GL H 891.21
VAN
122702
LBSNAA

श्री राष्ट्रीय प्रशासन अकादमी
Academy of Administration
मसूरी
MUSSOORIE
पुस्तकालय
LIBRARY 122702

अवाप्ति संख्या
Accession No. 14342
वर्ग संख्या GLSans 891.21
Class No.
पुस्तक संख्या वाणभ Van
Book No.

श्रीहर्षचरितम् ।

महाकवि-श्रीबाणभट्ट-विरचितम् ।

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण विरचितया,

तथा तदात्मजाभ्यां

पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-

विद्यारत्नाभ्यां परिवर्त्तितया परिवर्द्धितया च

टीकया समलङ्कृत्य प्रकाशितम् ।

द्वितीयसंस्करणम् ।

कलिकातामहानगर्य्याम्

वाचस्पत्यधन्ने

मुद्रितम् ।

१८१८ ।

सर्व्वे स्वत्वं संरक्षितम् । सत्वमुद्राङ्कनम् ।

प्रकाशक— { पण्डित-श्रीआशुबोध-विद्याभूषण
तथा
पण्डित-श्रीनित्यबोध-विद्यारत्न ।

प्राप्तिस्थान— { २न०, रमानाथ मजुमदार ष्ट्रीट्, ह्यारिसन-
रोड—पोष्ट अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्जी ।

२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।

संक्षिप्तश्रीहर्षचरितम् ।

प्रथम उच्छ्वासः ।

यत्प्रभावात् मतो विद्या माधूनां भासते हृदि ।
तां विश्ववन्द्यां परमां वाग्देवीं प्रणमाम्यहम् ॥
बाणभट्टकृतं गद्यं संक्षिप्य क्रियते मया ।
संक्षिप्तहर्षचरितं श्रीजीवानन्दशर्म्मणा ॥

पुरा किल भगवान् विश्वपतिः परमेष्ठी इन्द्रादिभिः देववृन्दैः महर्षिभिश्च सह संलपन् स्वं लोकम् अधितष्ठौ । तत्र महर्षिषु वेदान् पठत्सु कदाचित् अतिकोपनो मुनिः दुर्व्वासाः द्वितीयेन सहचरेण मन्दपालनाम्ना मुनिना सह विरोधम् आचरन् क्रोधात् विस्वरं साम जगौ । तत् आकर्ण्य शापभयात् अन्येषु दोषम् अकथयत्सु देवेषु मुनिषु च, अवधीरयति च अन्यासङ्गव्याजेन देवे पद्मसम्भवे, भगवतो कुमारौ तत्र चामरेण पितामहम् उपवीजयन्तौ वाग्देवी मृदुमन्दम् अहसत् । स च मुनिः तां तथा हसन्तीम् अवलोक्य "रे पापे ! दुर्व्वाससं माम् उपहससि ?" इत्युक्त्वा कमण्डलुजलेन उपस्पृश्य शप्तुं प्रचक्रमे । अत्रान्तरे तत्र स्थिता देवी सावित्री तर्जनीम् उत्क्षिप्य "आः पाप ! दुर्विनीत ! ब्राह्मणापसद ! सुरासुरवन्द्या देवीं सरस्वतीं शप्तुमिच्छसि ?" इत्यभिदधाना क्रोधात् स्वासनात् उदतिष्ठत् । ततो देवैः खशिष्यैश्च शतशः प्रसाद्यमानोऽपि, पित्रा अत्रिणा "पुत्र ! मा तपःक्षयं कुरु, स्खलितम् अस्या एकं क्षमस्व" इति निषिध्यमानोऽपि दुर्व्वासाः "दुःशीले ! मर्त्य-

भूमिं गच्छ" इति तां शशाप। ततश्च प्रतिशापोद्यतां सावित्रीं देवो वाग्देवी एव "सखि! संहर कोपं, स्वत एव द्विजन्मानो माननीयाः" इत्युक्त्वा न्यवारयत्।

अथ तां सरस्वतीम् अभिशप्ताम् आलोक्य विरिञ्चिः धीरेण स्वरेण उवाच,—"ऋषे! नायं सज्जनाचरितः पन्थाः येन प्रवृत्तोऽसि, क्षमा हि तपसो मूलं, क्रोधेन बुद्धिः विक्रियते, विकृतबुद्धयश्च अन्धा इव हिताहितं न पश्यन्ति, तस्मात् क्रोधम् अपहाय चरितव्यं विशेषतः तापसैः" इत्युक्त्वा अब्रवीत्,—"वत्से सरस्वति! मा विषाद, भवितव्यता अत्र बलवती, एषा त्वाम् अनुचरिष्यति सावित्री, विनोदयिष्यति च अस्माद्विरहिताम्। शापस्य अयं सुताऽऽननकमलाऽऽलोकनावसानः" इति। एवं सान्त्विता पितामहेन सा सह सावित्र्या विषण्णा गृहम् आजगाम।

अथ प्रदोषे सावित्री विषादसागरपतितां सवाष्पां सरस्वतीम् आह,—"सखि! त्वं हि त्रिलोकशिक्षादायिनी, तव पुरतः किमहं ब्रवीमि? विदितवृत्तान्ताऽसि दैवहतकस्य। यत् सत्यं दुःसहो बन्धुजनविरहः तापयतितराम्। तदत्र अप्रतिविधेये किं कर्तुम् अर्हसि? नात्र अनुशोचितव्यम्; कथय, इदानीं कतमं भूतलविभागमलङ्कर्तुम् इच्छसि अवस्थानेन? इतःप्रभृति एव देवदेवं स्वेष्टदातारं मनसा स्मर, अचिरेण एव कालेन गतशापा पुनः स्वधाम प्रतिपत्स्यसे" इति।

तथा अभिहिता सा प्रत्यब्रवीत्,—"सखि! त्वया सह वसन्त्या न मे स्वस्थानभ्रंशः मर्त्यलोकवासदुःखं वा अतिपीडाम् आवहति, केवलं पद्मयोनिचरणसेवनसुखं विगलयति मे चित्तम्; तत् त्वमेव मर्त्यभूमौ धर्मक्षेत्राणि पुण्यतीर्थानि जानासि, यदेव स्थानं तुभ्यं रोचते, तत्रैव वत्स्यामि" इत्युक्त्वा निमीलितनेत्रैव रजनीम् अगमयत्।

अथ अपरेद्युः उदिते भगवति सवितरि मुनिशापसमुद्विग्ना सावित्र्या सह महीतलम् अवततार। अवतीर्य च भूतले उपशोणं तत्तीरदेशस्य रामणीयकेन आकृष्टहृदया तत्रैव वासम् अरोचत; अवदत् च सावित्री,—"सखि! रोचते मे तटभूः अस्य महानदस्य, तटच्च एव स्थातुम् अभिलषति हृदयम्" इति। सावित्री च तथा अनुमोदमाना तस्य नदस्य पश्चिमे तीरे कस्मिंश्चित् शुचौ शिलातलमनार्थं लतामण्डपं सरस्वतीम् अवासयत्।

अथ कदाचित् तत्र स्थिता प्रतिदिवसम् इष्टदेवम् आराधयन्ती, प्रहरमात्रोदिते सवितरि उत्तरस्यां दिशि अश्वक्ष्वेडितम् आकर्ण्य लतामण्डपात् निर्गत्य, सहस्रमात्रेण पदातिसैनिकेन सह आगच्छत् अश्वसैनिकं, मध्ये च तस्य निरुपमं विधातुः सर्गमिव अष्टादशवर्षदेशीयं तरुणं, तत्पार्श्वे च स्थविरमेकम् असिचर्मधरं पुरुषम् अद्राक्षीत्। स च युवा अग्रयायिनां, तत् कन्यायुगलम् अवलोकयतां पदातीनां मुखात् श्रुत्वा तत् दिव्याकृति कन्यारत्नयुगलं सञ्जातकौतुकः स्वयं द्रष्टुकामः तूर्णजवेन वाजिना तत्प्रदेशम् आययौ; अवततार च तुरगात् तेन द्वितीयेन परिणतवयसा सह पुरुषेण। ततश्च तौ चरणाभ्यामेव सविनयं तत् लतामण्डपम् आगतौ सह सावित्र्या सरस्वत्या वनवासोचितेन आतिथ्येन यथार्हम् उपचरितौ। अथ क्षणमिव विश्रान्तं तं द्वितीयं प्रवयसं सावित्री ईषद्व्रीडितेव सविनयम् अवादीत्,—"आर्य! कुत आगम्यते? क्व वा गमिष्यते सैन्याभ्यां भवद्भ्याम्? अद्य आश्रमोऽयमागमनेन भवतोश्चरितार्थ इव संवृत्तः, न चेत् रहस्यं दोषो वा, तदाख्यातुम् अर्हति भवान्, कोऽयं महाभागः? त्रिभुवनरमणीयं रूपम् इदम् अवलोक्य मर्त्यभूमेः स्वर्गातिशायिताम् इव पश्यामि" इति।

इत्थम् अभिहितोऽसौ पुरुषः सप्रश्रयम् अवादीत्,—"देवि! साधवः स्वतः प्रियंवदा भवन्ति, तत्र अतिविस्मयाय इदं भवद्वचनामृतम्। शृणोतु भवती,—अयं हि भृगुकुलतिलकस्य भगवतः च्यवनस्य वह्निर्जीवितं दधीचो नाम कुमारः। माता च अस्य शर्य्यातस्य नृपतेः कन्या त्रिभुवनललामभूता सुकन्या नाम। स च राजर्षेः दौहित्रम् इमम् अतिप्रियम् अस्य पितुः अनुमत्या स्वगृह एव लालितवान्, अशिक्षयच्च सर्व्वाः विद्याः सकलाश्च कलाः। माञ्च अस्य नरपतेः आज्ञाकरं जानीहि विकुक्षिनामानम्।

अथ प्राप्ते सर्व्वविद्याऽधिगमे मातामहः शर्य्यातिः अस्य पितुः आश्रमम् एनं कृतविद्यं प्रदर्शयिष्यन् महितोयं सहाश्वबृन्दैः सपदातिभिश्च प्राहिणोत्। इतश्च न अतिदूरे उपशोणं तस्य भगवतः च्यवनस्य आश्रमपदं च्यावनं नाम काननम्। एष तावत् अस्मद्वृत्तान्तः। साम्प्रतं शुश्रूषवो वयम् आयुष्मत्योः वृत्तं, न इयमाकृतिः कदाचित् मानवी भवितुमर्हति; तत् आवेदयतु भवती, परं कौतुकम् अत्र नौ वर्त्तते" इति।

सा अब्रवीत्,—"भद्र! श्रोतव्यमावयोः वृत्तं कालेन। वहन् दिवसान् अत्र आवां स्थास्यावः। न च विस्मर्त्तव्योऽयम् अस्मत्परिचय आर्य्येण" इति। दधीचस्तु धीरमधुरम् अवादीत्,—"आर्ये! करिष्यति एव आर्य्या नौ प्रसादं, तिष्ठतु तावत् अधुना, तातमेव शीघ्रं द्रष्टुम् अभिलषति मे मनः, तत् उत्तिष्ठ, व्रजावः" इति।

अथ सरस्वती अश्वमारूढं प्रयान्तं तं युवानं प्रति अनिमिषनयना यावन्नास्तेति दृष्टिपथात्, तावद् व्यलोकयत्। क्रमेण च शोणम् उत्तीर्य्य दधीचः पितुः आश्रमम् अवाप; उवास च कियतो दिवसान् पित्राऽऽनन्दितः तस्मिन् कानने।

अथ सरस्वती तं युवानम् आलोक्य कुसुमशरशरविद्धा अभवत्। अथ अपरेद्युः च्यवनाश्रमात् तं देशमागत्य कृतासनपरिग्रहं दधीचमहचरं विकुक्षिं दृष्ट्वा प्रीत्या पप्रच्छ सावित्री,—"आर्य्य! कुशली तावत् कुमारः दधीचः?" इति। सोऽवदत्,—"देवि! कुशली कुमारः, स्मरति च आयुष्मत्योः अमीषु दिवसेषु। वृत्तान्तञ्च कुमारस्य समाख्यातुं मालती नाम काचित् किङ्करी अचिरेण एव आगमिष्यति युवयोः सकाशम्" इति। इत्युक्त्वा यथाऽभिलषितं प्रदेशम् अयासीत् विकुक्षिः। ततः परेद्युः एव मालती दधीचवार्त्तां समादाय तयोः आश्रमम् अभ्याययौ।

अथ क्षीणम् अवतीर्णायां सावित्र्यां स्नातुं, रहसि मालती सरस्वतीम् अवोचत्,—"देवि! विदितमेव भवत्याः माधुर्य्यं विषयस्य, लोलुपता च इन्द्रियाणाम्। किमुच्यते? लज्जेऽहं वक्तुं, तथाऽपि स्वामिनिदेशोऽपरिहरणीय इति विवक्षा मां बाधते। तत् आकर्णयतु भवती, यदा एव दृष्टाऽसि कुमारेण, तत एव आरभ्य आधयः किमिव तं न व्यथयन्ति? न अकार्य्यमस्ति कुसुमायुधस्य, किमधिकेन विज्ञापनेन, यदि न अनुकम्पसे, तदा अनिष्टमपि घोरम् आपतिष्यति कुमारस्य इति हृदयमाशङ्कते; तत् अधुना अनुरूपोऽयं देव्या वर इति मात्रम् आवेदयामि, इति श्रुत्वा देवी प्रमाणम्" इत्युक्त्वा व्यरंसीत्। सरस्वती तु अब्रवीत्,—"अयि मालति! किमत्र प्रतिवच्मि? नात्र बहु भाषितुम् अवसरोऽस्ति मे, तदिदानीं ते वचनकारो अयम् जनः अनुकम्प्यतां कुमारसमागमेन" इति। ततश्च मालती प्रीता दधीचम् आनेतुं च्यवनाश्रमम् अगात्। सावित्री च स्नातागता विदितवृत्तान्ता हृष्टा आसीत्।

अथ आगत्य दधीचः मालतीवचनानन्दितः तम् आश्रमं तया मनोरमया रमण्या सह सङ्गतः यथासुखम् अधिकं संवत्सरकालम्

एकं दिवसम् इव रममाणोऽतिवाहयाञ्चकार। दधार च गर्भं सरस्वती, असूत च सर्व्वलक्षणसम्पन्नं कुमारम्। ततश्च तस्मै सर्व्वं सरहस्याः वेदाः साङ्गोपाङ्गाः, सर्व्वाणि च अन्यानि शास्त्राणि, सर्व्वाश्च कलाः स्वयम् आविर्भविष्यन्ति इति वरं दत्त्वा सह सावित्र्या गतशापा ब्रह्मलोकं प्रत्याजगाम। तस्यां गतायां दधीचः तद्विरहकातरः स्वतनयस्य संवर्द्धनाय भार्गववंश-समुत्पन्नस्य भ्रातुः ब्राह्मणस्य पत्नीम् अक्षमालां नाम नियुज्य जातवैराग्यः तपश्चरणाय वनम् अगात्। यस्मिन् एव दिने सरस्वती प्रसूतवती, तस्मिन्नेव दिने अक्षमालाऽपि तनयमेकं प्रासोष्ट। सा तु अक्षमाला तौ अभिनवजातौ कुमारौ निर्व्विशेषं समपोष। तयोः एकः सारस्वतो नाम, द्वितीयो वत्सनामा आसीत्। द्वौ एव सोदरौ इव परस्परम् अकृत्रिमसद्भावौ तौ एकत्र ऊषतुः।

अथ गच्छता कालेन सारस्वतः मातृवरप्रभावेण यौवनारम्भ एव सर्व्वविद्यापारगः तस्मिन् समवयसि प्रियतमे भ्रातरि वत्से सर्व्वं वाङ्मयं सङ्क्रामयामास; स्थापयामास च तं कृतदारपरिग्रहं तत्रैव प्रदेशे प्रीतिकूटाभिधाने नगरे। स्वयन्तु नैष्ठिकब्रह्मचर्य्यपरः तपस्यतः पितुः अन्तिकम् अगमत्।

एतस्माच्च वत्सात् प्रादुरभवत् महत्तरो वंशः। तथा च, प्राक् तस्मात् एव वंशात् वात्स्यायना नाम गृहधर्म्मिणो मुनयः समजायन्त। क्रमेण कलौ सम्प्रवृत्ते अस्मिन्नेव विश्रुते कुले कुवेरो नाम कश्चित् द्विजः समुदभौ; तस्य चत्वारः सुता आसन् अच्युतः, ईशानः, हरः, पाशुपतश्च इति। तस्माच्च पाशुपतात् एक एव कुमारो जज्ञे अर्थपतिर्नाम। तस्य च एकादशसूनवः समभवन्,—भृगुः, हंसः, शुचिः, कविः, महीदत्तः, धर्म्मः, जातवेदाः, चित्रभानुः, त्रात्तः, अहिदत्तः, विश्वरूपश्चेति। चित्रभानुश्च तेषां राजदेव्याख्यायां पत्न्यां बाणं नाम सुतम् अजीजनत्। स तु

बाणः शैशव एव मातृहीनः चतुर्दशवर्षदेशीयश्च पित्रा व्ययुज्यत। ततश्च पितृशोकेन दग्धहृदयः, कथमपि कालेन विरलतां गते च शोके, चापलतया यौवनारम्भस्य सर्व्वदोषाकरतया च स्वातन्त्र्यस्य अनेकानि चापलानि आचरन् तुल्यशीलवयोभिः बहुभिः सुहृद्भिः सह देशान्तरदर्शनाकृष्टचेताः देशात् देशान्तरं गच्छन्, अलभत सतां निन्दनीयताम्। अथ शनैः शनैः राजकुलानि पश्यन्, विद्यालाभार्थं गुरुगृहाणि अधितिष्ठन्, सहृदयगोष्ठीश्च निषेवमाणः बुधमण्डलानि च उपचरन् भूयोऽपि स्वकुलोचितां वैदुषीं प्रकृतिं प्रापत्। एवञ्च सुबहोः कालात् ताम् एव जन्मभूमिं पुनरागात्।

दर

द्वितीय उच्छ्वासः।

एकदा निदाघेऽतीवोग्रे काले चन्द्रसेननामा कश्चिदस्य पारशवः भ्राता स्वगृहस्थितं तम् आगत्य अब्रवीत्,—"आर्य्य! द्वारि स्थितो दीर्घाध्वगो भवताम् अन्तिकं श्रीहर्षदेवस्य महाराजाधिराजस्य कृष्णाभिधानेन भ्रात्रा प्रेषितः कश्चित्" इति। बाणोऽवदत्,—"भ्रातः! अविलम्बेन एव प्रवेशयैनम्" इति। ततश्च प्रविशन्तं लेखहारकं दृष्ट्वा अभ्यभाषत,—"भद्र! कुशलमत्रभवतः कृष्णस्य मत्प्रियबन्धोः?" स तु "कुशलम्" इत्युक्त्वा "लेख एष स्वामिना प्रहितः" इत्यर्पयामास। बाणस्तु सादरं लेखमादाय स्वयमेव वाचयित्वा विदितलेखार्थः सन्देशमपृच्छत्। मेखलको नामासौ लेखहरः प्रत्यवादीत्,—"ब्रह्मन्! एवमाह अस्मत्स्वामी,—'यत् अदृष्टे त्वयि विना कारणं किमपि आशङ्कते मे स्निग्धं हृदयं, तद्भवता अकृतकालक्षेपेण एव राजकुलम् आगन्तव्यम्' इति"। अथ बाणः तं लेखहरं "विश्रामय" इति

भ्रातरं चन्द्रसेनम् आदिश्य कथमपि तदहः समुत्सुकः एव अत्यवाहयत्।

अथ अन्येद्युः प्रातः स्नात्वा कृतदेवार्चनः तस्मात् प्रीतिकूटात् निर्गत्य सद्य एव मल्लकूटाख्यं ग्राममासासाद। तत्र सुहृदा जगत्यतिनामधेयेन कृतातिथ्यः सुखोषितः परेद्युः यष्टिगृहकनामानं वनग्रामं गत्वा निशामयापयत्। ततोऽपरस्मिन् दिने राजभवनसन्निधौ विश्रान्तः मेखलकेन तेन सह अपराह्णसमये राजद्वारं प्राप। मेखलकस्तु "तिष्ठतु तावत् क्षणमात्रम् अत्र भवान्" इत्यभिधाय एक एव पुरमविशत्। क्षणेन च पुनः निर्गच्छता तेन सह समागतः पारियात्राख्यः प्रतीहारः मधुरवाचा सविनयम् अभ्यभाषत,—"ब्रह्मन्! आगच्छतु, प्रविशतु च अभ्यन्तरं भवान्, दर्शनाय कृतप्रतीक्षो देवः प्रसादेन" इति।

बाणस्तु "कृतार्थोऽस्मि" इत्यभिधाय पुरं प्रविशन् प्रथममेव दर्पशातनामानं गजेन्द्रम् आलोक्य विस्मयाक्रान्तचेताः क्षणं तदवलोकनकौतुकी समतिष्ठत। ततश्च "पुनरपि समये एनं द्रक्ष्यसि, साम्प्रतं प्रतीक्ष्यमाणं देवं तावत् पश्य" इत्यभिधीयमानो दौवारिकेण, समतिक्रम्य कक्ष्यान्तराणि त्रीणि, चतुर्थे आस्थानमण्डपस्य पुरतः चत्वरे राजभिः परिवृतम्, अमात्यैश्च समुपास्यमानं, दर्शनोद्यतम्, राजाधिराजं हर्षदेवं पश्यन् समुपेत्य कृताशीर्वादः स्वस्तिशब्दम् अकरोत्। राजा तु तं दृष्ट्वा गम्भीरेण स्वरेण "किम् अयं स बाणः?" इति अभ्यधात्। दौवारिकेण तु "देव! स एव अयम्" इति निवेदितः "न तावदेनम् अकृतस्वशुद्धिं पश्यामि" इति चक्षुषो प्रत्यावर्त्तयन्, पृष्ठतो निषण्णस्य भ्रातृप्रियस्य मालवेन्द्रसूनोः अवदत्,—"महान् अयं विटः" इति। एतत् आकर्ण्य सर्वस्मिन् एव राजलोके निःशब्दे मुक्तत्वम् इव तूष्णीं स्थितो बाणः समभ्यधात्,—"देव!

अविदिततत्त्व इव अज्ञातलोकवृत्त इव कथमेवम् आज्ञापयसि ? संसारेऽस्मिन् विचित्रमेव लोकानां चरितं, स्वभावश्च। तत् अत्र साधुभिः यथार्थदर्शिभिः एव भाव्यम्। विचारे यदि अहं दोषो इति प्रमीयते, तदा एव माम् अधिक्षेप्तुमर्हति महाभागः। न तु अकारणं मां अन्यथा सम्भावयतु देवः। ब्राह्मणोऽस्मि, महति वात्स्यायने कुले जातः। मया साङ्गा वेदाः सम्यक् पठिताः, अन्यानि शास्त्राणि यथाशक्ति समालोचितानि। तत्कथं मम विटत्वम् अवधार्यते देवेन ? सर्व्वथा समयेन मां यादृशं यथाऽर्हञ्च ज्ञास्यति महाराजः स्वयमेव" इति। अथ नरपतिः "एवम् अस्माभिः श्रुतम्" इति अभिदधानः समुचितसमादरादिना वर्हिने एनम् अभ्यनन्दत्, केवलं सस्नेहेन दृष्टिपातेन एव प्रीतिं प्रकटयन् विसर्ज्जितराजलोकोऽभ्यन्तरमेव प्राविक्षत्।

अनन्तरं भूपतेः तादृशेन आचरणेन व्यथितो बाणः तस्माद् राजभवनात् निर्गत्य तावत् बान्धवानां भवनेषु विमना एव अतिष्ठत्, यावत् अस्य कृतप्रसादो महीपतिः एनम् अभिनन्दन् स्वयं न आह्वयत्। अथ कालेन नरेन्द्रेण तथा अस्य प्रमादः कृतः, यथा असौ राजभवने स्थितो देवस्य हर्षवर्द्धनस्य परमप्रेमास्पदम् अतीव विश्रम्भभाजनं मित्रत्वम् आसाद्य परं सुखमन्वभवत्।

तृतीय उच्छ्वासः।

अथ एकदा शरदारम्भे बाणो हर्षमकाशाद् बन्धून् द्रष्टुं तमेव ब्राह्मणनिवासम् आजगाम। तत्रागत्य सुदृष्टिः नाम पुस्तकवाचकः श्रोतृचित्तं समाकर्षन् पुराणम् अपठत्। तदा-

नोच्च नातिदूरवर्त्ती बन्दी सूचीबाणः तारमधुरेण स्वरेण इदम् आर्य्यायुगलं पठितवान्,—

"तदपि मुनिगीतमतिपृथु तदपि जगद्व्यापि पावनं तदपि ।
हर्षचरितादभिन्नं प्रतिभाति हि मे पुराणमिदम् ॥ १ ॥
वंशानुगमविवादि स्फुटकरणं भरतमार्गभजनगुरु ।
श्रीकण्ठविनिर्यातं गीतमिदं हर्षराज्यमिव" ॥ २ ॥

एतत् आकर्ण्य बाणस्य चत्वारः पितृव्यपुत्राः परस्परं मुखम् अवलोकयामासुः । तेषु सर्व्वकनीयांश्च श्यामलो नाम प्रियतरः सप्रणयम् अवादीत्,—"भ्रातः ! यदि एवं, तदा भवता वर्ण्यमानस्य अस्य पवित्रकीर्त्तेः चक्रवर्त्तिनो हर्षदेवस्य पूर्व्ववंशानुक्रमसहितम् आमूलात् चरितस्य श्रवणे सकौतुका वयम् ; तच्च द्वितीयं महाभारतमिव कस्य कीर्त्यमानं न आवहति प्रीतिम् ? तदाख्यातु भवान्" इति । तदाकर्ण्य विहस्य बाणोऽब्रवीत्,—"आर्य्य ! न युक्तम् उक्तं भवता ; यतः को हि पुरुषायुषशतेनापि समग्रम् अस्य चरितम् आख्यातुं शक्नुयात् ? कियति अपि वर्णिते यदि वः कौतुकं, तत् कथयामि ; अद्य प्रायेण अतिक्रान्तो दिवसः, तत् परेद्युः आरप्स्यते वर्णयितुम्" इति । ते च सर्व्वे भ्रातरः तथा एव अन्वमोदन्त ।

अथ परस्मिन् अह्नि सर्व्वे बाणस्य ज्ञातयः सुहृदश्च सकौतुकाः समागमन् । स चापि बाणः तेषां पुरतः हर्षचरितम् आख्यातुम् उपचक्रमे ।—

"अस्ति श्रीकण्ठो नाम पुण्यवतां निवासोऽपरो वासववास इव वसुधाङ्कितः कश्चित् जनपदः ; वर्त्तते च तत्र स्थाण्वीश्वराख्यो नगरविशेषः । तत्र पुष्यभूतिः नाम राजाधिराजः प्रादुरासीत् । तस्य भगवति भूतभावने भवे सहजा भक्तिः आसीत् । एकदा असौ परमशैवो भूपतिः लोकमुखात् भैरवाचार्य्येनामानम् एकं

महापाशुपतं स्वजनपदमागतम् अश्रौषीत्। श्रुत्वा एव तन्नाम तस्मिन् महती भक्तिः बभूव अस्य भूपतेः।

कदाचित् परिणते वासरे प्रतीहारो राजानमेत्य व्यज्ञापयत्,—'देव! द्वारि स्थितः परिव्राट् भैरवाचार्य्यादेशात् अनुप्राप्तो देवं द्रष्टुम् इच्छति'। तदाकर्ण्य राजा अभ्यधात्,—'अविलम्ब प्रवेश्यताम् एषः' इति। ततश्च प्रविष्टं तम् अपृच्छत् नरपतिः,—'क्व भैरवाचार्य्यः?' इति। प्रीतमनाः परिव्राट् उपनगरं सरस्वतीतटैकदेशे वनान्तर्वर्त्तिनि शून्याऽऽयतने स्थितं तमाख्यातवान्। पुनश्च अकथयत्,—'देव! स भगवान् तत्र स्थितो महाभागम् अद्धयात आशीर्वचसा' इत्युक्त्वा प्रादात् योगकरण्डात् आकृष्य पञ्च राजतानि रत्नोज्ज्वलानि कमलानि भैरवाचार्य्यप्रहितानि।

राजा तु सादरं तानि आदाय अब्रवीत्,—'योगिन्! मनोरथदुर्लभफलप्रसविनी शिवभक्तिः इयम् अस्माकं, यया एवम् अस्मासु प्रसीदति भगवान् भैरवाचार्य्यः। तत् परेद्यवि भगवन्तं साक्षात्करिष्यामि' इत्युक्त्वा तं परिव्राजं विससर्ज।

अथ अन्येद्युः प्रातरुत्थाय अश्वारूढः कतिपयैः एव राजपुत्रैः अनुसृतः भैरवाचार्य्यसकाशं प्रायात्। गत्वा च तम् आश्रमं तत्र स्थितं शिष्यमेकं तदीयं दृष्ट्वा अपृच्छत्,—'क्व इदानीं भगवान् भैरवाचार्य्यः?' इति। सोऽब्रवीत्,—'महाभाग! एतस्य जीर्णमाहगृहस्य उत्तरेण विल्ववाटिकाम् अधितिष्ठति' इति। तथोक्तश्च असौ नरपतिः गत्वा ताम् एव विल्ववाटिकाम् अविशत्, अपश्यच्च तत्र प्रातः स्नातं, हुतहुताशनं, व्याघ्राजिनमधितिष्ठन्तं, कार्पटिकगणैः परिवृतं प्रमथगणवृतं भगवन्तं विरूपाक्षमिव भैरवाचार्य्यम्। स आचार्य्यः दृष्ट्वैव तं राजानं प्रत्युज्जगाम, समवर्द्धयच्च स्वस्तिगिरा गम्भीरया। राजा तु दूरतः

कृतप्रणामोऽब्रवीत्,—'भगवन्! मनोरथशिष्योऽयं जनो भवतां समागतः' इति। तदाकर्ण्य भैरवाचार्यः परमप्रीतः आसनदानेन तम् अभ्यर्च्य स्वयं व्याघ्राजिन एव निषसाद। राजा तु तस्मिन्नेव दिने नानाविधाभिः कथाभिः चिरं स्थित्वा तेनानुमतः पुनः राजधानीं प्रत्याजगाम।

अन्येद्युश्च भैरवाचार्योऽपि राजानं द्रष्टुं तदीयं राजभवनमगात्। आगताय च तस्मै राजा परमया भक्त्या सर्व्वं सपरिजनं सकोषं सान्तःपुरम् आत्मानं न्यवेदयत्। योगी विहस्य अवदीत्,—'राजन्! क्व वयं वनवासिनः फलमूलाशनाः निःस्पृहाः? क्व वा भोगविभवाः? विभवमदो हि नाशयति मनस्विताम्; तद्भवादृशा एव एतान् भोक्तुमलं, न वयम्' इति उक्त्वा कियन्तं कालं विविधाभिः वाग्भिः राजानम् अभिनन्द्य स्वम् एव आश्रयं प्रत्यागमत्।

एवञ्च असौ परिव्राट् अन्यानि तादृशानि पञ्च पञ्च कमलानि अन्तरा अन्तरा राज्ञ उपायनानि प्राहिणोत्। एकदा स श्वेतकर्पटाहृतं किमपि आदाय राजभवनम् आगत्य राजानम् अब्रवीत्,—"महाभाग! भगवान् भैरवाचार्यः भवन्तमेवम् आह यत्,—'मम एकेन शिष्येण पातालस्वामिना कस्यचित् ब्रह्मराक्षसस्य हस्तात् महाऽसिः अट्टहासो नाम अधिगतः, सोऽयं भवद्भुजमेव अलङ्कर्त्तुमलं' गृह्यताम्" इत्युक्त्वा तस्मात् श्वेतकर्पटात् अपकृष्य कृपाणं प्रादात्। नृपतिस्तु आयुधप्रियतया तत् आदाय पश्यन् परमां प्रीतिम् अवाप, अवोचत् च समयोचितं सविनयं किञ्चित्। स च परिव्राट् सपरितोषं 'स्वस्ति भवते' इत्यभिधाय स्वमेव आश्रमम् अयासीत्।

अथ गच्छत्सु कालेषु कदाचित् भैरवाचार्यः स्वयमागत्य रहसि राजानम् अवदत्,—"तात! कमपि महामन्त्रं सेवितवान्

अस्मि महाश्मशाने कोटिजपेन ; तस्य सिद्धिस्तु वेतालसाधनावसाना ; सा च असहायेन न कदाचित् लभ्यते। त्वमेव अलमस्य साहायकत्वे। त्वयि च अङ्गीकृतभारग्रहणे अपरे च त्रयः सहायाः सम्भविष्यन्ति ; एकः स खलु पातालस्वामी, अपरः स एव परिव्राट् टोट्टिभनामा अस्मच्छैशवसुहृत्, अन्यश्च कर्णतालो नाम शिष्यः'। अथ 'तथा' इति स्वीकृतवर्चसि भूपतौ भैरवाचार्यः प्रहृष्टः चकार सङ्केतम्,—'आगामिन्यां कृष्णचतुर्दश्याम् अर्द्धरात्रे महाश्मशानेऽस्मिन् शून्याऽऽयतने शस्त्रधारिणा भवता साक्षात्करणाय वयम्' इति।

अथ तस्यां कृष्णचतुर्दश्याम् आगतायां निशीथे नरपतिः शस्त्रमात्रसहायः तमेव उद्देशमगच्छत्। ते च त्रयः पातालस्वामिप्रभृतयः तं प्रत्युद्गमन् विकटवेशाः। तमसाऽऽच्छन्नतया तत्प्रदेशस्य अदृष्टशरीरत्वात् तेषां राजा 'कः कोऽत्र भोः!' इति तान् अपृच्छत्, अब्रुवंश्च ते त्रयः स्वं स्वं नाम इति। अथ नृपतिः तैः अनुगम्यमानः तामेव साधनभूमिम् अगच्छत्। तत्र गत्वा च महतो मण्डलस्य मध्ये किमपि जपन्तम् आचार्यम् अपश्यत्, प्रणमच्च। ततश्च पूर्वसङ्केतानुसारेण पातालस्वामी प्राचीं दिशं, कर्णतालः कौबेरीं, परिव्राट् पश्चिमां, राजा दक्षिणाम् आश्रित्य तस्थौ।

एवमवस्थितेषु तेषु, विस्रब्धम् आचरति च स्वं कर्म भैरवाचार्ये, निवृत्तेषु च जनितकर्णज्वरेषु अतिचिरं कृतकलकलेषु विफलप्रयासेषु विघ्नकारिषु यातुधानेषु, समतिक्रामति च निशीथसमये, मण्डलस्य उत्तरेण भूः अदीर्यत ; उज्जगाम च सहसा तस्माद् विदीर्णात् भुवो भागात् कश्चित् कुवलयश्यामः पुरुषः ; उच्चैः जगाद च विहस्य,—'भोः! किमयं विद्याऽवलेपः सहायमदो वा!!—यत् मह्यम् अविधाय बलिं जाल्म इव

स्वामिद्रिम् अभिवाञ्छसि ? दुर्मतिरियम् ; एतत्क्षेत्राधिपतिरहं शेषकण्ठो नाम नागाधिपतिः। प्रतिकूलवर्त्तिनि मयि का शक्तिः गरुडस्यापि गगनमार्गं मन्थरितुम् ? अनुभूयताम् अस्य दुर्नयस्य फलमिदानीं महाग्रयवतोऽपि' इत्यभिधाय प्रकोष्ठप्रहारैः त्रीनपि तान् पातालस्वामिप्रभृतीन् अभिचर्म्मवतोऽपि न्यपातयत्। नरपतिस्तु मावहेलमब्रवीत्,—'रे काकोदराधम ! काक ! जीवति मयि राजहंसे बलिमादातुं न जिह्रेषि ? परुषभाषितैः का श्लाघा ? भुजै एव वीर्य्यं वसति, न वचने। गृहाण शस्त्रं, यदि एवं प्रीतपत्तिस्ते' इति। नागस्तु अनादृत्य तद्वचनम्—'आगच्छ, किं शस्त्रेण ?—भुजाभ्याम् एव घातयामि ते दर्पम्' एवमभिदधानः समास्फोटयामास। राजा तु तथाऽधिक्षिप्तः परिकरं बध्नन् युद्धार्थमुद्यतस्तम् आक्रम्य केशेषु जग्राह, पातयामास च तत्क्षणमेव भूतले तं पापं नागम्। अथ आक्रुष्य तम् अदृहासं शिरश्छेत्तुम् उपक्रममाणः सोपवीतं तदङ्गं पश्यन् अब्रवीत्,—'पाप ! दुर्विनीत ! पश्यामि ते दुर्नयनिर्वाहबीजमिदं, यतो निःशङ्कमवाचरसि अविनयम् ; ब्रह्मबधाऽकर्त्तव्य एव' इति वदन् तं सुदूरतः समुत्ससर्ज।

अनन्तरञ्च सहसा एव ददर्श महान्तमालोकम्, अजिघ्रच्च घ्राणतर्पणमतिसौरभम् आमोदं, शुश्राव च नूपुरनिस्वनम्। नूपुरशब्दानुसारेण च व्यापारितचक्षुः अभिमुखम् आपतन्तीं कामपि कामिनीं दृष्ट्वा राजा असम्भ्रान्त एव अप्राक्षीत्,—'भद्रे ! कासि ? किमर्थं कुतो वा दृष्टिपथम् आगता ?' इति।

अथ सा अब्रवीत्,—'महाभाग ! जानीहि मां भगवतो विष्णोर्वक्षःस्थलविहारिणीं लक्ष्मीम्। अपहृताऽस्मि ते निरुपमेन अनेन साहसेन दुर्ज्जयनागनिपातिना ; वृणीष्व इदानीं स्वाभिलषितं वरम्' इति। परोपकारपरायणस्तु राजा

तां प्रणम्य स्वार्थनिःस्पृह एव आचार्यस्य सिद्धिमेव अयाचत। मा तु लक्ष्मीः 'तथा अस्तु' इत्यभिधाय पुनरब्रवीत्,—'राजन्! अनेन तव सत्त्वोत्कर्षेण, असाधारणया च शिवभक्त्या, स्वार्थनिःस्पृहतया च भृशं प्रीताऽस्मि; ददामि ते अपरम् अभीष्टम्;—भविष्यति भवान् महतो राजवंशस्य कर्त्ता; यस्मिन् उत्पत्स्यते महाराजाधिराज आदिराजः पृथुः इव हर्षो नाम,—सेविष्यते हि यं मदीयमिदं करकमलं कमलमपहाय गृहीतचामरम्' इत्युक्त्वा तिरोबभूवे।

अथ राजा तत्प्रसादेन नितरां प्रीतिमवाप हृदयेन। भैरवाचार्योऽपि राजप्रसादात् विद्याधरत्वमधिगतः प्राब्रवीत्,—'नरनाथ! प्रीतोऽस्मि ते महत्त्वतया परोपकारितया च; स्वप्नेऽपि असम्भावितां कोऽन्यो भवन्तमपहाय गुरवे ईदृशीं दक्षिणां दातुमलम्!! तदिच्छामि केनचित् कार्योपयोगेन आत्मानम् अनृणीकर्त्तुं भवतः' इति। राजनि तु,—'भवत्सन्दर्शनेनैव कृतकृत्योऽस्मि, नान्यत् किमपि कामये; साधयतु यथाममोहितं स्थानम् आचार्यः' इत्यभिहितवति, आचार्यः स्वाभीष्टं विद्याधरक्षेत्रं जिगमिषुः समालिङ्ग्य तान् शिष्यान् पातालस्वामिप्रभृतीन्,—'तात! साधयामि इति न स्नेहानुरूपं वचनं, स्मर्त्तव्योऽयं स्वार्थपरो जनः सर्व्वथा कथाऽन्तरेषु' इत्यादिकं तत्कालोचितं राजानं व्याहरन् उत्पपात गगनतलं, प्राप च सिद्धिलब्धं स्थानम्। श्रीकण्ठोऽपि नागराजः,—'राजन्! पराक्रमक्रीतोऽयं जनः स्मर्त्तव्यः' इत्यभिदधान एव भुवो विवरं प्राविशत्।

क्षितिपतिस्तु अवसितायां रजन्यां त्रीनपि तान् पातालस्वामिप्रभृतीन् सहायीकृत्य वनवापीसलिले अङ्गानि प्रक्षाल्य स्वं नगरं प्रत्यागमत्। कियता कालेन तेषु त्रिषु परिव्राट्/

वनमाश्रयत्। पातालस्वामिकर्णतालौ तु श्रीर्थ्यरसानुरागिणौ तमेव राजानम् आश्रित्य तस्थतुः।

चतुर्थ उच्छ्वासः।

अथ असौ पुष्यभूतिः शूर इव हरिवंशं महान्तं राजवंशम् अजीजनत्। तस्माच्च राजवंशात् क्रमेण बहवो राजानः समजायन्त। तेषु च तथाविधेषु धरणिं पालयत्सु उदभूत् प्रभाकरवर्द्धनो नाम भूपतिः; यशोवती नाम तस्य राजर्षेः महादेवी, पार्व्वती इव भगवतः शङ्करस्य परमप्रेयसी आसीत्। असौ च नरपतिः प्रकृत्यैव सूर्य्यभक्तः अन्वहम् राजपत् मन्त्रम् आदित्यहृदयम् अपत्यकामः त्रिकालम्। कदाचित् स ग्रीष्मरजन्यां यदृच्छया यशोवत्या सह प्रियया हर्म्यपृष्ठे सुष्वाप। गतभूयिष्ठायाञ्च निशायां राजमहिषी यशोवती सहसा एव 'परित्रायस्व परित्रायस्व आर्य्यपुत्र!' इति व्याहरन्ती, भूषणरवेण आक्रन्दयन्ती इव परिजनं वेपमानाङ्गयष्टिः उदस्थात्। तेन रवेण सहसा प्रबुद्धो राजा 'देवि! न भेतव्यं न भेतव्यं, किमेतत्?' इति आलपन् सहसा उदतिष्ठत्; चतुर्दिक्षु दत्तदृष्टिश्च यदा न किमपि दृष्टवान्, तदा तां भयकारणम् अपृच्छत्।

क्षणेन च साध्वसे प्रशान्ते सा देवी प्राब्रवीत्,—"आर्य्यपुत्र! दृष्टवत्यस्मि स्वप्ने—'भगवतः सवितुर्मण्डलात् निर्गत्य द्वौ कुमारौ ज्योतिर्मयौ बालातपेन पूरयन्तौ दिगन्तराणि, अहर्पतिना जगतो-जनेन अभिवन्द्यमानौ, कन्यया एकया च चन्द्रकलया इव अनुगम्यमानौ, भुवं गतौ विलपन्त्या मे शरीरं उदरं विदार्य्य प्रविशन्तौ' एवम् आलोक्यैव भीता प्रबुद्धाऽस्मि आर्य्यपुत्रम् आक्रोशन्ती कम्पमाना" इति। तत् आकर्ण्य राजा ताम्

अवादीत्,—'प्रिये! हर्षं विषादम् अनुभवासि, पूर्णमनोरथौ आवाम्; प्रसन्नोऽस्माकं रविः भगवान्, अचिरेण एव अपत्यरत्नत्रयप्रदानेन प्रीणयिष्यति देवीम्' इति।

अथ गच्छता कालेन देवी यशोवती राज्यवर्द्धनं नाम प्रथमं तनयम् असूत। ततश्च समतिक्रान्ते कस्मिंश्चित् काललवे, देवक्या इव भगवान् चक्रपाणिः, यशोवत्याः हृदये गर्भे च समसमेव प्रादुरासीत् हर्षः। सम्प्राप्ते च ज्येष्ठामूलीये मासि, बहुलासु, बहुलपक्षद्वादश्यां व्यतिक्रान्तायां प्रदोषवेलायां साम्राज्यलक्षणाक्रान्तमूर्त्तिः देवी हर्षः समजायत। अत्रान्तरे मौहूर्त्तिकः तारको नाम राज्ञः परमसम्मतः समागत्य 'माध्याता किल एवंविधे व्यतीपातादिदोषविरहिते वासरे, सर्व्वेषु उच्चस्थानावस्थितेषु च ग्रहगणेषु, ईदृशि एव लग्ने प्रादुरासीत्; ततोऽनन्तरं पुनः ईदृशि लग्ने चक्रवर्त्तिजनने नान्यः कोऽपि समजायत। सप्तचक्रवर्त्तिनृपाणां धुरीणः, महारत्नानां चक्रवर्त्तिलक्षणानाञ्च भाजनं, सप्तसागराधिपतिः सुतोऽयं देवस्य जातः' इति राजानं व्यज्ञापयत्। अथ गच्छति च काले धात्र्याः कराङ्गुलिम् अवलम्ब्य पञ्चषाणि पदानि प्रक्षिपति हर्षे, षष्ठञ्च हायनम् अनुप्रविशति राज्यवर्द्धने देवे, सा यशोवती गौरीमिव हिमाद्रिजाया प्रासोष्ट राज्यश्रियं नाम कन्यकाम्।

अत्रान्तरे च यशोवत्या भ्राता पुत्रं भण्डिनामानम् अष्टवर्षवयसं मनोभवमिव पुनरुत्पन्नं परमसुन्दरम् अनुचरं कुमारयोः समर्पयामास। राजा तु तस्मिन् पुत्रयोः इव समदृष्टिरासीत्। राजपुत्रौ तेन मधुमाधवौ इव मलयमारुतेन परां शोभां प्रापतुः। क्रमेण च यौवनपदवीमारुरुहतुः तौ पित्रोः आनन्देन समं वर्द्धमानौ।

कदाचित् अन्तःपुरवर्त्ती राजा सस्नेहनिर्भरम् अभाषत,—

'वत्सौ! दुर्लभाः सङ्गत्याः, तदेव तावत् प्रथमं राज्याङ्गम्; धूर्ता हि क्रीड़ारसप्रसङ्गेन पार्थिवं रञ्जयन्तः जनयन्ति स्वप्ना इव मिथ्यादर्शनेषु सङ्कल्पं, भ्रंशयन्ति च क्रमेण बहुविधाभिः उपाधिभिः स्वपदात्। तत् एतौ सर्वैः एव दोषाभिषङ्गैः अनाघ्रातौ, बहुधा अस्माभिः विप्रलम्भेन परीक्षितौ, विशुद्धप्रकृतौ, विनीतौ, विक्रमशालिनौ, अभिरूपौ च बालवेन्द्रतनयौ भुजौ इव मे शरीरादभिन्नौ कुमारगुप्तमाधवगुप्ताभिधानौ अस्माभिः भवतोः अनुचरौ निर्दिष्टौ। अनयोः उभयोरपि भवद्भ्यां सोदरदृष्टिभ्यां वर्त्तितव्यम्' इत्युक्त्वा तयोः आह्वानाय दौवारिकम् आदिदेश।

अचिरेणैव तौ तेन प्रतीहारेण सममागतौ प्रविश्य अभ्यन्तरं राजानं यथाविनयं प्रणेमतुः, उपविविशतुश्च नरपतिनिर्दिष्टे अनुरूपे आसने। भूपतिः तौ आदिदेश तथास्थितौ,—'वत्सौ! अद्य प्रभृति भवद्भ्यां कुमारयोः अनुचराभ्यां भवितव्यम्' इति। तौ च 'यथा आज्ञापयति देवः' इत्युक्त्वा कुमारौ राज्यवर्द्धनहर्षौ सविनयं प्रणम्य ततः प्रभृति नक्तांन्दिवं तौ अनुचरन्तौ तस्थतुः।

अथ राज्यश्रीः अपि राज्यश्रीः इव क्रमेण अवर्द्धत। अल्पैः एव दिवसैः तरुणीभूतां तां राजानः दूतसम्प्रेषणादिभिः अयाचन्त। एकदा राजा कैनापि पठ्यमानाम् आर्यामिमाम् अशृणोत्,—

'उद्वेगमहाऽऽवर्त्तं पातयति पयोधरोन्नमनकाले।
सरिदिव तटमनुवर्षं विवर्द्धमाना सुता पितरम्॥' इति।

एताञ्च आकर्ण्य रहसि रात्रौ यशोवतीं प्राह राजा,—'देवि! यौवनसीमाम् अनुप्राप्ता ते दुहिता। तुल्यादामपि अपत्यतायां दुहितुः जननं हि तप्यन्ते गृहिणः। अपत्यविरहं दुःसहमपि

सहमानाः कथञ्चित् प्राणाधिकामपि दुहितरं पात्रमात् कृत्वा सुखिनो भवन्ति सन्तः। सकलभुवनवन्द्यो हि मौखरो वंशः, तस्मात् उत्पन्नः अवन्तिवर्म्मसुतो ग्रहवर्म्मा एनाम् अस्मत्सुतां कामयते; यदि भवत्या अनुमोदितमेतत्, तदा अस्मै एव सुतां राज्यश्रियं समर्पयामि' इति। देवी प्राह,—'आर्य्यपुत्र! धात्रीनिर्व्विशेषा हि भवन्ति जनन्यः कन्यापुत्राणां प्रतिपालनमात्रक्षमाः, दाने तु प्रमाणं पितरः। तदेतदेव ब्रवीमि,—यथा यावज्जीवमावयोः व्यथां न जनयति, सत्पात्रम् आसाद्य सुखेन कालं नेष्यति च दुहिता, तथा आर्य्यपुत्र एवं अवधारयतु' इति।

अथ नरपतिः ग्रहवर्म्मणे दातुं कृतनिश्चयः, शुभे दिवसे शुभे च लग्ने ग्रहवर्म्माणम् आहूय सुतां राज्यश्रियं समप्रदात्। जामाता च तां परमसुन्दरीं भार्य्याम् अधिगम्य, तत्रैव महत्यां श्वशुरकुले कियन्ति दिनानि स्थित्वा, कथमपि श्वश्रूा श्वशुरेण च यातुकादिभिः सत्कृत्य विसर्ज्जितः तां राज्यश्रियम् आदाय स्वराज्यमयासीत्।

पञ्चम उच्छ्वासः।

एकदा राजा राज्यवर्द्धनं युवराजं कृत्वा हूणान् जेतुम् उत्तरापथं प्रजिघाय। देवोऽपि हर्षवर्द्धनः तं सौभ्रात्रेण कियन्तम् अध्वानं तुरङ्गाऽऽरूढोऽनुससार। अथ प्रविष्टे भ्रातरि कैलासप्रभोर्द्वारमनीमाणां, बहिरेव कियन्तं कालं मृगयाव्यपदेशेन व्यलम्बत। एकदा तु रजन्यां परिणतायामेव स्वप्ने दुरन्तेन दावानलेन दह्यमानं केशरिणम् अद्राक्षीत्। तस्मिन् एव च दहने समुत्सृज्य सुतस्नेहं, भाविनः पतिविरहस्य दुर्वि-

षहतां चिन्तयन्तीं केशरिणीम् आत्मानं पातयन्तीम् अद्राक्षीत्। आसीच्च अस्य चेतसि,—'संसारेऽस्मिन् लोहेभ्योऽपि कठिनतराः प्रणयपाशाः, यच्चिबद्धाः समाचरन्ति तिर्यञ्चोऽपि एवमेवम्'। अथ प्रबुद्धस्य 'किमेतत्' इति भावयतः पस्पन्दे मुहुर्मुहुः दक्षिणेतरं चक्षुः। चलितमिव अभूत् हृदयम्। इत्थं विषण्ण एव शून्येन चेतसा प्रभाते मृगयां विजहार, मध्याह्ने च वेत्रपट्टिकाशयनम् अधिशयानः साशङ्क एव अतिष्ठत्।

अत्रान्तरे कश्चिल्लेखहरः कुरङ्गकनामा दीर्घाध्वगः समुपेत्य कृतप्रणामः शुष्केण एव मुखेन स्वान्तर्दुःखम् उद्गिरन् लेखम् उपानयत्। तच्च आदाय देवो हर्षः स्वयमेव अवाचयत्। विदितलेखार्थश्च 'किं मान्यं तातस्य?' इति तम् अप्राक्षीत्। स च 'महान् दाहज्वरः' इति प्रत्यवाच। श्रुत्वा एव एतत् निदारुणं वचः समुत्पन्नवेपथुः पितुरारोग्यकामः विप्रेभ्यः अमितसुवर्णरत्नादिकं दत्त्वा, तस्मिन् एव दिने अकृताहार एव प्रयाणशङ्खमादिशन् एकाकी एव अश्वमारुह्य नगराय गन्तुम् उपचक्रमे। सहचराश्च राजलोकाः ससैनिकाः तम् अनुवव्रजुः। पथि गच्छंश्च मङ्गलैः दुर्निमित्तशतैः अनाभनन्यमानगमनः साशङ्क एव नक्तान्दिवं चलन्, अन्येद्युः मध्याह्नसमये स्कन्धावारम् आससाद; प्रविशंश्च तत्र यमपट्टिकेन केनचित् गीयमानं श्लोकमिमं शुश्राव,—

'मातापितृसहस्राणि पुत्रदारशतानि च।
युगे युगे व्यतीतानि कस्य ते कस्य वा भवान्?॥' इति।

अथ क्रमेण राजद्वारम् आगत्य अन्तःपुरात् बहिरागच्छन्तं सुषेणनामानं वैद्यकुमारं वैद्यकशास्त्रपारगं पितुः प्रियम् अपृच्छत्,—'सुषेण! अपि तातस्य कश्चिद् विशेषः?' इति। सोऽवदत्,—'कुमार! नास्ति, इदानीं यदि कुमारं द्रष्टा भवेत्'

इति। अथ प्रविष्टोऽभ्यन्तरं मात्रा यशोवत्या 'आर्य्यपुत्र! स्वपिषि किञ्चित्?' इति व्याहरन्त्या सविषादं सर्व्वाङ्गेषु संवाह्यमानं, प्रबलदाहज्वरेण विकृतिमापद्यमानं पितरम् अवलोकयामास। राजा तु दूरादेव पुत्रं कनीयांसमागतं दयिततमम् आलोक्य, तदवस्थोऽपि 'एहि एहि वत्स!' इति प्रसार्य्य बाहू शरीरार्द्धेन शयनात् उदतिष्ठत्; अस्पृशच्च पुनरेनं कम्पमानेन करतलेन सर्व्वाङ्गेषु, अब्रवीच्च कृच्छ्रात् इव क्षयक्षामकण्ठः,—'वत्स! क्लेशोऽसि' इति।

भण्डिस्तु अब्रवीत्,—'देव! अद्य तृतीयं दिनम् अस्य कृताहारस्य' इति। तदाकर्ण्य वाष्परुद्धकण्ठः कथञ्चथमपि दीर्घं निश्वसन् पुनरवादीत्,—'वत्स! वेद्मि त्वां पितृवत्सलं, सुकोमलहृदयञ्च। अवस्था च एतादृशी विधुरयति धीरस्य अपि धियम्। बन्धुजनस्नेहोऽतीव प्रमाथी संसारे अस्मिन् मानवानाम्; तथाऽपि, 'आत्मानं सततं रक्षेत्' इति नीतिम् अनुसृत्य सर्व्वथा शोकप्रसरो न दातव्यः। उत्कटदाहज्वरदग्धोऽपि वत्सस्य अनेन क्लेशवार्त्ताश्रवणेन अतिमात्रं दह्ये। त्वां तनुताम् आपन्नं दृष्ट्वा अतीव व्यथते मे हृदयम्। मदीयं सुखं, राज्यं, कुलञ्च, जीवितञ्च त्वदधीनम्। तव एव जन्मना अस्मि चरितार्थः। साम्प्रतं निराशोऽस्मि संवृत्तो जीवितं; केवलं भिषजाम् अनुरोधः पाययति मां भेषजम्। तत् अविलम्बम् उत्तिष्ठ, कुरु आहारं, कृताऽऽहारे च त्वयि अहं यथायुक्तं पथ्यं करिष्यामि' इति। श्रुत्वा च पितुर्वचनं देवस्य हर्षस्य शोकानलः सुतराम् अदीप्यत। क्षणं स्थित्वा पित्रा पुनः आहारार्थम् आदिष्टः तस्मात् पितृगृहात् अवततार, अकारोच्च चेतसि,—"अकाण्डे एवायं समापतितः महान् अनर्थः निर्मेघ इव अशनिसम्पातः, किमत्र करवाणि?' इति। अथ गत्वा

च स्वं धाम परिजनैः अनुगम्यमानः कथञ्चित् कतिपयान् कवलान् गृहीत्वा पुनरपि पितुरन्तिकमागात्। तत्र पितुरवस्थाम् अतीव शोचनीयाम् आकर्णयन्, पश्यंश्च जाग्रदेव दीर्घदीर्घां निशाम् अयापयत्, प्रातिहणीच्च प्रत्यूषसि एव भ्रातुरन्तिकं दूतान्।

अथ अन्यस्मिन् अहनि 'क्व असौ कुमारो हर्षः?' इति आलपन्ती, वैलाभिधाना यशोवत्याः प्रतीहारी तम् उपेत्य व्यज्ञापयत्,—'कुमार! परित्रायस्व परित्रायस्व, जीवति एव पत्यौ किमपि अध्यवसितं भवज्जनन्या' इति। तदाकर्ण्य हर्षः सत्वरं प्रविशन् अन्तःपुरं मर्तुं कृतव्यवसायां मातरम् अद्राक्षीत्; अभ्यधाच्च दूरादेव सवाष्पदृष्टिः उच्चैः,—'मातः! किमेवं व्यवस्यति भवती? मन्दभाग्यान् अस्मान् त्वमपि त्यक्तुमिच्छसि? प्रमोदं, निवर्त्तस्व अस्माद् दुर्व्यवसितात्' इति अभिधाय पादयोः न्यपतत्।

देवी च ससम्भ्रमं मस्तेहच्च तमुत्थाप्य सुतं, वाष्पनिरुद्धकण्ठी पुनः पुनः निश्वस्य आचष्ट,—'वत्स! नाम्नि त्वम् अप्रियो निर्गुणो वा, येन त्वां परित्यजामि; स्तन्येन सह एव त्वया पीतम् अस्मद्धृदयम्; परं कुलवधूः अहं चारित्रवती, धर्म्मोज्ज्वले च कुले जाता। किं न जानासि, महावीरस्य पुरुषप्रवरस्य महिषीं मां केशरिणः इव केशरिणीम्? वीरपत्नी, वीरजननी, वीरकन्या च अहम्, अविधवा एव मर्तुम् अभिलषामि; किं बहुना वत्स! यश एव चिरस्थायि, भौतिकं कलेवरन्तु न; तत् माम् अस्माद् व्यवसायात् निवर्त्तयितुं न अर्हसि, कथम् एतादृशो सुभगा भूत्वा भर्त्तृविरहानलदग्धा चिरं स्थास्यामि?' इति।

स तु दुर्निवारतां तादृशस्य शोकस्य समवधार्य्य, कुलाङ्गना-

नाम् उचितां श्रेयसीञ्च तां गतिं मन्यमानः तूष्णीम् अवाङ्मुखः तस्थौ। यशोवती च सद्यस्त्यक्तसुतस्नेहा चरणाभ्यामेव च अन्तःपुरात् निर्गत्य, अनुसरस्तीरतटं चिताऽग्निम् आरुरोह।

हर्षस्तु मातुर्मरणेन नितरां विह्वलः पुनः पितुः अन्तिकम् आगच्छन्, तञ्च स्वल्पावशेषजीवितम् अश्रुस्रोतसा वर्षन् विमुक्तकण्ठमतिचिरं प्रारोदीत्। राजा तु चिरात् चक्षुरुन्मील्य पुत्रं तथाविधं दृष्ट्वा प्रक्षीणस्वरेण कथञ्चित् उवाच,—'वत्स! कथमेवं विक्लवाभवन्तम् आत्मानं न रुणत्सि? त्वादृशा हि न अमङ्गलज्ञाः, न अल्पमतयश्च; क्व त्वद्विधाः? क्व च वैक्लव्यम्? भूरियं तव, इति सार्व्वभौमलक्षणवतः पुनरुक्तताम् एति। अवलम्बतां लक्ष्मीः, इति लक्ष्म्या स्वयं गृहीतपाणेः न युज्यते। निगृह्यतां चापलम्, इति स्वभावधीरस्य निरर्थकोपदेशः' इत्येवं ब्रुवन् एव पञ्चत्वम् अगात् राजसिंहः।

अत्रान्तरे अस्तमयासीत् वासरमणिः। प्रकाशमाने च प्राच्यां दिशि तारापतौ, स्वयमेव ममर्पितस्कन्धैः सामन्तैः पौरजनैश्च पुरोधःपुरःसरैः गृहीत्वा शर्वशिबिकाम् उपसरस्तीरतटं, चितायां नरनाथार्हायां वह्निसत्कारेण कीर्त्तिमात्रावशेषतां निन्ये यशोधनः औशीनर इव राजेन्द्रः। अथ उदिते च सवितरि देवो हर्षः स्नात्वा पित्रे अददुदकाञ्जलिम्। अपस्नातश्चार्द्रमस्तक एव पिधाय उन्मनीयदुकूलवसनं पादचारेणैव क्षितितलनिहितनयनः उष्णं निश्वसन् प्रत्याजगाम भवनम्।

एवं देवो हर्षः सममेव पितृभ्यां विहीनः, नितान्तविह्वलः, किङ्कर्त्तव्यविमूढोऽपि भ्रातृगतहृदयः समचिन्तयत्,—'अपि नाम आर्य्यः ईदृशं पितृमरणं महाप्रलयसमम् आकर्ण्य गतधैर्य्यो वाष्पवारिक्षतस्नानो वनमाश्रयेत्?—उत राज्यपदं परित्यजेत्? न आद्रियेत वा राजलक्ष्मीमुपसर्पन्तीम्? अतीव पितृवत्सलः

आर्य्यः ; सर्व्वदा तातं श्लाघमानः माम् आह स्म,—'वत्स हर्ष ! कस्यचिदपरस्य अस्ति, आसीत्, भविष्यति वा तातमदृशं कलेवरं, मुखकमलञ्च एतादृशम् ?—भुजदण्डौ च इत्यभूतौ ? क्व वा दृश्यन्ते ईदृशानि विचेष्टितानि ? कस्य अपरो मानी विक्रान्तः दानशौण्डो वा तातादन्यः ?' एतानि नानाविधानि चिन्तयन् भ्रातुरागमनं प्रतीक्षमाणः कथमपि शोकार्त्तः तस्थौ ।

षष्ठ उच्छ्वासः ।

अथ भुक्ते प्रथमप्रेतपिण्डादके विप्रे, अतीतेषु च अतिवैक्लव्यजननेषु अशौचकालेषु, चित्रार्पितकलेवरे काव्यार्पिताख्ये च नृपतौ, कुमारो हर्षः कदाचित् शोकाऽऽकुलचेताः महसा महाजनसङ्घातसमागमं दृष्ट्वा मनसि अचिन्तयत्,—'किमन्यत् भवितुमर्हति कारणमेषामागमनस्य ? मन्ये, आर्य्यम् इव मम्मातम् आवेदयति अयं शोकाऽऽकुलो जनगणः' इति अपृच्छत् कञ्चित् प्रविशन्तं पुरुषं,—'किमार्य्यः समागतः ?' इति । स तु शनैरवादीत्,—'देव ! यथा आज्ञापयसि' । ततश्च अचिरेण एव प्रविशन् देवो राज्यवर्द्धनः दूरादेव प्रियं भ्रातरं दृष्ट्वा, चिरसञ्चितवाष्पवेगेन निरुद्धकण्ठो बाहुयुगलेन कण्ठे गृहीत्वा मुक्तकण्ठं प्रारोदीत् ।

अथ पर्जन्य इव निरवशेषनयनाम्बुः, सुचिराच्च कथञ्चथमपि प्रशान्तमन्युवेगः देवो राज्यवर्द्धनः, परिजनानीतेन सलिलेन मुखादिकं प्रक्षाल्य सुचिरं तूष्णीं स्थित्वा स्नानागारमगच्छत् । तत्र स्नात्वा विस्रस्तकुन्तलः विमुक्ताभरणः शयनीये निपत्य मौनमतिष्ठत् । अथ अन्येद्युः प्रभाते प्रविश्य समुपविष्टेषु राजलोकेषु, भ्रातरं हर्षवर्द्धनमब्रवीत्,—

'तात! पात्रमसि गुरुवचनानाम्। शैशवत एव भवता चित्तवृत्तिम् अनुसरता सम्यक् आराधितः तातः; तत् एवं गते वचनस्थितं त्वां किमपि विवक्तुः आस्महे, नात्र चापल्यात् विरमतिः अवलम्बनीया; न च अत्र मदीहितं प्रत्यूहलवोऽपि विधेयः। ज्ञायत एव भवता लोकवृत्तं बहुदर्शनेन। पश्य, —मान्धातरि निधनं गते किमध्यवसितं पुरुजुत्सुना तदात्मजेन?—दिलीपे वा रघुणा?—दशरथे च रामेण?—दुष्मन्ते वा भरतेन? मन्तु तावदेतं;—तातेन अपि पितरि सुगृहीतनाम्नि स्वर्गं गते नाकारि किं राज्यम्?—नावलम्बितं किं गार्हस्थ्यम्?—न रक्षिता वा प्रजाः? शोकपरिभूतत्वं जनं कापुरुषम् आचक्षते विद्वांसः; अबला एव विषयः शोकसम्भाराणाम्। तथाऽपि किं करोमि? अहन्तु स्वभावदुर्बलतया कापुरुषतया वा शोकविह्वलः किङ्कर्त्तव्यविमूढाऽस्मि। मम हि, एवं विपर्य्यस्ते संसारे प्रनष्ट एव प्रज्ञाऽऽलोकः, विच्युतमेव धैर्य्यम्; किं बहुना, —सर्व्वथा निरुत्सुकोऽस्मि विषयेषु। राज्यं विषमिव चकोरस्य चक्षुर्मे विरक्तीकरोति। वंशलक्ष्मीमुद्वोढुं न अभिलषति मे मनः। तदहम् इच्छामि, पुरुरिव आज्ञया गुरोर्जरां, गृहाण मे राज्यलक्ष्मीम् इति। त्यक्ता च सर्व्वाणि बालक्रीडितानि हरिः इव लक्ष्म्या विहर। त्यक्तं मया अद्य प्रभृति शस्त्रम्' इत्यभिधाय निजं खड्गं खड्गधारिणी हस्तात् आकृष्य भूमौ न्यपातयत्।

तत् आकर्ण्य देवो हर्षेः सुतरां विदीर्णहृदयः सञ्चिन्तितवान्,—'किम् अयम् आर्य्यः मां ब्रवीति!! किमसौ केनचित् माम् अन्तरेण कोपितः?—अथवा एवं मां परीक्षते?—उत शोकजः कोऽपि चेतोविकार एषः?—आहोस्वित् शोकविमूढधिया एकं विवक्षितम्, अन्यत् मुखात् निर्गलितम्? केन हि दृष्टपूर्वे भ्रातरि ज्यायसि त्यक्तराज्ये नववयसि, लक्ष्मीः काम्यत

चाण्डालेनापि ? कथं वा मन्त्रावितम् इदम् अतीव अनुचितं चित्तवता आर्य्येण ?—किं वा अनेन विस्मृतः सौमित्रिः ?—अथवा भामसेनादयः पाण्डवाः ? यद् भवतु, आर्य्य मां विहाय तपोवनं विशति, नाहं क्षणमपि जीवितुं शक्नोमि' इति ।

इत्थं चिन्तयति तस्मिन्, महसा राज्यश्रियः परिजनः संवाटको नाम समेत्य, मुक्तकण्ठं विरुदन् सभायाम् आत्मानं न्यपातयत् । ततश्च सम्भ्रान्तो देवो राज्यवर्द्धनः सह भ्रात्रा 'किम् ?' इति तं पप्रच्छ । स तु कथमपि संहृतवाष्पवेगः प्राब्रवीत्,—'देव ! पिशाचस्य इव नीचस्य चरितं रन्ध्रप्रहारि । यस्मिन् दिने राजाधिराजः प्रभाकरवर्द्धनो देवभावं गत इति वार्त्ता आसीत्, तस्मिन्नेव दिने दुरात्मना मालवेन्द्रेण ग्रहवर्मा व्यापादितः कूटकारिणा । देवी च राज्यश्रीः संयता कान्यकुब्जदुर्गकारायां निहिता । जनश्रुतिश्च एषा यत्,—अराजकं राज्यमिदं मन्यमानोऽसौ दुर्मतिः एतामपि भुवम् आत्मसात् कर्त्तुम् आजिगमिषति' इत्युक्त्वा विरराम ।

श्रुत्वा एतत् आकस्मिकम् अनुपेक्षणीयम् अपरं दुर्घटनं परपरिभवस्य अनाकर्णितपूर्व्वतया, तेजस्वलतया नवयौवनस्य, स्वसुः स्नेहवशंवदतया च मद्य एव अस्य तादृशः शोको व्यरंमीत् । कोपावेशश्च गम्भीरं हृदयम् आचक्राम । पुनरपि परित्यक्तं शस्त्रं ग्रहीतुं समूलमालवोन्मूलनाय प्रसमार दक्षिणोऽस्य करः । ततश्च कनीयांसम् अब्रवीत् भ्रातरम्,—'आयुष्मन् ! राजकुलमिदं, बान्धवा इमे, परिजनोऽयं, भूश इयं रक्ष्यताम् ; गत एव अहम् अद्यैव मालवराजविध्वंसनाय । इदम् एव तावत् मे तपः दुर्विनीतारिनिर्मूलनम् । कुरङ्गकैः कचग्रहः केशरिण इव, भेकैः करप्रहारः कालसर्पस्य इव, मालवैः परिभवोऽस्मदीयस्य ; तिष्ठन्तु अन्यानि साधनानि ;—एक एव अयं भण्डिः

अयुतमात्रेण अश्वानां मया सह प्रयातु' इत्यभिधाय प्रयाणार्थं पटहम् आज्ञापयत्।

तथा प्रक्रान्तं तम् आह स्म सविनयं देवो हर्षः,—'आर्य! माम् अनुगन्तुम् आदिशतु, नाहं भवता विना क्षणमपि अत्र अवस्थातुम् उत्सहे; प्रमोदतु भवान्, न वञ्चितोऽस्मि कदाचिदपि प्रमादेषु आर्येण' इत्यभिदधान एव पादयोः अपतत्। तं पुनश्चरणपतितम् उत्थाप्य मस्तके प्रावाच देवो राज्यवर्धनः,—'वत्स! कथम् एवम् अतिसमारम्भमृदुर्योगेन गौरवम् आरोप्यते लघीयान् अरातिः? न हि कुलाद्रिसमुत्पाटनक्षमाः प्रभञ्जनाः समुज्जृम्भन्ते अतिचपले तूलराशौ। अचिरात् एव ग्रहीष्यसि अस्तं दिशां विजयं। साम्प्रतं दृश्यन्ताम् अनाथाः प्रजाः' इत्यभिधाय तस्मिन्नेव दिने प्रायात् मालवेन्द्रनिमूलनाय।

अथ देवो हर्षः भ्रातरि तथा प्रयाते खिद्यमानहृदयः परिणतप्रायायां रजन्याम् एकदा स्वप्ने अभद्रकं लोहस्तम्भं भज्यमानम् अद्राक्षीत्। सहसा प्रबुद्धश्च व्यचिन्तयत्,—'किम् एवं माम् एषः दुःस्वप्नः एतदवस्थमपि विधुरयति!! स्फुरति च निरन्तरम् अशुभसूचनाकुशलं सव्यं नयनम्; सुदारुणाश्च विविधा उत्पाताः पुनः प्रबलपार्थिवनाशमाचक्षाणाः मुहूर्त्तमपि न प्रशाम्यन्ति; सर्वथा स्वस्ति अस्तु सङ्गामविजयिने आर्याय'। इत्थं मनसा अभिध्यायन् समुत्थाय आस्थानमण्डपगत एव सहसा प्रविशन्तं कुन्तलं नाम अश्ववारं राज्यवर्धनस्य प्रातिभाजनम् अद्राक्षीत्; अश्रौषीच्च तस्मात् वाष्पपूर्णनयनात्,—अवज्ञानिर्जितमालवराजमपि गौड़ाधिपेन अलीकोपचारजनितविश्वासम् अशस्त्रं स्वभवनगतम् एव भ्रातरं निहतम्। श्रुत्वा एव शोकक्रोधाभ्यां ममैव ममाक्रान्तहृदयः अब्रवीत्,—'कः खलु तादृशं महापुरुषम् अकाण्डे गर्हितेन उपायेन मृत्युवशं नयेत् अनार्यात् गौड़ाधिपात्

अपरः ? न जाने,—स खलु दुरात्मा कां गतिं वा योनिं गमिष्यति ?—कस्मिन् वा निरये पतिष्यति ? चाण्डालोऽपि क इदं विगर्हितम् अकार्य्यम् आचरेत् ? नामग्रहणमपि अस्य पापकारिणः पापं जनयति। क्व इदानीं गमिष्यतीदृनेन दुरात्मना ?'इत्येवं वदत एव अस्य समीपगतः, पितुः मित्रं सेनापतिः सिंहनादनामा गम्भीरया वाचा सैनिकानां समरश्रमम् उत्तेजयन् समभ्यधात्,—'देव ! कापुरुषाः काका इव कृताश्रयया कोकिलया, हृतलक्ष्मा विप्रलभ्यमानम् आत्मानं न खलु चेतयन्ते। स्त्रियो हि दोषान्धतादयः कामलाविकाराः ; आतपत्राहृतरवयो हि न स्मरन्त्यपरं तेजस्विनं कुधियः ; किं वा करोतु वराकः ?—येनातिभीरुणा नित्यसमरविमुखेन नावलोकितान्येव कुपितानां शूराणामाननानि ? नासौ मूढः जानाति एवं यत्, —अभिचारा इव अपमानिताः सद्य एव समग्रवंशविनाशं विदधति मनस्विनः। वीरसमाजावहेलितस्य निष्टृणस्य तस्यैव उचितमिदं दुर्जनस्य दुष्पारनरकनिपातकुशलं कर्म्म। न खलु कदाचित् तेजस्विनं स्प्रष्टुं शक्नोति शोकः। त्वन्तु सत्त्ववतां प्राग्रहरोऽसि,—किम् एकेन गौड़ाधिपेन,—तथा कुरु, अन्योऽपि कश्चित् कदाचित् एवं यथा नाचरेत् इति। समाश्वास्यन्तामशरणाः प्रजाः। समर्प्यन्तां भूपतीनां शिरःसु शारदीयेन सूर्य्येण इव ललाटन्तपाः पादन्यासाः' इति।

तत् आकर्ण्य देवो हर्षस्तं प्रत्यवोचत्,—'करणीयमेव इदम् अभिहितम् आर्य्येण। शृणु तावत्, प्रतिजाने आर्य्यस्य पादरजःस्पर्शेन,—यदि अल्पीयसा एव कालेन निर्गौड़ां न करोमि पृथ्वीं, ततो जातवेदसि ज्वलति पतङ्ग इव महापातकी पातयामि कलेवरम्' इति।

एवं कृतशपथश्च सभां त्यक्त्वा रात्रौ शयनतलनिलीनगात्रः

शोकानलदह्यमानान्तःकरणः चेतसि अकरोत्,—'कथमिव अस्य हतजीवितकामस्य आर्य्यविरहं क्षणमपि युक्तम् उच्छ्वसितुम्!! क्व गता मा प्रीतिः भक्तिः अनुवृत्तिः वा? कः खलु आर्य्यविरहे मम जीवितं मन्नावयेत्? तथाविधम् ऐक्यम् एकपद एव विलीनम्!! अभिन्नोऽपि हतविधिना मद्भक्त्या विभिन्नः कृतः। दग्धरोषाऽऽविष्टचेतसा शोकात् रुदितमपि न मुक्तकण्ठं निर्घृणेन मया!! पर इव अहम् आर्य्यं मां विहाय स्वर्गं गते स्वस्थः इव तिष्ठामि!!' इत्येवं बहुविधानि चिन्तयन् निर्निद्र एव क्षपां नीत्वा प्रभातायाम् एव शर्व्वर्य्यां सकलगजसैन्याध्यक्षं स्कन्दगुप्तमाहूय विजयप्रयाणशङ्खपूरणाय समादिशत्।

सप्तम उच्छ्वासः।

अथ अन्येद्युः देवो हर्षः चतसृणाम् अपि दिशां विजयाय शुभे लग्ने कृतमङ्गलाचारः प्रातिष्ठत। उपसरन्ति तृणनिर्म्मितं मन्दिरम् अधितिष्ठति तस्मिन्, कोऽपि समागत्य हर्षाङ्कामेकां काञ्चनमयीं मुद्राम् अर्पयामास। जग्राह च राजा। समुपस्थापिते च आदावेव सा करात् परिभ्रश्य मृत्पिण्डे अवनतमुखी महीतले पपात। मृदुमृत्तिकायां पतनेन अस्या वर्णावलयः स्फुटतया अराजन्त। अशुभशङ्किषु अपि परिजनेषु देवस्य हर्षस्य मनसि भूयसी प्रतीतिः एषा जाता—'यस्मादियं वर्णराजिर्दृश्यते, अनेन एकशासनमुद्रिता भूर्भविष्यति इति निवेदितं निमित्तेन शकुनेन' इति ताम् अभिनन्द्य मनसा राजा हर्षदेवः तत्रैव तं दिवसम् अयापयत्। अथ रात्र्यां परिणतायां प्रयाणपटहः समताड्यत। पूरितश्च राजद्वारम् उद्घोष्यमाणनामधेयैः भूपतिभिः।

अथ उदिते एव भगवति मरीचिमालिनि प्रयियासुः नरपतिः प्रणमतां राजलोकानां सुभटानाञ्च यथायथं सम्मानेन प्रयाणमर्य्यादां विभज्य प्रतस्थे। ततः कियन्तम् अध्वानं गत्वा शिविरसन्निविष्टं तं प्रविश्य प्रतीहारो व्यजिज्ञपत्,—'देव! द्वारि स्थितः प्राग्ज्योतिषेश्वरकुमारेण प्रेषितो हंसवेगो नाम दूतः' इति। राजा 'शीघ्रमेनं प्रवेशय' इति तम् आज्ञापयत्। अथ प्रविशन्तं तम् अपृच्छत्,—'हंसवेग! अपि कुशलं कुमारस्य?' इति। स प्रत्यवादीत्,—'साम्प्रतम् असौ कुशली,—येन देवेन एवं स्नेहसिक्तया वाचा पृच्छ्यते' इति।

क्षणं स्थित्वा असौ पुनः अब्रवीत्,—'यदि च दुर्लभं देवस्य अनुरूपं जगति प्राभृतं, तदपि सन्देशम् अशून्यं करणीयम् इति अस्मात् कारणात् प्रभुणा पूर्व्वपुरुषोपार्ज्जितं वारुणम् आतपत्रम् आभोगाऽऽख्यं प्रेषितं तत् इदम् अनुरूपस्थानन्यासेन, कृपया प्रतिगृह्यताम्। अस्य च बहूनि आश्चर्य्याणि सन्ति;—प्रतिदिनं प्रविशति अस्मिन् चन्द्रमसः किरणावलितः एकैकः रश्मिः शैत्यार्थं छायायाः। प्रविष्टे च चन्द्रकिरणे प्रच्यवन्तेऽस्य मणिमयशलाकाभ्योऽच्छा धाराः सोममयूखानां बहुशः। यः खलु वरुण इव चतुर्णाम् अम्भोधीनाम् अधिपतिः भूतो भावी वा, तमेव संवर्त्त छायया, न इतरमिदम्। नेदं जातवेदसा दह्यते, पृषदश्वेन न क्षिप्यते, नोदकेन आर्द्रतां नीयते, न रजोभिः मालिन्यं प्राप्यते, नापि जरया जीर्य्यति। तदेतत् अनुगृह्यतां देवेन कटाक्षपातेन, सन्देशं कमपि सुविअब्धं श्रोष्यति' इत्यभिधाय पश्चाद्वर्त्तिनं पुरुषं प्राब्रवीत्,—'भद्र! दर्शय एतद् देवस्य' इति।

अथ तेन तत् निचोलकात् निष्कोषितं राजा राजन्यगणपरिवृतः साश्चर्य्यम् अवलोकयन् 'त्रिभुवनरत्नम् एतदद्भुतम्' इति

ननन्द। दृष्टे च तस्मिन् राज्ञा, अपराण्यपि उपायनानि प्रदर्शयामास सः। 'प्रथमे प्रयाणे शोभनं निमित्तमिदम्' इति मनसा प्रीयमाणो हंसवेगमाजभाषे,—'भद्र! एतस्य आतपत्ररत्नस्य कुमारात् लाभोऽतीव प्रीतिं जनयति, तत् विश्रम्यताम्' इत्यभिधाय स्वयम् आभोगस्य तस्य छायाम् अधितष्ठौ। एवम् आनन्दम् अनुभवन् तं दिवसम् अनयत्।

अथ रजन्यां विसर्जितपरिजनो हंसवेगम् आहूय आदिदेश सन्देशकथनं। स च प्रणम्य कथयितुम् आरेभे,—'देव! आसीत् पुरा नरको नृपतिः महावीरः। स इदं वरुणस्य प्राणसमं छत्ररत्नं जहार। तस्य महासत्त्वस्य अन्ववाये भगदत्तप्रभृतयो राजानः समभवन्; तेषु च कालेन व्यतिगतेषु भूतिवर्म्मा नाम नरपतिः अजायत। तस्मिन् पुनः देवभावं गते, चन्द्रमुखवर्म्मा तत्पुत्रः तदीयं सिंहासनम् अभजत। तस्मिंश्च स्वर्गते तत्पुत्रः स्थितिवर्म्मा राज्यम् अवाप। ततः सुस्थिरवर्म्मा नाम तत्पुत्रो महाराजपदवीं लेभे, यं मृगाङ्क इति लोका आहुः। तस्य च सुरुचातनाम्नः देवस्य श्यामाऽभिधानायां महादेव्यां भास्करवर्म्माऽपरनामा तनयः कुमारः समजायत। सोऽयं कुमारः जगदेकवीरेण देवनिभेन देवेन सख्यम् इच्छति, तत् आज्ञादानेन अनुमोदतां देवः; अनुभवतु साम्प्रतं देवस्य गाढाऽऽलिङ्गनसुखं कामरूपेश्वरः। न अभिनन्दति चेत् एतं प्रणयम् अस्य देवः,—तत् आज्ञापयतु, किमस्य कथनीयम्?' इति।

अथ भूपतिः तं सादरम् अब्रवीत्,—'हंसवेग! कथमिव तथाविधे गुणवतां प्रवरे मादृशस्य अन्यथा स्वप्नेऽपि प्रवर्त्तेत हृदयम्? अतिशुभः सङ्कल्पः कुमारस्य। स्वयम् असौ बाहुदीर्घ्यशाली मया च समालम्बितशराग्रनेन सख्या किमिव न

अधिकरिष्यति ? तत् तथा यतस्व,—यथा न चिरम् इयं क्लेशयति अस्मान् कुमारदर्शनोत्कण्ठा' इति ।

अथ प्रभाते प्रभूतानि प्रतिप्राभृतानि प्रधानप्रतिदूताधिष्ठितानि दत्त्वा हंसवेगं व्यसर्ज्जयत् । स्वयमपि तत आरभ्य अविरतैः प्रयाणैः अभ्यमित्रम् अयासीत् ।

प्रयांश्च कियन्तम् अध्वानं राज्यवर्द्धनभुजोपार्ज्जितम् अशेषं मालवराजसैनिकम् आदाय समागच्छन्तं भण्डिं शुश्राव । तत्र च अभिनवेन पुनः भ्रातृशोकस्मरणेन सम्मोद्यमानहृदयस्य शिविरं प्रविशतः सहसा भण्डिरागत्य अधोमुखो मुक्तकण्ठं रुदन् पादयोः पपात । राजा च सुचिरम् अतिकरुणं प्रारोदीत् । अथ कथञ्चिथमिव प्रशान्ते मन्युवेगे देवो हर्षः क्षणं स्थित्वा भ्रातृमरणवृत्तान्तम् अपृच्छत् ; अवोचच्च यथावृत्तं भण्डिः । अथ राजा पुनः अकथयत्,—'राज्यश्रीवृत्तमाख्याहि' । सोऽवदत्,—'देव ! देवभूयं गते राज्यवर्द्धने, गुप्तनाम्ना च गृहीते कुशस्थले, राज्यश्रीः परिभ्रश्य बन्धनात् विन्ध्याटवीं सपरिजना प्रविष्टेति लोकमुखात् श्रूयते वार्त्ता । अन्वेषणार्थञ्च तस्याः प्रहिताः कतिपये जना नाद्यापि निवर्त्तन्ते' इति । तदाकर्ण्य राजा अवादात्,—'यत्र सा, तत्र अहमपि गमिष्यामि । भवान् कटकम् आदाय प्रवर्त्ततां गौड़ाभिमुखम्' ।

अथ अन्येद्युः स्वसारम् अन्वेष्टुं हयसाधनैः कतिपयैः प्रातिष्ठत विन्ध्याचलम् ; प्रापच्च कतिपयैः एव अहोभिः तम् । प्रविशंश्च दूरतो वनग्रामम् अद्राक्षीत्, प्राविक्षच्च तत्रैव इति ।

अष्टम उच्छ्वासः ।

अथ अन्येद्युः देवो हर्षः तस्मात् वनग्रामात् निर्गत्य विन्ध्या-

टवीम् अविशत्; पर्य्यटंश्च तत्र ममज्ञात् बहून् दिवसान्। कदाचित् परिभ्रमतः तस्य भूपतेः व्याघ्रकेतुः नाम कश्चित् आटविकसामन्तस्य शरभकेतोः सूनुः कुतोऽपि शबरयुवानम् एकम् आदाय सन्निकर्षम् आगच्छत्, व्यज्ञापयच्च,—'देव! एतस्य खलु विन्ध्यस्य स्वामी शबरसेनापतिः भृकम्पो नाम। तस्य अयं निर्घातनामा स्वसीयः सर्व्वस्य अस्य विन्ध्यारण्यस्य पर्णानामपि अभिज्ञः, किमुत तत्तत्प्रदेशानाम्' इति। नृपतिः तम् अपृच्छत्,—'भद्र! काचित् रूपवती नारी दर्शनपथम् आगता तव?' इति। स प्रत्यवोचत्,—"न एवंरूपा काऽपि दृष्टिपथं गता, इदानीं तावत् देवाऽऽदेशात् अन्वेष्टुं यतिष्ये। इतश्च न अतिदूरे दिवाकरमित्राऽऽख्यः कोऽपि पाराशरो गिरिनदीम् आश्रित्य प्रतिवसति, स यदि विन्देत वार्त्ताम्' इति। तत् आकर्ण्य राजा चिन्तयामास,—'श्रूयते,—स्वर्गतस्य ग्रहवर्म्मणः शैशवमित्रं दिवाकरमित्रो नाम युवा एव सौगतधर्म्मम् आश्रित्य काषायपरिवीतो व्यचारीत्' इति। प्रकाशम् अवादीत्,—'भद्र! उपदिश्यतां तच्चिरावासस्थानं, यत्रासौ प्रतिवसति'।

अथ नरपतिः तेन निर्घातेन सह गत्वा तरुषण्डमध्यवर्त्तिनं दिवाकरमित्रं दृष्ट्वा, शिरसा मनसा वाचा च वन्दित्वा व्यजिज्ञपत्,—'भगवन्! मम हि विनष्टनिखिलप्रियजनस्य जीवितनिबन्धनं एकैव यवीयसी भगिनी अवशिष्टा। साऽपि भर्त्तृवियोगात् वैरिपरिभवम् असहमाना विन्ध्याटवीम् अविशत् इति वार्त्ता। ताञ्च अन्वेष्टुं वयम् अविरतम् इमाम् अटवीं पर्य्येटामः, न च एषा अधिगम्यते। तत्कथयतु गुरुदेवः, यदि कदाचित् वनं पर्य्यटन्ती दृष्टिपथं गता मा भवतः श्रुतिपथं वा' इति।

तत् आकर्ण्य जातानुकम्पः पाराशरो ममभ्यधात्,—'भद्र! न अधिगतः कश्चिद् वृत्तान्त एवंरूपः' इति ब्रुवति एव तस्मिन्,

कश्चिज्जातकरुण इव भिक्षुः ससम्भ्रमम् आगत्य उपरचिताञ्जलिः समभाषत,—'भगवन् भदन्त ! महत् खलु करुणं वर्त्तते, परित्रायस्व,—बाला काचित् बलवद्व्यसनाभिभूता इव दृश्यमाना कल्याणरूपा वैश्वानरं प्रवेष्टुम् उद्यता' इति। तत् आकर्ण्य राजा सञ्जातानुजाशङ्कः प्राह,—'भद्र ! कियद्दूरं सा ? —कथं वा आर्य्यस्य दृष्टिपथं गता ?' इति।

तथाऽभिहितोऽसौ भिक्षुः प्राब्रवीत्, —"महाभाग ! श्रूयताम्,—अहम् अद्य प्रत्यूष एव यदृच्छया गतवान् अतिदूरम्। गत्वा च एकस्मिन् वनलतागहने नारीणां रुदितम् अशृणवम् ; सञ्जातकुतश्च तम् उद्देशं गतोऽस्मि ; दृष्टवान् च अस्मि परं कारुण्यं करुणायाः योषितमेकाम् ; अचिन्तयञ्च 'चित्रमिदम् !! ईदृशीमपि आकृतिम् अभिभवति दारुणः सन्तापः !!' इति। सन्निहितञ्च मां काऽपि अन्यतरा योषित् तस्मात् स्त्रीणादुत्थाय समब्रवीत्,—'भगवन् ! सर्व्वभूतानुकम्पनपरा प्रायेण प्रव्रज्या श्रूयते ; तत् इयं नः स्वामिनो पितुः अवसानेन, भर्त्तुः वियोगेन, भ्रातुः अकालमृत्युना, शेषस्य बान्धववर्गस्य भङ्गेन च सवाष्पनयनं भृत्यवर्गं विहाय अग्निं प्रविशति ; परित्रातुम् अर्हति'। अहन्तु तत् आकर्ण्य समुद्विग्नतरः शनैः अवदम्,—'आर्य्ये ! यथा कथ्यते, तथा, शक्यते चेत् मुहूर्त्तमात्रमपि त्रातुं, तदा न व्यर्थयं प्रार्थना भविष्यति। मम आचार्य्यः सन्निहित एव। तदन्तिकम् अस्मिन् वृत्तान्ते कथिते, अवश्यमेव असौ समागत्य प्रतिविधास्यति। सुकौशलेन कुशलशीलामिमां कियन्तं कालं प्रबाध्य रक्षतु भवती, अहम् अविलम्बेनैव गत्वा व्यतिकरम् इमं गुरवे निवेदयिष्यामि' इत्युक्त्वा भवदन्तिकम् उपागाम"।

तदाकर्ण्य राजा श्रमणाऽऽचार्य्यमब्रवीत्,—'भगवन्! नियतं सा एव इयम् अनार्य्यस्य अस्य हतभाग्यस्य स्वसा इति विदीर्य-

मार्गमेव इदं हतहृदयम् आवेदयति, तत् सत्वरं परित्रायताम्' इत्युक्त्वा तमपि भिक्षुम् अब्रवीत्,—'आर्य्य! दर्शय पन्थानं, क्व असौ? तत्र गच्छामः,—यदि कथमपि जीवितां पश्यामः'।

अथ सर्व्वे ते गतवन्तः तम् उद्देशम्; दृष्टवन्तश्च वैश्वानरप्रवेशोद्यतां राज्यश्रियम्। अथ भ्राता हर्षस्तां ममन्थमम् अग्निमान्निध्यात् आक्षिप्य तरुतलम् आनीतवान्। दृष्ट्वा च भ्रातरं सुचिरमतिकरुणं विललाप सा। परिजनैश्च महता प्रयत्नेन प्रबाध्यमाना कथङ्कथमपि निवर्त्तितवती। ततः स्वमारं शनैः अब्रवीत् राजा,—'वत्से! वन्दस्व भगवन्तं श्रमणाऽऽचार्य्यम्, एष ते भर्त्तृहृदयं हितीयं, गुरुश्च अस्माकम्' इति। ततश्च भ्रातृवचनात् पतिवार्त्ताऽऽकर्णनप्रसङ्गेन पुनरपि अश्रुपूर्णलोचनायां राज्यश्रियां नमन्त्यां आचार्य्यः दीर्घं निश्वसन् सुहृच्छोकेन, क्षणं स्थित्वा मधुरया वाचा ममभ्यधात्,—'वत्से! अलमतिरुदितेन' इति राज्यश्रियमुक्त्वा राजानं पुनरवादीत्,—'वत्स! गम्यतां पुनः मदीया आवासभूमिः' इति।

ततो राजा सपरिजनां भगिनीमादाय तमेव देशं गत्वा आबन्धनात् पावकप्रवेशोद्योगपर्य्यन्तं सर्व्वं वृत्तान्तं स्वसुः परिजनात् शुश्राव। तथा श्रवणकातरञ्च तं देवं हर्षं श्रमणाऽऽचार्य्यः सान्त्वयन् प्रोवाच,—'श्रीमन्! श्रूयतां तावत्, वक्तव्यमस्ति किञ्चित्,—एकदा नागार्জ্জुनेन नाम भिक्षुणा नागराजात् अक्षतप्रभाभासिनी विषसन्तापशमनी मन्दाकिनी नाम एकावली लेभे। स च शातवाहनाभिधानाय राज्ञे मख्ये तां दत्तवान्। सा च इयं कालेन शिष्यपरम्परया अस्माकं हस्तं प्राप्ता। यदि च परिभव इव भवादृशां दर्शिम उपचारः, तथाऽपि औषधिबुद्ध्या धीमता सर्व्वसत्त्वरक्षाप्रवृत्तेन विषसन्तापात् रक्षितुकामेन गृह्यताम्' इत्युक्त्वा तां मन्दाकिनीं

राज्ञे प्रादात्। राजा च तां प्रभूतैः मयूखैः भासमानां सर्व्वाऽऽज्ञापूरणीं दृष्ट्वा सादरम् अग्रहीत्। गते च एकावलोप्रसङ्गे प्राप्तविश्रम्भा राज्यश्रीः ताम्बूलकरङ्कवाहिन्या पत्रलेखया हर्षं विज्ञापयामास,—'काषायग्रहणानुज्ञया अनुकम्पितामियम् अपुण्यभाजनं ते भगिनी' इति। राजा तु तदाकर्ण्य किमपि नाभ्यधात्। अथ आचार्य्यः विविधैः प्रबोधवचनैः मान्त्वयामास ताम्। ततश्च भूपतिः सविनयम् आबभाषे श्रमणाऽऽचार्य्यम्,—'प्राथनाऽस्ति काचित् विधेयस्यास्य,—इयमस्माकं भगिनी सर्व्वकार्य्योपरोधेनापि पालनीया नित्यम्; अतः अद्यावधि यावदहं लघयामि प्रतिज्ञाभारं, तावदिमाम् अत्रभवतः धर्म्याभिः कथाभिः अस्मत्पार्श्ववर्त्तिनीमेव प्रतिबोध्यमानामिच्छामि। इयं पुनः अवसितकृत्येन मयैव समं ग्रहीष्यति काषायाणि' इति उक्त्वा तूष्णीम्बभूव भूपतिः। अथ आचार्य्ये तस्मिन् 'तथा' इति अभिनन्दितप्रणये प्रीयमाणः राजा तत्र तां रजनीम् अतिवाह्य, प्रभाते वसनालङ्कारादिभिः परितोष्य विसर्ज्य च निर्घातम् आचार्य्येण सह स्वमारम् आदाय कटकम् अनुजाङ्कविनिविष्टं प्रत्यागमत्।

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्यविरचितं
सङ्क्षिप्तश्रीहर्षचरितं समाप्तम्।

श्रीहर्षचरितम् ।

प्रथम उच्छ्वासः ।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्व्वशुक्ला सरस्वती ॥ १ ॥

प्रणम्य परमात्मानं श्रीजीवानन्दशर्म्मणा ।
श्रीहर्षचरितस्यैषा विवृतिः क्रियतेऽमला ॥

प्रारिप्सितपरिसमाप्तिकामः तत्रभवान् महाकविर्बाणभट्टः आशङ्कितविघ्नव्यूह-विनाशाय अविगीतशिष्टाचारपरम्परापरिप्राप्तं वाग्देवतास्मरणरूपं मङ्गलं ग्रिथग्रिचायै यत्यादौ निबध्नाति, चतुर्मुखेत्यादि ।—चतुर्मुखस्य—चतुराननस्य, ब्रह्मणः इत्यर्थः, मुखानि—चत्वारि आननानीत्यर्थः, एव अम्भोजानि—पुण्डरीकाणि, तेषां यद्वनं—काननं, तत्र हंसवधूः,—हंसी, चतुराननवदनकमलवनविहारिमरालवधूस्वरूपेत्यर्थः, सर्वशुक्ला—सर्वेण—सकलेन, शरीरेण वसनेन स्वाधिष्ठानेन चेत्यर्थः, पक्षे,—च्युत-संस्कृत्याद्यभावरूपेण सर्व्वप्रकारेणेत्यर्थः, शुक्ला—श्वेतवर्णा, पक्षे,—परिशुद्धा, सरस्वती—वाग्देवी, पक्षे,—संस्कृतभारती, मम मानसे—चित्ते, पक्षे,—मानसाभिधेयसरसि, (यथा हि, मानससरोविहारिणः मानसौकसां कामिन्यः स्वर्गसुखमात्रोपभोग्यं स्वभवनं मानसं विहाय रमणीयमपि अन्यत् किमपि सरः गन्तुम् अनिच्छन्त्यः अतितरां तत्रैव श्रीभां प्रकाशयन्ति, तथैव विद्वत्कुलकमलकलहंसी भगवती भारती मन्मानस-मन्दिरमनियतकालमेव अध्युष्य अखिलं सदर्थजातं तत्र समुल्लासयिष्यति इति श्लेष-तात्पर्य्यम्; मानससरोविषय एव मरालानुरागः कविसमयसिद्धः; तथा हि,—"अस्ति यद्यपि सर्व्वत्र नीरं नीरजमण्डितम् । रमते न मरालस्य मानसं मानसं विना ॥" इति) नित्यं—सर्व्वदा, अनियतकालमित्यर्थः, रमतां—विहरतु, [प्रार्थनायां लोट्] ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥ २ ॥

मानसाभिधेये सरोवरे कमलकानने हंसीव या चतुराननाननकमलवने नित्यं श्रुतिस्वरूपेण विहरति, सा(ऽ)तिविशुद्धवागधिष्ठात्री देवी नस मानसमन्दिरे नियतं निवसतु इति निष्कृष्टार्थः । अत्र भगवत्यां सरस्वत्यां हंसबध्वाः, तथा चतुर्मुखमुखेषु अस्मीजानां तादात्म्याध्यासात् तथा श्लेषमहिम्ना मानस-सरस्वत्यादिपदानां चित्त-वागाद्यर्थान्तरावगमाच्च श्लिष्ट समस्तवस्तुविषयं स्वाङ्गं रूपकमलङ्कारः । अनुष्टुब् वृत्तम् ॥ १ ॥

अथेदानीं जन्मान्तरीणान् प्रत्यूहव्यूहान् बलवत्तरमैहिकं विघ्नं वा समाशङ्क्य तान् समूलमुन्मूलयितुं भूयस्या स्वाभीष्टदेवसमितप्रभावं शिवं स्तौति, नम इति ।—तुङ्गं—कदापि कुत्राप्यनवनततया सदा समुन्नतमित्यर्थः, शिरः,—स्वमस्तकं, चुम्बति—स्पृशति, तत्र तिष्ठति इत्यर्थः, यः तथाविधः, सततसमुद्गतोत्तमाङ्गलग्न इत्यर्थः, यः चन्द्रः,—शशाङ्कः, स एव चामरं—चमरमृगधवलपुच्छविनिर्मितव्यजनं, तेन चारुः, —मनोहरः, तस्मै, त्रैलोक्यं—त्रिभुवनमेव, नगरं—पुरं, तस्य आरम्भः,—निर्माणोपक्रमः, तस्य मूलस्तम्भः,—धवलशिलामय स्थूणाविशेषः, तस्मै, शम्भवे—शिवाय, नमः, —बहुकृत्वः प्रणतिरस्त्वित्यर्थः । यथा हि कश्चिदपूर्वकाकः लोकातिशायिनीं महानगरीं निर्मातुं प्रवृत्तः गोपुरं पुरतः विरचय्य, ततः विशालस्थूणासनाथं कृत्वा तस्योपरि अपूर्वशोभासम्पत्तये श्वेतपताकामिव कौमुदीरुचिं धवलचामरं निबध्नाति, तद्वत यस्यावत त्रिभुवननगरनिर्मित्सया स्वयमेव मूलस्तम्भस्वरूपतामुपगतः सितचारुचामरोपमं चन्द्रमसं शिरसा दधत् परमरमणीयतामुपलेभे, त्रिलोकीमूलहेतवे तस्मै शम्भवे नमः इति समुदिततात्पर्यम् । श्लोकेऽस्मिन् "स्वयम्भुः शम्भुरादित्यः" इति हरनामसहस्रं भगवतोऽपि शम्भुनामदर्शनात् कैश्चित् अस्य श्लोकस्य विष्णोर्नमस्कारपरत्वमपि वदद्भिः एवं व्याचक्ष्यते ; तथा हि,—हरेः शिरो हि द्युलक्षणं, "यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिः श्वरणौ मही" इति वचनात्, तथा च तुङ्गम्—उन्नतं, यत् शिरः,—द्युलक्षणो मूर्धा, तच्चुम्बी चन्द्र एव चामरं तेन चारवे, अन्यत्समं पूर्ववदिति । अत्र त्रैलोक्ये नगरतादात्म्याध्यासः शम्भौ मूलस्तम्भतादात्म्याध्यासश्च मस्तकस्थचन्द्रे चामरतादात्म्याध्यासे कारणमिति परम्परितरूपं रूपकमलङ्कारः, तदुक्तं दर्पणे,—"यत्र कस्यचिदारोपः परारोपस्य कारणम् । तत्परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम् ॥" इति । अनुष्टुब् वृत्तम् ॥ २ ॥

हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम्।
कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥ ३ ॥
नमः सर्व्वविदे तस्मै व्यासाय कविवेधसे।
चक्रे पुण्यं सरस्वत्या यो वर्षमिव भारतम् ॥ ४ ॥

पूर्व्वमग्रेषकारणं सर्व्वाधारं शङ्करं संस्तुत्य, स्त्रीजनसुलभेन सारल्येन वात्सल्येन च अचिरादेव वाञ्छितार्थप्रपूरणं सम्भाव्य च तच्छरीरार्द्धजायां तदाश्रयां पार्व्वतीं स्तौति, हरेति।—हरस्य—पत्युः पशुपतेरित्यर्थः, कण्ठग्रहे—कण्ठाश्लेषे, यः आनन्दः,—आह्लादः, निरतिशयं सुखमित्यर्थः, तेन मीलिते—सङ्कुचिते, तदुपभोगात् ईषन्मुकुलिते इत्यर्थः, अक्षिणी—नेत्रे यस्या ताम्, स्वयंग्रहाश्लेषसुखस्मरणात्रीमित्यर्थः, अत एव कालकूटस्य—कालकूटाभिधेयस्य, कालकूटेति स्वनामप्रसिद्धस्येति यावत्, हरकण्ठस्थितस्येति भावः, ("काकोलकालकूटहलाहलाः·····विषभेदा अमी नव" इत्यमरः) विषस्य—गरलस्य, [अत्र कालकूटस्यैव विषविशेषार्थकतया तेनैव प्रकृतार्थसङ्गतौ पुनः विषपदोपादानं पौनरुक्त्यदोषमावहतीति नाशङ्कनीयं, गौर्बल्वीवर्द्दन्यायेनैव झटिति अर्थप्रतीतिसौकर्य्यार्थं सामान्यविशेषार्थपरशब्दद्वयप्रयोगस्य सुधीसम्मतत्वात्; यथा हि बल्वीवर्द्दस्य गोविशेषत्वेऽपि तस्य झटिति गोत्वेन बोधनार्थं "बल्वीवर्द्दमानय" इति उक्त्वापि पुनः "गामानय" इति कथयति, तथात्र कालकूटस्य विषविशेषत्वेऽपि झटिति तस्य विषत्वेन बोधनार्थं पुनर्विषशब्दप्रयोगः समादृत इति सुधीभिर्विभाव्यम। कालकूटेति विशेषणेन च विषस्य निरतिशयौत्कट्यं प्रकटीकृतम्] स्पर्शन—संश्लेषेण, सम्पर्केणेत्यर्थः, जातः,—उद्भूतः, मूर्च्छागमः,—मोहाविशः यस्याः तथाभूतामिव, उमां—गौरीं, नमामि—वन्दे; विषाक्तद्रव्यसंसर्गे हि दारुणगरलप्रभावेण श्वासप्रश्वासवशात् संस्पृशः शरीरेऽपि विषक्रियासम्भवात् मूर्च्छा नामभवनीया, तेन हि विषकण्ठस्य स्वामिनः सकण्ठग्रहालिङ्गनजनितानन्दविगलितकलेवरायाः सुभ्रायाः पर्व्वतदुहितुः विषोपहतवत् अच्छां निमीलनं सुसङ्गतमेवेति कविना सप्रणयालिङ्गनसुखोपभोगक्लृप्तनयननिमीलनेऽपि पतिकण्ठसङ्क्रामितविषक्रियाकृतमोहाविशत्वेन उत्प्रेक्षितमिति बोध्यम। अत्र प्रकृते पतिकण्ठालिङ्गनजनितानन्दकृते नेत्रनिमीलने विषसम्पर्कजनितत्वेन सम्भावनात् उत्प्रेक्षालङ्कारः। अनुष्टुब् वृत्तम् ॥ ३ ॥

अथ आत्मनः प्रकृष्टकवित्वाभिमानप्रकटनाय कविकुलशिरोमणिं भगवन्तं महर्षिं श्रीकृष्णद्वैपायनं स्तौति, नम इति।—सर्व्वविदे—सर्वं—सकलं वेदादिकं, गीतादिकलाकलापञ्चेत्यर्थः, वेत्ति—जानातीति तथोक्ताय, योगजसन्निकर्षेण सर्व्वज्ञायेत्यर्थः,

प्रायः कुकवयो लोके रागाधिष्ठितदृष्टयः ।
कोकिला इव जायन्ते वाचालाः कामचारिणः ॥ ५ ॥

विभुसमायेति यावत्, कविवेधसे—कवीनां—काव्यरचयितॄणां, वेधाः,—विधाता, तस्मै, कविभ्यः अभिनवमहाकाव्यरचनापद्धतिप्रदर्शनेन शिक्षाविधायिने इति यावत्, "अपारे काव्यसंसारे कविरेव प्रजापतिः" इति स्मरणात्, व्यस्यति—विभजति, वेदान्—ऋग्यजुःसामाथर्वलक्षणानिति व्यासः, तस्मै, नमः,—सङ्गाऽतीता प्रणतिरस्त्वित्यर्थः । [प्रथमतो वेदशास्त्रं अविभक्तवाङ्मयरूपेणावस्थितं, तच्च पराशरसुतो द्वैपायनः, ऋग्यजुःसामाथर्वाख्यया मन्त्र-ब्राह्मण-उपनिषद्विधया विभज्य, पञ्चमवेदभूतमहाभारतेन तथा वेदार्थोपनिबन्धृणा पुराणादिना बहुधा विहृतवान् इत्यस्य व्याससंज्ञेति प्रसिद्धिः] । प्राक्कथितकविविधाहृत्वाच्च रचितग्रन्थख्यापनेन विशिनष्टि, चक्रे इति ।—यः,—कविवेधा व्यासः इत्यर्थः, भारतं—तदाख्यं महाकाव्यं, भारतं वर्षमिव—भरतराजाधिकृतप्रदेशमिवेत्यर्थः, [अत्र "भारतम्" इत्येकस्यैव पदस्य श्लेषमहिम्ना उभयार्थपरतया "वर्षमिव" इत्यनेनाप्यन्वेति इति बोध्यम्] सरस्वत्या—वागधिष्ठात्र्या देव्या, पवित्रे,—ब्रह्मावर्त्तजनपदैकदेशप्रवाहिण्या स्वनामप्रसिद्धया नद्येत्यर्थः, पुण्ये—पवित्रे, चक्रे—कृतवान् ; तदुक्तं,—"भारताध्यापनात् पुण्यादपि पादमधीयतः । श्रद्दधानस्य पूयन्ते सर्व्वपापानि देहिनः ॥" इति । यथा विधाता निजनिर्म्माणकौशलस्य परां कोटिमेकत्रप्रदर्शयितुं सर्व्वर्त्तुसुमनोहरं विविधामूल्यरत्नाकरं, सर्व्वतः समधिगतसमुत्कर्षं भारतवर्षं बहिःप्रकटिताखिलकल्मषनाशाय अन्तःसलिलशालिन्या परमपवित्रप्रवाहिण्या सरस्वत्या स्रोतस्वत्या पवित्रीचकार, तथाऽयमपि योगबललब्धाखिलविद्याप्रकाशः वेदव्यासः सर्व्वसारसमलङ्कृतम् अर्थसकाव्यलक्षणसमन्वितं स्वप्रणीतं महाभारतं लोकातिशायिना अन्तर्निगूढभावप्रसविना वागधिदेवतायाः कलाविलासेन पवित्रतामनयदिति निष्कृष्टार्थः । अत्र महाभारतस्य भारतवर्षेण सह अवैधर्म्यसाम्यकथनादुपमाऽलङ्कारः, तेन च व्यासस्य विधातृतादात्म्यं व्यज्यते, तथा च उपमाऽलङ्कारेण रूपकालङ्कारध्वनिरिति बोध्यम् । अनुष्टुब् वृत्तम् ॥ ४ ॥

अथेदानीं श्लोकषट्केन लौकिककवीनां स्वभावं पर्य्यालोचयन्नाह, प्राय इति ।—रागः,—असदभिनिवेशः, तेन अधिष्ठिता—आक्रान्ता, दृष्टिः,—ज्ञानं येषां तथाविधाः, अत एव, कुकवयः,—कु—कुत्सिताः, कवयः,—काव्यप्रणेतारः, असत्काव्यरचयितारः इति यावत्, प्रायः,—बाहुल्येन, लोके—जगति, दृश्यन्ते इति शेषः, विषयरागान्धतया अज्ञानोपहतदृष्टीनां कुकवीनां यानि हि भूयांसि काव्यानि इह लोके दृश्यन्ते, तानि तु आखण्डारिकादिप्रदर्शितसत्यधानसूत्रततया केवलमसारतर-

सन्ति श्वान इवासङ्ख्या जातिभाजो गृहे गृहे।
उत्पादका न बहवः कवयः शरभा इव ॥ ६ ॥

विषयसम्बद्धतया च प्रेक्षावतां काव्यानुशीलनप्रवृत्तेः विघातकराणीति सर्व्वथा तानि सर्वेषामेवानिष्टसम्पादकतया हेयानीति भावः, तथा हि,—ते तु केवलं कौकिला इव वाचालाः,—श्रुतिमधुरया वाचा अज्ञानां चित्ताकर्षिणः, असम्बद्धप्रलापिन इति यावत, कामचारिणः,—आलङ्कारिकगणाननुमतशैलीमाश्रित्य यथाकामं विचरन्तः, सदाचारानभिज्ञाः स्वेच्छाचारिणश्च अमन्दः कवय इति भावः, जायन्ते—सम्पद्यन्ते, ते तु न खलूपादेयत्वं किमपि (इति असत्कविनिन्दा) ; कौकिलाः यथा कुहरवेण प्राकृतानां जनानां चेतांसि उन्मादयन्ति, तथैव पूर्व्वाचार्य्यैः परिशीलितं मार्गमननुसरन्तः स्वेच्छया काव्यकान्तारसञ्चरणपरायणाः ये हि केवल वाग्माधुर्य्येण जनानां मानसानि प्रीणयितुं यतन्ते, अध्यैतृणां सदनमतेषु कृत्येषु प्रवर्त्तन्ते तथा अकृत्याच्च निवर्त्तन्ते विघातुममर्थानां तेषान्तु कवीनां काव्यालापोऽपि वर्জ्जनीय इति तात्पर्य्यम्। एतान्यपि विशेषणानि कौकिलपक्षे व्याख्यायन्ते ; तथा हि,—रागः,—लौहित्यं, तेन आघ्रिष्टता—आक्रान्ता, तादृशिष्टा इत्यर्थः, दृष्टिः,—चक्षुः येषां तथाभूताः, वाचालाः, —असम्बद्धप्रलापिनः, वाचा—गिरा, कुहरवेणेत्यर्थः, आलाः,—आ—समन्तात्, लान्ति—आवर्जयन्ति, वशीकुर्व्वन्तीति यावत, [लातेः कर्त्तरि डः,] चेतः इति शेषः, ये ते तादृशाः, कामकारिणः,—कामं—मनसिजं, मन्मथेच्छामित्यर्थः, कुर्व्वन्ति—जनयन्तीति तादृशाः, कामोद्दीपकाः, जायन्ते—कामोद्दीपनविभावता यान्तीत्यर्थः। ["वाचालाः" इत्यत्र "अवाचालाः" इति पाठे—केचित् कवयः कौकिला इव अवाचालाः,—मधुरवाचः इति यावत्, तथा कामचारिणः,—यथाकामं विचरन्तः स्वप्रतिभाऽनुसारेण अभिनवं काव्यं कुर्व्वाणाः इत्यर्थः, जायन्ते, सुकवय इति शेषः। अस्मिन् पक्षे सुकविप्रशंसैवेयमिति बोध्यम्]। अत्र कुकविषु कौकिलानामवैधर्म्यसाम्यप्रतीतेः श्लिष्टविशेषणकृतश्लेषानुप्राणितोपमाऽलङ्कारः। अनुष्टुब् वृत्तम् ॥ ५ ॥

पुनरपि असङ्ख्यातान् असतः कवीन् निन्दति, सन्तीति।—गृहे गृहे—प्रतिगृहम्, असङ्ख्याः,—बहव इत्यर्थः, जातिः,—जन्म, ("जातिः सामान्यजन्मनोः" इत्यमरः) तन्नाम भजन्ते इति तथोक्ताः, केवलमुत्पत्तिभाजः, न तु अभिनवप्रबन्धरचनया किमपि जगतः उपकर्त्तुं क्षमाः, वैदग्ध्योक्तिभूयिष्ठां निरतिशयचमत्कारिवाधिकां वाचं विन्यस्तुमनीशा इत्यर्थः, श्वान इव—सारमेयाः इव, सन्ति—विद्यन्ते ; ते हि यथा भुक्तोच्छिष्टभोजनप्रियाः इतिइतरपटवश्च सर्व्वतः अमेध्यभोजनेच्छया यथा-

अन्यवर्णपरावृत्त्या बन्धचिह्ननिगूहनैः ।
अनाख्यातः सतां मध्ये कविश्चौरो विभाव्यते ॥ ७ ॥

कामं विचरन्ति, तदत् अगणनीया कुकवयः कुकाव्यरचनया कालं नयन्तः वाल्मीकिप्रभृतिभिः परकीयार्थप्रहृत्तिपरायणाः काव्यकलालापैः विहरन्तीति समन्तात् दृश्यन्ते, एवम्भूतास्तु नियतं निन्दनीया एवेति भावः । यदि हि अन्यदीयवर्णितवस्तुप्रहृत्तिभाजः निन्द्याः स्युः, तर्हि के ख्यातिमन्तः, इत्याशंसायामाह, उत्पादका इति ।—किन्तु बहवः,—भूयांसः, कवयः,—कवित्वख्यातिमधिगन्तुमिच्छातः काव्यकलाप्रणयनोत्सुकाः पुरुषाः, शरभा इव—अष्टापदमृगविशेषा इव, न उत्पादकाः,—न अभिनवरचनानिपुणा इत्यर्थः, सन्तीति पूर्वेणान्वयः, अस्त्ये एवैते विद्यन्ते इति तात्पर्यम् । शरभाः नाम कैचन अष्टपादाः ऊर्ध्वपादाश्च मृगविशेषाः, "अष्टापदूर्ध्वनयन ऊर्ध्वपादचतुष्पदः" इत्युक्तलक्षणाक्रान्ताः पुरा आसन्, अद्यापि कुत्रचिदेव विद्यन्ते किलेत्यनुश्रूयते, ते तु यथा दृष्टचराः, इदानीन्तु प्रायः कैरपि कुत्रापि अदृष्टतया कल्पनामात्रपर्यवसायिनः सन्यद्यन्ते, तदत् अलौकिकप्रतिभाबलेन अपूर्वकाव्यसौन्दर्यसाधनेश्वराः कवयस्तु दुर्लभा एव ; तथा च, ये पुनः अनुच्छिष्टकाव्यकामिनीलास्यलीलाविन्यासपटीयांसः, ते एव सत्कवितावनिताभोगसौभाग्यश्रीभाजनं भवन्तीति कवेराशयः । अत्र कुकविषु शरभाणामवैधर्म्यसाम्यप्रतिपादनादुपमाद्वयम्, अन्योऽन्यनैरपेक्ष्यतया स्थितेश्चानयोः संसृष्टिः । अनुष्टुब् वृत्तम् ॥ ६ ॥

अन्यार्थप्रहृत्तानां कवीनां चौर्यापराधं विशदीकृत्य विवृणोति, अन्येति ।—अन्यस्य, कवेरिति शेषः, वर्णानां—सुविन्यासेन विरचितानामक्षरसमूहानामिति भावः, परावृत्तिः,—विपर्य्यासेन रचनं, तया, अन्यत्र,—अन्ये वर्णाः,—गौरकृष्णादयः, तेषां परावृत्तिः,—वर्णान्तरेण तिरोधानं तया, तथा बन्धानां—गौडीवैदर्भ्यादीनां, चिह्नानां—शीलश्लीप्रभृतिलिङ्गानाञ्च, निगूहनैः,—गोपनैः, अन्यत्र,—बन्धचिह्नस्य—बन्धनग्रन्थनादिलिङ्गस्य निगूहनैः, अनाख्यातः,—अकथितः, (अपिरवाध्याहार्य्यः) अथ च, —न ना अना—असत्पुरुषः, कापुरुष इति यावत्, इत्थं ख्यातः,—सर्व्वत्र परिचितः, कविः, —काव्यप्रणेता, सतां—सहृदयानां मध्ये, चौरः,—तस्करः, विभाव्यते —ज्ञायते, परिचीयते इत्यर्थः ; यथा हि, तस्कराः प्राप्तदण्डाः सभ्यजनसमाजे कृष्णगौरादिस्वरूपं स्वकीयं रूपं गोपायन्ति, निगडादिपूर्वोपात्तबन्धनजनितं त्वक्चिह्नञ्च सर्व्वथैव निगूहन्ति, तथैव मुकवीनां मधुरसहृदीकासमरसस्रावित्वीनां वाचामपहारकाः कवयः कैवलं अकारादिवर्णमालां, तथा माधुर्य्यादिगुणयुतां वैदर्भीत्यादिरीति-

श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थमात्रकम्।
उत्प्रेक्षा दाक्षिणात्येषु गौड़ेष्वक्षरडम्बरः॥ ८॥
नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम्॥ ९॥

विशीभितां पद्मादिबन्धोपनिबद्धां सत्कविभणितिं यथाकामं विपरिणमय्य स्वकृतित्वेन तया जनान् विमोहयन्तीति भावः। अत्र कवौ चौरतादात्म्याध्यासात् श्लिष्टविशेषणकृतेन श्लेषेणानुप्राणितः रूपकमलङ्कारः। अनुष्टुब् वृत्तम्॥ ७॥

काव्योत्कर्षापकर्षविचारविरहितानां मन्दधियां विभिन्नदेशीयानां कवीनां रुचिवैचित्र्यं विवरितुं तत्तत्कविकृतिषु श्लेषादिबाहुल्यं प्रदर्शयति, श्लेषेति।—उदीच्येषु—उदीचि उत्तरस्मिन् देशे भवा ये तथाभूताः, शरावत्याः नद्याः पश्चिमोत्तरदेशवाहिन्या इत्यर्थः, तेषु कविषु, श्लेषप्रायं—श्लेषाणाम्—अनेकार्थाभिधानानां प्रायः,—बाहुल्यं यस्मिन् तथाभूतं, बहूनामिधायकपदोपनिबद्धमिति यावत्, काव्यबन्धं स्वाभीष्टतया परिगृह्णातीति दृश्यते इति शेषः, उदीच्याः कवयः प्रायेण श्लेषालङ्कारभूयिष्ठं काव्यं प्रणयन्तीति भावः; प्रतीच्येषु—पश्चिमदेशीयेषु, पाश्चात्येष्वित्यर्थः, अर्थमात्रकम्—अर्थस्य—वाच्यलक्ष्यव्यङ्ग्यभेदेन भिन्नस्य, मात्रकं—बाहुल्यं यस्मिन् तथाभूतम्, अर्थगाम्भीर्यपूर्णपदनिबन्धनमित्यर्थः; तथा च प्रतीच्यानाम् अर्थविशेषादर एव, न तु उदीच्यानामिव तेषां शब्दालङ्कारादिषु प्रयासबाहुल्यम इति मात्रपदेन प्रत्याय्यते; दाक्षिणात्येषु—आ विन्ध्याचलात् महासागरं यावत् ये भूमिभागाः, तदधिष्ठितेषु इत्यर्थः, उत्प्रेक्षा—संशयमूलकः प्रकृतस्य अप्रकृतरूपतया तादात्म्याध्यासः, तथा हि,—"भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना" इत्युक्तलक्षणालङ्कारविशेषः, आदियते इति शेषः, गौड़ेषु—वङ्गदेशात् प्रभृति उत्कलदेशसीमायामवस्थितां सुवर्णरेखां नदीं यावत् विस्तृतजनपदेषु, प्राच्येष्विति भावः, अक्षराणां—वर्णानां, डम्बरः,—ओजोगुणवतां समासभूयिष्ठानां पदानां बन्धकृतं रचनाचातुर्यमित्यर्थः; अत एव रीतिषु गौड़ी नाम एका पदसङ्घटना दृश्यते; तथा हि,—"ओजःप्रकाशकैर्वर्णैर्बन्धः आडम्बरः पुनः। समासबहुला गौड़ी—" इत्यालङ्कारिकाः। एतेन एतदुक्तं भवति, यत्, सर्व्वत्रैव कविषु कश्चित् कश्चित् गुणो वर्त्तते, स तु न सहृदयप्रीतिकरः, यत्र तु सर्व्व एव गुणाः पूर्णतया वर्त्तन्ते, स एव सत्कविषु श्रेयान्, अन्ये केवलं तदाख्याभावभाजः इति भावः। अनुष्टुब् वृत्तम्॥ ८॥

साम्प्रतं सहृदयप्रीतिकररचनाप्रकारं विवक्षुः, साधारणकविभिरुपनिबद्धेषु

किं कवेस्तस्य काव्येन सर्व्ववृत्तान्तगामिनो ।
कथेव भारती यस्य न प्राप्नोति दिगन्तरम् ? ॥ १० ॥

काव्येषु सामाजिकजनानामभीप्सितगुणसमुदायानां यत्नेन अतीव दुर्लभेत्याह, नव इति ।—नवः,—नूतनः, अन्यैः कविभिरनिबद्ध इति यावत्, अर्थः,—अभिधेयः, अभिनवोपनिबद्धं वस्त्वित्यर्थः, ("अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः) अग्राम्या—अधमजनप्रयुज्यमानी वाक्प्रपञ्चः ग्राम्यः, स च दोषविशेषतया ख्यातः, तद्रहिता, जातिः,—काव्यानामुत्पत्तिः, अभिनवदोषविरहितकाव्यरचनमित्यर्थः, श्लेषः, —शब्दार्थाभ्यवृत्तिः श्लिष्टपदपर्य्यालोचनाजनिताऽलङ्कारविशेषः, आक्लिष्टः,—अदर्बोधः, अगूढतया स्फुटविभावानुभावादिभिः व्यक्तीकृतः इति यावत्, रसः,—शृङ्गारादिः, स्फुटः,—सुखसंवेद्यतया श्रवणसमकालमेव स्फुरकः, तथा विकटः,—वैकट्यं हि पदानां वृत्त्यप्रायत्वं, तद्गुणावाश्रितः, बन्धः,—औजोगुणप्रकाशकैः आडम्बरबहुलैः गौडरीत्यनुकूलैः वर्णैः गुम्फनमित्यर्थः, एतत् कृत्स्नं—सर्व्वम्, अभिनवत्वस्थिरचित्तत्वं, ग्राम्यादिदोषविनिर्मुक्तत्वं, सुबोध्यश्लेषालिङ्गितत्वं, स्फुटरसत्वं, गौडरीतिबन्धनश्चेत्यर्थः, एकत्र—एकस्मिन्, कवयितरीति शेषः, दुष्करं—दुर्लभमिति यावत् ; एते काव्योत्कर्षविधायकाः गुणा एकस्मिन् साधारणकविनिबद्धे न दृश्यन्ते, सत्कवीनां काव्यन्तु प्रोक्तसर्व्वगुणशालितया सहृदयप्रीतिकरमिति तदेव सुपाठ्यमिति भावः । अनुष्टुब् वृत्तम् ॥ ९ ॥

प्रागुक्तगुणवतो रचनैव सर्व्ववाद्रियते, अत एव ये हि कवयः प्रोक्तगुणशालितया काव्यं रचयितुमनीशाः, तेषां कवित्वख्यातिलाभाय काव्यप्रणयनप्रयासो हास्यायेति प्रकटयति, किमिति ।—यस्य—मन्दबुद्धेः कवियशःप्रार्थिनः काव्यरचयितुः, कथा—सन्दर्भवाक्, सर्व्ववृत्तान्तगामिनी—सर्व्वविषयप्रकाशिनी, यद्वा, सर्व्वाणि यानि वृत्तानि—वर्णमात्रागणसमार्द्धसमविषमात्मकानि विविधानि छन्दांसि, तेषाम् अन्तम्—अवसानं गच्छति या तथाभूता, तत्तद्वृत्तविशेषेण सामाजिकजनहृदयग्राहिणी इत्यर्थः, भारतपक्षे, —द्वैपवदखिलगूढार्थप्रकाशिनी, वेदार्थानस्मृतत्वेन च कृत्स्नतत्त्वार्थविबोधिनी, प्रागुक्तनवार्थादिसर्व्वगुणाङ्गामिनी च, भारतीव—महाभारतकथा इव, दिगन्तरम्—अन्यां दिशं, न प्राप्नोति—न गच्छति, अभिनवया प्रतिभया असौष्ठवया स्वव्युत्पत्त्या च झटिति जनानां मानसानि नावर्ज्जयति ; [एतेनास्य कवेरिदम् अनवद्यं काव्यं भारतीया कथा इव प्रोक्तगुणगणयोगात् सर्व्वोत्कर्षतामागतमिति ध्वनितम्] भगवतः द्वैपायनस्य महाकाव्यस्य सर्व्वलोकसमादृतत्वं दृश्यते ; तथा हि,—"नारदोऽश्रावयद्देवानसितो

उच्छ्वासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती।
कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः? ॥ ११ ॥
कवीनामगलद्दर्पो नूनं वासवदत्तया।
शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम् ॥ १२ ॥

दैवलः पितॄन्। गन्धर्व्वयक्षरक्षांसि श्रावयामास वै शुकः॥" इति। ["न प्राप्नोति दिगन्तरम्" इत्यत्र "न व्याप्नोति जगत्त्रयम्" इति पाठान्तरम्] तस्य कवेः काव्येन किम्?—कवित्वयशोऽधिगन्तये काव्यविरचने यतमानस्य दुर्मेधसः कवेः काव्येन न किमपि प्रयोजनमित्यर्थः; यत् सर्व्वत्र न समादियते, तत् काव्यं विफलमेवेति भावः। अनुष्टुब् वृत्तम् ॥ १० ॥

अधुना बन्दारकवन्दितगुणान्, केवलं लोकस्थितये एव, न तु यशसे सतां काव्यानां विधातॄन् कवीनामीश्वरान् सुकवीन् अष्टाभिः श्लोकैः प्राधान्येन स्तोतुं प्रवृत्तः प्रथमं स्वानौद्धत्यप्रदर्शनाय तानभिवन्दते, उच्छ्वासेति।—येषां वक्त्रे—वदने, सरस्वती—वाग्देवी, नियतं नृत्यतीति शेषः, उच्छ्वासस्येव—सुदीर्घनिश्वासमारुतत्यागस्येव उच्छ्वासस्य वाग्विश्रान्तिस्थानस्य, परिच्छेदसमाप्तेरित्यर्थः, अन्ते—अवसानेऽपि, अखिन्नाः, —अनलंरचने अभिनवस्वतःप्रतिभातबलानां विन्यासेऽपि अम्लानाः इति यावत्, आख्यायिकाकाराः, —आख्यायिकां—इतिहत्तं, कुर्व्वन्तीति तथोक्ताः, कथारचयितार इति यावत्, ते—प्रसिद्धाः, कवीश्वराः, —कविश्रेष्ठाः, कथं न वन्द्याः?—अपि तु सर्व्वतोभावेन सर्वैः गुणग्राहिभिरसदुचितचेतसा अर्चनीयाः खलु, असूयया न हि वयं दोषमात्रानुसन्धातारः, परन्तु गुणेषु आदरप्रदर्शनपरा इति कवेराशयः। अनुष्टुब् वृत्तम् ॥ ११ ॥

इदानीं सुकविकुलावतंसमभिनवसर्व्वगुणभूषितकथारचयितारं महाकविं सुबन्धुं तद्रचितप्रबन्धप्रशंसया प्राधान्येन प्रथमतः प्रस्तौति, कवीनामिति।—कर्णस्य—राधेयस्य दुर्य्योधनसुहृदः स्वनामख्यातस्य च वीरविशेषस्य एव, गोचरः,—स्थानं, तम्, अन्यत्र,—कर्णः,—कवीनां स्त्रीयं स्त्रीयं श्रवणमेव, गौः,—इन्द्रियं, तस्य चरं—विषयं, कवीनां श्रवणपथातिथित्वमित्यर्थः, कर्णसमीपे एकपुरुषघातिनी शक्तिरस्त्रीति पाण्डुतनयानां श्रुतिपथपतनमात्रकालमिति यावदिति वा, गतया—प्राप्तया, वासवः,—इन्द्रः, तेन दत्ता तया; अन्यत्र,—वासवदत्ताचरिताख्यापकग्रन्थस्य तया, शक्त्या—तदाख्येन अमोघशक्तिग्रहणावसरे प्रीतेन इन्द्रेण कर्णाय प्रदत्तेन अस्त्रविशेषेणेत्यर्थः, पाण्डुपुत्राणां —पाण्डवानां युधिष्ठिरादीनामिव, वासवदत्तया—तदाख्यसन्दर्भेण, कवीनां दर्पः,—

पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः ।
भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते ॥ १३ ॥
अविनाशिनमग्राम्यमकरोत् सातवाहनः ।
विशुद्धजातिभिः कोषं रत्नैरिव सुभाषितैः ॥ १४ ॥

अहङ्कारः, नूनं—निश्चितम्, अगलत्—ध्वस्तमवापेत्यर्थः । इन्द्रदत्तामैकपुरुषघातिनौ शक्तिमवेत्य पाण्डवा यथा विजयाशारहिता हृतदर्पा आसन्, तथा महाकवेः सुबन्धोः कृतेः श्लोक्तगुणराजिभूषितस्य वासवदत्तासन्दर्भस्य चारुतामवलोक्य सर्वे कवयः ततः समुत्कर्षं मनसाऽपि कर्तुमक्षमा इत्याहङ्कारो अभवन्निति निष्कर्षः । [एतेन वासवदत्तामरसप्रबन्धस्यातीव समुत्कर्ष उक्तः ; तथा महाकविसुबन्धुविरचितकथावत् एषा श्रीहर्षचरितकथाऽपि सर्वगुणालङ्कृता सहृदयानां हृदयग्राहिणी च इत्यभिप्रायो व्यज्यते] । उपमाऽलङ्कारः । अनुष्टुब् वृत्तम् ॥ १२ ॥

अथ सुकवीनामग्रेसरस्य कविकुलतिलकस्य महाकवेः हरिचन्द्रस्य गद्यकाव्यस्य प्राधान्यं प्रतिपादयति, पदैरिति ।—पदानां—सुप्तिङन्तानां, बन्धः,—वैदर्भ्यादिरीत्या रचनाविशेषः, नृपपक्षे—स्वमण्डलावष्टम्भश्च, तेन उज्ज्वलः,—समुल्लासितः, हारी—मनोहरः, हारालङ्कारशाली च, ["अहारी" इति पाठे—नास्ति हारी—हृद्यो यस्मात् तथाभूतः, अन्यत्र,—न हरति कस्यापि धनमित्यहारीत्यर्थः] कृता—सम्पादिता, वर्णानाम—अक्षराणां, ब्राह्मणादीनाञ्च, क्रमेण—रीतिपरिपाट्या, मर्य्यादानुसारेण च, स्थितिः,—सन्निवेशः, अवस्थानञ्च यस्मिन् येन वा तथोक्तः, भट्टारः, —पूज्यः, हरिचन्द्रः,—तदाख्यः कश्चित् कविविशेषः, तस्य गद्यबन्धः,—गद्यग्रन्थः, ["पद्यबन्धः" इति पाठान्तरं] नृपः,—राजा, स इवाचरतीति नृपायते—राजवत् समुल्लसति, सर्वोत्कर्षेण वर्त्तते इत्यर्थः । हरिचन्द्रकवेः काव्यं सर्वश्रेष्ठमिति तात्पर्यम् । अनुष्टुब् वृत्तम् ॥ १३ ॥

अपरमपि कविश्रेष्ठं सातवाहनं प्रस्तौति, अविनाशिनमिति ।—सातवाहनः,—तदाख्यः कविः, विशुद्धा—निर्दोषा, जातिः,—अभिनवकाव्यार्थानामुत्पत्तिः, अलङ्कारविशेषो वा येषु तथाविधैः, सुभाषितैः,—हृदयग्राहिभिः, वाक्यैः, रत्नैरिव—मण्यादिभिरिव, पदरत्नसमूहैरित्यर्थः, अविनाशिनम—अनश्वरम्, अतिरमणीयत्वेन चिरस्थायिनमिति भावः, अग्राम्य—ग्राम्यदोषवर्जितं, कोषं—काव्यमञ्जूषाम्, अकरोत्—विदधौ ; अत्र रत्नेन सह सुभाषितानामवैधर्म्यसाम्यप्रतीतेरुपमाऽलङ्कारः । अनुष्टुब् वृत्तम् ॥ १४ ॥

कीर्त्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला।
सागरस्य परं पारं कपिसेनेव सेतुना॥ १५॥
सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः।
सप्ताकैर्यशो लेभे भासो देवकुलैरिव॥ १६॥

प्रवरसेननामकमपरमपि कवीन्द्रं प्रशंसति, कीर्त्तिरिति।—प्रवरसेनस्य—तदाख्यस्य कवेः, अत्यन्त,—प्रवे—रत्नार्थैरकत्वात् प्रवेत्यर्थः, रसः,—रागो येषां ते, प्रवरसाः,—वानराः, तेषामिनः,—स्वामी तस्य, ("इनः पत्यौ नृपार्कयोः" इति मेदिनी) वानरराजस्य सुग्रीवस्यार्थः, कीर्त्तिः,—एकत्व—काव्यप्रणयनजम्, अपरत्व—वैदेह्याः समुद्ररणजनितं यशः, ("यशः कीर्त्तिः ममत्ना च" इत्यमरः) कुमुदवत्—कैरववत्, उज्ज्वला—प्रदीप्ता धवला च; यथा,—कृः,—पृथिवी, तस्याः सुत—आनन्दः, तया उज्ज्वला—भासुरा; अन्यत्र—कुमुदेन—तदाख्येन वानरसेनापतिना, उज्ज्वला—प्रशस्ता, तस्य शौर्य्यसमुद्भासिता इत्यर्थः, सेतुना—तदाख्यकाव्यग्रन्थेन, अन्यत्र—तदाख्यया प्रसिद्धेन श्रीरामकृतसेतुना, कपिसेनेव—वानरचमूरिव, सागरस्य परं पारं प्रयाता—गता। यथा वानरसेना सेतुबन्धन सागरस्यौर्य्य अपरपारास्थितां लङ्कां गता, तथा प्रवरसेनस्य यशः तदीयकाव्यग्रन्थस्य प्रचारेण सागरमपि उत्तीर्य्य देशान्तरं गतमिति निर्गलितोऽर्थः। अनुष्टुब् वृत्तम्॥ १५॥

अथ दृश्यकाव्यरचयितारमतीव प्राचीनं भासकविं प्रशंसति, सूत्रेति।—भासः,—तदाख्यः कविः, सूत्रं नाटकीयप्रमुखं धरतीति सूत्रधारः,—नाटकाभिनेतृप्रधानपुरुषविशेषः, स्थपतिश्च, तेन कृतः आरम्भो येषां तैः, बद्धो भूमिका—अनुकरणावस्थाविशेषेण वेशपरिवर्त्तः, कक्षा च, येषु तथोक्तैः, पताका,—बीजं विन्दुः पताका च प्रकरी कार्य्यमेव च। अथप्रकृतयः पञ्च" इति पञ्चविधानां तृतीया अर्थप्रकृतिः, सा च "यद्वृत्तन्तु परार्थे स्यात् प्रधानस्योपकारकम्। प्रधानवच्च कल्पेत सा पताकेति कीर्त्यते॥" इत्युक्तलक्षणा, वैजयन्ती च, तया सहितैः, देवकुलैरिव—देवमन्दिरैरिव, नाटकैः,—रूपकभेदैः, उक्तञ्च दर्पणकारेण,—"तद्रूपारोपात्तु रूपकम्" इति "नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्। विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः॥ सुखदुःखसमुद्भूति नानारसनिरन्तरम्। प्रख्यादिका दशपरास्तस्यारङ्काः परिकीर्त्तिताः॥ प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्। दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः॥ एक एव भवेदङ्गी शृङ्गारी वीर एव वा। अङ्गानि सर्वे रसाः; सर्वे कार्य्यं निर्व्यहणेऽद्भुतम्॥ चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृत-

निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।
प्रीतिर्मधुरसाद्रासु मञ्जरीष्विव जायते ? ॥ १७ ॥
समुद्दीपितकन्दर्पा ज्ञातगौरीप्रसाधना ।
हरलीलेव नो कस्य विस्मयाय बृहत्कथा ? ॥ १८ ॥

पूरुषा: । गोपुच्छायसमायन्तु बन्धनं तस्य कीर्त्तितम् ॥" इति च । यश:,—कीर्त्ति, क्लेम—पाप । यथा हि कारुप्रवर: बहुकचोपशोभितं सुमनोहरं देवमन्दिरं निर्म्माय अपूर्व्वशोभासम्पत्तये उपरि पताकां स्थापयति, तद्वत् नाट्यरचनाकुशल: महाकवि: भास: बहुभि: श्लेषै: अभिनीयमानं पताकास्थानोपशोभितमभिनवनाटकं विरचय्य जगति स्वीयामसीमां कीर्त्तिमस्थापयदिति तात्पर्य्यम् । उपमाऽलङ्कार: । अनुष्टुब् वृत्तम् ॥ १६ ॥

अथ कविकुलकलहंसं महाकाव्ये नाटके च अनिर्व्वचनीयां प्रतिभां प्रदर्श्य जगति समं सर्व्वजनवन्दनीयतामधिगतवन्तं महाकविं कालिदासं प्रशंसति, निर्गतास्विति । —निर्गतासु—स्वभवकवितया पदार्थचिन्तनप्रयासं विनैव स्वत: स्वमुखात् समुच्चरितासु, उच्चरितसमकालमेवेत्यर्थ:, आस्तां तावदर्थावगतिरिति भाव:, अभिनवमुद्भिन्नासु च, मधुरा:,—मनोहारिण्य:, सान्द्रा:,—घना:, गाढ़तया प्रयुक्ता: सुरसा इति यावत्, अन्यत्र—मधु विद्यते यासु ता मधुरा:,—मकरन्दबाहुल्य इत्यर्थ:, सान्द्रा:,—घना:, पूर्णावस्थां गता: मकरन्दपरिपूर्णा: इति भाव: ; तथाविधासु मञ्जरीष्विव—कुसुमवल्लरीष्विव, कालिदासस्य—तन्नामकस्य सर्व्वजनप्रसिद्धस्य महाकवे:, सूक्तिषु—शोभनेषु वाक्येषु, गलदपारमाध्वीभरितासु इत्यर्थ:, कस्य—जनस्य वा, प्रीति: न, भवतीति शेष: ; अपि तु सर्व्वस्यैव सहृदयस्य असहृदयस्य च समा प्रीतिर्भवत्येवेत्यर्थ:। ["मधुरसान्द्रासु" इत्यत्र "मधुरसार्द्रासु" इति पाठे—मधु—चौद्र, तद्वत् अतीव सुस्वाद इति भाव:, रस:,—शृङ्गारादि: ; अन्यत्र,—मधुरस:,—मकरन्द:, तेन आर्द्रासु—सुसिक्तासु, पूर्णास्विति भाव:]। उपमाऽलङ्कार: । अनुष्टुब् वृत्तम् ॥ १७ ॥

इदानीं बृहत्कथाकारचयितारं प्राधान्येन प्रशंसति, समुद्दीपितेति ।—समुद्दीपित:, —प्रकाशित:, कन्दर्प:,—काम: यया, बहूनां कामिजनानां वर्णनश्रवणात् सहृदयानां मन्मथोद्रेकात् रतिस्थायिभावक:, शृङ्गाररस: समुद्भवति हि ; तथा चोक्तम्,— "ऋतुमाल्यालङ्कारप्रियजनगान्धर्व्वकाव्यसेवाभि: । उपवनगमनविहारै: शृङ्गाररस: समुद्भवतीति ॥" तथोक्ता, अन्यच,—समुद्दीपित:,—नैदाघलीन दग्ध:, कन्दर्प:,—

आख्यराजकृतोत्साहैर्हृदयस्थैः स्फुटैरपि।
जिह्वान्तः क्रुध्यमाणेव न कवित्वे प्रवर्त्तते ॥ १९ ॥
तथाऽपि नृपतेर्भक्त्या भीतो निर्वहणाकुलः।
करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम् ॥ २० ॥

कामः, यस्यां तथोक्ता, यद्वा,—समुद्दीपितः,—प्रज्वलितः, कन्दर्पः,—कामः, यस्यां तथाभूता, मदनप्रकटीकृतविविधविलासा इत्यर्थः, (पुरा हि भगवतः शङ्करस्य समाधिभङ्गाय मनसिजेन विविधस्य विलासस्य अनुष्ठापितत्वादिति) कृतम्—अनुष्ठितं, गौर्य्याः,—दुर्गायाः, प्रसाधनम्—आराधनं, नायकेन नरवाहनदत्तेनेति भावः, यस्यां तथाभूता; अन्यत्र,—कृतम्—अनुष्ठितं, गौर्य्या—पार्व्वत्या, (कर्त्तृभूतया) प्रसाधनम्—आराधनं, हरस्येति भावः; यद्वा,—गौर्य्याः (कर्म्मभूतायाः) प्रसाधनम्—अलङ्करणं, हरेण कर्त्तेति भावः, यस्यां तथाभूता, बृहत्कथा—तदाख्यम् इतिहासकाव्यं, हरलीलेव—शिवविलास इव, कस्य—जनस्य, विस्मयाय—आश्चर्य्याय, गर्व्वपरिहाराय वा, नो? भवतीति शेषः; अपि तु सर्व्वस्यैव कवेः सामाजिकजनस्य च विस्मयाय भवतीत्यर्थः। उपमाऽलङ्कारः। अनुष्टुब् वृत्तम् ॥ १८ ॥

अपरञ्चाख्यराजनामानं कविं प्रस्तौति, आख्यैति।—आख्यराजो नाम कश्चित् कविः, तेन कृताः,—प्रणीताः, ये उत्साहाः,—स्वीयाद्भीमाख्यव्यवसायफलभूताः सन्दर्भविशेषाः, तैः, हृदयस्थैः,—चित्तनिहितैः, मनसा पर्य्यालोचितैरित्यर्थः, अपि—किंवा, स्फुटैः,—कदाचित् स्मरणपदवीं गतैः सद्भिः, जिह्वा—रसना, सदीयेति भावः, अन्तः-क्रुध्यमाणेव—केनचित् बलात् हृदयाभ्यन्तरं नीयमानेवेत्यर्थः, वृथा तव वाङ्निःसारणप्रयास एतेषाम् उत्साहानां पुरस्तादित्याशयेनेति भावः, कवित्वे—कवित्वं प्रकटयितुमित्यर्थः, न प्रवर्त्तते—नोत्साहते; उत्साहसन्दर्भं दृष्ट्वा नीरसः, यत् तदयं मम सन्दर्भः न सुष्ठु प्रतिभातुं शक्नोतीति भावः। ["आख्यराजकृतोत्साहैः" इत्यत्र आख्यराजकृतोच्छ्वासैः" इति पाठे—उच्छ्वासाः,—तदाख्यकाव्यभेदास्तैरित्यर्थः। अत्र प्रकृतायाः कवित्वप्रकटनाऽप्रवृत्तायाः जिह्वायाः, अप्रकृतेन अन्तःक्रुध्यमाणत्वेन संशयमूलकतादात्म्याध्यासादुत्कटैककोटिकसन्देहोदयात् उत्प्रेक्षाऽलङ्कारः। अनुष्टुब् वृत्तम् ॥ १९ ॥

इदानीं पूर्व्वोक्तमुक्त्वापेक्षया आत्मनो न्यूनत्वेऽपि काव्यप्रणयने हेतुं प्रकटयति, तथाऽपीति।—तथाऽपि—प्राचां सूक्तिभिः मे जिह्वायां अन्तःक्रुध्यमाणत्वेऽपि, नृपतेः,—राज्ञः शूद्रकस्य, स्वचरितवर्णने मम प्रवर्त्तकस्येति भावः, भक्त्या—अनुरागपारवश्येनेति भावः, निर्वहणे—परिसमाप्तौ, आकुलः,—महाराजस्य चरितकथायाः परिसमाप्ति-

सुखप्रबोधललिता सुवर्णघटनोज्ज्वलैः ।
शब्दैराख्यायिकाऽऽभाति शय्येव प्रतिपादकैः ॥ २१ ॥

भवेन्न वेति संशयान इति यावत्, अत एव भीतः,—सहृदयसमाजे महाराजस्य समीपे वा किमु अप्रतिभो भविष्यामीति त्रस्तः सन्, ["भक्त्याभीतः" इति भक्त्या अभीतः इति विशेषणपक्षे तु—भक्त्या, अहम् अभि—समन्तात्, इतः,—युक्तः ; यद्वा,—अकपट-राजभक्तिवर्त्मना प्रीत्याहिततया असङ्कुचितचेता इत्यर्थः] आख्यायिका—इतिहास एव, अम्भोधिः,—समुद्रः, राज्ञः सुविस्तृतचरितरूप इत्यर्थः, तस्मिन्, जिह्वया—रसनया, प्लवनं—सन्तरणमेव, चापलं—चपलकर्म, चापल्यं वा, करोमि—विदधामि; उडुपेन वारिधितरणवत् जिह्वया तच्चरितोदधितरणम् अत्यन्तमसम्भावितमपि भक्तिभावमाश्रित्य केवलं तव प्रवृत्तो भवामीति तात्पर्यम् । अत्र आख्यायिकायामुपमानभूतस्य अम्भोधेः स्वादात्म्याध्यासात् रूपकमलङ्कारः । अनुष्टुब् वृत्तम् ॥ २० ॥

अथ प्रेक्षावतामाख्यायिकायां प्रवृत्तिं जनयितुं तां सामान्येन सौन्दर्यकथनपरः सर्गं विवृणोति, सुखेति ।—सुखस्य—आलोचनाजनितस्य निरतिशयानन्दस्य, प्रबोधः,—प्रकृष्टानुभवः ; यद्वा,—सुखेन प्रबोधः,—प्रकृष्टं व्यवहारादीनां ज्ञानम्, अथवा,—कान्तासम्मिततया च कोमलया हृदयग्राहिण्या, न तु श्रुतिदुःखादिवत् कठोरया वाचा प्रदत्तसदुपदेशजनितः बोधः ; (उक्तञ्च मम्मटभट्टेन,—"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥" इति) तेन ललिता—मनोहारिणी, अन्यच,—सुखस्य—निधुवनानन्दस्य, प्रबोधः,—विबोधनत्वम्, रतिरभोद्भासकमित्यर्थः, ललितं—शृङ्गारानुगुणः चेष्टाविशेषः यस्यां तथाभूतेत्यर्थः, आख्यायिका—उपलक्ष्यार्थविषयकं गद्यकाव्यं, (तथा हि, आलङ्कारिकाः,—"आख्यायिका कथावत् स्यात् कवेर्वंशानुकीर्त्तनम् । अस्यामन्यकवीनाञ्च वृत्तं पद्यं क्वचित् क्वचित् ॥" इति) सुवर्णानां—सु—सुप्रयुक्तानां, वर्णानाम्—अक्षराणाम् ; (उक्तञ्च दर्पणे,—"एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग् भवति" इति) अन्यत्र,—सुवर्णानां—हेम्नां, घटनया—योजनया, अन्यत्र,—कारुकर्मनैपुण्येन, उज्ज्वलैः,—प्रदीप्तैः, मनोरमैरित्यर्थः, प्रतिपादकैः,—विवक्षितार्थ-बोधकैः, शब्दैः ; अन्यत्र,—प्रतिपादकैः,—सोपानविशेषैः, चरणन्यासपीठैर्वा, शय्येव —पर्यङ्क इव, आभाति—राजते । ["प्रतिपादकैः" इत्यत्र "प्रतिपादुकैः" इति पाठान्तरम्] । अत्राख्यायिकायाः शय्यया सहावैधर्म्यसाम्यप्रतिपादनात् श्लिष्टविशेषणकततया श्लेषानुप्राणितोपमाऽलङ्कारः । अनुष्टुब् वृत्तम् ॥ २१ ॥

दर्शयन्ती मुखे खेदं प्रस्खलन्ती पदे पदे।
कथञ्चित् नीयते शय्यां कथा नवबधूरिव ॥ २२ ॥
जयति ज्वलत्प्रतापज्वलनप्राकारकृतजगद्रक्षः।
सकलप्रणयिमनोरथसिन्धुश्रीपर्व्वतो हर्षः ॥ २३ ॥

अथ चिकीर्षितव्याख्यायामाख्यायिकायां सर्वेषां सामाजिकानां युगपत्साम्मुख्यकरणं दुष्करमेवेत्याह, दर्शयन्तीति।—मुखे—प्रारम्भे, वदने च, खेदं—विमनायमानानां सामाजिकानां विरागमिति यावत्, अन्यच,—सुरतविधौ अनिच्छाजनितम् अननुरागमित्यर्थः, दर्शयन्ती—प्रकटयन्ती, तथा पदे पदे—प्रतिपदप्रयोगान्ते इति भावः, अन्यत्र,—प्रतिपादविच्छेदमित्यर्थः, प्रस्खलन्ती—व्याकरणालङ्कारादिभिरनुशीलितपथात् अनियतं प्रच्यवमाना, अन्यत्र,—नवबधूचितलज्जया सङ्गसाध्वसेन वा पतिमुपगन्तुमनिच्छन्ती, अत एव नवबधूरिव—नवोढा नायिकेव, कथा—आख्यायिकाकाव्यं, कथञ्चित्—महता कष्टेन, अतिप्रयत्नेनेत्यर्थः, शय्यां—सहृदयहृदयरूपविश्रान्तिस्थानम्, अन्यत्र,—शयनं, नीयते—प्राप्यते। अत्र नवबध्वा सह कथायाः साम्यप्रदर्शनात् श्लिष्टविशेषणोत्थापिततया श्लेषानुप्राणितोपमाऽलङ्कारः। अनुष्टुब् वृत्तम् ॥ २२ ॥

साम्प्रतं स्ववर्णनीयकाव्यनायकमाशिषा संवर्द्धयति, जयतीति।—ज्वलन्—दीप्यमानः, प्रताप एव ज्वलनम्—अग्निः, तदेव प्राकारः,—सालः, प्राचीर इत्यर्थः, ("प्राकारो वरणः सालः" इत्यमरः) तेन कृता जगतां रक्षा येन तथाभूतः; प्राकारवेष्टिता पुरी यथा अनायासेन संरक्षितुं शक्यते, तथा विशालमपि साम्राज्यं महाप्रतापेन येन एकपुरमिव सुखं पालयाञ्चक्रे, एतेनास्याप्रतिमशौर्यशालित्वं प्रतिपादितमिति, तथा सकलानां—समग्राणां, प्रणयिनाम्—अर्थिनां, मनोरथस्य—अभीष्टस्य, सिन्धौ—सम्पूरणे, श्रियां—सम्पदां, पर्व्वतः,—गिरिः, लक्ष्मीनिवासभूताचलः इत्यर्थः; लक्ष्मीसद्मभूतः अनल्परत्नप्रभवः गिरिः यथा समागतानां धनार्थिनामीप्सितं पूरयति, तथैव यो हि अकातरमर्थिषु धनं तोयवत् विकीर्य्य प्रार्थिसार्थमनोरथमपपूरत्, एतेनास्यासीमदानशौण्डत्वं प्रतिपादितमिति ज्ञेयम्; हर्षयति—आनन्दयति जनानिति हर्षः,—तदाख्यः नृपतिः, जयति—सर्व्वोत्कर्षेण वर्त्तते। ["जयति ज्वलत्" इत्यत्र "जय ज्वलत्" इति पाठे—त्वं जय इति व्याख्यायते]। अत्र प्रतापे ज्वलनतादात्म्याध्यासात्, तथा राजनि हर्षे च श्रीपर्व्वतामेदारोपात् निरङ्गं रूपकमलङ्कारः। आर्य्या वृत्तम् ॥ २३ ॥

एवमनुश्रूयते,—(१) पुरा किल भगवान् स्वलोकमधितिष्ठन् परमेष्ठी विकासिनि पद्मविष्टरे समुपविष्टः, सुनासीरप्रमुखैर्गीर्वाणैः परिवृतो ब्रह्मोद्याः कथाः कुर्व्वन् अन्याश्च निरवद्या विद्यागोष्ठीर्भावयन् कदाचिदासाञ्चक्रे । (२) तथाऽऽसीनञ्च तं त्रिभुवनप्रतीच्यं मनुदक्षचाक्षुषप्रभृतयः प्रजापतयः सर्व्वे च सप्तर्षिपुरःसरा महर्षयः सिषेविरे ; केचित् ऋचः स्तुतिचतुराः

(१) एवमिति ।—अनुश्रूयते—परम्परया आकर्ण्यते । किलेति—प्रसिद्धौ । भगः,—ऐश्वर्य्यादिषट्कः, विद्यते अस्येति भगवान्, तदुक्तम्,—"ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनः ॥" इति । स्वस्य आत्मनः लोकं, स्वलोकं—ब्रह्मलोकमित्यर्थः । अधितिष्ठन्—समादरेण तदयोगक्षेमादिकमादधन् । परमे—सर्वोत्कृष्टे स्थाने तिष्ठतीति परमेष्ठी—ब्रह्मा । विकासिनि—विकस्वरे । पद्ममेव—कमलमेव, विष्टरः,—आसनं, तस्मिन्, पद्मविष्टरे । सुनासीरप्रमुखैः,—इन्द्रप्रभृतिभिः, ["हरयश्वाः सुनासीरः पुरुहूतः पुरन्दरः" इत्यमरः । सुष्ठु नासीरः,—अग्रगं सैन्यं यस्य सः, इन्द्रः इति व्युत्पत्तिः] । गीर्वाणैः,—देवैः, ("गीर्वाणा दानवारयः" इति देवपर्य्यायेष्वमरः) । परिवृतः,—चतुर्दिक्षु परिवेष्टितः, तस्य चतुराननत्वात् । ब्रह्मोद्याः,—ब्रह्म—वेदः, ("वेदस्तत्त्वं तपो ब्रह्म" इत्यमरः) परमात्मा वा, उद्यन्ते—कथ्यन्ते, कीर्त्यन्ते इति यावत्, याभिः तथाभूताः, [वदः सुपि क्यप् च" (३।३।१०६ पा०) इति भावे क्यप्, कर्म्मणि प्रत्ययः इत्येके, तथा च उक्तं,—"ब्रह्मोद्या सा कथा यस्यामुच्यते ब्रह्म शाश्वतम्" इति, तासां वक्ष्यमाण-गोष्ठ्यनुकूलत्वेन प्रधानतया भव्यं प्रतिपादनम् । "ब्रह्मोदिताः" इति पाठे—ब्रह्मणा—वेदेन, उदिताः,—उक्ता इत्यर्थः] । अन्याः,—वेदबाह्या इत्यर्थः, निरवद्याः,—अनिन्द्याः, विद्यागोष्ठीः,—ज्ञानालोचिनीः सभाः, समानविद्याविवृत्तशीलबुद्धिवयसामनुरूपैरालापैरेकचोपसंस्थानरूपा इति यावत् ; तथा च वात्स्यायनीये,—"या गोष्ठी लोकविहिष्टा या च स्वैरविसर्पिणी । परहिंसात्मिका या च न तामवतरेद्बुधः ॥ लोकचित्तानुवर्त्तिन्या क्रीडासादैककाम्यया । गोष्ठ्या सह चरन् विद्वान् लोकसिद्धिं नियच्छति ॥" इति । विभावयन्—सम्पादयन् । आसाञ्चक्रे—बभूव ।

(२) तथाऽऽसीनमिति ।—तथा—तेन प्रकारेण, आसीनम्—उपविष्टं, त्रिभुवनप्रतीच्यं—त्रिलोकीपूज्यं, ("प्रतीच्यः पूज्यः" इत्यमरः) । ऋचः,—ऋग्वेदान् ।

समुदचारयन्, केचिदर्पचितिभाञ्जि यजूंषि अपठन्, केचित् प्रशंसासामानि जगुः; अपरे विहृतकर्म्मक्रियातन्त्रान् मन्त्रान् व्याचचक्षिरे। विद्याविसंवादकृताश्च तत्र तेषाम् अन्योऽन्यस्य विद्याविवादाः प्रादुरभवन्।

(३) अथातिरोषणः प्रकृत्या महातपा मुनिः अत्रेः तनयः तारापतेः भ्राता नाम्ना दुर्व्वासा द्वितीयेन मन्दपालनाम्ना मुनिना सह कलहायमानः साम गायन् क्रोधान्धो विस्वरम् अकरोत्। सर्व्वेषु च शापभयप्रतिपन्नमौनेषु मुनिषु, अन्यालापलीलया अवधीरयति कमलसम्भवे, कुमारी किञ्चिदु-

स्तुतिचतुराः,—स्तुतिषु—स्तोत्रपाठेषु, चतुराः,—दक्षाः। समुदचारयन्—सम्यक उदात्तादिवैस्वर्य्यादिप्राधान्येन उच्चारितवन्तः। अर्पचितिभाञ्जि—अर्पचितिं—पूजां, भजन्ते इति तथोक्तानि, पूजासम्बन्धीनीत्यर्थः, ("पूजा नमस्यार्पचितिः" इत्यमरः)। यजूंषि—मन्त्राख्यवेदभागानित्यर्थः। प्रशंसासामानि—स्तुतिपराणि सामानि, सङ्गीतमयान् वेदभागानित्यर्थः। जगुः,—गीतवन्तः। विहृतकर्म्मक्रियातन्त्रान्—विहृतानि—प्रकटितानि, कर्म्मक्रियाणां—कार्य्यानुष्ठानानां, तन्त्राणि—प्रकरणानि यैः येषु वा तान्, ["विहृतक्रतुक्रियातन्त्रान्" इति पाठान्तरे—विहृतानि, क्रतुक्रियाणां—यज्ञकर्म्मणां तन्त्राणि यैस्ते] विद्याविसंवादकृताः,—विद्यानां—दर्शनादीनां, विसंवादेन—मतभेदेन, कृताः,—जनिताः, न तु मात्सर्य्यादिना।

(३) अतिरोषणः,—अतिकोपनः। प्रकृत्या—स्वभावेन, अन्यथा ब्रह्मसंहितेषमेवमाक्षेपः स्यात्। तारापतेः,—चन्द्रस्य। ["मन्दपालनाम्ना" इत्यत्र "मन्दपालनाम्ना" इति पाठान्तरम्]। कलहायमानः,—कलहं कुर्व्वन्। गायन्—सङ्गीतस्वरेण पठन्। विस्वरं—विकृताः स्वराः,—उदात्तादयः यस्मिन् तथाभूतं यथा तथा। दुर्व्वाससि तथा विस्वरं साम गायति यदि कश्चित् दोषमुत्कीर्त्तयति, तदा तं प्रति अनेन शापोत्सर्गः क्रियते इत्याशयेनाह, शापेति।—शापभयप्रतिपन्नमौनेषु—शापात् भयं शापभयं, तेन प्रतिपन्नम्—अङ्गीकृतं, मौनं यैः तथाभूतेषु। अन्यालापलीलया—अपरकथाच्छलेनेत्यर्थः। अवधीरयति—अवज्ञां कुर्व्वति, दुर्व्वाससं प्रतीति शेषः। कमलसम्भवे—पद्मयोनौ, ब्रह्मणीत्यर्थः। कुमारी—अनूढा बाला, कौमारव्रतं—ब्रह्मचर्य्यं तद्वती वा। ["कुमारी" इत्यतः प्राक् "भगवती" इति विशेषणत्वेन क्वचित्पाठः,

मुक्तबालभावे भूषितनवयौवने नवे वयसि वर्त्तमाना, गृहीतचामरप्रचलभुजलता पितामहमुपवीजयन्ती, (४) निर्भर्त्सनताड़नजातरागाभ्यामिव स्वभावारुणाभ्यां पादपल्लवाभ्यां समुल्लासमाना, शिष्यहृयेनेव पदक्रममुखरेण नूपुरयुगलेन वाचालितचरणा, मदननगरतोरणस्तम्भविभ्रमं विभ्राणा जङ्घाद्वितयं, सलीलम् उत्कलहंसकुलकलाऽऽलापप्रलापिनि मेखलादाम्नि विन्यस्तवामहस्तकिसलया, विद्वन्मानसनिवासलग्नेन गुणकलापेनेव अंसावलम्बिना ब्रह्मसूत्रेण पवित्रीकृतकाया, भास्वन्मध्यनायकम् अनेकमुक्ताऽनुयातम् अपवर्गमार्ग-

—तत्र भगवती—प्रागुक्तषड्ऐश्वर्यशालिनीत्यर्थः]। किञ्चिदुन्मुक्तबालभावे—दूर्षाद्गतशैशवे इत्यर्थः। गृहीतचामरप्रचलभुजलता—गृहीतेन चामरेण—बालव्यजनेन, प्रचला—चञ्चली भुज एव लता यस्याः तथोक्ता, ["प्रचलभुजलता" इत्यत्र "प्रचलद्भुजलता" इति पाठान्तरे—प्रचलन्ती भुज एव लता यस्याः सा]। पितामहं—ब्रह्माणम्। उपवीजयन्ती—वीजनेन आराधयन्तीत्यर्थः।

(४) निर्भर्त्सनेति।—निर्भर्त्सनाय—विस्वरपाठकं दुर्व्वांससं प्रति तिरस्करणाय, ताड़नं—प्रहारः, रोषाङ्कुरिहननमित्यर्थः, तेन जातः,—उद्भूतः, रागः,—लौहित्यं यथा तथाभूताभ्यां, स्वभावारुणाभ्यां—सहजरक्ताभ्याम्। समुल्लासमाना—सम्यक् विद्योतमाना। पदक्रममुखरेण—पदयोः क्रमः,—विन्यासः, तेन मुखरं—सशब्दं, रणदित्यर्थः, तेन। वाचालितचरणा—वाचालितौ—नदन्तौ, चरणौ यस्याः तथोक्ता। मदननगरतोरणस्तम्भविभ्रमं—मदनस्य—कामस्य, नगरम्—अवस्थानस्थानं, तस्य तोरणः,—बहिर्द्वारं, ("तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः) तस्य स्तम्भौ तयोः विभ्रम इव विभ्रमः,—विलासः यस्य तथाभूतम्। जङ्घाद्वितयम्—ऊरुयुगलम्। ["मदन" इत्यत्र "धर्म्म" इति पाठान्तरम् अप्रसिद्धत्वादपेक्ष्यम्]। उत्केति।—उत्कानां—उत्सुकानां, कलहंसानां कुलस्य कलः,—मधुराव्यक्तशब्दः, स एव आलापः,—आभाषणं, तद्वत् प्रलापिनि—मधुरास्फुटशब्दायमाने इत्यर्थः। मेखलादाम्नि—काञ्चीरज्जौ। विद्वन्मानसनिवासलग्नेन—विदुषां मानसं—हृदयं, तत्र निवासः,—स्थावस्थितिः, तेन लग्नं—संसक्तं तेन, गुणकलापेनेव—दाक्षिण्यशौचादिगुणसङ्घेनेव। अंसावलम्बिना—स्कन्धविलम्बमानेन, ब्रह्मसूत्रेण—यज्ञोपवीतेन। भास्व-

मिव हारमुरसा समुद्वहन्ती, (५) वदनप्रविष्टसर्व्वविद्या-बधूचरणालक्तकरसेनेव पाटलेन स्फुरता दशनच्छदेन विराजमाना, सङ्क्रान्तकमलासनकृष्णाजिनप्रतिमां मधुरगीताऽऽकर्णनावतीर्णशशिहरिणाम् इव कपोलस्थलीं दधाना, तिर्य्यक् सावज्ञम् उन्नमितैकभ्रूलता, श्रोत्रमेकं (६) विस्वरश्रवणकलुषितं प्रक्षालयन्तीव अपाङ्गनिर्गतेन लोचनांशुजलप्रवाहेण इतरश्रवणेन च विकसितसितसिन्धुवारमञ्जरीजुषा हसतेव

सूर्य्यनायकं—भास्वान्—दीप्यमानः, मध्यनायकः,—मध्यमणिः यस्य यत्र वा तम्; पक्षे,—भास्वत्,—सूर्य्यस्य, सूर्य्यमण्डलस्येत्यर्थः, मध्यं तेन नयति सः; यद्वा,—"परिव्राड्योगयुक्तस्य सूरस्याभिमुखं गतः। द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ॥" इति। अनेकमुक्ताऽनुयातम्—अनेकाभिर्मुक्ताभिः,—मुक्ताफलैः, अनुयातं—यायितम्; पक्षे,—अनेकैः मुक्तैः,—मोक्षगामिभिः, अनुयातं—सेवितम् इति। अपवर्गमार्गमिव—मुक्तिपथमिव, अपवर्गमार्गस्य मुक्ताजालस्य च विशुद्धस्वच्छत्वात् तथोत्प्रेक्षितम्। हारं—मुक्ताकलापम्, अपवर्गञ्च, हरमस्वन्तिनं तत्प्रसादप्राप्यत्वात् इति सङ्कल्पः।

(५) वदनेति।—वदने—मुखे, प्रविष्टानां सर्व्वासां विद्यानामेव बधूनां—नारीणां, चरणेषु यः अलक्तकरसः,—लाक्षाद्रवः तेनेव, अलक्तकरसहारेवेत्यर्थः, पाटलः,—रक्तः तेन। स्फुरता—विलसता। दशनच्छदेन—ओष्ठाधरेणेत्यर्थः। सङ्क्रान्तेति।—सङ्क्रान्ता—संलग्ना, कमलासनस्य—ब्रह्मणः, कृष्णाजिनस्य—कृष्णमृगचर्म्मणः, प्रतिमा—प्रभा यस्मिन् तथाभूताम्, अत एव मधुरीतं।—मधुरस्य गीतस्य आकर्णनाय—श्रवणाय, अवतीर्णः,—अवरूढः, उपस्थितः इत्यर्थः, शशिनः,—चन्द्रस्य, हरिणः,—कलङ्करूपो मृगो यत्र तादृशीं, कपोलस्थलीं—गण्डदेशम्। तिर्य्यक्—कुटिलं यथा तथा। सावज्ञम्—अवज्ञया, विस्वरपाठकं दुर्व्वाससं प्रति ज्ञापयतीति भावः, सह वर्त्तमानं यथा तथा। उन्नमितैकभ्रूलता—उन्नमिता—ऊर्द्धं नीता, एका भ्रूर्लतेव यया तथोक्ता। श्रोत्रं—कर्णम्।

(६) विस्वरेति।—विस्वरश्रवणेन—विरुद्धस्वराकर्णनेन, कलुषितं—दूषितं, कलङ्कितमिति यावत्। अपाङ्गनिर्गतेन—नेत्रप्रान्तनिर्गलितेन। लोचनांशुजलप्रवाहेण—लोचनस्य—नयनस्य, अंशवः,—किरणा एव, जलानि तेषां प्रवाहः,—स्रोतः तेन, ["लोचनांशु" इत्यत्र "लोचनाम्बु" इति पाठान्तरम्]। इतरश्रवणेन—अपर-

प्रकटितविद्यामदा, श्रुतिप्रणयिभिः प्रणवैरिव कर्णावतंसकुसुम-मधुकरकुलैः उपास्यमाना, सूक्ष्मविमलेन प्रज्ञाप्रतानेनेव अंशुकेनाच्छादितशरीरा, वाङ्मयमिव निर्मलं दिशु दशनज्योत्स्नालोकं विकिरन्ती देवी सरस्वती श्रुत्वा जहास।

(७) दृष्ट्वा च तां तथा हसन्तीं स मुनिः,—"आः पापे! दुर्गृहीतविद्यालवावलेपदुर्विदग्धे! माम् अपि उपहससि?" इत्युक्त्वा शिरःकम्पविशीर्ष्यमाणबन्धविसरैः उन्मिषत्तडित्तन्तु-पिङ्गलिम्नो जटासञ्चयस्य रोचिषा सिञ्चन्निव रोषदहनदुर्वेण

कर्णेन। विकसितेति।—विकसिता—विकासं गता, या सितसिन्धुवारस्य—शुक्लपुष्पतरुविशेषस्य, मञ्जरी—वल्लरी, तदृजुषा—तच्छालिना, अत एव हसनेव—दुर्व्वाससं प्रति कृतावहेलनजनितं हासं कुर्व्वतेव। प्रकटितेति।—प्रकटितः,—प्रकाशितः, विद्यामदः,—विद्याजनितोऽहङ्कारः यया तादृशी। श्रुतिप्रणयिभिः,—श्रुतिभिः,—कर्णे: सह, यः प्रणयः स विद्यते येषां तैः, श्रुतिसुखं जनयद्भिरिति यावत्, मधुरध्वनिवादिति भावः; अन्यत्र,—श्रुतिषु—वेदेषु, प्रणयः,—सर्वोत्कर्षेण प्रियता, अनुराग इत्यर्थः, तद्भिः। प्रणवैरिव—ब्रह्मप्रतिपादकमन्त्रविशेषैरिव। कर्णावतंसकुसुमनमधुकरकुलैः,—कर्णभूषणीकृतपुष्पलुब्धसमरहृन्दैः, उपास्यमाना—सेव्यमाना। प्रज्ञाप्रतानेन—प्रज्ञा—प्रकृष्टा मतिः, तस्याः प्रतानः,—प्रसरः तेनेव। अंशुकेन—वसनेन। वाङ्मयमिव—विद्यामिव। दशनज्योत्स्नालोकं—दन्तचन्द्रिकाद्योतमिव। विकिरन्ती—वर्षन्ती।

(७) दृष्ट्वेत्यादि।—स मुनिः तां तथा हसन्तीं दृष्ट्वा आपन्नलं जयाहेत्यन्वयः। तथेति।—चरणताडनभ्रुकुटिसञ्चारपूर्व्वकमित्यर्थः। स मुनिः,—पूर्वकथितस्वरूपः। आः इति कोपार्थकमव्ययम्, ["पापे" इत्यत्र "पापकारिणि" इति पाठान्तरम्]। दुर्गृहीतेति।—दुर्गृहीतः,—दुरभ्यस्तः, यः विद्यालवः,—विद्यालेशः, स्वल्पमात्रा विद्येत्यर्थः, तेन अवलेपः,—गर्व्वः, तेन दुर्विदग्धा—दुर्विनीता, तत्सम्बुद्धौ। मामपि—त्रिजगत्प्रसिद्धतेजसं दुर्व्वाससमपीत्यर्थः। शिरःकम्पेति।—शिरसः कम्पेन—विधूननेन, विशीर्ष्यमाणाः,—विश्लाय्यमानाः, ये बन्धविसराः,—बन्धनसञ्चयाः तैः। उन्मिषत्—उद्यत्, तडित्तन्तूनां—विद्युद्वृन्दानां, पिङ्गलिमा—पिङ्गत्वं यस्य तथाभूतस्य। जटासञ्चयस्य—जटासमूहस्य। ["शिरःकम्पशीर्ष्यमाणबन्धविसरारो-

दश दिशः, (८) कृतकालसन्निधानामिव अन्धकारितललाट-पट्टाष्टापदाम् अन्तकान्तःपुरमण्डनपत्रभङ्गमकरिकां भ्रुकुटि-मावध्नन्, अतिलोहितेन चक्षुषा अमर्षदेवतायै रुधिरोपहार-मिव प्रयच्छन्, निर्दयदष्टदशनच्छदो दन्तांशुच्छलेन भयपलाय-मानां वाचमिव निरुन्धन्, अंसस्खंसिनः शापशासनपट्टस्येव ग्रथून् ग्रन्थिम् अन्यथा कृष्णाजिनस्य, स्वेदकणप्रतिर्विम्बितैः

न्मिषत्पिङ्गलिमो जटाकलापस्य" इति पाठे,—शिरःकम्पेन शीर्य्यमाणो यो बन्धः तेन विशरारोः,—विस्रसरस्य, इतस्ततः इति योजना ; अत एव उन्मिषन्—उद्यन्, पिङ्गलिमा—पिङ्गत्व, यस्य तथाभूतस्य, जटाकलापस्य—जटासमूहस्येत्यर्थः]। रोचिषा—अर्चिषा, ("शोचिषा" इति पाठे—स एवार्थः, "रोचिः शोचिरुभे क्लीवे" इत्यमरः)। सिञ्चन्निव—वर्षन्निव, रोषदहनदूरवेण—कोपाग्निप्रसरेण ।

(८) कृतेति ।—कृतं कालस्य—अन्तकस्य, कृष्णवर्णस्य वा, सन्निधानम्—उपस्थितिर्यस्यां तथाभूताम् । अन्धकारितेति ।—अन्धकारितं—आकुञ्चितत्वेन दुष्प्रेक्ष्यं ललाटपट्टमेव अष्टापदं—हेम यया ताद्दशीम्, [एतेन भ्रुवश्चिपाप्रकटीकृतस्वरूपवत्त्वेन एतस्यादर्शनीयत्वं विस्पष्टम्]। अन्तकेति ।—अन्तकस्य--यमस्य, अन्तःपुरम्—अव-रोधकामिनीमित्यर्थः, तस्य मण्डनाय—अलङ्करणाय, पत्रभङ्गस्य मकरिका—मकरा-कारकिसलयच्छेद इत्यर्थः, ताम् ; रूपकमलङ्कारः। ["अन्तकमण्डन—" इति पाठस्तु तन्मण्डनमकरिकाया अयुक्तत्वादुपेक्ष्यः]। भ्रुकुटिं—भ्रूभङ्गिम्, ("भ्रुवोर्मूलसमुत्पत्तेपादु-भ्रुकुटि परिचक्षते" इति कोषः)। आवध्नन्—कुर्व्वन्नित्यर्थः। अतिलोहितेन—अति-रक्तेन। अमर्षदेवतायै—अमर्षः,—क्रोधः, तस्य अधिष्ठात्री या देवता तस्यै। रुधिरोप-हारं—रक्तरूपं पूजाद्रव्यम्। ["रुधिरोपहारम्" इत्यत्र "भक्तरुधिरोपहारम्" इति पाठान्त-रम्]। प्रयच्छन्—अर्पयन्। निर्दयेति ।—निर्दयं—दृढं यथा तथा, दष्टः दशनच्छदः,—ओष्ठः, अधरोष्ठ इति यावत्, येन तथाभूतः। दन्तांशुच्छलेन—दशनकिरणनिर्गमन-व्याजेन। भयपलायमानां—भयात्—शापादिनिबन्धनादिति भावः, पलायमानां—प्रतिष्ठमानाम्। निरुन्धन्—निरुद्धां कुर्व्वन्। ["निर्दयदष्टदशनच्छदभयपलाय-मानामिव वाचं रुन्धन् दन्तांशुच्छलेन" इति पाठे—निर्दयं यथा तथा दष्टः यो दशनच्छदः तस्मात् भयेन पलायमानामिवेति समासः]। अंसस्खंसिनः,—स्कन्धाव-लम्बिनः, सरन्नादिति भावः, ["अंसस्खंसिनः" इत्यत्र "अंसावसंसिनः" इति पाठान्त-रम्]। कृष्णाजिनस्य—कृष्णमृगचर्म्मणः। शापस्य शासनपट्टः,—सनन्दफलकं,

शापशङ्काशरणागतैरिव सुरासुरमुनिभिः प्रतिपन्नसर्व्वावयवः, कोपकम्पतरलिताङ्गुलिना करेण प्रसादनलग्नाम् अक्षरमालामिव अक्षमालाम् आक्षिप्य कामण्डलवेन वारिणा समुपस्पृश्य शापजलं जग्राह।

(९) अत्रान्तरे स्वयम्भुवोऽभ्यासे समुपविष्टा देवी मूर्त्तिमती पीयूषफेनपटलपाण्डुरं कल्पद्रुमदुकूलवल्कलं वसाना, विसतन्तुमयेनांशुकेन उन्नतस्तनमध्यबद्धगात्रिकाग्रन्थिः, तपोबलनिर्जितत्रिभुवनजयपताकाभिरिव तिसृभिर्भस्मपुण्ड्रकराजिभिर्विराजितललाटाजिरा, स्कन्धावलम्बिना

तस्यैव; शासनपट्टस्य स्वतः शुक्लत्वात् लिपिकृष्णत्वाच्च श्वेतबिन्दुचित्रितकृष्णाजिनतुल्यत्वात् तथोक्तम्। यस्मिन् अन्यथा—मन्युमतिशयात् अन्यप्रकारेण, विकृतभावेनेति भावः, यथुन्—बध्नन्। खेदेति।—स्वेदकणेषु—रोषजनितेषु घर्मबिन्दुषु, प्रतिबिम्बितैः,—प्रतिफलितैः। प्रतिपन्नसर्व्वावयवः,—समाश्रितसमस्तदेहः। कोपकम्पतरलिताङ्गुलिना—कोपेन यः कम्पः, तेन तरलिताः,—चलिताः, अङ्गुलयो यस्य तथोक्तेन। ["कोपतरलिताङ्गुलिना" इति पाठान्तरम्]। प्रसादनलग्नां—प्रसादनार्थं—सान्त्वनार्थं, लग्नां—समागतां, ताम्। ["प्रसादलग्नाम्" इति पाठेऽपि स एवार्थः]। अक्षरमालामिव—वर्णावलीमिव, भारतीसख्यमेतदुक्तम्। अक्षमालां—रुद्राक्षजपमालिकाम्। आक्षिप्य—परित्यज्येत्यर्थः। ["विक्षिप्य" इति पाठेऽपि स एवार्थः]। कामण्डलवेन—मुनिकरकस्थितेन। समुपस्पृश्य—आचम्य।

(९) अत्रान्तरे इत्यादि।—मूर्त्तैश्चतुर्भिर्वेदैः सह सावित्री समुत्तस्थौ इत्यन्वयः। अभ्यासे—अन्तिके। पीयूषेति।—पीयूषम्—अमृतं, तस्य फेनपटलं—फेनराशिः, तद्वत् पाण्डुरं—शुभ्रम्। कल्पद्रुमेति।—कल्पद्रुमस्य—सुरतरुभेदस्य, दुकूलं—वसनमिव, वल्कलं तत्। वसाना—परिदधाना। विसतन्तुमयेन—मृणालसूत्रमयेन। अंशुकेन—सूक्ष्मवसनेन। उन्नतेति।—उन्नतयोः स्तनयोर्मध्ये बद्धा गात्रिकाग्रन्थिः,—ग्रन्थिविशेषः यया तथोक्ता; स च स्त्रीकाकारः स्त्रीणां स्तनोद्देशे भवति। तपोबलेति।—तपसां—चान्द्रायणादीनां, बलेन निर्जितस्य—नितरां जितस्य, त्रिभुवनस्य जयपताकाभिरिव—जयध्वजैरिव, ["तपोनिर्जितत्रिभुवनजयपताकाभिरिव" इति पाठान्तरम्]। भस्मपुण्ड्रकराजिभिः,—भस्मकृततिलकैरित्यर्थः। विराजिताललाटा-

सुधाफेनधवलेन तपःप्रभावकुण्डलीकृतेन गङ्गास्रोतसेव योगपट्टकेन विरचितवैकक्ष्यका, सव्येन ब्रह्मोत्पत्तिपुण्डरीकमुकुलमिव स्फटिकमयमण्डलुं करेण कलयन्ती, दक्षिणमक्षमालाकृतपरिक्षेपं (१०) कम्बुनिर्मितोर्मिकादन्तुरितं तर्जनतरलिततर्जनीकम् उत्क्षिपन्ती हस्तम्—"आः पाप! क्रोधोपहत! दुरात्मन्! अज्ञ! अनात्मज्ञ! ब्रह्मबन्धो! मुनिखेटकापसदनिराकृत! आत्मस्खलितविलक्ष! कथं सकलसुरासुर-

जिरा—विराजितं—शोभितं, ललाटाजिरं—भालचत्वरं यस्याः तथाभूता। स्कन्धेति। —स्कन्धौ—अंसौ, तदवलम्बिना—तत्संलग्नेन इत्यर्थः, सुधाफेनधवलेन—अमृतफेनपाण्डुरेण, ["फेनधवलेन" इति पाठान्तरम्]। तपःप्रभावकुण्डलीकृतेन—तपसां प्रभावेण—बलेन, कुण्डलीकृतेन—कुण्डलवत् वर्तुलतां नीतेन, सङ्कोचं नीतेनेति भावः। योगपट्टकेन—तदाख्येन उपवीताकारेण, [अमैदं तृतीया]। विरचितवैकक्ष्यका—विरचितं—गृहीतं, वैकक्ष्यकं—तिर्यग्वक्षसि विलिप्ता हारविशेषः, यया तथाभूता, वैकक्ष्यकाकारं योगपट्टं धारयन्तीत्यर्थः, (तथा च—"तिर्यग्वक्षसि विलिप्तं वैकक्ष्यकमुदाहृतम्" इति कोषः)। सव्येन—वामेन। ब्रह्मोत्पत्तिपुण्डरीकमुकुलमिव—ब्रह्मणः उत्पत्तिः यस्मात् तत् पुण्डरीकं—श्वेतपद्मं, ("पुण्डरीकं सिताम्भोजम्" इत्यमरः) तस्य मुकुलमिव, कलयन्ती—धारयन्ती। अक्षमालाकृतपरिक्षेपम्—अक्षमालया—जपमालया, कृतः परिक्षेपः,—वेष्टनं यस्य तम्। ["अक्षमालापरिक्षेपम्" इति पाठे—अक्षमालया परिक्षेपः यस्य तथोक्तम्]।

(१०) कम्बुनिर्मितोर्मिकादन्तुरितं—कम्बुः,—शङ्खः, ("शङ्खः स्यात् कम्बुरस्त्रियाम्" इत्यमरः) तेन निर्मिता या ऊर्मिका—अङ्गुरीयकं, तेन दन्तुरितः,—दन्तवत् कृतः, युक्त इति भावः, तम्। तर्जनी—आक्रोशने, तरलिता—चालिता, ["तरङ्गिता" इति पाठे—तरङ्गवत् कृता] तर्जनी—प्रदेशिनी यस्य तम्। ["हस्तम्" इत्यत्र "करम्" इति पाठान्तरम्]। क्रोधोपहत!—क्रोधेन उपहतः,—विनाशं गतः, तत्सम्बुद्धिः; आत्मविनाशार्थमेव ते क्रोध इति भावः। ब्रह्मबन्धो!—निकृष्टब्राह्मण!, "मुनिखेटक!""मुनिखेट!"इति पाठद्वयम्; मुनिषु ये खेटकाः,—अधमाः, तेषु: अपसदाः,—नीचाः, तैः निराकृतः,—तत्सम्बुद्धौ। ["निराकृत!" इति पाठे—मुनिखेटापसदैः निराकृतिः—निराकरणं,

मुनिमनुजवृन्दवन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुमभिलषसि ?" इत्यभिदधाना, (११) रोषविमुक्तवेत्रासनैः ओङ्कारमुखरितमुखैः उत्क्षेपदोलायमानजटाभारभरितशिरोभिः परिकरबन्धभ्रमितकृष्णाजिनच्छायाश्यामायमानदिवसैः (१२) अमर्षनिश्वासदोलाप्रेङ्खोलितब्रह्मलोकैः सोमरसमिव स्वेदविसरव्याजेन स्रवद्भिः अग्निहोत्रपवित्रभस्मक्षोरललाटैः

दूरीकरणमित्यर्थः यस्य तथोक्तः, तत्सम्बुद्धिः। क्वचित् पुस्तके "मुनिखिट ! अपसद ! निराकृत !" इति प्रत्येकं पृथक् सम्बोधनान्तपदं दृश्यते ; तत्र निराकृत !—अस्वाध्याय इत्यर्थः]। आत्मस्खलितेति।—आत्मनः,—स्वस्य, स्खलितं—दोषः, विस्वरपठनजनितमिति भावः, तेन विलक्षः,—लज्जितः, लज्जां प्राप्तुं योग्य इत्यर्थः, तत्सम्बुद्धिः। सकलसुरेति।—परस्परविरुद्धस्वभावानां सुरासुरमानवानामपि अत्र न कश्चिद्विरोधः इति भावः। ["आत्मस्खलितविलक्ष ! कथं सकलसुरासुर—" इत्यत्र "कथमात्मस्खलितविलक्षः सुरासुर—" इति पाठान्तरे—आत्मनः स्खलितेन, विलक्षः,—लज्जां प्राप्तुं योग्योऽपि त्वमित्यर्थः]।

(११) रोषेति।—रोषेण—दुर्वाससं प्रति क्रोधेन, विमुक्तानि—त्यक्तानि, वेत्रासनानि—वेतसनिर्मितानि आसनानि यैः तथोक्तैः। ओङ्कारेति।—ओङ्कारेण मुखरितं—ध्वनितं, मुखं येषां तैः, सततं प्रणवमुच्चरद्भिरिति भावः। उत्क्षेपेति।—उत्क्षेपेण—उच्चानेन, दोलायमानैः,—चलद्भिरित्यर्थः, जटाभारैः,—जटासमूहैः, भरितानि—आपूरितानि, शिरांसि येषां तैः। ["जटाभारभरितशिरोभिः" इत्यत्र "जटाभारभरितदिग्भिः" इति पाठान्तरे—जटाभारैः भरिताः,—व्याप्ताः, दिशः यैः तैः]। परिकरेति।—परिकरबन्धः,—कटिबन्धः, तेन भ्रमितं—घूर्णितं, यत् कृष्णाजिनं तस्य छायया—कान्त्या, प्रभया इत्यर्थः, ("छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपे" इत्यमरः) श्यामायमानाः,—कालिमानमापद्यमानाः, दिवसा यैः तथाभूतैः, ["—कृष्णा—" इत्यत्र "कृष्णाजिनाटोपच्छाया" इति पाठान्तरम्]।

(१२) अमर्षेति।—अमर्षेण—क्रोधेन, यः निश्वासः स एव दोला—दोलनयन्त्रं, पूरकरेचनोभयरूपत्वात् निश्वासस्येति भावः, तया प्रेङ्खोलिताः,—आन्दोलिताः, ब्रह्मलोकाः यैः तथाभूतैः। सोमरसमिव—सोमो नाम लताविशेषः, तस्य रसः तमिव। स्वेदविसरव्याजेन—घर्मप्रसरच्छलेन। स्रवद्भिः,—क्षरद्भिः। अग्निहोत्रेति।—अग्निहोत्रस्य पवित्रं—त्रियुक्तं, यत् भस्म तेन क्षोराः,—विकसराः, ललाटाः येषां तैः।

कुशतन्तुचारुचामरचीरचीवरिभिः आषाढ़िभिः प्रहरणीकृत-दण्डकमण्डलुमण्डलैः मूर्त्तैश्चतुर्भिर्वेदैः सह हृषीमपहाय सावित्री समुत्तस्थौ।

(१२) ततः "मर्षय भगवन्! अभूमिरेषा शापस्य" इत्यनुनाथ्यमानोऽपि विबुधैः, "उपाध्याय! स्खलितमेकं क्षमस्व" इति बद्धाञ्जलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः, "पुत्र! मा कृथास्तपसः प्रत्यूहम्" इति निवार्य्यमाणोऽप्यत्रिणा, रोषावेशविवशो दुर्वासाः "दुर्विनीते! व्यपनयामि ते विद्यालवावलेपविशेषजनिताम् उन्नतिमिमाम्; अधस्ताद्गच्छ मर्त्यलोकम्" इत्युक्त्वा तच्छापोदकं विससर्ज। ततः प्रतिशापदानोद्यतां सावित्रीं "सखि! संहर रोषम्; असंस्तुतमतयोऽपि जात्यैव द्विजन्मानो माननीयाः" इत्यभिदधाना सरस्वती एव न्यवारयत्।

कुशेति।—कुशानां तन्तवः,—सूत्राणि एव, चारूणि—मनोज्ञानि, चामराणि येषां तथाभूताः कुशतन्तुचारुचामराः, तथा चीराणि—वस्त्रखण्डानि, चीवराणि—कौपीनानि सन्ति येषां तथोक्ताः, तैः। आषाढ़िभिः,—पालाशदण्ड आषाढ़ः, तद्वद्भिः, तथा चोक्तम्,—"आषाढ़संज्ञो दण्डस्तु पालाशो व्रतचारिणाम्" इति। प्रहरणीकृतेति।—प्रहरणार्थम् उद्यताः,—क्रोधादिति भावः, दण्डाः, कमण्डलुमण्डलानि—कमण्डलुसमूहाश्च यैः तथाभूतैः। मूर्त्तैः,—दृष्टवद्भिः। हृषीम्—आसनम्, ("व्रतिनामासन हृषी" इत्यमरः)।

(१२) तत इत्यादिके तच्छापोदकं विससर्ज इत्यन्वयसम्बन्धः। मर्षय—क्षमस्व। अभूमिः,—अस्थानम्, अयोग्यस्थानमित्यर्थः। अनुनाथ्यमानः,—प्रार्थ्यमानः। ["अनुशास्यमानः" इति पाठे—उपदिश्यमानः इत्यर्थः]। उपाध्याय!—आचार्य्य! इति सम्बोधनम्। स्खलितम्—अपराधमित्यर्थः। प्रत्यूहं—विघ्नं, शापदानेन तपसः क्षयादिति भावः। अचिरा—महातपसा क्षपिता इत्यर्थः। दुर्विनीते!—दुष्टे! व्यपनयामि—नाशयामि। विद्येति।—विद्यालवः,—विद्यालेशः, स्वल्पमात्रा विद्येत्यर्थः, तेन यः अवलेपविशेषः,—गर्वातिशयः, तज्जनिताम्—तत्कृताम्। उन्नतिमिति।—उन्नतदेशस्थत्वाधो नयनेन समुचितोऽयं वाक्यनिवेशः। अधस्तात्—अधोभूमिम्। विससर्ज—त्यजति, निक्षिपेत्यर्थः। असंस्तुतेति।—न संस्तुता—न

(१४) अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा पितामहो भगवान् कमलोत्पत्तिलग्नमृणालसूत्रमिव धवलयज्ञोपवीतिनीं तनुमुद्वहन्, उद्गच्छदच्छाङ्गुलीयकमरकतमयूखलताकलापेन त्रिभुवनोपप्लवप्रशमकुशापीड़धारिणेव दक्षिणेन करेण निवार्य्य शापकलकलम्, अतिविमलदीर्घैर्भाविकृतयुगारब्धसूत्रपातमिव दिक्षु पातयन्, दशनकिरणैः सरस्वतीप्रस्थानमङ्गलपटहेनेव पूरयन्नाशाः, स्वरेण सुधीरमुवाच,—"ब्रह्मन्! न खलु साधुसेवितोऽयं पन्थाः, येनासि प्रहृत्तः; निहन्त्येष परस्तात्।

विशुद्धा, न संस्कृतेति यावत्, मतिः,—चित्तं येषां तथाभूताः। ["असंस्तुतमतयः" इत्यत्र "असंस्कृतमतयः" इति पाठान्तरेऽप्ययमेवार्थः]।

(१४) अथेत्यादिके भगवान् पितामहः सुधीरमुवाच इत्यन्वयसम्बन्धः। तथेति।—तेन प्रकारेण इत्यर्थः, निर्दोषां सरस्वतीम् इत्याशयः। कमलेति।—कमलात्—नारायणनाभिपद्मात्, या उत्पत्तिः,—जन्म, स्वस्येति भावः, तया हेतुभूतया लग्नं—संसक्तं, मृणालसूत्रं—योनिपद्मस्येति भावः, यस्यां तथाभूतामिव। धवलेति।—"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः॥" इति प्रशंसार्थे नित्ययोगार्थे वा "अत इनि ठनौ (५।२।११५) इति मत्वर्थीयः प्रत्ययः "विसक्रिग्रलयच्छेदपाठेयवल्लः" इत्यादाविव बीप्सः, न चेत्, कर्म्मधारयानन्तरम् एकप्रत्ययानुमानात्के बहुव्रीहौ प्रतिपत्तिः सम्पद्यते, अन्यत्र तु बुद्धिश्रयोगः इति नियमबन्धस्य लघुत्वादेवमुक्तम्। उद्गच्छदिति।—उद्गच्छन्—उदयमानः, अच्छस्य—विशदस्य, अङ्गुलीयकमरकतस्य—मरकतनिर्म्मिताङ्गुलीयकस्येत्यर्थः, मयूखलताकलापः,—किरणावलीसमूहः यस्मात् तथाभूतेन। त्रिभुवनेति।—त्रिभुवनस्य—त्रिलोकस्य, उपप्लवः,—संक्षयः, तस्य प्रशमाय—शान्त्यै, कुशापीड़ं—कुशतन्तुसमूहं, धारयतीति तथोक्तेनेव, कुशानां माङ्गलिकत्वेन अमङ्गलनाशकत्वादिति भावः। भावीति।—भाविनः,—भविष्यतः, कृतयुगस्य—सत्ययुगस्य, आरब्धो यः सूत्रपातः,—विन्यासः, तमिव। पातयन्—कुर्व्वन्, इह केवलधात्वर्थगतानुष्ठानहेतुकः क्रियार्थः, "सवले चालिते वस्त्रे" इत्युदाहरणवत्प्रयोज्यः। दशनकिरणैः,—दन्तमयूखैः। सरस्वतीति।—सरस्वत्याः,—शप्तायाः इति भावः, प्रस्थानं—ब्रह्मलोकात् मर्त्यलोके गमनमित्यर्थः, तस्य मङ्गलपटहः,—माङ्गलिकवाद्यध्वनिभेदः इवेव। सुधीरं—सुगम्भीरम्। येनासि प्रहृत्तः,—येन पथा प्रहृत्तः,—प्रचलितः

(१५) उद्दामप्रसृतेन्द्रियवाजिसमुत्थापितं हि रजः कलुषयति दृष्टिम् अनवजिताम्। कियद्दूरं वा चक्षुरीक्षते ? विशुद्धया हि धिया पश्यन्ति कृतबुद्धयः सर्व्वानर्थान् अमतः सतो वा। निसर्गविरोधिनी चेयं पयःपावकयोरिव धर्म्मक्रोधयोः एकत्र वृत्तिः। आलोकमपहाय कथं तमसि निमज्जसि ? क्षमा हि मूलं सर्व्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिर्न ते आत्मरागदोषं पश्यति। क्व महातपोभारवैवधिकता ? क्व पुरोभागित्वम् ? अतिरोषणश्चक्षुष्मान् अन्ध एव जनः। न हि कोपकलुषिता विमृशति मतिः कर्त्तव्यमकर्त्तव्यं वा। कुपितस्य हि प्रथमा अन्धकारिणी भवति विद्या, ततो भ्रुकुटिः। आदौ इन्द्रियाणि रागः समास्कन्दति, चरमं चक्षुः। आरम्भे तपो गलति, पश्चात् स्वेदसलिलम्।

मुद्यतः, असि—भवसि। निहन्त्येषः,—एषः,—पन्थाः, निहन्ति, गच्छन्तमिति शेषः।

(१५) उद्दामेति।—उद्दामम्—उच्छृङ्खलं यथा तथा, प्रसृतानि—प्रवृत्तानि, प्रचलितानीत्यर्थः, इन्द्रियाण्येव वाजिनः,—अश्वाः, तैः समुत्थापितं—समुद्भूतम्। रजः,—रागः, धूलिश्च। कलुषयति—आविलयति, कार्य्याकार्य्यदर्शनसामर्थ्यनाशं करोतीति भावः। अनवजिताम्—अक्षाणि—इन्द्रियाणि, जयन्तीति अक्षजितः, ते न भवन्तीति अनवजिताः तेषाम्, अजितेन्द्रियाणामित्यर्थः। कृतबुद्धयः,—संस्कृतमतयः। निसर्गविरोधिनी—स्वभावदैरिणी। पयःपावकयोरिव—जलाग्न्योरिव। महातपोभारवैवधिकता—महतां तपसां भारस्य वैवधिकः,—वाही तस्य भावः तत्ता, ("बोढ़ा भारस्य धौमद्भिर्जनैः वैवधिकः स्मृतः" इति कोषः)। पुरोभागित्वं—दीर्घैकदर्शित्वम्। ("दीर्घैकदृक् पुरोभागी" इत्यमरः)। विमृशति—विचारयति। प्रथमा—प्राक्षणाश्रया, अन्धकारिणी—अन्धकाराच्छन्ना, कलुषितेति भावः। ["कुपितस्य प्रथममन्धकारीभवति विद्या" इति पाठे—कुपितस्य विद्या—ज्ञानं, प्रथमम्—आदौ, अन्धकारीभवति—आच्छन्नीभवतीत्यर्थः] ततः,—तदनन्तरं, भ्रुकुटिः,—भ्रूभङ्गः, भवतीति शेषः। रागः,—समासक्तिः, लौहित्यञ्च। समास्कन्दति—आश्रयति। चरमं—पश्चात्, चक्षुः, समास्कन्दतीत्यनुषङ्गः। आरम्भे, कोपस्येति

पूर्व्वमयशः स्फुरति. अनन्तरमधरः। कथं लोकविनाशाय ते विषपादपस्येव वल्कलानि जातानि ? अनुचिता खलु अस्य मुनिवेशस्य हारयष्टिरिव हृत्तमुक्ता चित्तवृत्तिः। (१६) शैलूष इव हठा वहसि कृत्रिमम् उपशमशून्येन चेतसा तापसाकल्पम्। अल्पमपि न ते पश्यामि कुशलजातम्। अनेनातिलघिम्ना अद्याप्युपर्य्येव प्लवसे ज्ञानोदन्वतः। न खलु अनेडमूकाः एड़ा जड़ा वा सर्व्वे एते महर्षयः। रोषदोषनिषद्ये ! स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसं सरस्वतीम् ? एतानि तानि आत्मस्खलितवैलक्ष्याणि, यैर्याप्यतां

शेषः। गलति—स्रवति, क्षयोन्मुखीभवतीत्यर्थः। पूर्वं—प्राक्। अयशः,—अकीर्त्तिः। विषपादपस्येव—विषवृक्षस्येव। ["वल्कलानि" इत्यत्र "जटावल्कलानि" इति पाठे—जटाः,—शिखाः, निर्य्यासमिलितवत् परस्परं लग्नकेशाः इत्यर्थः, मूलानि च। वल्कलानि—मुनिवस्त्राणि त्वचश्च। हृत्तमुक्ता—सुचरितच्युता, परिवर्त्तुलमुक्ताफला च।

(१६) शैलूष इव—नट इव, "जार्योपजीवी हि जनः शैलूषः कथितो बुधैः" इत्युक्तलक्षणो वा। उपशमशून्येन—शान्तिरहितेन। तापसाकल्पं—मुनिवेशम्। कुशलजातं—मङ्गलसमूहम्। अतिलघिम्ना—अतिलाघवेन। ज्ञानोदन्वतः,—ज्ञानसमुद्रस्य, उपरि एव प्लवसे—मन्तरसि, न तु अभ्यन्तरं विशसीति भावः। अनेडमूकाः,—स्तौतुं वक्तुञ्चासमर्थाः। एड़ाः,—श्रुतिहीनाः। जड़ाः,—मूर्खाः। तदुक्तम्,—"कथिता अनेडमूकाः स्तौतुं वक्तुञ्च खलु न ये शक्ताः। एड़ास्तु श्रुतिहीनाः जड़ास्तु मूर्खा बुधैः प्रोक्ताः" ॥ इति। ["अनेडमूकाः" इत्यत्र "अनेलमूकाः" इति पाठान्तरम्]। रोषेति।—रोषः,—क्रोध एव, दोषः तस्य, निषीदति अस्यां निषद्या—आपणभूः, तत्सम्बुद्धौ, हे रोषदोषाश्रयेत्यर्थः; यद्वा,—रोष एव दोषः तस्य निषद्या—आवासः यत्र तादृशं। स्वहृदये—निजचित्ते। निग्राह्ये—निगृहीतुमर्हे सतीत्यर्थः। अनागसं—निरपराधाम्, ("आगः पापापराधयोः" इति कोषः)। आत्मस्खलितेति।—आत्मनः,—स्वस्य, स्खलितानि—प्रमादाः, तैः वैलक्ष्याणि—लज्जितानि, साधुसमाजे सुखावनतिविधायकभावविशेषाः, ["आत्मस्खलितवैलक्ष्याणि" इत्यत्र "आत्मप्रमादःस्खलितवैलक्ष्याणि" इति पाठान्तरे—आत्मनः प्रमादेन—अनवधानतया, यत् स्खलितम्; प्रमादः एव स्खलितम् इत्यर्थो वा]। याप्यतां—गर्हणीयताम्।

याति अविदग्धो जनः" इत्युक्ता पुनराह,—"वत्से सरस्वति! विषादं मा गाः। एषा त्वामनुयास्यति सावित्री, विनोदयिष्यति च अस्मद्विरहिताम्। आत्मजमुखकमलावलोकनावधिश्च ते शापोऽयं भविष्यति" इति। एतावदभिधाय विसर्जितसुरासुरमुनिमनुजमण्डलः ससम्भ्रमोपगतनारदस्कन्धविन्यस्तहस्तः समुचिताङ्किककरणाय उदतिष्ठत्। सरस्वत्यपि श्रमा किञ्चिदधोमुखी (१७) धवलकृष्णशारां कृष्णाजिनलेखामिव तपसे दृष्टिमुरसि पातयन्ती सुरभिनिश्वासपरिमललग्नैर्मूर्त्तैः शापात्तरैरिव षट्चरणचक्रैराकृष्यमाणा शोकग्रथिलितहस्ता अधोमुखीभूतेनोपदिश्यमानमर्त्यलोकावतरणमार्गेव नखमयूखजालकेन नूपुरवव्याहारहृतैः भवन-

अविदग्धः,—अज्ञः। पुनराहेति।—वाच्यतानिबन्धने एव अभ्यासेऽपि वाक्यक्रमे पुनरित्युपादानम्। विनोदयिष्यति—सुखयिष्यति। ["अस्मद्विरहिताम्" इत्यत्र "अस्मद्विरहदुःखितास्" इति पाठान्तरम्]। समुचिताङ्किककरणाय—समुचितं यत् आङ्किकं—दिवसकार्य्यं, तस्य करणं तस्मै। सरस्वतीत्यादिकै,—सरस्त्यपि श्रमा गृहमगादित्यन्वयसम्बन्धः।

(१७) धवलकृष्णशारां—धवलः,—श्वेतः, कृष्णः,—नीलः, ताभ्यां शारा—शबला, संवलितेत्यर्थः, ताम्; शारशबलां धवलकृष्णामिति कथनीये शारशब्देन संमिश्रवर्णद्वयप्रतीतिः स्फुटा। कृष्णाजिनलेखामिव—कृष्णमृगचर्म्मश्रेणीमिव। तपसे—तपश्चरणाय। षट्चरणचक्रैः,—भ्रमरनिवहैः। ["षट्चरणचक्रैः" इत्यत्र "षट्चरणकदम्बकैः" इति पाठान्तरम्]। शोकेति।—शोकेन—शापजनितेन दुःखेनेत्यर्थः, ग्रथिलितौ—तेजोरहितौ, हस्तौ यस्याः सा। ["शोकग्रथिलित—" इत्यत्र "शापशोकग्रथिलित—" इति पाठान्तरम्]। अधोमुखीभूतेन—अधोमुखतां गतेन, यः आश्रितोऽपि अन्याय्योपदेशं ददाति, स वपयाऽवश्यमधोमुखो जायते इति भावः। नखेति।—नखमयूखानां—नखकिरणानां, जालकं—समूहः तेन। नूपुरेति।—नूपुरयोः रवाः,—निक्वणाः एव, व्याहाराः,—वचनानि, ("व्याहार भणितिर्लपितं भाषितं वचनं वचः" इत्यमरः) तैः हृताः,—आकृष्टाः तैः। ["नूपुरवव्याहारहृतैः" इत्यत्र "नूपुरव्याहाराहृतैः" इति पाठान्तरम्]।

कलहंसकुलैः ब्रह्मलोकनिवासिहृदयैरिवानुगम्यमाना समं सावित्र्या गृहमगात्।

अत्रान्तरे सरस्त्यवतरणवार्त्तामिव कथयितुं (१८) मध्यलोकमवततार अंशुमाली। क्रमेण च मन्दायमाने मुकुलितविसिनीविरहव्यसनविषण्णसरसि वासरे, मधुमदमुदितकामिनीकोपकुटिलकटाक्षक्षिप्यमाणे इव क्षेपीयः क्षितिधरशिखरमवतरति (१९) तरुणतरकपिलपनलोहिते लोकैकचक्षुषि भगवति सवितरि, प्रस्रुतमहिष्यूधःक्षरत्क्षीरधाराधवलितेषु आसन्न-चन्द्रोदयोद्दामक्षीरोदक्षालितेषु इव दिव्या-

(१८) अंशुमाली—सूर्यः। मध्यलोक—मर्त्यभूमिम्। ["मध्यलोकम्" इत्यत्र "मध्यमं लोकम्" इति पाठान्तरम्]। क्रमेणेत्यादिकं,—सावित्री सरस्वती-सवार्दित्यत्वयसम्बन्धः। मन्दायमाने—प्राखर्थं विजहतीति यावत्। मुकुलितेति।—मुकुलितानां—मुकुलतां गतं प्रवृत्तानामिति यावत्। विसिनीनां—पद्मिनीनां, विरहः,—कान्तस्य सूर्यस्य विच्छेद इति यावत्, एव व्यसनं—दुःखं, तेन विषण्णं—विषादं गतम्; निजकन्यानामिव खेदरवर्त्तिनीनां पद्मिनीनां दर्शनादिति भावः, सरः,—सरोवरं यस्मिन् तथाभूते। ["मुकुलितविसिनीविसरव्यसनविषण्णसरसि" इति पाठे—विसरः,—समूह इत्यर्थः]। मधुमदेति।—मधुमदेन—मद्यपानजनितेन उल्लासेन, मुदिताः,—सञ्जातसम्मथाः, सम्भोगार्थिन्य इति यावत्, याः कामिन्यः,—शृङ्गारार्थिन्यः प्रमदाः, तासां कोपेन—कथमधुनेदानीमपि नः सम्भोगान्तरायो न अस्तमेति इति क्रोधेन, कुटिलः,—वक्रः, यः कटाक्षः,—अपाङ्गवीक्षणं, तेन क्षिप्यमाणे इव—दूरीक्रियमाणे इव। क्षेपीयः,—अतिक्षिप्रम्, अतिशीघ्रमित्यर्थः। क्षितिधरशिखरम्—अस्ताचलचूडाम्।

(१९) तरुणेति।—तरुणतरः,—अतियुवा, यः कपिः,—वानरः, तस्य लपनं—मुखं, तद्वत् लोहितः,—रक्तः, तस्मिन्। लोकैकचक्षुषि—लोकानां—जगताम्, एकम्—अद्वितीयं, चक्षुः तस्मिन्; [लोकेत्यादिना सुरतान्तरायकर्तृत्वं सूच्यते]। प्रस्रुतेति।—प्रस्रुतात्—प्रस्रुतात्, महिष्याः उधसः,—स्तनात्, क्षरन्ति यानि क्षीराणि—दुग्धानि, तेषां धारावत् धवलितानि—शुभ्राणि तेषु। आसन्नेति।—आसन्नः,—सन्निहितः, यः चन्द्रोदयः, तेन उद्दामः,—उद्वेलः, यः क्षीरोदः,—

श्रमोपशल्यकेषु अपराह्णप्रचारप्रचलिते, चामरिणि चामीकर-तटताड़नरटितरदने रदति (२०) सुरस्रवन्तीरोधांसि स्वैरम् ऐरावते, प्रसृतानेकविद्याधराभिसारिकासहस्रचरणालक्तक-रसानुलिप्त इव प्रकटयति च तारापथे पाटलतां, तारापथ-प्रस्थित-सिद्धदत्तदिनकरास्तमयार्घ्यावर्जिते रञ्जितककुभि, कुसुम्भभासि स्रवति पिनाकिप्रणतिमुदितमन्थास्वेदसलिल इव

चीरसागरः, तेन चालितानि—धौतानि, तेषु इव। ["प्रसृतसुरभाहैयीयूथचरत्क्षीर-धाराधवलितेषु आमन्नचन्द्रोदयोद्दामक्षीरोदलहरीचालितेष्विव" इति पाठे—माहैयी—गौः, "माहैयी सौरभेयी गौः" इत्यमरः]। दिव्याश्रमोपशल्यकेषु—दिव्या आश्रमाः तेषाम् उपशल्यानि—अल्पभागाः, तेषु, ("यामान्त उपशल्यं स्यात्" इत्यमरः)। अपराह्णेति।—अपराह्णे—अह्नोऽपरभागे—पश्चिमभागे इत्यर्थः, यः प्रचारः,—प्रकर्षेण चरणं, तस्मिं प्रचलितः,—प्रवृत्त इति यावत्, तस्मिन्। चामरिणि—चामरशालिनि। चामीकरेति।—अत्र चामीकरशब्देन सुमेरुर्लक्ष्यते; तथा च चामीकरस्य—सुवर्णाद्रेः, सुमेरोरित्यर्थः, तटेषु यत् ताड़नं—वप्रक्रीड़ेत्यर्थः, तेन रटिताः,—ध्वनिताः, रदनाः, —दन्ताः यस्य तस्मिन्। [रटितरदने" इत्यत्र "रणितरदने" इति पाठान्तरेऽपि स एवार्थः]। रदति—विलिखति।

(२०) सुरस्रवन्तीरोधांसि—मन्दाकिनीतटानि। स्वैरं—यदृच्छयेत्यर्थः। प्रसृ-तेति।—प्रसृतानां—प्रचलितानां, कान्तं प्रति अभिसरन्तीनामित्यर्थः, अनेकासां —बहूनां, विद्याधराभिसारिकाणाम्—अभिसारिणीनां विद्याधरीणामित्यर्थः, ("या दूतिकागमनकालमपाहरन्ती सोढुं स्मरज्वरभरार्त्तिमपासितेव। निर्याति वल्लभजनाधरपानलीभात् सा कथ्यते कविवरैरभिसारिकेति॥" इत्युक्तेः) सहस्रस्य चरणालक्तकरसैः,—चरणलाक्षाद्रवैः, अनुलिप्त इव—अनुरञ्जित इव। प्रकटयति —प्रकाशयति। पाटलतां—रक्ततां। तारापथे—नक्षत्रमार्गे, गगनवर्त्मनीत्यर्थः। तारापथेति।—तारापथेषु—गगनमार्गेषु, प्रस्थितैः,—प्रचलितैः, सिद्धैः,—दैव-योनिविशेषैः, दत्तानि दिनकराय—सूर्याय, यानि अस्तमयार्घ्याणि—अस्तगमन-कालदेयानि अर्घ्याणि, तेभ्यः आवर्जितः,—प्रकीर्णः तस्मिन्। रञ्जितककुभि—रञ्जीकृतदिशि। कुसुम्भभासि—कुसुम्भ—रक्तपुष्पविशेषः, तद्वत् भाः,—दीप्तिः यस्य तादृशे। स्रवति—चरति सति। पिनाकीति।—पिनाकिने—हराय, या प्रणतिः,—प्रणामः, तया मुदिता—उल्लासं गता, या मन्था तस्याः खेदसलिल इव—घर्मोदक इव।

रक्तचन्दनद्रवे, वन्दारुमुनिवृन्दारकवृन्दवध्यमानसन्ध्याञ्जलिवने, (२१) ब्रह्मोत्पत्तिकमलसेवासमागतसकलकमलाकर इव राजति ब्रह्मलोके, समुच्चारिततृतीयसवनब्रह्मणि ब्रह्मणि, (२२) ज्वलितवैतानज्वलनज्वालाजटालाजिरेषु आरब्धधर्म्मसाधनशिविरनीराजनेष्विव समर्षिमन्दिरेषु अघमर्षणमुषितकिल्बिषगदोल्लाघलघुषु यतिषु सन्ध्योपासनाऽऽसीनतपस्विपङ्क्तिपूतपुलिने प्लवमानपद्मयोनियानहंसदन्तुरोर्म्मिणि मन्दाकिनी-

वन्दारुमुनीति।—वन्दारुभिः,—वन्दनशीलैः मुनिवृन्दारकाणां—मुनिमुख्यानां, वृन्दैः,—समूहैः, वध्यमानं—संयम्यमानं, सन्ध्यायाम् अञ्जलिवनम्—अञ्जलिसमूहः यस्मिन् तथाभूते, मुनिभिः सन्ध्यावन्दनार्थं क्रियमाणाञ्जलिपुटे इत्यर्थः।

(२१) ब्रह्मेति।—ब्रह्मणः उत्पत्तिः,—जन्म, यस्मात् तत्, कमलं—नारायणनाभिपङ्कजमित्यर्थः, तस्य सेवायै समागताः सकलाः कमलाकराः,—कमलसमूहाः; यद्वा,—कमलाकराः,—कमलश्रेष्ठाः; उत्कृष्टकमलानि इत्यर्थः, यस्मिन् तथाभूत इव,("आकरो निधनोत्पत्तिस्थानश्रेष्ठेषु कथ्यते" इति मेदिनी)। राजति—दीप्यमाने। समुच्चारितेति।—समुच्चारितं, तृतीयसवनं—सायंकालिकस्नानं, प्रातर्मध्याह्ने सायञ्च सोमयागैकदेशो वा, तत्र, ब्रह्म—वेदः यैन तथाभूते।

(२२) ज्वलितेति।—ज्वलितस्य—प्रदीप्तस्य, वैतानज्वलनस्य—यज्ञाग्नेः, ज्वालाभिः,—शिखाभिः, जटालानि—व्याप्तानि, अजिराणि—अङ्गनानि येषां तादृशेषु। आरब्धेति। आरब्धं—कृतारब्धं, धर्म्मसाधनं—धर्म्मार्जनहेतुः, शिविरस्य—स्कन्धावारस्य, नीराजनं—शान्तिकर्म्मविशेषः; यद्वा,—आरब्धं, धर्म्मसाधने शिविरे,—सत्कर्म्मोपकरणसाधनस्कन्धावारे, नीराजनाख्यं शान्तिकर्म्म येषु तथीभूतेषु, धर्म्मोपकरणसाधनादौ दीक्षाः नोऽस्मत्सायमुत्पादयेयुरिति भीतेः इति भावः। अघमर्षणेति।—अघानि—पापानि, मर्षयति—नाशयतीति अघमर्षणः,—वैदिकमन्त्रविशेषः, ("शमनं सर्व्वपापानां जप्यं विघ्नघमर्षणम्" इति शास्त्रम्) तेन मुषितानि—हृतानि, किल्बिषाणि—पापानि, गदाः,—रोगाश्च, तैः उल्लाघाः,—स्वस्थाः, अत एव लघवः,—सुवहदेहा इत्यर्थः, तेषु, ["किल्बिषगदोल्लाघलघुषु" इत्यत्र "किल्बिषविषगदोल्लाघलघुषु" इति पाठान्तरे—किल्बिषाणि एव विषाणि, गदाः,—रोगाश्च इत्यर्थः]। यतिषु—चतुर्थाश्रमिषु। सन्ध्येति।—सन्ध्योपासनायै आसीनानाम्—उपविष्टानां, तपस्विनां पङ्क्तिभिः पूतानि— पवित्रीकृतानि, पुलिनानि

जले, जलदेवताऽऽतपत्रे पवरथकुलकलत्राल्लःपुरसौधे, निजमधुरसामोदिनि मधुकृतमधुपमुदि मुमुदिषमाणे कुमुदवने, दिवसावसानताम्यत्तामरसमधुरसमपीतिव्रते, (२३) सुषुप्सति मृदुमृणालकाण्डकण्टककण्डूयनकुण्डलितकम्बरे धुतपक्षराजि-

—सैकतानि, सर्वी नौरपरित्यक्ततटानि इत्यर्थः, यस्य तादृशं। प्लवमानेति।—प्लवमानः,—सन्तरन्, यः पद्मयोनिः,—ब्रह्मणः, यानहंसः,—वाहनमराल:, तेन दन्तुराः,—सञ्जातदन्ता इवेत्यर्थः, ऊर्मयः,—तरङ्गाः यस्य तथोक्ते। ["प्लवमाननलिनयोनियानहंसहासदन्तुरितोर्म्मिणि" इति पाठे—प्लवमानः यः नलिनयोनिः,—पद्मयोनिः, यानहंसः, तस्य हासेन—उल्लासेन, प्रभया वा, दन्तुरिताः,—संवलिताः, स्फुटदन्तत्वात्सहासाः दन्तुरा इवालीक्यन्ते इति भावः, ऊर्मयः,—तरङ्गाः यस्य तथाभूते इति विग्रहः]। जलदेवतेति।—जलदेवतायाः,—जलाधिष्ठात्र्या देव्याः, आतपत्रे—छत्रे, तस्मिन्, तथाभूते इत्यर्थः। पवरथेति।—पवरथानां—पक्षिणां, कुलं—समूहः, तस्य कलत्राणि—स्त्रियः, पक्षिण इत्यर्थः, तेषाम् अल्लःपुरस्य सौधे—हर्म्याभूतमित्यर्थः, तस्मिन्। निजेति।—निजेन—स्वकीयेन, मधुरसेन—मकरन्देनेत्यर्थः, आमोदते—उल्लसतीति तथोक्ते। मधुनेति।—मधुना कृता मधुपानां—भ्रमराणां, मुद्—आनन्दो यत्र तथाभूते। ["निजमधुरसामोदिनि मधुकृतमधुपमुदि" इत्यत्र "निजमधुमधुरामोदिनि कृतमधुपमुदि" इति पाठे,—निजमधुना—स्वकीयमकरन्देन, स्वीय मद्येन वा, मधुरः,—मनोज्ञः, आमोदः,—उल्लासः यस्य तथोक्ते, कृता मधुपानां भ्रमराणां मद्यपानां वा मुद् यत्र तथाविधे इति बोध्यम्]। मुमुदिषमाणे—विकाशं ग्रहीतुमिच्छतीत्यर्थः, अन्यत्र,—मोदितुमिच्छति, प्रारिप्समानगानवाद्यादिगोष्ठीव्रजे इति यावत्, "मद्याः क्रीणन्ति" इत्यादिवत् अर्थक्रियः। दिवसेति।—दिवसस्य अवसानेन ताम्यन्ति—क्लिश्यन्ति, यानि तामरसानि—रक्तपद्मानि, तेषां मधुरसस्य पीतिः,—पानं, तेन सह वर्त्तमाना सपीतिः, [अनेन प्रेमोत्कर्षः सूच्यते] व्रतं—नियमः यस्य तथाभूते, युगपत् ताम्यत्तामरसमधुरसं पीतवतीत्यर्थः। ["दिवसावसानताम्यत्तामरसमधुरमधुसपीतिपीते" इति पाठे—दिवसावसानेन ताम्यताम्—अचिरं क्लिश्यतां, तामरसानां मधुरस्य मधुनः सपीतिः,—सहपान यथा तथा, पीतं पानं येन तथाभूते। "सपीतिप्रीते" इति पाठे—सपीतिः,—सहपानं, तया प्रीतं तथाभूते]।

(२३) सुषुप्सति—निद्रिसति। मृदिति।—मृदुना—कोमलेन, मृणाल-

वीजितराजीवरजसि राजहंसयूथे, तटलताकुसुमधूलिधूसरित-सरिति सिद्धपुरपुरन्ध्रिधम्मिल्लमल्लिकागन्धग्राहिणि मायन्तने (२४) तनीयसि निशानिश्वासनिभे नभस्वति, सङ्कोचोद्यद्-दुच्चकेसरकोटिसङ्कटकुशेशयकोशकुटीकुटिलशायिनि षट्चरण-चक्रे, नृत्योद्धूतधूर्जटिजटाऽटवीकुटजकुड्मलनिभे नभस्तलं

कण्डस्य—नालदण्डस्य, कण्डूकेन यत् कण्डूयनं—कण्डूतिः, तेन कुण्डलिता—साचीकृतेत्यर्थः, कन्धरा—ग्रीवा येन तादृशे। धुतेति।—धुताभिः,—कम्पिताभिः, पक्षराजिभिः,—पक्षसमूहैः, वीजितं—सञ्चालितम्, उत्पातितमित्यर्थः, राजीवानां—श्वेतकमलानां, रजः,—परागः येन तथोक्ते। ["राजीवरजसि" इत्यत्र "राजीव-सरसि" इति पाठान्तरे,—राजीवसरः,—पद्मसरोवरं येन तथोक्ते] तटेति।—तटेषु या लताः, तासां कुसुमानि तेषां धूलिभिः,—परागैः, धूसरिताः,—धूसरतां नीताः, सरितः,—नद्यः येन तथोक्ते। सिद्धेति।—सिद्धानां—दैवयोनिविशेषाणां, पुरं—नगरं, या पुरन्ध्र्यः,—स्त्रियः, तासां धम्मिल्लेषु—संयतकेशेषु, ("धम्मिल्लाः संयताः कचाः" इत्यमरः) या मल्लिकाः,—तदाख्यकुसुमानि, तासां गन्धग्राही—सौरभ-वानित्यर्थः, तस्मिन्।

(२४) तनीयसि—मन्दसञ्चारिणि इत्यर्थः। निशानिश्वासनिभे—निशा—रजनी, नायिकेति भावः, तस्या निश्वासः, तन्निभे—तत्सदृशे। सङ्कोचेति।—सङ्कोचे—निमीलने, उद्यताम्—उद्गच्छताम्, उच्चकेसराणाम्—उन्नतकिञ्जल्कानां,("किञ्जल्कः केसरोऽस्त्रियाम्" इत्यमरः) कोटिभिः,—अग्रभागैः, सङ्कटानि—आकीर्णानि, यानि कुशेशयानि—कमलानि, तेषां कोशाः,—अभ्यन्तरभागा एव, कुट्यः,—क्षुद्रगृहाणि, तेषु कुटिलं—कुण्ठितं यथा तथा, शेते इति तथाभूते। ["कुशेशयकोशकुटीकुटिल-शायिनि" इत्यत्र "कुशेशयकोशकोटरकुटीरशायिनि" इति पाठे—तादृशा ये कुशेशय-कोशाः,—पद्ममुकुलानि, तेषां कोटराण्येव—अभ्यन्तरा एव, कुटीराणि—क्षुद्र-गृहाणि, तेषु शेते इति तथोक्ते इत्यर्थः]। षट्चरणचक्रे—भ्रमरवृन्दे। नृत्येति।—नृत्येषु—नर्त्तनेषु, उद्धूतानि—उत्पतितानि, धूर्जटेः,—हरस्य, जटाऽटव्याः,—जटा-रूपात् अरण्यात् इत्यर्थः, यानि कुटजकुड्मलानि, तन्निभे—तत्सदृशे, नृत्यतो हरस्य जटाजूटात् उत्पतितकुटजकुड्मलसदृशे इत्यर्थः। ["नृत्योद्धूतधूर्जटिजटा-ऽटवीकुटजकुड्मलनिभे" इत्यत्र "नृत्योद्धूतधूर्जटिजटाऽटवीकुटजकुड्मलनिकरनिभे" इति पाठान्तरे—नृत्येषु उद्धतानि—उत्क्षिप्तानि, धूर्जटेः जटाऽटव्याः यानि कुटज-

(२५) स्तवकयति तारागणे, सन्ध्याऽनुबन्धताम्रे परिणमत् तालफलत्विषि कालमेघमेदुरे, मेदिनीं निमीलयति नवतमसि तमसि तरुणतरतिमिरपटलपाटनपटीयसि समुन्मिषति यामिनीकामिनीकर्णपूरचम्पककलिकाकदम्बके प्रदीपप्रकरे, (२६) प्रतनुतुहिनकिरणालोकपाण्डुनि आश्यानन्नीलनीर-मुच्यमानकालिन्दीकूलबालपुलिनायमाने शातक्रतवे, क्लृप्तयति

कुड्मलनिकरान्वि—कुटजानां—गिरिमल्लिका-कुसुमानां, कुड्मलनिकरान्वि—कोरक-समूहाः, तद्वि भे]।

(२५) स्तवकयति—पुष्पस्तवकवदाचरतीत्यर्थः। सन्ध्येति।—सन्ध्याया अनु-बन्धेन—अनुसरणेन, ताम्रं—ताम्रवर्णं तस्मिन्; अत एव परिणमदिति।—परिणमत्—परिपक्वतां गच्छत्, यत् तालफलं तस्य त्विष इव त्विषः,—कान्तयः यस्य तथाभूते। ['परिणमत्तालफलत्वक्त्विषि" इति पाठान्तरे,—तालफलस्य या त्वक्—वल्कलं, तस्याः त्विष इव त्विषः इत्यर्थः]। कालमेघमेदुरे—कालमेघः,—कृष्ण-मेघः, तद्वत् मेदुरः,—स्निग्धः तस्मिन्। निमीलयति—स्थगयति, आच्छादयतीत्यर्थः। ["निमीलयति" इत्यत्र "मीलयति" इति पाठेऽपि स एवार्थः]। नवतमसि—अभिनवजाते इत्यर्थः। तमसि—तिमिरे। तरुणेति।—तरुणतराणाम्—अभि-नवजातानां, तिमिरपटलानाम्—अन्धकारसमूहानां, पाटने—निरसने, पटीयान्—अतिशयेन पटुः तस्मिन्। समुन्मिषति—ज्वलति। यामिनीति।—यामिनी एव कामिनी तस्याः कर्णपूरः,—कर्णभूषणम् एव, चम्पककलिकाकदम्बकं तस्मिन्—तद्वि भे इति भावः। प्रदीपप्रकरे—प्रदीपनिचये।

(२६) प्रतन्विति।—प्रतनुभिः,—अभिनवोदितत्वात् अल्पाल्पैः, तुहिनकिर-णस्य—शीतरश्मेः चन्द्रस्य, आलीकैः,—उद्योतैः, ("आलीकौ दर्शनोद्योतौ" इत्यमरः) पाण्डु तस्मिन्, पाण्डुवर्णं इत्यर्थः। ["प्रतनुतुहिनकिरणकिरणलावण्यालोक-पाण्डुनि" इति पाठे—तुहिनकिरणस्य किरणानां—रश्मीनां, लावण्यालोकैः,—प्रभाप्रकाशैः, पाण्डु तस्मिन्नित्यर्थः]। आश्यानेति।—आश्यानम्—ईषच्छुष्कं, नीलनीरैः,—कृष्णवर्णसलिलैः, मुच्यमानं—त्यज्यमानं, ["मुच्यमानम्" इत्यत्र "मुक्त" इति पाठे—मुक्तं—त्यक्तम्]। कालिन्दीकूलस्य—यमुनातीरस्य, बालपुलिनं —नवोत्थितं सैकतं, तदाचरतीति तथोक्ते। शतं क्रतवः,—यज्ञा यस्य सः, शतक्रतुः,—इन्द्रः तस्य इदं, यद्वा,—स अधिष्ठाता यस्य तत् शातक्रतवम्—ऐन्द्र-

तिमिरम् आशामुखे खमुचि मेचकितविकचितकुवलयसरसि (२७)शशधरकरनिकरकचग्रहाविले विलीयमाने (२८)मानिनी-मनसीव शवरीचिकुरचये चाषपक्षत्विषि तमसि उदिते, भगवति (२९) उदयगिरितटनिकरकुहरहरिखरनख-मुख-निवह-हेतिनिहत-निजहरिणगलगलितरुधिरचयनिचितमिव लोहितं

मित्यर्थः, तस्मिन्। क्लशयति—क्लेशं करोति, खण्डयतीत्यर्थः। आशामुखे—दिङ्मुखे। खमुचि—खम्—आकाशं मुञ्चतीति तथोक्ते, आकाशं त्यक्त्वा भूमण्डलमाक्रामतीति भावः। मेचकितेति।—मेचकितं—श्यामलतां नीतं, विकचितानां ["विकच" इति पाठे—विकचानां—विकासं गतानाम्] कुवलयानां—नीलोत्पलानां, सरः, —सरोवरं येन तादृशे।

(२७) शशधरेति।—शशधरस्य—चन्द्रस्य, करनिकरैः—किरणसङ्घैः, [कर-समूहैरिति ध्वनिः] यः कचग्रहः,—केशाकर्षणं, तेन आविलं—मालिन्यं नीतं, तस्मिन्; अत एव विलीयमाने—विलयं गच्छति, अन्योऽपि केशाकर्षणेन विमानितो लज्जया अदर्शनं गच्छतीति भावः।

(२८) मानिनीमनसीव—मानिनीनां—मानवतीनां, कान्तं प्रति कुपितानामिति यावत्, नारीणां मनसीव—हृदये इव, शवरीणां—शवराङ्गनानां, चिकुरचये—केशनिचये, ["चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः" इत्यमरः। "शवरी-चिकुरचये" इत्यत्र "शर्व्वरीशवरीचिकुरचये" इति पाठे—शर्व्वर्य्यां—रात्रौ, रात्रिशवरीणामित्यर्थः, अन्यत्र समानम्]। विलीयमाने इत्यस्याधिकरणम्। चाषपक्षत्विषि—चाषो नाम पक्षिविशेषः तस्य पक्षवत् त्विषः,—प्रभा यस्य तादृशे।

(२९) उदयगिरीति।—उदयगिरेः,—उदयाचलस्य, तटनिकरेषु—प्रस्थभागेषु, यानि कुहराणि—गह्वराणि, तेषु ये हरयः,—सिंहाः, स्थिता इति भावः, तेषां खराः, —तीक्ष्णाः, ये नखाः, तेषां मुखनिवहाः,—अग्रसमूहा एव, हेतयः,—अस्त्राणि, तैः निहतः,—नाशितः, यो निजहरिणः,—स्वात्मकस्यः मृग इत्यर्थः, तस्य गलात्—कण्ठात्, गलितैः,—निःसृतैः, रुधिरचयैः,—रक्तसमूहैः, निचितमिव—व्याप्तमिव, ["उदयगिरिशिखरकटककुहरहरिखरनखरनिवहहेतिनिहतनिजहरिणगलितरुधिर-निचयनिचितमिव" इति पाठे—उदयगिरेः शिखरेषु कटकेषु—नितम्बेषु च, यानि कुहराणि तेषु ये हरयः,—सिंहाः, स्थिता इति भावः, तेषां खरनखरनिवहाः,—तीक्ष्णनखसमूहाः एव, हेतयः, अस्त्राणि तैः निहतस्य निजहरिणस्य गलितेन रुधिर-

वपुः उदयरागधरमिव विभावरीवध्वा धारयति श्वेतभानौ, (३०) अचलच्युतचन्द्रकान्तजलधाराधौत इव ध्वस्ते ध्वान्ते, (३१) गोलोकगलितदुग्धविसरवाहिनि दन्तमयमकरमुख-महाप्रणाले इव पूरयितुं प्रवृत्ते पयोनिधिमिन्दुमण्डले, स्पष्टे प्रदोषसमये सावित्री शून्यहृदयामिव किमपि ध्यायन्तीं मामां सरस्वतीमवादीत्, — "सखि! त्रिभुवनोपदेशदानदक्षायाः तव पुरो जिह्वा जिह्रेति मे जल्पन्ती। जानासि एव या दुर्वश्याः (३२) विसंष्ठुलाः गुणवत्यपि जने दुर्जनवान्नि-र्दाक्षिण्याः क्षणभङ्गिन्यो नातिक्रमणीया न रमणीया दैवस्य

निचयेन निचितमिवेत्यर्थः] अत एव लौहितं—रक्तम। उदयरागधरम्—उदये यो रागः,—लौहित्यं, तस्य धरतीति धरम। ["उदयरागधरमिव" इत्यत्र "उदयरागधरमधरमिव" इति पाठान्तरं—उदयरागधरम्—उदयकालिकरक्तप्रकाशम्, अधरमिव—निस्रोष्ठपुटमिव इत्यर्थः]। विभावरीवध्वाः,—विभावरी—रात्रिरेव, वधूः तस्याः। श्वेतभानौ—शुभ्रकिरणे, चन्द्रमसीत्यर्थः।

(३०) अचलेति।—अचलात्—उदयगिरेरित्यर्थः, च्युतानां—निर्गलितानां चन्द्रकान्तानां—मणिविशेषाणां, (ये चन्द्रोदये प्रस्रवन्तीति प्रसिद्धाः) जलधाराभिः धौतमिव,—क्षालितमिव, तस्मिन्, अत एव ध्वस्ते—ध्वंसं गते। ध्वान्ते—तमसि।

(३१) गोलोकेति।—गोलोकात्—गवां लोकात्, गोस्थानात्, गोष्ठादित्यर्थः, मयूखनिचयात् वा, ("स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले। लक्ष्म्यदृष्ट्या स्त्रियां पुंसि गौः" इत्यमरः। घृणिः,—मयूख इत्यर्थः)। गलितान्—निःसृतान्, दुग्धविसरान्—क्षीरप्रस्रवान्, वहतीति तथाभूते। दन्तेति।—दन्तमयं—गजदन्तनिर्मितमित्यर्थः, यत मकरमुखं—मकराख्य-जलजन्तुवदनं, तदेव महान् प्रणालः,—जलनिःसरण-मार्गः, तस्मिन्निव। प्रवृत्ते—प्रसृते। पयोनिधिं—सागरम्; ["पयोनिधिम्" इत्यत्र "पर्योधिम्" इति पाठान्तरम्] पूरयितुं—भर्तुम्; ["पूरयितुम्" इत्यत्र "आपूरयितुम्" इति पाठान्तरेऽपि स एवार्थः]। मामाम्,—अश्रुमुखीमित्यर्थः। पुरः,—अग्रतः। जिह्रेति—लज्जते। जल्पन्ती—आलपन्ती। दुर्वश्याः,—वशयितुम् अपार्दयितुमशक्याः। ["या दुर्वश्याः" इत्यत्र "याद्दश्यः" इति पाठान्तरम्]।

(३२) विसंष्ठुलाः,—निर्मर्यादाः। निर्दाक्षिण्याः,—निष्ठुराः। दैवस्य—

वामा वृत्तयः। निष्कारणा च निकारकणिकाऽपि उद्वेजयति मनस्विनोऽपि मानसम् असदृशजनात् आपतन्ती। अनवरत-नयनजलधारासिच्यमानः तरुरिव विपल्लवोऽपि सहस्रधा प्ररोहति। अतिसुकुमारश्च जनं सन्तापपरमाणवो मालती-कुसुममिव म्लानिम् आनयन्ति। महताञ्च उपरि निपतन् अणुरपि स्फुलिङ्ग इव करिणां क्लेशः कदर्थनाय अलम्। (३३) सहजस्नेहपाशग्रन्थिबन्धनाश्च बान्धवभूता दुस्त्यजा जन्मभूमयः। दारयति दारुणः क्रकचपात इव हृदयं संस्तुतजनविरहः। सा न अर्हसि एवं भवितुम्। अभूमिः खलु असि दुःखक्लेशाङ्कुरप्रभवानाम्। अपि च पुराकृते कर्मणि बलवति शुभेऽशुभे वा फलकृति निष्ठति अधिष्ठातरि

अदृष्टस्य। वामाः,—प्रतिकूलाः, याः चण्डभङ्ग्यः,—चण्डभावेन विध्वंसन्यः, नातिक्रमणीयाः,—अतिक्रमितुमशक्याः, ["नातिक्रमणीयाः" इत्यत्र "दुरतिक्रम-णीयाः" इति पाठे—दुःखेनातिक्रमितुं शक्याः इत्यर्थः]। वृत्तयः,—व्यवहाराः, ता दुर्जन इव गुणवत्यपि जने पतन्तीति ज्ञानास्पदमित्यन्वयः। निष्कारणा—अहेतुका, निकारकणिका—परिभवलेश इत्यर्थः। उद्वेजयति—व्यथयति। ["उद्वेजयति" इत्यत्र "कलुषयति" इति पाठेऽपि स एवार्थः]। असदृशजनात्—अयोग्यजनात्। विपल्लवः,—विपदो लेशः, पल्लवशून्यश्च। सन्तापपरमाणवः,—खेदलेशाः, उष्मबिन्दवश्च। आनयन्ति—प्रापयन्ति। अणुरपि—अत्यल्पोऽपि। स्फुलिङ्ग इव—अङ्गार इव। कदर्थनाय—व्यथनाय।

(३३) सहजेति।—सहजं—स्वाभाविकं, स्नेहपाशग्रन्थिना—स्नेहः,—प्रणय एव, पाशः,—रज्जुः, तेन ग्रथितबन्धनं यासां तथाभूताः। क्रकचपातः,—क्रकचः,—करपत्रं, तस्य पातः,—अङ्गेषु पतनं, स इव संस्तुतजनविरहः,—संस्तुताः,—परि-चिताः, प्रणयिन इति यावत्, ("संस्तवः स्यात् परिचयः" इत्यमरः) जनाः तेषां विरहः,—विच्छेदः। एवं भवितुम्—इत्थं खलजनविरहिणी भवितुमित्यर्थः। अभूमिः,—अयोग्यस्थानमित्यर्थः। दुःखेति।—दुःखमेव क्षुद्रः,—विषं, तस्य अङ्कुराः,—प्ररोहाः, तेषां प्रभवः तेषाम्, ["प्रभवाणाम्" इत्यत्र "प्रसवानाम्" इति पाठे—प्रसवानाम्—उत्पन्नानां, फलानामित्यर्थः]। पुराकृते—प्राक्तने इति यावत्।

प्रष्ठे पृष्ठतश्च कोऽवसरो विदुषि शुचाम् ? इदन्तु ते त्रिभुवन-मङ्गलैककमलम् अमङ्गलभूताः कथमिव मुखम् अपवित्रयन्ति अश्रुबिन्दवः ? तदलम् अनया कथया ; अधुना कथय, कतमं भुवो भागम् अलङ्कर्तुम् इच्छसि ? कस्मिन् (३४) अवतितीर्षसि पुण्यभाजि प्रदेशे ते हृदयम् ? कानि वा तीर्थानि अनुग्रहीतुम् अभिलषसि ? केषु वा धन्येषु तपोवनधामसु तपस्यन्ती स्थातु-मभिवाञ्छसि ? सज्जोऽयम् अनुसरणचतुरः सहपांशुक्रीडापरि-चयपेशलः प्रेयान् सखीजनः। कृतचितितलावतरणसङ्कल्पा अनन्यशरणा चाद्यैव प्रभृति प्रपद्यस्व मनसा वाचा क्रियया च सर्वविद्याविधातारं धातारञ्च स्वश्रेयसाय (३५) स्वचरणरजः-पवित्रितत्रिदशासुरमौलिं सुधासूतिकलिकाकल्पितावतंसकं

फलकर्त्रि—शुभाशुभफलदातरि। अधिष्ठातरि—ईश्वरे, प्रष्ठ—सर्व्वश्रेष्ठ, नियन्तरीत्यर्थः, तिष्ठतीत्यनेनान्वयः। विदुषि—विदुज्जने, शुचां—शोकानाम्, अवसरः, —स्थानं, कः ?—न कोऽपीत्यर्थः ; ईश्वरेच्छया शुभाशुभकर्म्मफलानि सर्व्वैरेव भुज्यते, तत्र विद्वांसो न शोचन्तीति तात्पर्य्यम् ; ["इदन्तु" इत्यत्र "इदञ्च" इति पाठान्तरम्] अपवित्रयन्ति—अपवित्रं कुर्व्वन्ति।

(३४) अवतितीर्षसि—अवतरितुमिच्छसि। तीर्थानि—पुण्यक्षेत्राणि। सज्जः, —प्रस्तुतः, सह गन्तुमिति शेषः। अनुसरणचतुरः,—आनुगत्यनिपुणः। ["अनुसरण-चतुरः" इत्यत्र "उपचरणचतुरः" इति पाठे—सेवाचतुरः इत्यर्थः]। सहेति।—सह-पांशुक्रीडायां—समेत्य धूलिक्रीडने, यः परिचयः,—समासोक्तिः, तेन पेशलः,—परवश इत्यर्थः, त्वदधीन इति यावत्। कृतेति।—कृतः,—विरचितः, चितितले—भूमण्डले, अवतरणसङ्कल्पो यया तथाभूता। ["प्रेयान्……सङ्कल्पा" इत्यत्र "प्रेयान् सखीजनः चितितलावतरणाय" इति पाठान्तरम्]। अनन्यशरणा—नास्ति अन्यत् शरणं—रक्षिता यस्याः तथोक्ता, ("शरणं गृहरक्षित्रोः" इत्यमरः)। प्रपद्यस्व—प्राप्नुहि, आश्रयेत्यर्थः, ["प्रपद्यस्व" इत्यत्र "प्रतिपद्यस्व" इति पाठान्तरम्]। धातारं—रक्षितारम्। स्वश्रेयसाय—निजमङ्गलाय। ["धातारञ्च स्वश्रेयसाय" इत्यत्र "दातारं स्वःश्रेयसस्य" इति पाठे—स्वःश्रेयसस्य—सङ्गलस्य, दातारमित्यन्वयः]।

(३५) स्वचरणेति।—स्वस्य चरणरजसा—पदरेणुना, पवित्रिताः,—पाविताः,

देवदेवं त्रिभुवनगुरुं त्र्यम्बकम् अम्बिकापतिम्। अल्पीयस्येव कालेन स ते शोकविरतिं करिष्यति" इति।

(३६) मुक्तमुक्ताफलधवललोचनजललवा सरस्वती प्रत्यवादीत्,—"प्रियसखि! त्वया सह विचरन्त्या न मे काश्चिदपि पीड़ाम् उत्पादयिष्यति ब्रह्मलोकविरहः शापशोको वा, केवलं कमलासनसेवासुखमार्द्रयति मे हृदयम्। अपि च त्वमेव वेत्सि मे भुवि धर्मसाधनानि सर्वयोगयोग्यानि स्थातुम् स्थानानि" इत्येवमभिधाय विरराम। रणरणकोपनीयमानप्रजागरा च उन्मीलितलोचनैव तां निशामनयत्।

त्रिदशानां—देवानाम्, असुराणाञ्च मौलयः,—किरीटाः, धम्मिल्ला वा यैन तथोक्तम्, ("मौली किरीटधम्मिल्लौ" इत्यमरः)। ["स्वचरणरजःपवित्रितत्रिदशासुरमौलिम्" इत्यत्र "चरणरजःपवित्रितत्रिदशासुरम्" इति पाठान्तरम्]। सुधेति।—सुधा—पीयूषं, सूते अस्मात् इति सुधासूतिः,—चन्द्रः, तस्य कला एव कलिका तया कल्पितः अवतंसकः,—ललाटभूषणमिति यावत्, यैन तं, ["कल्पितावतंसकम्" इत्यत्र "कल्पितकर्णावतंसम्" इति पाठे—कर्णावतंसः,—कर्णभूषणमित्यर्थः]। सः,—त्र्यम्बकः, शोकविरतिं—शोकशान्तिं, ["शोकविरतिं करिष्यति" इत्यत्र "शापशोकविरतिं वितरिष्यति" इति पाठान्तरम्]।

(३६) मुक्तेति।—मुक्ताः,—पातिताः, मुक्ताफलवत् धवलाः,—शुभ्राः, लोचनजललवाः,—अश्रुबिन्दवः यया तथाभूता। ["मुक्तमुक्ताफल" इत्यादेः प्राक् "एवमुक्ता" इत्यधिकः पाठः क्वचित् पुस्तके दृश्यते]। आर्द्रयति—स्नेहयति। ["धर्मसाधनानि" इत्यत्र "धर्मधामानि" इति पाठे—धर्मश्चित्तवाक्शौचमित्यर्थः। "सर्वयोगयोग्यानि" इत्यत्र च "समाधिसाधनानि योगयोग्यानि" इति पाठे—समाधिः,—चित्तैकाग्र्यं, तत्साधनानि; योगः,—जीवात्मनोः ऐक्यचिन्तनं, तदर्थयोग्यानि। उक्तञ्च,—"आदौ समाधिमातिष्ठेत् ततो योगमुपाचरेत्" इति]। रणरणकेति।—रणरणकेण—उत्कण्ठया, उपनीयमानः,—जायमानः, ["उपनीयमानः" इत्यत्र "उपनीतः" इति पाठे—जातः] प्रजागरः यस्याः तथोक्ता। ["उन्मीलितलोचनैव" इत्यत्र "अनिमीलितलोचनैव" इति पाठान्तरम्]।

(३७) अन्येद्युः उदिते भगवति त्रिभुवनशेखरे तुरङ्गमुख-खुराखुरायितखरखलीनकर्षणक्षतक्षरत्क्षतजेनैव पाटलित-वपुषि उदयाचलशिखरचूडामणौ जरत्कवाकुचूडारुणारुण-पुरःसरे विरोचने रोचमाने (३८) नातिदूरवर्त्ती पितामह-विमानहंसपालः पर्य्यटन् अपरवक्त्रम् उच्चैः अगायत्,—

"तरलयसि दृशं किमुत्सुकामकलुषमानसवासलालिते !।
अवतर कलहंसि ! वापिकां पुनरपि यास्यसि पङ्कजालयम्॥२४॥"

(३७) अन्येद्युः,—अन्यस्मिन् दिवसे। ["अन्येद्युः," इत्यत्र "अपरेद्युः" इति पाठान्तरे—अपरदिवसे, तत्परदिने इत्यर्थः]। त्रिभुवनशेखरे—त्रिलोकीशिरो-भूषणभूते इत्यर्थः। तुरङ्गेति।—तुरङ्गाणाम—अश्वानां, सप्तानामिति शेषः, (अस्य सप्तास्यत्वादिति भावः) मुखेषु खुराखुरायिताः,—खुराखुरशब्दवन्त इति यावत्, खराः,—तीक्ष्णाः, खलीनाः,—कविकाः, तेषां कर्षणेन क्षरत—निःसरत, अश्वानां मुखेभ्य इति भावः, क्षतजं—रक्तं, तेनैव। [अत्र "खुराखुरायमानखरखलीनक्षत-निजतुरगमुखविसृमरेण क्षतजेनैव" इति पाठे—खुराखुरायमानाः खलन्तः ये खलीनाः तैः क्षतानि निजानां तुरगाणां मुखानि तैः विसृमरेण—निर्गलितेन तेन]। पाटलितवपुषि—रक्तकलेवरे। ["उदयाचलशिखरचूडामणौ" इत्यत्र "उदयाचल-चूडामणौ" इति पाठान्तरम्] जरदिति।—जरन्—स्थविरः, यः कक्कवाकुः,—ताम्रचूडः, तस्य चूडा—शिखरं, तद्वत् अरुणः,—रक्तवर्णः, अरुणः,—निजसारथिः यस्य तथाभूते। विरोचने—सूर्य्ये। रोचमाने—दीप्यमाने।

(३८) नातिदूरवर्त्ती—अनतिदूरस्थः। पितामहेति।—पितामहस्य—ब्रह्मणः, विमानहंसस्य—वाहनभूतमरालस्य, पालः,—रक्षकः। [अत्र "नातिदूरवर्त्ती विविक्ष पितामहवाहनहंसकुलपालः" इति पाठान्तरम्]। अपरवक्त्रं—तदाख्यम् आख्यायिकासु प्रयोज्यं वृत्तम्; तथा चाह भामहः,—"वक्त्रं चापरवक्त्रञ्च काव्ये काव्यार्थशंसिनि" इति।

तरलयसीति।—अकलुषम्—अनाविलं, स्वतः स्वच्छमित्यर्थः, मानसं—तदाख्यं सर इत्यर्थः, यद्वा,—अकलुषं—निर्मलं, मानसं यस्य सः, अकलुषमानसो ब्रह्मा तस्मिन्, अथवा,—अकलुषं मानसं येषां ते, अकलुषमानसाः,—विद्वांसः तेषु, वासेन लालिता—विनोदिता, तत्सम्बुद्धिः, हे अकलुषमानसवासलालिते ! किं—

तच्छ्रुत्वा सरस्वती पुनरचिन्तयत्,—(३९) "अहमिवानेन पर्य्यनुयुक्ता। भवतु, मानयामि मुनेर्वचनम्" इत्युक्त्वा उत्थाय कृतमहीतलावतरणसङ्कल्पा परित्यज्य वियोगविक्लवं स्वपरिजनं ज्ञातिवर्गमपरिगणय्य त्रिः प्रदक्षिणीकृत्य चतुर्मुखं कथमप्यनुनयन्ती निवर्त्तिताऽनुयायिव्रतिव्राता ब्रह्मलोकतः सावित्रीद्वितीया निर्जगाम।

ततः क्रमेण (४०) ध्रुवपदप्रहृत्तां धर्म्मधेनुमिव अधो

कथम्, उत्सुकाम—उत्कण्ठाऽस्यास्तीति उत्सुकामिति यावत्, कातरामिति भावः, इयं तरलयसि ?—चलयसि विचपसि ? हे कलहंसि ! वापिकां—दीर्घिकाम्, अन्यत्र,—उप्यन्ते कर्म्माणि अस्यामिति वापिका—कर्म्मभूमिरित्यर्थः, तां, मर्त्यलोकमित्यर्थः, अवतर—अवतीर्णा भव। न चास्या चिरास्थितिरित्याह, पुनरिति।—पुनरपि पङ्कजानां—लक्ष्म्या कान्तकमलानाम्, आलयः त, मानसं सर इत्यर्थः, अन्यत्र,—पङ्कजालयं—पद्मयोनिं, यास्यसि—प्राप्स्यसि। अत्र श्लिष्टविशेषणमहिम्ना कलहंस्या वापिकाऽवतरणरूपात अप्रस्तुतात् सरस्त्या भूतलावतरणरूपस्य प्रस्तुतस्यावगमात् अप्रस्तुतप्रशंसा नाम अलङ्कारः। अपरवक्त्राख्यं वृत्तम् ॥ २४ ॥

(३९) अहमिवेति।—अनेन—यानहंसपालेन, अहं पर्य्यनुयुक्ता—व्यक्तेन बोधितेव। मुनेः—दुर्वाससः। वचनं—शापवाक्यम्। मानयामि—अङ्गीकरोमि, प्रतिपालयामीत्यर्थः। वियोगविक्लवं—वियोगः,—स्वविच्छेद एव, विक्लवः,—आपद् यस्य तं, ["वियोगविक्लवम्" इति पाठे सुगम एवार्थः] अपरिगणय्य—अगणयित्वा। ["अवगणय्य" इति पाठान्तरम्। "अवगणा" इत्यधिकः पाठः, तत्र,—अवगणा—सावित्रीं विना नान्यपरिजनेत्यर्थः]। चतुर्मुखं—ब्रह्माणम्। अनुनयन्ती—सान्त्वयन्ती। निवर्त्तितेति।—निवर्त्तिताः,—मया सह मा गच्छतेति निषिद्धाः, अनुयायिनः,—अनुगच्छन्तः, व्रतिनां—तापसानां, व्राताः,—सङ्घाः यया तथोक्ता। ["अनुनयनिवर्त्तितानुयायिव्रतिव्राता" इति पाठान्तरम्]।

(४०) ध्रुवेति।—ध्रुवस्य—नित्यस्य वस्तुनः, विष्णोरित्यर्थः, पदात्—चरणात्, मद्दा,—पदात्—तृतीयपदस्थापनस्थानात्, आकाशादिति यावत्, प्रहृत्तां—निःसृतां, ["ध्रुवपदप्रहृत्ताम्" इत्यत्र "ध्रुवप्रहृत्ताम्" इति पाठे—ध्रुवं—नित्यं, विष्णुमित्यर्थः, तस्मात् प्रहृत्ताम्] धर्म्मधेनुमिव—धर्म्माय धेनुः धर्म्मधेनुः,—क्षीरधेनुरित्यर्थः, तामिव।

धावमानधवलपयोधराम्, उद्भुरध्वनिम् अन्धकान्तक-
मौलिमालतीमालिकाम्, आलीयमानबालखिल्यरुद्धरोधसम्
(४१) अरुन्धतीधौततारवल्वचं, त्वङ्क्तुङ्गतरङ्गतरत्तरल-
तरतारतारकां, तापसवितीर्णतरलतिलोदकपुलिनाम्,
(४२) आप्लवनपूतपितामहपातितपिण्डपाण्डुरितपारां,
पर्य्यन्तसुखसुप्तसप्तर्षिकुशशयनसूचितसूर्य्यग्रहणसूतकोपवासाम्,

अध इति।—अधो धावमान—निःसरत्, धवलं—शुभ्रं, पयः,—जल, दुग्धञ्च, यस्यास्ताम्, अन्यत्र,—अधो धावमानाः,—अधोमुखाः, धवलाः पयोधराः,—स्तनाः यस्यास्ताम्। उद्भुरध्वनिम्—उद्भुराः,—उत्कटाः, कलकलायमाना इत्यर्थः, ध्वनयः यस्याः, ताम्, अन्यत्र,—उद्भटनिनादाम्। अन्धकेति।—अन्धको नाम कश्चिदसुरः, तस्य, अन्धयति—नाशयतीति अन्तकः,—हर इत्यर्थः, तस्य मौलिः,—जटाजूटमिति भावः, तस्य मालतीमालिका—मालतीपुष्पमाला ताम्। ["अन्धकान्तक" इत्यत्र "अन्धकमथन" इति पाठेऽपि स एवार्थः]। आलीयमानेति।—आलीयमानैः,—अतिक्षुद्रत्वात् विलयं गच्छद्भिरिति भावः, बालखिल्यैः,—मुनिविशेषैः, रुद्धः—संश्लिष्टः, रोधः,—तटं यस्याः ताम्।

(४१) अरुन्धतीति।—अरुन्धत्या—वशिष्ठपत्न्या, धौता—क्षालिता, तरोरियं तारवी—तरुसम्बन्धिनी, त्वक् यस्यां तथोक्ताम्। त्वङ्क्तुङ्गतरङ्गतरत्तरलतरतारतारकामिति।—त्वङ्क्षु—चलत्सु, तुङ्गेषु—उन्नतेषु, तरङ्गेषु—ऊर्म्मिषु, तरन्त्यः,—प्रतिफलन्त्यः, तरलतराः,—अतिचञ्चलाः, ताराः,—मण्डलाः, तारका यस्यां ताम्। तापसैरिति।—तापसैः,—मुनिभिः, वितीर्णानि,—दत्तानि, तरलानि—तरङ्गसङ्गात् चञ्चलानि, तिलोदकानि—तिलयुक्ततर्पणसलिलानि, पुलिनेषु—सैकतेषु यस्याः ताम्। [अत्र "तापसवितीर्णतरलतिलोदकपुलकितपुलिनाम" इति पाठे—तापसैः वितीर्णेन—दत्तेन, तरलेन तिलोदकेन पुलकितानि—उल्लासितानि, उद्भासितानीत्यर्थः, पुलिनानि यस्याः तामित्यर्थः।

(४२) आप्लवनेति।—आप्लवनेन—स्नानेन, पूतः,—पवित्रः, यः पितामहः,—ब्रह्मा, तेन पातितैः,—अर्पितैः, पिण्डपिण्डैः,—पिण्डेभ्यः,—अग्निष्वात्तादिभ्यः, दत्तैः पिण्डैः, पाण्डुरितः,—पाण्डुवर्णीकृतः, पारः,—तटभूमिर्यस्यास्तथोक्ताम्। पर्य्यन्तेति।—पर्य्यन्तेषु—प्रान्तदेशेषु, सुखेन सुप्तानां—निद्रितानां, सप्तानाम् ऋषीणां—मरीच्यादीनां, कुशा एव शयनानि—शय्याः, तैः सूचितः,—अनुमितः, सूर्य्य-

(४३)आचमनशुचिशचीपतिमुच्यमानशिवार्चनकुसुमनिकरशारां शिवपुरपतितनिर्माल्यमन्दारदामकाम्, (४४) अनादरदारितमन्दरदरीदृषदम्, अनेकनाकनायककामिनीकुचकलसलुलितविग्रहां, ग्राहग्रावग्रामस्खलितमुखरबहुस्रोतसं (४५) सुषुम्नासूनशशिसुधाशीकरस्तवकतारकिततीरां, धिषणाग्निकार्य्यधूमयङ्गस्य मृतकेन- अशौचेन, उपवासः,—अनशनं यस्याः तां, ["मृग्येयङ्गम्" इत्यत्र "मर्य्येयङ्ग" इति पाठान्तरेऽपि स एवार्थः]। मर्य्येयङ्गमनिताशौचं मनर्घयः अनशनेन कृशशयनमधिशयन्तीति भावः। ["पर्य्यस्तसुखसुप्त" इत्यत्र "पर्य्यस्तसुप्त" इति पाठान्तरम्]।

(४३) आचमनेति।—आचमनेन शुचिः,—पूतः, यः शचीपतिः,—इन्द्रः, तेन मुच्यमानैः,—अर्प्यमाणैः, शिवार्चनकुसुमनिकरैः,—शिवपूजापुष्पसमूहैः, शारां—विचित्रवर्णां ताम्। [अत्र "आचमनशुचिशचीपतिमुच्यमानार्चनकुसुमनिकरशाराम्" इति पाठान्तरम्]। शिवेति।—शिवपुरात—कैलासादित्यर्थः, पतितं निर्माल्यं—निर्वेदितं, शिवार्पितमिति भावः, मन्दारदामकं—मन्दारपुष्पमाल्यं यस्यां तथोक्ताम्।

(४४) अनादरेति।—अनादरेण—अवहेलया, दारिताः,—खण्डिताः, महाजवेनेति भावः, मन्दरदर्य्याः,—मन्दराचलगुहायाः, दृषदः—प्रस्तरा यया तां। अनेकेति।—अनेकेषां—बहूनां, नाकनायकानां—देवानां, याः कामिन्यः,—कान्ताः, तासां कुचकलसैः,—स्तनकुम्भैः, लुलितः—सञ्चालितः, विग्रहः,—कलेवरं, जलरूपमिति भावः, यस्याः ताम्। [अत्र "अनेकनाकनायककामिनीकुचकलसविलुलितविग्रहाम्" इति पाठे—अनेकाः,—बहवः, नाकनायकानां निकायस्य—निवासस्य, याः कामिन्यः, तासां कुलकलसैर्विलुलितः विग्रहः यस्यास्तामित्यर्थः]। ग्राहेति।—ग्राहाणां—जलजन्तुभेदानां, ग्रावग्रामाणां—प्रस्तरसमूहानाञ्च, स्खलितेन—इतस्ततः पतनेन, मुखराणि—शब्दितानि, बहूनि स्रोतांसि यस्याः ताम्। [अत्र "ग्राहग्रावग्रामस्खलनमुखरितस्रोतसम्" इति पाठान्तरम्]।

(४५) सुषुम्नेति।—सुषुम्ना नाम रविरश्मिविशेषः, तया सूतः,—उत्पन्नः, यः शशी—चन्द्रः, तस्य सुधानाम्—अमृतानाम्, अमृतमयमयूखानामिति यावत्, शीकरस्तवकैः,—बिन्दुगुच्छैः, तारकितं—तारकाराजितमिवेति भावः, तीरं यस्याः ताम्; ["सुषुम्नासूतशशिसुधाशीकरस्तवकतारकिततीराम्" इति पाठे—सुषुम्नाख्यरविरश्मेः सूतः,—निःसृतः, यः शशी:, अन्यत् समानम्]; तदुक्तम्,—"अर्का-

धूसरितसैकतां, सिद्धविरचितवालुकालिङ्गलङ्घनत्रासविद्रुतविद्याधरां, निर्मोकपट्टिकामिव गगनोरगस्य, (४६) लीलाललाटिकामिव त्रिपिष्टपस्य, विक्रयवीथीमिव पुण्यपण्यसञ्चयस्य, दत्तार्गलामिव नरकनगरस्य, अंशुकोष्णीषपट्टिकाम् इव सुमेरोः, दुकूलकदलिकामिव कैलासकुञ्जरस्य, पद्धतिम् इव अपवर्गस्य, (४७) नेमिमिव कृतयुगचक्रस्य,

र्विनिःसृतः प्राचीं यद् यात्यहरहः प्रभो" इति। धिषणेति।—धिषणस्य—बृहस्पतेः, ("बृहस्पतिः सुराचार्यो गीर्वाणधिषणो गुरुः" इत्यमरः) यत् अग्निकार्यम्—अग्निहोत्रव्यापारः, तस्य धूमेन धूमरितानि—मलिनीकृतानि, सैकतानि यस्याः ताम्। सिद्धेति।—सिद्धैः,—देवयोनिविशेषैः, विरचितानि—पूजार्थं विनिर्मितानि, यानि वालुकालिङ्गानि—वालुकामयशिवलिङ्गानि, तेषां लङ्घनात् त्रासेन—भयेन, सिद्धदेयशापजनितेनेति भावः, विद्रुताः,—पलायिताः, विद्याधराः,—देवयोनिभेदाः यस्यां ताम्। निर्मोकपट्टिकामिव—कञ्चुकपटीमिव। ["निर्मोकमुक्तिमिव" इति पाठे—निर्मोकस्य—कञ्चुकस्य, मुक्तिः तामिव, "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात्, मुक्तानिर्मोकमिवेत्यर्थः]। गगनमेव उरगः,—सर्पः, तस्य, (गगनस्य कृष्णवर्णत्वात् निर्मोकस्य शुक्लवर्णत्वाच्च तथोत्प्रेक्षते)।

(४६) लीलेति।—लीलाललाटिकामिव—विलासार्थं भालभूषणमिवेत्यर्थः। त्रिपिष्टपस्य—स्वर्गस्य, त्रयाणां पिष्टपानां समाहार इति समासे त्रिपिष्टपं—त्रिलोकं, तस्य, ["त्रिविष्टपविटस्य" इति पाठे—त्रिविष्टपस्य विटः,—धूर्तलम्पटविशेषः तस्य]। विक्रयवीथीमिव—विक्रयस्थानमिव; यद्वा,—विक्रयपरम्परामिव। पुण्यानि पण्यानीव—विक्रेयद्रव्याणीव, तेषां सञ्चयः,—समूहः तस्य, [अत्र "पुण्यपण्यस्य" इति पाठान्तरम्]। दत्तार्गलामिव—दत्ता अर्गलाः,—द्वारीधकदण्डविशेषाः तामिव। नरकनगरस्य—नरकमेव नगरं तस्य, ["नरकनगरद्वारस्य" इति पाठान्तरम्]। अंशुकेति।—अंशुकं—सूक्ष्मवसनं, तेन निर्मिता उष्णीषपट्टिका—शिरोवेष्टनपटी, तामिव। ["सुमेरोः" इत्यत्र "सुमेरुनृपस्य" इति पाठे—सुमेरुनृप इव तस्य, उपमितसमासः]। दुकूलकदलिकामिव—वस्त्रनिर्मितवैजयन्तीमिव। ["दुकूल" इत्यत्र "दुगूल" इति पाठान्तरे—दुगूलशब्दः दुकूलसमानार्थको बोध्यः]। कैलासकुञ्जरस्य—कैलासः कुञ्जर इव तस्य, कैलासाद्रिगजस्य। पद्धतिमिव—सरणिमिव। अपवर्गस्य—कैवल्यस्य।

(४७) नेमिमिव—धारामिव। कृतयुगचक्रस्य—कृतं—सत्यं युगं, चक्रमिव

सप्तसागरराजमहिषीं मन्दाकिनीमनुसरन्ती मर्त्यलोकम् अवातरत्, अपश्यत् च अम्बरतलस्थितैव हारम् इव वरुणस्य, आतपत्रनिकरमिव चन्द्राचलस्य, शशिमणिनिष्यन्दम् इव विन्ध्यस्य, कर्पूरद्रुमद्रवप्रवाहमिव दण्डकारण्यस्य, लावण्यरस-प्रस्रवणमिव दिशां, स्फटिकशिलापट्टशयनमिव अम्बरश्रियः, (४८) स्वच्छशिशिरसुरभिवारिपूर्णं भगवतः पितामहस्य अपत्यं हिरण्यबाहुनामानं महानदं, यं जनाः शोण इति कथयन्ति। दृष्ट्वा च तं तदीयरामणीयककृतहृदया तस्यैव तीरवासम् अराचयत्; उवाच च सावित्रीं,—"सखि! मधुर-

---

तस्य, अविरतघूर्णमानत्वादिति भावः। यद्वा,—कृताः,—निर्मिताः, युगाः,—युग-काष्ठानि येषां तथाभूताः चक्राः यस्य तस्य, रथस्येत्यर्थः। [अत्र "कृतयुगस्य" इति पाठान्तरम्]। सप्तेति।—सप्तानां सागराणां समाहारः सप्तसागरं तस्य; यद्वा,—सप्त च ते सागराश्चेति सप्तसागराः तेषां, महिषीं—प्रधानपत्नीं, ताम्; यद्वा,—सप्तसागरराजः,—क्षीरसमुद्रः तस्य महिषीं ताम्। ["अवातरत्" इत्यत्र "अवततार" इति पाठान्तरम्]। अम्बरतलस्थितैव—आकाशस्थितैव। हारमिव—मुक्तामालामिव। वरुणस्य—जलाधिपतेरिति भावः। आतपत्रनिकरमिव—छत्रपरम्परामिव, चन्द्राचलस्य—चन्द्राख्यस्य पर्वतस्य, ["आतपत्रनिकरमिव" इत्यत्र "अमृत-निर्झरमिव" इति पाठान्तरम्]। शशिमणिनिष्यन्दमिव—चन्द्रकान्तनिर्झरमिव। कर्पूरेति।—कर्पूरद्रुमस्य—कर्पूरतरोः, द्रवप्रवाहः,—निष्यन्दपरम्परा, तमिव। स्फटिकेति।—स्फटिकशिला—स्फटिकमणिः, तस्याः पट्टमेव शयनं—शय्या तदिव। ["स्फटिकशिला" इत्यत्र "स्फाटिकशिला" इति पाठान्तरे—स्फटिकमणिमयमित्यर्थः]। अम्बरश्रियः,—गगनलक्ष्म्याः। ["श्रियः" इत्यत्र "शिवाः" इति पाठान्तरम्]।

(४८) स्वच्छेति।—स्वच्छानि—निर्मलानि, शिशिराणि—शीतलानि, सुर-भीणि—सुखदानि, वारीणि—जलानि, तैः पूर्णः तम्। ["हिरण्यबाहुनामानम्" इत्यत्र "हिरण्यवाहनामानम्" इति पाठान्तरम्]। तदीयेति।—तस्य इदं तदीयं यत् रामणीयकं—मनोहरत्वं, तेन हृतम्—आकृष्टं, हृदयं यस्याः तथाभूता। ["तदीयरामणीयककृतहृदया" इत्यत्र "रामणीयककृतहृदया" इति पाठान्तरम्।

मयूरविरुतयः (४९) कुसुमपांशुपटलसिकतिलतरुतलाः पुष्पपरिमलमत्तमधुपश्रेणीवीणारणितरमणीयाः प्रीणयन्ति मां मन्दाकिनीद्युतेरस्य महानदस्योपकण्ठभूमयः, पक्षपाति च मे मनः अत्रैव स्थातुम्" इति। अभिनन्दितवचना च "तथा" इति तया तस्य पश्चिमे तीरे वासमरोचयत्। एकस्मिंश्च शुचौ शिलातलसनाथे तटलतामण्डपे गृहबुद्धिं बबन्ध। विश्रान्ता च नातिचिरादुत्थाय सावित्र्या सार्द्धम् उच्चितार्चनकुसुमा मन्त्री, (५०) पुलिनपृष्ठप्रतिष्ठापितशिवलिङ्गा च भक्त्या परमया पञ्चब्रह्मपुरःसरां सम्यङ्मुद्रां बबन्ध। विहितपरि-

"तीरवासमरोचयत" इत्यत्र "तीरे वासमरचयत्" इति पाठान्तरम्]। मधुरेति।—मधुराः,—मनोहारिण्यः, मयूराणां विरुतयः,—निनादाः।

(४९) कुसुमेति।—कुसुमानां, पांशुपटलैः,—परागनिचयैः, सिकतिलाः,—सैकतवत्यः, तरूणां—वृक्षाणां, तलाः,—तलदेशाः। पुष्पेति।—पुष्पाणां परिमलेन—सौरभेण, मत्तानां मधुपानां—भ्रमराणां, श्रेणी—सङ्घः, सैव वीणा, तस्याः रणितेन—शब्देन, रमणीयाः। ["परिमलमत्तमधुपवेणौ" इति पाठे—परिमलेन, पुष्पाणामिति भावः, मत्तानां मधुपानां वेणौ—श्रेणीत्यर्थः]। मन्दाकिनीद्युतेः,—मन्दाकिन्या द्युतिरिव द्युतिर्यस्य तथोक्तस्य। ["रमयन्ति मां मन्दीकृतमन्दाकिनीद्युतेः" इति पाठे—मन्दीकृता—खर्वीकृता, मन्दाकिन्या द्युतिः येन तथाभूतस्येत्यर्थः]। पक्षपाति—प्रणयीत्यर्थः, स्निग्धमिति यावत्। ["मनः" इत्यत्र "हृदयम्" इति पाठान्तरम्। "वासमरोचयत्" इत्यत्र "समवातरत्" इति पाठान्तरम्]। शिलातलसनाथे—शिलाखण्डसमन्विते। तटलतामण्डपे—तटस्थितलतानिर्म्मितवासगृहे। बबन्ध—कृतवती। मन्त्री—ज्ञातवती।

(५०) पुलिनेति।—पुलिनस्य—सैकतदेशस्य, पृष्ठे—उपरि, प्रतिष्ठापितं—संस्थापितं, शिवलिङ्गं यया तथोक्ता। ["प्रतिष्ठापितशिवलिङ्गा" इत्यत्र "प्रतिष्ठितसैकतशिवलिङ्गा" इति पाठान्तरे—प्रतिष्ठित—स्थापितं, सैकतं—वालुकामयं, शिवलिङ्गं यया सा]। पञ्चेति।—पञ्चब्रह्माणि—सद्योजातवामदेवाघोरतत्पुरुषेशानरूपाणि, पुरःसराणि—अग्रगण्यानि यस्यां तादृशीं, मुद्रां—कराङ्गुलियोगविशेषरूपां, सम्यक्—यथाविधि, बबन्ध—कृतवती; प्रथमं सद्योजातपूजाविधा-

करा अविगीताग्रहा अवनिपवनगगनतपनतुहिनकिरणदहन-सलिलयजमानमयीर्मूर्त्तीरिष्टावपि ध्यायन्ती सुचिरमष्ट-पुष्पिकामदात्। अयत्नोपनतेन फलमूलादिना अमृतरसमपि (५१) अतिशिशयिषमाणेन तेन च स्वादुना शिशिरेण शीत-वारिणा शरीरस्थितिम् अकरोत्, (५२) अतिवाहितदिवसा च तस्मिन् एव लतामण्डपशिलातले कल्पितपल्लवशयना सुष्वाप। अन्येद्युरपि अनेनैव क्रमेण नक्तन्दिनम् अत्यवाहयत्।

थिनौ, ततः वामदेवपूजासम्पादनौ, तत्पश्चात अघोरपूजासाधनौ, तदनन्तरं तत्पु रुषाद्यासम्पादनौ, अनन्तरम् ईशानपूजाविधायिनीत्येवं पञ्चमुद्राविधानेन पञ्चब्रह्माणि पूजयामास इति भावः। विहितपरिकरा—कृतपूजाविधाना। अविगीताग्रहा—अविगीतः—अनिन्द्यः, आग्रहः,—अभिनिवेशः यस्याः तथाभूता, विशिष्टयत्नवतीत्यर्थः। अवनीति।—अवनिः,—क्षितिः, पवनः,—वायुः, गगनम्—आकाशं, तपनः,—सूर्यः, तुहिनकिरणः,—सोमः, दहनः,—अग्निः, सलिलं—जलं, यजमानः,—यज्ञिकः, एतन्मय्यः,—अवन्याद्यात्मिकाः, ताः अष्टौ मूर्त्तीः, शिवस्येति भावः। ["मुद्राबन्धविहितपरिकरां ध्रुवागीतिगर्भामवनिपवनवनगगनदहनतपनतुहिनकिरण-यजमानमयीः" इति पाठान्तरे—मुद्राबन्धः,—आवाहनाद्यर्थं विशिष्टः करागुलि-सन्निवेशविशेषः, तेन विहितः,—कृतः, परिकरः,—पूजाविधानं यस्यां तथाभूतां, ध्रुवागीतिगर्भां—ध्रुवाख्या—तदाख्या, गीतिः,—गेयविशेषः, छन्दोविशेषो वा, गर्भे—अभ्यन्तरे यस्याः ताम्, अन्तरान्तरा गीतिपूर्त्तिकां पुष्पाञ्जलिं दत्तवतीत्यर्थः। वनं—जलं, जलमयीं मूर्त्तिरित्यर्थः]। ध्यायन्ती—चिन्तयन्ती। अष्टपुष्पिकाम्—अष्टौ पद्मादिपुष्पविशेषान्; यद्वा,—आसनवर्गप्रभृतिषु अष्टसु प्रत्येकम् अष्टपुष्पिका। अदात्—दत्तवती। अयत्नोपनतेन—अनायासोपलब्धेन। ["फलमूलादिना" इत्यत्र "फलमूलेन" इति पाठान्तरम्]।

(५१) अतिशिशयिषमाणेन—अतिशयितुमिच्छता। स्वादुना—सुस्वादेन, ["स्वादिमा" इति पाठे—अतिस्वादवतीत्यर्थः]। शिशिरेण—शीतलेन। शीतवारिणा—शीतजलसलिलेन। शरीरस्थितिमिति।—न त्वाहारनिमित्तं भोजनम्। अन्येद्युः,—अन्यस्मिन्नहनि।

(५२) अतिवाहितदिवसा—अतिक्रान्तदिना।

एवमतिक्रामत्सु दिवसेषु, गच्छति च काले, (५३) याममात्रमिव गते रवौ इतरस्यां दिशि (५४) प्रतिशब्दपूरितगह्वरं गम्भीरतरं (५५) तुरङ्गमक्वेषितोद्यममसृणोत्। उपजातकुतूहला च निर्गत्य लतामण्डपाद्विलोकयन्ती (५६) विकचकेतकगर्भपत्रपाण्डुरं रजःसङ्घातं नातिदवीयसि प्रदेशे सम्मुखम् आपतन्तम् अपश्यत्। क्रमेण च (५७) सामीप्योपजायमानाभिव्यक्तिनि तस्मिन् एव महति शफरोदरधूसरे रजसि पयसीव मकरचक्रं प्लवमानं पुरः प्रधावमानेन, (५८) प्रलम्बकुटिलकच-

(५३) याममात्रमिव—प्रहरमात्रमिव, गते—उदिते। ["याममात्रावशेषे" "याममात्रावशेषे" इति पाठद्वये—प्रहरमात्रावशेषे इत्यर्थः]। इतरस्याम्—अन्यस्याम्। ["इतरस्याम्" इत्यत्र "उत्तरस्याम्" इति पाठान्तरम्। "दिशि" इत्यत्र "ककुभि" इति पाठान्तरम्]।

(५४) प्रतिशब्देति।—प्रतिशब्देन—प्रतिध्वनिना, पूरितानि गह्वराणि येन तम्। ["प्रतिशब्दपूरितवनगह्वरम्" इति पाठान्तरम्। "गम्भीरतरम्" इत्यत्र "गम्भीरतारतरम्" इति पाठे—गम्भीरश्चासौ तारः,—महांश्चेति गम्भीरतारः, अतिशयेन गम्भीरतारः गम्भीरतारतरः, तम्]।

(५५) तुरङ्गमेति।—तुरङ्गमाणां क्वेषितानि—शब्दविशेषाः, तेषाम् उद्यमः,—उद्योगः, तम्। ["तुरङ्गमक्वेषितोद्यमम्" इत्यत्र "तुरङ्गक्वेषितक्वादम्" इति पाठे—तुरङ्गाणां क्वेषितमेव क्वादः,—निनादः, तम्]।

(५६) विकचेति।—विकचं—विकसितं, यत् केतकगर्भपत्रं, तद्वत् पाण्डुरं—शुभ्रम्। ["केतक" इत्यत्र "केतकी" इति पाठान्तरम्]। रजःसङ्घातं—धूलिसञ्चयम्। नातिदवीयसि—अनतिदूरवर्त्तिनीत्यर्थः। आपतन्तम्—आगच्छन्तम्।

(५७) सामीप्येति।—सामीप्येन—नैकट्येन, उपजायमाना अभिव्यक्तिः,—स्फुटता यस्य तादृशे। ["अभिव्यक्तिनि" इत्यत्र "अभिव्यक्ति" इति पाठे—अभिव्यक्तिः यस्य तादृशम्, इति अस्मद्बन्दम् इत्यस्य विशेषणम्]। शफरेति।—शफरस्य—मत्स्यविशेषस्य, उदरवत् धूसरं तस्मिन्। मकरेति।—मकरचक्रं—मकराः,—जलजन्तुभेदाः, तेषां चक्रं—समूहः, तदिव। प्रधावमानेन—द्रुतगामिनेत्यर्थः।

(५८) प्रलम्बेति।—प्रलम्बेन—प्रकर्षेण लम्बमानेन, कुटिलेन—कुञ्चितेन,

पल्लवघटितललाटतटचूलिकेन, (५९) धवलदन्तपत्रद्युतिहसित-कपोलभित्तिना, (६०) पिनद्धकृष्णागुरुपङ्कच्छुरणकषाय-कञ्चुकेन, (६१) उत्तरीयकृतशिरोवेष्टनेन, (६२) वामप्रकोष्ठ-निविष्टहाटककटकेन, (६३) द्विगुणपट्टिकागाढ़ग्रन्थिग्रथिता-सिधेनुना, सततव्यायामकृशकर्कशशरीरेण, वनहरिणयूथेनेव

कचः,—केशः, पल्लव इव, कोमलत्वात्, तेन घटिता—बद्धा, ललाटतटी—भालदेशे, चूलिका—चूड़ा येन तथोक्तेन, ["ललाटतटचूलिकेन" इत्यत्र "ललाटजूटकेन" इति पाठे स एवार्थः]।

(५९) धवलेति।—धवलस्य—श्वेतस्य, दन्तपत्रस्य—गजदन्तनिर्मितकर्णाभरणभेदस्य, ["दन्तपत्र" इत्यत्र "दन्तपत्रिका" इति पाठान्तरम्] द्युतिः,—प्रभा, तया हसिता—उद्भासिता, कपोलभित्तिः,—गण्डदेशः यस्य तेन।

(६०) पिनद्धेति।—पिनद्धः,—परिहितः, कृष्णागुरुपङ्कस्य—गन्धद्रव्यविशेषस्य, च्छुरणस्य—अधिवासनेन, कषायः,—सुरभिः, कञ्चुकः,—वारवाणः येन तेन। ["पिनद्धकृष्णागुरुपङ्कल्कच्छुरणकृष्णश्यामलकषायकञ्चुकेन" इति पाठे—पिनद्धः,—बद्धः, कृष्णागुरुपङ्क एव कल्कः,—चूर्णः, तस्य च्छुरणात्—संश्लेषात्, कृष्णः श्यामलः,—स्वतोऽन्यवर्णत्वात् चित्रितः, कषायः—सुरभिः, कञ्चुको येन तथाभूतेन]।

(६१) उत्तरीयेति।—उत्तरीयेण, कृतं शिरोवेष्टनम्—उष्णीषं येन तथोक्तेन।

(६२) वामेति।—वामे प्रकोष्ठे—"प्रकोष्ठमन्तरं विद्यादरत्निमणिबन्धयोः" इत्युक्ते करावयवे, निविष्टं—धृतं, हाटककटकं—स्वर्णवलयं येन तथोक्तेन, ["हाटककटकेन" इत्यत्र "स्पष्टहाटककटकेन" इति पाठान्तरे,—स्पष्टं—सुव्यक्तं, स्थूलमित्यर्थः]।

(६३) द्विगुणेति।—द्विगुणा—द्विराहत्ता, या पट्टिका—पट्टवसनखण्डं, तस्या गाढेन—कठिनेन, यन्थिना ग्रथिता—बद्धा, असिधेनुका—क्षुरिका येन तथोक्तेन, ("स्याच्छस्त्री चासिपुत्री च क्षुरिका चासिधेनुका" इत्यमरः)। ["द्विगुणपट्टपट्टिका" इति पाठान्तरे—पट्टस्य—पट्टवसनस्य, पट्टिका—खण्डमित्यर्थः]। सततेति।—सततेन—अविरतेन, व्यायामेन—अङ्गचालनविशेषेण, कृशं—क्षीणं, कर्कशं—कठिनञ्च, शरीरं यस्य तेन। ["सतत" इत्यत्र "अनवरत" इति पाठान्तरम्]। वनहरिणयूथेनेव—वन्यमृगदलेनेव। ["वातहरिणयूथेनेव" इति पाठे—वातहरिणाः,—ये वातासिः

मुहुर्मुहुः उड्डीयमानेन, (६४) लङ्घितसमविषमावटविटपेन, कोणधारिणा, कृपाणपाणिना च, (६५) सेवाग्रहीतविविधवनकुसुमफलमूलपर्णेन, "चल चल, याहि याहि, अपसर्प अपसर्प, पुरः प्रयच्छ पन्थानम्" इति अनवरतकृतकलकलेन युवप्रायेण सहस्रमात्रेण पदातिबलेन सनाथम् अखण्डचन्द्रं ददर्श।

(६६) मध्ये च तस्य साङ्गचन्द्रेण मुक्ताफलजालिना विविधरत्नखण्डखचितेन शङ्कक्षीरफेनपिण्डपाण्डुरेण क्षीरोदेनेव स्वयं

मुखं धावन्ति ते इत्यर्थः, तेषां यूथं, तेनेत्यर्थः]। उड्डीयमानेन—अतिवेगेन धावतेति भावः। ["खमुड्डीयमानेन" इति पाठे—खम्—आकाशम्, उड्डीयमानेन—उत्पतता, अतिवेगेन धावतेत्यर्थः]।

(६४) लङ्घितेति।—लङ्घितः,—अतिक्रान्तः, समानां विषमाणाम्, अवटानाम्—उन्मार्गाणाञ्च स्थानानामिति भावः, विटपः,—विस्तरः येन तथाभूतेन। कोणधारिणा—लगुडधरेणेत्यर्थः, ("कोणो वाद्यप्रभेदे स्यात् वीणादीनाञ्च वादने। एकदेशे गृहादीनामश्वौ च लगुडेऽपि च॥" इति मेदिनी)। कृपाणपाणिना—असिधारिणेत्यर्थः।

(६५) सेवेति।—सेवार्थे—स्वामिनः स्वाभीष्टदेवस्य वा सेवार्थं, गृहीतानि विविधानि वनस्य कुसुमानि फलानि मूलानि पर्णानि—पत्राणि च येन तथीकृतेन। याहि याहि—गच्छ गच्छ। अपसर्प—अपगच्छ। पुरः,—अग्रतः। प्रयच्छ—देहि। अनवरतकृतकलकलेन—अनवरतं—निरन्तरं, कृतः,—विहितः, कलकलः,—कोलाहलः, येन तथीकृतेन। युवप्रायेण—तरुणबहुलेन। सहस्रं मात्रा—परिमाणं यस्य तेन, सहस्रपरिमितेन इत्यर्थः। पदातिबलेन—पदचारिसैन्येन, सनाथं—सहितम्।

(६६) मध्ये इत्यादिके—"तस्य च मध्ये अष्टादशवर्षदेशीयं कञ्चित् युवानमद्राक्षीत्" इत्यन्वयसम्बन्धः। साङ्गचन्द्रेण—अङ्गचन्द्रः तेन समानं साङ्गचन्द्रं, तेन। मुक्ताफलजालिना—मुक्ताफलानां—मौक्तिकानां, जालं—समूहः, मालेति भावः, तद्वता। ["मुक्ताफलजालमालिना" इति पाठे—मुक्ताफलानां जालं—समूहः, तस्य माला—स्रक्, तद्वतेत्यर्थः]। विविधेति।—विविधानां रत्नानां खण्डैः खचितं—संयुक्तं, घटितमित्यर्थः, तेन। शङ्केति।—शङ्कः क्षीरं—दुग्धं, फेनपिण्डं—फेनचयः, तद्वत् पाण्डुरं—शुभ्रं तेन, ["फेनपिण्डपाण्डुरेण" इत्यत्र "फेनपाण्डुरेण" इति

लक्ष्मीं दातुमागतेन गगनगतेन आतपत्रेण कृतच्छायम्, अच्छाच्छेन आभरणदीधितीनां निवहेन दिशामिव दर्शनानुरागलग्नेन चक्रवालेन अनुगम्यमानम्, आ नितम्बावलम्बिन्या मालतीशिखरस्रजा (६७) सकलभुवनविजयाय अर्जितया रूपपताकयेव विराजमानं, समुत्सर्पिभिः शिखण्डकपद्मरागमणेः अरुणैः अंशुजालैः (६८) अदृश्यमानवनदेवताविधृतैः बालपल्लवैरिव प्रमृज्यमानमार्गरेणुम्, अरुणवपुषं,

---

पाठान्तरम्]। क्षीरोदेनेव—क्षीरसागरेणेव, लक्ष्मीजनकेनेति भावः। गगनगतेन—अत्यरौचवर्त्तिना। आतपत्रेण—छत्रेण। कृतच्छायं—कृता छाया—अनातपं, कान्तिश्च यस्य तं, ("छाया सूर्यप्रिया कान्तिः" इत्यमरः)। अच्छाच्छेन—स्वच्छेन, अभिरामेनेत्यर्थः। ["अच्छेन" इति पाठान्तरम्]। आभरणदीधितीनां—भूषणकिरणानाम्, ["दीधितीनाम्" इत्यत्र "द्युतीनाम्" इति पाठान्तरे—द्युतीनां—प्रभाणाम् इत्यर्थः]। निवहेन—समूहेन। दर्शनानुरागलग्नेन—दर्शने—अवलोकने, यः अनुरागः,—आसक्तिः, तेन लग्नं—समासक्तं तेन। दिशां चक्रवालेन—मण्डलेन इव। आ-नितम्बावलम्बिन्या—आ-नितम्बं—नितम्बपर्य्यन्तम्, अवलम्बते इति तथोक्तया। ["आ-नितम्बविलम्बिन्या" इति पाठे स एवार्थः]। मालतीशिखरस्रजा—मालतीकुसुमनिर्म्मितशिरोमालया।

(६७) सकलेति।—सकलानां भुवनानां विजयाय—पराजयार्थम्, अर्जितया—लब्धया। ["विजयार्जितया" इति समस्तो वा पाठः]। रूपपताकयेव—सौन्दर्य्यवैजयन्त्येव। समुत्सर्पिभिः,—समुद्गच्छद्भिः। ["उत्सर्पिभिः" इति पाठान्तरम्]। शिखण्डकपद्मरागमणेः,—शिखण्डकं—शिरोभूषणं, यः पद्मरागमणिः तस्य। अरुणैः,—रक्तैः, अंशुजालैः,—प्रभानिवहैः। ["शिखण्डखण्डिकापद्मरागमणेः" इति पाठे—शिखण्डखण्डिका—चूडाऽऽभरणमित्यर्थः। "अंशुजालैः" इत्यत्र "अंशुकजालैः" इति पाठान्तरे स एवार्थः]।

(६८) अदृश्यमानेति।—अदृश्यमानया वनदेवतया—वनाधिदेव्या, विधृतैः। बालपल्लवैरिव—नवकिसलयैरिव। प्रमृज्यमानमार्गरेणुं—प्रमृज्यमानाः,—अपनीयमानाः, मार्गरेणवः,—अध्वगमनात् अङ्गलग्ना धूलयः यस्य तादृशम्। अरुणवपुषं—रक्तदेहम्। ["प्रमृज्यमानमार्गरेणुपरुषवपुषम्" इति पाठे—प्रमृज्य-

(६९) वकुलकुड्मलमण्डलीमुण्डमालामण्डनमनोहारिणा कुटिलकुन्तलस्तवकमालिना मौलिना निमीलितातपम् आपिबन्तमिव दिवसं, (७०) पशुपतिमुकुटमृगाङ्क-द्वितीयशकलघटितस्येव (७१) सहजलक्ष्मीममालिङ्गितस्य ललाटपट्टस्य मनःशिलापङ्कपिङ्गलेन लावण्येन लिम्पन्तम् इवान्तरिक्षम्, (७२) अभिनवयौवनावष्टम्भप्रगल्भदृष्टिपात-

मान—परिक्रियमाणः, मार्गैरणाभः,—अध्वरजोभिः, परुषम्—आविलमिति यावत्, वपुः,—शरीरं यस्य तथाभूतमित्यर्थः]।

(६९) वकुलेति।—वकुलकुड्मलानां—वकुलमुकुलानां, मण्डली—माला इव, मुण्डमाला तया मण्डन—शोभा, तेन मनोहारिणा, ["मनोहारिणा" इत्यत्र "मनोहरेण" इति पाठान्तरम्]। कुटिलेति।—कुटिलः,—भङ्गिमान्, यः, कुन्तलानां—केशानां, स्तवकः,—गुच्छः, तेषां माला—समूहः, तद्वता, मौलिना—किरीटेन, शिरोभूषणेन इत्यर्थः, ("मौलौ किरीटचामीक्षौ" इत्यमरः)। निमीलितातपं—निश्चोपतसौरमयूखं, मौलिप्रभातिशय्यादिति भावः; ["मीलितातपम्" इति पाठेऽपि अभिप्रायः] अत एव दिवसम् आपिबन्तमिव—रसयन्तमिव, ["पिबन्तमिव" इति पाठान्तरम्]।

(७०) पशुपतीति।—पशुपतेः,—हरस्य, मुकुटं—शिरोभूषणभूतं, यः मृगाङ्कः,—अर्द्धचन्द्रः इत्यर्थः, तस्य द्वितीयम्—अपरं, शकलं—खण्डं, तेन घटितस्येव—निर्मितस्येव इत्यर्थः, अर्द्धचन्द्राकृतेरिति भावः। ["पशुपतिजटासुकुटमृगाङ्क" इति पाठे—पशुपतेर्जटासु यत् मुकुटं—मुकुटभूतः, मृगाङ्कः तस्येति योजना]।

(७१) सहजेति।—सहजा—स्वाभाविकी, या लक्ष्मीः,—शोभा, यद्वा,—सहजा—सहोत्पन्ना, या लक्ष्मीः,—पद्मालया, अतिसौभाग्यशालित्वात् श्रीः सततमेव महोदरसहैनावावसदित्याशयः; तया समालिङ्गितः,—समन्वितः तस्य। ललाट-पट्टस्य—भालफलकस्य। मनःशिलेति।—मनःशिला—रक्तवर्णः उपधातुविशेषः, तस्य पङ्कः,—द्रवः, तद्वत् पिङ्गलं—गौरमित्यर्थः, तेन। लावण्येन—"मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इत्युक्त-लक्षणेन अङ्गप्रभाविशेषेण। लिम्पन्तं—सञ्चन्तम्।

(७२) अभिनवेति।—अभिनवस्य—अचिरप्रवृत्तस्य, यौवनस्य अवष्टम्भेन—समाश्रयेण, ["यौवनारम्भावष्टम्भ" इति पाठे—यौवनारम्भेण यः अवष्टम्भः,—गर्व-

तृणीकृतत्रिभुवनस्य चक्षुषः प्रथिम्ना (७३) विकचकुवलय-कुमुदकमलसरःसहस्रसङ्क्षादितदशदिशं शरत्समयसम्पदमिव प्रवर्त्तयन्तम्, (७४) आयतनयनदीर्घमीमान्तसेतुबन्धेन (७५) ललाटपट्टिकाशशिमणिशिलातलगलितेन कान्ति-सलिलस्रोतसेव द्राघीयसा घोणावंशेन विराजमानम्, (७६) अतिसुरभिसहकारकालकर्पूरलवङ्गपारिजातपरिमल-लुब्धमत्तमधुकरकोलाहलमुखरेण मुखेन सनन्दनवनं वमन्त-

विशेषः] प्रगल्भः,—चतुरः, यो दृष्टिपातः,—अवलोकनविशेषः, तेन तृणीकृतं—तृच्छीकृतं, त्रिभुवनं येन तथाभूतस्य । प्रथिम्ना—विस्तारेण ।

(७३) विकचेति ।—विकचानां—विकसितानां, कुवलयानां—नीलोत्पलानां, कुमुदानां कमलानाञ्च, सरःसहस्रैः,—सरोवरसङ्घैः, संक्षादिता दश दिशो यया तथोक्ताम् । शरत्समयसम्पदमिव—शरत्कालिकश्रियमिव । ["शरदमिव" इति पाठान्तरे—शरत्कालमिव] । प्रवर्त्तयन्तं—प्रकटयन्तम् ।

(७४) आयतेति ।—आयतयोः,—विशालयोः, नयनयोर्यौ दीर्घः,—प्रशस्तः, सीमान्तौ सेतुबन्धौ: तेन, तथाभूतेन इत्यर्थः । ["आयतनयनदीर्घसीमान्तसेतुबन्धेन" इति पाठे—आयते नयने एव नद्यौ तयोः सीमान्तेषु सेतुबन्धः तेन, बद्धसेतु-भूतेन इत्यर्थः] ।

(७५) ललाटेति ।—ललाटपट्टिका—ललाटफलकम् एव, शशिमणिशिलाः-तलं—चन्द्रकान्तपाषाणतलं, तस्मात् गलितं—निःसृतं तेन । कान्तिसलिलस्रोत-सेव—लावण्यजलप्रवाहेणेव । ["ललाटपट्टिका" इत्यत्र "ललाटतट" इति पाठान्तरम्] । द्राघीयसा—अतिदीर्घेण । घोणावंशेन—नासादण्डेन इत्यर्थः । ["विराज-मानम्" इत्यत्र "भीमसानम्" इति पाठान्तरम्] ।

(७६) अतिसुरभीति ।—अतिसुरभि—अतिशयेन सौरभवत्, अत एव सह-कारः,—अतिसौरभं चूतफलं तन्मुकुलं वा, कालं—कङ्कोलकं, कर्पूरं लवङ्गं पारिजातं—पारिजातकुसुममित्यर्थः, तेषां परिमलेषु लुब्धानां—लोलुपानां, मत्तानां मधुकराणां—भ्रमराणां, कोलाहलैः,—झङ्कारैः, मुखरं—सशब्दं तेन । सहकारादिभ्योऽपि मनो-हरसौरभलोभादिति भावः । ["सहकारकालकर्पूर···लुब्ध" इत्यत्र "सहकारकर्पूर-कङ्कोललवङ्गपारिजातकपरिमलमुचा" इति पाठे—कङ्कोलं—वनकर्पूरं, गन्धद्रव्यभेद इति यावत्, ततः पूर्ववत् बहुव्रीहिसमासः, ततः तेषामिव परिमलं मुञ्चतीति तथोक्तेन ।

मिव वमन्तम्, (७७) आसन्नसुहृत्परिहाससम्भावणेन उत्तान-मुखमुग्धहसितैः (७८) दशनज्योत्स्नाक्षपितदिङ्मुखैः पुनः-पुनर्नभसि सञ्चारिणं चन्द्रालोकमिव कल्पयन्तं, (७९) कदम्ब-मुकुलस्थूलमुक्ताफलयुगलमध्याध्यासितमरकतस्य त्रिखण्डकण्ठा-भरणस्य (८०) प्रेङ्खतः प्रभया समुत्सर्पन्त्या सकुसुमहरित-

ततो "मत्तमधुकरकुलकोलाहलमुखरेण" इति पाठः] सनन्दनवनं—नन्दनवनं—तदाख्यदैवोद्यानं, तेन सह वर्त्तमानम्। वसन्तम्—उद्गिरन्तम्; मुखस्य नन्दनवनवत् तत्तत्सौरभ्यालिलत्वादिति भावः। ["वसन्तम्" इत्यत्र "वमन्तम्" इति पाठे—मुखेन—पारिभाषेण, सहकारादिपारिजातान्तानां प्रसूनसङ्घानां समुद्गमेनेत्यर्थः, वसन्तं—तिष्ठन्तं, विराजमानमित्यर्थः; युगपदेव तेषां तेषां समुद्गमात् वसन्तं—वसन्तनामकम ऋतु-मिव; यद्वा,—सहकारः,—सुगन्धद्रव्यभेदः सहकारफलेनैव क्रियते; पारिजातकः,—अनेकद्रव्यसंस्कृतः मुखवासविशेषः; वसन्तश्चैवंविधेनैव मुखेन पारिभाषिकोपलक्षितो भवति]।

(७७) आसन्नेति।—आसन्नेन—सन्निहितेन, सहृदा—मित्रेण, सह यत् परिहाससम्भाषणं—परिहासालापः तेन। उत्तानेति।—उत्ता-नस्य—उन्नमितस्येत्यर्थः, मुखस्य मुग्धानि—मनोज्ञानि हसितानि—स्मितानि तैः। ["आसन्नसुहृत्परिहासभावनोत्तानितमुखमुग्धहसितैः" इति पाठे—आसन्नेन सुहृदा यः परिहासः तस्य भावना—भावावबोधः, तस्मिन् उत्तानितम्—उन्नमितं यत मुखं तस्य मुग्धानि हसितानि तैः]।

(७८) दशनेति।—दशनानां—दन्तानां, ज्योत्स्नया—प्रभयेत्यर्थः, क्षपितानि—आप्लावितानि, धौतानीति यावत्, दिङ्मुखानि यैः तथोक्तैः। कल्पयन्तं—विस्तारयन्तम्।

(७९) कदम्बेति।—कदम्बमुकुलवत् स्थूलं यत् मुक्ताफलयुगलं—मौक्तिक-युग्मं, तस्य मध्यम् अध्यासितम्—अधिष्ठितं, मरकतं—तदाख्यं रत्नं, यस्य यत्र वा तथाभूतस्य। त्रिखण्डकण्ठाभरणस्य—त्रिगुणकण्ठहारस्येत्यर्थः, इयतीर्यौक्तिकफलयो-र्मध्ये मरकतरत्नग्रथितत्रिवाहत्तहारस्येति भावः। ["त्रिकण्टककर्णाभरणस्य" इति पाठे—त्रीणि कण्टकानि—कण्टकसदृश्यः, शलाका इत्यर्थः, यत्र तादृशं यत् कर्णाभरणं—कर्णभूषणं तस्येत्यर्थः]।

(८०) प्रेङ्खतः,—दीप्यमानस्य, ज्वलत इत्यर्थः, दोलतो वा। समुत्सर्पन्त्या —समुद्गच्छन्त्या। सकुसुमेति।—सकुसुमः,—पुष्पसहितः, हरितः,—हरिद्वर्णः,

कुन्दपल्लवकर्णावतंसमिवोपलक्ष्यमाणम्, (८१) आमोदि-मृगमदपङ्क्तिलिखितमकरमुखपत्रभङ्गभास्वरं, भुजयुगलम् उद्दाम-मकराक्रान्तशिखरमिव मकरकेतुदण्डद्वयं दधानं, धवलब्रह्म-सूत्रसीमन्तितं, (८२) सागरमथनसामर्षगङ्गास्रोतःसन्दानित-मिव मन्दरं दोर्दण्डमुद्वहन्तं, (८३) कर्पूरक्षोदमुष्टिच्छुरण-पांशुलेनेव युवतिजनकुचचक्रवाकामिथुनविपुलपुलिनेन उरः-स्थलेन स्थूलभुजायामपुञ्जीकृतं, पुरो विस्तारयन्तमिव दिक्-

कुन्दपल्लवः, कर्णावतंसः,—कर्णभूषणं यस्य तथाभूतमिव। ["क्लृप्तसकुसुमहरितकुन्द-पल्लवकर्णावतंसम्" इति पाठे—क्लृप्तः सकुसुमः हरितः कुन्दपल्लवः कर्णावतंसः,—कर्णभूषणं यस्य तथोक्तमित्यर्थः]।

(८१) आमोदीति।—आमोदी—सौरभवान्, यः मृगमदपङ्क्तिः,—कस्तूरिकारसः, तेन लिखितः,—चित्रितः, मकरमुखः,—मकराख्यजलजन्तुमुखवदनरूप इति यावत्, पत्रभङ्गः,—पत्ररचना, तेन भास्वरं—राजमानम्। ["पङ्क्तिलिखितपत्र-भङ्गभास्वरम्" इति पाठे—पङ्क्तिन—दृष्टेन, लिखितः यो पत्रभङ्गः, तेन भास्वरम्] भुजयुगलं—बाहुयुग्मम्। उद्दामेति।—उद्दामेन—उद्भटेन, मकरेण आक्रान्तं शिखरम्—अग्रभागः यस्य तादृशम्। मकरकेतुदण्डद्वयं—कामस्य दण्डयुगलम्। ["मकर-केतुकेतुदण्डद्वयम्" इति पाठे—मकरकेतोः केतुदण्डद्वयं—ध्वजयष्टियुगलम्]। धवलेति।—धवलेन—शुभ्रेण, ब्रह्मसूत्रेण—यज्ञोपवीतेन, सीमन्तितं—संयतं, सन्नद्धमित्यर्थः।

(८२) सागरेति।—सागरस्य—क्षीरोदस्य, मथनेन सामर्षा—सक्रीधा, पति-द्रोहादिति भावः, या गङ्गा तस्याः स्रोतसा—प्रवाहेण, सन्दानितमिव—बद्धमिव। मन्दरं—मन्दराचलम्।

(८३) कर्पूरेति।—कर्पूरस्य क्षोदः,—चूर्णं, तस्य मुष्टिः,—मुष्टिधृतकर्पूर-चूर्णमित्यर्थः, तस्य च्छुरणं—लेपनमिति यावत्, तेन पांशुलं—धवलमित्यर्थः, तेन। ["कर्पूरक्षोदच्छुरणपांशुलेन" इति पाठान्तरम्]। युवतीति।—युवतिजनस्य कुचावेव—स्तनावेव, चक्रवाकमिथुनं तस्य विपुलं—बृहत्, पुलिनं—सैकतं तेनेव। ["कान्तीश्चकुचचक्रवाकयुगलविपुलपुलिनेन" इति पाठे—कान्तायाः उच्चकुचावेव चक्रवाकयुगलं तस्य विपुलं पुलिनं तेनेत्यर्थः]। उरःस्थलेन—वक्षःस्थलेन। स्थूलेति।—स्थूलेन—महता, भुजयोः आयामेन—विस्तारेण, पुञ्जीकृतं—समा-

चक्रं, पुरस्तात् ईषत् (८४) अधोनाभिनिहितैककोणकमनीयेन पृष्ठतः कट्याधिक्षिप्तपल्लवेनोभयतः संवलनप्रकटितोरुविभागेन हारीतहरिता निविड़निपीड़ितेन अधरवाससा (८५) विभक्ततनुतरमध्यभागम्, अनवरतसमोपचितमांसकठिनविकटमकरमुखसंलग्नजानुभ्यां (८६) विशालवक्षःस्थलोपलवेदिकोत्तम्भनशिलास्तम्भाभ्यां चारुचन्दनस्थासक-

---

कृतम्। ["पुञ्जितम" इति पाठेऽपि स एवार्थः]। दिक्चक्रं—दिङ्मण्डलं, पुरः विलोक्यन्तमिव—प्रसारयन्तमिव। पुरस्तात्—अग्रतः।

(८४) अधोनाभीति।—नाभरधः,—अधोनाभि, तत्र निहितः एकः कोणः,—अंशविशेषः, तेन कमनीयं—मनोज्ञं तेन। पृष्ठतः,—पश्चाद्भागे। कट्येति।—कट्यया—मेखलया, ("कट्या बृहतिकायां स्यात काच्यां मध्येभबन्धने" इति मेदिनी) अधिक्षिप्तः,—संयतः, पल्लवः,—प्रान्तभागो यस्य तेन। ["कट्याधिकक्षिप्त" इति पाठे—कट्यायाम् अधिकं यथा तथा क्षिप्तः,—निहितः, लम्बमान इत्यर्थः, पल्लवः यस्य तेन] उभयतः,—उभयोः भागयोः। संवलनेन—सङ्कोचनेन, प्रकटितः,—प्रकाशितः, ऊर्वोर्विभागः येन तादृशेन, ["विभागेन" इत्यत्र "विभागेण" इति पाठान्तरे—ऊर्वोः,—पादयोः, (ऊरुशब्दोऽत्र पादसामीप्यलक्षणम्) विभागः,—तृतीयो भागः, जङ्घाप्रदेश इत्यर्थः, येन तादृशेन]। हारीतहरिता—हारितः,—पक्षिविशेषः, तद्वत् हरित्—नीलवर्णमित्यर्थः, तेन। ["हारीतहरितेन" इति पाठेऽपि स एवार्थः]। निविड़निपीड़ितेन—सुदृढ़मेयांसितेन। अधरवाससा—परिधानवसनेन।

(८५) विभक्तेति।—विभक्तः,—प्रकटितः, तनुतरः,—अतिक्षुद्रः, मध्यभागः,—कटिदेशः यस्य तम्। ["विभक्त" इत्यत्र "विभज्यमान" इति पाठान्तरे—विभज्यमानः,—पृथक् क्रियमाणः इत्यर्थः]। अनवरतेति।—अनवरतं—सततं, क्लृप्तः यः श्रमः, तेन उपचितं—प्रवृद्धं, यत मांसं, तेन कठिनं—दृढं, विकटं—बृहत्, यत् मकरमुखं—जानुनीरूपरिभागः, तेन संलग्ने—संबद्धे, जानुनी ययोः ताभ्याम्।

(८६) विशालेति।—विशालं—बृहत्, यत् वक्षःस्थलं, तदेव उपलवेदिका—पाषाणनिर्मिता वेदिका, तस्या उत्तम्भनाय—धारणाय, शिलास्तम्भौ—पाषाणनिर्मितौ स्तम्भौ, तत्स्वरूपावित्यर्थः, ताभ्याम्। चारुणेति।—चारुणा—मनोज्ञेन, चन्दनस्थासकेन—चन्दनचर्च्चया, विलक्षचन्दनेनेत्यर्थः, ("चर्च्चा तु चार्चिक्यं स्थासकः"

ूलकान्तिभ्याम् ऊरुदण्डाभ्याम् उपहसन्तमिव ऐरावत-
ारायामम्, (८७) अतिभरभरितोरुभागभारवहनखेदेनेव
नुतरं जङ्घाकाण्डं वहन्तं, (८८) कल्पपादपपल्लवपाटलस्य
भयपार्श्वविलम्बिनः पादद्वयस्य दोलायमानैर्नखमयूखजालकैः
८९) अश्वमण्डनचामरमालामिव रचयन्तम्, अभिमुख-
ञ्चैरुदञ्चद्भिः अतिचिरमुपरि विश्राम्यद्भिरिव वल्गनविकटं,
तद्भिः खुरैः खण्डितभुवि प्रतिक्षणं (९०) दशनग्रहविमुक्ति-
णखणायितखलीने दीर्घघोणलीननालिके ललाटपट्टिकालु-
ामरः)। स्थूला—अतिशयिता, कान्तिर्ययोः ताभ्याम्। ऐरावतकराऽऽयामम्—
ावतशुण्डदण्डविस्तारम्।

(८७) अतिभरेति।—अतिभरेण—अतिभारेण, भरितयोः,—पूर्णयोः, ऊरु-
गयोः,—ऊर्वोः, भारस्य वहनेन—धारणेन, यः खेदः,—श्रमः तेनेव। ["अति-
रतोरुभारवहन" इति पाठे—अति—अत्यर्थं, भरितयोः ऊर्वोः भारस्य वहनम्
र्थः]। तनुतरं—कृशतरम्। जङ्घाकाण्डं—जानुनोः अधोभागरूपं खण्डम्।
तनुतरं जङ्घाकाण्डं वहन्तम्" इत्यत्र "तनुतरजङ्घाकाण्डम्" इति पाठे—तनुतरः
ाकाण्डो यस्येति समासयोजना]।

(८८) कल्पपादपेति।—कल्पपादपस्य—कल्पतरोः, पल्लवः,—किसलयः,—
त् पाटलं—रक्तं तस्य। ["कल्पपादपपल्लवदयस्येव पाटलस्य" इति पाठा-
म्]। उभयपार्श्वविलम्बिनः,—उभयोः पार्श्वयोः विलम्बते इति तथोक्तस्य,
उभयपार्श्वावलम्बिनः" इति पाठान्तरम्]। नखमयूखजालकैः,—नखकिरण-
ूहैः। ["नखमयूखैः" इति पाठान्तरम्]।

(८९) अश्वेति।—अश्वस्य—खवाहनस्येति भावः, मण्डनम्—अलङ्कारः,
मरमाला, तामिव। रचयन्तं—कल्पयन्तम्। उदञ्चद्भिः,—उत्पतद्भिः। विश्राम्यद्भि-
ः—विश्रामं गच्छद्भिरित्यर्थः। वल्गनविकटं—वल्गनेन—गतिविशेषेण, विकटम्
उद्भटं यथा तथा। ["वलितविकटम्" इति पाठे—वलितं—गतिविशेषः, तेन
ाटं—चित्रमिति कैश्चिद् व्याचक्षुः]। खण्डितभुवि—खण्डिता—कुट्टिता, भूः,—
ति: यैन तथोक्ते।

(९०) दशनेति।—दशनैः,—दन्तैः, ग्रहः,—ग्रहणं, विमुक्तिः,—त्यागः, ताभ्यां
णखणायितः,—खणखणशब्दवत् कृतः, खलीनः,—कविका यैन तथोक्ते। ["प्रति-

लितचामीकरचक्रे (९१) शिञ्जानशातकौम्भजयनशोभिनि मनोरंहसि गोलाङ्गूलकपोलकान्तिरोमणि नीलसिन्धुवारवर्णे वाजिनि समारूढम्, उभयत्र पर्य्याणपट्टाश्लिष्टहस्ताभ्याम् आसन्नपरिचारकाभ्यां (९२) दोधूयमानधवलचञ्चरीकायुगलम्, अग्रतः पठतो वन्दिजनस्य सुभाषितम् उत्कर्णकित-

चणदशनविमुक्तखुरणखुरणायितखरखलीनैः" इति समस्तपाठे—प्रतिक्षणं दशनैर्विमुक्तः,—अपसारणं कृतः, तेन खुरणखुरणायितः खरः,—कर्कशः, खलीनो येन तथोक्तो इत्यर्थः]। दीर्घेति।—दीर्घायां—लम्बायां, घोणायां—नासिकायां, लीना—लग्ना, नालिका—कविका यस्य तादृशं। ललाटेति।—ललाटपट्टिकायां—भालफलके, लुलितं—चञ्चलितं, वेगादिति भावः, चामीकरचक्रं—स्वर्णचक्रं यस्य तथाविधं। ["दीर्घघ्राणलीनलालिकललाटलुलितचारुचामीकरचक्रके" इति पाठान्तरे—दीर्घे घ्राणे—नासायां, लीनः लालिकः,—कविकाशेखरं यस्य तादृशं, ललाटे—भालदेशे, लुलितं चारु—सुन्दरं, चामीकरचक्रं यस्य तथाभूते इत्यर्थः]।

(९१) शिञ्जानेति।—शिञ्जानं—स्वनत्, यत् शातकौम्भजयनं,—स्वर्णनिर्मित-तुरङ्गवर्म्मविशेषः, तेन शोभते इति तथोक्ते, ("जयनं स्यात् तुरङ्गादिसन्नाहे" इति मेदिनी)। मनोरंहसि—मनस इव रंहः,—रयः यस्य तादृशे, मनोजवे इत्यर्थः। गोलाङ्गूलेति।—गोलाङ्गूलः,—कृष्णमुखो वानरः, तस्य कपोलवत् कान्तिर्येषां तादृशानि रोमाणि यस्य तथोक्ते, ["गोलाङ्गूलकपोलकालकायलोम्नि" इति पाठान्तरे—गोलाङ्गूलकपोलवत् कालं—कृष्णवर्णं, कायलोम—शारीररोम यस्य तादृशे]। नीलेति।—नीलं यत् सिन्धुवारं—तत्कुसुममित्यर्थः, तस्येव वर्णो यस्य तथाभूते। वाजिनि—अश्वे। ["वाजिनि मरुति" इत्यधिकपाठे—मरुति—मरुन्नाम्नि, वाजिनीत्यर्थः]। उभयत्रेति।—उभयत्र—उभयोः पार्श्वयोरित्यर्थः। ["उभयत्र" इत्यत्र "उभयतः" इति पाठान्तरम्]। पर्य्याणेति।—पर्य्याणपट्टः,—अश्वपृष्ठस्थितासनविशेषः पर्य्याणं, तदेव पट्टः,—फलकं तस्मिन्, आश्लिष्टः,—अर्पितः, हस्तः,—वाम इति भावः, याभ्यां तथोक्ताभ्याम्। ["पर्य्याणपट्टाश्लिष्टः" इत्यत्र "पर्य्याणपट्टश्लिष्ट" इति पाठेऽपि स एवार्थः]।

(९२) दोधूयमानेति।—दोधूयमानं—वीज्यमानं, धवलं—श्वेतं, चञ्चरीका-युगलं—चामरयुगलं यस्य तम्। ["चञ्चरीका" इत्यत्र "चामरिका" इति पाठे स्पष्टम्]। वन्दिजनस्य—स्तुतिपाठकस्य, ["वन्दिनः" इति पाठेऽपि स एवार्थः]।

कपोलफलकेन लग्नोत्पलकेसरपद्मरागकलेनेव मुखशशिना भावयन्तम्, (९३) अनङ्गयुगावतारमिव दर्शयन्तं, चन्द्रमयीमिव सृष्टिम् उत्पादयन्तं, विलासप्रायमिव जीवलोकं जनयन्तम्, (९४) अनुरागमयमिव मर्गान्तरमानयन्तं, शृङ्गारमयमिव दिवसमापादयन्तं, रागराज्यमिव प्रवर्त्तयन्तम्, आकर्षणाञ्जनमिव चक्षुषोः, वशीकरणमन्त्रमिव मनसः, स्वस्थावेशचूर्णमिव इन्द्रियाणां, सन्तोषमिव कौतुकस्य, (९५) सिद्धयोगमिव सौभाग्यस्य, पुनर्जन्मदिवसमिव मन्मथस्य, रसायनमिव यौवनस्य, एकराज्यमिव रामणीयकस्य, कीर्त्तिस्तम्भमिव

उत्कोटकितकपोलफलकेन—उत्कोटकितं—रोमाञ्चितं इति यावत्, कपोलफलकं—गण्डतटं यस्य तथाभूतेन। लग्नोत्पल—लग्नानि—संसक्तानि, उत्पलस्य—कुमुदस्य, केसरपद्मरागकलानि—केसराणि—किञ्जल्कानि, पद्मरागौघ—नेवरीभागौघ, आवरकत्वात् इति भावः, तेषां शकलानि—खण्डानि यस्मिन् तेनेव, ["लग्नोत्पल" इत्यत्र "लग्नकर्णोत्पल" इति पाठे—लग्नस्य कर्णोत्पलस्य—कर्णावतंसीभूतकुमुदस्य इत्यर्थः]। भावयन्तं—चिन्तयन्तम्।

(९३) अनङ्गेति।—अनङ्गस्य—कामस्य, युगे—समयविशेषे, अवतारः,—पृथिव्यामवरोहणं, तमिव; अवतीर्णमनङ्गमिव लोकं दर्शयन्तमिति भावः।

(९४) अनुरागमयमिव—अनुरागातिशयादिति भावः। एवमुत्तरत्र। सर्गान्तरम्—अन्यां सृष्टिम्। ["मार्गान्तरम्" इति पाठे—अन्यविधं मार्गं—पन्थानं, व्यवहारमित्यर्थः]। आपादयन्तं—जनयन्तम्। रागराज्य—रागः,—विषयेषु घनस्नेहः, तस्य राज्यं तत्। आकर्षणाञ्जनं—वशीकरणकज्जलम्। स्वस्थावेशचूर्णमिव—स्वस्थं यथा तथा आवेशयतीति तथाभूतं चूर्णं—वशीकरणार्थचूर्णद्रव्यविशेषः, तदिव। सन्तोषमिव—तृप्तिमिव, यद्दर्शनेन कौतुकस्य निवृत्तिर्जायते इत्यर्थः। ["असन्तोषमिव" इति पाठे—यं दृष्ट्वा द्रष्टुः कौतुकं न निवर्त्तते, दर्शनजनितसन्तोषस्याऽनिवृत्तेः पुनः पुनः तद्दर्शनलालसा वर्द्धते इति भावः]।

(९५) सिद्धयोगमिव।—सिद्धाय, कार्य्याणामिति भावः। योगः,—उपायः, तमिव। रसायनमिव—गुणान्तराधानमिव; यथा रसायनबलात् कश्चित् परिपूर्णः स्थिरश्च भवति, तद्वत् एतदाश्रयेण यौवनमिति भावः। रामणीयकस्य—सौन्दर्यस्य।

रूपस्य, कुलकौषमिव लावण्यस्य, पुण्यकर्म्मपरिणाममिव संसारस्य, (९६) प्रथमाङ्कुरमिव कान्तेः, सर्गाभ्यासफलमिव प्रजापतेः, प्रतापमिव विभ्रमस्य, यशःप्रवाहमिव वैदग्ध्यस्य, अष्टादशवर्षदेशीयं कञ्चित् युवानम् अद्राक्षीत्।

पार्श्वे च तस्य द्वितीयं, (९७) संसक्ततुरगं, परं प्रांशुम्, उत्तप्ततपनीयस्तम्भावदातं, परिणतवयसमपि व्यायामबलीयांसं, नीचनखश्मश्रुकेशं, शुक्तिखलतिम्, ईषत्तुन्दिलं,

एकराज्यमिव—एकम्—अद्वितीयं, राज्यमिव। कुलकौषमिव—वंशचैवमिव। ["मूलकौषमिव" इति पाठान्तरे—प्रधानचैवमिव इत्यर्थः]। पुण्येति।—पुण्यानां कर्म्मणां परिणामः,—फलं, तमिव।

(९६) प्रथमाङ्कुरमिव—प्रथमः,—मुख्यः, आद्यो वा, अङ्कुरः,—प्ररोहः, तमिव। ["कान्तेः" इत्यत्र "कान्तिलतायाः" इति पाठे—कान्तिरेव लता तस्याः]। सर्गाभ्यासफलमिव—सर्गः,—सृष्टिः, तस्य अभ्यासः,—पुनःपुनरनुशीलनं, तस्य फलं, तादिव। विभ्रमस्य—विलासस्य। यशःप्रवाहमिव—यशसां प्रस्रवणमिव। वैदग्ध्यस्य—नैपुण्यस्य। अष्टादशवर्षदेशीयम्—ईषदसमाप्तोऽष्टादशवर्षवयस्कमिव लक्ष्यमाणमित्यर्थः, ["ईषदसमाप्तौ कल्पदेश्यदेशीयरः" (५।३।६७ पा०) इति सूत्रात् सिद्धम्]।

(९७) संसक्ततुरगं—तुरगेण संसक्तः तं, तुरगारूढमित्यर्थः, ["अपरसंसक्ततुरगम्" "अपरसंश्लिष्टतुरङ्गम्" इति च पाठान्तरद्वये—अपरेण तुरगेण संसक्तः, तम्, अपरेण तुरङ्गेण संश्लिष्टः,—संसक्तः तमिति चार्थः। अत समासाश्रित्यः]। परम्—अत्यन्तं, प्रांशुम्—उन्नदेहमित्यर्थः। उत्तप्तेति।—उत्तप्तं—प्रज्वलितं, यत् तपनीयं—काञ्चन, तस्य स्तम्भवत्—स्थूणावत्, अवदातः,—गौरः तम्, ("अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः" इत्यमरः) ["उत्तप्ततपनीयस्तम्भाकारम्" इति पाठान्तरम्]। परिणतवयसं—परिपक्कवयसं, स्थविरमिति यावत्। व्यायामबलीयांसं—व्यायामेन—सततास्फालनया, बलीयान्—अतिबलशाली, तम्। ["व्यायामकठिनकायम्" इति पाठे स्पष्टम्]। नीचनखश्मश्रुकेशं—नीचाः,—नताः, लम्बमाना इत्यर्थः, यद्वा, —नीचाः,—ह्रस्वाः, क्षौरकर्म्मणा अल्पा इत्यर्थः, नखाः श्मश्रूणि केशाश्च यस्य तथोक्तम्। ["नीचनखश्मश्रुकचम्" इति पाठान्तरे—कचाः,—केशाः, अन्यत् समानम्]। शुक्ति-खलतिं—शुक्तिवत् खलतिः,—खल्वाटः यस्य तं, शुक्तवर्णखल्वाटमित्यर्थः। तुन्दिलं—लम्बोदरमित्यर्थः। ["तुन्दिलम्" इत्यस्मात् परं

(९८) अनुत्कणोदारवेशतया जरामपि विनयमिव शिक्षयन्तं, गुणानपि गौरवमिव आपादयन्तं, महाऽनुभावतामपि शिष्यतामिव जनयन्तम्, आचार्यस्य आचार्यकमिव कुर्वाणं, धवलवारवाणधारिणं, लसत्तनुदुकूलपट्टिकापरिश्लिष्टमौलिं पुरुषम् ।

अथ स युवा (९९) पुरोयायिनां यथादर्शनं प्रतिनिहत्य विस्मयमानमनसां कथयतां पदातीनां सकाशात् उपलभ्य दिव्याकृति तत् कन्यायुगलम् उपजातकुतूहलः प्रतूर्णतुरगो दिदृक्षुः तं लतामण्डपोद्देशम् आजगाम । दूरादेव च तुरगा-

"रौमशोरःस्थलम्" इत्यधिकपाठे—रौमशं—बहुलोमयुक्तमित्यर्थः, उरःस्थलं—वक्षःस्थलं यस्य तथोक्तमित्यर्थः] ।

(९८) अनुत्कणेति ।—अनुत्कणं—सततम्, उदारवेशतया—विशुद्धपरिच्छदतया । ["अनल्पणोदारवेशतया" इति पाठे—अनुल्बणः,—अनुत्कटः, सौम्य इत्यर्थः, उदारः,—विशुद्धः, वेशो यस्य तस्य भावः, तत्ता तया] । गुणानपि—विनयदाक्षिण्यादीनपि । ["गौरवमिव आपादयन्तम्" इत्यत्र "गरिमाणमिवानयन्तम्" इति पाठान्तरे,—गरिमाणं—गुरुत्वं, प्रशस्यतामिवेति यावत्, आनयन्तं—सम्यक् प्रापयन्तम्] । महाऽनुभावतां—महासत्त्वताम् । ["जनयन्तम्" इत्यत्र "आनयन्तम्" इति पाठान्तरम्] । आचार्यस्य—गुरोः । ["आचार्यस्य" इत्यत्र "आचारस्य" इति पाठे—आचारस्य—सौजन्यस्येति यावत्, शास्त्रविहितायां नीतेर्वा] । आचार्यकमिव—आचार्यस्य कर्म आचार्यकं, तदिव । धवलवारवाणधारिणं—धवलवर्मधरम् । लसदिति ।—लसन्त्या—शोभमानया, तन्वा—सूक्ष्मया, दुकूलपट्टिकया—पट्टवसनखण्डिकया, परिश्लिष्टः,—परिवेष्टितः, मौलिः,—धम्मिल्लो यस्य तम् । ["लसत्.....मौलिम्" इत्यत्र "धौतदुकूलपट्टिकापरिवेष्टितमौलिम्" इति पाठान्तरे,—धौतया—विशुद्धया, निर्मलया इत्यर्थः ; अन्यत् तुल्यम्] ।

(९९) पुरोयायिनाम्—अग्रयायिनाम् । यथादर्शनं—दर्शनमनतिक्रम्य यथादर्शनं, दर्शनानुसारेणेत्यर्थः, दृष्टेवेति यावत् । प्रतिनिहत्य—प्रत्याहत्य, ["प्रतीत्य" इति पाठान्तरे—निश्चित्य, निर्णीय इत्यर्थः] । विस्मयमानमनसां—विस्मयमानं—चमत्कुर्वत्, मनः येषां तथाभूतानाम् । ["विस्मितमनसाम्" इति पाठान्तरम्] । उपलभ्य—विदित्वा । उपजातकुतूहलः,—सञ्जातदर्शनाभिलाष इत्यर्थः । प्रतूर्णतुरगः,

दवततार। निवारितपरिजनस्य तेन द्वितीयेन साधुना सह चरणाभ्यामिव सविनयमुपससर्प। कृतोपसङ्ग्रहणौ तौ सावित्री समं सरस्वत्या किसलयाऽऽसनदानादिना कुसुमफलार्घ्यावसानेन वनवासोचितेन आतिथ्येन यथाक्रममुपजग्राह। आसीनयोश्च तयोः आसीना नातिचिरमिव स्थित्वा तं द्वितीयं प्रवयसम् उद्दिश्य अब्रवीत्,—"आर्य! (१००) सहजलज्जाघनस्य प्रमदाजनस्य प्रथमाभिभाषणम् अशालीनता; विशेषतो वनसृगीमुग्धस्य कुमारीजनस्य। केवलम् (१०१) इयम् आलोकनकृतार्थाय चक्षुषे स्पृहयन्ती प्रेरयति उदन्तश्रवणकुतूहलिनी

—विद्रुततरङ्गमः। उपससर्प—उपजगाम; कन्यकात्वादौद्दण्यव्यवहारो न निन्द्यः। कृतोपसङ्ग्रहणौ—कृतम्—अनुष्ठितम्, उपसङ्ग्रहणं—समादरेण ग्रहणम्, अभिवादनं वा ययोः तथाभूतौ; ("उपसङ्ग्रहणं धीराः कथयन्त्यभिवादनम्" इति स्मरणात्)। किसलयाऽऽसनदानादिना—पल्लवरचिताऽऽसनदानादिना। कुसुमफलार्घ्यावसानेन—कुसुमेन फलेन च यत् अर्घ्यं—पूजनविशेषः, तदेव अवसानं यस्य तेन। ["सकुसुमफलार्घ्यावसानेन" इति पाठोऽपि स्पष्टः]। यथाक्रमं—यथानियमम्। उपजग्राह—समाहृतवती। आसीनयोः,—उपविष्टयोः, तयोः,—युवप्रवयसोरित्यर्थः। आसीना—उपविष्टा। ["अब्रवीत्" इत्यत्र "अवादीत्" इति पाठान्तरम्]।

(१००) सहजेति।—सहजया—स्वभावजातया, लज्जया घनः,—पूर्ण इत्यर्थः, तस्य। ["सहजलज्जाघनस्य" इत्यत्र "सहजलज्जाधनस्य" इति पाठे—सहजा—स्वाभाविकी, लज्जा एव धनं यस्य तस्येत्यर्थः]। प्रथमाभिभाषणं—प्रथमं—प्राक्, युवजनसमीपे तदीयाभिभाषणादिति भावः, अभिभाषणम्—आलपनम्। अशालीनता—धृष्टता, चापल्यमित्यर्थः। [अत्र "अशालीनता" इत्येव पाठः समीचीनः, "शालीनता" इत्यपपाठः, शालीनताशब्दस्य सौजन्यार्थकमत्राविवक्षितत्वात्]। वनसृगीमुग्धस्य—वनस्य सृगी—हरिणी, तद्वत् मुग्धः,—सरलः, तस्य। ["वनसृगी" इत्यत्र वनशब्देन जनसम्पर्कविरहितत्वं सूचितम्। "कुमारीजनस्य" इत्यत्र "कुलकुमारीजनस्य" इति पाठान्तरम्]।

(१०१) इयं "श्रोत्रवृत्तिः" इत्यनेनान्वयः। श्रोत्रवृत्तिः,—श्रवणेन्द्रियव्यापारः। आलोकनेति।—आलोकनेन—दर्शनेन, युवयोरिति भावः, कृतार्थे—चरितार्थे, तस्मै।

श्रोत्रवृत्तिः। (१०२) प्रथमदर्शने च उपायनमिवोपनयति सज्जनः प्रणयम्। अप्रगल्भमपि जनं प्रभवता प्रश्रयेण अर्पितं मनो मधु इव वाचालयति। अयत्नेनैव च अतिनम्रे साधौ धनुषीव गुणः परां कोटिमारोपयति विस्रम्भः। जनयन्ति च विस्मयम् अतिधीरधियाम् अपि अदृष्टपूर्वा दृश्यमाना जगति सुष्ठु सृष्ट्यतिशयाः; यतस्त्रिभुवनाभिभावि रूपमिदमस्य महानुभावस्य कुमारस्य, (१०३) सौजन्यपरतन्त्रा चेयं देवानां बुधस्यातिभद्रता कारयति कथां, न तु युवतिजनसङ्गोत्था तरलता। तत् कथय, अत्र आगमनेन अपुण्यभाक् कतमो

चक्षुषे—नयनाय। सृहयन्ती—स्पृहा कुर्वती, नयनवत् स्वयमपि कृतार्थतां गन्तुमभिलषन्तीत्यर्थः। उदलति।—उदलस्य—वृत्तान्तस्य, युवयोरिति शेषः, श्रवणे कुतूहलिनी—सञ्जातकुतूहला सती, प्रेरयति, अभिभाषितुं मामिति शेषः।

(१०२) प्रथमेति।—प्रथमं—नवमित्यर्थः, दर्शनं तस्मिन्। उपायनमिव—उपहारमिव, प्रणयम् उपनयति—प्रदर्शयति इत्यर्थः। ["उपनयन्ति सज्जनाः" इति बहुवचनान्तं पाठान्तरम्]। प्रभवता—प्रभुणा, महतेति भावः; प्रश्रयेण—विनयेन, सज्जनानामिति भावः; अर्पितं—प्रदत्तं, तस्मै इति शेषः, सज्जनायभीकृतमित्यर्थः, उद्दीपितमिति भावः, मनः,—चित्तं, मधु इव—मद्यमिव, अप्रगल्भमपि—मुग्धमपि, जनं वाचालयति—वाचालं करोति। गुणः,—विनयादिः, मौर्वी च। परां कोटिं—परमसुत्कर्षं, धनुषः शिखाञ्च। विस्रम्भः,—विश्वासः,("सभौ विस्रम्भविश्वासौ" इत्यमरः)। अतिधीरधियाम्—अतिशयेन धीरा धीः,—बुद्धिर्येषां तथाभूतानामपि। अदृष्टपूर्वाः—पूर्वमदृष्टाः। सुष्ठु सृष्ट्यतिशयाः,—शोभनाः सृष्टिविशेषा इत्यर्थः। ["स्रष्टुः सृष्ट्यतिशयाः" इति पाठे—स्रष्टुः,—विधातुः, सृष्टेः,—विशिष्टा सृष्टिः इति भावः, तस्या अतिशयाः,—उत्कर्षाः, परमोत्कृष्टसृष्टवस्तूनीति यावत्]।

(१०३) सौजन्येति।—सौजन्यस्य परतन्त्रा—पराधीना, इयं देवानां—पूज्यानां युष्माकम्, अतिभद्रता—अतिशयेन शिष्टाचारः, बुधस्य—विद्वज्जनस्य, भवतः इत्यर्थः, समीपे इति शेषः, ["बुधस्य" इत्यत्र "प्रियस्य" इति पाठे—प्रियस्य—प्रियजनस्य समीपे इति भावः] कथां कारयति—कथयतीत्यर्थः। युवतीजनसङ्गोत्था—युवतीजनानां सङ्गोत्था—स्वाभाविकी, तरलता—चपलता, "न तु कथां कारयति"

विक्रमजृम्भितविरहव्यथया शून्यतां नीतो देशः? क्व वा गन्तव्यम्? (१०४) को वा अयम् अपहृतहरहुङ्काराहङ्कारो-ऽपर इव अनन्यजो युवा? किन्नाम्नः ममहृतपसः पितुः अयम् अमृतवर्षी कौस्तुभमणिरिव हरेर्हृदयमाह्लादयति? का वाऽस्य त्रिभुवननमस्या प्रभातसन्ध्येव महतस्तेजसो जननी जननी? कानि वा अस्य पुण्यभाञ्जि भजन्ति अभिख्याम् अक्षराणि? आर्य्यपरिज्ञानेऽप्ययमेव क्रमः कौतुकानुरोधिनो हृदयस्य"।

इत्यनुषङ्गः। [अत्र "युवतीजन" इत्यत्र "कुमारीजन" इति पाठो युज्यते। "युवति-जन" इत्यत्र युवतिजने" इति पाठान्तरम्]। अथदानीं सावित्री ब्रह्मलोकापार्श्वे मनुष्यलोके दधीचस्य सरस्वत्याः भर्त्तव्यतां मनसि कृत्वा परिचयं पृच्छति, तत कथयेति।—तत्—तस्मात्, कथय—ब्रूहि। अत आगमनेन कतमो देशः अपुण्यभाक् —पुण्यवर्जितः कृत इत्यर्थः; यतः विक्रमजृम्भितविरहव्यथया—विक्रमेण—बलेन, जृम्भिता—उद्दीपिता, या विरहव्यथा—वियोगपीडा, युवयोरिति भावः, तया शून्यतां नीतः; यस्मात् देशात् भवत्यावागतौ, स देश इदानीं युवयोः विरहेण नितरां दुःखितो जातः, इति तस्य अपुण्यभाक्त्वमिति भावः; क्व भवतोर्निवासः इति प्रश्न-निष्कर्षः। ['विक्रमजृम्भितविरहव्यथया" इत्यत्र "विजृम्भितविरहव्यथः" इति पाठे—विजृम्भिता—उद्दीपिता, विरहव्यथा यस्य तथाभूत इत्यर्थः]।

(१०४) ["को वा" इत्यत्र "कस्य वा" इति पाठे—कस्य जनस्य अयं युवा इत्यन्वयः]। अपहृतेति।—अपहृतः,—नाशितः, हरस्य हुङ्काराहङ्कारः,—हुङ्कार-गर्भः गर्वः, येन तथाभूतः, हरकोपाग्निना अदग्ध इति भावः। अनन्यजः,—आत्मभूः, कामः इत्यर्थः। किन्नाम्नः,—किमाख्यस्य। ["का वास्य" इत्यत्र "का चास्य" इति पाठान्तरम्]। त्रिभुवननमस्या—त्रिलोकीपूज्या। प्रभातसन्ध्येव—प्रातः-सन्ध्या। ["महतस्तेजसो जननी जननी" इत्यत्र "महतस्तेजसी जननी" इति पाठान्तरम्]। पुण्यभाञ्जि—पुण्यवन्तीत्यर्थः। अभिख्यां—संज्ञाम्। अक्षराणि—वर्णाः, किन्नामधेयोऽयमिति भावः। आर्य्यपरिज्ञानेऽपि—साधुज्ञानेऽपि, अयं साधुरिति सामान्यतः परिज्ञानेऽपि इत्यर्थः, कौतुकानुरोधिनः,—विशिष्टज्ञानलालसस्येत्यर्थः, अयमेव क्रमः,—नियमः, प्रश्न इति शेषः।

इत्युक्तवत्यां तस्यां (१०५) प्रकटितप्रश्रयोऽसौ प्रत्यवादीत्,—"आयुष्मति! सतां हि प्रियंवदता कुलविद्या। न केवलमाननं, हृदयमपि च ते चन्द्रमयमिव सुधाकरकरशीतलैराह्लादयति वचोभिः। (१०६) सौजन्यजन्मभूमयो भूयसा शुभेन कर्म्मणा शिल्पकला इव भवादृश्यो दृश्यन्ते। (१०७) दूरं तावत् अन्योऽन्यस्यालापाः, अभिजातैः सह दृशोऽपि मिश्रीभूता महतीं तुष्टिम् आरोपयन्ति। श्रूयताम्—एष खलु भूषणं भार्गववंशस्य भगवतो भूर्भुवःस्वस्त्रितय-

(१०५) प्रकटितप्रश्रयः,—प्रदर्शितविनयः। ["प्रत्यवादीत्" इत्यत्र "प्रतिव्याजहार" इति पाठान्तरे—प्रत्युक्तवानित्यर्थः]। सतामिति।—सतां—साधूनां, प्रियंवदता—प्रियभाषित्वं, कुलविद्या—वंशक्रमानुसारिणी विद्या, सहजा विद्या इत्यर्थः। सुधाकरकरशीतलैः,—चन्द्रकिरणवत् शिशिरैः, ["सुधाकरकरशीतलैः आह्लादयति" इत्यत्र "सुधाशीकरशीतलैः आनन्दयति" इति पाठे—अमृतबिन्दुवत् शिशिरैः प्रीणयति इत्यर्थः]।

(१०६) सौजन्येति।—सौजन्यस्य—सदाचारस्य, जन्मभूमयः,—उत्पत्तिस्थानानि। भूयसा—अतिबहुलेन, शुभेन—पुण्येन, कर्म्मणा—कार्य्येण, शिल्पकला इव—शिल्पविद्या इव। [कर्म्मणा·····इव" इत्यत्र "सज्जननिर्म्माणशिल्पकलाः" इति पाठे—सन्तो जनाः सज्जनाः, तेषां निर्म्माणे शिल्पकला इत्यर्थः। "दृश्यन्ते" इत्यत्र "जायन्ते" इति पाठान्तरम्]।

(१०७) दूरं इति।—अन्योऽन्यस्य—परस्परस्य, सज्जनानामिति शेषः। आलापाः,—भाषणानि, दूरं तावत्, तिष्ठन्विति शेषः। ["आलापाः" इत्यत्र "आलापनम्" इति पाठे—आभाषणमित्यर्थः]; ते खलु तुष्टिमारोपयन्तीति का कथेति भावः। अभिजातैः,—सत्कुलजैः, सह मिश्रीभूताः दृशोऽपि—दृष्टयोऽपि, परस्परदर्शनानि अपीत्यर्थः, महतीं तुष्टिं—प्रीतिम्, आरोपयन्ति—जनयन्ति। ["तुष्टिम्" इत्यत्र "भूमिम्" इति पाठे—महतीं भूमिं—स्थानं, स्वर्गमिति यावत्, आरोपयन्ति—नयन्ति। "एषः" इत्यत्र "अयम्" इति पाठान्तरम्]। भूषणम्—अलङ्कारः। भार्गववंशस्य—भृगोरयं भार्गवः, तस्य वंशः,—कुलं तस्य। भूरिति।—

तिलकस्य, (१०८) अदभ्रप्रभावस्तम्भितजम्भारिभुजस्तम्भस्य, (१०९) सुरासुरमुकुटमणिशिलातलशयनदुर्ललितपादपङ्कजस्य (११०) निजतेजःप्रसरप्रष्टपुलोम्नः च्यवनस्य वह्निर्वर्त्ति-जीवितं दधीचो नाम तनयः। जननी च अस्य जितजगतः (१११) अनेकपार्थिवसहस्रानुयातस्य शर्य्यातस्य सुता राज-पुत्री त्रिभुवनकन्यारत्नं सुकन्या नाम। तां खलु देवीं हिमूर्त्तिं

भूः,—पृथिवी, भुवः,—अन्तरीक्षं, स्वः,—स्वर्गः, तेषां त्रितय, तस्य तिलकं—ललाट-भूषणविशेषः तस्य।

(१०८) अदभ्रेति।—अदभ्रः,—महान्, ("अदभ्रं बहुलं बहु" इत्यमरः)। प्रभावः,—तपःसामर्थ्यमिति यावत्, तेन स्तम्भितः,—संरुद्धः, जम्भारेः,—इन्द्रस्य, भुज एव स्तम्भः येन तथोक्तः, तस्य, (पुरा किल अश्विनीकुमाराभ्याम् "आवां यज्ञभागभुजौ कुरु" इति चिर प्रार्थितोऽयं तथेति प्रतिपद्य ताभ्यां भागं ददत् इन्द्रेण क्रुद्धेन वज्रधरेण रोषितः, ततश्चास्य सवज्रः हस्तः स्तम्भितोऽभूदिति पुराण-वार्त्ता अत्र अनुसन्धेया)।

(१०९) सुरासुरेति।—सुराणाम् असुराणाञ्च मुकुटेषु यानि मणिशिला-तलानि—रत्नभूतप्रस्तराः, तेषु शयनेन ["शिलातलशयन" इत्यत्र "शिलाशयन" इति पाठान्तरम्] दुर्ललितं—दुरधिगम्यं, अत्याहृतमिति यावत्, पादपङ्कज—चरणसरसिजं यस्य तथाभूतस्य, सुरासुरवन्द्यस्येति भावः। ["पादपङ्केरुहस्य" इति पाठान्तरेऽपि स एवार्थः]।

(११०) निजेति।—निजानां तेजसां प्रसरेण—प्रयोगेण, प्रष्टः,—दग्धः, पुलोमा—तन्नाम्ना राक्षसो येन तथोक्तस्य। (पुरा भृगोः पत्नी अन्तर्वत्नी पुलोम्ना राक्षसेन क्रियमाणा आसीत्, तदानीं गर्भस्थोऽसौ महामुनिर्गर्भात् च्युतः; ततश्च अत्यर्थनाम्ना अनेन च्यवनेन राक्षसोऽसौ कोपदृष्ट्या दग्ध इति पुराणवार्त्ता)। वह्निर्वर्त्ति—वह्निर्वर्त्तते इति वह्निर्वर्त्ति—वह्निःस्थितम्। ["वह्निर्वान्त" इति पाठान्तरे, —वह्निः,—वह्निप्रदेशे, वान्तः,—अवस्थानं यस्य तादृशं, वह्निरवस्थितमित्यर्थः]। जितजगतः,—जगद्विजयिनः।

(१११) अनेकेति।—अनेकानि—बहूनि, पार्थिवानां—राज्ञां, सहस्राणि तैः, अनुयातः,—सेवित इति यावत्, तस्य। शर्य्यातस्य—तदाख्यस्य, सम्राज इति शेषः। त्रिभुवनकन्यारत्नं—त्रिभुवने याः कन्याः तासु रत्नं—रत्नभूतेत्यर्थः। हिमूर्त्तिं—

विदित्वा वैजनने मासि प्रसवाय पिता पत्युः पार्श्वात् स्वगृहम् आनाययत्। असूत च सा तत्र देवी दीर्घायुषम् एनम्। अनेहसा अवर्द्धत तत्रैव अयम् आनन्दितज्ञातिवर्गो बालस्तारकराज इव राजीवलोचनो राजगृहे। भर्तृभवनमागच्छन्त्यामपि मातरि न (११२) आसेचनकदर्शनमिमम् अमुञ्चत् मातामहो मनोविनोदनं नप्तारम्; अशिक्षत च अयं तत्रैव सर्वा विद्याः सकलाश्च कलाः।

"कालेन च (११३) उपारूढयौवनम् इमम् आलोक्य अहमिव अमी अपि अनुभवतु मुखकमलावलोकनानन्दम् अस्य इति मातामहः कथं कथमप्येनं पितुरन्तिकम् अधुना व्यसर्जयत्। मामपि तस्य देवस्य सुगृहीतनाम्नः श्रेष्ठ्यातस्य आज्ञाकारिणं विकुक्षिनामानं भृत्यपरमाणुम् अवधारयतु भवती। पितुः पादमूलम् आयान्तं मया साभिसारम् अकरोत् स्वामी। (११४) तद्धि नः कुलक्रमागतं राजकुलम्।

दं मूर्त्तौ यस्याः तां, स्वतो गर्भजन्मना च मूर्त्तिदृश्यवतीमित्यर्थः, गर्भिणीमिति भावः। ["द्विमूर्त्तिम्" इत्यत्र "अन्तर्वत्नीम्" इति पाठे—अन्तर्वत्नी—गर्भिणीमित्यर्थः]। वैजनने मासि—प्रसवमासे। अनेहसा—कालेन। तारकराज इव—चन्द्र इव। राजीवलोचनः,—पद्मनेत्रः। ["मातरि" इत्यत्र "दुहितरि" इति पाठान्तरम्]।

(११२) आसेचनकेति।—आसेचनकं—"तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शने" इत्युक्तलक्षणम्, अतितृप्तिकरमिति यावत्; दर्शनं यस्य तथाभूतम्। मनोविनोदनं—मनःप्रीतिजननम्। नप्तारं—दौहित्रम्। कलाः,—चतुःषष्टिविधाः कामविद्याः।

(११३) उपारूढयौवनं—प्राप्तयौवनम्। असौ—श्वशुरः। कथं कथमपि—अतिकृच्छ्रेण। व्यसर्जयत्—प्रेषयामास इत्यर्थः। सुगृहीतेति।—सुगृहीतं नाम यस्य तथोक्तस्य, प्रातःस्मरणीयस्य इत्यर्थः, "स सुगृहीतनामा स्यात् यः प्रातः स्मर्यते बुधैः" इत्युक्तेः। भृत्यपरमाणुं—क्षुद्रतरं भृत्यमित्यर्थः। आयान्तम्—आगच्छन्तम्, एनमिति शेषः। मया साभिसारं—ससहायं, मत्सहचरमित्यर्थः। स्वामी—प्रभुः, नृपतिरित्यर्थः।

(११४) तद्धि न इति।—तत्—राजकुलं, नः,—अस्माकं, कुलक्रमागतं—

उत्तमानाञ्च चिरन्तनता जनयति अनुजीविनि अपि जने कियन्मात्रमिव मन्दात्तम्। अत्तोणः खलु दाक्षिण्यकोशो महताम्। इतश्च गव्यूतिमात्रे एव पारिशीर्णं तस्य भगवतः श्यवनस्य स्वनाम्ना नियमितव्यपदेशं श्यावनं नाम चैत्ररथ-कल्पं काननं निवासः। तदवधिरेव नौ यात्रा। यदि च (११५) गृहीतक्षणदाक्षिण्यम् अनवहेलं वा हृदयम् अस्माकम् उपरि भूमिर्वा प्रसादानाम् अयं जनः श्रवणार्हो वा, ततो न विमाननीयोऽयं नः प्रथमः प्रणयः कुतूहलिनो

वंशपरम्परया सेवितमिति यावत्, हि—अवधारणे। उत्तमानां—सज्जनानां, चिरन्तनता—चिरानुगत्यमिति भावः। अनुजीविनि—अनुजीव्य चलति, सेवके इति यावत्, कियन्मात्रमिव—अल्पमात्रमिव, ["कियन्मात्रमपि" इति पाठान्तरम्] मन्दात्तं—लज्जा, ("मन्दात्तं व्रीडया व्रीडा लज्जा" इत्यमरः) चिरानुगत्येन सम्यक् भृत्यभावे महतां लज्जा जायते, इति सामनुजीविनमपि स्वदौहित्रसदृशं कृतवानिति भावः। खलु—यतः, महतां दाक्षिण्यकोशः,—औदार्यभाण्डारम्, अत्तोणः,—न त्तयं गच्छतीत्यर्थः, स्वस्य दाक्षिण्यातिशय्यात् तथा कृतवानिति भावः। इतश्च—अस्मात् प्रदेशाच्च, पारिशीर्णं—शीर्णस्य नदस्य पारे इति पारिशीर्णम्। गव्यूतिमात्रे—गव्यूति—क्रोशयुगं, तदेव तन्मात्रं, तस्मिन्, ("गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः) तदन्ते इत्यर्थः, [अवान्ते गम्यमाने अध्ववाचकात् सप्तमी। "गव्यूतिमात्रमिव" इति पाठान्तरम्]। स्वनाम्ना—निजाख्यया, नियमितः,—निर्दिष्टः, अभिहित इत्यर्थः, व्यपदेशः,—संज्ञा यस्य तथोक्तम्। ["निर्म्मितव्यपदेशम्" इति पाठे,—निर्म्मितः,—कृतः]। चैत्ररथकल्पं—चैत्ररथं नाम कुबेरोद्यानं, तन्मादीपदूनम्। नौ—आवयोः। यात्रा—गमनम्। ["तदवधिरेव" इत्यत्र "तदवधिश्चेयम्" इति पाठान्तरम्]।

(११५) गृहीतेति।—गृहीतं क्षणदाक्षिण्यं—स्वल्पकालिकसौजन्यं येन तथा भूतम्। ["गृहीतक्षणम्" इति पाठे—गृहीतः,—स्वीकृतः, प्राप्त इत्यर्थः, क्षणः,—उत्सवः येन तम्; "क्षण उद्भव उत्सवः" इत्यमरः]। अनवहेलं—नास्ति अवहेला—अवज्ञा यस्य तादृशम्। प्रसादानाम्—अनुग्रहाणां, भूमिः,—पात्रम्। श्रवणार्हः,—श्रोतुं योग्यः। विमाननीयः,—अनादरणीयः, न उपेक्षणीय इति यावत्, नः,—अस्माकम्, अयं प्रथमः,—आद्यः, प्रणयः,—समागमः, प्रार्थना वा। ["कुतूहलिनो

हृदयस्य । वयमपि शुश्रूषवो प्रथमवृत्तान्तम् आयुष्मत्योः । न इयम् आकृतिर्दिव्यतां व्यभिचरति । गोत्रनामनी तु श्रोतुम् अभिलषति नौ हृदयम् । तत् कथय, कतमो वंशः स्पृहणीयतां जन्मना नीतः ? का च इयम् अत्रभवतो भवत्याः समवाय इव विरोधिनां पदार्थानाम् ? तथा हि,—सन्निहितबालान्धकारा भास्वन्मूर्त्तिश्च, पुण्डरीकमुखी हरिणलोचना च, (११६) बालातपप्रभाधरा कुमुदहासिनी च, ममदहंस-

हृदयस्य" इत्यत्र "कुतूहलस्य" इति पाठे—कौतुकस्य, श्रवणौत्सुक्यस्येत्यर्थः] । शुश्रूषवः, —श्रोतुमिच्छवः । ["प्रथमवृत्तान्तम्" इत्यत्र "वृत्तान्तम्" इति पाठान्तरम्] । व्यभिचरति—अतिक्रामति, दिव्यता विना ईदृशी आकृतिर्न सम्भवतीति भावः । गोत्रनामनी—कुलनामधेये । नौ—आवयोः । स्पृहणीयतां—स्पृहार्हीयतां । ["जन्मना" इत्यत्र "तत्रभवत्या जन्मना" इति पाठान्तरे,—तत्रभवत्या—माननीयया, पूज्यया वा, भवत्या इति शेषः] । अत्रभवतो—मान्या, पूज्या वा । विरोधिनां—परस्परविरुद्धानां, पदार्थानां—वस्तूनां, समवाय इव—सम्मेलनमिव, दृश्यते इति शेषः । ["भवत्याः" इत्यत्र "भवत्याः समीपे" इति पाठान्तरम्] । तथा हि—तमेवार्थं जानीहीत्यर्थः । सन्निहितबालान्धकारा—सन्निहिताः,—स्थिताः, बालाः,—केशाः, अन्धकारा इव यस्याः सा ; अन्यत्र,—बालाः,—अभिनवाः, अन्धकाराः तथाभूताः । भास्वन्मूर्त्तिः,—भास्वती—दीप्यमाना, मूर्त्तिः यस्याः तथोक्ता ; अन्यत्र,—भास्वतः,—सूर्यस्य, मूर्त्तिः । (अत्र सूर्यमूर्त्तिसमीपे अन्धकार इति विरोधः, उपमिति समासे बहुव्रीहिसमासे च तत्परिहारः) । पुण्डरीकमुखी —पुण्डरीकं—श्वेतपद्मं, तद्वत् मुखं यस्याः तथोक्ता ; अन्यत्र,—पुण्डरीकः,—तदाख्यो दिग्गजविशेषः, व्याघ्रो वा, तस्येव मुखं यस्याः तथोक्ता । हरिणलोचना—हरिणे—शुक्लवर्णे, लोचने यस्याः तथोक्ता, अन्यत्र—हरिणस्येव लोचने यस्याः तथोक्ता । (अत्र पदान्तरे विरोधः, पूर्ववत्ते समाधानम्) ।

(११६) बालातपेति ।—बालातपः,—अभिनवसूर्यालोकः, तस्य प्रभेव प्रभा —दीप्तिः यस्य तथाभूतः अधरो यस्याः तथोक्ता ; अन्यत्र,—बालातपस्य प्रभां धरतीति तथोक्ता । कुमुदहासिनी—कुमुदवत् हासो विद्यते यस्याः तथोक्ता ; अन्यत्र,—कुमुदैः हसतीति कुमुदिनीत्यर्थः । (अत्र पूर्वमविरोधः, पश्चाद्विरोधः) । ममदहंससखना—मदेन सह वर्त्तमानः समदः,—मत्त इत्यर्थः, स चासौ हंससखेति

स्वना समुन्नतपयोधरा च, (११७) कमलकोमलकरा (११८) हिमगिरिशिलापृथुनितम्बा च, करभोरुर्विलम्बितगामिनी च, अमुक्तकुमारभावा स्निग्धतारका च" इति।

सा तु अवादीत्—"आर्य! श्रोष्यसि कालेन; (११९) भूयसी दिवसान् अत्र स्थातुम् अभिलषति नो हृदयम्। अल्पीयांश्चायमध्वा। परिचय एव प्रकटीकरिष्यति।

समदहंसः, तस्येव स्वनः,—नादः यस्याः तथोक्ता; अन्यत्र,—समदः,—मत्तताव्यञ्जक इत्यर्थः, हंसस्य स्वनो यस्यां तथाभूता। ["समदहंससस्वना" इत्यत्र "कलहंससस्वना इति पाठे—कलः,—मधुरः, हंसस्येव स्वनो यस्याः तथोक्ता; अन्यत्र,—कलः हंसस्य स्वनो यस्यां तथोक्ता]। समुन्नतपयोधरा—समुन्नतौ—तुङ्गौ, पयोधरौ—कुचौ यस्याः तथोक्ता; अन्यत्र,—समुन्नताः,—समुद्गताः, पयोधराः,—मेघाः यस्यां तथोक्ता, प्रावृडिति भावः। (पूर्ववत् समाधानं, पश्चात् हंसानां शरद्येव मत्तताजननं, न प्रावृषीति विरोधः)।

(११७) कमलेति।—कमलं—पद्मं, तद्वत् कोमलौ—करौ यस्याः तथोक्ता; अन्यत्र,—कमलवत् कोमलाः,—मृदुलाः, कराः,—किरणाः यस्याः तथोक्ता।

(११८) हिमेति।—हिमगिरेः,—हिमालयस्य, शिलावत् पृथुः,—विशालः, नितम्बः यस्याः तथोक्ता; अन्यत्र,—पृथुनितम्बा हिमगिरिशिलेति व्यधिकरणान्वयः। पृथुः,—महान्, नितम्बः,—कटकं यस्याः तथाभूता। (प्रागविरोधः, पश्चात् तादृशशिलायाः कोमलकरतासम्भवादिरोधः)। करभोरुः,—करभः,—मणिबन्धादाकनिष्ठं करस्य बहिर्भागः, ("मणिबन्धादाकनिष्ठं करस्य करभो बहिः" इत्यमरः) तद्वत् ऊरुः यस्याः सा; अन्यत्र,—करभस्य—उष्ट्रस्य इव, ऊरुः यस्याः सा; तथा विलम्बितं—मृदुमन्दं, सविलासमित्यर्थः, गच्छतीति तथोक्ता; अन्यत्र,—विलम्बितम्—अतिमन्दं गच्छतीति तथोक्ता। [प्रागविरोधः, पश्चात् करभस्य द्रुतगामित्वादिरोधः, "विलम्बितगमना" इति पाठान्तरम]। अमुक्तकुमारभावा—न मुक्तः,—न त्यक्तः, कुमारभावः,—बाल्यमित्यर्थः, यया तथोक्ता; अन्यत्र,—न मुक्तः कुमारे—कार्त्तिकेये, भावः,—भक्तिर्यया तथोक्ता। स्निग्धतारका—स्निग्धा—स्नेहस्यात्मिका, प्रणयप्रकटीत्यर्थः, तारका—अक्षः कनीनिका यस्याः तथोक्ता; अन्यत्र,—स्निग्धः,—स्नेहवानित्यर्थः, तारकः,—तदाख्यदैत्यविशेषः यस्याः तथाभूता। (कुमारभक्तायाः कुमारभावं तारकं प्रति स्नेहो विरुद्ध इति, पूर्वार्धे तत्परिहारः)।

(११९) भूयसः,—बहून्। अल्पीयान्—अत्यल्पः। अध्वा—मार्गः। परि-

आर्य्येण न विस्मरणीयोऽयमनुषङ्गदृष्टो जनः" इत्यभिधाय तूष्णीमभूत्। दधीचस्तु नवाम्भोभारगम्भीराम्भोधरध्वाननिभया भारत्या नर्त्तयन् (१२०) वनलताभवनभाजो भुजगभुजः सुधीरमुवाच,—"आर्य्ये! करिष्यति प्रसादम् आर्य्या आराध्यमाना। पश्यामः तातम्। उत्तिष्ठ, व्रजामः" इति। "तथा" इति च तेन अभ्यनुज्ञातः शनकैः उत्थाय कृतनमस्कृतिः उच्चचाल। तुरगारूढञ्च तं प्रयान्तं सरस्वती सुचिरम् उत्तम्भितपक्ष्मणा निश्चलतारकेण लिखितेनेव चक्षुषा व्यलोकयत्। उत्तीर्य्य श्रोणम् अचिरेणैव कालेन दधीचः पितुः आश्रमपदं जगाम। गते च तस्मिन् सा तामेव दिशम् विलोकयन्ती सुचिरमतिष्ठत्, क्लेशादिव च मञ्जहार दृशम्।

अथ मुहूर्त्तमिव स्थित्वा स्मृत्वा च तां तस्य रूपमम्यदं

चयः,—संस्तवः। प्रकटीकरिष्यति—प्रकाशयिष्यति, अध्वनो गव्यूतिमात्रपरिमाणत्वात् निकटस्थितयोः आवयोः अन्तरान्तरा दर्शनसम्भावनया अचिरात् परिचयं प्राप्स्यसीति भावः। अनुषङ्गदृष्टः,—अनुषङ्गेण—कार्य्यान्तरव्यामङ्गेन, दृष्टः,—अवलोकितः। नवाम्भोभारेति।—नवानाम्—अभिनवसञ्चितानामित्यर्थः, अम्भसां—जलानां, भारेण—गौरवेण, ["भार" इत्यत्र "भर" इति पाठान्तरम्] गम्भीरो योऽम्भोधरध्वानः,—मेघस्य नादः, तन्निभया—तदनुरूपया। भारत्या—वाचा। नर्त्तयन्—नृत्यं कारयन्।

(१२०) वनेति।—वनलता एव भवनानि—गृहाणि, भजन्ते इति तथोक्तान्। भुजगान् भुञ्जते इति भुजगभुजः,—मयूरान्; मयूरा मेघगर्जनेन नृत्यन्तीति प्रसिद्धिः। प्रसादम्—अनुग्रहम्। आराध्यमाना—सेव्यमाना। ["पश्यामः तातम्" इत्यत्र "पश्यामः तावत्तातम्" इति पाठान्तरम्]। उच्चचाल—प्रतस्थे। उत्तम्भितपक्ष्मणा—उत्तम्भितानि—उत्क्षिप्तानि, ऊर्द्धं स्थिरीकृतानीत्यर्थः, पक्ष्माणि—लोमानि यस्य तेन, निश्चलतारकेण—स्थिरतारेण। पितुः,—जनकस्य अवनस्य। विलोकयन्ती—पश्यन्ती। ["आलोकयन्ती" इति पाठान्तरम्]। क्लेशादिव—अतिकष्टेनेव, दृशं—चक्षुः, मञ्जहार—व्यवर्त्तयत्।

पुनः पुनः (१२१) व्यस्मयत अस्याः हृदयम्। भूयोऽपि चक्षुः आचकाङ्क तद्दर्शनम्। अवशेव केनाप्यनीयत तामेव दिशं दृष्टिः। अप्रहितमपि मनस्तेनैव सार्द्धम् अगात्। अजायत च नवपल्लव इव लतायाः कुतोऽपि अनुरागः चेतसि। सालसेव शून्येव सनिद्रेव दिवसम् अनयत्। अस्तमुपयाति च प्रत्यक्पर्य्यस्तमण्डले लाङ्गलिकास्तवकसदृशत्विषि कमलिनीकामुके (१२२) कठोरसारसशिरःशोणशोचिषि सावित्रे त्रयीमये तेजसि, (१२३) तरुणतरतमालश्यामले च मलिनयति व्योम व्योमव्यापिनि तिमिरसञ्चये, सञ्चरत्सिद्धसुन्दरीनूपुररवानुसारिणि च मन्दं मन्दं मन्दाकिनीहंस इव समुत्सर्पति शशिनि

(१२१) व्यस्मयत—विस्मयमगच्छत्। अवशेव—पराधीनेव। अप्रहितमपि—अप्रेरितमपि, अनियुक्तमपि इति यावत्। ["लतायाः" इत्यत्र "बालवनलतायाः" इति पाठान्तरम्। "कुतोऽप्यनुरागः" इत्यत्र "कुतोऽप्यस्या अनुरागः" इति पाठान्तरम्। "सालसेव" इत्यत्र च "सालस्येव" इति पाठान्तरम्]। अनयत्—अत्यवाहयत्, क्लेशेन इति भावः। उपयाति—उपगच्छति। प्रत्यक्पर्य्यस्तमण्डले—प्रतीच्यां—पश्चिमायां दिशीत्यर्थः, पर्य्यस्तं—पतितं, मण्डलं यस्य तथाभूते। लाङ्गलिकेति।—लाङ्गलिका—फलिनी, "ईशलाङ्गला" इति ख्यातः लाङ्गलाकाररक्तवर्णपुष्पविशिष्टौषधिभेदो वा, तस्या इदं लाङ्गलिकं, यत् स्तवकं—गुच्छः, तेन सदृशी त्विट्—प्रभा यस्य तथोक्ते, ईषद्रक्तापिङ्गले इति भावः। ["लाङ्गलिकास्तवकतास्त्विषि" इति पाठे—लाङ्गलिकास्तवकवत् तास्राः,—रक्ताः, त्विषो यस्य तथोक्ते इत्यर्थः]।

(१२२) कठोरेति।—कठोरः,—परिणतः, स्थविर इत्यर्थः, यः सारसः,—पक्षिभेदः, तस्य शिर इव शोणा—रक्ता, शोचिः,—दीप्तिः यस्य तथाभूते। सावित्रे—सवितुरिदं सावित्रं, तस्मिन्। त्रयीमये—ऋगयजुःसाम्नां त्रितयं त्रयी, "ऋग्यजुःसामनामानः त्रयो वेदास्त्रयी श्रुता" इत्युक्तेः, तदात्मके, "त्रय्येव विद्या तपति" इति श्रुतेः।

(१२३) तरुणेति।—तरुणतरः,—अभिनवः, तमालः,—तदाख्यवृक्षभेदः, तद्वत् श्यामलः,—नीलः तस्मिन्। व्योम—आकाशं, मलिनयति—मलिनीकुर्वति, व्योमव्यापिनि—गगनाच्छादिनि। सञ्चरदिति।—सञ्चरन्तीनाम्—इतस्ततो गच्छन्तीनां,

गगनतलं, (१२४) कृतसन्ध्याप्रणामा निशामुख एव निपत्य विमुक्ताङ्गी पल्लवशयने तस्थौ। सावित्री अपि कृत्वा यथाक्रियमाणं सायन्तनं क्रियाकलापम् उचितं शयनकाले किसलयशयनमभजत, जातनिद्रा च सुष्वाप।

इतरा तु मुहुर्मुहुः (१२५) अङ्गवलनैः विलुलितकिसलयशयनतला निमीलितलोचनाऽपि नाभजत निद्राम्; अचिन्तयच्च,—"मर्त्यलोकः खलु सर्वलोकानाम् उपरि, यस्मिन् एवंविधानि सम्भवन्ति त्रिभुवनभूषणानि सकलगुणग्रामगुरूणि रत्नानि। तथा हि, तस्य (१२६) मुखलावण्यविन्दुः इन्दुः। तस्य च चक्षुषो विक्षेपाः (१२७) कुमुदकुवलयकमलाकराः।

सिद्धसुन्दरीणां—देवयोनिविशेषाणां स्त्रीणां नूपुररवम् अनुसरति—अनुगच्छतीति तथोक्तौ। मन्दं मन्दं—शनैः शनैः। समुत्सर्पति—समुद्गच्छति।

(१२४) कृतेति।—कृतः सन्ध्यायां सन्ध्याये वा प्रणामः यया तथाभूता, उपासितसन्ध्येति यावत्। निशामुख एव—प्रदोष एव, न पुनः शयनोचिते काले इति भावः। विमुक्ताङ्गी—निहितकलेवरा। "विमुक्ताङ्गी" इत्यनेन निःसङ्गत्वमस्या दर्श्यते। "यथाक्रियमाणम्" इत्यनेन सरस्वत्याः अस्याः विशेषत्वं प्रदर्शयन् सरस्वत्या एव स्मरणमाह। सायन्तनं क्रियाकलापं—सन्ध्याकालिककार्यजातम्।

(१२५) अङ्गवलनैः,—अङ्गस्य इतस्ततः चालनैः, विलुण्ठनैरिति यावत्। विलुलितेति।—विलुलित—विपर्यस्त, किसलयशयनतलं—पल्लवशय्या यस्याः तथाभूता। ["किसलयशयनीया" इति पाठान्तरे,—किसलयमेव शयनीयं—शय्या यस्याः सा]। मर्त्यलोकानां—मर्त्यानां लोकानां, स्वर्गमर्त्यपातालानाम् इत्यर्थः, [निर्धारे षष्ठी] उपरि—श्रेष्ठ इत्यर्थः। सकलगुणग्रामगुरूणि—सकलाः गुणाः,—विनयदाक्षिण्यादयः, तेषां ग्रामः,—समवायः, तेन गुरूणि—महान्ति।

(१२६) मुखेति।—मुखस्य लावण्यानां—कान्तिविशेषाणां, विन्दुः,—लेशः, इन्दुः,—चन्द्रः। ["मुखलावण्यविन्दुरिन्दुः" इत्यत्र "मुखलावण्यप्रवाहस्य निष्यन्दविन्दुरिन्दुः" इति पाठे,—मुखस्य यत् लावण्यं, तदेव प्रवाहः,—जलधारा, तस्या, निष्यन्दविन्दुः,—स्रावकणः। चक्षुषोः,—नयनयोः, विक्षेपाः,—विसरणानि, निपाता इत्यर्थः।

(१२७) कुमुदेति।—कुमुदानि—कैरवाणि, कुवलयानि—नीलोत्पलानि,

तस्य च अधरमणेर्दीधितयो विकसितबन्धूकवनराजयः। तस्य च अङ्गस्य परभागकरणम् अनङ्गः। आः! पुण्यभाञ्जि तानि चक्षूंषि चेतांसि यौवनानि वा स्त्रैणानि, येषाम् असौ अविषयो दर्शनस्य। क्षणं नु दर्शयता च तम् अन्यजन्मजनिकृतेनेव मे फलितम् अधर्म्मेण। का प्रतिपत्तिरिदानीम्?" इति चिन्तयन्त्येव कथंकथमपि समुपजातनिद्रा क्षणमशेत। सुप्ता च तम् एव दीर्घलोचनं ददर्श। (१२८) स्वप्नासादितद्वितीयदर्शना च आकर्णाकृष्टकार्मुकेण मनसि निर्दयमताडयत मकरकेतुना। प्रतिबुद्धाया मदनशरताड़िताया च तस्या वार्त्तामिव उपलब्धुम् अरतिः आजगाम। तथा हि, ततः-

---

कमलानि—पद्मानि, तेषाम् आकराः,—निचयाः। ["विकचकमुद" इत्यादि पाठान्तरम्]। दीधितयः,—मयूखाः। परभागकरणं—परभागस्य—उत्कर्षस्य, करणं—साधनम्। ["परभागकरणम्" इत्यत्र "परभागोपकरणम्" इति पाठे—उपक्रियते अनेनेति उपकरणं—साधनसामग्रीत्यर्थः]। आ इति खेदे। पुण्यभाञ्जि—पुण्यानि भजन्ते इति तानि, पुण्यवन्तीत्यर्थः, स्त्रैणानि—स्त्रीणाम् इमानि, स्त्रीसम्बन्धीनि इत्यर्थः; यद्वा,—स्त्रीणां समूहाः,—स्त्रैणानि, नारीजातय इत्यर्थः। येषां—चक्षुःप्रभृतीनाम्, असौ—युवा, अविषयः,—अगोचरः, यैः असौ न दृष्टः, तेषां सुखेन अवस्थितिरिति पुण्यभाक्त्वमिति भावः। ["अविषयः" इत्यत्र "विषयः" इति पाठान्तरे,—विषयः,—गोचरः, दृष्टिपथं गत इत्यर्थः]। अन्येति।—अन्यस्मिन् जन्मनि—पूर्वजन्मनि, या जनिः,—उत्पत्तिः, गर्हितकर्म्मणामिति भावः, पूर्वजन्मानुष्ठितगर्हिताचरणमिति फलितं, तत्कृतेनेव—तज्जनितेनेव। ["अन्यजन्मजनितेनेव" इति पाठस्तु सुगमः। "फलितम् अधर्म्मेण" इत्यत्र "फलितं धर्म्मेण" इति पाठो न युज्यते]। अधर्म्मवशादेव अस्य दर्शनं जातं, तेनैव मे इष्टहानिर्विकृतिरिति भावः। ["येषाम् असौ विषयः" इति पाठे तु—"फलितं धर्म्मेण" इति पाठो युज्यते। अस्य अपमानाच्चात्कारिणैव जन्मसाफल्यमिति पुण्यभाक्त्वमिति भावः]। प्रतिपत्तिः,—इतिकर्त्तव्यता। ["समुपजातनिद्रा क्षणम्" इत्यत्र "उपजातनिद्रा चिरात् क्षणम्" इति पाठान्तरे,—चिरात्—दीर्घकालेन, दीर्घकालानन्तरमित्यर्थः]।

(१२८) स्वप्नेति।—स्वप्न—निद्रावस्थायाम्, आसादितं—प्राप्त, द्वितीयं दर्शनं,

प्रभृति (१२९) कुसुमधूलिधवलिताभिर्वनलताभिः अताड़िताऽपि वेदनाम् अधत्त। मन्दमन्दमारुतविधुतैः कुसुमरजोभिः अदूषितलोचना अपि अश्रुजलं मुमोच। (१३०) हंसपक्ष-तालवृन्तचयविधुतैः शीतशीकरैः असिक्ताऽपि आर्द्रतामगात्। (१३१) प्रेङ्खत्कादम्बमिथुनाभिरनूढ़ाऽपि अघूर्णत वनकमलिनी-कल्लोलदोलाभिः। (१३२) विघटमानचक्रवाकयुगलविसृष्टैः अस्पृष्टाऽपि श्यामताम् आततान विरहनिश्वासधूमैः। पुष्प-धूलिधूसरैः अदृष्टाऽपि व्यचेष्टत मधुकरकुलैः।

तस्येति भावः, यया तथाभूता। प्रतिबुद्धायाः,—जागरितायाः। अरतिः,—वस्तु-वैराग्यरूपा कामदशा; तथा चोक्तं दर्पणे,—"अङ्गेष्वसौष्ठवं तापः पारुष्यता क्षमता-ऽरुचिः। अधृतिः स्यात् अनालम्बलक्षन्मयोन्मादमूर्च्छनाः। मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह॥" इति। "दुःखासिका" इति केचित्। कामश्चधृतिपञ्चभूतेति तदुपस्थितिप्रसङ्गः।

(१२९) कुसुमेति।—कुसुमानां धूलिभिः,—परागैः, धवलिताः,—व्याप्ततया श्वेतमापन्ना इत्यर्थः, ताभिः, ["कुसुमधूलिधवलाभिः" इति पाठान्तरम्]। वेदनां—व्यथाम्। अधत्त—अनुबभूव। ताड़ितलतास्पर्शे प्रत्युत सुखमेव भवेत्, अस्यास्तु न तथा, इत्यरतिरिति भावः। एवमुत्तरत्र द्रष्टव्यम्। अदूषितलोचना—अकलुषितनयना।

(१३०) हंसेति।—हंसानां पक्षा एव तालवृन्तचयाः,—व्यजनसङ्घाः, तैः विधुताः,—विक्षिप्ताः, तैः। ["हंसपक्षतालवृन्तव्रातवातवितैः" इति पाठे—तालवृन्तानां व्राताः,—समूहाः, तेषां वातैः वितताः,—विस्तृताः, विक्षिप्ता इत्यर्थः, तैः]। शीतशीकरैः,—शीतस्य—तदाख्यनदस्य, शीकराः,—अम्बुकणाः तैः, ("शीकरोऽम्बुकणः स्मृतः" इत्यमरः)। आर्द्रतां—आर्द्रताम्।

(१३१) प्रेङ्खदिति।—प्रेङ्खन्ति—सञ्चरन्ति, कादम्बानां—कलहंसानां, मिथु-नानि—युगलानि याभिः तथाविधाभिः। वनकमलिनीकल्लोलदोलाभिः,—वनेषु—जलेषु, याः कमलिन्यः,—पद्मिन्यः, ता एव कल्लोलदोलाः,—तरङ्गरूपा दोलन-यन्त्राणि, ताभिः, अनूढ़ाऽपि—अनुपवेशिताऽपि, अघूर्णत—अकम्पत।

(१३२) विघटमानेति।—विघटमानैः,—विच्छेदं गच्छद्भिः इत्यर्थः, चक्र-वाकानां युगलैः,—मिथुनैः, विसृष्टाः,—त्यक्ताः तैः। विरहनिश्वासधूमैः,—विरहे ये

(१३३) अथ गणरात्रापगमे निवर्त्तमानस्तेनैव वर्त्मना तं देशम् आगत्य तथैव निवारितपरिजनः छत्रधारद्वितीयो विकुक्षिर्डुढौके। सरस्वती तु तं दूरादेव सम्मुखमापतन्तं दृष्ट्वा ससम्भ्रमम् उत्थाय वनमृगीव उद्ग्रीवा विलोकयन्ती मार्गपरिश्रान्तम् अक्षपयत् इव धवलितदशदिशा दृशा।

कृतासनपरिग्रहन्तु तं प्रीत्या सावित्री पप्रच्छ,—"आर्य्य! कच्चित् कुशली कुमारः?" इति। सोऽब्रवीत्—"आयुष्मति! कुशली, स्मरति च (१३४) भवत्याः, केवलममीषु दिवसेषु तनीयसीमिव तनुं बिभर्त्ति, अविज्ञायमानाञ्च अनिमित्तां शून्यतामिवाधत्ते। अपि च अन्वक् समागमिष्यति एव मालती इति नाम्ना वरवर्णिनी वार्त्तां वो विज्ञातुम्;

निश्यामाः, ते धूमा इव तैः। श्यामता—मलिनता, अङ्गारसम्पृक्तकेवल्यमिति यावत्; यदुक्तं,—"अङ्गारदग्धो भगवान् मुरारिः, सङ्क्रीयते श्यामवपुर्मुरारिः। श्यामो मनाक् स्निग्धतरश्च तेन अङ्गारशेषो मुखराग उक्तः॥" इति। आततान—प्राप। ["आततान" इत्यत्र "आससाद" इति पाठान्तरम्]। पृषति।—पुष्पाणां धूलिभिः,—परागैः, धूसराः,—कपिशाः तैः, मधुकरकुलैः,—भ्रमरसङ्घैः, अदृष्टाऽपि व्यचेष्टत—तेषां झङ्कारैर्व्याप्ता भूमौ विलुण्ठितवतीत्यर्थः।

(१३३) अथ—अनन्तरं, गणरात्रापगमे—गणरात्रं—ब्रह्मो निशाः, ("गणरात्रं निशा ब्राह्मी" इत्यमरः) तस्य अपगमे—अतिक्रमे, बहुनिशासु गतासु इत्यर्थः। डुढौके—प्राप, उपतस्थे इत्यर्थः। ["आपतन्तं दृष्ट्वा ससम्भ्रमम् उत्थाय" इत्यत्र "आगच्छन्तं प्रीत्या सम्यक् समुत्थाय" इति पाठान्तरम्। "मार्गपरिश्रान्तम्" इत्यत्र "मार्गोपरिश्रान्तम्" इति पाठान्तरे—श्रान्तं तं मार्गोपरि एव, अक्षपयदिव इति परेणान्वयः। एतेन दधीचवार्त्ताज्ञानार्थमस्या अतीव व्याकुलत्वं सूच्यते]। अक्षपयत् इव—क्षपयामासेव। धवलितेति।—धवलिता—श्वेतीकृता, दश दिशः यया तथाभूतया।

(१३४) भवत्याः,—भवती इत्यर्थः, [स्मरणार्थकधातोर्योगे कर्म्मणि षष्ठी]। तनीयसीम्—अतिशयेन कृशाम्। शून्यतामिव—अभावमिव, आधत्ते—अनुभवतीत्यर्थः। अन्वक्—मत्पश्चात्, अविलम्बेनेति भावः। वरवर्णिनी—उत्तमाङ्गना, काचिदिति शेषः। ["अन्वक् समागमिष्यत्येव मालती इति नाम्ना वरवर्णिनी" इत्यत्र

उच्छ्वसितं हि सा कुमारस्य" इति। तच्छ्रुत्वा पुनरपि सावित्री समभाषत,—"अतिमहानुभावः खलु कुमारः, यत् एवम् अविज्ञायमाने क्षणदृष्टेऽपि जने परिचितम् अनुबध्नाति। तस्य हि गच्छतो यदृच्छया कथमपि अंशुकमिव मार्गलतासु मानसम् अस्मासु मुहूर्त्तम् आसक्तम् आसीत्। अमूल्यं हि सौजन्यम् आभिजात्येन वः स्वामिसूनोः। अलसः खलु लोकः, यदेवं (१३५) सुलभसौहार्द्दानि येन केनचिन्न क्रीणाति महतां मनांसि। सोऽयम् औदार्य्यातिशयः कोऽपि महात्मनाम् इतरजनदुर्लभः, येन उपकरणीकुर्व्वन्ति त्रिभुवनम्" इति। विकृत्तिः उच्चावचैः आलापैः सुचिरमिव स्थित्वा यथाऽभिलषितं देशम् अयासीत्।

"अल्वलमार्गसिध्यर्थेव मालतीति नाम्ना वाणिनी" इति पाठान्तरे,—अल्वलम्—अनुपदमेव, मत्वर्थादैवेत्यर्थः। वाणिनी—दूती]। वः,—युष्माकं, तव सरस्वत्याश्च इत्यर्थः। वार्त्ता—प्रवृत्तिम। सा—मालती। कुमारस्य—दर्शनस्य, उच्छ्वसितं—लोचनमित्यर्थः, प्राणसमा इति भावः। ("उच्छ्वसितम" इत्यनेनास्याः विस्रम्भवत्त्वा ख्यापिता)। अविज्ञायमाने—अज्ञातकुलशीले इति भावः। परिचितं—परिचयं, प्रणयमिति यावत्। अनुबध्नाति—आदधाति। महानुभावाः स्वपरविवेकरहिताः सर्व्वमेव स्वं मन्यन्ते इति भावः। यदृच्छया—अकस्मादित्यर्थः। अंशुकमिव—वसनमिव। मार्गलतासु—पथि स्थितासु वल्लीषु, अपरिचितासु इति भावः; यस्य यदृच्छया गच्छति, तस्य अनवधानतया कदाचित् अंशुकादि मार्गलतासु यथा लगति, तथा मार्गवशादिहागतस्य कुमारस्यापि मनः अस्मासु इति भावः। अमूल्यं—महामूल्यम्। [अत्र "अमूल्यम्" इति पाठान्तरे,—अमूल्यं—न निरर्थकमित्यर्थः, केवलं वाचिकं सौजन्यं न, किन्तु आन्तरमेवेति भावः] आभिजात्येन—सदंशप्रसूतत्वेन। स्वामिसूनोः,—प्रभुकुमारस्य। अलसः,—निर्व्वेष्टः, मूढो वा।

(१३५) सुलभेति।—सुलभानि—सुप्रापाणि, सौहार्द्दानि—मित्रताः, येषां तानि, महताम्—उदाराणां, मनांसि—चेतांसि, येन केनचित्—सामान्येन वस्तुनेति भावः, न क्रीणाति—क्रेतुं न प्रभवति। औदार्य्यातिशयः,—अतिशयेन औदार्य्यम्। कोऽपि—अनिर्व्वचनीयः। इतरजनदुर्लभः,—क्षुद्रजनदुष्प्रापः। येन—

(१३६) अथ अपरेद्युः उदिते भगवति द्युमणौ उद्दामद्युतौ अभिद्रुततारके तिरस्कृततमसि तामरसिनीविकासव्यसनिनि सहस्ररश्मौ शोणम् उत्तीर्य्य आयान्ती, तरलदेहप्रभावितानच्छलेन अत्यच्छं सकलं शोणसलिलमिव आनयन्ती, (१३७) स्फुटितातिमुक्तककुसुमस्तवकमल्लिषि सटालि महति मृगपताविव गौरी तुरङ्गमे स्थिता, मल्लीलम् उरोबध्नारोपितस्य (१३८) तिर्य्यगुत्कर्णतुरगाकर्ण्यमाननूपुर-

औदार्य्यातिशयेन इत्यर्थः। उपकरणीकुर्व्वन्ति—वशीकुर्व्वन्तीत्यर्थः। उच्चावचैः,—नानाविधैः। ("उच्चावचं नैकभेदम्" इत्यमरः)।

(१३६) अपरेद्युः,—अन्यस्मिन् अहनि। अपरेद्युः इत्यादिके—मालतीं ममदृश्यतेति अन्वयमन्वस्यः। ["उदिते" इत्यत्र "उद्यति" इति पाठः,—उदयं गच्छतीत्यर्थः]। द्युमणौ—दिवो मणिरिव तस्मिन्, गगनरत्ने इत्यर्थः, सूर्य्ये इति यावत्। उद्दामद्युतौ—उद्दामा—उत्कटा, उष्णेति यावत्, द्युतिः,—प्रभा, यस्य तस्मिन्। अभिद्रुततारके—अभिद्रुताः,—सन्ताडिताः, तारकाः,—नक्षत्राणि येन तथोक्ते, नक्षत्रतिरोधानकारिणि इत्यर्थः। तिरस्कृततमसि—दूरीकृतान्धकारे। तामरसिनीविकासव्यसनिनि—तामरसिन्याः,—रक्तोत्पलिन्याः, तासां विकासे—प्रस्फुटने, व्यसनम्—आसक्तिः, विद्यतेऽस्येति तथाभूते। ["तामरस……व्यसनिनि" इत्यत्र "तामरसव्यासव्यसनिनि" इति पाठान्तरे,—तामरसस्य—रक्तोत्पलस्य, व्यासः,—विस्तारः, विकाश इति यावत्, तत्र व्यसनिनि]। आयान्ती—आगच्छन्ती। तरलेति।—तरला—चञ्चला, विकासिनी इत्यर्थः, या देहप्रभा, तासां वितानः,—विस्तारः, स एव छलं, तस्य छलं वा तेन। अत्यच्छम्—अतिनिर्म्मलम्। आनयन्ती—सहचरीकुर्व्वतीत्यर्थः।

(१३७) स्फुटितेति।—स्फुटितः,—विकशितः, योऽतिमुक्तककुसुमस्तवकः,—माधवीलतापुष्पगुच्छः, तेन समाः स्निग्धाः,—कान्तयः यस्य तथोक्ते। सटालि—लटावति। मृगपताविव—सिंह इव। गौरी—गौरवर्णा, पार्व्वती च। उरोबध्नारोपितस्य—उरोबध्नः—अश्वपृष्ठारूढस्य चरणस्थापनार्थं द्रव्यविशेषः, तत्र आरोपितस्य—स्थापितस्य; चरणयुगलपदस्य विशेषणमिदम्।

(१३८) तिर्य्यगिति।—तिर्य्यग्—साचि यथा तथा, उत्कर्णेन—उन्नमितकर्णेन, तुरगेन—अश्वेन, आकर्ण्यमानं—शृण्वन्, प्रियमधुरशब्दत्वादिति भावः,

पटुरणितस्य अतिबहलेन पिण्डालक्तकेन पल्लवितस्य (१३९) कुङ्कुमपिञ्जरितपृष्ठस्य चरणयुगलस्य प्रसरद्भिः अतिलोहितैः प्रभाप्रवाहैः उभयतः ताड़नदोहदलोभागतानि किसलयितातिरिक्तरक्ताशोकवनानि इव आकर्षयन्ती, (१४०) सकलजीवलोकहृदयहठहरणघोषणयेव रशनया शिञ्जानजघनस्थला, धौतधवलनेत्रनिर्म्मितेन निर्मोकलघुतरेण आप्रपदीनेन कञ्चुकेन (१४१) तिरोहिततनुलता, तनुकञ्चुका-

नूपुरयोः पटु—स्पष्टं, रणितं—शब्दं यस्य तथाभूतस्य। अतिबहलेन—अतिप्रभूतेन, पिण्डालक्तकेन—घनलाक्षारसेन, पल्लवितस्य—नवकिसलयवदाचरत इत्यर्थः।

(१३९) कुङ्कुमेति।—कुङ्कुमेन पिञ्जरित—रञ्जित, पीतवर्णीकृतम इत्यर्थः, पृष्ठं यस्य तादृशस्य। उभयतः,—उभयोः पार्श्वयोरित्यर्थः। ताड़नेति।—ताडनं—प्रहार एव, दोहदः,—गर्भाभिलाषः, तत्र लोभः,—लोलुपता, तेन आगतानि;—"पादाहतः प्रमदया विकसत्यशोकः" इति कविसमयप्रसिद्धेः। किसलयितानि—सञ्जातपल्लवानि, अत एव अतिरिक्तानि—विस्तृतानि, अशोकवनानि तानि; ["किसलयितातिरिक्तरक्ताशोकवनानि" इत्यत्र "किसलयितानि रक्ताशोकवनानि" इति पाठान्तरम्]।

(१४०) सकलेति।—सकलानां जीवलोकानां हृदयानि—चेतांसि, तेषां हठेन—सहसा, हरणं तस्य घोषणा—वाद्यविशेषानुगता वचनानीत्यर्थः, तयेव; ["हरणघोषणयेव" इत्यत्र "हरणाघोषणयेव" इति पाठान्तरे,—अघोषणा—वाद्यविशेषानुगताङ्गीत्यर्थः]। रशनया—मेखलया। शिञ्जानेति।—शिञ्जानं—रणत्, जघनस्थलं यस्याः तथोक्ता। धौतेति।—धौतं—क्षालितम्, अत एव धवलं नेत्रं—वस्त्रविशेषः, ("नेत्रं मथितगुणे वस्त्रभेदे मूले द्रुमस्य च" इति मेदिनी) तेन निर्म्मितः,—कृतः तेन। निर्मोकः,—सर्पकञ्चुकः, तद्वत् लघुतरः,—अतिशयेन सूक्ष्मः तेन। आप्रपदीनेन—प्रपदं—पादाग्रं, प्रपदात् आ आप्रपदं—पादाग्रपर्य्यन्तं, तत् व्याप्नोतीति तथोक्तेन, पादाग्रपर्य्यन्ताच्छादिनेत्यर्थः।

(१४१) तिरोहितेति।—तिरोहिता—आवृता, तनुरेव—अङ्गमेव, लता—वल्ली यया तथोक्ता। तन्विति।—तनोः,—सूक्ष्मस्य, कञ्चुकस्य—वर्म्मणः, गात्रावरणस्येत्यर्थः, अभ्यन्तरेषु दृश्यमानाः तैः। ["तनुकञ्चुकाभ्यन्तर—" इत्यत्र "छातकञ्चु-

भ्यन्तरदृश्यमानैः आश्यानचन्दनधवलैः अवयवैः (१४२) स्वच्छसलिलाभ्यन्तरविभाव्यमानमृणालकाण्डेव सरसी, (१४३) कुसुम्भरागपाटलं पुलकवन्धचित्रं चण्डातकम् अन्तःस्फुटं स्फटिकभूमिरिव रत्ननिधानमादधाना, हारेण (१४४) आमलकीफलनिस्तुलमुक्ताफलेन स्फुरितस्थूलग्रहगणशारा, शारदीव (१४५) श्वेतविरलजलधरपटलावृता द्यौः, कुचपूर्णकलशयोरुपरि रत्नप्रालम्बमालिकाम् (१४६) अरुणहरितकिरणकिसलयिनीं कस्यापि पुण्यवतो हृदयप्रवेशवनमालिकामिव

कान्तर—" इति पाठे,—छातः,—तत्, सूक्ष्म इत्यर्थः]। आश्यानेति।—आश्यानानि—ईषच्छुष्काणि, चन्दनानि, तैः धवलाः तैः।

(१४२) स्वच्छेति।—स्वच्छानि—निर्मलानि, सलिलानि—जलानि, तेषाम् अभ्यन्तरेषु विभाव्यमानः,—लक्ष्यमाणः, मृणालकाण्डः,—मृणाललता यस्याः यस्यां वा तथाभूता।

(१४३) कुसुम्भेति।—कुसुम्भरागेण—कुसुम्भः,—"कुसुम" इति ख्यातः पुष्पविशेषः, तस्य रागेण—वर्णेन, पाटलं—रक्तम्। पुलकबन्धेन—विविधवर्णरचितबिन्दुन्यासेन, चित्रं—मनोज्ञमित्यर्थः। चण्डातकम्—अर्डोकम्, ऊरीरधःपर्यन्तपाति वसनविशेषम्,("अर्डोकं वरस्त्रीणां स्याच्चण्डातकमंशुकम्" इत्यमरः)। अन्तःस्फुटम्—अभ्यन्तरोज्ज्वलमित्यर्थः। रत्ननिधानं—निहितं रत्नमित्यर्थः। आदधाना—धारयन्ती।

(१४४) आमलकीति।—आमलकीफलानीव निस्तुलानि—वर्तुलानि, मुक्ताफलानि यत्र तादृशेन, तादृशमुक्ताफलमथितेनेत्यर्थः। ["निस्तुलः" इत्यत्र "निस्तुल" इति पाठे—निस्तुलानि—तुलारहितानि, निरुपमाणीत्यर्थः, मुक्ताफलानि यत्र तादृशेनेत्यर्थः]। स्फुरितेति।—स्फुरितैः,—राजितैः, स्थूलैः,—मुख्यतारैरित्यर्थः, ग्रहगणैः,—तारामण्डलैः, शारा—विचित्रा। शारदीव—शरत्कालीनेव।

(१४५) श्वेतेति।—श्वेतैः,—जलापगमात् शुभ्रतां गतैः, विरलैः,—अल्पान्तैः, जलधराणां—मेघानां, पटलैः,—निचयैः, आवृता—व्याप्ता। द्यौः,—अन्तरीक्षम्। कुचेति।—कुचौ—स्तनौ, पूर्णकलशाविव, तयोरुपरि रत्नप्रालम्बमालिकां—रत्नहारमालाम्।

(१४६) अरुणेति।—अरुणेन—रक्तेन, हरितेन—श्यामलेन, किरणेन—मयूखेन, पद्मरागमरकतानामिति भावः,—किसलयाः,—नवपल्लवाः सन्ति अस्यां

बद्धां धारयन्ती, (१४७) प्रकोष्ठनिविष्टस्य एकैकस्य हाटक-कटकस्य मरकतमकरवेदिकासनाथस्य (१४८) हरितीकृत-दिगन्ताभिः मयूखसंहतिभिः स्थलकमलिनीभिरिव लक्ष्मी-शङ्कया अनुगम्यमाना, (१४९) बहुलताम्बूलकृष्णिकान्ध-कारितेन अधरसम्पुटेन (१५०) मुखशशिपीतं ससन्ध्यारागं तिमिरमिव वमन्ती, (१५१) विकचनयनकुवलयकुतूहला-लीनया अलिकुलसंहत्या नीलांशुकजालिकयेव निरुद्धाङ्गवदना,

तादृशीं, सञ्जातकिसलयामिवेत्यर्थः। हृदयप्रवेशेति।—हृदये प्रवेशः, तस्मै वन-मालिका—पत्रपुष्पग्रथिता माला, तामिव ; (पूर्णकुम्भोपरि वनमालाप्रदानं प्रसिद्धम्) कोऽपि पुण्यवान् अस्या हृदयं प्रवेक्ष्यतीति तन्मङ्गलार्थं पूर्णकुम्भस्थापनमिति भावः।

(१४७) प्रकोष्ठेति।—प्रकोष्ठ—कूर्परस्याधोभागस्थं मणिबन्धपर्यन्तं हस्तावयवे, निविष्टः,—धृतः तस्य। हाटककटकस्य—स्वर्णवलयस्य। मरकतेति।—मरकतस्य—हरिन्मणिभेदस्य, मकरवेदिका—मकराकारा पीठिका, ग्रन्थिभेद इत्यर्थः, तथा सनाथः,—युक्तः, तस्य, तदलङ्कृतस्येति भावः।

(१४८) हरितीकृतेति।—हरितीकृताः,—श्यामीकृताः, दिगन्ताः,—दिग्वि-भागाः याभिः तथोक्ताभिः, मयूखसंहतिभिः,—किरणावलीभिः। ["मयूख-सन्ततिभिः" इति पाठेऽपि स एवार्थः]। स्थलकमलिनीभिरिव—स्थलपद्मिनीभिरिव, पत्रपुष्पसंहताभिरिति भावः। लक्ष्मीशङ्कया—लक्ष्मीरियं पद्महस्ता, पद्मविलासि-नीति भावः, इति बोधेन, अनुगम्यमाना—अनुस्रियमाणा।

(१४९) बहुलेति।—बहुलेन—पुनः पुनः चर्वितेनेति भावः, ताम्बूलेन या कृष्णिका—कृष्णवर्णरेखा, तया अन्धकारितः,—सञ्जातान्धकारः तेन। अधरसम्पुटेन —अधररूपसमुद्गकेन।

(१५०) मुखेति।—मुखमेव शशी—चन्द्रः, तेन पीतं—गृहीतम्। ससन्ध्यारागं —सन्ध्यारागः,—सन्ध्याकालिकलौहित्यं, तेन सह वर्त्तमानम्, [अधरस्य स्वतो लौहि-त्यात् ताम्बूलकृष्णिकायोगाच्च तथोल्लिखितम्]। वमन्ती—उद्गिरन्ती।

(१५१) विकचेति।—विकचे—विकसिते, नयने कुवलये—नीलोत्पले इव, तयोः कुतूहलात्—कुतुकात्, आलीना—संसक्ता, तयेव। नीलांशुकजालिकया—नीला—नीलवर्णा, अंशुकजालिका—जालाकारमंशुकमित्यर्थः, तया। निरुद्धम्—आच्छादितम्, अङ्गवदनं—वदनाङ्गं यया तथाभूता ; अध्वगमने चक्षुषि कौटादि-

नीलीरागनिहितनीलिम्ना (१५२) शितिगलगलशितिना वामश्रवणाश्रयिणा दन्तपत्रेण कालमेघपल्लवेनेव विद्युदिव द्योतमाना, वकुलफलानुकारिणीभिः तिसृभिः मुक्ताभिः कल्पितेन बालिकायुगलेन अधोमुखेन (१५३) आलोकजलवर्षिणा सिञ्चन्तीव अतिकोमले भुजलते, दक्षिणकर्णावतंसितया (१५४) केतकीगर्भपलाशलेखया रजनीकरजिह्वयेव लावण्यलोभेन (१५५) लिह्यमानकपोलतला, तमालश्यामलेन मृगमदामोदनिष्यन्दिना तिलकबिन्दुना मुद्रितमिव मनोभवसर्वस्वं वदनम् उद्वहन्ती, (१५६) ललाटलामकस्य सीमन्त-

पतनशङ्कयेति भावः। नीलीति।—नीलीरागेण—नीली—"नील" इति ख्यातः क्षुपविशेषः, तस्य रागेण—वर्णेन, निहितः,—अर्पितः, नीलिमा—नीलत्वं यत्र तादृशेन।

(१५२) शितिगलेति।—शितिगलः,—नीलकण्ठः, हर इत्यर्थः, तस्य गलः,—कृष्णः, तद्वत् शितिः,—नीलमित्यर्थः, तेन। ["शितिगलशितिना" इति पाठान्तरे,—शितिः, गलः, हरस्य इति भावः, तद्वत शितिना]। वामश्रवणाश्रयिणा—वामकर्णधृतेन। दन्तपत्रेण—कुन्दपुष्पाकृतिकर्णभूषणविशेषेण। कालमेघपल्लवेन—नीलमेघविस्तारेण, ("पल्लवोऽस्त्री किसलये विस्तारे विटपे वने" इति मेदिनी)। बालिकायुगलेन—बलयद्वयेन, ("अङ्गुलीयककक्षीवैरबलये पुंसि बालिका" इति मेदिनी)।

(१५३) आलोकेति।—आलोकः,—उद्योतः, प्रभेत्यर्थः, ("आलोकौ दर्शनौ द्योतौ" इत्यमरः) एव जलं, तं वर्षतीति तेन। दक्षिणेति।—दक्षिणे कर्णे अवतंसिता—अलङ्कारत्वेन धृता, तया।

(१५४) केतकीति।—केतक्या गर्भपलाशः,—अभ्यन्तरपत्रं, स एव लेखा—रेखा, तया। रजनीकरजिह्वयेव—रजनीकरस्य—चन्द्रस्य, जिह्वा—रसना, तयेव ["रजनीकरजिह्वालतयेव" इति पाठान्तरे—जिह्वा इव लता, तयेवेत्यर्थः]।

(१५५) लिह्यमानेति।—लिह्यमानं—चुम्ब्यमाणं, कपोलतलं—गण्डभागः यस्याः तथोक्ता। तमालश्यामलेन—तमालवत् श्यामलः,—कृष्णः, तेन। मृगमदेति।—मृगमदस्य—कस्तूरिकायाः, आमोदः,—सौरभं, तं निष्यन्दते—क्षरतीति तथोक्तेन; तिलकस्य मृगमदद्रवक्लृप्तत्वादिति भावः। मुद्रितं—चिह्नितम्। मनोभवसर्वस्वम्—मनोभवसर्वस्वधनम्; मुखस्यैव सर्वोत्कर्षेण कामोद्दीपकत्वादिति भावः।

(१५६) ललाटेति।—ललाटे—भाले, लामकः,—नर्मकः, स्फुरन्नित्यर्थः, तस्य।

चुम्बिनः चटुलतिलकमणेः उदञ्चता चटुलेन अंशुजा रक्तांशुकेनेव कृतशिरोऽवगुण्ठना, (१५७) पृष्ठप्रेङ्खदनादर मनशिथिलजूटिकाबन्धा, नीलचामरावचूलिनीव (१५८) चू मणिमकरिकासनाथा, मकरकेतुकेतुपताका, कुलदेवतेव च मसः, पुनः सञ्जीवनौषधिरिव पुष्पधनुषः, वेलेव (१५९) र सागरस्य, ज्योत्स्नेव यौवनचन्द्रोदयस्य, महानदीव रतिर मृतस्य, कुसुमोद्गतिरिव सुरततरोः, बालविद्येव वैदग्ध्य

सीमन्तचुम्बिनः,—सीमन्तः,—केशमध्यवर्त्ती वर्त्माकारःरेखाविशेषः, तं चुम्बा स्पृशतीति सीमन्तचुम्बी तस्य, सीमन्तस्पर्शिनः इत्यर्थः। चटुलः,—तरलः, तिलकमणिः,—तिलकाकारपद्मरागमणिविशेषः, तस्य तस्माद्वा। ["चटुलाति मणेः" इति पाठान्तरे,—"सुवर्णग्रङ्खलाबद्धो नानारत्नौघमण्डितः। ललाटलम्ब इत्यस्य चटुलातिलको मतः॥" इत्युक्तलक्षणललाटभूषणविशेषादित्यर्थः]। उदञ्चता उद्गच्छता। चटुलेन—इतस्ततः प्रसरता। अंशुजालेन—किरणसमूहेन। र कैनेव—रक्तवसनेनेव। कृतेति।—कृतं शिरसः अवगुण्ठनं यया तथाभूता।

(१५७) पृष्ठेति।—पृष्ठे प्रेङ्खन्—लम्बमानः, अनादरसंयमनेन—ईलाबन्ध शिथिलः,—स्खलितः, जूटिकाबन्धः,—केशपाशः यस्याः तथाविधा। नीलेति नीलं चामरमेव अवचूलं—ध्वजाधोवर्त्तिवसनं, चिह्नं वा, विद्यतेऽस्या इति तथोक्ता

(१५८) चूडामणीति।—चूडायां या मणिमकरिका—मकराकारः इत्यर्थः, तया सनाथा—सहिता, अत एव मकरकेतोः,—कामस्य, केतुपताकै ध्वजपताकेव, स्थितेति शेषः। कुलदेवतेव—वंशाधिष्ठात्री देवीव। पुनः स वनौषधिरिव—पुनः सञ्जीवनं—हरकोपानलदग्धानन्तरं सम्यग् जीवनप्राप्तिः, औषधिरिव—लताविशेष इव।

(१५९) रागेति।—रागः,—भोगस्पृहा, सागर इव तस्य, वेलेव—तीरः रिव; यद्वा,—प्रवाहपरम्परा इव, ("वेला स्यात् तीरनीरयोः" इत्यमरः) स यथा वेलां नातिक्रामति, तद्वत् एतस्यां नयनपथवर्त्तिन्यां युवामनुरागोऽपि र सुत्क्रम्य नान्यासु स्त्रीषुप्रसरति, एतस्यामेव निश्चलश्चिष्यति इति भावः। ज्योत्स्नेव —यथा उदितेऽपि चन्द्रे यावत् ज्योत्स्ना न विकसति, तावत् किमपि न विलस तथा एतां विना यौवनस्य सुषमा नान्यत्र शोभमाना दृश्यते इति भावः। कुसुमो द्गतिरिव—पुष्पोद्गम इव। सुरततरोः,—सुरतं—स्त्रीपुरुषयोरन्योन्यस्यर्शविशेषः,

कौमुदीव कान्तेः, धृतिरिव धैर्य्यस्य, गुरुशालेव गौरवस्य, वीजभूमिरिव विनयस्य, गोष्ठीव गुणानां, मनस्विनेव महाऽनुभावतायाः, तृप्तिरिव तारुण्यस्य, (१६०) कुवलयदलदामदीर्घलोचनया पाटलाधरया (१६१) कुन्दकुड्मलस्फुटदशनया शिरीषमालासुकुमारभुजयुगलया (१६२) कमलकोमलकरया वकुलसुरभिनिश्वसितया चम्पकावदातया कुसुममय्या ताम्बूलकरङ्कवाहिन्या (१६३) महाप्रमाणाश्वतरारूढया

तरुः तस्य। बालावय्येव—अभिनवा विद्येव, बाल्यकालिकी शिक्षेव वा। वैदग्ध्यस्य-विलासविशेषस्य; बाल्यसंस्कारो यथा कमपि कदाऽपि न त्यजति, तथा वैदग्ध्यमप्येतामिति भावः। कौमुदीव—चान्द्रिकेव, प्रभेवेत्यर्थः। धृतिरिव—सन्तोष इव, तुल्य इवेत्यर्थः। गुरुशालेव—गुरुगृहमिव; यद्वा,—गुर्वी शाला गुरुशाला, सेव। वीजभूमिरिव—वीजक्षेत्रमिव। गोष्ठीव—समाज इव, समवाय इवेत्यर्थः। मनस्विनेव-प्रशस्तमनःशालित्वमिव। तृप्तिरिव—सन्तोषसीमेवेत्यर्थः। तारुण्यस्य—यौवनस्य यथा उपभोगेन तृप्तः कश्चित् नान्यत् विषयजातमभिलषति, तद्वत् तारुण्यमपि सार्वतौमासाद्य इति भावः।

(१६०) कुवलयेति।—कुवलयदलदाम—नीलोत्पलदलमाला, तद्वत् दीर्घे-आयते, लोचने—नयने यस्याः तथोक्तया। पाटलाधरया—रक्ताधरया।

(१६१) कुन्देति।—कुन्दानां—माध्यकुसुमविशेषाणां, कुड्मलानीव स्फुटाः,-उज्ज्वलाः, दशनाः,—दन्ताः यस्याः तथाभूतया। शिरीषेति।—शिरीषाणां-तदाख्यपुष्पविशेषाणां, मालावत् सुकुमारं—सुकोमलं, भुजयुगलं—बाहुयुगलं यस्य तथोक्तया।

(१६२) कमलेति।—कमलं—पद्मं, तद्वत् कोमलौ, करौ—पाणी यस्य तथोक्तया। वकुलेति।—वकुलवत्—तदाख्यपुष्पविशेषवत्, सुरभि—सुगन्धि, निश्वसितं यस्याः तथाविधया। चम्पकावदातया—चम्पककुसुमवत् गौरवर्णया। अत एव कुसुममय्येव—पुष्पमय्यव, कुवलयादिभिर्नयनादीनां विधानादिति भावः। ताम्बूलकरङ्कवाहिन्या—ताम्बूलानां करङ्कः,—भाजनविशेषः, तं वहतीति तथोक्तया।

(१६३) महेति।—महत् प्रमाणं—परिमाणं यस्य तादृशः, अत्युन्नत इत्यर्थः श्वेताश्वतरः,—अश्वायां गर्दभेन जातः अश्वाकारपशुविशेषः; यद्वा,—तरुणः अश्वः

अनुगम्यमाना, (१६४) कतिपयपरिचारकपरिकरा मालती ममदृश्यत। दूरादेव च दधीचप्रेम्णा सरस्वत्या लुण्ठितेव मनोरथैः, आकृष्टेव कुतूहलेन, प्रत्युद्गतेवोत्कलिकाभिः, आलिङ्गितेव उत्कण्ठया, अन्तःप्रवेशितेव हृदयेन, स्नपितेव आनन्दाश्रुभिः, विलिम्पेव स्मितेन, वीजितेव उच्छ्वसितैः, आच्छादितेव चक्षुषा, अभ्यर्चितेव वदनपुण्डरीकेण, सखीकृतेव आशया, सविधम् उपययौ। अवतीर्य्य च तुरगात् दूरादेव अवनतेन मूर्ध्ना प्रणामम् अकरोत्, आलिङ्गिता च ताभ्यां सविनयम् उपाविशत्। सप्रश्रयं ताभ्यां सम्भाषिता च पुण्यभाजम् अमन्यत, अकथयच्च दधीचसन्दिष्टं शिरसि विनिहितेन अञ्जलिना नमस्कारम्, अगृह्णाच्च आकारतः प्रभृति अग्राम्यतया तैः तैः अतिपेशलैः आलापैः सावित्रीसरस्वत्योः मनसो।

["वर्म्मीचार्थेभ्यश्च तनूत्रम्" (५। ३। ८१ पा०) इति तनूत्रं तरप्, ("तनूत्रं—द्वितीयवयःप्राप्तिः" इति) तम् आरूढा—आश्रिता तया।

(१६४) कतिपयेति।—कतिपये—नात्यल्पे, नातिबहुला इति यावत्, परिचारकाः,—सख्यः, परिकराः,—परिवाराः, सहचराः इत्यर्थः, यस्याः तथोक्ता, ("परिकरः पर्य्यङ्कपरिवारयोः" इति मेदिनी) सरस्वत्या, कर्त्तृभूतयेति शेषः। लुण्ठितेव—लुण्ठितेव। उत्कलिकाभिः,—औत्सुक्यैः। विलिम्पेव—विशेषेण दत्तलेपनेव। ["विलुम्पेव" इति पाठान्तरं, —विलुम्पीकृतेव इत्यर्थः]। उच्छ्वसितैः,—निश्वासनकृद्भिः। सविधम्—अन्तिकम्। [लौकिकेऽपि यः कश्चित् प्रेमास्पदः प्रवासात् सविधमायाति, तस्य लण्ठनालापश्लेषालिङ्गनादिभिः सर्वं समादरं करोति इति ध्वनिः] सप्रश्रयं—सविनयम्। ताभ्यां—सावित्रीसरस्वतीभ्याम्। पुण्यभाजं—पुण्यवन्तम्, आत्मानमिति शेषः। ["पुण्यभाजमात्मानम् अमन्यत" इति पाठान्तरम्]। दधीचसन्दिष्टं—दधीचकथितं, नमस्कारम् अकथयत इत्यन्वयः। अगृह्णात्—वशीचकारेत्यर्थः। आकारतः प्रभृति—आकारात्—तथाविधात् पूर्वोक्तात्, सौम्यादिति भावः, प्रभृतीति अव्ययम्। अग्राम्यतया—अनितरजनव्यवहारवत्तयेत्यर्थः। अतिपेशलैः,—अतिकोमलैः, सौजन्यपूर्णैरिति भावः। ["अतिपेशलैः" इत्यत्र "अपि पेशलैः" इति पाठान्तरम्]। मनसो अगृह्णादित्यस्य कर्म्मपदम्।

क्रमेण च अतीते मध्यन्दिनसमये स्नानम् अवतीर्णायां सावित्र्यां स्नातुम् (१६५) उत्सारितपरिजना साकूता मालती कुसुमप्रस्तरशायिनीं ममुपसृत्य मरुस्वतीम् आबभाषे,—"देवि! विज्ञाप्यं नः किञ्चिदस्ति रहसि; अतो मुहूर्तम् अवधानदानेन प्रसादं क्रियमाणम् इच्छामि" इति। मरुस्वती तु दधीचसन्देशागङ्किनी, किं वक्ष्यतीति (१६६) स्तनविनिहितवामकरनखकिरणदन्तुरितम् उद्भिद्यमानकुतूहलाङ्कुरनिकरम् इव हृदयम् (१६७) उत्तरीयदुकूलवल्कलैकदेशेन संछादयन्ती, गलता अवतंसपल्लवेन श्रोतुं श्रवणेन इव धावमानेन (१६८) अनवरतश्वाससन्दोहदोलायितां जीविताशामिव समासन्नलताम् अवलम्बमाना, समुत्फुल्लस्य

(१६५) उत्सारितपरिजना—अपसारितसेवकजना। साकूता—साभिप्राया, हृदयनिहितगूढभावेत्यर्थः। कुसुमेति।—कुसुमसेव प्रस्तरः,—शयनं, [प्रस्तीर्यतेऽसौ इति प्रपूर्वात् स्तरतेः कर्मणि अल्] तच्च शेते या, इति तथोक्ताम्। दधीचेति।—दधीचस्य सन्देशः,—वाचिकम्, ("सन्देशवाग्वाचिकं स्यात्" इत्यमरः) आशङ्कते—तर्कयतीति तथाविधा सती।

(१६६) स्तनेति।—स्तने—पयोधरे, विनिहितस्य—अर्पितस्य, वामकरस्य—वामहस्तस्य, नखानां किरणेन—प्रभया, दन्तुरितं—सञ्जातदन्तमिव स्थितमित्यर्थः। उद्भिद्यमानेति।—उद्भिद्यमानाः,—उद्भेदं गच्छन्तः, [कर्मकर्तरि शानचप्रत्ययः] कुतूहलाङ्कुराणां—कौतुकप्ररोहाणां, निकराः,—समूहाः यस्य तथोक्तम्।

(१६७) उत्तरीयेति।—उत्तरीयं यत् दुकूलं—क्षौमाम्बरं, तदेव वल्कलं तस्य एकदेशः,—एकांशः तेन। गलता—स्खलता। अवतंसपल्लवेन—कर्णभूषणीकृतकिसलयेन, [इत्यभूततद्भावे ततीया]। श्रवणेन इव—श्रोत्रेन्द्रियेणेव।

(१६८) अनवरतेति।—अनवरतानां—अविच्छिन्नानां, श्वासानां सन्दोहः,—समूह एव, दोला ताम् श्रयिता—प्रापिता, दोलायिता, ताम्; दोला यथा दोलने स्वस्थानात् निर्गच्छति, तथा पुनः स्वस्थानम् आगच्छति, तद्वत् निश्वासः शरीराभ्यन्तरात् निर्गच्छति, पुनश्च उच्छ्वासरूपेण शरीराभ्यन्तरम् आगच्छतीति दोलाश्रिता निवेति भावः; यद्वा,—अनवरतश्वाससन्दोहेन दोलायितां, समासन्नलताम् इत्यत्र

मुखशशिनो लावण्यप्रवाहेण शृङ्गाररसेनेव प्लावयन्ती जीवलोकं, (१६९) कुसुमपरिमललग्नैः मधुकरकदम्बकैः मदनानलदाहश्यामलैः मनोरथैरिव निर्गत्य मूर्त्तैः. उत्क्षिप्यमाणा, कुसुमशयनीयात् (१७०) स्मरशरसंज्वरिणी मन्दं मन्दम् उदगात् ; "उपांशु कथय" इति (१७१) कपोलतल-प्रतिविम्बितां लज्जयेव कर्णमूलं मालतीं प्रवेशयन्ती मधुरया गिरा सुधीरम् उवाच,—"सखि ! मालति ! किमर्थम् एवम् अभिदधासि ? का अहम् अवधानदानस्य ? शरीरस्य प्राणानां वा सर्व्वस्य अप्रार्थितोऽपि प्रभवत्येव अतिपेशलः चक्षुष्मो जनः। मा न काचित्, या न भवसि मे स्वसा सखी प्रणयिनी प्राण-

विशेषणमेतत् ; समामग्नलतां—सन्निहितां ब्रतंतिम्। अवलम्बमाना—आश्रयन्ती। लावण्यप्रवाहेण—लावण्यस्रोतसा। शृङ्गाररसेनेव—रतिप्रधानो रसः शृङ्गाररसः तेनेव ; तदुक्तं दर्पणे,—"उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते। पराढ्यां वर्ज्जयित्वाऽत्र वेश्यामन्यानुरागिणीम्। आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः। चन्द्रचन्दन-शीतलकृतायुद्दीपनं मतम्। भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः। व्यभिचारिणो ह्यौग्र्य-मरणालस्यजुगुप्सा व्यभिचारिणः। स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥" इति।

(१६९) कुसुमेति।—कुसुमानां परिमलेन—सौरभेण, लग्नानि—संसक्तानि, तैः, ["कुसुमपरिमल" इत्यत्र "शयनकुसुमपरिमल" इति पाठे—शयने—शय्यायां, यानि कुसुमानि ; शयनानि—शय्याभूतानि यानि कुसुमानीति वा, तेषां परिमलेन]। मधुकरकदम्बकैः,—भृङ्गसङ्घैः। मदनानलेति।—मदनानलेन—कामाग्निना, दाहेन श्यामलाः,—कृष्णवर्णाः तैः। मूर्त्तैः,—मूर्त्तिमद्भिः। उत्क्षिप्यमाणा—उत्क्षिप्यमाना।

(१७०) स्मरेति।—स्मरस्य शरैः,—शरप्रहारैरिति भावः, यः संज्वरः,—सन्तापः, तद्वती। उदगात्—उत्तस्थौ। उपांशु—सुगुप्तं यथा तथा।

(१७१) कपोलेति।—कपोलतले—अत्यच्छे गण्डदेशे इत्यर्थः, प्रतिविम्बिता—प्रतिफलिता ताम्। अतिपेशलः,—अतिकोमलः, अतिप्रिय इति यावत्, ["अतिपेशलः" इत्यत्र "अतिवेलम्" इति पाठे—अतिवेलम्—अतिमात्रम्]। चक्षुष्मान्,—नयनरञ्जन इत्यर्थः, ["चक्षुष्मः" इति भङ्ग्या दधीच इति ध्वन्यते]। काचित्—कापि। स्वसा—भगिनी।

समा च। नियुज्यतां यावतः काय्यस्य क्षमं (१७२) चोदीयसो गरीयसो वा शरीरकम् इदम्। अनवस्करम् आश्रवं मे त्वयि हृदयम्। प्रीत्या प्रतिसरा विधेया अस्मि ते। व्याहर वरवर्णिनि! विवक्षितम्" इति।

सा तु अवादीत्,—"देवि! जानामि एव माधुर्य्यं (१७३) विषयाणां, लोलुपताञ्च इन्द्रियग्रामस्य, उन्मादिताञ्च नवयौवनस्य, पारिप्लवताञ्च मनसः। प्रख्याता एव मन्मथस्य दुर्निवारता। अतो न माम् (१७४) उपालम्भेन उपस्थातुम् अर्हसि। न च बालिशता चपलता चारणता वा वाचालतायाः कारणम्। (१७५) न किञ्चित् न कारयति अमाधारणा स्वामिभक्तिः। सा त्वं देवि! यदा एव दृष्टाऽसि

(१७२) चोदीयसः,—अतिशुद्धस्य, गरीयसः,—अतिगुरुणः, काय्यस्य इत्यस्यः। अनवस्करम्—अवस्करः,—मलः, ("उच्चारावस्करौ समलं मलम्" इत्यमरः) तद्रहितं, विशुद्धमित्यर्थः, अकपटमिति यावत्। आश्रवं—वचने स्थितं, ("वचने स्थित आश्रवः" इत्यमरः) त्वदुक्तं मया अकपटं कर्त्तव्यमिति भावः। प्रतिसरा—नियोज्या, अनुकूलवर्त्तिनीत्यर्थः। ("भवेत प्रतिसरो मन्त्रभटे·····। आरक्षे करसूत्रे च नियोज्ये त्वन्यलिङ्गकः॥" इति मेदनी) ते—तव, विधेया—विधीयते—क्रियते, आज्ञा इति भावः, यया सा, तथा, आज्ञापालनकारिणीत्यर्थः, अस्मि इत्यन्वयः। व्याहर—प्रकाशय। वरवर्णिनि—सुन्दरि।

(१७३) विषयाणां—सक्चन्दनवनितादीनाम् उपभोग्यानां, माधुर्य्ये—मनोहारित्वम्। लोलुपतां—लालसताम्। इन्द्रियग्रामस्य—चक्षुरादीन्द्रियसमूहस्य। उन्मादिताम्—उन्मादकारित्वम्। पारिप्लवतां—चापल्यं, ("चञ्चलं तरलञ्चैव पारिप्लवपारप्लवे" इत्यमरः)। प्रख्याता—प्रसिद्धा। दुर्निवारता—अवाध्यता।

(१७४) उपालम्भेन—तिरस्कारेण, अकथनीयकथनजनितेन इति भावः। उपस्थातुं—ग्रहीतुम्। बालिशता—अज्ञता। चपलता—धृष्टता। चारणता—राज्ञां कीर्त्तिघोषणशीलता। वाचालतायाः,—बहुभाषितायाः; एताः कारणं न च, तव समीपे यदहं किञ्चिद् विवक्षुः, तत्र मम बालिशतादयो नैव हेतुरिति निष्कर्षः।

(१७५) किन्तर्हि इत्याह, नेति।—असाधारणा—अनन्यसदृशी, स्वामिभक्तिः,

दैवेन, तत एवारभ्य च अस्य कामो गुरुः, चन्द्रमा जीवितेशः, (१७६) मलयमरुत् उच्छ्वासहेतुः, आधयोऽन्तरङ्गस्थानेषु, सन्तापः परमसुहृत्, प्रजागर आप्तः, मनोरथाः सर्व्वगताः, निश्वासा विग्रहाग्रेसराः, मृत्युः (१७७) पार्श्ववर्त्ती, रणारणकसञ्चारकः, सङ्कल्पाः (१७८) बुद्ध्युपदेशबुद्धाः। किं

—प्रभौ अनुरागः, किञ्चित्—किमपि, न कारयतीति न, अपि तु सर्व्वमेव कारयतीत्यर्थः। प्रभुभक्तिपरतन्त्रा अहं यात्किञ्चित् त्वा कथयामीति भावः। दैवेन—दैवेन। अस्य—कुमारस्य, गुरुः,—आचार्यः, कामः यथा आदिशति, तदेव अमौ करोति, तदग्रवर्त्तित्वादिति भावः। चन्द्रमा जीवितेशः,—प्राणेश्वरः, चन्द्रमसो हर्षोऽस्य प्राणाः, शिशिरतया कामानलनिर्वापणहेतुत्वात्, अमृतमयत्वेन च जीवनरक्षणक्षमत्वात् इति भावः, अथ च जीवितेशः,—मृत्युः; ("जीवितेशो यमे पुंसि विषे स्याज्जीवितेश्वरे" इति मेदनी) चन्द्रोदयसत्काले एव कामिनां तापं प्रशमयन्ति, निरन्तरसुधास्यन्दमानाः पुनः कामानलप्रवर्द्धकतया मृत्युं दिशन्ति इति वाक्यार्थः।

(१७६) मलयमरुत्—मलयपवनः, उच्छ्वासहेतुः,—उच्छ्वसितस्य कारणं, यदा मलयमरुत् वाति, तदा असौ निश्वसितीति भावः; अथ च श्वासोत्क्रान्तौ कारणम्। आधयः,—मानसव्यथाः, अन्तरङ्गस्थानेषु—स्वजनस्थानवर्त्तिन इति यावत्; स्वजना यथा सर्व्वदा परिचरन्ति, तथा आधय एनं सततम् आश्रयन्तीति भावः। सन्तापः, परमसुहृत्—परमामव, सततसङ्गीति भावः; अथच परम् असु-हृत्—प्राणहरः, ("पुंस्यसुभृत्सखसवः प्राणाः" इत्यमरः) प्रजागरः,—निद्राविरतिः, आप्तः,—आत्मीयः, प्राणत्यागे त्यजतीति भावः। मनोरथाः,—अभिलाषाः, सर्व्वगताः,—सर्व्वत्रगामिनः, विप्रतिपत्तिमूढतया कर्त्तव्यानिर्णयाच्चमा इति भावः। निश्वासाः,—दीर्घोच्छ्वासाः, विग्रहाग्रेसराः,—विग्रहस्य—विशिष्टज्ञानस्य, कर्त्तव्यज्ञानस्येति भावः, देहस्य च, अग्रगामिनः,—देहं परित्यज्य गन्तुं प्रवृत्ता इति भावः।

(१७७) पार्श्ववर्त्ती—पार्श्वचरः, त्वदनङ्गीकारेण निश्चितं म्रियते इति भावः। रणरणकसञ्चारकः,—रणरणकः,—उत्कण्ठा एव, सञ्चारयतीति सञ्चारकः,—प्रेरक इत्यर्थः, मृत्युमुखे इति शेषः। ["रणरणकः सञ्चारकः" इति पाठे—रणरणकः,—उत्कण्ठाविशेषः, अरतिकृतं दुःखमित्यर्थः, सञ्चारकः,—प्रेरकः]। सङ्कल्पाः,—मनःकल्पनाविशेषाः।

(१७८) बुद्ध्युपदेशबुद्धाः।—बुद्धिः,—ज्ञानस्य, उपदेशः,—"इदं कुरु, एवं क्रियताम्"

वा विज्ञापयामि, अनुरूपो देवो देव्याः इति आत्मसम्भावना, शीलवान् इति प्रक्रमविरुद्धं, धीर इत्यवस्थाविपरीतं, (१७९) सुभग इति त्वदायत्तं, स्थिरप्रीतिः इति निपुणोपक्षेपः, जानाति (१८०) सेवितुम् इति अस्वामिभावोचितम्, इच्छति दासभावम् आमरणात् कर्त्तुम् इति धूर्त्तालापः, भवनस्वामिनी भवसि इति उपप्रलोभनं, पुण्यभागिनी भजति भर्त्तारं तादृशम् इति (१८१) स्वामिपक्षपातः, त्वं तस्य मृत्युः इत्यप्रियम्, अगुणज्ञा असि इति अधिक्षेपः, स्वप्नेऽस्य बहुशः श्रुतप्रमादोऽसि

इत्यवरूपः तस्मिन्, वृद्धाः,—महान्तः स्थविराश्च। दधीचे एवमेव गुणो विद्यते इति वक्रोक्त्या वैदग्ध्येन मालतीं आह, अनुरूप इत्यादिना। अनुरूपः,—सुयोग्यः, देवः,—कुमारो दधीचः, इति, उक्तः इति शेषः, एवमुत्तरत्र। ["अनुरूपो देवो देव्याः" इत्यत्र "अनुरूपो देव्याः" इति पाठान्तरम्]। आत्मसम्भावना—निजसम्मानना; एतदर्थं स्वस्य आगमने त्वत्तः सम्मानना लभ्यते इति भावः। शीलवान्—सुशीलः, अवगतात इति शेषः। प्रक्रमविरुद्ध—प्रसङ्गविपरीतम्, इदृग्व्यापारप्रवृत्तस्य कुतः शीलवत्त्वमिति भावः। धीरः,—धैर्यवान्, अवगतमिति शेषः। अवस्थाविपरीतम्—अवस्था—मदनकृता दशा, तस्या विपरीतं—विरुद्धम्, न हि धीरा एवं विचलन्तीति भावः।

(१७९) सुभगः,—कामिनारञ्जनः। त्वदायत्त—त्वदधीनं, त्वयि अनुरक्तायां तत्त्वं सम्भवति, नान्यथा इति भावः। स्थिरप्रीतिः,—अचलप्रेमा। निपुणोपक्षेपः,—निपुणस्य—सुचतुरस्य, यथा-कथञ्चित काव्यसिद्धौ दक्षस्येति यावत्, उपक्षेपः,—उपक्रमः, आलाप इत्यर्थः; स्थायित्वकीर्त्तनं विना न अस्य काव्यस्य सिद्धिरिति एवमुक्तिः युज्यते इति भावः।

(१८०) सेवितुं—परिचरितुं, प्रणयेन अनुगन्तुमिति भावः। अस्वामिभावोचितं—स्वामित्वानुपयुक्तमित्यर्थः; न हि स्वामिनः सेवकान् सेवन्ते, प्रत्युत सेवका एव स्वामिनम् इति भावः। धूर्त्तालापः,—प्रतारकवचनम्; धूर्ता हि स्वकार्य्यसाधनार्थमेवं ब्रुवन्तीति भावः। भवनस्वामिनी—गृहकर्त्री। उपप्रलोभनं—लोभप्रदर्शनम्। पुण्यभागिनी—धन्या इत्यर्थः।

(१८१) स्वामिपक्षपातः,—स्वामिनि—यदर्थम् अहम् आगता तस्मिन् प्रभौ इत्यर्थः, पक्षपातः,—प्रणयातिरेक इत्यर्थः। त्वं तस्य मृत्युः,—त्वां विना स मरिष्यतीति भावः। अप्रियं—निष्ठुरं वच इत्यर्थः। अगुणज्ञा—गुणान् जानातीति गुणज्ञा, तथा

इति (१८२) असाक्षिकं, प्राणरक्षार्थम् अर्थयते इति कातरता, तत्र आगम्यताम् इति आज्ञा, वारितोऽपि (१८३) बलादागच्छतीति परिभवः ; तदेवम् अगोचरे गिराम् असि इति श्रुत्वा देवी प्रमाणम्" इति अभिधाय तूष्णीम् अभूत् ।

अथ सरस्वती प्रीतिविस्फारितेन चक्षुषा प्रत्यवादीत्,—"आर्ये ! न शक्नोमि बहु भाषितुम्, एषा अस्मि ते (१८४) स्मितवादिनि ! वचसि स्थिता ; गृह्यन्तामेते प्राणाः" इति । मालती तु, "यत् आज्ञापयसि अतिप्रसादाय" इति व्याहृत्य प्रहर्षपरवशा प्रणम्य प्रजविना तुरंगेण ततार श्रोणम्, अगाच्च दर्भाचमानेतं च्यवनाश्रमपदम् । इतरा तु

न भवतीति अगुणज्ञा, त्वं कुमारस्य गुणान् न वेत्सीति भावः । अधिक्षेपः,—तिरस्कारकरणम् ; बहुशः,—पुनःपुनः, क्षतप्रसादा—क्षतः,—विक्षिप्तः, प्रसादः,—अनुग्रहः यया तथाभूता ; त्वां स्वप्ने दृष्ट्वा अमी महती प्रीतिमलभतेति भावः ।

(१८२) असाक्षिकं—साक्षिवार्जितम् इदं वच इति यावत्, स्वप्नदर्शने साक्षिणाम् अभावादिति भावः । अर्थयते—याचते, त्वत्प्रसादमिति शेषः । कातरता—दैन्यातिशय इत्यर्थः ; दीना एव ईदृशम् आत्मपक्षीति भावः । तत्र—तत्प्रभौ इत्यर्थः, आज्ञा—आदेशः, प्रभुवचनमिति यावत् ; प्रभव एव आज्ञापयन्तीति भावः । वारितः,—निषिद्धः, "मा त्वमागच्छ मत्सकाशम्" इति निवारित इति यावत् ।

(१८३) बलात्—बलमाश्रित्य । परिभवः,—अवमानना इति यावत् ; बलात्कारप्रयोगस्य इच्छाविरुद्धत्वादिति भावः । तत्—तस्मात्, गिरां,—वाचाम्, अगोचरे—अविषये, असि—भवसि ; त्वयि न किमपि वक्तुं शक्नोमीति भावः । प्रमाणं—प्रमीयते—निर्ह्रियते अनेनेति प्रमाणम्, दुःखकर्त्तव्यविधाने हेतुरित्यर्थः ; यदत्र भवत्या अभिमतं, तदादिशेति भावः ।

(१८४) स्मितवादिनि !—स्मितेन—ईषद्धास्येन सह वदतीति स्मितवादिनी तत्सम्बुद्धौ, हे मधुरभाषिणि इत्यर्थः । अतिप्रसादाय—अत्यनुग्रहाय इत्यर्थः । ["अतिप्रसादाय" इत्यत्र "अतिप्रसादः" इति पाठे—अत्यनुग्रहः इत्यर्थः, भवत्या इति शेषः] । प्रजविना—द्रुतगामिना । (प्रजविना इति साभिप्रायवचनम्) । इतरा—सरस्वती ।

सखीस्नेहेन सावित्रीम् अपि विदितवृत्तान्ताम् अकरोत्; उत्कण्ठाभारभृता च तान्यता चेतसा कल्पायितं कथंकथमपि दिवसशेषम् अनैषीत्। अस्तम् उपगतवति भगवति (१८५) गभस्तिमति, स्तिमिततरम् अवतरति च तमसि, प्रहसिताम् इव सितां दिशं पौरन्दरीं दरीम् इव केसरिणि उदञ्चति चन्द्रमसि, सरस्वती (१८६) शुचिनि चीनांशुकसुकुमारे तरङ्गिणि दुकूलकोमले शयने इव शोणसैकते समुपविष्टा, (१८७) स्वप्नकृतप्रार्थनापादपतनलग्नां दधीचचरण-

सखीस्नेहेन—सख्याः—सावित्र्याः यः स्नेहः,—प्रणयः, तेन। विदितवृत्तान्ताम्—विदितः,—ज्ञातः, वृत्तान्तः,—दधीचे सरस्वत्या अनुरागवार्त्ता यस्याः ताम। उत्कण्ठाभारभृता—उत्कण्ठानां भारः,—अतिशयः, तं बिभर्त्तीति तेन। तान्यता—क्लिश्यता। कल्पायितं—"चतुर्युगसहस्रन्तु ब्राह्मं पुण्यं दिनमुच्यते" इत्युक्तं ब्राह्मं दिनं कल्पः, तद्वदाचरितः तम्; अतिदीर्घमिव मन्यमानमिति भावः। कथंकथमपि—अतिकृच्छ्रेण इत्यर्थः।

(१८५) गभस्तिमति—मयूखशालिनि, सूर्य्ये इत्यर्थः। स्तिमिततरं—मन्दं मन्दमित्यर्थः। अवतरति—आविर्भवति। प्रहसितामिव—प्रकर्षेण हसन्तीमिव। सितां—धवलाम्। पौरन्दरीं दिशं—पुरन्दरस्य—इन्द्रस्य इयम्; यद्वा,—पुरन्दरः अधिष्ठाता यस्याः सा पौरन्दरी, तां दिशं, पूर्व्वां दिशमित्यर्थः। दरीमिव—गुहामिव। केसरिणि—सिंहे, ("सिंही मृगेन्द्रः पञ्चास्यो हर्य्यक्षः केसरी हरिः" इत्यमरः)। उदञ्चति—उद्गच्छति, उदयमाने इत्यर्थः, ["उदञ्चति" इत्यत्र "सुञ्चति" इति पाठान्तरम्]।

(१८६) शुचिनि—स्वच्छे। चीनेति।—चीनांशुकं—चीनदेशभवं सूक्ष्मवसनं, तद्वत् सुकुमारः,—अतिकोमलः, तस्मिन्। तरङ्गिणि—प्रतिदिनं क्षीयमाणेन वारिणा कृततरङ्गे इत्यर्थः। ["दुकूलकोमले" इत्यत्र "दुगूलकोमले" इति पाठान्तरम्]। शयने इव—शय्यायामिव, शोणसैकते—शोणनदस्य पुलिने।

(१८७) स्वप्नेति।—स्वप्ने—स्वप्नावस्थायां, कृता या प्रार्थना—"मामनुगृह्णाण" इति याच्ञा, तस्यां यत् पादयोः, दधीचस्येति भावः, पतनं तेन लग्नां—संसक्तां ताम्। ["समुपविष्टा, स्वप्नकृत" इत्यत्र "समुपविष्टस्वप्नकृत" इति समस्तपाठे—तथाविधे शोणसैकते समुपविष्टस्य—आसीनस्य, दधीचस्य समीपे इति भावः, स्वप्नकृता

नखचन्द्रिकाम् इव ललाटिकां दधाना, (१८८) गण्डस्थलादर्शप्रतिबिम्बितेन "चारुहासिनि ! अयम् असौ आहूतो हृदयदयितो जनः" इति श्रवणसमीपवर्त्तिना निवेद्यमानमदनसन्देशा इव इन्दुना, विकीर्य्यमाणनखकिरणचक्रबालेन बालव्यजनीकृतचन्द्रकलाकलापेन इव करेण वीजयन्ती स्वेदिनं कपोलपट्टम्, "अत्र दधीचात् ऋते न केनचित् प्रवेष्टव्यम्" इति तिरश्चीनं चित्तभुवा पातितां विलासवैजयन्तीम् इव बालमृणालिकाम् अधिस्तनं स्तनयन्तीं कथमपि हृदयेन वहन्ती प्रतिपालयामास। (१८९) आसीच्च अस्या मनसि—"अहमपि नाम

इत्यर्थः]। दधीचेति।—दधीचस्य चरणनखस्य या चन्द्रिका—ज्योत्स्नावत्कान्तिरित्यर्थः, तामिव। ललाटिकां—ललाटभूषणं, तिलकमित्यर्थः।

(१८८) गण्डेति।—गण्डस्थलं—कपोलतलमेव, आदर्शः,—दर्पणः, अतिस्वच्छत्वादिति भावः, तत्र प्रतिबिम्बितः,—प्रतिफलितः, तेन। आहूतः,—आनीतः, मयेति शेषः। हृदयदयितः,—मनोरञ्जन इत्यर्थः। श्रवणसमीपवर्त्तिना—श्रुतिमूलागतेनेत्यर्थः। निवेद्यमानेति।—निवेद्यमानः,—विज्ञाप्यमानः, मदनस्य सन्देशः,—वाचिकं यस्य तथोक्ता। इन्दुना—चन्द्रेण। विकीर्य्यमाणेति।—विकीर्य्यमाणम्—इतस्ततः प्रसार्य्यमाणं, नखकिरणानां चक्रबालं—मण्डलं यस्य तथोक्तेन। बालेति।—अत एव बालव्यजनीकृतः,—अभिनवचामरत्वेन धृत इति यावत्; यद्वा,—बालकृतं व्यजनं, चामर इत्यर्थः, तत्कृतः, चन्द्रकलाकलापः,—चन्द्रकलासमूहः येन तथाभूतेन। करेण—हस्तेन। स्वेदिनं—कामजनितसम्भोदयात् उद्भूतघर्माक्तमित्यर्थः, कपोलपट्टं—गण्डतटम्। अत्र—हृदये इत्यर्थः। दधीचात् ऋते—दधीचं विना, केनचित्—केनापि न प्रवेष्टव्यम्। तिरश्चीनं—तिर्य्यक् यथा तथा, चित्तभुवा—मनसिजेन, पातितां विलासवैजयन्तीमिव—विलासार्थां वैजयन्तीमिव। [द्वाररक्षी अन्येषां प्रवेशनिवारणार्थं वैजयन्तीं तिरश्चीनं स्थापयति इति लोकव्यवहारः]। बालमृणालिकाम्—अभिनवमृणाललतां, विरहसन्तापशमनार्थं धृतमिति भावः। अधिस्तनं—स्तने इति अधिस्तनं, स्तनोपरीत्यर्थः, [विभक्त्यर्थेऽव्ययीभावः]। ["स्तनयन्तीम्" इत्यत्र "स्तनयन्ती" इति पाठे,—स्तनयन्ती—कलयन्ती, प्रकटयन्तीत्यर्थः]।

(१८९) आसीदिति।—अस्याः,—सरस्वत्याः, मनसि आसीच्च इति उत्तरेण

सरस्वती, यत्र अमुना मनोजन्मना जघन्या इव परवशीकृता ? तत्र का गणना इतरासु तपस्विनीषु अतितरलासु तरुणीषु ?" इति।

(१९०) आजगाम च मधुमास इव सुरभिगन्धवहः, हंस इव (१९१) कृतमृणालधृतिः, शिखण्डीव घनप्रीत्युन्मुखः, मलयानिल इव (१९२) आङ्कितसरसचन्दनधवलतनुलतोत्कम्पः, क्रियमाण इव कृतकरकचग्रहेण ग्रहपतिना, प्रेर्यमाण इव कन्दर्पोद्दीपनदक्षिणानिलेन, उह्यमान इव

अन्वयः। अहमपि—अतिधीरा देवताऽपीति भावः, नाम—प्राकाश्ये। मनोजन्मना—मनसिजेन, कामेन इति यावत्। जघन्या इव—नीचैव। परवशीकृता—अधीनीकृता। का गणना—को विचार इत्यर्थः। इतरासु—अन्यासु, तपस्विनीषु—वराकासु। अतितरलासु—अतिचपलासु।

(१९०) आजगामेति।—उत्तरस्थितेन दधीच इति पदेन अन्वयः। मधुमास इव—वसन्त इवेत्यर्थः। सुरभीति।—सुरभि—सौरभशालिनं, गन्धं वहतीति तथाभूतः; अन्यत्र,—सुरभिः,—सौरभवान्, गन्धवहः,—वायुश्च तथाभूतः।

(१९१) कृतेति।—कृता—विहिता, मृणालेन—कामसन्तापनिवारणार्थेन अङ्गस्थापितेनेति भावः, धृतिः,—सन्तोषः, धैर्यं वा येन तथोक्तः; अन्यत्र,—कृता मृणालस्य धृतिः,—धारणं, यद्गमित्यर्थः, येन तथोक्तः; यद्वा,—कृता मृणालेन धृतिः,—प्राणधारणं येन, तथोक्तः। शिखण्डीव—मयूर इव। घनेति।—घना—सान्द्रा, प्रीतिः,—कान्तासङ्गजेति भावः, तस्याम् उन्मुख,—तत्प्राप्तिलोलुप इत्यर्थः; अन्यत्र,—घने—मेघे, तद्दर्शने इति यावत्, या प्रीतिः,—सन्तोषः, तस्यै उन्मुखः,—ऊर्ध्वमुखः।

(१९२) आङ्कितः,—अङ्कितः, सरसेन—सान्द्रेण, घृष्टेनेत्यर्थः, चन्दनेन धवलायाः,—श्वेतीकृतायाः, तनुलतायाः,—अङ्गयष्टेः, उत्कम्पः,—कम्पनं, अरदग्राभेद इत्यर्थः, यस्य तथोक्तः; अन्यत्र,—आङ्कितः,—अङ्कितः, सरसानां—स्निग्धानां, चन्दनानां, धवाः,—वृक्षभेदाः, तान् लान्ति—आददतीति तथाविधाः याः तनुलताः,—सूक्ष्मवल्ल्यः, तासाच उत्कम्पः,—कम्पनं येन तथाविधः। क्रियमाण इव इत्युद्दीपकत्वात्। कृतेति।—कृतः करेण—किरणेन, हस्तेन च, कचग्रहः,—केशग्रहणं येन तथोक्तेन। ग्रहपतिना—चन्द्रेण। ["कन्दर्पोद्दीपनदक्षिणानिलेन" इत्यत्र "कन्दर्पोद्दी-

उत्कलिकाबहुलेन रतिरसेन, (१८३) परिमलसम्पातिना मधुपपटलेन पटेनेव नीलेन (१८४) आच्छादिताङ्गयष्टिः, अन्तःस्फुरता मत्तमदनकरिकर्णशङ्खायमानेन प्रतिमेन्दुना प्रथमसमागमविलासविलक्षस्मितेनेव धवलीक्रियमाणैककपोलोदरो मालतीदोहितीयो दधीचः। आगत्य च (१८५) हृदयगतदयितानूपुरस्वसिग्ध्येव हंसगद्गदया गिरा कृतसम्भाषणो यथा मन्मथः ममाज्ञापयति, यथा यौवनम् उपदिशति, यथा अनुरागः शिक्षयति, यथा विदग्धता अध्यापयति, तथा ताम् अभिरामां रामाम् अरमयत्। उपजातविस्रम्भा च आत्मानम्

पनदक्षिण दोक्षणानिलेन" इति पाठान्तरम्]। उह्यमान इव—नीयमान इव। उत्कलिकाबहुलेन—रभसबहुलेन।

(१८३) परिमलेति।—परिमलेन—गन्धसौरभेण, सम्पततीति तथोक्तेन, मधुपपटलेन—भ्रमरनिचयेन, पटेनेव—वसनेन इव।

(१८४) आच्छादितेति।—आच्छादिता—आवृता, अङ्गयष्टिः,—तनुलता यस्य तथोक्तः। अन्तःस्फुरता—अन्तर्विराजमानेन। मत्तेति।—मत्तः,—दृप्तः, मदनः,—काम एव, करी—हस्ती, तस्य कर्णे यः शङ्खः,—शङ्खनिर्मिताभरणविशेषः, स इवाचरतीति तेन, प्रतिमेन्दुना—प्रतिबिम्बितचन्द्रेण। प्रथमेति।—प्रथमः,—आद्यः,समागमः,—सङ्गः, तस्मिन् यो विलासः,—"धीरा दृष्टिर्गतिश्चेष्टा विलासे सस्मितं वचः" इत्युक्तलक्षणः भावविशेषः, तेन विलक्ष—सलज्ज, यत् स्मितं—मृदुहसितं, तेन इव। धवलीति।—धवलीक्रियमाणम् एकस्य कपोलस्य उदरम्—अभ्यन्तरं यस्य तथोक्तः।

(१८५) हृदयेति।—हृदयं गता—प्रविष्टा इत्यर्थः, या दयिता—कान्ता, तस्या नूपुरस्वः,—नूपुरनिस्वनः, तेन स्निग्धा—संवलिता, तयेव, हंसगद्गदया—हंसस्वनमधुरयेत्यर्थः, गिरा—वाचा, कृतसम्भाषणः,—कृतालापः, "देवि! कुशलं ते"? इत्येवमालपन् इत्यर्थः। यथा मन्मथ इति।—मन्मथस्य प्रभुशक्तिसम्पन्नत्वात् आज्ञादानमुचितम्। एवं सर्वत्र उन्नयम्। उपदिशति—"एवमेवं कुरु" इत्युपदेशः। विदग्धता—चतुरता। अध्यापयति—शिक्षयति। अभिरामां—मनोहारिणीं, रामां—कान्ताम्। देवताविषयकसम्भोगशृङ्गारवर्णनस्य अनौचित्यात् विस्मारेण नात्र प्रदर्शितम्। कुमारीलेन गान्धर्वविवाहस्य वर्णनौचित्येऽपि नात्र तद्वर्णनं कृतं, शापाव-

अकथयत् अस्य सरस्वती। तया तु सार्द्धम् एकं दिवसम् इव अनयत् संवत्सरम् अधिकम्।

अथ दैवयोगात् सरस्वती बभार गर्भम्, असूत च (१९६) अनेहसा सर्व्वलक्षणाभिरामं तनयम्। तस्मै च जातमात्रायैव "सम्यक् (१९७) सरहस्याः सर्व्वे वेदाः सर्व्वाणि च शास्त्राणि सकलाश्च कलाः मत्प्रसादात् स्वयम् आविर्भविष्यन्ति" इति वरमदात्। (१९८) सङ्गर्तृश्लाघया दर्शयितुम् इव हृदयेन आदाय दधीचं पितामहादेशात् समं सावित्र्या ब्रह्मलोकम् आरुरोह। गतायाञ्च तस्यां दधीचोऽपि हृदये (१९९) क्रादिन्या इव अभिहतो भार्गववंशमभूतस्य भ्रातुः ब्राह्मणस्य जायाम् अक्षमालाऽभिधानां मुनिकन्यकाम् आत्मसूनोः संवर्द्धनाय नियुज्य विरक्षातुरः तपसे वनम् अगात्। यस्मिन् एव अवसरे सरस्वती असूत तनयं, तस्मिन् एव अक्षमालाऽपि सुतं प्रसूतवती। तौ तु (२००) सा निर्विशेषं सामान्यस्तन्या शनैः शनैः शिशू समवर्द्धयत्। एकः तयोः सारस्वताख्य एव अभवत्,

मानमात्रपरत्वात् आख्यायिकायाः, अन्यथा तया पतिपरित्यागः गर्हणीयोऽपि कथं कृतः इत्यादिरूपकृतर्कोदयप्रसङ्गः स्यात्। उपजातविस्रम्भा—सञ्जातविश्वासा। अस्य—दधीचस्य। आत्मानं—स्वस्वरूपम्; अभिन्नां वाग्देवीमिति भावः।

(१९६) अनेहसा—कालेन। तस्मै—तनयाय। जातमात्राय—उत्पन्नमात्रायेत्यर्थः।

(१९७) सरहस्याः,—रहस्यम्—उपनिषत्, तेन सह वर्त्तमानाः। कलाः,—चतुःषष्टिसङ्ख्याकाः कामविद्याः।

(१९८) सङ्गर्तृश्लाघया—सत्—उत्तमः, यो भर्त्ता, तस्मिन् श्लाघा—गौरवं, तया।

(१९९) क्रादिन्या—वज्रेण इत्यर्थः, ("क्रादिनी वज्रसक्थ्यामित्यमरः)।

(२००) सा—अक्षमाला। निर्विशेषम्—स्वपुत्रात् अभिन्नभावेन इति यावत्। सामान्यस्तन्या—सामान्यम्—उभयोः साधारणमित्यर्थः, स्तन्यं—स्तनदुग्धं यस्याः तथाभूता सतीत्यर्थः। तयोः,—दधीचयोः तनययोः। एकः,—सरस्वतीतनय इत्यर्थः।

द्वितीयोऽपि वत्सनामा अभवत्; आसीच्च तयोः सोदर्ययोः इव स्पृहणीया प्रीतिः।

अथ सारस्वतो मातुः (२०१) महिम्ना यौवनारम्भ एव आविर्भूताशेषविद्यासम्भारः तस्मिन् सवयसि भ्रातरि प्रेयसि प्राणसमे सुहृदि वत्से वाङ्मयं समस्तमेव सञ्चारयामास; चकार च कृतदारपरिग्रहस्य अस्य तस्मिन् एव प्रदेशे प्रीत्या प्रीतिकूटनामानं निवासम्। (२०२) आत्मनाऽपि आषाढ़ी, कृष्णाजिनी, वल्कली, अक्षवलयी, मेखली, जटी च भूत्वा तपस्यतो जनयितुः एव जगाम अन्तिकम्। अथ तस्मात् (२०३) प्रवर्द्धमानादिपुरुषात् (२०४) जनितात्मचरणोन्नति-

---

सारस्वताख्यः,—सरस्वत्या अपत्यं पुमान् सारस्वतः, स एव आख्या यस्य तथाभूतः, माहनाख्या सारस्वत इति ख्यात इत्यर्थः।

(२०१) महिम्ना—वरप्रभावेण इत्यर्थः। तस्मिन्—अक्षमालापुत्रे। सवयसि—समानवयस्के। वाङ्मयं—वागात्मकं शास्त्रमित्यर्थः। सञ्चारयामास—प्रवेशयामास, सर्वा एव ता विद्या वत्से शिक्षयामासेति निष्कर्षः।

(२०२) आत्मना—स्वयम्। आषाढ़ी—आषाढः,—पालाशो दण्डः, तद्वान्, पालाशदण्डधारी इत्यर्थः। कृष्णाजिनी—कृष्णसारचर्म्मावरण इत्यर्थः। वल्कली—वल्कलं—वृक्षत्वक्, तद्वान्, वल्कलपरिधायी इत्यर्थः, ("आषाढ़संज्ञी दण्डः स्यात् पालाशो व्रतचारिणाम्। वृक्षत्वङ्निर्मितं वस्त्रं वल्कलं समुदाहृतम्॥" इत्यमरः)। अक्षवलयी—अक्षमालाधारी। मेखली—मेखला—मुञ्जतृणादिरचितं कटिसूत्रं, तद्वान्, मुञ्जतृणनिर्म्मितमेखलाधरीत्यर्थः। जटी—जटा—वृक्षसंहतकेशः, तद्वान्, जटिल इत्यर्थः, (विशेषणैरेतैः ब्रह्मचर्य्यमस्योक्तम्)। तपस्यतः,—तपस्यां कुर्व्वतः, जनयितुः,—पितुः दधीचस्येत्यर्थः।

(२०३) प्रवर्द्धमानात्—वृद्धिं गच्छतः, आदिपुरुषात्—मूलपुरुषात्, ब्रह्मण इत्यर्थः; यद्वा,—प्रवर्द्धमानात्—अपत्यादिना वृद्धिं गच्छतः, आदिपुरुषात्—पूर्व्वजात् मार्गवादित्यः; अन्यत्र,—नारायणात्।

(२०४) जनितेति।—जनिता—प्रवर्द्धिता, आत्मचरणेन—आत्मज्ञानेन, वा

निर्गतप्रघोषः, (२०५) परमेश्वरशिरोधृतः, (२०६) सकलकलागमगम्भीरः, महामुनिमान्यः, (२०७) विपक्षक्षोभक्षमः, (२०८) क्षितितललब्धायतिः, अस्खलितप्रवृत्तः, भागीरथीप्रवाह इव पावनः प्रावर्त्तत विपुलो वंशः। यस्मात्

उन्नतिः,—अभ्युदयः, तया निर्गतः,—दिगन्तं प्रति धावित इति यावत्, प्रघोषः,—ध्वनिः, कीर्त्तिः इति यावत्, यस्य तथोक्तः; यद्वा,—जनिता—विहिता, आत्मनां—स्वेषां, स्ववंशीयानामित्यर्थः, चरणानां—कठादिशाखाऽध्यायिनाम्, उन्नतिः,—उत्कर्षः, तया निर्गतः, प्रघोषः,—यशः यस्य तथोक्तः; अन्यत्र,—जनितस्य—उत्पादितस्य, आत्मचरणस्य—बलिच्छलनकाले स्वकीयवामपादस्येत्यर्थः, उन्नत्या—ऊर्द्धगत्या, निर्गतः प्रघोषः,—प्रकर्षेण कलकलध्वनिरित्यर्थः, यस्य तथाभूतः; तदानीं तत्पादस्पर्शेन ब्रह्मकटाहभेदादिति भावः, [ब्रह्मकटाहस्थिता गङ्गा भगवच्चरणस्पर्शात् तच्छेन मेरौतले पतिता इत्यस्या विष्णुपादीत्वेति प्रसिद्धिः। "प्रवर्द्धमानादिपुरुषजनितात्मचरणोन्नतिनिर्गतप्रघोषः" इति पाठे,—प्रवर्द्धमानो य आदिपुरुषः, तेन जनिता या आत्मनां चरणानामुन्नतिः, तया निर्गतः प्रघोषो यस्य सः]।

(२०५) परमेश्वरशिरोधृतः,—परमेश्वरः,—सम्राट्, तेन शिरसा धृतः,—सम्मानित इति यावत्; अन्यत्र,—परमेश्वरेण—हरेण, शिरसा धृतः,—गृहीतः, हरशिरश्चारीति यावत्।

(२०६) सकलेति।—सकलाः,—समग्राः, कलाः,—विद्याः, तासाम् आगमेन—अधिगमेन, गम्भीरः,—पूर्ण इत्यर्थः; अन्यत्र,—कलकलेन सह य आगमः,—प्रवाहः, तेन गम्भीरः। महामुनिभिः मान्यः,—आदरणीयः; यद्वा,—महामुनिवत् मान्यः,—माननीयः; अन्यत्र,—महामुनिः,—अगस्त्यः, तेन मान्यः,—सेव्यः, अतिपवित्रबुद्ध्या उदरेण गृहीतत्वात् इति भावः।

(२०७) विपक्षक्षोभक्षमः,—विपक्षाणां—शत्रूणां, विरोधिनामित्यर्थः, क्षोभे—पराजये, क्षमः,—शक्तः; अन्यत्र,—विपक्षाः,—पक्षरहिताः पर्व्वताः, तेषां क्षोभे—तरङ्गाघातेन खण्डने इति यावत्, क्षमः,—समर्थः।

(२०८) क्षितितलेति।—क्षितितलेषु—पृथिवीषु, लब्धा—प्राप्ता, आयतिः,—प्रतिष्ठा; अन्यत्र,—आयतिः,—विस्तारः येन तथोक्तः। अस्खलितप्रवृत्तः,—नास्ति स्खलितं—सदाचारभंगः यस्मिन् तदयथा तथा, प्रवृत्तः,—प्रचलितः; अन्यत्र,—

अजायन्त (२०९) वात्स्यायना नाम गृहमुनयः, आश्रित-श्रौता अपि (२१०) अनालम्बितालोकवककाकवः, (२११) कृतकुक्कुटव्रता अपि अवैड़ालव्रत्तयः, (२१२) विव-र्ज्जितजनव्रत्तयः, (२१३) परिहृतकपटकौरकुचीकूर्चाकृताः,

अस्खलितम्—अनिरुद्धं यथा तथा, प्रवृत्तः,—प्रवाहित इत्यर्थः। भागीरथीप्रवाह इव—गङ्गाप्रवाह इव। विपुलः,—महान्। यस्मात्—वंशादित्यर्थः।

(२०९) वात्स्यायना नाम—वत्सस्यापत्यानि पुमांसः वात्स्यायनाः, वत्सवंश-प्रभूततया प्रसिद्धा इत्यर्थः। गृहमुनयः,—गृहस्थिता मुनयः, मुनिवदाचारवन्तो गृहस्था इत्यर्थः। आश्रितश्रौताः,—आश्रिताः,—अवलम्बिताः, श्रौताः,—श्रुतिविहिताः आचाराः यैः तथोक्ताः; पक्षे,—श्रौताः—श्रुतौ—कर्णे एव स्थितं, चिरवृत्तमित्यर्थः।

(२१०) अनालम्बितेति।—आलम्बितः वकस्य काकः,—"भिन्नकण्ठध्वनिर्घोरः काकरित्यभिधीयते" इत्युक्तगीकभीत्यादिर्जनितविकृतकण्ठस्वरविशेषः यैः, तथाभूता न भवन्तीति तथोक्ताः, अकृत्यचारिण इत्यर्थः, अकपटेन वेदविधिमनुसरन्त इति यावत्। "भिन्नकण्ठध्वनिर्घोरः" इत्यादिनोक्तलक्षणकाकुशब्देन अत्र कुत्सा लक्ष्यते; वक-काकः,—वककृत्सा, तथा च, ये चिरवृत्तमाश्रितवन्तः, ते कुत्सचारित्वात् आलम्बितवक-काकर्षो भवन्ति, अमी तु न तथा इति विरोधः।

(२११) कृतेति।—कृतं कुक्कुटव्रतं—कुक्कुटाण्डप्रमाणग्रासभोजननियमः यैः तथोक्ताः, कुक्कुटाण्डप्रमाणेन चान्द्रायणादिव्रतम आचरन्त इत्यर्थः। अवैड़ालव्रत्तयः,—नास्ति वैड़ालो—विड़ालसम्बन्धिनी, वृत्तिः,—व्यवहारो येषां तथोक्ताः; विड़ालो हि हिंस वृत्तिः, कदाचित् स्वाभीष्टसिद्धये आत्मनः स्वभावं गोपायित्वा चरति, तथा-चारिणो न इति भावः। विरोधस्तु—कृतं कुक्कुटानां व्रतं—भक्षणं यैः तथाभूताः, ये कुक्कुटभक्षणं कृतवन्तः, ते कथं विड़ालव्रत्तयो न भवन्तीति।

(२१२) विवर्जितेति।—विवर्जिता जनानां—दुर्जनानाम्, इतरजनानां वा; यद्वा,—जनेषु—दुराचारपुरुषेषु, वृत्तिः,—व्यवहारो यैः तथाभूताः; ["विवर्जितजन-पङ्क्तयः" इति पाठे,—विवर्जिता जनानां—साधारणानां, पङ्क्तिः,—पाकः, "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात् पक्वद्रव्यम्, अन्नमिति यावत्, यैः तथोक्ताः इत्यर्थः]।

(२१३) परिहृतेति।—परिहृतं—परित्यक्तं, कपटकौरस्य—दुष्टयुकपक्षिणः, कुचीकूर्चाकृतं—"किंचिरमिचिर" इति अव्यक्तशब्दः, यैः तथोक्ताः; यद्वा,—

अगृहीतगर्हराः, (२१४) व्यकृतनिकृतयः, प्रसन्नप्रकृतयः, विगत-विकृतयः, परपरिवादपराचीनचेतसः, (२१५) वर्णत्रय-व्याहृत्तिविशुद्धान्वयः, धीरधिषणावधूताध्येषणाः, असङ्गसुक-स्वभावाः, प्रणतप्रणयिनः, (२१६) शमितसमस्तशाखान्तर-संगीतयः, (२१७) उद्घाटितसमयग्रन्थार्थग्रन्थयः, कवयः,

परिहृतं कपटं—व्याजस्तातः, कौराणां कुचोकूचां,—शुकपक्षिवत् निरर्थक-शब्दालापाश्च, तेषु आकूतम्—अभिप्रायः यैः ते, तादृशाः। कौरा हि यथा पाठितं वदन्तः लोकान् सन्तोषयन्ति, न तु तेषां तथा मनोवृत्तिः, एते तु ब्राह्मणा बाह्याभ्यन्तरसमन्वयवहारिणः न कापटिकाः, न वा शुकवत निरर्थकवाक्यप्रयोजकाः इति भावः। अगृहीतगर्हराः,—न गृहीतं गर्हरं—पापं यैः तथोक्ताः। ["परि-हृतकपट-चौर-कल्पितकचकुर्चाकृताः" इति पाठान्तरे,—परिहृतः,—परित्यक्तः, कपट-चौरकल्पितायां—गठतस्करायाश्चरितायां, कचकुर्चायां—केशकुचने, आकृतः,—अभिप्रायः, यैः तथोक्ताः, विलासवासनाविरहिता इत्यर्थः]।

(२१४) व्यकृतेति।—व्यकृता—तिरस्कृता, निकृतिः,—माया यैः तथोक्ताः, ("कुत्सितं निकृतिः माठ्यम्" इत्यमरः)। प्रसन्नेति।—प्रसन्ना—निर्मला, प्रकृतिः,—स्वभावो येषां तथोक्ताः, सौम्या इत्यर्थः। विगतेति।—विगता विकृतिः,—विकारो येषां ते, अविकृतचित्ता इत्यर्थः। परेति।—परेषां परिवादे—निन्दायां, पराचीनं—पराङ्मुखं, चेतः येषां तथोक्ताः, परनिन्दापराङ्मुखचित्ता इत्यर्थः।

(२१५) वर्णेति।—वर्णत्रयाणां—त्रयीवेद्यत्रयाणामित्यर्थः, व्याहृत्या—विवर्जनेन, प्रतिग्रहादिवैमुख्येनेति यावत्, विशुद्धानि—पवित्राणि, अन्वयाः—अन्नानि, ("भिक्षान्नं स्यात् भक्तमन्वाहम्" इत्यमरः) येषां तथोक्ताः, वर्णान्तरप्रति-ग्रहेण इत्यर्थः। धीरेति।—धीरा या धोषणा—मतिः, ("बुद्धिर्मनीषा धीषणा" इत्यमरः) तया अवधूता—तिरस्कृता, अध्येषणा—याच्ञा यैः तथोक्ताः, परित्यक्त-याच्ञाकृत्य इत्यर्थः। असङ्गसुकस्वभावाः,—असङ्गसुकः,—स्त्रियो सदृश स्वभावो येषां तथोक्ताः। प्रणतप्रणयिनः,—प्रणतेषु जनेषु अनुरागिण इत्यर्थः।

(२१६) शमितेति।—शमिता—शान्तिं नीता, सिद्धान्तेन निरस्तेत्यर्थः, समस्ता—समग्रा, शाखान्तराणां—कठादिवैदिकशाखाविशेषाणां, संगीतिः—संग्रहः यैः तथोक्ताः।

(२१७) उद्घाटितेति।—उद्घाटिताः,—व्याख्याता इत्यर्थः, समयानां—सम-

वाग्मिनः, विमत्सराः, सरसभाषित-व्यसनिनः, (२१८) विदग्ध-परिहासवेदिनः, परिचयपेशलाः, नृत्यगीतवादित्रेषु अबाह्याः, ऐतिह्यस्य अविसृष्णाः, मानृक्रोशाः, सत्यशुचयः, साधु-सम्मताः, (२१९) सर्व्वसत्त्वसौहार्दार्द्रवार्द्रहृदयाः, तथा सर्व्व-गुणोपेता राजसेनानभिभूताः, (२२०) क्षमाभाज आश्रित-नन्दनाः, अनिस्त्रिंशा विद्याधराः, अजड़ाः कलावन्तः,

स्त्राणां, शास्त्राणां—शास्त्राणाम्, अथयत्यये,—कूटार्थो इत्यर्थः, यैः तथाभूताः, शास्त्र-संशयच्छेत्तार इत्यर्थः। कवयः,—कवयितारः, काव्यप्रणेतार इत्यर्थः। वाग्मिनः,—सुवक्तारः। विमत्सराः,—वि—विगतः, मत्सरः,—अन्यगुणेषु यैषां ते तथोक्ताः। सरसेति।—सरसं—रसयुक्तं, भाषितं—वचनं, तत्र व्यसिनः,—तद्भाषणपरा इत्यर्थः।

(२१८) विदग्धेति।—विदग्धः,—चतुरः, परिहासः,—कौतुकविशेषः, तद्वेदिनः,—तदभिज्ञा इत्यर्थः। परिचयपेशलाः,—परिचयेषु—संस्तवेषु, सङ्गतैरिति शेषः, पेशलाः,—निपुणाः। नृत्यगीतवादित्रेषु अबाह्याः,—लास्यादिषु बाह्यभावरहिताः, नृत्यगीतवादित्रज्ञानवन्त इत्यर्थः। ऐतिह्यस्य—इतिहासस्य, अविसृष्णाः,—आसक्ता इत्यर्थः, इतिवृत्तज्ञानलालसा इति यावत्। मानृक्रोशाः,—मदयाः। सत्यशुचयः,—सत्येन शुचयः,—पवित्राः। साधुसम्मताः,—सज्जनमान्याः।

(२१९) सर्वेति।—सर्वेषु—सत्त्वेषु—प्राणिषु, सौहार्दार्द्रवेण—मैत्रीभावेनेत्यर्थः, आर्द्रं—स्निग्धं, हृदयं येषां तथोक्ताः। सर्व्वगुणोपेताः,—सर्वैः गुणैः,—शील-दाक्षिण्यादिभिः, उपेताः,—समन्विताः। राजसेति।—राज्ञः,—नृपस्य, सेनया—सैन्येन, अनभिभूताः,—अनाक्रान्ताः; अत्र ये सर्वैः गुणैः,—सत्त्वरजस्तमोभिर्गुणत्रयैः, उपेताः, ते कथं राजसेन—रजःसम्बन्धिगुणेन, दम्भाहङ्कारादिना इत्यर्थः, अनभि-भूताः,—अपराजिताः, रजोगुणायत्तजेता भवन्ति? इति विरोधः। एवमुत्तरत्र विरोधः उन्नेयः।

(२२०) क्षमाभाजः,—शक्तौ सहिष्णुता क्षमा, तद्भाजः,—तद्वन्त इत्यर्थः; आश्रितनन्दनाः,—आश्रितान्—अनुगतान् जनान्, नन्दयन्तीति तथाभूताः; अथ च, ये क्षमां—पृथिवीं, मध्यलोकमित्यर्थः,—भजन्ते, ते कथम् आश्रितं नन्दनं—तदाख्यं सुरोद्यानं यैः तथाभूता भवन्तीति विरोधः। अनिस्त्रिंशाः,—अनिर्दयाः, अक्रूराः इति यावत्, ("खड्गस्यर्ष्टेश्च निस्त्रिंशः खड्गे ना निर्दये त्रिषु" इति मेदिनी) विद्याधराः,—विद्वांसः। अथ च, ये अनिस्त्रिंशाः,—खड्गवर्जिताः, ते कथं विद्या-

(२२१) अदोषाः तारकाः, (२२२) अपरोपतापिनः भास्वन्तः, अनुष्माणः हुतभुजः, (२२३) अकुण्ठतयो भोगिनः, (२२४) अस्तम्भाः पुण्यालयाः, (२२५) अलुप्तक्रतुक्रिया

धराः,—देवयोनिविशेषाः ? इति विरोधः ; ये तु विद्याधराः देवयोनिविशेषाः, ते सखड्गा एव वर्त्तन्ते, न त्वनिखड्गाः इति प्रसिद्धिः ; मालाखड्गगुलिकाञ्जनादिभेदेन भिन्नानामपि तेषां खड्गहस्तत्वमत्यभिचारितमेवेति बोध्यम्। अजडाः,—अमूर्खाः। कलावन्तः,—नृत्यगीतादिषु विद्यासु निपुणा इत्यर्थः ; अन्यत्र,—अजडाः,—अशीताः, कलावन्तः,—चन्द्राः, यः अजडः,—अशीतः उष्ण इत्यर्थः, भवति, स कथं तुषारकिरणश्चन्द्रः स्यात् ? इति विरोधः।

(२२१) अदोषाः,—दोषरहिताः, तारकाः,—तारयन्ति—उद्धरन्ति लोकानिति तथोक्ताः, धर्म्मोपदेष्टारः इत्यर्थः ; अन्यत्र,—अदोषाः,—दोषा—रात्रिस्तद्रहिताः, तारकाः,—नक्षत्राणि, अत्र अपरौ तारकोद्गमः इति विरोधः।

(२२२) अपरोपतापिनः,—परान् न उपतापयन्ति—पीडयन्तीति तथोक्ताः, परपीडनरहिता इत्यर्थः। भास्वन्तः,—प्रभाशालिनः, लोकसमाजेषु दीप्यमाना इत्यर्थः ; अन्यत्र,—न परान् उपतापयन्ति—मलिनान् कुर्व्वन्ति इति तथोक्ताः, अपरोपतापिनः, भास्वन्तः,—सूर्य्याः ; ये सूर्य्याः, ते कथं अपरमलापका भवन्ति ? इति विरोधः। अनुष्माणः,—उष्मवर्জ্জिताः, अगर्वा इत्यर्थः, हुतभुजः,—हुतं—यज्ञेषु देवेभ्यो निवेदितमित्यर्थः, भुञ्जते इति तथोक्ताः, यज्ञशिष्टाशिन इत्यर्थः ; अन्यत्र,—अनुष्माणः,—शीताः, हुतभुजः,—अग्नयः, ये हुतभुजः, ते कथम् अनुष्माणः,—सन्तापवर्জ্জिता भवन्ति ? इति विरोधः।

(२२३) अकुण्ठतयः,—अकु—अकुत्सिता, स्थितिः,—गतिः, आचार इति यावत्, येषां तथोक्ताः, भोगिनः,—संसारसुखभोगवन्तः ; अन्यत्र,—नास्ति कौ—पृथिव्यां, पृथ्वीविवरे इत्यर्थः, स्थितिः,—गतिः स्थितिः वा येषां तथोक्ताः, भोगिनः,—सर्पाः ; ये सर्पाः, तेषां पृथिव्यां पृथिवीविवरे वा अनवस्थानमसम्भवमिति विरोधः।

(२२४) अस्तम्भाः,—स्तम्भः,—कामलालितसात्त्विकभावविशेषः, तद्रहिताः, पुण्यालयाः,—पुण्यवन्तः ; अन्यत्र,—अस्तम्भाः,—स्तम्भः,—स्थूणाः, गृहधारणकाष्ठमित्यर्थः, तद्रहिताः, स्तम्भशून्याः, पुण्यालयाः,—पक्षिचतुष्पदादि, मठादिस्थानानीत्यर्थः ; स्तम्भं विना गृहस्थितेरसम्भवाद्व विरोधः।

(२२५) अलुप्तेति।—न लुप्ता क्रतुक्रिया—यज्ञानुष्ठानं येषां तथाभूताः,

दक्षाः, अव्यालाः कामजितः, (२२६) असाधारणा द्विजातयः।

तेषु च एवम् उत्पद्यमानेषु, (२२७) संसरति संसारे, यासु युगेषु, अवतीर्णे कलौ, वहत्सु वत्सरेषु, व्रजत्सु वासरेषु, अतिक्रामति च काले, प्रसवपरम्पराभिः अनवरतम् आपतति विकासिनि वात्स्यायनकुले, क्रमेण कुबेरनामा (२२८) वैनतेय इव गुरुपक्षपाती द्विजो जन्म लेभे। तस्य अभवन् अच्युत ईशानो हरः पाशुपतश्च इति चत्वारो युगारम्भा इव

दक्षाः,—निपुणाः; अन्यत्र,—दक्षः,—प्रजापतिभेदः, इति विरोधः, तस्य यज्ञक्रियाया हरकोपेन नाशादत्रतक्रतुक्रियत्वमसम्भवमिति भावः। अव्यालाः,—अहिंसाः, कामजितः,—कामजयिनः, निरभिलाषाः वा; अन्यत्र,—नास्ति व्यालः,—सर्पः येषु तथाभूताः, कामजित्—रुद्रः, इति विरोधः; तस्य अङ्गे व्यालयोगप्रसिद्धेरिति भावः।

(२२६) असाधारणाः,—असामान्याः, द्विजातयः,—द्वे जाती येषां तथोक्ताः, मातृजठरे एकं जन्म, आचार्यसमीपे उपनयनात् वेदाधिगमः द्वितीयं जन्मेति द्विजातित्वमिति भावः; "मातुर्योऽधिजननं द्वितीयं मौञ्जीबन्धने" इति स्मृतेः; अन्यत्र,—द्विजातिः,—द्वाभ्यां जननम् इत्यर्थः, येषां तथोक्ताः, अथ च असाधारणाः, असामान्याः, अनितरा इत्यर्थः, इति कथं युज्यते? इति विरोधः।

(२२७) संसरति—चलति। यासु—गच्छत्सु। वहत्सु—अतिक्रामत्सु। व्रजत्सु—गच्छत्सु। वासरेषु—दिवसेषु। काले इति।—प्रागभिहिते इति भावः, नो चेदेतत् पुनरुक्तं स्यात्। प्रसवपरम्पराभिः,—अपत्यजन्मप्रवाहैः। आपतति—परिवर्द्धमाने। विकासिनि—विराजमाने।

(२२८) वैनतेय इव—विनतायाः अपत्यं पुमान् वैनतेयः,—गरुडः, स इव, गुरुपक्षपाती—गुरौ—आचार्ये पितरि वा, पक्षपातः,—भक्तिः विद्यते अस्येति तथोक्तः; अन्यत्र,—गुरुभ्यां—महद्भ्यां, पक्षाभ्यां—गरुद्भ्यां, पतति—उड्डयतीति तथोक्तः। द्विजः,—विप्रः, पक्षी च, ("दन्तविप्रागुदात्ता द्विजाः इत्यमरः)। तस्य—कुबेरस्य। युगारम्भा इव—युगानां—सत्यादीनां चतुर्णाम्, आरम्भाः,—प्रथमप्रवृत्तयः, ते इव।

(२२९) ब्राह्मतेजोजन्यमान प्रजाविस्तारा नारायणबाहुदण्डा इव (१३०) सच्चक्रनन्दकाः तनयाः। तत्र पाशुपतस्य एक एव अभवत् भूभार इव (१३१) अचलकुलस्थितिः चतुरुदधिगम्भीरोऽर्थपतिः इति नाम्ना (२३२) समग्रायजन्मचक्रचूडामणिः महात्मा सूनुः। सोऽजनयत् भृगुं हंसं शुचिं कविं महीदत्तं धर्मं जातवेदसं चित्रभानुं त्रासम् अहिदत्तं विश्वरूपञ्च इति एकादश रुद्रानिव (२३३) सोमामृतरसशीकर-

(२२९) ब्राह्मेति।—ब्राह्मं—वैदिकं, वेदविहितानुष्ठानमित्यर्थः, तेजः तेन जन्यमानः,—उत्पाद्यमानः, प्रजानां—सन्ततीनां, विस्तारः येषां तथाभूताः; अन्यत्र,—ब्रह्मणः,—विधातुरिदम् इति ब्राह्मं, यत् तेजः तेन, मनःप्रभावेण इत्यर्थः, जन्यमानः प्रजाविस्तारा येषु तथोक्ताः, युगारम्भे प्रथमं ब्रह्मणः सनकसनन्दसनातनादीनां चतुर्णां पुत्राणां मानससृष्टिः, ततः जन्मक्लेशस्य हेतोः सङ्कल्पात् मैथुनाच्च सृष्टिः प्रावर्त्ततेति शास्त्रात्।

(२३०) सच्चक्रनन्दकाः,—सतां—साधूनां, चक्रं—समाजं, नन्दयन्तीति तथोक्ताः; अन्यत्र,—सत्—तिष्ठत्, चक्रं—सुदर्शनाख्यं, नन्दकः,—तदाख्यः खड्गश्च येषु तथोक्ताः। नारायणबाहुदण्डा अपि चत्वारः। तनयाः,—पुत्राः। भूभार इव—पृथिवीभार इव।

(२३१) अचलकुलस्थितिः,—अचला—स्थिरा, कुलस्य—वंशस्य, स्थितिः यस्य तथोक्तः; अन्यत्र,—अचलानां—पर्वतानां, कुलैः,—वृन्दैः, समभिः कुलपर्वतैरित्यर्थः, उक्तञ्च,—"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥" इति, स्थितिर्यस्य तथोक्तः, श्रेष्ठा हि शिरःस्थाधाः भूमेः नमनोन्नमननिवारणार्थं पतिताः भूधराणामवस्थापनादित्याशयः। चतुरुदधिगम्भीरः,—चत्वारः उदधयः,—समुद्राः, तद्वत् गम्भीरः,—महाप्रभावशालित्वादविकार्यस्वभाव इत्यर्थः; अन्यत्र,—चतुर्भिः उदधिभिः,—सागरैः, गम्भीरः,—वेष्टितः इत्यर्थः।

(२३२) समग्रेति।—समग्राणाम् अयजन्मनां—ब्राह्मणानां, चक्रस्य—निचयस्य, चूडामणिः,—शिरोरत्नभूतः। सूनुः,—पुत्रः, अभवत् इत्यनुषङ्गः। सः,—अर्थपतिः।

(२३३) सोमेति।—सोमः,—तदाख्यलताभेदः, तस्य अमृतमिव रसः,—

क्षुरितमुखान् पवित्रान् पुत्रान्। अलभत च चित्रभानुः तेषां मध्ये (२३४) राजदेव्यभिधानायां ब्राह्मण्यां बाणम् आत्मजम्। स बाल एव विधेः बलवतो वशात् उपसम्पन्नया व्ययुज्यत जनन्या। जातस्नेहस्तु नितरां पितैव अस्य माहृताम् अकरोत्। अवर्द्धत (२३५) चेतनाऽधिकतरमेधीयमानधृतिः धात्रि निजे।

कृतोपनयनादिक्रियाकलापस्य (२३६) समाहृत्तस्य चतुर्दशवर्षदेशीयस्य पिता अपि श्रुतिस्मृतिविहितं कृत्वा द्विजजनोचितं निखिलं पुण्यजातं कालेन (२३७) अदशमीस्थ एव

यज्ञग्निष्ट इति भावः, तस्य शीकरैः,—बिन्दुभिः, क्षुरितं—पूर्णमित्यर्थः, मुखं येषां तान्, सोमयाजितया यज्ञीयसोमलतारसपायिन इत्यर्थः; अन्यत्र,—सोमस्य—शिरःस्थितचन्द्रस्य, अमृतरसानां—निःसृतसमूहद्रवाणाम् इत्यर्थः, शीकरैः क्षुरितमुखान्—आहृतवदनान् इत्यर्थः, स्वेषां भगवच्छङ्करांशभूतत्वात् शशाङ्कभृङ्गं वेदितव्यम्। पवित्रान्—विशुद्धवृत्तीन्, पुत्रान् अजनयत इत्यनुषङ्गः।

(२३४) राजदेव्यभिधानायां—राजदेवीसमाख्यायाम्, आत्मजम्, अलभत इत्यनुषङ्गः। सः,—बाणः। विधेः बलवतः,—प्रबलस्य दैवस्य, महाद्भाग्यस्य इति यावत्, वशात्—प्रभावात्। उपसम्पन्नया—मृतया। माहृतां—मातृत्वं, तत्कृत्यसाधनात् मातृवद्व्यवहारमित्यर्थः।

(२३५) चेतनेति।—चेतना—प्रज्ञा, तया अधिकतरा या मेधा—स्मृतिशक्तिरित्यर्थः, सैवाचरन्ती धृतिः,—धारणाशक्तिः यस्य तथाभूतः। ["अवर्द्धत……निजे" इत्यत्र "अवर्द्धत च तेनाधिकतरमेधीयमानधृतिर्धात्रि निजे" इति पाठे,—तेन—पित्रा इत्यर्थः, अधिकतरं यथा तथा, एधीयमाना—एधः,—इध्यते आग्नेनेति एधः,—अग्निसन्दीपनं काष्ठं, तद्वदाचर्यमाना, उद्दीप्यमाना इत्यर्थः, धृतिः यस्य सः, सहजधृतिमानपि पित्रा उपदेशदानादिना अधिकतरं स्फुरद्धृतिरकारीत्यर्थः। निजे धात्रि—स्वकीये गृहे, स्वीये तेजसि एव अवस्थितः इति शेषः]।

(२३६) समाहृत्तस्य—स्नातकस्य, वेदाध्ययनात् परं समावर्त्तनाख्यसंस्कारसंस्कृतस्य इत्यर्थः। चतुर्दशवर्षदेशीयस्य—ईषदसमाप्तचतुर्दशवर्षस्य। श्रुतिस्मृतिविहितं—"श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रन्तु वै स्मृतिः" इत्युक्तश्रुतिस्मृतिभ्यां, विहितं—कर्त्तव्यतया उक्तम्। पुण्यजातं—पौतं आर्त्तञ्च संस्क्रियाकलापमित्यर्थः।

(२३७) अदशमीस्थः,—"शतायुर्वै पुरुषः" इत्युक्तेः नराणां शतवर्षायुर्नियमात्

अस्तम् अगात्। संस्थिते च पितरि, महता शोकेन आभोगम् अनुप्राप्तो दिवानिशं दह्यमानहृदयः कथंकथमपि कतिपयान् दिवसान् आत्मगृहे एव अनैषीत्। गते च विरलतां शोके शनैः शनैः अविनयनिदानतया स्वातन्त्र्यस्य, कुतूहलबहुलतया च बालभावस्य, (२३८) धैर्य्यप्रतिपक्षतया च यौवनारम्भस्य, शैशवोचितानि अनेकानि चापलानि आचरन् इत्वरो बभूव। अभवंश्च अस्य वयसा समानाः सुहृदः सहायाश्च। तथा च,—भ्रातरौ पारशवौ चन्द्रसेनमातृषेणौ, (२३९) भाषाकविः ईशानः परं मित्रं, प्रणयिनौ रुद्रनारायणौ, विद्वांसौ वारबाण-वासबाणौ, वर्णकविः वेणीभारतः, प्राकृतकृत् कुलपुत्रो वायुविकारः, वन्दिनौ अनङ्गबाणसूचीबाणौ, (२४०) कात्यायनिका चक्रवाकिका, जाङ्गलिको मयूरकः,

तस्यायुषो दशधा विभागे नवत्यधिकाशतद्वयावस्था दशमी नाम, चरमावस्था, इति यावत्, तत्र तिष्ठति इति दशमीस्थः, ("दशमीस्थौ क्षीणरागहतौ" इत्यमरः) स न भवतीति अदशमीस्थः, पुरुषायुषस्यालाभेन अपूर्णवया एवेत्यर्थः। अस्तं—निधनम्। संस्थिते—मृते। आभोगं—कष्टम्। ("स्यात् कष्टं क्लेशमाभोगम्" इत्यमरः) विरलताम्—अल्पताम्। अविनयनिदानतया—अविनयः, दुराचारः, मदौद्धत्यमित्यर्थः, तस्य निदानं—मूलकारणं, तस्य भावः तत्ता तया। स्वातन्त्र्यस्य—स्वाधीनतायाः।

(२३८) धैर्य्यप्रतिपक्षतया—धैर्य्यविरोधितया इत्यर्थः। इत्वरः,—यायावरः, अधीरतया नैकत्र स्थितिशील इति यावत्। "अभवंश्च" इत्यादिना आत्मवत्ताद्दशसर्व्वविधकलाविशारदसहायकत्वात् उत्कर्षं प्रकटयति। पारशवौ—ब्राह्मणात् शूद्रकन्यायामूढायां जातौ पारशवौ; तदाह मनुः,—"ब्राह्मणाद् वैश्यकन्यायामम्बष्ठो नाम जायते। निषादः शूद्रकन्यायां यः पारशव उच्यते॥"

(२३९) भाषाकविः,—भाषायां—संस्कृतादिवाक्यं इत्यर्थः, कविः,—काव्यरचयिता; यद्वा,—भाषाः,—गेयवस्तुवाचः, तासु कविः, गाथादिषु गीतिप्रणेता इत्यर्थः, वारबाण-वासबाणौ—तदाख्यौ, विद्वांसौ—पण्डितौ। प्राकृतकृत्—प्राकृतभाषाप्रणेता। वायुविकारः,—तदाख्यः। वन्दिनौ—स्तुतिपाठकौ।

(२४०) कात्यायनिका—"पञ्चाग्निदर्शदेशीया वीरां संस्कृतकर्तृकाम्। वदन्ति

ताम्बूलदायकः चण्डकः, भिषक्पुत्रो मन्दारकः, पुस्तकवाचकः सुदृष्टिः, कलादश्चामीकरः, (२४१) हैरिकः सिम्भुषेणः, लेखको गोविन्दकः, चित्रकृत् वीरवर्म्मा, पुस्तकृत् कुमारदत्तः, मार्दङ्गिको जीमूतः, गायनौ सोमिलयज्ञादित्यौ, (२४२) सैरन्ध्री कुरङ्गिका, वांशिकौ मधुकरपारावतौ, गान्धर्वोपाध्यायो दर्दुरकः, (२४३) सांवाहिका कैरालिका, लासकयुवा ताण्डविकः, आत्मिक आखण्डलः, कितवौ भीमकः, शैलालि-

कात्यायनिकां घृतकाषायवाममम् ॥" इत्युक्तलक्षणा अङ्गसेवती विधवा नारी, चक्रवाकिका—तन्नाम्नी। जाङ्गलिकः,—विषवैद्यः। ["जाङ्गलिकः" इत्यत्र "जाङ्गुलिकः" इति पाठेऽपि स एवार्थः। "विषवैद्यो जाङ्गुलिकः" इत्यमरः]। मयूरकः,—तदाख्यः। ताम्बूलदायकः,—पर्णविक्रेता, ताम्बूलिक इत्यर्थः। चण्डकः,—तदाख्यः। भिषक्पुत्रः,—वैद्यसुतः, मन्दारकः,—तन्नामा। पुस्तकवाचकः,—पुस्तकलिखितवाक्यानां सुदृष्टिः,—तन्नामा। कलादः,—स्वर्णकारः, चामीकरः,—तदाख्यः।

(२४१) हैरिकः,—हीरकपण्यापजीवी, सिम्भुषेणः,—तदाख्यः। ("स्वर्णकारः कलादः स्यात् तदभ्यस्तु हैरिकः" इति कोषः)। लेखकः,—पुस्तकस्य इति शेषः, गोविन्दकः तन्नामा। चित्रकृत्—चालिख्यकर्त्ता, वीरवर्म्मा—तदाख्यः। पुस्तकृत्—ग्रन्थकर्त्ता; यद्वा,—पुस्तं—लेप्यादिशिल्पकर्म्म करोतीति तथोक्तः, ("पुस्तं कौवे पुस्तकं च लेप्यादिशिल्पकर्म्मणि" इति मेदनी); यद्वा,—पुस्तं—"कृदा वा दारुणा वापि वस्त्रेणाप्यथ चर्म्मणा। लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते ॥" इत्युक्तलक्षणं लिप्यादिशिल्पकर्म्म करोतीति तथोक्तः। मार्दङ्गिकः,—मृदङ्गवादकः, जीमूतः,—तदाख्यः। गायनौ—गायकौ, सोमिलयज्ञादित्यौ,—तन्नामानौ।

(२४२) सैरन्ध्री—"प्रसाधनोपचारज्ञा सैरन्ध्री स्ववशा स्मृता" इत्युक्तलक्षणा नारी कुरङ्गिका नाम। वांशिकौ—वंशीवादकौ, मधुकरपारावतौ—तन्नामानौ। गान्धर्वोपाध्यायः,—गान्धर्वे—सङ्गीतशास्त्रं, तस्य उपाध्यायः,—आचार्यः, दर्दुरकः,—तदाख्यः।

(२४३) सांवाहिका—सेविका, या पादादिमर्दनं करोति, सा; कैरालिका—तन्नाम काऽपि स्त्री। ["सांवाहिका" इत्यत्र "सवाहिका" इति पाठान्तरम्]। लासकः,—नर्त्तकः, स च असौ युवा—तरुणश्चेति, लासकयुवा, ताण्डविकः,—तदाख्यः। ध्रुव इत्यादिना तुल्यवयस्त्वमुच्यते। आत्मिकः,—अत्मे;,—पाशकैर्दीव्यतीति

युवा (२४४) शिखण्डकः, नर्त्तको हरिणिका, पाराशरी सुमतिः, क्षपणको वीरदेवः, कथको जयसेनः, शैवो वक्रघोणः, (२४५) मन्त्रसाधकः करालः, असुरविवरव्यसनी लोहितात्तः, (२४६) धातुवादविद् विहङ्गमः, दार्दुरिको दामोदरः, ऐन्द्रजालिकः चकोरात्तः, मस्करी ताम्रचूडः। स एतैः च अन्यैः च अनुगम्यमानो बालतया निघ्नताम् उपगतो (२४७) देशान्तरालोकनकौतुकाक्षिप्तहृदयः, सत्स्वपि पितृपितामहोपात्तेषु ब्राह्मणजनोचितेषु विभवेषु, मति च अविच्छिन्ने विद्याप्रसङ्गे

आक्षिकः,—द्यूतकरः, आखण्डलः,—तदाख्यः। कितवः,—धूर्त्तः, भौमकः,—तन्नामा। शैलालिनी—स्वयं नर्त्तकः, स च असौ युवा चेति तथोक्तः, तरुणशैलूष इत्यर्थः।

(२४४) शिखण्डकः,—तदाख्यः। हरिणिका नाम नर्त्तकी, सुमतिर्नाम पाराशरी भिक्षुः, ("भिक्षुः परिव्राट् कर्म्मन्दी पाराशर्यपि मस्करी" इत्यमरः)। वीरदेवो नाम क्षपणकः। कथकः,—पुराणव्याख्याता, जयसेनः,—तदाख्यः। शैवः, —शिवभक्तः, वक्रघोणः,—तदाख्यः।

(२४५) मन्त्रसाधकः,—साधितमन्त्र इत्यर्थः, करालः,—तन्नामा। असुरविवरव्यसनी—असुराणां विवरं—पातालमित्यर्थः; यद्वा,—असुराणां विवरं—रन्ध्रं, दीर्घ इति यावत्, तस्मिन् व्यसनी—तज्ज्ञानानुशीलकः इत्यर्थः, लोहितात्तः,—तदाख्यः।

(२४६) धातुवादविद्—धातवः,—स्वर्णरजतादयः, तेषां, उद्यते अनेनेति वादः, —गुणः, तं वेत्तीति तथोक्तः, रसायनवित् इत्यर्थः, विहङ्गमः,—तदाख्यः। दार्दुरिकः, —वाद्यभेदवादकः, यद्वा,—दर्दुराः,—भेकाः, तान् वेत्तीति दार्दुरिकः, भेकगुणागुणवेत्ता इत्यर्थः, दामोदरः,—तदाख्यः। ऐन्द्रजालिकः,—इन्द्रजालविद्यावित्, चकोरात्तः,—तन्नामा। मस्करी परिव्राट्, सन्न्यासी इत्यर्थः, ("भिक्षुः परिव्राट् कर्म्मन्दी पाराशर्यपि मस्करी" इत्यमरः)। ताम्रचूडः,—तदाख्यः। सः,—बाणः, निघ्नतां—वशगताम्, ("अधीनो निघ्न आयत्तः" इत्यमरः)। अधीनतामित्यर्थः, एतैः पूर्वोक्तैरनुसृतः सन्नपि स्वस्य च यवीयस्त्वात् ज्यायसां तेषां तेषां सहायकानामुपरि भक्त्यैव तथात्वमुपगतवान् इति भावः।

(२४७) देशान्तरेति।—देशान्तराणां—भिन्नदेशानाम्, आलोकने—दर्शने, यत् कौतुकम् औत्सुक्यं, तेन, आक्षिप्तम्—आकृष्टं, न पुनर्धनलिप्सयेति भावः, हृदयं यस्य तथोक्तः। सत्सु अपि—विद्यमानेषु अपि। पितृपितामहोपात्तेषु—पैतृकेषु

गृहात् निरगात्; अगाच्च निरवग्रहो ग्रहवानिव नवयौवनेन स्वैरिणा मनसा महताम् उपहासास्पदताम्।

अथ (२४८) शनैः शनैः अत्युदारव्यवहृतिमनोहृन्ति बृहन्ति राजकुलानि वीक्ष्यमाणः, निरवद्यविद्याविद्योतितानि च गुरुकुलानि सेवमानः, (२४९) महार्हाऽऽलापगम्भीरगुणवद्गोष्ठीः च उपतिष्ठमानः, (२५०) स्वभावगम्भीरधीधनानि विदग्धमण्डलानि च गाहमानः, पुनरपि तामेव वैपश्चितीम् आत्मवंशोचितां प्रकृतिम् अभजत्। महतश्च कालात् तामेव भूयो वात्स्यायनवंशाश्रयाम् आत्मनो जन्मभुवं ब्राह्मणाधिवासम्

इति यावत, विभवेषु—ऽ"...मु। विद्याप्रमर्शे—विद्याऽनुशीलने। अगाच्च—प्रापच्च। निरवग्रहः,—स्वतन्त्रः, स्वेच्छाचारी इत्यर्थः, ("स्वतन्त्रोऽप्रावृतः स्वैरी स्वच्छन्दो निरवग्रहः" इत्यमरः)। ग्रहवान् इव—भूताविष्ट इवेत्यर्थः। स्वैरिणा—स्वेच्छाचारवता। उपहासास्पदताम्—परिहासपात्रताम, अवज्ञेयतामिति यावत्। ["उपहासास्पदताम्" इत्यत्र "उपहास्यताम्" इति पाठेऽपि समान एवार्थः]।

(२४८) शनैः शनैः,—क्रमेण। अत्युदारेति।—अत्युदारा—अतिमहती, या, व्यवहृतिः,—व्यवहारः, आचार इति यावत, तया मना हृद्यन्ति यानि तद्यन्ति। बृहन्ति—महान्ति। वीक्ष्यमाणः,—परिपश्यन्। निरवद्येति,—निरवद्याभिः,—निर्दोषाभिः, अनिन्दनीयाभिरित्यर्थः, विद्याभिः विद्योतितानि—उज्ज्वलतां गतानि।

(२४९) महार्हेति।—महार्हाः,—महामूल्याः, मधुरा इत्यर्थः, आलापाः,—वचनानि, तैः गम्भीराः,—प्रदीप्ताः, गुणवत्यः,—विविधगुणशालिन्यः, गोष्ठाः,—सभाजाः ताः। उपतिष्ठमानः,—सेवमानः; अत्र उपपूर्वकात् तिष्ठतेः सत्कारार्थकत्वेनात्मनेपदम्।

(२५०) स्वभावेति।—स्वभावेन—प्रकृत्या, गम्भीराणि—धीराणि, धीधनानि—प्रज्ञाधनानि येषां तानि, विदग्धमण्डलानि—विद्वज्जनान्। गाहमानः,—समाश्रयन्। ("गाहमानः" इत्यनेन आत्मनः तेजस्वित्वं प्रकटीकृतम्)। वैपश्चितीं—विपश्चित्—विद्वान्, ("विद्वान् विपश्चिद् दोषज्ञः" इत्यमरः) तस्य इयं, वैपश्चिती तां, विद्वज्जनोचितामित्यर्थः, प्रकृतिं—स्वभावम्। वात्स्यायनवंशाश्रयां—वात्स्यायनवंशसम्भूतेः समलङ्कृतां, ब्राह्मणाधिवासं—विप्राध्युषितपुरम्।

अगमत्; तत्र च (२५१) चिरदर्शनात् अभिनवीभूतस्नेह-सद्भावैः (२५२) ससम्भ्रमप्रकटितज्ञातिर्यैः आप्तैः उत्सवदिवस इव आनन्दिताभिगमनो बालमित्रमण्डलस्य मध्यगतो मोक्ष-सुखम् इव अन्वभवत्।

इति श्रीमद् बाणभट्टविरचिते श्रीहर्षचरिते वात्स्यायनवंशवर्णन नाम प्रथमः उच्छ्वासः।

(२५१) चिरदर्शनात्—बहुकालान्तरदर्शनात्। अभिनवीभूतेति।—अभिनवीभूताः,—नूतनतां प्राप्ताः, स्नेहसद्भावाः,—तस्मिन् प्रणयातिरेक इत्यर्थः, यैषां तथोक्तैः।

(१५२) ससम्भ्रमेति।—ससम्भ्रम—सगौरवं यथा तथा प्रकटितं ज्ञातिर्यैः—ज्ञातित्वं, सस्नेहप्रणयसम्भाषणादिकमित्यर्थः, यैः साद्दरैः। ["ससम्भ्रमप्रकटितज्ञातिर्यैः" इत्यत्र "ससंस्तवप्रकटितज्ञातिर्यैः" इति पाठे—ससंस्तवं—सपरिचयं, परिचयेन सह इत्यर्थः, परिचयं प्राप्येति यावत्, प्रकटितं ज्ञातिर्यैः तैः। केचित्तु,—"ससंस्तवं—सादरम्" इति व्याख्यानयन्ति]। आप्तैः,—आत्मीयैः; अन्यत्र,—"रजस्तमोभ्यां निर्मुक्ताः तपोज्ञानबलेन ये। येषां त्रैकालममलं ज्ञानमव्याहतं सदा॥ आप्ताः शिष्टाः विबुद्धास्ते—" इत्युक्तलक्षणैः विधूतरजस्तमोगुणैः त्रिकालज्ञैः योगिभिरित्यर्थः। बालमित्रमण्डलस्य—शैशवसुखमनुभूय; अन्यत्र,—बालः इव निर्लेपत्वादिति भावः, यो मित्रः,—नवोदितः सूर्यः इत्यर्थः, तस्य मण्डलं—बिम्बं तस्य; उक्तञ्च,—"तपस्यन्तं रविं दृष्ट्वा निर्लेपो जायते रविः। मोक्षमार्गप्रयत्नेन तेजो नैवास्य विद्यते॥" इति। मोक्षसुखमिव—निर्व्याणलाभजनितानन्दसाक्षात्कारः इव, आत्यन्तिकदुःखनिवृत्तिरिव वा, मोक्षसुखमपि अणिमाद्यैश्वर्यसंज्ञितं योगिभिः सूर्यबिम्बगतैरनुभूयते। आख्यायिकासु कविभिर्निजवंशवर्णनं यथा कानने वंशः तथा वर्ण्यते एतत्तु वात्स्यायनवंशवर्णनं तथैवेति वेदितव्यम्। स्वस्य च सकलकलाऽभिज्ञत्वप्रदर्शनेन वैदग्ध्यातिशय्यं ख्यापितमिति; राज्ञः हर्षस्य चरिते वर्णयितव्ये, को हि नामास्य कविः इति प्रश्ने, तदुपादकविषयिण्याः जिज्ञासायाः अवतारणात् प्रसङ्गसङ्गत्या एतदपि प्रस्तुतं वेदितव्यम्।

इत्यग्नेयशास्त्राटवीसञ्चरणपञ्चाननेन वात्स्यवंशावतंसेन पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-विद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां श्रीहर्षचरितव्याख्यायां प्रथम उच्छ्वासः॥ १॥

द्वितीय उच्छ्वासः ।

अतिगम्भीरे भूपे कूप इव जनस्य निरवतारस्य ।
दधति समीहितसिद्धिं गुणवन्तः पार्थिवा घटकाः ॥ १ ॥
रागिणि नलिने लक्ष्मीं दिवसो निदधाति दिनकरप्रभवाम् ।
अनपेक्षितगुणदोषः परोपकारः सतां व्यसनम् ॥ २ ॥

अनुकूलं शोभनमुपायमधिगम्य जडप्राया: पुरुषा अपि समीहितं साधयितुमीशते इत्यभिधेयं सुसहायकवशात् अचिरादेव समाजः औद्धत्यात् स्वस्य अभीप्सितलाभमाशंसते, अतिगम्भीरेति ।—अतिगम्भीरे—अतिशयेन यत् गाम्भीर्यं—क्रोधहर्षादिभिः धैर्यच्युत्यभावः, तदिति इत्यर्थः, यस्य क्रोधादिजा विकृतिरन्यैः तदाकारेङ्गितादिलाऽपि न ज्ञायते, स गम्भीरः ; उक्तञ्च,—"यस्य प्रसादादाकारात् क्रोधहर्षभयादयः । भावस्या नोपलभ्यन्ते तद्गाम्भीर्यमुदाहृतम् ॥" इति । अन्वय,—दुरवगाहत्वं, तद्वतीत्यर्थः, भूपे—राजनि, कूपे इव निरवतारस्य—निः,—नास्ति, अवतारः,—अवतरणं, सुसहायकादिप्रवेशोपायः यस्य तथोक्तस्य, दुरधिगम्यस्येत्यर्थः, पक्षे,—सोपानादिसहायरहितस्य इत्यर्थः, जनस्य—लोकस्य, गुणवन्तः,—विद्याविनयशालिनः, पक्षे,—रज्जुविशिष्टाश्च, पार्थिवाः,—राजान एव, घटकाः,—ओजकाः, सहायभूताः सन्तः इति यावत् ; अन्यत्र,—पार्थिवाः,—पृथिवीविकाराः, मृन्मया इति यावत्, घटा एव इति घटकाः,—कलसाः, समीहितसिद्धिं—राजसद्मनि आत्मनः प्रवेशरूपमभिलषितसाफल्यमित्यर्थः, पक्षे,—जलोत्तोलनरूपमिष्टसिद्धिञ्च, दधति—सम्पादयन्ति । अवतरणिकाद्यभावेनातिदुरवगाहात् अतिगम्भीरादपि कूपात् रज्जुगृहीतेन कुम्भेन जलप्राप्तिरिव, अतिगम्भीरतयाऽतिदुरधिगम्यादपि नृपतेः गुणवत्सहायसाहचर्येण जनस्य इष्टसिद्धिर्भवतीति निष्कर्षः । [अनेन उक्तप्रकारे राजनि गुणवान् कृष्ण एव सहायभूतः बाणस्य समीहितसिद्धिं विधास्यति इति सूचितम्] । अत्र भूपे कूपस्यावैधर्म्येणाप्यप्रतीतिरूपमाऽलङ्कारः, स च अवतारगुणघटकादिशब्दानां श्लिष्टतया श्लेषेणानुप्राणित इत्यवधेयम् । आर्या वृत्तम् ॥ १ ॥

परोपकारप्रणयिनः अनुरक्तैकप्रवणाः महीयांसः खलु स्वगुणगणगरिम्णा आश्रितगुणदोषान् प्रागविचार्यैव तेषु सौभाग्यलक्ष्मीसमाधाने दृढव्रता भवन्तीति प्रस्तुतमव-

(१) अथ तत्र अनवरताध्ययनध्वनिमुखराणि, भस्मपुण्ड्रकपाण्डुललाटैः (२) कपिलशिखाजालजटिलैः क्रशानुभिः इव क्रतुलोभागतैः वटुभिः अध्यास्यमानानि, (३) सेकसुकुमारसोमकेदारिकाहरितायमानप्रघनानि,

तारयितुमप्रस्तुतं दिवसस्य नलिनेषु दिनकरलक्ष्म्योयोगम् उपन्यस्य, अर्थान्तरन्यासेन समाधत्ते, रागिणीति।—दिवसः,—दिवाभाग इत्यर्थः, रागिणि—लोहितरागवति, अनुरक्ते च, नलिने—कमले, दिनकरप्रभवां—भास्करप्रभाजनितां, लक्ष्मीं—श्रियं, शोभामिति यावत्; पत्ते,—सम्पदं, निदधाति—अर्पयति; तथा हि,—न अपेक्षितौ—न दृष्टौ, न विचारितावित्यर्थः, गुणदोषौ यत्र तथाभूतः, परोपकारः,—परहितसाधनमित्यर्थः, सतां—साधूनां, व्यसन—व्रतमिति यावत्। साधवो गुणदोषान् न विचारयन्ति, केवलं परेषाम् उपकारव्रतमेव कर्त्तव्यतया समाश्रयन्ति। [एतेन परोपकारी कृष्ण तथाविधे बाणे राजप्रभवां सम्पदम् आधास्यति इति प्रकटितम्; तथा च श्लोकद्वयेनानेन बाणस्य गुणवत्तया राजमाहात्म्यलाभः, परेषां साधूनां तत्कृतावद्रागस्य सूचितः]। अत्र पूर्वार्द्धे आप्रस्तुतस्य नलिने दिवसकृतलक्ष्मीनिधानस्योपन्यासेन, कवौ बाणभट्टे कृष्णकृतायाः समाजः श्रीहर्षस्य समापण्डितसौभाग्यलक्ष्म्याः निधानरूपस्य प्रस्तुतस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः; तथा द्वितीयार्द्धगतेन सामान्येन प्रथमार्द्धगतस्य विशेषार्थस्य सोपपत्तिकत्वकरणात् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः, इत्यनयोरङ्गाङ्गिभावेन सङ्करः। आर्य्या वृत्तम् ॥ २ ॥

(१) अथेत्यादि।—तत्र—ब्राह्मणाधिवासे। अनवरतेति।—अनवरतानाम्—अविश्रान्तानाम्, अध्ययनानां ध्वनिभिः मुखराणि—शब्दायमानानि, उत्तरस्थितेन "बाह्यानां भवनानि" इत्यनेनान्वयः। भस्मेति।—भस्मपुण्ड्रकेण—भस्मरचिततिलकेन, पाण्डूनि—धवलानि, ललाटानि येषां तैः, ["पाण्डुललाटैः" इत्यत्र "पाण्डुरललाटैः" इति पाठान्तरम्]। उत्तरस्थितेन "वटुभिः" इत्यनेनान्वयः।

(२) कपिलेति।—कपिलैः,—पिङ्गलैः, शिखाजालैः,—चूडानिचयैः, अर्चिःसङ्घैः, जटिलाः,—जटावन्तः, युक्ताश्च, तैः। ["शिखाजाल" इत्यत्र "शिखानाल" इति पाठान्तरन्तु न समीचीनम्]। क्रशानुभिरिव—अग्निभिरिव। क्रतुलोभात्—यज्ञलोभात्, आगतैः,—उपस्थितैः। वटुभिः,—ब्रह्मचारिभिः, माणवकैर्वा। अध्यास्यमानानि—अधिष्ठीयमानानि।

(३) सेकेति।—सेकेन—जलसेचनेन, सुकुमारा—स्निग्धा, सोमकेदारिका—

(४) कृष्णाजिनविकीर्णशुष्यत्पुरोडाशीयश्यामाकतण्डुलानि, (५) बालिकाविकीर्य्यमाणनीवारबलीनि, (६) शुचिशिष्यशतानीयमानहरितकुशपूलीपलाशसमिन्धि, (७) इध्मनगोमयपिण्डकूटसङ्कटानि, (८) आमिक्षीयक्षीरक्षारिणीनाम् अग्निहोत्रधेनूनां खुरवलयैः (९) विलिखिताजिरवितर्दिकानि, (१०) कामण्डलव्यमृत्पिण्डमर्दनव्यग्रयतिजनानि,

यज्ञार्थं रोपितं सोमलतायाः स्वल्पं क्षेत्रं, प्रघनेषु स्वल्पक्षेत्रस्यैव सम्भवात्; तया हरितायमानानि—श्यामायमानानि, प्रघनानि—अङ्गनानि येषां तानि।

(४) कृष्णाजिनेति।—कृष्णाजिनेषु—कृष्णसारमृगचर्म्मसु, विकीर्णाः,—विक्षिप्ताः, शुष्यन्तः,—शोषं गच्छन्तः, पुरोडाशीयाः,—हवनीयपिष्टकसाधनभूताः, श्यामाकतण्डुलाः,—श्यामकाः,—तृणविशेषाः, तदुत्पन्नाः तण्डुला इत्यर्थः, येषु तानि।

(५) बालिकेति।—बालिकाभिः,—कन्याभिः, विकीर्य्यमाणाः,—विक्षिप्यमाणाः, नीवाराः,—तृणधान्यभेदा एव, बलयः,—पूजाद्रव्याणि, येषु तानि।

(६) शुचीति।—शुचिभिः,—पवित्रैः, शिष्याणां—छात्राणां, शतैः आनीयमानाः,—आक्रियमाणाः, हरिताः,—श्यामाः, कुशपूल्यः,—दर्भनिचयाः, पलाशसमिधः,—वृक्षविशेषकाष्ठानि च येषु तानि।

(७) इध्मनेति।—इध्मनानां—काष्ठानां, गोमयपिण्डानाञ्च कूटैः,—राशिभिः, सङ्कटानि—आकीर्णानि।

(८) आमिक्षीयेति।—आमिक्षा—"आमिक्षा सा घृतौष्णे या चीरे स्याद्दधियोगतः" इत्युक्तलक्षणं घनीभूतं पयः "क्षीरा" इति वङ्गे प्रसिद्धा; तथा च स्मृतिः,—"तप्ते पयसि दध्यानयति सा वैश्यदैव्यामिक्षा भवति" इति; तस्यै हितानि आमिक्षीयाणि, यानि क्षीराणि, तानि चरन्तीति तासाम्। अग्निहोत्रधेनूनां—यज्ञार्थं पालितानां गवाम्। खुरवलयैः,—खुरसमूहैः।

(९) विलिखितेति।—विलिखिता—कृष्टा, अजिरेषु—अङ्गनभूमिषु, वितर्दिका—वेदिका येषां तानि, ("स्याद्वितर्द्दिस्तु वेदिका" इत्यमरः)।

(१०) कामण्डलव्येति।—कमण्डलुः,—मुनीनां जलपात्रभेदः, तस्मै इदं कामण्डलव्यं, यत् मृत्पिण्डं—कमण्डलुशोधनार्थं मृत्तिकाया इत्यर्थः, तेन मर्दने, कमण्डलोरिति भावः; यद्वा,—कामण्डलव्यं यत् मृत्पिण्डं—कमण्डलुनिर्म्माणोपयोगिमृत्तिकाराशिः, तेषां मर्द्दने—पेषणे, यतीनामकिञ्चनत्वात् कमण्डलावादराति-

(११) वैतानवेदीशङ्कव्यानाम् औडुम्बरीणां शाखानां राशिभिः (१२) पवित्रितपर्य्यन्तानि, वैश्वदेवपिण्डपङ्क्तिपाण्डुरित-प्रदेशानि, (१३) हविर्धूमधूसरिताङ्गनविटपिकिसलयानि, वत्सीयबालकलालितललत्तरलतर्णकानि, (१४) क्रीड़त्कृष्ण-सारच्छागशावकप्रकटितपशुबन्धप्रबन्धनानि (१५) शुक-शारिकाध्याध्ययनदीयमानोपाध्यायविश्रान्तिसुखानि, साक्षात्

शयाश्च स्वयं निर्म्माणं बोध्यम्; व्ययः,—तत्परः, यतिजनः,—सन्न्यासिवर्गः येषु तानि।

(११) वैतानेति।—वितानः,—यज्ञः, तस्मै हिता, वैतानी—यज्ञीयाग्निभृः, तथाभूता या वेदिः वैतानवेदिः, तस्य शङ्कव्यानां—शङ्कवः,—कीलकाः, तेभ्यो हितानां, शङ्कुसम्पादिनीनामिति यावत्, औडुम्बरीणां—यज्ञफलद्रुचसम्बन्धिनीनां, शाखानां—विटपानाम्।

(१२) पवित्रेति।—पवित्रितानि—पवित्रीकृतानि, पर्य्यन्तानि—प्रान्तभागा येषां तानि। वैश्वदेवेति।—वैश्वदेवानि—विश्वेभ्यो देवेभ्यो देयानि, पिण्डानि—अन्नानि, तेषां पङ्क्तिभिः, राजिभिः, पाण्डुरिताः,—धवलिताः, प्रदेशा येषु तानि।

(१३) हविरिति।—हविर्धूमैः,—यज्ञधूमैः इत्यर्थः, धूसरिताः,—धूसरवर्णीकृताः, अङ्गनविटपिनाम्—अजिरतरूणां, किसलयाः,—पल्लवाः येषु तानि। वत्सीयेति।—वत्सीयाः,—वत्सेभ्यो हिताः, वत्सपरिचर्य्याकुशला इत्यर्थः, ये बालकाः,—मुनिशिशवः, तैः लालिताः,—यत्नेन पोषिताः, ललन्तः,—लम्फन्तः, तरलाः,—चञ्चलाः, तर्णकाः,—सद्योजाता वत्साः येषु तानि।

(१४) क्रीड़दिति।—क्रीड़ता—चरता, कृष्णसाराणां—कृष्णमृगाणामिति कैश्चित्; अन्ये तु "कृष्णशार" इति छागविशेषणम्, "लोहितसारङ्गः कृष्णसारङ्गो वा" इत्यमरे, अत्र सारङ्गशब्दः शबले वर्त्तते; कृष्णशाराणां—कृष्णवर्णानामित्यर्थः, छागानां, शावकैः,—शिशुभिः, प्रकटितं—प्रकाशितं, पशुबन्धः,—पशवो बध्यन्ते यत्र तादृशो यज्ञः, तस्य प्रबन्धनं—प्रबन्धः, सातत्यमित्यर्थः, येषु तानि। ["प्रबन्धनानि" इत्यत्र "प्रबन्धानि" इति पाठेऽपि स एवार्थः]।

(१५) शुकेति।—शुकशारिकाभिः आरब्धेन—प्रक्रान्तेन, अध्ययनेन—वेदादीनां पाठेन, दीयमानं—सम्पाद्यमानम्, उपाध्यायानाम्—आचार्य्याणां, विश्रान्तिः

त्रयीतपोवनानि इव चिरदृष्टानां बान्धवानां प्रीयमाणो भ्रमन् भवनानि सुखम् अतिष्ठत्।

तत्रस्थस्य च (१६) अस्य कदाचित् कुसुमसमययुगम् उपसंहरन् अजृम्भत ग्रीष्माभिधानः (१७) सम्फुल्लमल्लिका-धवलाट्टहासो महाकालः। प्रत्यग्रनिर्जितस्य अस्तम् उपगतवतो वसन्तसामन्तस्य (१८) बालापत्येषु इव पयःपायिषु नवोद्यानेषु दर्शितस्नेहो मृदुः अभूत्। (१९) अभिनवोदितस्य सर्व्वस्यां पृथिव्यां सकलकुसुमबन्धनमोक्षम् अकरोत् प्रतपन्

मुखं येषु तानि। साक्षात्—मूर्त्तिमन्तौ अर्थः, त्रयीतपोवनानीव—त्रयी—ऋग्यजुःसाम्नां चितयं, तस्याः तपोवनानीव।

(१६) अस्य—बालस्य, कुसुमसमययुगम्—वसन्तकालस्य, युगं—युग्मं, सामद्वयमित्यर्थः, चैत्रवैशाखसामद्वयात्मकं वसन्तकालमिति यावत्, उपसंहरन्—निरस्यन्। अजृम्भत—प्रादुरभूत्।

(१७) सम्फुल्लेति।—सम्फुल्ला—विकसिता, मल्लिका एव धवलाः,—स्वच्छाः, अट्टहासाः,—हासविशेषा यस्य तथोक्तः। महाकालः,—ग्रीष्मः, भैरवश्च। प्रत्यग्रनिर्जितस्य—अभिनवविजितस्य। अस्तम् उपगतवतः,—क्षयं प्राप्तवतः। वसन्त एव सामन्तः,—अधीश्वरः तस्य, वसन्तसामन्तस्य। ("सामन्तः स्यात् अधीश्वरः" इति कोषः)।

(१८) बालापत्येष्विव—शिशुतनयेष्विव। पयःपायिषु—जलपानयोग्येषु, जलैः सेवनार्हेष्विति यावत्; अन्यत्र,—दुग्धपायिषु—स्तनन्धयेष्विति यावत्। नवोद्यानेषु—नूतनेषु उद्यानेषु; अन्यत्र,—नवम्—अभिनवम् उद्यानम्—उद्गमनं येषां तेषु, प्राथम्येन जगति आगमनप्रवृत्तेषु इत्यर्थः। दर्शितस्नेहः,—दर्शितः,—विधापितः, स्नेहः,—आर्द्रता, सरसता इत्यर्थः, येन सः; अन्यत्र,—दर्शितः स्नेहः,—प्रीतिः येन सः, ("दर्शितस्नेहः" इत्यनेन अस्य विजिगीषु व्यवहार आरोपितः, विजितस्य पुनः स्थापनं पुनरुक्तम्)। मृदुः,—अतीक्ष्णः; अन्यत्र,—सदयः। ग्रीष्मे नवोद्यानानि जलैः सिच्यन्ते इति तेषु ग्रीष्मस्य मृदुत्वमिति भावः।

(१९) अभिनवोदितः,—नूतनप्रवृत्तः। सकलेति।—सकलानां कुसुमानां—वासन्तिकानामिति भावः, बन्धनमोक्षं—हलखलनम्। नवाभिषिक्तो हि राजा आनन्दातिशयात् कारासु पूर्वनिबद्धानां बन्धनमोक्षं करोति; उक्तञ्च,—"यौवराज्याभिषेके वा परचक्रावरोपणे। पुत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते॥"

उष्णसमयः। स्वयम् (२०) ऋतुराजस्य अभिषेकार्द्राः चामरकलापा इव अग्रहस्त कामिनीनां चिकुरचयाः कुसुमायुधेन। हिमदग्धसकलकमलिनीकोपेन इव (२१) हिमालयाभिमुखीं यात्राम् अधात् अंशुमाली।

अथ (२२) ललाटन्तपे तपति तपने लिखितललाटिकापुण्ड्रकैः (२३) अलकचीरचीवरसंवीतैः (२४) स्वेदोदबिन्दुमुक्ताफलवलयवाहिभिः दिनकराराधननियमा इव अग्रहस्त

इति। प्रतपन्—प्रकर्षेण सन्तापं जनयन्; अत्यब,—अत्यन्तदयेषु प्रतापमनुभावयन्। स्वयमिति आदरातिशयप्रदर्शनार्थं बोध्यम्।

(२०) ऋतुराजस्य—यौवनस्य। अभिषेकार्द्राः,—स्नानार्द्राः। चामरपक्षे,—माङ्गलिकोदकसिञ्चनसम्बन्धादार्द्रत्वम्। अग्रहस्त—धृता इत्यर्थः। चिकुरचयाः,—केशकलापाः, कुसुमायुधेन—कामेन; यौवे स्नानार्द्रतया अमेयमनात् अतिसुन्दरत्वेन प्रतीयमानाः तथाविधाः कामिनीनां केशाः विशेषेण कामम् उद्दीपयन्तीति भावः। उक्तञ्च कालिदासेन,—"स्नानार्द्रमुक्तेषनुभूपवासं विन्यस्तसायन्तनमल्लिकेषु। कामी वसन्तात्ययमन्दवीर्यः केशेषु लेभे रतिमङ्गनानाम्॥" इति।

(२१) हिमालयाभिमुखीं—हिमालयः,—उत्तरदिशि स्थितः स्वनामप्रसिद्धः पर्व्वतविशेषः, तदभिमुखीं तां, यात्रां—गतिम्, उत्तरायणम् इत्यर्थः, अधात्—अकरोत् इत्यर्थः। हिमेन निजकान्तानां कमलिनीनां दग्धीभूतत्वात् कोपेन तत्प्रतिकारार्थं हिमालयपदग्रहणं ज्ञेयम्। ["अधात्" इत्यत्र "अकरोत्" "अदात्" इति पाठान्तरद्वयम्]। अंशून्—किरणान्, मलति—धारयति इति अंशुमाली—सूर्यः; एतेनास्य हिमपरिभवनशीलत्वं प्रकटीकृतम्।

(२२) ललाटन्तपे—ललाटतापिनि, खरतरे इत्यर्थः, तपने—सूर्य्ये, तपति—तापं वितरति सति। लिखितेति।—लिखितललाटिकापुण्ड्रकैः—लिखितं—चिह्नितं, हरिचन्दनेन इति भावः, [ललाटे अलङ्कारः ललाटिका "कर्णललाटात् कनलङ्कारे" (४। ३। ६५ पा०) इति कन्, ततः स्त्रियामापि कृते कापि परे टस्वाकारस्य इत्वम्] ललाटिकापुण्ड्रक—ललाटभूषणं तिलकभेदः येषु तथाविधैः।

(२३) अलकेति।—अलकाः,—चूर्णकुन्तला एव, चीवराणि—वस्त्रखण्डानि, तैः संवीताः,—आवृताः तैः।

(२४) स्वेदेति।—स्वेदोदबिन्दवः,—घर्म्मजलबिन्दव एव, मुक्ताफलवलयाः,—

ललनाललाटेन्दुभिः। (२५) चन्दनधूमराभिः असूर्य-म्पश्याभिः कुमुदिनीभिः इव दिवसम् असुप्यत सुन्दरीभिः। (२६) निद्राऽलसा रत्नालोकम् अपि न असहन्त दृशः, किमुत जरठम् आतपम्। (२७) अशिशिरसमयेन चक्रवाकमिथु-नाभिनन्दिताः सरित इव तनिमानम् अनीयन्त सोड्पाः शर्व्वर्य्यः। (२८) अभिनवपटुपाटलामोदसुरभिपरिमलं न

मुक्ताराचितजपमालिकाः, तान् वहन्तीति तथोक्तैः, ललनानां—कामिनीनां, ललाटा एव इन्दवः,—चन्द्राः तैः, दिनकरस्य—सूर्य्यस्य, आराधनम्—उपासनं, तस्य नियमा इव अगृह्यन्त। चीवरपरिधानम् अजवलग्नधारणञ्च सूर्य्योपासनव्रताङ्ग-मिति तथोक्तोचितम्।

(२५) चन्दनेति।—चन्दनेन धूमराः,—धवलाः, चन्दनाक्तदेहा इत्यर्थः; अन्यत्र,—चन्दनवत् धूमराः,—धवलकान्तयः, ताभिः। असूर्य्येति।—सूर्य्यं न पश्य-न्तीति तथोक्ताभिः, सूर्य्योत्तापासहिष्णुतया अतिनिभृतस्थानस्थिताभिरिति भावः; अन्यत्र,—दिनोदये स्वभावत एव मुकुलिताभिः। असुप्यत—सुप्तं, मुकुलितञ्च, [दिवसमिति अत्यन्तसंयोगे द्वितीया]। सुन्दरीभिः,—कामिनीभिः।

(२६) निद्रेति।—निद्रालसाः,—निद्रया आलस्यपरतन्त्राः, मुकुलीभावमा-पन्ना इत्यर्थः, दृशः,—चक्षूंषि, रत्नानाम्—अनुरागाणामिति भावः, आलोकम्—उद्योतं, प्रभामित्यर्थः, न असहन्त; जरठं—प्रगल्भम्, अत्युग्रमित्यर्थः, आतपं—सौरसन्तापं, किमुत इत्यन्वयः।

(२७) अशिशिरसमयेन—ग्रीष्मकालेन। चक्रवाकमिथुनाभिनन्दिताः,—चक्रवाकमिथुनैः अभिनन्दिताः,—समादृताः, सरित इव—नद्य इव, तनिमानं—कृशताम्। ["अनीयन्त" इत्यत्र आनीयन्त" इति पाठान्तरम्]। सोड्पाः,—सोड्पैः,—तारापतिः, चन्द्र इत्यर्थः, तेन सह वर्त्तमानाः; अन्यत्र,—सोड्पैः,—प्लवैः, भेलैरित्यर्थः, सह वर्त्तमाना इत्यर्थः, शर्व्वर्य्यः,—रजन्यः। ग्रीष्मे रात्रेर्मानम् अल्पतां याति, तेन च रात्रिविरहितानां चक्रवाकाणाम् आनन्द इति भावः; सरितश्च तेषां जीविकादायिन्य इति तदभिनन्दनम्।

(२८) अभिनवेति।—अभिनवेन—नूतनेन, पटुना—प्रसरता, पाटलामोदेन—पाटलापुष्पगन्धेन, ("पाकल" इति वङ्गभाषा) सुरभिः,—सौरभवान्, परिमलो

केवलं जलं, जनस्य पवनस्य पवनम् अपि पातुम् अभूत् अभिलाषो दिवसकरसन्तापात्।

क्रमेण च (२९) खरखरमयूखे, खण्डिततडिच्छैशवे, शुष्यत्सरसि, (३०) सीदत्स्रोतसि, मन्दनिर्झरे, (३१) भिल्लीकाझाङ्कारिणि, (३२) कातरकपोतकूजितानुबन्धबधिरितविश्वे, विश्वमत्पतत्त्रिणि, (३३) करीषकृष्यमरुति, विरलवीरुधि,

यस्य तादृशम्। पवनस्य—वायोः, पवनमपि—गन्धवहमपि, तादृशसौरभं वहन्तं पवनमपि इत्यर्थः। ["पवनस्य पवनम्" इत्यत्र "पवनम्" इति पाठान्तरम्। एष च पाठः सुबोधतया समीचीनः प्रतिभाति]। पातुमभिलाषोऽभूत इत्यन्वयः।

(२९) खरखरमयूखे—खरः,—तीक्ष्णः, खरमयूखः,—उष्णरश्मिः, सूर्य इत्यर्थः, यस्मिन् तथोक्ते, निदाघकाले इति उत्तरस्थितेनान्वयः। ["खरखरमयूखे" इत्यत्र "खरखगमयूखे" इति पाठे—खे—आकाशे, गच्छति इति खगः,—सूर्यः, ("खगः सूर्ये ग्रहे देवे भागेगे च विहङ्गमे" इति मेदिनी) खरः खगस्य—सूर्यस्य, मयूखः यत्र नाट्ये]। खण्डिततेति।—खण्डितं—निर्जितं, तडिता—विद्युता, शैशवं—बाल्यं, शिशुतानिबन्धनं चापल्यमिति भावः, येन तथाभूते, विद्युदालोकादपि अतितीक्ष्णालोकशालिनीति भावः। ["खण्डिततडिच्छैशवे" इत्यत्र "खण्डितशैशवे" इति पाठे—खण्डितम्—अपगतं, शैशवं—बालभावः, प्रथमावस्था इत्यर्थः, यस्य तथाभूते, प्रवर्द्धमाने इत्यर्थः]। शुष्यदिति।—शुष्यन्ति—शोषं गच्छन्ति—सरांसि यस्मिन् तथोक्ते।

(३०) सीददिति।—सीदन्ति—अवसादं गच्छन्ति, स्रोतांसि यस्मिन् तादृशे। सन्दनिर्झरे—मन्दाः,—स्वल्पाः, निर्झराः,—प्रस्रवणानि यत्र तथोक्ते।

(३१) भिल्लीकेति।—भिल्लीकाः,—क्षुद्राः कीटविशेषाः, तासां झङ्कारो विद्यतेऽत्रेति तथोक्ते; ते तथाविधे समये निश्चलस्थिता भिल्लीरवरूपं झङ्कारं कुर्वन्तीति प्रसिद्धिः।

(३२) कातरेति।—कातराणां भीषाक्रान्तानामिति यावत्, कपोतानां कूजितानुबन्धेन—कूजनमात्रेण, बधिरितं—बधिरीकृतं, विश्वं—जगत्, येन तथोक्ते। कपोताः खलु अतीव मेदोमयत्वात् नितान्तं भीषासहाः, अत एव पतत्त्रित्वेऽपि अस्य पृथक्त्वेन ग्रहणम्। पतत्त्रित्वाभिप्रायेण तु श्वासस्यैव औचित्यं बोध्यं, तेषां तादृशपीडाभावात्। वि-श्वसत्पतत्त्रिणि—विशेषेण श्वसन्तः,—क्लान्ततयेति भावः, पतत्त्रिणः,—पक्षिणः, कपोतेभ्योऽन्ये इति भावः, यस्मिन् तथोक्ते।

(३३) करीषकृष्येति।—करीषाणि—गोमयानि, कृष्यन्ति—शोषयन्तीति

(३४) कृधिरकृतूहलिकेशरिकिशोरकलिह्यमानकठोरधातकीस्तवके, (३५) ताम्यत्स्तम्बेरमयूथवमथुतिम्यन्महामहीधरनितम्बे, (३६) दूयमानहिरददीनदानाघ्यानश्यामिकालीनमूकमधुलिहि, (३७) लोहितायमानमन्दारसिन्दूरितमौलि, (३८) सलिलस्यन्दसन्दोहमन्देहमुह्यन्महामहिष-विषाणकोटि-विलिख्यमानस्फुटत्स्फटिकदृषदि,

तादृशाः, मरुतः,—वायवः यस्मिन् तथोक्ते। विरलवीरुधि—विरलाः,—अल्पाः, वीरुधः,—लताः यत्र तादृशे।

(३४) कृधिरेति।—कृधिरेषु—रक्तेषु, कृतूहलिनः,—लोलुपा इति यावत्, ये केशरिकिशोरकाः,—सिंहशिशवः, तैः। [किशोरकशब्देन तृष्णासहिष्णुता, मौग्ध्यातिशय्यञ्च द्योत्यते]; लिह्यमानः,—आस्वाद्यमानः, रक्ताधियेति भावः, कठोरः,—परिणतः, धातकीस्तवकः,—धातकीलतायाः पुष्पगुच्छः, ("धाइफूल" इति बङ्गभाषा) रक्तवर्ण इति भावः, यस्मिन् तथोक्ते।

(३५) ताम्यदिति।—ताम्यताम्—आतपतापेन क्लिश्यताम्इत्यर्थः, स्तम्बेरमयूथानां—हस्तिमङ्गानां, वमथुभिः,—उद्गारैः, करशीकरैरिति यावत्, तिम्यन्तः,—आर्द्रीभवन्तः, महतां महीधराणां नितम्बाः,—कटकटदेशाः यस्मिन् तथाभूते।

(३६) दूयमानेति।—दूयमानानां—ताम्यतां, हिरदानां—गजानां, दीनस्य—क्षीणतां गतस्य, दानस्य—मदस्य, आघ्यानात्—अप्रसरणधर्मकत्वात् दुःखच्छुक्ता, या श्यामिका—मदलेखासम्बन्धिनी श्यामवर्णरेखा, तस्यां लीनाः,—अतितर्षात् संसक्ताः, मूकाः,—आर्त्ततया निःशब्दाः, गुञ्जितरहिता इत्यर्थः, मधुलिहः,—भ्रमराः यस्मिन् तथोक्ते।

(३७) लोहितायमानेति।—लोहितायमानैः,—आलोहिताः लोहिताः भवन्तः तैः, पुष्पविकासात् रक्तायमानैरित्यर्थः, मन्दारैः,—पारिजाताख्यतरुविशेषैः, ("मन्दारः पारिजातकः" इत्यमरः) सिन्दूरिताः,—सञ्जातसिन्दूराः, दत्तसिन्दूरा इवेत्यर्थः, सौमानः,—ललाटभागाः, यामाणामिति शेषः, यस्मिन् तथोक्ते।

(३८) सलिलेति।—सलिलानां—जलानां, स्यन्दाः,—स्रवाः, तेषां सन्दोहः,—समूहः, तस्य सन्देहेन—भ्रमेणेति यावत्, मुह्यद्भिः,—चित्तविकृतिं गच्छद्भिः, महद्भिः महिषैः विषाणानां—शृङ्गाणां, कोटिभिः,—अग्रभागैः विलिख्यमानाः,—घृष्यमाणाः, स्फुरन्त्यः,—सौरातपेन उद्भासमाना इत्यर्थः, स्फटिकदृषदः,—स्फटिक-

(३९) घर्म्मेति मर्म्मरितगर्म्मुति, तप्तपांशुकुकूलकातरविकिरै, (४०) विवरशरणश्वाविधि, (४१) तटार्जुनकुररकूटज्वर-विवर्त्तमानोत्तानशफरशारपङ्कशेषपल्वलाम्भसि, (४२) दाव-जनितजगन्नीराजने, (४३) रजनीराजयक्ष्मणि, कठोरी-भवति निदाघकाले प्रतिदिशम् आढौकमाना इव ऊषरेषु

शिलाः यस्मिन् तथोक्ते। ["स्फाटिकदृषदि" इत्यत्र "स्फाटिकदृषदि" इति पाठे,—स्फाटिकमणिमयशिला यस्मिन् तथोक्ते इत्यर्थः]।

(३९) घर्म्मेति।—घर्म्मेण—उष्णता, मर्म्मरिताः,—शुष्कत्वेन मर्म्मरध्वनियुक्ताः, गर्म्मुतः,—लताविशेषा यस्मिन् तादृशे। ("गर्म्मुत स्त्री स्वर्णलतयोर्गोपति शिवषण्ढयोः। वृषभास्करयोः पुंसि" इति मेदिनी, नड़ः,—नलाख्यः लताविशेषः)। तप्तेति।—तप्ताः पांशवः,—रजांसि एव, कुकूलाः,—तुषानलाः, तैः कातराः विकिराः,—कुक्कुटादिपक्षिभेदा यस्मिन् तादृशे।

(४०) विवरेति।—विवराण्येव—गर्त्ता एव, शरणम्—आश्रयः येषां तादृशाः, श्वाविधः,—शल्लाः, "शाजाक" इत्याख्य जन्तुभेदा यस्मिन् तथोक्ते।

(४१) तटेति।—तटेषु,—तीरेषु, ये अर्জ্জुनाः,—खनामख्यातवृक्षभेदाः, तेषु ये कुररा:,—उत्क्रोशाख्यपक्षिभेदाः, क्षिप्ता इति भावः, तेषां कूटः,—ध्वनिविशेषः, तेन ज्वरः,—सन्तापः; यद्वा,—कूट एव ज्वरः, तादृशसमये अतीव श्रुतिकटुरिति भावः, तेन विवर्त्तमाना—विलुठन्तः, ["विवर्त्तमान—" इत्यत्र "निवर्त्तमान—" इति पाठे,—निवर्त्तमानाः,—विरमन्तः, जलमध्ये गमनादिति भावः, अत एव उत्तानाः,—उत्प्लवमानाः, तीरस्थाः कुररा यदा कूजन्ति, तदा मत्स्याः भीताः सन्तः उत्प्लवन्ते इति मत्स्यस्वभावः] उत्तानाः,—ऊर्द्धमुखा इति भावः, शफराः,—क्षुद्रमत्स्यभेदाः, तैः शाराः,—शबलाः, पङ्काः,—कर्दमाः, शेषा येषां तादृशानि, पल्वलानां—क्षुद्रसरसाम्, अम्भांसि जलानि यस्मिन् तथोक्ते।

(४२) दावेति।—दावेन—वनाग्निना,("दवदावौ वनानले" इत्यमरः) जनितं—सम्पादितं, जगतां नीराजनम्—आरात्रिकाख्य शान्तिकर्म्मविशेषः, यस्मिन् तथोक्ते।

(४३) रजनीति।—रजन्याः,—रात्रेः, राजयक्ष्मा—क्षयरोगविशेषः, तस्मिन्; रात्रेः क्षणेन कान्तिक्षयसम्पादनात् इति भावः। कठोरीभवति—प्रखरता गच्छति। प्रतिदिशं—दिशि दिशि। ("उन्मत्ताः,—उद्दामाः,—मातरिश्वानः,—वाताः, प्रावर्त्तन्त" इति उत्तरत्र वक्ष्यमाणः)। तानेव विशिनष्टि, आढौकमाना इत्यादिभिः।—

(४४) प्रपावाटकुटीपटलप्रकटलुण्ठकाः, (४५) प्रपक्व-कपिकच्छू-गुच्छच्छुटाच्छोटन-चापलैः अकाण्डकण्डूला इव (४६) कर्षन्तः शर्करिलाः कर्करस्थलीः, स्थूलदृषच्चूर्ण-मुचः, (४७) सुचुकुन्दकन्दलदलनदन्तुराः, समन्ततः

आढौकमानाः,—भ्रमन्तः, वेगेन वहन्त इति यावत्, ["आटौकमाना" इति पाठे,—उच्चैर्भ्रमन्तः; आङ्पूर्वकस्य भौवादिकस्य टौकते इत्यस्य रूपमेतत्। ग्रीष्मकाले खलु एतादृशाः मरुतः प्रावर्तन्त इति कालस्वभावः] उन्मत्तपक्षेऽपि,—एतत्सर्वं विशेषणं यथायोग्यं योजनीयम्। तथा च,—आढौकमानाः,—उद्धतं यथा तथा इतस्ततः भ्रमन्तः; उद्धतभ्रमणादयस्तु उन्मादस्यानुभावाः, तथा चोक्तम्,— अनिमित्तहसित-रुदितोत्कृष्टाबद्धप्रलापप्रणयनीत्यितप्रधावितहृत्तगीतपठितस्मितपांसवधूननानिष्कारणचौर-घटवक्त्रशरावाभरणस्रग्रजोपभोगैरन्यैश्चाव्यवस्थितचेष्टानुकरणादिभिरनुभावैरभिनयेत्" इति। ऊषरेषु—सिकताऽऽकीर्णमरुदेशेषु।

(४४) प्रपेति।—प्रपा—पानीयशाला, ("प्रपा पानीयशालिका" इत्यमरः) वाटः,—पत्याः, कुटी—क्षुद्रगृहभेदः, पटलं—छदिः, ततेषां प्रकटं—स्पष्टं, यथा तथा, लुण्ठकाः,—अपहारकाः, ध्वंसकारिण इति यावत्। अत्र वाटलुण्ठनं वाटस्थ-पांशुराशीनां परितः प्रक्षेपणादिति बोध्यम्; यद्वा,—प्रपावाटः,—पानीयशालारूपं स्थानम् इत्यर्थः।

(४५) प्रपक्वेति।—प्रपक्वाः,—प्रकर्षेण पक्वतां गताः, याः कपिकच्छूः,—कण्डु-लनकौड्डिदेशेषाः, ("आल्कुशी" इति बङ्गभाषा) तासां या गुच्छच्छुटाः,—लवक-राशयः, तासां छोटने—हरणे इति यावत्, यानि चापलानि—चपलकर्माणि, तैः, अकाण्डकण्डूला इव—आकस्मिककण्डूरोगग्रस्ता इव।

(४६) शर्करिलाः,—शर्कराः,—पाषाणकणिकाः, विद्यन्ते यासु ताः, शर्करा-बहुला इत्यर्थः, [पिच्छादिलादिलच्] कर्करस्थलीः,—क्षुद्रपाषाणखण्डयुताः भूमीः, "कङ्करभूमौ" इति भाषा, कर्षन्तः,—गच्छन्तः, कण्डूतिसङ्घावघर्षणार्थम् इति भावः। स्थूलदृषच्चूर्णमुचः,—स्थूलानि दृषदां—शिलानां, चूर्णानि—कणिका इत्यर्थः, सृजन्ति —वर्षन्तीति तथोक्ताः।

(४७) सुचुकुन्देति।—सुचुकुन्दानां—पुष्पविशेषाणां, कन्दलानाञ्च—कन्दली-पुष्पाणाञ्च, दलनेन—हन्तैर्व्यथयावनेन, दन्तुराः,—रुक्षातदन्ता इव दृश्यमाना इत्यर्थः। कपिकच्छूस्पर्शात् कण्डूला हि कण्डूतीनामुपशमनार्थं तथाविधचूर्णैः गात्रं घट्टयं

(४८)पतन्मुखरचीरीगणमुखशीकरशीक्ष्यमाणतनवः,(४९)तरुणतरतरणितापतरले तरन्त इव तरङ्गिणि मृगतृष्णिकातरङ्गिणीनाम् अलीकवारिणि, (५०) शुथच्छमीमर्म्मरमारवमार्गलङ्घनलाघवजवजङ्घालाः, (५१) रैणवावर्त्तमण्डली-रेचक-लासक रसरभमारब्धनर्त्तनारम्भारभटीनटाः,

---

कर्षन्ति, तज्जायमानसुखानुभूतिक्षणे दत्तांश स्वकीयान् विकासयन्ति इति लोकाचारः। समन्ततः,—चतुर्दिक्षु।

(४८) पतदिति।—पतन्तः,—उड्डीयमानाः, मुखराः,—शब्दं कुर्वन्तः, ये चीरीगणाः,—पक्षिभेदाः, ("चिल" इति वङ्गभाषा) तेषां मुखशीकरैः,—वदनाम्बुबिन्दुभिः, क्षीक्ष्यमाणाः,—सिच्यमानाः, तनवः,—अङ्गानि येषां तथोक्ताः।

(४९) तरुणेति।—तरुणतरः,—अतिप्रौढः, यः तरणिः,—सूर्य्यस्य, ("तरणिस्तरणौ पुंसि कुमारी नौकयोः स्त्रियाम्" इति मेदिनी) तापः, तेन तरले—चञ्चलमिव, राजमाने तस्मिन्, अत एव तरङ्गिणि—सञ्जाततरङ्गे इव भासमाने, मृगतृष्णिकाः,—मरीचिका एव, ("मृगतृष्णा मरीचिका" इत्यमरः। तृषार्त्तमृगाणां सूर्य्यकिरणोद्भासितासु बालुकासु जलबुद्धिः प्रसिद्धा एव) तरङ्गिण्यः,—नद्यः, तासाम् अलीकवारिणि—अलीकसलिले, तरन्त इव—प्लवमाना इव, बालुकामय्यामेव मरुभूम्यां तथा दृश्यमानत्वात्। उन्मत्ता अपि वैचित्र्येण निर्जलदेशं सजलमिव व्यवहरन्ति।

(५०) शुथदिति।—शुथ्यन्ती—शीर्षं गच्छन्ती, शमी—अग्निगर्भा वृक्षभेदः, तदत् मर्म्मरः,—मर्म्मरध्वनियुक्त इत्यर्थः; मरोरयं मारवः,—मरुदेशीयः, यः मार्गः,—पन्थाः, तस्य लङ्घने—अतिक्रमणे, लाघवं—नैपुण्यं, शीघ्रकारित्वमित्यर्थः यस्य तथाभूतौ यौ जवः,—वेगः, तेन जङ्घालाः,—जङ्घावन्तः, निरन्तरसञ्चारिणः इत्यर्थः।

(५१) रैणवेति।—रैणवी—धूलीसम्बन्धिनी, रैणमयी इत्यर्थः, या आवर्त्तमण्डली—मण्डलाकारेण घूर्णनपरम्परा, तस्याः रेचकः,—रेचयति बहिः करोति यः तथाभूतः, अनुकारश्च इत्यर्थः, यः लासकः,—नर्त्तकः, तस्य रसरभसेन—रागवेगेन, ["लासकरसरभस" इत्यत्र "रासरसरभस" इति पाठे,—रासे—रासाख्यक्रीडाविशेषे यः रसः,—अनुरागः, तत्र रभसः, तेन] आरब्धं यत् नर्त्तनं, तस्य आरम्भे—अनुष्ठाने, आरभटीनटाः,—अराश्च ते भटाश्चेति अरभटाः तेषामियम् आरभटी—वीररसप्रधाननरचनाविशेषः, तत्प्रधानी नर्त्तनविशेषो वा, तत्र नटाः,—नटा इव इत्यर्थः; साङ्गरागावसाने निपुणाः नर्त्तकाः यथा समुद्दिष्टं नृत्यमावेदयितुं रङ्गं परितः परि-

(५२) दावदग्धस्थलीममीमिलनमलिना: (५३) शिक्षित-क्षपणकवृत्तय इव मयूरपिच्छचयान् उच्चिन्वन्त:, सप्रयागगुल्मा इव (५४) शिक्षानजरत्करञ्जमञ्जरीबीजजालकै:, सप्ररोहा इव (५५) आतपातुरवनमहिषनासानिकुञ्जस्थूलनिश्वासै:, सापत्या इव (५६) उड्डीयमानजवनतरुहरिणपरिपाटी-

भाग्यन्ति, तथैव ये हि वाचामर्थी वैखरसमीं तदा नियतमुत्पादयामासुरिति तात्पर्यम्; तदुक्तं,—"प्लुष्टावपातप्लुतगर्ज्जितानि क्ष्वेड्यानि मायाकृतसिन्द्रजालम्। चित्राणि यूथानि च यत्र नित्यं तां तादृशीम् आरभटीं वदन्ति॥" इति।

(५२) दावेति।—दावेन—वनाग्निना:, दग्धा—भस्मीकृता, या स्थली—अकृषिमा भूमि:, सैव ममी, तस्या मिलनेन—सङ्गेन, मलिना:। ["ममीमिलनमलिना:" इत्यत्र "ममीमलनमलिना:" इति पाठे,—ममीनां मलनेन—धारणेन, मलिना:]।

(५३) शिक्षितेति।—शिक्षिता—अभ्यस्ता, क्षपणकानां—जैनसन्न्यासिनां, वृत्ति:,—व्यवहारो यै: तथाभूता इव; जैनानां गात्रमलक्षालननिषेधात् मलिन-कायत्वमिति भाव:। ["मयूरपिच्छचयान्" इत्यत्र "वनमयूरपिच्छचयान्" इति पाठान्तरम्]। उच्चिन्वन्त:,—धारयन्त:, क्षपणका अपि ममीमलिना: पिच्छानि बौद्धशास्त्रानुशासनात् धारयन्ति; ["शिखण्डस्तु पिच्छवर्हं नपुंसके" इत्यमरवचनात् पिच्छशब्दस्य मयूरपुच्छार्थकत्वलाभात् मयूरपदमधिकमेवोपात्तम्]। उन्मत्तपक्षेऽपि, —विवेकराहित्यात् यदृच्छया पिच्छचयान् वहन्ति; अत एव सप्रयागगुल्मा इव—प्रयागे—यागार्थं, गुल्मयन्तीति—गुल्मा:,—ढक्काविशेषा:, तै: सह वर्त्तमाना इव। उन्मत्तानामपि मृत्यकाले दर्शका: करतलादि वादयन्ति।

(५४) शिक्षानेति।—शिक्षाना:,—अस्फुटं शब्दायमाना:, जरतां—प्राचीनानां, करञ्जानां—तरुविशेषाणां, या मञ्जर्य:, तासां बीजजालकै:,—बीजनिचयै:, सप्ररोहा इव—साङ्कुरा इव।

(५५) आतपेति।—आतपेन—सन्तापेन, आतुरा:,—आर्त्ता:, ये वनमहिषा: तेषां नासा: निकुञ्जा इव—दीर्घरोमावृतया लतादिपिहितोदरा वनभूमय इव, ("निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे" इत्यमर:) तेभ्यो निर्गता: इति भाव:, स्थूलनिश्वासा: तै:। उन्मत्ता अपि आतपक्लिष्टा दीर्घं निश्वसन्ति। सापत्या इव—सपुत्रा इव, ससन्ताना इवेत्यर्थ:। उन्मत्ता अपि स्वस्मादिपतनभयात् अपत्यानि न त्यजन्ति।

(५६) उड्डीयमानेति।—उड्डीयमानानाम्—आतपतापाद्विच्युतया उत्पतता,

पेटकैः, सभ्रुकुटय इव (५७) दह्यमानखलधानवुस-कूटकुटिलधूमकोटिभिः, सावीचिवीचय इव महोष्ममुक्तिभिः, लोमशा इव (५८) शीर्य्यमाणशाल्मलिफलतूल-तन्तुभिः, दद्रुला इव (५९) शुष्कपत्रप्रकराकृष्टिभिः, शिराला इव (६०) तृणवेणीविकिरणैः, उच्छ्वयाश्रव इव

जवनतराणाम्—अतिवेगिनां, हरिणानां, ["जवनतरहरिण" इत्यत्र "जवनवात-हरिण" इति पाठे,—जवनानां—वेगगामिनां, वातहरिणानां—वाताभिमुखं गच्छतां हरिणानाम्] परिपाट्यः,—पर्य्यायाः, तेषां पेटकाः,—यूथानि, सङ्घाः इत्यर्थः, तैः, ("पेटकः पुल्लकादीनां सभ्रुभाङ्गं कदम्बके" इति मेदिनी)। सभ्रुकुटय इव—भ्रूभङ्गसहिता इव। उन्मत्ता अपि क्रोधप्राया एव, भ्रुव्यादयस्तु क्रोधस्य अनुभावाः।

(५७) दह्यमानेति।—दह्यमानानाम्—आतपतापेन सन्तप्यमानानां, खल-धानानां—धान्यमर्दनस्थानस्थितानां धान्यानां, वरुकूटाः,—तृणराशयः, कुटिलाः,—कुटिलगामिन्यः, (कुटिलपदेन भ्रुकुटीसादृश्यं व्यनक्ति) धूमकोटय इव—धूमराजय इव तैः; ग्रस्मानां ज्वालाभावात् तेषां धूमत्वेनोपवर्णनमुचितमेवेति। सावीचिवीचय इव,—अवीचिः,—नरकविशेषः, ("तद्भेदास्तपनावीचि महारौरवरौरवाः"। तद्भेदाः, —नरकभेदाः) तस्य वीचयः,—तरङ्गाः, ज्वाला वा, तैः सह वर्त्तमाना इव। महोष्ममुक्तिभिः,—महान्त उष्माणः तेषां मुक्तिभिः,—त्यागैः, वृष्टिभिरित्यर्थः; यद्वा, —उष्माणः,—सन्तापाः, तेषां मुक्तिभिः,—विसर्ज्जनैः, सन्तापवितरणैरित्यर्थः। लोमशा इव—रोमपूर्णा इव। उन्मत्ता अपि खेदादिवशादुष्मायन्ते।

(५८) शीर्य्यमाणेति।—शीर्य्यमाणानां—विदीर्य्यमाणानां, शाल्मलिफलानां तूलतन्तुभिः,—तूलसूत्रैः। दद्रुला इव—दद्रुरोगयुक्ता इव। उन्मत्ता अपि अवगाढ-नाद्यभावात् दद्रुयुक्ता भवन्ति। ["दद्रुलाः" इत्यत्र "दद्रुणाः" इति पाठेऽपि स एवार्थः। दद्रूः अस्य अस्तीति दद्रुणः, "दद्रू क्रमत्वच्च" इति नः]।

(५९) शुष्केति।—शुष्काणां पत्राणां प्रकराः,—सङ्घाः, तेषाम् आकृष्टयः,— आकर्षणानि ताभिः। शिराला इव—शिरासमूहशालिन इव, सुव्यक्तशिरासमूहा इवेत्यर्थः। उन्मत्ता अपि कार्श्यात् वातबाहुल्याच्च शिराला भवन्ति।

(६०) तृणेति।—तृणानां वेणी—राजिः, (शिरासादृश्यप्रदर्शनार्थं वेणी-पदम्) तस्या विकिरणैः,—विक्षेपैः, उच्छ्वयाः,—अविरतानि, अश्रूणि—नयन-जलानि येषां तथाभूता इव। उन्मत्ता अपि रुदन्ति। ["उच्छ्वयाश्रवः" इत्यत्र

(६१) धूयमानयवशूकशकलशङ्कुभिः, दंष्ट्राला इव (६२)चलित-शललसूचीशतैः, जिह्वाला इव वैश्वानरशिखाभिः, उत्सर्पत्सर्प-कचुकचूड़ालाः (६३) ब्रह्मस्तम्बरमाभ्यवहरणाय कवलग्रह-मिवाणैः कमलमधुभिः अभ्यस्यन्तः, (६४) सकलसलिलो-च्छोषघर्मघोषणापटहैः इव शुष्कवेणुवनास्फोटनपटुरवैः

उत्तमयवः" इति पाठे,—उत्—उद्गतानि, शस्यानि—कूर्चाः यैषां तथाभूता इव। उन्मत्ता अपि चिरं चौरकर्माभावात् दीर्घश्मश्रवो जायन्ते]।

(६१) धूयमानेति।—धूयमानानां—मन्दमरुद्वातात् कम्पमानानां, यवानां शूकाः—शूकाः, शिखासमूहाः इत्यर्थः, ("शूकोऽस्त्री शूकदयोः" इति मेदिनी) तेषां शकलाः,—खण्डाः, शङ्कवः,—कीला इव तैः। ["धूयमानयव—" इत्यत्र "धूयमाननवयव—" इति पाठान्तरे,—धूयमानानां नवानाम्—अभिनवोत्पन्नानां, यवानाम्]। दंष्ट्राला इव—दीर्घदन्तयुक्ता इवेत्यर्थः। उन्मत्ता अपि दन्तादिविकासैः कुर्वन्तो भाव्यन्ते।

(६२) चलितेति।—चलितानां—चलताम्, उड्डीयमानानामिति यावत्, शललानां—शल्यकीनां दीर्घकण्टकरूपलोम्नां, ("स्यादित्तु शल्यशल्लोस्त्रि शललौ शललं शलम्" इत्यमरः) सूचीशतैः,—सूच्याकारभागैः। जिह्वाला इव,—रसनावन्त इव, वह्निलिंगितरसना इवेत्यर्थः। उन्मत्ता अपि जिह्वां निष्काश्य लीषयन्ते। वैश्वानर-शिखाभिः,—अग्निशिखाभिः। उत्सर्पदिति।—उत्सर्पद्भिः,—उष्णतापात् प्रस्खलद्भिः, सर्पाणां कचुकैः,—निर्मोकैः, चूडालाः,—शिखावन्तः। उन्मत्ताः अपि स्नानादिना विना उन्मुक्तचूडाः भवन्तीति दृश्यते। ["उत्सर्पत्सर्पकचुकैः चूड़ाला इव" इति पाठो युज्यते]।

(६३) ब्रह्मेति।—ब्रह्मस्तम्बः,—ब्रह्मणड्डं, तस्य रसमाभ्यवहरणाय—रसशोषणाय, रसानां मधुरादीनां भोजनाय वा, कवलग्रहं—ग्रासग्रहणम्, "असक्थार्थौ मुखे पूर्णे गण्डूषः कवलोऽन्यथा" इति; अभ्यस्यन्तः,—पुनः पुनः कुर्वन्तः इवेत्यर्थः; मधुपानात् शरीरस्य रसशोषणं भवतीति प्रसिद्धम्।

(६४) सकलेति।—सकलानां, सलिलानां—जलानाम्, उच्छोषः,—अतिशयेन शोषकः, यो घर्मः,—उष्मा, तस्य घोषणा—प्रचारः, तस्याः पटहाः,—वादित्रभेदाः तैः इव; शुष्काणां वेणुवनानां—वंशारण्यानाम्, आस्फोटनस्य—सन्तापातिशयात् विदरणस्य, पटुरवाः,—महानिनादाः तैः,

त्रिभुवनविभीषिकाम् उड्डावयन्तः, (६५) च्युतचलचाषपक्ष-श्रेणीशारितसृतयः, (६६) त्विषिमन्मयूखलतालातप्लोष-कल्माषवपुष इव (६७) स्फुटितगुञ्जाफलस्फुलिङ्गाङ्गाराङ्कि-ताङ्गाः, (६८) गिरिगुहागभीरभाङ्कारभीषणभ्रान्तयः, (६९ भुवनभस्मीकरणाभिचारचरुपचनचतुरा रुधिराहुतिभिः इव पारिभद्रद्रुमस्तवकवृष्टिभिः तर्पयन्तः तारवान् वन-

त्रिभुवनविभीषिकां—त्रिलोकीभीतिम, उड्डावयन्तः,—जनयन्तः ; ये अट्टहासेन जगत् क्षोभयितुमुद्यताः, ते अवश्यमेव त्रिभुवनविभीषिकां जनयन्ति इति भावः।

(६५) च्युतेति।—च्युताः,—गात्रेभ्यः स्खलिताः, अत एव चलाः,—उत्पतन्त्यः, याः चाषाणां—नीलकण्ठाख्यपक्षिणां, पक्षश्रेणयः, ताभिः शारिताः,—चित्रिताः, आकीर्णा इति यावत्, सृतयः,—मार्गा यैः तथाभूताः ; ("सृतिः स्त्रीगमने मार्गे" इति मेदिनी)।

(६६) त्विषिमदिति।—त्विषिमान्—सूर्यः, [सप्तम्यन्तात् "त्विषि" इति पदात् मतुपः असम्भवात् "त्विष्मान्" "त्विषावान्" इति वा पदं भवितुं युक्तं] तस्य मयूख-लता—किरणराजिः, अलात इव—ज्वलदङ्गार इव, ("अङ्गारोऽलातमुल्मुकम्" इत्यमरः) तेन यः प्लोषः,—दहनं, तेन कल्माषं—चित्रं, ईषत्कृष्णरक्तमित्यर्थः, ("चित्रं किर्म्मीरकल्माषशबलैतायं कर्व्वुरं" इत्यमरः) वपुः,—शरीरं येषां तथोक्ता इव।

(६७) स्फुटितेति।—स्फुटितानि—आतपतापेन आवरणकोषस्फुटनात् विकसितानीत्यर्थः, यानि गुञ्जाफलानि—तदाख्यकृष्णमुखरक्तवर्णफलविशेषाः, ("कुंच" इति वङ्गभाषा) तद्वत् स्फुलिङ्गाः,—अग्निकणाः, तद्रूपा इति यावत्, ये अङ्गाराः, तैः अङ्कितं—संवलितं, दग्धमित्यर्थः, अङ्गं येषां तथोक्ताः, ("विषु स्फुलिङ्गो-ऽग्निकणः" इत्यमरः)। ये च साङ्गारास्ते च मलिनशरीरा भवन्ति।

(६८) गिरीति।—गिरिगुहासु—पर्व्वतगह्वरेषु, गभीरेण—घनेन, भाङ्कारेण भीषणा—भयावहा, भ्रान्तिः,—घूर्णनं येषां तथाभूताः। उन्मत्ता अपि अग्निश्च-गिरिगुहादिषु निर्भीका भ्रमन्ति।

(६९) भुवनेति।—भुवनस्य—जगतः, भस्मीकरणं—दहनमेव, अभिचारः,—अथर्व्ववेदविहितं निष्ठुरं कर्म्म, तत्र चरुपचने—हवनीयद्रव्यविशेषपाके, चतुराः,—पटवः। रुधिराहुतिभिरिव—रक्ताहुतिभिरिव, पारिभद्रो नाम द्रुमः,—वृक्षः, (लोके "मादार" इति प्रसिद्धः ; "पारिभद्रस्तु मन्दारे निम्बदारौ देवदारुणि" इति

विभावसून्, (७०) अग्निशिरसिकतातारकितरंहसः, (७१) तप्तशैलविलीयमानशिलाजतुरसलवलिप्तदिशः, दावदहन-पच्यमानचटकाण्डखण्ड-खचित-तरुकोटर-कीटपटल-पुटपाकगन्धकटवः, प्रावर्त्तन्त उन्मत्ता मातरिश्वानः।

(७२) सर्व्वतश्च भूरिभस्त्रामहस्रमन्थुत्तणक्षुभिता इव जरदजगरगम्भीरगलगुहावाह्निवायवः, क्वचित् (७३) स्वच्छन्दतृण-

मेदिनी। तस्य सेवकाः,—रक्तकुसुमगुच्छाः, तेषां तृष्टयः,—पाताः तैः, तर्पयद्भिः,—प्रीणयद्भिः, तारवान्—तरुसम्बन्धिनः, वनविभावसून्—दावाग्नीन्। अभिचारिणस्तु मारणोच्चाटनार्थं हवनकाले रुधिरेणानलं तर्पयन्ति इति। उन्मत्ता अपि रुधिरास्थिप्रभृतिकमयुचितं स्वैराचारतया अनले निक्षिपन्ति, तेन च अरङ्गलालुप्यन्ते।

(७०) अग्निशिरसिकेति।—अग्निशिरसां—उष्णाभिः, सिकताभिः,—बालुकाभिः, तारकितं—सञ्जाततारकमिव लक्ष्यमाणम् इत्यर्थः, रंहः,—वेगो येषां तथोक्ताः।

(७१) तप्तेति।—तप्तेषु शैलेषु—पर्व्वतेषु, विलीयमानानां—गलतां, शिलाजतूनां तदाख्यानाम् उपधातुभेदानां, रसलवैः,—रसविन्दुभिः, लिप्ताः दिशो यैः तथोक्ताः। दावेति—दावदहनैः,—दावानलैः, पच्यमानानां—दह्यमानानां, चटकानां—चटकाख्यपक्षिविशेषाणाम्; अण्डखण्डैः,—डिम्बशकलैः, खचितेषु—आकीर्णेषु, तरुकोटरेषु—वृक्षगर्त्तेषु, यानि कीटपटलानि—पिपीलिकाबृन्दानि, तत्तदण्डभक्षणार्थम् आगतानीति भावः, तेषां पुटपाकस्य—अभ्यन्तरपाकस्य, गन्धेन कटवः,—उद्वेजका इत्यर्थः। प्रावर्त्तन्त—प्रावहन्। उन्मत्ताः,—उच्छृङ्खलाः, मातरिश्वानः,—वायवः; सर्व्वत्र वाक्ये ध्वनिच्छाया अन्वेष्टव्येति।

(७२) सर्व्वत इति।—"दारुणा दावाग्नयः प्रत्यट्टग्यन्त" इति उत्तरेण अन्वयः। तानेव दावाग्नीन् विशिनष्टि, भूरीत्यादिभिः।—जरसां—जीर्णतां, ["जरदजगर" इत्यत्र "जरठाजगर" इति पाठे,—जरठानां—परिणतानां वृद्धानामित्यर्थः] अजगराणां—सर्पाणां, गम्भीराः गलाः,—गलदेशाः एव, गुहाः ताभ्यः वाह्निः,—वह्निर्निःसरन्तः, वायवः येषु तथोक्ताः; अत एव भूरीति।—भूरिभिः,—बहुभिः, भस्त्राणाम्—अग्निसन्धुक्षणयन्त्रभेदानां, "हाँता" इति प्रसिद्धानां, सहस्रैः सन्धुक्षणेन—समुद्दीपनेन, क्षुभिता इव—समुत्तेजिता इव।

(७३) स्वच्छन्देति।—स्वच्छन्दं—यथारुचि यथा तथा, तृणेषु—गुच्छेषु इति

चारिणो हरिणाः, क्वचित् (७४) तरुतलविवरवर्त्तिनो बभ्रवः, क्वचित् जटाऽवलम्बिनः कपिलाः, क्वचित् (७५) शकुनकुलकुलायपातिनः श्येनाः, क्वचित् (७६) विलीनलाक्षारसलोहितच्छवयोऽधराः, क्वचित् (७७) आसादितशकुनपक्षक्षतपटुगतयो विशिखाः, क्वचित् (७८) दग्धनिःशेषजन्म-

---

भावः, चरन्ति—प्रमरन्तीति तथोक्ताः. अन्यत्र,—तृणानि चरन्ति—भक्षयन्ति इति तथाभूताः, हरिणाः,—पाण्डुवर्णाः, ("हरिणः पाण्डुरः" इत्यमरः), अन्यत्र,—मृगाः, ("हरिणः पुंसि सारङ्गे विष्णौ त्वभिधेयवत्" इति मेदिनी)।

(७४) तरुतलेति।—तरुतलेषु यानि विवराणि—गर्त्तानि, तेषु वर्त्तन्ते इति तथोक्ताः, ["विवरवर्त्तिनः" इत्यत्र "विवरविवर्त्तिनः" इति पाठान्तरम्]। बभ्रवः,—पिङ्गलाः; अन्यत्र,—नकुलाः। ("बभ्रुर्वैश्वानरे..... । विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत्॥" इति मेदिनी)। जटाऽवलम्बिनः,—जटाः,—मूलानि, अवलम्बन्ते—आश्रयन्तीति जटाऽवलम्बिनः; अन्यत्र,—जटाधारिणः; कपिलाः,—पिङ्गलाः; अन्यत्र,—कपिलाख्यमुनिविशेषव्रतधारिणः तापसाः एवाभेदोपचारात् कपिला इति मन्तव्यम्; एते तु जटावल्कलधारिणो भवन्ति इति।

(७५) शकुनेति।—शकुनकुलानां—पक्षिविशेषाणां, कुलायान्—नीडानि, ("कुलायी नीडमस्त्रियाम्" इत्यमरः) पातयन्ति—दहन्तीति यावत् तथोक्ताः, श्येनाः,—शुक्लवर्णाः; अन्यत्र,—पक्षिबन्धकुलायाश्रितघातकाः पक्षिभेदाः, ("शकुनस्तु पुमान् पक्षिमात्रपक्षिविशेषयोः"। "श्येनः पक्षिणि पाण्डुरे" इति च मेदिनी)।

(७६) विलीनेति।—विलीनः,—द्रवीभूतः, यो लाक्षारसः,—अलक्तकद्रवः, तद्वत्; अन्यत्र,—तेन लोहिताः,—रक्ताः, छवयः,—कान्तयः येषां तथाभूताः, अधराः,—धर्त्तुमशक्याः, निखोष्ठाः वा; अन्यत्र,—धराः,—पर्व्वताः, ("अद्रयोऽधरपर्व्वताः" इत्यमरः)।

(७७) आसादितेति।—आसादितेषु—प्राप्तेषु; यद्वा,—आ—समन्तात्, सादितेषु—अवसादं गतेषु, स्खलितेषु इत्यर्थः, शकुनानां—पक्षिणां, ["शकुनि" इति पाठान्तरम्] पक्षेषु—गरुत्मु, कृता—लब्धा, पटुगतिः,—सम्यक् प्रसरः यैः; अन्यत्र,—आसादिता—प्राप्ता, शकुनपक्षेण—पक्षिगरुता, कृता—जनिता, पटुगतिः,—सत्वरगमनं यैः तथोक्ताः। वि—विविधाः, शिखाः,—ज्वाला येषां तथोक्ताः; अन्यत्र—शराः।

(७८) दग्धेति।—दग्धाः,—भस्मीकृताः, निःशेषाः,—समस्ताः, जन्म-

हेतवो निर्वाणाः, क्वचित् (७९) कुसुमवासिताम्बरसुरभयो रागिणः, क्वचित् मधूमोद्गारा मन्दरुचयः, क्वचित् (८०) सकलजगद्ग्रासघस्मराः सभस्मभूरिकाः, क्वचित् (८१) वेणुशिखरलग्नमूर्त्तयोऽत्यन्तह्रद्राः, क्वचित् (८२) अचलोपयुक्तशिलाजतवः

हेतवः,—श्लोत्पत्तिकारणानि, तृणकाष्ठादीनीति भावः यैः ; अन्यत्र,—दग्धाः,—क्षपिताः, ज्ञानाग्निनेति भावः, निःशेषाः,—समस्ताः, पूर्व्वपूर्व्वजन्मार्জ्जिता अपीति भावः, जन्महेतवः,—संसारागमनकारणानि पुण्यपापानि यैः तथोक्ताः, अत एव निर्वाणाः,—शान्ताः, दाह्याभावादिति भावः ; अन्यत्र,—मुक्तिं गता इत्यर्थः।

(७९) कुसुमेति।—कुसुमैः,—धूमैः ; अन्यत्र,—पुष्पैः। वासितं—क्षादितम् ; अन्यत्र,—सुरभीकृतं, यत् अम्बरं—नभः ; अन्यत्र,—वस्त्रं, तेन सुरभयः,—शोभनदर्शनाः ; अन्यत्र,—सौरभशालिनः, ("सुरभिः शल्लकीभासहभिन्नुरा·····। स्वर्णे गन्धोत्पले क्लीबं सुगन्धिकान्तयोस्त्रिषु॥" इति मेदिनी) रागिणः,—रक्तवर्णाः, अनुरागवन्तश्च। मधूमेति।—धूमोद्गारेण—धूमनिर्गमेन सह वर्त्तमानाः तथाऽपि, अमन्दा—अतिप्रह्वा, रुचिः,—दीप्तिर्येषां तथोक्ताः ; अन्यत्र,—धूमेन—अजीर्णरोगविशेषेण, उद्गारः,—वमनं येषां तथाविधाः, अत एव मन्दा रुचिः,—शरीरप्रभा, भोजनाभिलाषो वा, येषां तथोक्ताः ; ("रुचिः स्त्री दीप्तौ शोभायामभिरुचाभिलाषयोः" इति मेदिनी)।

(८०) सकलेति।—सकलं जगदेव ग्रासः,—कवलं, तस्य घस्मराः,—भक्षणशीलाः, दहनशीला इति यावत्, सभस्मभूरिकाः,—भस्मना भूरिभिः,—प्रभूतैः सह वर्त्तमानाः ; अन्यत्र,—भस्मभूरिकाः,—बहुभोजनश्चाधिविशेषः, भस्मकीट इति प्रसिद्धः, तेन सह वर्त्तमानाः, भस्मकीटाख्यरोगिण इत्यर्थः। ["सभस्मभूरिकाः" इत्यत्र "सभस्मकाः" इति पाठे,—भस्म एव भस्मकं तेन ; अन्यत्र,—भस्मकेन—तदाख्यातितीक्ष्णाग्निरूपव्याधिविशेषेण सह वर्त्तमानाः]।

(८१) वेणुशिखरेति।—वेणूनां—वंशानां, शिखरेषु—अग्रेषु, लग्नाः,—संसक्ताः ; अन्यत्र,—वंशदण्डाग्रेषु लग्नाः,—कृतभराः, मूर्त्तयः,—अङ्गानि येषां तथोक्ताः, अत्यन्तह्रद्राः,—अतिप्रबलाः, अतिस्थविराश्च। अतिस्थविराः वंशदण्डायमवलम्ब्य गच्छन्तीति दृश्यते।

(८२) अचलेति।—अचलेषु—पर्व्वतेषु, उपयुक्तानि—भक्षितानि, दग्धानीति यावत्, शिलाजतूनि—शिलाजत्वाख्याः उपधातुविशेषाः यैः ; अन्यत्र,—अचलन्—अविच्छिन्नं यथा तथा, दीर्घकालानुबन्धित्वादिति भावः, उपयुक्तं—सेवितम्, औषध-

क्षयिणः, क्वचित् (८३) सर्व्वान्नरसभुजः पीवानः, क्वचित् (८४) दग्धगुग्गुलवो रौद्राः, क्वचित् (८५) ज्वलितनेत्रदहनदग्धसकुसुमशरमदनाः (८६) कृतस्थाणुस्थितयः, चटुलशिखा नक्तंनारम्भारभटीनटाः (८७) शुष्ककासारसृतिभिः, स्फुटत् नीरसनीवारवोजलाजवर्षिभिः ज्वालाऽञ्जलिभिः अर्च्चयन्त इव घर्म्मघृणिम्, अघृणा इव

रूपेणेति भावः, शिलाजतु यैः तथोक्ताः, क्षयिणः,—निर्वाणं गताः, क्षयरोगिणश्च; उक्तञ्च निदानाचार्य्यैः,—"शिलाधातुप्रयोगाद्वा प्रसादाद्वाऽथ शार्ङ्गरात्। अजामूत्रप्रयोगाद्वा क्षयः क्षीयेत नान्यथा॥" इति।

(८३) सर्व्वेति।—सर्व्वाणि अन्नानि—खाद्यवस्तूनि, रसान्—मलिलादींश्च, भुञ्जते इति तथोक्ताः, अत एव पीवानः,—स्थूलकलेवराः; ये नित्यं मधुरादिषड्रसान् उपभुञ्जते, ते स्थूला एव भवन्ति। ["सर्व्वान्नरस—" इत्यत्र "सर्व्वरस—" इति पाठान्तरम्]।

(८४) दग्धेति।—दग्धाः गुग्गुलवः,—गन्धद्रव्यभेदाः यैः तथोक्ताः, रौद्राः,—भीषणाः, रुद्रसेवकाश्च, ते हि रुद्रपूजायां गुग्गुलुदहनेन धूपं ददति।

(८५) ज्वलितेति।—ज्वलितानां नेत्राणां—मूलानां, ("नेत्रं मथितगुणे वस्त्रभेदे मूलि द्रुमस्य च। रथे चक्षुषि नद्याञ्च" इति मेदिनी) दहनेन दग्धाः सकुसुमाः,—सपुष्पाः, शराः,—तृणभेदाः, मदनाः,—तदाख्यवृक्षभेदाश्च यैः तथोक्ताः; अन्यत्र,—ज्वलितेन नेत्रदहनेन—तृतीयनयनाग्निना, दग्धः,—भस्मीकृतः, सकुसुमशरः,—पुष्पशरसहितः, मदनः,—कामः यैः तथोक्ताः।

(८६) कृतेति।—अत एव कृताः स्थाणुषु—छिन्नशाखेषु वृक्षेषु, स्थितिः यैः ते; अन्यत्र,—कृताः, स्थाणोः,—हरस्य, स्थितयः,—व्यवहाराः यैः ते। चटुलशिखाः,—चटुलाः,—चञ्चलाः, शिखाः,—ज्वालाः यासां तथोक्ताः; अन्यत्र,—चञ्चलचूडा इत्यर्थः।

(८७) शुष्केति।—शुष्केषु कासारेषु—नडुलेषु, सृतिः,—प्रसरो यैषां तैः। स्फुटदिति।—स्फुटन्ति—अग्न्युत्तापात् लाजतां प्राप्नोतीति भावः, नीरसानि यानि नीवारबीजानि—धान्यविशेषाः, तेषां लाजान् वर्षन्तीति तथोक्तैः। ज्वालाऽञ्जलिभिः,—ज्वालाः,—शिखा एव अञ्जलयः तैः। घर्म्मघृणिम्—उष्णरश्मिं, सूर्य्यमित्यर्थः। अघृणा इव—घृणा—जुगुप्सा, तद्रहिता इव।

(८८) हठह्रियमानकठोरस्थलकमठवसाविसगन्धगर्भवः, खमपि धूमम् (८९) अम्भोदसमुद्भूतिभियेव भक्षयन्तः, सलिलाहुतय इव (९०) स्फुटद्दहनबालकीटपटलाः कवेषु, स्थिविष इव (९१) प्लोषविचटद्वल्कलधवलशम्बूकशुक्तयः शुष्केषु सरःसु, स्वेदिन इव (९२) विलीयमानमधुपटलगोलगलितमधूच्छिष्ट-दृष्टयः काननेषु, खलतय इव (९३) पर्य्यन्तशौर्य्यमाणशिखा-

(८८) हठेति।—हठात्—सहसा, ह्रियमानाः—दह्यमानाः, कठोराणां स्थल-कमठानां—स्थलवर्त्तिनां कच्छपानां, या: वसाः,—मेदांसि, तासां यो विसगन्धः,—आमगन्धः, ("विस्रं स्यादामगन्धि यत्" इत्यमरः) तस्य गर्भवः,—लोलुपाः।

(८९) अम्भोदेति।—अम्भोदानां—मेघानां, खविलासिनामिति भावः, समुद्भूतिः,—समुत्पत्तिः, तस्माः भीः, तयैव धूमं भक्षयन्तः,—सहरन्तः, सम्यग्ज्वलनेनेति भावः; उक्तञ्च मेघदूताख्ये काव्ये सहकविना कालिदासेन,—"धूमज्योतिः-सलिलमरुता सन्निपातः क्व मेघः" इति। सलिलाहुतय इव—जलाहुतय इव, ता हि अग्निं निर्वापयन्तीति भावः।

(९०) स्फुटदिति।—स्फुटन्ति—विशीर्य्यन्ते; अनेन,—निर्गच्छन्ति, बहलानि—भूरीणि, बालानि—क्षुद्राणि, कीटपटलानि—क्षुद्रप्राणिवृन्दानि; अनेन,—किंसिहन्दानि यत्र तथोक्ताः। कवेषु—नूतनहरणेषु, ("कच्चौ तु हरणवीरुधौ" इत्यमरः); अनेन,—अचविशेषेषु। स्थिविष इव—धवलाख्यरोगयुक्ता इव।

(९१) प्लोषेति।—प्लोषेण—दहनेन, विचटन्ति—चटत् चटदिति शब्दं कुर्व्वन्ति, यानि वल्कलानि—आवरणानि, [वल्कलशब्दोऽत्र त्वगुपलक्षणम्] तैः धवलाः शम्बूकाः,—शङ्खाः, शुक्तयः,—मुक्ताक्षोटाख्या जलजन्तुभेदाः, येषां तथोक्ताः। स्वेदिन इव—घर्म्मार्ता इव।

(९२) विलीयमानेति।—विलीयमानेभ्यः,—विलयं गच्छद्भ्यः, मधुपटल-गोलेभ्यः,—मधुचक्रेभ्यः, गलिता—निःसृता, मधूच्छिष्टानां—सिक्थानां, दृष्टिः यैः तथोक्ताः। खलतय इव—खल्वाटा इव।

(९३) पर्य्यन्तेति।—पर्य्यन्तेषु—प्रान्तदेशेषु, शिरसो निम्नभागेषु च, शौर्य्य-माणाः,—प्रसरन्तः, ["पर्य्यन्तशौर्य्यमाण—" इत्यत्र "परिशौर्य्यमाण—" इति पाठे—परि—सर्वे, प्रान्तभागे इत्यर्थः] शिखानां—ज्वालानाम्; अनेन,—चूडानां,

संहतयो महोषरेषु, (९४) गृहीतशिलाकवला इव ज्वलित-सूर्य्यमणिशकलेषु शिलोच्चयेषु, प्रत्यदृश्यन्त दारुणा दावाग्नयः।

तथाभूते च तस्मिन् अत्युग्रे ग्रीष्मसमये कदाचित् अस्य स्वगृहावस्थितस्य भुक्तवतोऽपराह्णसमये भ्राता पारशवः चन्द्रसेननामा प्रविश्य अकथयत्,—"एष खलु (९५) देवदेवस्य चतुःसमुद्राधिपतेः (९६) सकलराजचक्रचूडामणिश्रेणीशाण-कोणकषणनिर्म्मलीकृतचरणनखमणेः (९७) सर्व्वचक्रवर्त्तिनां धौरेयस्य (९८) महाराजाधिराजपरमेश्वरश्रीहर्षदेवस्य भ्राता कृष्णनाम्ना भवताम् अन्तिकं प्रज्ञाततमो दीर्घाध्वगः प्रहितो द्वारम् अध्यास्ते" इति। सोऽब्रवीत्,—"आयुष्मन्! अविलम्बितं प्रवेशय एनम्" इति।

महांतः,—समूहः येषां तथाभूताः। महोषरेषु—महत्सु ऊषरेषु, मरुषु इत्यर्थः; एतेषु दाह्यवस्तूनाम् अभावात् प्रान्तदेशेषु आग्नेयशाखाप्रादुर्भाव इति भावः।

(९४) गृहीतेति।—गृहीतं शिला एव कवलं—ग्रासो यैः तथाभूताः। ज्वलितसूर्य्यमणिशकलेषु—दीप्तसूर्य्यकान्तोपलखण्डेषु। शिलोच्चयेषु—पर्व्वतेषु, दावाग्नयः,—आरण्यानलाः, ("—दवदावौ तु वनवह्नौ वनेऽप्युभौ" इति मेदिनी)।

(९५) देवदेवस्य—देवानां—राज्ञां, देवः,—राजा, सम्राडित्यर्थः तस्य, ["देवदेवस्य" इत्यत्र "देवस्य" इति पाठान्तरम्]।

(९६) सकलेति।—सकलानां राजचक्राणां—नृपमण्डलानां, याः चूडामणि-श्रेण्यः,—शिरोरत्नराजयः, ता एव शाणाः,—निकषपाषाणविशेषाः, तेषां कोणेषु—प्रान्तभागेषु, यत्कषणं—घर्षणं, तेन निर्म्मलीकृताः,—विशदीकृताः, चरणयोर्नखा एव मणयः,—रत्नानि यस्य तथाभूतस्य, राजचक्रानियतवन्द्यस्येति भावः।

(९७) सर्वेति।—सर्वेषां चक्रवर्त्तिनां—सार्व्वभौमानां, धौरेयस्य—अग्रगण्यस्य।

(९८) महेति।—महता राजाधिराजानां परमेश्वरः,—सर्व्वनियन्तेत्यर्थः, स चासौ श्रीहर्षदेवश्चेति तथोक्तस्य। अन्तिकं—समीपम्। प्रज्ञाततमः,—अतिप्रतीतः, अतिप्रथितेन विज्ञात इत्यर्थः, अतिविश्रुत इति यावत्। दीर्घाध्वगः,—दीर्घम् अध्वानं गच्छतीति तथोक्तः, बहुदूरादागत इति भावः। प्रहितः,—प्रेषितः। एतेन बाणं प्रति राज्ञः आदरातिशयः सूच्यते।

अथ तेन आनीयमानम्, (९९) अतिदूरगमनगुरुजङ्घजङ्घं, (१००) कार्ष्मिकचेलचौरिकानियमितोच्चण्डचण्डातकं, (१०१) पृष्ठप्रेङ्खत्पटच्चरकर्पटघटितगलितग्रन्थिम्, (१०२) अतिनिविड़सूत्रबन्धनिक्षिप्तान्तरालक्षतव्यवच्छेदया लेखमालिकया (१०३) परिकलितमूर्द्धानं प्रविशन्तं, लेखहारकम् अद्राक्षीत्; अप्राक्षीच्च दूरादेव,—(१०४) "भद्र! भद्रम् अशेषभुवननिष्कारणबन्धोः तत्रभवतः कृशस्य" इति। सः "भद्रम्" इत्युक्त्वा प्रणम्य अतिदूरं समुपाविशत्; विश्रान्तश्च अब्रवीत्,

(९९) अतिदूरेति।—अतिदूरगमनेन गुरू—भारवत्यौ, अत एव जड़े—गमनाक्षमे, जङ्घे यस्य तथाभूतम्।

(१००) कार्ष्मिकेति।—कार्ष्मेण लिप्तं कार्ष्मिकं, मकार्ष्माध्वगमनादिति भावः, यत चेल—वस्त्र, तस्य चौरिका—खण्ड, तया नियमितं—संयमितम्, उच्चखण्डं—कर्कशं, स्थूलामत्यर्थो वा, चण्डातकम्—अर्द्धोरुपर्य्यन्तव्यापकं वसनं येन तथोक्तम। यद्यपि वरस्त्रीणामर्द्धोरुपर्य्यन्तविलम्बिनि वसने एव चण्डातकशब्दो गम्यते, तथापि अत्र सामान्यतः लक्षणयैव चण्डातकशब्दो ज्ञेयः।

(१०१) पृष्ठेति।—पृष्ठे—पृष्ठदेशे, प्रेङ्खत—चलत्, यत् पटच्चरं—जीर्णवस्त्रं, ("पटच्चरं जीर्णवस्त्रम्" इत्यमरः) कर्पटश्च—घर्म्मादिमार्ज्जनार्थं वस्त्रखण्डश्च, ताभ्यां घटितः,—रचितः, अथ च गलितः,—शिथिलः, ग्रन्थिः,—सन्धिबन्धः यस्य तथोक्तम।

(१०२) अतिनिविडेति।—अतिनिविडः,—अतिघनः, यः सूत्रबन्धः, तेन निक्षिप्तः,—निक्षप्त इव आचरितः, मनितः इत्यर्थः, [निक्षोपपदादाचारार्थे क्तौ निष्ठायां रूपमेतत्] अन्तराले—मध्ये, क्षतः,—विक्षतः, व्यवच्छेदः,—विभागो यस्याः तथाभूतया, लेखमालिकया—लिपिसन्धयेन। अन्येषामपि लिपिर्लेखनीता, ततः लेखमालिकया इत्युक्तं, तत्तु उपरिष्टाद् व्यक्तीभविष्यति।

(१०३) परिकलितेति।—परिकलितः,—वेष्टितः, ["परिकल्पित—" इति पाठे स एवार्थः] मूर्द्धा—मस्तकं येन तथोक्तं, शिरोभूतलिपिमित्यर्थः। लेखहारकं—पत्रवाहकम्। अप्राक्षीत्—अपृच्छत्।

(१०४) भद्रेति सम्बोधनं, हे भद्र!—साधो! भद्रं—कुशलम्। अशेषेति।—अशेषाणां—समस्तानां, भुवनानां—जगतां, निष्कारणः,—अहेतुकः बन्धुः तस्य। तत्रभवतः,—पूज्यस्य। "अतिदूरं" इत्यनेन सर्व्वमेव आत्मनः प्रभावातिशय्यं द्योतितम्।

—"एष खलु स्वामिनो माननीयस्य लेखः प्रहितः" इति विमृश्य च अर्पयत्। अथ बाणः सादरं गृहीत्वा स्वयमेव अवाचयत्,—"मेखलकात् सन्दिष्टम् अवधार्य्य (१०५) फल-प्रतिबन्धो धीमद्भिः अपहरणीयः कालातिपात इति (१०६)एतावत् अत्र अर्थजातम्; इतरत् वार्त्तासंवादनमात्रकम्"। अवधृतलेखार्थश्च समुत्सारितपरिजनः सन्देशं पृष्टवान्। मेखलकः तु अवादीत्,—एवम् आह मेधाविनं स्वामी,—जानाति एव मान्यः यथा (१०७) एकगोत्रता वा, समानजातिता वा, समं संवर्द्धनं वा, एकदेशनिवासो वा, दर्शनाभ्यासो वा, परस्परानुरागश्रवणं वा, (१०८) परोक्षोपकारकरणं वा, समान-शीलता वा, स्नेहस्य हेतवः। त्वयि तु विना कारणेन अदृष्टेऽपि

["अतिदूरे" इत्यत्र "नातिदूरे" इति पाठान्तरम्]। स्वामिनः,—अस्मत्प्रभोः, [अत्र कर्त्तरि विवक्षया षष्ठी, निष्ठायां तद्विषेधात्; अन्यथोपपद्यमाने शिरोवेष्टनन्यायमनु-धावति] माननीयस्य—सम्मानार्हस्य, प्रहितः,—प्रेषितः, भवतः सकाशं इति शेषः। अर्पयत्—दत्तवान्, लेखमिति शेषः। मेखलकात्—तदाख्यात प्रागुक्तात् पत्रवाह-कात। सन्दिष्टं—वाचिकम।

(१०५) फलेति।—फलं—कार्य्यं, प्रतिबध्नाति—रुणद्धीति तथोक्तः, कार्य्य-व्याघातक इत्यर्थः। कालातिपातः,—कालविलम्बः, अपहरणीयः,—त्यक्तव्यः, अकरणीय इति यावत।

(१०६) एतावत्—एतत्पर्य्यन्तम्। अत्र—लेखमालिकायाम। अर्थजातं—प्रतिपाद्यवस्तु, अभिधेयविषय इत्यर्थः। इतरत्—अन्यत्, वार्त्तासंवादनमात्रकं—वृत्तान्तालोचनमात्रम। अवधृतलेखार्थः,—विदितलिपिनिबद्धवृत्तान्तः। मेधाविनं—प्रकृष्टधीशक्तिसम्पन्नम। स्वामी—अस्माकं प्रभुः। मान्यः, भवानिति शेषः।

(१०७) एकगोत्रता—एककुलोत्पत्तिः। अत्र "एकगोत्रता" इत्यादि स्नेह कारणम् उत्तरोत्तरं हीनबलं ज्ञेयम्। समानजातिता—तुल्यजातित्वम। समं—सह, सम्वर्द्धनम। एकदेशनिवासः,—एकस्थानस्थितिः। दर्शनाभ्यासः,—पुनः पुन साक्षात्करणम। परस्परानुरागश्रवणम—अन्योऽन्यसद्भावाकर्णनम।

(१०८) परोक्षोपकारकरणं—साक्षात्काराभावेऽपि उपकारकरणम। समान-

प्रत्यासन्ने बन्धाविव बद्धपक्षपातं किमपि स्निह्यति मे हृदयं, दूरस्थेऽपि इन्दोरिव कुमुदाकरे। (१०९) भवन्तम् अन्तरेण अन्यथा चक्रवर्त्ती दुर्ज्जनैः ग्राहित आसीत्, (११०) न च तत् तथा। (१११) न सन्त्येव ते, येषां सतामपि मतां न विद्यन्ते मित्रोदासीनशत्रवः। (११२) शिशुचापलापराचीनचित्तवृत्तितया च भवतः केनचित्

शालता—ममत्वभावत्वम्। स्नेहस्य—प्रणयबन्धनस्य। प्रत्यासन्ने—निकटवर्त्तिनि। बन्धाविव—सुहृदीव। बद्धपक्षपातं—बद्धस्नेहम्। कुमुदाकरे—वैरवनिचयीत्यादिभणि, ("आकरो निवहोत्पत्तिस्थानयोरुषु कथ्यते" इति मेदिनी)।

(१०९) भवन्तमिति।—भवन्तं—त्वाम्, अन्तरेण—विना, तवानुपस्थितेः त्वां लक्ष्यीकृत्येत्यर्थः, दुर्ज्जनैः,—दुष्टैः लोकैः, चक्रवर्त्ती—सम्राट्, अन्यथा—अन्येन प्रकारेण, ["अन्यथा चक्रवर्त्ती" इत्यत्र "अन्यथा चान्यथा चायं चक्रवर्त्ती" इति पाठः,—अयम्—एषः, भङ्गाता इति भावः, चक्रवर्त्ती अन्यथा च अन्यथा च—प्रकृतं गोपायित्वा अन्येन बहुविधेन अप्रकृतेनेत्यर्थः। एतेन किञ्चिदपि सम्भवतीति प्रकटयति]। ग्राहितः,—अवबोधितः, आसीदित्यन्वयः। राजाधिराजस्य नृपौ भवतो दौर्बल्यात्कौशलात राज्ञः त्वयि मनोभङ्गः कारितः इति भावः। अत्र "आसीत्" इति भूतप्रयोगात्, अधुना तु दुर्ज्जना विफलाभिसन्धा जाता इति प्रकटीकृतम्; एतत्तु उपरिष्टात् "तथेति च प्रतिपन्नम्" इत्यादिवचसा व्यक्तीभविष्यति।

(११०) न चेति।—तत्—राज्ञस्त्वयि मनोऽन्यथात्वमिति भावः, तथा—तादृशं, न च—नैवेत्यर्थः। त्वयि राज्ञो मनोविकृतिः न जातेति भावः। अथवा,—तत्—तैः कृतमन्यथा वर्णनं, तथा—तादृक्, न, मिथ्येवेत्यर्थः। तथात्वे तु बाणस्य दुर्वृत्तता प्रसज्येत, कृष्णस्यापि बाणे तथाविधः अनुरागः नृपतिवच्चलत्व दोषायैव स्यादिति।

(१११) न सन्त्येव ते।—ते—मानवाः, न सन्त्येव—नैव विद्यन्ते इत्यर्थः। सतामपि सतामित्यादि।—सतां—साधूनां, सदाचारवतामित्यर्थः, सतां—विद्यमानानामपि, मित्रोदासीनशत्रवः,—मित्राणि—सुहृदः, उदासीनाः,—मध्यस्थाः, शत्रवः,—विद्वेषिणः, न विद्यन्ते—न तिष्ठन्ति, सर्वेषामेव मानवानां मित्रोदासीनशत्रवो विद्यन्ते इत्यर्थः।

(११२) शिशुचापलेति।—शिशोर्यापल्यं—शैशवचापल्यं, बाल्यकालिकचञ्चलतेति यावत्, तत्र अपराचीना—अपराङ्मुखी, चित्तवृत्तितया तया, तथा,

(११३) असहिष्णुना यत्किञ्चित् असदृशम् उदीरितम्, इतरो लोकः तथैव तत् गृह्णाति, वक्ति च। (११४) सलिलानि इव गताऽनुगतिकानि लोलानि खलु भवन्ति अविवेकिनां मनांसि। (११५) बहुसुखश्रवणनिश्चलीकृतनिश्चयः किं करोतु पृथिवीपतिः? तत्त्वान्वेषिभिश्च अस्माभिः दूरस्थितोऽपि (११६) प्रत्यक्षीकृतोऽसि। विज्ञप्तः चक्रवर्त्ती त्वदर्थम् ;—यथा प्रायेण प्रथमे वयसि सर्वस्य एव चापलैः शैशवम् अपराधि इति। तथेति च

तात्कालिकचित्तवृत्तेः ईषदन्यमार्गप्रवृत्ततया इति भावः। ["चित्तवृत्तितया" इत्यत्र "चेतोवृत्तितया" इति पाठान्तरम्]।

(११३) असहिष्णुना—सोढुमशक्नुवता, विदुषिणा वा ; असदृशम्—अयुक्तं, विरुद्धमित्यर्थः, उदीरितम्—उक्तम्। इतरो लोकः,—साधारणो लोको नीचो वा, तत्—असदृशं वाक्यं, तथि प्रयुक्तमिति भावः, तथा एव—सत्यमेव, गृह्णाति—अवबुध्यते, वक्ति च—कथयति च।

(११४) सलिलानि इवेति।—अविवेकिनां—विवेकशून्यानां जनानां, मनांसि सलिलानि इव—जलानि इव, गतं—गमनम्, अनुगतिं—पश्चाद्गमनं च कुर्वन्ति यानि तानि, गताऽनुगतिकानि, ["गताऽनुगतिकानि" इत्यत्र "गताऽगतिकानि" इति पाठे,—गमनागमनशीलानि, न तु दृढानि इति भावः] अत एव लोलानि—चपलानि ; इतरजनानाम् अयमेव स्वभावः खलु, यत्, ते स्थिरतया कुत्रापि दीर्घकालं स्थातुं न शक्नुवन्तीति भावः।

(११५) बहुसुखेति।—बहूनां सुखानां—भूरीणां श्रवणसन्तर्पणानां हृद्यानां वचसां, कर्णेजपानां चाटुवाचामित्यर्थः, श्रवणेन ["बहुसुखश्रवण—" इत्यत्र "बहुसुखश्रवण—" इति पाठे,—बहूनां, जनानामिति शेषः, सुखेभ्यः श्रवणात्] निश्चलीकृतः निश्चयः,—अवधारणं, यस्य तथाभूतः, दुर्ज्जनाः सततं राज्ञां निकषा बहून् सन्तोषकरान् विषयान् कीर्त्तयन्ति, तेन असौ समाकृष्टचेताः वितथान्यपि तान्येव तथ्यानि तेषां वचनानि इति अवधारयति, नाव तत्त्वमनुसन्दधातीति भावः।

(११६) प्रत्यक्षीकृतः,—साक्षात्कृतः, परिचित इति भावः। प्रथमे वयसि—यौवनप्रारम्भे इत्यर्थः। चापलैः,—चपलकर्म्मभिः, शैशवं—बाल्यम्, अपराध्यतीति अपराधि—सदोषं भवति इति यावत्।

(११७) प्रतिपन्नं स्वामिना। अतो भवता राजकुलम् अकृतकालक्षेपम् आगन्तव्यम्। अवकेशीव अदृष्टपरमेश्वरो (११८) बन्धुमध्यम् अधिवसन् नासि मे बहुमतः; न च (११९) सेवावैषम्यविषादिना वा परमेश्वरोपसर्पणभीरुणा भवता भवितव्यम्। यतो यद्यपि,—

स्वेच्छोपजातविषयोऽपि न याति वक्तुं
दृष्टीति मार्गणशतैश्च ददाति दुःखम्।
मोहात् समुत्क्षिपति जीवनमप्यकाण्डे
कष्टं मनोभव इवेश्वरदुर्विदग्धः॥ ३॥

(११७) प्रतिपन्नं—विदितं, स्वीकृतमित्यर्थः। स्वामिना—प्रभुणा, राज्ञेत्यर्थः। अकृतकालक्षेपं—कालविलम्बमकृत्वेत्यर्थः। अवकेशीव—निष्फलतरुरिव, ("वन्ध्या फलीऽवकेशी च" इत्यमरः) अदृष्टपरमेश्वरः,—न दृष्टः परमेश्वरः,—राजाऽधिराजः, रविश्च येन तथाभूतः। अदृष्टरविस्तरुमध्यगतश्छायाप्रधानः अवकेशी अपि न कस्यचित् प्रियः।

(११८) बन्धुमध्यं—बन्धूनां—ज्ञातीनां, ("सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः" इत्यमरः) मध्यम् अधिवसन्—अधितिष्ठन्, मे—मम, [वर्त्तमाननिष्ठायोगात् कर्त्तरि षष्ठी] बहुमतः,—बहाहृतः, न असि—न भवसि; यथा रविकिरणालाभे तरुः निष्फलो भवति, तथा राजानुग्रहं विना भवादृशस्य निष्फला स्थितिरिति भावः।

(११९) सेवेति।—सेवायां—परिचर्य्यायां, राज्ञ इति भावः, यत् वैषम्यं—क्लेशातिशय इति यावत्, तेन विषादतीति तेन। परमेश्वरोपसर्पणभीरुणा—परमेश्वरस्य—चक्रवर्त्तिनः, उपसर्पणम्—आनुगत्यं, तस्माद् भीरुः तेन, कदाचित् कथमपि अपराधे दण्डशङ्कां कुर्व्वता इत्यर्थः।

दृष्टान्तप्रभोः मर्य्यादाऽभावमाशङ्कमानाय बाणाय सदुपदिशन् क्लृप्तः स्वकीयस्वामिनं प्रशंसितुं प्रसङ्गात् दुर्विनीतप्रभोः स्वरूपमुपवर्णयन्नाह, स्वेच्छेति।—ईश्वरदुर्विदग्धः,—दुर्विदग्धः,—अपण्डितः, ईश्वरः,—प्रभुः, नियन्तानुग्रहसमर्थः इत्यर्थः, अविवेकी नृपतिरिति यावत्, [आकृतिगण्यादित्वात् वैकल्पिकः परनिपातः], अन्यत्र, —ईश्वरेण—हरेण, दुर्विदग्धः,—दुः,—दुःखं कष्टकरं यथा यथा, वि—विशेषेण, दग्धः,—भस्मीकृतः इत्यर्थः, नेत्रजन्मना वह्निनेति शेषः, मनोभव इव—काम इव,

कष्टं—क्लेशहेतुरित्यर्थः, भवतीति शेषः ; अल्पबुद्धेः प्रभोः सेवा अतीव क्लेशकरीति भावः। पादत्रयेण अविवेकिनः प्रभोः सेवायाः कामप्रसरनिरोधस्य च दुःशकत्वमुपपादयितुमाह, स्वेच्छेति।—दुर्विनीतः मूर्खश्च प्रभुः, स्वेच्छया—निजाभिलाषेण, उपजाताः,—उपस्थिताः, विषयाः,—भोग्यवस्तूनि, सकर्पूरचन्दनवनितादयः अर्था इति यावत्, यस्य तथाभूतः, यथेच्छं व्ययोपभोगयोग्यसम्पदोऽधिगच्छन्नपीत्यर्थः ; अन्यत्र,—स्वेच्छया—यथेष्टम्, उपजाताः,—उपगताः, विषयाः,—लक्ष्याणि यस्य तथाभूतः, यथेच्छं कामिजनरूपाणि लक्ष्याणि विध्यन्नपीत्यर्थः, देहीति—प्रयच्छ इति, वक्तुं—कथयितुं, न याति—न ददातीत्यर्थः, [धातूनामनेकार्थत्वात् अत्र याधातुर्दानार्थः] याचकं किञ्चित् देहीति कथयति सति विरज्यते इति भावः ; अन्यत्र,—देहीति—देहवान् इति, वक्तुं—वचनम्, [अत्र तुमर्थोऽविवक्षितः, धात्वर्थमात्रमेव विवक्षितम्] न याति—न गच्छति, न प्राप्नोति इत्यर्थः ; यद्वा,—वक्तुं न याति—शरीरोक्तियोग्यतां न प्राप्नोतीत्यर्थः, अनङ्गत्वात् इति भावः ; मार्गणशतैः,—याञ्चाशतैः, पुनः पुनः याञ्चाभिरित्यर्थः ; कारुण्यपूर्णाः महान्तस्तु न तथा, ते तु अकिञ्चनानां दैन्योक्तिं सोढुमशक्नुवन्तः प्रार्थितव्यसमाकर्णात् प्रागेव तेषाम् अप्रार्थितमपि अकातरं विसृजन्ति इति विशेषः ; अन्यत्र,—शरशतैः, ("—मार्गणो याचके शरे। याञ्चान्वेषणयोः क्लीवम्—" इति मेदिनी) दुःखं ददाति—क्लेशं जनयति, एकत्र,—अनङ्गीविभ्यः, अन्यत्र,—कामिभ्य इति शेषः। यद्वा—देहीति पदम् अविवेकिप्रभुपक्षे मार्गणशतैरित्यनेनान्वितं कृत्वा व्याख्यातव्यं, देहीति याचकानां याञ्चाशतैः तेभ्यः नियतं दुःखं ददातिः, न तु किञ्चित् तेभ्यः अर्पयति इत्यर्थः ; अत्र पक्षे वक्तुमिति पदं धातूनामनेकार्थत्वात् भोक्तुमिति कृत्वा भोगार्थकत्वेन व्याख्यातव्यमिति सङ्क्षेपः ; अकाण्ड—सहसा, कारणान्तरे असत्यपीति यावत्, मोहात्—अज्ञानात्, यद्वायथं दोषादोषयोः अनवबोधात् इत्यर्थः, स्वस्य विचारशक्तेरभावादिति यावत् ; अन्यत्र,—मोहात्—स्वविकारजनितं मोहमुत्पाद्येत्यर्थः, [ल्यब्लोपे पञ्चमी] जीवनमपि—प्राणानपि, एकत्र,—अनङ्गीविनाम्, अन्यत्र,—कामिनामिति शेषः ; समुत्क्षिपति—समुत्कर्षति, दण्डयति इत्यर्थः ; अन्यत्र,—हरतीत्यर्थः। ["समुत्क्षिपति" इत्यत्र "समाक्षिपति" इति पाठे,—समाकर्षति, दण्डयतीत्येवार्थः] अत्र मूर्खदुर्विनीतेश्वरस्य मनोभवेन सह वैधर्म्योक्तिविरहितसाम्यकथनादुपमाऽलङ्कारः, सा च देहि-मार्गणादिपदानां श्लिष्टतया श्लेषेणानुप्राणितेति बोध्यम्। अयमेव च श्लोकः श्लेषालङ्कारविचारावसरे साहित्यदर्पणे,—"कष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः" इति चतुर्थपादमात्रं विपरिवर्त्य उदाहृतो विश्वनाथेन ; अस्मिंस्तु पाठे,—प्रसूनविशिखः,—कामः, तथा अल्पबुद्धिः,—अबोधः,

तथापि (१२०) अन्ये ते भूपतयः, अन्य एव अयं न्यक्कृत-नृग-नल-निषध-नहुषाम्बरीष-दशरथ-दिलीप-नाभाग-भरत-भगीरथ-ययातिः अमृतमयः स्वामी। न अस्य (१२१) अहङ्कारकालकूटविषदग्धदुष्टा दृष्टयः, न (१२२) दर्पगदगुरुगर-गलग्रहगद्गदा गिरः, न (१२३) अतिस्मयोष्मापस्मारविस्मृत-स्थैर्याणि स्थानकानि, न (१२४) उद्दामदर्पदाहज्वरवेग-

प्रभुः,—स्वामी चेत्यभयमपि इत्यर्थः, कष्टं—क्लेशकारणमित्यर्थः, अन्यत् सर्वं पूर्ववत्। अस्मिंस्तु पक्षे प्राकरणिकाप्राकरणिकयोरत्यन्तभिन्नप्रमुखविशेषयोरेकधर्माभिसम्बन्धाद्दीपकमलङ्कारः, तदपि अधानप्राणतां बीभ्यम। वसन्ततिलकं वृत्तम् ॥ ३ ॥

(१२०) अन्ये ते भूपतय इति।—ते—तादृशा इत्यर्थः, दर्पदग्धा इति भावः, भूपतयः,—राजानः, अन्ये—अपरे, अस्मात् राज्ञः पृथगित्यर्थः। अयं—चक्रवर्ती इत्यर्थः। न्यक्कृतेति।—न्यक्कृताः,—अधःकृताः, नृगादयो येन तथाभूतः, नृगनलादीन् अतिधार्मिकान् भूपतीन् निजधर्मशीलतया तिरस्करोति इत्यर्थः। अमृतमयः,—अमृतपूर्णः, देवतुल्य इति धावत। अत्र "अमृतमयः" इति विशेषणं साभिप्रायम्; यतः अहङ्कारदर्पादिक कालकूटगदादिना दूषयति, अतः अहङ्कारादीनामल्पताभावप्रकटनेनास्याश्च राज्ञः अमृतमयत्वं प्रदर्शयति; यः खलु अमृतमयः, तस्य कालकूटादिसम्बन्धः सम्भावयितुं न शक्यते इति। अस्य—चक्रवर्तिनः।

(१२१) अहङ्कारेति।—अहङ्कार एव कालकूट—विषः, तेन दग्धाः,—अत एव दुष्टाः। ["—विषादग्धदुष्टा" इति पाठान्तरम्]। दृष्टयः,—दर्शनानि।

(१२२) दर्पेति।—दर्प एव गदः,—रोगः, ["दर्पगद—" इत्यत्र "गर्व—" इति पाठान्तरम्] स एव गुरुः,—महान्, गरः,—विषं, तेन गलस्य—कण्ठस्य, यः ग्रहः,—ग्रहणम, अवरोधनमित्यर्थः, तेन गद्गदाः,—अस्पष्टाक्षरा इत्यर्थः। ["—गलग्रहगदगद्गदा" इति पाठान्तरम्]। गिरः,—वाचः।

(१२३) अतिस्मयेति।—अतिस्मयः,—अतिगर्व एव, उष्मा—सन्तापः, स एव अपस्मारः,—वातव्याधिविशेषः, तेन विस्मृतं स्थैर्यं—निश्चयः येषां तथाभूतानि; अपस्मारेणास्य सन्तापकादिति अभेदाध्यासबीजं, तेन च धैर्यच्युतिरपि भवतीति। स्थानकानि—स्थितयः।

(१२४) उद्दामेति।—उद्दामेन—उत्कटेन, दर्पेण उत्पादित इत्यर्थः, यो

विक्लवा विकाराः, न (१२५) अभिमानमहामन्निपातनिर्मिताङ्गभङ्गानि गतानि, न (१२६) मदार्दितवक्रीकृतौष्ठनिष्ठ्यूतनिष्ठुराक्षराणि जल्पितानि। तथा च,—(१२७) अस्य विमलेषु साधुषु रत्नबुद्धिः, न शिलाशकलेषु। (१२८) मुक्ताधवलेषु गुणेषु

दाहज्वरः, तस्य वेगेन—रयेण, विक्लवाः,—व्याकुलाः। विकाराः,—चित्तविकृतयः, मनसो भावान्तराणि इत्यर्थः।

(१२५) अभिमानेति।—अभिमानः,—अहमेव महान् इत्याकारज्ञानमेव, महान् सन्निपातः,—विदोषजनितो व्याधिभेदः, तेन निर्मिताः,—जनिताः, अङ्गानाम्—एकत्व स्वजनानां, तेषामहङ्कारदर्शनेन विरागोत्पादात, अपरत्व तु अवयवानां, भङ्गाः,—विकृतिविशेषाः येषु तथाभूतानि। गतानि—गमनानि।

(१२६) मदेति।—मदः,—सौभाग्ययौवनाद्यवलेपजो विकारविशेषः, तथा चोक्तं दर्पणे,—"मदो विकारः सौभाग्ययौवनाद्यवलेपजः" इति, तेन अर्दितः,—पीडितः, आक्रान्त इत्यर्थः, अत एव वक्रीकृतः; यद्वा,—मद एव अर्दितः,—वातव्याधिभेदः, तेन वक्रीकृतः; तथा चोक्तं,—शिरोनासौष्ठचिबुकललाटेक्षणसन्धिगाः। अर्दयन्ति नरं वक्रमर्दितं जनयन्ति च॥ वक्रीभवति वक्रार्दम—" इत्यादि, यः ओष्ठः, तस्मात निष्ठ्यूतानि—निर्गलितानि, निष्ठुराणि—दारुणानि, कर्कशानि वा, अक्षराणि—वर्णाः, कवर्गादय इत्यर्थः, येषु तानि; मदवशात पुरुषस्य यथेच्छं वाक् प्रयोगाद्यदर्शनात अयथापुरुषभाषित्वाच्च तेन मदेन सह वातव्याधेरपि तथाभूतत्वादभेदाध्यासः। जल्पितानि—वचनानि। तथा च—तमेवार्थं ज्ञापयति इत्यर्थः।

(१२७) अस्य—चक्रवर्तिनः। विमलेषु—अनघेषु, अपापेषु इत्यर्थः; अन्यत्र,—निर्मलेषु, भास्वरतया मुच्छायेषु इत्यर्थः, साधुषु—सज्जनेषु, रत्नबुद्धिः,—रत्नानि एते इति बुद्धिः, ज्ञानमित्यर्थः, शिलाशकलेषु—प्रस्तरखण्डेषु, हीरकादिषु इति यावत, (अत्र हीरकमरकतादिषु इति वक्तव्ये "शिला" इत्यादि पदं साधुषु आदरातिशयप्रकटनार्थमिति बोद्धव्यं) न रत्नबुद्धिरिति शेषः। अत्र अप्रस्तुत विमलत्वरूपसाधारणधर्मवशात् साधुषु निरूपितायाः रत्नबुद्धेः तथाविधेषु अन्येषु शिलाशकलेषु व्यपोहनात् परिसङ्ख्याऽलङ्कारः; तदुक्तं दर्पणे,—"प्रश्नादप्रश्नतो वाऽपि कथितादे वस्तुनो भवेत्। तादृगन्यव्यपोहश्चेत् परिसङ्ख्या" इति। एवमुत्तरत्र।

(१२८) मुक्ताधवलेषु—मौक्तिकवत् विशदेषु, गुणेषु—विद्याविनयादिषु;

प्रसाधनधीः, न आभरणभारेषु। (१२९) दानवत्सु कर्म्मसु (१३०) साधनश्रद्धा, न करिकटेषु। सर्व्वाग्रेसरे यशसि महाप्रीतिः, न जीवितजरत्तृणे। (१३१) गृहीतकरासु आशासु प्रसाधनाभियोगः, न (१३२) निजकलत्रचर्म्मपुत्रिकासु। गुणवति धनुषि महायत्नबुद्धिः, न पिण्डोपजीविनि सेवकजने। अपि च,—अस्य (१३३) मित्रोपकरणम् आत्मा, भृत्योपकरणं प्रभुत्वं, परिजनोपकरणं वैदग्ध्यं,

अन्वयः,—मुक्ताभिः धवलेषु, गुणेषु—सूत्रेषु, मौक्तिकहारेषु इत्यर्थः; प्रसाधनधीः,—अलङ्कारबुद्धिः। यदा,—प्रसाधनं—प्रकृष्टम अर्ज्जनं, गुणार्ज्जनमेव अर्ज्जनं, न तु आभरणार्ज्जनम इति भावः। आभरणभारेषु—भारभूतेषु आभरणेषु—अलङ्कारेषु, कटककुण्डलादिसमूहेषु वा इत्यर्थः, न।

(१२९) दानवत्सु—दानयुक्तेषु, धनदानप्रायेषु इत्यर्थः; अन्यत्र,—मदयुक्तेषु, ("दानं गजमदे त्यागे पालनच्छेदयोर्द्वयोः" इति मेदिनी)।

(१३०) साधनश्रद्धा—निष्पादनानुरागः; अन्यत्र,—साध्यते अनेन इति साधनं—सैन्यं, सेनाङ्गमित्यर्थः, तादृशविषयिणी श्रद्धा, सेनाङ्गैर्न युद्धादिकर्म्मसम्पादनबुद्धिरित्यर्थः। करिकटेषु—हस्तिगण्डेषु, दानवत्—मदजलवर्षिषु इत्यर्थः, साधनश्रद्धा—सम्पादनानुरागः न; मदसूचा हस्तिनां सङ्गानुरागो न इत्यर्थः। जीवितजरत्तृणे—जीवनरूपे जीर्णे—क्षणभङ्गुर इति भावः, तृणे महाप्रीतिः,—महानुरागो न इत्यर्थः।

(१३१) गृहीतेति।—गृहीतः करः,—स्वयार्ज्जितो भागः याभ्यः तथाविधासु; अन्यत्र,—गृहीतः,—धृतः, करः,—पाणिः याभिः तासु; आशासु—दिक्षु, चेतसः अनधिगतविषयतृष्णासु वा, प्रसाधनाभियोगः,—वशीकरणप्रयासः, रञ्जनानुरागो वा। ["प्रसाधनाभियोगः" इत्यत्र "प्रमाधनताभियोगः" इति पाठान्तरम]।

(१३२) निजेति।—निजकलत्राणि—स्वीयभार्याः, [न तु परकीया इति ध्वनिः] तान्येव चर्म्मपुत्रिकाः,—चर्म्मावच्छादितपुत्तलिकाः तासु, न। गुणवति—मौर्व्वीसमन्विते; अन्यत्र,—विद्याविनयादिसम्पन्ने। पिण्डोपजीविनि—अन्नदानेन भरणीये इति भावः।

(१३३) मित्रोपकरणं—सुहृद्रूपम् उपकरणम्—उपकारकं वस्तु, आत्मा—स्वस्वरूपम्। आत्मप्रभावेण सर्व्वमसौ संसाधयति स्म, न तु परमुखमपेक्षाञ्चक्रे इति

बान्धवोपकरणं लक्ष्मीः, (१३४) कृपणोपकरणम् ऐश्वर्य्यं, द्विजोपकरणं सर्व्वस्वं, (१३५) सुकृतसंस्मरणोपकरणं हृदयं, (१३६) धर्म्मोपकरणम् आयुः, साहसोपकरणं शरीरं, (१३७) असिलतोपकरणं पृथिवी, विनोदोपकरणं राजकं, प्रतापोपकरणं प्रतिपक्षः। (१३८) न अस्य अल्पपुण्यैः

आत्मबान्धवा मित्रसमीत्यर्थः, न परबुद्ध्याचालित इति भावः। भृत्योपकरणं—भृत्यानाम् उपकारसाधनं, प्रभुत्वं—प्रभावः; अनुचरादीनां दानादिसम्पादनमेवास्य प्रभुत्वफलम इति भावः। पण्डितोपकरणं—पण्डितानाम् उपकारसाधनं, वैदग्ध्यं—विद्यावत्त्वं, वैचक्षण्यं वा। बान्धवोपकरणं—बान्धवानाम् उपकारसाधनं, लक्ष्मीः,—सम्पदित्यर्थः; सम्पदा बान्धवा उपक्रियन्ते इति भावः।

(१३४) कृपणोपकरणं—कृपणानां—दीनानाम्, उपकारसाधनं—पोषणम् इत्यर्थः, ऐश्वर्य्यं—सम्पदित्यर्थः; न हि द्विजातिवटवे सर्व्वस्वमर्हन्ति, किन्तु दारिद्र्यमोचनोपयोगि इति। अस्य ऐश्वर्य्यं दरिद्राणां दारिद्र्यमोचनार्थं, तेषां पोषणस्यैवोचित्यात्। द्विजोपकरणं—द्विजाना—ब्राह्मणानाम्, उपकारसाधनं, सर्व्वस्वं—सर्वं धनम्। अत्र सर्व्वस्वपदेन तदर्जनीयं कौतुकमप्युच्यते, तत्सर्व्वमपि विप्रा एव लब्धुमर्हन्ति, तदतिरेकेण अन्येषाञ्च तत्रानर्हत्वादिति बोध्यम।

(१३५) सुकृतेति।—सुकृतस्य—कृतोपकारस्य संस्मरणं, तस्य उपकरणम्—उपकारकं, हृदयं—चित्तम्; कृतशौर्यमिति भावः।

(१३६) धर्म्मोपकरणं—धर्म्मोपार्ज्जनसाधनमित्यर्थः, आयुः,—जीवनकालः इत्यर्थः। धर्म्मार्ज्जनार्थमेवायं जीवति इति भावः। साहसोपकरणं—साहसा—प्रागविचिन्त्य बलेन, क्रियमाणं कर्म्म साहसं, तस्य उपकरणम्—उपकारसाधनम्।

(१३७) असीति।—असिलता—खड्गयष्टिः, तस्या उपकरणम्—उपार्ज्जनवत्त्वित्यर्थः; खड्गबलेनैवानेन पृथिवी आयत्तीकृता इति भावः। विनोदोपकरणं—विनोदस्य—प्रीतेः, उपकरणम्—उपकारसाधनं, राजकं—राजचक्रं, राज्ञां समूह इत्यर्थः; अनुगतानां राज्ञां साहचर्य्येणैव, धर्म्मानुसारेण राज्यपालनेन वा अस्य प्रीतिमनुभवति इति भावः। प्रतापोपकरणं—प्रतापस्य—"स प्रतापः प्रभावश्च यस्तेजः क्रोधदम्भजम्" इत्युक्तलक्षणस्य, उपकरणं—ख्यापनसाधनमिति भावः, प्रतिपक्षः,—शत्रुः; शत्रुविजयेनैवास्य प्रतापोपलब्धिरिति भावः।

(१३८) नास्येति।—अल्पपुण्यैः,—अधन्यैः, अल्पभाग्यैरिति भावः, ("अल्प-

अवाप्यते सर्व्वातिशायिसुखरमप्रसूतिः पादपल्लवच्छाया" इति। श्रुत्वा च तमेव चन्द्रसेनं समादिशत्,—"कृतकशिपुं विश्रान्त-सुखिनम् एनं कारय" इति।

अथ गते च तस्मिन्, (१३९) पर्य्यस्ते च वासरे, (१४०) मङ्क्षुमानरक्तपङ्कजसम्पुटपीयमाने इव क्षयिणि क्षामतां व्रजति बालवायसारुणे पराङ्मुखातपे, (१४१) शिथिलित-निजवाजिजवे (१४२) जपाऽऽपोडपाटले अस्ताचलशिखर-

---

पुष्पे" इत्यनेन पादयोः कल्पद्रुत्वं व्यज्यते, पुण्यबलादेव तत्प्राप्तेः)। अस्य—समाजः, सर्व्वातिशायी—सर्व्वस्य उत्कर्षवानित्यर्थः, यः सुखरसः,—सुखमेव रसनधर्म्मितया रसः, तस्य प्रसूतिः,—उत्पादकत्वम्, सुभगानाम् आनन्दास्वादजननोत्यर्थः; यद्वा,—आनन्दास्वादोत्पादितर्यस्याः तथाभूता। पादपल्लवच्छाया—पादपल्लवस्य—चरणकिसलयस्य, छाया—अनातपः, आश्रय इत्यर्थः। अत्र पादपल्लवस्य छायावत्त्वं बहूनां जनानामाश्रयणीयत्वात् उपचर्य्यते। कृतकशिपुं—रचितशयनीयम्; यद्वा,—सम्पादितभोजनाच्छादनव्यापारम्; तथा चोक्तं,—"भोजनाच्छादने सांडकभे कशिपु-रुच्यते" इति। ["कृतकशिपुम्" इत्यत्र "कृतसेवम्" इति पाठान्तरम्]।

(१३९) पर्य्यस्ते—अवसिते।

(१४०) मङ्क्षुमानेति।—मङ्क्षुमानः,—मन्थरान्, यः रक्तपङ्कजसम्पुटः,—रक्तपद्मरूपसमुद्गकः, तेन पीयमाने इव—ग्रस्यमाने इव, क्षयिणि—क्षयोन्मुखे। क्षामतां—क्षीणतां, व्रजति—गच्छति, वासरे—दिवसे। बालवायसारुणे—बालः,—सद्यो-जातः, यो वायसः,—काकः, तद्वत् अरुणः,—रक्तवर्णः, तस्मिन्। पराङ्मुखातपे—पराङ्मुखः,—विमुखतामापाद्यमानः, आतपः,—मयूखाः यस्य तथोक्ते। ["बाल-वायसारुणे पराङ्मुखातपे" इत्यत्र "बालवायसास्यारुणे अपराङ्मातपे" इति पाठान्तरे,—बालवायसस्य आस्यवत्—मुखवत् अरुणे इत्यर्थः]। बालवायसास्यस्य ईषदरु-णिमयोगात् तेन अस्ताचलगमनोन्मुखरवेः सादृश्यस्य सुखावबोधात् वाङ्मात्रेण विम्लानायमानायाः दिशः साम्यं सुघटमेवेति क्षेयम्।

(१४१) शिथिलितेति।—शिथिलितः,—[अशिथिलः शिथिलः कृतः इति चुरादौ सृशादित्वात् क्तौ निष्पन्नायां रूपसत्तम्] खर्व्वीकृत इत्यर्थः, निजानां वाजिनाम्—अश्वानां, सप्तानामिति भावः, जवः,—वेगः, येन तथोक्ते।

(१४२) जपेति।—जपा—मूर्य्यप्रियपुष्पभेदः, तस्य आपीडः,—स्तवकः, तद्वत्

स्खलिते खञ्जतीव कमलिनीकण्टकक्षतपादपल्लवे पतङ्गे, (१४३) पुरः परापतति प्रेङ्खदन्धकारलेशलम्बालके शशिविरहशोकश्याम इव श्यामामुखे, कृतसन्ध्योपासनः शयनीयम् अगात्; अचिन्तयच्च एकाकी,—"किंकरोमि? (१४४) अन्यथा सम्भावितोऽस्मि राज्ञा। निर्निमित्तबन्धुना च सन्दिष्टमेवं क्षणेन। कष्टा च सेवा, विषमञ्च भृत्यत्वम्। अतिगम्भीरं महत् राज-

पाटल—रक्त। अस्ताचलशिखरस्खलित—पश्चिमाचलचूडावलम्बिनि इत्यर्थः। अस्तमनोन्मुखस्य रवेः मरीचीनां चयात् गतमान्द्यमनुभूयते इति तस्य शिखरस्खलितत्वं सम्भावितम्; अत एव, खञ्जतीव—खञ्ज इव आचरतीव, [खञ्जशब्दादाचारार्थे क्वौ सति प्रयोगः] स्खलतीवेत्यर्थः, अस्ताचलस्य उपलविषमत्वात् बन्धुरभूमौ स्खलनात् तपनस्य खञ्जप्रायत्वमुत्प्रेक्षितमिति। कमलिनीति।—कमलिन्याः कण्टकैः क्षतः,—विद्धः, पादपल्लवः,—चरणकिसलयः, किरणविस्तरस्य यस्य तथाभूते, पतङ्गे—सूर्ये। ["पतङ्गो पक्षिसूर्यौ च" इत्यमरः]। नायकं नायिकाम् अभिगच्छति नायिकायाः प्रणयकोपजनितकप्रहारविशेषेण चरणक्षतिसम्भवात् नायकस्य स्खलनमुपपद्यते इति च दृष्टकामुकव्यवहारप्रतीतेः समासोक्तिरलङ्कारोऽत्र ध्वन्यते]।

(१४३) पुरः,—पूर्वस्यां दिशि इत्यर्थः, परापतति—आगच्छति। प्रेङ्खदिति।—प्रेङ्खन्तः,—आविर्भवन्तः, अन्धकारलेशाः,—तिमिरबिन्दवः एव, लम्बाः,—लम्बमानाः, अलकाः,—चूर्णकुन्तला यस्मिन् यस्य वा तथाभूते; यथा पतिवियोगविधुरा हि सती रमणी मुक्तां वेणिं विदधती पतिमेव नियतं मनसि अनुध्यायन्ती तिष्ठति इति दृश्यते, तथैव निशाऽपि पत्युः निशाकरस्य विरहक्लेशा मुक्तवेणिरिव निशामुखे अदृश्यतेति उत्प्रेक्षितम्; अलकानां मुक्तत्वादेव तेषां मुखाद्यङ्गेषु प्रसृतत्वं वेदितव्यम्। शशीति।—शशिनः,—चन्द्रस्य, पत्युरिति भावः, विरहेण—विच्छेदेन, यः शोकः,—दुःख, तेन श्यामे इव—मलिने इव। श्यामामुखे—श्यामा—रजनी, ("श्यामा स्यात् शारिवा निशा" इत्यमरः) "शीते सुखोष्णसव्याङ्गी यौवने च सुवर्णशीतला। तप्तकाञ्चनवर्णाभा सा श्यामा परिगीयते॥" इत्युक्तलक्षणा स्त्री च, तस्याः मुखे—प्रारम्भे, वदने च; अत्र श्यामायां वराङ्गनायां श्यामत्वारोपः अन्धकारस्य अलकत्वारोपे निमित्तमिति शिष्टपरम्परितरूपकमलङ्कारः।

(१४४) अन्यथा—विरहप्रकारेण इत्यर्थः। सम्भावितः,—तर्कितः। निर्निमित्तबन्धुना—अकारणमित्रेण। सेवा—परिचर्या, राज्ञ इति शेषः, कष्टा—कष्टकरी

कुलम् ; (१४५) न च तत्र मे पूर्व्वजप्रवर्त्तिता प्रीतिः, न कुलक्रमागता गतिः, न उपकारस्मरणानुरोधः, न (१४६) बालसेवास्नेहः, न गोत्रगौरवं, न पूर्व्वदर्शनदाक्षिण्यं, न (१४७) प्रज्ञासंविभागोपप्रलोभनं, न (१४८) विद्याऽतिशयकुतूहलं, न आकारसौन्दर्य्यादरः, न सेवाकाकुकौशलं, (१४९) न विद्वद्गोष्ठीबन्धवैदग्ध्यं, (१५०) न वित्तव्ययवशीकरणं,

इत्यर्थः। विषमम्—असहनीय, दौष्कुलेयकादतिकठिनमित्यर्थः, भृत्यत्वं—भृत्यभावः। अतिगम्भीरं—दुर्ज्ञेयस्वभावमिति भावः।

(१४५) पूर्व्वजैति।—पूर्व्वजैः,—पितृपितामहादिभिः, प्रवर्त्तिता—जनिता, प्रीतिः,—प्रणयः। कुलक्रमागता—वंशपरम्पराप्राप्तेत्यर्थः। गतिः,—गमनागमननियमः, स्वीकृतीऽभ्युपायः वा ; राजसेवेव मम वंशपरम्पराऽवलम्बिता वृत्तिर्न इत्यर्थः। उपकारस्मरणानुरोधः,—राजकुलेन कदाचित् मम उपकारः कृतः, तस्य स्मरणं, तदनुरोधः,—तदाध्यता, न अस्तीति शेषः, प्रत्युपकारकरणार्थमिति भावः।

(१४६) बालसेवास्नेहः,—बाल्यात्प्रभृति सेवानिमित्तं ममत्वम्। गोत्रगौरवं—गोत्रस्य—कुलस्य, मदीयस्य इति भावः, गौरवं—सम्माननं, राजसेवया इति भावः, प्रत्युत अगौरवमेव इति भावः। पूर्व्वदर्शनदाक्षिण्य—पूर्व्वं दर्शनं—साक्षात्कारः, परिचयो वा, राज्ञ इति शेषः, तेन दाक्षिण्य—सारल्यं, सद्भाव इति यावत्।

(१४७) प्रज्ञेति।—प्रज्ञायाः,—बुद्धेः, प्रकृष्टज्ञानस्य वा, संविभागः,—समालोचनं, तस्य उपप्रलोभनं—लाभोपायसाधनमित्यर्थः ; अनवरतबुद्धिपरिचालनेन तस्या उत्कर्षसाधनाशा इति भावः।

(१४८) विद्याऽतिशयेति।—अतिशायिनी विद्या मे भविष्यति इति कुतूहलम्—औत्सुक्यम्। आकारसौन्दर्य्यादरः,—आकारस्य—अवयवस्य, सौन्दर्य्ये आदरः,—यत्नः। सेवाकाकुकौशलं—सेवायां यः काकुः,—शोकभीत्यादिजनितो ध्वनिविकारः, ["काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः" इत्यमरः। इह तु काकुशब्देन वक्रोक्तिर्लक्ष्यते] तस्य कौशलं—पाटवं, न मे अस्तीति भावः।

(१४९) विद्वदिति।—विदुषां गोष्ठी—समाजः, तस्या बन्धे—बन्धने, आयत्तीकरणे इति यावत्, वैदग्ध्यं—नैपुण्यं, न, आवश्यकमिति शेषः।

(१५०) वित्तेति।—वित्तस्य—धनस्य, व्ययः, तस्य वशीकरणं—बाध्यता, न, अस्तीति शेषः ; राजसेवायां प्रचुरं वित्तं लभ्यते, ममापि तस्य व्यय आवश्यक इत्यपि

(१५१) न राजवल्लभपरिचयः। अवश्यं गन्तव्यम्। सर्व्वथा भगवान् पुरारिः भुवनगुरुः गतस्य मे सर्व्वं साम्प्रतमाचरिष्यति" इति अवधार्य्य गमनाय मतिम् अकरोत्।

(१५२) अथान्यस्मिन् अहनि उत्थाय, प्रातरेव स्नात्वा, धृतधवलदुकूलवासाः, गृहीतात्तमालः, प्रास्थानिकानि सूक्तानि मन्त्रपदानि च बहुशः समावर्त्त्य, देवदेवस्य विरूपाक्षस्य (१५३) क्षीरस्नपनपुरःसरां सुरभिकुसुमधूपगन्ध-ध्वजबलिविलेपनप्रदीपकबहुलां विधाय पूजां, परमया भक्त्या

हेतुर्न इत्यर्थः; व्ययबाहुल्यहेतुकधनाभावोऽपि मे नास्तीति भावः; यद्वा.—वित्तानां—धनानां, व्ययः,—विनियोगः, तेन वशीकरणं, मम वश्यतानयनं, प्रचुरधन-व्ययेनाऽपि निस्पृहस्य मम वश्यतासिद्धिः न हि सम्भवतीति भावः।

(१५१) राजवल्लभपरिचयः,—राज्ञो वल्लभः,—प्रियः, अहमिति भावः, तस्य परिचयः,—प्रकटनं, न, प्रयोजकमिति शेषः। अवश्यमिति।—अत्र "तथाऽपि" इति पदमूहनीयम्; यद्यपि तव गमने मम एतेषु कोऽपि हेतुर्नास्ति, तथाऽपि अवश्यमेव गन्तव्यम्; तत्रापि हेतुश्च प्रागुक्तनिमित्तत्रयोः कृष्णस्य सन्देशः, यतः कृष्णेन सन्दिष्टम्, अतः अवश्यमेव गन्तव्यम् इति भावः। पुरारिः,—त्रिपुरारिः, महादेवः इत्यर्थः। ["पुरारिः" इत्यत्र "पुरारातिः" इति पाठान्तरम्]। गतस्य—राजकुलं प्रस्थितस्य इत्यर्थः। साम्प्रतं—समुचितम्।

(१५२) अथेत्यादि—"अथ अन्यस्मिन्नहनि प्रीतिकूटात् निरगात्" इत्यत्तेन सम्बध्यते। धृतधवलदुकूलवासाः,—परिहितशुभपट्टवसनः। गृहीतात्तमालः,—जप-मालाधारी। प्रास्थानिकानि—प्रस्थानं प्रयोजनं येषां तानि, प्रस्थानकालकर्त्तव्यानि, सूक्तानि—वैदिकमन्त्रान्, मन्त्रपदानि—अन्यमन्त्रविशेषान्, बहुशः,—पुनः पुनः, समा-वर्त्त्य—समुच्चार्य्य, पठित्वा इत्यर्थः। विरूपाक्षस्य—विलोचनस्य, हरस्य इति यावत्।

(१५३) क्षीरेति।—क्षीरेण—दुग्धेन, स्नपनम्—अभिषेचनं, पुरःसरं—पूर्वं यस्याः ताम्। सुरभीति।—सुरभीणि—सुगन्धीनि, कुसुमानि—पुष्पाणि, धूपाः, गन्धाः, ध्वजाः,—पताकाः, बलिविलेपनानि—पूजार्थविलेपनद्रव्याणि; यद्वा—बलयः,—उपहाराः, विलेपनानि—कुङ्कुमकृष्णागमदाद्यनुलेपनानि, प्रदीपकाश्च, तैः बहुलां—भूयिष्ठां ताम्। ["बहुलाम्" इत्यत्र "बहुलाम्" इति पाठान्तरम्]।

(१५४) प्रथमहुततरलतिलत्वग्विघटनचटुलमुखरशिखाशिखरं, प्राज्याहुतिप्रवर्द्धितदक्षिणार्च्चिषं भगवन्तम् आशुशुक्षणिं हुत्वा, दत्त्वा (१५५) द्युम्नं यथाविद्यमानं द्विजेभ्यः, प्रदक्षिणीकृत्य प्राङ्मुखीं नैचिकीं, (१५६)शुक्लाङ्गरागः, शुक्लमाल्यः, शुक्लवासाः, रोचनाञ्चित-दूर्वाग्रपल्लवग्रथित-गिरिकर्णिका-कुसुमकृतकर्णपूरः,

(१५४) प्रथमेति ।—प्रथम—प्राक्, हुतानां—देवोद्देशेन प्रक्षिप्तानां, तरलानां—चपलानाम्, अग्न्युत्तापेन सत्वततामित्यर्थः, तिलानां त्वचः,—आवरणानि, तासां विघटनेन—विसरणेन, ["—विघटन—" इत्यत्र "—विचटन—" इति पाठान्तरे,—विभेदेन, दग्धीभवनेनेत्यर्थः] चटुलाः,—चञ्चलाः, अत एव मुखराः,—पटत्पटदिति शब्दं कुर्व्वाणाः, शिखाः,—ज्वालाः, शिखराणि—शिरोभूषणानि यस्य तथोक्तम् । प्राज्येति ।—प्र—प्रकृष्टाभिः, आज्याहुतिभिः,—घृताहुतिभिः ; यद्वा, —प्राज्याभिः,—प्रभूताभिः, आहुतिभिः ["प्राज्याहुति—" इत्यत्र "प्राज्याज्याहुति—" इति पाठे,—प्राज्याभिः,—भूरिभिः, आज्याहुतिभिः ; अथवा,—प्राज्यैः,—बहुलैः, आज्यैः आहुतिभिः] प्रवर्द्धिता—प्रकर्षेण वृद्धिं नीता, दक्षिणाः,—दक्षिणदिग्वर्त्तिन्यः, सरलाः वा, अर्च्चिषः,—शिखाः यस्य तथोक्तम्, ("अर्च्चिर्मयूखशिखयोर्नेता" इति मेदिनी) । आशुशुक्षणिम—अग्निम । ("—पावकोऽनलः । रोहितास्वो वायुसखा शिखावानाशुशुक्षणिः ॥" इत्यमरः) ।

(१५५) द्युम्नं—धनम् । ("—द्युम्नं वित्ते बलेऽपि च" इति मेदिनी) । यथाविद्यमानं—[विद्यमाननमनतिक्रम्य इत्यव्ययीभावः] यावत् धनं स्थितं, तावत् सर्व्वमेवेत्यर्थः । एतेनास्य दानशौण्डत्वं प्रदर्शितम् । प्राङ्मुखीं—पूर्व्वमुखीं, नैचिकीं—धेनुविशेषं, ("उत्तमा गौषु नैचिकी" इत्यमरः) ; केचित्तु,—"धेनुर्वत्सप्रयुक्ता·····द्विजनृपगणिकाः पृथमालापताकाः" इत्येतेषु यावायां माङ्गलिकत्वेनोक्तेषु गणिकाग्रहणदर्शनात् नैचिकीं—नीचजातीयां स्त्रीं, गणिकामित्यर्थः इति व्याख्यानयन्ति ।

(१५६) शुक्लाङ्गरागः,—श्वेतचन्दनादिचर्चितदेहः । रोचनेति ।—रोचनया—गोरोचनाख्यमाङ्गल्यद्रव्येण, अञ्चिताः,—रञ्जिताः, दूर्व्वाणाम् अग्रपल्लवाः, तैः ग्रथितं —गुम्फितं, यत् गिरिकर्णिकाकुसुमम्—अश्वखुरी नाम माङ्गलिकी ओषधिः गिरिकर्णिका ; यद्वा,—गिरिकर्णिका—अपराजिता, ("आस्फोता गिरिकर्णी स्यात् विष्णुक्रान्ताऽपराजिता" इत्यमरः) तस्याः कुसुमं, तेन कृतः,—रचितः, कर्णपूरः,—कर्णभूषणं येन तथोक्तः । ["रोचनाञ्चितदूर्व्वा—" इत्यत्र "रोचनाचितदूर्व्वा—" इति

शिखासक्तसिद्धार्थकः, पितुः कनीयस्या (१५७) स्वसा मात्रा इव स्नेहार्द्रहृदयया श्वेतवाससा साक्षादिव भगवत्या महाश्वेतया मालत्याख्यया कृतसकलगमनमङ्गलः, दत्ताशीर्वादः बान्धवबृद्धाभिः, अभिनन्दितः (१५८) परिजनजरतीभिः, वन्दितचरणैः अभ्यनुज्ञातः गुरुभिः, अभिवादितैः आघ्रातः शिरसि कुलवृद्धैः, वर्द्धितगमनोत्साहः शकुनैः, (१५९) मौहूर्त्तिकमतेन कृतनक्षत्रदोहदः, (१६०) शोभने मुहूर्त्ते हरितगोमयोपलिप्ताजिरस्थण्डिलस्थापितम् असितेतरकुसुममालापरिक्षिप्तकर्णं पिष्टपञ्चाङ्गुलपाण्डरं मुखविनिहित-

पाठे,—रोचनया चित्रा:,—विचित्रवर्णा, दृश्यायपत्रवा,]। शिखेति।—शिखासु—चूडासु, सक्ता:, —स्थिता: इत्यर्थ:, सिद्धार्थका:, श्वेतसर्षपा: यस्य तथाभूत:।

(१५७) स्वसा—भगिन्या। मात्रा इव—जनन्या इव। श्वेतवाससा—शुभवसनपरिधानेन इत्यर्थ:। महाश्वेतया—सरस्वत्या, "रविस्थदेवतया" इति केचित। मालत्याख्यया—मालतीनाम्ना। कृतेति।—कृतम्—अनुष्ठितं, सकलं गमनाय मङ्गलं यस्य तथोक्त:।

(१५८) परिजनजरतीभि:,—परिजनेषु मध्ये या जरत्य:,—स्थविरा:, ताभि:। आघ्रात:,—शिरसि चुम्बित:। शकुनै:,—मुनिनिमित्तभूतपक्षिभि:, शुभसूचकदक्षिणनेत्रभुजस्पन्दनादिरूपैर्वा।

(१५९) मौहूर्त्तिकेति।—मुहूर्त्तं जानन्तीति मौहूर्त्तिका:,—गणका इत्यर्थ:, ("—दैवज्ञगणकावपि। स्युर्मौहूर्त्तिक—" इत्यमर:) तेषां मतेन—अभिप्रायेण। कृतेति।—कृतं नक्षत्रेषु—अश्विन्यादिषु, यात्रिकेषु इति भाव:, दोहदम्—अनुरागविशेष: येन तथोक्त:, शुभे नक्षत्रे कृतयात्र इति भाव:।

(१६०) शोभने—शुभे, प्रशस्ते इति भाव:, मुहूर्त्ते—क्षणविशेषे। हरितेति।—हरितेन—अशुष्केण इति यावत, गोमयेन उपलिप्तं—प्रलिप्तं, यत् अजिरम्—अङ्गनम्, तदेव स्थण्डिलं—परिष्कृता भूमि:, तत्र स्थापित: तम्। असितेतरेति।—असितेतराभि:,—श्वेताभि:, कुसुममालाभि: परिक्षिप्त:,—परिवेष्टित:, कर्ण:,—"काना" इति प्रसिद्ध:, यस्य तथोक्तम्। ["कर्णम्" इत्यत्र "कण्ठम्" इति पाठान्तरम्]। पिष्टेति।—पिष्टानां—"पिटिली" इति प्रसिद्धानां गाङ्गलिकद्रव्याणां,

नवचूतपल्लवं पूर्णकलसम् उदीक्षमाणः, प्रणम्य कुलदेवताभ्यः कुसुमफलपाणिभिः (१६१) अप्रतिरथं जपद्भिः निजद्विजैः अनुगम्यमानः, प्रथमचलितदक्षिणचरणः, प्रीतिकूटात् निरगात्।

(१६२) प्रथमेऽहनि घर्मकालकष्टं, निरुदकं, निष्पत्रपादपविषमं, पथिकजननमस्क्रियमाणं, प्रवेशपादपोत्कीर्णकात्यायनीप्रतियातनं, शुष्कम् अपि (१६३) पल्लवितमिव तृषितश्वापदकुललम्बितलोलजिह्वालतासहस्रैः,

पञ्चाङ्गुलं—पञ्चाङ्गुलाकारः प्रसाधनविशेषः, तेन पाण्डरः,—शुभ्रः, पञ्चाङ्गुलगृहीतपिष्टेन चित्रित इति भावः, तम। ["पाण्डरम्" इत्यत्र "पाण्डुरम्" इति पाठेऽपि उक्त एवार्थः]। मुखेति।—मुखे, कलसस्य इति भावः, विनिहितः,—विशेषेण अर्पितः, ["विनिहित—" इत्यत्र "निहित—" इति पाठान्तरम्] नवः चूतपल्लवः,—आम्रपल्लवः यस्य तथोक्तः, पूर्णकलसः—परिपूर्णकुम्भम, उदीक्षमाणः,—पश्यन्।

(१६१) अप्रतिरथ—नास्ति प्रतिरथः,—प्रतिद्वन्द्वी यत्र तद् यथा तथा; यद्वा,—अप्रतिरथं—सामावयवभेदं, प्रस्थानकालिकमन्त्रविशेषमित्यर्थः, जपद्भिः, बाणस्य कोऽपि प्रतिस्पर्द्धी माभूदिति प्रतिपक्षशमनं यथा तथा मन्त्रं जपद्भिरिति निष्कर्षः। निजद्विजैः,—आत्मीयैः विप्रैः। "निजद्विजैः" इत्यत्र निर्जेति विशेषणेन बाणस्य दाढ्यं प्रकटितम्। प्रीतिकूटात्—तदाख्यात नगरात्।

(१६२) प्रथमेति।—"प्रथमेऽहनि चाण्डकाननमतिक्रम्य मल्लकूटनामानं ग्राममगात्" इत्यन्वयः। तदेव काननं विशिनष्टि, घर्मकालेत्यादिभिः।—घर्मकालकष्टं—घर्मकाले—ग्रीष्मकाले, कष्टं यत्र तत् तथोक्तं, निदाघे कष्टजनकम्। यतः निरुदकं—निर्जलम्। निष्पत्रेति।—निष्पत्रैः,—पत्ररहितैः, पादपैः,—वृक्षैः, विषमं—दुरवगाहं, छायाराहित्यात् असुखदमित्यर्थः। पथिकेति।—पथिकैः,—पान्थैः जनैः, नमस्क्रियमाणं—प्रणम्यमानम्। प्रवेशेति।—प्रवेशः—प्रवेशारम्भे, यः पादपः,—तरुः, तत्र उत्कीर्णा—खोदिता, कात्यायन्याः,—दशभुजायाः, प्रतियातना—प्रतिकृतिः यत्र तथोक्तम्। ["प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया प्रतिकृतिरर्चा पुंसि प्रतिनिधिः—" इत्यमरः। "नमस्क्रियमाणं, प्रवेशपादपोत्कीर्ण—" इत्यत्र "नमस्क्रियमाणप्रवेशपादपोत्कीर्ण—" इति पाठे,—नमस्क्रियमाणा प्रवेशपादपोत्कीर्णकात्यायनीप्रतियातना यस्य तथोक्तम्]

(१६३) तृषितैः,—पिपासुभिः, श्वापदकुलैः,—हिंस्रप्राणिनिवहैः, लम्बितानि

(१६४) पुलकितमिव अच्छभल्लगोलाङ्गूलनिह्यमानमधुगोलचलितसरघासङ्घातैः, (१६५) रोमाञ्चितमिव दग्धस्थलीरूढस्थलाभीरुकन्दलशतैः शनैः चण्डिकाकाननमतिक्रम्य मल्लकूटनामानं ग्रामम् अगात्। तत्र च (१६६) हृदयनिर्विशेषेण भ्रात्रा सुहृदा च जगत्पतिनाम्ना सम्पादितसपर्यः सुखम् अवसत्। अथ अपरेद्युः उत्तीर्य भगवतीं भागीरथीं (१६७) यष्टिग्रहकनाम्नि वनग्रामके निशाम् अनयत्। अन्यस्मिन् दिवसे स्कन्धावारम् उपमणितारम् अन्वजिरवति कृतसन्निवेशम् आसमाद, अतिष्ठच्च नातिदूरे राजभवनस्य।

—बहिष्कृतानि इत्यर्थः, लालानां—चञ्चलानां, सतृष्णानां वा, ("लीलायललसतृष्णयोः" इत्यमरः) जिह्वालतानां—जिह्वा एव लताः, तासां, रसनावल्लीनां, सदृक्षाणि तैः, पल्लवितमिव—सञ्जातकिसलयमिव, [इत्युत्प्रेक्षा] जिह्वानां किसलयसाम्यादिति भावः।

(१६४) अच्छेति।—अच्छभल्लैः,—भल्लुकैः, गोलाङ्गूलैः,—कृष्णवदनकपिविशेषैश्च, लिह्यमानानि—आस्वाद्यमानानि, यानि मधुगोलानि—मधुचक्राणि, तेभ्यः चलितानाम्—उड्डीयमानानां, सरघाणां—मधुमक्षिकाणां, सङ्घातैः,—समूहैः, पुलकितमिव—कण्टकितमिव।

(१६५) दग्धेति।—दग्धासु—दावाग्निना भस्मीकृतासु, स्थलीषु—अकृत्रिमासु भूमिषु, रूढानां—जातानाम्, अभीरुणां—शतावरीनामौषधिविशेषाणां, कन्दलशतैः,—नवाङ्कुरसमूहैः, ("कन्दलं त्रिषु कपालेऽप्युपरागे नवाङ्कुरे" इति मेदिनी) रोमाञ्चितमिव—सञ्जातरोमहर्षमिव।

(१६६) हृदयनिर्विशेषेण—हृदयात् निर्विशेषः,—अभिन्न इत्यर्थः, तेन; यद्वा,—हृदयेन निर्विशेषः तेन, अभिन्नहृदयेन इत्यर्थः। भ्राता—चन्द्रसेनेन इति यावत्। सम्पादितसपर्यः,—कृतार्हणः, अनुष्ठितसत्कारः इत्यर्थः। ("पूजा नमस्याऽपचितिः सपर्याऽर्चाऽर्हणाः समाः" इत्यमरः)।

(१६७) यष्टिग्रहकेति।—यष्टिग्रहकं नाम—आख्यानं यस्य तथोक्ते। ["यष्टिग्रहक—" इत्यत्र "यष्टियहक—" इति पाठान्तरम्]। स्कन्धावारं—सैन्यनिवेशार्थं रचितपटमण्डपादिरूपम्। उपमणितारं—मणितारास्यपत्तनसमीपे। अन्वजिर-

(१६८) निर्वर्त्तितस्नानाशनव्यतिकरो विश्रान्तस्य मेखलेन सह याममात्रावशेषे दिवसे भुक्तवति भूभुजि प्रख्यातानां क्षितिभुजां बहून् शिविरमन्निवेशान वीक्षमाणः, शनैः शनैः (१६९) पट्टबन्धार्थमुपस्थापितैश्च, (१७०) डिण्डिमाधिरोहणाय आहूतैश्च, अभिनवबद्धैश्च, विक्षेपोपार्जितैश्च, कौशलिकोपगतैश्च, नागवीथीपालप्रेषितैश्च, (१७१) प्रथमदर्शनकुतूहलोपनीतैश्च, दूतसम्प्रेषणप्रेषितैश्च, पक्षीपरिवृढौकितैश्च,

र्वति—आजरवती नाम नदी, तामन् अत्याजरवति, [अव्ययीभावः] आजरवत्याः नद्याः तीरे इत्यर्थः। क्रतमन्निवेश—क्रतस्थितिम। आससाद—प्राप।

(१६८) निर्वर्त्तितेति।—निर्वर्त्तितः,—सम्पादितः, स्नानाशनयोः,—स्नानभोजनयोः, व्यतिकरः,—विधिः येन तथोक्तः। ["मेखलेन" इत्यत्र "मेखलकेन" इति पाठान्तरम्]। याममात्रावशेषे—प्रहरमात्रावशिष्टे। भूभुजि—राजनि, प्रख्यातानां—प्रसिद्धानां, क्षितिभुजां—राज्ञाम्, अधीनानामिति भावः, बहून्—प्रभूतान्, शिविरमन्निवेशान्—पटमण्डपान्।

(१६९) "पट्टबन्धार्थम्" इत्यादौ "वारणेन्द्रैः प्रयायमाणं राजद्वारम्" इत्युत्तरेण सम्बन्धः। वारणेन्द्रैरित्युत्तरस्थितं विशिनष्टि, पट्टबन्धार्थमित्यादिभिः।—पट्टबन्धः,—सिंहासनरचनं, तदर्थम् उपस्थापितैः,—आनीतैः, सिंहासनस्य अत्युच्चतया गजेन्द्रैरेव तत्समाधानं क्रियते इति भावः।

(१७०) डिण्डिमाधिरोहणाय—पटहस्थापनाय, गजेन्द्रस्थापरीति भावः। विक्षेपाः,—कराः, राजग्राह्यभागा इत्यर्थः, तदर्पणं; यद्वा,—विक्षेपेण—प्रेरणेन, अधीननृपतिवृन्दैः उपायनार्थमिति भावः, उपार्जितैः,—लब्धैः तैः। कौशलिकोपगतैः,—कौशलिकेन—पटुत्वेन, नैपुण्येनेत्यर्थः, उपगताः,—प्राप्ताः तैः; यद्वा,—कौशलिकं—पटुत्वम्, उपगतैः,—प्राप्तैः, शिक्षितयुद्धादिकौशलैरित्यर्थः; [कौशलिकागतैश्च इति पाठान्तरम्] नागवीथीपालप्रेषितैः,—नागवीथ्याः—हस्त्युत्पत्तिभुवः, तस्याः पालाः,—अध्यक्षा इत्यर्थः, तैन प्रेषिताः,—प्रहिताः तैः।

(१७१) प्रथमेति।—प्रथमं दर्शनं, तस्मिन् यत् कुतूहलम्—औत्सुक्यं, तेन उपनीताः,—उपस्थापिताः तैः। दूतेति।—दूतानां—राजवार्त्तावहानां, सम्प्रेषणेन—प्रेरणेन, राजभिरिति भावः, प्रेषिताः,—प्रेरिताः, दूतैः सहेति भावः, तैः। पक्षीपरिवृढौकितैः,—जनपदाध्यक्षप्रेषितैः; यद्वा,—पक्षी—व्याधानां क्षुद्रयामः, तस्याः

(१७२)स्वेच्छायुद्धक्रीड़ाकौतुकाकारितैश्च,दीयमानैश्च, आच्छिद्यमानैश्च, मुच्यमानैश्च, यामस्थापितैश्च, (१७३) सर्व्वद्वीपजिगीषया गिरिभिरिव सागरसेतुबन्धार्थम् एकीकृतैः (१७४) ध्वजपटपटुपटहशङ्खचामराङ्गरागरमणीयैः, (१७५) पुण्याऽभिषेकदिवसैरिव कल्पितैः, (१७६) वारणेन्द्रैः श्यामायमानम्; (१७७) अनवरतचलितखुरपुटप्रहृतमृदङ्गैः नर्त्तयद्भिरिव राजलक्ष्मीम्, उपहसद्भिरिव (१७८) सृक्कपुटप्रसृतफेनाट्-

पर्यन्तः,—प्रभुः, तेन क्रीकितैः; व्याधानां पशुबन्धनादिकर्म्मरतत्वात् तैः सङ्कीर्णैः, पश्चात् तदध्यक्षैः उपायनत्वेन प्रेरितैरिति भावः।

(१७२) स्वेच्छेति।—स्वेच्छया, राज्ञ इति भावः, युद्धक्रीड़ार्थं यत् कौतुकं—कुतूहलं, तस्मै तेन वा आकारिताः,—आनीताः, आहूता वा, तैः। दीयमानैः,—राजभिः उपढौक्यमानैः इत्यर्थः। आच्छिद्यमानैः,—अपसार्य्यमाणैः, मुच्यमानैः, बन्धनादिति शेषः। यामस्थापितैः,—प्रहरकालावस्थितैः।

(१७३) सर्वेति।—सर्वेषां द्वीपानां जिगीषया—विजेतुमिच्छया, गिरिभिरिव—पर्व्वतैरिव। सागरेति।—सागराणां सागरेषु वा, सेतुबन्धार्थम् एकीकृतैः,—समवेतीकृतैः।

(१७४) ध्वजेति।—ध्वजपटाः,—पताकाः, पटवः,—गभीरनादाः इत्यर्थः, ये पटहाः,—वाद्यभेदाः, शङ्खाः, चामराणि—बालव्यजनानि, अङ्गरागाः,—विलेपनद्रव्याणि, तैः रमणीयाः,—सुदर्शना इत्यर्थः, तैः।

(१७५) पुण्याऽभिषेकदिवसैरिव—यत्र पुण्यानक्षत्रयुक्ते दिवसे राजा मङ्गलालङ्कृतः स्नाति असौ पुण्याऽभिषेकदिवसः, तत्र ध्वजादिरम्यवस्तूनि सज्जीक्रियन्ते इति स्थितिः, तादृशैः, दिवसैरिव। कल्पितैः,—सज्जितैः।

(१७६) वारणेन्द्रैः,—गजेन्द्रैः, श्यामायमानं—कृतान्धकारमिति भावः; अथ च,—श्यामा—रात्रिः, तद्वदाचरति दिवसः इति भावः, तथोक्तम्।

(१७७) तुरङ्गैरिति पदं विशिनष्टि, अनवरतेति।—"अनवरत" इत्यादौ "तुरङ्गैः तरङ्गायमाणं राजद्वारम्" इत्युत्तरेण सम्बन्धः। अनवरतम्—अविरतं, चलितेन खुरपुटेन प्रहतानि—कुट्टितानि, मृदः,—मृत्तिकायाः, भूमेरित्यर्थः, अङ्गानि; मृदङ्गाः,—मुरजाख्यवाद्यभेदाश्च, यैः तथोक्तैः। नर्त्तयद्भिरिव—नृत्यं कारयद्भिरिव, नर्त्तने च मृदङ्गवाद्यमुपयुज्यते इत्युत्प्रेक्षाबीजम्।

(१७८) सृक्केति।—सृक्कपुटेभ्यः,—ओष्ठप्रान्तेभ्यः, ("सृक्कन्" "सृक्क" इति च

हासेन जवजड़जङ्घां हरिणजातिम्, (१७९) आकारयद्भिरिव सङ्कृष्टहेतोः हर्षहेषितेन उच्चैःश्रवसम्, (१८०) उत्पतद्भिरिव दिवसकाररथतुरगरुषा पक्षायमाणमण्डनचामरमालैः गगनतलं, तुरङ्गैः तरङ्गायमाणम्; (१८१) अन्यत्र प्रेषितैश्च, प्रेष्यमाणैश्च, प्रेषितप्रतीपनिवृत्तैश्च, (१८२) बहुयोजनगमनगणनसङ्ख्याऽक्षरावलीभिः इव वराटिकाऽऽवलीभिः घटितमुखमण्डनकैः तारकितैरिव सन्ध्याऽऽतपच्छेदैः, (१८३) अरुणचामरिकारचितकर्णपूरैः सरक्तोत्पलैरिव रक्तशालिशालेयैः,

ओष्ठप्रान्तार्थबोधकशब्दोऽयमपि क्लीबे प्रयुज्यते इति दृश्यते, तस्यैवायं प्रयोगः, अमरस्तु न तथा, तथा हि,—"प्रान्तावोष्ठस्य सृक्कणी" इति) प्रसृतः,—निःसृतः, यः फेनः, स अट्टहासः,—हास्यविशेष इव तेन। जवजड़ेति।—जवे—वेगगतौ, जड़ा—मन्थरा, अशक्तेत्यर्थः, जङ्घा यस्याः तथाविधां, हरिणजातिं—मृगविशेषजातिम्।

(१७९) आकारयद्भिरिव—आह्वयमानैरिव, सङ्कृष्टहेतोः,—परस्परसम्मेलनहेतोः, सङ्ग्रामहेतोर्वा।

(१८०) दिवसेति।—दिवसकारस्य—सूर्यस्य, रथे ये तुरगाः,—अश्वाः, तेभ्यः रुट्—क्रोधः, ईर्ष्येत्यर्थः, तया। गगनतलम्—अन्तरीक्षम्, उत्पतद्भिरिव—उड्डीय गच्छद्भिरिव; अत एव पक्षायमाणेति।—पक्षायमाणा—पक्षवदाचरन्ती, मण्डनचामरमाला—भूषणार्थधृतचामरराजिः येषां तथाभूतैः। तरङ्गायमाणम्—तरङ्गवदाचरतीति तथोक्तम्।

(१८१) "अन्यत्र" इत्यादौ "क्रमेलककुलैः कपिलायमानं राजद्वारम्" इति उत्तरेण सम्बन्धः। तान्येव क्रमेलककुलानि विशिनष्टि, अन्यत्रेत्यादिभिः।—अन्यत्र—अन्यस्मिन् प्रदेशे, प्रेषितैः,—प्रहितैः, प्रेष्यमाणैः,—प्रेर्यमाणैः, प्रेषितप्रतीपनिवृत्तैः,—आदौ प्रेषिताः, पश्चात् प्रतीपं—प्रतिकूलं, निवृत्ताः,—गताः, प्रतिनिवृत्ता इत्यर्थः, तैः।

(१८२) बहुयोजनेति।—बहूनि योजनानि यद्गमनं, तस्य गणनायां सङ्ख्याऽक्षराऽऽवल्यः,—गणनचिह्नभूताङ्कसमूहाः, ताभिरिव। वराटिकाऽऽवलीभिः,—कपर्दकनिवहैः, घटितं—रचितं, मुखानां मण्डनकं—भूषणं येषां तैः; अत एव तारकितैरिव—प्रस्फुटिततारामण्डलैरिव, सन्ध्याऽऽतपच्छेदैः,—सन्ध्याकालिकाऽऽतपखण्डैः।

(१८३) अरुणेति।—अरुणाभिः,—रक्ताभिः, चामरिकाभिः,—क्षुद्रचामरैः, रचितः,—कृतः, कर्णपूरः,—कर्णावतंसः येषां तथोक्तैः; अत एव, सरक्तोत्पलैरिव—

(१८४) अनवरतझणझणायमानचारुचामीकरघुरघुरक-मालिकैः, जरत्करञ्जवनैरिव रणितशुष्कवीजकोशीशतैः, (१८५) श्रवणोपान्तप्रेङ्खत्पञ्चरागवर्णाचित्रसूत्रजूटजटा-जालैः कपिकपोलकपिलैः, क्रमेलककुलैः कपिलायमानम्; (१८६) अन्यत्र शरत्कालधरैरिव सद्यःसुतपयःपटलधवलतनुभिः,

रक्तोत्पलवाङ्गिरिव, रक्तानां शालीनां—धान्यानां, शालेयानि—चैत्राणि तैः; ["व्रीहि-शाल्यीढक्" (५।२।२ पा०) इति सूत्रेण शालीनां भवनं चैत्रम् इत्यर्थे शालिशब्दात् ढक्। "चैत्रं व्रैहेयशालेयं व्रीहिशाल्युद्भवोचितम्" इत्यमरः]।

(१८४) अनवरतेति।—अनवरतम्—अविरतं, झणझणायमानैः,—झण-झणेति अव्यक्तं शब्दं कुर्व्वद्भिः, चारुभिः,—शोभनैः, चामीकरैः,—काञ्चनैः, तद्घटितैः क्षुद्रगोलकैरिति भावः; घुरघुरका—"घुरघुर" इत्यव्यक्तं स्वनन्ती, मालिका येषां तैः; अत एव, जरत्करञ्जवनैरिव—शुष्ककमलवनैरिव, [करञ्जशब्दस्य कमलार्थक-त्वाभावात् "जरत्करञ्जवनैरिव" इत्येव साधुतया प्रतीयते, जरत्करञ्जवनैः,—शुष्ककमल-वनैः, ("करञ्जं पीयूषपद्मयोः" इति मेदिनी) रणितेत्यादिविशेषणानुरोधात् यथा-श्रुतार्थकस्य करञ्जशब्दस्यापि अर्थप्रतीतेर्व्याघातकतया प्रयोगानर्हत्वात् इति ध्येयम्]। रणितेति।—रणितानि—शब्दितानि, शुष्काणि बीजकोशीशतानि—पद्मबीजपूर्णकोष-समूहा येषु तादृशैः; शब्दायमानाः क्षुद्राः याः पद्मबीजाधाराः तेषां शतानि वा तैरित्यर्थः, ("बीजकोशो वराटकः" इत्यमरः)।

(१८५) श्रवणेति।—श्रवणयोः,—कर्णयोः, उपान्तेषु—प्रान्तभागेषु, प्रेङ्खन्ति —चलन्ति, पञ्चरागवर्णाभिः,—पञ्चभिः,—पञ्चविधैः, रागैः,—रञ्जनद्रव्यैः, वर्णाः, —चित्राः, रञ्जिता इत्यर्थः, याः ऊर्णाः,—मेषादीनां लोमानि ताभिः, चित्राणि—मनोज्ञानि, सूत्रजूटा इव—सूत्रनिचया इव, जटाजालानि—केशरनिवहा येषां तैः, अत एव कपीति।—कपीनां—वानराणां, कपोलाः,—गण्डाः, तद्वत् कपिलाः,—पिङ्गलाः तैः; क्रमेलककुलैः,—उष्ट्रवृन्दैः, ("उष्ट्रे क्रमेलक-मय-महाङ्गाः" इत्यमरः) कपिलायमानं—पिङ्गलायमानम्।

(१८६) अन्यत्रेत्यादौ—"श्वेतपचषण्ढैः श्वेतद्वीपायमानं राजद्वारम्" इत्युत्तरेण सम्बन्धः। तान्यातपचषण्ढानि विशिनष्टि, अन्यत्रेत्यादिभिः।—अन्यत्र—अन्यस्मिन् प्रदेशे। सद्य इति।—सद्यः,—तत्क्षणात्, सुतानां—क्षरितानां, पयसां—दुग्धानां, पटलवत्—राशिवत्, धवला—शुभ्रा, तनुः,—आकारः येषां तथाभूतैः; अन्यच,—

(१८७) कल्पपादपैरिव मुक्ताफलजालकजायमानाऽऽलोकलुप्तच्छायामण्डलैः, (१८८) नारायणनाभिपुण्डरीकैः इव आश्लिष्टगरुडपक्षैः, (१८९) क्षीरोदोद्देशैरिव द्योतमानविकटविद्रुमदण्डैः, (१९०) शेषफणाफलकैरिव उपरिस्फुरत्स्फोतमाणिक्यखण्डैः, (१९१) श्वेतगङ्गापुलिनैरिव राजहंसोपसेवितैः,

सद्यः सुतैः,—अचिरनिर्गलितैः, पयसां—जलानां, पटलैः,—समूहैः, धवलाः,—श्वेताश्च, ते तनवः,—दीप्तयश्च तथाभूतैः ; अत एव, शरज्जलधरैरिव—शारदीयमेघैरिव। अत्र शरद्ग्रहणं सद्यःसुतपयस्क-धवलतनुत्वबोधनाभिप्रायेणेति बोध्यम्।

(१८७) मुक्ताफलेति। मुक्ताफलानां—मौक्तिकानां, जालकैः,—मालाभिः, आतपवं परितः ग्रथिताभिः इति भावः, यद्वा,—तेषां जालकानां—मालानां, जायमानः,—उत्पद्यमानः, य आलोकः,—उद्योतः, प्रभेति यावत्, तेन लुप्तं—नाशितं, छायामण्डलम्—अनातपसमूहः यैः, तथाभूतैः ; अन्यत्र,—मुक्ताफलानां जालकैः,—समूहैः, कल्पपादपप्रसूतैरिति भावः, अन्यत् समानम्। अत एव कल्पपादपैरिव—कल्पतरुभिरिव।

(१८८) नारायणनाभिपुण्डरीकैरिव—नारायणस्य नाभिसमुत्पन्नश्वेतपद्मैः इव, [पुण्डरीकशब्देन तन्मृदुत्वमभ्युच्यते] आश्लिष्टाः,—सस्पृक्ताः, गरुडपक्षाः,—तदाख्यरत्नविशेषाः ; अन्यत्र,—गरुडपक्षिणः पक्षा यत्र तथाभूतैः।

(१८९) क्षीरोदोद्देशैरिव—क्षीरसागरविभागैरिव, शुक्लत्वादिति भावः, द्योतमानाः,—दीप्यमानाः, विकटाः,—बृहन्तः, विद्रुमदण्डाः,—प्रवालघटितनालानि येषां तथोक्तैः ; अन्यत्र,—द्योतमानाः विकटाः,—विषमाः, ऋजुवक्रदीर्घह्रस्वादिरूपा इत्यर्थः, सुन्दरा वा, विद्रुमदण्डाः,—प्रवालद्रुमा इत्यर्थः, यत्र तैः।

(१९०) शेषेति।—शेषस्य—अनन्तनागस्य, फणाफलकैरिव—फणामण्डलैरिव, तस्य श्वेतवर्णत्वात् [इत्युत्प्रेक्षा]। उपरीति।—उपरि—शिखरदेशे, स्फुरत्—दीप्यमानं, स्फोतं—स्थूलं, माणिक्यखण्ड—रत्नविशेषशकलं येषां तैः ; अन्यत्र,—उपरि—फणाया उपरिभागे, स्फुरत् स्फोतं माणिक्यखण्डं, येषु तैः।

(१९१) श्वेतगङ्गापुलिनैरिव—श्वेतानि गङ्गायाः पुलिनानि—सैकतदेशाः तैरिव। राजहंसेति।—राजानो हंसा इव तैः, नृपोत्तमैः, तदाख्यहंसविशेषैश्च, ("राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे" इति मेदिनी) उपसेवितानि—व्याप्तानि, चरितानि च, तैः।

(१९२) अभिभवद्भिरिव निदाघसमयम्, (१९३) उपहसद्भिरिव विवस्वतः प्रतापम्, (१९४) आपिबद्भिरिव आतपं, चन्द्रलोकमयमिव जीवलोकं जनयद्भिः, कुमुदमयम् इव कालं कुर्व्वद्भिः, ज्योत्स्नामयमिव वासरं विरचयद्भिः, फेनमयीमिव दिवं दर्शयद्भिः, अकालकौमुदीसहस्राणीव सृजद्भिः, उपहसद्भिरिव शातक्रतवीं श्रियं, (१९५) श्वेतायमानैः आतपत्रषण्डैः श्वेतद्वीपायमानम्;

(१९२) निदाघसमयं—ग्रीष्मकालम्, अभिभवद्भिरिव—जयद्भिः इव, निदाघकालिकातपनिवारणात् इति भावः।

(१९३) विवस्वतः,—सूर्य्यस्य, प्रतापं—प्रभावम्, उपहसद्भिरिव—परिहसद्भिरिव; छायादानेन सूर्य्यातपस्य वैयर्थ्यजननात् इति तात्पर्य्यम्। अथ च प्रतापपदेन भङ्ग्या विवस्वत आरोपितविजिगीषुत्ववहारत्वात् शत्रुमनःसन्तापकारि यश उक्तम्।

(१९४) आपिबद्भिरिव—सम्यग्ग्रसद्भिरिव। आतपं—प्रकाशं, तस्य सर्व्वत एवातिदर्शनात्। चन्द्रेति।—आतपवाणामतिधावल्यात् विशालत्वाच्च तद्दर्शने स्वभावधवलस्य चन्द्रलोकस्य भ्रान्तिरुदीयते, अतः जीवलोकस्य चन्द्रलोकमयत्वमुत्प्रेक्षितम्। कुमुदेति।—कुमुदमयं—शरत्समयमिव, कालं—ग्रीष्मसमयं, तदानीं तत्कालस्यैव प्रवृत्तत्वात् इति बोध्यं, [कुमुदस्य शुक्लत्वात्, सर्व्वव्यातिशुभ्रत्वबोधनायैवमुत्प्रेक्षा]। ज्योत्स्नेति।—वासर—दिनं, [वासरे घर्म्मातिशय्यसम्भावनासत्त्वेऽपि आतपवच्छायया तदभावात् स्निग्धत्वाधिक्यप्रकटनार्थं ज्योत्स्नामयत्वमुत्प्रेक्षितम्]। दिवम्—अन्तरीक्षम्; फेनमयीमिव—आतपवाणामत्युच्चत्वात् सुधाधावल्याच्च फेनिलामिव, [इत्युत्प्रेक्षा]। कौमुदीसहस्राणि—चन्द्रिकासमूहान्,—"कौ मोदन्ते जना यस्यां नानाभावैः परस्परम्। हृष्टास्तुष्टाः सुखापन्नास्तेन सा कौमुदी मता॥" इत्युक्तलक्षणकार्त्तिकपौर्णमासीसमूहान् वा। सृजद्भिः,—उत्पादयद्भिः। शातक्रतवीं—शतक्रतुः,—इन्द्रः, तस्येयं शातक्रतवी तां, ऐन्द्रीमित्यर्थः, श्रियं—सम्पदम्; [अतिधावल्ययोगात् हासत्वमुत्प्रेक्षितं,—"यशसि धवलता वर्ण्यते हासकीर्त्त्योः" इति कविसमयप्रसिद्धेः]।

(१९५) श्वेतायमानैः,—श्वेता इव आचरन्तीति श्वेतायमानाः, तैः; अत्र आतपत्रादीनां स्वत एव श्वेतत्वात् श्वेतपदेन कथमुपमीयते इति चेदुच्यते,—श्वेतगुणा इव आचरन्तीति तैः, तेन यथा श्वेतगुणयोगात् अन्यत् किमपि द्रव्यं श्वेतायत,

(१९६) क्षणदृष्टनष्टाष्टदिक्सुखञ्च मुषाङ्गिरिव त्रिभुवनम्, (१९७) आक्षेपोत्क्षेपदोलायितं दिनं गतागतानीव कारयद्भिः, (१९८) उत्सारयद्भिरिव कुनृपकलङ्ककालीं कालेयीं स्थितिं, (१९९) विकचविशदकाशवनपाण्डुरदिशं शरत्समयमिव उत्पादयद्भिः, (२००) विसतन्तुमयमिव अन्तरिक्षमाविर्भाव-

तदत् एतदर्थागात् सितेरित्यर्थः, ["श्वेतायमानैः" इत्यत्र "श्वेतमानैः" इति पाठान्तरम्] आतपवषण्डैः,—कृष्णनिवहैः। ["आतपवषण्डैः" इत्यत्र "आतपवद्वण्डैः" इति पाठान्तरम्]। श्वेतद्वीपायमानं—श्वेतद्वीपमिवाचरत्। ["श्वेतद्वीपायमानम्" इत्यत्र "श्वेतायमानम्" इति पाठान्तरम्]।

(१९६) क्षणेत्यादौ,—"चामराणां सहस्रैर्दोलायमानम्" इति उत्तरेण सम्बन्धः। चामराणां चामराणां सहस्राणि विभिन्नाष्ट क्षणेत्यादिभिः।—क्षणेन दृष्टं नष्टं—कृन्नञ्च, मन्दनाकृतयोगायोगवशादिति भावः, अष्टानां दिशां मुखानि यस्य तादृशं, मुषाङ्गिरिव—हरङ्गिरिव। [त्रिभुवनम्" इत्यत्र "भुवनम्" इति पाठान्तरम्]।

(१९७) आक्षेपेति।—आक्षेपः,—प्रसारणम्, उत्क्षेपः,—कृर्हं क्षेपणं, ताभ्यां दोलायितं त्रिभुवनमिति शेषः, दिनं—दिवसं, [प्रयोज्य कर्त्तरि द्वितीया, करोतेः त्रिगन्तस्य प्रयोज्यकर्त्तुः कर्मत्वस्य पाचिकत्वादिति] गतागतानि—यातायातानि, कारयद्भिरिव, [इति क्रियोत्प्रेक्षा]; प्रसारणक्षणे सूर्यकिरणादीनामदर्शनात् तदभावक्षणे च दर्शनादिति भावः।

(१९८) कुनृपेति।—कुनृपाः,—कुत्सिता नृपा एव, कलङ्काः,—अपवादाः, अयशोरूपा इत्यर्थः, तैः, ["कलङ्कोऽङ्कापवादयोः" इत्यमरः। "कुनृप—" इत्यत्र "कुनृपति—" इति पाठान्तरम्] कालीं—कृष्णवर्णां, मलिनेत्यर्थः, तां, कालेयीं—कलेरियं कालेयी तां, कलिसम्बन्धिनीं, स्थितिं—मर्य्यादाम्, आचारमिति यावत्, उत्सारयद्भिरिव—अपनयद्भिरिव।

(१९९) विकचेति।—विकचैः,—प्रस्फुटैः, अत एव विशदैः,—स्वच्छैः, काशवनैः,—काशाख्यतृणारण्यैः, पाण्डुराः,—धवलाः, दिशो यत्र तथाभूतं, शरत्समयं—शरत्कालम्, उत्पादयद्भिरिव—जनयद्भिरिव, आक्षेपसमयं इति भावः, ["उत्पादयद्भिः" इत्यत्र "उपपादयद्भिः" इति पाठे—प्रतिपादयद्भिः, अवगमयद्भिरित्यर्थः]।

(२००) विसतन्तुमयं—मृणालसूत्रमयम्, अन्तरीक्षं—गगनतलम्, आविर्भाव-

यष्टिः, (२०१) शशिकरशुचीनां चलतां चामराणां सहस्रैः दोलायमानम्; अपि च (२०२) हंसयूथायमानं करिकर्णशङ्खैः, (२०३) कल्पलतावनायमानं कदलिकाभिः, (२०४) माणिक्यवृक्षकवनायमानं मायूरातपत्रैः, (२०५) मन्दाकिनीप्रवाहायमाणम् अंशुकैः, (२०६) क्षीरोदायमानं क्षौमैः, (२०७) कदलीवनायमानं मरकतमयूखैः, (२०८) जन्यमानान्यदिवसमिव पद्मरागबालातपैः, (२०९) उत्पद्यमानापराम्बरम् इव इन्द्रनीलप्रभापटलैः,

यष्टिरिव—प्रकटयष्टिरिव, उत्क्षेपसमये इति भावः; श्वेतबालव्यजनानां प्रत्येकं तन्तुप्रायत्वात्।

(२०१) शशीति।—शशिनः,—चन्द्रस्य, कराः,—किरणाः इव, शुचीनि—स्वच्छानि, उज्ज्वलानि वा, तेषाम्। दोलायमानं—दोलिव आचरतीति तथोक्तम्।

(२०२) करीति।—करिणां—हस्तिनां, कर्णाः शङ्खा इव तैः, यद्वा,—करिणां कर्णेषु ये शङ्खाः,भूषार्थे विन्यस्ता इत्यर्थः, तैः। हंसयूथायमानं—हंससमूहमिवाचरत्।

(२०३) कदलिकाभिः,—पताकाभिः, ("रम्भाहचेऽथ कदली पताकाम्रगभेदयोः" इति मेदिनी) कल्पलतावनायमानं—कल्पद्रुमवनमिव आचरत्।

(२०४) मायूरातपत्रैः,—मयूरपुच्छनिर्मितच्छत्रैः, माणिक्यवृक्षकाणां—माणिक्यभूषितक्षुद्रतरूणां, वनमिव आचरतीति तथोक्तम्।

(२०५) अंशुकैः,—वसनपरम्पराभिः, मन्दाकिन्याः,—स्वर्गङ्गायाः, प्रवाह इव आचरतीति तथोक्तम्।

(२०६) क्षीरोदायमानं—क्षीरोदः,—क्षीरसागरः, स इव आचरतीति तथोक्तं, क्षौमैः,—श्वेतपट्टवसनैः।

(२०७) मरकतमयूखैः,—मरकतानां—हरिन्मणीनां, मयूखाः,—किरणाः, तैः; कदलीवनायमानं—रम्भावनमिव आचरत्।

(२०८) पद्मरागबालातपैः,—पद्मरागाणां—"पोखराज" इत्याख्यरत्नभेदानां, बालातपाः,—अरुणालोका इत्यर्थः, तैः; जन्यमानः,—उत्पद्यमानः, अन्यो दिवसः तमिव; प्रकृतस्य दिवसस्य आद्यावयवेनाच्छादितत्वादित्याशयः।

(२०९) इन्द्रनीलेति।—इन्द्रनीलाना—नीलकान्तमणीनां, प्रभापटलैः,—आलीकनिवहैः, उत्पद्यमानं—जन्यमानम्, अपरम्—अन्यत्, अम्बरमिव—गगनमिव।

(२१०) आरभ्यमाणापूर्व्वनिशमिव महानीलमयूखान्धकारः, (२११) स्यन्दमानानेककालिन्दीसहस्रमिव गरुड़मणिप्रभाप्रतानैः, (२१२) अङ्गाराङ्कितमिव पुष्परागरश्मिभिः, (२१३) कैश्चित् प्रवेशमलभमानैः अधोमुखैः चरणनखपतितवदनप्रतिविम्बनिभेन लज्जया स्वाङ्गानीव विशङ्कैः, कैश्चित् (२१४) अङ्गुलीलिखितायाः क्षितेः विकीर्य्यमाणकरनखकिरणकदम्बकव्याजेन सेवाचामराणीव अर्पयद्भिः,

(२१०) महानीलेति ।—महानीलानां—महतां नीलमणीना, मयूखाः,—कृष्णाः किरणाः, अन्धकारा इव तैः, आरभ्यमाणा—प्रक्रम्यमाणा, अपूर्व्वा—अविदितपूर्व्वा आश्चर्य्या वा, निश्—निशा, तामिव, [निशाशब्दवत् निश्शब्दोऽपि रात्रिवाची दृश्यते, नि—नितरां, श्यति—तनूकरोति व्यापारान् इति व्युत्पत्त्या निपूर्व्वात् श्यतेः कप्रत्ययेन पृषोदरादित्वात् रूपसिद्धेः] ।

(२११) गरुड़ेति ।—गरुडमणीनां—मरकतमणीनां, प्रभाप्रतानैः,—प्रभाविस्तरैः, स्यन्दमानं—वहमानम्, अनेकं—बहु, कालिन्द्याः,—यमुनायाः, सहस्रमिव—प्रवाहसमूहमिव इत्यर्थः ।

(२१२) पुष्परागाणां—पद्मरागमणीनां, रश्मिभिः,—किरणैः, अङ्गाराङ्कितम् इव—ज्वलिताग्निशकलवेष्टितमिव । ["अङ्गाराङ्कितमिव" इत्यत्र "अङ्गारकितमिव" इति पाठे,—अङ्गारकः,—अग्निस्फुलिङ्गः, लौहिताङ्गग्रहो वा, तस्य रक्तवर्णत्वात्, स इव आचरतीति अङ्गारकशब्दादाचारेऽर्थे क्विप् कृते कर्त्तरि क्ते अङ्गारकितः, तम्, अग्निस्फुलिङ्गवत् आचरितमित्यर्थः] ।

(२१३) कैश्चित् इत्यादौ,—"शत्रुमहासामन्तैः समन्तादासेव्यमानम्" इत्युत्तरेण सम्बन्धः । तानेव विशिनष्टि, कैश्चिदित्यादिभिः ।—कैश्चित्—कतिपयैः, प्रवेशमलभमानैः,—अप्राप्नुवद्भिः, अत एव अधोमुखैः,—अवनतमुखैः, चरणेषु ये नखाः, तेषु पतितानां वदनप्रतिविम्बानां—निजमुखच्छायानां, निमेन—व्याजेन, लज्जया—पराजयजनितया इति भावः, स्वाङ्गानीव—स्वशरीराणीव, विशङ्कैः,—तदन्तर्निलीयमानैः, सङ्कुचितकलेवरैः इति यावत् ।

(२१४) अङ्गुलीति ।—अङ्गुलिभिः, लिखितायाः,—खनितायाः इत्यर्थः, क्षितेः,—पृथिव्याः, [अपादाने पञ्चमी] विकीर्य्यमाणानाम्—उत्क्षिप्यमाणानां, करनखकिरणानां—विसृमरदसृणनखमयूखानां, कदम्बकं—समूहः, तस्य व्याजः,—

कैश्चित् (२१५) उरःस्थलदोलायमानेन्द्रनीलतरलप्रभापट्टैः स्वामिप्रकोपप्रशमनाय कण्ठबद्धकृपाणपट्टैरिव, कैश्चित् (२१६) उच्छ्वासमीरभम्भाभ्यद्भ्रमरपटलान्धकारितमुखैः अपह्नुतलक्ष्मीशोकधृतलम्बश्मश्रुभिरिव, अन्यैः (२१७) शेखरीडडीयमानमधुपमण्डलैः प्रणामविडम्बनाभयपलायमानमौलिभिरिव, (२१८) निर्जितैरपि सम्मानितैः इव, अनन्यशरणैः, अन्तरान्तरा निष्पततां प्रविशतां च अन्तरप्रतीहाराणाम्

कर्म, तेन, सेवाचामराणि इव—परिचर्यार्थबालव्यजनानि इव, अर्पयद्भिः,—ददद्भिः; "वीरभोग्या वसुन्धरा" इत्युक्तेः चिरं वीरकुलवत्त्वेन महावीरोऽयं नृपतिरेव त्वयेदानीं चामरग्रहणेन सेव्यः, न तु वर्यमिति तद्धारणे सेवनेच्छा इति भावः।

(२१५) उरःस्थलेति।—उरःस्थलेषु—वक्षःस्थलेषु, दोलायमानानां—लम्बमानानाम्, इन्द्रनीलानां—नीलकान्तमणीनां, तरलानि—चपलानि, स्फुरन्ति इत्यर्थः; यद्वा,—इन्द्रनीलतरलानां—हारमध्यगतेन्द्रनीलमणीनां,("हारस्य यो मध्यमणिस्तरलः स प्रकीर्त्तितः" इति कोषः) प्रभापट्टानि—प्रभाफलकानि येषां तैः, अत एव स्वामिनः,—प्रभोः, विजयिन इत्यर्थः, प्रकोपः,—प्रकृष्टः क्रोधः, तस्य प्रशमनाय—शान्त्यर्थम्। कण्ठेति।—कण्ठेषु बद्धानि कृपाणपट्टानि—असिफलकानि यैः तथाभूतैरिव।

(२१६) उच्छ्वासेति।—उच्छ्वासस्य—निश्वासपवनस्य, सौरभेण—सुगन्धेन, भाभ्यद्भिः,—समन्तात् सञ्चरद्भिः, भ्रमरपटलैः,—अलिवृन्दैः, अन्धकारितं—अन्धकार इव आचरितं, समाच्छन्नमिति यावत्, मुखं येषां तैः, अत एव अपह्नुतायाः,—विजयिनृपेण बलपूर्व्वकं गृहीतायाः इत्यर्थः, लक्ष्म्याः,—राजश्रियः, शोकेन हेतुना धृताः,—रचिता इत्यर्थः, लम्बाः,—लम्बमानाः, श्मश्रवः यैः तथाभूतैरिव; शोकोद्विग्नानां चौरकर्म्मणि आस्थाऽभावात् दीर्घश्मश्रुत्वस्य प्रायिकत्वात्।

(२१७) शेखरेति।—शेखरेभ्यः,—शिरोमालिकाभ्यः, डडीयमानानि—उत्पतन्ति, मधुपमण्डलानि—भ्रमरसङ्घाः येषां तथोक्तैः; अत एव प्रणामेति।—प्रणामे—प्रणत्यां, या विडम्बना—अवमानना, तस्या भयेन पलायमानाः मौलयः,—धम्मिल्लाः येषां तथाभूतैः इव। ("मौली किरीटधम्मिल्लौ" इत्यमरः)।

(२१८) निर्जितैरपि—पराजितैरपि, सम्मानितैरिव—पूजितैरिव, विजयिनोऽनुग्रहादिगयात् इति भावः। अनन्यशरणैः,—अन्यायरहितैः। अन्तरान्तरा—

अनुमार्गप्रधावितानेकार्थिजनसहस्राणाम् अयथायिनः पुरुषान् अश्रान्तैः पुनः पुनः पृच्छद्भिः,—"भद्र ! अद्य भविष्यति ? भुक्ता स्थाने दास्यति दर्शनं परमेश्वरः, निष्पतिष्यति वा बाह्यां कक्ष्याम् ?" इति दर्शनाशया दिवसं नयद्भिः, भुजनिर्जितैश्च शत्रुमहासामन्तैः समन्तादासेव्यमानम्; अन्यैश्च (२१९) प्रतापानुरागागतैः नानादेशजैः महीपालैः प्रतिपालयद्भिः नरपतिदर्शनकालमध्यास्यमानम्, (२२०) एकान्तोपविष्टैश्च जैनैः आर्हतैः पाशुपतैः पाराशरिभिः वर्णिभिश्च सर्व्वदेशजन्मभिश्च जानपदैः सर्व्वाभोधिवेलावनवलयवासिभिश्च

मध्ये मध्ये। निष्पतता—निर्गच्छताम्। अन्तरप्रतीहाराणाम्—अन्तरं—मध्ये मध्ये, ये, प्रतीहाराः,—रक्षिणः तेषाम्। अनुमार्गेति।—मार्गे मार्गे अनुमार्गं—प्रतिपथमित्यर्थः, [वीप्सार्थे अव्ययीभावः] प्रधावितानि अनेकानि अर्थिजनसहस्राणि—याचकसमूहाः, तेषाम् अयथायिनः,—अयथागामिनः, ["अयथायिनः" इत्यत्र "अनुयायिनः" इति पाठे—पश्चाद्गामिनः] पुरुषान्—राजकीयजनान्। अश्रान्तैः,—न श्रान्तं—श्रान्तिर्यषां तैः, अविरतैरित्यर्थः, ["अश्रान्तम्" इति पाठे—क्रियाविशेषणम्]। भविष्यति, दर्शनमिति शेषः। भुक्ता—आहारं कृत्वा। स्थाने—समुचिते प्रदेशे। परमेश्वरः,—महाराजाऽधिराजः। निष्पतिष्यति—आगमिष्यति, कक्ष्याम्—प्रकोष्ठम्, ("कक्ष्या प्रकोष्ठे हर्म्यादेः" इत्यमरः)। दिवसं नयद्भिः,—यापयद्भिः। शत्रुमहासामन्तैः,—शत्रवश्च ते महान्तः सामन्ताश्चेति तैः। आसेव्यमानम्—आकीर्य्यमाणम्, उपास्यमानं वा।

(२१९) प्रतापानुरागागतैः,—प्रतापश्च अनुरागश्च ताभ्यां हेतुभूताभ्याम् आगताः तैः, भयस्नेहसमन्वितैरिति भावः। प्रतिपालयद्भिः,—प्रतीक्षमाणैः। अध्यास्यमानम्—अधिष्ठीयमानम्।

(२२०) एकान्तोपविष्टैः,—एकदेशासीनैः, जैनैः,—आर्य्यसंहतमतवर्त्तिभिः, आर्हतैः,—नग्नचपणकैः, पाशुपतैः,—पशुपतिर्देवता येषां तैः, शैवैरित्यर्थः। पाराशरिभिः,—पराशरेण प्रोक्तम् अधीयते ये: तादृशैः, पराशरमुनिमतानुवर्त्तिभिः यतिभिरित्यर्थः, वर्णिभिः,—ब्रह्मचारिभिः। सर्व्वदेशजन्मभिः,—सर्व्वदेशीयैः, जानपदैः—जनपदवासिभिः। ["जानपदैः" इत्यत्र "जनपदैः" इति पाठेऽपि स एवार्थः]।

म्लेच्छजातिभिः सर्व्वदेशान्तरागतैश्च दूतमण्डलैः उपास्यमानं, (२२१) सर्व्वप्रजानिर्म्माणभूमिमिव प्रजापतीनां, (२२२) लोकत्रयसारोच्चयरचितं चतुर्थमिव लोकं, (२२३) महाभारतशतैरपि अकथनीयसमृद्धिसम्भारं, (२२४) कृतयुगसहस्रैरिव कल्पितसन्निवेशं, (२२५) स्वर्गार्व्बुदैरिव विहितरामणीयकं, (२२६) राजलक्ष्मीकोटिभिरिव कृतपरिग्रहं राजद्वारम् अगात्।

सर्वेति।—सर्वेषाम् अम्भोधीनां—समुद्राणां, वेलावनानि—तीरस्थवनभागाः, तेषां वलयं—मण्डलं, तस्मिन् वसन्तीति तथोक्तैः। दूतमण्डलैः,—वार्त्ताहरैः, उपास्यमानम्—आश्रीयमाणम्।

(२२१) अत एव सर्वेति।—सर्वासां प्रजानां निर्म्माणभूमिः,—सृष्टिस्थैर्यं, तामिव। प्रजापतीनां—सृष्टॄणाम्; अवैव स्थित्वा प्रजापतयो यानि सृजेयुः, तदा कथं सर्वे एव पदार्थाः कारणभूता इव तत्र दृश्यैरनिति भावः।

(२२२) लोकेति।—लोकानां—स्वर्गमर्त्यपातालानां, त्रयं, तस्य सारोच्चयः,—स्थिरांशराशिः, तेन रचितम्। लोकं—जगत्।

(२२३) महेति।—महाभारतशतैरपि—असङ्ख्यमहाभारतमहाकाव्यैरपि। अकथनीयेति।—न कथनीयः,—अनिर्वचनीय इति भावः, समृद्धीनां—सम्पदां, सम्भारः,—सञ्चयः यस्य तथोक्तमित्यर्थः; महाभारतशतैरपि अस्य द्रव्यसमूहवर्णना कर्त्तुं न शक्यते, तेषामनल्पत्वादिति तात्पर्य्यम्। अत्र प्रतीयमानोत्प्रेक्षा, तदङ्गकस्य इवादेरदर्शनात्, परन्तु वाच्योत्प्रेक्षाप्रस्तावे तदुपवर्णनस्यैवोचितत्वेन प्रक्रान्तक्रमस्योल्लङ्घनात् भग्नप्रक्रमताख्यदोषः उन्नेयः।

(२२४) कृतयुगसहस्रैरिव—बहुतरसत्ययुगैरिव इत्यर्थः। कल्पितेति।—कल्पितः,—रचितः, अधिष्ठित इति यावत्, सन्निवेशः,—स्थानं यस्य तथाभूतम्, अनघमिति भावः।

(२२५) स्वर्गार्व्बुदैरिव—अर्व्बुदसङ्ख्याः,—दशकोटिसङ्ख्याः स्वर्गैरिव, विहितम्—अर्पितं, कृतमित्यर्थः, रामणीयकं—रम्यत्वं यस्य तथाभूतम्।

(२२६) राजेति।—राज्ञां लक्ष्मीकोटयः ताभिरिव; यद्वा,—राजलक्ष्मीणां—राजश्रीणां, कोटिभिरिव—लक्षशतैरेव, (इह तु अर्व्बुदकोटिशब्दो बहुसङ्ख्यापरिलक्षणार्थौ बोद्धव्यौ) कृतपरिग्रहं—कृताश्रयम्। ["अगात्" इत्यत्र "अगमत्" इति पाठान्तरम्]।

(२२७) अभ्यजायत च अस्य जातविस्मयस्य मनसि,—"कथमिव इदमियत्प्रमाणं प्राणिजातं जनयतां प्रजासृजां न आमीत् महाभूतानां वा परिच्छेदः ? परमाणूनां वा परिच्छेदः ? कालस्य वा अन्तः ? आयुषो वा व्युपरमः ? आकृतीनां वा परिसमाप्तिः ?" इति। मेखलकस्तु दूरादेव द्वारपाललोकेन (२२८) प्रत्यभिज्ञायमानः "तिष्ठतु तावत् क्षणमात्रम् अत्रैव पुण्यभाक्" इति तम् अभिधाय अप्रतिहतः पुरं प्राविशत्।

अथ स मुहूर्त्तादिव (२२९) प्रांशुना, कर्णिकारगौरेण, (२३०) बौभ्रकञ्चुककक्षन्नवपुषा, (२३१) समुन्मिषन्माणिक्य-

(२२७) अभ्यजायत—उदपद्यत, ["अभ्यजायत" इत्यत्र "अभवत्" इति पाठान्तरम्]। अस्य—बाणस्य। प्राणिजातं—जीवसङ्घम। प्रजासृजां—प्रजापतीनाम्। महाभूतानां—नित्यसिद्धजीवकर्मायूनां, सृष्ट्युपादानकारणभूतानामिति भावः। परिच्छेदः,—इयत्तयावधारणम। व्युपरमः,—शेषः। परिसमाप्तिः,—निःशेषरूपेण व्ययः।

(२२८) प्रत्यभिज्ञायमानः,—सोऽयमिति अवगम्यमानः। पुण्यभाक्—सौभाग्यवान, भवानिति शेषः। ["पुण्यभाक्" इत्यत्र "पुण्यभागी" इति पाठान्तरम। विदुषि अस्मिन् कियदप्यवज्ञाशङ्कापरिहारार्थं पुण्यभागित्युक्तम]। तं—बाणम्। अप्रतिहतः,—अनिवारितः। पुरं—राजभवनम्। ["पुरम्" इत्यत्र "पुरः" इति पाठे,—भवनानीत्यर्थः]।

(२२९) अथ इत्यादौ,—"पुरुषेण अनुगम्यमानो निर्गत्य अवोचत्" इत्युत्तरेणान्वयः। अन्तराले विषयान्तरवर्णनाभावात, मुहूर्त्तादिव इत्यनेन कियत्कालत्वेपमत्वा समनन्तरमेव सन्देशहरस्य प्रत्यागमनेन, पुरुषानुगतत्वेन चास्य विशिष्टः समादर एव प्रदर्शित इति प्रतीयते। "प्रांशुना" इत्यादीनि "पुरुषेण" इत्यस्य विशेषणानि। प्रांशुना—उन्नतकायेन। कर्णिकारं—तदाख्यकुसुमं, तद्वत् गौरः,—शुभ्रः, तेन।

(२३०) बौभ्रेति।—बौभ्रेण—निर्मलेन, विशदेन इत्यर्थः, ("बौभ्रन्तु विमलात्मकम्" इत्यमरः) कञ्चुकेन—वर्म्मणा, कक्षन्नम्—आवृतं, वपुः,—शरीरं यस्य तथाभूतेन।

(२३१) समुन्मिषदिति।—समुन्मिषत्—सम्यग् दीप्यमानं, यत् माणिक्य-

पदकबन्धबन्धुरशस्तबन्धक्लृप्तावलग्नेन, (२३२) हिमशैलशिला-विशालवक्षसा, (२३३) हरवृषककुदकूटविकटांसतटेन, (२३४) उरसा चपलहृषीकहरिणकुलसंयमनपाशमिव हारं बिभ्रता, (२३५) "कथयतं यदि सोमवंशसम्भवः सूर्य्यवंशसम्भवो वा भूपतिरभूदेवंविधः" इति प्रष्टमानीताभ्यां सोमसूर्य्याभ्यामिव श्रवणगताभ्यां मणिकुण्डलाभ्यां समुद्भासमानेन, (२३६) वहद्-वदनलावण्यविसरवैणिकाक्षिप्यमाणैः अधिकारगौरवाद्दीय-

पदकं—मणिमयं राज्ञाधिकारचिह्नं, तस्य बन्धेन—ग्रहणेन इति यावत्, बन्धुरम्—उन्नतानतं, ("बन्धुरं तुन्नतानतम्" इत्यमरः) शस्तं—स्वर्णपट्टिका, काञ्चननिर्म्मित-कटिसूत्रमिति यावत्, तस्य बन्धेन—स्थापनेन, क्लृप्तं—चौणम्, अवलग्नं—मध्यं यस्य तेन, ("मध्यमस्त्रावलग्नञ्च मध्योऽस्त्री" इत्यमरः)।

(२३२) हिमेति।—हिमशैलः,—हिमाद्रिः, तस्य शिलावत् विशालं—प्रशस्तं, वक्षः यस्य तेन।

(२३३) हरेति।—हरस्य वृषः तस्य ककुदं—स्कन्धपृष्ठस्थमांसपिण्डविशेषः, "झुंड्" इति बङ्गीयैराख्यातः, ("वृषाङ्के ककुदोऽस्त्रियाम्" इत्यमरः) तस्य कूटं—शिखरं, तद्वत विकटः,—समुन्नतः इत्यर्थः, अंसतटः,—स्कन्धदेशः यस्य तेन।

(२३४) उरसा—वक्षःस्थलेन। चपलेति।—चपलानि—चञ्चलानि, हृषीकाणि—एकादशेन्द्रियाणि, ("हृषीकं विषयेन्द्रियम्" इत्यमरः) हरिणकुलानि इव—मृगयूथानि इव, तेषां संयमनाय—बन्धनाय, पाशः,—रज्जुः, तमिव, हारं बिभ्रता—दधानेन, [एतेनास्य जितेन्द्रियत्वं गम्यते]।

(२३५) कथयतं—कीर्त्तयतं, युवामिति शेषः। सोमवंशसम्भवः,—चन्द्र-वंशोत्पन्नः। एवंविधः,—एतत्सदृशः, यौदृशदेवसदृश इति भावः। आनीताभ्या-मिति।—अत आनयने तस्य प्रभविष्णुता ध्वन्यते। सोमसूर्य्याभ्यामिव—चन्द्ररविभ्या-मिव। श्रवणगताभ्यां—कर्णधृताभ्याम्। यस्य प्रष्टुमानीयते स श्रवणान्तिकं गच्छति। समुद्भासमानेन—विराजता।

(२३६) वहदिति।—वहतां—प्रसरतां, ["वहदन—" इत्यत्र "वहदन—" इति पाठे,—वहतां—महताम्, अत्युत्कर्षवतामित्यर्थः] वदनलावण्यानां—मुख-प्रभाणां, विसरः,—विस्तार एव, वैणिका—स्रोतः, नदीप्रवाह इति यावत्, तया क्षिप्यमाणैः,—निराक्रियमाणैः, ताड्यमाना इत्यर्थः, तैः; किन्तु अधिकारस्य—

मानमार्गैः इव दिनकृतः किरणैः प्रसादलब्धया विकचपुण्ड-
रीकमुण्डमालिकयेव दीर्घया दृष्ट्या दूरादेव आनन्दयता,
(२३७) नैष्ठुर्याधिष्ठानेऽपि प्रतिष्ठितेन पदे प्रश्रयमिव
दर्शयता अवनम्रेण मौलिना पाण्डुरमुष्णीषमुद्वहता, (२३८)
वामेन स्थूलमुक्ताफलच्छुरणदन्तुरत्वकरं करकिसलयेन कलयता
कृपाणम्, (२३९) इतरेण अपनीततरलतां ताड़नीमिव
लतां शातकोष्भीं वेत्रयष्टिमुन्मृष्टां धारयता पुरुषेण अनुगम्य-

दिनकरतया आधिपत्यविशेषस्य, गौरवात्—सम्मानात्, दीयमानो मार्गो यैः तथोक्तैः ; दिनकृतः,—मृग्यस्य, किरणैः, (कर्तृभूतैः) प्रसादः,—प्रसन्नता, मार्गदान-जनिता प्रीतिरित्यर्थः, तेन लब्धया—अधिगतया, विकचपुण्डरीकमुण्डमालिकयेव —प्रस्फुटश्वेतपद्मस्रजेव, पद्मानां दिनकरस्वामिकत्वात् इति भावः ; दीर्घया—महत्या, विशालया इत्यर्थः, दृष्ट्या—नयनेन, दृष्टिपातेन वा, आनन्दयता—सन्तोषयता।

(२३७) नैष्ठुर्याधिष्ठानेऽपि—निष्ठुरस्य भावः नैष्ठुर्यं, तस्य अधिष्ठानम्—आस्पदं तस्मिन्। पदे—अधिकारे, द्वारपालनकर्मणि इति यावत्, प्रतिष्ठितेनापि प्रश्रयमिव—विनयमिव, दर्शयता—प्रकटयता। अवनम्रेण—विनतेन, मौलिना—शिरसा, पाण्डुरं—धवलम्, उष्णीषं शिरोवेष्टनम्, उद्वहता—धारयता। ["प्रश्रयमिव दर्शयिता अवनम्रेण" इत्यत्र "प्रश्रयमिवावनम्रेण" इति पाठान्तरं दृश्यते, तत्रान्वयस्तु, —अवनम्रेण मौलिना प्रश्रयमिव पाण्डुरमुष्णीषमुद्वहतेति, प्रश्रयस्य सद्गुणत्वात् तस्य सर्वगुणोत्कर्षद्योतनाय शुभ्रोष्णीषसाम्यं प्रदर्शितमिति वेदितव्यम्]।

(२३८) वामेन—सव्येन, करकिसलयेन—हस्तपल्लवेन, स्थूलानि यानि मुक्ताफलानि—मौक्तिकानि, तेषां, तन्मालानामिति भावः, यत्, छुरणं—विकाशः, तेन दन्तुरः,—सञ्जातदन्त इव दृश्यमानः, त्वक्,—खड्गमुष्टिदेशः यस्य तथाभूतं, कृपाणं—तलवारं, कलयता—धारयता ; तदा तस्य व्यापाराभावात् वामहस्तेन धारणमिति बोध्यम्।

(२३९) इतरेण—दक्षिणेन इत्यर्थः, करेण इति शेषः। अपनीतेति।—अपनीता—नाशिता, तरलता—चापल्यं, दुर्विनीतानां, प्रवेशोद्यतानां वा जनानामिति भावः, यया तथोक्तां, वेत्रयष्टिप्रहारभयात् कोऽपि प्रविशन् चापल्यं न करोतीति भावः। "अपनीत—" इत्यादिना अस्य नियमसंस्थापकत्वं प्रदर्श्यते।

मानो निर्गत्य अवोचत्,—"एष खलु (२४०) महाप्रतीहाराणामनन्तरश्चक्षुष्यो देवस्य पारियात्रनामा दौवारिकः। समनुगृह्णातु एनम् अनुरूपया प्रतिपत्त्या कल्याणाभिनिवेशी" इति। दौवारिकः समुपसृत्य कृतप्रणामो मधुरया गिरा सविनयम् अभाषत,—"आगच्छत, प्रविशत दर्शनाय, कृतप्रसादो देवः" इति। वाणस्तु,—"धन्योऽस्मि, यदेवम् अनुगृह्यं मां देवो मन्यते" इत्युक्त्वा तेन उपदिश्यमानमार्गः प्राविशत् अभ्यन्तरम्।

(२४१) अथ वनायुजैः, आरट्टजैः, काम्बोजैः, भारद्वाजैः, सिन्धुदेशजैः, पारसीकैश्च, गौरैश्च, श्यामैश्च, श्वेतैश्च, पिङ्गलैश्च,

---

ताडनीं—ताड्यतेऽनयेति तां, लतां—वल्लीमिव, ["ताडनीमिव लताम्" इत्यत्र "ताडितीमिव लताम्" इति पाठे,—ताडित्—विद्युत्, तस्या इयं ताडिती, तां, वैद्युतिकीं, लतामिव, विद्युल्लतामिवेत्यर्थः] जातकौक्षीं—काञ्चनीं, स्वर्णमयीमित्यर्थः, ("स्वर्णं सुवर्णं कनकं.....तपनीयं जातरूपम्....." इत्यमरः), उत्पृष्टाम्—अतिशयेन विशोधितामित्यर्थः, ("निर्घृष्टं शोधितं सृष्टम्" इत्यमरः) एतेन यष्टेः भास्वरतैव द्योत्यते। वेत्रयष्टिं—वेतसलतादण्डम् इत्यर्थः।

(२४०) महाप्रतीहाराणां—प्रधानद्वाररक्षिणाम्, अनन्तरः,—अव्यवहित इत्यर्थः, चक्षुष्यः,—प्रियदर्शन इत्यर्थः। एनं—पारियात्रं दौवारिकम्। अनुरूपया—समुचितया, प्रतिपत्त्या—सम्मानेन। कल्याणाभिनिवेशी—कल्याणे—शुभकर्मणि, अभिनिवेशः,—अवश्यमिदं कर्तव्यम् इत्याग्रहसमन्वितः मनःसंयोगविशेषः, सः अस्य अस्तीति तथाभूतः, सततशुभानुष्ठानशीलः इत्यर्थः, भवानिति शेषः। "आगच्छतः" "प्रविशत" इति बहुवचननिर्देशेन अस्यादरातिशय एव प्रतीयते।

(२४१) अतःपरम् "अथ" इत्यादौ "तुरङ्गैः आचितां मन्दुरां विलोकयन्" इति उत्तरेण सम्बन्धः। तान् तुरगान् विशिनष्टि, अथेत्यादिभिः।—वनायुजैः,—वनायुदेशोद्भवैः, आरट्यदेशजातैरित्यर्थः, आरट्टजैः,—आरट्टदेशोद्भवैः, काम्बोजैः,—तदाख्यदेशजैः, भारद्वाजैः,—भरद्वाजदेशजैः, सिन्धुदेशजैः,—सिन्धुदेशोद्भवैः, पारसीकैः,—पारस्यदेशभवैः, गौरैः,—रक्तवर्णैः, पद्मकिञ्जल्कवर्णैरिति भावः, ("गौरः पद्मादयः स्मृतः" इति कोषात्) श्यामैः,—कृष्णवर्णैः, श्वेतैः,—शुक्लवर्णैः, पिङ्गलैः,—

हरिद्भिश्च, तित्तिरिकल्माषैश्च, (२४२) पञ्चभद्रैश्च, मल्लिकाचैश्च, क्षत्तिकापिञ्जरैश्च, (२४३) आयतनिर्मांसमुखैः, अनुत्कट-कर्णकोशैः, सुवृत्तश्लक्ष्णसुघटितघण्टिकाबन्धैः, (२४४) यूपानु-पूर्ववक्रायतोदग्रग्रीवैः, (२४५) उपचयक्षयत्स्कन्धसन्धिभिः,

पिङ्गलैः, हरिद्भिः,—हरिद्वर्णैः, घासवर्णैरित्यर्थः, तित्तिरिकल्माषैः,—तित्तिरिः,—पक्षिविशेषः, तद्वत् कल्माषाः,—विचित्रवर्णाः तैः, ("चित्रं किर्म्मीरकल्माषशबलैतास्य कर्व्वुरे" इत्यमरः)।

(२४२) पञ्चभद्रैः,—पञ्चसु अङ्गेषु, मुखमस्तिनेषु शफेषु चतुर्षु इति भावः, भद्राः,—श्वेताः, इति पञ्चभद्राः तैः, उक्तञ्च,—"सितास्य यस्य वाजिनः शफाः सम्मतकं मुखम्। स पञ्चभद्रनामको नृपस्य राज्यमौक्ष्यदः॥" इति। मल्लिकाचैः,—पृथुः स्निग्धा समा चैव मल्लिकाकुसुमप्रभा। राजी यस्य तु पर्य्यन्ते परिक्षिप्ते तु लोचने। स हर्यो मल्लिकाचस्तु दृष्टिपर्य्यन्तताराकः॥" इत्युक्तलक्षणैः। क्षत्तिकापिञ्जरैः,—"तारकाकदम्बककल्पानेकविन्दुकल्माषितत्वच्। क्षत्तिकापिञ्जराः—" इत्युक्तलक्षणैः।

(२४३) आयतनेति।—आयतानि—दीर्घाणि, निर्मांसानि—प्रायेणास्थिमया-नीति भावः, मुखानि येषां तथोक्तैः; उक्तञ्च तल्लक्षणं,—"मुखं तत्वायतनतं चतुरस्रं समाहितम्। ऋजु चैवोपदिष्टञ्च परिपूर्णञ्च गम्यते॥" इति। कर्णेनाप्युक्तं,—"उच्चा अतुङ्गश्चत्यं स्निग्धं संवाहिराग अच्छशमम्" इति। अनुत्कटकर्णकोशैः,—अनुत्कटः,—खर्व्व इत्यर्थः, कर्णः,—श्रवणेन्द्रियं, कोशः,—मध्यञ्च; यद्वा,—कर्णकोशः,—श्रवणपाशः, येषां तैः। सुवृत्तेति।—सुवृत्तः,—सुवर्तुलः, श्लक्ष्णः,—चिक्कणः, सुघटितः,—सुनिर्म्मितः, घण्टिका—क्षुद्रघण्टा, बध्यतेऽत्रेति घण्टिकाबन्धः,—ग्रीवायाः मध्यभागः, निगाल इत्यर्थः, येषां तथोक्तैः। तादृशनिगालवत्त्वञ्चाश्वानां शुभसूचकम् उक्तम्; यथा,—"ग्रीवाग्रीवाऽतिरात्रेष्टा दीर्घवृत्तः समाहितः। नोद्वर्त्तो नातिदुर्नम्रोऽतिविभानतः। सुस्निग्धोऽनुपविग्धश्च निगालो मांसितः शुभः॥" इति।

(२४४) यूपेति।—यूपः,—यज्ञीयदारुभेदः, तस्येवानुपूर्वी—आनुरूप्यमित्यर्थः, तया वक्रा आयता—दीर्घा, उदग्रा—उन्नता, ग्रीवा येषां तैः; तदुक्तं,—"ग्रीवा भूलम्बिनी वृत्ता दीर्घा च सुसमाहिता। गर्ल्ल बद्धा विदीर्घेव्वा तथा ग्रीवासु चोन्नता॥ निगालं स्याच्च निर्म्मांसा महती साकुञ्चिता शुभम्। श्लिष्टसायवद्धा च तुरगस्य प्रशस्यते॥" इति।

(२४५) उपचयेति।—उपचयेन वर्द्धनं—स्फीततां गच्छन्, स्कन्धसन्धिर्येषां

(२४६) निर्भुग्नोरःस्थलैः, (२४७) अस्थूल-प्रगुणप्रसृतैः, (२४८) लोहपीठकठिनखुरमण्डलैः, (२४९) अतिजवत्रुटनभयात् अनिर्मितान्त्राणीव उदराणि वृत्तानि धारयद्भिः, (२५०) उद्यद्भ्रोणीविभज्यमानपृथु-जघनैः, (२५१) जगतीदोलायमानबालपक्ष्मवैः, कथमपि (२५२) उभयतो निखातदृढभूरिप्राग्रसंयमननियन्त्रितैः,

तः ; तदुक्तं,—"स्फ्यस्य सुपरिपूर्णः स्याद् व्यक्तमांसः पृथुत्विकः। बहुमांसाङ्गसंश्लिष्टः स्थिरमांसश्च पूरितः॥" इति।

(२४६) निर्भुग्नेति।—निर्भुग्न—स्थूलतया बहिर्निर्गतम्, अथवा रोगादिना कुटिलीकृतं, उरःस्थलं—वक्षःस्थलं येषां तैः ; उक्तञ्च,—"स्थूलास्थि महदच्छिद्रं पृथुलं यच्च निर्वलि। उरः दृष्टकप्रशंसन्ति स्थूलक्रोडं महत्तरम्॥" इति।

(२४७) अस्थूलेति।—अस्थूला—स्वल्पमांसेत्यर्थः, प्रगुणा—ऋजुः, प्रसृता—लम्बा येषां तैः, ("लम्बा तु प्रसृता" इत्यमरः) उक्तञ्च,—लम्बे वृत्ते दीर्घे निर्मांसे पूजिते निगूढसिरे" इति।

(२४८) लोहेति।—लोहपीठवत् कठिनं खुरमण्डलं—वृत्ताकारखुरचतुष्टयं येषां तैः ; तदुक्तम्,—"खुरास्तुरगे वृत्ताश्च ह्रस्वाश्च सुहृदा घनाः" इति।

(२४९) अतिजवेति।—अतिजवेन—अतिवेगेन, यत् त्रुटनं—छिदः, तस्मात् भयं, तस्मात् हेतोः, अनिर्मितानि अन्त्राणि—नाडीविशेषाः येषु तथोक्तानि इव, वृत्तानि—वर्तुलानि, उदराणि धारयद्भिः ; तथा चोक्तम्,—"उदरं वृत्तमगुरु मृगस्योपचितं तथा। अच्छिद्रह्रस्ववृत्तान्त्रसमकुक्षि च पूजितम्॥" इति।

(२५०) उद्यदिति।—उद्यती—उदयमधिगच्छन्ती, द्रोणी—वाजिनां श्रोणी-विशेषः, तया विभज्यमानानि—व्यक्तीक्रियमाणानि, पृथूनि जघनानि—कटिपूर्वो-भागाः येषां तैः ; तदुक्तं,—"पृष्ठारःकटिपार्श्वस्य मांसोत्कर्षणनिर्मिता। द्रोणिकेति प्रशंसन्ति श्रोणी वाजिनि पञ्चमी॥" इति।

(२५१) जगतीति।—जगत्यां—भूमौ, दोलायमानाः बालाः,—पुच्छलोमानि पक्ष्माण इव येषां तैः।

(२५२) उभयत इति।—उभयतः,—उभयोः पार्श्वयोः, निखातः,—प्रोतः, अत्युत्कटवेगवत्त्वादिति भावः, दृढः,—कठिनः, भूरिः,—प्रभूतः, प्राग्रः,—रज्जुः, तेन संयमनं—बन्धनं, तेन नियन्त्रिताः,—निरुद्धाः तैः।

(२५३) अनायतैरपि पश्चात् पाशबन्धप्रसारितैकाङ्घ्रिभिः आयततरैरिव उपलक्ष्यमाणैः, (२५४) बहुगुणसूत्रग्रथितग्रीवागण्डकैः, आमीलल्लोचनैः, (२५५) दूर्वारसश्यामलफेनलवशबलान् दशनगृहीतमुक्तान् फरफरितत्वचः कण्डूजुषः प्रतीकान् प्रचालयद्भिः, (२५६) सालसवलितबालधिभिः, (२५७) एकशफविश्रान्तिस्रस्तशिथिलितजघनार्द्धैः, निद्रया प्रध्यायद्भिः, (२५८) स्खलितहुङ्कारमन्दमन्दशब्दायमानैश्च, (२५९) ताडितखुरधरणिरणित-

(२५३) अनायतैरपि—पाशबन्धनियन्त्रणात् अविस्तृतावयवैरपि इत्यर्थः, ["अनायतैरपि" इत्यत्र "आयतैरपि" इति पाठे,—दीर्घैरपि इत्यर्थः] पश्चात् पाशबन्धेऽपि प्रसारितः,—विस्तारितः, एकः अङ्घ्रिः,—पादः यैषां तैः, अत एव आयततरैरिव—अतिदीर्घकायैरिव, उपलक्ष्यमाणैः,—दृश्यमानैः ।

(२५४) बहुगुणेति ।—बहुगुणैः,—अनेकावृत्तैः, सूत्रैः ग्रथितः,—गुम्फितः, ग्रीवासु गण्डकः,—भूषणभेदः यैषां तैः । आमीलल्लोचनैः,—आमीलितनेत्रैः । ["आमीलल्लोचनैः" इति पाठ,—आमीलत्—ईषन्मुद्रिते, लोचने यैषां तैः] ।

(२५५) दूर्वेति ।—दूर्वारसवत् श्यामलाः ये फेनलवाः,—फेनबिन्दवः, तैः शबलान्—चित्रितान्, दशनैः,—दन्तैः, गृहीताः,—आदौ धृताः, पश्चात् मुक्ताः,—त्यक्ताः तान्, फरफरिताः,—पुनः पुनरीषत्कम्पिताः, त्वचः यैषां तान्, कण्डूजुषः,—कण्डूतिशालिनः, प्रतीकान्—अङ्गानि, ("अङ्गं प्रतीकोऽवयवोऽपघनः" इत्यमरः) प्रचालयद्भिः,—कम्पयद्भिः ।

(२५६) सालसेति ।—सालसं—लघु यथा तथा, वलिताः,—चालिताः, कम्पिता इत्यर्थः, बालधयः,—पुच्छलोमानि यैषां तैः ।

(२५७) एकशफेति ।—एकेन शफेन—खुरेण, या विश्रान्तिः,—स्थितिरिति यावत्, तया स्रस्तं—पर्य्यस्तं, शिथिलितं—निस्त्रीभूतमित्यर्थः, जघनार्द्धं यैषां तैः । प्रध्यायद्भिः,—प्रकर्षेण चिन्तयद्भिः । ["प्रध्यायद्भिः" इत्यत्र "प्रध्यायद्भिश्च" इति पाठान्तरम्] ।

(२५८) स्खलितेति ।—स्खलितेन—अर्द्धोच्चरितेनेति यावत्, हुङ्कारेण मन्दमन्दं यथा तथा शब्दायमानैः,—नदद्भिः ।

(२५९) ताडितेति ।—ताडिता—प्रहता, पादेन इति भावः, या खुरधरणिः,

मुखरशिखर-खुरलिखितक्ष्मातलैः, घासमभिलषद्भिश्च, (२६०) प्रकीर्य्यमाणयवसग्रासरसमत्सरोद्भूतचौभैश्च, (२६१) प्रकुपित-चण्डचण्डालहुङ्कारकातरतरतरलतारकैश्च, (२६२) कुङ्कुम-प्रमृष्टिपिञ्जराङ्गतया सततसन्निहितनीराजनानलरच्यमाणैरिव उपरि विततविताने:, (२६३) पुरः पूजिताभिमतदेवतैः, भूपालवल्लभैः तुरङ्गैः आचितां मन्दुरां विलोकयन्, (२६४)कुतू-हलाक्षिप्तहृदयः किञ्चित् अन्तरम् अतिक्रान्तो हस्तवामेन

—खुराघःकाष्ठपट्टाच्छादिता भूः, तया: राणितेन—नादेन, मुखर—सशब्दमित्यर्थः, शिखरम्—अग्रं येषां तादृशाः, ये खुराः, तैः लिखितं—कुट्टितं, क्ष्मातलं—भूतलं यै. तथाविधैः।

(२६०) प्रकीर्य्यमाणेति।—प्रकीर्य्यमाण:,—प्रक्षिप्यमाणः, यः यवसग्रासः, —घासकवलः, तस्य रसे—स्वादे, यो मत्सरः,—अन्यतुरगान् प्रति विद्वेषः, अन्यः कोऽपि तद्ग्रासं नास्वादयतिति धियति भावः, तेन उद्भूतः,—जनितः, क्षोभः,—अधैर्य्यमित्यर्थः, येषां तैः।

(२६१) प्रकुपितेति।—प्रकुपितः,—क्रुद्धः, अत एव चण्डः,—उग्रः, यः चण्डालः,—अश्वपाल इति यावत्, तस्य हुङ्कारेण कातरतराः,—अतिदीनाः, तरलाः,—चञ्चलाः, तारकाः,—कनीनिकाः येषां तैः।

(२६२) कुङ्कुमेति।—कुङ्कुमैः प्रमृष्टिः,—प्रमार्ज्जनं, तेन पिञ्जराणि—पिङ्ग-लानि, अङ्गानि येषां तद्भावः, तत्ता, तया हेतुना। सततेति।—सततं—निरन्तरं, सन्निहितेन—संसक्तेन इत्यर्थः, नीराजनानलेन—"यात्रायां वाजिनां नीराजना क्रियते" इति शास्त्रात् नीराजनाग्निना, रच्यमाणाः तैरिव। उपरीति।—उपरि—ऊर्द्ध, विततः,—विस्तृतः, वितानः,—उल्लोचः येषां तैः।

(२६३) पुर इति।—पुरः,—अग्रतः, पूजिता—अर्चिता, अभिमता—अभीष्टा, देवता येषां तैः। ["देवतैः" इत्यत्र "दैवतैः" इति पाठान्तरम्]। भूपालवल्लभैः,—राजप्रियैः। आचितां—व्याप्ताम्, ["आचिताम्" इत्यत्र "आरचिताम्" इति पाठे,—शोभितामित्यर्थः]। मन्दुराम्—अश्वशालां, ("वाजिशाला तु मन्दुरा" इत्यमरः)। विलोकयन्—पश्यन्।

(२६४) कुतूहलेति।—कुतूहलेन—औत्सुक्येन, आक्षिप्तम्—आकृष्टं, हृदयं यस्य तथाभूतः। अतिक्रान्तः,—गतः। हस्तवामेन—हस्तस्य वामभागेन इत्यर्थः।

अत्युन्नतया निरवकाशमिव आकाशं कुर्वाणं,महता कदलीवनेन (२६५) परिवृतपर्य्यन्तं, (२६६) सर्व्वतो मधुकरमयीभिः मदस्रुतिभिः नदीभिरिव आपतन्तीभिः आपूर्य्यमाणम्,(२६७)आशामुखविसर्पिणा वकुलवनानामिव विकसताम् आमोदेन लिम्पन्तं घ्राणेन्द्रियं, दूरात् अव्यक्तम्, इभधिष्ण्यागारम् अपश्यत् ; अपृच्छच्च,—"अत्र देवः किं करोति" इति। (२६८) असौ अकथयत्,—"एष खलु देवस्य उपवाह्यः, वाह्यं हृदयं, जात्यन्तरित आत्मा, वहिश्चराः प्राणाः, (२६९) विक्रमक्रीड़ासुहृत्, दर्पशात

[हस्तवामशब्दौ भाष्यकृता वामहस्तमार्ग इत्यर्थे]। अत्युन्नतया—अत्युन्नततया, निरवकाशमिव—अवकाशशून्यमिव, अम्बरुषमिति भावः।

(२६५) परिवृतपर्य्यन्तं—वेष्टितप्रान्तम।

(२६६) मधुकरमयीभिः,—भृङ्ग्यात्माभिः, मदस्रुतिभिः,—हस्तिनां दानवारिनिःस्रवैरित्यर्थः। आपतन्तीभिः,—आवहन्तीभिः।

(२६७) आशामुखविसर्पिणा—दिङ्मुखविस्तारिणा, सर्व्वत्र प्रसृतेनेत्यर्थः। वकुलेत्यादिना प्राशस्त्यमेव द्योतयति; तदुक्तं,—"मालतीमुक्तपद्मागवकुलोपमसौरभम्। दानं पिष्टाम्बुमट्टश्च सुरुच्छ्रेतं तु शीतलम॥" इति श्लैष्मिकादाननलक्षणम्; एवञ्च प्रकोपमयेऽपि तथाविधमदवर्णनेन श्लेष्मप्रकृतित्वं प्रकटयति,—"श्लेष्मप्रकृतिकं श्रेष्ठं भद्रजातिं तथैव च" इति च शास्त्रकृता दर्शितम। विकसतां—प्रस्फुटताम्। आमोदेन—सौरभेण, लिम्पन्तं—पूरयन्तम्। धिष्ण्यागारम्—अवस्थानमन्दिरम्। ("धिष्ण्या स्थाने गृहे भेऽग्नौ" इत्यमरः)।

(२६८) असौ—दौवारिकः। उपवाह्यः,—क्रीड़ाहस्ती, ["उपवाह्यः" इत्यत्र "औपवाह्यः" इति पाठेऽपि स एवार्थः]। करिषु केचन सन्नाह्याः केचिच्च भद्रजातीया द्विविधस्वभावा भवन्ति। अस्य च यद्यपि वक्ष्यमाणेन "विक्रमक्रीड़ासुहृत्" इत्यनेन "दर्पशात इति यथार्थनामा वारणपतिः" इत्यनेन च सान्नाह्यत्वमेवोक्तं, तथापि "उपवाह्यः" इति कथनेन अर्थद्वयेऽपि औचित्यात् भद्रजातीयत्वायमिति निश्चीयते। वाह्यं—वहिश्चरम्। जात्यन्तरितः,—अन्यां जातिं गतः, हस्तिजन्म प्राप्तः इत्यर्थः। वहिश्चराः,—वाह्याः।

(२६९) विक्रमेति।—विक्रम एव क्रीड़ा, तस्यां सुहृत्—सहायः। दर्पशातः,

इति यथार्थनामा वारणपतिः। तस्य अवस्थानमण्डपोऽयं महान् दृश्यते" इति। (२७०) स तम् अवादीत्,—"भद्र! श्रूयते दर्पशातः। यदि एवम् अदोषो वा, पश्यामि तावत् वारणेन्द्रमेव। अतोऽर्हसि माम् अत्र प्रापयितुम्; (२७१) अतिपरवान् अस्मि कुतूहलेन" इति। सोऽभाषत,—"भवतु एवम्; आगच्छतु भवान्। को दोषः? पश्यतु तावत् वारणेन्द्रम्" इति।

गत्वा च तं प्रदेशं दूरात् एव (२७२) गम्भीरगलगर्ज्जिताञ्जितैः वियति चातककदम्बकैः भुवि च भवननीलकण्ठकुलैः कलकेकाकलकलमुखरमुखैः क्रियमाणकलकोलाहलं, (२७३) विकचकदम्बमवादिमदसुरासौरभभरितभुवनं,

—दर्पम्—अहङ्कारं, शत्रूणामिति शेषः, शातयति—नाशयति तथोक्तः। यथार्थनामा—अन्वर्थनामा, शत्रूणां दर्पशातनादिति भावः। वारणपतिः,—गजेन्द्रः। तस्य—वारणपतेः, अवस्थानमण्डपः,—वासस्थानम्।

(२७०) सः,—बाणः। तं—दौवारिकम्। यदि एवं—दर्पशात इत्यन्वर्थनामेति भावः, अदोषो वा—दर्शने दोषो न भवेद् वा, तर्हि। अत्र—वारणपतेः स्थाने, प्रापयितुं—नेतुम्।

(२७१) अतिपरवान्—अतिशयेन पराधीनः, कुतूहलेन—वारणपतेर्दर्शनात् सुखेन। सः,—दौवारिकः। "गत्वा" इत्यादौ "दर्पशातमपश्यत्" इत्युत्तरेणान्वयः। तमेव विशिनष्टि, गम्भीरेत्यादिभिः।

(२७२) गम्भीरेण—गभीरेण, गलगर्ज्जितेन—कण्ठनिनादेन, हेषितेनेति यावत्, अर्ज्जितानि—उपस्थापितानि, मेघगर्ज्जनशङ्कोत्पादनादिति भावः, तैः। ["गर्ज्जिताञ्जितैः" इत्यत्र "गर्ज्जितोर्ज्जितैः" इति पाठे,—गर्ज्जितेन—हेषितेन इत्यर्थः, ऊर्ज्जितानि—प्रवृद्धानि, अनेकसङ्ख्यया समुपस्थितानीत्यर्थः, तैः]। वियति—आकाशे। चातकानां कदम्बकानि—सङ्घाः, तैः। भुवि—भूतले, भवननीलकण्ठकुलैः,—गृहमयूरवृन्दैः; कलाः,—मधुरास्फुटाः, केकाः,—(मयूर) वाचः, तासां कलकलेन—कोलाहलेन, मुखराणि—शब्दायमानानि, मुखानि येषां तैः; क्रियमाणः कलः,—मधुरास्फुटः, कोलाहलः यत्र तथोक्तम्।

(२७३) विकचेति।—विकचानां—प्रस्फुटानां, कदम्बानां—नीपकुसुमानां,

(२७४) कायवन्तमिव अकालमेघकालम्, (२७५) अविरल-मधुविन्दुपिङ्गलपद्मजालकितां सरसीमिव अभ्यवगाढां दशां चतुर्थीम् उत्सृजन्तम्, (२७६) अनवरतम् अवतंसशङ्खैः आमन्द्रकर्णतालदुन्दुभिध्वनिभिः पञ्चमीप्रवेशमङ्गलारम्भमिव गायन्तम्, (२७७) अविरतचलनचित्रत्रिपदीललितलास्यलयैः

मदवारिणा—अनुकारिणा, मदः,—दानवारि, स एव सुरा—मद्य, तस्याः, सौरभेण—गन्धेन, भरितं—पूरितं, भुवनं येन तथोक्तम्।

(२७४) कायवन्तमिव—मूर्त्तिमन्तमिव, अकालमेघकालम्—असमयमेघ-समयम्। चातककादम्बकनीलकण्ठकुवलयकदम्बसौरभादियुक्तत्वेन नवजलधर-श्यामलत्वेन च तस्य मेघकालत्वेनोत्प्रेक्षा।

(२७५) अविरलेति।—अविरलाः,—घनाः, ये मधुविन्दवः,—मदवारिकणाः, तैः; अभ्यव,—मधुविन्दवः,—मादिककणाः तैः, पिङ्गल—पिङ्गलं, पद्मानां—पद्माकाराणां, पद्मैः,—तदाख्यकुसुमानाच्च, जालकं—समूहः जातमस्यामिति तथोक्ताम्, ["इताऽस्यजाते" (वा०) इतीतच्प्रत्ययः] "पद्मकं विन्दुजालं स्याद् गात्रकं करिणामिति"; यथा,—"पद्मवालकसंस्थानैः विन्दुभिश्च कचैस्तथा। स्वङ्कताङ्गस्तुषाराभः शावः शक्तिकरः करी॥" इत्युक्तम्; अत एव सरसीमिव—कमलाकरमिव, अभ्यव-गाढां—परिणतां, चतुर्थीं दशां—मदावस्थां, नियतदानवारिक्षरणात् परिणतगजानां शरीरं सच्छिद्रमारक्तञ्च भवतीति, अत एव "चतुर्थ्यामवगाढायां लेखाविन्दुभिराचितः" इत्युक्तम्। उत्सृजन्तं—त्यजन्तं, मदस्रावित्वं हस्तिनां प्रथमं शरीराधेयसम्पादकौ मदस्रावारम्भः प्रथमावस्था, ततोऽनवरतस्रावो द्वितीयावस्था, तदनु मदवारिणाम् अङ्गेषु क्रमशो गाढता जायते सा तृतीयावस्था, तदनन्तरम् अङ्गेषु पद्माकाराणि मदविन्दुजालानि बध्यन्ते सा चतुर्थी अवस्थेति बोध्यम्।

(२७६) अनवरतम्—अविरतम्, आमन्द्राः,—दुष्पङ्गभीराः, कर्णतालस्य—नियतसञ्चालितश्रवणस्य दुन्दुभेरिव, ध्वनयः,—शब्दाः तैः, तथा अवतंसशङ्खैः,—कर्ण-भूषणाकृतशङ्खैः, पञ्चमी—दशेति भावः, स्वार्थ्यदर्शात यावत्, तस्यां प्रवेशः, तान्मान् मङ्गलारम्भः,—मङ्गलसूचनारम्भसङ्गीतमित्यर्थः, तमिव गायन्तं—सङ्गीतं कुर्वन्तम्।

(२७७) अविरतेति।—अविरतेन—अविश्रान्तेन, चलनेन—चापल्येनेत्यर्थः, चित्रा—सुदृश्या, या त्रिपदी—पादबन्धनी, एकपदीत्रयेण पादत्रयावस्थितिर्वा, तस्यां ललितं—सुन्दरं, मनोज्ञमित्यर्थः, यत् लास्यं—नृत्यं, तस्य लयाः,—बाद्यादेकतानताः,

दोलायमानदीर्घदेहाभोगतया मेदिनीविदलनभयेन भारमिव लघयन्तं, (२७८) दिग्भित्तितटेषु कायमिव कण्डूयमानम्, (२७९) आह्वाय उदस्तहस्ततया दिग्वारणानिव आह्वयमानं, (२८०) ब्रह्मस्तम्भमिव स्थूलनिशितदन्तेन करपत्रेण पाटयन्तम्, (२८१) अमान्तं भुवनाभ्यन्तरे वह्निः इव निर्गन्तुम् ईहमानं, सर्वतः (२८२) सरसकिसलयलतालासिभिः लेशिकैः चिरपरिचयोपचितैः घनैरिव विचिन्नमशैवलविस विसरशवलसलिलैः सरोभिरिव च आधोरणैः आधीयमानतैः। दोलायमानेति।—दोलायमानः,—पुरतः पश्चाच्चानिशं प्रेङ्खन्, दीर्घः,—महान्, देहस्य आभोगः,—विस्तारः यस्य तद्भावः, तत्ता तया हेतुना। मेदिनीति।—मेदिन्याः,—पृथिव्याः, विदलनं—विदारणमित्यर्थः, तस्मात् यत् भयं, तेन भारमिव लघयन्तम्—लघुकुर्वन्तमित्यर्थः।

(२७८) दिगिति।—दिगेव भित्तिः,—कुड्या, तस्याः तटाः,—आभोगाः तेषु। कायमिव—अङ्गमिव, कण्डूयमानं—घर्षमाणमित्यर्थः।

(२७९) आह्वाय—सङ्ग्रामाय। उदस्तः,—उत्क्षिप्तः, हस्तः,—शुण्डः येन, ("हस्तः करे करिकरे सप्रकोष्ठकरेऽपि च" इति मेदिनी) तस्य भावः, तत्ता तया हेतुना, दिग्वारणान्—दिग्गजान्, आह्वयमानमिव—स्पर्द्धया आकारयन्तमिव। [अत्र ह्वयतेः युद्धार्थे स्पर्द्धापूर्वकाह्वानार्थबोधकत्वेन आत्मनेपदम्]।

(२८०) ब्रह्मस्तम्भ—ब्रह्मखण्ड, स्थूलः निशितः,—तीक्ष्णः, दन्तः तेन, करपत्रेण—क्रकचेन, पाटयन्तमिव—दारयन्तमिव; करपत्रमपि स्थूलनिशितदशनं भवति, स्थाणुस्तम्भञ्च भेदयति।

(२८१) भुवनाभ्यन्तरे अमान्तं—पर्य्याप्तमलभमानम्, अवर्त्तमानमित्यर्थः, अत एव वह्निः,—भुवनाभ्यन्तराद् बाह्यदेशं, निर्गन्तुम् ईहमानमिव—चेष्टमानमिव।

(२८२) सरसाः,—रसयुक्ताः, किसलयाः,—पल्लवा यासां, तथाविधाः याः लताः—व्रतत्यः, ताभिः लसन्ति—राजन्तीति तथोक्तैः, लेशिकैः,—घासिकैः, चिरपरिचयेन—चिरानुगत्या, उपचितैः,—समाहृतैः, घनैरिव—मेघैरिव। विचिन्नेति।—विचिन्नानि—अर्पितानि, सशैवलानां विसानां—मृणालानां, विसरेण—विस्तरेण, शवलानि—मिश्राणि, सलिलानि यैः तथाभूतैः। आधोरणैः,—हस्तिपालैः, ("आधोरणाः, हस्तिपकाः हस्त्यारोहाः निषादिनः" इत्यमरः)। आधीयमानः,—

निदाघसमयसमुचितोपचारानन्दम्, अपि च (२८३) प्रतिगज-दानपवनादानदूरोत्क्षिप्तेन अनेकसमरविजयगणनालेखाभिरिव बलिवलयराजिभिः तनीयसीभिः तरङ्गितोदरेण अतिस्थवीयसा हस्तार्गलदण्डेन अर्गलयन्तमिव सकलं सकुलशैलसमुद्र-द्वीपकाननं ककुभां चक्रवालम्, (२८४) एकं करान्तरार्पितेन उत्पलाशेन कदलीदण्डेन अन्तर्गतशीकरमिश्यमानमूलं, मुक्ता-पल्लवमिव अपरं लीलाऽवलम्बिना मृणालजालकेन समररसो-च्छ्वासरोमाञ्चकण्टकितमिव दन्तकाण्डं वहन्तं, (२८५) विसर्पन्त्या च दन्तकाण्डयुगलकस्य कान्त्या सरःक्रीडास्वादितानीव कुमुद-

उत्पाद्यमानः, निदाघसमयस्य—ग्रीष्मकालस्य, समुचितेन—उपयुक्तेन, उपचारेण—परिचर्यया, आनन्दः,—सन्तोषः यस्य तम्।

(२८३) प्रतिगजेति।—प्रतिद्विपानां—प्रतिद्वन्द्विहस्तिनां, दानपवनस्य—मद-सौरभवाहिनो मरुत इत्यर्थः, आदानेन—ग्रहणेन, आघ्राणेनेत्यर्थः, दूरं यथा तथा उत्क्षिप्तः,—उद्धृतः तेन; तेषां जिगीषयेति भावः। अनेकेति।—अनेकेषां—बहूना, समराणां—सङ्ग्रामाणां, विजयाः, तेषां गणना—सङ्ख्यानं, तस्याः लेखाभिरिव—लिपिभिरिव, बलिवलयराजिभिः,—वलयाकारवलिरेखाभिः, तनीयसीभिः,—अति-क्षुद्राभिरित्यर्थः। तरङ्गितं—भङ्गिमत, उदरम्—अभ्यन्तरभागः यस्य तथोक्तेन, अति-स्थवीयसा—अतिस्थूलेन, हस्तार्गलदण्डेन—शुण्डरूपार्गलदण्डेन, अर्गलयन्तमिव—निरुन्धन्तमिव। ककुभां चक्रवालं—दिङ्मण्डलम्।

(२८४) एकं दन्तकाण्डमित्यन्वयः। करान्तरार्पितेन—करस्य—शुण्डस्य, अन्तरे—मध्ये, अर्पितः,—दत्तः, आधारयोनेति भावः, तेन; उत्पलाशेन—उद्धृत-पद्मेन, कदलीदण्डेन—रम्भास्तम्भेन हेतुना, अन्तर्गतैः शीकरैः,—अम्बुकणैः, मिश्य-मानं मूलं यस्य तथोक्तम्। मुक्तापल्लवमिव—मुक्ताफलकिसलयमिव, अपरं दन्तकाण्ड-मित्यनुषङ्गः। ["अपरम्" इत्यत्र "परम्" इति पाठे,—अन्यमित्यर्थः]। लीलाऽव-लम्बिना—लीलया अवलम्बते इति तथोक्तेन, मृणालजालकेन—मृणालनिचयेन। समरेति।—समरे—युद्धे, यो रसः,—रागः, तेन उच्छ्वासः,—उद्भताः, रोमाञ्चा एव कण्टकाः जाता अस्येति तथोक्तमिव, दन्तकाण्डं—दशनसमूहं, वहन्तं—दधानम्।

(२८५) विसर्पन्त्या—विसरन्त्या, दन्तकाण्डयुगलस्य कान्त्या—प्रभया। सरः-

वनानि बहुधा वमन्तं, (२८६)निजयशोराशिमिव दिशाम् अर्पयन्तं, (२८७) कुकरिकोटपाटनदुर्ललितान् सिंहानिव उपहसन्तं, (२८८) कल्पद्रुमदुकूलमुखपटमिव च आत्मनः कलयन्तं, (२८९) हस्तकाण्डटण्डोडरणलीलासु च लक्ष्यमाणेन रक्तांशुकसुकुमारतलेन तालुना कवलितानि रक्तपद्मवनानि इव वर्षन्तम्, अभिनवकिसलयराशीनिव उद्गिरन्तं, (२९०) कमलकवलपोतं मधुरमिव स्वभावपिङ्गलेन वमन्तं चक्षुषा, (२९१) चूतचम्पकलवलीलवङ्ककक्कोलवल्लि एला-

क्रीडेति।—सरसि या क्रीडा—विहारः, तत्र आस्वादितानि—भुक्तानि तानीव, [इत्युत्प्रेक्षा] कुमुदवनानि—कैरवसङ्घान् बहुधा—अनेकधा, वमन्तम्—उद्गिरन्तम्।

(२८६) निजयशोराशिमिव—स्वीयं कीर्त्तिसमूहमिव, दिशाम् अर्पयन्तं—दिक्षु विक्षिपन्तम्। दन्तयोर्वर्णप्राशस्त्यमाह,—"पयःकुमुदकुन्दाभौ केतकीकुमुदद्युती। मृगाङ्ककिरणालीकौ कीर्त्तिकल्याणकारकौ॥" इति।

(२८७) कुकरीति।—कुत्सिताः,—दुर्बला इति यावत्, करिणः,—हस्तिनः, ते एव कीटाः,—क्षुद्रप्राणिभेदाः, तेषां पाटनेन—संहननेन, दुर्ललिताः,—दृप्ताः, तान्।

(२८८) कल्पद्रुमेति।—कल्पद्रुमस्य दुकूलं—श्वेतपट्टवसनं, तदेव मुखपटः,—मुखाच्छादनवस्त्रं तमिव, आत्मनः,—स्वस्य, कलयन्तं—धारयन्तमित्यर्थः।

(२८९) हस्तेति।—हस्तः,—शुण्ड एव, काण्डदण्डः,—लम्बयष्टिः, तस्य उद्वरणानि—उत्क्षेपणान्येव, लीलाः तासु, लक्ष्यमाणेन—दृश्यमानेन, रक्तांशुकसुकुमारतलेन—रक्तवस्त्रमृदुमृदुतलेन, तालुना—तालुदेशेन हेतुना, उक्तञ्च—"रक्तौष्ठतालुरसनम्" इति। कवलितानि—भक्षितानि। वर्षन्तं—वमन्तम्। अभिनवकिसलयराशीनिव—नवपल्लवनिवहानिव।

(२९०) स्वभावपिङ्गलेन—सहजदीप्तिस्निग्धवर्णेन, चक्षुषा, उक्तञ्च,—"अग्निसूर्य्यसमाभासे कालविड्वाजसन्निभे। प्रसन्नमधुपिङ्गे च स्थिरे चामीलने तथा॥ अपरिस्राविणी चैव कृशाग्निनिभभास्वरे। नेत्रे श्लक्ष्णे समे स्निग्धे दीर्घे चाविलपक्ष्मणी॥" इति। कमलानां कवलेन—ग्रासेन, पोतं मधुरसमिव—मकरन्दमिव। वमन्तं—वर्षन्तम्।

(२९१) चूतेत्यादिना प्राशस्त्यमाह, यदुक्तम्,—"उभयद्युतिरप्येष विवर्णो

लतामिश्रितानि ससहकाराणि कर्पूरपूरपूरितानि पारिजातकवनानीव उपभुक्तानि पुरः करटाभ्यां बहुलमदामोदव्याजेन विसृजन्तम्, अहर्निशं (२९२) विभ्रमकृतहस्तस्थितिभिः अर्द्धखण्डितपुण्ड्रेक्षुकाण्डकण्डूयनलिखितैः अलिकुलवाचालितैः दानपट्टकैः विलभमानमिव सर्व्वकाननानि करिपतीनाम्,

हर्षवर्जितः। यदि स्यादपगन्धश्च तदाऽसौ न मतां मतः॥" इति। पुरः,—अग्रतः, करटाभ्यां—गण्डाभ्यां, बहुलमदाऽऽमोदव्याजेन—प्रभूतदानवारिसौरभच्छलेन, चूतचम्पकलवलीलवङ्ककक्कोलवल्लि—चूतम्—आम्रमुक्तालमित्यर्थः, चम्पकं—चम्पकपुष्पमित्यर्थः, लवली—"नीयाड" इति ख्यातः वृक्षविशेषः, तस्याः पुष्पमित्यर्थः, लवङ्गं—लवङ्गकलिका, कक्कोलं—"काँकला" "वनकर्पूर" इति च ख्यातः वृक्षविशेषः कक्कोलः, तस्य फलमित्यर्थः, तद्वल्लि—तद्विशिष्टानि, एलालतामिश्रितानि—सफलैलावल्लीयुक्तानि, ससहकाराणि—अतिसौरभासमन्वितानि, ("आम्रः चूतो रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः)। कर्पूरपूरपूरितानि—कर्पूराख्यवृक्षावयवस्य सुगन्धिनिर्य्यासप्रवाहभरेण व्याप्तानि, पारिजातकवनानि—पारिजाताख्यपुष्पावयवस्य अरण्यानि, विसृजन्तमिव—वमन्तमिव।

(२९२) विभ्रमेति।—विभ्रमेण कृता हस्ते—शुण्डे, स्थितिः यैः तादृशैः; अर्द्धेति।—अर्द्धेत्यादिना इक्षुकाण्डस्य लेखनीसाम्यं प्रदर्शयति, अर्द्धं खण्डितः,—भग्नः, पुण्ड्रेक्षुकाण्डः,—इक्षुविशेषकाण्डः, तेन यत् कण्डूयनं, तेन लिखितानि—कृतलेखानि तैः; अलिकुलैः,—भ्रमरवृन्दैः, वाचालितानि—मुखरितानि तैः; यद्वा,—लिखितैः, —कृतलेखैः, तथाऽपि अलिकुलवाचालितैः,—अलिकुलेन—भ्रमरवृन्देन, वाचालितः, —मुखरीकृतभूतैः, [अवाचालः वाचालः भूतः इति अभूततद्भावार्थे क्विप्रत्यये वाचाल इति नामधातोः कर्त्तरि निष्ठायां सिद्धम्, अन्यथा विशेषणपदत्वादव सत्यर्थीयस्य इतचः अप्रयोगः, विशेष्यपदोत्तरप्रयोगस्य तस्य साधुत्वात्] तादृशैः; [एतेन अलिकुलस्य लिपेरक्षररूपता ध्वन्यते, अक्षरेषु च विद्यमानेषु अधीयमानेषु वाचालता प्रतीयते]। दानपट्टकैः,—दानमेवपट्टैः, हस्तिपट्टे,—दानस्य—मदजलस्य, पट्टकानि—पीठानि, तैः, शिरःहस्तकपोलादिप्रदेशैः, तत्र मदसलिलस्य प्राधान्येन चरणात् तस्य शिरसः तथात्वेनापवर्णनमिति वेदितव्यम्, करिपतीनां—गजेन्द्राणां, सर्व्वकाननानि विलभमानमिव—स्ववशीकृतिमार्गमिव; दानपट्टकलिखितानुरूप भूम्यादिकं किमपि लभ्यते, तदाचरणि लिखितानि च वाच्यन्ते।

(२८३) अविरलोदबिन्दुस्यन्दिना हिमशिलाशकलमयेन विभ्रमनक्षत्रमालागुणेन शिशिरीक्रियमाणं, (२८४) सकलवारणेन्द्राधिपत्यपट्टबन्धबन्धुरम् इव उच्चैस्तरां शिरो दधानं, मुहुर्मुहुः (२८५) स्थगितापावृतदिङ्मुखाभ्यां कर्णतालहन्ताभ्यां वीजयन्तमिव भर्तृभक्त्या दन्तपर्यङ्किकास्थितां राजलक्ष्मीम्,

(२८३) अविरलेति।—अविरलम्—अजस्रम्, उदबिन्दुस्यन्दिना—जलकणस्राविणा, ["मन्थौदनमनुबिन्दु—" (६ ३ ६० पा०) इति मृचेण प्राचिक: उदकस्य उदादेशः, तथा च उदकबिन्दुरित्यपि पदान्तरं भवतीति भाष्यम्] हिमशिलाशकलमयेन—वातश्चीभूतं करकाकारं हिमं हिमशिला, तच्छकलमयेन—तत्खण्डमयेन। केचित्तु "हिमानि शिलाशकलानि चन्द्रकान्ता:" इति प्राहुः। विभ्रमनक्षत्रमालागुणेन—विभ्रमाय—शोभार्थमित्यर्थः, या नक्षत्राणां मालेव इति नक्षत्रमाला—सप्तविंशतिमणिनिर्मितो मौक्तिकहारविशेषः, सा एव गुणः,—पाशः, तेन, शिशिरीक्रियमाणं—शीतलीक्रियमाणम् ; अतिधवलानां वर्तुलाकाराणाञ्च मौक्तिकसज्ञां गजस्य शिरसि शोभार्थं निहितानां जलबिन्दुरूपत्वेन वर्षोपलरूपत्वेनोत्प्रेक्षितत्वं सुसङ्गतमेवेति ज्ञेयम्।

(२८४) सकलेति।—सकलानां वारणेन्द्राणां—हस्तीन्द्राणाम्, आधिपत्य—प्रभुत्वं, तस्य पट्टबन्धः,—तत्सूचकलोध्रपल्लवरूपमिति यावत्, तेन बन्धुरमिव—रमणीयमिव, शोभमानमिव इत्यर्थः, उन्नतानतमिवेति वा, गजशिरोदेशस्य समतलत्वादर्शनात् ; तत्र पट्टबन्धादेव विषमत्वं ज्ञातमित्युत्प्रेक्षितम्,("बन्धुरं सुकुटे पुंसि स्त्रीचिह्नतिलकेऽर्जुनौ:। बन्धुकं बन्धुरे हृद्ये त्रिषु स्यादभ्यनमयौ:॥" इति मेदिनी) उच्चैस्तराम्—अतिशयेन उच्च, शिरः,—मस्तकं, दधानं—धारयन्तम् ; तच्च करिणः प्राग्भागमुन्नं, यथा,—"समं महच्च पूर्णञ्च नातिरूक्षोऽमलं कम्। नावायं नातिपृथुलं वितानावयवं सदु॥" इति।

(२८५) स्थगितेति।—स्थगितम्—आच्छादितं, प्रसारणक्षणे इति भावः, अपावृतं—प्रकटितञ्च, सङ्कोचनावसरे इति भावः, तस्यातिविशालत्वादेवेत्याशयः, दिङ्मुखं याभ्यां तथाविधाभ्यां, कर्णतालहन्ताभ्यां—कर्णावेव तालहन्ती ताभ्याम् ; ["कर्णतालतालहन्ताभ्याम्" इति पाठे,—नियतसञ्चालितश्रवणरूपव्यञ्जनाभ्यान् इत्यर्थः]। दन्तेति।—दन्त एव पर्यङ्किका—क्षुद्रपर्यङ्कः, राजलक्ष्म्याः अवस्थानयोग्यत्वादिति भावः, तत्र स्थितां तां, राजलक्ष्मीं—राजश्रियं, वीजयन्तमिव इत्युत्प्रेक्षा।

(२९६) आयतवंशक्रमागतेन गजाधिपत्यचिह्नेन चामरेणेव चलता बालधिना विराजमानं, (२९७) स्वच्छगिरिशीकरच्छलेन दिग्विजयपीताः सरित इव पुनः पुनः मुखेन मुञ्चन्तं, क्षणम् (२९८) अवधानदाननिस्यन्दीकृतसकलावयवानाम् अन्यद्विरदडिण्डिमाकर्णनबलनानाम् अन्ते दीर्घशीत्कारैः परिभवदुःखमिव आवेदयन्तम्, (२९९) अलब्धयुद्धमिव आत्मानम् अनुशाचन्तम्, (३००) आरोहाधिरूढ़िपरिभवेण लज्जमानमिव अङ्गुलीलिखितमहीतलं मदं मुञ्च-

(२९६) आयतेति ।—आयतः,—दीर्घः, वंशः,—पृष्ठदण्ड इति यावत्, क्रमश्च, तस्य क्रमेण—आनुपूर्व्या, परम्परया च, आगतः,—उत्थितः, प्राप्तश्च तेन । आयतवंशः,—वक्रवंशः, शरवंशः, बालवंशश्चेति चतुर्षु आयतवंशश्चैव प्राशस्त्यमुक्तं, यथा,—"यावत् पुरितपाशस्य वंशश्चपलताकृतिः । सुभगा स्त्रीषु गजेन्द्राणामायतः क्रमते सुखम् ॥" इति । गजाधिपत्यं तस्य चिह्नं—लक्षणं तेन । बालधिना—पुच्छेन, विराजमानं—शोभमानम् ।

(२९७) स्वच्छेति ।—स्वच्छानां—विशदानां, गिरिशीकाणां—शीतलानां, शीकराणाम्—अम्बुकणानां, कृतं तेन, दिशां विजयैः—विजयकालैः, पीताः ताः, सरितः,—नदीः । मुञ्चन्तं—त्यजन्तम् ।

(२९८) अवधानेति ।—अवधानस्य—मनोनिवेशस्य, दानेन—मनोनिवेशपूर्वकम् अन्यद्विरदडिण्डिमश्रवणेन इति भावः, निस्यन्दीकृता,—निश्चलीकृताः, सकलाः अवयवाः यासु तासाम् । अन्येषां द्विरदानां—गजानां, डिण्डिमाकर्णने—तेषामुपरिस्थापितानां वाद्यभेदानां श्रवणे, या बलना—चालना, तदसहिष्णुता वा इति भावः, तासां, ["डिण्डिमाकर्णनबलनानाम्" इत्यत्र "डिण्डिमाकर्णनाङ्कबलनानाम्" इति पाठे,—डिण्डिमाकर्णने या अङ्कबलना—अङ्कचालना तासाम्] । अन्ते—अवसाने । दीर्घशीत्कारैः,—दीर्घकालं व्याप्य निर्गतैः शीत् इत्याकारकाव्यक्तशब्दविशेषैः, ["दीर्घशीत्कारैः" इत्यत्र "दीर्घफूत्कारैः" इति पाठान्तरम्] । परिभवदुःखमिव—पराजयव्यलीकमिव, आवेदयन्तं—प्रकटयन्तम् ।

(२९९) अलब्धेति ।—न लब्धं युद्धं येन तथोक्तमिव ।

(३००) आरोहेति ।—आरोहस्य—आरोहणस्य इत्यर्थः, अधिरूढिः,—अधि-

न्तम्, (३०१) अवज्ञाग्रहीतमुक्तकवलकुपितारोहारटनाऽनुरोधेन मदतन्द्रीनिमीलितनेत्रत्रिभागं कथं कथमपि मन्दमन्दम् अनादरात् आददानं कवलान्, (३०२) अवजघ्रतमालपल्लवसुतश्यामलरसेन प्रभूततया मदप्रवाहमिव मुखेनापि उत्सृजन्तं, (३०३) दलन्तमिव दर्पेण, श्वसन्तमिव शौर्येण, मूर्च्छन्तमिव मदेन, वृद्धन्तमिव तारुण्येन, द्रवन्तमिव दानेन, वल्गन्तमिव बलेन, माद्यन्तमिव मानेन, उद्यन्तमिव उत्साहेन, ताम्यन्तमिव तेजसा, लिम्पन्तमिव लावण्येन, सिञ्चन्तमिव

रोहणं, सैव परिभवः, तेन, लज्जमानमिव, अङ्गुलीभिः,—करिकरायावयवैः; अन्यत्र, —करशाखाभिश्च, लिखितं—खण्डितं, महीतलं—भूतलं येन तथोक्तं, लज्जितानां भूलेखनं विनोद इति भावः; मदं—दानवारि गर्वञ्च, मुञ्चन्तं—त्यजन्तम्; लज्जितस्य गर्वत्यागः समुचित एव।

(३०१) अवज्ञेति।—अवज्ञया—अवहेलया, आदौ गृहीताः पश्चात मुक्ताः, —त्यक्ताः, ये कवलाः, तैः कुपितः,—रुष्टः, यः आरोहः,—हस्तिपकः, तस्य आरटनाऽनुरोधेन—निर्बन्धातिशयेन इत्यर्थः। मदेति।—मदेन या तन्द्री—आलस्यं, निद्रा वा, ("तन्द्री निद्राप्रमीलयोः" इत्यमरः। आलस्यं वा इन्द्रियाणामचेष्टनं वा प्रमीला) तया निमीलितः नेत्रयोः त्रिभागः,—क्वचित् सङ्ख्यावाचिनामपि पूरणार्थत्वमिति न्यायात् तृतीयो भाग इत्यर्थः, यस्मिन् तद् यथा तथा, कवलान्—ग्रासान्, आददानं—गृह्णन्तम्।

(३०२) अवजघ्रेति।—अवजघ्राणं—खादितानां, तमालपल्लवानां सुताः, —निर्गलिताः, श्यामलाः रसा यस्मात् तथोक्तेन, मुखेन—वदनेन, प्रभूततया—प्राचुर्येण, मदप्रवाहमिव—दानवारिस्रोत इव, उत्सृजन्तं—मुञ्चन्तम्।

(३०३) दलन्तमिव—स्वयं भिद्यमानमिव। ["दलन्तम्" इत्यत्र "चलन्तम्" इति पाठे,—कम्पमानमित्यर्थः]। श्वसन्तमिव—जीवन्तमिव। वृद्धन्तमिव—सुखलन्तमिव। द्रवन्तमिव—गलन्तमिव। दानेन—मदेन। वल्गन्तमिव—विचेष्टमानमिव। माद्यन्तमिव—मत्तां प्रकटयन्तमिव। उद्यन्तमिव—उदयमानमिव। ताम्यन्तमिव—क्लिश्यन्तमिव। लिम्पन्तमिव—संश्लेषयन्तमिव, सञ्चयन्तमिव वा। सिञ्चन्तमिव—वर्षन्तमिव।

सौभाग्येन ; (३०४) स्निग्धं नखेषु, परुषं रोमविषये, गुरुं मुखे, सच्छिष्यं विनये, मृदुं शिरसि, दृढं परिचयेषु, ह्रस्वं स्कन्धबन्धे, दीर्घम् आयुषि, दरिद्रम् उदरे, सततप्रवृत्तं दानं, (३०५) बलभद्रं मदलीलासु, कुलकलत्रम् आयत्ततासु, जिनं क्षमासु, वह्निवर्षं क्रोधमोक्षेषु, गरुडं नागोद्धृतिषु, (३०६) नारदं कलहकुतूहलेषु, शुष्काशनिपातम् अवस्कन्देषु, मकरं वाहिनीचीभेषु, (३०७) आशीविषं दशनकर्मसु, वरुणं हस्तपाशाकृष्टिषु, यमवागुराम् अरातिसंवेष्टनेषु,

(३०४) स्निग्धमिति।—उक्तञ्च,—"नखाः स्निग्धाः सिताः श्लक्ष्णाः" इति। परुषं—कर्कशं, यो हि स्निग्धः (प्रीतिमान्) स कथं परुषः (प्रीतिशून्यः) भवतीति विरोधः। गुरुं—महान्तम् ; एवं गुरुः,—विस्तीर्णः, आचार्यश्च। सच्छिष्यं—सुशीलं शिष्यम। विनये इति।—उक्तञ्च,—"विनये मुनिभिस्तुल्याः क्रूरा नागाश्च राक्षसाः। निस्विंशस्याधिकत्वाच्च शस्तं नागा महीपतेः॥" इति। यश्च गुरुः, स कथं शिष्यः इति विरोधः। मृदुं—कोमलम्। परिचयेषु—अवयवेषु इत्यर्थः। मृदुदृढयोरेकत्रावस्थानं न युज्यते इति विरोधः। स्कन्धबन्धे—ग्रीवामूले। ह्रस्वदीर्घयोर्विरोधः उन्नेयः। दरिद्रं—क्षुद्रं, दीनञ्च। दाने—मदवारिस्रावे इत्यर्थः, अथ च दाने—त्यागे। अत्र दरिद्रसततदानप्रवृत्तयोर्विरोधः।

(३०५) बलभद्रं—बलरामम् ; मदलीलासु—मदः,—दानवारि, सुरामत्तता च, तल्लीलासु। कुलकलत्र—कुलाङ्गना ; आयत्ततासु—बाध्यतासु। बलभद्रकुलकलत्रयोः मदमत्तताबाध्यतयोश्च विरोधः। जिनं—बुद्धदेवम्। वह्निवर्षम्—अग्निवृष्टिम् ; क्रोधमोक्षेषु—कोपप्रसरेषु। अत्र शमप्रधानजिनवह्निवर्षयोः क्षमाक्रोधमोक्षयोश्च विरोधः। नागोद्धृतिषु—नागानां—प्रतिपक्षहस्तिनां, सर्पाणाञ्च, उद्धृतिषु—निपातनेषु।

(३०६) नारदं—देवर्षिं, नारं—जलं ददातीति तथोक्तञ्च, कलहकुतूहलेषु—विवादकौतुकेषु, युद्धव्यापारेषु च। शुष्काशनिपातं—हृष्टिं विना वज्रपतनम्, अवस्कन्देषु—शत्रूणाम् आक्रमणेषु। मकरं—जलजन्तुभेदं, वाहिनीचीभेषु—शत्रुसेनादलनेषु, नद्युल्लेलकरणेषु च।

(३०७) आशीविषं—सर्पं, दशनकर्मसु—दन्तव्यापारेषु, दंशनक्रियासु इत्यर्थः। वरुणं—जलाधिपतिं हस्त एव पाशः हस्तपाशः, हस्ते पाशस्य, तेन आक-

(३०८) कालं परिणतिषु, राहुं तीक्ष्णकरग्रहणेषु, लोहिताङ्गं वक्रचारेषु, (३०९) अलातचक्रं मण्डलभ्रान्तिविज्ञानेषु, मनोरथसम्पादकं चिन्तामणिपर्व्वतकं विक्रमस्य, (३१०) दन्तमुक्ताशैलस्तम्भं निवासप्रासादम् अभिमानस्य, (३११) घण्टाचामरमण्डनमनोहरम् (३१२) इच्छासञ्चरणविमानं मनस्विनायाः, (३१३) मदधारादुर्दिनान्धकारं

ष्टयः,—आकर्षणानि तासु। यमवागुरां—यमस्य वागुरा—प्राणिबन्धनजालं ताम्, अरातिसंवेष्टनेषु—शत्रुसमाक्रमणेषु।

(३०८) कालं—यमं, कृष्णवर्णं च, परिणतिषु—अन्तकर्म्मसु, तिथ्येकदन्तप्रहारकर्म्मसु इति वा "तिथ्येकदन्तप्रहारस्तु गजः परिणतो मतः" इति स्मरणात्; कैश्चित्तु,—परिणतिषु—शुभाशुभादिकर्म्मविपाकेषु, कालम्—अहरादिरूपम् इति पक्षान्तरं व्याख्यानयन्ति। तीक्ष्णकरग्रहणेषु—तीक्ष्णेन—तीव्रेण, प्रचण्डेनेत्यर्थः; यद्वा,—तीक्ष्णं यथा तथा, करेण—शुण्डेन, ग्रहणानि—आक्रमणानि; अन्यत्र,—तीक्ष्णकरः,—सूर्य्यः, तस्य ग्रहणानि—ग्रासाः तेषु। लोहिताङ्गं—मङ्गलग्रहं, वक्रचारेषु—कुटिलगतिषु।

(३०९) अलातचक्रं—तदाख्यकाष्यबन्धविशेषम्, उल्मुकमण्डलञ्च; मण्डलभ्रान्तिविज्ञानेषु—मण्डलाकारेण भ्रान्तिः,—भ्रमणं, तस्यां विज्ञानानि—विशिष्टानि ज्ञानानि, परिचयाः इत्यर्थः, तेषु। मनोरथसम्पादकम्—अभीष्टनिर्वाहकं, [शेषे षष्ठीसमासः, "कर्म्मण्यण्" (३।२।१ पा०) इत्यणि कृते स्वार्थे कः]। चिन्तामणिपर्व्वतकं—चिन्तामणिः,—चिन्तामात्रेण चिन्तितवस्तुदायकामूल्यरत्नविशेषः, तस्य पर्व्वतकः,—क्षुद्रपर्व्वतः तम्। ["पर्व्वतकम्" इत्यत्र "पर्व्वतम्" इति पाठान्तरम्]।

(३१०) दन्तेति।—दन्तावेव मुक्ताशैलस्तम्भौ—मौक्तिकपाषाणस्तम्भौ, दन्तौ मुक्ताशैलस्य स्तम्भौ इव इति वा यस्य तथोक्तम्; दन्तस्य मुक्ताशैलानाञ्च स्तम्भा यत्र तादृशमिति च। निवासप्रासादं—निवासभवनम्। ["दन्तमुक्ता·····प्रासादम्" इत्यत्र "दन्तमुक्ताशैलस्तम्भनिवासप्रासादम्" इति समस्तपाठोऽपि दृश्यते]।

(३११) घण्टेति।—घण्टाश्च चामराणि च तैः मण्डनेन—अलङ्करणेन, मनोहरः,—रम्यः तम्।

(३१२) इच्छेति।—इच्छया—अप्रतिहतेति भावः, सञ्चरणं—परिभ्रमणं, तत्र विमानं—देवयानं तत्। मनस्विनायाः,—वीरतायाः।

(३१३) मदेति।—मदधाराभिः, दुर्दिनं—समाच्छन्नमित्यर्थः, अत एव अन्धं

गन्धोदकधारागृहं क्रोधस्य, (३१४) सकाञ्चनप्रतिमं महानिकेतनम् अहङ्कारस्य, (३१५) सगण्डशैलप्रस्रवणं क्रीडापर्व्वतम् अवलेपस्य, (३१६) मदन्ततोरणं वज्रमन्दिरं दर्पस्य, (३१७) उच्चकुम्भकूटाट्टालकविकटं सञ्चारि गिरिदुर्गं राज्यस्य, (३१८) कृतानेकबाणविवरमहस्रं लोहप्राकारं पृथिव्याः, (३१९) श्लिलीमुखशतझाङ्कारितं (३२०) पारिजातपादपं भूनन्दनस्य, तथा च सङ्गीतगृहं कर्णतालताण्डवानाम्,

करोति इति अन्धकारं तत्, गन्धोदकधारागृहं—सुवासिततजलधारागृहं, क्रोधस्य—कोपस्य ।

(३१४) सकाञ्चनेति ।—काञ्चनप्रतिमा—स्वर्णवदुज्ज्वला इत्यर्थः, प्रतिमा—दन्तकोशः, दैवताकृतिश्च, तत्सहितं—तदुपकरणमित्यर्थः ; ("प्रतिमा गजदन्तस्य बन्धे चानुकृतावपि" इति मेदिनी) । महानिकेतनं—महामन्दिरम्, अहङ्कारस्य—दर्पस्य ।

(३१५) सगण्डेति ।—गण्डः,—कपोल एव, शैलः, अन्यत्र—गण्डशैलः,—पर्व्वतात् विच्युतः स्थूलोपलः, ("गण्डशैलास्तु च्युताः स्थूलोपलाः गिरेः" इत्यमरः) एव प्रस्रवणं—दानवारिस्रावः, निर्झरश्च, तेन सह वर्त्तमानम्, अवलेपस्य—गर्व्वविशेषस्य ।

(३१६) मदन्तेति ।—दन्ताविव तोरणः,—बहिर्द्वारम्, अन्यत्र,—दन्तनिर्म्मितस्तोरणः, तेन सह वर्त्तमानम् । वज्रमन्दिरं—वज्रनिर्म्मितगृहम् ।

(३१७) उच्चेति ।—उच्चौ—उन्नतौ, कुम्भाविव कूटौ—शिखरे यस्य तादृशं, यत् अट्टालकं—हर्म्यं, तद्वत् विकटं—भयावहं, सञ्चारि—जङ्गमम् ; यदाह कौटिल्यः,—"हस्तिनो हि जङ्गमं दुर्गम्" इति । गिरिदुर्गं—पर्व्वतरूपं शत्रुदुष्प्रवेशं स्थानमित्यर्थः ।

(३१८) कृतेति ।—कृतानि अनेकानि बाणविवरसहस्राणि—बाणनिक्षेपार्थं छिद्रसमूहाः, प्राकारेषु बाणनिक्षेपार्थं विवरसहस्राणि क्रियन्ते, ये "इन्द्रकोशाः" इति चाणक्यादिषु ख्याताः ; यद्वा,—बाणैः, शत्रुनिक्षिप्तैरिति भावः, विवरसहस्राणि यत्र तादृशं, लोहप्राकारं—लोहनिर्म्मितप्राचीरम् ।

(३१९) श्लिलीमुखेति ।—श्लिलीमुखानां—भ्रमराणां, शतैः झाङ्कारितः,—निनादितः ; यद्वा,—श्लिलीमुखशतैः,—बाणसमूहैः, शत्रुप्रक्षिप्तैरिति भावः, झाङ्कारितः,—पतनक्षणे झङ्कारशब्देन विद्धः, तम् ।

(३२०) पारिजातपादपं—दैवतद्रुविशेषं, भूनन्दनस्य—भूः,—पृथिव्याः एव,

(३२१) आपानमण्डपं मधुपमण्डलानाम्, अन्तःपुरं शृङ्गाराभरणानां, मदनोत्सवं मदलीलालास्यानाम्, (३२२) अक्षुण्णप्रदोषं नक्षत्रमालामण्डलानाम्, (३२३) अकालप्रावृट्कालं मदमहानदीपूरप्लवानाम्, अलीकशरत्समयं समच्छदवनपरिमलानाम्, (३२४) अपूर्वहिमागमं शीकरनीहाराणां, मिथ्याजलधरं गर्जिताडम्बराणां, दर्पशातम् अपश्यत्।

आसीच्च (३२५) अस्य चेतसि—"नूनमस्य निर्माणे

नन्दनं—देवकाननं तस्य ; अन्यत्र,—भुव—पृथिवीं, नन्दयति—पालनेन प्रीणयतीति भूनन्दनः,—राजा तस्य। कर्णतालताण्डवानां—कर्णतालनर्त्तनानाम्।

(३२१) आपानमण्डपं — पानगृहं, मधुपमण्डलानां — भृङ्गसमूहानाम्, अन्यत्र,—विटानां, मद्यपायिनामित्यर्थः। शृङ्गाराभरणानां—शृङ्गाराः,—किन्दूरादिभिः रचनाविशेषा एव, आभरणानि ; अन्यत्र,—शृङ्गारः,—रसविशेषः, ("शृङ्गारः सुरते नाट्यरसे च गजभण्डने" इति मेदिनी) तस्य आभरणानि—विलासद्रव्याणीत्यर्थः, तेषाम्। मदनोत्सव—मदयतीति मदनः,—मदकरः, उत्सवो यस्य तथोक्तम्, अन्यत्र,—कामोत्सवम्।

(३२२) अक्षुण्णेति।—अक्षुण्णः,—पूर्णः, मेघावरणादिशून्य इति भावः, प्रदोषः,—रजनीमुखं, पक्षे,—अक्षुण्णः,—पूर्णः, प्रदोषः,—प्रकृष्टदूषणः, यस्य तथोक्तः, ("भुजबाह्वः प्रवेशो दोः" इत्यमरः) नक्षत्रमालामण्डलानां—तारकाराजय एव मण्डलानि—चक्राकारवेष्टनानि, परिधयो वा, तेषां, पक्षे,—नक्षत्रमालाः,—सप्तविंशतिमौक्तिकहारा एव, मण्डलानि तेषाम्।

(३२३) अकालप्रावृट्कालम्—असमयवर्षासमयम्। मदेति।—मदा एव महानदीनां पूराः,—प्रवाहाः, तेषां प्लवाः,—गतिविशेषाः तेषाम्। अलीकशरत्समयं—मिथ्याशरत्कालं, समच्छदवनपरिमलानां—सप्तपर्णवनस्यैव परिमलाः,—सौरभाणि, मदवारीणामिति भावः, तेषाम्।

(३२४) अपूर्वहिमागमं—नूतनहेमन्तं, शीकरनीहाराणां—जलकणरूपशिशिराणाम्। मिथ्याजलधरम्—अलीक पयोधरम्, अन्यं मेघमित्यर्थः, गर्जिताडम्बराणां—गर्जितान्येव आडम्बराः,—चेष्टाविशेषाः तेषाम्।

(३२५) नूनं—मन्ये, [इत्युत्प्रेक्षावाचकम्]। अस्य—वारणपतेः, निर्माणे—

गिरयो याहिता: परमाणुताम्। कुतोऽन्यथा (३२६) गौरवम् इदम् ? आश्चर्यमेतत्, विन्ध्यस्य दन्ती, आदिवराहस्य कर:!"
इति विस्मयमानम् एतं दौवारिकोऽब्रवीत्,—"पश्य,—

मिथ्यैवालिखतां मनोरथशतैर्निःशेषनष्टां श्रियं
चिन्तासाधनकल्पनाकुलधियां भूयो वने विद्विषाम्।
आयात: कथमप्ययं स्मृतिपथं शून्यीभवच्चेतसां
नागेन्द्र: सहते न मानसगतानाशागजेन्द्रानपि ॥ ४ ॥

सृष्टौ, परमाणुतां याहिता:,—नीता:, प्रापिता इत्यर्थ:; देहस्य भौतिकपरमाणुसमष्टिमयत्वादिति भाव:।

(३२६) गौरवं—गुरुत्वम्। आश्चर्यं—चमत्कृति:। यत् विन्ध्यस्य—तदाख्यपर्वतस्य, दन्ती, एतत् आश्चर्यमित्यर्थ:, विन्ध्यपर्वततुल्योऽयं गजेन्द्र इति भाव:। आदिवराहस्य—वराहरूपेणावतीर्णस्य भगवतो विष्णोरित्यर्थ:। कर:,—शुण्ड:, इति च आश्चर्यम्; आदिवराहसदृशोऽयमिति भाव:। विस्मयमानं—चमत्कुर्वाणम्। एतं—बाणम्।

दर्पशातस्य विक्रमातिशयप्रदर्शनप्रसङ्गेन राजविद्विषां पुनरभ्युदयसम्भावनाराहित्यं प्रकटयति, मिथ्यैवेति।—नि:शेषेण नष्टा तां—सम्यङ्नाशङ्गतामित्यर्थ:, श्रियं—राजलक्ष्मीं, निजामिति शेष:, पराजितत्वादिति भाव:, मनोरथशतै:,—शतै: शतै: मनोरथै:, एवमेवमस्माभि: सम्पत्के: करिष्यते इत्येवमभिलाषैरित्यर्थ:, मिथ्यैव—वृथैव, आलिखताम्—अनुशोचतामिति यावत्, ["आलिखताम्" इत्यत्र "आलिखिताम्" इति पाठे,—चिचिता, मनसि अङ्कितामित्यर्थ:, श्रियमित्यस्य विशेषणम; कुर्वतामिति शेष:] भृश:,—समधिकं यथा तथा, चिन्तया—अहो! केन दुर्दैवेन अस्माकमीदृशी दुर्दशा जाता, कं वा उपायं करिष्यामि ? इत्यादिभावनया इत्यर्थ:, साधनानां—पुनरुद्धारोपायानां, कल्पनया च आकुला धीर्येषां तथाभूतानां, अत एव शून्यीभवच्चेतसां—शून्यीभवत्—निराशीभवदित्यर्थ:, चेतो येषां तादृशानां, ["शून्यीभवच्चेतसाम्" इत्यत्र "शून्यीभवच्चेतसा" इति पाठे तु—शून्यीभवता चेतसा कथमपि स्मृतिपथम् आयात: इत्यन्वय:] वने विद्विषां—वनवासिनां शत्रूणां, कथमपि—अतिकृच्छ्रेण, स्मृतिपथम् आयात:,—तेनैव वारणेन्द्रेण वयं नितरां निर्जिता इति स्मरणपदवीं गता:, अयं नागेन्द्र:,—वारणपति:, मानसं—चित्तं, सरोविशेषश्च, गता: तान्, आशा:,—तृष्णा:, अभिलाषा इत्यर्थ:, ता एव गजेन्द्रा:, आशा दिश:, तथा च

तत् एहि, पुनरपि एनं द्रक्ष्यसि, पश्य तावत् (३२७) देवम्" इत्यभिधीयमानश्च (३२८) तेन (३२९) मदजलकज्जल-कालकपोलपट्टपतितां मत्तामिव मदपरिमलेन मुकुलितां कथमपि तस्मात् दृष्टिम् आकृष्य, तेनैव दौवारिकेण उपदिश्यमानवर्त्मा, समतिक्रम्य भूपालसहस्रसङ्कुलानि त्रीणि कक्ष्यान्तराणि, चतुर्थे (३३०) सत्यास्थानमण्डपस्य पुरस्तात् (३३१) अजिरे स्थितं, दूरादूर्ध्वस्थितेन प्रांशुना कर्णिकार-

---

दिग्गजाश्च नान्, न सहते—न क्षमते, का कथा विपक्षैः भूपालैः उपस्थापितानां दन्तिनां प्रतिपक्षाणामिति तात्पर्यम्। एतस्य शरणे शत्रूणां पुनरुद्धारस्य आशाऽपि नोदेतीति भावः। अत्र आशासु गजेन्द्राणामभेदारोपात् रूपकमलङ्कारः; "मानसगतान्" इति विशेषणश्लेषेण सङ्कीर्यते; अन्यत्र च श्लेषः शब्दविषय एव। शार्दूलविक्रीडितं वृत्तं,—"सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्" इति लक्षणात् ॥ ४ ॥

(३२७) देवं—श्रीहर्षमित्यर्थः।

(३२८) तेन—दौवारिकेण।

(३२९) मदेति।—मदजलमेव कज्जलम्—अञ्जनं, तेन कालः,—कृष्णवर्णः, यः कपोलपट्टः,—गण्डतटः, इत्यत्र इति भावः, तस्मिन् पतिता—निहिता ताम्। ["मदजलकज्जलकालकपोल—" इत्यत्र "मदजलपङ्किलकपोल—" इति पाठे,—मदजलेन पङ्किलः,—मलिन इत्यर्थः]। तस्मात्—वारणेन्द्रात्; मत्तोऽपि पतति, मुकुलितदृष्टिर्जायते, चरणस्खलनादन्धेराकृष्यमाणश्च भवति। समतिक्रम्य—अतीत्य। कक्ष्यान्तराणि—प्रकोष्ठावकाशान्। चतुर्थे,—कक्ष्ये इति शेषः। "चतुर्थे" इत्यादौ "चक्रवर्त्तिनं हर्षः अद्राक्षीत्" इत्युत्तरेण सम्बन्धः।

(३३०) तं विशिनष्टि, सत्येत्यादिभिः। सत्यास्थानेति।—सत्यस्य—सत्यनिरूपणस्य, यत् आस्थानमण्डपं—सभागृहं तस्य, विचारालयस्य इत्यर्थः। ["सत्यास्थानमण्डपस्य" इत्यत्र "भुक्तास्थानमण्डपस्य" इति पाठे,—भुक्तं—भोजनं, तस्मिन् सति, भोजनानन्तरमित्यर्थः, यत् आस्थानं—लोकदर्शनार्थं विद्यान्त्यर्थं वा, मण्डपं—गृहं तस्येत्यर्थः]। पुरस्तात्—अग्रतः, अग्रवर्त्तिनीत्यर्थः।

(३३१) अजिरे—अङ्गने, स्थितं—तिष्ठन्तम्। दूरात्—दूरेदूरात् इत्यर्थः;

गौरेण (३३२) व्यायामव्यायतवपुषा शस्त्रिणा मौलेन शरीरपरिचारकलोकेन पङ्क्तिस्थितेन कार्त्तस्वरस्तम्भमण्डलेनेव परिवृतम्, (३३३) आमन्त्रोपविष्टविशिष्टेष्टलोकं, (३३४) हरिचन्दनरसप्रक्षालिते (३३५) तुषारशीकरशीतलतले दन्तपाण्डुरपादे शशिमये इव मुक्ताशैलशिलापट्टशयने समुपविष्टं,

ऊर्ध्वस्थितेन—दण्डायमानेन, प्रांशुना—उन्नतकायेन, अन्यत,—प्रकृष्टाः अंशवो यस्य तेन, कर्णिकारगौरेण—आरग्वधपुष्पगौरकान्तिना।

(३३२) व्यायामेति।—व्यायामेन—परिश्रमविशेषेण, व्यायतं—विभक्तावयवं, विशेषेण दीर्घञ्च, वपुः,—शरीरं यस्य तेन। शस्त्रिणा—शस्त्रपाणिना; लम्भगावेऽपि शस्त्राः स्थाप्यन्ते, अतस्तेषामपि शस्त्रित्वं वीर्यम्; मौलेन—मूलायातेन, वंशक्रमानुगतेन इत्यर्थः; परिचारकाश्च मौलसृतकश्रेणिभिन्नाभिन्नाटविकभेदेन षट्प्रकारा भवन्ति; अन्यच,—मूले—बुध्ने भवं मौलं तेन, बुध्नप्रतिष्ठेन, निखातमूलेनेति भावः, शरीरपरिचारकलोकेन—शरीरसेवकजनेन। पङ्क्तिस्थितेन—श्रेणीबद्धेन इत्यर्थः। कार्त्तस्वरस्तम्भमण्डलेन इव—काञ्चनस्तम्भनिबद्धेन इव; ("स्वर्णं सुवर्णं..... रुक्मं कार्त्तस्वर जाम्बूनदमष्टापदौऽस्त्रियाम्" इत्यमरः)।

(३३३) आमन्त्रेति।—आमन्त्रे—मन्त्रणायां, उपविष्टाः,—अवस्थिताः, विशिष्टाः,—मन्त्रणाः, इष्टाः,—अभिलषिताः, मनोऽभिमता इति यावत्, लोका यस्य तम्।

(३३४) हरिचन्दनेति।—हरिचन्दनस्य—यस्योह्यमाणस्य मतः कुङ्कुमस्येव रागः सौगन्ध्यञ्च जायते, तादृशस्य चन्दनविशेषस्य इत्यर्थः, रसेन—द्रवेण, प्रक्षालितम्—अभिषिक्तं, विधौतं वा, तस्मिन्।

(३३५) शशिमये इति वक्ष्यमाणानुरोधेन तुषारेत्यादिना अस्य शैत्यातिशयं प्रकटयति। तुषारेति।—तुषारशीकरवत् शीतलं तलं यस्य तथोक्ते। दन्तेति।—दन्तवत् दन्तमया वा पाण्डुराः,—श्वेताः, पादाः,—चरणाः, रश्मयश्च यस्य तथाविधे, ("पादो ब्रध्ने तुरीयांशे शैलप्रत्यन्तपर्वते। चरणे च मयूखे च" इति मेदिनी)। शशिमये इव—चन्द्रमये इव, मुक्ताशैलस्य—मौक्तिकपर्वतस्य, शिलापट्ट एव शयनं—शय्या तस्मिन्। "मुक्ताशैल" इत्यनेन शुभ्रतयाऽपि शशिमये इव इत्येतावदेव द्योतयति।

(२३६) अयनीयपर्य्यन्तविन्यस्ते समर्पितसकलविग्रहभारं भुजे, (२३७) दिङ्मुखविसर्पिणि देहप्रभाविताने विततमणिमयूखे घर्म्मसमयसुभगे सरसीव (२३८) मृदुमृणालजालजटिलजले सराजकं रममाणं, तेजसः परमाणुभिरिव केवलैः निर्म्मितम्, अनिच्छन्तं बलात् आरोपयितुमिव सिंहासनं (२३९) सर्व्वावयवेषु सर्व्वलक्षणैः गृहीतं, गृहीतब्रह्मचर्य्यम् आलिङ्गितं राजलक्ष्म्या, (२४०) प्रतिपन्नासिधाराधारणव्रतम्

(२३६) अयनीयेति।—अयनीयस्य—अयातलस्य, पर्य्यन्ते—प्रान्तभागे, विन्यस्तः,—निहितः तस्मिन्। भुजे—हस्ते। समर्पितेति।—समर्पितः,—निहितः, सकलस्य विग्रहस्य—शरीरस्य, युद्धस्य च भारः येन तथोक्तम्।

(२३७) दिङ्मुखेति।—दिशां मुखानि विसर्पति—व्याप्नोतीति तथाभूते, देहप्रभावितानेन—अङ्गकान्तिविस्तारे। विततेति।—विततता—विस्तृता, मणीनां—रत्नानां, मयूखा यत्र तादृशे। घर्म्मसमयसुभगे—ग्रीष्मकालरमणीये; मणीनां सहजत्वेन तदीया मयूखा अपि तपयन्तीति घर्म्मसमयसुभगत्वं बोध्यम्।

(२३८) मृदुभिः,—कोमलैः, मृणालजालैः,—विसमञ्चयैः, जटिलानि जलानि यस्य तथोक्ते। सराजकं—राजगणसहितं यथा तथा, रममाणं—विहरन्तम्। केवलैः,—निरवच्छिन्नैः, तेजसः,—प्रतापस्य, परमाणुभिरिव निर्म्मितं—सृष्टं, तेजोराशिमिव स्थितमिति यावत्।

(२३९) सर्व्वावयवेषु—हस्तपदादिषु सर्व्वाङ्गेषु, सर्व्वलक्षणैः,—समस्तशुभचिह्नैः, गृहीतं—युक्तम्; लोकेऽपि कश्चित् कमपि ऊर्द्धमारोपयितुं सर्व्वाङ्गेष्वेव गृह्णाति। गृहीतब्रह्मचर्य्यं—गृहीतम्—अवलम्बितं, ब्रह्मचर्य्यं—दारग्रहणादिवर्ज्जनेन केवलं गुरुकुले वेदाध्ययनादिव्रतचर्य्या येन तथोक्तम्; अथ च राजलक्ष्म्या आलिङ्गितमिति विरोधः; "स्वदारसन्तुष्टः ऋतुकालगामी गृहस्थोचितव्यापारवान् ब्रह्मचारी एव भवति" इति श्रुतेः तथाविधं गृहस्थमिति तत्परिहारः। किञ्च, "यावन्मया सकला मही न जिता तावद् ब्रह्मचर्य्यं चरामि" इति प्रतिज्ञाय श्रीहर्षः द्वादशभिः वर्षैः जित्वा तां महीं सर्व्वां महिषीमब्रवीत्,—"प्रतिज्ञा मया निर्व्यूढा" इत्यनुश्रुतिरत्र अनुशीलनीया।

(२४०) प्रतिपन्नेति।—प्रतिपन्नम्—अवलम्बितम्, असिधाराधारणव्रतं—असिधारा—खड्गधारा, व्रतविशेषश्च, असिधारायां स्थितिरिव दुष्करं व्रतम्; असि-

अविसंवादिनं राजर्षिं, (३४१) विषमराजमार्गविनिहितपदस्खलनभियेव सुलग्नं धर्म्मे, (३४२) सकलभूपालपरित्यक्तेन भीतेनेव लब्धवाचा मर्व्वात्मना सत्येन सेव्यमानम्, (३४३) आमन्त्रवारविलासिनीप्रतियातनाभिः चरणनखपातिनीभिः दिग्भिरिव दशभिः प्रणम्यमानं, (३४४) दीर्घैः दिगन्तपातिभिः दृष्टिपातैः लोकपालानां कृताकृतमिव प्रत्यवेक्षमाणं,

धारायां स्थितौ मनाक् स्खलने यथा नाशः, एवं मनाक् स्खलने यवानिष्ट, तादृशे व्रते; तच्च यादवेन दर्शितं यथा,—"युवा युवत्या माई यन् सुधा भर्त्तृवदाचरेत। अलंनिहत्तसङ्गः स्यादसिधाराव्रतं हि तत्॥" यत्र स्त्रीपुंसौ अकपटौ ब्रह्मचर्य्येण तिष्ठत इति भावः, तेन तथोक्तम्, अविसंवादिनं—विसंवादः,—विरुद्धभावः अस्यास्तीति विसंवादी, स न भवतीति तथोक्तः, तम्; पक्षे,—प्रतिपन्नेषु—विश्वसितेषु, आश्रितेषु इत्यर्थः, असिधाराधारणमेव खड्गधारागृहणमेव व्रतं यस्येति तथोक्तम्, अथ च अविसंवादिनं, यस्तु प्रतिपन्नेषु खड्गधारां पातयति, स कथं न विसंवादी, कथं वा राजर्षिः इति विरोधः। राजर्षिं—राजा ऋषिरिव राजर्षिः, तम्; यः खलु राजर्षिः, प्रतिपन्नासिधारः ब्रह्मचारी च, स राजलक्ष्म्या आलिङ्गित।

(३४१) विषमेति।—विषमे—दारुणे, नतोन्नतरूपे च, राजमार्गे—राजनीतौ, राजपथे च, विनिहितस्य—अर्पितस्य, पदस्य स्खलनभियेव—च्युतिभयेनेव, धर्म्मे सुलग्नं—कृतावलम्बनं, धृतधर्म्मयष्टिमिति भावः।

(३४२) सकलेति।—सकलैः भूपालैः परित्यक्तः तेन, अत एव भीतेनेव—अयमपि यदि मां न गृह्णाति, तदाऽहमशरणः, इति त्रसेन इव इत्यर्थः। लब्धवाचा—लब्धा—गृहीता, वाक् यस्य तेन। सर्व्वात्मना—सर्व्वस्वरूपेण, सत्येन सेव्यमानं—परिचर्य्यमाणम्।

(३४३) आमन्त्रेति।—आमन्त्राणां—सन्निहितानां, परिचर्य्यार्थमिति भावः, वारविलासिनीनां—वेश्यानां, प्रतियातनाभिः,—प्रतिच्छायाभिः, ("प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया। प्रतिकृतिरर्चा पुंसि प्रतिनिधिः" इत्यमरः)। चरणनखपातिनीभिः,—पदनखप्रतिताभिः, दशभिर्दिग्भिरिव; पदनखानां दशसङ्ख्याकत्वादिति भावः। प्रणम्यमानम्—अभिवन्द्यमानम्।

(३४४) दीर्घैः,—आयतैः, दिगन्तपातिभिः,—दिगन्तगामिभिः। लोकपालानाम्—इन्द्रादीनां, कृताकृतमिव—कार्य्याकार्य्यमिव, प्रत्यवेक्षमाणं—परिपश्यन्तम्।

(३४५) मणिपादपीठपृष्ठप्रतिष्ठितकरेण उपरिगमनाभ्यनुज्ञां मृग्यमाणमिव दिवसकरेण, (३४६) भूषणप्रभासमुत्सारणबद्धपर्य्यन्तमण्डलेन प्रदक्षिणीक्रियमाणमिव दिवसेन, (३४७) अप्रणमद्भिः गिरिभिरपि दूयमानं, (३४८) शौर्य्योष्मणा फेनायमानमिव चन्दनधवलं लावण्यजलधिम् उद्वहन्तम् ऐकराज्योर्जितेन, (३४९) निजप्रतिबिम्बान्यपि नृपतिचक्रचूडामणिधृतानि असहमानमिव, (३५०) दर्पदुःखासिकया चामरा-

---

(३४५) मणिसम्बन्धप्रतिष्ठानमेव पोषयति, मणीति।—मणिपादपीठस्य—रत्नमयचरणासनस्य, पृष्ठे—उपरि, प्रतिष्ठिताः,—पतिताः रचिताश्च, कराः,—किरणाः, हस्ताश्च यस्य तेन, दिवसकरेण—सूर्य्येण। उपरीति।—उपरिगमने—ऊर्द्धगमने, या अभ्यनुज्ञा—अनुमतिः तां, मृग्यमाणमिव—प्रार्थ्यमानमिव।

(३४६) भूषणेति।—भूषणानाम्—अलङ्काराणां, प्रभाभिः,—किरणैः, समुत्सारणेन—सन्ताडनेन, बद्धं—धृतं, लब्धमिति यावत्, पर्य्यन्तेषु—प्रान्तेषु, मण्डलं—मण्डलाकारेण अवस्थानं येन तथोक्तेन। प्रदक्षिणीक्रियमाणं—वेष्ट्यमानमित्यर्थः।

(३४७) अप्रणमद्भिः,—प्रणतिमकुर्व्वद्भिः, स्वभावोन्नततयादिति भावः; गिरिभिः,—पर्व्वतैरपि, दूयमानमिव—सन्तप्यमानमिव।

(३४८) ऐकराज्योर्जितेन—ऐकराज्यम्—एकाधिपत्यं, तेन ऊर्जितः,—प्रवृद्धिं गतः तेन, ["ऐकराज्योर्ज्जितेन" इत्यत्र "एकराज्यौर्जितेन" इति पाठे,—एकराज्येन ऊर्जितः, तस्य भावः एकराज्यौर्जित्यं तेन]। शौर्य्योष्मणा—वीर्य्यप्रतापेन, फेनायमानमिव—फेनमुद्गमनमिव; उष्मणा जलमपि सफेनं भवतीति लोके दृश्यते। चन्दनधवलं लावण्यजलधिं—"मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिह स्फुटम्॥" इत्युक्तलक्षणानां लावण्यानां जलधिः,—समुद्रः तम्, उद्वहन्तम्।

(३४९) नृपतिचक्रैः,—राजमण्डलैः, ["नृपतिचक्र—" इत्यत्र "नृपचक्र—" इति पाठान्तरम्] चूडामणिभिः,—शिरोरत्नैः, धृतानि—गृहीतानि, निजप्रतिबिम्बानि—स्वकीयकिरणानपि, असहमानमिव—कथं सामान्येन मत्सममं इति धियेति भावः।

(३५०) दर्पदुःखासिकया—अहङ्कारसमुत्थशोकखड्गेन हेतुना, चामरा-

निलनिभेन बहुधेव श्वसन्तीं राजलक्ष्मीं दधानं, (३५१) सकलमिव चतुःसमुद्रलावण्यम् आदाय उत्थितया श्रिया समुपश्लिष्टम्, (३५२) आभरणप्रभाजालजायमानानि इन्द्रधनुःसहस्राणि इन्द्रप्राभृतप्रहितानि विलभमानमिव, राज्ञां (३५३) सम्भाषणेषु परित्यक्तमपि मधु वर्षन्तं काव्यकथासु, (३५४) अपीतमपि अमृतम् उद्गमन्तं, (३५५) विस्रब्धभाषितेषु अनाकृष्टमपि हृदयं दर्शयन्तं, (३५६) प्रसादेषु निश्चलामपि श्रियं स्थाने स्थाने स्थापयन्तं, वीरगोष्ठीषु पुलकितेन कपोल-

---

निलनिभेन—चामरमारुतव्याजेन, बहुधा श्वसन्तीं,—मुहुर्घं श्वासमारुतं निक्षिपन्तीं, राजलक्ष्मीं,—राजश्रियं, दधानमिव—धारयन्तमिव।

(३५१) सकलं,—समग्रम्। चतुरिति।—चतुर्णां समुद्राणां समाहारः चतुःसमुद्रं तस्य लावण्यं तत्। आदाय—गृहीत्वा, उत्थितया—आविर्भूतया, श्रिया—लक्ष्म्या, समुपश्लिष्टमिव—समालिङ्गितमिव।

(३५२) आभरणेति।—आभरणानां प्रभाजालेन—दीप्तिसमूहेन जायमानानि—उत्पद्यमानानि, इन्द्रप्राभृतप्रहितानि—इन्द्रेण प्राभृतेन—उपढौकनत्वेन इत्यर्थः, प्रहितानि—प्रेषितानीत्यर्थः, इन्द्रधनुषां—शक्रचापानां, सहस्राणि विलभमानमिव—विगर्हयेण आददानमिव। राज्ञां—निर्जितानामिति भावः।

(३५३) सम्भाषणेषु—समालपनेषु,—परित्यक्तमपि मधु—मधुररसमित्यर्थः, काव्यकथासु—काव्यालोचनासु, वर्षन्तं—वमन्तम्; अवज्ञया राजभिः मधुरालापो न क्रियते, किन्तु कविभिः काव्यानुशीलने क्रियते इति भावः।

(३५४) अपीतमपि—अभुक्तमपि, अमृतं,—पीयूषम्, उद्गमन्तम्,—उद्गिरन्तम्; ["अपीतमपि अमृतम्" इत्यत्र "अपीतममृतम्" इति पाठान्तरम्]।

(३५५) विस्रब्धभाषितेषु—विश्लाऽऽलापेषु। अनाकृष्टमपि—प्रसादकैः अनुक्तोक्तिभिः अगृहीतमपि इत्यर्थः, हृदयं—चित्तं, मनोऽभिप्रेतं वस्त्वित्यर्थः, दर्शयन्तं—प्रकटयन्तम्।

(३५६) प्रसादेषु—प्रसन्नतासु सत्सु इत्यर्थः। निश्चलामपि—स्थिरामपि, श्रियं—लक्ष्मीं, सम्पदमिति यावत्, स्थाने—योग्ये पात्रे इत्यर्थः, स्थापयन्तम्—अर्पयन्तम्। वीरगोष्ठीषु—वीरसभासु, पुलकितेन—रोमाञ्चितेन, उत्साहातिशया-

स्खलेन अनुरागसन्देशमिव उपांशु रणश्रियः शृण्वन्तम्, (३५७) अतिक्रान्तसुभटकलहालापेषु खेदहृष्टमिव दृष्टिम् दृष्टे कृपाणे पातयन्तं, परिहासस्मितेषु गुरुप्रतापभीतस्य राजकस्य स्वच्छम् आशयमिव दशनांशुभिः कथयन्तं, (३५८) सकललोकहृदयस्थितमपि न्याये तिष्ठन्तम्; अगोचरे गुणानाम्, अभूमौ सौभाग्यानाम्, अविषये वरप्रदानानाम्, असाध्ये आशिषाम्, अमार्गे मनोरथानाम्, अतिदूरे दैवस्य अदर्शि उपमानानाम्, (३५९) असाध्ये धर्मस्य, अदृष्टपूर्वे लक्ष्म्या महत्त्वे

स्थिति भावः, कपोलस्थलेन—गण्डदेशेन, उपांशु—रहसि, रणश्रियः,—सङ्ग्रामलक्ष्म्याः, अनुरागसन्देशमिव—प्रेमव्यञ्जकवाचिकमिव, शृण्वन्तम्—आकर्णयन्तम्।

(३५७) अतिक्रान्तेति।—अतिक्रान्ताः,—अतीताः, सुभटानां—सुधीडृणां, ये कलहाः,—संग्रामाः, तेषाम् आलापाः,—कथाः तेषु। दृष्टे—अभिलषिते, प्रिये इत्यर्थः, कृपाणे—तलवारे; सङ्ग्रामश्रमे रुधिरादिधावनमलिनकलङ्कनिवारणार्थं शस्त्रेषु स्नेहो दीयते इति व्यवहारः। परिहासस्मितेषु—नर्महासेषु, गुरुणा—महता, प्रतापेन—तेजसा, भीतस्य—त्रस्तस्य, राजकस्य—राजचक्रस्य, समीपे इति शेषः। दशनांशुभिः,—दन्तकिरणैः, तदुत्थाजेन इति भावः, स्वच्छं—निर्मलं, प्रसन्नमित्यर्थः, आशयं—भावं, कथयन्तं—प्रकाशयन्तम्। प्रकृष्टतापभीतस्य च स्वच्छं—निर्मलम्, आशयं,—जलाशयमिति भावः, दर्शयन्ति लोकाः। अत्र "प्रताप" "स्वच्छ" इत्यादिप्रकरणवशात् जलशब्दाभावेऽपि आशयशब्देन जलाशयः प्रत्येतव्यः।

(३५८) सकलेति।—सकलानां लोकानां—जनानां, हृदयेषु स्थितमपि न्याये—नीतिमार्गे, तिष्ठन्तं—वर्त्तमानं, न्याय्यमनुवर्त्तमानमित्यर्थः; यः सकललोकहृदयस्थितः, स कथमेकस्मिन्नेव तिष्ठतीति विरोधः। गुणानां—विद्याविनयादीनाम्, अगोचरे—अविषये, सौभाग्यानाम् अभूमौ—अस्थाने, वरप्रदानानाम् अविषये—अगोचरे, आशिषामसाध्ये—असाध्ये, मनोरथानाम् अमार्गे, दैवस्य अतिदूरे, उपमानानां—सादृश्यबोधकानाम्, अदर्शि—अविषये इत्यर्थः, अतीते इति भावः।

(३५९) असाध्ये—साधयितुमशक्ये धर्मस्य [इति कर्त्तरि षष्ठी]। अदृष्टपूर्वे—पूर्वमदृष्टे, लक्ष्म्या महत्त्वे—उत्कर्षे, स्थितं, महालक्ष्मीनिवासमित्यर्थः; यश्च गुणादीनाम् अगोचरादिषु वर्त्तते, स कथम् अदृष्टपूर्वे लक्ष्म्या महत्त्वे तिष्ठतीति

खितम् ; (३६०) अरुणपादपल्लवेन (३६१) सुगत-मन्थरोरुणा (३६२) वज्रायुधनिष्ठुरप्रकोष्ठपृष्ठेन (३६३) वृष-स्कन्धेन भास्वद्बिम्बाधरेण (३६४) प्रसन्नावलोकितेन मुखचन्द्रेण कृष्णकेशेन वपुषा (३६५) सर्व्वदेवताऽवतारमिव एकत्र दर्श-यन्तम् ; अपि च मांसलमयूखमालामलिनितमहीतले महति

विरोधः ; यत्र गुणसौभाग्यादयो न गण्यन्ते, तादृशं लक्ष्मीमहत्त्वमनुसरन्तमित्यर्थः ; एतेन अस्य विरोधस्य परिहारः ।

(३६०) अरुणेति ।—अरुणः,—लोहितः, पादपल्लवः,—चरणकिसलयः यस्य तेन ; अन्यत्र,—अरुणस्य—अनूरोः, सूर्य्यसारथेरित्यर्थः, पादपल्लवः तेन ।

(३६१) सुगतेति ।—सुष्ठु गतं—गमनं ययोः तथाभूतौ, मन्थरौ—मन्द-गामिनौ, ऊरू यस्य तेन ; अन्यत्र,—सुगतः,—बुद्धदेवः, तस्य मन्थरः,—मन्दगामी, ऊरू तेन ।

(३६२) वज्रेति ।—वज्रं—कुलिशमेव, आयुधम्—अस्त्रविशेषः, तद्वत् निष्ठुरं कठिनं, प्रकोष्ठः,—मणिबन्धं कूर्परसन्धेरधोभागः, ("प्रकोष्ठो मणिबन्धस्य कूर्पर-स्यान्तरेऽपि च" इति मेदिनी) पृष्ठञ्च यस्य तेन ; अन्यत्र,—वज्रायुधः,—इन्द्रः, तस्य निष्ठुरं प्रकोष्ठपृष्ठं तेन ।

(३६३) वृषस्कन्धेन—वृषस्येव स्कन्धौ यस्य तेन ; अन्यत्र,—वृषस्य—धर्म्मस्य, स्कन्धः तेन, ("वृषो धर्म्मे बलीवर्दे श्रेष्ठ्यां पुंराशिभेदयोः" इति मेदिनी) । भास्वदिति । —भास्वान्—दीप्यमानः, बिम्बमिवाधरो यस्य तेन ; अन्यत्र,—भास्वतः,—सूर्य्यस्य, बिम्बमिवाधरः तेन ।

(३६४) प्रसन्नेति ।—प्रसन्नं—निर्म्मलम्, अवलोकितं—दर्शनं यस्य तेन ; अन्यत्र,—प्रसन्नः,—कश्चिद्देवविशेषः, आयुतीव इति यावत्, तस्य अवलोकितं—दर्शनम् इव, तेन , यद्वा,—प्रसन्नेन अवलोकितेन—बुद्धिभेदेन इत्यर्थः । मुखचन्द्रेण—मुखं चन्द्र इव यस्य तेन ; अन्यत्र,—मुखे चन्द्रः तेन । ["मुखचन्द्रेण" इत्यत्र "चन्द्र-मुखेन" इति पाठान्तरम्] । कृष्णः,—कृष्णवर्णः, केशो यस्य तेन ; अन्यत्र,—कृष्णस्य —श्रीहरेः, केशः तेन । वपुषा—अङ्गेन, उत्तमप्रकारेण अवयवेनेत्यर्थः ।

(३६५) सर्वेति ।—सर्वेषां देवतानामवतारः तमिव । मांसलेति ।—मांस-लाभिः,—महतीभिः, मयूखानां—किरणानां, मालाभिः,—समूहैः, मलिनितम्—आकीर्णमित्यर्थः, अन्धकारितं गतमिति यावत्, महीतलं येन तथोक्ते । महति—

महार्हे माणिक्यमालामण्डितमेखले महानीलमये पादपीठे कलिकालशिरसि इव मलीमसं (३६६) विन्यस्तवामचरणम्, (३६७) आक्रान्तकालियफणाचक्रवालं बालम् इव पुण्डरीकाक्षं, क्षौमपाण्डुरेण चरणनखदीधितिप्रतानेन प्रसरता महीं (३६८) महादेवीपट्टबन्धेन इव महिमानम् आरोपयन्तम्, (३६९) अप्रणतलोकपालकोपेनेव अतिलोहितौ सकल-नृपतिमौलिमालासु अतिपीतं पद्मरागरत्नातपमिव वमन्तौ (३७०) सर्वतेजस्विमण्डलास्तमयसन्ध्यामिव धारयन्तौ,

---

प्रशस्ते, महार्हे—महामूल्ये। माणिक्येति।—माणिक्यमालया मण्डिता—अलङ्कृता, मेखला—नितम्बभागः, मध्यभाग इत्यर्थः, यस्य तादृशे, महानीलमये—महानील-मणिनिर्मिते; कलिकालशिरसि इव—कलिमूर्द्धनि इव, कलिकालस्य मलिनत्वादेव-मुत्प्रेक्षा। मलीमसं—मलिनं, सदोषं वा।

(३६६) विन्यस्तेति।—विन्यस्तः,—निहितः, वामचरणः येन तथोक्तम्। वामचरणन्यासेन तस्य तिरस्करणीयत्वमेव व्यज्यते।

(३६७) आक्रान्तेति।—आक्रान्तम्—अभ्यासितं, कालियस्य—नागविशेषस्य, फणाचक्रवालं—फणमण्डलं येन तथोक्तं, बालं—शिशुं, पुण्डरीकाक्षमिव—श्रीकृष्ण-मिव; पद्मे,—पुण्डरीके—श्वेतपद्मे इव अक्षिणी यस्य तथोक्तम्। क्षौमपाण्डुरेण—क्षौमं—श्वेतपट्टवसनं, तद्वत् पाण्डुरः,—धवलः तेन। चरणेति।—चरणनखानां दीधिति प्रतानेन—मयूखविस्तारेण, महीं—पृथिवीं, प्रसरता—व्याप्नुवता।

(३६८) महादेवीति।—महादेवी—महती देवी, राजमहिषीत्यर्थः, पृथि-वीति भावः, तस्याः पट्टबन्धः,—क्षौमाच्छादनविशेषः तेनेव, महिमानं—महत्त्वं, पृथिव्या एकेश्वरत्वमित्यर्थः, आरोपयन्तम्, आत्मानमिति शेषः।

(३६९) अप्रणतेति।—न प्रणताः,—अप्रणताः, ते च ते लोकपालाश्चेति अप्रणतलोकपालाः, तेषु कोपः,—क्रोधः तेनेव। अतिलोहितौ—अतिरक्तौ, अत एव सकलेति।—सकलानां—समग्राणां, नृपतीनां—राज्ञां, मौलिमालासु—मुकुट राजिषु, अतिपीतम्—अतिशयेन गृहीतं, पद्मरागरत्नानाम्—तदाख्यमणीनाम्, आतपमिव—आलोकमिव, वमन्तौ—उद्गिरन्तौ।

(३७०) सर्वेति।—सर्वेषां तेजस्विमण्डलानां—वीरसमूहानां, सूर्यादीनाञ्चेति

अशेषराजककुसुमशेखरमधुरसस्रोतांसीव स्रवन्तौ,(३७१)समस्त-सामन्तसीमन्तोत्तंससक्सौरभभ्रान्तैः (३७२) भ्रमरमण्डलैः अमित्रोत्तमाङ्गैः इव मुहूर्त्तमपि अविरहितौ, संवाहनतत्परायाः श्रियो (३७३) विकचरक्तपङ्कजवनवासभवनानीव कल्पयन्तौ, (३७४) जलजशङ्खमीनमकरसनाथतलतया कथितचतुरम्भोधिभोगचिह्नौ इव चरणौ दधानम्; (३७५) दिङ्नाग-

भावः, अस्तमयसन्ध्यामिव—नाशप्राप्तिरूपसायङ्कालमिव, अस्तगमनसन्ध्याकालमिव च, धारयन्तौ—दधानौ। अशेषेति।—अशेषाणां—समस्तानां, राज्ञां कुसुमानि—पुष्परचितानीति यावत्, यानि शेखराणि—शिरोभूषणानि,["अशेषराजककुसुमशेखर—" इत्यत्र "अशेषराजकशेखरकुसुम—" इति पाठे,—अशेषराजकानां शेखराणि—शिरोभूषणमाल्यरूपाणि, यानि कुसुमानि] तेषां मधुरसाः,—मकरन्दरसाः, तेषां स्रोतांसीव—प्रवाहानिव, स्रवन्तौ—वर्षन्तौ।

(३७१) समस्तेति।—समस्तानां सामन्तानाम्—अधीश्वराणां, ("सामन्तः स्यादधीश्वरः" इत्यमरः) सीमन्ताः,—संयताः केशाः, ("सीमन्ताः संयताः कचाः" इत्यमरः) तेषाम् उत्तंसाः,—मण्डनानि, याः स्रजः,—माल्यानि, तासां सौरभेण—सङ्गन्धेन, भ्रान्तानि—घूर्णमानानि, तैः।

(३७२) भ्रमरमण्डलैः,—भृङ्गमण्डलैः, अमित्रोत्तमाङ्गैरिव—शत्रूणां शिरोभिरिव, अविरहितौ—अमुक्तौ। संवाहनेति।—संवाहनम्—अङ्गादिमर्दनरूपा सेवा, तस्मिन् तत्परा—रता, तस्याः, श्रियः,—राजलक्ष्म्याः।

(३७३) विकचेति।—विकचानि—प्रस्फुटानि, रक्तपङ्कजवनानि—रक्तकमलकाननानि एव, वासभवनानि—वासगृहाणि, तानि इव कल्पयन्तौ—रचयन्तौ।

(३७४) जलजेति।—जलजं—पद्मं, शङ्खः,—कम्बुः, मीनः,—मत्स्यः, मकरः,—जलजन्तुभेदः, तैः सनाथं—युक्तं, तलं यथोः तथोर्भावः तत्ता तया हेतुना। जलजेत्यादिलक्षणानि राजचक्रवर्त्तित्वज्ञापकानि बोध्यानि। कथितेति।—कथितं—प्रकटितं, चतुर्णाम् अम्भोधीनां—सागराणां, चतुरम्भोधिवेष्टिताया भुवः इति यावत्, भोगचिह्नं—भोगलक्षणं याभ्यां तथाभूतावित्र, चरणौ—पादौ, दधानं—धारयन्तम्।

(३७५) दिङ्नागेति।—दिङ्नागस्य—"ऐरावतः पुष्करीकः वामनः कुमुदो-

दन्तमुसलाभ्यामिव (३७६) विकटमकरमुखप्रतिबन्धबन्धुराभ्याम्, (३७७) उद्वेललावण्यपयोनिधिप्रवाहाभ्यामिव (३७८) फेनाऽऽहितशोभाभ्यां, कल्पचन्दनद्रुमाभ्यामिव (३७९) भोगिमण्डलशिरोरत्नरश्मिरज्यमानमूलाभ्यां, हृदयारोपितभूभारधारणमाणिक्यस्तम्भाभ्याम् ऊरुदण्डाभ्यां विराजमानम्; (३८०) अमृतफेनपिण्डपाण्डुना,

ऽञ्जनः। पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः॥" इत्यमरेषु अष्टसु दिग्गजेषु प्राचयेनीक्षालात् ऐरावतस्य इत्यर्थः, दन्तावेव मुसलौ, ताभ्यामिव।

(३७६) विकटेति।—विकटः,—उत्कटः, यो मकरस्य—जलजन्तुभेदस्य, मुखमिव प्रतिबन्धः,—जानुसन्धिरित्यर्थः, तेन बन्धुरौ—उन्नतानतौ, ताभ्यां, ("बन्धुरन्नूनतानतम्" इत्यमरः) अन्वयः,—विकटः यो मकरमुखः,—मकरमुखाकृतिभूषणविशेषः, स एव प्रतिबन्धः,—समत्वप्रतिरोधक इत्यर्थः, तेन बन्धुरौ—वक्रौ, ("बन्धुरं मुकुटे पुंसि·····। ·····त्रिषु स्याद्रम्यनम्रयोः॥" इति मेदिनी) ताभ्याम्।

(३७७) उद्वेलेति।—उद्वेलः,—उच्छलन्, (उद्वेलतया लावण्यस्य समुच्छलदूपत्वमवगन्तव्यम्) वेलामतिक्रान्तश्च यः लावण्यपयोधिः,—लावण्यसागरः, लवणसमुद्रश्च, तस्य प्रवाहाविव—स्रोतसौ इव, ताभ्याम्।

(३७८) फेनेति।—फेनैः,—रससमूहैरित्यर्थः, सततसञ्चरज्जाम्बारीहणात् सहर्षजननीकृतैर्वक्त्रापनीटनाय अर्पितैः फेनाकारौषधविशेषैरिति भावः, अन्वयः,—क्षीरोदैः, ("क्षीरोदोऽब्धिकफः फेनः" इत्यमरः) आहिता—जनिता, शोभा ययोः ताभ्याम्। कल्पचन्दनद्रुमाभ्यामिव—वाञ्छितफलप्रदचन्दनतरुभ्यामिव। ["कल्पचन्दनद्रुमाभ्यामिव" इत्यत्र "चन्दनद्रुमाभ्यामिव" इति पाठान्तरम्]।

(३७९) भोगीति।—भोगिनां—सुखभोगरतानां, सांसारिकाणामित्यर्थः; यद्वा,—भोगिनां—नृपाणां, ("भोगी भुजङ्गेऽपि स्यात् ग्रामपाले नृपे पुमान्" इति मेदिनी) अन्वयः,—भोगिनां—सर्पाणां, मण्डलस्य—सङ्घस्य, शिरोरत्नानि, तेषां रश्मिभिः,—मयूखैः, रज्यमाने—अलङ्क्रियमाणे, मूले—पादमूले, द्रुममूले चेत्यर्थः, ययोः ताभ्याम्। हृदयेति।—हृदयं—चित्तम्, आरोपितः यो भूभारः तस्य धारणे माणिक्यस्तम्भौ ताभ्याम्, इवेति शेषः।

(३८०) अमृतेति।—अमृतस्य फेनपिण्डः,—फेनराशिः, तद्वत्; अन्यत्र,—फेनपिण्डैः, पाण्डुः,—धवलः, तेन।

(३८१) मेखलामणिमयूखखचितेन, नितम्बविम्बव्यासङ्गिना, (३८२) विमलपयोधौतेन, (३८३) नेत्रसूत्रनिवेशशोभिना, अधरवाससा वासुकिनिर्मोकेणेव (३८४) मन्दरं द्योतमानम् ; अघनेन, सतारागणेन, उपरिकृतेन, (३८५) द्वितीयाम्बरेण भुवनाऽऽभोगमिव भासमानम् ; (३८६) द्विपपतिदशनमुसल-सदृक्षोल्लेखकठिनमसृणेन, (३८७) अपर्य्याप्ताम्बरप्रथिम्ना,

(३८१) मेखलेति ।—मेखला—काञ्ची, काञ्चननिर्म्मितं कांटिबन्धनसूत्रमिति यावत्, तत्र ये मणयः,—रत्नानि ; अन्यत्र,—मेखलासु—नितम्बेषु, सुन्दरस्य इति भावः, ये मणयः, तेषां मयूखैः,—किरणैः, खचितं—रञ्जितं तेन । नितम्बविम्बव्यासङ्गिना—नितम्बमण्डलसंसक्तेन. अन्यत्र,—कटकतटव्यापिना ।

(३८२) विमलेति ।—विमलैः,—स्वच्छैः, पयोभिः,—जलैः, अन्यत्र,—दुग्धैः, क्षीरोदस्य मन्थनकाले इति भावः, धौतेन—क्षालितेन ।

(३८३) नेत्रेति ।—नेत्रस्य—वस्त्रविशेषस्येत्यर्थः, ("नेत्रं सन्थिगुणे वस्त्रभेदे मूले द्रुमस्य च" इति मेदिनी) सूत्राणां—तन्तूनां, निवेशेन—रचनया ; अन्यत्र,—नेत्रं—मन्थनरज्जुः, तस्य सूत्राणां—तन्तूनां, निवेशेन—आधानेन, शोभते इति तथोक्तेन । अधरवाससा—परिधानवस्त्रेण । वासुकिनिर्मोकेणेव—वासुकेः,—नागराजस्य, निर्मोकेणेव—कञ्चुकेनेव ।

(३८४) मन्दरं—तदाख्यं पर्व्वतम् । द्योतमानं—राजमानम् । अघनेन—सृक्कणि, घनः,—मेघः, तद्रहितेन च । सतारागणेन—तारा,—मुक्तास्विन्दवः, नक्षत्राणि च, तेषां गणः,—समूहः, तत्सहितेन । उपरिकृतेन—उपरिधृतेन, देवैर्ऊर्ध्वभागस्थेनेत्यर्थः ; अन्यत्र,—ऊर्ध्वस्थितेन ।

(३८५) द्वितीयाम्बरेण—द्वितीयेन वसनेन, उत्तरीयेणेत्यर्थः ; अन्यत्र,—अम्बरेण—नभसा । भुवनाऽऽभोगमिव—भुवनाऽऽयाममिव, भासमानं—विराजमानम् ।

(३८६) द्विपतीति ।—द्विपतेः,—गजेन्द्रस्य, दशना एव मुसलानि, तेषां सदृक्षाणाम् उल्लेखेन—लिखनेन, कठिनं—दृढं, मसृणं—कोमलञ्च ; अन्यत्र,—चिक्कणं, तेन ।

(३८७) अपर्य्याप्तेति ।—अपर्य्याप्तम्—असीमेत्यर्थः, यत् अम्बरम्—आकाशं, तस्येव प्रथिमा तेन ; अन्यत्र,—अपर्य्याप्तं अम्बरं प्रथिमा—विस्तारो यस्य तेन ।

(३८८) विविधवाहिनीसङ्गोभकलकलसम्मर्दसहिष्णुना, कैलासम् इव महता स्फटिकतटेन उरुणा उरःकपाटेन राजमानम्; (३८९) श्रीसरस्वत्योः उरोवदनोपभोग-विभागसूत्रेणेव पातितेन, (३९०) ग्रैवेयेणेव तद्भुज-स्तम्भविन्यस्तसमस्तभूभारलब्धविश्रान्तिसुखप्रसुप्तेन, हारदण्डेन परिवेष्टितकन्धरम्; (३९१) जीवितावधिगृहीतसर्व्वस्व-महादानदीक्षाचीरेणेव हारमुक्ताफलानां किरणनिकरेण

(३८८) विविधेति।—विविधानां—बहुविधानां, वाहिनीनां—नदीनां, सङ्गमे—समवाये, यः कलकलः—कोलाहलः, तेन सम्मर्दः,—सङ्क्लेशः; अन्यत्र,—वाहिनीनां—नदीनां, सङ्गमे यः कलकलः, तेन सम्मर्दः, तं सहितुं शीलमस्येति तथोक्तेन। उरुणा—महता, उरःकपाटेन—वक्षःस्थलरूपेण कपाटेन। पर्व्वतान्तर-सामान्येऽपि श्रीभ्यधिक्यद्योतनार्थं कैलासमिवेत्युक्तम्।

(३८९) श्रीसरस्वत्योरिति।—श्रीसरस्वत्योः,—लक्ष्मीवाग्देव्योः, सपत्न्योरिति भावः, उरोवदनयोः,—यथाक्रमेण लक्ष्म्या उरसः वाग्देव्या वदनस्येति यावत्, उप-भोगः,—सम्भोगः, लक्ष्म्या उरसि स्थितिः सरस्वत्या मुखे स्थितिरिति भावः, तस्य विभागसूत्रं—सीमाबन्धनसूत्रमित्यर्थः, तेनेव, पातितेन पराङ्मुखीकृतेनेति भावः।

(३९०) तद्भुजेति।—तस्य—हर्षस्य, भुज एव स्तम्भः, तस्मिन् विन्यस्तः यः समस्तः,—सम्पूर्णः, भूभारः,—पृथिवीभारः, तेन लब्धा—प्राप्ता, या विश्रान्तिः,—विश्रामः, तया सुखम्—आनन्दं यथा तथा, प्रसुप्तः,—निद्रितः, तेन, ग्रैवेयेण—अनन्त-नागेनेव; ["ग्रैवेयेण" इत्यनन्तरं क्वचित् "च" इत्यधिकः पाठो दृश्यते]। हारदण्डेन—हारयष्टिना, कन्धरानिहितेनेति भावः। परिवेष्टितः—आलिङ्गितः,["परिवेष्टित—" इत्यत्र "परिवलित—" इति पाठोऽपि स एवार्थः] कन्धरः—ग्रीवा यस्य तम्।

(३९१) जीवितेति।—जीवितं—जीवनम्, अवधिः,—ग्रहणं येषां तानि, गृहीतानि—उपार्जितानि, यानि सर्वाणि स्वानि—धनानि, तेषां महादानं—याचितो जीवनमपि ददाति किमु बाह्यानि धनानीति भावः; यद्वा,—जीवितं—जीवनमपीति भावः, अवधिः,—ग्रहणं यस्य तद् यथा तथा, गृहीतं—स्वीकृतम्, अङ्गीकृतमित्यर्थः, सर्व्वस्वानां—सर्व्वधनानां, महादानं, तस्मिन् या दीक्षा—व्रत धारणनियमविशेषः, तस्याः चीरं—कौपीनरूपं वसनखण्डं, वल्कलं वा, तेनेव; दीक्षायग्रहणे चीरवसनैः भूयते इति भावः।

(३९२) प्राहृतवक्षःस्थलम् ; अजजिगीषया बालैः भुजैरिव अपरैः प्ररोहद्भिः, (३९३) बाह्रुपधानशायिन्याः श्रियः (३९४) कर्णोत्पलमधुरसधारासन्तानैरिव गलद्भिः, भुजजन्मनः प्रतापस्य निर्गमनमार्गैरिव आविर्भवद्भिः, अरुणैः केयूररत्न-किरणदण्डैः उभयतः (३९५) प्रसारितमणिमयपत्त्रवितान-मिव माणिक्यमहीधरम् ; (३९६) सकललोकालोक-मार्गार्गलेन (३९७) चतुरुदधिपरिक्षेपखातशिलाप्राकारेण,

(३९२) प्राहृतेति ।—प्राहृतम्—आच्छादितं, वक्षःस्थलं येन यस्य वा तथोक्तम् । अजजिगीषया—न जायते इति अजः—विष्णुः, तस्य जिगीषा—जयेच्छा तया, ("अजा विष्णुहरच्छागाः" इत्यमरः) । बालैः,—नवैः । प्ररोहद्भिः,—जायमानैः भुजैः।

(३९३) बाह्रुपधानेति ।—बाह्रुरेव उपधानं—उपबर्हः, "बालिश" इति बङ्गभाषा, तस्मिन् शेते इति तथोक्तायाः, श्रियः,—राजलक्ष्म्याः । ["श्रियः" इत्यत्र "श्रियाः" इति पाठान्तरम्]।

(३९४) कर्णोत्पलेति । —कर्णोत्पलस्य—कर्णभूषणीभूतोत्पलस्य, मधुरस-धाराणां—मकरन्दप्रवाहाणां, सन्तानैरिव—समूहैरिव, गलद्भिः,—निःसरद्भिः । भुजजन्मनः,—बाहुजनितस्य, एतेन सैनादिकृतं नौत्यादिकृतञ्च प्रतापं व्यवच्छिनत्ति । आविर्भवद्भिः,—प्रकटीभवद्भिः । अरुणैः,—रक्तैः, केयूररत्नकिरणदण्डैः,—केयूर-रत्न नाम्—अङ्गदस्थमणीनां, किरणा एव दण्डाः, तैः ।

(३९५) प्रसारितेति ।—प्रसारितौ मणिमयौ पत्त्रवितानौ—विस्तृतपक्षौ इत्यर्थः, यस्य तथोक्तमिव । माणिक्यमहीधरं—माणिक्यरत्ननिर्मितपर्व्वतं, माणिक्य-पर्व्वतं वा ।

(३९६) सकलेति ।—सकलानां लोकानाम् आलोकः,—उद्योतः, प्रभेत्यर्थः, तस्य मार्गः,—पन्थाः, तस्य अर्गलः,—कवाटरोधककाष्ठादिदण्डविशेषः, तेन ; अस्य बाहुदण्डप्रभावात् सर्वेषामेव भुजशालिनां प्रभावजनितालोको विनाशं गत इति भावः ।

(३९७) चतुरिति ।—चतुर्णाम् उदधीनां—समुद्राणां सम्बन्धी, परिक्षेपः,—परिवेष्टनमेव, चतुर्दिग्वर्त्तिसमुद्रा एवेत्यर्थः, खातानि—परिखाः, पृथिव्या इति भावः, तेषां शिलाप्राकारः,—पाषाणनिर्म्मितं प्राचीरमित्यर्थः, तेन, शिलावप्रेण इति भावः, नगरस्य समन्तात् प्राकारं दत्त्वा परितः परिखा क्रियते इति लोकव्यवहारः ।

(३९८) सर्वराजहंसवध्यवज्रपञ्जरेण, (३९९) भुवनलक्ष्मीप्रवेशमङ्गलमहामणितोरणेन, (४००) अतिदीर्घदोर्दण्डयुगलेन दिशां दिक्पालानाञ्च युगपदायतिमपहरन्तम्; (४०१) सोदर्य्यलक्ष्मीचुम्बनलोभेन कौस्तुभमणेरिव मुखावयवतां गतस्य अधरस्य गलता रागेण पारिजातपल्लवरसेनेव सिञ्चन्तं दिङ्मुखानि; (४०२) अन्तरान्तरा सुहृत्परिहासस्मितैः प्रकीर्य्यमाणविमलदशनकिरणशिखाप्रतानैः (४०३) प्रकृतिमूढाया राजश्रियाः प्रज्ञालोकमिव दर्शयन्तम्; मुखजनितेन्दुमन्देहाऽऽगतानि कुमु

(३९८) सर्वेति।—सर्वेषां राज्ञां हंसानामिव; यद्वा.—राजहंसानां—राजश्रेष्ठानां, तदाख्यहंसविशेषाणाञ्च, वध्य—वधने, निरोधने इत्यर्थः, वज्रपञ्जरं—वज्रनिर्म्मितं पञ्जरमित्यर्थः, तेन।

(३९९) भुवनेति।—भुवनानां लक्ष्म्याः प्रवेशस्य मङ्गलं—माङ्गलिकमित्यर्थः, महामणितोरणं—महारत्ननिर्म्मितं बहिर्द्वारं, तेन।

(४००) अतिदीर्घेति।—अतिदीर्घम—अत्यायतं, दीर्घदण्डयुगलं—भुजदण्डद्वयं, तेन। युगपत्—समकालम्, आयतिम्—दैर्घ्यं, प्रभावञ्च, ("आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयोः" इति मेदिनी) अपहरन्तं—नाशयन्तं, सङ्कोचयन्तम् इत्यर्थः।

(४०१) सोदर्य्येति।—सोदर्य्या—सहोदरा, समगर्भजेत्यर्थः, भगिनीति भावः, या लक्ष्मीः,—श्रीः, मुखसम्बन्धिनीति भावः, तस्याः चुम्बनाय लोभः तेन हेतुना, कौस्तुभमणेरिव—चीरसागरोत्पन्नतया सहोदरस्येव इत्यर्थः, मुखावयवतां—वदनाङ्गतां, गतस्य—प्राप्तस्य, तादृश्येण अवतीर्णस्येति भावः, अधरस्य गलता—स्रवता, रागेण—लौहित्येन, पारिजातपल्लवरसेनेव—पारिजातकिसलयद्रवेणेव, दिङ्मुखानि सिञ्चन्तं—आप्लावयन्तम्।

(४०२) अन्तरान्तरा—मध्ये मध्ये। सुहृदिति।—सुहृद्भिः सह ये परिहासाः, तेषु स्मितानि—मन्दहासाः, तैः। प्रकीर्य्यमाणेति।—प्रकीर्य्यमाणाः,—विक्षिप्यमाणाः, विमलाः दशनकिरणानां—दन्तमयूखानां, शिखाप्रतानाः—अग्रसन्निवेशा येषु तथोक्तैः, ["दशनकिरणशिखाप्रतानैः" इत्यत्र "दशनशिखाप्रतानैः" इति पाठान्तरम्]।

(४०३) प्रकृतिमूढायाः,—स्वभावसुग्धायाः; गुणदोषविचारानभिज्ञाया इति

दिनीवनानीव प्रेषयन्तम्; स्फुटधवलदशनपङ्क्तिकृतकुमुद-वनशङ्काप्रविष्टां शरज्ज्योत्स्नामिव विसर्जयन्तम्; (४०४) मदि-राऽमृतपारिजातगन्धगर्भेण भरितसकलककुभा मुखामोदेन अमृतमथनदिवसमिव सृजन्तम्; (४०५) विकचमुखकमल-कर्णिकाकोशेन अनवरतमापीयमानश्वाससौरभमिवाधोमुखेन नासावंशेन, (४०६) चतुषः स्नेहस्निग्धस्य धवलिम्ना दिङ्मु-खानि अपूर्ववदनचन्द्रोदयोद्वेलक्षीरोदप्लावितानीव कुर्वाणम्; (४०७) विमलकपोलफलकप्रतिबिम्बितां चामरग्राहिणीं विग्रहिणीमिव मुखनिवासिनीं सरस्वतीं दधानम्; अरुणेन

भाव:। प्रज्ञालोकमिव—प्रकृष्टज्ञानरूपमालोकमिव, दर्शयन्तम्। मुखेति।—मुखे जनित: य इन्दुसन्देह:,—इन्दुरयमिति सन्देह:, तेन आगतानि, कुमुदिनीवनानीव प्रेषयन्तम्—इन्दुरयं नेति कृत्वा विसर्जयन्तम्। स्फुटेति।—स्फुटधवला या दशन-पङ्क्ति: तया कृता—जनिता, या कुमुदवनशङ्का, तया हेतुना प्रविष्टां, मुखाभ्यन्तर-मिति भाव:, शरज्ज्योत्स्नां—शरत्कालिककौमुदीमिव, विसर्जयन्तं—नैतानि कुमुद-वनानीति कृत्वा त्यजन्तम्।

(४०४) मदिरेति।—मदिराऽमृतवत् य: पारिजातगन्ध:, स गर्भे यस्य तेन। भरितसकलककुभा—सर्व्वदिक्प्रसारिणेति यावत्, मुखामोदेन—वदनसौरभेण, अमृतमथनदिवसमिव—पीयूषमन्थनदिनमिव, सृजन्तं—जनयन्तम्।

(४०५) विकचेति।—विकचं—प्रस्फुटं, मुखं कमलमिव, तस्य कर्णिका-कोश:,—बीजकोश: तेन, ("कर्णिका करिहस्ताग्रे… । ……ऽलवराटे कर्णभूषणे॥" इति मेदिनी)। अधोमुखेन—नतमुखावयवेन, "अधोमुखेन" इत्नेन सौरभस्य सुग्रेयत्वं तथा आपीयमानानुमितिश्च प्रकटयति। नासावंशेन—नासिकारूपदण्डेन, अनवरतं—नियतम्, आपीयमानम्—आघ्रायमाणं, श्वासस्य सौरभं येन तथोक्त-मिव।

(४०६) स्नेहेति।—स्नेहवत् स्निग्धं तस्य, चक्षुष: धवलिम्ना—शैल्येन, दिङ्मुखानि अपूर्व्व: वदनमेव चन्द्र:, तस्य उदयेन उद्वेल:,—वेलायामुच्छलित:, य: क्षीरोद:, तेन प्लावितानीव—आप्लावितानीव।

(४०७) विमलेति।—विमले कपोलफलके—गण्डतटे, प्रतिबिम्बिता—प्रति-

चूडामणिशोचिषा (४०८) सरस्वतीर्ष्याकुपितलक्ष्मीप्रसादन-लग्नेन चरणालक्तकेनेव लोहितायितललाटतटम्; (४०९) आपाटलांशुतन्वीमन्तानवलयिनीं (४१०) कुण्डलमणिकुटिल-कोटिबालवीणाम्, (४११) अनवरतचलितचरणानां वादयताम् उपवीणयतामिव (४१२) स्वरव्याकरणविवेकविशारदं, (४१३) श्रवणावतंसमधुकरकुलानां कलक्वणितमाकर्णयन्तम्; (४१४) उत्फुल्लमालतीमयेन राजलक्ष्म्याः कचग्रहलीला-

फलिता ताम्। विद्युद्वीमिव—मूर्त्तिमतीमिव। सरस्वतीं—वाग्देवीम्। अरुणेन—रक्तेन, चूडामणिशोचिषा—चूडामणेः—शिरोरत्नस्य, शोचिषा—अर्चिषा।

(४०८) सरस्वतीति।—सरस्वत्याम् ईर्ष्या—द्वेषः, तया कुपिता या लक्ष्मीः, तस्याः प्रसादनं—चरणप्रणिपातेन सान्त्वनं तेन, लग्नं—संसक्तं तेन, चरणालक्तकेन—चरणलाक्षारसद्रवेणेवेत्यर्थः। लोहितेति।—लोहितायितः,—रक्तायितः, ललाट-तटः यस्य तथोक्तम्। ["लोहितायितललाटतटम्" इत्यत्र लोहितायतललाटतटम्" इति पाठे,—लोहितः आयतः,—विशालः, ललाटतटः यस्य तमित्यर्थः।

(४०९) आपाटलेति।—आपाटलाः,—ईषद्रक्ताः, अंशवः,—मयूखा एव, तन्वीसन्ताना:,—तन्वीसङ्घाः, तेषां वलयं—मण्डलं विद्यतेऽस्या इति तथोक्ता, ताम्।

(४१०) कुण्डलेति।—कुण्डलयोः,—कर्णभूषणयोः, ये मणयः, तेषां कुटिला—भङ्गिमती, कोटिः,—शिखा इत्यर्थः, सा एव बालवीणा—सप्ततन्त्री विपञ्ची, ताम्।

(४११) अनवरतेति।—अनवरतं—निरन्तरं, चलिताः चरणा येषां तथोक्तानाम्। उपवीणयतां—वीणया उपगायतां, वीणया स्तुतिं कुर्व्वतामित्यर्थः, तेषामिव। एतेन गानस्यैव प्राधान्यं प्रकटयति।

(४१२) स्वरेति।—स्वराः,—निषादादयः, व्याक्रियन्ते—प्रकाश्यन्ते अनेनेति स्वरव्याकरणः, स चासौ विवेकस्येति स्वरव्याकरणविवेकः, तेन विशारदं—चतुरं यथा तथा, [क्रियाविशेषणम्]।

(४१३) श्रवणेति।—श्रवणयोः,—कर्णयोः, यौ अवतंसौ—अलङ्कारविशेषौ, तयोः मधुकरकुलानि—भृङ्गसमूहाः, स्थितानीति भावः, तेषां कलक्वणितं—मधुरा-स्फुटं रणितम्, आकर्णयन्तं—शृण्वन्तम्। ["कलक्वणिनम्" इति पाठान्तरम्]।

(४१४) उत्फुल्लेति।—उत्फुल्लमालतीमयेन—विकसितमालतीगुम्फितेन,

ऽऽलग्नेन नखज्योत्स्नावलयेनेव मुखशशिपरिवेशमण्डलेन मुण्डमालागुणेन परिकलितकेशान्तम् ; (४१५) शिखण्डाभरणभुवा मुक्ताफलाऽऽलोकेन मरकतमणिकिरणकलापेन च अन्योऽन्यसंवलनबृजिनेन प्रयागप्रवाहवेणिकावारिणेव आगत्य स्वयम् अभिषिच्यमानम् ; (४१६) श्रमजलविलीनबहलकृष्णागुरुपङ्कतिलककलङ्ककल्पितेन कालिम्ना (४१७) प्रार्थनाचाटुचतुरचरणपतनशतश्यामिकाकिणेनेव

राजलक्ष्म्याः [कर्तृभूतायाः] कचग्रहः,—केशाकर्षणं, तस्य या लीला—विलासः, तया, आलग्नं—संसक्तं तेन । नखेति ।—नखानां, राजलक्ष्म्या इति भावः, ज्योत्स्ना,—प्रभा इति यावत्, तासां वलयं—मण्डलं तेनेव । मुखेति ।—मुखं शशीव—चन्द्र इव, तस्य परिवेशमण्डलं—परिधिमण्डलं, तेन । मुण्डमालागुणेन—शिरोमालयेत्यर्थः, परिकलिताः,—परिगताः, केशान्ताः केशनिचयाः यस्य तथोक्तम् ; यद्वा,—परिकलिता ये केशाः, तैरन्तः,—मनोहरः, तम् ।

(४१५) शिखण्डेति ।—शिखण्डाभरणं—चूडालङ्कारः, तस्माद् भवतीति तथोक्तेन । मुक्तेति ।—मुक्ताफलानाम् आलोकेन—प्रभया । मरकतमणीनां किरणकलापेन—प्रभाजालेन, अन्योऽन्यस्य संवलनं—मिश्रणं, तेन बृजिनं—कलुषम्, आविलमित्यर्थः, तेन । ("कलुषं बृजिनेनोऽघम्" इत्यमरः) । प्रयागेति ।—प्रयागे—गङ्गायाः सरस्वत्याः यमुनायाश्च सङ्गमस्थले, या प्रवाहवेणिका—तिसृणां नदीनां स्रोतोरूपा वेणी, तस्या वारि, तेनेव । अभिषिच्यमानं—क्रियमाणाभिषेकमित्यर्थः ।

(४१६) श्रमेति ।—"श्रमजल—" इत्यादौ "वारविलासिनीभिः विलुप्यमानसौभाग्यमिव सर्वतः" इत्युत्तरेणान्वयः । श्रमजलेन—चामरादिसञ्चारणजनितपरिश्रमजनितेन जलेन, घर्मेणेत्यर्थः ; विलीनं—द्रवतां गतं, बहलं—प्रचुरम् ; यद्वा,—बहलं—घनं, घनसन्निविष्टमिति यावत्, कृष्णागुरुपङ्कतिलकं—कालागुरुद्रवरचितं तिलकं, तस्य कलङ्कः,—चिह्नं, ("कलङ्कोऽङ्के लाञ्छनेच चिह्नं लक्ष्म च लक्षणम्" इत्यमरः) तेन कल्पितः,—कृतः तेन । कालिम्ना—श्यामलत्वेन ।

(४१७) प्रार्थनेति ।—"प्रार्थना" इत्यादौ प्रार्थनादीनि समस्तानि श्रीहर्षगतानि वीप्स्यानि । प्रार्थनायां—मामनुगृह्णीयेति याच्ञायां, यच्चाटुः,—दैन्यं, तेन चतुरं—सविलासं, यानि चरणपतनानि, तेषां शतेन—बाहुल्येनेति यावत्, या श्यामिका—कालिमा, तस्याः किणः,—चिह्नविशेषः, तेनेव ।

(४१८) नीलायमाननललाटलेखाभिः, (४१९) क्षुभित-मानसोन्नतैः उत्कलिकाकलापैरिव हारैः उल्लसद्भिः अवष्टभ्य-मानाभिः, (४२०) विलासवल्गनचटुलैः भ्रूलताकल्पैः ईर्ष्यया श्रियमिव तर्जयन्तीभिः, (४२१) आयामिभिः श्वसितैः अविरलपरिमलैः मलयमारुतमयैः पाशैरिव आकर्षन्तीभिः (४२२) विकटवकुलावलीवराटकवेष्टितमुखैः हृदयैः स्तन-कलसैः (४२३) खदारसन्तोषरसमिवाग्रेषमुद्वहन्तीभिः,

(४१८) नीलेति।—नीलायमाना—नीलिमाचरन्ती, ललाटलेखा—भाल-रेखा यासां ताभिः।

(४१९) क्षुभितेति।—क्षुभितानि—इष्टलाभविरहात् क्षीभं गतानि यानि मानसानि—चेतांसि, तेभ्यः उद्गताः,—उत्थिताः तैः; क्षुभितं—वात्याव्याप्तं चञ्चलं, यत् मानसं—तदाख्यं सरः, तस्मात् उद्गतैः इति च। उत्कलिकाकलापैरिव—रथ-ङ्गिकासमूहैरिव, वीचिसमूहैरिव च, ("कथितोत्कलिकोत्कण्ठाहेलासल्लिलवीचिषु" इति मेदिनी) उल्लसद्भिः,—राजमानैः, हारैः अवष्टभ्यमानाभिः,—स्तब्धीक्रियमाणाभिः।

(४२०) विलासेति।—विलासेन—विभ्रमेण, यद् वल्गनं—चलनं, तत्र चटुलाः,—पटवः तैः। भ्रूलताकल्पैः,—लतासदृशीभिः भ्रूभिरित्यर्थः। श्रियमिव—राजलक्ष्मीमिव, सपत्नीधियेति भावः।

(४२१) आयामिभिः,—आयतैः, श्वसितैः,—निश्वासैः, इष्टलाभविरहदुःखा-दिति भावः, अविरलैः,—घनैः, परिमलैः,—सौरभं येषां तैः। पाशैरिव—रज्जुभि-रिव, आकर्षन्तीभिः,—वशीकुर्वतीभिः, समीपमानयन्तीभिश्च, प्रियं हर्षमिति भावः।

(४२२) विकटेति।—"विकट—" इत्यादिना उद्दीपनभावमेव व्यञ्जयति। विकटा—स्थूला, या वकुलावली—वकुलमाला, सैव वराटकः,—रज्जुः, ("वराटकः शङ्खबीजकोषे रज्जौ कपर्दके" इति मेदिनी) तेन वेष्टितं मुखं येषां तैः। हृदयैः,—उत्पलैः, हृदयत्वादेव हार्द्रमेषां द्योतयति। स्तनकलसैः,—स्तना: कलसा इव तैः।

(४२३) खदारेति।—स्वस्य दारा:—पत्नी, तेषु सन्तोषः,—प्रीतिः, एव रसः,—रागः, इत्यर्थ इति भावः, जलञ्च, तमिव। हृदयत्वेनैव च वक्ष्यति, अग्रेषम् इति।—अग्रं—सलयम्, उद्वहन्तीभिः,—उत्तोलयन्तीभिः, रिक्तीकुर्वतीभिरिति यावत्; कलसैः किल रज्जुवेष्टितमुखैः रसम (जलम्) उद्धियते इति लौकिकव्य-वहारः; तादृशस्तनप्रदर्शनेन स्वदारसन्तोषोऽपाक्रियते, स्वसन्तोषश्च जन्यते इति भावः।

(४२४) कुचोत्कम्पिकाविकारप्रेङ्खितानां हारतरलमणीनां रश्मिभिः आकृष्य हृदयमिव हठात्प्रवेशयन्तीभिः, प्रभामुचाम् आभरणमणीनां मयूखैः प्रसारितैः बहुभिरिव बाहुभिः आलिङ्गन्तीभिः, (४२५) जृम्भाऽनुबन्धबन्धुरवदनारविन्दावरणीकृतैः उत्तानैः करकिसलयैः सरभसप्रधावितानि मानसानीव निरुन्धतीभिः, (४२६) मदान्धमधुकरकुलकोर्य्यमाणकर्णकुसुमरजःकणकूणितकोणानि कुसुमशरशरनिकरप्रहारमूर्च्छामुकुलितानीव लोचनानि चतुरं सञ्चारयन्तीभिः, अन्याऽन्यमत्सरात्(४२७) आविर्भवद्भङ्गुरभ्रुकुटिविभ्रमच्छिन्नैः कटाक्षैः कर्णेन्दीवराणीव ताड़-

(४२४) कुचेति।—कुचानां—स्तनानाम्, उत्कम्पिका—कम्पविशेष एव, विकारः,—अन्यथाभावः, तेन प्रेङ्खिताः,—चालिताः तेषाम्; हारतरलमणीनां—हारेषु तरलाः,—भास्वराः, ये मणयः,—रत्नानि, तेषाम्; रश्मिभिः,—मयूखैः, आकृष्य, हर्षमिति शेषः। प्रभामुचां—प्रभावर्षिणाम्, आभरणमणीनाम्—अलङ्काररत्नानां, मयूखैः,—किरणैः। आलिङ्गन्तीभिः,—आश्लिष्यन्तीभिः।

(४२५) जृम्भेति।—जृम्भाणां—कामजनितानुभावविशेषाणाम्, अनुबन्धेन—सातत्येन, बन्धुराणि—भङ्गिमन्ति, रम्याणि वा, वदनानि—मुखानि, अरविन्दानीव—पद्मानीव, तेषाम् आवरणीकृताः,—आवरणत्वेन उद्धृताः तैः। उत्तानैः,—ऊर्ध्वीकृतैः, करकिसलयैः, सरभसप्रधावितानि—सवेगप्रचलितानि, हर्षं प्रतीति भावः। निरुन्धतीभिः,—निरुद्धं कुर्वतीभिः।

(४२६) मदेनेति।—मदेन मत्तानि—मत्तानीति यावत्, ["मदान्ध—" इत्यत्र "मदनान्ध—" इति पाठान्तरम्] यानि मधुकरकुलानि तैः कीर्य्यमाणानि—विक्षिप्यमाणानि, यानि कर्णकुसुमानां रजांसि—परागाः, तेषां कणैः,—लेशैः, कूणिताः,—सङ्कोचिताः, कोणाः,—एकदेशाः, येषां तानि। अत एव कुसुमेति।—कुसुमशरस्य—कामस्य, शरनिकरैः,—शरसमूहैः, प्रहारेण या मूर्च्छा—मोहः, तया मुकुलितानीव—निमीलितानीव, लोचनानि—नयनानि, चतुरं—सविलासं यथा तथा, सञ्चारयन्तीभिः,—प्रसारयन्तीभिः। अन्योऽन्यमत्सरात्—परस्पर्ध्यावशात्।

(४२७) आविर्भवदिति।—आविर्भवन्तः,—उत्पद्यमानाः,भङ्गुराः,—कुटिलाः,

यन्तीभिः, (४२८) अनिमेषदर्शनसुखरसराशिं (४२९) मन्थरितपक्ष्मणा चक्षुषा पीतमिव (४३०) कोमलकपोलपालीप्रतिविम्बितं वहन्तीभिः, (४३१) अभिलाषलीलानिर्निमित्तस्मितैः चन्द्रोदयान् इव मदनसाहायकाय सम्पादयन्तीभिः, (४३२) अङ्गभङ्गवलनान्योऽन्यघटितोत्तानकरवेणिकाभिः (४३३) स्फुटनमुखराङ्गुलीकाण्डकुण्डलीक्रियमाणनखदीधितिनिवहनिभेन अकिञ्चित्करकामकार्मुकाणीव रुषा भञ्जतीभिः वारविलासिनीभिः

ये भ्रुकुटिविभ्रमाः, तैः स्निग्धाः तैः। कर्णेन्दीवराणीव—श्रवणनीलोत्पलानीव, ताडयन्तीभिः, स्वसाम्येर्धयेति भावः।

(४२८) अनिमेषेति।—अनिमेषं—निर्निमेषं, दर्शनम्—अवलोकनं, तेन सुखरसानां—सुखास्वादानां, रसः,—जलं, तेषाञ्च राशिर्यस्मिन् तं, हर्षमिति शेषः।

(४२९) मन्थरितेति।—मन्थरितानि—निश्चलानि, पक्ष्माणि—लोमानि यस्य तेन, चक्षुषा—नेत्रेण, पीतमिव।

(४३०) कोमलेति।—कोमलायां कपोलपाल्यां—कपोलतले, प्रतिविम्बितं—प्रतिफलितम्; निर्मले स्फटिकभाजनादौ अन्तर्वर्त्तिद्रव्यमपि प्रतिविम्बितं दृश्यते। वहन्तीभिः,—धारयन्तीभिः।

(४३१) अभिलाषेति।—अभिलाषस्य—कामतृष्णायाः, लीलया—विलासेन, निर्निमित्तानि—अहेतुकानि, स्मितानि—स्मदुहसितानि तैः। मदनसाहायकाय—कामसाहाय्याय। सम्पादयन्तीभिः,—प्रकाशयन्तीभिः।

(४३२) अङ्गेति।—अङ्गानां भङ्गवलनेन—भ्रूभादिजनितभङ्गिविशेषेण, अन्योऽन्येन—परस्परेण, घटिताः,—कृताः, उत्ताना: याः करवेणिकाः,—परस्परानुबन्धेन स्थितयोः करयोः अङ्गुलिविन्यासविशेषाः, ताभिः।

(४३३) स्फुटनेन—मोटनेनेत्यर्थः, मुखराः,—सशब्दाः ये अङ्गुलय एव काण्डाः,—शाखाविशेषाः, तैः कुण्डलीक्रियमाणानां नखानां दीधितिनिवहाः,—मयूखनिचयाः, तेषां निभः,—छलं तेन। अकिञ्चित्कराणि—अक्षमाणि इति यावत्, हर्षचित्ताकर्षणाय्यक्षमानीति भावः, कामस्य कामुकाणि—धनूंषि, तानीव, रुषा—कोपेन, भञ्जतीभिः,—खण्डयन्तीभिः।

(४३४) विलुप्यमानसौभाग्यमिव सर्व्वतः; (४३५) स्पर्शखिन्नवेपमानकरकिसलयगलितचरणारविन्दां चरणग्राहिणीं विहस्य कोणेन लीलाऽलसं शिरसि ताड़यन्तम्; (४३६) अनवरतकरकलितकोणतया च आत्मनः प्रियां वीणामिव श्रियमपि शिक्षयन्तम्; निःस्नेह इति धनैः, (४३७) अनाश्रयणीय इति दोषैः, नियहरुचिः इति इन्द्रियैः, दुरुपसर्प इति कलिना, नीरस इति व्यसनैः, (४३८) भीरुः इति अयशसा,

(४३४) विलुप्यमानेति।—विलुप्यमानं—क्षियमाणं, सौभाग्यं—वाल्लभ्यं यस्य तथोक्तमिव।

(४३५) स्पर्शेति।—स्पर्शेन खिन्नः,—घर्म्मार्त्तः, वेपमानः,—कम्पमानश्च, सात्त्विकभावातिशयादिति भावः, यः करकिसलयः, तस्मात् गलितं—च्युतं, चरणारविन्दं—पादपद्मं हर्षस्येति भावः, यस्याः तथोक्ताम्। चरणग्राहिणीं—चरणसेविनीमित्यर्थः। कोणेन—वीणावादनदण्डेन, ("कोणो वीणादिवादनम्" इत्यमरः)। लीलाऽलसं—विलासमन्थरम्। ताड़यन्तं—प्रहरन्तम्।

(४३६) अनवरतेति।—अनवरतम्—अविरतं, करकलितः,—करधृतः, कोणो येन तथोक्तः, तस्य भावः, तत्ता, तया हेतुना, प्रियां—प्रीतिजननीम्। ["प्रियाम्" इति वीणायाः श्रियाश्च विशेषणम्]। शिक्षयन्तम्—अभ्यस्यन्तं, पर्य्यालोचयन्तमिति यावत्। निःस्नेहः,—स्नेहरहितः, सततव्ययशीलत्वादिति भावः, "निःस्नेह" इत्यादौ "एतैरेकमप्यनेकधा गृह्यमाणम्" इत्युत्तरेण सम्बन्धः, एवं सर्व्वत्र।

(४३७) अनाश्रयणीयः,—असेवनीयः। नियहरुचिः,—नियहे—वशीकरणे, रुचिः,—अभिलाषो यस्य तथाभूतः। दुरुपसर्पः,—दुर्द्धर्षः। कलिना—चतुर्थयुगेन। नीरसः,—निरनुरागः। व्यसनैः,—मृगयादिभिरष्टादशभिः, तदुक्तं मनुना,—"दशकामसमुत्थानि तथाष्टौ क्रोधजानि च। व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्॥ कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः। वियुज्यतेऽर्थधर्म्माभ्यां क्रोधजेष्वात्मनैव तु॥ मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः। तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः॥ पैशुन्यं साहसं द्रोहः ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः॥" इति।

(४३८) भीरुः,—भयशीलः। अयशसा—अकीर्त्या, अकीर्त्तिकरेण दुश्चेष्टितेनेति भावः।

(४३९) दुर्गृहीतचित्तवृत्तिरिति चित्तभुवा, स्त्रीपर इति सरस्वत्या, शठः इति परकलत्रैः, काष्ठामुनिरिति यतिभिः, धूर्त्त इति वेश्याभिः, नेय इति सुहृद्भिः, कर्म्मकर इति विप्रैः, सुसहाय इति (४४०) शत्रुयोधैः, एकमपि अनेकधा गृह्यमाणम्; (४४१) शन्तनोः महावाहिनीपतिं, भीष्मात् जितकाशिनं, (४४२) द्रोणात् चापलालसं,

(४३९) दुर्गृहीतेति।—दुर्गृह्य—दुराकर्षी, चित्तवृत्तिर्यस्य तथोक्तः। चित्तभुवा—कामेन। स्त्रीपरः,—स्त्रैणः। शठः,—धूर्त्तः, वञ्चक इत्यर्थः। ["शठः" इत्यत्र "षण्ढः" इति पाठे.—षण्ढः,—प्रजननाक्षमः, क्लीव इत्यर्थः] काष्ठामुनिः,—उत्कर्षवान् तापसः, "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः)। नेयः,—वशंवदः, परवशः इत्यर्थः। कर्म्मकरः,—भृत्यः। सुसहायः,—सुष्ठु सहायसम्पन्नः; कथमन्यथा एकेन वयं पराजिता इति भावः।

(४४०) शत्रुयोधैः,—शत्रुवीरैः। अनेकधा—बहुधा। गृह्यमाणं—ज्ञायमानम्। अत्रोल्लेखालङ्कारः, तथा च दर्पणः,—"क्वचिद्गृहीतृणां विषयाणां तथा क्वचित्। एकस्यानेकधोल्लेखी यः स उल्लेख उच्यते॥" इति।

(४४१) शन्तनोः.—तदाख्यात् कुरुवंशीयात् राज्ञः, [ल्यब्लोपे पञ्चमी] शन्तनुमपेत्यर्थः; एवमुत्तरत्र। महीति।—महत्यः वाहिन्यः,—चम्वः, तासां पतिः, तम्; पक्षे,—शन्तनुस्तु महती एकैव वाहिनी—गङ्गा, तस्याः पतिरिति व्यतिरेकः। भीष्मात्—भीष्ममपेत्य, जितकाशी—जितेन—जयेन, काशते—राजते इति तथोक्तः, तम्; तथा च परशुरामः भीष्मेण पराजितः, काशिराजदुहितृस्वयंवरे च समागतं सकाशिराजं नृपचक्रम् एकाकी एव स विजित्य भ्रातुर्विचित्रवीर्यस्य दारार्थम् अम्बाऽम्बिकाऽम्बालिकानामकन्यात्रयम् आनीतवान्; हर्षस्तु ततोऽपि जितकाशी; जितेन्द्रियो वा तम्। तथा हि, यदा त्वयि त्वत्पुत्रे वा विद्यमाने कुतो महौहिवाणां राज्यपालिरिति पितुः शन्तनोर्निमित्तं सत्यगन्धानाम्नीं दासराजकन्यामर्थयते भीष्माय दासराजेन सा न दत्ता, तदा "नाहं राज्यं विवाहं वा करिष्यामि" इति भीष्मेण प्रतिज्ञातं, तत एव चिरकुमारेणानेनाभावि; अतः भीष्मस्तु पितुरोधेन जितेन्द्रियः, अयन्तु स्वभावत इति व्यतिरेकः।

(४४२) द्रोणात्—धनुर्वेदाचार्य्यात्, चापे—धनुषि, लालसा यस्य तम्; अथ च, च—समुच्चये, अपगता लालसा यस्य तथोक्तः तं, निर्लोभमित्यर्थः; यद्वा,—

(४४३) गुरुपुत्रात् अमोघमार्गणं, (४४४) कर्णात् मित्र-प्रियं, (४४५) युधिष्ठिरात् बहुक्षमं, (४४६) भीमात् अनेकनागायुतबलं, (४४७) धनञ्जयात् महाभारतरणयोग्यम् ;

चापल्ल—चपलकर्मणि, अलसः,—मन्दव्यापारः, अपटुरित्यर्थः, तम् ; द्रोणस्तु अर्थलालसापूर्णतया द्रुपदेन सह विरोधं कृतवान्, अयन्तु न तथेति व्यतिरेकः ।

(४४३) गुरुपुत्रात्—गुरुः,—द्रोणाचार्यः, तस्य पुत्रः,—अश्वत्थामा, तस्मात् । अमोघाः,—अव्यर्थाः, मार्गणाः,—शराः यस्य तथोक्तः, तम्, अविफलशरवर्षिणमित्यर्थः ; तथा च "अद्यैव पाण्डवान् हनिष्यामि" इति प्रतिज्ञाय अश्वत्थाम्ना ब्रह्मास्त्रं निक्षिप्तं, तदस्त्रतेजसा सचराचरं जगदपि सन्तप्यमानं विलोक्य समागतेन स्वाश्रमगतेन विरिञ्चिना जगदनुकम्पया तदस्त्रोपसंहाराय याचितः सः "अर्जोऽयं मे अमोघः, शत्रुपक्षोयं कामप्येकं न हत्वा न निवर्तिष्यते" इत्युक्तवान् ; ततः उत्तरागर्भस्थं परीक्षितं विनाश्य स तमुपसंहृतवान् ; ततश्च भगवान् श्रीकृष्णः अङ्गुष्ठमात्रो भूत्वा उत्तरागर्भं प्रविश्य, तं पुनरुज्जीवितवानिति पौराणिकी वार्त्ता । अथ च, अमोघाः,—सफलाः, मार्गणाः,—याचकाः यत्र तथोक्तः, अर्थिप्रार्थितपूरक इति यावत् । द्रौणिः विधातुरपि याचकं न सम्यक् सफलामकरोत्, अयन्तु अर्थिमात्रस्यैव प्रार्थितप्रदाता अत एव व्यतिरेकः ।

(४४४) कर्णात्—राधेयात्, मित्रप्रियं—मित्रस्य—सूर्यस्य, मित्राणां—सुहृदाञ्च, प्रियः, तम् । ("—मित्रं सुहृदि न दर्यो । सूर्ये पुंसि—" इति मेदिनी) ; सूर्यनन्दनतया सूर्यप्रियो हि कर्णः, अयन्तु सूर्योपासकतया तत्प्रियः । कर्णस्तु मित्रस्य एकस्य दुर्योधनस्य प्रियः, अयन्तु मित्राणां बहूनां प्रिय इति व्यतिरेकः ।

(४४५) युधिष्ठिरात्—धर्मराजात, बहुक्षमं—क्षमागुणबहुलम् ; अथ च बह्वी क्षमा—पृथिवी, राज्यमित्यर्थः यस्य तथोक्तम् ।

(४४६) भीमात्—अर्जुनायजपाण्डवात् । अनेकेति ।—अनेकनागायुतवत्—नास्ति एकः,—श्रेष्ठः ("एकः सङ्ख्याऽन्तरे श्रेष्ठे केवलेतरयोस्त्रिषु" इति मेदिनी) नागः, ये च ते नागाः,—हस्तिनः, तेषाम् अयुतवत्, सहस्रहस्तिसमुद्भवादित्यर्थः, बलं—सामर्थ्यम् ; अन्यत्र,—अनेकानि—बहूनि, नागानां—हस्तिनाम्, अयुतानि—दशसहस्राणि, बलानि—सैन्यानि, यस्य तथोक्तः, तम् ।

(४४७) धनञ्जयात्—अर्जुनात्, महाभारते यो रणः,—सङ्ग्रामः, कुरुक्षेत्रादिषु इति यावत् ; अन्यत्र,—महान् भारः, पृथिव्या इति भावः, तस्य तरणं—

(४४८) कारणमिव कृतयुगस्य, बीजमिव विबुधसर्गस्य, उत्पत्तिद्वीपमिव दर्पस्य, एकागारमिव करुणायाः, प्रातिवेशिकमिव पुरुषोत्तमस्य, (४४९) खनिपर्व्वतमिव पराक्रमस्य, सर्व्वविद्यासङ्गीतगृहमिव सरस्वत्याः, द्वितीयामृतमथनदिवसमिव लक्ष्मीसमुत्थानस्य, (४५०) बलदर्शनमिव वैदग्ध्यस्य, एकस्थानमिव स्थितीनां, सर्व्वस्वकथनमिव कान्तेः, अपवर्गमिव रूपपरमाणुसर्गस्य, सकलदुश्चरितप्रायश्चित्तमिव राज्यस्य, (४५१) सर्व्वबलसन्दोहावस्कन्दमिव कन्दर्पस्य, उपायमिव पुरन्दरदर्शनस्य, आवर्त्तनमिव धर्म्मस्य, कन्यान्तःपुरमिव (४५२) कलानां, (४५३) परमप्राणमिव सौभाग्यस्य, राज-

---

बहुनः। यद्वा,—महतः,—प्रकृष्टस्य, भारस्य—कार्य्यधुरायाः, तरणं—सम्पादनमित्यर्थः, तस्य योग्यः तम्।

(४४८) कारणमिव—हेतुभूतमिव, कृतयुगस्य—सत्ययुगस्य। बीजमिव—अङ्कुरोत्पादकक्षुद्रवस्तुविशेष इव, विबुधसर्गस्य—देवसृष्टेः। उत्पत्तिद्वीपमिव—प्रभवस्थानमिव। एकागारमिव—अद्वितीयं गृहमिव। प्रातिवेशिकं—प्रतिविम्बमिव, प्रातिवेशिनमिव वा।

(४४९) खनिपर्व्वतमिव—आकरगिरिमिव। सर्व्वविद्यासङ्गीतगृहमिव—अशेषशास्त्रसङ्गीतालयमिव। द्वितीयामृतमथनदिवसमिव—अपरपीयूषोच्छलनवासरमिव।

(४५०) बलदर्शनमिव—शक्त्युत्कर्षप्रदर्शनमिव। एकस्थानमिव—अद्वितीयं निकेतनमिव। स्थितीनां—मर्य्यादानां, शिष्टाचाराणामित्यर्थः। सर्व्वस्वकथनमिव—निधिभूतत्वविज्ञापनमिव, अपवर्गमिव—साफल्यमिव, अथवा कृत्यावसानमिव, परमोत्कर्षमिवेत्यर्थः, ("स्यादपवर्गस्त्यागे मोक्षे कार्य्यावसाने साफल्ये" इति मेदिनी)। सकलदुश्चरितप्रायश्चित्तमिव—अखिलपापक्षयमात्रसाधनीभूतकर्म्मविशेषमिव।

(४५१) सर्वेति।—सर्वेषां बलानां—सैन्यानां, सामर्थ्यानां वा, सन्दोहः,—सङ्घः, तस्य अवस्कन्दः,—समावेशः तमिव। पुरन्दरदर्शनस्य—इन्द्रसाक्षात्कारस्य। आवर्त्तनमिव—आवर्त्तमिवेत्यर्थः।

(४५२) कलानां—नृत्यगीतादीनां चतुःषष्टिविधानां कामविद्यानाम्।

(४५३) परमप्राणमिव—परमं बलमिव। ["परमप्राणमिव" इत्यत्र "परम-

सर्गसमाप्त्यवभृथस्नानदिवसमिव सर्व्वप्रजापतीनाम् ; गम्भीरञ्च, प्रसन्नञ्च, श्यामजननञ्च, रमणीयञ्च, कौतुकजननञ्च, पुण्यञ्च, चक्रवर्त्तिनं हर्षम् अद्राक्षीत्।

दृष्ट्वा च (४५४) अनुगृहीत इव, निगृहीत इव, साभिलाष इव, हृप्त इव, रोमाञ्चमुचा मुखेन मुञ्चन् आनन्दवाष्पवारि-विन्दून् दूरादेव विस्मयस्मेरः समचिन्तयत्,—"सोऽयं सुजन्मा, सुगृहीतनामा, तेजसां राशिः, (४५५) चतुरुदधिकेदार-

---

प्रमाणमिव" इति पाठे,—परमम्—उत्कृष्टं, प्रमाणं—दृष्टान्तस्थानमित्यर्थः, तदिव]। राजसर्गेति।—राज्ञां सर्गः,—सृष्टिः, तस्य समाप्तिः,—अवसानं, सैव अवभृथस्नानं—दीक्षान्तस्नानं, तस्य दिवसः, तमिव। सर्व्वप्रजापतीनां—सर्वेषां स्रष्टृणाम्। गम्भीरेत्यादि।—गम्भीरञ्च प्रसन्नञ्च इत्यादि अन्योऽन्यसापेक्षं बोध्यं, तेन गम्भीरत्वेऽपि प्रसन्नत्वं—प्रसादगुणसम्पन्नत्वम् ; नो चेत् तथाविधत्वं, तदा कुटिलप्रकृतित्वं प्रसज्येत। किञ्च गम्भीरं—गभीरं, निश्चलमित्यर्थः, सात्त्विकारमिति भावः, अथ च प्रसन्नं—निर्म्मलम्, इति विरोधोऽपि अत्र उद्भावनीयः। श्यामेत्यादि।—श्यामजननत्वेऽपि रमणीयत्वं—रम्यदर्शनत्वम् ; तथा च रघुवंशे कालिदासः,—"भौमकालैर्नृपगणैः स बभूवोपजीविनाम्। अधृष्यश्चाधिगम्यश्च यादोरत्नैरिवार्णवः॥" तादृक्त्वं नो चेत्, तस्य भौमाकृतित्वं सम्पद्येत ; तथा श्यामजननम् अथ च रमणीयमिति विरोधः। एवं कौतुकजननत्वेऽपि पुण्यं—पवित्रस्वभावम् ; तथाभूतत्वं नो चेत् तस्य पापकारित्वमेव सम्भाव्येत, यतः कौतुकजननत्वन्तु अपुण्यत्वादेव सम्पद्येत ; तथा कौतुकजननम् अथ च पुण्यं—सभक्तिदर्शनार्हं पवित्रमिति विरोधः। चक्रवर्त्तिनं—सार्व्वभौमम्।

(४५४) अनुगृहीत इव—अनुकम्पित इव, प्रसन्नया दृष्ट्येति सारः। निगृहीत इव—अभिभूत इव, तेजसेत्याशयः। साभिलाष इव—समुत्सुक इव, पुनः पुनः दर्शनाऽऽशयेति भावः। हृप्त इव—चरितार्थ इव, दृष्टव्यवस्तुदर्शनेन इति हृदयम् ; अथ च, यः अनुगृहीतः, स एव निगृहीतः, यः साभिलाषः, स कथं हृप्तः ? इति विरोधोऽपि अत्र प्रकटः। रोमाञ्चमुचा—पुलकितेनेत्यर्थः। मुञ्चन्—त्यजन्। विस्मय-स्मेरः,—विस्मयेन—चमत्कारेण, अलौकिकज्ञानजनितेन इति तात्पर्य्यम्, स्मेरः,—विकसितचित्त इत्यर्थः।

(४५५) चतुरुदधीति।—चतुर्णाञ्च उदधीनां—सागराणां, यत् केदारं—

कुटुम्बी, भोक्ता ब्रह्मास्तम्भफलस्य, (४५६) सकलादिराजचरित-जयज्येष्ठमल्लो देवः परमेश्वरो हर्षः। एतेन च खलु राजन्वती पृथ्वी। न (४५७) अस्य हरेरिव वृषविरोधीनि बाल-चरितानि, न (४५८) पशुपतेरिव दक्षोद्वेगकारीणि ऐश्वर्य-विलसितानि, न (४५९) शतक्रतोरिव गोत्रविनाशपिशुनाः प्रवादाः, न (४६०) यमस्येव अतिवल्लभानि दण्डग्रहणानि,

सेवम्, अन्तःपातीति यावत्, चतुरर्णवावृता महीति भावः, तदेव कुटुम्बं—पोष्य-वर्गः अस्येति तथोक्तः। भोक्ता—अधिकारी। ब्रह्मास्तम्भफलस्य—ब्रह्माण्डवर्त्ति-सर्व्वरत्नजातस्येत्यर्थः, वेदप्रतिपादितयज्ञफलसमूहस्य वा।

(४५६) सकलेति।—सकलाः,—समस्ताः, आदिराजाः,—मल्लादयः, तेषां चरितानि—आचाराः, तेषां जये—पराभवविषये, अतिक्रमणे इत्यर्थः, ज्येष्ठमल्लः,—प्रधानवीरः। परमेश्वरः,—सम्राट्। एतेन—हर्षेण। राजन्वती—प्रशस्तराजशालिनी इत्यर्थः, ["राजन्वान् सौराज्ये" (८।२।१४ पा०) इति मतुपि रूपम्]।

(४५७) अस्य—हर्षस्य। हरेरिव—कृष्णस्येव। वृषविरोधीनि—वृषः,—धर्म्मः; अन्यत्र,—वृषरूपोऽरिष्टासुरः, तस्य विरोधीनि—विध्वंसकानीत्यर्थः। बालचरितानि—शैशवक्रीड़ितानि। कृष्णो बाल्यलीलायां वृषं हतवान्, अयन्तु सदसद्विवेकसम्भावना-विरहितबालावस्थायामपि तत्पालक इति व्यतिरेकः।

(४५८) पशुपतेरिव—हरस्येव। दक्षेति।—दक्षाणां—कुशलानां जनानामिति भावः; अन्यत्र,—दक्षस्य—प्रजापतेः, श्वशुरस्येति भावः; उद्वेगकारीणि—भीषणानि, ऐश्वर्य्यविलसितानि—आधिपत्यचेष्टितानि; अत्र तु ऐश्वर्य्यशब्दस्य गौण-वृत्तित्वं ज्ञातव्यम्; अन्यत्र,—ऐश्वर्य्याणि—ईश्वरधर्म्मा अणिमादय इत्यर्थः; अस्मिन् पक्षे तु ऐश्वर्य्यशब्दः मुख्यवृत्तिको बोध्यः; तेषां विलसितानि—विजृम्भितानि, वीरभद्रादिसृष्टिव्यापारा इत्यर्थः।

(४५९) शतक्रतोरिव—इन्द्रस्येव। गोत्रविनाशपिशुनाः,—गोत्राणां—वंशा-नाम्; अन्यत्र,—पर्व्वतानां, ("गोत्रः शैले गोत्रं कुलाख्ययोः" इति मेदिनी) विनाश-पिशुनाः,—विध्वंससूचकाः। प्रवादाः,—जनश्रुतयः, दुष्कीर्त्तयः इत्यर्थः।

(४६०) यमस्येव—अन्तकस्येव। अतिवल्लभानि—अतिप्रियाणि; अत्र अति-शब्देन मौहर्षस्य युक्तदण्डत्वं प्रतिपादयति। दण्डग्रहणानि—दण्डः,—करग्रहणानि; अन्यत्र,—दण्डस्य—शासनयष्टेः, यमायुधस्येति यावत्, ग्रहणानि।

न वरुणस्येव (४६१) निस्त्रिंशग्राहसङ्कुलरक्षिता रत्नाकरया:, (४६२) न धनदस्येव निष्फला: सन्निधिलाभा:, (४६३) न जिनस्येव अर्थवादशून्यानि दर्शनानि, (४६४) न चन्द्रमस इव बहुलदोषोपहता: श्रिय:। चित्रमिदम् अत्यमरं राजत्वम्। अपि च अस्य (४६५) त्यागस्य अर्थिन:,

(४६१) निस्त्रिंशेति।—निस्त्रिंशग्राहाणां—खड्गधारिणां, सङ्कुलै: ; अन्यत्र,—निस्त्रिंशा:,—निष्ठुरा:, ("निस्त्रिंश: खड्गे ना निर्दये त्रिषु" इति मेदिनी) ग्राहा:,—जलजन्तुभेदा: मकरा इति यावत्, ("ग्राहो ग्रहेऽवहारे च" इति मेदिनी। अवहार:,—मकर इत्यर्थ:) तेषां सङ्कुलै: रक्षिता:,—पालिता:। रत्नालया:,—रत्नभाण्डागाराणि ; अन्यत्र,—रत्नाकरा:, समुद्रा इत्यर्थ:।

(४६२) धनदस्येव—कुबेरस्येव, न निष्फला:,—न अर्थादिफलप्राप्तिविरहिता: इत्यर्थ: ; य: कश्चित् अर्थितया अस्य समीपं गच्छति, स न विफलाभिलाषी भवतीति भाव: ; यद्वा,—न निष्फला:,—सफला:, ज्ञानीपदेशलाभादिति भाव: ; अन्यत्र,—दानादिव्यवहाराभावात् निष्प्रयोजना इत्यर्थ:। सन्निधिलाभा:,—सन्निधि:, —सन्निधानं, समीपोपस्थितिरित्यर्थ: ; यद्वा,—सन्त:,—साधव एव, निधय:,—अमूल्यानि रत्नानि ; अन्यत्र,—सन्त:,—उत्कृष्टा:, निधय:,—पद्मशङ्खादय:,("निधिर्नाशैवधिर्भेदा: पद्मशङ्खादयो निधे:" इत्यमर:) तेषां लाभा:,—प्राप्तय:।

(४६३) जिनस्येव—बुद्धदेवस्येव। अर्थवादेति।—अर्थानां—धनानां, वाद:, —मया इदं लब्धम्, अनेन एतत् प्राप्तमित्यादिरूपं वचनं, तेन शून्यानि—रहितानि, दर्शनानि—अवलोकनानि। अस्य राज्ञ: साक्षात्कारे प्रभूता अर्था लभ्यन्ते इति भाव: ; अन्यत्र,—अर्थवाद:,—स्तुतिवाद:, तेन शून्यानि, सारवन्तीत्यर्थ:। दर्शनानि—मङ्कायानादीनि तदीयशास्त्राणीति भाव:।

(४६४) बहुलेति।—बहुला:,—अनेके, दोषा:,—रागादय इत्यर्थ:, तैरुपहता:, —मलिनीकृता इत्यर्थ: ; अन्यत्र,—बहुलस्य—कृष्णपक्षस्य, दोषाभि:,—रजनीभि:, ("बहुला नीलिकायां स्यात्……। पुंस्यग्नौ कृष्णपक्षे च वाच्यवत् प्राज्यकृष्णयो:॥" "दोष: स्यात् दूषणे पापे दोषा रात्रौ भुजेऽपि च" इति च मेदिनी) उपहता:,—लाञ्छिता:। श्रिय:,—समृद्धय: ; अन्यत्र,—शोभा:। अत्यमरम्—अतीवादिनश्वरम्।

(४६५) त्यागस्य—दानस्य, पर्याप्ती विषय:,—प्रभुरं ज्ञानमित्यर्थ: ; अर्थिन:, —याचका:, न इति अन्वय: ; त्यागाकाङ्क्षा न छद्मिमायातीति भाव:।

(४६६) प्रज्ञायाः शास्त्राणि, कवित्वस्य वाचः, (४६७) सत्त्वस्य साहसस्थानानि, उत्साहस्य व्यापाराः, (४६८) कीर्त्तेः दिङ्मुखानि, अनुरागस्य लोकहृदयानि, (४६९) गुणगणस्य सङ्ख्याः, कौशलस्य कलाः, न पर्य्याप्तो विषयः। अस्मिंश्च राजनि (४७०) यतीनां योगपट्टकाः, (४७१) पुस्तकर्म्मणां पार्थिव-

(४६६) प्रज्ञायाः,—प्रकृष्टाया बुद्धेः, पर्य्याप्तो विषयः,—शास्त्राणि, न इति अन्वयः; सर्व्वाणि शास्त्राणि अतीत्य बुद्धिः प्रवर्त्तते इति भावः। कवित्वस्य—काव्यरचयितृत्वस्य, पर्य्याप्तो विषयः,—वाचः, न इति अन्वयः; वाग्देवीमतिशयिनी कवित्वशक्तिरिति भावः।

(४६७) सत्त्वस्य—बलस्य, पर्य्याप्तो विषयः,—साहसस्थानानि, न इति अन्वयः; एतावदधिकं बलं, यत् तत्प्रकाशस्थानानि न लभ्यन्ते इति भावः। उत्साहस्य—बलप्रकटनस्येत्यर्थः, पर्य्याप्तो विषयः,—व्यापाराः, न इति अन्वयः; उत्साहोपयुक्तव्यापारस्थानं नास्तीति भावः।

(४६८) कीर्त्तेः—यशसः, दिङ्मुखानि पर्य्याप्तो विषयो न इति अन्वयः; एतावदधिकाः कीर्त्तयः, यत् दिगन्तेषु न मान्तीति भावः। अनुरागस्य—प्रीतेः, लोकहृदयानि—जनमानसानि, पर्य्याप्तो विषयो न इति अन्वयः; एतावानुरागः, यल्लोकहृदयेषु न मातीति भावः।

(४६९) सङ्ख्याः,—एकादिपरार्द्धपर्य्यन्ता इति यावत्, गुणगणस्य—विद्यादिगुणराशेः, पर्य्याप्तो विषयः न इति अन्वयः; एतावन्तो गुणाः, यत् न सङ्ख्यातुं शक्यन्ते इति भावः। कलाः,—चतुःषष्टिविधाः कामविद्याः, कौशलस्य—वैदग्ध्यस्य, पर्य्याप्तो विषयो न इति अन्वयः; एतावद् वैदग्ध्यं, यत् कलाविज्ञानमतिशेते इति भावः।

(४७०) यतीनां—परमहंसानां, चतुर्थाश्रमिणामिति भावः, एवेति शेषः, योगपट्टकाः,—पर्य्यङ्कबन्धनार्थम् उपवीतभेदाः, ये पुनः योगेन—उपधिना, कापट्टेनेति यावत्, विश्लथबन्धनेनेति भावः, ("योगोऽपूर्व्वार्थसम्प्राप्तौ···। विश्लथघातके द्रव्योपायसन्नहनेष्वपि" इति मेदिनी) पट्टकाः,—कूटलेख्यानीत्यर्थः, नेति अन्वयव्यवच्छेद आर्थः, इति परिसङ्ख्यालङ्कारः।

(४७१) पुस्तकर्म्मणां—लेप्यकर्म्मणां, ("पुस्तं लेपादिकर्म्मणि", इत्यमरः)

विग्रहाः, (४७२) षट्पदानां दानग्रहणकलहाः, (४७३) वृत्तानां पादच्छेदाः, (४७४) अष्टापदानां चतुरङ्ग-कल्पनाः, (४७५) पन्नगानां द्विजगुरुद्वेषाः, (४७६) वाक्य-विदाम् अधिकरणविचाराः;" इति (४७७) समुपसृत्य चापवीती स्वस्त्ययनम् अकरोत्।

पार्थिवविग्रहाः,—मृन्मयशरीराणि, न तु ब्राह्मणविरोधाः, इति व्यवच्छेदस्यार्थलात् परिसङ्ख्या। एवमुत्तरत्र।

(४७२) षट्पदानां—भ्रमराणां, दानं—मदवारि, तस्य ग्रहणे—आदाने, कलहाः,—विरोधाः, कलरवा इति भावः, दानस्य—दृप्तधनस्य, ग्रहणे कलहाः, अहमग्रे अहमग्रे इत्यादिरूपेण विरोधात्तु नेति भावः; यद्वा,—दाने—ऋणादिरूपेण दृप्तस्य धनस्य परिशोधकाले, ("दाने न्यासार्पणेऽपि च" इत्यमरः, "अपिना ऋणादि ग्रहावपि" इति तत्रैव टीकायाम्) यद् ग्रहणम्—आदानं, तत्र कलहाः न।

(४७३) वृत्तानां—छन्दसां, पादच्छेदाः,—चरणविरामाः; प्रापविर्भावे पद-च्छेदनानि नेति भावः।

(४७४) अष्टापदानां—चतुरङ्गफलकानां, चतुरङ्गकल्पनाः,—चत्वारि अङ्गानि —हस्त्यश्वनौपादातरूपा अवयवा इत्यर्थः, तेषां कल्पनाः,—रचनाः; चतुरङ्गक्रीडायां तत्तदाख्यशारीविन्यासा इत्यर्थः, न तु चतुरङ्गाणां हस्त्यश्वरथपादातरूपाणां, कल्पनाः, —रचनाः; प्रयोजनाभावादिति भावः।

(४७५) पन्नगानां—सर्पाणां, द्विजगुरुद्वेषाः,—द्विजानां—पक्षिणां गुरुः द्विज-गुरुः,—गरुडः इत्यर्थः, तस्मिन् द्वेषाः; अन्यत्र,—द्विजेषु—ब्राह्मणेषु, गुरुषु च; यद्वा,—द्विजगुरुषु—ब्राह्मणश्रेष्ठेषु, द्वेषा इति भावः।

(४७६) वाक्यविदां—वाक्यज्ञानां, मीमांसकानामित्यर्थः, अधिकरण-विचाराः,—अधिकरणानां,—"विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्॥" इत्युक्तपञ्चलक्षणानां, विचाराः,—समालोचनानि, धर्माधिकरणज्ञानानि च, अधिकरणं—प्रजानां परस्परविरोधे धर्मनिर्णयस्थान-मित्यर्थः, तत्र विचारो न; प्रजाः सततं न कलहायन्ते इति भावः।

(४७७) समुपसृत्य—उपगम्य, उपवीती—उद्धृतदक्षिणकर इत्यर्थः,—"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः" इति वचनात्।

अथ (४७८) उत्तरेण नातिदूरे राजधिष्ण्यस्य गजपरिचारको मधुरम् अपरवक्त्रम् उच्चैः अगायत्,—

"करिकलभ ! विमुञ्च लोलतां चर विनयव्रतमानताननः।
मृगपतिनखकोटिभङ्गुरो गुरुरुपरि क्षमते न तेऽङ्कुशः" ॥ ५ ॥

राजा तु (४७९) तच्छ्रुत्वा दृष्ट्वा च तं गिरिगुहागतसिंहहृंहितगम्भीरेण स्वरेण पूरयन्निव नभोभागम् अपृच्छत्,—"एष स बाणः ?" इति। "यथा आज्ञापयति देवः, सोऽयम्" इति विज्ञापितो दौवारिकेण, "न तावदेनम् अकृतप्रसादः प्रक्ष्यामि" इति तिर्यक् (४८०) नीलधवलांशुकधारां तिर-

(४७८) उत्तरेण—उत्तरस्यां दिशि। राजधिष्ण्यस्य—राजमण्डपस्य। गजपरिचारकः,—हस्तिपालः इत्यर्थः। अपरवक्त्रं—तदाख्यं जातिविशेषम्।

गजान्तरपरिचारकः कश्चित् स्वपरिचरणीयं वन्यैधर्म्मेणाविनीतं करिशावकम् अनुशासितुमाह, करिकलभेति।—हे करिकलभ !—हस्तिशावक ! लोलतां—चापल्यं, विमुञ्च—त्यज ; आनतम् आननं यस्य तथाभूतः सन्, विनयव्रतं—शिष्टाचारमित्यर्थः, चर—कुरु ; मृगपतेः,—सिंहस्य, नखकोटिः,—नखराग्रं, तद्वत् भङ्गुरः,—कुटिलः, गुरुः,—महान्, शासिता च, अङ्कुशः,—हस्तिशासनदण्डविशेष इत्यर्थः, ते—तव, उपरि न क्षमते—तव दोषं न सहते इत्यर्थः। अनेन आश्लिष्टानां दृष्टवधिता राज्ञा, अस्य सन्निधौ बाणेन तथा उपचरितव्यमिति द्योत्यते। अत्र गजान्तरपरिचारकस्य कस्यचित् निजपरिचर्य्यमविनीतगजमुद्दिश्य प्रयुक्तः हस्तिपकोचितो विषयः पुरःस्थं बाणं प्रति राज्ञो हर्षस्य भूतहत्तान्तस्मारकः सञ्जातः। तत्र "विमुञ्च लोलताम्" इति श्रवणेन करिणां स्वाभाविकरागित्वस्य स्मरणोदयात् बाणस्यापि पूर्वसुतरागवत्त्वात् भुजङ्गताकृतिः सञ्जाता इति बोध्यम्। अत्राप्रस्तुतकलभवर्णनया प्रस्तुतस्य कलेः बाणस्य प्रतीतेरप्रस्तुतप्रशंसाऽलङ्कारः। अपरवक्त्रं वृत्तम् ॥ ५ ॥

(४७९) अत एवाह, तच्छ्रुत्वेत्यादि।—गिरीति।—गिरिगुहां गतः सिंहः, तस्य हृंहितं—गर्ज्जितं, तद्वत् गम्भीरः तेन। नभोभागं—गगनम्। अकृतप्रसादः,—न कृतः प्रसादः,—प्रसन्नता येन सः, अप्रसन्न इत्यर्थः ; भावबोधार्थमिति भावः। तिर्यक्—तिरश्चीनं, कुटिलं यथा तथेत्यर्थः।

(४८०) नीलेति।—नीलाः धवलाः अंशवः एव अंशुकाः [स्वार्थे कन्प्रत्ययः] ;

स्करिणीम् इव (४८१) भ्रमयन् अपाङ्गनीयमानतरलतारकस्य आयामिनीं चक्षुषः प्रभां परिवृत्य (४८२) प्रेष्ठस्य पृष्ठतो निषण्णस्य मालवराजसूनोः अकथयत्,—"महानयं भुजङ्गः" इति। (४८३) तूष्णीम्भावेन तु अगमितनरेन्द्रवचसि तस्मिन्, मूके च राजलोके, मुहूर्त्तमिव तूष्णीं स्थित्वा ब्राणो व्यज्ञापयत्,—"देव! (४८४) अविज्ञाततत्त्व इव, अश्रद्दधान इव, नेय इव, अविदितलोकवृत्तान्त इव च कस्मात् एवम् आज्ञापयसि? (४८५) स्वैरिणो विचित्राश्च लोकस्य स्वभावाः प्रवादाश्च। महद्भिस्तु यथार्थदर्शिभिः भवितव्यम्। न अर्हसि माम् अन्यथा सम्भावयितुम् अविशिष्टमिव। ब्राह्मणो-

---

अन्यत्र,—तथाविधानि अंशुकानि—वस्त्राणि, तैः शारा—शबला, ताम्। तिरस्करिणीमिव—जवनिकामिव।

(४८१) अपाङ्गेति।—अपाङ्गं—प्रान्तं, नीयमाना—चाल्यमाना, तरला—चञ्चला, तारका—कनीनिका यस्य तथाभूतस्य, चक्षुषः आयामिनीं—प्रसारिणीं, प्रभां,—कान्तिं, भ्रमयन्—सञ्चारयन्, परिवृत्य—परावृत्तीभूयेत्यर्थः।

((४८२) प्रेष्ठस्य—अतिप्रियस्य, पृष्ठतः,—पश्चाद्भागे, निषण्णस्य—उपविष्टस्य, मालवराजसूनोः,—मालवेन्द्रपुत्रस्य। ["अकथयत्" इत्यत्र "अकथयत" इति पाठे,—अस्मीभयपदित्वादात्मनेपदं ज्ञेयम्]। भुजङ्गः,—विटः, धूर्त्तः, लम्पटो वा, ("भुजङ्गो विट्सपर्यो:" इत्यमरः)।

(४८३) तूष्णीम्भावेन—मौनभावेन, अगमितनरेन्द्रवचसि—अगमितम्—अबुद्धं, नरेन्द्रस्य—हर्षस्य, वचः येन तथाभूते, नरेन्द्रवचसो भावमविज्ञानतीत्यर्थः, तस्मिन्—मालवराजसूनौ। मूके—वाग्व्यापाररहिते, मौनावलम्बिनीत्यर्थः, राजलोके—अन्यस्मिन् राज्ञां समवाये इत्यर्थः।

(४८४) अविज्ञाततत्त्व इव—अविदितयाथार्थ्य इव। अश्रद्दधान इव—अविश्वसन्निव। नेय इव—परवश इव, परो यथा बोधयति, तथैव धारयावान् इवेति भावः। अविदितलोकवृत्तान्त इव—अज्ञातजनचरित इव, असमीक्षितभुवनव्यापार इव वेत्यर्थः।

(४८५) स्वैरिणः,—स्वेच्छाऽनुवर्त्तिनः। अविशिष्टमिव—अविशङ्कमिव,

ऽस्मि जातः सोमपायिनां वंशे वात्स्यायनानाम्। यथाकालम् (४८६) उपनयनादयः कृताः संस्काराः। सम्यक् पठितः साङ्गो वेदः। श्रुतानि यथाशक्ति शास्त्राणि। दारपरिग्रहात् अभ्यागारिकोऽस्मि। का मे भुजङ्गता? (४८७) लोकद्वया-विरोधिभिस्तु चापलैः शैशवम् अशून्यम् आसीत्। अत्र अनपलापोऽस्मि। (४८८ अनेन एव च गृहीतविप्रतीसारमिव मे हृदयम्। इदानीन्तु सुगत इव शान्तमनसि, मनाविव

साधारणमिवेत्यर्थः, अभद्रमिवेति भावः। सोमपायिनां—सोमयागं कृत्वा तच्छेष-सोमरसपानरतानां, वात्स्यायनानां—वत्समुनिसन्तानानाम्।

(४८६) उपनयनादयः,—उपनयनम् आदि—मुख्यं येषां ते, संस्काराः,—गर्भाधानादयः। साङ्गः,—"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चितिः। ज्योतिषामयनं विद्येयं षड्भिरङ्गैः सह वर्त्तमानः। अभ्यागारिकः,—गृहस्थः, सम्यग्वृत्तिस्थितः इत्यर्थो वा। ("कुटुम्बव्यापृतस्तु यः। स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम्" इत्यमरः)। भुजङ्गता—धूर्त्तता, लम्पटता वा। [केचित्तु "का मे" इत्यत्र "कामे" इति समस्तपाठं परिकल्प्य—"कामे भुजङ्गतेति कामभुजङ्गता, शृङ्गारित्वम्। कामे—मदने भुजङ्गता ज्ञेया, न साहसेषु। न हि मे काचित् भुजं—बाहुं गता प्राप्तेत्यर्थः" एवं व्याख्यानयन्ति; तत्तु न मनोरमं, प्रस्तुतप्रसङ्गसङ्गत्यभावात्]।

(४८७) लोकेति।—लोकयोः,—स्वर्गमर्त्ययोः, इयं, तस्य अविरोधीनि—अविरोधकराणि तैः, "लोकद्वयाविरोधिभिः" इत्यनेन त्रिवर्गस्यानुपघातं प्रकटयति। अतायुर्वै पुरुषः कालमत्योऽन्यानुपघ्नं परस्परस्यानुपघातेन त्रिवर्गं सेवेत इत्यादि दर्शनात् शैशवेऽपि धर्म्मविरोधि किञ्चिन्नाचरितमिति भावः। चापलैः,—चपलकर्म्मभिः, यानि लोकगर्हितानि नरकजननानि च अताद्दृशैः कर्म्मभिरित्यर्थः, शैशवं—बाल्यम्, अशून्यम्—अविरहितम्। "शैशवमशून्यम्" इत्यनेन तदैकासक्तत्वं परिहरति आत्मनः। अनपलापः,—निरपह्नवः, अकृतनिह्नवोपगीत इति यावत्।

(४८८) अनेनैव—बाल्यचापल्येनैवेत्यर्थः। गृहीतेति।—गृहीतः विप्रतीसारः,—अनुतापो येन तथाभूतमिव। ("पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि" इत्यमरः)। इदानीम्—अस्मिन् काले। सुगत इव—बुद्धदेव इव। मनाविव—

कर्त्तरि वर्णाश्रमव्यवस्थानां, समवर्त्तिनीव च साक्षात् दण्ड-भृति देवे शासति (४८९) समाम्बुराशिरशनाम् अशेषद्वीप-मालिनीं महीं, क इव अविशङ्कः सर्वव्यसनबन्धोः अविनयस्य मनसाऽपि अभिनयं कल्पयिष्यति ? (४९०) आसतां तावत् मानुष्यकोपेताः। त्वत्प्रभावात् अलयोऽपि भीता इव मधु पिबन्ति। रथाङ्गनामानोऽपि लज्जन्त इव अभ्यनुवृत्ति-व्यसनैः प्रियाणाम्। (४९१) कपयोऽपि चकिता इव चपलायन्ते। शरारवोऽपि सानुक्रोशा इव श्वापदगणाः पिंश-तानि भुञ्जते। सर्वथा कालेन मां ज्ञास्यति स्वामी स्वयमेव।

वैवस्वते आदिराजे इव। वर्णेति।—वर्णाः,—ब्राह्मणक्षत्रियवैश्यशूद्राः, आश्रमाः,—ब्रह्मचर्य्यगृहस्थवानप्रस्थभिक्षुकाः, तेषां व्यवस्थाः,—स्थितयः, तासाम्; कर्त्तरि—नियन्तरि। समेति।—समं वर्त्तते इति समवर्त्ती—यमः, ("धर्मराजः पितृपतिः समवर्त्ती परेतराट्। कृतान्तो यमुनाभ्राता शमनो यमराड्यमः॥" इत्यमरः) तस्मिन्निव। दण्डभृति—दण्डं बिभर्त्तीति दण्डभृत्, तस्मिन्, दण्डधरे इत्यर्थः।

(४८९) समाम्बुराशिरशनां—सप्त अम्बुराशयः,—सागराः, रशनाः,—मेखला यस्याः ताम्। अशेषद्वीपमालिनीं—बहुद्वीपशालिनीं, महीं—पृथ्वीं, शासति—पालयति सति। अविशङ्कः,—निर्भीकः। सर्वेति।—सर्वेषां व्यसनानां—दुश्चरि-तानां, बन्धोः,—मित्रं, हेतुरिति यावत्, तस्य। अविनयस्य—चापल्यस्य। अभिनयं—चेष्टाविशेषं, कल्पयिष्यति—करिष्यतीत्यर्थः।

(४९०) आसतां—तिष्ठन्तु। मानुष्यकोपेताः,—मनुष्यस्य भावः,—मानु-ष्यकं, तेन उपेताः,—युक्ताः, मनुष्यधर्म्मेण इत्यर्थः। अलयः,—भ्रमराः। रथाङ्ग-नामानः,—चक्रवाकाः। अभ्यनुवृत्तिव्यसनैः,—अतिशयानुवृत्तिभिः इत्यर्थः। प्रियाणां—चक्रवाकीणामिति भावः।

(४९१) कपयः,—वानराः, चकिता इव—शङ्किता इव, चपलायन्ते—चपला इवाचरन्ति, ["कर्तुः क्यङ् सलोपश्च" (३। १। ११ पा०) इति क्यङि रूपम्]। शरारवः,—हिंसाः, श्वापदगणाः,—व्याघ्रसमूहाः, सानुक्रोशाः,—सदयाः, दुश्चरिता-जनितानुतापशालिन इत्यर्थः। पिंशितानि—मांसानि, भुञ्जते—यजन्ते। कालेन—समयेन।

(४९२) अनपाचीनचित्तवृत्तिग्राहिणो हि भवन्ति प्रज्ञावतां प्रकृतयः" इत्यभिधाय तूष्णीम् अभूत्।

भूपतिरपि—"एवम् अस्माभिः श्रुतम्" इत्यभिधाय तूष्णीमेव अभवत्। (४९३) सम्भाषणासनदानादिना तु प्रसादेन न एनम् अन्वग्रहीत्, केवलम् अमृतवृष्टिभिः स्नपयन्निव स्नेहगर्भेण दृष्टिपातमात्रेण अन्तर्गतां प्रीतिम् अकथयत्। (४९४) अस्ताभिलाषिणि च लम्बमाने सवितरि विसर्जितराजलोकोऽभ्यन्तरं प्राविशत्। (४९५) बाणोऽपि निर्गत्य धौतारकूटकोमलातपत्विषि निर्वाति वासरे, (४९६) अस्ताचलकूटकिरीटे निचुलमञ्जरीभासि तेजांसि मुञ्चति वियन्मुचि मरीचिमति,

(४९२) अनपाचीनेति।—अनपाचीना—अविपरीता, प्रसृष्टामित्यर्थः, विषयद्वारमिति यावत्, ("अपाचीनोऽवागर्थे विपर्य्यस्ते च वाच्यवत्" इति मेदिनी) चित्तवृत्तिं गृह्णन्तीति तथाभूताः।

(४९३) सम्भाषणेति।—सम्भाषणं—संलापः, आसनदानञ्च आदि यस्य तथोक्तेन। प्रसादेन—अनुग्रहेण, प्रीतिज्ञापकेनेति यावत्, एनं—बाणं, न अन्वग्रहीत्—न अनुचकर्ष। स्नपयन्निव—अभिषिञ्चन्निव।

(४९४) अस्ताभिलाषिणि—अस्ताचलगमनोद्यते। लम्बमाने—पश्चिमां दिशमवतरतीत्यर्थः। विसर्जितराजलोकः,—स्वस्थानगमनाय राजन्यान् अनुमन्यमान इत्यर्थः।

(४९५) "बाणोऽपि" इत्यादौ "निवासस्थानमगात्" इत्युत्तरेणान्वयः। धौतेति।—धौतं—प्रसृष्टमिति यावत्, यत् आरकूटं—पित्तलमित्यर्थः, ("रीतिः स्त्रियामारकूटम्" इति पित्तलपर्य्यायेष्वमरः) तद्वत् कोमला आतपस्य त्विषः,—प्रभाः यस्य तादृशे। निर्वाति—निर्वाणं गच्छति, अवसानं प्राप्ते इत्यर्थः।

(४९६) अस्ताचलेति।—अस्ताचलस्य—अस्तगिरेः, कूटं—शृङ्गं, ("कूटोऽस्त्रौ शिखरं शृङ्गम्" इत्यमरः) तस्य किरीटं—मुकुटं तस्मिन्। निचुलेति।—निचुलस्य—स्थलवेतसस्य, इञ्जलाख्यवृक्षस्य वा, ("निचुलोऽम्बुज इञ्जलः" इत्यमरः) मञ्जरी—नवमञ्जरी, तस्या भास इव भासः,—दीप्तयः येषां तथाभूतानि, तेजांसि—किरणान्, मुञ्चति—विकिरति। वियन्मुचि—गगनपरित्यागिनि। मरीचिमति—सूर्य्ये। ["मरीचिमति" इत्यत्र "मरीचिमालिनि" इति पाठेऽपि स एवार्थः]।

(४९७) रोमन्थमन्थरकुरङ्गकुटुम्बाध्यास्यमानस्निग्धदृष्टगोष्ठीन-पृष्ठासु अरण्यस्थलीषु, (४९८) शोकाकुल-कोककामिनी-कूजितकरुणासु तरङ्गिणीतटीषु, (४९९) वासविटपोपविष्ट-वाचाटचटकचक्रवालेषु, (५००) आलवालावर्जितसेकजल-कुटेषु निष्कुटेषु, (५०१) दिवसविच्छित्तिप्रत्यागतं प्रस्तुतस्तनं

(४९७) रोमन्थेति।—रोमन्थेन—उद्गीर्य चर्व्वणेन, मन्थराः,—अलसाः, कुरङ्गाणां—हरिणानां, कुटुम्बाः,—वर्गाः, ["रोमन्थमन्थरकुरङ्गकुटुम्ब—" इत्यत्र "अतिरोमन्थमन्थरकुरङ्गकुटुम्बक—" इति पाठे,—अति—अतिमात्रं, पुनः पुनरित्यर्थः, यः रोमन्थः तेन मन्थराः कुरङ्गाणां कुटुम्बा एव इति कुटुम्बकाः] तैः, अध्यास्यमानम्—अधिष्ठीयमानम्, अत एव स्निग्धम्—अतिमृदु, कोमलमित्यर्थः, गोष्ठीनं—भूतपूर्व्व-गोष्ठ, ["गोष्ठात् खञ् भूतपूर्वे" (५। २। १८ पा०) इति मत्वर्थीये खञि रूपम्। "गोष्ठ गोष्ठानकं तत्तु गौष्ठीनं भूतपूर्व्वकम्" इत्यमरः। अत्र "गौष्ठीनम्" इति पाठस्तु अपाणिनीय एव, तत्र खञि उपधावृद्धेरदर्शनात्। अत्र सुग्धबोधटीकायां रामतर्कवागीशपादाः,—"गोष्ठाद्भूतपूर्वे खीनः" इति सूत्रेण, प्रथमान्तात् भूतपूर्व्वार्थे वर्त्तमानात् गोष्ठशब्दात् स्वार्थे खीनो वा स्यात्; तथा च, भूतपूर्वं गोष्ठं गौष्ठीनम्; भूत-पूर्वं इति किम्? गोष्ठी वर्त्तते इत्याहुः," तथा चैतन्मते गौष्ठीनमिति पदमपि सिध्यति इति बोध्यम्] पृष्ठम्—उपरिभागो यासां तासु। अरण्यस्थलीषु—वनभूमिषु।

(४९८) शोकेति।—शोकाकुलानां—कान्तविरहादिति भावः, कोककामि-नीनां—चक्रवाकीणां, कूजितैः,—विलपितैरित्यर्थः, करुणाः,—कारुण्यजनकाः, तासु। तरङ्गिणीतटीषु—नदीतीरेषु।

(४९९) वासेति।—वासविटपेषु—आश्रयवृक्षशाखासु, उपविष्टं वाचाटानां—रुवतामित्यर्थः, चटकानां—क्षुद्रपक्षिविशेषाणां, चक्रवालं—मण्डलं येषु तथाविधेषु।

(५००) आलेति।—आलवालानि—तरुतलेषु मण्डलाकारेण रचिता जलाधारविशेषाः तेषु, ("—अम्भसां यत्र धारणम्। स्यादालवालमावालम्……" इत्यमरः) आवर्जितानि—रचितानि, सेकजलकुटानि—सेचनार्थं जलघटाः, ["सेक-जलकुटेषु" इत्यत्र "सेकजलकूटेषु" इति पाठे,—"सेकजलकूटानि—सेचनजल-समूहाः] येषु तथाभूतेषु। निष्कुटेषु—गृहारामेषु, ("गृहारामास्तु निष्कुटाः" इत्यमरः)।

(५०१) दिवसेति।—दिवसे विच्छित्तिः,—विहारः, विचरणमित्यर्थः, तस्मात्

स्तनन्धये धयति धेनुवर्गम् उद्गतक्षीरक्षुभिततर्णकव्राते, क्रमेण च (५०२) अस्तधराधरधातुधुनीपूरप्लावित इव लोहितायमानमङ्गसि मज्जति (५०३) सन्ध्यासिन्धुपानपात्रे पातङ्गे मण्डले, (५०४) कमण्डलुजलशुचिशयचरणेषु (५०५) चैत्यप्रणतिपरेषु पाराशरिषु, (५०६) यज्ञपात्रपवित्रपाणौ प्रकीर्णबर्हिषि उत्तेजसि जातवेदसि हवींषि वषट्कुर्व्वति याजूकजने

प्रत्यागत—प्रतिनिवृत्तं, प्रसृतस्तनं—प्रसृताः,—प्रचरिताः, स्तना यस्य तथोक्तं, धेनुवर्गं—गोयूथं, स्तनन्धये—स्तनपायिनि। उद्गतेति।—उद्गतेन—उच्छलितेन, क्षीरेण—दुग्धेन, क्षुभितं—क्षुब्धं, तर्णकानां—वत्सानां,("सद्योजातस्तु तर्णकः" इति गोप्रकरणे अमरः) व्रातं—समूहः तस्मिन्, ["उद्गतक्षीरक्षुभिततर्णकव्राते" इत्यत्र "उद्गतक्षीरं क्षुधिततर्णकव्राते" इति पाठे,—उद्गतम्—उच्छलितं, क्षीरं यस्य तं, धेनुवर्गमित्यस्य विशेषणम्; तथा क्षुधितं तर्णकानां व्रातं तस्मिन्] धयति—पिबति।

(५०२) अस्तेति।—अस्तधराधरः,—अस्ताचलः, तत्र ये धातवः,—गैरिकमनःशिलादयः, ("……धातुर्नेन्द्रियेषु च। मनःशिलादौ श्लेष्मादौ विशेषाद्गैरिकेऽस्थि च॥" इति मेदिनी) तेषु या धुन्यः,—तत्संसृष्टाः निर्झरिण्यः इत्यर्थः, तासां पूरैः,—प्रवाहैः, प्लावित इव—सिक्त इव। लोहितेति।—लोहितायमानानि—रक्तायमानानि, मङ्गांसि—तेजांसि यस्य तथोक्ते। मज्जति—तिरोभवतीत्यर्थः।

(५०३) सन्ध्येति।—सन्ध्या एव सिन्धुः,—नदी, समुद्रो वा, ("सिन्धुर्वसुधुदेशाब्धिनदे ना सरिति स्त्रियाम्" इति मेदिनी) तस्याः पानपात्रं—जलपात्रं तस्मिन्। पातङ्गे—पतङ्गः,—सूर्यः, तस्य इदं पातङ्गं तस्मिन्। ("पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः" इति मेदिनी)।

(५०४) कमण्डलुेति।—कमण्डलुः,—यतीनां जलपात्रभेदः, तस्य जलेन शुचयः,—पवित्राः, शयाः,—कराः, ("पञ्चशाखः शयः पाणिः" इत्यमरः) चरणाय येषां तेषु, कमण्डलुजलक्षालितपाणिपादेषु इत्यर्थः।

(५०५) चैत्येति।—चैत्यन्—आयतनभेदः, वृक्षादिर्वा, ("चैत्यमायतने बुद्धबिम्बे गोहिंशपादपे" इति मेदिनी) तस्य प्रणतिः,—अभिवन्दनं, देवताऽधिष्ठिततयेति भावः, तत्र पराः,—प्रवणाः तेषु। पाराशरिषु—भिक्षुषु, यतिषु इति यावत्, ("भिक्षुः परिव्राट् कर्म्मन्दी पाराशर्य्यपि मस्करी" इत्यमरः) पराशरसन्तानवर्त्तिषु द्विजेषु वा।

(५०६) यज्ञेति।—यज्ञपात्रैः,—स्रुक्स्रुवादिभिः, पवित्रा पाणयो यस्य

(५०७) निद्राविद्राणद्रोणकुलकलिलकुलायेषु (५०८) कापेय-विकलकपिकुलेषु आरामतरुषु, (५०९) निर्जिगमिषति जरत्तरुकोटरकुटीकुटुम्बिनि कौशिककुले, (५१०) मुनिकरमहस्रप्रकीर्णमन्त्र्यावन्दनोदविन्दुनिकरे इव दन्तुरयति तारापथस्थलीं स्थवीयसि तारकानिकुरम्बे, (५११) अम्बरास्थायिणि शर्वरीशवरीशिखण्डे खण्डपरशुकण्ठकाले कवलयति बाले

तथोक्ते। प्रकीर्णबर्हिषि—प्रकीर्णाः,—विकीर्णाः, बर्हिषः,—कुशाः येन तस्मिन्, ("बर्हिस पुंसि हुताशने। न स्त्री कुशे" इति मेदिनी)। उत्तेजसि—ज्वलतीत्यर्थः, जातवेदसि—अग्नौ, हवींषि—हवनीयद्रव्याणि, वषट्कुर्वति—वषडिति मन्त्रेण प्रक्षिपति, याययूकजने—अत्यर्थं यजनशीललोके ["यजजपदशां यङः" (३।२।१६६ पा०) इति ऊकप्रत्ययो रूपम्)।

(५०७) निद्रेति।—निद्रया—स्वप्नेन, विद्राणानि—आकुलानि, द्रोणकुलानि—काकसङ्घानि. ("अथ द्रोणः काकेऽपि···" इत्यमरः) तैः कलिलाः,—श्यामाः, कुलायाः,—नीडाः येषां तेषु।

(५०८) कापेयेति।—कपीनामिदं कापेयं—कपिशिशुचापल्यमिति भावः, तेन विकलानि कपिकुलानि येषु तादृशेषु। आरामतरुषु—उपवनवृक्षेषु।

(५०९) निर्जिगमिषतीति—निर्गन्तुमिच्छति, रात्रिचरत्वादिति भावः। जरदिति।—जरन्तः,—जीर्णाः इत्यर्थः, ये तरवः,—वृक्षाः, तेषां कोटराणि एव—गह्वराणि एव, कुट्यः,—क्षुद्रगृहाणि, तत्र कुटुम्बी—परिवारवान् तस्मिन्। कौशिककुले—पेचकवर्गे।

(५१०) मुनीति।—मुनीनां करसहस्रैः,—बहुभिः हस्तैरित्यर्थः, प्रकीर्णाः,—प्रक्षिप्ताः, मन्त्र्यावन्दनस्य ये उदविन्दवः,—जलबिन्दवः, तेषां निकरे इव, दन्तुरयति—दन्तुरां कुर्वति। तारापथस्थलीं—तारापथम्—अन्तरीक्षमेव, स्थली ताम्। स्थवीयसि—स्थूलतरे। तारकानिकुरम्बे—तारागणे।

(५११) अम्बरास्थायिणि—आकाशमध्यचारिणि। शर्वरीति।—शर्वरी—रात्रिरेव, शवरी—शबरनारी, तस्याः शिखण्डः,—चूडा, जूटकः इत्यर्थः, ("शिखण्डी बर्हचूडयोः" इति मेदिनी) तस्मिन्। खण्डेति।—खण्डपरशुः,—शिवः, तस्य कण्ठ इव कालः,—श्यामः तस्मिन्। कवलयति—ग्रसति। बाले—अभिनवे।

ज्योतिःशेषं सान्ध्यम् अन्धकारावतारे, (५१२) तिमिरतर्जन-निर्गतासु (५१३) दहनप्रविष्टदिनकरकरशाखास्विव स्फुरन्तीषु दीपलेखासु, (५१४) अररसम्पुटसंक्रीडनकथिताऽऽवृत्तिष्विव गोपुरेषु, (५१५) शयनोपजोषजुषि (५१६) जरतीकथितकथे शिश्रयिषमाणे शिशुजने, (५१७) जरन्महिषमसीमलीममतमसि (५१८) जनितपुण्यजनप्रजागरे विजृम्भमाणे भीषणतमे तमीमुखे, (५१९) मुखरितविततज्यधनुषि वर्षति

ज्योतिःशेषं—ज्योतिषां शेषः तम्, अवशिष्टालोकमित्यर्थः। सान्ध्यं—सन्ध्याकालीनम्। अन्धकारावतारे—तिमिरागमे।

(५१२) तिमिरेति। — तिमिराणां — तमसां, तर्जनाय — अपसारणाय, निर्गताः,—प्रसृताः, तासु।

(५१३) दहनेति।—दहनम्—अग्निं, प्रविष्टाः,—गताः, दिनकरस्य—सूर्यस्य, करशाखाः,—कराः,—किरणा एव, शाखाः, तदाकारत्वादिति भावः, कराङ्गुलयश्च, तास्विव। स्फुरन्तीषु—ज्वलन्तीषु। दीपलेखासु—दीपराजिषु।

(५१४) अरेति।—अररः,—कवाटाः, ("कवाटमररं तुल्ये" इत्यमरः) तेषां सम्पुटस्य—युगलस्य, संक्रीडनेन—शब्देन, अवरोधनिनादेनेत्यर्थः, कथिता—सूचिता, आवृत्तिः,—अवरोधनं येषां तथाभूतेषु। गोपुरेषु—पुरद्वारेषु, ("पुरद्वारन्तु गोपुरम्" इत्यमरः)।

(५१५) शयनेति।—शयने य उपजोषः,—सौनभावः, तज्जुषि—तच्छालिनि।

(५१६) जरतीति।—जरतीभिः,—वृद्धाभिः, कथिता—उक्ता, कथा—उपकथेति यावत्, यस्य यस्मै वा तादृशे, शिश्रयिषमाणे—श्रयितुमिच्छतीत्यर्थः।

(५१७) जरदिति।—जरतः महिषा एव मस्यः,—लेखनसाधनानि द्रव्याणि, तद्वत् मलीमसानि—मलिनानि, तमांसि—तिमिराणि, यस्मिन् तथोक्ते।

(५१८) जनितेति।—जनिताः,—प्रसूताः, पुण्यजनानां—यक्षाणां, निशाचरविशेषाणामित्यर्थः, ("अथ पुण्यजनो यक्षे राक्षसे सज्जनेऽपि च" इति मेदिनी) प्रजागरः,—प्रकृष्टजागरणं यस्मिन् तथाभूते। विजृम्भमाणे—आविर्भवति। तमीमुखे—रजनीमुखे, ("रजनी यामिनी तमी" इत्यमरः)।

(५१९) मुखरितेति।—मुखरिता—शब्दिता, टङ्कारध्वनियुता इति यावत्, विततता—विस्तृता, ज्या यस्य तादृशं धनुः यस्य तथाभूते। वर्षति—मुञ्चति।

शरनिकरम् अनवरतम् अशेषसंसारशेमुषीमुषि मकरध्वजे, (५२०) रताकल्पाऽऽरम्भशोभिनि शृङ्खलीभाषितभाजि भजति भूषां भुजिष्याजने, (५२१) सैरिन्ध्रीबध्यमानरशनाजालजल्पाक-जघनासु जनीषु, (५२२) वप्रिकविप्रिखाविहारिणीषु (५२३) अनन्यजानुप्लवासु प्रचलितासु अभिसारिकासु, विरलीभवति (५२४) वरटानां वेश्मन्तशायिनीनां मञ्जुनि

शरनिकरं—शरसङ्घातम्। अशेषेति।—अशेषाणां—समस्तानां, संसाराणां—सृष्टीनां, शेमुषी—बुद्धिः, ("धीः प्रज्ञा शेमुषी मतिः" इत्यमरः) तां मुष्णाति—अपहरति तस्मिन्। मकरध्वजे—कामे।

(५२०) रतेति।—रतस्य—निधुवनस्य, आकल्पाः,—वेशरचनाः, तेषाम् आरम्भेण—समुदयोगेन शोभते इति तथोक्ते। शृङ्खलीति।—शृङ्खल्याः,—कुट्टिन्या, ("कुट्टिनी शृङ्खली समे" इत्यमरः) भाषितं—वचनं, भजते—श्रयतीति तथा-भूते। भूषाम्—अलङ्कारं, शोभां वा, भजति—सेवमाने, परिदधाने इत्यर्थः, गच्छति वा, भुजिष्याजने—दासीजने, वेश्याजने वा, ("भुजिष्यस्तु स्वतन्त्रे च हलसूचक-दासयोः। स्त्रियां दासी गणिकयोः" इति मेदिनी)।

(५२१) सैरिन्ध्रीति।—सैरिन्ध्रीभिः,—प्रसाधनोपचाराभिः नारीभिः, ["सैरिन्ध्री" इत्यत्र "सैरन्ध्री" इति पाठेऽपि स एवार्थः। "सैरिन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका" इत्यमरः] बध्यमानानां—परिधीयमानानां, रशनानां—काञ्चीनां, जालैः,—सङ्घैः, जल्पाकं—मुखरं, जघनं—कटिपुरोभागो यासां तथा-विधासु, जनीषु—वधूषु, नायिकासु इत्यर्थः, ("जनो लोकेऽबलाबन्धोः" इति मेदिनी)।

(५२२) वप्रिकेति।—वप्रिका—जलशून्या, ("शून्यन्तु वप्रिकं तुच्छरिक्तके" इत्यमरः) या विप्रिखा—रथ्या, तासु विहरन्ति—सञ्चरन्तीति तथोक्तासु।

(५२३) अनन्यजेति।—अनन्यजः,—मनसिजः, अनुप्लवः,—अनुचरः, सहाय इत्यर्थः, ("अनुप्लव सहायश्चानुचरोऽभिचरः समाः" इत्यमरः) यासां तथाविधासु। प्रचलितासु—प्रस्थितासु, सङ्केतस्थानमिति शेषः। अभिसारिकासु—"कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिका" इत्युक्तलक्षणासु नारीषु। विरलीभवति—अल्पी-भवतीत्यर्थः।

(५२४) वरटानां—हंसीनां, ("हंसस्य योषिद् वरटा" इत्यमरः)। वेश्मन्त-

(५२५) मञ्जीरशिञ्जितजड़े जल्पिते, (५२६) निद्राविद्राण-द्राघीयसि द्रावयतीव च विरहिहृदयानि (५२७) सारसरसिते, (५२८) भाविवासरबीजाङ्कुरनिकर इव च विकीर्य्यमाणे जगति प्रदीपप्रकरे निवासस्थानम् अगात्। अकरोच्च चेतसि,—"अतिदक्षिणः खलु देवो हर्षः; यदेवम् (५२९) अनेकबाल-चरितचापलोचितकौलीनकोपितोऽपि मनसा श्लिष्यत्येव मयि। यदि अहम् अश्विगतः स्यां, न मे दर्शनेन प्रसादं कुर्य्यात्। इच्छति तु मां गुणवन्तम्। (५३०) उपदिशन्ति हि विनयम् अनुरूपप्रतिपत्त्युपपादनेन वाचं विनाऽपि भर्त्तव्यानां स्वामिनः।

शायिनीनां—पल्वलशायिनीनां ("क्रेशन्तः पल्वलश्वात्पसरः" इत्यमरः)। मञ्जुनि—मनोज्ञे।

(५२५) मञ्जीरेति।—मञ्जीरस्य—नूपुरस्य, शिञ्जितं—रचितं, तद्वत् जड़ं—गम्भीरं मन्थरं वा तस्मिन्, जल्पिते—रवे।

(५२६) निद्रेति।—निद्रया—स्वप्नेन, विद्राणम्—अलसं, जड़मित्यर्थः, द्राघीयः,—अतिदीर्घञ्च तस्मिन्। द्रावयति—द्रवीकुर्व्वति, अभिभवति क्लेशयतीवेत्यर्थो वा, कामावेशादिति भावः।

(५२७) सारसरसिते—सारसानां—पक्षिविशेषाणां, रसितं—रुतं तस्मिन्।

(५२८) भावीति।—भाविनः,—भविष्यतः, वासरस्य—दिवसस्य, बीजाङ्कु-राणां निकर इव—सङ्घ इव। विकीर्य्यमाणे—समन्ततः प्रसार्य्यमाणे। अति-दक्षिणः,—अत्युदारः।

(५२९) अनेकेति।—अनेकेषां—बहूनां, बालचरितानां चापलं तस्य उचितं यत् कौलीनम्—अपवादः, ("स्यात् क्लीबीनं लोकवादे" इत्यमरः) तेन कोपितो-ऽपि। अश्विगतः,—द्वेष्यः, ("द्वेष्ये त्वश्विगतः" इत्यमरः)।

(५३०) उपदिशन्ति—शिक्षयन्ति। विनयं—शिष्टाचारम्। अनुरूपेति।—अनुरूपा—योग्या, प्रतिपत्तिः,—सम्भावना, तस्या उपपादनं—योजनं तेन। वाचं विनाऽपि—वाक्यमकथयित्वेति भावः, ["वाचम्" इत्यत्र "वाचा" इति पाठेऽपि स एवार्थः]। भर्त्तव्यानां—प्रतिपालनीयानाम्। स्वामिनः,—प्रभवः।

अपि च धिक् मां (५३१) खदोषान्धमानसम् अनादरपीड़ितम् एवम् अतिगुणवति राजनि अन्यथा च अन्यथा च चिन्तयन्तम्। सर्वथा करोमि तथा, यथा यथाऽवस्थितं जानाति माम् अयं कालेन" इत्येवम् अवधार्य्य च अपरेद्युः (५३२) निष्क्रम्य कटकात् सुहृदां बान्धवानाञ्च भवनेषु तावत् अतिष्ठत्, यावत् अस्य स्वयमेव (५३३) गृहीतस्वभावः पृथिवीपतिः प्रसादवान् अभूत्; अविशच्च पुनरपि नरपतिभवनम्। स्वल्पैरेव च अहोभिः परमप्रीतेन प्रसादजन्मनो मानस्य, प्रेम्णः विस्रम्भस्य, द्रविणस्य, नर्म्मणः, प्रभावस्य च परां कोटिम् आनीयत नरेन्द्रेणेति।

इति श्रीबाणभट्टकृते हर्षचरिते राजदर्शनं नाम द्वितीय उच्छ्वासः॥ २॥

---

(५३१) खदोषेति।—खदोषेण अन्धं मानसं यस्य तथोक्तम्। अनादरपीड़ितम्—अनादरेण—अवज्ञया, पीड़ितम्—अभिभूतम्। राजनि—नृपविषये इत्यर्थः।

(५३२) निष्क्रम्य—निर्गत्य। कटकात्—शिविरात्।

(५३३) गृहीतस्वभावः,—विदितचरितः। पृथिवीपतिः,—हर्षः इत्यर्थः। अहोभिः,—दिवसैः। प्रसादजन्मनः,—प्रसादजस्य। विस्रम्भस्य—विश्वासस्य। द्रविणस्य—धनस्य। नर्म्मणः,—परिहासस्य। प्रभावस्य—प्रतापस्य, परां कोटिं—परमोत्कर्षम्।

इत्यग्निधशास्त्राटवीषड्चरणपञ्चाननेन बाल्यवंशावतंसेन पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीमदायुर्बोधविद्याभूषण-पण्डितश्रीमन्नित्यबोधविद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां श्रीहर्षचरितव्याख्यायां द्वितीय उच्छ्वासः॥ २॥

तृतीय उच्छ्वासः ।

निजवर्षाहितस्नेहा बहुभक्तजनान्विताः ।
सुकाला इव जायन्ते प्रजापुण्येन भूभुजः ॥ १ ॥
साधूनामुपकर्त्तुं लक्ष्मीं धर्त्तुं विहायसा गन्तुम् ।
न कुतूहलि कस्य मनश्चरितञ्च महात्मनां श्रोतुम् ॥ २ ॥

इदानीं श्रीहर्षचरितवर्णनोपक्रमे तत्पूर्व्वजस्य वंशप्रवर्त्तकस्य पुष्यभूतिनाम्नो राज्ञश्चरितं वर्णयितुं तस्य प्रजारञ्जकत्वं सूचयन्नाह, निजेति ।—निजम्—आत्मीयं, वर्षं—जम्बुद्वीपं, वृष्टिञ्च, ("वर्षोऽस्त्रीभारतादौ च जम्बूद्वीपाब्दवृष्टिषु । प्रावृट्काले स्त्रियां भूम्नि" इति मेदिनी) तस्मिन् तेन च आहितः,—निहितः जनितश्च, स्नेहः,—प्रीतिः आर्द्रता च यैः तथाविधाः, बहुभिः,—अनेकैः, भक्तजनैः,—अनुजीविगणैः, अन्विताः,—युक्ताः ; अन्यत्र,—बहूनाम्—अनेकेषां, भक्तानाम्—अन्नानां, जनेन—जननेन, अन्विताः,—युक्ताः, बहुधान्यादिजननयोग्या इत्यर्थः, भूभुजः,—पृथिवीपालाः, सुकाला इव—सुसमया इव, प्रजानां—प्रकृतीनां, पुण्येन—सुकृतेन, जायन्ते—उत्पद्यन्ते ; सौराज्यस्य सुसमयस्य च प्रजापुण्य हेतुरिति निष्कर्षः । अनेन महाप्रभावस्य पुष्यभूतेः वर्णना सूचिता । अत्र सुकालैः सार्द्धं भूभुजामवैधर्म्यसाम्यप्रतिपादनादपमाऽलङ्कारः, उपात्तविशेषणैश्चानेकार्थभाषणात् श्लेषेणासौ सङ्कीर्य्यते । पथ्यावक्त्रं वृत्तम् ॥ १ ॥

उपरिष्टाद् वर्णयिष्यमाणं साधुचरितस्य भैरवाचार्य्यस्य चरितं सर्व्वेषामवश्यमेव श्रोतव्यम् इति सूचयितुमाह, साधूनामिति ।—कस्य, मनस्य इति शेषः, मनः,—चेतः, साधूनां—सज्जनानाम्, उपकर्त्तुम्—अनुकूलयितुं, [सप्तम्यर्थविवक्षया षष्ठी] लक्ष्मीं—श्रियं, धर्त्तुं—ग्रहीतुं, लब्धुमिति यावत्, ["धर्त्तुम्" इत्यत्र "द्रष्टुम्" इति पाठे,—द्रष्टुं—साक्षात्कर्त्तुं, प्राप्तुमित्यर्थः] विहायसा—आकाशमार्गेण, गन्तुं—यातुं, खेचरतां लब्धुमिति यावत्, महात्मनां—महाऽनुभावानां, चरितम्—आचरणं, कीर्त्तिमिति यावत्, श्रोतुम्—आकर्णयितुञ्च, न कुतूहलि ?—न उत्सुकम् ? भवतीति शेषः, अपि तु सर्व्वस्यैव भवति इत्यर्थः । अनेन श्लोकेन भैरवाचार्य्यस्य उपकारकरणात् पुष्यभूतेः स्वयं लक्ष्मीदर्शनं विहायसा गमनञ्च सूचितम् । अत्र एकस्यैव कर्त्तृकारकस्य मनसः

(१) अथ कदाचित् विरलितबलाहके, (२) चातकातङ्ककारिणि, (३) क्वणत्कादम्बे, (४) दर्दुरदृप्ति, मयूरमदमुषि, (५) हंसपथिकसार्थसर्वातिथौ, (६) धौतासिनिभनभसि, (७) भास्वरभास्वति, शुचिशशिनि, तरुणतारागणे, (८) गलत्सुनासीरशरासने, (९) सीदत्सौदामनीदाम्नि,

---

अनेकाभि: उपकरण धारण [-दर्शन-]-गमन-श्रवणरूपाभि: क्रियाभि: सम्बन्धात् दीपकालङ्कार: ; अपि च "कस्य न मन: कुतूहलि" इत्यत्र हेतुमतिकल्पायेन "अपि तु सर्वस्यैव" इति अर्थान्तरस्य उपस्थितैरर्थापत्तिरपि, इति तयो: सापेक्षतया सङ्कर: । आर्या वृत्तम् ॥ २ ॥

(१) अथेत्यादि ।—अथेत्यादौ "वार्षो···ब्राह्मणाधिवासमगात्" इत्युत्तरखण्डस्य: । विरलितेति ।—विरलिता:,—विरलीभूता:, स्वल्पीभूता: इत्यर्थ:, बलाहका:,—मेघा: यस्मिन् तथोक्ते ।

(२) चातकेति ।—चातकानाम् आतङ्क:,—सन्ताप:, भयं वा, तं करोति—जनयति इति तथाभूते ।

(३) क्वणदिति ।—क्वणन्त:,—रुवन्त:, कादम्बा:,—कलहंसा यस्मिन् तथोक्ते ।

(४) दर्दुरेति ।—दर्दुरान्—भेकान्, हृष्टीति तथोक्ते । मयूरेति ।—मयूराणां मदं—हर्षं, गर्वं वा, मुष्णाति—हरतीति तथाभूते ।

(५) हंसेति ।—हंसा एव पथिकसार्था:,—पान्थसमूहा:, (ते) सर्वे अतिथय: यस्य तथाभूते ; निर्मलजलदानेन तेषां तृप्तिजननादिति भाव: ।

(६) धौतेति ।—धौत:,—क्षालित:, शाणदानादिना निर्मल इति भाव:, य: असि:,—खड्ग:, तद्वत्—तत्सदृशं, नभ:,—अन्तरीक्षं यस्मिन् तथोक्ते ।

(७) भास्वरेति ।—भास्वर:,—अत्युज्ज्वल इत्यर्थ:, ["स्थेभास—" (३।२।१७ पा०) इति वरच् रूपम्] भास्वान्—सूर्य: यस्मिन् तथोक्ते । शुचिशशिनि—निर्मलचन्द्रमसि । तरुणतारागणे—नवसमुज्ज्वलनक्षत्रनिवहे ।

(८) गलदिति ।—गलत्—निर्गच्छत्, नश्यदिति यावत्, सुनासीरस्य—इन्द्रस्य, ("इन्द्रो मरुत्वान् मघवा विडौजा: पाकशासन: । वृत्रहा पुरुहूत: सुनासीर:—" इत्यमर:) शरासनं—धनु: यस्मात् तथोक्ते ।

(९) सीददिति ।—सीदत्—अवसादं गच्छत्, विनश्यदित्यर्थ:, सौदामनी—तडिदेव, दाम—माला यस्मिन् तथोक्ते ।

(१०) दामोदरनिद्रादुर्दृशि, (११) द्रुतवैदूर्य्यवर्णार्णसि, (१२) घूर्णमानमिहिकालघुमेघमोघमघवति, (१३) निमीलन्नीपे, (१४) निष्कुसुमकुटजे, (१५) निर्मुकुलकन्दले, कोमलकमले, (१६) मधुस्यन्दीन्दीवरे, कङ्कारङ्कादिनि, (१७) शेफालिकाशीतलीकृतनिशे, यूथिकामोदिनि,

(१०) दामोदरेति।—दामोदरस्य—भगवतो विष्णोः, निद्रां दुनोति—अपनयतीति तथोक्ते; वर्षाशयितस्य विष्णोः शरदि प्रबोधादिति भावः; "शेते विष्णुः सदाऽऽषाढे कार्त्तिके च विबुध्यते" इति स्मरणात्।

(११) द्रुतेति।—द्रुतं—गलितं, यत् वैदूर्य्ये—रत्नविशेषः, तस्य वर्ण इव वर्णो यस्य तादृशं, निर्म्मलमिति भावः, अर्णः,—जलं यस्मिन् तथोक्ते। ("अम्भोऽर्णोनीयपानीयनीरजीवाल्वमम्बरम्" इत्यमरः)।

(१२) घूर्णमानेति।—घूर्णमाना—इतस्ततः सञ्चरन्ती, या मिहिका—नीहारः, ("अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्। प्रालेयं मिहिका···" इत्यमरः) तद्वत् लघवः, निर्ज्जलत्वादिति भावः, ये मेघाः, तैः मोघः,—विफलः, निरर्थक इति भावः, मघवा—इन्द्रः यस्मिन् तथोक्ते; वर्षणाभावात् मेघाधिपस्य मघवतो मोघत्वं बोद्धव्यम्, इन्द्रादेशेन हि मेघा वर्षन्ति इति प्रसिद्धिः।

(१३) निमीलदिति।—निमीलन्तः,—सङ्कुचन्तः, विकासावसानादिति भावः, नीपाः,—कदम्बा यस्मिन् तथोक्ते।

(१४) निष्कुसुमेति।—निष्कुसुमाः,—पुष्पवर्जिताः, कुटजाः,—गिरिमल्लिकाख्यवृक्षभेदाः यस्मिन् तथाविधे।

(१५) निर्मुकुलेति।—निर्मुकुलाः,—कुसुमविरहिताः, कन्दलाः,—वृक्षविशेषा यस्मिन् तथोक्ते। कोमलकमले—मृदुलपद्मे, पद्मविकासिनि इत्यर्थः।

(१६) मधुस्यन्दीति।—मधुस्यन्दीनि—मकरन्दवर्षीणि, इन्दीवराणि—नीलोत्पलानि यस्मिन् तथोक्ते। कङ्कारङ्कादिनि—सौगन्धिकापराख्यश्वेतोत्पलविकासिनि ("सौगन्धिकन्तु कङ्कारम्" इत्यमरः)।

(१७) शेफालिकेति।—शेफालिकाभिः,—तदाख्यपुष्पविशेषैः, शीतलीकृता—शिशिरीकृता, निशा—रात्रिर्यस्मिन् तथोक्ते; सा तु रजन्यामेव विकसति इति। [अत्र बहुव्रीहिसमासेन गुणीभूततया निशाशब्दस्य "गौस्त्रियोरुपसर्ज्जनस्य"

(१८) मोदमानकुमुदावदातदशदिशि, (१९) सप्तच्छद-धूलिधूसरितसमीरे, स्तवकितबन्धुरबन्धूकबध्यमानाकाण्डसन्ध्ये, (२०) नीराजितवाजिनि, (२१) उद्दामदन्तिनि, (२२) दर्प-च्चीवीच्चके, (२३) च्चीयमाणपङ्कचक्रवाले, बालपुलिनपल्लवित-

(१।२।४८ पा०) इति सूत्रेण ङीप्रत्ययः। नितरां श्यति व्यापारानिति व्युत्पत्त्या, दैवादिक श्यतेः कर्त्तरि कप्रत्यये स्त्रियां टापि चास्य सिद्धिः]। यूथिकामोदिनि—यूथिकापुष्पोद्भेदेन आनन्दकारिणि इत्यर्थः ; यद्वा,—यूथिकायाः,—तदाख्यपुष्पस्य, आमोदः,—अतिनिर्हारी परिमलः, सुदूरपाती सौरभः यत्र तस्मिन्, ("आमोदः सोऽतिनिर्हारी" इत्यमरः)।

(१८) मोदमानेति।—मोदमानैः,—विकसद्भिः, कुमुदैः,—कैरवैः, अवदातैः, —सितैः, दश दिशो यस्मिन् तथोक्ते।

(१९) सप्तच्छदेति।—सप्तच्छदानां—विषमच्छदाख्यतरुविशेषाणां, धूलिभिः, —परागैः, धूसरिताः,—ईषत्पाण्डुरीकृताः, तदुत्पतीयमाना इति भावः, समीराः,—वायवः यस्मिन् तथोक्ते। स्तवकिताः,—सञ्जातस्तवकाः, अत एव बन्धुराः,—मनोज्ञाः, ("बन्धुरं मुकुटे पुंसि··· । ···त्रिषु स्याद्रम्यनम्रयोः॥" इति मेदिनी) ये बन्धूकाः,—बन्धुजीवाख्यपुष्पतरुविशेषाः, तैः बध्यमाना—क्रियमाणा इत्यर्थः, ["बन्धूकबध्य-माना—" इत्यत्र "बन्धूकाबध्यमाना" इति पाठेऽपि स एवार्थः] अकाण्डे—अनव-सरे, असमये इत्यर्थः, ("काण्डः स्तम्बे तरुस्तम्बे बाणेऽवसरनीरयोः" इति मेदिनी) सन्ध्या यस्मिन् तथाविधे।

(२०) नीराजितेति।—नीराजिताः,—युद्धयात्रायां कृतनीराजनाख्यशान्ति-कर्म्माणः, वाजिनः,—अश्वा यस्मिन् तथोक्ते।

(२१) उद्दामेति।—उद्दामाः,—मदोद्धता इत्यर्थः, दन्तिनः,—हस्तिनो यस्मिन् तथोक्ते।

(२२) दर्पेति।—दर्पेण—गर्वेण, चीवाणि—मत्तानि, चौक्काणि—उक्षां—वृषाणां समूहाः यस्मिन् तथोक्ते।

(२३) च्चीयमाणेति।—च्चीयमाणं—नश्यत्, पङ्कानां—कर्दमानां, चक्रवालं —समूहः यस्मिन् तथोक्ते। बालेति।—बालम्—अभिनवं, सद्यः सुतजलमिति भावः, यत् पुलिनं—सैकतं, तस्मिन् प्लावितानि—समन्तात् व्याप्तानि, प्रवाहरेखाङ्कि-

सिन्धुरोधसि, (२४) परिणामाश्यानश्यामाके, (२५) जनितप्रियङ्गुमञ्जरीरजसि, (२६) कठोरत्वपुषत्वचि, (२७) कुसुमक्षेरशरे, शरत्समयारम्भे राज्ञः समीपात् बाणो बन्धून् द्रष्टुं पुनरपि तं ब्राह्मणाधिवासम् अगात्।

(२८) समुपलब्धभूपालसम्मानातिशयपरितुष्टाः तस्य ज्ञातयः श्लाघमाना निर्ययुः। क्रमेण च कांश्चित् अभिवादयमानः, कैश्चित् अभिवाद्यमानः, कैश्चित् शिरसि चुम्ब्यमानः, कांश्चित् मूर्ध्नि समाजिघ्रन्, कैश्चित् आलिङ्ग्यमानः, कांश्चित् आलिङ्गन्, अन्यैः आशिषा अनुगृह्यमाणः, परान् अनुगृह्णन्, बहुबन्धुमध्यवर्त्ती परं मुमुदे। (२९) सम्भ्रान्तपरिजनोपनीतेषु आसनमासीनेषु गुरुषु भेजे। भजमानस्य अर्चादिसत्कारं नितरां

तानीति यावत्, सिन्धूनां—नदीनां, ("सिन्धुर्नदे सरिति स्त्रियाम्" इत्यमरः) रोधांसि—तटानि यस्मिन् तथोक्ते।

(२४) परिणामेति।—परिणामेन—परिपाकेण, आश्यानाः,—ईषच्छुष्काः, श्यामाकाः,—तृणधान्यविशेषाः यस्मिन् तथाभूते।

(२५) जनितेति।—जनितानि—उत्पादितानि, प्रियङ्गवः,—कङ्गुपर्य्यायान्तरतृणधान्यभेदस्य, मञ्जरीणां—वल्लरीणां, रजांसि—परागा येन तथोक्ते।

(२६) कठोरेति।—कठोराः,—कठिनाः, चपुषाणां—कर्कटीत्याख्यफलानां, "त्रपुषा" इत्याख्यफलानां वा, त्वचः,—वल्कलानि यस्मिन् तथोक्ते। ["कठोरत्वपुषत्वचि" इत्यत्र "कठोरितत्रपुसत्वचि" इति पाठे,—कठोरिताः,—कठोरीभूताः इत्यर्थः]।

(२७) कुसुमेति।—कुसुमैः,—पुष्पैः, क्षेराः,—विकस्वराः, शराः,—तदाख्यतृणभेदा यस्मिन् तथाविधे।

(२८) समिति।—सम्—सम्यक्, उपलब्धः,—प्राप्तः, भूपालात्—राज्ञः, हर्षादिति भावः, सम्मानातिशयः,—आदरातिशयः, तेन परितुष्टाः,—प्रीताः। श्लाघमानाः,—प्रशंसन्तः। अभिवादयमानः,—वन्द्यमानः, अभिवाद्यमानः,—वन्द्यमानः। परान्—अन्यान्। परम्—अत्यन्तं, मुमुदे—पिप्रिये।

(२९) सम्भ्रान्तेति।—सम्भ्रान्तेन—सत्वरेण, परिजनेन उपनीतम्—आहृतम्।

ननन्द। प्रीयमाणेन च मनसा सर्वांस्तान् पर्य्यपृच्छत्,—(३०) "कच्चित् एतावतो दिवसान् सुखिनो यूयम्? अप्रत्यूहा वा सम्यक्करणपरितोषितद्विजचक्रा क्रातवो क्रियते क्रिया? (३१) यथावदविकलमन्त्रभाञ्जि भुञ्जते हवींषि हुतभुजः? यथाकालम् अधीयते वा वटवः? प्रतिदिनम् अविच्छिन्नो वा वेदाभ्यासः? कच्चित् स एव चिरन्तनो यज्ञविद्याकर्म्माणि अभियोगः? तानि एव व्याकरणे (३२) परस्परस्पर्द्धानुबन्धाबन्ध्यदिवसदर्शितानि व्याख्यानमण्डलानि? सैव वा पुरातनी परित्यक्तान्यकर्त्तव्या प्रमाणगोष्ठी? स एव वा (३३) मन्दीकृततरशास्त्ररसो मीमांसायाम् अतिरसः?

आसीनेषु—उपविष्टेषु। मेजे—सिषेवे, अध्यतिष्ठदित्यर्थः। भजमानः,—लभमानः। अर्च्चादिसत्कारं—पूजादिरूपसंवर्द्धनामित्यर्थः।

(३०) कच्चित् इति इष्टप्रश्ने, ("कच्चित कामप्रवेदने" इत्यमरः)। अप्रत्यूहाः,—निर्विघ्नाः। सम्यगिति।—सम्यक्करणेन—शोभनानुष्ठानेन, यथाशास्त्रसम्पादनेनेत्यर्थः, परितोषितानि—प्रीणितानि, द्विजचक्राणि—विप्रवृन्दानि यस्यां यस्या वा सा। क्रतुः,—यज्ञः, तस्य इयं क्रातवी—यज्ञसम्बन्धिनी इत्यर्थः।

(३१) यथावत्—यथाविधि। अविकलेति।—अविकलान्—विशुद्धानिति यावत्, मन्त्रान् भजन्ते इति तथोक्तानि। हवींषि—हवनीयानि, घृतादीनीति यावत्। हुतभुजः,—अग्नयः। वटवः,—बालकाः, ब्रह्मचारिणो वा। अविच्छिन्नः,—विच्छेदरहितः। चिरन्तनः,—धारावाही। अभियोगः,—आग्रहः, यत्नविशेषो वा।

(३२) परस्परेति।—परस्परस्य स्पर्द्धा—जिगीषा, तस्या अनुबन्धेन—सातत्येन, अबन्ध्याः,—फलवन्तः, सदा शास्त्रालोचनेन अनलसा इति भावः, दिवसाः,—वासराः, तेषु दर्शितानि—प्रकटितानि, ["दर्शितानि" इत्यत्र "दर्शितादरादि" इति पाठे,—दर्शितः,—प्रकटितः, आदरो येषु तानि]। पुरातनी—चिरन्तनी, चिरप्रसिद्धेति भावः। परित्यक्तेति।—परित्यक्तानि—परिवर्জ্জितानि, उपेक्षितानीत्यर्थः, अन्यानि—अपराणि, कर्त्तव्यानि—अवश्यानुष्ठेयानि, यस्यां तथाभूता। प्रमाणगोष्ठी—तर्कशास्त्रसमालोचना, प्रमाणसंसद् वा।

(३३) मन्दीकृतेति।—मन्दीकृतः,—प्रायेण निवर्त्तित इति यावत्, इतरेषु—

कश्चित् ते एव वा अभिनवसुभाषितसुधावर्षिणः काव्यालापाः ?" इति।

अथ ते तम् ऊचुः,—(३४) "तात ! सन्तोषजुषां सततसन्निहितविद्याविनोदानां (३५) वैतानवह्निमात्रसहायानां कियन्मात्रं नः कृत्यं सुखितया, (३६) सकलभुवनभुजि भुजङ्गराजदेहदीर्घे रचति क्षितिं क्षितिभुजो भुजे सर्व्वथा सुखिन एव वयम्; विशेषेण तु त्वयि (३७) विमुक्तकौसीद्ये परमेश्वरपार्श्ववर्त्तिनि वेत्रासनम् अधितिष्ठति। सर्व्वे च यथाशक्ति यथाविभवं यथाकालञ्च सम्पादयन्ते विप्रजनोचिताः क्रियाकलापाः" इत्येवमादिभिः आलापैः स्कन्धावारवार्त्ताभिश्च शैशवातिक्रान्तक्रीड़ानुस्मरणैः (३८) पूर्व्वजकथाभिश्च विनोदितमनाः तैः

अन्येषु, शास्त्रेषु रसः,—रागो येन तथाविधः, मीमांसायां—जैमिनिप्रोक्तक्रतुविषयकशास्त्रे, ब्रह्मविद्यायां वा, अतिरसः,—अत्यासक्तिः।

(३४) तात इति पूज्यसूचकं वचनम्। सततेति।—सततसन्निहितः,—निरन्तरोपस्थितः, विद्यया—विद्याऽनुशीलनेनेत्यर्थः, विनोदः,—प्रीतिः येषां तथाभूतानाम्, अत एव सन्तोषजुषां—सन्तोषशालिनाम्।

(३५) वैतानेति।—वितानः,—यज्ञः, तस्य अयं वैतानः,—यज्ञीय इत्यर्थः, स चासौ वह्निश्चेति तथोक्तः, तन्मात्रः,—तदेव इत्यर्थः, न त्वन्य इति भावः, सहायो येषां तथाविधानां, नः,—अस्माकं, सुखितया—सुखभोगेन, कृत्यं—प्रयोजनं, कियन्मात्रं—स्वल्पमात्रमित्यर्थः।

(३६) सकलभुवनभुजि—सर्व्वां क्षितिं पालयतीत्यर्थः। भुजङ्गेति।—भुजङ्गराजः,—वासुकिः, तस्य देहवत् दीर्घः,—आयतः तस्मिन्, क्षितिभुजः,—राज्ञः, भुजे—बाहौ, क्षितिं—पृथ्वीं, रचति सति।

(३७) विमुक्तेति।—विमुक्तं—त्यक्तं, कौसीद्यम्—आलस्यं, निष्पन्नतेत्यर्थः, येन तथाभूते, अनलसे इत्यर्थः। परमेति।—परमेश्वरस्य—सार्व्वभौमस्य श्रीहर्षस्य, पार्श्ववर्त्तिनि—पार्श्वचरसभासदीत्यर्थः। वेत्रासनं—वेत्रनिर्म्मितमासनं, राजदत्तमिति शेषः।

(३८) पूर्व्वजकथाभिः,—पूर्व्वकालिककथाभिः। विनोदितमनाः,—आन-

सह सुचिरम् अतिष्ठत्, उत्थाय च मध्यन्दिने यथाक्रियमाणाः स्थितीः अकरोत्। भुक्तवन्तश्च तं सर्वे ज्ञातयः पर्य्यवारयन्।

(३९) अत्रान्तरे दुकूलपट्टप्रभवे शिखण्ड्यपाङ्गपाण्डुनी पौण्ड्रे वाससी वसानः, स्नानावसानसमये वन्दितया तीर्थसृदा गोरोचनया च रचिततिलकः, तैलामलकमसृणितमौलिः, (४०) अनुच्चचूडाचुम्बिना निविडेन कुसुमापीडकेन समुल्लासमानः, (४१) असकृदुपयुक्ताताम्बूलविमलाधरकान्तिः, (४२) एकशलाकाञ्जनजनितलोचनरुचिः, (४३) अचिरभुक्तः, विनीतम्

न्दितचेताः, सदुदारचरितामृतावगाहनादिति भावः। यथाक्रियमाणाः,—याहशाः सर्वैः क्रियन्ते ताहशीरित्यर्थः, स्थितीः,—आचारान्।

(३९) "अत्रान्तरे" इत्यादौ "पुस्तकवाचकः सुदृष्टिः आजगाम" इत्यन्वयः। तमेव विशिनष्टि, दुकूलेति।—दुकूलपट्टप्रभवे—चौमतन्तुजाते, ["दुकूलः" इत्यत्र "दुगूल" इति पाठेऽपि स एवार्थः] शिखण्डिनः,—मयूरस्य, अपाङ्गवत्—नेत्रप्रान्तवत्, पाण्डुनी—धवले, [शिखण्ड्यपाङ्गपाण्डुत्वेन पाण्डुत्वं गम्यते] पौण्ड्रे—पुण्ड्रदेशभवे, वाससी—वसने, वसानः,—परिदधानः। स्नानावसानसमये—स्नानानन्तरं, वन्दितया—मन्त्रपूतीकृतयेत्यर्थः, तीर्थसृदा—पुण्यक्षेत्रमृत्तिकया, गोरोचनया—स्वनामख्यातसारभवगौर्यमाङ्गल्यद्रव्यविशेषेणेत्यर्थः। रचिततिलकः,—कृततिलकः। तैलेन, आमलकेन—तच्चूर्णेन चेत्यर्थः, मसृणितः,—चिक्कणीकृतः, मौलिः,—केशचयः येन यस्य वा तथोक्तः।

(४०) अनुच्चेति।—अनुच्चा—अवनतेत्यर्थः, पृष्ठदेशे इति भावः, या चूडा—शिखा, तां चुम्बति—स्पृशतीति तथोक्तेन, निविडेन—घनेन, घनसन्निविष्टपुष्पेणेत्यर्थः, कुसुमापीडकेन—पुष्पमाल्येन, समुल्लासमानः,—श्रीभमानः।

(४१) असकृदिति।—असकृत्—पुनःपुनः, उपयुक्तेन—भुक्तेन, चर्वितेन इत्यर्थः, ताम्बूलेन—पर्णेन, विमला—विशदा, अधरस्य कान्तिर्यस्य तथोक्तः।

(४२) एकेति।—एकेन शलाकाञ्जनेन—शलाकाधृतकज्जलबिन्दुना इत्यर्थः, जनिता—उत्पादिता, लोचनयोः,—नयनयोः, कान्तिः,—शोभा येन तथोक्तः।

(४३) अचिरभुक्तः,—अचिरं—सद्यः, भुक्तं—भोजनं यस्य तथाभूतः, अल्प-

आर्य्यश्च वेषं दधानः, (४४) पुस्तकवाचकः सुदृष्टिः आजगाम, नातिदूरवर्त्तिन्याञ्च आसन्न्यां निषसाद। (४५) स्थित्वा च मुहूर्त्तमिव तत्कालापनीतसूत्रवेष्टनमपि नखकिरणैः मृदु-मृणालसूत्रैरिव आवेष्टितं पुस्तकं पुरोनिहितशरशलाकायन्त्रके निधाय, पृष्ठतः सनीड़मन्निविष्टाभ्यां मधुकरपारावताभ्यां दत्ते स्थानके (४६) प्राभातिकप्रपाठकच्छेदचिह्नीकृतम् अन्तर-पत्रम् उत्क्षिप्य, गृहीत्वा च कतिपयपत्रलघ्वीं कपाटिकां,

समयकृतभोजन इत्यर्थः। विनीतं—शान्तम्, आर्य्यं—सौम्यं, वेषं—परिच्छदं, ["वेषम्" इत्यत्र "वंशम्" इति पाठे,—वंशं—कुलमित्यर्थः]।

(४४) पुस्तकवाचकः,—ग्रन्थपाठकः, पवित्रसन्दर्भव्याख्याता वा। आसन्न्यां—वेवासने।

(४५) "स्थित्वा च" इत्यादौ "पुराणं पपाठ" इत्युत्तरेणान्वयः। तत्कालेति। —तत्काले—तस्मिन् काले, पाठकाले इत्यर्थः, अपनीतं—विरहितं, सूत्रेण वेष्टनं यस्य तथोक्तमपि, सूत्रवेष्टनरहितमपीत्यर्थः, मृदूनि—कोमलानि, मृणालसूत्राणि—विसतन्तवः तैरिव, नखकिरणैः,—नखमयूखैः, आवेष्टितं—जड़ितम्। ["आवे-ष्टितम्" इत्यत्र "वेष्टितम्" इति पाठान्तरम्]। पुर इति।—पुरः,—अग्रतः, निहिते —स्थापिते, शरशलाकायन्त्रके—शरतृणनिवहनिर्म्मिते यन्त्रविशेषे, निधाय—संस्थाप्य, सनीड़सन्निविष्टाभ्यां—समीपस्थिताभ्यां, ("समीपे निकटासन्नसन्निकृष्टसनीड़वत्…" इत्यमरः) मधुकरपारावताभ्यां—भ्रमरकपोताभ्यां, स्थानके—अवकाशे, दत्ते सति, मधुकराः पारावताश्च निजनिस्वनेन श्रोतॄन् सुखयन्ति, अस्मिंस्तु पाठके पठति तैरपि तच्छ्रवणात् तूष्णीं स्थीयते इति भावः।

(४६) प्राभातिकेति।—प्रभातस्य अयं प्राभातिकः,—प्रभातकालिक इत्यर्थः, यः प्रपाठकः,—प्रपठनमित्यर्थः, तस्य छेदः,—विरामः, तस्य चिह्नं चिह्नं कृतं चिह्नीकृतम्, इयन्मात्रं पठितं, नान्यदिति स्मरणार्थं लक्षीकृतमित्यर्थः, तत्; कश्चित् पाठकः प्रभाते कियत् पठित्वा परपाठकाले पूर्व्वपठितस्मरणार्थं केनापि पत्रेण चिह्नीकरोति, ततश्च मध्याह्नात् परमयं तस्मैव पुस्तकस्य तदनन्तरपठनाय तत् अन्तरपत्रमपनीय पठतीति भावः। अन्तरपत्रं—मध्यस्थितविच्छेदचिह्नपत्रम्; उत्क्षिप्य—अपनीय। कतिपयेति।—कतिपयैः पत्रैः लघ्वीं—स्वल्पभारां इत्यर्थः, तां, कपाटिकां—पुस्तकावरणपट्टकम्।

श्यामलयन्निव (४७) मसीमलिनानि अक्षराणि दन्तकान्तिभिः, अक्षयन्निव (४८) सितकुसुममुक्तिभिः ग्रन्थं, (४९) सुखसन्निहितसरस्वतीनूपुररवैरिव गमकैः मधुरैः आक्षिपन् मनांसि श्रोतृणां गीत्वा पवनप्रोक्तं पुराणं पपाठ ।

तस्मिंश्च तथा श्रुतिसुभगगीतिगर्भं पठति सुदृष्टौ नातिदूरवर्त्ती (५०) वन्दी सूचीवाणः तारमधुरेण गीतिध्वनिम् अनुवर्त्तमानः स्वरेण इदम् आर्य्यायुगलम् अपठत्,—

"तदपि मुनिगीतमतिपृथु तदपि जगद्व्यापि पावनं तदपि ।
हर्षचरितादभिन्नं प्रतिभाति हि मे पुराणमिदम् ॥ ३ ॥

---

(४७) मसीमलिनानि—लेखनसाधनरसविशेषो मसी, तया मलिनानि—कृष्णानि ।

(४८) सितेति ।—सितानां—शुक्लानां, कुसुमानां—पुष्पाणां, मुक्तयः;—हृष्टयः इत्यर्थः, ताभिः । ग्रन्थं—पुष्पकलिखितसन्दर्भम् ।

(४९) सुखेति ।—सुखे सन्निहिता—समासीना, या सरस्वती, तस्या नूपुररवाः,—मञ्जीरनिनादाः, तैरिव, गमयन्ति—बोधयन्ति, अर्थानिति गमकाः,—स्वरविशेषा इत्यर्थः, तैः । पवनप्रोक्तं—वायुप्रोक्तम् । ["पवन" इत्यत्र "पवमान" इति पाठेऽपि स एवार्थः] ।

(५०) वन्दी—स्तुतिपाठकः, सूचीवाणः,—तदाख्यः । गीतिध्वनिं—सुदृष्टिना गीतश्लोकनिनादम्, अनुवर्त्तमानः,—अनुसरन् । आर्य्यायुगलम्—आर्य्यया जात्या निबद्धं श्लोकद्वयम् ।

पुराणश्रवणेन तत्रोक्तवस्तुना राज्ञो हर्षस्य साम्यं स्मरन्नाह, तदपीति ।—तत् मुनिना—वैपायनेन, गीतं—कीर्त्तितमपि, तत् अतिपृथु—अतिविस्तृतमपि, पृथुः,—आदिराजो वैनपुत्रः, तमतिक्रान्तं, तदतिशायीत्यर्थश्च, तत् जगद्व्यापि—जगत्प्रसिद्धं, पावनं—पुण्यवर्द्धनमपि, इदं पुराणं, वाय्यमिति शेषः, हि—निश्चितं, हर्षचरितात् अभिन्नं—प्रभेदरहितं, मे—मम, प्रतिभाति—प्रतीतिविषयीभवतीत्यर्थः । अत्र तादृशपुराणात् हर्षचरितस्य भेदेऽपि अभेदकथनात् भेदेऽप्यभेदप्रतिपत्तिरूपा अतिशयोक्तिरलङ्कारः । आर्य्या वृत्तम् ॥ ३ ॥

वंशानुगमविवादि स्फुटकरणं भरतमार्गभजनगुरु।
श्रीकण्ठविनिर्यातं गीतमिदं हर्षराज्यमिव" ॥ ४ ॥

(५१) तत् श्रुत्वा बाणस्य चत्वारः पितामहमुखपद्मा इव (५२) वेदाभ्यासपवित्रितमूर्त्तयः, (५३) उपाया इव साम-

---

गीतेन सह हर्षराज्यस्य साम्यं वर्णयन्नाह, वंशेति।—वंशं—वेणुवाद्यम्; अत्यच, —कुलम्, अनुगच्छतीति तथोक्तं, वंशवाद्यानुगतं, वंशपरम्परागतञ्चेत्यर्थः, अविवादि —न स्तः विवादिनौ स्वरौ गान्धारनिषादाविति भावः, यस्मिन्; अत्यच,—न सन्ति विवादिनः,—विरोधिनौ यत्र तत्, सौराज्यमित्यर्थः, तत्र केषाञ्चिदपि विवादाभावादिति भावः, स्फुटकरणं—स्फुटानि—स्पष्टानि, करणानि—ताललयादीनि यस्मिन्; [कैश्चित्तु गीतपक्षे एवं व्याख्यानयन्ति—"वंशेन—वेणुना, अनुगमः ययोः तौ, विवादिनौ स्वरौ—विश्रुत्यन्तरौ गान्धारनिषादौ स्वरौ यत्र तत्। करणम्—अपदः, सताल आविद्धः स्वरसन्निवेशः, उच्चारणस्थानं वा] अत्यच,—स्फुटानि—प्रसिद्धानि, करणानि—धर्म्मविचारस्थानानि, विद्यापरीक्षास्थानानि वा, यस्मिन् तत्। भरतेति। —भरतः,—भरतो नाम सङ्गीतशास्त्रसूचकारः मुनिविशेषः, आद्विराजविशेषस्य, तस्य मार्गः,—पन्थाः, नीतिरिति यावत्, तस्य भजनेन—अनुसरणेन, गुरु—महदित्यर्थः। श्रीकण्ठेति।—श्रीयुक्तः,—वैश्वर्य्यादिदोषविरहादिति भावः, कण्ठः श्रीकण्ठः; यद्वा,—श्रीकण्ठः,—हरः, सर्व्वविद्याऽऽधारत्वादिति भावः; अत्यच,— देशभेदः, तस्मात् विनिर्यातं—विशेषेण निःसृतम्, इदं गीतं हर्षस्य—राज्ञः प्रमोदस्य च, राज्यमिव, प्रतिभाति इति शेषः। अत्र श्लिष्टविशेषणवर्णन गीतस्य हर्षराज्येन सह अवैधर्म्यसाम्यकथनात् उपमानामालङ्कारः, सा च श्लेषेणानुप्राणितेति बोध्यम्। आर्य्या वृत्तम् ॥ ४ ॥

(५१) तदित्यादि।—"तत्" इत्यादौ "मुखानि व्यलोकयन्" इत्युत्तरेणान्वयः। पितामहमुखपद्मा इव—पितामहः,—ब्रह्मा, तस्य मुखानि, चत्वारीति भावः, पद्मा इव पितामहमुखपद्माः, ते इव। ("वा पुंसि पद्मम्" इत्यभिधानात् पुंल्लिङ्गता)।

(५२) वेदेति।—वेदानाम् अभ्यासेन—पुनः पुनः अनुशीलनेन, पवित्रिता मूर्त्तिः येषां तथोक्ताः।

(५३) उपाया इव—सामादय इव, ("सामदानभेददण्डास्त्रिलुपायचतुष्टयम्"

प्रयोगललितमुखाः, गणपतिः, अधिपतिः, तारापतिः, श्यामलः इति पितृव्यपुत्रा भ्रातरः, (५४) प्रसन्नवृत्तयः, (५५) गृहीतवाक्याः, (५६) कृतगुरुपदन्यासाः, (५७) न्यायवादिनः, सुकृतसङ्ग्रहाभ्यासगुरवः, (५८) लब्धसाधुशब्दाः, लोक इव व्याकरणेऽपि, (५९) सकलपुराणराजर्षिचरिताभिज्ञाः,

इत्यमरः)। सामेति।—साम्नां—सामवेदानां, सान्त्ववादानाञ्च, ("सामक्लीवमुपायस्य भेदे वेदान्तरेऽपि च" इति मेदिनी) प्रयोगेण ललितानि—सुन्दराणि, सर्व्वरञ्जनानीति भावः, ("ललितं त्रिषु सुन्दरम्" इत्यमरः) मुखानि—वदनानि, आरम्भाश्च येषां ते, ("मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि" इति मेदिनी)।

(५४) प्रसन्नेति।—प्रसन्ना—विशुद्धा सुबोधा च, वृत्तिः,—जीविका सूत्रविवरणञ्च येषां ते, ("वृत्तिर्विवरणा जीवकौञ्छिक्यादिप्रवर्त्तने" इति मेदिनी)।

(५५) गृहीतेति।—गृहीतम्—आहृतं विदितार्थञ्च, वाक्यं—वचनं, विवरणमिति यावत्, वार्त्तिकञ्च यैः तथोक्ताः।

(५६) कृतेति।—कृतः,—विहितः, गुरूणां—पित्रादीनां, पदे—चरणे, न्यासः,—आत्मार्पणं यैः; यद्वा,—कृतः,—अभ्यस्तः, गुरुपदे—दुर्बोधशब्दे, न्यासः,—वृत्तिर्विवरणं यैः ते; अन्यत्र,—कृता गुरवः,—बहव इत्यर्थः, पदानां—सुप्तिङन्तानां, न्यासाः,—प्रयोगा यैः; यद्वा,—कृतौ गुरुणि पदे न्यासः,—स्थितिः यैः तथोक्ताः, महतीं प्रतिष्ठां गता इति यावत्; यद्वा,—कृतः गुरूणाम्—उपदेष्टॄणां सन्निधौ, पदे—स्थाने, न्यासः,—स्थितिः येषां ते, सर्व्वैरुपदेष्टृपदे ते हता इत्यर्थः।

(५७) न्यायेति।—न्यायम्—उपपत्तियुक्तं वचनं, उपपत्त्यनुपपत्तिविचारञ्च वदन्तीति तथाविधाः। सुकृतेति।—सुकृतानां—पुण्यकर्म्मणां, सङ्ग्रहस्य—सञ्चयस्य, अभ्यासेन—पुनःपुनराहृत्या, गुरवः,—महान्तः; अन्यत्र,—सुकृतस्य—सुष्ठु कृतस्य, सङ्ग्रहस्य—व्याडिकृतस्य व्याकरणसन्दर्भस्य, अभ्यासेन च गुरवः,—उपाध्यायाः।

(५८) लब्धेति।—लब्धः,—अधिकृतः, साधुशब्दः,—साधुरयमिति शब्दः, साधुवादो वा, व्युत्पन्नशब्दश्च यैः तथोक्ताः।

(५९) सकलपुराणेति।—सकलेत्यादि विशेषणत्रयेण वक्ष्यमाणद्विजराजादिवृत्तान्ते अभिज्ञता प्रदर्श्यते। सकलानां पुराणानां—पूर्व्वकालिकानां राजर्षीणां—मनवादीनां, चरितेषु अभिज्ञाः,—विशिष्टज्ञानशालिनः।

(६०) महाभारतभावितात्मानः, विदितसकलेतिहासाः, महाविद्वांसः, महाकवयः, (६१) महापुरुषवृत्तान्तकुतूहलिनः, सुभाषितश्रवणरसरसायनाः, विदग्धाः, (६२) वयसि वचसि यशसि तपसि सदसि महसि वपुषि यजुषि च प्रथमाः, पूर्वमेव कृतसङ्गराः, विवक्षवः, (६३) स्मितसुधाधवलितकपोलोदराः, परस्परस्य मुखानि व्यलोकयन्।

(६४) अथ तेषां कनीयान् कमलदलदीर्घलोचनः श्यामलो नाम बाणस्य प्रेयान् प्राणानामपि वशयिता दत्तसंज्ञः तैः

---

(६०) महेति।—महाभारते—तदाख्यव्यासप्रणीतलक्षश्लोकात्मके ग्रन्थभेदे। भावितः,—अनुशीलितः, आत्मा यैः तथोक्ताः, महाभारतसारविद इति यावत, विपुलभारतवर्षविख्यातचरित्रा वा।

(६१) महापुरुषेति।—महान् पुरुषः,—नारायणः हर्षराजस्य, तस्य वृत्तान्त —विवरणे, चरिते इत्यर्थः, कुतूहलिनः,—कौतुकशालिनः। सुभाषितेति।—सुभाषितानां—शोभनानां काव्यानाम् आलापानाच्च, श्रवणे—आकर्णने, यो रसः,—रागः, तस्य रसायनाः,—औषधविशेषाः; सुभाषितश्रावणेन लोकानां श्रुतिसुखदायका इति भावः। "सुभाषित" इत्यनेन स्वकृतकाव्यस्य प्रशंसा व्यज्यते। विदग्धाः,—विगतविषयानुरागा इत्यर्थः।

(६२) वयसि—यौवने। वचसि—वाक्यविन्यासे। सदसि—सभायाम्। महसि—तेजसि। वपुषि—शरीरे। यजुषि—यजुर्वेदे। प्रथमाः,—अग्रगण्याः। कृतसङ्गराः,—वयं सर्वे एकमत्येन हर्षचरितं वक्तुं बाणमनुरुन्ध्मः इति अन्योऽन्यं कृताङ्गीकाराः, अहम्पूर्विकया हर्षचरितकथनाय बाणमनुरोद्धुं कृतविवादा वा, ("सङ्गरो युधि चापदि। क्रियाकारे विधे चाङ्गीकारे" इति मेदिनी)।

(६३) स्मितेति।—स्मितं—मृदुहसितमेव, सुधा—अमृतं, तया धवलितं—विशदीकृतं, कपोलस्य—गण्डस्य, उदरम्—अभ्यन्तरभागः येषां तथाविधाः। व्यलोकयन्—अपश्यन्।

(६४) अथेत्यादि।—तेषां—भ्रातृणामित्यर्थः, कनीयान्—कनिष्ठः,["द्विवचन—" (५।३।५७ पा०) इति ईयसुनि "युवाल्पयोः—" (५।३।६४ पा०) इति अल्पस्य कनादेशे रूपम्]। "कनीयान्" इत्यनेनास्य प्रियवादित्वं प्रकटीकृतम्। प्रेयान्—

(६५) सप्रणयं दशनज्योत्स्नाक्षपितककुभा मुखेन्दुना बभाषे,—(६६) "तात! वाण! द्विजानां राजा गुरुदारग्रहणम् अकार्षीत्। (६७) पुरूरवा ब्राह्मणधनतृष्णया दयितेन आयुषा व्ययुज्यत। (६८) नहुषः परकलत्राभिलाषी महाभुजङ्ग आसीत्।

अतिप्रणयेन प्रियः। वशयिता—लोकवशीकरणक्षम इति यावत्। दत्तसंज्ञः,—बुद्धीति कृतसङ्केत इत्यर्थः। तैः,—भावैः।

(६५) सप्रणय—सहर्षम्। दशनेति।—दशनानां—दन्तानां, ज्योत्स्नया—प्रभया, क्षपिताः,—अभिभूताः, ककुभः,—दिशो येन तादृशेन।

(६६) तात!—वत्स!। प्रथम तावत्पूर्वेषां राजर्षीणां दोषानुद्भाव्य हर्षदेवस्य नितरां निर्दोषतां ख्यापयति द्विजानामित्यादिना। तेषां दोषाश्च क्वचित् शब्देन क्वचित् वा अर्थेन यथायोग्यमुद्भावनीयाः। द्विजानां राजा—चन्द्रः,("द्विजराजः प्रभाधरो नक्षत्रेशः क्षपाकरः" इत्यमरः)। चन्द्रादिशब्दकथनेन राजत्वप्रतीतेरभावात् "द्विजानां राजा" इत्युक्तम्। गुर्विति।—गुरोः—बृहस्पतेः,("बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः" इत्यमरः) पितुरिव आचार्यस्य च वा, दारानां—पत्न्याः, तारायाः इत्यर्थः, ग्रहणं—धर्षणमित्यर्थः। पुरा तारानाम गुरुभार्यां पूर्णचन्द्रसमं परमसुन्दरं समुदितं कामयमाना गर्भवती आसीत्, तदुपलक्षेण बहुयुगं गुरुचन्द्रयोः विरोधः आसीत्; तेन यदा बृहस्पतिः तारानयनाय इन्द्रादीन् देवान् प्रोत्साहितवान्, तदा चन्द्रः शुक्रं शरणमगात्। तत्र गुरुपक्षीया देवाः शुक्रप्रेरिताः चन्द्रपक्षीया असुराश्च अन्योऽन्यं महासमराय आजुहुवुः, दिव्यमानेन वर्षसहस्रञ्च युद्धमकार्षुः; तदृष्ट्वा भगवान् नारदः प्रथमसमागमाधीतां तारां गुरवे, तद्गर्भजं पुत्रं बुधनामानं चन्द्राय च समर्प्य उभयोर्विरोधं बभञ्जेति पौराणिकी वार्त्ता अत्रानुसन्धेया।

(६७) ब्राह्मणेति।—ब्राह्मणस्य धनानि तेषु तृष्णा—लोभः तया। दयितेन—प्रियेण, आयुषा—जीवितेन, आयुर्नाम्ना पुत्रेण च, व्ययुज्यत—वियुक्तः; अन्यत्र,—विप्रशापात् विगतजीवनः परं पुत्रजननात् चिरं पुत्रवियुक्त इत्यर्थः। पुरा राजर्षिः पुरूरवाः दिग्गजैर्युद्धुकामः पथिकेनापि प्रभूतधनशालिना विप्रेण यज्ञे निमन्त्रितः लोभात् तद्धनं जिहीर्षुस्तच्छापात् विनाशं गतः, विप्रः तस्मिन्मृते नरेन्द्रमन्तरा लोकाः निवर्त्तन्त इति आयुर्नामानं राजर्षिं तदायुषा तदपादयत इति पौराणिकी कथा अत्र अनुसन्धेया।

(६८) नहुषः।—आयुसुतः, परस्य कलत्रं—भार्यां, तदभिलाषी, महाभुजङ्गः,—अजगरः, अतिलम्पटश्च इत्यर्थः। पुरा दुर्वाससः शापात् इन्द्रे अदर्शनं गते त्रिलोकीं

(६९)ययातिः आहितब्राह्मणीपाणिग्रहणः पपात। (७०)सुद्युम्नः स्त्रीमय एव अभवत्। (७१)सोमकस्य प्रख्याता जन्तुबधनिर्घृणता।

नष्टश्रियं दृष्ट्वा देवा नहुषं शतक्रतुम् ऐन्द्रे पदे अभ्यषिञ्चन्, ततश्चासौ ऐश्वर्यमत्तः शचीं साध्वीं गुरुगर्हणेषु प्रच्छन्नवर्त्तिनीं कामयमानः, गुरुपदेशात् तया भीतया "अपूर्व्वयानेन आगच्छन मां नय" इत्यभिहितो यदा ऋषियानेन तत्सकाशं गन्तुमैच्छत्, गच्छन् तदैव सृष्टु चलितुमत्तमम् अगस्त्यं वाहकं "सर्प सर्प" इत्युक्त्वा पदा प्राहरत्। ततश्च "सर्पो भव" इति सहसा तच्छापात् अजगरतां प्राप इति पौराणिकी वार्त्ता अत्र अनुसन्धेया।

(६९) आहितेति।—आहितः,—कृतः, ब्राह्मण्याः—ब्राह्मणकन्यायाः पाणिग्रहणं—परिणयः येन तथोक्तः। पपात—नरकमगमदित्यर्थः। क्षत्रियोऽपि ब्राह्मणकन्यायाः पाणिग्रहणेन शास्त्रमर्य्यादालङ्घनेन पतितोऽभूदित्यर्थः। पुरा मृगयाविहारी राजर्षिर्ययातिः एकस्मिन् कूपे वृषपर्व्वणोऽसुरपतेर्दुहित्रा बहुशतदासीसमेतया क्रीडनकलहकुपितया पितृगुरोः शुक्रस्य कन्यां देवयानीं निपातिताम् उच्चैः रुदतीं दृष्ट्वा निजकरेण तत्करं गृह्णन् उज्जधार। ततः "पाणिग्राहेण भवता कथमहं त्याज्या" इति तया प्रार्थितः ब्राह्मणीत्वात् अस्वीकुर्व्वन् शोकाकुलेन तत्पिता शुक्रेण अनुमतः तां पत्नीत्वेन जग्राह। तदृग्रहणाच्चान्ते नरकगामी अभवदिति पौराणिकी वार्त्ता अत्र अनुसन्धातव्या।

(७०) सुष्ठु द्युम्नं—बलं धनञ्च यस्य सः सुद्युम्नः,—तदाख्यो नरपतिः, स्त्रीमयः,—स्त्रीरूपः, सततकालाऽनुरतश्च। पुरा कस्मिंश्चित् सरसि पार्व्वत्या विहरन् हरः राजर्षिणा सुद्युम्नेन मृगयाविहारिणा अवलोकितः, ततश्च लज्जितया गौर्य्या अभ्यर्थितो हरः "योऽत्रागत्य यत्किमप्युपयोज्यते स स्त्रीत्वमवाप्स्यति" इति सामान्येन तं शशाप। स च शमः सरोवरनीरं पीत्वा सद्य एव स्त्रीरूपोऽभवत् इति पुराणाख्यानम्।

(७१) सोमकस्य—राजर्षिविशेषस्य। जन्त्विति।—जन्तुः,—जन्तुर्नाम तस्य पुत्रः, जन्तवः,—प्राणिनश्च, तस्य तेषाञ्च बधेन—हत्यया, निर्घृणता—निष्ठुरता। पुरा जन्तुर्नाम सोमकस्य राज्ञ एक एव पुत्र आसीत्, राजा तु एकपुत्रोऽपुत्र एव इति मन्वानः बहुपुत्रतामिच्छन् पुरोधसा अभ्यधायि "यदि बहून् पुत्रान् कामयसे, तदा अस्य सुतस्य जन्तोर्वपया होमः क्रियतां, तद्धोमधूमान् यावत्यो महिष्यः ते समाजिघ्रेयुः, ताः सर्वा एव पुत्रान् प्रसविष्यन्ते" इति श्रुत्वा राज्ञा सोमकेन तथैव आचरितमिति वार्त्ता अत्रानुधेया।

(७२) मान्धाता मार्गणव्यसनेन सपुत्रपौत्रो रसातलम् अगात्। (७३) पुरुकुत्सः कुत्सितं कर्म्म तपस्यन्नपि मेकलकन्यकायाम् अकरोत्। (७४) कुवलयाश्वो भुजङ्गलोकपरिग्रहात् अश्वतर-कन्याम् अपि न परिजहार। (७५) पृथुः प्रथमपुरुषकः परिभूत-वान् पृथिवीम्। (७६) नृगस्य क्रकलासभावे वर्णसङ्करः समदृश्यत।

(७२) मार्गणेति।—मार्गणेषु—शरेषु, व्यसनं—समासक्तिः, युद्धासक्तिरिति यावत्, याञ्चासातत्यञ्च तेन, रसातलं—पातालम् अधलाञ्च, ("अधो भुवनपातालं बलिसद्मरसातलम्" इत्यमरः) अगात्—गतवान्, विनष्ट इति भावः। पुरा मान्धाता पृथिवीं निर्जित्य स्वर्गजयार्थं गतः शतक्रतुना अभ्यधायि,—"राजन्। पातालं तावदये जय, पश्चात् स्वर्गजयिनः तव दास्यं ग्रहीष्यामि" इति। स च तदचनात् अवि-चार्य्यैव रसातलं गतः तत्रत्येन शङ्करप्रसादलब्धचिशूलेन लवणलाञ्छा दानवेन सपुत्रपौत्रो निधनतां नीत इति किंवदन्ती।

(७३) मेकलकन्यकायां—नर्म्मदायाम्। ("रेवा तु नर्म्मदा सोमोद्भवा मेकल-कन्यका" इत्यमरः)। पुरा पुरुकुत्सः तपस्यन् मेकलकन्यकायां विहरन्तीं कामपि कामिनीं दृष्ट्वा कामार्त्तः तां धर्षयामासेति पुराणप्रसिद्धा वार्त्ता।

(७४) भुजङ्गलोकपरिग्रहात्—पातालगमनात्, भुजङ्गो विटश्च। अश्वतर-कन्याम्—अश्वतरो नाम कश्चित् नागः, तस्य कन्या तां, वडवाञ्च, न परिजहार—न तत्याज, ऊढवानित्यर्थः। पुरा कुवलयाश्वः मृगयाप्रसङ्गेन मृगमार्गी मज्जनेच्छया सरसीमवगाहमान एव रसातलं गतः, तत्र अश्वतरकन्यां गतवानिति वार्त्ता।

(७५) पृथुः,—आदिराजः वेणतनयः। प्रथमेति।—प्रथमः,—आद्यः, मुख्यश्च, पुरुष एव—पुरुषकः, कदर्य्यपुरुषश्च। पुरा पृथुः भूधराक्रान्तां पृथ्वीं विलोक्य चापकोट्या भुवः पर्य्यन्तेषु तान् प्रचिच्छेप, ततश्च स्वधरणिनिमित्तभूतभृतां परिभवात् अस्य कदर्य्य-पुरुषत्वम्, एतदयोगात् स्वस्याः अपि परिभवञ्च विचार्य्य तस्मात् रुष्टा भूः "देहि मे प्रजाभरणोपायान्" इति तेन आकृष्टकार्मुकेण अनुरुद्धा त्रिभुवनानि वभाम, ततः कमपि शरणम् अलभमाना अस्य सर्वाः अस्यसम्पदो जनयामासेति कथितम्; अतः एतस्मात् परिभूता भूः इति वार्त्ता अनुसन्धेया।

(७६) क्रकलासभावे—क्रकलासः,—सरटः, क्षुद्रप्राणिभेद इत्यर्थः, तद्भावे—तद्रूपदशायाम्, अपीति शेषः, किं पुनः राजभावे इति निन्द्यता। वर्णेति।—वर्णानां—शुक्लकृष्णादीनां, ब्राह्मणक्षत्रियवैश्यशूद्राणाञ्च, सङ्करः,—सम्मिश्रणम्। नृगो राजर्षिः

(७७) सौदासेन न रक्षिता पर्य्याकुलीकृता क्षितिः।
(७८) नलम् अवशाक्षहृदयं कलिः अभिभूतवान्।
(७९) संवरणो मित्रदुहितरि विक्लवताम् अगात्।
(८०) दशरथ इष्टरामोन्मादेन मृत्यम् अवाप।

कदाचित् कस्यापि विप्रस्य सम्बन्धिनीं गाम् अविदित्वा अन्यस्मै द्विजाय दत्तवान्, ततश्च गोस्वामी तां गां स्वीयां विदित्वा तं विप्रं ययाचे। स च तां नास्मै ददौ। ततस्तौ विवदमानौ राजद्वारं गत्वा राजानं विज्ञातीयस्त्रीषु आसक्तम् अलभमानौ क्रोधात् "कृकलासौ भव" इति तं शप्त्वा यथागतं प्रतिजग्मतुरिति पौराणिकी वार्त्ता।

(७७) न रक्षिता—न पालिता, नरान् त्रिणातीति नरक्षिता—नरक्षय-शालिनीत्यर्थः; यद्वा,—नरक्षिता—मानवहन्त्री, सौदासेन इत्यस्य विशेषणम्, अत एव पर्य्याकुलिता—समन्तात् आकुलतां प्राप्ता। सौदासो नाम राजा मृगयार्थं पथि कदाचित् स्थितं कमपि शक्राभिधं मुनिम् "अपसर्प" इति अवदत्, स तु "पन्था देयो ब्राह्मणाय" इति शास्त्रात् नीतिमनुसरन् तद्वचनम् अनाकर्णयन् मार्गात् न चलितः। ततश्च राजा क्रोधाभिभूतेन कशयाऽभिहतो स मुनिः "मनुष्यभक्षको राक्षसो भव" इति तं शशाप। ततश्च तस्मिन् राक्षसे जाते भुवः पर्य्याकुलता जातेति पौराणिकी वार्त्ता।

(७८) अवशाक्षहृदयं—न वशम्—अनायत्तमित्यर्थः, अक्षहृदयम्—अक्ष-ज्ञानम्, अक्षाणि—इन्द्रियाणि चक्षुरादीनि, हृदयं—मनश्च यस्य तथाभूतम्। पुरा नलो राजा द्यूतव्यसनासक्तः तदाकृशलस्य कलिना परिभूत इति प्रसिद्धिः।

(७९) मित्रेति।—मित्रः,—सूर्य्यः, मित्रं—सुहृच्च, तस्य दुहिता—कन्या, तपतीति यावत्, तस्यां विक्लवतां—समासक्तिमित्यर्थः। पुरा तपतीनाम्नीं रविकन्यां दृष्ट्वा संवरणः तस्यामासक्तो बभूव इति वार्त्ता।

(८०) इष्टेति।—इष्टा—प्रिया, रामा—कान्ता, कैकेयीति भावः, तस्याम् उन्मादः,—अत्यासक्तिरिति यावत्; यद्वा,—इष्टः,—प्रियः, रामः,—स्वसुतः, तदर्थम् उन्मादः,—कैकयीप्रार्थनया तन्निर्वासनेन या उन्मत्तता तेन। मृगयाव्यसनी राजा दशरथः वनमध्ये दूरात् कुम्भपूरणरवे हरिणां जलपानमाशङ्क्य शब्दवेधिना बाणेन सिन्धुनामानमन्धतापसतनयं विव्याध। ततश्च तदार्त्तनादमनुसरन् तत्र गत्वा मृता च स्वकार्य्यं मृगमनुतप्तः शरविद्धेन तेन विज्ञापितवृत्तान्तः पित्रोरन्धयोः समीपं तं प्रापयामास। तत्पितृवाक्येन शस्त्रमुद्धरति राजनि बाली मृतः। ततश्च सस्त्रीकः

(८१) कार्त्तवीर्य्यो गोब्राह्मणातिपीड़नेन निधनमयासीत्।
(८२) मरुत्त इष्टबहुसुवर्णकोऽपि देवद्विजबहुमतो न बभूव।
(८३) शन्तनुरपि व्यसनात् एकाकी वियुक्तो वाहिन्या विपिने

तापसः "त्वमप्येवमिव पुत्रशोकेन प्राप्स्यसि विनाशम्" इति दशरथं शप्त्वा अग्नौ प्राणान् अत्यजत्। एवं अग्नौ राजा दशरथः स्त्रीवाक्येन प्रियं पुत्रं रामं वनं प्रेषयन् मुनिशापात् तच्छोकेन ममारेति रामायणी वार्त्ता।

(८१) गोब्राह्मणेति।—गवे—गोनिमित्तमित्यर्थः, ब्राह्मणस्य—जमदग्नेरिति भावः, गवां ब्राह्मणानाञ्च, अतिपीड़नेन—बधेन। पुरा कार्त्तवीर्यः कदाचित् गवां कोटिरप्यतीवाधिका जमदग्नेः धेनुम् अहरत्, तच्च व्यापादितवान्; ततश्च क्रोधाभिभूतेन तत्पुत्रेण परशुरामेण परशुच्छिन्नभुजसहस्रः ससर्व्वक्षत्रियसङ्घः निहत इति वार्त्ता।

(८२) इष्टेति।—इष्टः,—अनुष्ठितः, बहूनि सुवर्णानि—सौवर्णद्रव्याणि यस्मिन् तथाभूतः यज्ञः बहुसुवर्णकः, येन तथाभूतः। इष्टः,—प्रियः, अभिमत इत्यर्थः, बहु—अतिशयेन, सु—शोभनं, वर्णः,—गौरस्वरूपः यस्य तथाभूतोऽपि इति च। यद्वा,—इष्टानि—दत्तानि, बहूनि—प्रभूतानि, सुवर्णकानि येन तथाभूतः। देवेति।—देवद्विजः,—हरिष्यतिः; देवा द्विजाः,—विप्राश्च, तेषां बहुमतः,—बह्वादृतश्च। पुरा बहुसुवर्णकाख्येन यागेन प्रियव्रतः मरुत्तः हरिष्यतिं याज्यकर्म्मणि अनुरुरोध। "मनुष्यस्य तव यज्ञं न करिष्यामि" इति तेनावमतश्च नारदवचनात् तद्भ्रातरं वाराणसीषु यज्ञगृहीतच्छद्मना स्थितं संवर्त्तकं विवरिषुः गत्वा तेनैवोक्तविच्छेदैः भगवन्तं त्वा प्रयान्तं तं विज्ञाय बहुशस्त्रिरक्षुर्व्वन्तमपि अविरज्यमानः कथमपि पौरोहित्ये न्ययोजयत्। ततश्च हरिष्यतिस्तदयज्ञे भ्रातुः सर्व्वस्वं दृष्ट्वा विद्वेषमकरोदिति वार्त्तानुसन्धेया।

(८३) व्यसनात्—अत्यासङ्गात्। ["शन्तनुरपि व्यसनात्" इत्यत्र "शन्तनुरतिव्यसनात्" इति पाठः,—अतिव्यसनात्—अत्यन्तासक्तेरित्यर्थः;] वाहिन्या—नद्या, गङ्गादेव्या इत्यर्थः, सेनया च, ("वाहिनी स्यात् तरङ्गिण्यां सेनासैन्यप्रभेदयोः" इति मेदिनी)। पुरा महाभिषो ब्रह्मसभायां गङ्गां चामरव्यग्रां कदाचित् अङ्गविशेषात् चालितवासनं दृष्ट्वा भृशं कामार्त्तस्तां प्रेमवचसा जल्पन् ब्रह्मणा "पतित्वा चवियस्यहं शन्तनुर्नाम भव" इति शप्तः, सद्यः एव गां गतः शन्तनुः नाम राजा अभूत्। गङ्गाऽपि मत्कृतेऽस्मेदृशी दशा इति सखेदं भुवम् अवतरति स्म। तदानीञ्च वसुहरणकुपितेन वसिष्ठेन "भुवं गच्छत" इति शप्तैः वसुभिः विदितैतद्वृत्तान्तैः गङ्गा

विललाप। (८४) पाण्डुः वनमध्यगतो मत्स्य इव मदनरसाविष्टः प्राणान् मुमोच। (८५) युधिष्ठिरो गुरुभय-विषण्णहृदयः समरशिरसि सत्यम् उत्सृष्टवान्। (८६) इत्थं नास्ति राजत्वम् अपकलङ्कम् ऋते देवदेवात् अमुतः सर्वद्वीप-भुजो हर्षात्। अस्य हि बह्वनि आश्चर्याणि श्रूयन्ते; तथा हि,—

अन्वधायि—"यदि तव नृपेऽस्मिन् समासक्तिः जाता, तदा वयमपि तव गर्भे उत्पत्त्या-महे; जातमात्राश्च त्वया स्वसन्निधौ मोक्तव्याः" इति। सा तु तथा अङ्गीकृत्य मृगयायां विहरन्तं शन्तनुं प्रार्थयमानम् अवोचत्—"राजन्! यदहं करोमि, तत्र त्वया न निरोद्धव्यं, न च मदीयं जन्म प्रष्टव्या" इति। राजाऽपि नितरां तदासक्तः तथेत्यङ्गीकृत्य बह्वब्दानि तया अरमत। कालक्रमेण यः कश्चित् सुत उत्पद्यते स्म, स तया जले क्षिप्तः; एवं सप्तसु सुतेषु जलेषु क्षिप्तेषु गङ्गां सेवमानः निःसन्तानोऽयं मा भूत्, इति सप्तभिर्वसुभिः कृतांशसङ्गः भौष्मो भूतः, ततः तमपि क्षिपन्तीं, राजा नितरां पुत्रशोकार्त्तः तां "नेदानीं त्वया मत्पुत्रः क्षेप्तव्यः" इति सतिरस्कारम् अभिहितवान्। साऽपि "भङ्गप्रतिज्ञो भवान्" इत्युक्त्वा अष्टमं पुत्रं राज्ञे दत्त्वा पुनः ब्रह्मलोकम् अगात्। राजा च तद्वियोगार्त्तो बहुधा विललाप इति वार्त्ता अत्र अनुसन्धेया।

(८४) वनम्—अरण्यं जलञ्च, ("वने सलिलकानने" इत्यमरः)। मदनः,—कामः, मदनं—तदाख्यफलभेदश्च, ("मदनः स्मरवसन्तद्रुभेदधत्तूरसिक्थके" इति मेदिनी); सलिलान्तरालचारी मत्स्यो यथा मदनाख्यफलरसकषायितसलिलसम्पर्कात् प्राणान् विजहाति, तथा अरण्यविहारी पाण्डुः मृगरूपसमाविष्टमानसः प्राणमत्यजदिति निष्कृष्टार्थः। एकदा पाण्डुः मृगयार्थं वनविहारी कर्दमाख्यं मृगरूपिणं कञ्चिन्मुनितनयं, मृगीरूपया आत्मपत्न्या सह रममाणमालोक्य अकृतार्थतादशायामेव तं बाणेनैकेन जघान; तेन च शरार्त्तेन प्राणान् सुमुचता "त्वमपि अहमिव स्त्रिया विहरन् अकृतार्थ एव प्राणांस्त्यक्ष्यसि" इति शप्तः असौ कदाचित् कामार्त्तः माद्र्या सह विजने विहरन् मृत्युवशं नीतः इति भारती वार्त्ता।

(८५) गुर्विति।—गुरुभयं—गुरोः,—द्रोणात्, भयं, महदयञ्च, तेन विषण्णं हृदयं यस्य तथोक्तः। कुरुपाण्डवसमरे स्वबलानि विनाशयन्तं साक्षाद् धनुर्वेदं द्रोणम् "अश्वत्थामा हतः" इति अलीकवचसा शोकाकुलं कृत्वा युधिष्ठिरः कृतशस्त्रत्यागं तं घातितवान् इति भारती वार्त्ता।

(८६) इत्थम्—एवम्प्रकारं, सत्ययुगमारभ्य कलिप्रवृत्तिं यावदित्यर्थः। अप-

(८७) अत्र बलजिता निश्चलीकृताः चलन्तः कृतपक्षाः क्षितिभृतः। (८८) अत्र प्रजापतिना शेषभोगिमण्डलस्य उपरि क्षमा कृता। अत्र (८९) पुरुषोत्तमेन सिन्धुराजं प्रमथ्य लक्ष्मीः आत्मीकृता। (९०) अत्र बलिना मौचितभूभृद्वेष्टनो मुक्तो महानागः। (९१) अत्र देवेन अभिषिक्तः कुमारः।

कलङ्कं—निर्दोषम्। देवदेवात्—राजाऽधिराजात्। आश्चर्याणि—विस्मयकराणि, चरितानीति शेषः।

(८७) अत्रेत्यादि।—अत्र "बलजिता" इत्यादयः ग्रन्थाः श्रीहर्षे अन्वर्थाः ज्ञातव्याः। अत्र—जगति। बलं—शत्रुसैन्यं, बलाख्यम् असुरञ्च, जितवान् इति बलजित् तेन, श्रीहर्षेणेति शेषः। चलन्तः,—विरोधितया व्यवहरन्त इत्यर्थः, पक्षशालितया उड्डीयमानाश्च; कृताः,—अवलम्बिताः, पक्षाः,—सहायाः; अन्यच,—कृताः,—धृताः इत्यर्थः, पक्षाः,—पतत्राणि यैः तथोक्ताः; क्षितिभृतः,—राजानः, पर्वताश्च; निश्चलीकृताः,—निर्जितत्वात् वशीकृताः, पक्षच्छेदनात् स्थावरतां नीताश्च।

(८८) प्रजापतिना—नरपतिना, ब्रह्मणा च। शेषेति।—शेषस्य—निहतावशिष्टस्य, भोगिनां—सुखभोगरतानां राज्ञामिति भावः, मण्डलस्य—चक्रस्य; अन्यत्र,—शेषस्य—अनन्तस्य, भोगिनः,—नागस्य, मण्डलस्य—फणस्य च, उपरि क्षमा—क्षान्तिः, पृथिवी च, कृता—विहिता, निहिता च।

(८९) पुरुषेति। पुरुषेषु उत्तमः,—श्रेष्ठः, तेन, नरनाथेन नारायणेन च, सिन्धुराज—सिन्धुदेशाधिपतिं चौरनिधिञ्च, प्रमथ्य—निर्जित्य विलोड्य च, लक्ष्मीः,—राजश्रीः कमला च, आत्मीकृता स्वीकृता।

(९०) बलिना—बलवता असुरराजेन च, महानागः,—महान्—रणदक्षो, स्वीयदर्पशातास्त्रः इति भावः, वासुकिश्च। मौचितेति।—मौचितम्—अपनीतं, भूभृद्भिः,—शत्रुराजभिः इत्यर्थः, वेष्टनम्—अवरोधनम; यद्वा,—मौचितं भूभृतः,—श्रीकुमाराख्यस्य राज्ञः, वेष्टनं—गुरुकृतं बंधनं यस्य तथाभूतः; श्रीकुमाराख्यः नृपतिः किल महागजेन दर्पशातेन उपजातमर्दनावरुद्धः, दृष्ट्वा च तत् हर्षेण राज्ञा स्वयं गृहीत्वा मौचितः सः, दुष्टहस्ती चायमिति कौपात् परित्यक्तः विपिने, इति वार्त्ता; अन्यत्र,—भूभृतः,—मन्दरस्य, वेष्टनञ्च यस्य तथाभूतः, मुक्तः,—परित्राणः, सागरमन्थनात् परं परित्यक्तश्च।

(९१) देवेन—राज्ञा, देवराजेन च, कुमारः,—निजतनयः गुहश्च, अभिषिक्तः,

(९२) अत्र स्वामिना एकप्रहारपातितारातिना प्रख्यापिता शक्तिः। अत्र (९३) नरसिंहेन स्वहस्तविशसितारातिना प्रकटीकृतो विक्रमः। अत्र (९४) परमेश्वरेण तुषारशैलभुवो दुर्गाया गृहीतः करः। अत्र (९५) लोकनाथेन दिशां मुखेषु परिकल्पिताः लोकपालाः सकलभुवनकोशस्यायाजन्मनां विभक्तः। (९६) इत्येवमादयः प्रथमकृतयुगस्येव दृश्यन्ते महासमारम्भाः। अतोऽस्य सुगृहीतनाम्नः पुष्यराजेः पूर्वपुरुषवंशानुक्रमेण आदितः प्रभृति चरितमिच्छामः श्रोतुम्।

—प्रतिष्ठापितः यौवराज्ये सेनापत्ये च इति शेषः। यद्यप्यत्र देवपदं देवतासामान्यार्थकं, तथाप्यत्र लक्षणया देवराजपरत्वमवगन्तव्यम्; तेनैव कुमारस्य सेनानीत्वेन हृतत्वादिति।

(९२) स्वामिना—प्रभुणा, सेनापतिना गुहेन च। एकेति।—एकेन—केवलेन, प्रथमसङ्ख्यकेन च; प्रहारेण—शराघातेन, प्रकर्षेण च; पातिताः अरातयः,—शत्रुभूता राजानः, तारकादयोऽसुराश्च येन तथाभूतेन। शक्तिः,—सामर्थ्यं, तदाख्यमस्त्रञ्च।

(९३) नरसिंहेन—नरः सिंह इव तेन, नरश्चासौ सिंहश्चेति तथोक्तेन च, नृहरिरूपेत्यर्थः। स्वहस्तेति।—स्वहस्तेन, न तु सैन्यसहायेन, चक्रादिनिजास्त्रेण च, विशसिताः,—निहताः, विदारिताश्च, अरातयः,—शत्रवः, विरोधिनो नृपाः हिरण्यकशिपुप्रभृतयश्च इति यावत्, येन तथोक्तेन।

(९४) परमेश्वरेण—परमश्चासौ ईश्वरश्चेति परमेश्वरः,—सार्वभौमः, हरश्च, तेन, तुषारशैलभुवः,—हिमालयप्रदेशभूमेः, हिमगिरिजातायाश्च, दुर्गायाः,—दुर्गमायाः, गौर्याश्च, करः,—बलिः, पाणिश्च।

(९५) लोकनाथेन—नरपतिना, विधात्रा च, दिशां मुखेषु—दिशि दिशि इति यावत्; अत्रत्र,—दिशां मुखेषु—निःसरणमार्गेषु, सीमान्तदेशेषु इति यावत्। परिकल्पिताः,—नियोजिताः, लोकपालाः,—प्रजापालाः, इन्द्रादयश्च। सकलभुवनकोशः,—सर्वजगतां धनं, सकलभुवनमेव कोशः,—धनभाण्डारश्च; अयाजन्मनां—ब्राह्मणानां, आदि नृपाणां श्रमणानाञ्च विभक्तः,—विभज्य दत्तः।

(९६) इत्येवमादयः इति।—अत्र आदिपदेन न त्वेतावन्त एव, अन्येऽपि एवंविधा बहवः इति व्यज्यते। प्रथमकृतयुगस्येव—प्रथमं सृष्टस्य सत्ययुगस्येव, महारम्भाः,—महान्ति कार्याणि, अचलपक्षच्छेदनादयः व्यापारा इति यावत्।

(९७) सुमहान् कालो नः शुश्रूषमाणानाम्। (९८) अयस्कान्तमणय इव लोहानि नीरसनिष्ठुराणि चुल्लकानामपि आकर्षन्ति मनांसि महतां गुणाः, किमुत स्वभावसरसमृदूनि इतरेषाम्। कस्य न (९९) द्वितीयमहाभारते भवेत् अस्य चरिते कुतूहलम्? आचष्टां भवान्। (१००) भवतु भार्गवोऽयं वंशः शुचिना अनेन राजर्षिचरितश्रवणेन सुतरां शुचितरः" इत्येवम् अभिधाय तूष्णीम् अभूत्।

बाणस्तु विहस्य अब्रवीत्,—(१०१)"आर्य्य! न युक्त्यनुरूपम् अभिहितम्। (१०२) अघटमानमनोरथमिव भवतां कुतूहलम् अवकल्पयामि।(१०३)शक्याशक्यपरिसङ्ख्यानशून्याः प्रायेण स्वार्थहृषः। परगुणानुरागिणी (१०४) प्रियजनकथाश्रवणरसरभसमोहिता च मन्ये महतामपि मतिः अपहरति प्रविवेकम्।

(९७) सुमहान् कालः, गत इति शेषः। शुश्रूषमाणानां—श्रोतुमिच्छताम्।

(९८) अयस्कान्तमणय इवेति।—मणिशब्देन उपमेयानां गुणानामपि रत्नत्वं प्रदर्शितम्। नीरसनिष्ठुराणि—नीरसानि—आर्द्रभावरहितानि, निष्ठुराणि—कठिनानि। चुल्लकानां—खलानां, क्षुद्राणां वा, ("चुल्लकस्त्रिषु नीचेऽल्पे" इति मेदिनी) महतां गुणाः मनांसि आकर्षन्ति इति अन्वयः। इतरेषां—साधूनां, महतां वा।

(९९) द्वितीयमहाभारते—द्वितीयमहाभारतसदृशे, अस्य—हर्षस्य, चरिते—वृत्ते, कुतूहलम्—औत्सुक्यम्। आचष्टां—कथयतु।

(१००) भार्गवः,—भृगुगोत्रोद्भूतः। सुतराम्—अतिशयेन, शुचितरः,—पूततरः।

(१०१) आर्य्य!—पूज्य! युक्त्यनुरूपं—युक्तियुक्तम्।

(१०२) अघटमानेति।—अघटमानः,—असम्पन्नतां गच्छन्, मनोरथः यस्य तथाभूतम्, अलीकमिति भावः। अवकल्पयामि—अवधारयामि।

(१०३) शक्येति।—शक्यं—साध्यम्, अशक्यम्—असाध्यं, तयोः परिसंख्यानं—परिगणनं तेन शून्याः,—रहिताः। स्वार्थहृषः,—स्वकार्यहृष्टाः; स्वार्थसाधनेच्छा शक्याशक्यविवेकं न गणयतीत्यर्थः।

(१०४) प्रियेति!—प्रियजनस्य कथाश्रवणे यो रसः,—रागः, तस्य रभसेन

पश्यतु आर्य्यः, क्व (१०५) परमाणुपरिमाणं वटुहृदयम्? क्व (१०६) समस्तब्रह्मस्तम्ब्यापि देवस्य चरितम्? (१०७) क्व परिमितवर्णवृत्तयः कतिपये शब्दाः? क्व (१०८) संख्यातिगाः तद्गुणाः? सर्व्वज्ञस्यापि (१०९) अयम् अविषयः, वाचस्पतेरपि अगोचरः, सरस्वत्या अप्यतिभारः, किमुत अस्मादिधस्य? कः खलु पुरुषायुषशतेनापि शक्नुयात् अविकलम् अस्य चरितं वर्णयितुम्? एकदेशे तु यदि कुतूहलं वः, सज्जा वयम्। इयम् (११०) अधिगतकतिपयाक्षरलवलघोयसी जिह्वा क्व

—अतिशयेन, ("रभसो वेगहर्षयोः" इत्यमरः) मोहिता,—अत्वा इत्यर्थः। प्रविवेकं—प्रकृष्टं विवेकम्।

(१०५) परमाणुपरिमाणम्—अतिक्षुद्रमिति भावः। वटुहृदयं—द्विजशिशुमानसम्।

(१०६) समस्तेति।—समस्तः,—सकलः, ब्रह्मस्तम्बः,—ब्रह्माख्यं तद्यापि। दैवस्य—हर्षस्य।

(१०७) परिमितेति।—परिमितानां—परिगणितानां, वर्णानाम्—अक्षराणाम्, अकारादिहकारान्तानामिति यावत्, वृत्तयः,—रचनानि यस्र तथाभूताः। कतिपये—अल्पा इति भावः।

(१०८) संख्यातिगाः,—संख्याः,—एकादिपरार्द्धपर्य्यन्ताः, ता अतिगच्छन्ति—अतिशेरते इति तथोक्ताः। तद्गुणाः,—तस्य—दैवस्य हर्षस्य, गुणाः।

(१०९) अयं—हर्षचरितरूपः, अविषयः—अगोचरः। वाचस्पतेः,—बृहस्पतेः। पुरुषायुषशतेन—पुरुषस्य आयुः,—जीवितकालः, ["अचतुर—" (५।४।७७ पा०) इत्यादि सूत्रेण अच्प्रत्ययान्तो निपातः] शतं वर्षाणीत्यर्थः, "शतायुर्वै पुरुषः" इति श्रुतेः, तेषां शतं, तेन। अविकलं—सम्यक्। पुरुषेत्यादिना योग्येऽपि वर्णयितरि सति वर्णनीयस्य बाहुल्यात् जीवनकालस्य चाल्पीयस्त्वात् कार्त्स्न्येन वर्णनं न सम्भवति इति व्यञ्जितम्; अत एवाह, एकदेशे इति।—एकदेशं—कियत्यंशे इत्यर्थः। सज्जाः,—प्रस्तुताः, वर्णयितुमिति भावः।

(११०) अधिगतेति।—अधिगताः,—ज्ञाताः, कतिपयानाम् अक्षराणां लवाः,—लेशाः यया तथाभूता, अत एव लघोयसी—यत्किञ्चिद् वर्णयितुं क्षमा इति भावः।

उपयोगं गमिष्यति? (१११) भवन्तः श्रोतारः, वर्ण्यते हर्षचरितं, किम् अन्यत्। अद्य तु परिणतप्रायो दिवसः। (११२) पश्चात् लम्बमानकपिलकिरणजटाभारभास्वरो भगवान् भार्गवो राम इव समन्तपञ्चकरुधिरमहाह्रदे निमज्जति सन्ध्यारागपटले पूषा। स्वां निवेदयितास्मि" इति। सर्वे च ते "तथा" इति प्रत्यपद्यन्त। नातिचिरात् उत्थाय सन्ध्याम् उपासितुं शोणम् अयासीत्।

(११३) अथ मधुमदपल्लवितमालवोकपोलकोमलातपे

उपयोगम्—उपकारिता, गमिष्यति—प्राप्स्यति? न कुत्रापि इत्यर्थः; यद्यपि सन्तः गुणावलौ असङ्ख्याता माद्दशैः अत्यल्पवर्णावलीभिः वर्णयितुमशक्या च, तथाऽपि भवता गुणग्राहिणां प्रायेः कथञ्चित् वक्तुमुत्सहते इति भावः।

(१११) भवन्तः,—भवद्विधाः विबुधाः इत्यर्थः, न तु ये केचित् प्राकृता इति भावः। हर्षचरितं—हर्षस्य—महाप्रभावस्येति भावः, चरितं—वृत्तं, महनीयमलौकिकञ्चेत्याशयः, न तु तुच्छं यत्किञ्चिदिति भावः; भवद्विधेषु श्रोतृषु अलौकिकं हर्षचरितं वर्णयितुं तादृशी लघीयसी जिह्वा नैवोपयोगिनीति निष्कर्षः। किमन्यत्—इतोऽन्यत् किं कथयामीत्यर्थः। परिणतप्रायः—प्रायेण परिणतः, अवसित इत्यर्थः।

(११२) पश्चादिति।—पश्चात्—पश्चिमायां दिशि, पृष्ठदेशे च। लम्बमानेति। —लम्बमानः,—पतन्, कपिलः,—पिङ्गलः, किरणः,—मरीचिरेव, जटाभार इव—जटासमूह इव, तेन भास्वरः,—दीप्यमानः। राम इव—परशुराम इव। समन्तेति। —समन्तपञ्चकं—कुरुक्षेत्रं, तत्र यत् रुधिरं—निहतनिःखलक्षत्राणां कण्ठादिनिःसृतं रक्तमिति यावत्, तेन यः महान् ह्रदः, तस्मिन्; रुधिरमेव महान् ह्रदः तस्मिन् इति वा। सन्ध्येति।—सन्ध्याया रागाः,—लोहित्यानि, तेषां पटलं—समूहः तस्मिन्। पूषा—सूर्यः, ("विकर्तनार्कमार्तण्डमिहिरारुणपूषणः" इत्यमरः)। पुरा भार्गवो रामः पितृनिधनेन कुपितः एकविंशतिकृत्वः क्षत्रान् निहत्य, तदीयेन रुधिरेण कुरुक्षेत्रस्य समन्तात् पञ्च ह्रदान् कल्पयित्वा तेषु पितॄन् तर्पयामास, ततश्च तत्स्थानम् अद्यापि समन्तपञ्चकमिति प्रसिद्धम्। प्रत्यपद्यन्त—स्वीकृतवन्तः।

(११३) अथेत्यादि।—"अथ" इत्यादौ "तयैव गोष्ठ्या तस्थौ" इत्युत्तरेणान्वयः। मधुमदेति।—मधुमदेन—मद्यपानजनितेन उल्लासेन, पल्लविलः,—प्रफुल्ल इत्यर्थः, यो मालवस्यः,—मालवदेशीयमहिलायाः, कपोलः,—गण्डः, तद्वत् कोमलः, आतपः,—

मुकुलितेऽब्जे कमलिनीमलनादिव लोहिततमे तमोलिहि रवौ लम्बमाने, रविरथतुरगमार्गानुसारेण यममहिष इव धावति (११४) नभसि तमसि, क्रमेण च (११५) गृहतापसकुटीरकपटलावलम्बिषु रक्तातपच्छेदैः सह संहृतेषु वल्कलेषु, (११६) कलिकलुषमुषि पुष्णति गगनम् अग्निहोत्रधामधूमे, (११७) सनियमे यजमानजने मौनव्रतिनि, (११८) विहारवेलाविलोले पर्य्यटति पत्नीजने, (११९) विकीर्य्यमाणहरितश्यामाकशालिपूलिकासु दुग्धासु होमकपिलासु हूयमाने वैतानतनून-

प्रभा यस्य तथाभूते। मुकुलिते—मुकुलभावं गते, निमीलितप्राये इत्यर्थः। कमलिनीमलनादिव—पद्मिनीमालिन्यदर्शनादिव इत्यर्थः। ["कमलिनीमलनादिव" इत्यत्र "कमलिनीमीलनादिव" इति पाठः,—पद्मिनीसङ्कोचादिवेत्यर्थः]। लोहिततमे—अतिलोहिते, आगामिनः तिमिरस्य रिपोः; कमलिनीं स्वां प्रियां प्रति भाविवर्षणजनितक्रोधादिति भावः, तमोलिहि—तिमिरध्वंसिनि, रवौ—सूर्य्ये, लम्बमाने—पश्चिमाशां पततीत्यर्थः।

(११४) नभसि—आकाशे। तमसि—अन्धकारे।

(११५) गृहेति।—गृहतापसानां—गृहस्थतपस्विनां, कुटीरकाणां—क्षुद्रगृहभेदानां, पटलानि—कुटीषि, गृहाच्छादनानि तृणानीत्यर्थः। ("अथ पटलं कुटिः" इत्यमरः) अवलम्बन्ते इति तथोक्तेषु; रक्तातपच्छेदैः,—रक्तवर्णसूर्य्यमयूखखण्डैः, सह संहृतेषु—आकृष्य नीतेषु, वल्कलेषु—तरुत्वक्षु, तापसानां वस्त्रभूतेषु इति यावत्।

(११६) कलिकलुषमुषि—कलिकालजनितपापहारिणि, पुष्णति व्याप्नुवति। अग्निहोत्रधामधूमे—होमगृहधूमे।

(११७) सनियमे—सुसंयते, यजमानजने—याज्ञिकवर्गे, मौनव्रतिनि—मौनव्रतधारिणि।

(११८) विहारेति।—विहारः,—गोष्ठाद् गवानयनेन तद्दोहनम्, अग्निहोत्रार्थं वह्निसमुच्चयणमिति वा, तस्य वेला—समयः, तेन विलोले—चञ्चले, व्यग्रे इति भावः। पर्य्यटति—परितो भ्रमति।

(११९) विकीर्य्यमाणेति।—विकीर्य्यमाणाः,—प्रक्षिप्यमाणाः, प्रदीयमाना इत्यर्थः, हरिताः,—श्यामलाः, श्यामाकशालीनां—श्यामाकाख्यव्रीहिभेदानां, पूलिकाः,—गुच्छाः याभ्यः तथाभूतासु, दोहनकाले तादृशग्रासदानाद् अनायासेन दोहनं दुग्ध-

पाति, (१२०) पूतविष्टरोपविष्टे कृष्णाजिनजटिले जटिनि जपति वटुजने, (१२१) ब्रह्मासनाध्यासिनि ध्यायति योगिगणे, (१२२) तालध्वनिधावमानानन्तान्तेवासिनि अलसबृहस्त्रोत्रियानुमतेन गलदुग्रन्थदण्डकोद्गारिणि सन्ध्यां समवधारयति वठरविटवटुसमाजे, (१२३) समुन्मज्जति च ज्योतिषि तारकाख्ये खे, प्राप्ते प्रदोषारम्भे, भवनम् आगत्य उपविष्टः स्निग्धैः बन्धुभिश्च सार्द्धं तयैव गोष्ठ्या तस्थौ। (१२४) नीतप्रथमयामश्च गणपतेः

द्वद्धिश्च भवतीति भावः। क्षीमकपिलासु—क्षीमधेनुषु। दुग्धासु—क्षतदोहासु। दूयमाने—दुहिषा सन्तप्यमाणे। वैतानतनूनपाति—यज्ञीयाग्नौ। ("अग्निर्वैश्वानरो···। ···जातवेदाश्चनूनपात्" इत्यमरः)।

(१२०) पूतेति।—पूते—पवित्रे, विष्टरे—आसने, उपविष्टः तस्मिन्। कृष्णाजिनजटिले—कृष्णमृगचर्मावृते, जटिनि—जटाधारिणि, जपति, इष्टमन्त्रमिति शेषः, वटुजने—द्विजजने।

(१२१) ब्रह्मेति।—ब्रह्मासनम्—आसनविशेषः, तत् अध्यास्ते इति तथोक्ते। ध्यायति—चिन्तयति, स्वेष्टदेवमिति शेषः।

(१२२) तालेति।—तालध्वनिः,—सङ्केतार्थमङ्गुलिशब्दविशेषः, तेन धावमानाः,—सत्वरमापतन्तः, अनन्ताः,—अशेषाः, बहव इत्यर्थः, अन्तेवासिनः,—छात्रा यस्य तथाभूते। अलसेति।—अलसः,—मन्थरः, बृहः,—स्थविरः, श्रोत्रियः,—छान्दसः, वेदोपाध्याय इत्यर्थः, तस्य अनुमतं—"छन्दभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायात् अनुमतिरित्यर्थः, तेन, अनुज्ञया इत्यर्थः। गलदिति।—गलतः,—स्खलतः, विस्मरत इत्यर्थः, ग्रन्थदण्डकान्—ऋग्विशेषान्, उद्गिरति—उच्चारयतीति तथोक्ते। सन्ध्यां—सन्ध्याकालिकोपासनाविशेषं, समवधारयति—समालोचयति। वठरेति।—वठराः,—अबोधाः, मूर्खा इत्यर्थः, विटाः,—दुर्वृत्ताः, ये वटवः,—द्विजशिशवः, तेषां समाजः,—सङ्घः तस्मिन्; बृहद्गृहश्रोत्रियैः मूर्खाः दुर्वृत्ताश्च शिशवः सन्ध्योपासनायै नियुज्यन्ते इति समुदितार्थः।

(१२३) समुन्मज्जति—संमुन्मीलति, तारकाख्ये—नक्षत्रनामनि, ज्योतिषि—तेजःपदार्थे। खे—आकाशे। प्राप्ते—उपस्थिते, प्रदोषारम्भे—रजनीमुखे इत्यर्थः। गोष्ठ्या—समाजेन, तस्थौ—बन्धुभिः बन्धुभिः परिवृतः स्थित इत्यर्थः।

(१२४) नीतप्रथमयामः,—अतिक्रान्ते प्रथमप्रहरे इत्यर्थः, गणपतेः,—प्राग्वृत्त-

भवने परिकल्पितं शयनीयम् असेवत; इतरेषान्तु सर्वेषां निमीलितदृशामपि अनुपजातनिद्राणां कमलवनानामिव सूर्योदयं प्रतिपालयतां कुतूहलेन कथमपि सा क्षपा क्षयम् अगच्छत्।

अथ यामिन्याः (१२५) तुर्ये यामे प्रतिबुद्धः स एव वन्दी श्लोकद्वयम् अगायत्,—

"पश्चादङ्घ्रिं प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चैः
आसज्याभुग्नकण्ठो मुखमुरसि सटा धूलिधूम्रा विधूय।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥५॥

पितृव्यपुत्रस्य। परिकल्पितं—रचितम्। कुतूहलेन—प्रभाते बाणवर्ण्यमानहर्षचरितश्रवणौत्सुक्येन इत्यर्थः। क्षपा—रात्रिः।

(१२५) तुर्ये—चतुर्थे, यामे—प्रहरे। वन्दी—स्तुतिपाठकः।

अश्वानां चेष्टावर्णनमुखेन उषागमनं द्वाभ्यां सूचयन्नाह, पश्चादिति।—शयनादुत्थितः,—प्रबुद्धः इत्यर्थः, तुरङ्गः,—अश्वः, पश्चादङ्घ्रिं—पश्चादागस्थितपदद्वयमित्यर्थः, त्रिकस्य—पृष्ठवंशाधरस्य, ("पृष्ठवंशाधरे त्रिकम्" इत्यमरः) नत्या विततं—विस्तृतं यथा तथा, प्रसार्य—विस्तार्य, अङ्गम्—अवयवम्, उच्चैः द्राघयित्वा—दीर्घीकृत्य, आभुग्नकण्ठः,—नमितगलः सन्, मुखम् उरसि—वक्षसि, आसज्य—लग्नं कृत्वा, सङ्गम्य इत्यर्थः, धूलिभिः धूम्राः,—धूसराः इत्यर्थः, सटाः,—जटाः, विधूय—कम्पयित्वा, घासानां—शष्पाणां, ग्रासे—कवलने, अभिलाषः तस्मात्, अनवरतं चलत्—स्फुरत्, प्रोथं—नासिका यस्य तादृशं, ("प्रोथोऽस्त्री हयघोणायाम्" इति मेदिनी। "घोणा नासा च नासिका" इत्यमरः) तुण्डं—वदनं यस्य तथोक्तः, ("तुण्डमाननं लपनं मुखम्" इत्यमरः) मन्दं शब्दायमानः,—अव्यक्तं कुर्वन्, खुरेण क्ष्मां—भुवं, विलिखति—कुट्टयति। अत्र प्रातः शयनादधिरोहित्यस्य अश्वस्य कविप्रौढोक्तिसिद्धक्रियाया यथावद्वर्णनात् स्वभावोक्तिरलङ्कारः। स्रग्धरा वृत्तं, — "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धराकीर्त्तितेयम्" इति लक्षणम् ॥ ५ ॥

कुर्वन्नाभुग्नपृष्ठो मुखनिकटकटिः कन्धरामातिरश्वीं
लोलेनाहन्यमानं तुहिनकणमुचा चञ्चता केसरेण।
निद्राकण्डूकषायं कषति निविडितश्रोत्रशुक्तिस्तुरङ्गः
त्वङ्गत्पक्ष्माग्रलग्नप्रतनुबुसकणं कीर्णमक्ष्णः खुरेण ॥ ६ ॥

बाणस्तु तत् श्रुत्वा समुत्सृज्य निद्राम् उत्थाय प्रक्षाल्य वदनम् उपास्य भगवतीं सन्ध्याम् उदिते भगवति सवितरि गृहीतताम्बूलः तत्रैव अतिष्ठत्। अत्रान्तरे सर्वे अस्य ज्ञातयः समाजग्मुः, परिवार्य्य च आसाञ्चक्रुः। असौ अपि (१२६) पूर्वोद्गतेन विदिताभिप्रायः तेषां पुरो हर्षचरितं कथयितुम् आरेभे।

श्रूयताम्,—

(१२७) अस्ति पुण्यकृताम् अधिवासो वासवावास इव

कुर्वन्निति।—तुरङ्गः,—अश्वः, निविडिते—कुक्षिते, श्रोत्रे—कर्णौ, शुक्ती इव—मुक्तास्फोटाविव येन यस्य वा तथोक्तः, तथा आभुग्नम्—आकुञ्चितं, पृष्ठं येन तथोक्तः, मुखस्य निकटे—सन्निधौ, कटिः,—मध्यभागः यस्य तथाभूतः, कन्धरां—ग्रीवाम्, आतिरश्वीम्—आभङ्गुरां, कुर्वन् लोलेन—चपलेन, तुहिनकणमुचा—शिशिरबिन्दुवर्षिणा, चञ्चता—स्फुरता, केसरेण—लटाजालेन, आहन्यमानं—सन्ताड्यमानं, निद्राकण्डूः,—निद्राऽऽवेशावशेषः, तया कषायः,—आविलः, तम्, अक्ष्णः,—नेत्रस्य, कीर्णं—प्राप्तं, त्वङ्गत्सु—प्रसरत्सु, पक्ष्माग्रेषु—लोमाग्रेषु, लग्नाः,—संसक्ताः, प्रतनवः,—स्वल्पाः, बुसकणाः,—कङ्कुरांशाः, सारहीनत्वुच्यधान्यानि इत्यर्थः, यत्र तद् यथा तथा, खुरेण कषति—घर्षयति। अत्रालङ्कारस्तु पूर्ववत्। कन्धरा वृत्तम् ॥ ६ ॥

(१२६) पूर्वोद्गतेन—प्राक्सूचितारम्भेण, पूर्वकृतप्रस्तावेन, इत्यर्थः, ("प्रक्रमः स्यादुपक्रमः। स्यादभ्यादानमुद्घात आरम्भ…" इत्यमरः) विदिताभिप्रायः,—विज्ञाताशयः।

(१२७) "अस्ति" इत्यादौ "श्रीकण्ठो नाम जनपदः" इत्युत्तरेण अन्वयः। तमेव विशिनष्टि, पुण्येत्यादिभिः।—पुण्यकृतां—पुण्यशालिनां, देवानाञ्च, अधिवासः,

वसुधाम् अवतीर्णः, सततम् (१२८) असङ्कीर्णवर्णव्यवहार-स्थितिः, (१२९) कृतयुगव्यवस्थः, (१३०) स्थलकमल-बहुलतया पोतोन्मूल्यमानमृणालैः उद्गीतमेदिनीसारगुणैरिव कृतमधुकरकोलाहलैः हलैः उल्लिख्यमानक्षेत्रः, (१३१) क्षीरोद-पयःपायिपयोदसिक्ताभिरिव पुष्कलेक्षुवाटसन्ततिभिः निरन्तरः, प्रतिदिशम (१३२) अपूर्वपर्वतकैरिव खलधानधामभिः

—आवासक्षेत्रम्। वासवावास इव—इन्द्रालय इव, स्वर्ग इव इत्यर्थः, वसुधां—पृथ्वीम्।

(१२८) असङ्कीर्णेति।—न सङ्कीर्णा—सङ्करदोषैः अनाघ्रातेत्यर्थः, वर्णानां—ब्राह्मणादीनां, व्यवहाराः,—आचाराः, स्थितयः,—मर्य्यादाश्च यत्र तथोक्तः।

(१२९) कृतेति।—कृतयुगस्येव—सत्ययुगस्येव, व्यवस्था—नियमः यत्र तथाभूतः।

(१३०) स्थलकमलबहुलतया—स्थलपद्मप्राचुर्य्येण। पोतेति।—पोतेन—मुखाग्रेण, हलानामिति भावः, ["हलसूकरयोः पुवः" (३।२।१८३ पा०) इति पूधातोः ड्वनि रूपम्। "पोतं वज्रे मुखाग्रे च शूकरस्य हलस्य च" इति मेदिनी] उन्मूल्यमानानि—उद्धियमाणानि, मृणालानि यैः तथोक्तैः, अत एव उद्गीताः—उच्चैः कीर्त्तिताः, मेदिन्याः सारः,—उत्कृष्टाः, गुणा यैः तथाभूतैः। कृतेति।—कृता मधुकराणां कोलाहलाः यैः तादृशैः। हलैः,—लाङ्गलैः, उल्लिख्यमानानि—उत्खन्यमानानि, क्षेत्राणि यस्य तथोक्तः।

(१३१) क्षीरोदेति।—क्षीरोदस्य—क्षीरसागरस्य, पयांसि पिबन्ति इति तथोक्ताः, ये पयोदाः,—मेघाः, तैः सिक्ताः ताभिरिव, माधुर्य्यातिशयात् क्षीरोद-पयःपायीत्युत्प्रेक्षा; पुष्कलेक्षुवाटसन्ततिभिः,—पुष्कलेक्षूणाम्—इक्षुविशेषाणां, वाट-सन्ततयः,—इतिनिचयाः, वेष्टनसमूहा इत्यर्थः, ("वाटो मार्गे इतिस्थाने स्यात् कुटीवासुनीः स्त्रियाम्" इति मेदिनी) ताभिः, निरन्तरः,—अविच्छिन्नः, नीरन्ध्र इत्यर्थः।

(१३२) अपूर्वपर्वतकैरिव—अभिनवक्षुद्रगिरिभिरिव, अपूर्वत्वन्तु सद्य एव तथा कल्पनादिति बोध्यम्। खलधानधामभिः,—खलेषु—श्रमसमाहरणभूमिषु, धानाय—स्थापनाय, रक्षणाय इत्यर्थः, धाम—स्थानं येषां तैः; यद्वा,—खलधानं

विभज्यमानैः शस्यकूटैः सङ्कटसीमान्तः, समन्तात्(१३३)उद्घात-घटीसिच्यमानैः जीरकजूटैः जटिलितभूमिः, (१३४) उर्व्वरा-वरीयोभिः शालीयैः अलङ्कृतः, (१३५) पाकविशरारुराज-माषनिकरकिर्मीरितैश्च (१३६) स्फुटितमुद्गफलकोशी-कपिशितैः गोधूमधामभिः स्थलीपृष्ठैः अधिष्ठितः,(१३७)महिष-पृष्ठप्रतिष्ठितगायद्गोपालपालितैश्च (१३८) कीटपटललम्पट-चटकानुसृतैः (१३९) अवटुघटितघण्टाघटीरटितरमणीयैः

—शस्यमर्दनस्थानमेव धाम येषां तैः, खलरक्षकैरित्यर्थः। विभज्यमानैः,—विभागेन स्थाप्यमानैः, पृथक् पृथक् रक्ष्यमाणैः इत्यर्थः, शस्यकूटैः,—धान्यादिशस्यराशिभिः, सङ्कटसीमान्तः,—आकीर्णसीमाभागः।

(१३३) उद्घातेति।—उद्घातघटीभिः,—यन्त्रकलसैः इत्यर्थः, सिच्यमानानि—आर्द्रीक्रियमाणानि तैः। जीरकजूटैः,—जीरकसमूहैः, जटिलिता—समाकीर्णा, भूमिः यव तथोक्तः।

(१३४) उर्व्वरेति।—उर्व्वरा—सर्वशस्याढ्या भूः, तया वरीयांसि—श्रेष्ठानि, अत्युत्कृष्टानि इत्यर्थः, तैः, शालीयैः,—धान्यविशेषसङ्घैः शालिचयैः वा, अलङ्कृतः,—परिशोभितः।

(१३५) पाकेति।—पाकेन विशरारुणां—स्फुरतां, विशरारुत्वं युगपत्पाक-सम्भवात्, राजमाषाणां—तदाख्यकलायविशेषाणां, निकरैः,—सङ्घैः, किर्म्मीरितानि—शबलानि तैः।

(१३६) स्फुटितेति।—स्फुटितानां—पक्वानां, मुद्गफलानां—तदाख्यकलाय-भेदानां, कोशीभिः,—शिम्बिकाभिः, कपिशितानि—पिङ्गलानि तैः। गोधूम-धामभिः,—गोधूमशालिभिः इत्यर्थः, स्थलीपृष्ठैः,—अकृत्रिमभूतलैः, अधिष्ठितः,—समन्वितः।

(१३७) महिषेति।—महिषाणां पृष्ठेषु प्रतिष्ठिताः,—आरूढा इत्यर्थः, गायन्तः गोपालाः तैः, पालितानि—रक्षितानि, तैः।

(१३८) कीटेति।—कीटानां—क्षुद्रप्राणिभेदानां, पटलेषु—वृन्देषु, गोधना-नाम् अङ्गलग्नेषु इति भावः, लम्पटाः,—लुब्धाः, ये चटकाः,—क्षुद्रपक्षिभेदाः, तैः अनुसृतानि—अनुगतानि, तैः।

(१३९) अवटुेति।—अवटुः,—घाटा, गोवापस्थानम्: इत्यर्थः, ("अवटु-

अटङ्किः अटवीं (१४०) हरहषभपीतम् आमयशङ्कया बहु-विभक्तं क्षीरोदमिव क्षीरं चरङ्किः (१४१) वाष्पच्छेद्यतृणतृषैः गोधनैः धवलितविपिनः, (१४२) विविधमखहोमधूमान्य-शतमन्युमुक्तैः लोचनैरिव सहस्रसङ्ख्यैः कृष्णसारैः शारीकृतोद्देशः, (१४३) धवलधूलीमुचां केतकीवनानां रजोभिः पाण्डुरीकृतैः प्रथमोद्धूलनधूसरैः शिवपुरस्येव प्रवेशैः प्रदेशैः उपशोभितः,

---

घंटा क्वकाटिका" इत्यमरः) तव घटिता—योजिता, या घण्टाघटी—घण्टारूपः क्षुद्रघटः, ["क्षादल्पाख्यायाम्" (४।१।५१ पा०) इति अल्पार्थे ङीषि रूपम्] तस्या रटि-तेन—निनादेन, रमणीयानि—चारुणि, मनोज्ञानि इत्यर्थः, तैः। अटङ्किः,—चरङ्किः।

(१४०) हरेति।—हरस्य—शिवस्य, वृषभेण पीतम्, आमयशङ्कया—अजीर्ण-रोगसम्भावनया, बहुतरदुग्धपानेन अजीर्णं सम्भवति इति भावः। ["आमयशङ्कया" इत्यत्र "आमयाशङ्कया" इति पाठान्तरम्]। क्षीरोदमिव—क्षीरसागरं समयमिव, बहुविभक्तं—बहुधा विभज्य स्थापितम् इत्यर्थः।

(१४१) वाष्पेति।—वाष्पेण—लोहनिर्मितेन अस्त्रविशेषेण, "कासे" इति वङ्गभाषाप्रसिद्धेन, छेद्यानि तृणानि तैः; यद्वा,—वाष्पेण—उष्मणा, दुःषदातपेनैव-त्यर्थः, छेद्यानि—नाश्यानि इत्याशयः, अतिकोमलतया दुःषदातपेनापि शुष्कतां गम-नार्हाणि इति भावः, यानि तृणानि तैः, तृनानि—सन्तुष्टानि तैः। गोधनैः,—गाव एव धनानि तैः। धवलितानि—श्वेतीकृतानि, विपिनानि—वनानि यस्य तथोक्तः।

(१४२) विविधेति।—विविधानां—बहुप्रकाराणां, मखानां—यज्ञानां, होमधूमैः अन्यानि—दर्शनव्यापाररहितानि अत एव शतमन्युना—इन्द्रेण, मखाहूतेन इति भावः, मुक्तानि—परित्यक्तानि तैः, लोचनैः,—नयनैरिव, सहस्रसङ्ख्यैः कृष्ण-सारैश्च इति भावः; अन्यत्र,—सहस्रसङ्ख्यैः,—प्रभूतैरित्यर्थः, कृष्णसारैः,—श्यामलवर्ण-चित्रितैः मृगैः, शारीकृतोद्देशः,—चित्रितप्रदेशः।

(१४३) धवलधूलीमुचां—श्वेतरजोमुचां, केतकीवनानां रजोभिः,—परागैः, पाण्डुरीकृतैः,—पाण्डुतां नीतैः, अत एव प्रमथानां—शिवपारिषदां भूतवर्गाणाम्, उद्धूलनेन—लुण्ठनेन, धूसराः,—दुःषत्पाण्डुवर्णाः, उद्धृतरजस्त्वादिति भावः, तैः, ("दुःषत्पाण्डुस्तु धूसरः" इत्यमरः)। शिवपुरस्येव—शिवालयस्येव, प्रविशन्ति एभि-रिति प्रवेशाः,—मार्गाः तैः।

(१४४) शाककन्दलश्यामलितग्रामोपकण्ठकाश्यपीपृष्ठः, पदे पदे (१४५) करभपालीभिः पीलुपल्लवप्रस्फोटितैः करपुट-पीड़ितमातुलुङ्गीदलरसोपलिप्तैः (१४६) स्वेच्छाविचितकुङ्कुम-केसरक्षतपुष्पप्रकरैः (१४७) प्रत्यग्रफलरसपानसुखसुप्तपथिकैः (१४८) वनदेवतादीयमानामृतरसप्रपाग्टहैरिव द्राक्षामण्डपैः (१४९) स्फुरत्फलानाञ्च वीजलग्नशुकचञ्चुरागाणामिव (१५०) समारूढ़कपिकुलकपोलमन्दिह्यमानकुसुमानां दाड़ि-

(१४४) शाकेति ।—शाकानां कन्दलैन—अभिनवेन अङ्कुरेण, ("कन्दलं विषु कपालेऽप्युपरागे नवाङ्कुरे" इति मेदिनी) श्यामलिता ग्रामाणाम् उपकण्ठाः, —प्रान्तभागा यस्य तथोक्तं, काश्यपीपृष्ठं—भूतलं यस्य तथाभूतः । ("भूर्भूमि···।··· काश्यपी क्षितिः" इत्यमरः) ।

(१४५) करभपालीभिः,—करभाः,—उष्ट्रशिशवः, तेषां पाल्यः,—वृन्दानि ताभिः । ["इत्थम्भूतलक्षणे" (२ । ३ । २१ पा०) इति तृतीया] पीलुपल्लवेन—पीलूनां —"आख्रोट्" इति प्रसिद्धानां वृक्षभेदानां, पल्लवाः,—किसलयाः, करभभक्ष्या इति भावः, तैः प्रस्फोटितैः,—ग्रोभितैः । करपुटेति ।—करपुटैः पीड़ितानां—मर्दितानाम् इत्यर्थः । मातुलुङ्गीदलानां—मातुलुङ्गी नाम वृक्षभेदः, "मधुकुक्कुटी" वा "छीलङ्ग" इति वङ्गभाषया प्रसिद्धा, तस्या दलानि—पल्लवाः, तेषां रसैः,—द्रवैः, उपलिप्तानि—प्रलिप्तानि तैः ।

(१४६) स्वेच्छेति ।—स्वेच्छया विचिताः,—उच्चिताः, कुङ्कुमानां केसराः,—किञ्जल्काः तैः, कृतः,—रचितः, पुष्पाणां प्रकरः,—माल्यं येषु तथोक्तैः ।

(१४७) प्रत्यग्रेति ।—प्रत्यग्राणि—अभिनवानि, फलानि तेषां रसपानेन सुखसुप्ताः पथिकाः,—अध्वगाः येषु तथोक्तैः ।

(१४८) वनेति ।—वनदेवताभिः दीयमानानि अमृतरसानां प्रपागृहाणि—पानीयशालाः, तैरिव, ("प्रपा पानीयशालिका" इत्यमरः) । द्राक्षामण्डपैः,—द्राक्षालतावितानार्थं कृतमण्डपैः ।

(१४९) स्फुरन्ति—विकसन्ति, फलानि यासां तासाम् । वीजेति ।—वीजेषु लग्नाः,—संसक्ताः, शुकानां—तदाख्यपक्षिभेदानां, चञ्चुरागाः,—चञ्चुलौहित्यानि येषां तथाभूतानामिव ।

(१५०) समारूढेति ।—समारूढानां कपिकुलानां—वानरवृन्दानां, कपोलैः,

मीनां वनैः विलोभनीयापनिर्गमः, (१५१) वनपालपीयमान-नारिकेलरसासवैश्च (१५२) पथिकलोकलुप्यमानपिण्डखर्जूरैः (१५३) गोलाङ्गूललिह्यमानमधुरामोदपिण्डीरसैः(१५४)चकोर-चञ्चुजर्जरितारुकैः उपवनैः अभिरामः, (१५५) तुङ्गार्जुनपाली-परिवृतैश्च (१५६) गोकुलावतारकलुषितकूलकीलालैः अध्वग-शतशरण्यैः अरण्यधरावन्यैः अवन्यवनरन्ध्रः, (१५७) करभीय-

—गण्डदेशैः, ["कपिगण्ड—" (उ० १ पा० ६७ सू०) इत्यादिना ओलचि रूपम्] सन्दिह्यमानानि—संशय्यमानानि, सदृशानीति भावः, कुसुमानि यासां तथोक्तानाम्। विलोभनीयापनिर्गमः,—विलोभनीयाः,—विशेषेण दर्शनीयाः, उपनिर्गमाः,—निर्गमनमार्गाः, "उद्यानानि" इति कैचित्, यस्य तथाभूतः।

(१५१) वनेति।—वनपालैः,—वनरक्षिभिः, पीयमानाः,—आस्वाद्यमानाः, नारिकेलानां रसाः,—जलान्येव, आसवाः,—मद्यानि येषु तथोक्तैः।

(१५२) पथिकेति।—पथिकलोकैः, पान्थजनैः, लुप्यमानानि—गृह्यमाणानि, भक्षणेन अदृश्यतां नीयमानानीत्यर्थः, पिण्डखर्जूराणि येभ्यः तथोक्तैः।

(१५३) गोलाङ्गूलेति।—गोलाङ्गूलैः,—कृष्णमुखकपिभेदैः, लिह्यमानः,—आस्वाद्यमानः, मधुरः,—स्वादुः, आमोदपिण्डीरसः, सुरभिपिण्डीखर्जूरविशेषरसः येषु तैः।

(१५४) चकोरेति।—चकोराणां—पक्षिभेदानां, चञ्चुभिः जर्जरितानि आरुकाणि—आरुकाख्यवृक्षफलानि इत्यर्थः, येषु तथोक्तैः, उपवनैः,—उद्यानैः, अभिरामः,—मनोहरः।

(१५५) तुङ्गेति।—तुङ्गाभिः,—उन्नताभिः, अर्जुनपालीभिः,—कुकुभाख्य-वृक्षश्रेणीभिः, परिवृताः,—वेष्टिताः तैः।

(१५६) गोकुलेति।—गोकुलानां—गोवृन्दानाम्, अवतारेण—अवतरणेन, कलुषितानि—आविलीकृतानि, कूलकीलालानि—तीरस्थितजलानि येषां तैः। ("...सलिलं कमलं जलम्। पयः कीलालम्..." इत्यमरः)। अध्वगशतशरण्यैः,—पथिकशतपरित्राणेभ्यः, अरण्यधरावन्यैः,—वनजलाशयैः। अवन्यानि—फलवन्ति, वनरन्ध्राणि—वनाभ्यन्तरभागाः यस्य तथाभूतः।

(१५७) करभीयेति।—करभेभ्यः,—उष्ट्रावकेभ्यः, हिताः, करभीयाः, ये

कुमारकपाल्यमानैः औष्ट्रकैः औरभ्रैश्च कृतसम्बाधः, दिशि दिशि (१५८) रविरथतुरगविलोभनायेव (१५९) विलोडनमृदितकुङ्कुमश्लथलीरससमालब्धानाम् उत्प्रोथपुटैः उन्मुखैः (१६०) उदरशायिकिशोरकजवजननाय प्रभञ्जनमिव च आपिबन्तीनां वातहरिणीनामिव स्वच्छन्दचारिणीनां वडवानां वृन्दैः विचरद्भिः आचितः, (१६१) अनवरतक्रतुधूमान्धकारप्रहृत्तैः हंसयूथैरिव वाणैः धवलितभुवनः,

---

कुमाराः,—पशुपालशिशव इत्यर्थः, तैः, पाल्यमानाः,—रक्ष्यमाणाः तैः। औष्ट्रकैः,—उष्ट्राणां समूहैः। औरभ्रैः,—मेषनिचयैः, ["गावीचोष्ट्रौरभ्र—" (४। २। ३९ पा०) इत्यादिना वुञि रूपम्। "मेष्ट्रौरभ्रीरणीर्णामुरणश्च एडकाः" इत्यमरः। "औरभ्रैः" इत्यत्र "औरश्रकैः" इति पाठेऽपि स एवार्थः]। कृतसम्बाधः,—समाकीर्णः।

(१५८) रवीति।—रवेः,—सूर्यस्य, रथे ये तुरगाः,—अश्वाः, तेषां विलोभनम्—अनुरागप्रकटनेन लोभप्रदर्शनं, तस्मै इव।

(१५९) विलोडनेति।—विलोडनेन—दलनेन, ["विलीड्न—" इत्यत्र "विलीठन—" इति पाठे,—विलीठनेन—भूमौ इतस्ततः शरीरपरिचालनेन इत्यर्थः] मृदिता—मर्दनं नीता, या कुङ्कुमश्लथली—कुङ्कुमोत्पत्तिभूमिः, तस्या रसेन—द्रवेण, समालब्धाः,—अनुलिप्ताः, तासाम्। उत्प्रोथपुटैः,—उत्—उद्गतानि, प्रोथपुटानि—नासापुटानि येषां तादृशानि, तैः। उन्मुखैः,—ऊर्ध्वमुखैः।

(१६०) उदरशायीति।—उदरशायिनां—गर्भस्थितानां, किशोरकाणां—शावकानां, ["बाल: किशोर:" इति अश्वप्रकरणे अमरः। बाल: अश्वशिशुरित्यर्थः] जवजननाय—वेगवर्द्धनाय इत्यर्थः, प्रभञ्जनमिव—वायुमिव। आपिबन्तीनां—भक्षयन्तीनां, संपीतवतीनामिति यावत्, वातहरिणीनामिव—वातमृगीणामिव, समीराभिमुखधाविनीनामिति यावत्, स्वच्छन्दचारिणीनां—स्वेच्छया चरन्तीनां, वडवानाम्—अश्वानाम्। ("वाम्श्वा वडवा" इत्यमरः) आचितः,—आकीर्णः, [आङ्पूर्वकचिञ्: "निष्ठा" (१।२।११२ पा०) इति कर्मणि क्तः]।

(१६१) अनवरतेति।—अनवरताः,—अविरताः, क्रतूनां—यज्ञानाम् धूमा एव अन्धकाराः, तेषु प्रहृत्ताः,—जाताः, तैः, हंसपक्षे,—धूमेन अन्धकारः, तस्मात् प्रहृत्तैः,—पलायितैः, इतस्ततः सञ्चरद्भिरित्यर्थः, वाणैः,—हयविशेषैः, अश्वैरित्यर्थः।

(१६२)सङ्गीतगतसुरजरवमत्तैः मयूरैरिव विभवैः मुखरितजीवलोकः, अग्निकरावदातवृत्तैः मुक्ताफलैरिव गुणिभिः प्रसाधितः, (१६३) पथिकजगतविलुप्यमानस्फीतफलैः महातरुभिरिव सर्व्वातिथिभिः अभिगमनीयः, (१६४)मृगमदपरिमलवाहिसुगरोमाच्छादितैः हिमवत्पादैरिव महत्तरैः स्थिरीकृतः, (१६५) प्रोद्दण्ड-

धवलितेति।—धवलितानि—श्वेतीकृतानि, भुवनानि—अवयवाः यस्य तथोक्तः। ["भुवनः" इत्यत्र "भवनः" इति पाठे,—भवनानि—गृहाणि इत्यर्थः] "धूमान्धकारग्रहणैः वार्द्धैः धवलितभुवनः" इति विरोधप्रतीतिः। हंसानामन्धकारग्रहणत्वन्तु तमसि प्रचारात् स्थेयम्।

(१६२) सङ्गीतेति।—सङ्गीतेषु—विस्पष्टं निषादादिसप्तस्वरालपनेषु इत्यर्थः, गतानां—स्थितानां, सुरजानां—मृदङ्गानां, रवेण—नादेन, मत्ताः,—मादकजनकाः, उल्लासिताश्च, तैः। विभवैः,—सम्पद्भिः। मुखरितः,—ध्वनितव्याप्त इति भावः, नादितश्च, जीवलोकः,—प्राणिवर्गः, जनलोकावकाशश्च ("लोकस्तु भुवने जने" इत्यमरः) यस्य तथोक्तः। अग्निकरेति।—अग्निः,—चन्द्रस्य, करा:,—किरणाः, तद्वत् अवदातानि—विशदानि, निर्म्मलानि इति यावत्, वृत्तानि—चरितानि येषाम्; अन्यत्र,—अग्निकरवत् अवदातानि—स्वच्छानि, वृत्तानि—वर्त्तुलानि तैः। गुणिभिः,—विद्याविनयशालिभिः, सूत्रवद्भिश्च। प्रसाधितः,—अलङ्कृतः।

(१६३) पथिकेति।—पथिकजगतैः,—पान्थैः, तस्करजगतैः इत्यर्थः, विलुप्यमानानि—चौर्य्यमाणानि, स्फीतानि फलानि—धनानि येषां तथाभूतैः; अन्यत्र,—पथिकानाम्—अध्वगानां, जगतैः विलुप्यमानानि—गृह्यमाणानि, भक्षणेन अदृश्यतां नीयमानानि इत्यर्थः, स्फीतानि—प्रभूतानि, फलानि येषां तैः। अभिगमनीयः,—आश्रयणीयः।

(१६४) मृगेति।—मृगमदस्य—कस्तूरिकायाः, परिमलवाहिभिः,—सौरभशालिभिः, सुगरोमभिः,—राङ्कवेति संज्ञालैः, कस्तूरीमृगरोमनिर्म्मितैः वसनैः इति यावत्, ("राङ्कवं सुगरोमजम्" इत्यमरोक्तेः) आच्छादितैः,—कृतगात्रावरणैः; अन्यत्र,—तथाविधसुगरोमाढ्यैः, हिमवत्पादैरिव—हिमाद्रेः प्रत्यन्तपर्व्वतैरिव, ("पादाः प्रत्यन्तपर्व्वताः" इत्यमरः) महत्तरैः,—अतिमहद्भिः लोकैः, तद्वैर्वा; अन्यत्र,—प्रकाण्डैः स्थिरीकृतः,—आवासितः।

(१६५) प्रोद्दण्डेति।—प्रकर्षेण उद्धता दण्डाः,—नाला येषां तानि,

सहस्रपत्रोपविष्टद्विजोत्तमैः नारायणनाभिमण्डलैरिव तोयाशयैः मण्डितः, (१६६) मथितपयःप्रवाहप्रक्षालितक्षितिभिः क्षीरोद-मथनारम्भैरिव मन्द्रघोषैः पूरिताशः श्रीकण्ठो नाम जनपदः। (१६७) यत्र चेताग्निधूमाम्बुपातजलक्षालिता इव अक्षीयन्त कुदृष्टयः। (१६८) पच्यमानचयनेष्टकादहनदग्धानीव न अदृश्यन्त दुरितानि। (१६९) क्रियमाणयूपदारु-

---

सहस्रपत्राणि—कमलानि, तेषु उपविष्टा इवोत्तमाः,—उत्कृष्टाः पक्षिणः, ब्राह्मणाश्च यैः तथाभूतैः, तोयाशयैः,—जलाशयैः, सरोभिरित्यर्थः; अन्यत्र,—तोयमेव आशयः,—आधारः, स्थानमित्यर्थः, येषां तैः, नारायणस्य समुद्रशायित्वात्; मण्डितः,—सुशोभितः।

(१६६) मथितेति।—मथितानां—निर्जलतक्राणां, ("मथितं पुनः। क्लीबं निर्जलघोले स्यात् विस्रावोद्धितदृष्टयोः" इति मेदिनी) पयसां—दुग्धानाञ्च, प्रवाहेण—निवहेन; अन्यत्र,—मथितेन—विलोडितेन, पयसां—दुग्धानां, प्रवाहेण—स्रोतसा; प्रक्षालिता—धौता, क्षितिः,—भूभागो यैः तथोक्तैः। मन्द्रघोषैः,—मन्द्रैः घोषैः,—गोपपल्लीभिः, ("घोष आभीरपल्ली स्यात्" इत्यमरः); अन्यत्र,—मन्द्रा-ऽऽघोषैः,—मन्द्राऽऽरावैश्च, पूरिता—व्याप्ता, आशा—आकाङ्क्षा, आशा—दिशश्च यत्र तथोक्तः, ("आशा तृष्णादिशोः स्त्रियाम्" इति मेदिनी)।

(१६७) यत्रेत्यादि।—चेता—दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः। "अग्नित्रयमिदं चेता" इत्युक्तविधिः, अग्निः चेताग्निः; अत्र प्रचण्डाग्निबोधनाय चेतेति पदं बोद्धव्यं, चेताग्नितुल्योऽग्निरित्यर्थः, तस्य धूमेन यो ऽम्बुपातः,—पतितम् अम्बु इत्यर्थः, स एव जल—सलिलं, तेन क्षालिता इव—धौता इव, भ्रमिता इव इति भावः, कुदृष्टयः,—कुत्सिता दृष्टयः,—वेदविरुद्धानि ज्ञानानि, दृष्टिदोषाश्च, अक्षीयन्त—क्षयम् अगच्छन्।

(१६८) पच्यमानेति।—पच्यमानं—दह्यमानं, चयनं—चित्या, "पाँजा" इति बङ्गभाषा, यासां तथाभूतानाम्, इष्टकानां—दह्यमानानामिति भावः, दहनेन—सन्तापेन, दग्धानि इव—भस्मीकृतानि इव। दुरितानि—पापानि। एतेन बहुलेष्टकानिर्मितहर्म्यवासिविलासिसङ्घावेऽपि न पापे प्रवृत्तिरिति भावः।

(१६९) क्रियमाणेति।—क्रियमाणानि—क्रत्यमानानि, यूपाय दारूणि, यैः

परशुपाटित इव व्यदीर्यत अधर्मः। (१७०) मखशिखिधूम-जलधरधाराधौत इव ननाश वर्णसङ्करः। (१७१) दीय-मानानेकगोसहस्रसमृद्धखण्ड्यमान इव अपलायत कलिः। (१७२) सुरालयशिलाघट्टनटङ्कनिकरनिकृत्ता इव व्यदीर्यन्त विपदः। (१७३) महादानविधानकलकलाभि-हता इव प्राद्रवन् उपद्रवाः। (१७४) दीप्यमान-सदामहानसमहसमन्तापिता इव व्यलीयन्त व्याधयः।

तथाभूतः, परशुभिः,—कुठारैः, पाटित इव—कर्त्तित इव। अधर्मः,—पापं, व्यदीर्यत—विदीर्णः अभूत्।

(१७०) मखेति —मखानां—यज्ञानां, शिखिनः,—अग्नयः, तेषां धूमाः, ते ये जलधराः,—मेघाः, उत्पन्ना इति भावः; उक्तञ्च महाकविना कालिदासेन,—"धूमज्योतिः-सलिलमरुतां सन्निपातः क्व मेघाः" इति, तेषां धाराभिः,—वृष्टिभिः, धौत इव—क्षालित इव। वर्णसङ्करः,—वर्णानां—ब्राह्मणक्षत्रियवैश्यशूद्राणां, सङ्करः, —प्रातिलोम्येन सन्तानोत्पादनम्; अन्यत्र,—सङ्कीर्णवर्णः, शुक्लकृष्णादीनां मिश्रयोनौ-त्पन्नः शबलादिवर्णः इति भावः, तादृशी हि वर्णः मेघधाराधौतः अवश्यमेव लक्ष्यति।

(१७१) दीयमानेति।—दीयमानानाम् अनेकेषां—प्रभूतानां, गोसहस्राणां महद्भिः खण्ड्यमान इव—ताड्यमान इव, कलिः,—चतुर्थं युगम्।

(१७२) सुरेति।—सुरालयेषु—देवमन्दिरेषु, याः शिलाः,—प्रस्तराः, तासां घट्टने—योजने, ये टङ्कनिकराः,—पाषाणदारणास्त्रनिवहाः, ("टङ्कः पाषाणदारणः" इत्यमरः) तैः निकृत्ता इव—खण्डिता इव, व्यदीर्यन्त—व्यचूर्ण्यन्त।

(१७३) महादानेति।—महादानानां—भूम्यादिदानानामित्यर्थः, विधाने—अनुष्ठाने, यः कलकलः,—कोलाहलः,—तेन अभिहता इव—ताडिता इव। उप-द्रवाः,—अनिष्टपाताः,—प्राद्रवन्—अपलायन्त; दानेन च महाद्युपद्रवशान्तिः भवति इति भावः।

(१७४) दीप्यमानेति।—दीप्यमानानां—राजमानानां, सदाणां—सदा दानानां, तदर्थं निकेतनानामिति भावः, ("सदनाच्छादने यज्ञे सदा दाने वनेऽपि च" इत्यमरः) महानसानां—रन्धनशालानां, ("रन्धनाल्लु पाकस्थानमहानसम्"

(१७५) वृषविवाहप्रहतपुण्यपटहपटुरवत्रासिता इव न उपासर्पन् अपमृत्यवः। (१७६) सन्ततब्रह्मघोषबधिरीकृता इव अपजग्मुः ईतयः। (१७७) धर्म्माधिकारपरिभूतमिव न प्राभवत् दुर्दैवम्।

(१७८)तत्र चैवंविधे नानारामाभिरामकुसुमगन्धपरिमलाभोगसुभगो यौवनारम्भ इव भुवनस्य, कुङ्कुममलनपिञ्जरितबहु-

इत्यमरः) महद्भिः,—प्रचुरसङ्ख्यकैः इति यावत्, सन्तापिता इव—अभिभूता इव, व्याधयः,—रोगाः।

(१७५) वृषेति।—वृषस्य विवाहः,—वृषोत्सर्गः, यत्र चतसृभिः वत्सतरीभिः समुत्सृष्टो वृषः स्वैरविहारी भवति, तत्र, प्रहतस्य—वादितस्य, पुण्यपटहस्य—धर्म्मानकस्य, पटुना—तारेण, रवेण—नादेन, त्रासिता इव—भीषिता इव। न उपासर्पन्—नापतन्। कैश्चित्"वृषोऽत्र नीलवृषः, 'लोहिती यस्तु वर्णेन मुखे पुच्छे च पाण्डरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते॥' इत्युक्तलक्षणः, तस्य विवाहः,—तदुत्सर्ग इत्यर्थः।" तादृग्वृषोत्सर्गस्य अपमृत्युनिवारकत्वम् अपि इति आचक्षते।

(१७६) सन्ततेति।—सन्ततेन—अविरतेन, ब्रह्मघोषेण—वेदध्वनिना, बधिरीकृता इव—श्रवणशक्तिरहिता इव, ईतयः,—शस्योपघातकाः; "अतिवृष्टिरनावृष्टिः शलभाः मूषिकाः खगाः। अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः॥" इत्युक्ताः षट्। ब्रह्मघोषेणासां तथा बधिरत्वं जायते, यथा शस्योत्पत्तिकथाम् अपि न श्रोतुं शक्नुवन्तीति भावः।

(१७७) धर्म्मेति।—धर्म्माधिकारः,—धर्म्मविचारालयः, तेन परिभूतम् इव—निराकृतम् इव; दुर्दैवस्य विपत्तेतुत्वेऽपि धर्म्मविचारेण लोकानां तदपगमादिति भावः।

(१७८) "तत्र" इत्यादौ "स्थाखीश्वरास्त्री जननिवेशः" इत्युत्तरेणान्वयः। तच—जनपदे। नानेति।—नानाऽऽरामाणां—बहूनाम् उद्यानानाम्, अभिरामाणि—मनोहराणि, कुसुमानि; अत्रच,—नाना रामाः,—बहवो महिलाः, अभिरामकुसुमानि इव, तेषां गन्धस्य—सौरभस्य, परिमलः,—सम्मर्दनामोदः, तस्य आभोगः,—अनुभवः, तेन सुभगः,—रम्यः; यद्वा,—नानारामाभिरामकुसुमानां गन्धानां—मृष्टचन्दनकुङ्कुमादीनाञ्च,परिमलेन—जननीहरेण सौरभेण,यः आभोगः,—संस्कारः, तेन सुभगः,—रमणीयः। कुङ्कुमेति।—कुङ्कुमानां मलनेन—कर्दमेन, पिष्टकुङ्कु-

महिषीसहस्रशोभितोऽन्तःपुरनिवेश इव धर्मस्य, (१७९) मरुद्धूयमानचमरीबालव्यजनधवलितप्रान्तः एकदेश इव सुरराज्यस्य, (१८०) ज्वलन्मखशिखिसहस्रदीप्यमानदशदिगन्तः शिविरसन्निवेश इव कृतयुगस्य, (१८१) पद्मासनस्थितब्रह्मर्षिध्यानाधीयमानसकलाकुशलप्रशमः प्रथमोऽवतार इव ब्रह्मलोकस्य, (१८२) कलकलमुखरमहावाहिनीशतसङ्कुलो विक्षेप इव उत्तरकुरूणाम्, (१८३) ईश्वरमार्गणसन्तापानभिज्ञसकलजनो विजिगीषुरिव त्रिपुरस्य,

मालुलेपनेन इत्यर्थः, ("मलनं पटवासे ना कर्दमे तु नपुंसकम्" इति मेदिनी) पिञ्जरिताः,—रञ्जिता इत्यर्थः, वल्ल्याः महिष्यः,—कृताभिषेकाः राजभार्याः, उत्तमा महिलाश्च, तासां सहस्रेण शोभितः,—अलङ्कृतः।

(१७९) मरुदिति।—मरुतः,—वायवः, देवाश्च, ("मरुतौ पवनामरौ" इत्यमरः) तैः उद्धूयमानाः,—सञ्चाल्यमानाः, चमरीणां बालाः,—पुच्छलोमान्येव, व्यजनानि, तैः धवलिताः,—श्वेतीकृताः, प्रान्ताः,—पर्य्यन्तभागा यस्य तथोक्तः।

(१८०) ज्वलदिति।—ज्वलतां मखशिखिनां—यज्ञाग्नीनां, सहस्रैः दीप्यमाना दशानां दिशामन्ता यस्य तथाभूतः। शिविरसन्निवेश इव—कटकबन्ध इव। कृतयुगस्य—सत्ययुगस्य।

(१८१) पद्मेति।—पद्मासनेषु स्थिताः ये ब्रह्मर्षयः; यद्वा,—पद्मम् एव आसनं पद्मासनं, तत्र स्थितो ब्रह्मा एव ऋषिः; यद्वा,—ब्रह्मा च ऋषयश्च तैः, ध्यानेन—समाधिना, आधीयमानः,—क्रियमाणः, सकलानाम्—समग्राणाम्, अकुशलानाम्—अमङ्गलानां, प्रशमः,—शान्तिः यस्मिन् तथाभूतः।

(१८२) कलकलेति।—कलकलैः,—शब्दविशेषैः, मुखराः,—नदन्त्यः, महत्यः वाहिन्यः,—नद्यः, सेनाश्च; तासां शतेन सङ्कुलः,—आकीर्णः, उत्तरकुरूणाम्—उत्तराः कुरवः,—मेरुसन्निहितदेशवासिनः तेषां, विक्षेप इव—"क्वचिदभिहितो भावो द्रव्यवत् प्रकाशते" इति न्यायेन विक्षिप्तोत्तरकुरुप्रदेश इवेत्यर्थः। ["विक्षेप इव" इत्यत्र "विपक्ष इव" इति पाठे,—प्रतिद्वन्द्वी इव, उत्तरकुरुप्रदेशानामिति भावः।

(१८३) ईश्वरेति।—ईश्वरस्य—हरस्य, राज्ञश्च, मार्गणैः,—शरैः, बहुधा छलेनार्थप्रार्थनैश्च, यः सन्तापः,—क्लेशः, तस्य अनभिज्ञाः सकलाः जनाः यस्मिन् तथा-

(१८४) सुधारससिक्तधवलगृहपङ्क्तिपाण्डुरः प्रतिनिधिरिव चन्द्रलोकस्य, (१८५) मधुमत्तमत्तकाशिनीभूषणरवभरितभुवनो नामाभिहार इव कुबेरनगरस्य,स्थाखीश्वराख्यो जननिवेशः ।

(१८६) यः तपोवनमिति मुनिभिः, कामायतनमिति वेश्याभिः, सङ्गीतशालेति लासकैः, यमनगरमिति शत्रुभिः, (१८७) चिन्तामणिभूमिरिति अर्थिभिः, वीरसूतिमिति शस्त्रोपजीविभिः, गुरुकुलमिति विद्यार्थिभिः, (१८८) गन्धर्व-नगरमिति गायनैः, विश्वकर्ममन्दिरमिति विज्ञानिभिः,

---

भृतः । त्रिपुरस्य—तिसृणां पुरां समाहारः त्रिपुरं—मयदानवनिर्मितम् अन्तरीक्ष-स्थितं पुरत्रयमित्यर्थः, तस्य । पुरा ईश्वरेण सङ्गीतकं त्रिपुरमस्त्रज्वालया दग्धमिति पुराणम् ।

(१८४) सुधेति ।—सुधारसैः,—लेपनद्रवैः, चूर्णद्रवैरित्यर्थः, अमृतैश्च, ("सुधा लेपोऽमृतं खुड्डी" इत्यमरः) सिक्तानां—लिप्तानां, धवलगृहाणां पङ्क्तिभिः,—राजिभिः, पाण्डुरः,—धवलः । प्रतिनिधिरिव—प्रतिकृतिरिव ।

(१८५) मधुमत्तेति ।—मधुमदेन—मद्यपानजनितेनोल्लासेन, मत्ता या मत्तकाशिन्यः,—उत्तमाङ्गनाः, यच्चिह्नम्, तासां भूषणरवैः,—अलङ्कारनिनदैः, भरितम्—आपूरितं, भुवनं यत्र तथाभूतः ; नामाभिहार इव—पर्य्यायान्तरमिव । स्थाखीश्वर-राख्यः,—स्थाखीश्वरस्य आख्या यत्र तथाभूतः, स्थाण्वीश्वर इति आख्या यस्य तथाभूत इति वा । ["जननिवेशः" इत्यत्र "जनपदविशेषः" इति पाठान्तरम्] ।

(१८६) य इत्यादि ।—तपोवनं—निरन्तरधर्म्मानुशीलनादिति भावः । कामायतनं—विलासप्राचुर्य्यादिति भावः । सङ्गीतशाला—गान्धर्व्वविद्याऽनुशीलना-तिशय्यादिति भावः । लासकैः,—नटैः । यमनगरं—भयजनकत्वादिति भावः ।

(१८७) चिन्तामणिभूमिः,—वाञ्छितार्थप्राप्तिहेतुम्, अनवरतदानधर्म्मप्रचारात् इति भावः, ["भुवः किप्" (उ० ४ पा० ४५ सू०) इति किप्प्रत्ययो रूपम्] । वीर-सूतिं—वीरोत्पत्तिभूमिरित्यर्थः, साहसिपुरुषभूयस्त्वात् इति भावः । गुरुकुलम्—आचार्य्यगृहं, सततविद्याऽर्जनात् इति भावः ।

(१८८) गन्धर्वनगरं—सततसङ्गीतप्रचारादिति भावः । गायनैः,—गायकैः । विश्वकर्ममन्दिरं—शिल्पविद्याप्राचुर्य्यात् इति भावः ।

(१८९) लाभभूमिरिति वैदेहकैः, द्यूतस्थानमिति भागार्थिभिः, साधुसमागम इति सद्भिः, (१९०) वज्रपञ्जरमिति शरणागतैः, विटगोष्ठीति विदग्धैः, सुकृतपरिणाम इति पथिकैः, (१९१) असुरविवरमिति वातिकैः, शाक्याश्रम इति शमिभिः, (१९२) अप्सरःपुरमिति कामिभिः, महोत्सवसमाज इति चारणैः, वसुधारेति विप्रैः अगृह्यत।

(१९३) यत्र च मातङ्गगामिन्यः शीलवत्यश्च, गौर्य्यो

(१८९) लाभभूमिः,—उपार्जनस्थानं, बहुविधवस्तूनां व्यवहारात् इति भावः। वैदेहकैः,—वणिग्भिः, ("वैदेहकः सार्थवाही नैगमी वाणिजो वणिक्" इत्यमरः)। द्यूतस्थानं—द्यूतं—दैवनं, क्रीड़ेति यावत्, तस्य स्थानम्। भागार्थिभिः,—भागः,—सौभाग्यं, तदर्थिभिः,—तदभिलाषिभिः, सौभाग्यशालिभिः सततं दैववत् सुखेन दीव्यते इति भावः। ["भागार्थिभिः" इत्यत्र "बन्दिभिः" इति पाठं परिकल्प्य केचित् "द्यूतस्थानमिति साधुभागो दीयते तत्र बन्दिभ्यः" इति व्याचख्युः]।

(१९०) वज्रपञ्जरं—वज्रनिर्म्मितं पञ्जरं, तत्र स्थितानां शत्रुदुर्द्धर्षत्वादिति भावः। विटगोष्ठी—विलासिसमाजः। विदग्धैः,—विलासिभिः। सुकृतपरिणामः,—पुण्यपरिणतिः, सुखेन स्थानलाभादिति भावः। पथिकैः,—पान्थैः, ["पथः ष्कन्" (५।१।७५ पा०) इति ष्कनि रूपम्]

(१९१) असुरविवरं—पातालम्। वातिकैः,—वायुरोगिभिः, भीमाकारयोगिपुरुषाणां सततसञ्चारादिति भावः; यद्वा,—वातिकैः,—खनिविद्याव्यसनिभिराचार्य्यैः, विविधविचित्ररत्नानां सन्निवेशादिति भावः। शाक्याश्रमः,—बौद्धसन्न्यासिमठः। शमिभिः,—शाक्यश्रमणकैः, बौद्धधर्म्मानामपि प्रचारादिति भावः।

(१९२) अप्सरःपुरम्—अप्सरसां नगरं, विलासप्राचुर्य्यादिति भावः। चारणैः,—कुशीलवैः, ("चारणास्तु कुशीलवाः" इत्यमरः)। चारणा हि उत्सवसंसदि राज्ञां गुणादिकं कीर्त्तयित्वा अभिलषितं प्राप्नुवन्ति। वसुधारा—धनप्रवाहः; दातृभ्यो बहुधनलाभादिति भावः। सर्वलोकेषु उल्लेखालङ्कारः।

(१९३) यत्रेत्यादि।—मातङ्गगामिन्यः,—श्वपचगामिन्यः, चाण्डालगामिन्यः इति यावत्, ("मातङ्गः श्वपचे गजे" इति मेदिनी) अथ च शीलवत्यः,—सुशीलाः;

विभवरताश्च, (१८४)श्यामाः पद्मरागिण्यश्च, (१८५) धवलद्विज-शुचिवदनाः मदिरामोदिश्वसनाश्च, (१८६) चन्द्रकान्तवपुषः शिरीषकोमलाङ्ग्यश्च, (१८७) अभुजङ्गम्याः कञ्चुकिन्यश्च,

याः चाण्डालानपि उपगच्छन्ति, ताः कथं शीलवत्यः भवन्ति ? इति विरोधः ; गज-गामिन्य इति तत्परिहारः ; एवम् उत्तरत्र। गौर्यः,—पार्वत्यः, अथ च विभवरताः, —वि—विगतं, भवं—हरं, रतं—रागो यासां ताः ; या गौरी, सा कथं हरादन्यत्र अनुरागिणी ? इति विरोधः ; गौर्यः,—गौराङ्ग्यः, विभवेषु—सम्पत्सु, रता इति परिहारः।

(१८४) श्यामाः,—रजन्यः, अथ च पद्मरागिण्यः,—पद्मेषु रागो विद्यते यासां ताः, पद्मविकाशिन्य इति यावत्, रात्रौ पद्मानां निमीलनात् तासां पद्मरागित्वं न सम्भवति इति विरोधः ; श्यामाः,—श्यामलाङ्ग्यः ; यदा,—"शीते सुखोष्णसर्वाङ्गी ग्रीष्मे च सुखशीतला। तनुकाञ्चनवर्णाभा सा श्यामा परिगीयते ॥" इत्युक्तलक्षणा नार्यः ; पद्मरागिण्यः,—पद्मरागरत्नालङ्कृता इति परिहारः।

(१८५) धवलेति।—धवलानि—विशदानि, द्विजस्येव शुचीनि—पवित्राणि, वदनानि यासां ताः ; अथ च, मदिरेति।—मदिरया—सुरया, तत्पानेन इत्यर्थः, आमोदिनः,—सौरभवन्तः, श्वसनाः,—निश्वासमरुतः यासां तथोक्ताः ; याः हि पवित्रब्राह्मणवत् पवित्रवदनाः तासां मद्यपाने कथं मुखस्य पवित्रता ? इति विरोधः ; धवलैः,—स्वच्छैः, द्विजैः,—दन्तैः, शुचीनि—उज्ज्वलानि, धवलानीत्यर्थः, वदनानि यासां ता इति परिहारः, ("शुचिर्यौ शाम्रि··· । ···धवले शुक्लेऽनुपहते त्रिषु ॥" इति मेदिनी)।

(१८६) चन्द्रकान्तेति।—चन्द्रकान्तः,—मणिविशेषः, तद्वत् वपुः,—शरीरं यासां ताः, अथ च शिरीषकोमलाङ्ग्यः,—शिरीषपुष्पवत् कोमलं—सुकुमारम्, अङ्गं यासां ताः ; चन्द्रकान्तस्य प्रस्तरविशेषत्वेन काठिन्यात् याः तद्वत् कठिनाङ्ग्यः, ताः कथं शिरीषकोमलाः ? इति विरोधः ; चन्द्रवत् कान्तं—रमणीयं, वपुर्यासामिति तत्परि-हारः।

(१८७) अभुजङ्गेति।—भुजङ्गैः,—सर्पैः न गम्याः, अभुजङ्गगम्याः, अथ च कञ्चुकिन्यः,—भुजङ्ग्यः ; याः खलु भुजङ्ग्यः, ताः कथं भुजङ्गैरनभिगमनीयाः ? इति विरोधः ; भुजङ्गैः,—विटैः,("भुजङ्गो विटसर्पयोः" इति हलायुधः) न गम्याः, कञ्चु-किन्यः,—कञ्चुकं—स्त्रीणां स्तनावरणवस्त्रविशेषः, तदस्य इति परिहारः, ("कञ्चुको

(१९८) पृथुकलत्रश्रियः दरिद्रमध्यकलिताश्च, (१९९)लावण्यवत्यो मधुरभाषिण्यश्च, (२००) अप्रमत्ताः प्रसन्नोज्ज्वलरागाश्च, (२०१) अकौतुकाः प्रौढाश्च प्रमदाः।

वारवाणे स्त्रीन्द्रियौके कवचेऽपि च। ·····चीलके ॥" इति मेदिनी। चीलकः,—"काँचुली" इति ख्यातः कृपासकापरपर्य्यायः स्त्रीणां तनावरणवस्त्रभेदः)।

(१९८) पृथ्वति।—पृथुः,—आदिराजो वेणतनयः, तस्य कलत्राणां—महिषीणां, [गडधातोः क्विप् "गडेरादेश्च कः" (उ० ३ पा० १०६ सू०) इत्यादेः ककारादेशेन रूपम्] श्रियः इव—सम्पदः इव, श्रियो यासां ताः, अथ च दरिद्रमध्यकलिताः,—दरिद्राणां—निर्धनानां, मध्ये कलिताः,—संख्याताः, गणिता इत्यर्थः; याः खलु राजमहिष्य इव सम्पच्छालिन्यः, ताः कथं दरिद्रमध्ये गणिताः? इति तदसम्भवादिरोधः; पृथ्वी—महती, कलत्रस्य—श्रोणेः, जघनस्य इत्यर्थः, ("कलत्रं श्रोणिभार्य्ययोः" इत्यमरः) श्रोः,—शोभा यासां ताः; दरिद्रं—क्षीणं, मध्यः,—कटिदेशः, तेन कलिताः,—शोभिता इति यावत्, इति परिहारः।

(१९९) लावण्यवत्यः,—लवणरसशालिन्यः, अथ च मधुरभाषिण्यः,—मधुरा—स्वादी, इति भाषा—उक्तिः, विद्यते यासां ताः; या हि लवणरसबहुलाः, ताः मधुराः इत्युक्तिः न सम्भाव्यते इति विरोधः; लावण्यवत्यः,—"मुक्ताफलेषु छायायाः तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिह स्मृतम् ॥" इत्युक्तमौल्यर्थविशेषवत्य इत्यर्थः, मधुरभाषिण्यः,—मधुरं—प्रियं, भाषितं शीलमासाम् इति तथाविधाः, प्रियवादिन्य इति परिहारः, ("स्वादुप्रियौ तु मधुरौ" इत्यमरः)।

(२००) प्रसन्ना—सुराभेदः, तया उज्ज्वलः,—शुक्लाररसावेशयुक्तः इति यावत्, ("शुक्लः शुचिरुज्ज्वलः" इत्यमरः) रागः—अनुरागः सुखरागो वा, यासां ताः, अथ च अप्रमत्ताः,—अचौर्याः; याः मद्यपायिन्यः, ताः कथमप्रमत्ताः? इति विरोधः; अप्रमत्ताः,—प्रमादशून्याः, प्रसन्नः,—सौम्यः, उज्ज्वलः,—विशदः, रागः,—वर्णो यासां ताः, इति परिहारः, ("प्रसन्ना स्त्री सुरायां स्यात् स्वच्छमन्तुष्टयोस्त्रिषु" इति मेदिनी)।

(२०१) अकौतुकाः,—कौतुकं—विवाहकालिकहस्तसूत्रं, तद्रहिताः, विवाहकालपरिहितस्य कौतुकस्य समनन्तरमेव मुक्तत्वादिति भावः, विवाहितानां हि करसूत्रं बध्यते, अत्र तद्राहित्यात् अविवाहिता इति भावः, अथ च, प्रौढाः,—पूर्णयौवना इत्यर्थः; याः हि पूर्णयौवनाः, ताः कथम् अविवाहिताः? इति विरोधः;

(२०२) यत्र च प्रमदानां चक्षुरेव सहजं मुण्डमाला-मण्डनं, भारः कुवलयदलदामानि। (२०३) अलक-प्रतिविम्बान्येव कपोलतलगतानि अक्लिष्टाः श्रवणावतंसाः, पुनरुक्तानि तमालकिशलयानि। (२०४) प्रियजनकथा एव सुभगाः कर्णालङ्काराः, आडम्बरः कुण्डलादिः। कपोला एव सततम् आलोककारकाः, विभवो निशासु मणिप्रदीपाः। (२०५) निश्वासाकृष्टमधुकरकुलान्येव रमणीयं मुखावरणं, कुलस्त्रीजनाचारो जालिका। वाणी एव मधुरा वीणा, वाञ्छ-

---

कौतुकम्—औत्सुक्यं, कान्तदौर्लभ्यादिति भावः, तद्दृष्टिताः, स्वाधीनभर्तृकत्वादिति भावः, इति परिष्कारः, ("कौतुकन्त्वभिलाषे···। विवाहसूत्रगीतादिभोगयोरपि न द्वयोः" इति मेदिनी)।

(२०२) यत्रेत्यादि।—सहजम्—अकृत्रिमम्। मुण्डमालामण्डनं—मुण्डमाला—नीलोत्पलमाला एव, मण्डनं—भूषणम्। कुवलयदलदामानि—नीलोत्पलपत्र-मालिकाः, भारः,—बाह्यवस्तुभावम् इत्यर्थः; चक्षुषामेव स्त्रीणां नीलोत्पलरूपत्वादिति भावः।

(२०३) अलकेति।—अलकानां—चूर्णकुन्तलानां, प्रतिविम्बानि—छायाः, एव। अक्लिष्टाः,—हस्तावमर्षजनितक्लिष्टताशून्या इत्यर्थः, श्रवणावतंसाः,—श्रोत्रभूष-णानि। तमालकिशलयानि—तदाख्यवृक्षविशेषस्य पल्लवानि, पुनरुक्तानि—निरर्थ-कानि इति भावः।

(२०४) प्रियजनकथाः,—कान्तमख्यद्वालापाः, ["प्रियजनकथाः" इत्यत्र "प्रियकथाः" इति पाठेऽपि—अभिन्नार्थ एव] सुभगाः,—रमणीयाः, श्रुतिसुखाः इत्यर्थः. आडम्बरः,—संरम्भः, आधिक्यम् इत्यर्थः. ("आडम्बरस्तूर्यपटुप्रसंरम्भे गज-गर्जिते" इति मेदिनी)। आलोककारकाः,—स्फटिकवत् स्वच्छत्वात् इति भावः। विभवः,—ऐश्वर्यं, सम्पदिति यावत्।

(२०५) निश्वासेति।—निश्वासैः—अतिसुरभिणा इति भावः, आकृष्टानाम् —आघ्रायमाणानां, मधुकराणां—भ्रमराणां, कमलधिया पतत्यामिति भावः, कुलानि—सङ्घाः। मुखावरणं—वदनाच्छादनम्। जालिका—अवगुण्ठनवसनम्, ("·····स्त्रियास्तु वसनान्तरे। भटानामश्मरचिताङ्गरक्षित्राणे च जालिका" इति

विज्ञानं तन्त्रीताडनम्। हासा एव अतिशयसुरभयः (२०६) पटवासाः, निरर्थकाः कर्पूरपांशवः। (२०७) अधरकान्तिविसर एवोज्ज्वलतरोऽङ्गरागः, निर्गुणो लावण्यकलङ्कः कुङ्कुमपङ्कः। बाहव एव कोमलतमाः परिहासप्रहारवेल्लताः, निष्प्रयोजनानि मृणालानि। (२०८) यौवनोष्मस्वेदबिन्दव एव विदग्धाः कुचालङ्कृतयः, हारास्तु भाराः। (२०९) श्रोण एव विशालस्फाटिकशिलातलचतुरस्रा रागिणां विश्रामकारणम्, अनिमित्तं भवनमणिवेदिकाः।

मेदिनी) तन्त्रीताडनं—तन्त्री—वीणागुणः, तस्याः ताडनम्—आघातः, वीणावादनमित्यर्थः, वाद्यविज्ञानं—वाद्यं—वह्निर्गतं, विज्ञानं—विशेषेण वादित्रवादनबोधः।

(२०६) पटवासाः,—सुगन्धचूर्णविशेषाः। निरर्थकाः,—निष्प्रयोजनाः। कर्पूरपांशवः,—कर्पूररजांसि।

(२०७) अधरकान्तिविसरः,—अधरस्य लावण्यविस्तारः। निर्गुणः,—निष्फलः, लावण्यकलङ्कः,—लावण्यस्य मालिन्यापादक इत्यर्थः, कुङ्कुमपङ्कः,—कुङ्कुमद्रवः। कोमलतमाः,—अतिकोमलाः। परिहासेति।—परिहासे—क्रीडाकाले, यः प्रहारः,—ताडनं, तदर्थं वेल्लताः,—वेल्लयः।

(२०८) यौवनेति।—यौवनेन—तारुण्येन, य उष्मा—उष्णता, तेन ये स्वेदबिन्दवः,—घर्मजलकणाः। विदग्धाः,—मनोज्ञाः।

(२०९) श्रोण.,—नितम्बाः। विशालेति।—विशालं—बृहत्, यत् स्फाटिकशिलातलं—स्फाटिकमणिमयशिलापट्टं, (नितम्बानाम् अतिशुभत्वात् श्लक्ष्णत्वात् विशालत्वाच्च तथात्वं बोध्यम्) तद्वत् चतुरस्राः,—चतुष्कोणाः, रागिणां—विलासिनां, विश्रामकारणं—विश्रान्तिस्थानं, [विश्राम इति त्वपाणिनीयं, विपूर्व्वकस्य श्राम्यतेः घञि "नोदात्तोपदेशस्य—" (७।३।३४ पा०) इत्युपधावृद्धिनिषेधात्; "विश्रामकारणम्" इत्यत्र "विश्रमकारणम्" इति पाठो मनोरमः। तत्त्वबोधिनीकारास्तु—"यदि तु 'धुर्य्यान्विश्रामय' इत्यादिवच्चि वृद्धिमाश्रित्य णिलोपादेरच् क्रियते, तदा रूपं सिध्यति" इत्याहुः। "विश्रामशब्दस्तु साधुरेवौणादिकपरमौ संज्ञापूर्व्वको विधिरनित्य इति वृद्ध्यभावात्" इति तु कैयटः। "सूर्य्यविश्रामा भूमिरित्येवमादिकं प्रयोगमन्याय्यमेव मन्यन्ते" इति तु कात्यिका] नितम्बानां विशालत्वादिति भावः। अनिमित्तम्—अकारणम्।

(२१०) कमललोभनिलीनानि अलिकुलानि एव मुखराणि पदाभरणकानि, निष्कलानि इन्द्रनीलनूपुराणि। नूपुरवाङ्मता भवनकलहंसा एव समुचिताः सञ्चरणसहायाः, ऐश्वर्यप्रपञ्चाः परिजनाः।

(२११) तत्र च साक्षात् सहस्राक्ष इव सर्ववर्णधरं धनुर्दधानः, मेरुमय इव कल्याणप्रकृतित्वे, (२१२) मन्दरमय इव लक्ष्मीसमाकर्षणे, जलनिधिमय इव मर्य्यादायाम्, आकाशमय इव (२१३) शब्दप्रादुर्भावे, (२१४) शशिमय इव कलासङ्गहे, वेदमय इव अकृत्रिमालापत्वे, धरणिमय इव

(२१०) कमलेति।—कमललोभेन—पद्मं कमलमिति धिया यो लोभः,—आसङ्गाभिलाषः, तेन निलीनानि—संलग्नानि। मुखराणि—निस्वनवन्ति। इन्द्रनीलनूपुराणि—नीलकान्तमणिनिर्मितानि मञ्जीराणि। सञ्चरणसहायाः,—विचरणसङ्गिनः। ऐश्वर्यप्रपञ्चाः,—विभवविस्तारः; ऐश्वर्यप्रदर्शनार्थमिति भावः।

(२११) तत्रेति।—"तत्र" इत्यादौ "पृथग्भूतिरिति नाम्ना बभूव" इत्युत्तरेणान्वयः। सर्वेति।—सर्वे वर्णाः,—ब्राह्मणादयः, शुक्लाद्याश्च, तान् धरति—धारयति पालयति वा इति तथोक्तं, धनुः,—कार्मुकं, दधानः,—धारयन्; शक्रधनुः विविधवर्णरञ्जितं दृश्यते इति शास्त्रे उल्लेखः। कल्याणप्रकृतित्वे—कल्याणं—मङ्गलं, सुवर्णञ्च, प्रकृतिः यस्य तथात्वे।

(२१२) मन्दरमयः,—तदाख्यपर्वततात्मकः। क्षीरोदमन्थने मन्दराचलस्य मन्थनदण्डरूपतया तेनैव तत्र स्थितायाः लक्ष्म्याः समुद्धारणम्; अस्यापि शत्रुराजलक्ष्मीसमाकर्षकत्वमिति भावः। मर्य्यादायां—स्थितौ, सदाचाररक्षणे इत्यर्थः, सीमायाञ्च, ("मर्य्यादा सीमनि स्थितौ" इति मेदिनी); जलनिधिः यथा असीमा, तथा अयम् अविचलितसदाचार इति भावः।

(२१३) शब्दप्रादुर्भावे—शब्दानां—यशोविनयादिरूपाणां, घटपटादिरूपाणाञ्च, प्रादुर्भावः,—प्रकाशनं तस्मिन्; आकाशाद् यथा शब्दानां प्रादुर्भावः, "शब्दगुणमाकाशम्" इति श्रुतेः, तथा अस्मात् यशोविनयादीनां समुद्भूतिः इति भावः।

(२१४) शशिमयः,—चन्द्रमयः। कलासङ्गहे—कलाः,—चतुःषष्टिप्रकारा विद्याः, षोडशभागाश्च, तासां संग्रहः तस्मिन्। अकृत्रिमालापत्वे—अकृत्रिमः,—अक-

(२१५) लोकधृतिकरणे, पवनमय इव (२१६) सर्वपार्थिव-रजोविकारहरणे, गुरुर्वचसि, (२१७) पृथुः उरसि, विशालो मनसि, जनकः तपसि, (२१८) सुयात्रः तेजसि, सुमन्त्रो रहसि, (२१९) बुधः सदसि, अर्जुनो यशसि, भीष्मो धनुषि, निषधो वपुषि, शत्रुघ्नः समरे, (२२०) शूरः शूरसेनाऽऽक्रमणे,

पटः, सत्यमित्यर्थः, अपौरुषेयस्य, आलापः,—वचनं यस्य तथात्वे ; वेदवाक्यमिव अस्य वाक्यं सत्यमिति भावः।

(२१५) लोकधृतिकरणे—लोकानां—प्रजानां, जगतां च, धृतिः,—धैर्यं, धारणं च, तस्याः करणं—सम्पादनं, तस्मिन्।

(२१६) सर्वेति।—सर्वेषां पार्थिवानां—राज्ञां, रजोविकारस्य—रजोगुण-विकृतेः, दम्भाहङ्कारादेः इत्यर्थः ; अन्यत्र,—पार्थिवानां—पृथिवीसम्बन्धिनां, रजसां—धूलीनां, विकारस्य हरणे—अपनयने। वचसि गुरुः,—महान्, अतिसुवक्ता इति भावः, बृहस्पतिश्च।

(२१७) उरसि—वक्षसि, पृथुः,—विशालः, आदिराजविशेषश्च। मनसि विशालः,—विस्तीर्णः, उदारमना इत्यर्थः, तदाख्यो राजा च ; यद्वा,—विशालो नाम बोधिसत्त्वः, स इव शान्तमनाः। जनकः,—उत्पादकः, तदाख्यो राजा च ; यथा राजा जनकस्तपसि निरतः, तथाऽयम् इति भावः।

(२१८) सुयात्रः,—सु—शोभना, यात्रा—युद्धार्थप्रयाणं यस्य तथोक्तः, तदाख्यो नृपश्च। सुमन्त्रः,—सु—शोभनः, मन्त्रः,—कर्त्तव्यावधारणवचनं यस्य तथोक्तः, तदाख्यो दशरथमन्त्री च। रहसि—निर्जने।

(२१९) बुधः,—पण्डितः, चतुर्थग्रहश्च। सदसि—सभायाम्। अर्जुनः,—धवलः, कार्त्तवीर्यश्च, यदा,—पाण्डवश्च। भीष्मः,—भयङ्करः, शान्तनवश्च। ["भीमादयोऽपादाने" (३।४।७४ पा०) इति विशेषेः मकि सुगागमे रूपम्] धनुषि—धनुर्वेदे इत्यर्थः। निषधः,—कठिनः, तदाख्यदेशविशेषस्य राजा च, नल इत्यर्थः, तदाख्यः पर्वतो वा, नल इव रूपवान्, पर्वत इव स्थिरशरीरो वा इति भावः, ("निषधः कठिने देशे तद्राजे पर्वतान्तरे" इति मेदिनी)। शत्रुघ्नः,—शत्रुघ्नाती, रामानुजश्च।

(२२०) शूरः,—वीरः, यदुवंशीयराजविशेषश्च। शूरेति।—शूराणां—शौर्य-शालिनीनां, सेनानां—वाहिनीनां, शूरसेनस्य—देशविशेषस्य च, आक्रमणं तस्मिन्।

दक्षः प्रजाकर्मणि, सर्वादिराजतेजःपुञ्जनिर्मित इव राजा पुष्यभूतिरिति नाम्ना बभूव।

(२२१) पृथुना गौरियं क्षतेति यः स्वर्गमान इव मही महिषीं चकार। (२२२) निसर्गस्वैरिणी स्वरूपानुरोधिनी च भवति हि महतां मतिः। यतः तस्य केनचित् अनुपदिष्टा सहजैव शैशवादारभ्य अन्यदेवताविमुखी भगवति, भक्तिसुलभे, भुवनभृति, भूतभावने, भवच्छिदि, भवे भूयसी भक्तिः अभूत्। अक्षतहृषभध्वजपूजाविधिः न स्वप्नेऽपि आहारम् अकरोत्। अजम्, अजरम्, अमरगुरुम्, असुरपुररिपुम्, अपरिमितगण-पतिम्, अचलदुहितृपतिम्, अखिलभुवनक्षतचरणनतिं, पशु-पतिं प्रपन्नोऽन्यदेवताशून्यम् अमन्यत त्रैलोक्यम्। भर्तृ-

दक्षः,—निपुणः, प्रजापतिभेदश्च। प्रजाकर्मणि—प्रजापालने, प्रजोत्पादनव्यापारे च।

(२२१) पृथुनेत्यादि।—इयं—मही, गौः,—गोरूपधरा इत्यर्थः, क्षतेति स्वर्गमान इव—तं जिगीषन् इव इत्यर्थः, महिषी—"क्षताभिषेका महिषी" इति अमरोक्ता राज्ञः प्रधानपत्नी, तां, महिषस्त्रीरूपाच्च।

(२२२) निसर्गस्वैरिणी—स्वभावतः स्वेच्छाचारिणी। स्वरूपानुरोधिनी—स्वाभिमतानुवर्त्तिनी। अनुपदिष्टा—अशिक्षिता। सहजा—स्वाभाविकीत्यर्थः। भुवन-भृति—भुवनानि—जगान्ति, बिभर्त्ति—धारयति, पालयति इत्यर्थः, तस्मिन्, विश्वभर-रक्षितरि इत्यर्थः। भूतभावने—भूतान्—प्राणिनः, भावयति—वृद्धिं प्रापयति—तत्तेन विषयेषु प्रवर्त्तयति; यद्वा,—भावयति—चिन्तयति, शुभाशुभमिति भावः, यः तस्मिन्। भवच्छिदि—संसारध्वंसिनि। भवे—हरे। अजं—जन्मरहितम्। अजरं—जरारहितम्। अमरगुरुं—देवदेवम्। असुरपुररिपुं—त्रिपुरारिम्। अपरि-मितगणपतिम्—अपरिमितानाम्—असङ्ख्येयानां, गणानां—प्रमथानां, पतिः,—प्रभुः, तम्। अचलेति।—अचलस्य—नगस्य, हिमवत इत्यर्थः, दुहितुः,—तनयायाः, पार्वत्या इत्यर्थः, पतिः,—स्वामी तम्। अखिलेति।—अखिलैः,—समग्रैः, भुवनैः,—त्रैलोक्यवर्त्तिभिरित्यर्थः, क्षता चरणयोः नतिः,—प्रणामः, यस्य तम्। पशुपतिं—पशूनां—सर्व्वेषां अविशेषेण पश्यन्ति ये ते पशवः,—देवाः, सर्व्वेषु समदर्शिनः इति

चित्तानुवर्त्तिन्यश्च अनुजीविनां प्रकृतयः। तथा हि,—गृहे गृहे भगवान् अपूज्यत खण्डपरशुः। (२२३) ववुः अस्य क्ष्वेडानलज्वालाविलीयमानबहलगुग्गुलुगन्धगर्भाः क्षपनक्षीरशीकरक्षोदचारिणः (२२४) विल्वपल्लवदामदलोद्वाहिनः पुण्यालयेषु वायवः। (२२५) शिवसपर्य्यासमुचितैः उपायनैः प्राभृतकैश्च पौराः, पादोपजीविनः सचिवाः, भुजबलनिर्जिताश्च करदीकृता महासामन्ताः तं सिषेविरे। तथा हि,—

भावः, ("पशुर्मृगादिदेवाजे नाय्यं पशुदर्शने" इति मेदिनी) तेषां पतिः तम्; ईशमित्यर्थः। प्रपन्नः,—आश्रितः। खण्डपरशुः,—शिवः। ("·····शङ्करश्चन्द्रशेखरः। भूतेशः खण्डपरशुः····· ॥" इत्यमरः)।

(२२३) ववुः,—वहन्ति स्म। क्ष्वेडेति।—क्ष्वेडानलज्वालायां—क्ष्वेडकृष्णाग्निशिखायां, ["क्ष्वेडानलज्वाला—" इत्यत्र "क्ष्वेडालवाल—" इति पाठे,—क्ष्वेडार्थम् आलवालम्—आलवालाकृतिकुण्डमित्यर्थः, तस्मिन्] विलीयमानानां—द्रवतां, बहलानां—बहूनां, गुग्गुलूनां गन्धो गर्भे—मध्ये येषां तथाभूताः, क्ष्वेडार्थं मज्जलट्यो विच्छिद्यमाणानां नानाविधानां गन्धद्रव्याणां सौरभोद्भाविता इत्यर्थः; एतेन वायौ सौरभ्यं वर्णितम्। क्षपनेति।—क्षपनं—क्षालीपकरणं, यत् क्षीरं—दुग्धं, तस्य शीकरक्षोदान्—कणचूर्णान्; यद्वा,—शीकराः—बिन्दव एव, क्षोदाः,—चूर्णसदृशा इति यावत्, तान् चरन्तीति तथोक्ताः; एतेन वायौ शैत्यं वर्णितम्।

(२२४) विल्वेति।—विल्वपल्लवानां—विल्वपत्राणामित्यर्थः, दामानि—माल्यानि, तेषां दलानि—निचयानि, उद्वहन्तीति तथाविधाः; एतेन वायौ माल्यं दर्शितम्। पुण्यालयेषु—पुण्यस्थानेषु, पूजास्थानेषु इति यावत्। ["पुण्यालयेषु" इत्यत्र "पुण्यविषयेषु" इति पाठे,—पवित्रजनपदेषु इत्यर्थः, "विषयो गोचरे देशे तथा जनपदेऽपि च" इति मेदिनी]।

(२२५) शिवेति।—शिवस्य सपर्य्या—पूजा, ("पूजा नमस्यापचितिः सपर्य्या·····" इत्यमरः) तत्समुचितानि—तदुपयोगीनि इत्यर्थः, तैः, उपायनैः,—उपढौकनैः, यानि खयमानीयन्ते प्रभुप्रीतिकराणि द्रव्याणि तैः इत्यर्थः। प्राभृतकैः,—सुहृत्प्रेषितैर्द्रव्यैः इत्यर्थः। ["प्राभृतकैः" इत्यत्र "प्राभृतैः" इति पाठेऽपि अभिप्रायः एव]। करदीकृता—दण्डजाः कृताः। महासामन्ताः,—श्रेष्ठनृपतयः।

(२२६) कैलासकूटधवलैः (२२७) कनकपत्रलताऽलङ्कृत-विषाणकोटिभिः (२२८) महाप्रमाणैः सन्ध्याबलिहृषैः, सौवर्णैश्च स्नपनकलसैः, अर्घ्यभाजनैश्च, धूपपात्रैश्च, पुष्पपटैश्च, (२२९) मणियष्टिप्रदीपैश्च, ब्रह्मसूत्रैश्च, महार्हमाणिक्यखण्ड-खचितैश्च मुखकोषैः परितोषम् अस्य मनसि चक्रुः। (२३०) अन्तःपुराणि अपि स्वयम् आरब्धबालेयतण्डुलकण्ड-नानि, (२३१) देवगृहोपलेपनलोहिततरकरकिसलयानि, (२३२) कुसुमग्रथनव्यग्रसमस्तपरिजनानि तस्य अभिलषितम् अन्ववर्त्तन्त।

(२२६) कैलासेति।—कैलासस्य—रजतगिरेः, [कैलीनां समूहः इति "तस्य समूहः" (४। २। ३७ पा०) इति अण् कैल, तेनास्यतेऽत्र इत्यासधातोः "अकर्त्तरि च—" (३।३।१९ पा०) इति घञि रूपम्] कूटानि—शृङ्गाणि, तद्वत् धवलाः तैः।

(२२७) कनकेति।—कनकपत्रलताभिः,—स्वर्णनिर्म्मितपत्रभङ्गैः, अलङ्कृताः विषाणकोटयः,—शृङ्गाग्राणि येषां तैः।

(२२८) महाप्रमाणैः,—बृहदाकारैः, सन्ध्याबलिहृषैः,—सन्ध्याकालिकपूजार्थ-हृषभैः। सौवर्णैः,—काञ्चननिर्म्मितैः, स्नपनकलसैः,—स्नानसाधनकुम्भैः। अर्घ्य-भाजनैः,—अर्घ्यपात्रैः। पुष्पपटैः,—येषु वसनेषु सूत्रैः पुष्पाकृतयो विरच्यन्ते ते पुष्पपटाः, तैः। ["पुष्पपटैः" इत्यत्र "पुष्पपट्टैः" इति पाठेऽपि अविशेष एव]।

(२२९) मणियष्टिप्रदीपाः,—ज्वलन्मणिशिखाः सौवर्णयष्टयः तैः। ब्रह्मसूत्रैः, —यज्ञोपवीतैः। महार्हेति।—महार्हेण—महामूल्येन, माणिक्यखण्डेन—रत्न-शकलेन, खचितैः,—निबद्धैः, मुखकोषैः,—मुखयुक्ताः कोषाः तैः, शिवलिङ्गाच्छा-दनैः। अस्य—पुष्पभूतैः।

(२३०) अन्तःपुराणि—अवरोधवर्गाः। आरब्धेति।—आरब्धानि बालेयानि—बलिः,—पूजा, तस्मै हितानि, ["छदिरुपधिबलेर्ढञ्" (५।१।१२ पा०) इति ढञि रूपम्] तण्डुलानां कण्डनानि—शोधनविशेषाः यैः, तथाभूतानि ; यद्वा,—बालेयानां तण्डुलानां कण्डनानि यैः तथाभूतानि।

(२३१) देवेति।—देवगृहस्य—शिवमन्दिरस्य, उपलेपनेन—गोमयादिना संशोधनेन, लोहिततराः,—अतिलोहिताः, करकिसलयाः येषां तथोक्तानि।

(२३२) कुसुमेति।—कुसुमानां ग्रथने—गुम्फने, अत्र ग्रथनशब्दप्रयोगश्चिन्त्यः,

तथा च,—(२३३) परममाहेश्वरः स भूपालो लोकतः शुश्राव, भुवि भगवन्तम् अपरमिव साक्षात् दक्षमखमथनं दाक्षिण्यात्यं बहुविधविद्याप्रभावप्रख्यातैः गुणैः शिष्यैरिव अनेकसहस्रसङ्ख्यैः व्याप्तमर्त्यलोकं भैरवाचार्य्यनामानं महाशैवम्। (२३४) उपनयन्ति हि हृदयम् अदृष्टमपि जनं शीलसंवादाः ; यतः स राजा श्रवणसमकालमेव तस्मिन् भैरवाचार्य्ये भगवति द्वितीय इव कपर्दिनि दूरगतेऽपि गरीयसीं बबन्ध भक्तिम्, आचकाङ्क्ष च मनोरथैरपि अस्य सर्व्वदा दर्शनम्।

(२३५) अथ कदाचित् पर्य्यस्ते अस्ताचलचुम्बिनि वासरे अन्तःपुरवर्त्तिनं राजानम् उपसृत्य प्रतीहारी विज्ञापितवती,—"देव! द्वारि परिव्राट् आस्ते, कथयति च भैरवाचार्य्यवचनात् देवम् अनुप्राप्तोऽस्मि" इति। राजा तु तत् श्रुत्वा सादरं—"क्व असौ? आनय, अत्रैव, प्रवेशय एनम्" इति च अब्रवीत्। तथा च अकरोत् प्रतीहारी। (२३६) न चिरात् च प्रविशन्तं, प्रांशुम्, आजानुलम्बभुजं, भैक्षचाममपि स्थूलास्थिभिः अवयवैः पीवान-

---

यन्यनशब्दस्येव मृडत्वात्। व्यग्राः,—आसक्ताः, समक्षाः परिजनाः,—परिवारा येषां तानि। अन्ववर्त्तन्त—अन्वसरन्। "अभिलषितमन्ववर्त्तन्त" इत्यनेन अन्तःपुरिकाणामस्य चित्तानुवर्त्तनं प्रदर्शितम्।

(२३३) परममाहेश्वरः,—महेश्वरस्य परमभक्त इत्यर्थः। भुवि—वसुधायाम्, एतेनास्य पृथिवीख्यातेऽपि दुर्लभदर्शनत्वमुक्तम्। दक्षमखमथनं—दक्षप्रजापतेः यज्ञध्वंसनमित्यर्थः। दाक्षिण्यात्यं—दक्षिणदेशभवम्।

(२३४) उपनयन्ति—उपस्थापयन्ति। शीलसंवादाः,—चारित्रसादृश्यानि, चरित्रालोचनं वा। कपर्दिनि—शिवे। गरीयसीं—गुरुतराम्। मनोरथैरपि, किं पुनर्यत्नतः इति भावः। ["सर्व्वदा" इत्यत्र "सर्व्वथा" इति पाठान्तरम्]।

(२३५) अथेत्यादि।—पर्य्यस्ते—अवसिते। वासरे—दिवसे, दिवसनाथे इति भावः। परिव्राट्—सन्यासी। अनुप्राप्तः,—समागत इत्यर्थः।

(२३६) "न चिरात्" इत्यादौ "मस्करिणमद्राक्षीत्" इत्युत्तरेण सम्बन्धः।

मिव उपलक्ष्यमाणं, पृथुतमोत्तमाङ्गम्, (२३७) उत्तुङ्गबलिभङ्गस्थपुटललाटं, (२३८) निर्मांसगण्डकूपं, (२३९) मधुविन्दुपिङ्गलपरिमण्डलाक्षम्, (२४०) ईषदावक्रघोणम्, (२४१) अतिप्रलम्बैककर्णपाशम्, (२४२) अलाबुबीज-

---

प्रांशुम्—उन्नतकायमित्यर्थः। आजानुलम्बभुजम्—आजानु—ऊरुपर्व्वपर्य्यन्तं, लम्बौ—लम्बायमानौ, भुजौ—बाहू यस्य तं, ["जानूरुपर्व्वाऽष्टीवदस्त्रियाम्" इत्यमरः। "आजानुलम्बभुजम्" इत्यत्र "आजानुभुजम्" इति पाठान्तरम्]। भैक्षचामं—भिक्षा एव भैक्षं, तेन चामं—क्षीणम्। पीवानमिव—स्थूलम् इव। ["ध्याख्यी: सम्प्रसारच्च" (उ० ४ पा० ११४ सू०) इति प्यैधातोः क्तनिपि सम्प्रसारणे रूपम्। "पीवानम्" इत्यत्र "पीवरम्" इति पाठेऽपि स एवार्थः। "पीनपीवरौ तु स्थूलपीवरे" इत्यमरः]। पृथुतमोत्तमाङ्गं—बृहन्मस्तकम्। ["पृथुतमोत्तमाङ्गम्" इत्यत्र "पृथूत्तमाङ्गम्" इति पाठेऽपि स एवार्थः]।

(२३७) उत्तुङ्गेति।—उत्तुङ्गा—दीर्घा, बलिभङ्गा यत्र तादृशं, स्थपुटं—निम्नोन्नतं, ललाटं—भालदेशः यस्य तथोक्तम्।

(२३८) निर्मांसेति।—निर्मांसौ—मांसशून्यौ, अस्थिमयावित्यर्थः, गण्डौ—कपोलौ कूपाविव यस्य तथोक्तम्। ["निर्म्मांसगण्डकूपम्" इत्यत्र "निर्म्मांसगण्डकूपकम्" इति पाठेऽपि स एवार्थः। कूप एवेति कूपकम्]।

(२३९) मधुविन्दुवत् पिङ्गलं परिमण्डलं—गोलकं ययोः तथाभूते, अक्षिणी—नेत्रे यस्य तं, पिङ्गलाक्षमित्यर्थः। ["बहुव्रीहौ—" (५।४।११३ पा०) इत्यादिना षचि रूपसिद्धिः]।

(२४०) ईषदिति।—ईषत् आवक्रा घोणा—नासिका यस्य तम्। ("घोणा नासा च नासिका" इत्यमरः)।

(२४१) अतीति।—अति—अतिशयेन, प्रलम्बः,—लम्बमानः, एकः कर्णपाशः,—कुत्सितकर्ण इत्यर्थः, यस्य तथोक्तम्, अतिशयेन लम्बमानत्वादशोभनदर्शन इति भावः। "पाशः केशादिपूर्व्वः स्यात् तत्सङ्गे कर्णपूर्व्वकः। सुकर्णे च·····॥" इति मेदिनीवचनमनुसृत्य "कर्णपाशः शोभनकर्णः" इति केषाञ्चिद्व्याख्यानं न मनोरमम्, अतिलम्बमानस्यैकस्यैव कर्णस्य शोभनदर्शनत्वासम्भवात्।

(२४२) अलाबुबीजवत्—तुम्बीबीज इव, ("तुम्बलाबू उभे

विकटोन्नतदन्तपङ्क्तिं, (२४३) तुरगानूकश्रथाधरलेखं, (२४४) लम्बचिबुकायततरलपनम्, (२४५) अंसावलम्बिना काषायेण योगपट्टकेन विरचितवैकक्षकं, (२४६) हृदयमध्यनिबद्धग्रन्थिना च रागिणेव खण्डशः कृतेन धातुरसारुणेन कर्पटेन कृतोत्तरासङ्गं, (२४७) पुनरुक्तबालप्रग्रहवेष्टननिश्चलमूलेन (२४८) बद्धमृत्परिशोधनवंशत्वक्कृतितउना (२४९) कौपीन-

समे" इत्यमरः) विकटा—कराला, उन्नता च, दन्तपङ्क्तिः,—दशनावली यस्य, तम्।

(२४३) तुरगेति।—तुरगस्य अनूकः,—अधोगत ओष्ठः, तद्वत् श्रथा—शिथिला, लम्बमाना इत्यर्थः, अधरलेखा यस्य तम्।

(२४४) लम्बेति।—लम्बेन चिबुकेन—अधराधोभागेन, आयततरम्; यदा,—लम्बं चिबुकं यस्य तथाभूतम्, आयततरम्—अतिदीर्घं, लपनं—मुखं यस्य तथोक्तम्।

(२४५) अंसावलम्बिना—स्कन्धावलम्बिना, काषायेण—कषायरञ्जितेन, योगपट्टकेन—उपवीतकाकारेण योगसाधनेन पट्टवसनखण्डेन इत्यर्थः, विरचितं वैकक्षकं—तिर्यक् वक्षोलम्बा हारविशेषो येन तम्। ("...वैकक्षकन्तु तत्। यत् तिर्यक् चिप्तमुरसि..." इत्यमरः)।

(२४६) हृदयेति।—हृदयस्य—उरसः, मध्ये निबद्धः,—रचितः, ग्रन्थिः,—बन्धनविशेषः, यस्य तथोक्तेन। रागिणेव—विषयानुरागिणेव, धातुरसारुणेन—गैरिकारुणेन इत्यर्थः. कर्पटेन—नक्षकेन, छिन्नवस्त्रेणेत्यर्थः, ("समौ नक्षककर्पटौ" इत्यमरः)। कृतोत्तरासङ्गं—कृतः,—विहितः, धृत इत्यर्थः, उत्तरासङ्गः,—उत्तरीयं येन तथोक्तम्।

(२४७) पुनरुक्तेति।—पुनरुक्तेन—पुनः पुनः आवृत्तेन इत्यर्थः, बालेन—नूतनेन, अश्ववालधिकृतेन वा इत्यर्थः, प्रग्रहेण—रज्ज्वा, यद्वेष्टनं, तेन निश्चलं—स्थिरं, मूलं यस्य तेन।

(२४८) बद्धेति।—बद्धः,—रचितः इत्यर्थः, मृदां—मृत्तिकानां, शिवलिङ्गादिनिर्माणसाधनानाम् इति भावः, परिशोधनाय—परिमार्जनाय, वंशत्वचा—वेणुवल्कलेन, कृतः इति शेषः, तितउः,—चालनी यस्य तेन, ("चालनी तितउः पुमान्" इत्यमरः)।

(२४९) कौपीनेति।—कौपीनेन—चीरवस्त्रेण, गुह्यप्रदेशावरणेनेत्यर्थः,

सनाथग्रिखरेण (२५०) खर्जूरपुटसमुद्गकगर्भीकृतभिक्षा-कपालकेन (२५१) दारवफलकत्रयविकोणत्रियष्टिनिविष्ट-कमण्डलुना (२५२) वर्हिरूपपादितपादुकाऽवस्थानेन (२५३) स्थूलदशासूत्रनियन्त्रितपुस्तिकापुलकेन (२५४) वाम-करधृतेन योगभारकेण अध्यासितस्कन्धम्, (२५५) इतरकर-गृहीतवेत्रासनं, मस्करिणम् अद्राक्षीत्।

("कौपीनं स्यादकार्य्येऽपि चीरगुह्यप्रदेशयोः" इति मेदिनी) सनाथं—युक्तं, ग्रिखरम् —अग्रभागः यस्य तेन।

(२५०) खर्जूरेति।—खर्जूरस्य—इक्षुभेदस्य, पुटैः,—श्लिष्टैः, पत्रैरित्यर्थः, रचितः इति भावः, समुद्गकः,—सम्पुटकः, पात्रविशेष इत्यर्थः, ("समुद्गकः सम्पुटकः" इत्यमरः) तस्य गर्भीकृतं—गर्भे स्थापितम् इत्यर्थः, भिक्षाकपालकं—भिक्षा-पात्रमित्यर्थः, यस्य तथोक्तेन।

(२५१) दारवेति।—दारुण इदं दारवं—काष्ठसम्बन्धीत्यर्थः, यत् फलकत्रयं —पट्टकत्रयं, तस्मिन् ये त्रयः कोणाः,—कोणत्रयं, तेषु याः तिस्रो यष्टयः,—दण्डाः, तासु निविष्टः कमण्डलुर्यस्य तेन।

(२५२) वर्हिरिति।—वर्हिः,—बाह्यदेशं, उपपादितं—सम्पादितं, पादु-कार्थाः,—उपानहौ:, अवस्थानं—स्थापनमित्यर्थः, यस्य तेन।

(२५३) स्थूलेति।—स्थूलैः,—दृढैः, पीवरैर्वा, दशासूत्रैः,—वसनाखण्ड-तन्तुभिः, नियन्त्रितं—निबद्धं, पुस्तिकापुलकं—क्षुद्रपुस्तकसमूहः यत्र तेन। ["पुस्तिका-पुलकेन" इत्यत्र "पुस्तिकापुलिकेन" इति पाठेऽपि स एवार्थः]।

(२५४) वामकरधृतेन—वामहस्तगृहीतेन, योगभारकेण—योगसाधनद्रव्यसञ्चय-रूपया, भाण्डागारिकया वा; अध्यासितः,—सन्निवेशितः, स्कन्धः,—अंसः, यस्य तम्।

(२५५) इतरेति।—इतरेण—दक्षिणेनेत्यर्थः, करेण गृहीतं वेत्रासनं, स्थाने स्थाने विश्रामार्थम् इति भावः। मस्करिणं—परिव्राजकम्। ["भिक्षुः परिव्राट् कर्मन्दीपाराशर्य्योऽपि मस्करी" इत्यमरः। "मस्करमस्करिणौ—" (६।१।१५४ पा०) इति मकारशब्दस्य सुडिनौ निपात्येते इति दीक्षितः। "मस्करोऽस्यास्तीति मत्वर्थीयेन इनिना एतत्सिद्धम्"; "अयं मा लुत अयं मा लुत, इत्युपक्रम्य आपस्तः काम्यकर्म्मपरिहाणिर्युष्माक श्रेयसीत्युपदेष्टा मस्करीत्युच्यते" इति भाष्य-कैयटयोर्विरोधे, मस्करो ज्ञानमस्यास्तीति, मा कार्षुः शोभनस्य इति वा विग्रहः]।

क्षितिपतिरपि (२५६) उपगतम् उचितेन च एनम् आदरेण अन्वग्रहीत्; आसीनश्च पप्रच्छ,—"क्व भैरवाचार्यः?" इति। सादरनरपतिवचनमुदितमनास्तु परिव्राट् तम् (२५७) उपनगरं सरस्वतीतटवनावलम्बिनि शून्यायतने स्थितम् आचचक्षे। भूयश्च आबभाषे,—"अर्चयति हि (२५८) महाभागं भगवान् आशीर्वचसा" इत्युक्त्वा च उपनिन्ये योगभारकात् आक्रम्य भैरवाचार्यप्रहितानि रत्नवन्ति बहुलालोकलिप्तान्तःपुराणि पद्म राजतानि पुण्डरीकाणि।

(२५९) नरपतिस्तु प्रियजनप्रणयभङ्गकातरो दाक्षिण्यम् अनुरुध्यमानो ग्रहणलाघवञ्च लङ्घयितुम् असमर्थो दोलायमानेन मनसा स्थित्वा कथंकथमपि अतिसौजन्यनिघ्नः तानि जग्राह; जगाद च,—"सर्वफलप्रसवहेतुः शिवभक्तिरियं नः,

(२५६) उपगतम्—उपस्थितम्। उचितेन—अनुरूपेण। एनं—सत्कारेण। तं—भैरवाचार्यम्।

(२५७) उपनगरं—नगरसमीपे। सरस्वतीति।—सरस्वत्याः,—तदाख्यायाः नद्याः, तटे—तीरदेशे, यद्वनं, तदवलम्बते इति तथोक्ते, सरस्वतीतीरस्थवनमध्ये इति भावः। शून्यायतने—शून्यदेवालये इत्यर्थः।

(२५८) महाभागं—भाग्यवन्तं, महाप्रभावं वा। उपनिन्ये—अर्पितवान्। बहुलेति।—बहुलेन—प्रभूतेन, आलोकेन—उद्योतेन, लिप्तम्—उद्भासितम्, अन्तःपुरं—गृहान्तः, यैः यैषां वा तानि, रत्नवन्ति—मणिखचितानि, राजतानि—रौप्यमयानि, पुण्डरीकाणि—पद्मानि।

(२५९) नरपतिरित्यादि।—प्रियेति।—प्रियजनस्य—प्रीतिभाजनस्य, भैरवाचार्यस्येत्यर्थः, प्रणयभङ्गः,—अप्रहणे प्रार्थनाभङ्गः, तेन कातरः,—कथं तादृशस्य प्रणयभङ्गं करोमि? इति व्याकुल इत्यर्थः। दाक्षिण्यम्—औदार्यम्, अनुरुध्यमानः,—अनुसरन्, ग्रहणलाघवं—ग्रहणे लाघवं—लघुताम्; दत्तवस्तुग्रहणं स्वयं बलात् निहतूनां पूराणां लज्जाकरत्वादिति भावः। लङ्घयितुम्—अतिक्रमितुं, स्वीकर्तुमिति भावः। दोलायमानेन—किंकर्तव्यविमूढतया गृह्णामि नवेति संशयितेनेत्यर्थः। कथंकथमपि—अतिक्लेशेनेत्यर्थः। अतिसौजन्यनिघ्नः,—अतिसौजन्यवशंवदः। नः,—

यया मनोरथदुर्लभानि फलन्ति फलानि, यया च अस्मासु प्रीयते भगवान् भुवनगुरुर्भैरवाचार्यः। स्रो द्रष्टास्मि भगवन्तम्" इत्युक्त्वा च मस्करिणं व्यसर्जयत्; अनया च वार्त्तया परां मुदम् अवाप।

(२६०) अपरेद्युश्च प्रातरेव उत्थाय वाजिनम् अधिरुह्य, (२६१) समुच्छ्रितश्वेतातपत्रः (२६२) समुड्डूयमानधवल-चामरयुगलः कतिपयैरेव राजपुत्रैः परिवृतो भैरवाचार्यं सवितारमिव शशी द्रष्टुं प्रतस्थे। गत्वा च किञ्चित् अन्तरं (२६३) तदीयमेव अभिमुखम् आपतन्तम् अन्यतमं शिष्यम् अद्राक्षीत्; अप्राक्षीच्च,—"क्व भगवान् आस्ते?" इति।

अस्माकम्। यया—शिवभक्त्या इत्यर्थः। ["नः, यया मनोरथ—" इत्यत्र "नः मनोरथ—" इति पाठान्तरम्]। मनोरथदुर्लभानि—मनोरथेनापि दुर्लभानि—दुष्प्रापाणि। फलन्ति—प्रसवन्ति, भवन्ति इत्यर्थः। यया—शिवभक्त्या इत्यर्थः ["यया च" इत्यत्र "येनैवम्" इति पाठे,—येन—फलनेनेत्यर्थः] स्वः,—परदिने। द्रष्टास्मि—अवलोकिताऽहं, [दृशधातोर्लुटि उत्तमपुरुषैकवचनस्य रूपमिदम्]। वार्त्तया—हृत्तान्तेन, भैरवाचार्यप्रसादरूपेणेति भावः।

(२६०) अपरेद्युरित्यादि।—अपरेद्युः,—अपरस्मिन् दिवसे, ["सद्यः परुत्-परार्ध्यैषमः—" (५।३।२२ पा०) इति निपातनात् सिद्धम्] वाजिनम्—अश्वम्।

(२६१) समुच्छ्रितेति।—समुच्छ्रित—समुद्धृतं, समुन्नतं वा, श्वेतं—शुभ्रम्, आतपत्र—छत्रं यस्य तथाभूतः।

(२६२) समुड्डूयमानेति।—समुड्डूयमानं—संवीज्यमानं, धवलं—श्वेतं, चामर-युगलं यस्य तथोक्तः। सवितारमिव—सूर्यमिव। शशी—चन्द्रः। "सवितारमिव शशी" इत्यनेन भैरवाचार्यस्य अतीव तेजस्वित्वं राज्ञश्च लोकरञ्जकत्वं ख्यापितम्। किञ्च, शशी यथा सूर्यप्रभयैव पुष्टः प्रभान्वितो जायते, राजाऽपि तथा भैरवाचार्यप्रसादेन बहुधनं लब्ध्वा प्रभाववान् सञ्जातः।

(२६३) तदीयमेव—भैरवाचार्यसम्बन्धिनमेवेत्यर्थः। अभिमुखं—स्वसम्मुखम्। आपतन्तम्—आगच्छन्तम्। अन्यतमम्—अपरम्। शिष्यम्—अन्तेवासिनम्। अद्राक्षीत्—ददर्श, [दृशर्लुङि प्रथमपुरुषैकवचनरूपम्]।

सोऽकथयत्,—"अस्य (२६४) जीर्णमातृगृहस्य उत्तरेण विल्ववाटिकाम् अध्यास्ते" इति। गत्वा च तं प्रदेशम् (२६५) अवततार तुरङ्गमात्, प्रविवेश च विल्ववाटिकाम्।

(२६६) अथ महतः कार्पटिकवृन्दस्य मध्ये प्रातरेव स्नातं, (२६७) दत्ताष्टपुष्पिकम्, अनुष्ठिताग्निकार्य्यं, (२६८) कृतभस्मचयपरिहारपरिकरे (२६९) हरितगोमयोपलिप्तक्षितितलवितते

(२६४) जीर्णमातृगृहस्य—पुरातनदेवीमन्दिरस्येत्यर्थः, ["एनया द्वितीया" (२।३।३१ पा०) इति एनपेति योगविभागात् षष्ठी] उत्तरेण—उत्तरस्यां दिशि। विल्ववाटिका—विल्ववृक्षशोभितवाटीमित्यर्थः।

(२६५) अवततार—अवारुरोह। ["अवततार तुरङ्गमात्" इत्यत्र "अवततार" इति न्यूनपाठो दृश्यते]।

(२६६) अथेत्यादि।—"अथ" इत्यादौ "भैरवाचार्य्यं ददर्श" इत्युत्तरेणान्वयः। कार्पटिकवृन्दस्य—कर्पटं—चीरवस्त्रं पारदधति इति कार्पटिकाः,—कौपीनधारिणः, तेषां वृन्दस्य—समूहस्य, व्रतिसमूहस्य इत्यर्थः।

(२६७) दत्ताष्टपुष्पिक—दत्ताः, इष्टदेवायेति भावः, अष्टौ पुष्पिकाः,—पद्मादयः येन तम्; यद्वा,—अष्टौ पुष्पाण्येव अष्टपुष्पिकाः; अष्टानां पुष्पिकाणां समाहारः, इति अष्टपुष्पिकं, समाहारद्विगुसमासाश्रयणादध्यवसेयम्; तत्र प्रभृति गन्धप्रधानं पार्थिवम्, अर्घ्यस्नानादिकं रसप्रधानमाप्यं, प्रदीपाभरणप्रभादिरूपप्रधानं तैजसम्, अनुलेपनप्रभृति स्पर्शप्रधानं वायवीयं, सुषिरातोद्यगीतादिकं शब्दप्रधानमाकाशीयम्, अनुध्यानं मानसम्, अस्ति सर्व्ववैश्वर इति निश्चयो बोद्धम्, अहमेवेश्वर इत्याहङ्कारिकम्; अथवा,—आसनवर्गप्रभृतिषु अष्टसु प्रत्येकमष्टपुष्पिकाः। अनुष्ठिताग्निकार्य्यं—कृतहोमविधानम्।

(२६८) कृतेति।—कृतः भस्मचयपरिहारस्य—भूतिसमूहसम्मार्जनस्य, परिकरः,—प्रक्रिया यस्य तस्मिन्, भस्मराशिरहिते इति भावः। ["कृतभस्मचय—" इत्यत्र "कृतभस्मरेखा—" इति पाठे,—कृतः भस्मरेखायाः,—भस्मबिन्दोरपि, परिहारस्य परिकरो यस्य; यद्वा,—कृतः भस्मनां रेखायाः,—दण्डाकृतिचिह्नविशेषस्य, परिहारः,—त्यागः, विन्यास इत्यर्थः, व्याघ्रचर्म्मस्थापनस्य सीमानिर्देशार्थमिति भावः, तस्य परिकरः यस्य तस्मिन्]।

(२६९) हरितेति।—हरितेन—श्यामलेन, सरसेनेति भावः, गोमयेन

व्याघ्रचर्मणि उपविष्टं, (२७०) कृष्णकम्बलप्रावरणनिभेन (२७१) असुरविवरप्रवेशाशङ्कया पातालान्धकारावासमिव अभ्यस्यन्तम्, उन्मिषता विद्युत्कपिलेन आत्मतेजसा (२७२) मद्दामांसविक्रयक्रीतेन मनःशिलापङ्केनेव शिष्यलोकं लिम्पन्तं, (२७३) जटीकृतैकदेशलम्बमानरुद्राक्षशङ्खगुटिकेन ऊर्ध्ववद्धेन शिखापाशेन बध्नन्तमिव (२७४) विद्याऽवलेपदुर्विदग्धान् उपरि

उपलिप्तं—श्रोधितम् इति भावः, चितितलं—भूतलं, तस्मिन् वितते—विस्तृते तस्मिन्।

(२७०) कृष्णकम्बलेति।—कृष्णवर्णं कम्बलम् एव प्रावरणं—गात्राच्छादनं, तस्य निभः,—कल्पं, तदेव निभः,—कल्पं वा तेन। ("निभस्तु कथितो व्याजे पुंलिङ्गः सदृशे त्रिषु" इति मेदिनी)।

(२७१) असुरेति।—असुरविवरं—पातालं, तस्मिन् प्रवेशः, तस्य आशङ्का—वितर्कः, सम्भावना इत्यर्थः, तया। पातालेति।—पातालं यः अन्धकारः, तत्र आवासं—स्थितिमित्यर्थः। अभ्यस्यन्तं—शिक्षमाणम्। उन्मिषता—स्फुरता, विद्युत्कपिलेन—तड़ित्पिङ्गलेन, आत्मतेजसा—निजज्योतिषा।

(२७२) मद्दामांसेति।—मद्दामांसं—नरमांसं, तस्य विक्रयः,—विक्रयलब्धं धनम् इत्यर्थः, तेन क्रीतः तेन; यद्वा,—विक्रयः,—विनिमयः, तेन क्रीतः तेन। मनःशिलापङ्केन—मनःशिला—उपधातुविशेषः, तस्याः पङ्कः,—द्रव इत्यर्थः, तेन। शिष्यलोकम्—अन्तेवासिजनम्।

(२७३) जटीति।—अजटा जटा सम्पाद्यमानः जटीकृतः, एकदेशः,—एकांशः, तस्मिन् लम्बमाना रुद्राक्षाः,—जपमाल्यविशेषाः, शङ्खगुटिकाः,—शङ्खनिर्मितगुटिकाश्च, जपसाधना इति भावः; यद्वा,—रुद्राक्षवत् शङ्खगुटिका, यस्मिन् तथोक्तेन; यद्वा,—शङ्खगुटिकाः,—शङ्खाः,—ललाटास्थि, ("शङ्खौ निधौ ललाटास्थ्नि" इत्यमरः) तत्कृता गुटिकाः; ग्रैवाः ललाटास्थ्ना जपमालां कुर्वन्ति इति व्यवहारः। ऊर्ध्ववद्धेन—उन्नम्य नियमितेन, शिखापाशेन—शिखारूपरज्ज्वा। ["प्रग्रहा शिखा शिखापाशः" इति केनचिद् व्याख्यातं, तन्न समीचीनं, "पाशः कुत्सायाम्" इति वीपदेवीयसूत्रेण कुत्स्यार्थे एव पाशप्रत्ययस्य विधानात्]।

(२७४) विद्येति।—विद्यया योऽवलेपः,—अहङ्कारः, तेन दुर्विदग्धाः,

सञ्चरतः सिद्धान्, (२७५)धवलकतिपयशिरोरुहेण शिरसा पञ्च-पञ्चाशतं वर्षाण्यतिक्रामन्तं, (२७६) खालित्यचीयमाणशङ्क-लोमलेखं, (२७७) लोमशकर्णशष्कुलीप्रदेशं, पृथुललाटतटं, तिरश्चा भस्मललाटिकया बहुशः (२७८) शिरोर्द्धृतदग्ध-गुग्गुलुसन्तापस्फुटितकपालास्थिपाण्डुरराजिशङ्कामिव जनयन्तं, (२७९) सहजललाटवलिभङ्गसङ्कोचितकूर्चभागं बभ्रुभासं

—दुर्विनीता नाम्। उपरि—आकाशे इत्यर्थः। सञ्चरतः,—परिभ्रमतः, सिद्धान्—देवयोनिविशेषान्।

(२७५) धवलेति।—धवलाः,—श्वेताः, कतिपये शिरोरुहाः,—केशा यस्मिन् तथोक्तेन, शिरसा—मस्तकेन, ["शिरसा" इत्यत्र "वयसा" इति पाठे,—वयसा—जीवनकालेन, जरयेति भावः।

(२७६) खालित्येति।—खलितिः,—खल्वाटः, तस्य भावः खालित्यम्, इन्द्लुप्तमित्यर्थः, तेन चीयमाणा शङ्कस्य—ललाटास्थेः, लोमलेखा—केशनिचयः यस्य तथोक्तम्।

(२७७) लोमशेति।—लोमशः,—लोमाकीर्णः, ["लोमादि—" (५।२।१०० पा०) इत्यादिना शेप्रत्ययं रूपम्] कर्णशष्कुली—कर्णकुहरं, तस्याः प्रदेशः,—एकदेशः यस्य तम्। पृथुललाटतटं—विशालभालदेशम्। तिरश्चा—तिर्यग्वर्त्तिन्या, ललाटिकया—ललाटभूषणेन, तिलकविशेषेण इत्यर्थः।

(२७८) शिर इति।—शिरस ऊर्द्धं शिरोर्द्धं, [निपातनात् सकारलोपः] तस्मिन् धृतानां दग्धानां गुग्गुलूनां—गन्धद्रव्यभेदानां, सन्तापेन—उत्तापेन, स्फुटितानि यानि कपालास्थीनि—कपालान्येव अस्थीनि—मस्तकास्थीनि इत्यर्थः,("कपालोऽस्त्री शिरोऽस्थि स्यात् घटार्द्धः शकले व्रजे" इति मेदिनी) तेषां पाण्डुरा—धवला, राजिः,—आवलिः, तस्याः शङ्कां ताम् इव।

(२७९) सहजेति।—सहजेन—स्वाभाविकेन, ललाटे या वलिभङ्गः,—तरङ्गितचर्म्मरेखाविशेषः, तेन सङ्कोचितः,—ह्रस्वतां प्रापितः इत्यर्थः, कूर्चभागः,—भ्रूमध्यभागः यस्य तथोक्तम्। ["कूर्चमस्त्री भ्रुवोः मध्यम्" इत्यमरः। "कूर्चभागम्" इत्यत्र "कूर्चभागाम्" इति पाठे,—सङ्कोचितः कूर्चभागः यस्याः यद्वा ताम्; अस्मिन् पक्षे,—"भ्रूलेखाम्" इत्यस्य विशेषणमेतत्]। बभ्रुभासं—पिङ्गलकान्तिम्।

(२८०) भ्रूसङ्क्रत्या निरन्तराम् आयामिनीम् एकामिव भ्रूलेखां बिभ्राणम्, ईषत्काचरकनीनिकेन (२८१) रक्तापाङ्गेन निर्गतांशुप्रतानेन मध्यधवलभासा इन्द्रायुधेनेव अतिदीर्घेण लोचनयुगलेन परितो महामण्डलमिव अनेकवर्णरागम् आलिखन्तं, (२८२) सितपीतलोहितपताकावलीशबलं, शिवबलिमिव दिक्षु विक्षिपन्तं, (२८३) तार्क्ष्यतुण्डकोटिकुञ्जायघोणं, (२८४) दूरविदीर्णस्रुक्कसङ्क्षिप्तकपोलं, किञ्चित् दन्तुरतया सदा हृदयसन्निहितहरमौलिचन्द्रातपेनेव निर्गच्छता दन्तालो-

(२८०) भ्रूसङ्क्रत्येति।—भ्रुवोः सङ्क्रतिः,—सम्मेलनं तया, निरन्तराम्—अविच्छिन्नाम्, आयामिनीम्—आयताम्। भ्रूलेखां—भ्रुवौ रेखाम्। ईषदिति।—ईषत् काचरा—पीतवर्णा, कनीनिका—मध्यतारा यस्य तेन। ["ईषत्काचर—" इत्यत्र "ईषत्काचकाचर—" इति पाठे,—ईषत् काचेन—नेत्ररोगविशेषेण, काचरा इत्यर्थः]।

(२८१) रक्तापाङ्गेन—श्वेतप्रान्तदेशेन। निर्गतेति।—निर्गता अंशूनां—किरणानां, प्रतानाः,—प्रसराः यस्मात् तेन। ["रक्तापाङ्गेन निर्गतांशुप्रतानेन" इत्यत्र "रक्तापाङ्गनिर्गतांशुप्रतानेन" इति समस्तपाठे,—रक्तात्—रक्तवर्णात्, अपाङ्गात्—प्रान्तदेशात्, निर्गताः अंशुप्रताना यस्य तेन]। मध्येति।—मध्ये धवला भासा—प्रभा यस्य तेन। इन्द्रायुधेनेव—शक्रधनुषा इव। अतिदीर्घेण—आकर्णविस्तृतेनेति भावः। परितः,—समन्तात्, महामण्डलं—सर्वतोभद्रादिरूपं यत्तमिवेत्यर्थः। अनेकेति।—अनेकैः,—विविधैः, वर्णैः रागः,—रञ्जनं यत्र तम्।

(२८२) सितेति।—सिता—श्वेता, पीता—हरिद्राभा, लोहिता—रक्ता च, याः पताकाः,—वैजयन्त्यः, तासाम् आवल्यः,—श्रेण्यः, ताभिः शबलं—विविधवर्णरञ्जितमित्यर्थः, नेत्रयुगलस्य प्रागुक्तविविधवर्णशालित्वात् इति भावः। शिवबलिं—शिवपूजाविधिम्।

(२८३) तार्क्ष्येति।—तार्क्ष्यः,—गरुडः, ("गरुत्मान् गरुडस्तार्क्ष्यः" इत्यमरः) तस्य तुण्डकोटिः,—मुखाग्रं, चञ्चुरयम् इत्यर्थः, तद्वत् कुञ्जम्—उन्नतपृष्ठमित्यर्थः, अयघोणं—घोणा—नासिका, तस्या अग्रं यस्य तथोक्तम्।

(२८४) दूरेति।—दूरम्—अत्यन्तं, विदीर्णाभ्यां—विस्तृताभ्यां, स्रुक्काभ्याम्—ओष्ठप्रान्ताभ्यां, ("प्रान्तावोष्ठस्य स्रुक्कणी" इत्यमरः) संक्षिप्तौ—सङ्कोचितौ, कपोलौ

केन धवलयन्तं दिशां चक्रवालं, (२८५) जिह्वाग्रस्थितसर्वशैव-संहिताऽतिभारेणेव मनाक् प्रलम्बितोष्ठं, (२८६) प्रलम्बश्रवण-पालीप्रेङ्खिताभ्यां स्फाटिककुण्डलाभ्यां शुक्रबृहस्पतिभ्यामिव सुरासुरविजयविद्यासिद्धिश्रद्धया अनुबध्यमानं, (२८७) बहु-विविधौषधिमन्त्रसूचपङ्क्तिना सल्लाहवलयेन एकप्रकोष्ठेन शङ्खखण्डं (२८८) पूष्णो दन्तमिव भगवता भवेन भग्नं भक्त्या

—गङ्गा यस्य तम्। किंचिदूनरतया—ईषद्धोर्घदत्वेन, सदा हृदये सन्निहितस्य—अवस्थितस्य, हरस्य मौलौ—शिरसि, यः चन्द्रः, तस्य आतपः,—आलोकः तेन इव। निर्गच्छता—बहिर्गच्छता, दन्तालोकेन—दशनप्रभया, दिशां चक्रवालं—मण्डलं, ["चक्रवालम्" इत्यत्र "जालकम्" इति पाठे,—समूहमित्यर्थः] धवलयन्त—श्वेत-यन्तम्।

(२८५) जिह्वेति।—जिह्वायाः,—रसनायाः, ["शैवायशङ्खजिह्वायीवाऽऽग्रमीवाः" (उ० १ पा० १५४ सू०) इति लिङ्धातोः वन्प्रत्यये निपातनात् सिद्धम्] अग्रे स्थिताः याः सर्वाः शैवसंहिताः,—शिवचरितगाथाः, तासाम् अतिभारेणेव मनाक्—ईषत्, प्रलम्बितः ओष्ठः यस्य तथोक्तम्।

(२८६) प्रलम्बेति।—प्रलम्बयोः,—प्रकर्षेण लम्बमानयोः, श्रवणपाल्योः,—कर्णरेखयोः, प्रेङ्खिते—आन्दोलिते ताभ्याम्। स्फाटिककुण्डलाभ्यां—स्फटिकमणि-निर्मितकर्णभूषणाभ्याम्। शुक्रबृहस्पतिभ्यां—भार्गवजीवाभ्याम् इव। सुरेति।—सुराणां—देवानां, शुक्रेणेति भावः, असुराणां—दैत्यानां, बृहस्पतिनेति भावः, विजयाय—पराजयार्थं, विजयसाधनीत्यर्थः, या विद्या—मन्त्रादिरूपा इत्यर्थः, तस्याः सिद्धिः,—साधनं, प्राप्तीच्छा इति यावत्, तया या श्रद्धा—आदरः, तया। अनुबध्य-मानम्—अनुगम्यमानम्।

(२८७) बहुेति।—बहवः विविधानाम् औषधीनां मन्त्राणाञ्च सूचपङ्क्तिः यस्मिन् तथोक्तेन, सल्लोहवलयेन—लोहवलयाख्येन, एकप्रकोष्ठेन—एकेन कूर्पर-मणिबन्धयोः अन्तरदेशेन, ("प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च" इति मेदिनी)। शङ्खखण्डं—कम्बुशकलम्।

(२८८) पूष्ण,—सूर्यस्य। दन्तमिव—रदम् इव। भवेन—हरेण। भग्नं—पाटितम्। भक्त्या—श्रद्धाविशेषेणेत्यर्थः। हरकरस्पर्शेन दन्तस्य पावित्र्यात् तत्र भक्तिर्ज्ञातव्या। पुरा दक्षस्य प्रजापतेः यज्ञे हरनिन्दाश्रवणे पूष्णा जहासे, तेन

भूषणीकृतं कलयन्तम्, (२८९) अखिलरसकूपोदञ्चनघटीयन्त्रमालाम् इव रुद्राक्षमालां दक्षिणेन पाणिना भ्रमयन्तम्, उरसि दोलायमानेन आपिङ्गलाग्रेण कूर्चकलापेन सम्मार्ज्यन्तमिव अन्तर्गतं निजरजोनिकरम्, (२९०) अतिनिविड़नीललोममण्डलनिचितञ्च ध्यानलब्धेन ज्योतिषा दग्धमिव हृदयदेशं दधानम्, (२९१) ईषत्प्रशिथिलबलिवलयबध्यमानतुन्दम्, (२९२) उपचीयमानस्फिङ्मांसपिण्डकं, (२९३) पाण्डुरपवित्रचौमावृतकौपीनं, (२९४) सावष्टम्भपर्य्यङ्कबन्ध-

अतिकृपितो हरः तस्य दन्तपाटीं चपेटप्रहारेण भञ्जति पुराणवार्त्ता। कलयन्तं—धारयन्तम्।

(२८९) अखिलेति।—अखिलस्य—समग्रस्य, रसस्य—जलस्य, अनुरागस्य च, कूपं प्रति इति भावः; कूपात्—जलाधारविशेषात्, संसारकूपाच्चेति भावः। उदञ्चनाय—उद्धरणाय, घटीयन्त्रमालाम् इव—घटीयन्त्रराजिम् इव; कूपात् जलोद्धरणार्थं घटीयन्त्रमाला भ्रम्यते इति लोकव्यवहारः। उरसि—वक्षसि। आपिङ्गलाग्रेण—ईषत्कापिशायेण, कूर्चकलापेन—श्मश्रुनिचयेन इत्यर्थः; कलापग्रहणं सम्मार्ज्जनौपयिकार्थम्। सम्मार्ज्जयन्तं—संशोधयन्तम्। अन्तर्गतं—हृदिस्थमित्यर्थः। निजरजोनिकरं—स्वं रजोगुणविकारं, धूलिसञ्चयञ्च।

(२९०) अतीति।—अतिनिविड़ेन—अतिघनेन, नीलेन—कृष्णेन, लोममण्डलेन—रोमनिवहेन, निचितं—व्याप्तम्। ["निचितम्" इत्यत्र "खचितम्" इति पाठोऽपि स एवार्थः]। ज्योतिषा—अन्तर्ज्योतिषा, ज्ञानरूपेणेति भावः।

(२९१) ईषदिति।—ईषत् प्रशिथिलेन—प्रशिथिलेन, बलिवलयेन—बलिवलयेन इत्यर्थः, बध्यमानं—वेष्ट्यमानं, तुन्दम्—उदरं यस्य तथोक्तम्। ("पिचिण्डकुक्षिजठरोदरं तुन्दम्" इत्यमरः)।

(२९२) उपचीयमानेति।—उपचीयमानम्—आप्यायमानं, स्फिचौ:,—नितम्बयोः, ("स्त्रियां स्फिचौ कटिप्रोथौ" इत्यमरः। कटिप्रोथौ—कट्यधः नितम्बस्थमांसपिण्डद्वयौ) मांसपिण्डकं यस्य तम्।

(२९३) पाण्डुरेति।—पाण्डुरेण—धवलेन, पवित्रेण—शुद्धेन, चौमेण—पट्टवसनेन, आवृतम्—आच्छादितं, कौपीनम्—अन्तर्वस्त्रं यस्य तथाभूतम्।

(२९४) सावष्टम्भेति।—सावष्टम्भं—सगर्वं, सवेगम् इत्यर्थः, सदृढम् इति

मण्डलितेन अमृतफेनखेतरुचा योगपट्टकेन वासुकिना इव (२९५) अप्रतिहतानेकमन्त्रप्रभावाविर्भूतेन प्रदक्षिणीक्रियमाणम्, (२९६) अरुणतामरससुकुमारतलस्य पादयुगलस्य निर्मलैः नखमयूखजालकैः जर्जरयन्तमिव (२९७) महानिधानोद्वरणरसेन रसातलं, (२९८) तोयक्षालितशुचिना धौतपादुकायुगलेन हंसमिथुनेन इव (२९९) भागीरथीतीर्थयात्रापरिचयागतेन (३००) आमुच्यमानचरणान्तिकं, (३०१) शिखरनिखातकुब्जकालायसकण्टकेन वैणवेन

वावत्, यः पर्य्यङ्कबन्धः,—आसनविशेषः, तेन मण्डलितं—वलयीकृतं तेन। अमृतेति। —अमृतफेनवत्; अन्यत्र,—अमृतस्य—समुद्रमन्थनोद्भूतस्य इति भावः, फेनैः, श्वेता —शुभ्रा, रुक्—कान्तिः यस्य तेन, योगपट्टकेन—प्रागुक्तेन यौगिकाध्यपट्टसूत्रविशेषेण।

(२९५) अप्रतिहतेति।—अप्रतिहतानां—प्रतिरोद्धुम् अशक्यानाम्, अमोघानामित्यर्थः, अनेकेषां मन्त्राणां प्रभावेण—सामर्थ्येन, आविर्भूतः,—वशीकृत इति भावः, तेन, प्रदक्षिणीक्रियमाणं—समन्तात् वेष्ट्यमानम् इत्यर्थः।

(२९६) अरुणेति।—अरुणं—रक्तं, यत् तामरसं—पद्मं, तद्वत् सुकुमारं—सुकोमलं, तलं यस्य तथाभूतस्य। जर्जरयन्तम् इव—विदारयन्तमिव।

(२९७) महानिधानेति।—महानिधानस्य—महतो निधेः, रत्नविशेषस्य इत्यर्थः, उद्धरणम्—उत्खननं, तस्मिन् यो रसः,—रागः तेन। रसातलं—पातालम्।

(२९८) तोयेति।—तोयेन—जलेन, क्षालितं—धौतम्, अत एव शुचि—पवित्रं तेन; अन्यत्र,—तोये क्षालितं—सर्व्वदा जलेऽवस्थानात् धौतमिवेत्यर्थः, अत एव शुचि—शुभ्रं, तेन।

(२९९) भागीरथीति।—भागीरथी—गङ्गा, ["तेन निर्वृत्तम्" (४।२।६८ पा०) इत्यणि "टिड्ढाणञ्—" (४।१।१५ पा०) इत्यादिना ङीपि रूपम्] एव तीर्थं —पुण्यक्षेत्रं, तस्मिन् यात्रा—गमनं, तत्र यः परिचयः,—सङ्गतिः, तेन आगतं, तेन।

(३००) आमुच्यमानेति।—आमुच्यमानं—त्यज्यमानं, चरणान्तिकं—चरणसन्निधिः यस्य तथोक्तम्।

(३०१) शिखरेति।—शिखरे—अग्रे, अथे वा, निखातः,—प्रोथितः, कुब्जः, —कुटिल इत्यर्थः, कालायसकण्टकः,—कृष्णलौहकण्टकः यस्य तेन; [एतेन विशा-

विशाखिकादण्डेन (३०२) सर्वविद्यासिद्धिविघ्नविनायकापनयनाङ्कुशेन इव सततपार्श्ववर्त्तिना विराजमानम्, अबहुभाषिणं, मन्दहासिनं, सर्वोपकारिणं, कुमारब्रह्मचारिणम्, अतितपस्विनं, महामनस्विनं, (३०३) क्षुद्रक्रोधम्, अक्षुद्राननुरोधं, महानगरमिव (३०४) अदीनप्रकृतिशोभितं, मेरुमिव (३०५) कल्पतरुपल्लवराशिसुकुमारच्छायं, कैलासमिव (३०६) पशुपतिचरणरजःपवित्रितशिरसं, शिवलोकमिव (३०७) माहेश्वरगणानुयातं, जलनिधिमिव

खिकादण्डस्य अङ्कुशसाम्यं प्रदर्शितम्] वैणवेन—वेणः,—वंशदण्डः, तस्यायं वैणवः, —वेणुनिर्मित इत्यर्थः, तेन. विशाखिकादण्डेन—खलिनवल्गुडेनेत्यर्थः।

(३०२) सर्वेति।—सर्वासां विद्यानां सिद्धौ विघ्नः,—अन्तरायः, यो विनायकः,—गणपतिः, तस्य अपनयनाय—अपसारणाय, अङ्कुशः,—अस्त्रविशेषः तेन इव। सर्वोपकारिणं—सर्वेषाम् उपकारपरायणम्। कुमारब्रह्मचारिणं—नैष्ठिकब्रह्मचारिणम् इत्यर्थः। महामनस्विनं—प्रशस्तचित्तम्।

(३०३) क्षुद्रक्रोधम्—अल्पक्रोधं, प्रायेण क्रोधवर्जितम् इत्यर्थः। अक्षुद्रानुरोधम—अक्षुद्रः,—अनल्पः, अनुरोधः,—आदर इत्यर्थः, यस्य तथोक्तं, बहुमानितमित्यर्थः; अन्यत्र,—अक्षुद्राणां—स्थूलाशानां, सुखिनामित्यर्थः, अनुरोधः,—अनुसरणं येन तथोक्तं, बहुधनिकमन्यितमित्यर्थः।

(३०४) अदीनेति।—अदीना—दैन्यवर्जिता, या प्रकृतिः,—स्वभावः, तया शोभितः तम्, उदारप्रकृतिमित्यर्थः; अन्यत्र,—अदीनाभिः,—दारिद्र्यविहीनाभिः, प्रकृतिभिः,—प्रजाभिः, प्रधानपुरुषैः वा, शोभितम्।

(३०५) कल्पेति।—कल्पतरूणां—कल्पद्रुमाणां, पल्लवराशयः,—किसलयनिचयाः, तद्वत्, तेन सुकुमारा—कोमला, विशदा च, छाया—कान्तिः, अनातपश्च यस्य तथोक्तः, तम्। ("छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इत्यमरः)।

(३०६) पशुपतीति।—पशुपतेः,—हरस्य, चरणरजोभिः पवित्रितं—पावितं, शिरः,—मस्तकम्; अन्यत्र,—पवित्रितानि शिरांसि—मस्तकानि यस्य तथोक्तः, तम्।

(३०७) माहेश्वरेति।—महेश्वरो देवता येषां ते माहेश्वराः,—शैवा इत्यर्थः,

(३०८) अनेकनदनदीसहस्रप्रक्षालितशरीरं, जाह्नवीप्रवाहमिव (३०९) बहुपुण्यतीर्थस्थानशुचिम्; धाम धर्म्मस्य, तीर्थं तथ्यस्य, कोशं कुशलस्य, पत्तनं पूततायाः, (३१०) शालां शीलस्य, वेश्म क्षमायाः, शालेयं शालीनतायाः, स्थानं स्थितेः, आधारं धृतेः, आकरं करुणायाः, निकेतनं कौतुकस्य, आरामं रामणीयकस्य, प्रासादं प्रसादस्य, आगारं गौरवस्य, समाजं सौजन्यस्य, सम्भवं सद्भावस्य, कालं कलेः, भगवन्तं साक्षात् इव विरूपाक्षं भैरवाचार्य्यं ददर्श।

["साऽस्य—" (४।२।२४ पा०) इत्यादिना अण् कृपम्] तेषां गणाः,—समूहाः; अत्रत्र,—महेश्वरस्य इमे माहेश्वराः, ["तस्येदम्" (४।३।२० पा०) इत्यण् कृपम्] ये गणाः,—प्रमथवर्गाः, ("गणः प्रमथसङ्घौघे" इति मेदिनी) तैः अनुयातः,—अनुगतः, तम्।

(३०८) अनेकेति।—अनेकेषु नदनदीनां सहस्रेषु प्रक्षालितं—स्नातम् इत्यर्थः, शरीरं यस्य; अन्यत्र,—अनेकैर्नदनदीसहस्रैः प्रक्षालितं शरीरं यत्र तथोक्तः, तम्; सर्वासामेव नदनदीनां सागरे सङ्गतत्वादिति भावः।

(३०९) बहुपुण्येति।—बहुषु पुण्येषु तीर्थेषु—हरिद्वारादिपवित्रक्षेत्रेषु इत्यर्थः, स्थानेन—स्थित्या, शुचिः,—पवित्रः तम्। विशेषणमिदम् उभयत्रापि तुल्यार्थकम्। धाम—आश्रयम्। तीर्थं—क्षेत्रम्। तथ्यस्य—सत्यस्य। कोशं—भाण्डागारम्। कुशलस्य—मङ्गलस्य। पत्तनं—नगरम्। पूततायाः,—पवित्रतायाः।

(३१०) शालां—गृहम्। शीलस्य—सुचरितस्य। वेश्मं—भवनम्। क्षमायाः,—शान्तेः। शालेयं—शाला एव शालेयं, गृहम् इत्यर्थः। शालीनतायाः,—विनयितायाः। स्थितेः,—मर्य्यादायाः, शिष्टाचारस्य इत्यर्थः। स्थानम्—आवासः। धृतेः,—धैर्य्यस्य। आधारम्—आश्रयः। आकरम्—उत्पत्तिक्षेत्रम्। निकेतनम्—आलयम्। कौतुकस्य—कौतूहलस्य; तद्दर्शने सर्वेषामेव कौतूहलानुत्पद्यन्ते इति भावः। आरामम्—उपवनम्। रामणीयकस्य—रमणीयतायाः। प्रासादं—हर्म्यम्। प्रसादस्य—प्रसन्नतायाः। समाजं—गोष्ठीम्। सौजन्यस्य—सज्जनतायाः, सद्व्यवहारस्य वा। सम्भवम्—उत्पत्तिस्थानम्। सद्भावस्य—साध्वभिप्रायस्य। कालम्—अन्तकम्। कलेः,—कलियुगस्य। विरूपाक्षं—त्रिलोचनम्।

(३११) भैरवाचार्यस्तु दूरात् एव राजानं दृष्ट्वा अग्निमिव जलनिधिः चचाल। प्रथमतरोत्थितशिष्यलोकश्च उत्थाय प्रत्युज्जगाम ; समर्पितश्रीफलोपायनश्च (३१२) जह्नुकर्ण-समुद्गीर्ण्यमाणगङ्गाप्रवाहह्लादगम्भीरया गिरा स्वस्तिशब्दम् अकरोत्।

नरपतिरपि (३१३) प्रीतिविस्तार्यमाणधवलिम्ना चक्षुषा प्रत्यर्पयन्निव बहुतराणि पुण्डरीकवनानि,

(३११) जलनिधिः,—समुद्रः ; भैरवाचार्यस्य गम्भीरसत्त्वात् जलनिधिरिवेत्युक्तम्। चचाल—अभ्यगच्छत्, गाम्भीर्यादिति भावः। जलनिधिरपि उद्यन्तं अग्निं दूरादेव दृष्ट्वा उद्वेलितो भवति इति प्रसिद्धिः। प्रथमेति।—प्रथमतरः,—अध्ययनर्यातिशयेन प्रथम प्रथमतरः, उत्थितः,—उद्गतः, शिष्यलोको यस्य तथाभूतः, आचार्यशिष्यधीमध्ये शिष्यजना एव आदौ उत्थितवन्तः, पश्चात् आचार्यः उत्थितवानिति भावः ; यद्वा,—प्रथमतरः उत्थितः शिष्यलोकात् यः तथाभूतः, शिष्येभ्यः प्रागेव उत्थितवानिति भावः। समर्पितेति।—समर्पितानि—प्रदत्तानि, श्रीफलान्येव—बिल्वफलान्येव, उपायनानि—उपहाराः येन तथोक्तः, श्रीफलानि उपायनीकुर्वन् इत्यर्थः।

(३१२) जह्नुकर्णेति।—जह्नुः नाम राजर्षिः, तस्य कर्णात् समुद्गीर्ण्यमाणा—समुद्गम्यमाना, या गङ्गा, तस्याः प्रवाहः,—स्रोतः, तस्य ह्लादवत्—नादवत्, गम्भीरा तया ; गङ्गाप्रवाह इत्यनेन तदाकाश्य पवित्रत्वं प्रदर्शितम्। पुरा भगीरथेन आनीयमाना गङ्गा पथि तपस्यतो राजर्षेः जह्नोः तपोभूमिं तदुपकरणानि च प्लावयन्ती बहति स्म ; तद्दृष्ट्वा असौ क्रोधात् तां गङ्गां गण्डूषेण पपौ ; अथ तेन पश्चात् आयान्तीं गङ्गाम् अदृष्ट्वा, क्व गता मे गङ्गा ? इति अनुसन्दधता जह्नुः पृष्टः तत्तत्त्वमाचख्यौ। ततः तदनुरोधेन स्वात कर्णरन्ध्रात् तां उद्गार्णवान् इति पुराणवार्त्ता।

(३१३) प्रीतीति।—प्रीत्या विस्तार्यमाणः,—प्रसार्यमाणः, धवलिमा—धावल्यं यस्य तथाभूतेन। प्रत्यर्पयन्निव—प्रतिददद्दिव, पुण्डरीकवनानि—श्वेतकमलवनानि, ("पुण्डरीकं सिताम्भोजम" इत्यमरः)। प्राक् भैरवाचार्येण पद्मराजतपद्मानि राज्ञे उपायनीकृतानि, राज्ञा तु तन्निमयेन राजतधवलानि बहूनि पुण्डरीकाणि प्रत्युपायनीकृतानीति भावः।

(३१४) ललाटपट्टपर्य्यस्तेन च उदंशुना शिखामणिना महेश्वर-प्रसादमिव तृतीयनयनोद्गमेन प्रकाशयन् (३१५)आवर्ज्जितकर्ण-पल्लवपलायमानमधुकरः शिवसेवासमुन्मूलिताशेषपापपल्लवमुच्य-मान इव दूरावनतः प्रणामम् अभिनवं चकार। आचार्योऽपि,—"आगच्छ, अत्रोपविश" इति शार्दूलचर्म्म आत्मीयम् अदर्शयत्। (३१६) उपदर्शितप्रश्रयस्तु राजा मत्तहंसकलगद्गदस्वरसुभगां मधुरसमयीं महानदीमिव प्रवर्त्तयन् वाचं व्याजहार,—"भग-वन्! न अर्हसि माम् (३१७) अन्यनृपस्खलितैः खलीकर्त्तुम्। (३१८) अशेषराजकोपेक्षितायाः राजलक्ष्म्याः खलु अयं

(३१४) ललाटेति।—ललाटपट्ट—भालफलके, पर्य्यस्तः,—पतितः, तेन। उदंशुना—उद्गतकिरणेन, शिखामणिना—चूड़ारत्नेन। महेश्वरप्रसादमिव—शङ्करानु-ग्रहम् इव, तृतीयनयनोद्गमेन—उद्गततृतीयेन नयनेन इत्यर्थः।

(३१५) आवर्ज्जितेति।—आवर्ज्जितेन—आन्दोलितेन, प्रणामव्यापारे इति भावः, कर्णपल्लवेन—कर्णकिसलयेन, पलायमानाः मधुकराः,—भ्रमरा यस्मात् सः, अत एव शिवेति।—शिवस्य सेवया समुन्मूलितानां—समुत्पाटितानाम्, अशेषाणां—समग्राणां, पापानां—दुष्कृतानां, लवैः,—विन्दुभिः, मुच्यमान इव—क्षीयमाण इव। दूरावनतः,—दूरादेव आनतः सन्। अभिनवं—सद्य एवेत्यर्थः, दर्शनक्षणमेवेति यावत्। शार्दूलचर्म्म—व्याघ्रचर्म्म। आत्मीयं—स्वकीयम्।

(३१६) उपदर्शितप्रश्रयः,—प्रदर्शितविनयः। मत्तेति।—मत्तस्य—हृष्टस्य, हंसस्य कलः,—मधुरास्फुटः, गद्गदस्वरः,—अर्द्धोच्चारितस्वरविशेषः, तद्वत् स्वर इति भावः, तेन सुभगां—मनोज्ञां, मधुरसमयीम्—इक्षुरसात्मिकाम्, अतीव सुमधुरा-मित्यर्थः।

(३१७) अन्येति।—अन्येषां नृपाणां स्खलितानि—दोषाः, तैः, खलीकर्त्तुम्—प्रायेण खलं कर्त्तुं, सदोषं सम्भावयितुम् इत्यर्थः, अन्ये नृपतयः बहुभिः दोषैः कलुषीक्रियन्ते, न अहं तथेति भावः।

(३१८) अशेषेति।—अशेषाणां राज्ञां कोपेन ईक्षितायाः,—दृष्टायाः, बहवो राजानो निर्जिताः, तेषां विजितलक्ष्म्याः कोपदृष्टिः सम्भवति एवेति भावः; यद्वा, —अशेषैः,—समग्रैः, राजभिः कोपेन—क्रोधेन, तान् विजित्य तेषां लक्ष्म्याः

(३१९) शीलापराधो द्रविणदौरात्म्यं वा, यदेवम् आचरति मयि गुरुः । अभूमिरयम् उपचाराणाम् । अलम् (३२०) अतियत्नेन ; दूरस्थितोऽपि मनोरथग्रिथ्यः अयं जनो भवताम् । (३२१) माननीयश्च गुरुवत् न उल्लङ्घनम् अर्हति गुरोः आसनम् । आसतां च भवन्त एव अत्र" इति व्याहृत्य परिजनोपनीते वासमि निषसाद । भैरवाचार्योऽपि प्रीत्या अनतिक्रमणीयं नृपवचनम् अनुवर्त्तमानः पूर्ववत् तदेव व्याघ्राजिनम् अभजत ।

स्वायत्तीकरणादिति भावः, दुश्चितायाः,—दुष्टायाः, राजलक्ष्म्याः,—मदीयाया इति भावः ; यद्वा,—अशेषराजकैः,—सकलराजसमूहैः, उपेक्षितायाः,—परित्यक्तायाः, रक्षितुमसामर्थ्यादिति भावः, राजलक्ष्म्याः,—विजितनृपाणामिति भावः ; लक्ष्मीर्हि चला, बहुभोग्या च, सञ्जात् राज्ञो विजित्य तल्लक्ष्म्याः एकभोग्यत्वसम्पादनात् चलायास्तस्याः अचलत्वविधानाच्च लक्ष्म्याः मां प्रति कोप इति मन्तव्यम् । ["राजलक्ष्म्याः" इत्यत्र "इतलक्ष्म्याः" इति पाठे,—दुर्हृतायाः लक्ष्म्याः इत्यर्थः] ।

(३१९) शीलापराधः,—चरितदोषः, द्रविणदौरात्म्यं—धनदुर्हृत्तता, धनमत्तता इति यावत् । गुरुः,—भवान्, मयि, विषये, एवम्—इत्थं, राजा अयमिति ज्ञात्वा विशिष्टसम्मानादिकमित्यर्थः, आचरति—करोति इति यावत्, अयं राजलक्ष्म्याः शीलापराधः द्रविणदौरात्म्यं वा इति अन्वयः । अभूमिः,—अस्थानम्, अपात्रमित्यर्थः, अयोग्य इति भावः । अयमिति आत्मनिर्देशः । उपचाराणां—सेवानां, विशिष्टसमादराणामित्यर्थः, राजोचितव्यवहाराणामिति भावः ।

(३२०) अतियत्नेन—अतिक्लेशेन, अतियत्नेन इत्यर्थः, ["गम्यमानाऽपि क्रिया विभक्तौ प्रयोजिका" इति हत्या अलंयोगे हतीया] मदर्थमिति भावः । मनोरथग्रिथ्यः,—मनोरथेनैव ग्रिथ्यतां गत इत्यर्थः, कदाचिददृष्टस्यापि ते प्रभावादिकं श्रुत्वा मनसैव ग्रिथ्यत्वं स्वीकृतवानिति भावः ; यद्वा,—अहं भवता मनसा कृतः समुपस्थाने, आज्ञाकर इति भावः ।

(३२१) माननीयं—सम्मानार्हम् । उल्लङ्घनं—पादेनाक्रमणं, मर्यादातिक्रमणं वा । आसतां—तिष्ठन्तु । अनुवर्त्तमानः,—अनुमोदमानः ।

आसीने च सराजके (३२२) परिजने शिष्यजने च समुचितम् अर्घ्यादिकं चक्रे। क्रमेण च नृपमाधुर्य्यहृतान्तःकरणः (३२३) शशिकरनिकरविमला दशनदीधितीः स्फुरन्तीः शिवभक्तीरिव साक्षात् दर्शयन् उवाच,—"तात! अतिनम्रता एव ते कथयति गुणानां गौरवम्। (३२४) सकलसम्पत्पात्रमसि। विभवानुरूपास्तु प्रतिपत्तयः। जन्मनः प्रभृति अदत्तदृष्टिः अस्मि स्वापतेयेषु। यतः (३२५) सकलदोषकलापानलेन्धनैः धनैः अविक्रीतं क्वचित् शरीरकमस्ति।

(३२२) परिजने—राजाऽनुयायिनि जने इत्यर्थः। अर्घ्यादिकं—पूजाविधानं, चक्रे—कृतवान्, भैरवाचार्य्ये इति शेषः। नृपेति।—नृपस्य माधुर्य्येण—रमणीयतागुणेन, "सर्व्वावस्थाविशेषेषु माधुर्य्यं रमणीयता" इति दर्पणः, हृतम्—आकृष्टम, अन्तःकरणं—मनः यस्य तथाभूतः।

(३२३) शशीति।—शशिनः,—चन्द्रस्य, कराणां—मयूखानां, निकरवत्—समूह इव, विमलाः,—विशदाः। दशनदीधितीः,—दन्तमयूखान्। स्फुरन्तीः,—द्योतमानाः। गुणानां—विद्याविनयादीनां, रज्जुनाच्च। गौरवम्—उत्कर्षं, भारवत्त्वञ्च; यत्र अंगे भारातिशयस्तदंश एव नमतीति ध्वन्यते।

(३२४) सकलेति।—सकलानां सम्पदाम्—ऐश्वर्य्याणां, पात्रं—भाजनम, असि—त्वमसि। प्रतिपत्तयः,—ज्ञानानि, विभवानां—सम्पदाम्, अनुरूपास्तु—सदृश्य एव; यथा त्वं सर्व्वसम्पत्पूर्णः, तथा सर्व्वज्ञानपूर्णोऽपि इति भावः। स्वापतेयेषु—धनेषु, ["पथ्यतिथि—" (४।४।११४ पा०) इत्यादिना स्वपतेर्ढञि रूपम्] ("द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमरः) अदत्तदृष्टिरस्मि—धनेषु मम दृष्टिः नास्तीत्यर्थः; नाहं धनलालस इति भावः।

(३२५) सकलेति।—सकलाः,—समग्राः, दोषकलापाः,—दोषनिवहा एव, अनलाः,—अग्नयः, तेषाम् इन्धनानि—काष्ठानि तैः; यथा काष्ठैः एव अग्नय उद्दीप्यन्ते, तथा धनैरेव दोषाः प्रवर्द्धन्ते इति भावः। शरीरकं—तुच्छदेहमित्यर्थः, क्वचित्—कुत्रापि, अविक्रीतमस्ति—विक्रीतं नास्ति; यद्वा,—धनैः अविक्रीतं—न विक्रीतम्, ईदृक् शरीरकं क्वचित्—कुत्रापि अस्ति?—नैवास्तीत्यर्थः; अत एव अदत्तदृष्टिरस्मि इति बीजना।

(३२६) भैक्षरक्षिताः सन्ति प्राणाः । दुर्गृहीतानि कतिचित् विद्यन्ते विद्याऽक्षराणि । (३२७) भगवच्छिवभट्टारकपादसेवया ममुपार्जिता कियत्यपि सन्निहिता पुण्यकणिका । स्वीक्रियतां यत् अत्र उपयोगार्हम् । (३२८) प्रतनुगुणग्राह्याणि कुसुमानि इव हि भवन्ति सतां मनांसि । अपि च,—(३२९)विद्वत्सम्मताः श्रूयमाणा अपि साधवः शब्दा इव सुधीरेऽपि हि मनसि यशांसि कुर्वन्ति । विवरं विशतः कुतूहलस्य फेनधवलैः स्मेरोभिरिव अपक्ष्रियमाणो गुणगणैः आनीतोऽस्मि कल्याणिना" इति ।

(३२६) भैक्षेति ।—भिक्षया लब्धं भैक्षं तेन, भिक्षाणाम् अन्नादिना इत्यर्थः, रक्षिताः,—पालिताः । "रक्षिताः" इत्यनेन एभिः प्राणैः यदि कस्यचित् कदाचित् स्त्रीऽप्युपकारो भवेत्, तदा प्राणधारणेनापि स कर्त्तव्यः इति सूचितम् । दुर्गृहीतानि —दुःखेन गृहीतानि ।

(३२७) भगवदिति ।—भगवतः,—"ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" इत्युक्तषड्गुणशालिनः, शिवभट्टारकस्य—शिवस्वामिनः, पादसेवया—चरणशुश्रूषया । पुण्यकणिका—पुण्यबिन्दुः । यत्—पुण्यकणिकारूपं वस्तु, अत्र—जगति, उपयोगार्हम्—उपयोगम् अर्हतीति तथोक्तं, क्वचित् कदाचित् उपकारितां व्रजतीति यावत्, तत् स्वीक्रियताम्—आत्मीक्रियतां, गृह्यतामित्यर्थः ।

(३२८) प्रतन्विति ।—प्रतनुना —स्वल्पेनेत्यर्थः, गुणेन—उपकारादिना, तन्तुना च, याह्याणि—ग्रहीतुं शक्यानि । कुसुमानि इव इत्यनेन सतां मनसामतीव कोमलत्वं सूचितम् ।

(३२९) विद्वदिति ।—विद्वद्भिः सम्मताः,—अभिमताः, स्वीकृताश्च । साधवः,—सन्तः, विशुद्धाश्च, शब्दा इव,—यशांसि कुर्वन्ति—प्रतिपत्तिं विस्तारयन्तीत्यर्थः ; विशुद्धाः शब्दाः यथा प्रतिपत्तिं विस्तारयन्ति, सन्तोऽपि तथा इति भावः । विवरं—छिद्रं, गह्वरम् इत्यर्थः, अन्तःकरणमिति भावः, पातालं वा, विशतः,—गच्छतः । फेनधवलैः,—फेनवत् धवलैः,—निर्मलैः, फेनेन धवलैः,—शुभ्रैः च । कल्याणिना —कल्याणभाजनेन, भवता इति शेषः ।

राजा तु तं प्रत्यवादीत्,—"भगवन्! (३३०) अनुरक्तेष्वपि शरीरादिषु इव साधूनां स्वामिन एव प्रणयिनः। युष्मद्दर्शनात् इवाप्रार्थितमेव च अपरिमितं (३३१) कुशलजातम्। अनेनैव आगमनेन स्पृहणीयं पदम् आरोपितोऽस्मि गुरुणा" इति विविधाभिश्च कथाभिः चिरं स्थित्वा गृहम् अगात्।

अन्यस्मिन् दिवसे भैरवाचार्योऽपि राजानं द्रष्टुं ययौ। तस्मै च राजा सान्तःपुरं सपरिजनं (३३२) सकोषम् आत्मानं निवेदितवान्। स च विहस्य उवाच,—"तात! क्व विभवाः? क्व च वयं वनवर्हिताः? धनोष्मणा म्लायति अलं लता इव मनस्विता। खद्योतानामिव अस्माकमियम् अपरोपतापिनी राजते तेजस्विता। भवादृशा एव भाजनं भूतेः" इति स्थित्वा च कञ्चित् कालं जगाम।

(३३३) परिव्राट् तेनैव क्रमेण पञ्च पञ्च राजतानि पुण्ड्रीकाणि उपायनीचकार। एकदा तु श्वेतकर्पटावृतं किमपि

(३३०) अनुरक्तेषु—अनुरागभाजनेषु, शरीरादिषु इव साधूनां ["शरीरादिषु इव साधूनाम्" इत्यत्र "शरीरादिषु साधूनाम्" इति पाठान्तरम्] स्वामिनः,—प्रभवः, भवादृशा इति शेषः, प्रणयिनः,—प्रणयवन्तः, अनुरागिणो भवन्तीत्यर्थः; प्रभवः सेवकेषु शरीरेषु इव अनुरक्ता भवन्तीति भावः।

(३३१) कुशलजातं—मङ्गलसमूहः। स्पृहणीयम्—अभिलषणीयम्। पदं—स्थानम्। गुरुणा—भवता इति भावः।

(३३२) सकोषं—सधनभाण्डारम्। निवेदितवान्—अर्पयामास। धनोष्मणा—धनदर्पेणेति यावत्। म्लायति—म्लानिं प्राप्नोति। अलम्—अत्यर्थम्। मनस्विता—प्रशस्तमनस्कता। खद्योतानामिव—ज्योतिरिङ्गणानामिव, कीटमणिविशेषाणामिव इत्यर्थः। अपरोपतापिनी—न परान् उपतापयतीति तथोक्ता; धनिनान्तु तेजस्विता परोपतापिनी इति भावः। भूतेः,—सम्पदः। एवशब्दोऽन्ययोगव्यवच्छेदकः, तथा च, न मादृशा इति भावः।

(३३३) परिव्राट्—भैरवाचार्येण प्राक् प्रेषितः सः भिक्षुः। तेनैव क्रमेण—प्राक् प्रदर्शितप्रकारेण, उपायनीचकार—उपहारीकृतवान्। श्वेतकर्पटावृतं—शुभ्र-

आदाय प्राविशत्। उपविश्य च पूर्ववत् स्थित्वा मुहूर्त्तम् अब्रवीत्,—"महाभाग! भवन्तम् आह भगवान्, यथा अस्माच्छिष्यः पातालस्वामिनामा ब्राह्मणः। तेन ब्रह्मराक्षसहस्तात् अपहृता महाऽसिः अट्टहासनामा। सोऽयं भवद्भुजयोग्यो गृह्यताम्" इत्यभिधाय अपहृतकर्पटाच्छादनात् परिजनात् आचकर्ष शरद्गगनमिव पिण्डतां नीतं, (३३४) कालिन्दीप्रवाहमिव स्तम्भितजलं, नन्दकजिगीषया कृष्णकोपितं कालियमिव कृपाणतां गतं, लोकविनाशाय प्रकाशितधारासारं प्रलयकालमेघ-

वसनाच्छादितं, किमपि, वस्त्वति शेषः। "महाभाग" इति सम्बोधनं प्रकृतोपयोगि इति मन्तव्यं, भाग्यदेवताप्रसादलाभस्य आशुभावित्वात्। अस्माच्छिष्यः; पातालस्वामिनामा ब्राह्मणः; यथा आह, भगवान्—भैरवाचार्यः, भवन्तमाह, तथेति शेषः, इति योजनीयम्। तेन—पातालस्वामिनेत्यर्थः। महाऽसिः,—महान् तलवारः। अपहृतेति।—अपहृतम्—अपनीतं, कर्पटाच्छादनं—वस्त्रावरणं येन तथोक्तात्, परिजनात्—अनुचरजनादित्यर्थः, ["कर्पटाच्छादनात् परिजनात्" इत्यत्र "कर्पटावच्छादनात् परिवारात्" इति पाठे,—वस्त्रावृतात् खड्गकोषात् इत्यर्थः। "आचकर्ष" इत्यत्र "कृपाणम" इत्युत्तरेण सम्बन्धः। प्राक्—"श्वेतकर्पटावृतं किमपि आदाय प्राविशत्" इत्यनेन स्वयमेव आदाय प्राविशत इति गम्यते, न तु अन्यस्य कस्यचित् प्रवेशः। अत्र तु "परिजनादाचकर्ष" इत्युक्तं, चिन्त्यमेतत्, पूर्वोक्तवाक्यविरोधसम्बन्धात्। "परिवारात्" इति पाठे न काप्यनुपपत्तिः तत आकर्षणे विरोधासम्बन्धात्]। शरद्गगनमिव—शरत्कालिकाकाशमिव, पिण्डतां नीतं—घनत्वं प्रापितं, नैर्मल्यादिति भावः, न तु श्वेतात्, असेः कृष्णतायाः वक्ष्यमाणत्वात्; यद्वा,—पिण्डतां नीतं—लोहत्वं गमितं, ("लोहाऽस्त्री शस्त्रकं तीक्ष्णं पिण्ड कालायसायसौ" इत्यमरः)।

(३३४) कालिन्दीप्रवाहमिव—यमुनास्रोत इव; स्तम्भितजलं—स्थिरीकृततोयम्; कृष्णवर्णत्वात् कालिन्दीप्रवाहमिव इत्युक्तं, तथा सूर्यकिरणप्रतिबिम्बितः प्रवाहो यथा चाकचक्यमयो दृश्यते, असेरपि चलत्वभासुरत्वात् तथात्वं बोद्धव्यम्। नन्दकजिगीषया—नन्दकस्य—विष्णोः खड्गविशेषस्य, जिगीषया—विजयेच्छया; कृष्णकोपितं—कृष्णेन कोपितं, दमनादिति भावः, कालियं—तदाख्यं यमुनावासिनं नागाधिपमिव। लोकविनाशाय—जगत्संहाराय, प्रकाशितः,—व्यक्तीकृतः, धारासारः,—धारा-

खड्गमिव नभस्तलात् पतितं, (३३५) दृश्यमानविकटदन्तमण्डलं हासमिव हिंसायाः, हरिबाहुदण्डमिव कृतदृढमुष्टिग्रहं, सकलभुवनजीवितापहरणक्षमेण कालकूटेन इव निर्मितं, (३३६) कृतान्तकोपानलतप्तेन इव अयसा घटितम्, अतितीक्ष्णतया पवनस्पर्शेन अपि रुषेव क्षणन्तं, (३३७) मणिसभाकुट्टिमपतत्प्रतिबिम्बच्छद्मना आत्मानम् अपि द्विधेव पाटयन्तम्, (३३८) अरिशिरश्छेदलग्नैः कचैरिव किरणैः करालितधारं, मुहुर्मुहुः (३३९) तड़ित्पिङ्गपतरलैः प्रभाचक्रच्छुरितैः

मन्यातः, धारायाः,—निर्गिताया, सारः,—औत्कर्ष्यं यस्य तथोक्तम्। प्रलयकालसंप्राप्तखड्गमिव—लयकालिकजलदांगमिव, महानीलोज्ज्वलाभासत्वात्।

(३३५) दृश्यमानेति।—दृश्यमानानि विकटानि—करालानि, दन्तमण्डलानि—दशनराजयः यस्मिन् तथाभूतम्; कृष्णवर्णस्य असेरतीक्ष्णीकल्पत्वात् कृष्णवर्णाया हिंसायाः यथं हासमिवेत्युत्प्रेक्षा। कृतेति।—कृतः,—रचितः, दृढः,—कठिनः, मुष्टिग्रहः,—मुष्टिबन्धः यस्मिन् तम्; अन्यत्र,—कृतः दृढं यथा तथा मुष्टेः,—मुष्टिकनामासुरस्य ग्रहः,—ग्रहणं येन तथाभूतम्।

(३३६) कृतान्तेति।—कृतान्तस्य—यमस्य, कोपानलः,—क्रोधाग्निः, तेन तप्तं—गलितं तेन, अयसा—लोहेन। अतितीक्ष्णतया—अतिनिर्मितत्वेन; तैक्ष्ण्यञ्च तनुत्वाज्ज्ञायते, तनु च अन्योऽन्यसङ्घर्षेण क्षणति इति हृदयम्। रुषेव—कोपेनेव, क्षणन्तं—रणन्तम्; अतितीक्ष्णप्रकृतिकोऽपि स्वल्पेनापि कोपकारणेन कुप्यतीति इति लोकः।

(३३७) मणीति।—मणिमयसभातलेषु, पतत् यत् प्रतिबिम्बं तस्य छद्म—छलम्; तदेव छद्म वा, तेन। पाटयन्तं—खण्डयन्तम्, अतितैक्ष्ण्यादिति भावः।

(३३८) अरीति।—अरीणां—शत्रूणां, शिरांसि, तेषां छेदेन लग्नाः,—संसक्ताः, तैः, कचैरिव—केशैरिव; कृष्णवर्णस्य तस्य किरणानामपि कृष्णाभत्वात् कचैरिवेत्युत्प्रेक्षा; करालितधारं—करालिता—व्याप्ता, धारा यस्य तथोक्तम्।

(३३९) तड़ित्पिङ्गेति।—तड़िता—विद्युता, पिङ्गाः,—विकासाः, तद्वत् तरलानि—चपलानि तैः। प्रभाचक्रार्णां—किरणमण्डलानां, छुरितैः,—छुरवैः,

जर्जरितातपं खण्डशश्छिन्दन्तमिव दिवसं, कटाक्षमिव कालराज्ञेः, कर्णोत्पलमिव कालस्य, (३४०) ओङ्कारमिव क्रौर्यस्य, अलङ्कारम् अहङ्कारस्य, कुलमित्रं कोपस्य, देहं दर्पस्य, सुसहायं साहसस्य, अपत्यं मृत्योः, आगमनमार्गं लक्ष्म्याः, निर्गमनमार्गं कीर्त्तेः कृपाणम्।

अवनिपतिस्तु तं गृहीत्वा करेण (३४१) आयुधप्रीत्या प्रतिमानिभेन आलिङ्गन्निव सुचिरं ददर्श; सन्दिदेश च,—"वक्तव्यो भगवान्, (३४२) परद्रव्यग्रहणावज्ञादुर्विदग्धम् अपि हि मे मनो युष्मद्विषये न शक्नोति वचनव्यतिक्रमव्यभिचारमाचरितुम्" इति। परिव्राट् तु गृहीते तस्मिन् परितुष्टः "स्वस्ति भवते, साधयामि" इत्युक्त्वा निरयासीत्। नृपश्च प्रकृत्या वीररसानुरागी तेन कृपाणेन अमन्यत करतलवर्त्तिनीं मेदिनीम्।

उन्मेषैरित्यर्थः, जर्जरितः,—खण्डखण्डीकृतः, मन्दीकृत इति यावत्, आतपः,—सूर्यालोकः येन तथीकृतम्; अत एव दिवसं खण्डशः,—खण्डखण्डं कृत्वा इत्यर्थः, छिन्दन्त मव—पाटयन्तमिव।

(३४०) ओङ्कारं—प्रणवं, प्रारम्भमिति भावः। क्रौर्यस्य—निष्ठुरतायाः। कुलमित्रं—कुलेन—वंशपरम्परया, मित्रं—सुहृदम्। अपत्यं मृत्योरिति।—असेर्मरणसाधनत्वात्, पैतृकगुणस्य पुत्रे सद्भावसम्भावनत्वाच्च मृत्योरपत्यत्वं तस्य बोद्धव्यम्। कृपाणम्—असिम्।

(३४१) आयुधप्रीत्या—आयुधे—अस्त्रे, या प्रीतिः,—अनुरागः, वीरसुलभासक्तिरिति भावः, तया, प्रतिमानिभेन—प्रतिबिम्बच्छलेन, स्वस्येति शेषः, दर्पणस्वच्छे तत आत्मप्रतिबिम्बसङ्क्रमणादिति भावः। सन्दिदेश—वाचिकं कथयामास। भगवान्—भैरवाचार्य इति भावः।

(३४२) परेति।—परेषां द्रव्याणि—धनानि, तेषां ग्रहणं, तस्मिन् अवज्ञा—घृणा, तया दुर्विदग्धं—दुर्विनीतं, दुष्टम् इति यावत्। वचनेति।—वचनस्य—आज्ञावाक्यस्य, व्यतिक्रमः,—लङ्घनमेव, व्यभिचारः,—दोषः तम्। साधयामि—गच्छामि, "प्रायेण म्लेच्छकः साधिः गमेः स्थाने प्रयुज्यते" इति दर्पणात्। ["साधयामि" इत्यत्र "साधयामः" इति पाठे,—गच्छामः इत्यर्थः]।

अथ व्रजत्सु दिवसेषु एकदा भैरवाचार्यो राजानम् (३४३) उपह्वरे सोपग्रहम् अवादीत्,—"तात! स्वार्थालसाः परोपकारदक्षाश्च प्रकृतयो भवन्ति भव्यानाम्। भवादृशाश्च अर्थिदर्शनं महोत्सवः, प्रयाचनम् आराधनम्, अर्थग्रहणम् उपकारः। भूमिरसि सर्व्वलोकमनोरथानाम्। येन अभिधीयसे, श्रूयताम्;—(३४४) भगवतो महाकालहृदयनाम्नो महामन्त्रस्य कृष्णसगन्धरानुलेपेन आकल्पेन कल्पकथितेन महाश्मशाने जपकोट्या (३४५) कृतपूर्व्वसेवोऽस्मि।

(३४३) उपह्वरे—एकान्ते, रहसि इति यावत् ("रहोऽल्लिकमुपह्वरे" इत्यमरः) सोपग्रहं—सानुकूलं, साभ्यर्थनमिति भावः, ("उपग्रहः प्रमाणं वन्द्यानुपर्योगेऽनुकूलने" इति मेदिनी)। स्वार्थालसाः,—स्वकार्य्यपराङ्मुखा इत्यर्थः। भव्यानां—सज्जनानाम्। अर्थिदर्शनं—भिक्षुकदर्शनं, महोत्सवः,—आनन्दजननम्; भवादृशा अर्थिनो दृष्ट्वा महान्तम् आनन्दम् अनुभवन्ति इत्यर्थः। प्रयाचनं—याञ्ज्ञा, आराधनं—पूजनम्; अर्थिषु याचमानेषु आत्मानम् आराधितं मन्यन्ते इति भावः। ["प्रयाचनम्" इत्यत्र "प्रणयनम्" इति पाठेऽपि स एवार्थः]; अर्थग्रहणम् उपकारः,—अर्थिषु अर्थान् गृह्णत्सु आत्मानम् उपकृतं मन्यन्ते इत्याशयः। भूमिः,—पावम्। सर्वेति।—सर्व्वलोकानां—सर्वेषां प्राणिनां, मनोरथानाम्—अभिलाषाणाम्; सर्व्व एव त्वां सदैव मनसा स्मरन्ति इति भावः; यद्वा,—मनोरथानां—मनोऽभीष्टपूरणानामित्यर्थः। रथा अपि भूमौ गच्छन्ति इत्यपि व्यज्यते। अभिधीयसे—कथ्यसे, त्वम् एवमिति शेषः।

(३४४) भगवतः,—ईश्वरस्य, हरस्य इत्यर्थः। महाकालेति।—महाकालस्य—हरस्य, हृदयं—हृदयनिहितं वक्ष्यति महाकालहृदयं, तत् नाम यस्य तथोक्तस्य। "जपकोट्या" इत्यनेनान्वयः, कोटिसङ्ख्यकजपेन इत्यर्थः। कृष्णेति।—कृष्णानि—कृष्णवर्णानि, स्रजः,—माल्यानि, अम्बराणि—वसनानि, अनुलेपाः,—अनुलेपनानि, गन्धद्रव्याणि इत्यर्थः, यस्मिन् तथाभूतेन, आकल्पेन—परिच्छदेन, वेशेनेत्यर्थः, ("आकल्पवेशौ नेपथ्यं प्रतिकर्म प्रसाधनम्" इत्यमरः)। कल्पकथितेन—कल्पः,—शास्त्रम्, इतिकर्त्तव्यतासमूहोपदेशकः ग्रन्थः इत्यर्थः, ("कल्पः शास्त्रे विधौ न्याये—" इति मेदिनी) तत्कथितेन—एतन्महामन्त्रविधानग्रन्थोक्तेन।

(३४५) कृतेति।—कृता पूर्वं सेवा येन तथाभूतः।

(३४६) तस्य वेतालसाधनावसाना सिद्धिः। असहायैश्च सा दुरवापा। त्वञ्च अलम् अस्मै कर्मणे। त्वयि च गृहीतभरे भविष्यन्ति अपरे सहायाः त्रयः। एकः स एव अस्माकं टौटिभनामा (३४७) बालमित्रं मस्करी, यो भवन्तम् उपतिष्ठते, द्वितीयः स पातालस्वामी, अपरो मक्षिष्य एव कर्णतालनामा द्राविड़ः। यदि साधु मन्यसे, ततो नीयताम् अयं दिङ्नागहस्तदीर्घो गृहीताट्टहासो निशामिकाम् एकदिङ्मुखार्गलतां बाहुः"।

इति कृतवर्चसि च तस्मिन्, (३४८) अन्धकारं प्रविष्ट इव दृष्टदीपप्रकाशः (३४९) प्राप्तोपकारावकाशः प्रमुदितेन अन्तरात्मना नरेन्द्रः समभाषत,—"भगवन्! परम् अनुगृहीतोऽस्मि, अनेन शिष्यजनसामान्येन निदेशेन कृतपरिग्रहमिव

(३४६) तस्य—तादृशमन्त्रजप्यस्येत्यर्थः। वेतालेति।—वेतालस्य—शिवानुचरभेदस्य, मृताधिष्ठितशवविशेषस्य वा, साधनं—वशीकरणम्, अवसानं यस्याः तथाभूता, सिद्धिः,—फलम्; वेतालसाधनस्यैव सा सिद्धिः न लभ्यते इति भावः। सा—सिद्धिः, असहायैः,—सहायशून्यैः, दुरवापा—दुर्लभा। अलं—समर्थः, ("अलं भूषणसमर्थयोः" इत्यमरः)। अस्मै कर्मणे—मत्साहाय्यायेत्यर्थः, ["नमः स्वस्ति—" (२।३।१६ पा०) इति अलंशब्दयोगे चतुर्थी]। गृहीतभरे—भारं गृहीतवतीत्यर्थः।

(३४७) बालमित्रं—शैशवसुहृत्। मस्करी—परिव्राट्। उपतिष्ठते—उपास्ते, ["उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्" (वा०) इति सङ्गतिकरणार्थे तङ्]। द्राविड़ः,—द्रविड़देशीयः। साधु—समीचीनम्। दिङ्नागहस्तदीर्घः,—ऐरावतशुण्डवदायतः। एकदिङ्मुखार्गलताम्—एका दिक्, तस्या मुखस्य अर्गलताम्—अवरोधकदण्डताम्; बाहुः, तवेति शेषः। सप्रश्रयः सन् एकस्यां रात्रौ मम वेतालसाधनविषये साहाय्यं कुरु इति भावः।

(३४८) अन्धकारं प्रविष्ट इव—तिमिरं गत इवेत्यर्थः। दृष्टदीपप्रकाशः,—अवलोकितदीपालोकः। ["दृष्टदीपप्रकाशः" इत्यत्र "दृष्टप्रकाशः" इति पाठे,—दृष्टः,—प्रकाशः,—आलोकः येन तथाभूतः]।

(३४९) प्राप्तेति।—प्राप्तः उपकारस्य—भैरवाचार्यकृतोपकारपरिशोधार्थम् इति भावः, अवकाशः,—समयो येन तथाभूतः। प्रमुदितेन—प्रहृष्टेन। अन्तरा-

आत्मानम् अवैमि" इति। ननन्द च तेन नरेन्द्रव्याहृतेन भैरवार्यः; चकार च सङ्केतम्—"आगामिन्याम् एव असितपक्षचतुर्दशीरात्रेपायाम् इयत्यां वेलायाम् अमुष्मिन् महाश्मशानसमीपभाजि शून्यायतने शस्त्रद्वितीयेन आयुष्मता द्रष्टव्या वयम्" इति।

(३५०) अथ अतिक्रान्तेषु अहःसु, प्राप्तायाञ्च कृष्णपक्षचतुर्दश्यां, शैवेन विधिना दीक्षितः क्षितिपालो नियमवान् अभूत्। (३५१) कृताधिवासञ्च सम्पादितगन्धपुष्पधूपमाल्यादिपूजं खड्गम् अट्टहासम् महायम् अकरोत्। ततः परि-

स्मना—मनसा। शिष्येति।—शिष्यजनेन—अन्तेवासिलोकेन सह, सामान्यं—समानस्य भावः, तुल्यता इत्यर्थः, तेन, शिष्यजनोचितेनेत्यर्थः। निर्देशेन—आज्ञया। कृतेति।—कृतः परिग्रहः,—यङ्गणम्, आश्रयदानम् इति भावः, यस्य तथोक्तमिव, भवत्परिजनमिवेत्यर्थः। अवैमि—वेद्मि, मन्ये इत्यर्थः। नरेन्द्रव्याहृतेन—राजवचनेन। सङ्केतम्—इङ्गितम्। ["आगामिन्यामेव" इत्यत्र "अस्यामेवागामिन्याम्" इति पाठान्तरम्]। असितपक्षचतुर्दशीरात्रेपायां—कृष्णपक्षीयचतुर्दशीरात्रौ। इयत्यां वेलायाम्—एतत्परिमिते समये। महाश्मशानसमीपभाजि—महाश्मशानस्य समीपं भजते इति तथोक्ते, महाश्मशाननिकटवर्त्तिनि इत्यर्थः, शून्यायतने—निर्जने स्थाने, शून्यदेवालये वा।

(३५०) अथेति।—अतिक्रान्तेषु—अतीतेषु, अहःसु—दिवसेषु। ["प्राप्तायाञ्च कृष्णपक्षचतुर्दश्याम्" इत्यत्र "प्राप्तायाञ्च तस्यामेव कृष्णचतुर्दश्याम्" इति पाठान्तरम्]। शैवेन विधिना—शिवोपासनाविधानेन, दीक्षितः,—संयतः, [दीक्षधातोः "निष्ठा" (३।२।१०२ पा०) इति कर्म्मणि निष्ठायां रूपम्] कृतनियम इत्यर्थः, ["क्षितिपालः" इत्यत्र "क्षितिपः" इति पाठान्तरम्]। नियमवान्—व्रतनिष्ठः।

(३५१) कृताधिवासं—कृतः अधिवासः,—व्रतदिनात् पूर्व्वदिने गन्धादिना संस्कारः, यस्य तं, ("संस्कारो गन्धमाल्याद्यैः यः स्यात् तत् अधिवासनम्" इत्यमरोक्तेः)। सम्पादितेति।—सम्पादिता—कारिता, गन्धपुष्पधूपमाल्यादिभिः पूजा यस्य तथोक्तम्। [गन्धपुष्पधूप—" इत्यत्र "गन्धधूप—" इति पाठान्तरम्। "अट्टहासं महायमकरोत्" इत्यत्र "अट्टहासमकरोत्" इति पाठान्तरम्]। "ततः" इत्यादौ

ष्ठते दिवसे केनापि कर्म्मसाधनाय कृतरुधिरबलिविधानासु इव लोहितायमानासु दिक्षु, रुधिरबलिलम्पटासु च वेताल-जिह्वासु इव लम्बमानासु च रविदीधितिषु, (३५२) नरेन्द्रानुरागेण इव गृहीतापरदिग्गि स्वयमेव दिक्पालतां चिकीर्षति सवितरि, यातुधानीषु इव वर्द्धमानासु तरुच्छायासु, पातालतलवासिषु विघ्नाय दानवेषु इव उत्तिष्ठमु तमोमण्ड-लेषु, नभसि पुञ्जीभवति रौद्रं कर्म्म दिदृक्षमाणे इव नक्षत्र-गणे, विगाढायां शर्व्वर्य्यां, (३५३) सुप्तजननिःशब्दे स्तिमिते

"राजा नगरात् निरमात्" इत्युत्तरेणान्वयः। परिष्ठते—अवसानं गते। [अत्र "परि-ष्ठते दिवसे" इत्यादिषु सर्व्वत्र "यस्य च भावेन—" (२।३।३७ पा०) इत्यादिना भावे सप्तमी ज्ञेया]। केनापि, जनेनेति शेषः। कृतेति।—कृतम्—अनुष्ठितं, रुधिरेण—रक्तेन, बलिविधानं—पूजाविधिः; यासां तथोक्तासु इव, लोहितायमानासु—सन्ध्या-रागरञ्जितासु इति भावः। रुधिरेति।—रुधिरबलिषु—रक्तोपहारप्राप्तिषु इत्यर्थः, लम्पटाः,—लुब्धाः तासु, वेतालजिह्वासु इव—भूतरसनासु इव, रविदीधितिषु—सूर्य्य-किरणेषु।

(३५२) नरेन्द्रानुरागेण—राज्ञानुरक्त्या। ["नरेन्द्रानुरागेण इव" इत्यत्र "नरे-न्द्रानुरागेण" इति पाठान्तरम्]। गृहीतेति।—गृहीता अपरा—पश्चिमा, दिक् येन तथोक्ते। ["स्वयमेव" इत्यत्र "स्वयमिव" इति पाठान्तरम्]। सवितरि—सूर्य्ये। यातुधानीषु—निशाचरीषु इव, ("राक्षसः कौणपः क्रव्यात्·····। यातुधानः पुञ्ज-जनः·····॥" इत्यमरः) वर्द्धमानासु—उद्गिं गच्छन्तीषु, लम्बमानासु इत्यर्थः। पातालतलवासिषु—रसातलाभ्यन्तरस्थितेषु। ["पातालतलवासिषु" इत्यत्र "पाताल-वासिषु" इति पाठान्तरम्]। विघ्नाय—कार्य्यव्याघाताय, राज्ञः इति भावः। तमो-मण्डलेषु—तिमिरनिचयेषु। नभसि—आकाशे, पुञ्जीभवति—बहुलीभवति; कृष्ण-पक्षरजन्यां नक्षत्राणि बहुलानि दृश्यन्ते इति भावः। रौद्रं—दारुणम्। दिदृक्षमाणे इव—द्रष्टुमिच्छति इव, ["आशु—" (१।३।५७ पा०) इत्यादिना सन्नन्तस्य दृशेः सनि "लटः—" (३।२।२४ पा०) इत्यादिना शानचि रूपम्]। दिदृक्षवोऽपि एकतः पुञ्जीभवन्ति इति दृश्यते लोके। विगाढायां—घनीभूतायां, शर्व्वर्य्यां—रजन्याम्।

(३५३) सुप्तेति।—सुप्ताः,—निद्रिताः, जना यस्मिन् तथोक्तः, अत एव

निशीथे, राजा (३५४) सान्तःपुरं परिजनं वञ्चयित्वा, (३५५) वामकरस्फुरत्स्फरुः दक्षिणकरेण उत्खातं खड्गम् अट्टहासम् आदाय, विसर्पता च खड्गप्रभापटलेन नीलांशुकपटेन इव दर्शनभयात् (३५६) अवगुण्ठितनिखिलगात्रयष्टिः, अनादिष्टयाऽपि अनुगम्यमानो राजलक्ष्म्याः पृष्ठतः, ३५७)परिमललग्नमधुकरवेणिव्याजेन केशेषु इव कर्म्मसिद्धिम् आकर्षन्, एकाकी नगरात् निरगात्, अगाच्च तं देशम्।

निःशब्दः,—शब्दरहितः, तस्मिन्। स्तिमिते—तूष्णीम्भूते इति भावः। ["निःशब्दे स्तिमिते" इत्यत्र "निःशब्दस्तिमिते" इति समस्तपाठान्तरम्]। निशीथे—अर्द्धरात्रे, ("अर्द्धरात्रनिशीथौ द्वौ" इत्यमरः)।

(३५४) सान्तःपुरम्—अन्तःपुरम्—अन्तःपुरवर्त्तिनी महिषी, तत्सहितं, परिजनं—स्वजनम् इत्यर्थः, वञ्चयित्वा—प्रतार्य्य, परित्यज्य इत्यर्थः।

(३५५) वामेति।—वामे—सव्ये, करे—हस्ते, स्फुरन्—दीप्यमानः, रत्नखचितत्वादिति भावः, स्फरुः,—खड्गमुष्टिः यस्य तथाभूतः, ("स्फरुः खड्गादिमुष्टौ स्यात्" इत्यमरः)। उत्खातं—निष्कोषितम् इत्यर्थः। विसर्पता—प्रसरता, खड्गप्रभापटलेन—असिच्छटासमूहेन। नीलांशुकपटेन इव—नीलांशुकं—नीलवसनमेव, पटः,—तिरस्करिणी, तेन इव। अत्र उपमेयोपमानयोः खड्गप्रभापटलनीलांशुकपटयोः अवैधर्म्येवाच्यसाम्यनिबन्धनोपमाऽलङ्कृतिः; सङ्कीर्णोपमा इति केचित्।

(३५६) अवगुण्ठितेति।—अवगुण्ठिता—आच्छादिता, निखिला—समग्रा, गात्रयष्टिः,—शरीरदण्डः येन यस्य वा तथोक्तः, खड्गस्य नीलवर्णप्रभया रञ्जितसर्व्वदेह इत्यर्थः; शाणसमुज्ज्वलात् खड्गात् निःसृतनीलप्रभया विच्छुरितविग्रहतया नीलांशुकावृतवत् परिलक्ष्यते इति भावः। अनादिष्टयाऽपि—अनुक्तयाऽपि। राजलक्ष्म्या—राजश्रिया, अनुगम्यमानः,—अनुसियमाणः; एतेन प्रभूतलक्ष्मीलाभः सूचितः।

(३५७) परिमलेति।—परिमलेन—अतिमनोहरगात्रसौरभेण, ("स्यात् परिमलोऽतिमनोहरगन्धयोरपि" इति मेदिनी) लग्नानां—सक्तानां, मधुकराणां—भ्रमराणां, वेणिः,—राजिः, तस्याः सैव वा व्याजः,—छलं तेन। कर्म्मसिद्धिं—कार्य्यसिद्धिम्। एकाकी—असहायः। देशं—स्थानम्। [तं देशम्" इत्यत्र "तद्देशम्" इति पाठेऽपि स एवार्थः]।

(३५८) अथ प्रत्युज्जग्मुः ते त्रयोऽपि (३५९) द्रौणि-कृपकृतवर्म्माण इव सौप्तिके (३६०) सन्नद्धाः, स्नाताः, स्रग्विणः, गृहीतविकटवेशाः, (३६१) कुसुमशिखरसञ्चारिभिः क्रियमाणमन्त्रांशुखाबन्धा इव गुच्छैः षट्चरणैः, (३६२) उष्णीषपट्टकान् ललाटमध्यघटितविकटस्वस्तिकाग्रन्थीन् महामुद्राबन्धान् इव धारयन्तः मूर्द्धभिः, (३६३) एक-श्रवण-विवर-विततविमलदन्तपत्रप्रभालेपधवलितकपोलैः मुखैः आपिबन्त

(३५८) अथेत्यादि ।—प्रत्युज्जग्मुः,—प्रत्युद्गतवन्तः, राजानं दृष्ट्वा तत्सम्मानार्थमुत्तस्थुः इत्यर्थः । त्रयः,—टिटिभ-कर्णताल पातालस्वामिनः इत्यर्थः । ["त्रयोऽपि" इत्यत्र "त्रयः" इति पाठान्तरम्] ।

(३५९) द्रौणीति ।—द्रोणस्यापत्यं द्रौणिः,—अश्वत्थामा, कृपः,—कृपाचार्यः, कृतवर्म्मा—यादववीरविशेषः, ते इव । सौप्तिके—सुप्तेषु भवं सौप्तिकं तस्मिन्, ["तत्र भवः" (४।३।५३ पा०) इति ठञि रूपम्] महाभारतीयसौप्तिकाख्ये पर्व्वणि इत्यर्थः । पुरा दुर्य्योधने भग्नोरौ समरपतिते अश्वत्थामादयस्त्रयः प्रभोः प्रीतिसम्पादनाय योधिष्ठिरे शिविरे धृष्टद्युम्नाधिष्ठिते सुप्तेषु सर्वेषु अवशिष्टेषु सैनिकवीरेषु कथमपि प्रविश्य सर्वाणि सैनिकानि व्यनाशयन्निति भारती वार्त्ता ।

(३६०) सन्नद्धाः,—वर्म्मिताः, परिहितवर्म्माण इत्यर्थः, ("सन्नद्धः वर्म्मितः सज्जो दंशितो व्यूढकङ्कटः" इत्यमरः) । स्नाताः,—कृतस्नानाः । स्रग्विणः,—मालाधारिणः ।

(३६१) कुसुमेति ।—कुसुमशिखरेषु—शिरोभूषणभूतपुष्पमालासु इत्यर्थः, सञ्चरन्तीति तैः । षट्चरणैः,—मधुकरैः, क्रियमाणाः मन्त्रेण शिखाबन्धाः,—कायबन्धाः प्रसिद्धाः येषां ते इव ।

(३६२) उष्णीषपट्टकान्—शीर्षावरणकपर्टान् । ललाटेति ।—ललाटस्य—भालस्य, मध्ये घटितः,—रचितः, विकटः,—दृढः, स्वस्तिकाग्रन्थिः,—स्वस्ति—शुभं, तस्मै हिता स्वस्तिका, तस्या ग्रन्थिः,—बन्धविशेषः येषु तान् । महामुद्राबन्धानिव—महान्तः मुद्राबन्धाः,—वीराचारानुष्ठेयबन्धनविशेषाः, तानिव । मूर्द्धभिः,—शिरोभिः ।

(३६३) एकेति ।—एकस्मिन् श्रवणविवरे—श्रोत्ररन्ध्रे, विततः—विस्तृतः, विमलस्य—विशदस्य, दन्तपत्रस्य—गजदन्तनिर्म्मितपत्राकारस्य कर्णभूषणविशेषस्य इत्यर्थः, या प्रभा—दीप्तिः, तस्याः लेपः,—आलेपनं तैः ; यद्वा,—प्रभा—दीप्तिः,

इव (३६४) निशाचरापचयचिकीर्षया शार्वरम् अन्धकारम्, (३६५) इतरकर्णावलम्बिनां रत्नकुण्डलानाम् अच्छाच्छया रुचा गोरोचनयेव मन्त्रपरिजप्तया समालब्धाः, स्वप्रतिबिम्बगर्भान् कर्म्मसिद्धये (३६६) दत्तपुरुषोपहारान् इव उल्लासयन्तः निशितान् निस्त्रिंशान्, (३६७) निशितनिस्त्रिंशांशुसन्तानसौमन्तिततिमिरान् (३६८) आत्मीयदिग्भागसंरक्षणाय त्रिधेव त्रियामां

सा एव लेपः,—आलेपनसुधा तैः, ["प्रभालेपः—" इत्यत्र "प्रभाऽऽलोकलेपः—" इति पाठे,—प्रभा, तस्याः आलोकः,—उद्योतः, तेन लेपः ; प्रभायाः आलोक एव लेपः इति वा तैः] धवलिताः,—सितीकृताः, कपोलाः,—गण्डदेशाः येषां तैः। आपिबन्त इव—ग्रसन्त इव।

(३६४) निशाचरेति।—निशाचराणां—राक्षसानाम्, अपचयचिकीर्षा—अपकारेच्छा, हानिकरणेच्छा इत्यर्थः, तया। शार्वरं—शर्वरी—रात्रिः, तत्र भवः शार्वरः, तम् ; निशाचराः निशासु अन्धकारे एव प्रभवन्ति, अन्धकारापगमे तेषां प्रभावाभावेन तदपकारस्य सौकर्य्यादिति भावः।

(३६५) इतरकर्णावलम्बिनाम्—अपरकर्णलम्बमानानाम्। अच्छाच्छया—अतिनिर्म्मलया, रुचा—प्रभया, गोरोचनयेव—गोरोचना—माङ्गलिकद्रव्यभेदः तया, पीतप्रभयेति भावः। मन्त्रपरिजप्तया—मन्त्रेण परिजप्ता—विशोधिता तया। समालब्धाः,—अनुलिप्ताः। स्वप्रतिबिम्बगर्भान्—स्वस्य प्रतिबिम्बं—प्रतिच्छाया, गर्भे—अन्तरे येषां तान्। कर्म्मसिद्धये—कार्य्यसिद्ध्यर्थम्।

(३६६) दत्तेति।—दत्तः,—अनुष्ठितः, पुरुषोपहारः,—नरबलिः यैभ्यः तानिव। उल्लासयन्तः,—सञ्चालयन्तः, निशितान्—तीक्ष्णान्, निस्त्रिंशान्—खड्गान्। ("खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः" इत्यमरः)।

(३६७) निशितनिस्त्रिंशेति।—निशितनिस्त्रिंशानां—शाणितखड्गानाम्, ["निशितनिस्त्रिंशांशु—" इत्यत्र "निस्त्रिंशांशु—" इति पाठान्तरम्] अंशुसन्तानैः,—प्रभानिवहैः, सौमन्तितानि—विभक्तानि इति यावत्, तिमिराणि—तमांसि यस्याः ताम् ; तयाणां तेषां खड्गत्रयप्रभया तत्रत्यान्धकारनिरसनात् अन्यत्र चान्धकारव्याप्तत्वात् सौमन्ततितिमिरामिव प्रतीयमानामिति भावः।

(३६८) आत्मीयेति।—आत्मीयः,—स्वीयः, ["आत्मीय—" इत्यत्र "आत्मीयात्मीय—" इति पाठे,—स्वीयस्वीय इत्यर्थः] दिशां भागः,—रक्षणीया दिक् इत्यर्थः,

पाटयन्तः, (३६९) सार्द्धचन्द्रैः कलधौतबुद्बुदावलितरलतारागणैः निशाया इव (३७०) परुषासिधारानिक्तैः खड्गैः गृहीतैः चर्म्मफलकैः अकाण्डशर्वरीम् अपरां घटयन्तः, (३७१) काञ्चनशृङ्खलाकलापनियमितनिविड़निष्प्रवाणयः, बद्धासिधेनवः, टौटिभकर्णतालपातालस्वामिनो निवेदितवन्तश्च आत्मानम् ।

अवनिपतिस्तु—(३७२) "कोऽत्र कः ?" इति त्रीन् अपृच्छत् । आचचक्षिरे च स्वं स्वं नाम त्रयोऽपि ते ; तैरेव च अनुगम्यमानो जगाम तां बलिदीपालोकजर्जरितगुग्गुलुधूप-

---

तस्य संरक्षणं—सन्दर्शनम् इति भावः, तस्मै । विद्यामां—रजनीं, पाटयन्तः,—खण्डयन्तः ।

(३६९) सार्द्धचन्द्रैः,—अर्द्धचन्द्राकृतैः इत्यर्थः ; निशायां खड्गेषु च अर्द्धचन्द्रस्य सम्भाव्यमानत्वात् एवमुक्तं, न तु वास्तवत्वेन कृष्णचतुर्दशीरात्रौ चन्द्रः सम्भवतीति । कलधौतेति ।—कलधौतं—रौप्यं, ("कलधौतं रौप्यहेम्नी" इत्यमरः) तस्य बुद्बुदावलिः,—बुद्बुदाः,—जलस्फोटाः, तदाकारबिन्दुविशेषाः इत्यर्थः, तेषामावलिः,—सङ्घः, तद्वत् तरलः,—स्फुरन् इति भावः, तारागणो येषु तैः ।

(३७०) परुषेति ।—परुषाभिः,—निशिताभिः, असिधाराभिः निक्ताः,—छिन्नाः, तैः । चर्म्मफलकैः,—"ढाल" इति बङ्गभाषाप्रसिद्धैः, अकाण्डशर्वरीम्—असमयरजनीम्, अपरां—द्वितीयाम्, (एकस्या वर्त्तमानत्वात् अपरामिति पदं बोद्धव्यम्) घटयन्तः,—जनयन्तः ।

(३७१) काञ्चनेति ।—काञ्चनशृङ्खलाकलापेन—स्वर्णमेखलाहारेण, नियमितं—निबद्धं, निविड़—घनं, निष्प्रवाणि—नवं वस्त्रं यैः ते, ("अनाहतं निष्प्रवाणि तत्कक्ष्यं नवाम्बरे" इत्यमरः) । बद्धेति ।—बद्धा—गृहीता, असिधेनुः,—क्षुरिका यैः तथोक्ताः, ("स्याच्छस्त्री चासिपुत्री च क्षुरिका चासिधेनुका" इत्यमरः) । निवेदितवन्तः,—भैरवाचार्यनिर्देशेन भवन्तं प्रतीचामः इति कथितवन्त इत्यर्थः ।

(३७२) "कोऽत्र कः" इति वाक्यैकांशोक्तिः, अत्र कः कः वर्त्तते इत्याशयः ; बलिदीपेति ।—बलिदीपस्य—पूजाप्रदीपस्य, आलोकेन—प्रभया, जर्जरितानां—विनष्टप्रायाणां, मन्दीभूतप्रभाणामिति भावः, गुग्गुलुधूपानां—गुग्गुलुधूपदानार्थरचि-

धूमगर्भ्यमाणदिग्भागतया विचित्र्यमाणरक्षासर्षपार्द्धदग्धान्धकारपलायमाननिशामिव समुपकल्पितसर्वोपकरणां निःशब्दाञ्च गम्भीराञ्च भीषणाञ्च साधनभूमिम्।

(३७३) तस्याञ्च कुमुदधूलिधवलेन भस्मना लिखितस्य मण्डलस्य मध्ये स्थितं, (३७४) दीप्ततरतेजःप्रसरं, पृथुपरिवेशपरिक्षिप्तमिव शरत्सवितारं, (३७५) मथ्यमानक्षीरोदावर्त्तमध्यवर्त्तिनम् इव मन्दरं,

ताप्तीनामिति भावः, धूमैः गर्भ्यमाणः,—ग्राह्यमानः, दिग्भागो यस्याः, तस्या भावः, तत्ता तया। विचित्र्यमाणेति।—विचित्र्यमाणैः,—प्रसार्यमाणैः, विघ्नापनयनार्थमिति भावः, रक्षासर्षपैः,—रक्षार्थं—विघ्नेभ्यो पूजाद्यनुष्ठानरक्षणार्थं, सर्षपाः,—गौरसिद्धार्थाः, मन्त्रपूता इति भावः, तैः अर्द्धदग्धम् अन्धकारं यस्याः तथाभूता, अत एव पलायमाना निशा यस्याः यस्यां वा तथोक्ताम्। "बलिदीप" इत्यनेन अर्द्धदग्धत्वमेव सम्भाव्यते, अर्द्धदग्धस्य च पलायनमपि सङ्गच्छते, न तु बहुदग्धस्य; पलायमानस्य कञ्चित् दिग्भागमाश्रयतीति विभावनीयम्। समुपकल्पितेति।—समुपकल्पितानि—समायोजितानि, सर्वाणि उपकरणानि—साधनद्रव्याणि यस्यां ताम्। साधनभूमिं—मन्त्रसाधनचत्वरम्।

(३७३) "तस्याञ्च" इत्यादौ "भैरवाचार्यमपश्यत्" इत्युत्तरेणान्वयः। कुमुदेति।—कुमुदानां—सितोत्पलानां, धूलिः,—परागः, तद्वत् धवलः तेन। लिखितस्य—रचितस्य। मण्डलस्य—मण्डलाकाररेखायाः।

(३७४) दीप्तेति।—दीप्ततरः,—अतिशयेन भास्वान्, तेजसां प्रसरः,—विस्तारः, यस्य तथोक्तम्, अत एव पृथ्विति।—पृथुना—विशालेन, परिवेशेन—परिधिना, मण्डलविशेषेण इत्यर्थः, ("परिवेशस्तु परिधिरुपसूर्यकमण्डले" इत्यमरः) परिक्षिप्तः,—वेष्टितः तं, शरत्सवितारं—शारदं सूर्यमिव, स्थितमिति शेषः; शारदसूर्यस्य सुतीक्ष्णकिरणत्वात् तद्वदृश्यं, तेन च भीषणदर्शनत्वमस्योक्तमिति ज्ञातव्यम्।

(३७५) मथ्यमानेति।—मथ्यमानस्य—विलोड्यमानस्य, क्षीरोदस्य—क्षीरसागरस्य, आवर्त्तमध्ये—जलभ्रमिमध्ये, ("स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः) वर्त्तते इति तथोक्तं, ["क्षीरोदावर्त्तमध्यवर्त्तिनम्" इत्यत्र "क्षीरादावर्त्तवर्त्तिनम्" इति पाठे,—आवर्त्ते—आवर्त्तमध्ये इत्यर्थः]। मन्दरं—मन्दराद्रिम्।

(३७६) रक्तचन्दनानुलेपिनो (३७७) रक्तखगम्बराभरणस्य उत्तानशयस्य शवस्य उरसि उपविश्य (३७८) जातजातवेदसि मुखकुहरे (३७९) प्रारब्धाग्निकार्य्यम्, (३८०) कृष्णोष्णीषं, कृष्णाङ्गरागं, कृष्णप्रतिसरं, कृष्णवाससं, (३८१) कृष्णतिलाहुतिनिमेन विद्याधरत्वलक्षणया (३८२) मानुषनिर्माणकारणकालुष्यपरमाणूनिव क्षयम् उपनयन्तम्, आहुतिदानपर्य्यस्ताभिः प्रेतमुखस्पर्शदूषितं प्रक्षालयन्तमिव आशुशुक्षणिं कर-

(३७६) रक्तेति ।—रक्तचन्दनम् एव अनुलेपः, रक्तचन्दनानुलेपः, स विद्यतेऽस्येति तथोक्तस्य, रक्तचन्दनानुलिप्तस्येत्यर्थः ।

(३७७) रक्तेति ।—रक्तं—रक्तवर्णं, खगम्बरं—माल्यवसनम्, आभरणं यस्य तथाभूतस्य । उत्तानशयस्य—उत्तानशायिनः, ऊर्ध्वमुखशायिन इत्यर्थः । ["उत्तानादिषु कर्त्तृषु" (वा०) इति शिङ्धातोः अचि रूपम्] शवस्य—मृतदेहस्य ।

(३७८) जातेति ।—जातः,—उत्पन्नः, उत्थित इत्यर्थः, सन्नद्धलेनेति भावः, जातवेदाः,—अग्निर्यस्मात् तथाभूते, ("अग्निर्वैश्वानरो वह्निः,..... । .....जातवेदास्तनूनपात् ॥" इत्यमरः) मुखकुहरे—वदनगह्वरे ।

(३७९) प्रारब्धेति ।—प्रारब्धं—प्रक्रान्तम्, अग्निकार्य्यं—होमः येन तथोक्तम् ।

(३८०) कृष्णेति ।—कृष्णं—कृष्णवर्णम्, उष्णीषं—शिरोवेष्टनवसनं यस्य तथाभूतम् । कृष्णाङ्गरागं—कृष्णवर्णविलेपनम् । कृष्णप्रतिसरं—कृष्णवर्णदृढसूत्रम् ; ("ना चमूजघने दृढसूत्रे प्रतिसरीऽस्त्रियाम्" इत्यमरः) । कृष्णवाससं—कृष्णवसनपरिधायिनम् ।

(३८१) कृष्णेति ।—कृष्णतिलानाम् आहुतिनिमेन—आहुतिच्छलेन, विद्याधरत्वलक्षणया—विद्यां धरतीति विद्याधरः,—दैवयोनिविशेषः, तस्य भावः तत्त्वं, तस्य लक्षणा—स्पृहा तया, आत्मनो विद्याधरत्वलाभेच्छया इत्यर्थः ।

(३८२) मानुषेति ।—मानुषस्य—स्वस्येति भावः, निर्म्माणं—सृष्टिः, तस्य कारणानि—उपादानसामग्र्याः, कालुष्यपरमाणवः,—मालिन्यपरमाणवः, तानिव ; तिलानां कृष्णत्वादेव परमाणूनामपि कालुष्योत्प्रेक्षा ; क्षयं—नाशम्, उपनयन्तं—प्रापयन्तम् । आहुतीति ।—आहुतिदाने—अग्नौ हवनीयद्रव्यनिक्षेपकाले, पर्य्यस्ताः,—पतिताः ताभिः, करनखदीधितिभिः,—दृढनखमयूखैः । प्रेतेति ।—प्रेतस्य—शवस्य, मुखस्पर्शेन—तन्मुखे ज्वलनादिति भावः, दूषितम्—अपवित्रम्, आशुशुक्षणिम्

नखदीधितिभिः, (३८३) धूमालोहितेन चक्षुषा चतजाहुतिमिव हुतभुजि पातयन्तम्, (३८४) ईषद्विहृताधरपुटप्रकटितसितदशनशिखरेण दृश्यमानमूर्त्तमन्त्राक्षरपङ्क्तिनेव मुखेन किमपि जपन्तं, (३८५) होमश्रमस्वेदसलिलप्रतिविम्बिताभिः आसन्नदीपिकाभिः, दहन्तमिव सिद्धये सर्वावयवान्, (३८६) अंसावलम्बिना बहुगुणेन विद्याधरराज्येनेव ब्रह्मसूत्रेण परिगृहीतं, महाभैरवं भैरवाचार्य्यम् अपश्यत्; उपसृत्य च अकरोत् नमस्कारम्; अभिनन्दितश्च तेन स्वव्यापारम् अन्वतिष्ठत्।

—अग्निम्, ("अग्निर्वैश्वानरो वह्निः…। ……शिखावानाशुशुक्षणिः॥" इत्यमरः) प्रज्वालयन्तमिव—ग्रीधयन्तमिव।

(३८३) धूमेति।—धूमेन आलोहितम—आरक्तं तेन। चक्षुषा—नेत्रेण। हुतभुजे—अग्नौ, चतजाहुतिमिव—रक्ताहुतिमिव, पातयन्तं—क्षिपन्तम्। वक्ष्यमाणविषयोपयोगितया रक्ताहुतित्वं नामाख्यात इति।

(३८४) ईषदिति।—ईषद्विहृतेन—जपानुरोधादल्पव्यात्तेन, अधरपुटेन प्रकटितानि—प्रकाशितानि, सितानां—स्वच्छानां, दशनानां—दन्तानां, शिखराणि—अग्राणि यस्य तथाभूतेन। ईषद्विहृतत्वादेवास्य शिखरप्रकटनं बोद्धव्यम्। अत एव दृश्यमानेति।—दृश्यमाना मूर्त्ता—मूर्त्तिमती, मन्त्राणां—प्रणवादीनाम्, अक्षरपङ्क्तिः,—वर्णराजिः यस्य तादृशेन।

(३८५) होमेति।—होमेन यः श्रमः,—श्रान्तिः, तेन स्वेदसलिलानि—घर्मोदकानि, तेषु प्रतिबिम्बिताः,—प्रतिफलिताः ताभिः। आसन्नदीपिकाभिः,—समीपवर्त्तिप्रदीपैः; प्रतिबिम्बग्रहणोपपत्त्यर्थम् आसन्नेति पदं प्रयुक्तमिति मन्तव्यम्। सिद्धये—विद्याधरत्वलाभाय इत्यर्थः।

(३८६) अंसावलम्बिना—स्कन्धलम्बिना। बहुगुणेन—बहुतन्तुना, उत्कर्षोपेतयुक्तेन च। विद्याधरराज्येन—तदाख्यदैवयोनिविशेषाणां राजत्वेन, ["विद्याधरराज्येनेव" इत्यत्र "विद्याराजेनेव" इति पाठे,—विद्याराजः,—मन्त्रविशेषः तेनेव। अस्मिन् पाठे विद्याराजपक्षे—बहुगुणेन—पुनःपुनरावर्त्तितेन, पुनःपुनरुच्चरितेनेत्यर्थः, बहुगुणसम्पन्नेनेति वा]। ब्रह्मसूत्रेण—यज्ञोपवीतेन। महाभैरवं—शिवोपममित्यर्थः,

अवान्तरे पातालस्वामी (३८७) शातक्रतवीम् आशाम् अङ्कीचकार। कर्णतालः कौवेरीम्। परिव्राट् (३८८) प्राचेतसीम्। राजा तु (३८९) वैश्वङ्कवेन ज्योतिषा अङ्कितां ककुभम् अलङ्कृतवान्।

(३९०) एवञ्च अवस्थितेषु प्रतिदिशं दिक्पालेषु, दिक्-

अति भयङ्करं वा। अभिनन्दितः,—अभ्यर्थितः। तेन—भैरवाचार्येण। ["परिगृहीतं, महाभैरवं भैरवाचार्यम्" इत्यत्र "परिगृहीतं भैरवाचार्यम्" इति पाठान्तरम्]। स्वव्यापारं—स्वकार्यं, भैरवाचार्योक्तमिति शेषः। अन्वतिष्ठत्—अन्वपालयत्।

(३८७) शातक्रतवीं—शतक्रतुः,—इन्द्रः, तस्य इयं शातक्रतवी तां, प्राचीमित्यर्थः, आशां—दिशं, ("दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः) अङ्कीचकार—अधितष्ठौ। "अङ्कीचकार" इत्यनेन सर्वेषामेषां स्वेच्छापरिग्रहणं प्रकटितमिति। कौवेरीं—कुवेरसम्बन्धिनीं, कुवेरपालितां वा, उदीचीमित्यर्थः।

(३८८) प्राचेतसीं—प्रचेतसा—वरुणेन, अधिष्ठिता प्राचेतसी तां, प्रतीचीमित्यर्थः। ["तस्य निवासः" (४।२।६९ पा०) इत्यणि ङीपि रूपसिद्धिः]।

(३८९) वैश्वङ्कवेन—विश्वङ्कुर्नाम सूर्यवंश्यः राजा, तस्य इदं वैश्वङ्कवं तेन। ज्योतिषा—तेजसा, अङ्कितां—चिह्नितां तां, दक्षिणामिति यावत्। ककुभं—दिशम्। दक्षिणस्याम् इत्युत्तरमङ्गलबोधकत्वात् वैश्वङ्कवेनेत्युक्तम्। पुरा विश्वङ्कुर्नाम राजा सशरीरो दिवं जिगमिषुः सवाय गुरुं वशिष्ठमन्वरुणत्। स तु नैतत् त्वया अधिक्रियते इत्यवज्ञातवान्। ततो गुरुपुत्रैश्च अवज्ञातः गुरुद्वेषिणं विश्वामित्रं शरणमगात्। तेन च कृतयज्ञः सशरीरो दिवं गच्छन् देवराजेन गुरुद्वेषी इति स्वर्गात् निराकृतः पतन्, विश्वामित्रम् उच्चैः जगाद,—"मुने! त्रायस्व मां नरकं पतन्तम्" इति। आत्मत्राणाय प्रार्थितः विश्वामित्रस्य तवैव अन्तरीक्षे दक्षिणदिग्भागवर्त्तिनि "तिष्ठ" इति उवाच; ततश्च असौ तथैव अद्यापि स्थितः। तच्च स्थानं विश्वङ्कुस्वर्ग इति ख्यायते एवं पुराणवार्त्ता अवानुसन्धेया।

(३९०) एवमित्यादि।—प्रतिदिशं,—सर्वासु दिक्षु, दिशि दिशि इत्यर्थे, आभीक्ष्ण्येऽव्ययीभावात्। ["प्रतिदिशम्" इति पाठः पुस्तकान्तरे न दृश्यते]। दिक्पालेषु—दिशां रक्षकेषु, पातालस्वामिप्रभृतिषु चतुर्षु इत्यर्थः। दिक्पालेति।—दिक्-

पातालभुजपञ्जरप्रविष्टे (३९१) साधयति विस्रब्धं कर्म्म भैरवं भैरवाचार्य्ये, (३९२) अतिचिरं कृतकोलाहलेषु निष्फलप्रयत्नेषु प्रत्यूहकारिषु शान्तेषु कौणपेषु, गलति अर्द्धरात्रसमये (३९३) मण्डलस्य नातिदवीयसी उत्तरेण अकस्मात् (३९४) प्रलयमहावराहदंष्ट्राविवरमिव दर्शयन्ती मही अदीर्य्यत। सहसैव च तस्मात् विवरात् आशावारणोत्क्षिप्त इव आलानलोहस्तम्भः, (३९५) महावराहपीवरस्कन्धपीठः,

पातालानाम्—एषां पातालस्वामिप्रभृतीनां, भुजाः,—बाहव एव, ["अर्जिदृशि—" (उ० १ पा० २८ सू०) इत्यादिना बाधधातोः कुप्रत्ये इकारादेशे रूपम्] पञ्जरं तस्मिन्, प्रविष्टः तस्मिन्, अकुतोभये इति भावः।

(३९१) विस्रब्धं—निःशङ्कं, विश्वस्तं वा यथा तथा। एतन्निमित्तमेव राजादीनां साहाय्यग्रहणं बोद्धव्यम्। साधयति—अनुतिष्ठति।

(३९२) अतिचिरम्—अतिपूर्वं, दीर्घकालं व्याप्य इति वा। प्रत्यूहकारिषु—विघ्नकारिषु। शान्तेषु—शान्तिं प्राप्तेषु। कौणपेषु—राक्षसेषु, ("राक्षसः कौणपः क्रव्यात्" इत्यमरः)। गलति—अतिक्रामति।

(३९३) मण्डलस्य—प्रागुक्तभस्मलिखितमण्डलाकाररेखायाः। नातिदवीयसी—नातिदूरवर्त्तिनी इत्यर्थः। उत्तरेण—उत्तरस्यां दिशि। ["एनबन्यतरस्याम्—" (५।३।३५ पा०) इत्यादिना सप्तम्यन्तस्य एनप्, तदन्तेन योगात् "एनपा—" (२।३।३१ पा०) इत्यादिना "मण्डलस्य" इति षष्ठी]।

(३९४) प्रलयेति।—प्रलये—प्रलयकाले, महावराहः,—आदिवराहः, जलमग्नायाः पृथिव्याः उद्धारकः नारायणावतारविशेषः इति यावत्, तस्य दंष्ट्रा—दशनः, तस्याः विवरं—तत्कृतं रन्ध्रम इव इत्यर्थः, दर्शयन्ती—प्रकटयन्ती। ["मही" इत्यत्र "क्षितिः" इति पाठान्तरम्]। अदीर्य्यत—स्वयमेव द्विधा अभवत् इत्यर्थः। विवरात्—रन्ध्रात्, "पुरुषः उज्जगाम" इति उत्तरेण सम्बन्धः। तमेव विशिनष्टि, आशीत्यादिभिः।—आशावारणः,—दिग्गजः, पातालस्य इति भावः, तेन उत्क्षिप्त इव—उपरि क्षिप्त इव, आलानलोहस्तम्भः,—आलानं—गजबन्धनं, ("आलानं बन्धनस्तम्भे" इति हस्तिप्रकरणे अमरः) तदर्थं लोहस्तम्भः,—लौहनिर्म्मितः विपुलः कीलविशेषः इत्यर्थः। लोहपदेन पुरुषस्य दृढशरीरत्वं कृष्णवर्णत्वञ्चोक्तम्।

(३९५) महावराहेति।—महावराहस्य इव पीवरं—स्थूलं, मांसलमित्यर्थः,

नरकासुर इव भुवो गर्भात् उद्भूतः, बलिदानव इव भित्त्वोत्थितः पातालम्, इन्द्रनीलप्रासाद इव (३९६)उपरिज्वलितरत्नप्रदीपः, (३९७) स्निग्धनीलघननिविड़कुटिलकुन्तलकान्तमौलिः, (३९८) उन्मीलन्मालतीमुण्डमालः, गद्गदतया स्वरस्य स्वभावपाटलतया च चक्षुषः क्षीव इव यौवनमदेन, (३९९) वल्गद्गलदामकः, (४००) करसम्पुटमृदितया मृदा (४०१) दिङ्नागकुम्भाभो अंसकूटौ पुनः पुनः पङ्कयन्, (४०२) सान्द्रचन्दनपङ्क-

स्कन्धपीठम्—अंसपीठम्, आसनवत् विस्तृतः स्कन्धः इत्यर्थः, यस्य तथोक्तः। नरकासुर इव—भूमिसुत इव इति भावः। गर्भात्—उदरात्, अभ्यन्तरादित्यर्थः, ("कुक्षिभृणाभका गर्भः" इत्यमरः) इन्द्रनीलप्रासाद इव—नीलकान्तमणिनिर्मितहर्म्यम् इव।

(३९६) उपरीति।—उपरि—ऊर्ध्वभागे, ज्वलितौ—प्रदीप्तौ, रत्नप्रदीपौ—मणिमयदीपौ, नेत्रे इति भावः, यस्य तथाभूतः।

(३९७) स्निग्धेति।—स्निग्धैः,—मसृणैः, नीलैः,—कृष्णवर्णैः, घनैः,—अविरलैः, निविड़ैः,—सङ्घीर्णैः, दृढ़ैरिति वा, दृढ़मूलैरित्यर्थः, कुटिलैः,—भङ्गिमद्भिः, कुञ्चितैरित्यर्थः, कुन्तलैः,—केशैः, कान्तः,—मनोज्ञः, मौलिः,—किरीटं यस्य तथोक्तः। ("मौलिः किरीटे धम्मिल्ले चूड़ायामनपुंसकम्" इति मेदिनी)।

(३९८) उन्मीलदिति।—उन्मीलन्ती—स्फुरन्ती, मालतीमुण्डमाला—मालतीपुष्पशेखरहारः यस्य तथोक्तः। गद्गदतया—अर्द्धस्फुटतया। स्वभावपाटलतया—सहजरक्ततया। क्षीव इव—मत्त इव।

(३९९) वल्गदिति।—वल्गत्—चलत्, गले—कण्ठे, दाम—माल्यं यस्य तथाभूतः; चाचल्यमानवक्षोजग्रहारयष्टिक इत्यर्थः।

(४००) करेति।—करयोः सम्पुटेन—योगेन, समुद्गकाकारकरचितकरद्वयेन इत्यर्थः, मृदिता—दलिता तया। मृदा—मृत्तिकया।

(४०१) दिङ्नागेति।—ऐरावतकुम्भनिभौ, अंसकूटौ—स्कन्धपृष्ठे, स्कन्धोपरिभागौ पर्व्वतशृङ्गवत् समुन्नतदृढ़स्कन्धौ वा इत्यर्थः, पङ्कयन्—कर्द्दमयन्, मूर्त्तिभेदलग्नमृदा मलिनयन् इत्यर्थः।

(४०२) सान्द्रेति।—सान्द्रेण—घनेन, चन्दनपङ्केन—कर्द्दमितचन्दनेनेत्यर्थः, घृष्टचन्दनसारेण इति भावः, ["चन्दनपङ्क—" इत्यत्र "चन्दनकर्द्दम—" इति

दत्तैः अव्यवस्थास्यासकैः (४०३) अतिसितजलधरशकलशारित इव शारदाकाशैकदेशः, (४०४) केतकीगर्भपत्रपाण्डुरस्य चण्डातकस्य उपरि चामतरीकृतकुक्षिः, (४०५) कक्ष्याबन्धं विधाय विलासविच्छित्तिना धवलव्यायामफालीपटान्तेन धरणितलगतेन धार्यमाण इव पृष्ठतः शेषेण, (४०६) स्थिरस्थूलोरुदण्डः, भूमिभङ्गभयेन इव मन्थराणि स्थापयन् पदानि, (४०७) निर्भरगर्व्वगुरु कथमपि शैलम्

पाठान्तरेऽपि स एवार्थः] दत्तानि—विरचितानि तैः। अव्यवस्थास्यासकैः,—अव्यवस्थया—अयथास्थवस्थया इत्यर्थः, स्यासकाः,—चन्द्रकाः बुद्बुदाकारा बिन्दव इत्यर्थः, तैः; यद्वा,—स्यासकैः,—चार्च्चिक्यैः, पाटव विनेवानुलिप्तचन्दनादिभिरित्यर्थः, ("स्यासकः पुंसि चार्च्चिक्ये जलादेरपि बुद्बुदे" इति मेदिनी)।

(४०३) अतीति।—अतिसितेन—अतिस्वच्छेन, जलधाराणां—मेघानां, शकलेन—खण्डेन, शारित इव—चित्रित इव, कर्ब्बुरित इव इत्यर्थः, [शारशब्दात् सत्वर्थीय इतचि सिद्धम] शारदाकाशैकदेशः,—शरत्कालिकगगनैकभागः।

(४०४) केतकीति।—केतक्याः गर्भपत्रम्—अभ्यन्तरच्छदः, तद्वत् पाण्डुरं—धवलं, तस्य, चण्डातकस्य—परिधानवसनभेदस्य; यद्यपि चण्डातकशब्देन उत्तमाङ्गनानामधोरूपस्थलस्थितं वसनं गम्यते, तथाऽपि अत्र उपचारात् पुंसामपि वसनविशेषो बोद्धव्यः। चामतरीकृतकुक्षिः,—अतिशयेन क्षीणतां नीतोदरः।

(४०५) कक्ष्याबन्धं—वस्त्ररज्जुं, कटिबन्धमित्यर्थः। विलासविच्छित्तिना—लीलाविशेषेण। धवलेति।—धवलः,—शुभ्रः, व्यायामः,—विशेषेण आयत इति यावत्, व्यायामपरिमाणदीर्घो वा, फालीपटान्तः,—कटिबन्धवस्त्रान्तः, तेन। धरणितलगतेन—भूतलस्पृष्टिनेन। [धरणितलगेन इति पाठान्तरम्]। धार्यमाण इव—गृह्यमाण इव। शेषेण—अनन्तनागेन। शेषस्य धावल्यात्, व्यायतत्वात् धरणितलगतत्वाच्च तथाविधोत्प्रेक्षा बोद्धव्या।

(४०६) स्थिरेति।—स्थिरौ—दृढौ, स्थूलौ ऊरुदण्डौ यस्य तथोक्तः। भूमीति।—भूमेः,—पृथिव्याः, भङ्गभयेन—नाशभयेन, रसातलगमनाशङ्कया इति भावः। मन्थराणि मन्दसञ्चाराणीत्यर्थः। स्थापयन्—अर्पयन्।

(४०७) निर्भरेति।—निर्भरेण—निरतिशयेन, गर्वेण—अहङ्कारेण, गुरु—

इव गात्रम् उद्वहन्, (४०८) दर्पेण स्वेन मुहुर्मुहुः उरसि द्विगुणिते दोष्णि वामे तिर्य्यक् उत्क्षिप्ते च दक्षिणे जङ्घाकाण्डे (४०९) कुण्डलिते चण्डास्फोटनटाङ्कारैः (४१०) कर्म्मविघ्ननिर्घातानिव पातयन्, एकेन्द्रियविकलमिव जीवलोकं कुर्वन्, (४११) कुवलयदलश्यामलः पुरुषः उज्जगाम, जगाद च विस्मयं (४१२) नरसिंहनादनिर्घोषघोरया भारत्या,—

भारवाहित्यर्थः ; कर्मण्यानुरोधेन महाभारवत् गिरिमुक्तमिव शरीरं धारयमाणः इति कथनपौनरुक्त्यस्यागमः ।

(४०८) दर्पेण—अभिमानेन, ["स्वेन" इति पाठः पुनरुक्तदोषेण न दृश्यते] । द्विगुणिते—द्विराकृष्टे, वामे—सव्ये, वामभागस्थे इत्यर्थः, दोष्णि—भुजे । ["दमीडोसिः" (उ० २ पा० ६९ सू०) इति दमधातोः डोसिप्रत्यये रूपम् । "भुजबाहू प्रवेष्टो दोः" इत्यमरः] दक्षिणे च भुजे इति शेषः, तिर्य्यक्—वक्रभावेन, उत्क्षिप्ते—ऊर्द्धं स्थापिते । जङ्घाकाण्डे—जङ्घारूपे स्तम्भे ।

(४०९) कुण्डलिते—कुण्डलीकृते, कुञ्चिते इत्यर्थः । चण्डेति ।—चण्डम्—उत्कटं, यत् आस्फोटनम्—आघातः, बाह्वोरिति भावः, येन ये टाङ्काराः,—शब्दविशेषाः तैः, कुलिशकठोरनिर्हादैः इत्यर्थः ।

(४१०) कर्मेति ।—कर्म्मणि—भैरवाचार्य्यस्य साधनकार्य्ये, विघ्नाय—अन्तरायार्थमित्यर्थः, निर्घाताः,—आकाशपतितवायुजनिताः शब्दविशेषाः तानिव । तथा चोक्तं,—"यदन्तरीक्षे बलवान् मारुतो मरुताहतः । पतत्यधः स निर्घातो जायते वायुसम्भवः ॥" इति । अत एव एकेन्द्रियविकलमिव—एकेन इन्द्रियेण—श्रोत्रेणेति भावः, विकलः,—अक्षिहीनः, तमिव, बधिरमिवेत्यर्थः ।

(४११) कुवलयदलश्यामलः,—कोर्वलयानीव कुवलयानि नीलाम्बुजानि तद्वत् श्यामलः, नीलोत्पलपर्णकृष्णः इत्यर्थः । ["कुवलयश्यामलः" इति पाठान्तरम्] । उज्जगाम—उदतिष्ठत् ।

(४१२) नरसिंह ।—नरसिंहः,—नृसिंहावतारः, तस्य नादः,—शब्दः, ("नामिकण्ठहृदि स्थानात् मारुतः प्राणसंज्ञकः । नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः ॥" इत्युक्ते, "आकाशाग्नेर्मरुज्जातौ नाभिकण्ठौ समुद्भवम् । सुखेऽभिव्यक्तिमापन्नौ यः स नाद इतीरितः ॥" इत्युक्ते च प्राणवायुरूपभेदे वा) निर्घोषः,—हुङ्कारः, निनादः इत्यर्थः, तद्वत् घोरा—गम्भीरा तया । भारत्या—वाचा ।

"भो (४१३) विद्याधरीश्रद्धाकामुक! किम् अयं विद्याऽवलेपः? सहायमदो वा? यत् अस्मै जनाय अविधाय (४१४) बलिं बालिश इव सिद्धिम् अभिलषसि? का ते दुर्बुद्धिरियम्? एतावता कालेन शैवाधिपतिः अस्य मन्नाम्ना एव लब्धव्यपदेशस्य देशस्य नागतस्ते (४१५) श्रोत्रोपकण्ठं, श्रीकण्ठनामा नागोऽहम्। अनिच्छति मयि का शक्तिः (४१६) ग्रहगणस्य अपि गन्तुं गगने? (४१७) भूनाथोऽपि अयम् अनाथः तपस्वी, यस्तु त्वादृशैः शैवापसदैः उपकरणी-

(४१३) विद्याधरीति।—विद्याधर्यां—दैवयोनिविशेषस्त्रियां, श्रद्धया—रागेण, कामुकः,—अभिलाषी, तत्सम्बुद्धौ। विद्याधरीतिपदप्रयोगः वपोत्पादनार्थं बोद्धव्यः, श्रद्धापदग्रहणञ्च चेष्टावैफल्यबोधनाय। विद्याधरीष्वेव श्रद्धा विद्यते नास्मासु, अतस्ते कर्म्मनाशो भविष्यतीति भावः। विद्याऽवलेपः,—विद्यागर्व्वः। सहायमदः,—सहकारिसद्भावजनितौद्धत्यम्। अस्मै जनाय इति आत्मनिर्देशः, मह्यमित्यर्थः। "अस्मै" इत्यादि वाक्यं गर्व्वद्योतकमवगन्तव्यम्।

(४१४) बलिं—पूजाम्, अविधाय—अदत्त्वा। बालिश इव—मूर्ख इव। ("मूर्खवैधेयबालिशाः" इत्यमरः)। "अभिलषसि" इति पदं कामनावैफल्यसूचकम्, मन्नाम्नैव—मदीयेन नाम्नैव, लब्धव्यपदेशस्य—प्राप्ताभिधानस्य, सङ्केतितस्येत्यर्थः, अस्य देशस्य—श्रीकण्ठाख्यजनपदस्य इत्यर्थः, शैवाधिपतिः,—शैवस्वामी, भूस्वामी इत्यर्थः।

(४१५) श्रोत्रोपकण्ठं—श्रोत्रयोः, उपगतः कण्ठम्—उपकण्ठं, ["अव्ययादयः शाल्यादयश्च द्वितीयया (वा०) इति समासः] श्रुतिसमीपम् इत्यर्थः; श्रीकण्ठनामा नागः एतद्देशस्वामी, त्वया एतावतापि कालेन न श्रुतः? इत्यर्थः।

(४१६) ग्रहगणस्यापि—ग्रहाः,—रव्यादयः, तेषां गणः तस्य; मदनिच्छया शैवराणामपि न शक्तिः खनुत्पतितुं, किमु मानववराकाणामिति भावः।

(४१७) भूनाथः,—भूपालः, अयं—पुष्पभूतिः इत्यर्थः। अनाथः,—अस्वामिकः, यद्यस्य कोऽपि स्वामी अस्यास्यत् तदा एनमस्याद्यापारात् व्यवारयिष्यदिति भावः। तपस्वी—वराकः, अधूर्त्तः इत्यर्थः, यदयं धूर्त्तेन त्वया प्रतारित इति भावः। यः,—भूपाल इत्यर्थः। त्वादृशैः,—त्वत्सदृशैः। ["यस्तु त्वादृशैः" इत्यत्र "यः त्वादृशैः"

क्रियते। सहस्व इदानीं सह अमुना (४१८) दुर्नरेन्द्रेण दुर्नयस्य फलम्" इत्यभिधाय च निष्ठुरैः प्रकोष्ठप्रहारैः त्रीनपि टीटिभप्रभृतीन् अभिमुखं प्रधावितान् सशरीरावरणकृपाणान् अपातयत्।

(४१९) अथ अपूर्वाधिक्षेपश्रवणात् अशस्त्रव्रणैः अपि अमर्षखेदच्छलेन अनेकसमरपीतम् असिधाराजलमिव वमद्भिः अवयवैरपि रोमाञ्चनिभेन मुक्तशरशतशल्यनिकरभरलघुमिव आत्मानं रणाय कुर्वाद्भिः, (४२०) अट्टहासेन अपि प्रतिविम्बिततारागणेन स्फुटदृष्टधवलदन्तमालम् अवज्ञया हसतेव कथ्यमानसत्त्वाव-

---

दांत पाठान्तरम्]। शैवापसदैः,—शैवाधमैः। उपकरणीक्रियते—प्रलोभ्य सहायीक्रियते इत्यर्थः।

(४१८) दुर्नरेन्द्रेण—कुराज्ञा। दुर्नयस्य—दुश्चेष्टितस्य। निष्ठुरैः,—निर्दयैः, प्रचण्डैरित्यर्थः। प्रकोष्ठप्रहारैः,—प्रकोष्ठस्य—हस्तावयवविशेषस्य, प्रहारैः, चपेटाघातैः इति वार्थः, ("अस्योपरि प्रगण्डः स्यात् प्रकोष्ठस्तस्य चाध्वधः" इत्यमरः)। अभिमुखं प्रधावितान्—लोभं लक्ष्यीकृत्य प्रचलितानित्यर्थः। सशरीरैरिति।—शरीरावरणं—वर्म, कृपाणः,—खड्गः, ताभ्यां सह वर्त्तमानान्, असिवर्मसहितान् इत्यर्थः।

(४१९) अथेति।—"अथ" इत्यादौ "नरनाथः सावज्ञम् अवादीत्" इत्युत्तरेणान्वयः। अपूर्वेति।—अपूर्वः,—अभिनवः, अतत्पूर्वः इत्यर्थः, योऽधिक्षेपः,—निर्भर्त्सनं, तस्य श्रवणम्—आकर्णनं तस्मात्, अशस्त्रव्रणैः,—अशस्त्रेण—न शस्त्रेण, व्रणं—क्षतं येषां तैः, अस्त्राघातमलभमानैः इत्यर्थः। अमर्षखेदच्छलेन—अमर्षेण—क्रोधेन, यः खेदः,—घर्मजलं, तस्य छलेन—व्याजेन। अनेकेति।—अनेकेषु, समरेषु—सङ्ग्रामेषु, पीतम्—आस्वादितम्, असिधाराजलमिव—बहुशस्त्रप्रयुक्तखड्गधाराजलमिव, वमद्भिः,—उद्गिरद्भिः, अवयवैः,—अङ्गैः, रोमाञ्चनिभेन—रोमाञ्चच्छलेन, मुक्ताः,—निःसारिताः, शरशतानि—बाणसमूहानि, शल्यनिकराः,—शल्यसमूहाः एव भरो येन तथाभूतः, अत एव लघुः,—भाररहितः, तमिव। रणाय—रणकर्मणे, ["तादर्थ्ये चतुर्थीवाच्या" (वा०) इति चतुर्थी]।

(४२०) अट्टहासेन—तदाख्येन असिना, प्रतिविम्बिताः,—प्रतिफलिताः, तारागणः,—नक्षत्रवृन्दं यस्मिन् तेन। स्फुटेति।—स्फुटं, दृष्टा धवला—शुभ्रा, दन्त-

दृष्टः, (४२१)परिकरबन्धविभ्रमभ्रमितकरनखकिरणचक्रवालेन व्यपगमनाशङ्क्या नागदमनमन्त्रमण्डलबन्धेनेव रुन्धन् दशदिशः, नरनाथः सावज्ञम् अवादीत्,—"अरे (४२२) काकोदर! काक! मयि स्थिते राजहंसे न जिह्रेषि बलिं याचितुम्? अमीभिः किं वा परुषभाषितैः? भुजे वीर्यं निवसति,न वाचि। प्रतिपद्यस्व शस्त्रम्। अयं न भवसि। (४२३) अगृहीतहेतिषु अशिक्षितो मे भुजः प्रहर्त्तुम्" इति। नागस्तु (४२४) अनादृततरम्,—"एहि, किं शस्त्रेण? भुजाभ्यामेव भनज्मि

माला—दशनश्रेणी यस्य, तदृशया तथा, हसतेव—हासं कुर्व्वतेव। कथ्यमानेति।—कथ्यमानः,—अभिधीयमानः, प्रकाश्यमान इति यावत्, अशस्त्रव्रणैरवयवैः अट्टहासेन च इति भावः, सत्त्वस्य—उत्साहस्य, बलस्य वा, अवष्टम्भः,—वेगः यस्य तथाभूतः।

(४२१) परिकरेति।—परिकरबन्धः,—कटिबन्धः, तस्य विभ्रमेण—चेष्टया, व्यापारेणेत्यर्थः, भ्रमितयोः,—चलितयोः, करयोः,—हस्तयोः, नखकिरणानां चक्रवालं—मण्डलं, तेन। व्यपगमनाशङ्क्या—शत्रोः पलायनाशङ्क्येत्यर्थः। नागेति।—नागानां—सर्पाणां, दमनमन्त्रः,—शासनमन्त्रः, गारुडादिः इत्यर्थः, तेन यो मण्डलबन्धः,—मण्डलाकारबन्धनविशेषः, गारुडतन्त्रप्रसिद्धः ऐन्द्रादिवत्स इत्यर्थः, यत्र स्थितो नागः न पलायितुं प्रभवतीति भावः, तेनैव; रुन्धन्—आवृण्वन्। सावज्ञं—सहेलम्।

(४२२) काकोदर—भुजङ्ग! ("……भुजङ्गोऽहिर्भुजङ्गमः। ……चक्षुःश्रवाः काकोदरः फणी॥" इत्यमरः) काकस्य—वायसस्य, उदरम्; यद्वा,—काकम्—दूषद्गतिमत् उदरं यस्य, तत्सम्बुद्धौ च। काक! इति साधिक्षेपोक्तिः, काकवत् निर्लज्ज इति भावः। राजहंसे—राजश्रेष्ठे, मरालि च, ("राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे" इति मेदिनी) जिह्रेषि—लज्जसे। बलिं—पूजां, पूजाविधौ देयं तण्डुलादिकञ्च, ("बलिः पूजोपहारयोः" इत्यमरः)। काकानां बलिभोजनं प्रसिद्धम्। परुषभाषितैः,—कटूक्तिभिः। प्रतिपद्यस्व—गृहाण। अयम्—दृष्टश्च इत्यर्थः, न भवसि—न तिष्ठसीत्यर्थः, त्वमिति शेषः, न जीवसि इति भावः।

(४२३) अगृहीतहेतिषु—अगृहीतशस्त्रेषु, ("रवेरश्मिश्च शस्त्रञ्च वह्निज्वाला च हेतयः" इत्यमरः) अशिक्षितः,—अज्ञातः, अनभ्यस्त इत्यर्थः।

(४२४) अनादृततरं—सावज्ञातिशयमित्यर्थः। एहि—आगच्छ। किं शस्त्रेण?

भवतो दर्पम्" इति अभिधाय आस्फोटयामास। नरपतिरपि (४२५) निरायुधम् आयुधेन युधि लज्जमानो जेतुम् उत्सृज्य सवर्म्मफलकम् अट्टहासम् असिम् अर्द्धोरुकस्य उपरि बबन्ध बाहुयुद्धाय कक्ष्याम्। युयुधाते च (४२६) निर्दयास्फोटनस्फुटितभुजरुधिरशीकरमिच्यमानौ शिलास्तम्भैरिव पतद्भिः बाहुदण्डैः शस्त्रमयमिव कुर्वाणौ भुवनं तौ। न चिराच्च पातयामास भूतले भुजङ्गं भूपतिः। जग्राह च केशेषु, (४२७) उच्चखान च शिरश्छेत्तुम् अट्टहासम्, अपश्यच्च वैकक्षकमालाऽन्तरेण अस्य यज्ञोपवीतम्। उपसंहृतशस्त्रव्यापारश्च अवादीत्,—"दुर्विनीत! अस्ति ते (४२८) दुर्नयनिर्वाहबीजम् इदं, यतो विश्रब्धमेव आचरसि चापलानि" इत्युक्त्वा उत्ससर्ज तम्।

—शस्त्रस्य किमपि प्रयोजनं नास्तीत्यर्थः। भनक्ति—नाशयतीत्यर्थः। आस्फोटयामास—आस्फालयामास, बाहौ कराघातम् अकार्षीदित्यर्थः।

(४२५) निरायुधम्—अशस्त्रम्। आयुधेन—शस्त्रेण। उत्सृज्य—परित्यज्य। अट्टहासं—तदाख्यं भैरवाचार्य्यदत्तं खड्गम्; अट्टहासयदृष्णैव अर्थे गम्यमाने पुनरसिपदग्रहणं "प्रशंसार्थः सामान्यपदप्रयोगः" इति रुद्रटानुशासनादवगन्तव्यम्। अर्द्धोरुकस्य—ऊर्ध्वोरुधरपर्य्यन्तावाच्छादनवस्त्रस्य। कक्ष्यां—वसनरज्जुम्।

(४२६) निर्दयेति।—निर्दयं—निष्ठुरं, यत् आस्फोटनं—प्रहरणं, परस्परं बाहुदण्डताडनेन शस्त्रकरणमित्यर्थः, तेन स्फुटितस्य—विच्छिन्नस्य, भुजस्य रुधिराणां—रक्तानां, शीकरैः,—विन्दुभिः, सिच्यमानौ—आक्रीयमाणौ इत्यर्थः। पतद्भिः,—परस्परदेहे इति भावः। न चिरात्—अचिरादित्यर्थः।

(४२७) उच्चखान—उत्पाटयामास इत्यर्थः। वैकक्षकमालां—तिर्यक्प्रवाहावलम्बिहारविशेषम्, अन्तरेण—मध्ये, ["अन्तराऽन्तरेण युक्ते" (२।३ ४ पा०) इति अन्तरेणेति योगे द्वितीया]। मालाऽन्तरितत्वात् पूर्व्वमदृष्टम्, इदानीमनाहतत्वात् तद्दर्शनं बोद्धव्यम्।

(४२८) दुर्नयेति।—दुर्नयस्य—दुश्चेष्टितस्य, निर्व्वाहः,—सम्पादनं, तस्य बीजं—कारणम्, इदं—यज्ञोपवीतमिति यावत्; एतद्दर्शनेन ब्राह्मणोऽयमिति मत्वा दुरा-

अनन्तरञ्च सहसैव (४२९) अतिबहलां ज्योत्स्नां ददर्श, शरदि विकसतां कमलवनानामिव च घ्राणावलेपिनम् आमोदम् अजिघ्रत्, झटिति च नूपुरशब्दम् अशृणोत्, व्यापारयामास च शब्दानुसारेण दृष्टिम्।

(४३०) अथ करतलस्थितस्य अट्टहासस्य मध्ये तडित-मिव नीलजलधरोदरे स्फुरन्तीं, प्रभया पिबन्तीमिव त्रियामां, तामरसहस्तां, (४३१) कोमलाङ्गुलिरागराजिजालकानि च चरणनखानि (४३२) वेलावालविद्रुमलतावनानि इव आक-र्षन्तीं, (४३३) करपङ्कजसङ्कोचशङ्कया शशाङ्कमण्डलमिव खण्डशः कृतं निर्म्मलचरणनखनिवहनिभेन बिभ्रतीं,

---

चारोऽपि त्वं न कैनापि दण्ड्यसे ब्रह्महत्याभयादिति भावः। विमुक्तं—निःशङ्कम्। चापलानि—दुश्चेष्टितानि। उन्ममर्ज—मुमोच।

(४२९) अतिबहलाम्—अतिप्रभूताम्। घ्राणावलेपिनं—नासारन्ध्रपूरकमिति भावः। आमोदम्—अतिमनोहरगन्धम्। व्यापारयामास—प्रेरयामास, ददर्शेत्यर्थः। दृष्टिं—नेत्रम्।

(४३०) अथेत्यादि।—"अथ" इत्यादौ "स्त्रियमपश्यत्" इत्युत्तरेणान्वयः। अट्टहासस्य—तदाख्यस्य असेः। तडितमिव—सौदामनीमिव, स्फुरन्तीं—राज मानाम्। पिबन्तीमिव—ग्रसन्तीमिव। त्रियामां—रात्रिम्; अतिप्रभावत्त्वेन तमि-स्रायसनमुल्लेखितम्। तामरसहस्तां—पद्मकराम्, ("अथ तामरसं पद्मे ताम्रकाञ्च-नयोरपि" इति मेदिनी)।

(४३१) कोमलेति।—कोमलानाम् अङ्गुलीनां रागराजिः,—लोहितधारा, तस्या जालकानि—प्रवाहान्।

(४३२) वेलेति।—वेलायां—तटभूमौ, बालानि—नवानि, यानि विद्रुम-लतावनानि—प्रवालवल्लीकाननानि, तानि इव।

(४३३) करेति।—कर एव पङ्कजं—पद्मं, तस्य सङ्कोचः,—निमीलनं, चन्द्रोदयादिति भावः, तस्य आशङ्का—भयं, तया शशाङ्कमण्डलमिव—चन्द्रमण्डलम् इव। खण्डशः कृतं—खण्डखण्डीकृतम्। निर्म्मलेति।—निर्म्मलानां—विशदानां, चरणनखानां निवहः,—समूहः, तन्निभेन—तच्छलेन।

(४३४) गुल्फावलम्बिनूपुरपुटतया स्थितनिविड़कटकावलिबन्धनादिव परिभ्रश्य आगतां, (४३५) बहुविधकुसुमशकुनिशतशोभितात् पवनचलिततनुतरङ्गात् अतिस्वच्छात् अंशुकात् उदधिसलिलादिव उत्तरन्तीम्, (४३६) उदधिजन्मप्रेम्णा त्रिवलिच्छलेन त्रिपथगयेव परिष्वक्तमध्याम्, अत्युन्नतस्तनमण्डलां दृश्यमानदिङ्नागकुम्भामिव ककुभं, (४३७) मदलग्नैरावतकरशीकरनिकरम् इव शरत्तारागणतारं हारम् उरसा दधानां, (४३८) धवलचामरैरिव च मन्दमन्द-

(४३४) गुल्फेति ।—गुल्फं—पादग्रन्थिम् अवलम्बते इति गुल्फावलम्बि—गुल्फस्थं, नूपुरपुटं—नूपुरसन्धिः यस्याः तद्भावः तत्ता, तया हेतुना । स्थितेति ।—स्थितं निविड़—दृढ़, कटकावल्याः—सैनिकचक्रे, बन्धनं तस्मादिव, परिभ्रश्य—विच्युत्य, पलाय्य इत्यर्थः, आगताम्—उपस्थिताम् ।

(४३५) बहुविधेति ।—बहुविधैः,—विविधैः, कुसुमानां—पुष्पाणां, शकुनीनां—पक्षिणाञ्च, शतैः, एकत्र—तन्तुनिर्मितैः, अन्यत्र,—उपरिपतितैः इति भावः, शोभितं तस्मात् । पवनेति ।—पवनेन—वायुना, चलिताः,—विक्षिप्ताः, तनवः,—अल्पाल्पाः, तरङ्गाः,—शोभावर्द्धनार्थं हस्तेन कृचनजनिताः भङ्गयः, ऊर्म्मयश्च यस्य तस्मात्, अतिस्वच्छात्—अतिविशदात्, अंशुकात्—वसनात् । उत्तरन्तीम्—उत्तिष्ठन्तीम् ; वस्त्राच्छादिततया दूरात् स्पष्टं नालक्ष्यत, ततो यथा यथा समीपवर्त्तिनी अजायत, तथा तथा स्फुट दृश्यमानत्वात् वसनाभ्यन्तरात् उत्तरणवीधी जायते ; अथवा पवनेन आच्छादनवसनस्य अन्तराऽन्तरा उद्वत्तनात् वस्त्राभ्यन्तरादुत्तरणबोधः इति भावः ।

(४३६) उदधिजन्मप्रेम्णा—समुद्रोत्पत्तिस्नेहेन, त्रिवलिच्छलेन—त्रिवलिमिषेण, त्रिपथगयेव—त्रिधारया गङ्गयेव, परिष्वक्तमध्याम्—आलिङ्गितमध्यभागाम् । दृश्यमानेति ।—दृश्यमानौ दिङ्नागस्य—ऐरावतस्य, कुम्भौ यस्यां तथाभूताम् इव । ककुभं—दिशम्, ("दिशस्तु ककुभः काष्ठा·····" इत्यमरः) ।

(४३७) मदेति ।—मदे—दानवारिणि, लग्नः,—सक्तः, मदलग्नः, समद इत्यर्थः, य ऐरावतः, तस्य करः,—शुण्डः, तस्य शीकराणां—जलाविन्दूनां, निकरः,—सङ्घः, तमिव । शरदिति ।—शरदि यः तारागणः,—नक्षत्रवृन्दं, तद्वत् तारः,—महान्, उज्ज्वल इत्यर्थः, तम् । उरसा—वक्षसा ।

(४३८) धवलचामरैरिव—श्वेतचामरैरिव । मन्देति ।—मन्दमन्देन—धीरमन्देन,

निश्वासदोलायितैः हारकिरणैः उपवीज्यमानां, (४३९)स्वभाव-लोहितेन मदान्धगन्धेभकुम्भास्फालनसङ्क्रान्तसिन्दूरेणेव करद्वयेन द्योतमानां, (४४०) हरशिखण्डेन्दुद्वितीयखण्डेनेव कुण्डलीकृतेन ज्योत्स्नामुचा दन्तपत्रेण विभ्राजमानां, (४४१) कौस्तुभगर्भस्तिस्तवकेन इव च श्रवणलग्नेन अशोककिसलयेन अलङ्कृतां, महता मातङ्गमदमयेन तिलकेन अदृश्यच्छत्रच्छायामण्डलेनेव अविरहितललाटाम्, आ पादतलात् आ सीमन्ताच्च चन्द्रातपधवलेन चन्दनेन आदिराजयशसेव धवली-

---

भ्यां खेन इत्यर्थः, ["प्रकारे गुणवचनस्य" (८।१।१२ पा०) इति द्वित्वम्] निश्वासेन दोलायिताः,—चञ्चलिताः, तैः। उपवीज्यमानां—संवीज्यमानां ताम्।

(४३९) स्वभावलोहितेन—सहजरक्तेन। मदान्धेति।—मदान्धः,—मदमत्तः, यः गन्धेभः,—गन्धप्रधानो हस्ती,—"स्वेदं मूतं पुरीषञ्च मज्जानं चैव मतङ्गजाः। यस्यास्राव्य विमाद्यन्ति तं विद्याद्गन्धहस्तिनम्॥" इत्युक्तलक्षणो हस्ती वा, तस्य कुम्भास्फालनं—कुम्भावमर्शः, तेन सङ्क्रान्तं—संसक्तं, सिन्दूरं यस्मिन् तेनेव; लक्ष्म्याः गजारोहणशीलत्वात् तत्कुम्भसिन्दूरसङ्गमसमवगन्तव्यम्; करद्वयेन—करयुगलेन, द्योतमानां—राजमानाम्।

(४४०) हरेति।—हरस्य शिखण्डः,—शेखरं, चूडेत्यर्थः, ("शिखण्डो बर्हचूडयोः" इति मेदिनी) तत्र यः इन्दुद्वितीयखण्डः,—अर्द्धचन्द्र इत्यर्थः, तेन इव। कुण्डलीकृतेन—कुण्डलरूपतां नीतेन, ज्योत्स्नामुचा—प्रभावर्षिणा, दन्तपत्रेण—हस्तिदन्तनिर्मितकर्णभूषणेन, विभ्राजमानां—विराजमानाम्।

(४४१) कौस्तुभेति।—कौस्तुभस्य—नारायणोरःस्थस्य मणिविशेषस्य, गभस्तीनां—किरणानां, स्तवकः,—गुच्छः तेन इव, श्रवणलग्नेन—श्रोत्रगतेन। मातङ्गमदमयेन—गजदानरचितेन इत्यर्थः। अदृश्येति।—अदृश्यस्य—तिरोहितस्य, छत्रस्य छायामण्डलं तेन इव, अविरहितः,—अशून्यः, ललाटो यस्याः ताम्। आ पादतलात्—पादतलमारभ्य, आ सीमन्तात्—सीमन्तपर्यन्तम्, [अत्र "पञ्चम्यपाङ्परिभिः" (२।३।१० पा०) इति सूत्रेण पञ्चमी, ततः "आङ् मर्यादाभिविध्योः" (२।१।१३ पा०) इति पञ्चम्यन्तेन पदेन पाक्षिकः समासाभावः]। चन्द्रातपधवलेन—कौमुदीवत् शुभ्रेण, चन्द्रातप इव—उज्ज्वल इव, धवलेन—स्वभावादातेन वा।

ज्ञातां, (४४२) धरणितलचुम्बिनीभिः कण्ठकुसुममालाभिः सरिद्भिरिव सागराद्दृष्टाभिः अधिष्ठितां, मृणालकोमलैः अवयवैः (४४३) कमलसम्भवत्वम् अनक्षरम् आचक्षाणां स्त्रियम् अपश्यत्, असम्भ्रान्तश्च पप्रच्छ,—"भद्रे! कासि? किमर्थं वा दर्शनपथम् आगतासि?" इति। सा तु स्त्रीजनविरुद्धेन (४४४) अवष्टम्भेन अभिभवन्तीव अभाषत तम्;—"वीर! विद्धि मां (४४५) नारायणोरःस्थली-लीलाविहारहरिणीं, (४४६) पृथुभरतभगीरथादिराजवंश-

---

आदिराजवंशसा इव—आदिराजस्य—मनोः वैवस्वतस्य, पृथुनृपतेर्वा, यज्ञः तेन इव।

(४४२) धरणितलेति।—धरणितलं—भूतलं, चुम्बन्ति—स्पृशन्ति, इति तथोक्ताभिः। विशेषणमिदं सरित्पक्षेऽपि योजनीयम्। सागराद्दृष्टाभिः,—सागरेण अदृष्टाः ताभिः, असागरगामिनीभिः इत्यर्थः, शुभत्वादिति भावः। ["सागराद्दृष्टाभिः" इत्यत्र "सागराधिष्ठाभिः" इति पाठे,—सागरम् अधि—अधिकृत्य, तिष्ठन्ति याः ताभिः, सागराधिष्ठिताभिरित्यर्थः]।

(४४३) कमलसम्भवत्वं कमलादुत्पत्तिम्; यद्वा,—सम्भूयते—स्त्रीयते अस्मिन्निति [अधिकरणे अलि] सम्भवः, कमलमेव सम्भवः,—अधिष्ठानस्थानं यस्याः तस्याः भावः तत्त्वं, कमलवासत्वमित्यर्थः, लक्ष्म्याः पद्मालयत्वात्; अथवा,—कमलसम्भवत्वं—सलिलादुत्पन्नत्वं, क्षीरोदधेः तदुत्पत्तेः, ("सलिलं कमलं जलम्" इत्यमरोक्तेः)। अनक्षरम्—अक्षररहितं, तूष्णीम् इत्यर्थः, वाग्व्यापारं विनैवेति यावत्, आचक्षाणां—कथयन्तीम्। असम्भ्रान्तः,—अचकितः, अत्वर एवेत्यर्थः।

(४४४) अवष्टम्भेन—गर्वेण। अभिभवन्तीव—तिरस्कुर्वतीव, तदाज्ञां प्रतिक्षिपन्तीवेत्यर्थः।

(४४५) नारायणेति।—नारायणस्य—विष्णोः, उरः,—वक्षःस्थलम् एव, स्थली—अकृत्रिमा भूमिः, अरण्यम् इत्यर्थः, तत्र लीलया—खेच्छयेत्यर्थः, यो विहारः,—क्रीडा, विचरणञ्च, तत्र हरिणी—मृगी ताम्; हरिणी अपि स्वेच्छया अरण्यस्थां विहरति।

(४४६) पृथ्विति।—पृथुप्रभृतीनां राज्ञां, वंशस्य—कुलस्य, वेदद्रष्टुश्च,

पताकां, (४४७) सुभटभुजजयस्तम्भविलासशालभञ्जिकां, (४४८) रणरुधिर-तरङ्गिणी-तरङ्ग-क्रीड़ा-दोहद-दुर्ललित-राज-हंसीं, (४४९) सितनृपच्छत्रषण्डशिखण्डिनीम्, (४५०) अति-निशितशस्त्रधारावनभ्रमणविभ्रमसिंहीम्, असिधाराजलकम-लिनीं श्रियम्। (४५१) अपहृतास्मि तव अमुना शौर्य्यरसेन। याचस्व, ददामि ते वरम् अभिलषितम्" इति।

("वंशः पुंसि कुले वेणौ" इति मेदिनी) पताकां—वैजयन्तीम्, औज्ज्वल्यकारिणीम्, एकत्र कीर्त्तिविस्तारात्, अन्यत्र,—वैशुद्धस्यौपरि अवस्थानात् इति भावः।

(४४७) सुभटेति।—सुभटानां—सुवीराणां, भुजाः,—बाहव एव, जयस्तम्भाः,—विजयशापकस्थूणाः, तेषु विलासशालभञ्जिका—शोभार्थोपनिर्मितपुत्तलिका, ताम्। दृश्यते हि लोके स्तम्भानामुपरि शालभञ्जिकान्यासः क्रियते इति, एवं हि या सततं वीराणां हर्षेषु अभिरमते स्म इति। सुभटपदेन अस्याः वीरानुरागित्वं प्रकटीकृतं, "स्त्रीभिः षण्ढः इव श्रीभिः दुर्बलः परिभूयते" इत्युक्तेः।

(४४८) रणेति।—रणेषु—सङ्ग्रामेषु, या रुधिरतरङ्गिण्यः,—रक्तनद्यः, तासां तरङ्गेषु—ऊर्म्मिषु, क्रीड़ा—केली, तत्र दोहदेन—अभिलाषेण, दुर्ललिता—दुर्विनीता, राजहंसी ताम्।

(४४९) सितेति।—सितानि—धवलानि, नृपाणां—राज्ञां, छत्रषण्डानि—आतपत्रसङ्घातानि, आतपत्रवनानि इत्यर्थः, तत्र शिखण्डिनी—मयूरी, ताम्; अना-तपे प्रायशः मयूरीणां सञ्चरणशीलत्वात्।

(४५०) अतीति।—असीनां—तरवारीणां, धारा एव वनानि, तेषु भ्रमणम् एव विभ्रमः,—विलासः, तत्र सिंही ताम्; [हिंसेः प्रयोगाच्च "वृषीदरादीनि—" (६।३।१०९ पा०) इत्यादिना इकारसकारयोः स्थानव्यत्ययात् सिंहः, ततः "जातेः—" (४।१।६३ पा०) इत्यादिना ङीषि रूपम्]। असीति।—असीनां—तरवारीणां, धारा एव—निशितायाश्चैव, जलानि, तत्तुल्यात्, वैशद्याच्चेति भावः, तत्र कमलिनी—पद्मिनी, ताम्।

(४५१) अपहृता—आकृष्टा। शौर्य्यरसेन—वीर्य्योत्साहेन; खिन्नानां चिर-प्रार्थनयापि दर्शनमददत्याः शौर्य्यगुणपक्षपातिन्याः सिन्धुजायाः तत्र राजनि स्वय-मनाविर्भावः, नरनाथसामान्यशौर्य्यानुरागात् इति बोध्यम्।

वीराणान्तु (४५२) अपुनरुक्ताः परोपकाराः ; यतो राजा तां प्रणम्य स्वार्थविमुखो भैरवाचार्यस्य सिद्धिं ययाचे। लक्ष्मीस्तु देवी (४५३) प्रीततरहृदया विस्तीर्यमाणेन चक्षुषा क्षीरोदेनेव उपरि पर्य्यस्तेन अभिषिञ्चन्ती भूपालम्—"एवमस्तु" इति अब्रवीत् ; अवादीच्च पुनः,—"अनेन (४५४) सत्त्वोत्कर्षेण भगवच्छिवभट्टारकभक्त्या च असाधारणया भवान् भुवि सूर्य्याचन्द्रमसोः तृतीय इव अविच्छिन्नस्य प्रतिदिनम् उपचीयमानवृद्धेः शुचिसुभगसत्यत्यागधैर्य्यगाम्भीर्यपुरुषप्रकाण्डप्रायस्य

(४५२) अपुनरुक्ताः,—पुनरुक्तिदोषरहिताः, परोपकाराः,—परेषामुपकाराः ; वीराः परोपकारं करिष्यामः इति प्रतिज्ञाय तथा एव आचरन्ति, कार्पण्यात् न तव तेषां कापि अन्योक्तिरिति भावः ; यद्वा,—अपुनरुक्ताः,—अनधिकाः, परोपकारा न तेषाम् अधिका मताः ; अवश्यकर्त्तव्यत्वात् स्वतःसिद्धा इति भावः ; परोपकारव्रतिनस्ते कृतमुपकारं कदाऽपि न वाचा व्याहरन्तीति तात्पर्य्यम्। तां—लक्ष्मीम्। स्वार्थविमुखः,—निःस्वार्थः, स्वोपकारार्थं वरमप्रार्थयमानः इत्यर्थः। सिद्धिम्—अभीष्टसाफल्यं, विद्याधरत्वलाभरूपामित्यर्थः ; आश्रितेष्टसाधने एव महापुरुषाः व्यसनिनः भवन्तीति निष्कर्षः।

(४५३) प्रीततरेति।—प्रीततरम्—अतिशयेन प्रीतं, राज्ञः स्वार्थनिःस्पृहत्वेन इति भावः, हृदयं यस्याः सा। विस्तीर्यमाणेन—विस्फार्य्यमाणेन ; राज्ञः निःस्पृहत्वदर्शनेन विस्मयागमादिति भावः। क्षीरोदेनेव—दुग्धसागरेणेव ; अतीव प्रसन्नत्वादिति भावः। उपरि पर्य्यस्तेन—उपरि पतितेन। एवम् अस्तु—त्वत्प्रार्थनं पूर्णं भवतु इत्यर्थः।

(४५४) सत्त्वोत्कर्षेण—साहसातिशयेन, महाऽनुभावतातिरेकेण वा। असाधारणया—निरुपमया। सूर्य्याचन्द्रमसोः,—आदित्यनिशाकरयोः, तृतीय इव—सूर्य्याचन्द्रमसमपेक्ष्य तेजस्वितया तृतीयस्थानमधिकृत इत्यर्थः। अविच्छिन्नस्य—विच्छेदमनधिगतस्य। उपचीयमानवृद्धेः,—सततवर्द्धमानाभ्युदयस्य। कालवशात् स्वतेजःसु कदाचित् क्षयवतः कदाचिद्वर्द्धितः सूर्य्यात्, प्रतिमासं क्षयवृद्धितः चन्द्रमसश्चापि उपमानभूतात् अहरह उपचीयमानवृद्धिमत्त्वस्य उपमेयभूतस्य नरेन्द्रस्याधिक्यप्रतीतेः व्यतिरेकालङ्कारः। शुचीति।—शुचिः,—बाह्याभ्यन्तरपूतत्वं शुद्धाचरणं वा, सुभगः—

महतो राजवंशस्य कर्त्ता भविष्यति। (४५५) यस्मिन् उत्पन्नरे सर्वद्वीपानां भोक्ता हरिश्चन्द्र इव हर्षनामा चक्रवर्त्ती त्रिभुवनविजिगीषुः द्वितीयो मान्धातेव; यस्य अयं करः स्वयमेव ग्रहीष्यति चामरम्" इति वचसोऽन्ते तिरोबभूव।

भूमिपालस्तु तदाकर्ण्य हृदयेन अतिमात्रम् अप्रीयत। भैरवाचार्योऽपि तस्या देव्याः तेन वचसा, (४५६) कर्म्मणा च सम्यक् उपपादितेन मद्य एव कुन्तली, किरीटी, कुण्डली, हारी, केयूरी, मेखली, मुद्गरी, खड्गी च भूत्वा अवाप विद्याधरत्वम्; प्रोवाच च,—"राजन्! (४५७) अदूरव्यापिनः फल्गुचेतसाम् अलसानां मनोरथाः। सतान्तु भुवि

सु—शोभनं, भगं—वीर्यं यशो वा, सत्यं—यथार्थभाषणं, त्यागः,—दानं, धैर्य्यं—धीरत्वं, तेषु शौण्डाः,—प्रसक्ताः, दक्षाः वा, सदाचारपरायणा यशस्विनः सत्यवादिनः वदान्याः धीराश्च इत्यर्थः, पुरुषप्रकाण्डाः,—पुरुषश्रेष्ठाः, [प्रकृष्टः काण्डः प्रकाण्डः "प्रादयः गताद्यर्थे प्रथमया" (वा०) इति समासः। अत्र प्रकाण्डशब्दः श्रेष्ठार्थकोऽवगन्तव्यः]। प्रायेण—बाहुल्येन यत्र तादृशस्य। कर्त्ता—उत्पादकः।

(४५५) यस्मिन्—राजवंशे। द्वितीयः,—अपरः, मान्धातेव—नृपविशेष इव। अयं—मदीयः इत्यर्थः। ["स्वयमेव ग्रहीष्यति" इत्यत्र "स्वयमेव कमलमुपहाय ग्रहीष्यति" इत्यधिकः पाठः]।

(४५६) कर्म्मणा—अवसाधनरूपकार्य्येण। सम्यक् उपपादितेन—सम्यगनुष्ठितेन। मद्य एव—तत्क्षणमेव। कुन्तली—कुन्तलवान्, सुकेश इति यावत्। किरीटी—मुकुटधारी। कुण्डली—कर्णान्दोलितकुण्डलः। हारी—हारवान्। केयूरी—अङ्गदी। मेखली—काञ्चीदामालङ्कृतकटिः। मुद्गरी—मुद्गरः,—दण्डविशेषः, तद्वान्; [अत्र सर्व्वत्र इन्प्रत्ययेषु "अत इनिठनौ" (५।२।११५ पा०) इति इनिप्रत्ययः, मेखली इत्यत्र "व्रीह्यादिभ्यश्च" (५।२।११६ पा०) इति इनिप्रत्ययेन रूपम्]। विद्याधरत्वं—विद्याधरभावम्।

(४५७) अदूरव्यापिनः,—अदूरविस्तारः, न दूरप्रसारिण इत्यर्थः। फल्गुचेतसाम्—असारचित्तानाम्, ("असारं फल्गु" इत्यमरः) अलसानां—कार्य्यपराङ्मुखानाम् इत्यर्थः, मनोरथाः,—कामाः।

(४५८) विस्तारवत्यः स्वभावेनैव उपकृतयः ; स्वप्नेऽपि असम्भावितां दातुमिमां दक्षिणां क्षमः कोऽन्यो भवन्तम् अपहाय ? (४५९) सम्पत्कणिकामपि प्राप्य तुलेव लघुप्रकृतिः उन्नतिम् आयाति। (४६०) त्वदीयैः गुणैः उपकरणीकृतस्य त्वत्त एव च लब्धात्मलाभस्य निर्लज्जता इयम् अस्य मूढहृदयस्य। तदिच्छामि येन केनचित् (४६१) कार्य्यलवोपपादनोपयोगेन स्मारयितुम् आत्मानम्" इति। (४६२) प्रत्युपकारदुष्प्रवेशास्तु भवन्ति धीराणां हृदयावष्टम्भाः ; अतः तं राजा—"भवत्सिद्ध्यैव परिसमाप्तकृत्योऽस्मि ; साधयतु मान्यो यथासमीहितं स्थानम्" इति प्रत्याचचक्षे।

(४५८) विस्तारवत्यः,—प्रसरणशीलाः, दूरव्यापिन इत्यर्थः। उपकृतयः,—उपकाराः। इमां दक्षिणां—विद्याधरबलाभरूपाम्। क्षमः,—शक्तः। अपहाय—त्यक्त्वा, विनेत्यर्थः।

(४५९) सम्पदिति।—सम्पदः,—विभवस्य, कणिकां—कणमात्रं, विभवलेशमित्यर्थः। लघुप्रकृतिः,—क्षुद्रस्वभावः। उन्नतिम्—ऊर्ध्वगमनम्, उच्चागमनत्वं, विपथगामित्वमित्यर्थः।

(४६०) उपकरणीकृतस्य—उपकृतस्य इत्यर्थः। लब्धेति।—लब्ध आत्मनो लाभः,—अभीष्टरूपः येन तथाभूतस्य। अस्य—मदीयस्य इति भावः।

(४६१) कार्य्येति।—कार्य्यस्य लवः,—लेशः, बिन्दुः इत्यर्थः, यत्किञ्चित्कार्यमिति निष्कर्षः, तस्य उपपादनं—सम्पादनं, तेन यः उपयोगः,—उपकारः, तेन। स्मारयितुं—स्मृतिपथं नेतुम्।

(४६२) प्रत्युपकारेति।—प्रत्युपकारेण—उपकारप्रतिदानेन, अत्यकृतेन इति भावः, दुष्प्रवेशाः,—प्रवेष्टुमशक्या इत्यर्थः। हृदयावष्टम्भाः,—हृदयगाम्भीर्याणि ; धीराणां हृदयानि परप्रत्युपकारं नार्थयन्ते इति भावः। ["अतः" इत्यत्र "यतः" इति पाठान्तरम्]। भवत्सिद्ध्या—भवतः सिद्ध्या—अभीष्टपूरणेनेत्यर्थः। परिसमाप्तम्—अवसितं, कृत्यं—प्रयोजनं यस्य तथाभूतः ; लब्धप्रत्युपकार इति भावः। साधयतु—गच्छतु। "प्रायेण शब्दकः साधिगमैः स्थाने प्रयुज्यते" इति साहित्यदर्पणः। मान्यः, भवानिति शेषः। यथासमीहितं—चेष्टितानुरूपं, यथाऽभिलषितमित्यर्थः, स्थानं—

तथोक्तञ्च (४६३) भूभुजा जिगमिषुः सुदृढं समालिङ्ग्य टौटिभादीन् कुवलयवनेनेव अवश्यायशीकरस्राविणा साम्रेण चक्षुषा वीक्षमाणः क्षितिपतिं पुनः उवाच,—"तात! ब्रवीमि यामीति न स्नेहमदृश्यम्। त्वदीयाः प्राणा इति पुनरुक्तम्। गृह्यतां इदं शरीरकमिति (४६४) व्यतिरेकेण अर्थकरणम्। तिलशः क्रीता वयमिति न उपकारानुरूपम्। बान्धवोऽसीति (४६५) दूरीकरणमिव। त्वयि स्थितं हृदयमिति अप्रत्यक्षम्।

विद्याधरलोकमित्यर्थः। इति, उक्ता इति शेषः। प्रत्याचचक्षे—प्रत्याख्यानं कृतवान् इत्यर्थः; प्रत्युपकृतियहणे असम्मतोऽभूत् इति भावः।

(४६३) भूभुजा—राज्ञा। जिगमिषुः,—गन्तुमिच्छुः, [इच्छासन्नन्तस्य गमेः "सनाशंस—" (३।२।१६८ पा०) इति उप्रत्यये रूपम्] भैरवाचार्य इति शेषः। कुवलयवनेन इव—नीलोत्पलकाननेन इव। अवश्यायेति।—अवश्यायानां—तुषाराणां, ("अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्" इत्यमरः) शीकरान्—बिन्दून्, स्रवति इति तथोक्तेन। साम्रेण—सजलेन, अत्र असशब्देनैव नयनसलिलार्थावबोधात् पुनः चक्षुःशब्दोपादानं निरर्थकमेव, तेन साम्रेणेत्यव ससलिलेनेति वक्तुमुचितम्। "यामि" इत्यादिना सर्वं स्वाभिप्रायं प्रकाशयतीति बोद्धव्यम्। स्नेहसदृशं—स्नेहसमुचितम्। अत्र स्नेहानुरूपनिषेधेन स्नेह इव सुतरामाविष्कृत एव; उक्तं हि,—"प्रतिषेध इवेष्टस्य यद्विशेषाभिधित्सया। आक्षेप इति तं सन्तः शंसन्ति कवयः सदा॥" इति। एवमुत्तरत्रापि। प्राणाः, मदीया इति शेषः, त्वदीयाः,—त्वं मत्तः अभिन्न इति भावः। पुनरुक्तं—कार्येण प्राक् प्रदर्शितप्रायत्वात् तव पुनः वाचा समाधानमधिकम् इति भावः।

(४६४) व्यतिरेकेण—पृथग्भावेन, अर्थकरणम्—अर्थसाधनम्, आवां खलु अभिन्नावेव, तथा कथने तु तस्य विपर्ययः स्यादिति भावः। तिलशः,—खण्डशः; यावत्य उपकाराः कृताः, मदीयेषु अवयवेषु तिलशः खण्डयित्वा प्रदत्तेषु सत्सु अपि तथा न परिशोध्यन्ते इति भावः।

(४६५) दूरीकरणम् इव—दूरे निक्षेप इव; बान्धवस्य खलु बहुधा भिन्नतया दूरवर्तित्वात् इति भावः। अप्रत्यक्षं—अवचनगोचरम् एतत्; हृदयस्य तथाविधस्य हृद्विषयत्वायोगात् इति भावः।

(४६६) त्वद्विरहकारिणी कारणा इयं नः सिद्धिरिति अयुक्तेयम्। (४६७) निष्कारणः तव उपकार इति अनुवादः। स्मर्त्तव्या वयमिति (४६८) आज्ञा। सर्व्वथा (४६९) कृतघ्नालापेषु असज्जनकथासु च चेतसि कर्त्तव्योऽयं स्वार्थनिष्ठुरो जनः" इत्यभिधाय वेगच्छिन्नहारोच्छलितमुक्ताफलनिकरताडिततारागणं गगनतलम् उत्पपात; ययौ च सौमन्तितग्रहग्रामः सिद्धुचितं धाम। (४७०) श्रीकण्ठोऽपि,—"राजन्! पराक्रमक्रीतः

(४६६) त्वद्विरहकारिणी—तव विच्छेदजननी, अत एव नः,—अस्माकम्, इयं सिद्धिः,—विद्याधरत्वलाभः, कारणा—यातना, क्लेश एव इत्यर्थः, ["कारणा तु यातना तीव्रवेदना" इत्यमरः]। "नः सिद्धिः" इत्यत्र "न सिद्धिः" इति पाठे,—अयुक्तविरहजननात् इयं यातनारूपत्वेन परिणता, न हि एषा तात्त्विकी सिद्धिरिति, यतो हि, प्रियसङ्गमादिना सिद्धिलाभस्यापि तथाविधसुखानाधायकत्वेनाकिञ्चित्करत्वादित्याशयः] अयुक्तेयम्—अविश्वास्यम्; एतस्मिन् महिरहेण कारणाज्ञाने कथम् अत्र प्रवृत्तिः, इति एतद्वाक्यस्य अयुक्तेयत्वम् इति भावः।

(४६७) निष्कारणः,—निरर्थकः, अहेतुः वा; कस्यापि प्रत्युपकारस्यानङ्गीकारादिति भावः। इति—एतत्कथनम्, अनुवादः,—उक्तार्थस्य प्रकारान्तरेण कथनम्।

(४६८) आज्ञा—आदेशः; अनुजीविभिः राजानं प्रति न हि आदिश्यते, अपि तु राज्ञा ते आदिश्यन्ते इति भावः।

(४६९) कृतघ्नालापेषु—कृतं घ्नन्तीति कृतघ्नाः, तेषाम् आलापाः,—भाषणानि, तेषु, अकृतज्ञजनविषयकालापावसरेषु इत्यर्थः, असज्जनकथासु—दुर्जनविषयकालापप्रस्तावेषु इत्यर्थः; भवत्प्रत्युपकाराकरणात् अहमपि कृतघ्नासज्जनेषु अन्यतमः इति भावः। स्वार्थनिष्ठुरः,—स्वकार्य्यमात्रनिर्व्वाहपरायणत्वेन निर्हृदयः। वेगेति।—वेगेन—गतिरंहसा, छिन्नात्—त्रुटितात्, हारात् उच्छलितानां—निर्गलितानां, मुक्ताफलानां—मौक्तिकानां, निकरैः,—समूहैः, ताडितः,—आहतः, तारागणः,—नक्षत्रसमूहः यस्य यत् वा तत्। अत्र विषयिणां क्रियत्यङ्गकानां मौक्तिकानां निगरणेन असङ्ख्यतारागणताडनमध्यवसीयते इत्यसम्बन्धे सम्बन्धरूपा अतिशयोक्तिः। सौमन्तितेति।—सौमन्तितः,—विधाकृतः, ग्रहाणाम्—अन्तरीक्षचारिणां सूर्य्यादीनां, ग्रामः,—मण्डलं येन तथाभूतः। सिद्धुचितं—विद्याधरत्वानुरूपमित्यर्थः, धाम—स्थानम्।

(४७०) श्रीकण्ठोऽपि—तदाख्यः नागोऽपि। पराक्रमक्रीतः,—वीर्य्यक्रीतः।

कर्त्तव्येषु नियोगेन अनुग्राह्यो ग्राहितविनयोऽयं जनः" इत्यभिधाय राज्ञा अनुमोदितः तदेव भूयो भूविवरं विवेश।

(४७१) नरपतिस्तु क्षीणभूयिष्ठायां क्षपायां, प्रबातुम् आरब्धे, (४७२) प्रबुध्यमानकमलिनीनिश्वासमुरभौ,(४७३) वनदेवताकुचांशुकापहरणपरिहासखेदिनि इव मावश्यायशीकरे, (४७४) परिमलाकृष्टमधुव्रति, (४७५) कुमुदनिद्रावाहिनि,

["कर्त्तृकरणे कृता बहुलम्". (२।१ ३२ पा०) इति सूत्रेण तृतीयासमासः]। कर्त्तव्येषु—कार्य्येषु, भवतः इति भावः, नियोगेन—आदेशेन। ग्राहितविनयः,—शिक्षितविनयः, पराजयेन इति भावः। ["राज्ञा अनुमोदितः" इत्यत्र "राजानुमोदितः" इति पाठान्तरम्। एतत् समीचीनं मन्यामहे, "मतिबुद्धि—" (३। २। ११८ पा०) इति वर्त्तमानविहितस्य क्तस्य "क्तेन च—" (२। २। १२ पा०) इत्यादिना षष्ठ्या एव समासनिषेधात्, अतीतविहितेन क्तेन तृतीयया समासो भवत्येव इति समञ्जसं भवेत्। "राज्ञा अनुमोदितः" इति पाठे,—"कर्तृकरणे—" (२। १। ३२ पा०) इति बहुलग्रहणात्समाधेयः समासाभावः इति दिक्। भूविवरं—पातालम्।

(४७१) "नरपतिः" इति "नगरं विवेश" इत्युत्तरेणान्वितम्। क्षीणभूयिष्ठायां—प्रायेण क्षीणायाम् इत्यर्थः। क्षपायां—रजन्याम्। प्रबातुं—प्रकर्षेण सञ्चरितुम्।

(४७२) प्रबुध्यमानेति।—प्रबुध्यमानानां—सूर्य्योदयप्रारम्भात् विकाशं लभमानानां, कमलिनीनां—पद्मिनीनां, निश्वासेन—तत्सम्पृक्तवायुनेत्यर्थः, सुरभिः,—सुगन्धः तस्मिन्।

(४७३) वनेति।—वनदेवतानां कुचयोः,—स्तनयोः, अंशुकस्य—वसनस्य, अपहरणमेव परिहासः,—क्रीडनविशेषः, तेन यः खेदः,—घर्म्मोदकं, सत्त्वोदयात् इति भावः, तद्वति इव, सावश्यायशीकरे—तुषारबिन्दुयुक्ते इत्यर्थः; एतेन वायौ भुजङ्गन्यवहारसमारोपात् समासोक्तिरलङ्कारः।

(४७४) परिमलेति।—परिमलः,—पुष्पादिविमर्द्दजनितो गन्धः, सुरतसम्भोगजसन्निभः इति तु अर्थवशसम्पन्नः, तद्वदित्वादिति भावः, ("विमर्दोत्थे परिमलः" इत्यमरः) तेन आकृष्टाः,—आविष्टाः, मधुव्रताः,—भ्रमराः; अन्यत्र,—तदाप्तार्थोन्मादिताः विटाः इति फलितं, येन तथोक्ते।

(४७५) कुमुदेति।—कुमुदानां निद्रा—सङ्कोच इत्यर्थः, तां वाहयति—

(४७६) निशापरिणतिजड़े, तुषारलेशिनि वनानिले, (४७७) विरहविधुरचक्रवाकचक्रनिश्वसितमन्त्रापितायामिव अपरजलनिधिमवतरन्त्यां त्रियामायां, (४७८) साक्षादागतलक्ष्मीविलोकनकुतूहलिनीषु इव समुन्मीलन्तीषु नलिनीषु, (४७९) उन्निद्रपक्षिणि, (४८०) क्षरति कुसुमविसरमिव तुहिनकणनिकरं मृदुपवनलासितलते कानने,

जनयति इति तस्मिन् ; अत्र नायिकान्तरसमागमसमये प्रणयकलहमाशङ्क्य प्रागुपभुक्ताया अप्यन्यथा: कुमुदिन्या: प्रेमगर्भव्यवहारेण निद्रासमुत्पादनात्, अस्य नायिकासु तुल्यानुरागदर्शनात् दक्षिणनायकत्वं ध्वन्यते ।

(४७६) निशेति ।—निशाया:,—रात्रे:, परिणतिः,—परिणामः, अवसानम् इत्यर्थः, तया जड़:,—मन्थर: ; एकत्र—शिशिरभावेन, अन्यत्र,—सर्व्वां निशां व्याप्य निधुवनविलासात् प्रजागरालस: इति भाव:, तस्मिन् । तुषारलेशिनि—शिशिरबिन्दुवाहिनि ; ईषत् शीतले इति भाव: । अन्यत्र,—रतिश्रमरूढेवति इत्यर्थ: ।

(४७७) विरहेति ।—विरहेण—विच्छेदेन, विधुराणां—व्याकुलानां, चक्रवाकाणां—रथाङ्गनामकानां पक्षिणां, चक्रस्य—समूहस्य, निश्वसितेन—निश्वासवायुना, उष्णेन इति भाव:, सन्तापितायाम् इव ; अत्र प्रकृतस्याप्रकृतस्वरूपेण सम्भावनादुत्प्रेक्षाऽलङ्कार: । अपरजलनिधिं—पश्चिमसागरम् ; प्राचि तपनस्योदयात् तत्तेजसा क्रमात् तमसां प्रतीचि अपसरणात् इति तात्पर्य्यम् । सन्तापित: शीतलं जलमवगाहते इति लोकप्रसिद्ध: । त्रियामायां—रजन्याम् ।

(४७८) साक्षादिति ।—साक्षादागताया:,—प्रत्यक्षदृश्यमानाया: इत्यर्थः, लक्ष्म्या:,—श्रिया:, (नवोदितस्य पत्यु: प्रभाकरस्य शोभाया इत्यपि व्यज्यते) विलोकने—दर्शने, दर्शनार्थमित्यर्थः, कुतूहलिन्य:,—कौतुकवत्य:, तासु इव । समुन्मीलन्तीषु—विकसन्तीषु, नलिनीषु—पद्मिनीषु ; एतेन नलिनीनां सुग्धनायिकाऽरूढत्वं ध्वनितम् ।

(४७९) उन्निद्रेति ।—उन्निद्रा:,—विगतनिद्रा:, प्रबुद्धा इत्यर्थः, (प्रत्युषि पतत्रिवर्गाणां जागरणस्वभावत्वादिति भाव:) पक्षिणो यत्र तस्मिन् ; एतेन पक्षिणां झङ्कारसङ्घातानां विटादीनामिव रत्यनुकूलसङ्घातत्वं प्रतीयते ।

(४८०) क्षरति—वर्षति । कुसुमविसरमिव—पुष्पनिकरमिव ; अन्यत्र,—विरहतापोपशान्तये रतिसुखोपभुक्तये वा पुष्पविकीर्णत्वं इष्यते । मृदुपवनेति ।—मृदुना

(४८१) कमललक्ष्मीप्रबोधमङ्गलशङ्खेषु इव रसत्सु (४८२) अन्तर्वलध्वनन्मधुकरेषु, मुकुलायमानेषु कुमुदेषु, (४८३) उज्जिहानरविरथवाजिविसृष्टैः प्रोथपवनैः प्रोत्सार्यमाणासु इव वारुण्यां ककुभि पुञ्जीभवन्तीषु श्यामालताकलिकासु तारकासु, (४८४) मन्दरशिखराभ्यर्णिग मन्दानिललुलितकल्पलतावनकुसुमधूलिविच्छुरिते इव धूसरीभवति सप्तर्षिमण्डले,

—मन्देन, पवनेन—वायुना, लासिताः,—नर्तिताः, कम्पिताः इत्यर्थः, लताः,—व्रततयः यत्र तादृशं ; एतेन वायोः कलापरधीरललिततायकत्वं गम्यते।

(४८१) कमलेति।—कमलानां—पद्मानां, लक्ष्मीः,—श्रीः, तस्याः प्रबोधाय—जागरणाय, विकसनाय इति भावः, मङ्गलशङ्खाः तेषु इव, इत्युत्प्रेक्षा। रसत्सु—ध्वनत्सु।

(४८२) अन्तरिति।—अन्तः,—अभ्यन्तरे, वलाः—कलाः, सायं पद्मानिमीलनादिति भावः, सायन्तु प्राक्कालिकसमयमात्रम् ; अधुना प्रभातवर्णनादर्शनात् कमलानां विकासप्रसङ्गात्, रतिश्रान्तानां कमलानां मधुररसनेन जागरणार्थं तत्र व्यासक्ताः वा, ध्वनन्तः,—गुञ्जन्तः, मधुकराः,—भ्रमराः येषां तेषु ; एतेन भ्रमराणां रत्यनुकूलसहायत्वं प्रतीयते। मुकुलायमानेषु—मुकुलभावं गच्छत्सु।

(४८३) उज्जिहानेति।—उज्जिहानैः,—उद्गच्छद्भिः, [उत्पूर्वकात् जिहीते इत्यस्य शानचि रूपम्] प्रभुद्भिः वा, रवेः,—सूर्यस्य, रथवाजिभिः,—रथाश्वैः, विसृष्टाः,—त्यक्ताः, तैः। प्रोथपवनैः,—नासामारुतैः। प्रोत्सार्यमाणासु इव—अपसार्यमाणासु इव, इत्युत्प्रेक्षा। वारुण्यां ककुभि—पश्चिमायां दिशि। पुञ्जीभवन्तीषु—संहतीभवन्तीषु। श्यामेति।—श्यामा—रात्रिः एव, लता—व्रततिः ; ("श्यामा स्यात् शारिवा निशा" इत्यमरः) यद्वा,—श्यामालता—प्रियङ्गुलतिका, मकरिका वा, तस्याः कलिकाः,—कुसुममुकुलानि तासु। तारकासु—नक्षत्रेषु ; इति परम्परितं (प्रियङ्गुलतिकापदं तु निरङ्गं) रूपकमलङ्कारः।

(४८४) मन्दरेति।—मन्दरस्य—पूर्वतभेदस्य, शिखरं—शृङ्गम्, आसन्नतीति तथोक्ते। मन्देति।—मन्देन—अल्पवेगेन, सदु प्रवहता इत्यर्थः, अनिलेन—वायुना, लुलितम्—ईषदान्दोलितं, यत् कल्पलतावनं—देवतरुविशेषकाननं, तस्य कुसुमानां—पुष्पाणां, धूलिभिः,—परागैः, विच्छुरिते इव—विकिरे इव, [इति वाच्या क्रियोत्प्रेक्षा] धूसरीभवति—धूसरतां व्रजति। सप्तर्षिमण्डले—मरीच्यादिसप्तर्षिमण्डले, एतेषां स्वर्गावस्थायित्वात् कल्पलतिकाप्रसूनपरागलिप्तत्वं साधु सङ्गच्छते।

(४८५) सुरवारणाङ्कुश इव च्युते गलति तारामये मृगे, कौलपि टीटिभादीन् गृहीत्वा नागयुव्यतिकरमलीमसानि शुचिनि वनवापीपयसि प्रक्षाल्य अङ्गानि नगरं विवेश। अन्यस्मिन् अहनि तेषाम् आत्मशरीरानन्तरं स्नानभोजनाच्छादनादिना प्रीतिम् अकरोत्।

कतिपयदिवसापगमे च (४८६) परिव्राट् भूभुजा वार्ध्यमाणोऽपि वनं ययौ। पातालस्वामिकर्णतालौ तु शौर्य्यानुरक्तौ तमेव सिषेवाते। (४८७) सम्पादितमनोरथातिरिक्तविभवौ च सुभटमण्डलमध्ये निष्कृष्टमण्डलाग्रौ समरमुखेषु प्रथमम्

(४८५) सुरेति।—सुरवारणस्य—ऐरावतस्य, अङ्कुश इव। च्युते—स्वस्थानात् भ्रष्टे, गलति—सरति। तारामये—नक्षत्रमयि, मृगे—मृगशीर्षाख्ये नक्षत्रे; स हि वितारोऽङ्कुशाकार इति कीर्णलयविशिष्टेनाङ्कुशेन सदृश्यसनक्षत्रवत्वयवत; मृगशिरस; अवैधर्म्यसाम्यप्रतिपादनात् उपमालङ्कार:। टीटिभादीन्—टीटिभ कर्णताल-पाताल-स्वामिन इत्यर्थ:। नागेति।—नागेन—शीकण्ठाख्येन, सह यत् युद्धं, तस्य व्यतिकर:,—सम्पर्क:, तेन मलीमसानि—मलिनानि। शुचिनि—पवित्रे, निर्मले वा; वनवापीपयसि—अरण्यसरसीजले। अन्यस्मिन् अहनि—परदिने, अन्येद्युरित्यर्थ:, निशावसानात् परमिति भाव:, तेषां—टीटिभादीनाम्। आत्मेति।—आत्मशरीरम्—आत्मदेहम्, अनन्तरम्—अव्यवहितोत्तरं भवति यस्मिन् कर्मणि, तद् यथा स्यात् तथा; स्नानभोजनाच्छादनादिना—स्नानाहारवसनादिना; प्राक् तेषां स्नानभोजनादिव्यापारं समाधाय, तेषां शरीरं सन्तर्प्य, पश्चात् स्वस्य शरीरसन्तर्पणाय स्नानभोजनादिव्यापारं विदधाविति भाव:।

(४८६) परिव्राट्—परिव्राजक:, [परिव्रजतीत्यर्थे परिपूर्वकात् व्रजते: कर्त्तरि क्विप् निपात:] टीटिभ इत्यर्थ:। भूभुजा—राज्ञा, [भुवं भुनक्ति पालयतीत्यर्थे, भूपपदात् भुनक्ते: कर्त्तरि क्विप् रूपम्]। वार्ध्यमाण:,—निषिध्यमान:। वनं ययौ—वानप्रस्थाश्रमसम्बलम्बे इति भाव:। शौर्य्येति।—शौर्य्येण—पराक्रमेण, राज्ञ इति भाव:, अनुरक्तौ—ज्ञातानुरागौ, न भोगलोलुपतया इति भाव:; अतिशयौ तु तौ गुणलुब्धौ गृहानेवाधिवसतुरिति व्यञ्जितम्।

(४८७) सम्पादितेति।—सम्पादित:,—सञ्जनित:, भूभुजेति शेष:, मनोरथस्य

उपयुज्यमानौ कथाऽन्तरेषु च अन्तरान्तरा समादिष्टौ विचित्राणि भैरवाचार्यचरितानि शैशववृत्तान्तांश्च कथयन्तौ तेनैव सार्द्धं जराम् आजग्मतुः इति।

इति श्रीबाणभट्टकृते हर्षचरिते भैरवाचार्यसिद्धिसाधनं नाम
तृतीय उच्छासः ॥ ३ ॥

—आज्ञायाः, अतिरिक्तः,—अधिकः, विभवः,—सम्पद् ययोः तौ। सुभटमण्डलमध्ये —सुवीरमण्डलमध्ये। निष्कृष्टेति।—निष्कृष्टम्—अत्युत्कृष्टमित्यर्थः, मण्डलाग्रं—खड्गः ("खड्गे तु निस्त्रिंशचन्द्रहासासिरित्यपि।" कौटिल्यकौ मण्डलाग्रः…" इत्यमरः।) ययोः तौ; यद्वा,—निष्कृष्ट—प्रख्यातं, यत् मण्डलं—वीरव्यूहः, तस्य अग्रा प्रधानभूतौ, वीरेषु प्रसिद्धावित्यर्थः; अत एव समरमुखेषु—युद्धाग्रेषु, सेनाव्यूहसम्मुखे इति यावत्। प्रथमम्—अग्रे; प्राधान्येन, सेनापतित्वेन वा इति भावः। उपयुज्यमानौ—नियुज्यमानौ, इतौ इत्यर्थः। कथाऽन्तरेषु—आलापप्रसङ्गेषु। अन्तरान्तरा—मध्ये मध्ये। ["आनुपूर्व्यं हे वाच्ये" (वा०) इति द्वित्वम्] समादिष्टौ—आज्ञप्तौ, राज्ञा इति भावः। शैशववृत्तान्तान्—बाल्यक्रीडादिव्यापारान्, भैरवाचार्यस्यैव इति भावः। कथयन्तौ इति स्थिरसौहार्द्यज्ञापनपरं बोद्धव्यम्। तेनैव—राज्ञा [अत्र "सहयुक्तेऽप्रधाने" (२।३।१९ पा०) इति सूत्रे, 'एवं साकं सार्द्धं समं योगेऽपि' इति वृत्तेः, तेन सार्द्धं योगे तृतीया ज्ञेया]। सार्द्धं—सह। जराम्—वार्द्धकम्।

इत्यर्गलशास्त्राटवीसञ्चरणपञ्चाननेन वात्स्यवंशावतंसेन पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-विद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां श्रीहर्षचरितव्याख्यायां तृतीय उच्छासः ॥ ३ ॥

चतुर्थ उच्छ्वासः ।

योगं स्वप्नेऽपि नेच्छन्ति कुर्वते न करग्रहम् ।
महान्तो नाममात्रेण भवन्ति पतयो भुवः ॥ १ ॥
सकलमन्नोभृत्कम्पक्रदुत्पथत एक एव नृपवंशे ।
विपुलेऽपि पृथुप्रतिमो दन्त इव गणाधिपस्य मुखे ॥ २ ॥

अथेदानीं महतां गुणकीर्त्तनरूपेण प्रस्तुतस्य यत्समाप्तिकस्य गुणवत्त्वं प्रख्यापयितुमाह, योगमिति ।—महान्तः,—महाऽनुभावा जनाः, स्वप्नेऽपि—निद्रावस्थायां मानसिकज्ञानविशेषेऽपि, ("स्वप्नः स्यादि प्रसुप्तस्य विज्ञाने दर्शने पुमान्" इति मेदिनी) योगं—विश्वासहन्तृत्वं, कृत्य इत्यर्थः, पराभिसन्धानार्थमुपधिमिति यावत्, ("योगोऽप्युपायध्यानसङ्गतिध्यानयुक्तिषु । विश्रब्धघातके····· ॥" इति मेदिनी) मैथुनञ्च, न इच्छन्ति—नाभिलषन्ति, करग्रहं—करेषु—राजयाह्यभागेषु, ग्रहः,—आग्रहः तं, पीडनम् इत्यर्थः, दण्डग्रहणमिति वा, पाणिग्रहणञ्च, विवाहमित्यर्थः, न कुर्वते, अत्र च नाममात्रेण भुवः,—पृथिव्याः, पतयः,—अधिपतयः, परिशीलारश्च भवन्ति ; एकत्र, —नाममात्रव्यवहारेण सर्वे कल्पमानाल्लात् पतित्वे वृणन्ति ; अन्यत्र,—पाणिग्रहणसङ्गमादिकं विनाऽपि भूपतयः इति नामधारिणो भवन्तीति भावः ; एतेन भाविनृपतेः हर्षस्य अलीकपतित्वं प्रकारान्तरकत्वं प्रभावातिशयश्च सूचितम् । पद्यावृत्तं वृत्तम् ॥ १ ॥

इदानीं पुष्यभूतिवंशं उत्पत्स्यमानस्य हर्षनृपतेः तदुत्पत्तेभ्यः पूर्वनृपतिभ्यः श्रेष्ठत्वमाह, सकलेति ।—विपुले—महति, विशाले च, अपि नृपवंशे,—राजवंशे, गणाधिपस्य—गणपतेः, मुखे—वदने ; अत्रैव,—गणाः,—सैन्यभेदाः, ("गणः प्रमथसङ्घेऽपि चण्डाद्यैन्यभेदयोः" इति मेदिनी) तेषाम् अधिपस्य—अधिपतेः, राज्ञः, इत्यर्थः, राजसमूहानामिति भावः, मुखे—प्रधाने इत्यर्थः, नृपवंशे इत्यस्य विशेषणत्वेन योजनीयम्, दन्त इव—रदन इव, पृथुः,—आदिराजः, तत्प्रतिमः,—तत्सदृशः ; अत्रैव,—पृथुः,—विशालः, प्रतिमा—दन्तस्य, दन्तकीर्त्ति इत्यर्थः, ("प्रतिमा गजदन्तस्य बन्धे चानुकृतावपि" इति मेदिनी) यस्य तथाभूतः, एक एव—कश्चिदेव, यथा गणाधिपस्य मुखे दन्तोऽप्येक एव, तथा नरेन्द्रवंशे, कश्चिदेक एव इति

(१) अथ तस्मात् पुष्यभूतेः द्विजवरस्वेच्छागृहीतकोषो नाभिपद्म इव पुण्डरीकेक्षणात्, लक्ष्मीपुरःसरो रत्नसञ्चय इव रत्नाकरात्, गुरुबुधकविकलाभृत्तेजस्विभूनन्दनप्रायो ग्रहगण इव उदयस्थानात्, (२) महाभारवाहनयोग्यः सागर इव

भावः; सकलानां महीभृतां—राज्ञां, पक्षतानाञ्च, कल्पकृत्—भयप्रद इति भावः; एकत्र,—नामसाम्यवर्णनेन वंशपुरुषजननात्, अन्यत्र,—स्वस्थानादपसारणात्; उत्पद्यते—जायते। एतेन महाराजस्य हर्षस्य उत्पत्तिः सूचिता। आर्या वृत्तम् ॥ २ ॥

(१) अथेत्यादि।—"अथ" इत्यादौ "निर्जगाम राजवंशः" इति उत्तरेण सम्बन्धः। तमेव विशिनष्टि, द्विजवरेत्यादिभिः।—द्विजवरैः,—ब्राह्मणश्रेष्ठैः; अन्यत्र,—द्विजेषु वरः,—श्रेष्ठः, ब्रह्मेत्यर्थः, तेन स्वेच्छया—यथाकाममित्यर्थः, गृहीतः,—लब्धः, स्वीकृतश्च, कोषः,—धनं, बीजकोषश्च, कर्णिका च इत्यर्थः, यस्य तथाभूतः। पुण्डरीकेक्षणात्—कमललोचनात्, पुण्डरीकाक्षात् नारायणाच्च। नाभिपद्म इव—नाभिकमलमिव; यद्यपि "वा पुंसि पद्म नलिनम्" इत्युक्तममरेण, तथाऽपि पद्मशब्दस्य पुंसि प्रयोगस्तु अकविप्रयुष्टदोषदुष्ट एवेत्युक्तमालङ्कारिकैः। इतः प्रभृति श्लेषसङ्कीर्णोपमालङ्कारः विज्ञेयः, सर्ववर्णनेषु धर्म्यसाम्यप्रतिपादनादिति। लक्ष्मीः,—श्रीः, पुरःसरी—प्रथमा यस्य तथोक्तः, लक्ष्मीः,—सम्पत्, तत्पुरःसरश्च। रत्नसञ्चय इव—रत्नानां—रत्नभूतानाम्, उत्कृष्टानामित्यर्थः, पुरुषाणामिति भावः, "जातौ जातौ यदुत्कृष्टं तद्रत्नमिह कथ्यते" इत्युक्तेः, सञ्चयः,—समुत्पत्तिः यस्मात् सः, रत्नानां सञ्चयः यस्य तथाभूतो वा, रत्नानां—मणीनां, सञ्चयः,—समूहश्च। रत्नाकरात्—रत्नानाम् आकरः,—आश्रयः, उत्पत्तिस्थानञ्च, तस्मात्, समुद्राच्च। गुर्व्वित्यादि।—गुरवः,—उपदेष्टारः, बुधाः,—पण्डिताः, कवयः,—काव्यकृतः, कलाभृतः,—सङ्गीताभिज्ञाः ["कलाभृत्" इत्यत्र "कलावत्" इति पाठेऽपि स एवार्थः] तेजस्विनः,—शूराः, भूनन्दनाः,—राजानः; अन्यत्र,—गुरुः,—बृहस्पतिः, बुधः,—सौम्यात्मजः, कविः,—शुक्रः, कलाभृत्—चन्द्रः, तेजस्वी—सूर्य्यः, भूनन्दनः,—मङ्गलः, एते प्रायेण यत्र तथाभूतः। उदयस्थानात्—उदयाचलादित्यर्थः; अन्यत्र,—प्रभवस्थानादित्यर्थः।

(२) महाभारेति।—महान् भारः,—भूभार इत्यर्थः, भूपालनरूप इति भावः, तस्य वाहनं—निर्वाहणं, तस्य योग्यः; अन्यत्र,—महतो भारस्य—भारवहव्यस्य, वाहने—स्थानात् स्थानान्तरनयने, योग्यः,—समर्थः। [समुद्रपक्षे आरोप्यीयस्थानार्थकेऽपि भारशब्दे राजवंशपक्षे भूरक्षणभारस्य न तथार्थता इति "वाहन—"

सगरप्रभावात्, (३) दुर्ज्जयबलसनाथो हरिवंश इव शूरात् निर्जगाम राजवंशः। (४) यस्मात् अविनष्टधर्म्मधवलाः प्रजासर्गाः इव कृतमुखात्, प्रतापाक्रान्तभुवनाः किरणा इव तेजो-

(८।४।८ पा०) इत्यादिना न षत्वम्]। सगरप्रभावात्—सगरस्य—तृतीयवंशीयस्य राजर्षिविशेषस्य, प्रभावात्—सामर्थ्यात्। पुरा सगरस्य नृपतेः षष्टिसहस्राणि पुत्रा आसन्। ते तु कालेन महाबलाः पराक्रान्ताश्च वीराः पितुः सगरस्य अश्वमेधीयाश्वं रक्षन्तः सर्व्वां पृथ्वीं प्रदक्षिणीकुर्व्वन्तः चेरुः। अवान्तरं शक्रेण तेषां मध्यचारी अश्वः दैवशक्त्या हरता पातालं कपिलमुनिसमीपे रक्षितः। अथ ते रक्षकाः यज्ञीयमश्वम अपश्यन्तः सर्व्वां पृथ्वीं स्वर्गेच भ्रमन्तः परं न अश्वमवापुः। ततः पित्राज्ञया पातालं खनित्वा कपिलसमीपे तमश्वं दृष्ट्वा कपिलं व्यपीडयन्। स च मुनिः तान् कोपदृष्ट्या पश्यन्नेव भस्मीचकार। तेषां तदा पातालखननेन यो जलराशिरुत्थितः, स एव सगरादुत्थ इति सागरसंज्ञां लेभे इति पुराणवार्त्ता। अन्यत्र,—सगरस्येव प्रभावो यस्य तथाभूतः तस्मात्। ["प्रभावात्" इत्यत्र "प्रभवात्" इति पाठे,—सगरात् प्रभवः,—उत्पत्तिर्यस्य तस्मात्, सगरपुत्रादित्यर्थः; अन्यत्र,—सगरवत् प्र—प्रज्ञाः, प्रज्ञावंशे इत्यर्थः, भवः,—उत्पत्तिः यस्य तस्मात् इत्यर्थः]।

(३) दुर्ज्जयबलसनाथः,—दुर्ज्जयं बलं—पराक्रमः इत्यर्थः, येषां तैः, तादृशैः वीरैरित्यर्थः; यद्वा,—दुर्ज्जयेन—दुःखेन जेतुं शक्येन, पराक्रमेणा इत्यर्थः, बलेन—सैन्येन, सनाथः,—सहितः; किं वा—दुर्ज्जयश्च बलसनाथश्च—महाप्राणश्च सैन्ययुतश्च वा, असौ दुर्ज्जयबलसनाथः; अन्यच,—दुर्ज्जयेन—जेतुमशक्येन, बलेन—बलदेवेन, सनाथः,—सहितः; यद्वा,—दुर्ज्जयः,—विष्णुः, "दुर्ज्जयो दुरतिक्रमः" इति विष्णुसहस्रनामवचनात्, बलः,—बलदेवश्च, ताभ्यां सनाथः; शूरात्—वीरात्, "तस्मात् प्रभृतेः" इति पूर्वेणान्वयः; तदाख्यात वसुदेवपूर्व्वपुरुषाच्च।

(४) यस्मात्—राजवंशात्, "यस्मात्" इत्यादौ "अजायन्त राजानः" इति उत्तरेण सम्बन्धः। तानेव विशिनष्टि, अविनष्टेत्यादिभिः।—अविनष्टेन—अविलुप्तेन, सम्पूर्णेनेत्यर्थः, धर्म्मेण—वेदोदितानुष्ठानेन, "चोदनालक्षणोऽर्थो धर्म्मः" इत्युक्तेः, "चोदना वेदविधिरुच्यते" इति तद्व्याख्यानाच्च; धवलाः,—विशुद्धाः, चतुराश्रम्यप्रणायिन इति यावत्; यद्वा,—अविनष्टधर्म्मान् धवान्—नरान्, स्वामिन—भर्त्तृन्, सिवत्वेन भूत्यत्वेन वा इति भावः, तथोक्ताः, ("धवः पुमान् नरे भर्त्तरि पत्यौ क्ष्मान्तरेऽपि च" इति मेदिनी) प्रजासर्गाः,—मानुषसृष्टयः। कृतमुखात्—संस्कृत-

निधेः, (५) विग्रहव्यायतिसुखा गिरय इव भूभृत्प्रवरात्, (६) धरणिधारणक्षमा दिग्गजा इव ब्रह्मकरात्, उदधीन् पातुम् उद्यता जलधरा इव घनागमात्, (७) इच्छाफलदायिनः कल्पतरव इव नन्दनात्, (८) सर्वभूताश्रया विश्वरूपप्रकरा इव श्रीधरात् अजायन्त राजानः।

सुखात्, सत्कारपूतवचस इति भावः, सत्ययुगप्रारम्भाच्च। प्रतापेति।—प्रतापेन—कोषदण्डजशक्त्या ("स प्रभावः प्रतापश्च यत्तेजः कोषदण्डजम्" इत्यमरः) तेजसा च, आतपेनेत्यर्थः, आक्रान्तम्—अधिष्ठितं, भुवनं यैः तथोक्ताः। तेजोनिधेः,—प्रतापशालिनः, सूर्यात्च।

(५) विग्रहेति।—विग्रहेण—युद्धेन, अवयवेन च, ("विग्रहः कायविस्तारविभागे ना रणेऽस्त्रियाम्" इति मेदिनी) व्यायानि दिसुखानि यैः तथोक्ताः। भूभृत्प्रवरात्—भूभृत्सु—राजसु, पर्वतेषु च, प्रवरः,—श्रेष्ठः तस्मात्, [निर्हारे षष्ठीसमासनिषेधात् समसी एव आश्रयणीया। "भूभृत्प्रवरात्" इत्यत्र "भूभृत्प्रभवात्" इति पाठे,—भूभृत्सु—भूपालेषु, प्रभवः,—पराक्रमः यस्य, अनयः,—भूभृतां—पर्वतानां, प्रभवः,—प्रथमप्रकाशस्थानं, तस्मात इत्यर्थः, ("प्रभवो जन्ममूले स्यात जन्महेतौ पराक्रमे। प्रारम्भे चादिमस्थाने" इति मेदिनी), केचित्तु "भूभृत्प्रभवो ब्रह्मा" इति व्याचक्षते]।

(६) धरणीति।—धरण्याः,—पृथिव्याः, धारणे—पालने, उद्वहने च, क्षमाः,—शक्ताः। ब्रह्मकरात्—ब्रह्म—वेदोक्तं धर्मम् इत्यर्थः, करोतीति तस्मात्, विधाद्वहलाच्च, सामगान कुर्वतः ब्रह्मणः करात् कारणः उत्पन्ना इति पौराणिकी वार्ता। उदधीन्—समुद्रान्, पातुं—रक्षितुं, पिबितुञ्च। घनागमात्—घनः,—सान्द्रः, दृढ इत्यर्थः, आगमः,—शास्त्रज्ञानं यस्य तथोक्तात्, मेघागमाच्च, वर्षाकालं प्राप्येत्यर्थः।

(७) इच्छेति।—इच्छया—कामनया, अर्थनामिति भावः, फलानि—अभिलषितानि, दातुं शीलमेषां तथोक्ता, [अत्र इच्छाफलपूर्वकात् दाधातोः "सुप्यजातौ—" (३। २। ७८ पा०) इत्यादिना णिनिप्रत्यये "आतो युक्—" (७।३।३३ पा०) इत्यादिना युगागमे रूपम्]। नन्दनात्—नन्दयतीति तथोक्तात्, तदाख्योद्यानाच्च।

(८) सर्वेति।—सर्वेषां भूतानां—प्राणिनां, जीवानाञ्च, प्रजानाञ्चेत्यर्थः, चित्रादिमहाभूतानां वा, आश्रयाः,—आश्रयणीयाः; यद्वा,—सर्वेषु—द्रव्येषु इति

(९) तेषु चैवमुत्पद्यमानेषु क्रमेण उदपादि हूणहरिण-केसरी, सिन्धुराजज्वरः, गुर्जरप्रजागरः, गान्धाराधिपगन्धहिप-कूटपाकलः, (१०) लाटपाटवपाटच्चरः, (११) मालव-लक्ष्मीलतापरशुः, प्रतापशील इति प्रथितापरनामा,

भावः, भूतानि—सत्यानि, नित्यत्वात् पारमार्थिका इति भावः, अत एव आप्तयाः। विश्वरूपप्रकराः,—विश्वेषां—जगतां, रूपप्रकराः,—रूपनिवहाः, ["विश्वरूपप्रकराः" इत्यत्र "विश्वरूपप्रकाराः" इति पाठे,—भगवतः श्रीविष्णोः दुर्दशरूपविशेषाः इव इत्यर्थः]। श्रीधरात्—श्रियं—सम्पदं, राजलक्ष्मीं वा, धरतीति तथोक्तात्, विष्णोश्च।

(९) तेष्वित्यादि।—"उदपादि" इत्यादौ प्रभाकरवर्द्धनो नाम राजाऽधिराजः" इत्युत्तरेणान्वयः। उदपादि—उत्पन्नः। तमेव विशिनष्टि, हूणेत्यादिभिः।—हूणाः,—तदाख्यक्षत्रियविशेषाः, दैत्यविशेषा वा, हरिणा इव—मृगा इव, तेषां तेषु वा केसरी—सिंहः, तेषां विजयेन भीतिहेतुत्वादिति भावः; एवमुत्तरत्रापि बोद्धव्यम्; अतः प्रभृति सर्वत्र रूपकमलङ्कारः, अभेदाध्यासदर्शनात्। सिन्धुराजज्वरः,—सिन्धु-राजस्य ज्वरः,—रोगविशेषः। गुर्जरप्रजागरः,—गुर्जरनिद्राक्षयः; गुर्जरदेशीया जना यस्य भयेन सततं जायतीति भावः। गान्धाराधिपः,—गान्धारराज एव, गन्ध-हिपः,—गन्धप्रधानो हिपः, मत्तहस्तीत्यर्थः, "खेदं मूत्रं पुरीषञ्च मज्जाश्चैव मतङ्गजाः। यस्याघ्राय विमाद्यन्ति तं विद्याद् गन्धहस्तिनम्॥" इत्युक्तलक्षणो वा, तस्य कूटः,—निश्चलः, अविच्छेदीति भावः; यद्वा,—कूटे—यन्त्रे, संयमनविशेषे इत्यर्थः, ("कूटोऽस्त्री निश्चले राशौ···। ·····सीराऽवयवयन्त्रयोः॥" इति मेदिनी) पाकलः,—हस्तिज्वरविशेषः, ("पाकलं कुष्ठभेषज्ये पुंसि स्यात् कुञ्जरज्वरे" इति मेदिनी। "विविधैर्नामभिः क्रूरो नाना योनिषु वर्त्तते। पाकलो गजेष्वभितापी वाजिष्वर्कः कुकुरेषु। इन्द्रमदो मत्स्येष्वपु मौलिका ज्योतिरोषधिषु भूम्यामूषरो नाम॥" इत्यादि वैद्यके च।

(१०) लाटेति।—लाटानां—लाटदेशीयानां क्षत्रियाणां, [लाटशब्दात् "तत्र जातः" (४।३।२५ पा०) इत्यणि रूपम्] पाटवस्य—नैपुण्यस्य, पाटच्चरः,—चौरः, तद्विध्वंसीत्यर्थः, ("चौरैकागारिकस्तेन·····पाटच्चरमलिम्लुचाः" इत्यमरः)।

(११) मालवेति।—मालवानां—तदाख्यजनपदानां, लक्ष्मीरेव लता, तस्याः परशुः,—कुठारः। हूणादिराजविजेता, तदाख्यदेशविजेता वेति निष्कर्षः। प्रताप-शीलः,—यतो हूणादिराजविजयी, अत एव प्रतापशील इति। प्रथितापरनामा—

(१२) प्रभाकरवर्द्धनो नाम राजाधिराजः। (१३) यो राज्याङ्गसङ्घानि अभिषिच्यमान एव मलानीव मुमोच धनानि; यः परकीयेणापि कातरवल्लभेन रणमुखे तृणेनेव धृतेन अलज्जत जीवितेन; यः (१४) करधृतधौतासिप्रतिविम्बितेन आत्मनाऽपि अद्यूयत समितिषु सहायेन। रिपूणां पुरः (१५) प्रधनेषु धनुषाऽपि नमता यो मानी मानसेन अखिद्यत। यस्य

विख्यातान्वर्थनामधेयः; यद्वा,—प्रथित इति प्रथः,—प्रभाकरवर्द्धनादितरः, नाम—समाख्या यस्य तथाभूतः।

(१२) प्रभेति।—प्रभाकरः,—सूर्यः, तद्वत् वर्द्धते इति तथोक्तः; यद्वा,—प्रभाकरस्यासौ वर्द्धनश्च इति विग्रहः, यशःप्रभावशालित्वात्।

(१३) राज्याङ्गसङ्घानि—राज्याङ्गानि—अमात्याद्याः, तत्सङ्घानि—तत्समूहान्। अभिषिच्यमानः,—राज्ये प्रतिष्ठाप्यमानः, अन्यत्र,—अभितः—सर्वतः, सिच्यमानः,—प्रोक्ष्यमाणः, जलेनेति भावः; [अत्र "उपसर्गात्—" (८।३।६५ पा०) इत्यादिना षत्वम्] यस्य सर्वतोभावेन जलसिक्तो भवति, सः अङ्गसङ्घानि मलानि मुञ्चतीति लोकदृष्टम्। मलानि—दूषितानि, क्लेदांश्च तानीव, धनानि मुमोच—तत्याज, दीनानाथादिभ्यो दत्तवानित्यर्थः; अत्र मलैः सह धनानामवैधर्म्यसाम्यप्रतीतेरुपमाऽलङ्कारः। परकीयेणापि—परार्थप्रवृत्तेनापि इत्यर्थः, कातरेषु, जनेषु इति शेषः, कातराणां—दुर्बलानां जनानां वा, वल्लभेन—प्रियेण, हातुमशक्येनेति भावः, तृणेनेव—अतितुच्छेनेति भावः। कातरा अपि मुखे तृणानि धरन्ति इति प्रसिद्धिः। अलज्जत—नित्यं परोपकाराय जीवनमुत्सृजन्नपि स नाद्यैतावता कालेनापि कस्याप्यार्तस्य रक्षणाय जीवनमिदं तृणाय मत्वा उत्क्षेष्टुं शक्नुयामिति अतुच्यन् किं मया जगति कृतमिति कुण्ठितोऽभूदित्यर्थः।

(१४) करेति।—करे—करतले, धृतः,—गृहीतः, धौतः,—निशितः, उज्ज्वलो वा; अत्र धौतपदप्रयोगेण प्रतिविम्बयहणसामर्थ्यं प्रतिपादितमिति बोध्यम्। असिः,—तरवारिः, तत्र प्रतिबिम्बितेन—प्रतिफलितेन। अद्यूयत—सन्तप्तवान्। समितिषु—सङ्ग्रामेषु, ("युद्धमाजीधनं जन्यं प्रधनं प्रविदारणम्। ...समुदायः स्त्रियः संयत्समित्याजिसमिदृधः" इत्यमरः)। सहायः,—सहचरः, तेन; असहाय एव शत्रून् जिगीषुः स इति भावः।

(१५) प्रधनेषु—युद्धेषु। नमता—ज्यारोपणार्थमिति भावः। मानी—अभि-

(१६)अन्तर्गतापरिमितरिपुशल्यशङ्कुकीलितामिव निश्चलामुवाह राजलक्ष्मीम् । यश्च सर्व्वासु दिक्षु (१७) समीकृततटावटविटपाटवीतरुतृणगुल्मवल्मीकगिरिगहनैर्दण्डयात्रापथैः पृथुभिर्भृत्योपयोगाय व्यभजतेव वसुधां बहुधा ; यश्च (१८) अलब्धयुद्धदोहदमात्मीयोऽपि सकलरिपुसमुत्सारकः परकीय इव ततापप्रतापः ; यस्य च (१९) वाङ्मयो हृदयेषु, जलमयो लोचनपुटेषु, मारुत-

मानवान् । मानसेन—मनसा ; अस्त्रिः धनुश्च मया सहायत्वेन नीयते, न मन्त्रास्त्रेण, कैवलेन उपस्थित्या वा शत्रवो जीयन्ते इति दुःखेनेति भावः ।

(१६) अन्तर्गतेति ।—अन्तर्गतैः,—अभ्यन्तरस्थैः, अपरिमितैः,—अगणितैः, रिपूणां—शत्रूणां, रिपुनिक्षिप्तैरिति भावः, शल्यशङ्कुभिः,—बाणादिरूपकीलैः, कीलिता—संयमिता तामिव, इत्युत्प्रेक्षा । निश्चलाम्—अनपायिनीम् ।

(१७) समीकृतेति ।—समीकृतानि—समतलतां नीतानि, तटाः,—नदीतीराणि, अवटाः,—विवराणि, ("गर्त्तावटौ भुवि श्वभ्रे" इत्यमरः) विटपाः,—शाखाः, अटव्यः,—विपिनानि, तरवः,—वृक्षाः, तृणानि गुल्माः,—लताः, काण्डविरहितवृक्षा इत्यर्थः, ("अप्रकाण्डे लतागुल्मौ" इत्यमरः) वल्मीकाः,—"ऊर्यो" इति प्रसिद्धकीटविशेषसञ्चिता मृत्कूटाः, गिरिगहनानि—पार्व्वतीयवनानि ; यद्वा,—गिरयः,—पर्व्वताः, गहनानि—गह्वराणि, पर्व्वतकन्दराणीत्यर्थः, ("गहनं कलिले क्लीबे । नपुंसकं गह्वरे स्यात् दुःखकाननयोरपि" इति मेदिनी) यैः तैः ; यद्वा,—समीकृताः तटावटाः यैः तादृशाः ये विटपाटवीतरवः, तथा तृणगुल्मवल्मीकगिरयश्च तैः गहनैः,—क्रूरैः, दुष्प्रवेशैरित्यर्थः ; दण्डयात्रापथैः,—दण्डः,—सैन्यं, ("सैन्ये कारे मानभेदे दण्डोऽस्त्री लगुडे पुमान्" इति मेदिनी) तस्य यात्रापथैः,—गमनमार्गैः, युद्धप्रयाणमार्गैरित्यर्थः । पृथुभिः,—सुदीर्घैरित्यर्थः । भृत्योपयोगाय—भृत्यानाम्—अनुजीविनाम्, उपयोगाय—सुखभोगाय, सुखेन गमनायेति भावः, व्यभजत—विभक्तवानिवेत्यर्थः ।

(१८) अलब्धेति ।—न लब्धः—प्राप्तः, युद्धदोहदः,—युद्धाभिलाषः येन तम्, अलब्धयुद्धाभिलाषमित्यर्थः । सकलेति ।—सकलानां—समग्राणां, रिपूणां—शत्रूणां, समुत्सारकः,—निराकर्त्ता । परकीय इव—परसम्बन्धीव ; परकीयः प्रतापी यथा विजिगीषुं तपति, तथा स्वप्रतापोऽपि सङ्ग्रामयुद्धव्यापाराप्राप्तेरिति भावः ।

(१९) वाङ्मयः,—अग्निरूपः, तेजोभूतमयश्च, [अत्र "तत्प्रकृतवचने मयट्"

मयो निश्वसितेषु, क्षमामयोऽङ्गेषु, आकाशमयः शून्यतायां, पञ्चमहाभूतमयो मूर्त्त इव अदृश्यत (२०) निहतप्रतिसामन्तान्तःपुरेषु प्रतापः; (२१) यस्य च आसन्नेषु भृत्यरत्नेषु प्रतिविम्बितेव तुल्यरूपा समलक्ष्यत लक्ष्मीः; तथा च, यस्य (२२) प्रतापाग्निना भूतिः, शौर्य्योष्मणा सिद्धिः, असिधाराजलेन

(५।४।२१ पा०) इति प्राचुर्य्ये मयट्, एवं जलमयादिषु ज्ञेयम्] हृदयेषु—अन्तःकरणेषु, सततप्रियवियोगानलौष्ण्यैकवैकृतस्मरणादिति भावः। जलमयः,—अश्रुमयः इत्यर्थः, अम्भूतमयत्व, शोकातिशयादजस्रनेत्रास्रुप्रपातादिति भावः। मारुतमयः,—उष्णदीर्घश्वासरूपः, मरुद्भूतमयत्व, दुःखातिशयादविरतोष्णश्वासमरुत्सारादिति भावः। क्षमामयः,—क्षान्तिपूर्णः, विपक्षाणामप्यवरोधवर्गः न पीडनीयः इति स्त्रीत्वेनाविनाशित्वादिति भावः। भूसौष्ठवादिना भूक्षिपूर्णत्वात् क्षान्तित्वाच्च क्षितिभूतमयत्व। आकाशमयः,—गगनरूपः, व्यापभूतमयत्व, शून्यतायां—विरहितायामिति यावत्, नित्येष्टत्वे वा प्रियतमविच्छेदादिति भावः; अत एव पञ्चमहाभूतमयः, चित्यप्रौढमकदन्योमानि महान्ति पञ्चभूतानि, तदात्मकः, तत्तद्रूपेण परिणत इत्यर्थः, मूर्त्तः,—मूर्त्तिमान्; यथा महाभूतानां शब्दादयः गुणाः केवलं परार्थैकफलाः, तथैवास्य दयादाक्षिण्यादिगुणग्रामाः परोपकृतये आसन्निति तात्पर्य्यम्।

(२०) निहतेति।—निहतानां—सङ्ग्रामे व्यापादितानां, प्रतिसामन्तानां—विरोधिस्वराज्यान्तरवर्त्तिनरेन्द्राधिपानामित्यर्थः, अन्तःपुरेषु—अन्तःपुरवर्त्तिनीषु नारीषु इत्यर्थः। अत्र एकस्यापि प्रतापस्य तत्तद्गुणयोगादनेकधोल्लेखे हृदयादयः यथायोगं प्रयोजकाः इत्युल्लेखालङ्कारः।

(२१) आसन्नेषु—सन्निहितेषु, भृत्यरत्नेषु—भृत्या रत्नानीव; यद्वा,—भृत्येषु रत्नानि तेषु—भृत्यश्रेष्ठेषु, अमात्यप्रधानेषु इति यावत्, ("जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" इति उत्पलमाला), प्रतिविम्बितेव—प्रतिफलितेव; आसन्नानि रत्नानि प्रतिबिम्बं गृह्णन्ति इति दृश्यते लोके; तुल्यरूपा—समभागेन विभक्ता।

(२२) प्रतापाग्निना—प्रतापरूपेणानलेन, भूतिः,—सम्यद्, भस्म च, ("भूतिर्भस्मनि सम्पदि" इत्यमरः)। शौर्य्योष्मणा—वीर्य्योष्मभावेन, अन्नदाहिकया शक्त्या च, [अत्र "सर्व्वधातुभ्यो मनिन्" (उ० ४ पा० १४४ सू०) इति उष्धातोः मनिन् प्रत्ययान्तेन उष्मन्शब्देन अर्थबोधः। "इषि युधि—" (उ० १ पा० १४४ सू०) इति सूत्रे बाहुलकग्रहणात् उष्धातोः मक्प्रत्यये सिद्धस्यापि विवक्षितत्वात्]। सिद्धिः,—

वंशवृद्धिः, शस्त्रव्रणमुखैः पुरुषकारोक्तिः, (२३) धनुर्गुण-किणेन करग्रहोतिः अभवत्; यश्च (२४) वैरमुपायनं, विग्रहमनुग्रहं, समरागमं महोत्सवं, शत्रुं निधिदर्शनम्, अरिबाहुल्यमभ्युदयम्, आहवाह्वानं वरप्रदानम्, अवस्कन्द-पातं दिष्टवृद्धिं, शस्त्रप्रहारपतनं वसुधारारसम् अमन्यत;

राज्यादिलाभः, पाकस्य। असिधाराजलेन—खड्गधारारूपेण जलेन। वंशवृद्धिः,—वंशस्य—कुलस्य, वेणोश्च, वृद्धिः,—अभ्युदयः, वर्द्धनञ्च। शस्त्रेति।—शस्त्राणां व्रणानि—क्षतानि एव, मुखानि—अग्राणि, आननानि च, तैः, पुरुषकारोक्तिः,—पौरुष-प्रकटनमित्यर्थः; मुखैरेव उक्तिर्भवतीति तथाऽऽरोपः।

(२३) धनुरिति।—धनुषो गुणः,—मौर्व्वी, तस्य किणः,—कलङ्करेखा, व्यायामदक्षतायाश्चिह्नं वा, तेन। करग्रहोतिः,—दक्षहस्तग्रहणं, करस्य—हस्तस्य ग्रहणञ्च। [अत्र सर्व्वत्र तृतीयान्तेषु "सहयुक्ते—" (२।३।१९ पा०) इत्यादिसूत्रे "विनाऽपि तद्योगं तृतीया, दृष्टो युनेत्यादिवाक्यलिङ्गात्" इति हृत्याः अतद्योगेऽपि सहार्थे तृतीया]।

(२४) वैरमित्यादि।—वैरं—शत्रुणा कृतम् अनिष्टाचरणमित्यर्थः, उपायनम्—उपढौकनं, तत्प्रतिसमाधाने प्रीत्यातिशय्यादिति भावः। विग्रहं—युद्धं, शत्रुभिः क्रियमाणमिति शेषः, अनुग्रहम्—अनुकम्पां, तत्रातीव अनुरागत्वादिति भावः। समरागमं—सङ्ग्रामागमनं, महोत्सवम्, बलपरीक्षणादिभिः आनन्दवर्द्धनत्वादिति भावः। निधिदर्शनं—निधेः,—महामूल्यरत्नस्य, [अत्र निपूर्व्वस्य धाधातोः "उपसर्गे—" (३।३।९२ पा०) इति क्तिप्रत्यये निपातनाद्रूपम्] दर्शनम्; यद्वा,—निधेरिव दर्शनं यस्य तथाभूतम्; युद्धकण्डूविनोदनोपायत्वादिति भावः। अरिबाहुल्यं—शत्रुबहुतां, अभ्युदयम्—उन्नतिजननमित्यर्थः, तन्निषूदनैः प्रतापविस्तारात् राज्य-विस्तारश्चेति भावः। आहवाह्वानं—युद्धे आकारणं, वरप्रदानम्—अभीष्टदानम्; निरन्तरमभिलषितत्वादिति भावः। अवस्कन्दपातं—शत्रुष्वभिगमोऽवस्कन्दः, [अत्र अवपूर्व्वकात् स्कन्दधातोः "अकर्त्तरि—" (३।३।१९ पा०) इत्यादिना अधिकरणे घञि रूपम्] तस्य पातः,—उपस्थितिः तम्; दिष्टवृद्धिं—भाग्यवर्द्धनम्, आनन्दवर्द्धनं वा। शस्त्रप्रहारेण, शत्रोरिति शेषः, पतनं—धरातले लुण्ठनमित्यर्थः, वसुधारारसं—वसुधा—पृथ्वी, तस्या राः,—दानं, [रा दाने इत्यस्मात् क्विपो रूपम्] तस्य रसः,—रागः, स्वादो वा तम्; यथा भूमिदः स्वर्गं गच्छेत्, तथा सङ्ग्रामे शस्त्रप्रहारपतितो-

(२५) यस्मिंश्च राजनि निरन्तरैर्यूपनिकरैरङ्कुरितमिव क्रतयुगेन, दिङ्मुखविसर्पिभिः अध्वरधूमैः पल्लायितमिव कलिना, ससुधैः सुरालयैः अवतीर्णमिव स्वर्गेण, (२६) सुरालयशिखरोड्डूयमानैर्धवलध्वजैः पल्लवितमिव धर्मेण, (२७) वह्निकृपरचितविकट-सभासत्रप्रपाप्राग्वंशमखपैः प्रसूतमिव ग्रामैः, काञ्चनमयसर्वोप-

---

ऽपीति भावः; यद्वा,—यज्ञालवसुधाराकर्णने दग्धवत्यलनाद्यसाधारणानन्दरसनिस्यन्दमयः।

(२५) यस्मिंश्च राजनि सतीत्यर्थः, [अथ "यस्य च—" (२।३।३७ पा०) इत्यादिना भावे सप्तमी क्रेया]। निरन्तरेति।—निरन्तरैः,—अविच्छिन्नैः, यूपनिकरैः,—यूपाः,—यज्ञार्थपशुबन्धनदारुविशेषाः, तेषां निकराः,—समूहाः, तैः, अङ्कुरितं—प्ररोहरूपेण समुत्थितमिव, इति क्रियोत्प्रेक्षा। क्रतयुगेन—सत्ययुगेन। दिङ्मुखविसर्पिभिः,—दिगन्तरालविसृमरैः, अध्वरधूमैः,—यज्ञधूमैः, पल्लायितमिव, समाच्छन्नदृष्टित्वेनेति भावः। कलिना—चतुर्थयुगेन; कलेः पापत्वात् पापस्य च कृष्णवर्णतायाः कविसमयप्रसिद्धत्वात् धूमेर्हेतुभूतैरुत्प्रेक्षा स्फुटीकृता। ससुधैः,—सुधा—अमृतं, चूर्णद्रव्यं, तेन सहितैः, सुरालयैः,—देवमन्दिरैः।

(२६) सुरेति।—सुरालयानां—देवागाराणां, शिखरेषु—शिरःसु, चूडासु इत्यर्थः, उड्डूयमानाः,—उड्डायमानाः, तैः; धवलध्वजैः,—श्वेतपताकाभिः, पल्लवितमिव—नमनात् प्रसृतमिव; धर्मस्य शुभतायाः कविसमयप्रसिद्धत्वात् तथाविधोत्प्रेक्षाबीजमेतत्।

(२७) वह्निरिति।—वह्निः,—वाह्ने देशे, उपरचितानि—निर्मितानि, विकटानि—बहूनि, विशालानीत्यर्थः, सभानां—संसदां, ("समज्या परिषद्गोष्ठी सभासमितिसंसदः। आख्यानी क्लीवमाख्यानं स्त्रीनपुंसकयोः सदः॥" इत्यमरः) सत्राणां—सदादानानां, ("सत्रमाच्छादने यज्ञे सदादाने वनेऽपि वा" इत्यमरः) प्रपाणां—जलदानानां, ("प्रपा पानीयशालिका" इत्यमरः)। प्राग्वंशानाम्—प्राक्—पूर्वभागी, वंशः,—सपत्नीकयजमानसमुदायः यत्र तेषां, यज्ञिय गृहे ऋत्विर्ग्व्यादिकं नियतं स्थाप्यते, तस्मात् पूर्वं सावरोधयजमानसदस्याद्यवस्थानानामित्यर्थः, ("प्राग्वंशः प्राग्वविर्गेहात्" इत्यमरः) मखपानि—गृहाणि, तैः। प्रसूतमिव—उत्पन्नमिव, सृष्टमिवेत्यर्थः, ग्रामैः; बहुभिः गृहैः अपरः ग्राम इव दृश्यमान आसीदिति भावः।

करणैर्विभवैर्विशीर्णमिव मेरुणा, (२८) द्विजदीयमानैः अर्थ-कलशैः फलितमिव भाग्यसम्पदा।

(२९) तस्य च जन्मान्तरेऽपि सतो पार्वतीव शङ्करस्य, गृहीतहृदया लक्ष्मीरिव लोकगुरोः, (३०) स्फुरत्तरलतारका रोहिणीव कलावतः, सर्व्वजननयनो बुद्धिरिव प्रजापतेः,

काञ्चनमयसर्व्वोपकरणैः,—स्वर्णनिर्म्मितसर्व्वद्रव्यसम्भारैः, विभवैः,—सम्पद्भिः। विशीर्ण-मिव—पतितमिव, विस्मृतामवेत्यर्थः; मेरोः स्वर्णमयत्वात् तच्च सर्व्वसुवर्णाना-मानयनात् स एव विशीर्णः तत्रापतित इवेत्युत्प्रेक्षा।

(२८) द्विजैरिति।—द्विजेभ्यः,—विप्रेभ्यः, दीयमानाः,—विकीर्य्यमाणाः, कैः; अर्थकलशैः,—धनकुम्भैः। भाग्यसम्पदा—सौभाग्यसमृद्धा।

(२९) "तस्य" इत्यादौ "यशोवती नाम महादेवी·····अभूत्, या अस्य वक्षसि···ललास" इति उत्तरेण सम्बन्धः। [अत्र यशःशब्दात् "तदस्य—" (५।२।९४ पा०) इत्यादिना मतुपि "मादुपधायाश्च—" (८।२।९ पा०) इत्यादिना मतोर्मस्य वकारादेशे यशस्वत् ततः स्त्रियां ङीपि यशस्वती इति रूपसिद्धिः; अल्युत्पन्नप्रातिपदिकात् यशोशब्दात् मतुपि "संज्ञायाम्" (८।२।११ पा०) इति मतोर्मस्य वकारादेशे यशोवत् ततः ङीपि यशोवती इति कथञ्चित् निर्वाहः]। तामेव विशिनष्टि, सतीत्यादिभिः।—सती—पतिव्रता, सती नाम्नी च; दक्षदुहितृरूपेण यदा जाता, तदा पार्व्वत्याः सतीति संज्ञा आसीदिति प्रसिद्धिः। शङ्करस्य—शं—मङ्गलं, करोतीति तथोक्तस्य, हरस्य च। "शङ्करस्य" इत्यादीनि "महामुनेः" इत्यन्तानि पदानि राजपक्षेऽपि सङ्गमनीयानि। गृहीतहृदया—हृदय-ग्राहिणी, वक्षःस्थलवासिनी च, ["गृहीतहृदया" इत्यत्र "गृहीतपरहृदया" इति पाठे,—गृहीतम्—आवर्जितं, परेषाम्—अन्येषां, हृदय—चेतः, सदाचारादिनेति भावः, यया सा; अन्यत्र,—गृहीतम्—आश्रितं, परस्य—श्रेष्ठस्य, विष्णोरित्यर्थः, हृदय—वक्षःस्थलं, सततपतिव्रतात्वावलम्बनात् इति भावः, यया सा] लोकगुरोः, जगद्गुरोः नारायणस्य, पृथिव्रीपतेश्च।

(३०) स्फुरदिति।—स्फुरन्ती—दीप्यमाना, तरला—चञ्चला, तारका—कनीनिका यस्याः सा, स्फुरन्ती—दीप्यमाना, तरला—भासुरा, उज्ज्वला इत्यर्थः, ("तरलं चञ्चले स्निग्धे भास्वरेऽपि त्रिलिङ्गकम्" इति मेदिनी) तारका—नक्षत्र रूपिणीत्यर्थश्च। कलावतः,—चतुःषष्टिविद्याशालिनः, चन्द्रस्य च। सर्व्वजननयनो—

(३१) महाभूभृत्कुलोद्गता गङ्गेव वाहिनीनायकस्य, (३२) मानसानुवर्त्तनचतुरा हंसीव राजहंसस्य, (३३) सकललोकार्च्चितचरणा त्रयीव धर्म्मस्य, (३४) दिवानिशम् अमुक्तपार्श्वस्थितिः अरुन्धतीव महामुनेः, (३५) हंसमयीव गतिषु, परपुष्टमयीव

सर्व्वेषां जनानां जननी—उत्पादनी, [जनधातोः "अर्त्तिसृ—" (उ० २ पा० १०३ सू०) इत्यादिसूत्रे बाहुलकग्रहणात् अनिप्रत्यये ततो ङीपि रूपम्] माता च,—"राजभार्य्या प्रभूः पृथ्वी गुरुदारोपमातृका। श्वश्रूः पूर्व्वजपत्नी च सपत्नी मातरः स्मृताः॥" इत्युक्तेः। प्रजापतेः,—ब्रह्मणः, प्रजापालस्य च।

(३१) महेति।—महत्—विशालं, भृतां—राज्ञां, कुलं—वंशः, महाभूभृतः,—हिमाद्रेः, कुलं—देहश्च, ("कुलं जनपदे गोत्रे सजातीयगणेऽपि च। भवने च तनौ क्लीवम्" इति मेदिनी) तस्मात् उद्गता—जाता, निर्गता च, [अत्र "निराङ्भ्यः क्रान्त्यर्थे पञ्चम्या" (वा०) इति समासः]। वाहिनीनायकस्य—सेनापतेः, नदीपतेः समुद्रस्य च, ("वाहिनी स्यात्तरङ्गिण्यां सेनासैन्यप्रभेदयोः" इति मेदिनी)।

(३२) मानसेति।—मानसस्य—चित्तस्य, तदाख्यस्य सरसश्च, अनुवर्त्तनम्—अनुसरणं, तस्मिन् चतुरा—निपुणा। राजहंसस्य—मरालस्य, राजश्रेष्ठस्य च, ("राजहंसस्तु कादम्बे कलहंसे नृपोत्तमे" इति मेदिनी)।

(३३) सकलेति।—सकलैः,—समग्रैः, लोकैः,—जनैः, अर्च्चितौ—सेवितौ, चरणौ—पादौ, अर्च्चिताः चरणाः,—बहुव्रीहिगर्भाद्यः यस्याः सा, ("चरणोऽस्त्री बहुवादौ मूले गोत्रे पदेऽपि च" इति मेदिनी) त्रयी—ऋग्यजुःसामाख्या वेदा इत्यर्थः, [अत्र "सङ्ख्याया—" (५।२।४२ पा०) इत्यादिना विहितस्य तयः "त्रिचतुर्भ्या—" (५।२।४३ पा०) इत्यादिना अयजादेशे स्यानिवद्भावात् "टिड्ढाणञ्—" (४।१।१५ पा०) इत्यादिना ङीपि रूपम्। "स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी" इत्यमरः]। धर्म्मस्य—विहितक्रियाकलापस्य, तज्जनितादृष्टस्य वा, धर्म्मोऽस्यास्तीति धर्म्मी, [अर्श आदित्वादचप्रत्ययः] तस्य, धर्म्मवत इत्यर्थः।

(३४) दिवानिशम्—अहोरात्रम्। [अत्र "विप्रतिषिद्धस्य—" (२।४।१२ पा०) इत्यादिना समाहारद्वन्द्वः]। अमुक्तेति।—अमुक्ता—न त्यक्ता, पार्श्वे स्थितिर्यया सा, पार्श्वचारिणीत्यर्थः। महामुनेः,—वसिष्ठस्य, राजर्षेश्च। अत्र "सती पार्श्वेतीव गुरुरस्य" इत्यादिषु सर्व्वत्र भिन्नैः पदैः अनेकार्थप्रत्यायनात् श्लेषसङ्करोपमाऽलङ्कारः।

(३५) हंसमयीव—हंसरूपिणीव, मदुमन्दगमनादिति भावः। परपुष्टमयीव

आलापेषु, चक्रवाकमयीव पतिप्रेक्षिणि, प्रावृषमयीव पयोधरोन्नतौ, मदिरामयीव विलासेषु, निधिमयीव अर्थसञ्चयेषु, वसुधारामयीव प्रसादेषु, कमलमयीव कोषसङ्ग्रहेषु,(३६)कुसुममयीव फलदानेषु, सन्ध्यामयीव वन्द्यत्वे, (३७) चन्द्रमयीव निष्कलत्वे, दर्पणमयीव प्रतिप्राणिग्रहणेषु, सामुद्रमयीव परचित्तज्ञानेषु, परमात्ममयीव व्याप्तिषु, स्मृतिमयीव पुण्यवृत्तिषु,

—कोकिलरूपिणीव, मधुरस्वरत्वादिति भावः। पतिप्रेक्षिणि—भर्तृप्रेक्षणे, विरहकातर्यात्तत्प्रेक्षणादिति भावः। प्रावृषमयीव—वर्षामयीव, पयोधरोन्नतौ—घनोन्नतौ, मेघोन्नतौ च। ("पयोधरः कोषकारे नारकेले घनेऽपि च। कणकर्मघयोः" इति मेदिनी)। विलासेषु—विभ्रमचेष्टितेषु। अर्थसञ्चयेषु—अर्थानां—धनानां, सञ्चयः,—सङ्ग्रहः तेषु, निधिमयीं—निधिः,—गूढं धनं, तन्मयीव, धनसञ्चयकारिणी इति भावः। वसुधारामयीव—वसूनां—धनानां, धारा—वर्षणं, तन्मयीव प्रसादेषु—अनुग्रहेषु, दयासु इत्यर्थः; एतादृशी दयावती, यत् सततं वसूनां अनुजाविभ्योऽर्थिभ्यश्च वितरतीति भावः। कमलमयीव—पद्मरूपिणीव, कोषसङ्ग्रहेषु—धनभाण्डाररक्षणेषु इत्यर्थः, कर्णिकासम्पूरणेषु च, बीजकोषग्रहणेषु इत्यर्थः।

(३६) कुसुममयीव—पुष्परूपिणीव, फलदानेषु—कृतस्य कर्मणः पुरस्कारादिदानेषु ब्रह्मादीनां शस्यादिवितरणेषु वा इति भावः; पुष्पानन्तरमेव फलस्योत्पत्तेश्च इत्याशयः। सन्ध्यामयीव—सन्ध्यारूपिणीव, वन्द्यत्वे—पूज्यत्वे; सन्ध्या यथा लोकैः पूज्यते, तथाऽसौ पूज्यते इति भावः।

(३७) चन्द्रमयीव—चन्द्ररूपिणीव, निष्कलत्वे—अकीर्णत्वे, अगर्व्यत्वे इत्यर्थः, ऊषरादित्वे च, शीतलप्रकृतित्वादिति भावः। दर्पणमयीव—आदर्शरूपिणीव, प्रतिप्राणिग्रहणेषु—प्राणिनं प्राणिनं प्रति इति प्रतिप्राणि, यद् यद्ग्रहणं—आवर्जनं, सर्वलोकवशीकरणम् इत्यर्थः, सर्वजनप्रतिबिम्बधारणं च, तेषु। सामुद्रमयीव—सामुद्रं—परचित्तज्ञानसाधनं समुद्रकृतं शास्त्रं, येन अभ्यस्य चित्तवृत्तिः ज्ञायते, तं, तद्रूपिणीव। परचित्तज्ञानेषु—परेषां चित्तस्य—मनसः, मानसोदितविषयस्येति भावः, ज्ञानेषु—बोधेषु; उपस्थितिचक्ष एव आश्रितानां परेषां मनोऽभिप्रेतकार्यसमाचरणादिति भावः। परमात्ममयीव—परमेश्वररूपिणीव, व्याप्तिषु—व्यापनभावेषु, सर्वेषु कार्येषु अभिनिवेशात्, सर्वलोकान्तर्यामित्वाच्च। स्मृतिमयीव—स्मरणरूपिणीव, पुण्यवृत्तिषु

मधुमयीव सम्भाषणेषु, अमृतमयीव हृद्यासु, वृष्टिमयीव भृत्येषु, निर्वृतिमयीव सखीषु, वेतसमयीव गुरुषु, गोत्रवृद्धिरिव विलासानां, प्रायश्चित्तशुद्धिरिव स्त्रीत्वस्य, आज्ञासिद्धिरिव मकरध्वजस्य, (३८) व्युत्थानबुद्धिरिव रूपस्य, दिष्टवृद्धिरिव रतेः, मनोरथसिद्धिरिव रामणीयकस्य, दैवसम्पत्तिरिव लावण्यस्य, वंशात्पत्तिरिवानुरागस्य, वरप्राप्तिरिव कान्तेः, सर्गसमाप्तिरिव सौन्दर्यस्य, आयतिरिव यौवनस्य, अनभ्रवृष्टिरिव वैदग्ध्यस्य, अयशःप्रमृष्टिरिव लक्ष्म्याः, यशःपुष्टिरिव चारित्रस्य, हृदय-

—पुण्यकर्मस्वव्यापारेषु, पुण्यानि कर्माणि न विस्मर्यन्ते बहुव्यापृततयाऽपीति भावः। मधुमयीव सम्भाषणेषु—मलापेषु, मधुरभाषित्वात् इति भावः। अमृतमयीव—सुधामयीव, जलमयीव च, हृद्यासु—मनोज्ञासु, सर्वेन्द्रियकरणे पाटवादिति भावः। ["हृद्यासु" इत्यत्र "हृद्यासु" इति पाठे,—हृषामनुभवन्तु, पिपासासु इत्यर्थः]। वृष्टिमयीव—वर्षणरूपिणीव, भृत्यवाञ्छातिरिक्तप्रदत्वादिति भावः। निर्वृतिमयीव—सुखमयीव, सखीषु—वयस्यासु; तासां सततसुखवितरणत्वादिति भावः। वेतसमयीव—वेतसरूपिणीव, निरन्तरनम्रत्वादिति भावः। अत्र सर्वत्र सप्तम्यन्तेषु "सप्तम्यधिकरणे च" (२।३।३६ पा०) इति विषयाधिकरणे सप्तमी] गोत्रवृद्धिरिव—वंशोन्नतिरिव, विलासानां—विभ्रमचेष्टितानां, विभ्रमातिशयविस्तारादिति भावः। प्रायश्चित्तशुद्धिः,—प्रायश्चित्तेन—चान्द्रायणादितपसा, शुद्धिः,—पूतत्वम्; स्त्रीत्वं हि पापमयं कातर्यादिदोषदूषितत्वात्, तत्तु अनया निजगुणैः अन्यथाकृत्य पावितम् उज्ज्वलितं वा इति भावः। मकरध्वजस्य—कामस्य, आज्ञासिद्धिः,—अस्याः तथा क्रमनीयत्वं, यथा एतद्दर्शने कस्यापि कामावेशः न शाम्यतीति कामस्य अव्याहताज्ञत्वमिति भावः।

(३८) व्युत्थानबुद्धिरिव—विशेषेण उत्थाने—अभ्युदये, बुद्धिरिव—प्रकृष्टेव। दिष्टवृद्धिः इव—भाग्योदय इव। रामणीयकस्य—रमणीयत्वस्य, [अत्र रमणीयशब्दात् "यीपधात्—" (५।१।१३२ पा०) इत्यादिना ष्यञि रूपम्]। सर्गसमाप्तिरिव—सृष्टिरेव इव, नान्दितः सौन्दर्यमिति भावः। आयतिरिव—आभोग इव, परिपूर्णतेत्यर्थः। अनभ्रवृष्टिरिव—विना मेघं वर्षणमिव, असम्भवत्वात् इति भावः। वैदग्ध्यस्य—निपुणतायाः; यथा अनभ्रवृष्टेः विस्मयोत्पादिका, तथा अस्याः वैदग्ध्यमपि आश्चर्य-

तुष्टिरिव धर्म्मस्य, सौभाग्यपरमाणुसृष्टिरिव प्रजापतेः; शमस्यापि शान्तिरिव, विनयस्यापि विनीतिरिव, आभिजात्यस्यापि अभिजातिरिव, संयमस्यापि संयतिरिव, धैर्य्यस्यापि धृतिरिव, विभ्रमस्यापि विभ्रान्तिरिव, यशोवती नाम महादेवी प्राणानां प्रणयस्य विस्रम्भस्य धर्म्मस्य सुखस्य च भूमिरभूत्, या अस्य वक्षसि नरकजितो लक्ष्मीरिव ललास।

निसर्गत एव च स (३९) नृपतिः आदित्यभक्तो बभूव। प्रतिदिनमुदये दिनकृतः स्नातः सितदुकूलधारी धवलकर्पट-प्रावृतशिराः प्राङ्मुखः क्षितौ जानुभ्यां स्थित्वा कुङ्कुमपङ्कानुलिप्ते मण्डलके पवित्रपद्मरागपात्रोन्निहितेन स्वहृदयेनेव सूर्य्यानुरक्तेन रक्तकमलषण्डेन अर्घ्यं ददौ; अजपञ्च जप्यं

जननमिति भावः। अयशःप्रमार्ष्टिः,—अयशसः, चपलत्वजनितस्येति भावः, प्रमार्ष्टिः,—प्रमार्जनम्, अपनयनमित्यर्थः, सा इव; अनपायिनी लक्ष्मीरियमिति भावः। यशःपुष्टिरिव—यशसां—कीर्त्तीनां, पुष्टिः,—पोषणं, सेव, अतीवसुचरित्वादिति भावः। आभिजात्यस्य—कौलीन्यस्य, अभिजातिः,—सत्कुलजातत्वं, सेव। महादेवी—महाराज्ञी। भूमिः,—भाजनम्। नरकजितः,—नरकासुरजेतुः, नारायणस्य इत्यर्थः, नरकं—निरयं, जितवानिति तथाभूतस्य च।

(३९) निसर्गतः,—स्वभावतः, आदित्यस्य भक्तः आदित्यभक्तः,—सूर्य्यभक्त इत्यर्थः, सूर्य्योपासक इति यावत्, [अदितिशब्दादपत्यार्थे "दित्यदित्या—" (४।१।८५ पा०) इत्यादिना ण्यप्रत्यये रूपम्] प्रकृतिः स्वानुकूलं भजते इति तेजस्विनः तेजस्विसमाराधनं समञ्जसम्। दिनकृतः,—सूर्य्यस्य। सितदुकूलधारी—परिहितशुभ्रवसनः। धवलेति। —धवलेन—श्वेतेन, कर्पटेन—वसनेन, प्रावृतम्—आच्छादितं, शिरो यस्य तथाभूतः, श्वेतौषधधारीत्यर्थः। कुङ्कुमेति।—कुङ्कुमस्य पङ्केन—द्रवेण, दृष्टकुङ्कुमेनेत्यर्थः, अनुलिप्ते—प्रलिप्ते, रञ्जितमिति यावत्, तस्मिन्। मण्डलके—मण्डलाकारे पद्मादिरूपे, सूर्य्यासनविधिविहिते इति भावः। पवित्रेति। पवित्रा—विशुद्धा, पद्मरागस्य पात्री—पद्मरागमणिनिर्मितं भाजनं, [अत्र पात्र्यादिभ्यश्छन्दसि" (ङ० ४ पा० १६९) इति स्वनप्रत्यये "वनो र च" (४।१।७ पा०) इति ङीपि रूपम्] तस्मात् निहितं—रचितं तेन। स्वहृदयेनेव—स्वस्य—आत्मनः, हृदयेनेव—मनसेव, अभि-

सुचरितः प्रत्युषसि मध्यन्दिने दिनान्ते च अपत्यहेतोः प्राध्वं प्रयतेन मनसा जञ्जपूको मन्त्रमादित्यहृदयम्।

(४०) भक्तजनानुरोधविधेयानि तु भवन्ति देवतानां मनांसि; यतः स राजा कदाचित् ग्रीष्मसमये यदृच्छया सितकरकरसितसुधाधवलस्य हर्म्यस्य पृष्ठे सुष्वाप। पार्श्वे चास्य द्वितीयशयने देवी यशोवती शिश्ये। (४१) परिणत-

प्रयत्नेन इति भावः। सूर्यानुरक्तेन—सूर्यप्रियेण। रक्तकमलषण्डेन—रक्तोत्पलनिचयेन, ("अब्जादिकदम्बे षण्डसस्त्रियाम्" इत्यमरः) अर्च्यां—पूजाम्। जप्यं—जपनीयम्। सुचरितः,—सुशीलः, प्रभाकरवर्द्धन इति भावः। प्रत्युषसि—प्रभाते। मध्यन्दिने—मध्याह्ने। दिनान्ते—सायंकाले। अपत्यहेतोः,—पुत्रार्थम्। प्राध्वं—नम्रं यथा तथा, [अव्ययमेतत्। "प्राध्वन् प्रणते चातिदूरवर्त्मनि वन्धने" इति मेदिनी]। प्रयतेन—अभिनिविष्टेन। जञ्जपूकः,—पुनःपुनर्जपपरायणः। ["यजजपदशां यङः" (३।२।१६६ पा०) इति ऊकप्रत्यये रूपम्]। मन्त्रम्—"अर्कन् मूर्धिविन्यस्य ललाटे तु रविं न्यसेत्" इत्यादि न्यासपूर्वकम् "आदित्यो मन्त्रसंयुक्तः आदित्यो भुवनेश्वरः। आदित्य त्रापरो देवः त्रादित्यः परमेश्वरः॥" इत्यादि भविष्यपुराणोक्तम्, आदित्यहृदयम्—आदित्यस्य—सूर्यस्य, हृद्—चित्तम्, अयते—गच्छति इति आदित्यहृदयं,—सूर्यचित्तप्रियमिति यावत्, आदित्यप्रीतिकरमिति भावः।

(४०) भक्तेति।—भक्तजनानां—सेवकानामित्यर्थः, अनुरोधस्य—निर्बन्धस्य, विधेयानि—वश्यानि; अनन्यभक्तिभावसुलभाः देवप्रसादाः इति भावः। यदृच्छया—स्वेच्छया, [अत्र या इच्छा, इति विग्रहे "मयूरव्यंसकादयश्च" (२।१।७२ पा०) इति निपातनात् समासः] सितेति।—सितकरः,—चन्द्रः, तस्य करः,—किरणाः, तद्वत् सिताभिः,—शुभ्राभिः, सुधाभिः,—चूर्णप्रलेपैरिति यावत्, धवलं—शुभ्रं तस्य; यद्वा,—सितकरकरासतोऽसौ सुधाधवलस्य तथाभूतस्य, विप्रदचन्द्रप्रभोद्भासितस्य सुधाधवलस्य च इति भावः। हर्म्यस्य—प्रासादस्य इति यावत्, ("हर्म्यादि धनिनां वासः प्रासादो देवभूभुजाम्" इत्यमरवचनात्)। पृष्ठे—उपरिभागे। सुष्वाप—निद्रौ। द्वितीयशयने—अपरशय्यायाम्। "द्वितीयशयने" इत्यनेनास्य संयमित्व प्रकटीकृतम्; "नाश्नीयात् भार्यया सार्द्धं न च सुप्यात् तया समम्" इति स्मरणात्। शिश्ये—शयितवती।

(४१) "परिणत—" इत्यादौ "देवी यशोवती.....उदतिष्ठत्" इत्युत्तर-

प्रायायान्तु श्यामायाम्, आसन्नप्रभातवेलाविलुप्यमानलावण्ये लिलम्बिषमाणे सौदत्तेजसि तारकेश्वरे, (४२) कराग्रस्पृष्ट-कुमुदिनीप्रमोदजन्मनि शशधरस्वेदे इव गलति अतिशीतले अवश्यायपयसि, (४३) मधुमदमत्तप्रसुप्तसीमन्तिनीनिश्वास-हृतेषु सङ्क्रान्तमदेष्विव घूर्णमानेषु अन्तःपुरप्रदीपेषु, (४४) राजनि च विमलनखप्रतिविम्बिताभिः संवाह्यमानचरणे इव तारकाभिः, विस्रब्धप्रसारितैः दिगङ्गनानामिवार्पितैरङ्गै-र्मधुसुगन्धिभिः स्वहस्तकमलतालवृन्तवातैरिव श्वसितैर्मुखश्रिया

न्वयः। अत्र "उदीचामुर्ध्वकर्मणि" (१।३।२४ पा०) इति अनूर्ध्वदृष्यात्, अयनात् उत्थानरूपार्थे नात्मनेपदप्राप्तिः] परिणतप्रायायाम्—अवसितप्रायायां, श्यामायां—रजन्याम्। ("श्यामा स्याच्छारिवा निशा" इत्यमरः)। आसन्नेति।—आसन्नया—आपतन्त्येत्यर्थः, प्रभातवेलया—प्रत्यूषसमयेन, विलुप्यमानं—क्षीयमाणं, लावण्यं—कान्तिर्यस्य तथाभूते। लिलम्बिषमाणे—लम्बितुमिच्छति, पश्चिमायां दिशीति शेषः। सौदत्तेजसि—क्षीयमाणरश्मौ। तारकेश्वरे—तारारात्रौ, चन्द्रमसि इत्यर्थः।

(४२) करेति।—कराग्रैः,—किरणाग्रैः, स्पृष्टायां—कृतस्पर्शायां, कुमुदिन्यां—कैरविण्यां, यः प्रमोदः,—सन्तोषजनितप्रीतिः, तस्मात् जन्म—उत्पत्तिर्यस्य तथोक्ते। शशधरस्वेदे इव—चन्द्रघर्म्मे इवेत्युत्प्रेक्षा, गलति—पतति, स्रवतीत्यर्थः। अवश्यायपयसि—तुषारजले, ("अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्" इत्यमरः)।

(४३) मधुरिति।—मधुमदेन—मद्यपानजनितोल्लासेन, मत्तानां—जीवानां, प्रसुप्तानां—निद्रितानां, सीमन्तिनीनां—नारीणां, निश्वासैः, हृताः,—सञ्चालिताः तेषु, सङ्क्रान्तमदेष्विव—प्राप्तमद्यपानजनितावस्थाविशेषेष्विवेत्युत्प्रेक्षा; तासां प्रमदानां सङ्क्रान्तिरिति भावः। घूर्णमानेषु—भ्राम्यमाणेषु।

(४४) राजनि—नरेन्द्रे। विमलेति।—विमलेषु—निर्म्मलेषु, स्वच्छेषु इत्यर्थः, नखेषु, पादनखेष्विति भावः, प्रतिबिम्बिताः,—प्रतिफलिताः ताभिः। तारकाभिः,—नखैः। संवाह्यमानेति।—संवाह्यमानौ—संसेव्यमानौ, सेव्यमानौ इत्यर्थः, चरणौ यस्य तथाभूते इवेत्युत्प्रेक्षा। विस्रब्धेति।—विस्रब्धं—विश्वस्तं यथा तथा, प्रसारितानि—विस्तारितानि तैः। अङ्गैः,—अवयवैः, [अत्र "सप्तम्या—" (१।४।८० पा०) इत्या-

वीज्यमाने, विमलकपोलस्थलस्थितेन सितकुसुमशेखरेणेव रतिकेलिकचग्रहलम्बितेन प्रतिमाशशिबिम्बेन विराजिते, स्वपति, देवी यशोवती महसैव,—"आर्यपुत्र! परित्रायस्व परित्रायस्व" इति भाषमाणा भूषणरवेण व्याहरन्तीव परिजनम् उत्कम्पमानाङ्गयष्टिः उदतिष्ठत्।

अथ तेन सर्व्वस्यामपि पृथिव्याम् (४५) अश्रुतपूर्वेण, किमुत देवीमुखे, "परित्रायस्व" इति ध्वनिना दग्ध इव अवणयोः एकपद एव निद्रां तत्याज राजा। शिरोभागाच्च कोप-

---

दिना इत्यभूतलक्षणे तृतीया] मधुसुगन्धिभिः,—मधु—मकरन्दं, तद्वत् सुगन्धिभिः, —सुरभिभिः। मुखश्रिया—वदनलक्ष्म्या। विमलेति।—विमलं—स्वच्छं, कपोलस्थलं —गण्डदेशः, तस्मिन् स्थितं—प्रतिफलितं, तेन। सितकुसुमशेखरेणेव—श्वेतपुष्पशिरोमाल्येनेव। रतीति।—रतिकेलिः,—सुरतलीला, तत्र यः कचग्रहः,—केशाकर्षणं, तेन लम्बितं, तेन। प्रतिमाशशिबिम्बेन—शशिप्रतिबिम्बेन इत्यर्थः। स्वपति—निद्राति, राजनीति पूर्वेणान्वयः। भूषणरवेण—अलङ्कारशिञ्जितेन; भीत्या अङ्गवेपनेन भूषणरवः समुदितः इति भावः। व्याहरन्तीव—कथयन्तीव, स्वभयमिति शेषः; यद्वा,—आह्वयन्तीव। परिजनं—सखीजनं, भृत्यजनं वा। उत्कम्पमानाङ्गयष्टिः,—यष्टिः,—अतिशयेन, कम्पमाना—वेपमाना, अङ्गयष्टिः,—क्षीणदेह इत्यर्थः, यस्याः तथाभूता।

(४५) अश्रुतपूर्वेण—पूर्व्वमश्रुतेन; तादृगे राजन्वति देशे प्रजानां तथाभूतविपत्पातस्य असम्भवादिति भावः। [अत्र "सुपो—" (२।४।७१ पा०) इत्यादिवार्त्तौ "भूतपूर्वे चरट्" (५।३।५३ पा०) इति निर्देशात् पूर्व्वनिपाते भूतपूर्व्ववत् सामान्यात् अश्रुतपूर्व्व इति सिद्धिः] यद्वा,—अश्रुतः पूर्व्वः,—प्रागप्यविभावः यस्य तथाविधेन, प्राचीनैरप्यश्रुतोत्पत्तिकेन इत्याशयः। किमुत—किं पुनः, यस्य राज्ये साधारणप्रजानामपि किमपि भयकारणं नास्ति, तस्य अन्तःपुरे स्वसहिष्णोः भयकारणस्य अतीव असम्भाव्यत्वमेवेति भावः। दग्ध इव—ज्वलित इव। एकपदे—तत्काले एव, सद्य एवेत्यर्थः, ("एकपदं तत्काले नपुंसकम्·····" इति मेदिनी) अकस्मादेव वा। "शिरोभागाच्च" इत्यादौ "वेगेन उत्पपात" इति उत्तरेण सम्बन्धः; तमेव विशिनष्टि, शिरोभागादिति।—शिरोभागात्—शीर्षदेशात्। कोपेति।—कोपेन—क्रोधेन,

कम्पमानदक्षिणकराकृष्टेन कर्णोत्पलेनेव निर्गच्छता अच्छधारेण धौतासिना सीमन्तयन्निव निशाम्, ४६) अन्तरालव्यवधायकम् आकाशम् इव उत्तरीयांशुकं विक्षिपन् वामकरपल्लवेन, करविक्षेपवेगगलितेन हृदयेनेव भयनिमित्तान्वेषिणा भ्रमता दिक्षु कनकवलयेन विराजमानः, (४७) सत्वरावतारितवामचरणाक्रान्तिकम्पितप्रासादः, पुरः पतितेन असिधारागोचरगतेन शशिमयूखखण्डनेव खण्डितेन हारेण राजमानः, लक्ष्मीचुम्बनलग्नताम्बूलरसरञ्जिताभ्यामिव निद्रया कोपेन च अतिलोहिताभ्यां लोचनाभ्यां पाटलयन् पर्य्यन्तान्

कम्पमानः,—वेपमानः, दक्षिणः,—याम्यः, करः,—हस्तः, तेन आकृष्टः,—आच्छिन्नः तेन। निर्गच्छता—निर्गलता। अच्छधारेण—निर्मलधारेण। धौतासिना—निशितकरवालेन, सीमन्तयन्निव—द्विधा कुर्व्वन्निव। असिप्रभया क्षितयः स्थानस्य प्रकाशीभूतत्वात्, समन्तादन्धकारहतत्वाच्च निशायाः सीमन्तीकरणत्वमवगन्तव्यम्।

(४६) अन्तरेति।—अन्तरालस्य—मध्यस्य, व्यवधायकं व्यवधानकारणमित्यर्थः, आच्छादकमिति यावत्। आकाशमिवेति।—सूक्ष्मत्वात् स्वच्छत्वाच्च उज्ज्वलनीलाभासत्वाद्वा तथा बोध्यम्। उत्तरीयांशुकम्—उत्तरासङ्गं, वामकरपल्लवेन विक्षिपन्—पर्य्यस्यन्, अपसारयन् इत्यर्थः। करेति।—करस्य विक्षेपः,—प्रसारणमित्यर्थः, तस्य वेगः,—रयः, तेन गलितं—निःसृतं तेन। भयेति।—भयस्य निमित्तं—कारणम्, अन्विष्यतीति तथोक्तेन। कनकवलयेन—काञ्चनकटकेन।

(४७) सत्वरेति।—सत्वरं—सवेगम्, अवतारितेन—विक्षिप्तेन, वामचरणेन या आक्रान्तिः,—आघातः, तया कम्पितः,—चालितः, प्रासादः,—हर्म्येण तथाभूतः। असिधारागोचरगतेन—असिधारायाः गोचरं—विषयं, गतः,—प्राप्तः, तेन, असिधाराप्रतिबिम्बितेनेत्यर्थः। शशिमयूखखण्डनेव—चन्द्रकिरणशकलेनेव, औज्ज्वल्यादिति भावः; खण्डितेन—छिन्नेन। राजमानः,—शोभमानः। लक्ष्मीति।—लक्ष्म्याः,—कर्तृभूतायाः राजलक्ष्म्याः, चुम्बनं, तेन लग्नः,—संसक्तः, यः ताम्बूलरसः,—पर्णरागः, तेन रञ्जिताभ्याम् इव—चर्चिताभ्यामिवेत्युत्प्रेक्षा। अतिलोहिताभ्याम्—अतिरक्ताभ्याम्। पाटलयन्—ईषद्रक्तीकुर्व्वन्। आशानां—दिशां, पर्य्यन्तान्—प्रान्तदेशान्।

आशानाम्, (४८) आबद्धान्धकारया विपताकया भ्रुकुट्या पुनरिव त्रियामां परिवर्त्तयन्,—"देवि! न भेतव्यं, न भेतव्यम्" इत्यभिदधानो वेगेन उत्पपात। सर्व्वासु च दिक्षु विक्षिप्तचक्षुः यदा न अद्राक्षीत् किञ्चिदपि, तदा पप्रच्छ तां भयकारणम्।

अथ (४९) गृहदेवतास्विव प्रधावितासु यामिकविलासिनीषु, प्रबुद्धे च समीपशायिनि परिजने, शान्ते च हृदयोत्कम्पकारिणि साध्वसे, सा ममभाषत,—"आर्य्यपुत्र! (५०)जानामि, स्वप्ने भगवतः सवितुर्मण्डलात् निर्गत्य द्वौ कुमारकौ तेजोमयौ, बालातपेनेव पूरयन्तौ दिग्भागान्, वैद्युतम् इव जीवलोकं कुर्व्वाणौ, मुकुटिनौ, कुण्डलिनौ, अङ्गदिनौ, कवचिनौ, गृहीतशस्त्रौ, इन्द्रगोपकरुचा रुधिरेण धात्रा स्नातौ,

(४८) आबद्धान्धकारया—आपूर्णतिमिरया; सङ्कीर्णीत्यर्थः इति भावः। ["आबद्धान्धकारया" इत्यत्र "बद्धान्धकारया" इति पाठेऽपि,—स एवार्थः]। विपताकया—रेखावशेण। त्रियामां—प्रहरत्रितयवतीं रजनीमित्यर्थः। परिवर्त्तयन्—प्रकारान्तरेण उपस्थापयन्नित्यर्थः। विक्षिप्तचक्षुः,—प्रसृतनेत्रः, पातितनयन इत्यर्थः।

(४९) गृहदेवतासु इव—गृहाधिष्ठदेवीषु इवेत्युत्प्रेक्षा, प्रधावितासु—आपतितासु, आत्तनादत्वमादिति भावः। यामिकविलासिनीषु—प्रहरपालिनीषु, अत्युपरविकासु नारीषु इति यावत्। ["यामिकविलासिनीषु" इत्यत्र "यामकिनीषु" इति पाठे,—यामः,—प्रहरः एव यामकः, तत्र तिष्ठन्ति याः ताः यामकिन्यः, तासु, प्रहरिणीषु इत्यर्थः। [अत्र "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुवादयः॥" इति नित्ययोगेऽर्थे "अत—" (५।२।११५ पा०) इति इनि ङीपि रूपम्] प्रबुद्धे—जागरिते। साध्वसे—भये, ("भीतिर्भीः साध्वसं भयम्" इत्यमरः)।

(५०) जानामि—मन्ये। तेजोमयौ—तेजःपूर्णौ। बालातपेनेव—अभिनवसूर्य्यमयूखेनेव, पूरयन्तौ—आच्छादयन्तौ। वैद्युतमिव—तडिन्मयमिव। जीवलोकं—जगत्। मुकुटिनौ—किरीटधारिणौ। कुण्डलिनौ—कुण्डलालङ्कृतौ। अङ्गदिनौ—केयूरशोभितौ। कवचिनौ—वर्म्मधरौ। इन्द्रगोपकरुचा—इन्द्रगोपकः,—वर्षाकालिकरक्तवर्णकीटविशेषः, तद्वत् रुक्—प्रभा यस्य तथाभूतेन। धात्रा—स्वीयतेजसा, प्रभया

उन्मुखेन उत्तमाङ्गघटमानाञ्जलिना जगता निखिलेन प्रणम्यमानौ, कन्यया एकया च चन्द्रमूर्त्येव सुषुम्णारश्मिनिर्गतया अनुगम्यमानौ, वितितलमवतीर्णौ, तौ च मे विलपन्त्याः शस्त्रेण उदरं विदार्य्य प्रवेष्टुम् आरब्धौ ; प्रतिबुद्धास्मि च आर्य्यपुत्रं विक्रोशयन्ती वेपमानहृदया" इति।

एतस्मिन्नेव च कालक्रमे राजलक्ष्म्याः प्रथमालापः (५१) प्रथयन्निव स्वप्नफलम् उपतीरणं ररास प्रभातशङ्खः। भाविनीं भूतिमिव अभिदधाना दध्वनुः अमन्दं दुन्दुभयः। चकाण

इति यावत्, उपलक्षितौ इति भावः, ["धात्रा" इति पाठः पुस्तकान्तरे न दृश्यते] अत एव कधिरेण—रक्तेन। स्नातौ—अभिषिक्तौ, इवेति शेषः ; यद्वा,—कधिरेण—रक्तवर्णेन, इन्दोरुपकरणत्वात् धात्रा—स्वदेहकिरणेन, स्नातौ। उन्मुखेन—ऊर्ध्वमुखेन। उत्तमेति।—उत्तमाङ्गे—शिरसि,("उत्तमाङ्गं शिरः शीर्षम्" इत्यमरः) घटमानः,—मिलन्, अञ्जलिः यस्य तेन, शिरोवद्धाञ्जलिनेति यावत्। जगता—जगदासिञ्जनेनेत्यर्थः। निखिलेन—समस्तेन। प्रणम्यमानौ—अभिवन्द्यमानौ। चन्द्रमूर्त्येव—चन्द्रवदुचिरविग्रहत्वेन दृश्यमानया इत्यर्थः, चन्द्रिकामुद्भासितकलेवरया इति भावः। सुषुम्णारश्मिनिर्गतया—सुषुम्णाख्योऽमृतमयो रविरश्मिः, तस्मात् निर्गता—निःसृता तया। [सर्व्वेष्वेव मुद्रितपुस्तकेषु "सुषुम्णरश्मि" इति पाठो विद्यते, स तु लिपिकरप्रमादात् प्रथममुद्रितपुस्तके स्थानमलभत, अनन्तरं तमेवादर्शं कृत्वा सर्व्वेष्वेव गड्डलिकाप्रवाहन्यायेन तथैव अवर्त्तत इति मन्यामहे ; वस्तुतस्तु सुषुम्णारश्मि" इत्येव प्रकृतः पाठः, शास्त्रेषु सर्व्वत्रैव सुषुम्णा इति आकारान्तस्यैव प्रयोगदर्शनात् "सुषु इति अव्यक्तं शब्दं ध्मायति यत्र इति व्युत्पत्त्या ध्माधातोः कप्रत्ययेन निष्पन्नत्वाच्च आकारान्त एव युज्यते, न तु अकारान्तः इति सुधीभिः विभाव्यम्]। तौ च—कुमारावित्यर्थः। प्रवेष्टुम्, उदरमेवेति शेषः। प्रतिबुद्धा—जागरिता। विक्रोशयन्ती—आर्त्तस्वरेण आकारयन्ती।

(५१) प्रथयन्निव—विस्तारयन्निव। उपतीरणं—तीरे इति उपतीरणं, ["अव्ययं—" (२।१।६ पा०) इत्यादिना विभक्त्यर्थेऽव्ययीभावः] तीरसमीपे वा ; ररास—दध्वान। प्रभातशङ्खः,—प्रातःकाले वाद्यमानः शङ्खः। भाविनीम्—आगामिनीं, भूतिम्—अभ्युदयम्। अभिदधानाः,—कथयन्तः, सूचयन्त इत्यर्थः, अमन्दं—

कोणाहता घानन्दादिव प्रत्यूषनान्दी। जयजयेति प्रबोधमङ्गल-पाठकानाम् उच्चैर्वाचोऽश्रूयन्त। पुरुषस्य वल्लभतुरङ्गमन्दुरा-मन्दिरे मन्दमन्दं सुप्तोत्थितः मक्षीनां कृतमधुरहेषारवाणां पुर-स्रोतस्तुषारसलिलशीकरं किरन् मरकतहरितं यवसं वक्त्रापर-वक्त्रे ववाठ,—

"निधिस्तत्कविकारेण मध्यगः स्मरता धात्रा।
शुभागमो निमित्तेन स्पष्टमाख्यायते लोके॥ ३॥

मक्षीरम्। दन्दुभयः,—भेर्यः। चक्राम—दध्वान [कणतेः भौवादिकस्य लिटि रूपम्]। कोणाहता—कोणः,—वीणादिवादनदण्डः, तेन आहता—ताडिता। प्रत्यूषनान्दी—प्रभातभेरीवाद्यविशेषः। प्रबोधेति।—प्रबोधे—जागरणकाले, राज्ञ इति शेषः, मङ्गलपाठकानां—माङ्गलिकस्तोत्रपाठिनाम्। पुरुषस्य—कथित् अश्वपाल इति भावः। वल्लभेति।—वल्लभानां—प्रियाणां, तुरङ्गाणाम्—अश्वानां, मन्दुरा—वाजिशाला, [मदिधातोः "मन्दिवाञ्जिमदिपचतिचटिताडिभ्य उरच्" (उ० १ पा० २९ सू०। इति उरचि रूपम्] एव मन्दिरं तस्मिन्, मदिधातोः "दृधिमदि—" (उ० १ पा० ५२ सू०) इत्यादिना किरच्चि प्रत्यये रूपम्। "वाजिशाला तु मन्दुरा" इत्यमरः]। मन्दमन्दं—अनैः,अनैः। मक्षीणाम्—अश्वानाम्। ("घोटकेऽपीति तुरग ..... । .....हयमैन्यवसप्रयः" इत्यमरः)। कृतेति।—कृतः मधुरः,—मक्षीणाम्, हेषारवः,—ध्वनिविशेषः, यैः तथोक्तानाम्। ("...अश्वानां हेषा क्रेषा च निःस्वनः" इत्यमरः) पुरः,—अग्रतः। स्रोतदिति।—स्रोतस्तः,—निःसरन्तः, तुषारसलिलानां—हिमजलानां, शीकराः,—बिन्दवः यस्मात् तथोक्तम्। मरकतहरितं—मरकतवत्—"पाण्णा" इत्याद्यहरिद्वर्णमणिविशेषवत्, हरितः,—श्यामवर्णः तम्। [मरकतशब्दः मरकपूर्वकात् तृधातोः क्तप्रत्यये सिद्धः, "अन्येष्वपि दृश्यते" (३।२।१०१ पा०) इति सूत्रे "अपि ग्रहः सर्वोपाधिव्यभिचारार्थः, तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्" इति हृत्तेः]। यवसं—घासं, ("घासो यवसम्" इत्यमरः) किरन्—विक्षिपन्, ददद्दित्यर्थः, वक्त्रापरवक्त्रे—वक्त्रस्य अपरवक्त्रश्च ते, तदाख्ये भावाङ्गे।

अथ प्रभाते सुप्तोत्थितस्यास्य यदृच्छया पठिताभ्यां श्लोकाभ्यां राज्ञः भाविशुभ-लाभं सूचयति, निधिरिति।—लोके—जगति, तत्कविकारेण—तत्या—धात्र्या, विकारेण—विकृतभावेन, आख्यानं परिणाहोन्नतानामधोमुखत्वादिरूपेण इत्यर्थः, (भूम्याः अधः यत्र निधिः वर्तते, तत्रत्याः द्रुमाः अधोमुखशाखामूलभाजो भवन्ति इति

अरुण इव पुरःसरो रविं पवन इवातिजवो जलागमम्।
शुभमशुभमथापि वा नृणां कथयति पूर्वनिदर्शनोदयः" ॥ ४ ॥

नरपतिस्तु तच्छ्रुत्वा प्रीयमाणेन अन्तःकरणेन तामवादीत्,—"देवि! (५२) किं मुहोऽवसरे विषीदसि? सन्तु ताः ते गुरुजनाशिषः, पूर्णा नो मनोरथाः, परिगृहीतासि कुलदेवताभिः, प्रसन्नस्ते भगवान् अंशुमाली न चिरेणैव अतिगुणवदपत्यवयलाभेन आनन्दयिष्यति भवतीम्" इति अवतीर्य

प्रसिद्धिः); निधिः,—अधःस्थितरत्नविशेषः, स्फुरता—विसरता, धात्रा—तेजसा, प्रभवेति यावत्, सन्मणिः,—सद्रत्नं, तथा निमित्तेन—सुलक्षणेन निदर्शनेन, शुभागमः,—मङ्गलागमः, स्पष्टं—स्फुटम्, आख्यायते—सूच्यते। अत्र प्रस्तुतस्य शुभागमस्य निमित्तेन, अप्रस्तुतस्य च निधेः तद्विकारेण, तथा सन्मणेरपि स्फुरता धात्रा, स्पष्टाख्यानरूपैककियाऽभिसम्बन्धात् मालादीपकमलङ्कारः। वक्त्रं यथा,—"वक्त्रं नाथानसौ स्यातामम्बेयौंऽनुष्टुभि ख्यातम्" इति हृत्तरत्नाकरधृतलक्षणात् ॥ ३ ॥

अरुण इति।—पूर्वनिदर्शनोदयः,—प्रागेव शुभलक्षणाविर्भावः, पुरःसरः,—अग्रोदित इति यावत्, अरुणः,—सूर्यसारथिः, रविं—सूर्यमिव, अतिजवः,—अतिवेगवान्, पवनः,—वायुः, जलागममिव—वारिवर्षणमिव, नृणां—मानवानां, शुभं—मङ्गलम्, अथापि वा अशुभम्—अमङ्गलं, कथयति—आचष्टे, सूचयतीत्यर्थः। अत्र पूर्वनिदर्शनोदयेन सह अरुणस्य तथा पवनस्य च अवैधर्म्यसाम्यप्रतीतेः मालादीपकालङ्कारः। अपरवक्त्रं यथा,—"अयुजि नयरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ" इति लक्षणात् ॥ ४ ॥

(५२) [पुस्तकान्तरे "किम्" इति पाठो न विद्यते]। मुहोऽवसरे—आनन्दसमये इत्यर्थः। विषीदसि—विषण्णा भवसि। सन्तु ताः,—सन्त्वाः, सिद्धा इति यावत्। पूर्णाः,—सफलाः। नः,—अस्माकम्। कुलदेवताभिः,—इष्टदेवताभिः, परिगृहीतासि—अनुकम्पितासि, अनुकम्पालेन स्वीकृतासीत्यर्थः; अन्यथा कथं सौभाग्यदुर्लभाभीष्टफलप्राप्तिसूचकस्वप्नावगमः इति भावः। अंशुमाली—सूर्यः। न चिरेणैव—अविलम्बेनैव। अतिगुणवदिति।—अतिगुणवतां—अतिगुणशालिनाम्, अपत्यवयसां—पुत्रयोः, युवाभ्यां इत्यर्थः, लाभेन। ["इति" इत्यनन्तरम् "अभिधाय" इति शेषः, ग्रन्थान्तरे दृश्यते; तथा पाठे "अवादीत्" इति क्रिययाऽन्वितस्य सम्बन्धस्य

च यथाक्रियमाणाः क्रियाश्चकार ; यशोवती अपि तुतोष तेन पत्युः भाषितेन।

(५३) ततः समतिक्रान्ते कस्मिंश्चित् कालांशे देव्याश्च यशोवत्यां देवो राज्यवर्धनः प्रथममेव सम्बभूव गर्भे। गर्भस्थितस्यैव च यस्य यशसेव पाण्डुतामादत्त जननी। (५४) गुणगौरवक्लान्तेव गात्रमुद्वोढुं न शशाक। कान्तिविसरामृतरसदृप्तेव आहारं प्रति पराङ्मुखी बभूव। शनैः शनैः उपचीयमानगर्भभरालसा च गुरुभिः वारितापि वन्दनाय कथमपि सखीभिर्हस्तावलम्बेन अनीयत। विश्राम्यन्ती शालभञ्जिकेव समीपगतस्तम्भभित्तिषु अलक्ष्यत। (५५) कमलालोभनिलीनैः

पुनरभिधाय इत्यनेनान्वयः क्रियापुनरुक्तदोषापादकः इति न सदाहृतः इति श्रेयम्]। यथाक्रियमाणाः,—नित्यं सम्पाद्यमाना इत्यर्थः।

(५३) समतिक्रान्ते—समतीते। कालांशे—समयविभागे। सम्बभूव—सम्भूतः, सञ्जात इत्यर्थः ; स्वतेजस आधानादिति भावः। यस्य—राज्यवर्धनस्य, आत्मन इति भावः, "आत्मा वै जायते पुत्रः" इति श्रुतेः। जननी—यशोवती, पाण्डुतां—पाण्डुवर्णत्वम्, आदत्त—अयाच, पाण्डुवर्णा अभूदित्यर्थः।

(५४) गुणेति।—गुणानां—दयादाक्षिण्यादीनां, गर्भस्थात्मकस्य इति भावः, गौरवेण—अतिशयगुरुत्वेन, क्लान्तेव—खिन्नेव इत्यर्थः। उद्वोढुं—धारयितुमित्यर्थः, न शशाक—न चक्रमे, कथञ्चिद्धारयामास इति भावः। कान्तीति।—कान्तीनां—लावण्यानां, विसरः,—प्रसर एव, अमृतरसः,—पीयूषास्वादः, सुधास्वादजन्यानन्दसन्दोह इतियावत्, तेन दृप्ता इव—लब्धदर्पाः इव। पराङ्मुखी—विमुखी, बभूव—अरुचिमती जाता इत्यर्थः। उपचीयमानेति।—उपचीयमानः,—वर्द्धमानः, यो गर्भभरः,—गर्भस्य भारः, तेन अलसा—मन्थरा। वारिताऽपि—निषिद्धाऽपि। वन्दनाय—प्रणामादिरूपार्चनाय, गुरुभिरिति शेषः, [अत्र "क्रियार्थो—"(२।३।१४ पा०) इत्यादिना चतुर्थी]। हस्तावलम्बेन—हस्तधारणेन। विश्राम्यन्ती—विश्रामार्थं तिष्ठन्ती, शालभञ्जिकेव—पुत्तलिकेव, समीपगतस्तम्भभित्तिषु—सान्निध्यतस्थूणाकुड्येषु, अलक्ष्यत—अदृश्यत।

(५५) कमलेति।—कमलेषु लोभः,—चरण्यौ: कमलमुद्रा लोभ इत्यर्थः, [अत्र चरण्यौः कमलमालं सामानिकस्थनप्रतिलोभापितम् इति मानिमानखङ्गारात्-

अलिभिरिव हृतौ उद्वर्तुं नाशकत् चरणौ। मृणाललोभेन च चरणनखमयूखलग्नैः भवनहंसैरिव सञ्चार्यमाणा मन्दमन्दं बभ्राम। (५६) मणिभित्तिपातिनीषु प्रतिमास्वपि हस्तावलम्बनलोभेन प्रसारयामास करकमलं, किमुत सखीषु!! (५७) माणिक्यस्तम्भदोधितीः अपि आलम्बितुम् आचकाङ्क्ष, किं पुनर्भवनलताः!! समादेष्टुमपि असमर्था आसीत् गृहकार्य्याणि, कैव कथा कर्त्तुम्!! आस्तां नूपुरभारखेदितं चरणयुगलं, मनसाऽपि न उदसहत सौधम् आरोढुम्। अङ्गान्यपि न अशक्नोत् धारयितुं, दूरे भूषणानि। चिन्तयित्वाऽपि क्रीडापर्व्वताधिरोहणम् उत्कम्पितस्तनी तत्रास। प्रत्यूत्थानेषु उभयजानुशिखर-

माणिक्यस्तम्भः,] तेन निर्मलैः,—संसक्तैः, चरणयोरिति भावः, अलिभिः,—भृङ्गैः, हृतौ इव—आकृष्टौ इव। मृणाललोभेन—मृणालानि एतानीति धिया यो लोभः तेन; अत्रापि अलङ्कारः पूर्ववाक्यवत् बोध्यः। चरणेति।—चरणयोः नखाः, तेषां मयूखेषु—किरणेषु, लग्नाः,—संसक्ताः तैः। सञ्चार्यमाणा इव—सञ्चाल्यमाना इव, भ्रमणपद्धतिः गृहवर्त्तिहंसादेवानया शिक्षितेति हृदयम्। अत्र सर्वत्र वाच्योत्प्रेक्षा इति ज्ञेयम्।

(५६) मणीति।—मणिभित्तिषु—मणिमयकुड्येषु, पतन्तीति पातिन्यः तासु, प्रतिमासु—प्रतिबिम्बेषु, हस्तावलम्बनलोभेन—हस्तधारणाशया। किमुत—किं पुनः। एवमर्थेऽपि। अत्र अतस्मिन् तद्बुद्धिरूपत्वात् भ्रान्तिमदलङ्कारः।

(५७) माणिक्येति।—माणिक्यस्य—रत्नविशेषस्य, स्तम्भाः,—स्तूनाः, माणिक्यनिर्मितस्तम्भा इत्यर्थः, तेषां दोधितयः,—मयूखाः ताः। भवनलताः,—गृहाङ्गनवल्लिनीः; वल्लीरित्यर्थः। समादेष्टुम्—आज्ञप्तुम्। आस्तां—तिष्ठतु। नूपुरेति।—नूपुरयोः,—मञ्जीरयोः, भारेण खेदितं—सञ्जातखेदम्। उदसहत—उत्साहमकरोत्। सौधं—हर्म्योपरितलमित्यर्थः; आरोढुमित्यत्रापि कर्म नाशकोत्, किं पुनरयमाशयः आरोहणमिति भावः। दूरं—किमुतेत्यर्थः; दूरं भूषणानि आसतां इति वाऽर्थः। क्रीडेति।—क्रीडापर्व्वतं—विहारार्थनिर्मितकृत्रिमशैलं, अधिरोहणम्—आरोहणम्। उत्कम्पितस्तनी—उत्कम्पितौ—उद्वेपितौ, स्तनौ—कुचौ यस्याः तादृशी। तत्रास—भीता बभूव। ["तत्रास" इत्यत्र "तत्रास" इति पाठे,—चुकूज, यातनाव्यञ्जक-

विनिहितकरकिसलयापि गर्व्वादिव गर्भेण अधार्य्यत। (५८) प्रतिदिवसञ्च अधोमुखो स्तनपृष्ठसङ्क्रान्तेन अपत्यदर्शनौत्सुक्यात् अन्तःप्रविष्टेन इव मुखकमलेनैव प्रीयमाणा दर्शं गर्भम्। उदरे तनयेन हृदये च भर्त्रा निहिता द्विगुणितामिव लक्ष्मीमुवाह। पत्युत्सङ्गमुक्तशरीरा च शरीरपरिचारिकाणाम् अङ्केषु, सपत्नीनान्तु शिरःसु पादौ चकार। (५९) अवतीर्णे च दशमे मासि (६०) सर्व्वावीभृत्पत्तपाताय वज्रपर-

ध्वनिं चकारेत्यर्थः]। प्रत्युत्थानेषु—गुरुजनागमने समुत्थानेषु, उभयोर्जानोः,—ऊरुपर्व्वणोः, जङ्घयोः मन्थिटशयोरित्यर्थः, शिखरयोः,—अग्रयोः, विनिहितः,—अर्पितः, करकिसलयः,—हस्तपल्लवः यया तथाभूता; अधार्य्यत—धृतार्य्यत इत्यर्थः, प्रत्युत्थातुमुपक्रममाणाऽपि तेजोत्कर्षवत्त्वात् तत् प्रत्यकृध्यत इव इति भावः।

(५८) ["प्रतिदिवसञ्च" इत्यत्र "दिवसञ्च" इति पाठे,—कृत्स्नं दिनं व्याप्येत्यर्थः। अत्र पक्षे "कालाध्वनोः—" (२।३।५ पा०) इत्यादिना अत्यन्तसंयोगे द्वितीया। प्रथमपक्षे "दिवसं दिवसं प्रति इत्यव्ययीभावे क्रियाविशेषणम इति विवेकः]। स्तनेति। —स्तनपृष्ठे—स्तनयोरुपरि, सङ्क्रान्तं—प्रतिबिम्बितं तेन; पाण्डुरतया स्वच्छत्वादिति भावः। अपत्येति।—अपत्यस्य—पुत्रस्य, गर्भस्थितस्येति भावः, दर्शने यत् औत्सुक्यं—कुतूहलं तस्मात्। द्विगुणितां—द्विरावृत्तां, लक्ष्मीं—श्रियम्। पत्युत्सङ्गेति।—पत्युः, —स्वामिनः, उत्सङ्गे—क्रोडे, मुक्तं—निहितं, शरीरं यया तथाभूता। ["पत्युत्सङ्ग—" इत्यत्र "सत्युत्सङ्ग—" इति पाठान्तरम्]। शरीरेति।—शरीरं—देहं, परिचरन्ति—सेवन्ते याः तासां, पादादिसंवाहिकानामित्यर्थः, अङ्केषु—क्रोडेषु, तत्तदवयवेषु वा इत्यर्थः। सपत्नीनां—समानभर्तृकाणां, दुर्भगानामिति भावः। भर्तुरादरातिशयात् सर्व्वाः सपत्नीरतिक्रम्य अतिष्ठदिति भावः, न तु वामत्वेन तासां शिरःसु पादौ स्थापितवती। अत्र पादयोः युगपदेकत्र व्यापनमसम्भवः इति आपाततः विरोधस्य भिन्नसमयत्वेन समर्थनात् विरोधाभासोऽलङ्कारः।

(५९) अवतीर्णे—उपस्थिते।

(६०) सर्वेति।—सर्वेषाम् उर्वीभृतां—भूभृताम्; एकत्र राज्ञाम्, अन्यत्र,—पर्व्वतानामित्यर्थः ("भूभृद्भूमिधरे नृपे" इत्यमरः)पक्षपाताय—सहायनिपाताय, गरुत्कर्त्तनाय च, ("पञ्चमे मासार्द्धके···। ·····सखिसहाययोः। चुल्लीरन्ध्रे पतत्रे च···" इति

माणुभिः इव निर्मितं, (६१) त्रिभुवनभारधारणसमर्थं शेषफणा-मण्डलोपकरणैः इव कल्पितं, सकलभूभृत्कम्पकारिणं दिग्गजा-वयवैः इव विहितम्, अमृत देवं राज्यवर्द्धनम् ; (६२) यस्मिन् जाते जातप्रमोदा नृत्यमय्य इव अजायन्त प्रजाः। पूरिता-मङ्गलशङ्खशब्दमुखरं प्रहतपटहशतपटरवं गम्भीरभेरीनिनाद-निर्भरभरितभुवनं प्रमोदोन्मत्तमर्त्यलोकमनोहरं मासमेकं दिवसमिव महोत्सवम् अकरोत् नरपतिः।

अथ अन्यस्मिन्नतिक्रान्ते कस्मिंश्चित् काले (६३) कन्द-लिनि, कुड्मलितकदम्बतरौ, तीक्ष्णतृणास्तम्बे, स्तम्भिततामरसे,

---

मौदिनी) वज्रपरमाणुभिरिव—वज्रस्य—कुलिशस्य, परमाणवः,—अतिक्षुद्रा अंश-विशेषाः, तैरिव। इन्द्रः पुरा वज्रेण पर्व्वतानां पक्षच्छेदं कृतवान् इति पुराणवार्त्ता।

(६१) त्रिभुवनस्य—त्रिजगतः, भारस्य धारणे—पालने, वहने च, समर्थे—योग्यम्। शेषेति।—शेषस्य—अनन्तनागस्य, फणामण्डलानि—फटामण्डलानि एव, उपकरणानि—उपादानकारणानि, तैरिव ; अन्यथा कथं तादृशभारधारणे सामर्थ्यं सम्भवेत् इति भावः। सकलेति।—सकलानां भूभृतां—राज्ञां, पर्व्वतानाञ्च, कम्पकारिणं—कम्पहेतुं विप्लवकारणत्वादिति भावः। अत एव दिग्गजेति।—दिग्गजानाम्—ऐरावतादीनाम्, अवयवैः,—अङ्गैरिव। अमृत—अमृतवती। राज्यवर्द्धनं—राज्यं वर्द्धयतीति तथोक्तम्, अन्वर्थाभिधायिनमिति भावः।

(६२) यस्मिन्—राज्यवर्द्धने। जातप्रमोदाः,—जातौत्सुक्याः। नृत्यमय्यः,—नृत्यरूपाः, सदा नर्त्तनपरायणा इत्यर्थः। प्रजाः,—जनाः। पूरितेति।—पूरितानाम्—आपादितानाम्, असङ्ख्यानां—बहूनां, शङ्खानां—कम्बूनां, शब्दैः,—रवैः, मुखरः,—कोलाहलपूर्णः, तम्। प्रहतेति।—प्रहतानां—ताडितानां, पटहशतानां—वादित्रशतानां, पटवः,—महान्तः, रवा यस्मिन् तथाविधम्। गम्भीरेति।—गम्भीरैः,—घनैः, भेरीणां—वाद्यविशेषाणां, निनादैः,—निःस्वनैः, निर्भरम्—अत्यन्तं यथा तथा, भरितम्—आपूरितं, भुवनं यत्र तथाविधम्। प्रमोदेति।—प्रमोदेन—प्रहर्षेण, उन्मत्तैः,—उल्लसितैः, मर्त्यलोकैः,—मनुष्यैरित्यर्थः, मनोहरं—रमणीयम्।

(६३) कन्दलिनि—कन्दलीलताकुसुमशोभिनि। कुड्मलितेति।—कुड्मलिताः,—मुकुलिताः, कदम्बतरवः यस्मिन् तथोक्ते। तीक्ष्णतृणास्तम्बे—तीक्ष्णाः,—दृढिरयाः,

विकसितचातकचेतसि, मूकमानसौकसि नभसि देव्या देवक्या इव चक्रपाणिः यशोवत्या हृदये गर्भे च सममेव सम्बभूव हर्षः। शनैः शनैः च (६४) अस्याः सर्व्वप्रजापुण्यैरिव परिगृहीता भूयोऽपि आपाण्डुताम् अङ्गयष्टिर्जगाम। गर्भारम्भेण

[तक्ष्धातोः भप्रत्ययं "तृषादराद्दीनि यथोपदिष्टम्" (६।३।१० पा०) इति अकारस्य श्रीकारादेशं रूपम्। "तोकं कर्णमले पुंसि हरिते च हरिद्रयेव" इति मेदिनी] हरणशस्याः,—हरणगुच्छाः यस्मिन् तत्र, तरुणहरणगुच्छे इत्यर्थः। श्लाघ्नेति।—श्लाघितानि —निश्चलानि, वातविरहादिति भावः, तामरसानि—पद्मानि यत्र तादृशे। विकसितेति।—विकसितम्—उल्लसितं, सततम् अम्बुलाभादिति भावः, चातकानां—पक्षिविशेषाणां, चेतः,—मानसं यस्मिन् तथोक्ते। मूकेति।—मूकाः,—निःशब्दाः, मानसगमनादिति भावः, मानसौकसः,—मानससरोविहारिणः, हंसा इति यावत्, यस्मिन् तादृशे; वर्षासु मर्त्यलोके दृष्टिजलस्य आविलत्वात् हंसानां तत्सृहाराहित्येन मानससरसि निर्म्मले विहरणस्य "जलधरसमये मानसं यान्ति हंसाः" इत्यादिकविसमयप्रसिद्धेरिति भावः। नभसि—श्रावणे मासि, ("श्रावणे तु स्यान्नभाः श्रावणिकश्च सः" इत्यमरः)। देवक्याः,—वसुदेवपत्न्याः, भगवतः श्रीकृष्णस्य मातरीति यावत्। चक्रपाणिः,—श्रीकृष्णः, चक्रं—चक्राकृतिरेखा, पाणौ—करतले यस्य स इति च; ["प्रकरणार्थस्य परं निष्ठासप्तम्यौ" (वा०) इति सप्तम्यन्तस्य परप्रयोगात् रूपम्]। यशोवत्याः,—प्रभाकरवर्द्धनस्य महिष्याः; अत्रैव,—यशस्विन्याः। हृदये हर्षः,—आनन्दः, गर्भे हर्षः,—हर्षनाम्नः नरपतेरित्यर्थः। अत्र देवकीचक्रपाण्योः यशोवतीहर्षयोः यथाक्रमसुपमानोपमेयदलस्थयोः साहश्यलक्ष्मीसमवगाहनादुपमा हर्ष इति शब्देन सङ्कीर्णा; अपि चात्र गर्भे सञ्जातः श्रीहर्षस्य समुत्पत्तेरनन्तरमेव हृदये हर्षस्य समुत्पत्तिरुचिता, हर्षारतयोः समकालिकत्वेन कथनात् काव्यकारणयोः पौर्व्वापर्य्यविपर्य्ययरूपातिशयोक्तिरलङ्कारः इत्यवगन्तव्यम्।

(६४) अस्याः,—यशोवत्याः। सर्वेति।—सर्व्वासां प्रजानां—जनानां, पुण्यैः,—सुकृतैः; पुण्यानां शुभतया वर्णनायाः "यशसि धवलता वर्ण्यते हासकीर्त्योः" इत्यादिभिः कविसमयसिद्धत्वात्; परिगृहीता—आश्रिता। आपाण्डुताम्—ईषत्पाण्डुवर्णताम्; सर्व्वप्रजापुण्यफलसमष्टिभूतेयं सञ्जातः प्रजारञ्जकस्य हर्षस्य समुत्पत्तिरिति हृदयम्।

(६५) श्यामायमानचारुचूचुकचूलिकौ चक्रवर्त्तिनः पातुं मुद्रितौ इव पयोधरकलशौ बभार । (६६) स्तन्यार्थम् आनननिहिता दुग्धनदीव दीर्घस्निग्धधवला माधुर्य्यम् अधत्त दृष्टिः । सकलमङ्गलगणाधिष्ठितगात्रगरिम्णेव गतिः अमन्दायत । (६७) मन्दमन्दं सञ्चरन्त्या निर्मलकुट्टिमनिमग्नप्रतिविम्बनिमेन गृहीतपादपल्लवा पूर्व्वसेवामिव आरेभे पृथिवी अस्याः ।

(६५) श्यामायमानेति ।—श्यामायमाना—नीलायमाना, चारु—मनोज्ञा, चूचुकयोः,—कुचाग्रयोः, ("चूचुकन्तु कुचाग्रं स्यात्" इत्यमरः) चूलिका—कलङ्कविशेषः ययोः तादृशौ ; [चूलसमञ्चये इति धातोः "खुल् तृचौ" (३।१।१३३ पा०) इति खुल्, "प्रत्ययस्थात्—" (७।३।४४ पा०) इत्यादिना अतः इत्वे ; "पृषोदरादीनि यथोपदिष्टम्" (६।३।१० पा०) इति उकारस्य ऊत्वे रूपम्]। चक्रवर्त्तिनः,—भाविनः समाज्ञो हर्षस्य नृपतेः इत्यर्थः। मुद्रितौ इव—मुद्रया अङ्कितौ इव, पयोधरकलशौ—स्तनकुम्भौ, दुग्धाधारकुम्भौ च ।

(६६) स्तन्यार्थं—स्तनदुग्धार्थम् । दीर्घेति ।—दीर्घा—आयता, स्निग्धा—प्रसन्ना, धवला—शुभ्रा च तथाभूता, विशेषणसमेतत् दुग्धनदीपक्षेऽपि बीजमेतत् माधुर्य्यं—मधुररसं, मधुरभावञ्च । अधत्त—धृतवती । सकलेति ।—सकलैः मङ्गलगणैः,—माङ्गलिकवस्तुनिवहैः, [मांगधातोः "इषादिभ्यश्चित्" (उ० १ पा० १०८ सू०) इति चलप्रत्यये इदित्वात् नुमि रूपम्] अधिष्ठितम्—आश्रितं, यत् गात्रं—शरीरं, तस्य गरिमा—गुरुत्वं, तेनेव । अमन्दायत—मन्दा इव—स्त्रस्ता इव, धीरा इवेति यावत्, आचरत् ।

(६७) मन्दमन्दं—शनैःशनैः, ["मन्दमन्दम्" इत्यत्र "मन्दं मन्दम्" इति पाठान्तरम् ; प्रथमपक्षे,—"प्रकारे—" (८।१।१२ पा०) इत्यादिना द्विर्वचनस्य कर्म्मधारयवद्भावात् सुबीपादिके कृते तथा रूपम् ; पाठान्तरपक्षे,—"नित्यवीप्सयोः" (८।१।४ पा०) इति वीप्सार्थे द्विर्वचनम् इति विवेकः]। निर्मलेति ।—निर्मलेषु—स्वच्छेषु, कुट्टिमेषु—गृहाभ्यन्तरतलेषु, निमग्नं—निपतितं, यत् प्रतिविम्बं, चरणयोरिति भावः, तन्निमेन—तद्व्याजेन, गृहीतपादपल्लवा—धृतचरणकिसलया, पृथिवी—भूमिः, अस्याः,—यशोवत्याः, श्रुत्या इवेति भावः, पूर्व्वसेवां—पूर्व्वपरिचर्य्यां, स्वभर्तुः चक्रवर्त्तिनः श्रीहर्षस्य जननीत्वात् इति भावः। अत्र पादयोः प्रतिविम्बनस्य सेवारूपत्वेन उत्कटैककोटिकसंशयाधायकतया सत्त्वात्, उत्प्रेक्षालङ्कारः, अपि च, अन्यत्रा; कस्या

(६८) दिवसम् अधिशयानायाः शयनीयम् अपाश्रयपत्रभङ्ग-पुत्तिकाप्रतिमा विमलकपोलोदरगता प्रसवसमयं प्रतिपाल-यन्ती लक्ष्मीरिव अलक्ष्यत। (६९) क्षपासु सौधशिखराग्र-गताया गर्भोन्माथमुक्तांशुकं स्तनमण्डलं मङ्क्तान्तमृडुपतिमण्ड-लम् उपरि गर्भस्य श्वेतातपत्रमिव केनापि धार्यमाणम् अदृ-श्यत। (७०) सुप्तायां वामभवनं चित्रभित्तिचामरग्राहिण्योऽपि

अपि स्त्रियाः परिचर्यां पृथिव्या प्राक् कदाचिदपि नैव कृता, एतस्याः सत्करणेन त्रिजगल्ललनाभ्यः सौभाग्यात्कर्षप्रतीतेः इति व्यतिरेको व्यङ्ग्यः।

(६८) दिवसं—वासरम् ["अधिशीङ्स्थासां कर्म" (१।४।४६ पा०) इति आधारस्य कर्मसंज्ञा] शयनीयं—शय्याम्, अधिशयानायाः,—अधिशेष्टन्या इत्यर्थः। अपाश्रयस्य—गृहाभ्यन्तरगतचन्द्रातपस्य, या पत्रभङ्गपुत्तिका—पुत्तलिकारचनाविशेषः, तस्याः प्रतिमा—प्रतिबिम्बम्। विमलं—स्वच्छं, गर्भजन्यपाण्डवर्णत्वादिति भावः, कपोलोदरं—गण्डाभ्यन्तरं, तद्गता—तत्र प्रतिफलिता इत्यर्थः। प्रतिपालयन्ती—प्रतीक्षमाणा; वितानेषु दीयमानानां नारीणां मूर्त्तिषु राजश्रियाः हर्षवरणार्थं प्रतीक्षणमु-त्प्रेक्षितम्। लक्ष्मीरिव—राजश्रीरिव, [लक्षधातोः "लक्षेर्मुट् च" (उ० ३ पा० १६० सू०) इति ई प्रत्ययो मुडागमश्च रूपम्, अङ्ग्यलत्वात् न सुलोपः]। अत्र "लक्ष्मीरिव" इति पदं गर्भस्थबालस्य भाविचक्रवर्त्तित्वसूचकं ज्ञातव्यम्; एवमुत्तरत्र "श्वेतात-पत्रमिव" इत्यादिष्वपि।

(६९) क्षपासु—रजनीषु, सौधशिखरस्य—प्रासादचूडायाः, अग्रम्—उपरि-भागः, तद्गतायाः,—तत्र स्थितायाः इत्यर्थः। गर्भेति।—गर्भस्य उन्माथेन—क्लेशेन इत्यर्थः, गर्भभारवहनजनितखेदेन इति भावः, मुक्तं—त्यक्तम्, अपसृतमित्यर्थः, अंशुकं—वसनं यस्मात् तथाभूतं, स्तनमण्डलं मङ्क्तान्तं—प्रतिफलितम्, उडुपतिमण्डलं —चन्द्रमण्डलम्। केनापि—अनिर्दिष्टेन जनेन, सेवकेनेति भावः; यद्वा,—केन—ब्रह्मणा सूर्य्येण वा; उपर्युक्तजगत्पालकादरात् स्वांशानुरागाद्वा इति श्लेषः। एतेन लोकनाथप्रतापशालित्वावगमः अन्तरस्थगर्भस्य सूच्यते इति।

(७०) सुप्तायाः,—निद्रितायाः। चित्रेति।—चित्रभित्तिषु—आलेख्यकुड्येषु, स्थिताः याः चामरयाहिण्यः,—बालव्यजनधारिण्यः, ताः। अत्र अपिशब्दः सम्भा-वनार्थकः इत्युत्प्रेक्षा, निश्चयार्थके तु न तथा।

चामराणि चालयाञ्चक्रुः। (७१) स्वप्नेषु करविधृतकमलिनीपलाशपुटसलिलैः चतुर्भिः अपि दिक्करिभिः अक्रियत अभिषेकः। (७२) प्रतिबुध्यमानायाश्च चन्द्रशालिकाशालभञ्जिकापरिजनो जयशब्दम् असकृत् अजनयत्। (७३) परिजनाङ्गनेषु आदिश इति अशरीरा वाचो निषेकुः। क्रीडायाम् अपि न असहत आत्माभङ्गम्। अपि च (७४) चतुर्णामपि महार्णवानाम् एकीकृतेन अम्भसा स्नातुं वाञ्छा बभूव। वेला-

(७१) स्वप्नेषु—स्वप्नाः,—निद्राऽवस्थायां विषयानुभवाः, तेषु, "स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः" इति दर्पणः। करैः,—शुण्डैः, विधृतानि—गृहीतानि, कमलिनीपलाशानां—पद्मिनीपत्राणां, पुटे—पात्रविशेषे, सलिलानि—जलानि यैः तथाभूतैः, दिक्करिभिः,—दिग्गजैः। अभिषेकः,—स्नपनं, गर्भस्येति भावः। अत्र अपिशब्दः समुच्चयार्थकः, तेन एतेषां सर्वेषां यद्वत् इति महाप्रतापशालित्वं राजसौभाग्यभाक्त्वञ्च गर्भस्य सूचितम्।

(७२) प्रतिबुध्यमानायाः,—जायत्याः। चन्द्रशालिका—शिरोगृहं, प्रासादोपरिस्थः "चिलेघर" इति बङ्गभाषाप्रसिद्धः गृहविशेष इत्यर्थः, तत्र या याः शालभञ्जिकाः,—काष्ठनिर्मितपुत्तलिकाः, ता एव परिजनः, असकृत्—पुनःपुनः। अजनयत्—अकरोत्; तद्ध्वनेः साङ्गजिकप्रतिध्वनिपूर्णतया, जागरणवशेन तथाविधं जयशब्दमिव सा अशृणोदिति भावः।

(७३) परिजनाङ्गनेषु—परिवाराकारणासु। आदिश—आज्ञापय। अशरीराः,—आकाशचारिण्य इत्यर्थः। निषेकुः,—निगदिताः। एतेन अपौरुषेयैः व्योमचारिणां सिद्धानां "यदादिशति" इत्यादिस्वोक्तिसूचकशब्दैः गर्भस्थबालस्य महाप्रभावत्वं सूचितम्। क्रीडायामित्यादिना तस्य अप्रतिहतात्मत्वं प्रदर्शितम्। अत्र का कथा कर्तव्यार्थसम्पादनावसरे इति अपिशब्दार्थः।

(७४) "चतुर्णाम्" इत्यादिना "प्रशस्यलक्षणानि अवध्यन्त" इत्यन्तेन प्रबन्धेन तस्य भावि सार्वभौमत्वं महायुरत्वञ्च प्रकटीकृतम्, अपि च गर्भः यं यमभिलषति, गर्भिण्या अपि तत्र तत्राभिलाषो जायते; यदुक्तं सुश्रुते,—"गर्भे चतुर्थे मासि अभिप्रायमिन्द्रियार्थेषु करोति, द्विहृदयाञ्च नारीं दौहृदिनीमाचक्षते। ..... । अतीऽनुकूलेषु या नारी सनभिध्याति दौहृदम्। शरीराचारशीलैः सा सन्तानं जनयि-

लताग्रहोदरपुलिनपरिमरेषु पर्य्यटितुं हृदयम् अभिललाष। (७५) आत्ययिकेषु अपि कार्य्येषु सविभ्रमं भ्रूलता चचाल। (७६) सन्निहितेषु अपि मणिदर्पणेषु मुखम् उत्खातं खड्गपट्टे वीक्षितुं व्यसनमासीत्।(७७)उत्सारितवीणाः स्खलितविकला धनुर्ध्वनयः श्रुतौ असुखायन्त। (७८) पञ्जरकेसरिषु चक्षुः अरमत।

व्यति॥" इति। अनेन गर्भस्थस्यैव तस्य महावीरमार्व्वभौमसौभाग्याभिलाषः प्रतीयते इति बोद्धव्यम्। वेलासु—ममृद्धतीरेषु, यानि लताग्रहाणि—कुञ्जभवनानि, तेषाम् उदरेषु—अभ्यन्तरेषु, यानि पुलिनानि—सैकतभागाः, तेषां परिसराः,—आभोगाः तेषु। एतेनास्य ससागरधराऽधीश्वरत्वस्यावश्यभात्यत्वमनुमीयते।

(७५) आत्ययिकेषु—कष्टसाध्येषु कार्य्येषु, [अत्ययं भवः इत्यर्थे "तत्र भवः" (४।३।५३ पा०) इति ठञि रूपम्] सविभ्रम—सविलासं, भ्रूलता चचाल—तस्या इति शेषः, आयहमूचिकां भ्रुकुटिमकरीत्यर्थः। गर्भे वीरपुरुषस्य अवस्थित्या कष्टसाध्यकार्य्ये प्रवृत्तिः आसीत्; अथवा,—आत्ययिकेषु—अवश्यकर्त्तव्येषु, सविभ्रमं—सविलासं, भ्रूलता चचाल—पस्पन्दे; भ्रूलतासञ्चालनेनैव अवश्यकर्त्तव्यानि कारयामास, न तु हस्तादिना गर्भभारालसत्वादिति भावः।

(७६) सन्निहितेषु अपि—निकटस्थितेषु अपि, मणिदर्पणेषु ["षष्ठी चानादरे" (२।३।३८ पा०) इति अनादरे सप्तमी] तान् अनादृत्येत्यर्थः। उत्खातं—उद्धृतं, परिजनेन इति भावः; यद्वा,—निष्कोषितं इत्यर्थः, खड्गपट्टे—असिफलके, मुखं वीक्षितुं—द्रष्टुं, व्यसनम्—आसक्तिः, अभिलाष इत्यर्थः; महावीराश्रितगर्भत्वात्, विज्ञिगीषुभिः वीरैश्च खड्गफलके एव मुखदर्शनस्य प्राकृतिकत्वादिति भावः।

(७७) उत्सारितवीणाः—उत्सारिता—अपसारिता, वीणा—वाद्यविशेषः श्रेष्ठः तथाभूताः, तद्वादिभिः वीणादिमधुरशब्दाः तिरस्कृतास्ते इति भावः। धनुर्ध्वनयः,—धनुर्निनादाः, श्रुतौ—श्रवणेन्द्रिये, असुखायन्त—श्रुतिसुखा जाता इति यावत्; पूर्ववत् महावीराश्रितगर्भत्वात्, प्रत्यर्थिप्रमर्दनपरायणानां वीराणाञ्च धनुष्टङ्कारस्यैव श्रुतिसुखकरत्वादिति भावः।

(७८) पञ्जरकेसरिषु—बन्धनं गतेषु सिंहेषु इत्यर्थः, चक्षुः अरमत—अप्रीयत; महापराक्रमस्य गर्भस्य मृगयादिव्यापारेषु सिंहादपि भीत्यभावात् तेनैव च सह क्रीडादिकरणात् इति भावः; अपि च, पञ्जरकल्पोदरशायिनः हर्षस्य केसरिप्रतिमत्वेन सहर्षमजनितदृष्टिः चक्षुषः अजगीति शेषम्।

(७९) गुरुप्रणामेषु अपि स्तम्भितमिव शिरः कथमपि ननाम। (८०) सखीजनाश्च अस्याः प्रमोदविस्फारितैः लोचनपुटैः आसन्नप्रसवमहोत्सवधियेव धवलयन्तो भवनं विकच-कुमुदकमलकुवलयपलाशवृष्टिमयं रत्नाबलिविधिमिवानवरतं विदधाना दिक्षु क्षणमपि न मुमुचुः पार्श्वम्। (८१) आत्मोचितस्थाननिषण्णाश्च महान्तो विविधौषधिधरा भिषजो भूधरा इव भुवो धृतिं चक्रुः। (८२) पयोनिधीनां क्षुदयानीव

(७९) गुरुप्रणामेषु—वन्दनीयजनवन्दनेषु, स्तम्भितमिव—निश्चलीभूतमिव, ननाम सस्पृहमपि सपदि प्रतिरुद्धगतिकामित्यर्थः, महावीरस्य सार्वभौमस्य च मस्तक-नमनस्य प्रकृतिविरोधित्वादनभ्यस्तत्वाच्च। पूर्वोक्तेषु सर्वेषु एव वाक्येषु वीरपुरुषाश्रित-गर्भत्वात् तथोक्तिरिति भावः।

(८०) सखीजनाः,—सहचारिणयः। ["सखीजनाश्च" इत्यत्र "सख्यश्च" इति पाठान्तरम्] प्रमोदविस्फारितैः,—आनन्दविकसितैः। आसन्नेति।—आसन्नः, —समीपवर्ती, यः प्रसवः,—गर्भमोचनं, स एव तेन वा महोत्सवः,—आनन्दजनन-व्यापारः, तद्धियेव—तद्बुद्ध्या इव, महोत्सवः समीपवर्ती इति विचिन्त्य इवेत्यर्थः। धवलयन्तः,—शुभीकुर्वन्तः। विकचेति।—विकचानि—विकसितानि, यानि कुमुद-कमलकुवलयानि—कैरवपद्मनीलोत्पलानि, तेषां पलाशानि—दलानि, तेषां वृष्टिमयं —वर्षणात्मकं, रत्नाबलिविधिं—रत्नार्थं—गर्भस्य विघ्नाभावसम्पादनाय, बलिविधिं— पूजाविधानमिव। विदधानाः—कुर्वन्तः। मुमुचुः,—तत्यजुः; आसन्नप्रसवायाः नियतपर्यवेक्षणनियमादिति भावः।

(८१) आत्मेति।—आत्मनः,—स्वस्य, उचितेषु—योग्येषु, स्थानेषु निषण्णाः, —उपविष्टाः, महान्तः,—उत्तमाः इत्यर्थः, उन्नताश्च, भिषजः,—वैद्याः, विविधाः, —नानाविधाः, ओषधीः,—गर्भविघ्नोत्पादकपूतनादियक्षनिवारकाणि, तथा रोगोप-शमनानि द्रव्याणि, द्रुमलतादीनि च, धरन्तीति तथोक्ताः; यद्वा भूधरपक्षे,—विविधाः ओषध्यः यासु तादृशाः धराः,—शुभागाः येषु तथाभूताः। भूधरा इव—पर्वता इव, भुवः,—स्थानस्य, प्रसवस्थानस्य इत्यर्थः, पृथिव्याश्च, धृतिम्—अवधारणं, धारणञ्च, चक्रुः,—कृतवन्तः; मन्त्रतन्त्रयन्त्राः चिकित्सकाः एतत्पार्श्वात् क्षणमपि न प्रचेलुः इति भावः।

(८२) पयोनिधीनां—समुद्राणाम्। क्षुदयानीव—अभ्यन्तराणीवेत्यर्थः; यद्वा

लक्ष्म्या सहागतानि यौवासूत्रयन्त्रेषु प्रशस्तरत्नानि अबध्यन्त।

ततश्च प्राप्ते (८३) ज्येष्ठामूलीये मासि बहुलासु बहुलपक्षहादश्यां व्यतीते प्रदोषसमये समारूढवति क्षपायौवने महसैवान्तःपुरं समुदपादि कोलाहलः स्त्रीजनस्य। निर्गत्य च ससम्भ्रमं यशोवत्याः स्वयमेव (८४) हृदयनिर्विशेषा धात्र्याः सुता सुयात्रा इति नाम्ना राज्ञः पादयोर्निपत्य,—"देव! दिष्ट्या वर्द्धसे द्वितीयसुतजन्मना" इति व्याहरन्ती पूर्णपात्रं जहार।

अस्मिन्नेव च काले राज्ञः (८५) परमसम्मतः, शतशः

समुद्राभ्यन्तरं बहूनि प्रशस्तरत्नानि विद्यन्ते, तथेति भावः। लक्ष्म्या—पद्मोनिवासस्थित्यर्थेति भावः, सह आगतानि—उपनीतानि, यौवासूत्रयन्त्रेषु—यौवायां ये सूत्रयन्त्रयः तेषु, रत्नावधानार्थमिति भावः। प्रशस्तरत्नानि—उत्कृष्टमणयः, [प्रशस्तानि तानि रत्नानि इति कर्मधारयः; अथवा,—प्रशस्तानि रत्नानि यासाम् इति बहुव्रीहिः] अबध्यन्त—बद्धानि, परिजनैः इति शेषः।

(८३) ज्येष्ठामूलीये—ज्येष्ठानक्षत्राधिदैवते, ज्यैष्ठे मासि इत्यर्थः, बहुलासु—कृत्तिकासु नक्षत्रेषु, ("बहुलाः कृत्तिका गावः" इत्यमरः)। बहुलपक्षहादश्यां—कृष्णपक्षहादश्यां तिथौ, ("बहुला नीलिकायां स्यात्··· । पुंस्यग्नौ कृष्णपक्षे च···॥" इति मेदिनी)। व्यतीते—अतिक्रान्ते, प्रदोषसमये—रजनीमुखे, समारोढुमिच्छति—समारोढुमिच्छति, प्रादुर्भवतीत्यर्थः, क्षपायौवने—रात्रियौवने, निशीथे इत्यर्थः, समुदपादि—सञ्जातः।

(८४) हृदयानिर्विशेषा—हृदयादभिन्ना इत्यर्थः। धात्र्याः सुता—धात्र्यपत्यमित्यर्थः, [धात्र् धेट्धातुभ्यां "धः कर्मणि ष्ट्रन्" (३।२।१८१ पा०) इति ष्ट्रनि षित्त्वात् ङीषि धात्रशब्दात् ङीषि वा रूपम्]। दिष्ट्या—भाग्येन, दैवेनेत्यर्थः, [दिष्टधातोः "भव्यगेय-" (उ० ४ पा० १११ सू०) इति यक्प्रत्यये निपातनात् साधुत्वम्] व्याहरन्ती—कथयन्ती, पूर्णपात्रं—प्रियभाषणपरितोषजनितवसनरत्नादिपूरितपात्रं दीयमानं पूर्णपात्रम्,—"आनन्दोऽतिसौहार्दात्य वस्त्रादेः वस्त्रात्। अज्ञातो हरत्येव पूर्णपात्रन्तु तत् श्रुतम्॥" इत्युक्तलक्षणं यथा परिहृतवस्त्रालङ्कारादिकं वा। जहार—गृहीतवती।

(८५) परमसम्मतः,—अतिप्रियः। शतशः,—शतवारान्, बहुश इत्यर्थः।

संवादितातीन्द्रियादेशः, दर्शितप्रभावः, सङ्कलितो ज्योतिषि, सर्वासां ग्रहसंहितानां पारदृश्वा, सकलगणकमध्ये महितो हितश्च, त्रिकालज्ञानभाक्, भोजकस्तारको नाम गणकः समुपस्थित्य विज्ञापितवान्,—"देव! श्रूयतां, मान्धाता किलैवंविधे (८६) व्यतीपातादिसर्व्वदोषाभिषङ्गरहितेऽह्नि सर्वेषु उच्चस्थानस्थितेषु एवं ग्रहेषु दृष्टग्नि लग्ने मेजे जन्म।

संवादितेति।—संवादितः,—प्रत्यक्षीकृतः, अतीन्द्रियः इन्द्रियमतिक्रान्तः, [अत्यादयः "क्रान्ताद्यर्थे द्वितीयया" (वा०) इति समासः] भावीति भावः, आदेशः,—घटना येन तथाभूतः, भविष्यद्वक्तेति भावः; यद्वा,—संवादितः, जनैरिति भावः, अतीन्द्रियः,—उत्कृष्टाशयः, आदेशः,—आज्ञावाक्, भाषणमित्यर्थः, यस्य तथाभूतः। दर्शितप्रभावः,—दर्शितः,—प्रकटितः, प्रभावः,—सामर्थ्यं येन तथोक्तः; यद्वा,—दर्शितः,—दर्शः,—दर्शनं सञ्जातोऽस्य इति विग्रहे "तदस्य—" (५।२।३६ पा०) इत्यादिना तारकादेराकृतिगणत्वादितच्प्रत्यये सिद्धः प्रभावः यस्य तथाभूतः; एतेनास्य विश्वपरीक्षाप्रतिभावत्वं सूचितम्। सङ्कलितो—सङ्कलितम् अभ्यासीति सङ्कलितो, सङ्कलनाभिज्ञः, गणिताभिज्ञ इति यावत्। ज्योतिषि—ज्योतिषशास्त्रे। ग्रहसंहितानां—ग्रहाः,—रव्यादयः, तेषां संहिताः,—सन्धयः, तत्सूचकशास्त्राण्येति यावत्, तासु पारदृश्वा—पारदर्शी, विज्ञेषज्ञ इति यावत्, [पारदृष्टवान् इत्यर्थे "दृशः क्वनिप्" (३।२।८४ पा०) इति क्वनिप् रूपम्]। महितः,—पूजितः। हितः,—हितकरः, सूर्य्यकृतकज्योतिर्विद्यासिद्धान्तानां निरन्तरमनननिदिध्यासनादिभिः इति भावः। गणकः,—दैवज्ञः; सूर्य्योपासका हि प्रायशः गणका भवन्ति, ये देशान्तरे "मगाः" इति प्रसिद्धाः, भागवता इत्यर्थे। भोजकः,—आडारपटुरिति भावः; यद्वा,—भोज इव इत्यर्थे स्वार्थे कनि तथाविधः भोजतन्त्रप्रवीणः, भोजवत् निरमागमज्ञो वा इत्याशयः। मान्धाता—सूर्य्यवंशीययुवनाश्वसुतः सार्व्वभौमनृपतिर्विशेषः।

(८६) व्यतीपातादीति।—व्यतीपातः,—"मनसे हि मकरार्कौ युगपत् स्यातां यदैकमार्गस्थौ। मनसार्द्धेऽर्कश्च यदा ग्रभौ स भवेद् व्यतीपातः॥" इत्युक्तलक्षणः अन्तरीक्षे राशिषट्के एकमार्गावस्थितयोः चन्द्रसूर्य्ययोः योगविशेषः, आदिर्येषां तथोक्तः, सर्वे दोषाः, तेषाम् अभिषङ्गः,—व्याप्तिकरः, सम्बन्ध इति यावत्, तेन रहितं—वर्जितं तस्मिन्, अह्नि—दिवसे। उच्चस्थानस्थितेषु—तुङ्गिषु इत्यर्थः।

(८७) अर्वाक् ततोऽस्मिन् अन्तराले पुनः एवंविधे योगे चक्रवर्त्तिजनने न अजनि जगति कस्मिदपरः। (८८) सप्तानां चक्रवर्त्तिनाम् अग्रणीः,चक्रवर्त्तिचिह्नानां महारत्नानाञ्च भाजनं, सप्तानां सागराणां पालयिता, सप्ततन्तूनां सर्वेषां प्रवर्त्तयिता, सप्तसप्तिसमः सुतोऽयं देवस्य जातः" इति।

अत्रान्तरे स्वयमेव (८९) अनाध्माता अपि तारमधुरं

यर्हसु—रत्नादिषु। ईदृशि—एवंविधे योगे इति भावः। लग्ने—राश्युदये, ("राशीनामुदयो लग्नम्" इत्यमरः)। भेजे—लेभे।

(८७) अर्वाक् ततः,—तत्पश्चादित्यर्थः। अस्मिन् अन्तराले—समये ; यद्वा,—अन्तराले—अभ्यन्तरे ; हर्षमान्द्यादेः अस्मत्कालमध्ये इत्यर्थः, एवंविधे—सर्व्वशुभाकरे इति भावः, योगे—ग्रहादीनां सम्मेलने इत्यर्थः, चक्रवर्त्तिजनने—चक्रवर्त्तिनः,—सम्राजः, जननम्—उत्पत्तिर्यस्मिन् तादृशे। अपरः,—हर्षमूलात् अन्य इति यावत्, न अजनि—न जातः। एतेन मान्धाता तु कदाचित् सत्ययुगे आसीत्, इदानीमेष एव त्रिलोक्यामतिमवीर्य्यः इत्यवगम्यते।

(८८) सप्तानां चक्रवर्त्तिनां—सार्व्वभौमनृपतीनां, "भरतार्জ্জुनमान्धातृभगीरथयुधिष्ठिराः। सगरो नहुषश्चैव सप्तैते चक्रवर्त्तिनः॥" इत्युक्तानाम्, अग्रणीः,—अग्रगण्यः, तेषां सप्तानां श्रेष्ठ इत्यर्थः। चक्रवर्त्तिचिह्नानां—सार्व्वभौमलक्षणानां, पद्मजालङ्खत्वादीनामित्यर्थः। महारत्नानां—"मणिश्चर्मरिचर्काणि वरा स्त्री पारिनायकः। (परिनायकः,—सेनापतिः) षडेतानि तु रत्नानि कीर्त्तितानि मनीषिभिः॥" इत्युक्तविधानां रत्नविशेषाणाम्। भाजनं—पात्रम्। सप्तानां सागराणां—लवणेक्षुसुरासर्पिर्दधिदुग्धजलात्मनाम् इत्यर्थः। सप्ततन्तूनां—यज्ञानां,सप्तभिः भूरादिमहाव्याहृतिभिः साध्यमानत्वादिति भावः, ("यज्ञः सर्वोऽध्वरो याग: सप्ततन्तुर्मखः क्रतुः" इत्यमरः)। प्रवर्त्तयिता—सम्पादकः। सप्तसप्तिसमः,—सप्त—सप्तसङ्ख्काः, सप्तयः,—अश्वाः, [मननार्थकात्मप्धातोः "वसेस्तिः" (उ० ४ पा० १७९ सू०) इति सूत्रे बाहुलकग्रहणात् तिप्रत्यये रूपम्] यस्य सः, सप्तसप्तिः सप्ताश्वः इत्यर्थः, तत्सम:, आदित्यसदृशः इत्यर्थः, तदंशप्रभवत्वात् इत्याशयः,("…भास्करोहस्करोऽहप्रभाकरविभाकराः। भास्वद्विवस्वत्सप्तास्व…॥" इत्यमरः)। अत्र नरेन्द्रसूनोः लोकासाधारणसम्पत्तिशालित्वबलवत्त्ववर्णनविषयत्वात् उदात्तालङ्कारः।

(८९) अनाध्माताः,—अपूरिताः, मुखानिलैरिति भावः। तारमधुरम्—

शङ्का विरेसुः। अताडितोऽपि क्षुभितजलनिधिजलध्वनिधीरं जुगुञ्ज अभिषेकदुन्दुभिः। अनाहतानि अपि (९०) मङ्गलतूर्य्याणि रेणुः। (९१) सर्व्वभुवनाभयघोषणापटह इव दिगन्तरेषु बभ्राम तूर्य्यप्रतिशब्दः। (९२) विधुतकेसरसटाश्च साटोपग्रहीतहरितदूर्वापल्लवकवलप्रशस्तैर्मुखपुटैः समक्ष्वेलन्त हृष्टा वाजिनः। (९३) सलीलम् उत्क्षिप्तैः हस्तपल्लवैः नृत्यन्त इव श्रवणसुभगं जगर्जुः गजाः। (९४) ववौ च अचिरात् चक्रायुधम् उत्सृजन्त्या लक्ष्म्या निश्वास इव सुराऽऽमोदसुरभिः दिव्यानिलः।

उच्चैर्मधुरम्। विरेसुः,—दध्वनुः। अताडितः,—अनाहतः। क्षुभितेति।—क्षुभितस्य—विलोडितस्य, जलनिधेः,—सागरस्य, जलं, तस्य ध्वनिवत् धीरं—गम्भीरम्। जुगुञ्ज—दध्वान। अभिषेकदुन्दुभिः,—अभिषेकसमये वादनीयभेरी, ("भेरी स्त्री दुन्दुभिः पुमान्" इत्यमरः)।

(९०) मङ्गलतूर्य्याणि—माङ्गलिकवाद्यविशेषाः, रेणुः,—रणन्ति स्म।

(९१) सर्वेति।—सर्वेषां भुवनानाम् अभयघोषणायाः,—निर्भयताप्रचारस्य, पटह इव—आणकाख्यवादिवभेद इव, ("आणकः पटहोऽस्त्री स्यात्" इत्यमरः)। तूर्य्यप्रतिशब्दः,—नान्दीवाद्यप्रतिध्वनिः।

(९२) विधुतेति।—विधुताः,—कम्पिताः, केसराः,—ग्रीवारोमाणि एव, सटाः,—जटाः यैः तथोक्ताः। साटोपेति।—साटोपं—ससम्भ्रमं, सवेगमित्यर्थः, गृहीतानां हरितानां—श्यामलानां, दूर्वापल्लवानां कवले—ग्रासे, प्रशस्तानि—विस्तृतानीत्यर्थः, व्यात्तानीति यावत्, तैः, मुखपुटैः,—मुखावयवैः। समक्ष्वेलन्त—क्ष्वेडारवम् अकुर्व्वन्; अकस्मादेव हर्षाङ्गनादिति भावः। ["समक्ष्वेलन्त" इत्यत्र "समहेलन्त" इति पाठेऽपि स एवार्थः]। हृष्टाः,—प्रसन्नाः। वाजिनः,—अश्वाः।

(९३) सलीलं—सावहेलम्, उत्क्षिप्तैः,—उन्नमितैः इत्यर्थः, हस्तपल्लवैः,—शुण्डाकिसलयैः। श्रवणसुभगं—श्रुतिसुखं, जगर्जुः,—बृंहन्तः, गर्ज्जितवन्तः इत्यर्थः; आनन्दाविर्भाव एव गजानां गर्ज्जने हेतुः इति ज्ञेयम्।

(९४) ववौ—वहति स्म। चक्रायुधं—विष्णुम्, उत्सृजन्त्याः,—त्यजन्त्याः। सुराऽऽमोदसुरभिः,—सुरायाः,—मद्यस्य, आमोदः,—विसर्दोत्यगन्धः, तद्वत् सुरभिः,—प्राणतर्पणः; यद्वा,—सुराणाम्—अमराणामपि, आमोदः,—आनन्दः यस्मात्

(९५) यज्वनां मन्दिरेषु प्रदक्षिणशिखाकलापकथितकल्याणागमाः प्रजज्वलुः अनिध्मना वैतानवह्नयः। (९६) भुवस्तलात् तपनीयशृङ्खलाबन्धबन्धुरकलशीकोशाः ममुदगुः महानिधयः।

तादृशश्यामौ सुरभिश्च इति विग्रहः, अमरवरमल्लपर्णमङ्गल्यवान् इत्यर्थः, दिव्यानिलः, —स्वर्गीयवायुः, समाजः यौगपद्यस्य ज्ञातस्य श्रुतिस्मृतिविधिबोधितानां कर्मणां भाविविशुद्धसम्प्रदायप्रवर्त्तकत्वज्ञानेन देवानामपि प्रमुदितत्वादिति भावः।

(९५) यज्वनां मन्दिरेषु—यज्ञशालासु इत्यर्थः, ["इषिमदि—" (उ० १ पा० ५२ सू०) इत्यादिना किरचि रूपम्]। प्रदक्षिणेति।—प्रदक्षिणः,—सरलः, दक्षिणावर्त्तः इति यावत्, अन्यथा हवनसमये ऋत्विजां हस्तदाहापातात्, तेन चाग्नेः अप्रसन्नत्वमाशङ्क्यते ; तथा हि रघौ कालिदासः,—"प्रदक्षिणार्चिर्व्यजिन" इति ; शिखाकलापः,—ज्वालासमूहः, तेन कथितः,—सूचितः, कल्याणागमः,—शुभोदयः यैः तथोक्ताः। अनिध्मनाः,—इध्मनं—दाह्यकाष्ठं, तद्रहिताः ; वैतानवह्नयः,—वितानं—क्रतुः, तत्र भवाः वैतानाः, यज्ञीया इत्यर्थः, [विपूर्व्वकात् तनधातोः "अकर्त्तरि च—" (३।३।१९ पा०) इत्यादिना घञि, ततः भावार्थे अणि च रूपम्] तथाविधाः वह्नयः, यज्ञाग्नयः इत्यर्थः।

(९६) भुवस्तलात्—पृथ्वीतलात्, भुवस्तलं विदार्य्य इत्यर्थः, ["ल्यब्लोपे कर्म्मण्यधिकरणे च" (वा०) इति पञ्चमी विभक्तिः]। तपनीयेति।—तपनीयं—स्वर्णं, ["तत्यस्त्यानीयरः" (३।१।९६ पा०) इति कर्म्मणि अनीयरप्रत्यये रूपम्] "स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्। तपनीयम्··· ॥" इत्यमरः] तस्य शृङ्खला—हारविशेषः, सौवर्णशृङ्खलेत्यर्थः, निगड़ो वा, ("शृङ्खला पुंस्कटीवस्त्रबन्धे च निगड़े विषु" इति मेदिनी) तस्या बन्धेन बन्धुराः,—नतोन्नताः, रम्याः वा, ("बन्धुरं तुङ्गतानतम्" "बन्धुरं मुकुटे पुंसि··· ।···त्रिषु स्याद्रम्यनम्रयोः ॥" इत्यमरमेदिन्यौ) कलशीकोशाः,—कुम्भभाजनानि, स्वाधारभूतकुम्भस्य पिधानानि वा येषां तथाविधाः, सौवर्णशृङ्खलाबद्धकुम्भपरिपूर्णा इत्यर्थः। महानिधयः,—महान्ति अमूल्यरत्नानि, शङ्खपद्मादयः शैवनिधिभेदा इति यावत्। समुदगुः,—समुद्गच्छन्ति स्म, समुदगच्छन्नित्यर्थः ; महापुरुषजन्मप्रभावात् सर्व्वाण्येव शुभचिह्नानि सर्व्वतः प्रादुरासन्निति भावः। जन्मानुकूलाभ्युदयिकदैवादिसंस्काराणाम् अप्रसिद्धगौणहेतूनां सत्त्वेऽपि, पुरुषकारस्य प्रसिद्धमुख्यहेतोः अभावात् विभावना।

(९७) प्रहतमङ्गलतूर्य्यप्रतिशब्दनिभेन दिक्षु दिक्पालैरपि प्रमोदात् अक्रियत इव दिष्टवृद्धिकलकलः। (९८) तत्क्षण एव च शुक्लवाससो ब्रह्ममुखाः कृतयुगप्रजापतय इव प्रजाहृदये समुपतस्थिरे द्विजातयः। साक्षाद्धर्म्मा इव (९९) शान्त्युदकफलहस्तः तस्थौ पुरः पुरोधाः। (१००) पुरातन्यः स्थितय इव

(९७) प्रहतेति।—प्रहतस्य—ताडितस्य, मङ्गलतूर्य्यस्य—माङ्गलिकवाद्यविशेषस्य, प्रतिशब्दः,—प्रतिध्वनिः, तन्निभेन—तद्वाजेन। प्रमोदात्—आनन्दात्। दिष्टवृद्धिकलकलः,—दिष्टं—भाग्यं, ("दैवं दिष्टं भागधेयं भाग्यम्" इत्यमरः) तस्य वृद्धिः,—उन्नतिः, तस्यै कलकलः,—कलरवः; [कलप्रकारः इत्यर्थे "प्रकारे—" (८।१।११ पा०) इत्यादिना द्विर्वे रूपम्] शासति सति श्रीहर्षे राजनि सुशासनगुणेन प्रजानां निरुपद्रवतया सत्त्वात् तेषां स्वस्वकार्य्यभारलाघवसम्भावनयेति भावः। अक्रियत इव—कृत इव। अत्र सम्भावनायाः उत्कटैककोटिकत्वात् उत्प्रेक्षा।

(९८) तत्क्षण एव—तज्जन्मसमये एव, क्रियत्कालक्षेपमप्यकृत्वा इति भावः; शुक्लवाससः,—श्वेतवसनाः। ब्रह्ममुखाः,—ब्रह्म—वेदः, [हृद्भिधातोः "हृदेर्नीऽच" (उ० ४ पा० १४५ सू०) इति मनिनि नकारस्य अकारे ततः रत्वे रूपम्। पवर्गीयादिः इति केचित्। "वेदस्तत्त्वं तपो ब्रह्म" इत्यमरः] मुखे येषां तथोक्ताः, वेदानुज्ञायत्त इति यावत्, पितामहप्रमुखाश्च, कृतयुगप्रजापतय इव—कृतयुगे—सत्ययुगे, प्रजापतयः,—लोकसृष्टिकर्त्तारः इव। परमेष्ठिप्रधानाः प्रजापतयः सृष्ट्यादौ यथा समवेता आसन्, तद्वेत्यर्थः, इत्यवैधर्म्यमाश्रित्योपमाऽलङ्कारः। प्रजाहृदये—प्रजानां—लोकानां, प्रजायाः,—सन्ततेश्च, ("प्रजा स्यात् सन्ततौ जने" इत्यमरः) हृदये—अभ्युदयाय, आयतिं संस्कर्त्तुमित्यर्थः, ["क्रियार्थोपपदस्य—" (२।३।१४ पा०) इत्यादिना चतुर्थी]। समुपतस्थिरे—उपस्थिताः। द्विजातयः,—ब्राह्मणाः; प्राक् ब्राह्मणोपस्थितिः सर्वोत्पातनाशनत्वात् अशेषमङ्गलप्रदा इति हृदयम्।

(९९) शान्तीति।—शान्त्यर्थमुदकं—जलं, शान्त्युदकं, फलञ्च, आशीर्व्वादार्थमिति भावः, हस्ते यस्य तथाभूतः। पुरोधाः,—पुरोहितः। [पुरस्पूर्व्वकात् धाधातोः "पुरसि च" (उ० ४ पा० २३० सू०) इति असि प्रत्यये रूपम्] माङ्गलिककार्य्यादौ सर्वार्थे पुरोहितोपस्थितिः सनातनी पद्धतिरेवेति भावः।

(१००) पुरातन्यः,—चिरन्तन्यः, [तत्र भवेऽर्थे "सायञ्चिरं—" (४।३।२३ पा०) इत्यादिना ट्युल्प्रत्यये तुडागमे ततः टित्वात् ङीपि रूपम्] स्थितय इव—

अदृश्यन्त आगता बान्धवबृन्दाः। (१०१) प्रलम्बश्मश्रु-जालजटिलाननानि बहलमलपङ्ककलङ्ककालकायानि नश्यतः कलिकालस्य बान्धवकुलानि इव आकुलानि अधावन्त मुक्तानि बन्धनबृन्दानि। (१०२) तत्कालापक्रान्तस्य अधर्मस्य शिविर-श्रेणय इव अलक्ष्यन्त लोकविलुण्ठिता विपणिवीथ्यः। (१०३) विलसदुन्मुखवामनकबधिरबृन्दवेष्टिताः साक्षात् जातमाहदेवता इव बहुबालकव्याकुला ननृतुः बृद्धधात्र्यः।

मर्य्यादा इव, शिष्टाचारपद्धतयः इवेति यावत्। बान्धवबृन्दाः,—बान्धवेषु—सगोत्रेषु, बृन्दाः,—स्थविराः; चिरन्तनाचारपरिरक्षणशीलवत्त्वात् तेषामिति भावः।

(१०१) प्रलम्बेति।—प्रलम्बेन—लम्बमानेन, चौराभावात् इति भावः, श्मश्रुजालेन—कूर्चसमूहेन, जटिलानि—व्याप्ततया निबिडानि, आननानि, येषां तानि। बहलेति।—बहलानां—बहूनां, मलपङ्कानां—गात्रक्लेदरूपकर्दमानां, कलङ्केन—कृष्णवर्णचिह्नेन, कालः,—कृष्णवर्णः, मलिन इत्यर्थः, कायः,—देहो येषां तानि; स्नानाद्यभावादिति भावः। नश्यतः,—पलायमानस्य, भाविसुराजदण्डभया-दिति भावः। बान्धवकुलानि इव—स्वजनबृन्दानि इव। आकुलानि—अधिकारभंशात् विह्वलानि इत्यर्थः। मुक्तानि—बन्धनागारात् त्यक्तानि, बन्धनबृन्दानि—कारानिरुद्ध-लोकसङ्घाः; [बन्धननिरुद्धानि बृन्दानि इति विग्रहे, शाकपार्थिवादित्वात् उत्तर-पदलोपिसमासः]; महात्मवै राज्ञा कारावासिनो मुच्यन्ते इति चिरप्रसिद्धिः।

(१०२) तत्कालेति।—तस्मिन् काले—हर्षजन्यसमये इत्यर्थः, अपक्रान्तस्य—अपसृतस्य, धर्म्मतः प्राप्तितः हर्षस्य भयात् पलायितस्य इत्यर्थः, अधर्म्मस्य—वैदनिषिद्ध-कर्म्मजन्यपापाचारस्य, शिविरश्रेणय इव—सैनिनिवेशस्थानानि इव। लोकेति।—लोकैः,—जनैः, विलुण्ठिताः,—विशेषेण हृतद्रव्या इत्यर्थः, विपणिवीथ्यः,—पण्य-वीथिकानिवहाः; आनन्देन राजानया लोका राजदेयचतिपूरणानां विपणिकृतां वणिजां विपणिद्रव्याणि पराजितशिविरधनानीव लुण्ठितवन्त इत्यर्थः।

(१०३) विलसदिति।—विलसद्भिः,—आनन्देन स्फुरद्भिः, उन्मुखैः,—ऊर्द्धमुखैः, वामनकानां—क्षुद्रकायानां जनविशेषाणां, बधिराणाम्—एडानां, श्रुति-शक्तिरहितानामित्यर्थः, अलःपुरचारिणामिति भावः, बृन्दैः,—समूहैः, वेष्टिताः,—परिवृताः। साक्षात्—मूर्त्तिमतीत्यर्थः, जातमाहदेवता इव—जातस्य—प्रसूतस्य बालस्य, माहदेवता इव—षष्ठीदेव्य इव इत्यर्थः, सा च मार्जारवाहिनी बहुबालकपरि-

(१०४) प्रावर्त्तत च विगतराजकुलस्थितिः, अधःकृतप्रतीहाराकृतिः, अपनीतवेत्रिवेत्रः, निर्दोषान्तःपुरप्रवेशः, समस्वामिपरिजनः, निर्विशेषबालवृद्धः, समानशिष्टाशिष्टजनः, दुर्ज्ञेयमत्तामत्तप्रविभागः, तुल्यकुलयुवतिवेश्याविलासः, प्रनृत्तसकलकटकलोकः, पुत्रजन्मोत्सवो महान्।

हता सूतिकाऽऽगारे स्थाप्यते। बहुभिर्बालकैः,—क्रीडनिहितैः शिशुभिः इति भावः, व्याकुलाः,—विह्वलाः, उद्वेजिता इत्यर्थः, युगपदङ्गनामनुरोधे व्यस्तापातात् इति हृदयं, वृद्धधात्र्यः,—स्थविरा उपमातरः, नतृत्युः,—नृत्यन्ति स्म।

(१०४) प्रावर्त्तत—प्रारभत, प्रारब्धोऽभवदित्यर्थः। विगतेति।—विगता—विनष्टा, राजकुलस्य—राजवंशस्य, स्थितिः,—नियमः यस्मिन् तथोक्तः; कुमारदर्शनार्थं परितः प्रजानां पर्य्याकुलतया स्थितेरिति भावः। अधःकृतेति।—अधःकृता—पातिता, परित्यक्ता इत्यर्थः, प्रतीहाराणां—दौवारिकाणाम्, आकृतिः,—आकारः, भीषणवेषेण स्थितिरिति यावत्, यत्र तथाभूतः; यद्वा,—अधःकृता—न्यक्कृता, अगणिता इत्यर्थः, कुमारदर्शनार्थिभिरिति भावः, प्रतीहाराणाम् आकृतिः,—भयङ्करमूर्त्तिरिति यावत्, यत्र तथाभूतः। अपनीतवेत्रिवेत्रः,—अपनीतानि—त्यक्तानि, वेत्रिभिः,—वेत्रधारिभिः, लोकापसारणार्थमिति भावः, वेत्राणि—करधृतयष्टयः यस्मिन् तथोक्तः। निर्दोषेति।—निर्दोषः,—दोषरहितः, अन्तःपुरे—राजावरोधे, प्रवेशः यस्मिन् तथाभूतः, अवारितान्तःपुरप्रवेश इत्यर्थः। समेति।—समौ—तुल्यौ, स्वामिपरिजनौ—प्रभुभृत्यौ यस्मिन् तथोक्तः; अयं स्वामी, समुचितमुपचरितव्यः, अयं परिजनः, तथा नोपचरितव्य इत्येवं विचाररहित इति भावः। निर्विशेषेति।—निर्विशेषाः,—विशेषरहिताः, अभिन्ना इत्यर्थः, बालाः,—शिशवः, वृद्धाः,—स्थविराश्च यस्मिन् तथाभूतः; बालवृद्धौ परस्परं मिलित्वा तुल्यभावेन उत्सवकरणादिति भावः। समानेति।—समानाः,—तुल्यसत्काराः, शिष्टाः,—शान्ताः सन्तः, अशिष्टाः,—जडताः मूर्खाश्च, जनाः यस्मिन् तथोक्तः। दुर्ज्ञेयेति।—दुर्ज्ञेयः,—कः पानोन्मत्तः, को वा कुमारजन्मना हृष्ट इति विशिष्य निर्णेतुमशक्यः, पानेन आनन्देन च विवेकविच्युतेरुभयत्रैव तुल्यत्वादिति भावः, मत्तानां—पानोन्मत्तानाम्, अमत्तानां—प्रकृतिस्थानाञ्च जनानां, प्रविभागः,—प्रभेदः यस्मिन् तथाभूतः, सर्वेषामेव तत्र प्रमत्तत्वादिति भावः। तुल्येति।—तुल्यः,—समः, कुलयुवतीनां—कुलाङ्गनानां, वेश्यानां—वारनारीणाञ्च, विलासः,—विहारः, यस्मिन् तथोक्तः; कुलाङ्गनाः वेश्याश्च परस्परं

(१०५) अपरेद्युः आरभ्य सर्वाभ्यो दिग्भ्यः स्त्रीराज्यानि इव आवर्जितानि, असुरविवराणि इव अपाहृतानि, नारायणावरोधानि इव प्रचलितानि, अप्सरसामिव मह्यामवतीर्णानि कुलानि, (१०६) परिजनेन पृथुकरण्डपरिगृहीताः स्नानीयचूर्णावकीर्णकुसुमाः सुमनःस्रजः, स्फटिकशिलाशकलशुक्ल-

---

मिलित्वैव समभावेन विहरन्ति स्म, सर्व्वासामेव तदानीं निर्भरानन्दसन्दोहविमुग्धत्वादिति भावः। प्रवृत्तात्।—प्रकर्षेण वृत्ताः,—नर्त्तनरताः, सकलाः कटकलोकाः,—शिबिरस्थजनाः यस्मिन् तथाभूतः।

(१०५) अपरेद्युः इत्यादि।—"अपरेद्युः" ["सद्यः—" (५।३।२२ पा०) इत्यादिना निपातनात् सिद्धम्] इत्यादौ "सामन्तान्तःपुरसहस्राणि अदृश्यन्त" इत्यन्वयः। तानि एव विशिनष्टि, स्त्रीराज्यानीव इत्यादिभिः।—आवर्जितानि—आकृतानि। स्त्रीराज्यानि इव—कुमारदर्शनार्थमेकत्र सङ्गताः स्त्रीसमूहा इवेत्यर्थः; एवमादिषु प्रकृतस्य परात्मना सम्भावनोदयात् उत्प्रेक्षाऽलङ्कारः। असुरविवराणि इव—रसातलानि इव, अपाहृतानि—उद्घाटितानि, उज्ज्वलत्वादिति भावः। नारायणावरोधानि इव—कृष्णान्तःपुरिका जना इव; तथा सातिशयगौरववत्त्वात् षोडशसहस्रसङ्ख्यातत्वाच्चेति भावः, [अव अवरुध्यन्ते या: ताः अवरोधाः, इति कर्म्मणि घञ्, अवरोधशब्दस्य नियतपुंलिङ्गता; तथा हि मेदिनी,—"अवरोधस्त्रीरोधने राजदारेषु तद्गृहे" इति; एवञ्च कोषशास्त्रावरुद्धत्वात्, विद्याविरुद्धत्वदोषः विज्ञेयः; घञि आलि च निष्पादितानां नियतपुंस्त्वानुशिष्टत्वात् व्याकरणादिलक्षणहीनत्वेन वा च्युतसंस्कारत्वमूह्यम्। अवरोधानां समूहः, इत्यर्थे "तस्य समूहः" (४।२।३७ पा०) इति सूत्रेण समूहार्थे अण् कृते, अवरोधानि अवरोधानां कुलानि इत्यर्थपरत्वे तु क्लीवत्वं कथञ्चित् सम्पादनीयमिति, तथा च नाशङ्कतदोषावसर इति विवेकः]। मह्याम्—पृथ्व्याम्, अवतीर्णानि—आगतानि, अप्सरसः [अप्सु: सरन्ति इत्यर्थे "अपपूर्व्वकात् सृधातोः "असरः" (उ० ४ पा० २३६ सू०) इति असिप्रत्यये रूपम्] कुलानीव—वृन्दानीव। अप्सरसामिव सुन्दरीणां नारीणामेकत्र सङ्गतत्वादिति भावः।

(१०६) परिजनेन—दासदासीवर्गेण। पृथ्वित्यादि।—पृथुभिः,—स्थूलैः, महद्भिर्वा, करण्डैः,—समुद्गकैः, भाजनविशेषैः इत्यर्थः, परिगृहीताः,—सङ्गृहीताः। स्नानीयेति।—स्नानीयं—स्नानोपकरणं, चूर्णं, गन्धद्रव्यविशेषाणामिति भावः, तेन अवकीर्णं—युक्तम्, आकीर्णं वा, कुसुमं यासां ताः, सुमनःस्रजः,—पुष्पमाल्यानि,

कर्पूरखण्डपूरिताः पात्रीः, (१०७) कुङ्कुमाधिवासभाञ्जि भाजनानि च मणिमयानि. सहकारतैलसिक्ततनुखदिरकेसरजालजटिलानि चन्दनधवलपूगफलफालीदन्तुरदन्तशफरकाणि, (१०८) गुञ्जन्मधुकरकुलपीयमानपारिजातपरिमलानि पाटलानि पाटलकानि च. सिन्दूरपात्राणि च. पिष्टातकपात्राणि च, बाललतालम्बमानविटकवीटकांश्च ताम्बूलवृक्षान् बिभ्राणेन

"बिभ्राणेन" इत्यनेनान्वयः; एवमुत्तरत्र। स्फटिकेति।—स्फटिकं शिलाशकलं—प्रस्तरखण्डः, तदत् शुक्लेन—स्वच्छेन, कर्पूरखण्डेन पूरिताः,—आकीर्णाः, पात्रीः,—कर्पूरभाजनानि इत्यर्थः।

(१०७) कुङ्कुमेति।—कुङ्कुमान्येव—काश्मीरजान्येव, अधिवासाः,—अधिवासनद्रव्याणि, सुगन्धिद्रव्याणि इत्यर्थः, तान् भजन्ते इति तथोक्तानि, तत्पूरितानि इत्यर्थः। मणिमयानि—रत्ननिर्मितानि। सहकारेति।—सहकारस्य—अतिसौरभचूतफलस्य, तैलेन—स्नेहविशेषेण, सिक्तं, तनु—अत्यल्पं, खदिरकेसरं—खदिरसारः, तस्य जालेन—समूहेन, जटिलानि—युक्तानि, सम्भृतानि इत्यर्थः। चन्दनेति।—चन्दनवत् धवलानि—शुभ्राणि, पूगफलानि—गुवाकफलानि, तेषां फालीभिः,—शकलैः, दन्तुराणि—सञ्जातदन्तानीव लक्ष्यमाणानि, दन्तशफरकाणि—गजदन्तनिर्मितभाजनविशेषान् इत्यर्थः, [शफीपपदात् राधातोः "सृगृधृदृधृभ्य" (उ० १ पा० ३८ सू०) इति कुप्रत्यये स्वार्थे कनि रूपम्]।

(१०८) गुञ्जदिति।—गुञ्जद्भिः,—रणद्भिः, मधुकरकुलैः,—भृङ्गसङ्घैः, पीयमानः,—आस्वाद्यमानः, आघ्रायमाण इत्यर्थः, पारिजातानां—तत्पुष्पाणामित्यर्थः; राज्ञः सहाप्रभावशालित्वात् देवानां सम्मतत्वाच्च, तेन पारिजातपुष्पाणि सुलभान्येवेति बीज्यम्; यद्वा,—पारिजातानां—पारिभद्राख्यपुष्पविशेषाणां, परिमलः,—विमर्दोत्थगन्धः येषां तानि। पाटलानि—श्वेतरक्तवर्णानि, पाटलकानि—पाटलविशेषान्। ["पाटलकानि" इत्यत्र "पीटलकानि" इति पाठान्तरम्]। पिष्टातकपात्राणि—पिष्टातकं—वस्त्रवासकं सुगन्धिद्रव्यचूर्णं, ("पिष्टातः पटवासकः" इत्यमरः) तस्य पात्राणि—भाजनानि। बालेति।—बालाः,—नवाः, लताः तासु, लम्बमानानि—प्रसरन्ति इत्यर्थः, विटकवीटकानि—पञ्चाङ्गताम्बूलदलैः क्रियमाणाः खदकविशेषाः येषु तान्। ताम्बूलवृक्षान्—ताम्बूलवल्लीरित्यर्थः। बिभ्राणेन—दधता, [बिभर्तेः

(१०९) अनुगम्यमानचरणानि, कृट्टनरणितमणिनूपुरमुखरित-दिङ्मुखानि, नृत्यन्ति, राजकुलम् आगच्छन्ति, समन्तात् सामन्तान्तःपुरसहस्राणि अदृश्यन्त।

(११०) शनैः शनैः व्यजृम्भत च क्वचित् नृत्तानुचितचिरन्तनशालीनकुलपुत्रकलोकलास्यप्रथितपार्थिवानुरागः, क्वचित्

(१११) अन्तःस्मितक्षितिपालापेक्षितनर्त्तावृद्रटामासमाकृष्य-

"तान्छील्य—" (३।२।१२९ पा०) इत्यादिना वयः अर्थे कर्त्तरि चानशि रूपम्] परिजनेन इत्यस्य विशेषणम्।

(१०९) अनुगम्यमानेति।—अनुगम्यमानाः — सेव्यमानाः, चरणा येषां तानि, वन्द्यमानचरणानि इत्यर्थः। कृट्टनेति।—कृट्टनेन—दलनेन, पदविक्षेपणेन इति यावत्, ["अनुगम्यमानचरणानि, कृट्टन—" इत्यत्र "अनुगम्यमानानि, चरणनिकृट्टन—" इति पाठे,—पूर्व्वोक्तविशेषणविशिष्टेन परिजनेन अनुस्रियमाणानि। चरणयोः,—पादयोः, निकृट्टनेन—द्रुतपातनेन इत्यर्थः] रणितैः,—क्वणितैः, मणिनूपुरैः,—रत्नमयमञ्जीरैः, मुखरितानि—ध्वनितानि, दिशां मुखानि येषां यैर्वा तानि। नृत्यन्ति—क्रियमाणनर्त्तनानि इवेति प्रतीयमानोत्प्रेक्षा; यद्वा,—त्वरितगात्रविक्षेपस्यैवात्र विवक्षायाम् अपूर्व्वमृत्योद्यमात् अतिशयोक्तिरूपकानि इत्यर्थः। राजकुलं—राज्ञः,—श्रीहर्षदेवस्य, गृहम्, आगच्छन्ति—आयान्ति, कुमारदर्शनार्थमिति भावः। समन्तात्—चतुर्दिक्षु। सामन्तेति।—सामन्तानाम्—अधीनभूपतीनाम्, अन्तःपुराणि—अवरोधनार्थाः, ["ऋक्पू—" (५।४।७५ पा०) इत्यादिना समासान्ते अचि रूपम्] तेषां सहस्राणि—समूहाः। अत्राङ्गनार्थे सामन्तावरोधानां माङ्गल्यपूजोचितद्रव्यसम्भारहस्तानां राजभवनागमनौत्सुक्यं यथायथं प्रतिपादितमिति।

(११०) "शनैः शनैः व्यजृम्भत" इत्यादौ "उत्सवामोदः" इत्यत्रेणान्वयः। शनैः शनैः,—क्रमेण। व्यजृम्भत—प्रावर्त्तत। नृत्तेति।—नृत्ते—नर्त्तने, अनुचितः,—अयोग्यः, अनभ्यस्त इत्यर्थः, चिरन्तनशालीनः,—चिरलज्जाशीलः, चिरविनीत वा, [शालाशब्दात् "तदर्हति" (५।१।६३ पा०) इति खञि रूपम्] यः कुलपुत्रकलोकः,—सत्कुलजातः सुसभ्यलोकसमवायः, तस्य लास्येन—नर्त्तनेन, निरतिशयानन्दात् एतदुत्सवे एतेनापि नर्त्तितुं लज्जात्यागः कृत इति भावः, प्रथितः,—प्रकाशितः, पार्थिवस्य—राज्ञः, पार्थिवे—राज्ञि वा, अनुरागः,—प्रीतिः यस्मिन् तथाविधः।

(१११) अन्तरिति।—अन्तःस्मितेन—अन्तरीषद्धसता इत्यर्थः, स्वपुत्रजन्मनि

माणराजवल्लभः, क्वचित् (११२) मत्तकटककुट्टनीकण्ठलग्न-वृद्धार्थसामन्तनृत्तनिर्भरहसितनरपतिः, क्वचित् (११३) क्षिति-पालिमंज्ञादिष्टदुष्टदासेरकगीत-सूच्यमानसचिवचौर्यरतप्रपञ्चः, क्वचित् (११४) मदोत्कटकुटहारिकापरिष्वज्यमानजरत्प्रव्र-जितजनितजनहासः, क्वचित् (११५) अन्योऽन्यनिर्भरस्पर्द्धोद्धुर-

क्षुद्रदासीनामपि प्रमोदातिशय्यदर्शनादिति भावः, क्षितिपालेन—राज्ञा,अपेक्षिताः,—निरीक्षिताः ; यद्वा,—अपेक्षिताः,—उपेक्षिता इत्यर्थः, दृष्टनापि अदृष्टेनैव, महतामसत्प्रतिकूलत्वभाववत्त्वात् इति भावः, क्षौद्राभिः,—मद्यपानेन मत्ताभिः, क्षुद्राभिः,—इतरजातीयाभिः, दासीभिः,—परिचारिकाभिः, समाक्रुष्यमाणाः,—आक्षिप्यमाणाः, राजवल्लभाः,—राज्ञः नर्म्मसचिवा इत्यर्थः, यत्र तादृशः।

(११२) मत्तेति।—मत्तानां—मधुपानविह्वलानां, कटककुट्टनीनां—राजधानी-स्थितवारविलासिनीनां, ("कटकीऽस्त्री नितम्बोऽद्रेः··· । ···राजधानीबलयथोरपि" इति मेदिनी) कण्ठेषु—गलेषु, लग्नाः,—संसक्ताः, ये वृद्धाः,—स्थविराः, आर्याः,—साधवः, सामन्ताः,—अधीश्वरा नृपतयः, तेषां नृत्तेन—सविलासाङ्गविक्षेपरूपनर्त्त-नेन इत्यर्थः, निर्भरम्—अत्यन्तं, हसितः,—कृतहासः, नरपतिः,—सम्राट् यत्र तथा-भूतः ; विलासिनीभिः सह राजवृद्धानां नर्त्तनं स्वाभाविकमनुकूलमेव इति भावः।

(११३) क्षितिपेति।—क्षितिपस्य—राज्ञः, अज्ञिमंज्ञया—नेत्रेङ्गितेन, आदिष्टः,—आज्ञप्तः, दुष्टः—दुर्वृत्तः, यो दास्या अपत्यं दासेरकः,—दासीपुत्र इत्यर्थः,["क्षुद्राभ्यो वा" (४।१।१३१ पा०) इति पक्षे ढक्रि ततः कनि रूपम्] उष्ट्री वा, [तस्येदमित्यर्थे तत्पालक इत्यर्थः, अन्यथा सूच्यमानवानापत्तेः] तस्य गीतेन—गानेन, सूच्यमानः,—प्रकाश्यमानः, सचिवानाम्—अमात्यानां, चौर्य्येण—गोपनेनेत्यर्थः, रतप्रपञ्चः,—निधुवनविहारविलसितं यत्र तथोक्तः।

(११४) मदोत्कटेति।—मदोत्कटाभिः,—मदमत्ताभिः, कुटहारिकाभिः,—कुटं—घटं, कुम्भमिति यावत्, ("कुटः कोटे पुमानस्त्री घटे स्त्रीपुंसयोर्गृहे" इति मेदिनी) हरन्ति—वहन्ति याः तथोक्ताभिः, कुम्भ्यर्थीगेन जलवाहिनीभिः दासीभिः, परिष्वज्यमानाः,—आलिङ्ग्यमानाः, नीरेण स्वकुटपूरणार्थमिति भावः, ये जरन्तः,—स्थविराः, प्रव्रजिताः,—सन्न्यासिनः, तैः जनितः,—उत्पादितः, जनानां हासो यस्मिन् सः।

(११५) अन्योऽन्येति।—अन्योऽन्यस्मिन्—परस्परं, निर्भरस्पर्द्धा—आत्यन्तिकी

चेटकपेटकारब्धावाच्यवचनयुद्धः, क्वचित् (११६) नृपाबला-बलात्कार-नर्त्यमान-नृत्यानभिज्ञान्तःपुरपाल-भावित-भुजिष्यः, (११७) सपर्वत इव कुसुमराशिभिः, सधाराग्रह इव सौधु-प्रपाभिः, सनन्दनवन इव पारिजातामोदैः, सनीहार इव कर्पूर-रेणुभिः, साट्टहास इव पटहरवैः, सामृतमथन इव कलकलैः, सावर्त्त इव रासकमण्डलैः, सरोमाञ्च इव भूषणमणिकिरणैः,

दुर्विदग्धाः, तथा उद्धराः,—दृढाः, उन्मत्तप्राया इत्यर्थः, उच्छृङ्खला इति यावत्, प्रचण्ड-भावेन वाग्युद्धेषु रता इति भावः, ये चेटकाः—नीचदासाः, गायकनर्त्तकपरिचारक-कादय इति यावत्, तेषां पेटकेन—कदम्बकेन, समूहेन इत्यर्थः, ("पेटकः पुत्तिकादीनां सङ्घातायां कदम्बके" इति मेदिनी) आरब्धं—प्रक्रान्तम्, अवाच्यम्—अवक्तव्यं, वचनयुद्धं—युक्तकलहः, गालिरित्यर्थः, यत्र तथोक्तः; अन्योऽन्यं कुवाक्यप्रयोग एव नीचानन्दप्रद इति भावः।

(११६) नृपेति।—नृपस्य—राज्ञः, अबलाभिः,—नारीभिः, राजयोषिद्भिरित्यर्थः, बलात्कारेण—बलप्रयोगेण, नर्त्यमानाः,—नर्त्तितुं प्रवर्त्त्यमानाः, नृत्यानभिज्ञाः,—नर्त्तनज्ञानरहिताः, तथा, अन्तःपुरपालाः,—अन्तःपुररक्षिणः, तैः, तैः वा, भाविताः,—अहो एते अस्माकं नर्त्तनाज्ञतां ज्ञास्यन्तीति चिन्तिताः; यद्वा,—सतत-परिचयेन सद्भावान्विताः इत्यर्थः, भुजिष्याः,—किङ्कर्य्यः यस्मिन् तथोक्तः।

(११७) सपर्वत इति।—पर्वताकारपुष्पपूर्ण इत्यर्थः। कुसुमराशिभिः,—स्तूपीकृत-पुष्पवृष्टिभिः इत्यर्थः। सौधुप्रपाभिः,—सुरापानौदनशालिकाभिः, सधाराग्रह इव—जलधाराग्रहसमन्वित इवेत्युपमा, सौधुप्रपाधाराग्रहयोः साट्टग्रलक्ष्मासमुल्लासनात्; एवमग्रेऽपि ज्ञेयम्। पारिजातामोदैः,—पारिजातपुष्पसौरभैः, ["पारिजातामोदैः" इत्यत्र "पारिजातकामोदैः" इति पाठे,—पारिजात एवेति पारिजातकं, तस्य कामोदैः] सनन्दनवन इव—नन्दनवनं—देवोद्यानं, तत्सहित इव; देवोद्याने यथा पारिजातानामामोदः, तथा अत्रापि पारिजातवृष्टिभिरिति भावः। सनीहार इव—हिमबिन्दुसहित इव, कर्पूररेणुभिः,—कर्पूरचूर्णैः। साट्टहास इव—अट्टहासः,—उच्चैर्हासविशेषः, तेन सहित इव, पटहरवैः,—आनकध्वनिभिः। सामृतमथन इव—अमृतमन्थनसहित इव, कलकलैः,—कोलाहलैः; अमृतमथनकाले यथा देवासुराणां कलकलः सञ्जातः, तथाऽत्रापीति भावः। सावर्त्त इव—जलभ्रमसदृश-भ्रान्तिसहित इव, रासकमण्डलैः,—स्त्रीणां हस्तधारणेन मण्डलाकारेण नर्त्तनं रासः,

सपट्टबन्ध इव वन्दनललाटिकाभिः, सप्रसव इव प्रतिशब्दकैः, सप्ररोह इव प्रसाददानैः उत्सवामोदः ।

(११८) स्कन्धावलम्बमानकेसरमालाः काम्बोजवाजिन इव आस्कन्दन्तः, तरलतारका हरिणा इव उड्डीयमानाः, सगरसुता इव खनित्रैः निर्दयैः चरणाभिघातैः दारयन्तो भुवम्, अनेकसहस्रसङ्ख्याः चिक्रीडुः युवानः । कथमपि (११९) तालाव-

मालाथितस्त्रीपुरुषाणां विभक्तिभाजनत्वेन वा, [ततः स्वार्थे कन्प्रत्ययः] रासकानां मण्डलानि—समूहाः तैः । सरोमाञ्च इव—लोमहर्षसहित इव । भूषयन्ति ।—भूषणमणीनाम्—अलङ्कारीभूतानां रत्नानाम्, अलङ्कार्यैर्योजितरत्नानां वा, किरणैः,—प्रभाभिः । सपट्टबन्ध इव—सौवीरबन्ध इव, वन्दनललाटिकाभिः,—चन्दनतिलकरूपैः अलङ्कारैः । सप्रसव इव—ससन्तान इव, प्रतिशब्दकैः,—प्रतिध्वनिभिः । सप्ररोह इव—साङ्कुर इव, प्रसाददानैः,—पारितोषिकवितरणैः, पारितोषिकार्थं कोशागारादानीय प्रीतिपात्रसात्कृतैः इतस्ततः प्रक्षिप्तैः धनादिभिरित्यर्थः ; महीन्द्रामपवनैः विक्षोभितः महासिन्धुतरङ्गितनीरस्तोमः यथा मणिकादिषु न क्षमन्ति, तथा महीन्द्रवेषु महाराजदीयमानार्थसङ्घः साधारणानुजीविषु अपर्याप्ततया न समाविशन्नित्यर्थः ।

(११८) स्कन्धेति ।—स्कन्धेषु—गलदंशेषु इत्यर्थः, अवलम्बमानाः,—दोलायमानाः, केसरमालाः,—बकुलमालाः, ("केसर शिरकुल……। सिंहसटायां पुन्नागे बकुले नागकेसरे ॥" इति मेदिनी) सौवीरीमवलम्ब्य येषां तथोक्ताः । काम्बोजवाजिन इव—काम्बोजाः,—काम्बोजदेशीयाः, वाह्लीकदेशजा इत्यर्थः, वाजिनः,—अश्वा इव, आस्कन्दन्तः,—आस्फोटयन्तः, आक्रमन्तो वा, परस्परमिति शेषः, बलपरीक्षणेच्छया इति भावः । तरलतारकाः,—चञ्चलतारकाः, हरिणा इव—मृगा इव, उड्डीयमानाः,—उच्छलन्त इत्यर्थः । यद्यपि पक्षिणां गतौ प्रयुक्तस्यास्य डीयतेः व्योमगमनार्थकत्वं दृश्यते, तथापि इहातिचमत्कृत्यर्थमुत्प्लवने प्रयुक्तः, तस्य विरति बहुतरत्वात्, तेन च न प्रसिद्धित्यागाख्यः वाक्यदोषः । सगरसुता इव—सगरस्य—तदाख्यस्य राज्ञः, सुता इव—पुत्रा इव, षष्टिसहस्रसङ्ख्यका इति शेषः । खनित्रैः,—खननसाधनैः अस्त्रैः । चिक्रीडुः,—क्रीडन्ति स्म । ते खनित्रैः, एते चरणाघातैः, ते नियतसङ्ख्याकाः, एते असङ्ख्याका इति तेभ्योऽतिगौरवमितेषाम् इति हृदयम् ।

(११९) तालेति ।—तालैः,—कांस्यतालैः, करतालैरित्यर्थः, दक्षिणापथे—

चरचारणचरणक्षोभं चलमे क्षमा। (१२०) क्षितिपालकुमारकाणां खेलताम् अन्योऽन्यास्फालैः आभरणेषु मुक्ताफलानि फेलुः। (१२१) सिन्दूररेणुना पुनरुत्पन्नहिरण्यगर्भमर्भशोणितशोणाशम् इव ब्रह्माण्डकपालम् अभवत्। (१२२) पटवासपांशुपटलेन प्रकटितमन्दाकिनीसैकतसहस्रमिव शुशुभे नभस्तलम्। (१२३) विप्रकीर्ण्यमाणपिष्टातकपरागपिञ्जरितातपा भुवनक्षोभविशीर्णपितामहकमलकिञ्जल्करजोराजिरञ्जिता इव

"तालावा" इति ख्यातैः सङ्गीताङ्गीभूतभ्रमणविशेषैः वा, यदुक्तं,—"स्फुटितालिकाग्रतैर्युक्तं चारणजनस्य कैश्चिद्भ्रमणम्। तत्कांस्यतालिकयाराङ्गिष्टापच्चकुलमारिवकाः॥" अवचरन्तीति तालावचराः, तेषां, चारणानां—कुशीलवानां, नृत्यतामिति भावः, चरणक्षोभं—पदविक्षेपजनिताघातं, कथमपि—केनापि प्रकारेण, एतेन अतिबाहुल्यमुत्प्रेक्ष्यते। चलमे—सेहे। क्षमा—पृथ्वी।

(१२०) क्षितिपालकुमारकाणां—सामन्तकुमाराणाम्। खेलतां—क्रीडताम्। अन्योऽन्यास्फालैः,—परस्परास्फालनैः, आभरणेषु—अलङ्कारेषु मध्ये, मुक्ताफलानि—मौक्तिकानि, फेलुः,—विसस्मरुः प्रापुः, बिभिदुर्वा।

(१२१) सिन्दूरेति।—सिन्दूररेणुना—सिन्दूरचूर्णेन। पुनरिति।—पुनरुत्पन्नस्य—द्वितीयवारं सञ्जातस्य, हिरण्यगर्भस्य—प्रजापतेः, हर्षस्येति भावः, ब्रह्मणश्च, गर्भशोणितेन—गर्भान्निःसरणजनितप्रसृतरक्तेनेत्यर्थः, शोणाः,—रक्ताः, आशाः,—दिशो यस्य तथोक्तम्। ब्रह्माण्डकपालं—पृथ्वीतलमित्यर्थः।

(१२२) पटवासेति।—पटवासानां—वस्त्रवासकगन्धद्रव्यविशेषाणां, पांशुपटलेन—रजःसमूहेन, विचित्र्यमाणेनेति भावः; यद्वा,—पटवासाः,—वस्त्रगृहाः एव, पांशवः,—कर्पूरविशेषाः, धावल्यादिति भावः, तेषां पटलेन। प्रकटितेति।—प्रकटितं—बहिर्निःसृतं, मन्दाकिन्याः,—स्वर्गगङ्गायाः, सैकतसहस्रं—वालुकामयभूमिसमूहः यस्मिन् तथोक्तमिव। नभस्तलम्—अन्तरीक्षम्। बहलोत्क्षिप्तगन्धचूर्णधारावाहुल्यादेवमुत्प्रेक्षितम्।

(१२३) विप्रकीर्ण्यमाणेति।—विप्रकीर्ण्यमाणैः,—प्रसार्यमाणैः, पिष्टातकानां—पटवासकानां, परागैः,—रेणुभिः, पिञ्जरिताः,—रञ्जिता इत्यर्थः, आतपाः,—सूर्यमयूखाः येषु तथाभूताः। भुवनेति।—भुवनस्य—जगतः, क्षोभेण—सञ्चलनेन,

रेणुर्दिवसाः, (१२४) सङ्कटविघट्टितहारपतितमुक्ताफलपटलेषु चस्खाल लोकः।

(१२५) स्थानस्थानेषु च मन्दमन्दमास्फाल्यमानालिङ्गकेन शिञ्जानमञ्जुवेणुना (१२६) झणझणायमानझल्लरीकेण ताड्यमानतन्त्रीपटहिकेन(१२७)वाद्यमानाऽनुत्तालाऽलाबुवीणेन कल-

आनन्दनिनेनेति भावः, विशीर्णं—विदलितं, यत् पितामहकमलं—ब्रह्मकमलं, ब्रह्मण आवासीभूतं पद्ममित्यर्थः, तस्य किञ्जल्काः,—केसराः, तेषु ये रजसां—परागाणां, राजयः,—समूहाः, तैः रञ्जिता इव। रेणुः,—धूलयः।

(१२४) सङ्कटेति।—सङ्कटेन—अन्योऽन्यघर्षणेन, लोकानाम् अतिनिबिडत्वादिति भावः, विघट्टितेभ्यः,—क्लिन्नेभ्यः, हारेभ्यः पतितानि यानि मुक्ताफलानां—मौक्तिकानां, पटलानि—समूहाः, तेषु, चस्खाल—पपात, पिच्छिलत्वात् उदकानलत्वाच्च तेषामिति भावः।

(१२५) स्थानस्थानेषु—क्वचित् क्वचित् प्रदेशेषु, स्थानं—स्थितिः, मर्यादा च, तत्प्रकारकेषु इत्यर्थः, [अन्यथा "प्रकारैः—" (८।१।१२ पा०) इत्यादिना न द्विरुक्तौ कर्मधारयवद्भावः इति स्थानेषु स्थानेषु वाक्यमेव स्यात्]; यद्वा,—स्थानानां—नृपतिसाधारणाश्रयाणां, स्थानानि—प्रश्नसमण्डपादीनि तेषु इति विग्रहः, ["क्रद्योगा षष्ठी समस्यत इति वाच्यम्" (वा०) इति समासविधानात्]। "स्थानस्थानेषु" इत्यादौ "पण्यविलासिन्यः प्रानृत्यन्" इत्युत्तरेणान्वयः। ता विग्रिनष्टि, आतोद्यवाद्येनानुगम्यमाना इत्यादिभिः।—आतोद्यवाद्येनेति विग्रिनष्टि, मन्देत्यादिभिः।—मन्दं मन्दम्—ईषदीषत्, आस्फाल्यमानः,—ताड्यमानः, आलिङ्गकः,—मुरजवाद्यभेदः यस्मिन् तेन, ("हुडक्का मुरजा भेदास्तडुआलिङ्गीडुंकास्त्रयः" इत्यमरः)। शिञ्जानेति।—शिञ्जानः,—रणन्, [अदादेरात्मनेपदिनः शिञ्जिधातोः "लट—" (३।२।१२४ पा०) इत्यादिना शानचि रूपम्] मञ्जुः,—मनोज्ञः, वेणुः,—वंशीवाद्यभेदः यत्र तथोक्तेन।

(१२६) झणेति।—झणझणायमाना—झणझणेति शब्दं कुर्वाणा, झल्लरी—वाद्यभेदः यत्र ताडनेन। ताड्यमानेति।—ताड्यमाना—वाद्यमाना, तन्त्रीपटहिका—पटहवाद्यविशेषः यत्र तथोक्तेन।

(१२७) वाद्यमानेति।—वाद्यमाना—आहन्यमाना, अनुत्ताला—अनुत्ताटस्वना, अलाबुवीणा—अलाबुनिर्मिता वीणा यस्मिन् तेन। कलेति।—कला—

कांस्यकोशीक्वणितकाहलेन (१२८) समकालदीयमानानुत्तालतालकेन आतोद्यवाद्येन अनुगम्यमानाः, पदे पदे झणझणितभूषणरवैः अपि सहृदयैः इव अनुवर्त्तमानताललयाः, कोकिला इव (१२९) मदकलकाकलीकोमलालापिन्यो विटानां कर्णामृतानि अश्लीलरासकपदानि गायन्त्यः, समुण्डमालिकाः, सकर्णपल्लवाः, मचन्दनतिलकाः, समुच्छ्रिताभि-

मधुरस्वना, या कांस्यकाशी—करतालिका, तया: क्वणितेन—ध्वनितेन सह, काहलः,—तदाख्यवाद्यस्वनः यत्र तथाविधेन, ("काहलस्वरणायुधे। शब्दमात्रेऽपि पुंलिङ्गः·····" इति मेदिनी)।

(१२८) समेति —समकालं—युगपत्, दीयमानः,—सम्प्राद्यमान इत्यर्थः, अनुत्तालः,—अनुत्कटः, तालः,—स्वरविशेषः, द्वित्रमात्रादिकालक्रियामानो वा, यत्र तेन, ["तालकेन" इत्यत्र "तालकेन" इति पाठे,—कनपट्टाद्यभिधेन गानाङ्गस्वरभेदेन इत्यर्थः] आतोद्यवाद्येन—"ततं वीणादिकं वाद्यमानद्धं मुरजादिकम। वंशादिकन्तु सुषिरं कांस्यतालादिकं घनम॥ चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम।" इत्युक्तेन वाद्यविशेषेण, अनुगम्यमानाः,—सङ्गम्यमानाः। पदे पदे—प्रतिपदक्षेपं, झणझणितभूषणरवैः,—झणझणायमानालङ्करणध्वनिभिः। सहृदयैरिव—रसज्ञादिभिः सामाजिकैरिव। अनुवर्त्तमानेति।—अनुवर्त्तमानौ—अनुसरन्तौ, तालल्यौ—यथाकालं दीयमान-मानसाम्यरूपौ यासां ताः, ("तालः कालक्रियामानं लयः साम्यमथाऽक्रियाम्" इत्यमरः) तत्र हस्तेन अङ्गुल्या वा आकुञ्चनप्रसारणगतिक्रियया कालस्य परिमाणं मानं, कालक्रियायोग्य वादित्रादिदण्डायां तथाविधं मानं ताल उच्यते। लयः पुनः गीतवाद्यपादन्यासादीनां क्रियाकालयोश्च परस्परं समतारूपः इत्यवगन्तव्यम्।

(१२९) मदेति।—मदेन—मद्यपानजनितेन उल्लासेन; कलः,—मदात्—हर्षात्, कला—मधुरास्फुटा, काकली—सूक्ष्ममधुरध्वनिः, ("काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे। कलः" इत्यमरः) तया कोमलं—मृदुमन्द्रं, पेशलमित्यर्थः, मनोज्ञमिति यावत्, तद् यथा तथा, आलपन्तीति तथोक्ताः। विटानां—लम्पटानां, विलासिनामित्यर्थः, कर्णामृतानि—श्रुतिसुखानीत्यर्थः। अश्लीलेति।—अश्लीलानि—लज्जावहानि, याम्यानि इति यावत्, रसयन्तीति रासकानि—शृङ्गाररसोद्दीपनानीति भावः, पदानि—गेयवस्तूनि, गायन्त्यः,—उच्चारयन्त्यः। समुण्डमालिकाः,—सपुष्पहाराः। समुच्छ्रिताभिः,—समुत्थिताभिः, वलयावलीबाचालाभिः,—वलयराजि-

वेल्लयावल्लीवाचालाभिः बाहुलतिकाभिः सवितारम् इव आलिङ्गयन्त्यः, कुङ्कुमप्रमृष्टिरुचिरकायाः (१३०) काश्मीरकिशोर्य्य इव वल्लान्त्यः, नितम्बविम्बलम्बिविकटकुरुण्टकशेखराः प्रदीप्ता इव रागाग्निना, सिन्दूरच्छटाच्छुरितमुखमुद्राः शासनपट्टपङ्क्तय इव अप्रतिहतशासनस्य कन्दर्पस्य,

झणत्कारवतीभिः इत्यर्थः, बाहुलतिकाभिः—भुजवल्लीभिः, सवितारमिव—सूर्यमिव, आलिङ्गयन्त्यः,—आश्लिष्यन्त्यः. [आङ्पूर्वकात् लिङ्गयते: चौरादिकात् शतरि ङीपि रूपम्] नर्त्तनकाले बाहुद्वयं किञ्चित्तिर्य्यग्भावेन उन्नीय प्रमार्ष्टि च गमनात् सूर्य्यालिङ्गनं लातमिवेत्युत्प्रेक्षा। कुङ्कुमेति।—कुङ्कुमेन प्रमृष्टिः,—प्रमार्ज्जनम्, उद्वर्त्तनमित्यर्थः, रञ्जनमिति भावः, एकत्र,—सौन्दर्य्यवर्द्धनाभिलाषात् ; अन्यत्र,—कुङ्कुमचर्चेषु खोठनादिति भावः ; तया रुचिरः,—मनोज्ञः, कायः,—देहः यासां ताः।

(१३०) काश्मीरकिशोर्य्य इव—कुङ्कुमनिर्म्मिताः कुमार्य्य इव, काश्मीरदेशीयाः कुमार्य्य इव वा, [कश्यते: शब्दार्थकात् "कर्शमुट् च" (उ० ४ पा० ३२ सू०) इति ईरनि मुडागमे काश्मीरः इति, तत्र भवाः ताः इति ङेयम्] वल्लान्त्यः,—चलन्त्यः। नितम्बेति।—नितम्बविम्बेषु—नितम्बभागेषु, लम्बिनः,—लम्बमानाः, विकटाः,—आयताः इत्यर्थः, कुरुण्टकशेखराः,—आम्रातकमञ्जर्य्य इत्यर्थः, यासां तथोक्ताः, ["कुरुण्टक" इत्यत्र "कुरण्टक" इति पाठेऽपि स एवार्थः। प्रथमपाठे,—कुपूर्व्वात् कृणटेः अचि ; द्वितीये,—कुरधातोः अण्टक्प्रत्यये सिद्धिः]। प्रदीप्ता इव—प्रज्वलिताः इव, रागाग्निना—अनुरागवह्निना, आम्रातकशेखराणां रक्तत्वादिति भावः। सिन्दूरेति।—सिन्दूरच्छटाभिः,—सिन्दूरतिलकरागैः इत्यर्थः, क्षुरिताः,—रञ्जिताः, मुखमुद्राः,—मुखशोभाः, ललाटसीमन्तादयो वा, मुखाब्जेष्व मुद्रा इति वा, यासां ताः ; मुद्राविशेषाणां सिन्दूरेण रञ्जितत्वं लोके दृश्यते; अन्यत्र,—सिन्दूरच्छटाभिः,—सिन्दूरप्रभाभिः, क्षुरिताः मुखे—अग्रभागे, मुद्राः,—प्रत्ययोत्पादिन्यः चिह्नविशेषाः यासां ताः ; शासनपट्टानामग्रभागेऽपि सिन्दूरङ्किताः मुद्रा मुद्रन्ते इति लोकव्यवहारः। शासनपट्टपङ्क्तयः इव—शासनपट्टाः,—नियोगपत्राणि, "सनन्दपत्र" इति भाषया प्रसिद्धाः, तेषां पङ्क्तय इव—राजय इव। अत्र बहुवचनेन बहुनियुक्तविचक्षणशासनपट्टवद्भिः प्रतिक्षणं प्रतिस्थानं तिष्ठद्भिः, शासितुः अभङ्गशासनकारराजस्य आज्ञाभङ्गः प्रायः यथा न कैश्चिदपि सुकरः, तथा

(१३१) मुष्टिप्रक्षीयमाणकर्पूरपटवासपांशुला मनोरथमञ्चरण-रथ्या इव यौवनस्य, (१३२) उद्दामकुसुमदामताडितनगणजनाः प्रतीहार्य्य इव तरुणमहोत्सवस्य, प्रचलत्पत्रकुण्डला ललन्त्यो लता इव मदनचन्दनद्रुमस्य, (१३३) ललितपदहंसकरवमुखराः समुल्लसन्त्यो वीचय इव शृङ्गाररसस्य, (१३४) वाच्यावाच्यविवेक-शून्या बालक्रीड़ा इव सौभाग्यस्य, घनपटहरवोत्कण्टकितगात्र-

मन्मथस्य राज्ञः शासनपटहभृताः ताः दृष्ट्वा सर्वे एव दर्शकाः कन्दर्पवशीभूताः तच्छासनं स्वीचक्रुः इति अवगम्यते। अप्रतिहतशासनस्य—अस्खलितशासनस्य।

(१३१) मुष्टीति।—मुष्टिभिः,—बद्धकरैः, प्रक्षीयमाणैः,—प्रक्षिप्यमाणैः, विलासिभिरिति भावः; कर्पूरपटवासैः,—कर्पूरचूर्णैरित्यर्थः, पांशुलाः,—रजोभिराकुला इत्यर्थः। मनोरथेति।—मनोरथेन—स्वेच्छया, सञ्चरणं—भ्रमणं, तस्य रथ्या इव—पन्थान इव, यौवनस्य—तारुण्यस्य, यथेच्छमस्मिंगयौवनशालिन्य इति भावः; रथा अपि रथ्यासु सञ्चरणात् पांशुव्याप्ता भवन्ति।

(१३२) उद्दामेति।—उद्दामैः,—उत्कटैः विपुलैरित्यर्थः, कुसुमदामभिः,—पुष्पमाल्यैः, ताडिताः,—आहताः, तरुणजनाः,—युवजना याभिः तथोक्ताः। तरुण-महोत्सवस्य—तरुणानां—युवां, महोत्सवः तस्य। प्रतीहार्य्य इव—रक्षिण्य इवेत्यर्थः; प्रतीहार्य्योऽपि महोत्सवस्थले जनान् ताडयन्ति। प्रचलत्पत्रकुण्डलाः,—प्रचलन्ति—वृथावेगात् चाचल्यमानानीत्यर्थः, पत्राणि—किसलया एव, कुण्डलानि—कर्णभूषणानि; अत्रैव,—पत्राणि कुण्डलानीव यासां ताः; अत एव ललन्त्यः,—स्फुरन्त्यः, ["ललन्त्यः" इत्यत्र "लसन्त्यः" इति पाठेऽपि स एवार्थः] लता इव—व्रतत्य इव। मदनचन्दनद्रुमस्य—मदनः,—काम एव, चन्दनद्रुमः,—चन्दनतरुः, तस्य।

(१३३) ललितेति।—ललितानि—रमणीयानि, पदानि—चरणानि, तेषु हंसकाः,—नूपुराः, ("पादाङ्कदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्। हंसकः पाद-कटकः" इत्यमरः) क्षुद्रहंसाश्च, [अल्पार्थे कन्प्रत्ययः] तेषां रवेण—ध्वनिना, मुखराः,—शब्दिताः; यद्वा,—ललितानि पदानि यासां ताश्च ताः हंसकरवमुखराश्च तथाभूताः। समुल्लसन्त्यः,—समुल्लासमानाः। वीचय इव—तरङ्गा इव। शृङ्गार-रसस्य—प्रधानीभूतरसस्य, रसस्य—जलस्य च।

(१३४) वाच्येति।—वाच्यं—वक्तव्यम्, अवाच्यम्—अवक्तव्यं, तयोर्विवेकेन—विचारेण, शून्याः,—रहिताः, यथाकामं व्याहारिण्य इत्यर्थः। बालक्रीड़ा इव—प्राथ-

यष्टयः केतक्य इव कुसुमधूलिमुद्गिरन्त्यः, कमलिन्य इव दिवसमुत्फुल्लाननाः, कुमुदिन्य इव रात्रावनुपजातनिद्राः, (१३५) आविष्टा इव नरेन्द्रवृन्दपरिवृताः, प्रीतय इव हृदयमपहरन्त्यः, गीतय इव रागमुद्दीपयन्त्यः, पुष्टय इव आनन्दमुत्पादयन्त्यः; मदमपि मदयन्त्य इव, रागमपि रञ्जयन्त्य इव, आनन्दमपि आनन्दयन्त्य

मिकावज्ञानमिव; ("क्रीडाकेलिप्रकारे स्यात् खिलाऽवज्ञानयोरपि" इति मेदिनी), नवाभ्युदयमागच्छन् दरिद्रः अविवेकी यथा तत्सौभाग्यमर्दन यथेच्छव्यवहारः शिष्टाशिष्टजनविषयकविवेकविच्युतः वाच्यावाच्यज्ञानशून्यो भवति, तथैव ताः पण्ययोषितोऽपि नृत्यकालेऽभवन् इत्याशयः। सौभाग्यस्य—शुभाद्दृष्टविलासस्य। घनेति।—घनेन—गम्भीरेण, पटहस्य—वाद्यविशेषस्य, नृत्यसमकालं ताड्यमानस्येत्यर्थः, रवेण—ध्वनिना; अन्यत्र,—घनः,—मेघ एव, पटहः,—वाद्यविशेषः, तस्य ध्वनिना—रवेण, उत्कण्टकिताः,—उद्गतलोमहर्षाः; सहसा वाद्यध्वनिश्रवणादिति भावः; अन्यत्र,—प्रकटितकण्टकाः; गावयष्टयः,—अङ्गलताः यासां तथोक्ताः; अथवा,—गावाणीव यष्टयः,—लताः यासां ताः। केतक्य इव—केतकलता इव। कुसुमधूलिं—पुष्पपरागम्, उद्गिरन्त्यः,—उत्क्षिपन्त्य इत्यर्थः। दिवसं—दिनं व्याप्य। उत्फुल्लाननाः,—उत्फुल्लानि—प्रफुल्लानि, आननानि—मुखानि, प्रियवयस्याभिः सह हृद्यनायकविषयकालापेन इति भावः, यासां ताः; अन्यत्र,—विकसिताः; कमलिनीनां दिवाविकाशित्वात्। अनुपजातनिद्राः,—न उपजाता—उपगता, कान्तसङ्गातिशय्यात्; राजसभादौ नर्तनादिविलासव्यापारवत्त्वात् वा इति भावः, निद्रा—स्वापः यासां ताः, अनिमीलन्त्यश्च, कुमुदिनीनां रात्रिविकाशित्वादिति भावः।

(१३५) आविष्टा इव—अधिष्ठिता इव, भूतादिभिरिति शेषः। नरेन्द्रेति।—नरेन्द्राणां—राज्ञां, भूतवैद्यानाञ्च, भूतापसारणमन्त्रविदामित्यर्थः, ("नरेन्द्रस्तु महीपाले विषवैद्ये च पुंस्ययम्" इति मेदिनी, अत्र चकारग्रहणात् भूतवैद्यादयः तदर्थकाः ज्ञेयाः) वृन्दैः,—समूहैः, परिवृताः,—वेष्टिताः; पिशाचोपहृता जना यथा भूतवैद्यपरिवेष्टिताः भवन्ति, तथा पण्ययोषितः अपि राजवृन्दपरिवृता आसन्निति भावः, इति अवैधर्म्यसाम्यादुपमालङ्कारः। हृदयमपहरन्त्यः,—मनोहारिण्यः। रागं—वासनाविशेषम्, आसङ्गलिप्सामिति यावत्, उद्दीपयन्त्यः,—उत्तेजयन्त्यः। पुष्टय

इव, नृत्यमपि नर्त्तयमाना इव, उत्सवमपि उत्सुकयन्त्य इव, (१३६) कटाक्षितेषु पिबन्त्य इवापाङ्गशुक्तिभिः, तर्जनेषु संयमयन्त्य इव नखमयूखपाशैः, कोपाभिनयेषु ताड़यन्त्य इव भ्रूलतातिभागैः प्रणयसम्भाषणेषु वर्षन्त्य इव सर्व्वरसान्, चतुरचङ्क्रमणेषु विकिरन्त्य इव विकारान्,पर्य्यविलासिन्यः प्रानृत्यन्।

इव—स्फूर्त्त्य इव इत्यर्थः। मदमपि—मत्ततामपि, मदयन्त्यः,—समुत्तेजयन्त्य इत्यर्थः; मदो हि सर्वेषामुत्तेजको भवति, मदस्तु ता आश्रित्य स्वयमेव उत्तेजितोऽभवत् इति भावः। एवमुत्तरत्रापि सङ्गतिः करणीया; अत्र मदादीनां यदि एतादृशी दशा तदा का कथा मदभिन्नानामिति अपिकारलभ्योऽर्थः। रागं—सम्भोगाभिलाषमित्यर्थः। रञ्जयन्त्यः,—उल्लासयन्त्य इत्यर्थः। उत्सवम्—आनन्दजनकानुष्ठानमिति यावत्। उत्सुकयन्त्यः,—उत्सुकं कारयन्त्यः; ["तत्करोति तदाचष्टे" (गः) इति ण्यन्तादुत्सुकात् शतरि ङीपि रूपम्] उत्सवदर्शनार्थं सर्वे उत्कण्ठिता भवन्ति, उत्सवस्तु स्वयमेव ताः दृष्टुमुत्सुको जातः इति भावः। [मदादिषु वाक्यनिकरेषु लोकोत्तरचमत्कारातिशयजननोन्मादनादिक्रिया उत्प्रेक्षिता इति क्रियोत्प्रेक्षाऽलङ्कारः]।

(१३६) कटाक्षितेषु—कटाक्षविक्षेपेषु इत्यर्थः। ["तदस्य सञ्जातं—" (५।२।३६ पा०) इत्यादिना इतचि रूपम्] अपाङ्गशुक्तिभिः,—अपाङ्गाः,—नेत्रप्रान्तभागा एव, ("अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः) शुक्तयः,—मुक्तास्फोटाः, ("मुक्तास्फोटः स्त्रियां शुक्तिः" इत्यमरः) ताभिः, पिबन्त्य इव—गृह्णन्त्य इव, तरुणानिति शेषः; लोकेऽपि शुक्तिभिर्दुग्धादिपानीयं पिबन्ति। [दुग्धादिपानवत् शुक्तिभिः तरुणपानमसम्बद्धमिति विरोधः, ताभिः प्रियहृदयाकर्षणत्वेन स्वान्तः प्रियमूर्त्तिधारणत्वेन वा आभासीक्रियते इति विरोधाभासः उत्प्रेक्षासङ्कीर्णः] तर्जनेषु—अङ्गुलिताड़नविशेषेषु, नखमयूखपाशैः,—नखानां मयूखाः,—किरणाः, पाशाः,—रज्जव इव, तैः, संयमयन्त्य इव—सम्बध्नन्त्य इव। कोपाभिनयेषु—कोपसूचकाङ्गचेष्टासु। भ्रूलताऽतिभागैः,—भ्रूलताऽभिघातैरित्यर्थः। ["भ्रूलताऽतिभागैः" इत्यत्र "भ्रूलताऽऽदिभागैः" इति पाठे,—भ्रूनेत्रमुखप्रभृत्यवयवैरित्यर्थः] प्रणयसम्भाषणेषु—प्रेमालापेषु। वर्षन्त्यः इव—मुञ्चन्त्य इव। सर्व्वरसान्—सर्व्वान्—सम्पूर्णान्, न तु किञ्चिन्न्यूनानिति भावः, रसान्—शृङ्गाररूपान्, अनुरागरूपान् वा। चतुरचङ्क्रमणेषु—विदग्धभ्रमिषु, नृत्यकाले सविलासघूर्णनेषु इत्यर्थः। विकिरन्त्य इव—विक्षिपन्त्य इव। विकारान्—विकृतभावविशेषान्, तरुणानामिति शेषः।

(१३७) अन्यत्र वेत्रिवेत्रवित्रासितजनदत्तान्तरालाः, म्रियमाणधवलातपत्रवना वनदेवता इव कल्पतरुतलविचारिण्यः, काश्चित् (१३८) स्कन्धोभयपार्श्वलम्बमानलम्बोत्तरीयलग्नालीलादोलाऽधिरूढा इव प्रेङ्खन्त्यः, काश्चित् (१३९) कनककेयूरकोटिपाद्यमानपट्टांशुकोत्तरङ्गाः तरङ्गिण्य इव तरत्सक्रवाकसीमन्त्यमानस्रोतसः, काश्चित् (१४०) उड्डयमानधवलचामरसटालग्नत्रिकण्टकवलितविकटकटाक्षाः सरस्य इव हंसाकृष्य-

---

(१३७) "अन्यत्र" इत्यादौ "राजमार्गेभ्यः प्रारब्धनृत्याः विविजुः" इत्युत्तरवाक्यान्वयः। ता विशिनष्टि, वेत्रीत्यादिभिः।—वेत्रिभिः,—वेत्रपाणिभिः, द्वौवारिकैरिति यावत्, वेत्रैः,—वेत्रप्रदर्शनैः, वेत्राघातैश्च, विवासितैः,—विशेषेण भीषितैः, जनैः दत्तम् अन्तरालम्—अवकाशः यासां ताः, नृत्यदर्शनार्थिभिः अतिनिबिडतया नृत्यस्थानाक्रमणात्, प्रायशस्तासामङ्गोपरि आपतनाशङ्केति भावः। म्रियमाणेति।—म्रियमाणानि—मस्तकोपरि उत्क्षाप्यमानानीत्यर्थः, परिचारिकाभिरिति शेषः, धवलानि—श्वेतानि, आतपत्रवनानि—छत्रसङ्घाः यासां तथोक्ताः। वनदेवता इव—वनाधिष्ठातृदेव्य इव; अधिकारिणां सर्व्वत्र समानाचारवत्त्वात इति भावः। कल्पेति।—कल्पतरूणां—कल्पद्रुमाणां, तलेषु—अधोदेशेषु, विचरन्ति—विहरन्तीति तथोक्ताः।

(१३८) स्कन्धेति।—स्कन्धयोः—भुजशिरसः, उभयोः पार्श्वयोः,—कोणयोः, भागयोरित्यर्थः, लम्बमानं—दोलायमानं, लम्बं—दीर्घं, यत् उत्तरीयम्—उत्तरासङ्गः, तस्मिन् लग्नाः,—संसक्ताः, अत एव लीलेति।—लीलादोला—क्रीडादोलायन्त्रम्, अधिरूढा इव—अधिष्ठिता इव, प्रेङ्खन्त्यः,—सञ्चरन्त्यः।

(१३९) कनकेति।—कनककेयूराणां—काञ्चनाङ्गदानाम्, अत्र कनकपदेन चक्रवाकसाम्यं प्रकटीकृतं, तेषां कनकाभत्वात; कोटिभिः,—अग्रभागैः, पाद्यमानः,—क्षिप्यमानः, अन्योऽन्यसङ्घर्षणेन इति भावः, पट्टांशुकस्य—कौशेयवसनस्य इत्यर्थः, उत्तरङ्गाः,—उत्तरीयं यासां तथोक्ताः; अन्यत्र,—उच्छलद्वीचयः इत्यर्थः, अत एव तरङ्गिण्य इव—नद्य इव। तरदिति।—तरद्भिः,—प्लवमानैः, चक्रवाकैः,—स्वर्णाभपक्षिविशेषैः, सीमन्त्यमानानि—द्विधा क्रियमाणानि, स्रोतांसि—स्रोतःप्रवाहाः यासां तथाभूताः।

(१४०) उड्डयमानेति।—उड्डयमानानां—वीज्यमानानां, धवलानां—श्वेतानां,

मानलोलोत्पलवनाः, काश्चित् (१४१) चलच्चरणच्युतालक्तककृतखेदशीकरसिच्यमानभवनहंसाः सन्ध्यारागरज्यमानेन्दुबिम्बा इव कौमुदीरजन्यः, काश्चित् (१४२) कण्ठनिक्षिप्तकाञ्चनकाञ्चीगुणार्पितकञ्चुकिविकारकुञ्चितभ्रुवः, कामवागुरा इव प्रसारितबाहुपाशा राजमहिष्यः प्रारब्धनृत्या विरेजुः।

चामराणां—बालव्यजनानां, सटासु—लोमसु, लग्नः,—संसक्तः, यः विकटकः,—"विकटकस्तु व्यूहः स्यात् विभीरत्नैश्च भूषणम्" इत्युक्तलक्षणः रत्नमयघटितकर्णाभरणभेदः, तेन वलिताः,—सञ्चलिताः, सङ्कुचिताः इत्यर्थः वा, विकटाः,—उत्कटाः, विशालाः वा, आकर्षणेन कर्णपीडाऽनुभवात् शालीन्यातिशय्यात् वा इति भावः, कटाक्षाः,—अपाङ्गावलोकनानि यासां तथोक्ताः, अत एव सरस्य इव—वाप्य इव। हंसैः।—हंसैः,—मरालैः, आक्रम्यमाणानि—आक्षिप्य नीयमानानि, नीलोत्पलवनानि यासां तथाविधाः।

(१४१) चलदिति।—चलद्भ्यां—सञ्चरद्भ्यां, चरणाभ्यां—पादाभ्यां, च्युतानि—निर्गलितानि, अलक्तकानि—लाक्षाद्रवाणि, अरुणाः,—रक्ताः, स्वेदा इव, तेषां शीकरैः,—बिन्दुभिः, सिच्यमानाः,—रज्यमाना इति यावत्, भवनहंसाः,—गृहपालितहंसविशेषाः याभिः तथोक्ताः, अत एव सन्ध्यायाः,—सन्ध्यौ भवा, सन्ध्यायते परब्रह्म अस्यामिति वा तस्याः, रागः,—लौहित्यं, तेन रज्यमानं—लौहितायमानम्, इन्दुबिम्बं—चन्द्रबिम्बं यासां ता इव, कौमुदीरजन्यः,—"कौ मोदन्ते जना यस्यां नानाभावैः परस्परम्। कुष्टास्तुष्टाः सुखापन्नास्तेन सा कौमुदी स्मृता॥" इत्युक्तलक्षणाः कार्त्तिकज्योत्स्नापूर्णा रात्रय इत्यर्थः। शीतलोज्ज्वलोदारकान्तिमतीनां नृपाङ्गनानां चन्द्रिकारजनीसाम्येन, हर्षोद्दीपनशक्त्यतिशयः सूच्यते।

(१४२) कण्ठेति।—कण्ठेषु—गलेषु, निक्षिप्तेन—अर्पितेन, काञ्चनकाञ्चीगुणेन—सौवर्णमेखलादाम्ना, अर्पितानां—पूजितानां, परिहासार्थं नियन्त्रितानां वा, कञ्चुकिनाम्—"अन्तःपुरचरो वृद्धो वर्षीयो गुणगणान्वितः। सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" इत्युक्तलक्षणानाम् अन्तःपुरचारिणां दौवारिकविशेषाणां, विकारेण—विकृतभावेन, कण्ठे काञ्चीप्रदानादिति भावः, कुञ्चिता—कुटिलिता, ["विकारकुञ्चित—" इत्यत्र "विकाराकुञ्चित—" इति पाठे,—आकुञ्चिता—ईषत् कुटिलिता इत्यर्थः] भ्रूः यासां तथोक्ताः; कञ्चुकिनः विकारदर्शनेन तस्य तत्परिधाने अनिच्छां बुद्ध्वा ईषत्क्रोधभावप्रकटनार्थम् इति भावः। कामवागुरा इव—कामस्य

सर्व्वतश्च नृत्यतः (१४३) स्त्रैणस्य गलद्भिः पदालक्तकैः अरुणिता रागमयीव शुशोण क्षौणी। (१४४) समुल्लसद्भिः स्तनमण्डलैः मङ्गलकलशमय इव बभूव महोत्सवः। (१४५)भुजलताविक्षेपैः मृणालवलयमय इव रराज लोकः। समुल्लसद्भिः (१४६) विलासस्मितैः तडिन्मय इव अक्रियत कालः। (१४७) चञ्चलानां चक्षुषाम् अंशुभिः कृष्णशारमया इव आसन् वासराः। समुल्लसद्भिः शिरीषकुसुमस्तवककर्णपूरैः शुक-

युवजनबन्धनसाधनानि यन्त्राणि इव इत्यर्थः. ["मन्त्रादयश्च" (उ० १ पा० ४२ सू०) इत्युरजन्तानाम् आकृतिगणत्वात् एतत् सिद्धम्]। प्रसारितौ—विस्तारितौ, नर्त्तनवशादिति भावः, बाहू—भुजौ, पाशौ—रज्जू इव यानिः तथाभूताः। प्रारब्धनृत्याः, —नृत्यन्त्यः इत्यर्थः। विरेजुः,—युयुधिरे, ["विरेजुः" इत्यत्र "विलिसुः" इति पाठे, —चिक्रीडुरित्यर्थः]।

(१४३) स्त्रैणस्य—स्त्रीणां समूहः स्त्रैणं, तस्य, ["तस्य समूहः" (४।२।३७ पा०) इति अण्, "स्त्रीपुंसाभ्यां—" (४ । १ । ८७ पा०) इत्यादिना नञ्, इति सिद्धम्]। गलद्भिः,—स्रवद्भिः, पदालक्तकैः,—चरणलाक्षारसैः। अरुणिता—रक्तीकृता। रागमयीव—रञ्जनमयीव, अनुरागमयीव वा। शुशोण—शोणमयी बभूव इत्यर्थः, रक्तवर्णा जाता इति यावत, ["सर्व्वपातिपदिकेभ्यः क्विब्वा" (वा०) इति आचारक्विबन्तात् शोणाक्विटि रूपम]। क्षौणी—पृथ्वी।

(१४४) समुल्लसद्भिः,—समुल्लासमानैः। मङ्गलकलशमयः,—मङ्गलार्थंस्थापितघटपूर्णः, स्तनयोः कलशसाम्यतया वर्णनस्य कविसमयसिद्धत्वादिति भावः।

(१४५) भुजलताविक्षेपैः,—बाहुवल्लीचालनैः, मृणालवलयमय इव—भुजलतानां मृणालवत् कोमलाकारत्वादिति भावः।

(१४६) विलासस्मितैः,—विभ्रमहसितैः। तडिन्मय इव—सौदामनीविकाश इवेत्यर्थः, हृदयहारिणां तेषां विद्युत्स्फुरणवदचिरस्थायित्वादिति भावः। कालः,—होरादिरूपः, क्षणश्च।

(१४७) चञ्चलानां—पुनःपुनश्चलताम्। अंशुभिः,—किरणैः। कृष्णशारमया इव—तदाख्यमृगविशेषमया इव; श्वेतमण्डलमध्यवर्त्तिकृष्णोज्ज्वलतारत्वात् चक्षुषामिति भावः। वासराः,—दिवसाः। शिरीषेति।—शिरीषकुसुमानां—शिरीष-

पिच्छमय इव हरितच्छायोऽभूत् आतपः। (१४८) विस्रंसमानैः धम्मिल्लतमालपल्लवैः कज्जलमयम् इव अलक्ष्यत अन्तरिक्षम्। (१४९) उत्त्रिप्तैः हस्तकिशलयैः कमलिनीमय्य इव बभासिरे क्षत्तयः। (१५०) माणिक्येन्द्रायुधानाम् अर्चिषा चाषपत्रमया इव चकाशिरे रविमरीचयः। (१५१) रणताम् आभरणगणानां प्रतिशब्दकैः किङ्किणीमय्य इव शिशिञ्जिरे दिशः। (१५२) जरत्योऽपि उन्मादिन्य इव रमण्यो रेणुः। (१५३) वर्षीयांसोऽपि ग्रहगृहीता इव न अपत्रपिरे। विद्वांसोऽपि मत्ता इव आत्मानं

पुष्पाणां, स्तवकाः,—गुच्छका एव, कर्णपूराः,—कर्णभूषणानि, तैः। शुकपिच्छमयः,—शुकाख्यपक्षिपक्षमय इवेत्यर्थः। हरितच्छायः,—श्यामलकान्तिः।

(१४८) विस्रंसमानैः,—स्खलद्भिः। धम्मिल्लेति।—धम्मिल्लेषु—संयतेषु केशेषु, ("धम्मिल्लाः संयताः कचाः" इत्यमरः) स्थिता ये तमालपल्लवाः,—तमालतरुकिसलयाः तैः, कज्जलमयमिव—अञ्जनमयमिव, तमालपल्लवानां कृष्णवर्णत्वादिति भावः।

(१४९) उत्त्रिप्तैः,—उद्वमितैः। हस्तेति।—हस्ताः किसलयाः,—पल्लवा इव तैः। कमलिनीमय्यः,—कमलमयस्थानानीव; हस्तानां कोमलत्वादारक्तत्वाच्चेति भावः। बभासिरे—शुशुभिरे। क्षत्तयः,—सर्गाः, जगन्ति इत्यर्थः।

(१५०) माणिक्येन्द्रायुधानां—माणिक्यानि—उत्कृष्टानि रत्नानि, इन्द्रायुधानीव—शक्रचापानीव, तेषाम्, अर्चिषा—प्रभया, चाषपत्रमयाः,—नीलकण्ठेतिप्रसिद्धकिकीदिविपक्षिपक्षमयाः इव, ("अथ चाषः किकीदिविः" इत्यमरः)। रविमरीचयः,—सूर्यमयूखाः; चाषपत्राणाम् इन्द्रधनुर्वत् नानावर्णत्वादिति भावः।

(१५१) रणतां—झणत्कारवताम्, आभरणगणानाम्—अलङ्कारजातानां, प्रतिशब्दकैः,—प्रतिध्वनिभिः, किङ्किणीमय्य इव—किङ्किणयः,—क्षुद्रघण्टिकाः, ("किङ्किणी क्षुद्रघण्टिका" इत्यमरः) तन्मय्य इव, शिशिञ्जिरे—ध्वनन्ति स्म।

(१५२) जरत्योऽपि—स्थविरा अपि। उन्मादिन्य इव—चित्ता इव। रेणुः,—अङ्गितवस्त्रः।

(१५३) वर्षीयांसः,—अतिवृद्धाः। ग्रहगृहीता इव—भूताद्याविष्टा इव। न अपत्रपिरे—न लज्जितवन्तः, नर्त्तनादिषु इति शेषः; अपूर्वानन्दोदयेन ते सहज-

विसस्मरुः। (१५४) निनर्त्तिषया मुनीनामपि मनांसि विपुस्फुरुः। सर्व्वस्वञ्च ददौ नरपतिः। दिशि दिशि (१५५) कुबेरकोषा इव अलुप्यन्त लोकेन द्रविणराशयः।

(१५६) एवञ्च वृत्ते तस्मिन् महोत्सवे शनैः शनैः पुनरपि अतिक्रामति काले, देवे च (१५७) उत्तमाङ्गनिहितरक्षासर्षपे, समुन्मिषत्प्रतापाग्निस्फुलिङ्ग इव गोरोचनापिञ्जरितवपुषि, (१५८) समभिव्यज्यमानसहजक्षात्रतेजसि इव हाटकवल-

---

मार्ज्जीर्यमपहाय उन्मत्तवत् आचरन्ति स्म इति भावः। मत्ताः,—मदानन्दविह्वलाः। विसस्मरुः,—विस्मृतवन्तः।

(१५४) निनर्त्तिषया—नर्त्तितुमिच्छया। विपुस्फुरुः,—विशेषेण स्फुरन्ति स्म। विरागिणामपि वासनारहितेऽपि हृदये नर्त्तनानुरागोदयः, किं वक्तव्यमन्येषाम्? इत्याशयः। ["विपुस्फुरुः" इत्यत्र "विपुस्फुलुः" इति पाठेऽपि स एवार्थः]। सर्व्वस्वं—कृत्स्नं धनम्।

(१५५) कुबेरकोषा इव—कुबेरस्य—धनाधिपस्य देवस्य, ["कुल्लेर्लोपश्च" (उ० १ पा० ६० सू०) इति कुविधातोः एरचि लोपे रूपम्, अत्यर्थालीयं धातुः इत्येके] कोषा इव—भाण्डागाराणीव, अक्षयाणि इति भावः। द्रविणराशयः,—धनराशयः। लोकेन—अर्थिजनेन इति भावः। अलुप्यन्त—हृतानि इत्यर्थः।

(१५६) "एवञ्च" इत्यादौ "देवी यशोवती गर्भेण आधत्त·····राज्यश्रियम्" इत्युत्तरेणान्वयः। वृत्ते—अवसिते इत्यर्थः। अतिक्रामति—अतिगच्छति। "देवे" इत्यादिपदं "हर्षे" इत्यस्य विशेषणम्।

(१५७) उत्तमेति।—उत्तमाङ्गे—शिरसि, निहितानि—रचितानि, रक्षासर्षपाणि—भूताद्युपद्रवेभ्यः रक्षणार्थं मन्त्रपूतसर्षपाणीत्यर्थः, यस्य तथोक्ते। समुन्मिषदिति।—समुन्मिषन्तः,—बहिःस्फुरन्तः, प्रतापाग्नेः, अन्तःस्थितस्येति भावः, स्फुलिङ्गाः,—कणसमूहाः यस्य तथाभूते इव। गोरोचनेति।—गोरोचनया—तदाख्येन पीतवर्णसाङ्गलिकद्रव्यभेदेन, पिञ्जरितं—पिङ्गलितं, रञ्जितमित्यर्थः, वपुः,—शरीरं यस्य तथोक्ते।

(१५८) समभीति।—समभिव्यज्यमानं—सम्यक् स्फुटीभवदित्यर्थः, सहजं—स्वाभाविकं, क्षात्रं—क्षत्रियोचितं, तेजः,—प्रतापः यस्य तथाभूते इव। हाटकेति।—हाटकेन—काञ्चनेन, ("स्वर्णे सुवर्णे कनकं हिरण्यं हेम हाटकम्" इत्यमरः)

विकटव्याघ्रनखपङ्क्तिमण्डितग्रीवके, (१५९) हृदयोद्भिद्यमानदर्पाङ्कुर इव प्रथमाव्यक्तजल्पितेन सत्यस्य शनैः ओङ्कारमिव कुर्वाणे, मुग्धस्मितैः कुसुमैरिव मधुकरकुलानि बन्धुहृदयानि आकर्षति, (१६०) जननीपयोधरकलशपयःशीकरसेकादिव जायमानैः विलासहसिताङ्कुरैः दशनकैः अलङ्क्रियमाणमुखकमलके, (१६१) चरित्रे इव अन्तःपुरस्त्रीकदम्बकेन पाल्य-

---

वद्धा—नियन्त्रिता, विकटा—भीषणा, व्याघ्रस्य—शार्दूलस्य, नखपङ्क्तिः,—नखरराजिः, तया मण्डिता—अलङ्कृता, ग्रीवा—कण्ठदेशः यस्य तथाभूते। विष्वेभ्यः बालस्य रक्षाविधानार्थं स्वर्णादिमण्डितव्याघ्रनखमालिकया बालकग्रीवाऽवरुद्धं क्रियते इति लोकाचारः।

(१५९) हृदयेति।—हृदये—मनसि, उद्भिद्यमानः,—उद्भेदं गच्छन्, दर्पस्य—अहङ्कारस्य, स्वर्द्धया इत्यर्थः, अङ्कुरः,—प्ररोहः यस्य, तथाभूत इव ; मानीभूतानां मानाङ्कुरोद्भव: जन्मसहज: इत्याशयः। प्रथमाव्यक्तेति।—प्रथमं—वाक्स्फुरणप्रारम्भे इत्यर्थः, यत् अव्यक्तम्—अस्फुटं, जल्पितं—वचनं तेन। सत्यस्य—सत्ययुगस्य, सत्यवचसो वा। ओङ्कारमिव—प्रणवमिव, तस्य अपरमवयवशब्दया अस्पष्टतया उच्चार्यत्वादिति भावः ; यद्वा,—ओङ्कारमिव—अभ्युपगममिव, स्वीकारमिवेत्यर्थः, कुर्वाणे—उच्चारयतीत्यर्थः ; अवश्यमेव सत्ययुगाचारं प्रवर्तयामि, सत्यमेव वच्मि, नानृतमिति वा सदर्पम् अभिव्याहरतीति भावः। मुग्धस्मितैः,—ईषद्विकासैः। बन्धुहृदयानि—बन्धुजनमनांसि ; प्राकृतिकसारूप्यमेव बन्धुहृदयावर्जनकारणमिति भावः।

(१६०) जननीति।—जनन्याः,—मातुः यज्जीवत्याः, ["अस्त्रिय—" (उ० २ पा० १०३ सू०) इत्यत्र वार्तिककारेण तत्रो ङीपि रूपम्] पयोधरौ—स्तनौ, पयोधरात्,—मेघात्, तौ कलशौ इव, तयोः, ते कलशा इव इति च, जलाधारत्वादिति भावः, तेषां पयःशीकरसेकादिव—पयसां—दुग्धानां, जलानां च, शीकराः,—बिन्दवः, तेषां सेकात्—सेचनात्, वदने इति भावः। जायमानैः,—उत्पाद्यमानैः, विलासहसिताङ्कुरैः,—लीलाहासप्ररोहैः ; जलसेकात् भूमावपि अङ्कुरः उद्भवति ; दशनकैः,—दन्तैः, अलङ्क्रियमाणं—शोभां नीयमानं, मुखकमलं—वदनपद्मं, यस्य तथाभूते।

(१६१) चरित्रे इव—सच्चरित्रे इव ["चरित्रे इव" इत्यत्र "चारित्रे इव"

माने, (१६२) मन्त्रे इव सचिवमण्डलेन रक्ष्यमाणे, वृत्ते इव कुलपुत्रकलोकेन अमुच्यमाने, यशसीव आत्मवंशेन संवर्द्ध-माने, (१६३) मृगपतिपोते इव रक्षिपुरुषशस्त्रपञ्जरमध्यगते, (१६४) धात्रीकराङ्गुलिलग्ने (१६५) षड्वर्षाणि पदानि प्रयच्छति हर्षे, षष्ठं वर्षम् अवतरति च राज्यवर्द्धने, देवी यशोवती गर्भेण आधत्त (१६६) नारायणमूर्त्तिरिव वसुधां देवीं राज्यश्रियम्।

इति पाठान्तरम्]। अन्तःपुरस्त्रीणां कदम्बकेन—समूहेन, पाल्यमाने—रक्ष्यमाणे, लाल्यमाने वा, यथा अन्तःपुरिकाभिः स्वकरिवं रक्ष्यते, तथा अस्मिन् रक्ष्यमाणे इत्यर्थः।

(१६२) मन्त्रे इव—मन्त्रितविषये इव। सचिवमण्डलेन—मन्त्रिसमूहेन, रक्ष्यमाणे—गोप्यमाने इत्यर्थः, अमुजनात् दुष्टजनाद् वा इति शेषः; "षट्कर्णो भिद्यते मन्त्रः" इत्युक्तेर्मन्त्रस्य अतिगोपनमेव कर्त्तव्यमिति भावः। वृत्ते इव—सदाचारे इव, कुलपुत्रकलोकेन—सत्कुलजनसमूहेन, अमुच्यमाने—अत्यज्यमाने, रक्ष्यमाणे इति यावत्। आत्मवंशेन—निजकुलेन, संवर्द्ध्यमाने—सम्यक् वृद्धिं नीयमाने। यशोवृद्धौ वंशान्नतिरेव प्रधानं कारणं, सामन्तिकमहापुरुषोत्पत्तिप्रसङ्गात् इति भावः।

(१६३) मृगपतिपोते इव—सिंहशिशाविव। रक्षेति।—रक्षिपुरुषाणां—प्रहरिजनानां, शस्त्राणि—खड्गादय आयुधा एव, पञ्जराणि—पिञ्जराणि; तेषामन्तः शस्त्ररचितपरिवृतत्वादिति भावः, तन्मध्यगते—तदभ्यन्तरस्थिते।

(१६४) धात्रीकराङ्गुलिलग्ने—उपमाढौकत्ताङ्गुलिधारिणि।

(१६५) षड्वर्षाणि—षट् वा षड् वा, [बहुव्रीहौ "सर्व्वनामसङ्ख्ययोरुप-सङ्ख्यानम्" (वा०) इत्यत्र "सङ्ख्याया अल्पीयस्याः" इति इति:, तथात्र पूर्व्वनिपातः, "सङ्ख्याऽव्यया—" (२।२।२५ पा०) इति सूत्रेण बहुव्रीहौ, पश्चात् "बहुव्रीहौ सङ्ख्येये—"(५।४।७३ पा०) इति समासान्त डच्प्रत्यये षड्वर्षाणि इति सिद्धम्] पदानि, प्रयच्छति—भूमावर्पयति, चलतीत्यर्थः। हर्षे—हर्षवर्द्धने, द्वितीयकुमारे इति यावत्। अवतरति—उपगच्छतीत्यर्थः। राज्यवर्द्धने—तदाख्ये ज्येष्ठकुमारे इत्यर्थः। [कालादिषु सर्व्वत्र "यस्य च भावेन" (२।३।३७ पा०) इति सूत्रेण भावे सप्तमी बोध्या]।

(१६६) नारायणमूर्त्तिः,—नारायणस्य—श्रीविष्णोः, मूर्त्तिरिव—तनुरिव। वसुधां—पृथ्वीम्। नारायणमूर्त्तेः वसुधाप्रादुर्भावे प्रमाणं यथा ब्रह्मवैवर्त्ते प्र० ख० ७ अध्याये,—"कथयामि च तत्सर्व्वं सार्थकं सर्व्वसम्मतम्। पुरा श्रुतं यत् सुमुखं धर्म-

(१६७) पूर्णेषु च प्रसवदिवसेषु दीर्घरक्तनालनेत्राम् उत्पलिनीमिव सरसी, (१६८) हंसमधुरस्वरां शरदमिव (१६९) प्रावृट्, (१७०) कुसुमसुकुमारावयवां वनराजिम् इव (१७१) मधुश्रीः, (१७२) महाकनकावदातां वसुधारा-

---

वक्त्राच्च पुष्करे॥ महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्। मला बभूव कालेन सर्वाङ्गव्यापको ध्रुवम्॥ स च प्रविष्टः सर्वेषां तत्प्राणां विवरेषु च। कालेन महता तस्मात् बभूव वसुधा मुने!॥ प्रत्येकं प्रतिलोमाच्च कूपेषु सा स्थिरा स्थिता। आविर्भूता तिरोभूता सा जले च पुनः पुनः॥ आविर्भूता सृष्टिकाले तज्जलोपर्य्यवस्थिता। प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥" इति। राज्यश्रियं—तदाख्यां कन्यां, गर्भेण आधत्त—धृतवती; यद्वा,—भगवतः कमठरूपिणः मूर्त्तिः पृष्ठेन धरित्रीमिव यशोवती राज्यश्रियं गर्भेण दधार इत्यर्थः।

(१६७) "पूर्णेषु" इत्यादौ "दुहितरं प्रसूतवती" इत्युत्तरेणान्वयः। पूर्णेषु प्रसवदिवसेषु—दशमे मासि इत्यर्थः। दीर्घेति।—दीर्घं—आयतं, नलमेव—कमलमेव इति नाल ("नलः पोटगले राशि पिठरदेवे कपीश्वरे। कमलेऽपि च नड्याञ्च क्लीवयोषितोः॥" इति मेदिनी) रक्ते—रक्तवर्णे, नाले—कमले, रक्तनाले—रक्तोत्पले इत्यर्थः, ते इव नेत्रे, अन्यत्र—रक्तोत्पले नेत्रे इव; यद्वा,—दीर्घाणि, रक्तानि—रक्तवर्णानि, नालानि—दण्डानि, नेत्राणि—मूलानि च यस्याः ताम्; ("नेत्रं मधिगुणे वस्त्रभेदे मूले द्रुमस्य च। रथे चक्षुषि…॥" इति मेदिनी) उत्पलिनीमिव—पद्मिनीमिव।

(१६८) हंसेति।—हंसवत् मधुरः स्वरः यस्याः; अन्यत्र,—हंसस्य मधुरः स्वरः यस्यां ताम्।

(१६९) प्रावृट्—वर्षर्तुः इत्यर्थः; प्रावृषोऽनन्तरमेव शरत्प्रवृत्तेः तथा उपमीयते।

(१७०) कुसुमेति।—कुसुमवत् सुकुमाराः,—सुकोमलाः, अवयवाः,—अङ्गानि; अन्यत्र,—कुसुमान्येव सुकुमाराः अवयवाः,—भागाः यस्याः ताम्।

(१७१) मधुश्रीः,—वसन्तलक्ष्मीः, ["मधु पुष्परसक्षौद्रमद्ययोः……। वसन्तदैत्यभिक्षौ……" इति मेदिनी। "मधुश्रीः" इत्यत्र "माधवश्रीः" इति पाठे,—मधुरेव माधवः,—वसन्तः, स्वार्थे अण्। "माधवोऽजे मधौ राधे यादवे ना स्त्रियां सिता" इति मेदिनी, तस्य श्रीरित्यर्थः]।

(१७२) महेति।—महाकनकं—तिलसुवर्णं, तद्वत् अवदाता—गौराङ्गी

मिव द्यौः, प्रभावर्षिणीं (१७३) रत्नजातिमिव वेला, सकल-जननयनानन्दकारिणीं चन्द्रलेखामिव प्रतिपत्, (१७४) सहस्र-नेत्रदर्शनयोग्यां जयन्तीमिव शचीं, (१७५) सर्वभूभृदभ्यर्थितां गौरिमिव मेना, प्रसूतवती दुहितरम् ; (१७६) यया हयोः सुतयोः उपरि स्तनयोः इव एकावलीलतया नितराम् अराजत।

(१७७) अस्मिन्नेव तु काले देव्या यशोवत्या भ्राता सुतम् अष्टवर्षदेशीयम् उद्वयमानकुटिलकाकपक्षकाञ्चिखण्डं

ताम् ; अन्वय,—महद्भिः,—प्रभूतैः, कनकैः—स्वर्णैः, अवदाता—उज्ज्वला ताम्। वसुधारामिव—धनवृष्टिमिव। द्यौः,—अन्तरीक्षम् ; सा हि जगती महाऽभ्युदयाय दिवान्तरीक्षात् पततीति प्रसिद्धिः।

(१७३) रत्नजातिमिव—रत्नराजिमिव। वेला—समुद्रजलविकृतकूलम्, ("अब्ध्यम्बुविकृतौ वेला" इत्यमरः) चन्द्रलेखामिव—शशिकलामिव। प्रतिपत्—प्रथमा तिथिः।

(१७४) सहस्रेति।—सहस्रैः नेत्रैः,—बहुजननयनैरिति भावः ; सहस्रनेत्रेण —इन्द्रेण च, दर्शनयोग्या—दर्शनीया, तां, जयन्तीमिव—तदाख्यां कन्यकामिव। ("जयन्तीऽस्त्रियभिद्यौर्योरिन्द्रपुत्रौपताकयोः" इति मेदिनी) शचीं—इन्द्राणीं।

(१७५) सर्वेति।—सर्वैः भूभृद्भिः,—राजभिः ; अन्वय,—सर्वभूभृता—सर्वां भुवमभिव्याप्य तिष्ठता हिमाद्रिणा इत्यर्थः ; यथा,—सर्वैः भूभृद्भिः,—पर्वतैः, राजकुमारीदर्शनेच्छया, अभ्यर्थिता—प्रार्थिता, तां, गौरीमिव—पार्वतीमिव। मेना —मेनका, हिमवन्महिषीति यावत्। [पूर्वोक्तत्रयारभ्यैतदन्तसन्दर्भे एकं प्रभूतवस्तुमेव साहश्ये हेतुः, इति साधारणधर्मस्य उत्पत्त्यादिवस्तूपमानसम्बन्धात् मालोपमा-ऽलङ्कृतिः इति सङ्कीर्णः]।

(१७६) यया—दुहित्रा। हयोः सुतयोः,—राज्यवर्द्धनहर्षवर्द्धनयोः। उपरि —अग्रे, स्थितया इति शेषः ; यद्वा,—उपरि—अनन्तरमित्यर्थः, जातया इति शेषः; ऊर्ध्वभागविराजमानया च। एकावलीलतया—एकसरेण हारेण इत्यर्थः। यशोवती नितराम्—अतिशयेन, अराजत इति सम्बन्धः।

(१७७) अस्मिन्नेवेति।—अस्मिन्नेव समये—दुर्दिनजननकाले। "अस्मिन्नेव" इत्यादौ "यशोवत्या भ्राता सुतं……भण्डिनामानम् अनुचरं कुमारयोः अर्पितवान्" इति उत्तरेण सम्बन्धः। तं विशिनष्टि, अष्टवर्षदेशीयमित्यादिभिः। सुतं—

(१७८)खण्डपरशुहुङ्कारान्निधूमलेखानुबद्धमूर्द्धानं मकरध्वजमिव पुनर्जातम्, एकेन (१७९) इन्द्रनीलकुण्डलांशुश्यामलितेन शरीरार्द्धेन इतरेण च त्रिकण्टकमुक्ताफलालोकधवलितेन सम्पृक्तकायमिव हरिहरयोः दर्शयन्तं, (१८०) पीनप्रकोष्ठप्रतिष्ठितपुष्पलोहवलयं परशुरामिव (१८१) चक्षत्तपणचीण-

स्नतनयम्। अष्टवर्षदेशीयं—प्रायेण अष्टवर्षवयस्कमित्यर्थः, [ईषदूनार्थे "ईषदसमाप्तौ—" (५।३।६७ पा०) इत्यादिना देशीयर्प्रत्ययः]। चड्डूयमानेति।—चड्डूयमानः,—चड्डीयमानः, कुटिलः,—भङ्गिमान्, काकपक्षकः एव—शिखा एव, शिखण्डः,—पिच्छं यस्य तं, ("बालानान्तु शिखा प्रोक्ता काकपक्षः शिखण्डकः" इति कोषः); यद्वा,—काकपक्षकः,—काकपक्ष इव गाढकृष्ण इति भावः, शिखण्डः,—चूडा यस्य तम्; ("शिखण्डी बर्हचूडयोः" इति मेदिनी)।

(१७८) खण्डेति।—खण्डपरशुः,—हरः, तस्य हुङ्कारेण—क्रोधजेन हुमिति शब्देन, यो ऽग्निः,—अनलः, हतीयनयनादुत्थित इति भावः, तस्य धूमलेखया अनुबद्धः,—आक्रान्तः, ["लेखाऽनुबद्ध—" इत्यत्र "लेखाऽनुबुद्ध—" इति पाठे,—धूमलेखया—धूमरेखादर्शनेन, अनुबुद्धः,—परिज्ञातः, यतोऽयं धूमरेखावान्, अत एव मयूरध्वजमूर्द्धा इति परिज्ञानमित्यर्थः] मूर्द्धा—शिरो यस्य तथाभूतं, मकरध्वजमिव—काममिव। पुनर्जातं—पुनरुत्पन्नम्। रामकृष्णयोः इव राज्यवर्द्धनहर्षयोः आनुकूल्याय प्रभुत्वमिव इति व्यङ्ग्यम्।

(१७९) इन्द्रनीलेति।—इन्द्रनीलस्य—नीलकान्तमणिविशेषस्य, यत् कुण्डलं—कर्णभूषणं, तस्य अंशुभिः,—प्रभाभिः, श्यामलितं—सम्पन्नश्यामवर्णं, तेन। शरीरार्द्धेन—अङ्गार्द्धभागेन। इतरेण—अन्येन, शरीरार्द्धेनेति शेषः, त्रिकण्टकं—तदाख्यं रत्नत्रयघटितं कर्णभूषणं, तच्चपत्नु प्राक् प्रदर्शितम्; तस्य मुक्ताफलानाम् आलोकेन—प्रभया, धवलितं—कृतशुभवर्णं, तेन। सम्पृक्तकायमिव—सम्मिलितावयवमिव, ["सम्पृक्तकायमिव" इत्यत्र "सम्पृक्तावतारमिव" इति पाठे,—मिलितावतारमिव] एकत्र हरिहरात्मविभावः विशेषद्धिसूचकः।

(१८०) पीनेति।—पीनौ,—स्थूलौ, प्रकोष्ठौ,—कूर्परार्धीभागौ, प्रतिष्ठितं—प्रतिष्ठां गतं, स्थितमिति यावत्, पुष्पलोहवलयं—मणिविशेषवलयं यस्य तथोक्तम्। [कैश्चित्तु पुष्पलोहशब्देन "स्वर्णाग्रहीवं रथचक्रम्" इति वदन्ति]।

(१८१) चक्षदिति।—चक्षाणां—कथयतां, क्षपणेन—छेदनेन, क्षीणः,—क्षयं

परशुपाशचिह्नितं बालतां गतं, (१८२) कण्ठसूत्रग्रथित-भङ्गुरप्रबालाङ्कुरं हिरण्यकशिपुमिव उरःकाठिन्यखण्डितनर-सिंहनखरखण्डं गृहीतजन्मान्तरं, शैशवेऽपि भावदृष्टं बीजमिव वीर्यद्रुमस्य भक्तिनामानम् अनुचरं कुमारयोः अर्पितवान्।

(१८३) अवनिपतेस्तु तस्य उपरि पुत्रयोः तृतीयस्य नेत्रयोः इव ईश्वरस्य तुल्यं दर्शनमासीत्। राजपुत्री अपि

गतः, परशुः,—कुठारः, अत एव पाशः,—रज्ज्वाकारः; यद्वा,—चाक्षुषत्वप्रयोजन क्षौमः,—रेखामात्रावशिष्टः, अत एव अपकृष्टः परशुः,—परशुपाशः, प्रधनाप्राधान्यात् इति भावः, तेन चिह्नितः,—परशुरामोऽयमिवेति लक्षितः, महावीरनिवर्हणघोर-समित्प्रदत्तपरिचयपरिणद्धखेदेन इदानीमपि परशोः किञ्चित् खण्डं भग्नमिव दधानो वा इत्यर्थः, तम्। बालतां—शिशुत्वं, गतं—प्राप्तम्, पुनरुत्पन्नं परशुरामभिवेत्यर्थः। श्रीरामलक्ष्मण्योः इव राज्यवर्द्धनहर्षयोः उपासनार्थमेव परशुरामस्येव कुमारस्य तदग्रबोधकत्वमेतत् इति भावः।

(१८२) कण्ठेति।—कण्ठसूत्रे—गलदेशनिक्षिप्ततन्त्रौ, ग्रथितः,—गुम्फितः, भङ्गुरः,—कुटिलः, प्रबालाङ्कुरः,—विद्रुमप्ररोहः यस्य तम्। अत एव हिरण्य-कशिपुमिव—तदाख्यमादितेयमिव। उर इति।—उरसः,—वक्षसः, काठिन्येन—दार्ढ्येन, खण्डितः,—भग्नः, नरसिंहस्य—नृसिंहाकृतेर्भगवतो विष्णोः, नखरखण्डः यस्मिन् तथोक्तम्। व्यर्थीकृतभगवन्नरसिंहनखरत्वेन एतस्य विष्णोरंशत्वं ध्वनितम्, एकत्र बाध्यबाधकत्वभेदायहाददोषापत्तेः। गृहीतजन्मान्तरं—पुनर्जातमित्यर्थः। अभिन्नीर-क्षेण भग्नभगवन्नखरेणापि असुरेण साम्यप्रतिपादनात् हीनोपमेयमिति; अथ तथा-विधासुराभावात् अखण्डत्वाच्च भगवतोऽवतारासमसम्बन्धे सम्बन्धरूपात्मिकातिशयोक्तिः व्यङ्ग्या। सावष्टम्भं—सतेजस्कम् इत्यर्थः। बीजमिव—प्ररोहमूलमिव; बालत्वात् बीजमिवेत्युत्प्रेक्षा उन्नेया। वीर्यद्रुमस्य—शौर्यवृक्षस्य।

(१८३) अवनिपतेः,—राज्ञः। तस्य—भक्तिनामकस्य कुमारस्य। पुत्रयोः तृतीयस्य—आत्मजौ अपेक्ष्य तृतीयस्थानमधिकृतस्य इत्यर्थः, तृतीयपुत्रत्वं गतस्येति भावः, ["पूरणगुण—" (२।२।११ पा०) इति न षष्ठीसमासः] ईश्वरस्य—हरस्य। नेत्रयोः तृतीयस्य—तृतीयनेत्रस्य इव, तुल्यं—समानं, न तु भिन्नविधमित्यर्थः; दर्शनम्—अवलोकनम्; अन्यत्र,—दृष्टिम्; राजा आत्मपुत्राविव तं ददर्शेत्यर्थः।

सकलजीवलोकहृदयानन्ददायिनौ तेन (१८४) प्रकृतिदक्षिणेन मधुमाधवौ इव मलयमारुतेन उपेतौ नितरां रेजतुः। क्रमेण च अपरेणेव भ्रात्रा प्रजानन्देन सह वर्द्धमानौ यौवनम् अवतेरतुः। (१८५) स्थिरोरुस्तम्भौ च पृथुप्रकोष्ठौ दीर्घभुजार्गलौ (१८६) विकटोरःकवाटौ प्रांशुशालाऽभिरामौ महानगरसन्निवेशौ इव सर्वलोकाश्रयक्षमौ बभूवतुः।

सकलेति।—सकलानां—सर्वेषां, जीवलोकानां—प्राणिपूर्णजगतां, हृदयस्य—अन्तःकरणस्य, आनन्दम्—उल्लासं, ददतः,—जनयतः इति तौ।

(१८४) प्रकृतिदक्षिणेन—प्रकृत्या—स्वभावेन, दक्षिणः,—अनुकूलः, तेन, दक्षिणदिग्भवेन च। मधुमाधवाविव—चैत्रवैशाखाविव, ("स्याच्चैत्रे चैत्रिको मधुः। वैशाखे माधवो राधः" इत्यमरः) उपेतौ—युक्तौ, सङ्गतौ इत्यर्थः। अपरेण—द्वितीयेन। प्रजानन्देन—प्रजानामानन्देन, भ्रातृजन्मना यथा आनन्दो जायते, तथा यौवनोदयेन प्रजानां तथानन्दवृद्धिः जायेति भावः। अवतेरतुः,—प्रापतुः, यौवनोद्गमसन्धिस्थौ बभूवतुः इत्यर्थः।

(१८५) स्थिरोरुस्तम्भौ—स्थिरौ—दृढौ, ऊरू—सक्थिनौ, स्तम्भाविव; अन्यत्र,—स्थिराः,—दृढाः, उरवः,—महान्तः, स्तम्भाः,—स्थूणाः ययोः तौ, पृथुप्रकोष्ठौ—पृथू—स्थूलौ, पृथवः वा, प्रकोष्ठौ—"प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च" इत्युक्तौ कूर्पराधोभागौ इत्यर्थः, कक्षविशेषाश्च यथोः तौ, ("प्रकोष्ठो मणिबन्धस्य·····। भुजकक्षान्तरेऽपि स्यात्॥" इति मेदिनी)। दीर्घेति।—दीर्घौ—आयतौ, भुजौ—बाहू, अर्गलाविव—कवाटरोधककाष्ठदण्डाविव; अन्यत्र,—भुजाविव अर्गलौ यथोः तौ।

(१८६) विकटेति।—विकटः,—विशालः, उरः,—वक्षस्थलं, कवाट इव—द्वारावरणभूतः पट्ट इव; अन्यत्र,—उर इव कवाटौ यथोः तौ। प्रांशुरिति।—प्रांशु—उन्नतौ, शाली इव—तदाख्यवृक्षौ इव, अभिरामौ—दर्शनीयौ; अन्यत्र,—प्रांशुना शालेन—प्राकारेण, ("प्राकारो वरणः शालः" इत्यमरः) यद्वा,—प्रांशुभिः शालाभिः, गृहविशेषैः, अभिरामौ। महेति।—महतः,—विशालस्य, नगरस्य, सन्निवेशौ इव,—अवस्थानभूतौ इत्यर्थः। सर्वेति।—सर्वेषां लोकानां—जनानाम्, आश्रये—रक्षणे, अधिवेशने च, क्षमौ—शक्तौ; यौवराज्योचितवयोवत्त्वात् बहुप्रासादवत्त्वादिति भावः।

(१८७)अथ चन्द्रसूर्यौ इव स्फुरज्ज्योत्स्नायशःप्रतापाक्रान्त-भुवनौ अभिरामदुर्निरीक्ष्यौ, अग्निमारुतौ इव समभिव्यक्ततेजो-बलौ एकीभूतौ, (१८८) शिलाकाठिनकायबन्धौ हिमवद्विन्ध्यौ इव अचलौ, महाद्विषौ इव कृतयुगयोग्यौ, अरुणगरुडौ इव (१८९) हरिवाहनविभक्तशरीरौ, इन्द्रोपेन्द्रौ इव नागेन्द्रगतौ,

(१८७) अथेत्यादि।—"अथ" इत्यादौ "सर्व्वस्यामेव पृथिव्यां.....प्रकाशतां लभतः" इत्युत्तरेणान्वयः। तौ विशिनष्टि, चन्द्रसूर्य्यावित्यादिभिः। स्फुरदिति।—स्फुरत्—सर्व्वतः प्रसरत्, ज्योत्स्नेव—कौमुदीव, यशः,—कीर्त्तिः, ज्योत्स्ना यश इव इति च, भुवनाक्रान्तिसामर्थ्यादिति भावः, प्रतापः,—कीर्त्तदग्धजं तेजः, ("स प्रतापः प्रभावश्च यत्तेजः कीर्त्तदग्धजम्" इत्यमरः) आतपश्च, आह्लादकरत्वात् तद्देजकत्वाच्चेति भावः, तेन आक्रान्तम्—अधिष्ठितं, भुवनं—जगत याभ्यां तौ, अत एव अभिराम-दुर्निरीक्ष्यौ—अभिरामः,—सुदर्शनः, चन्द्रतुल्यत्वादिति भावः, दुर्निरीक्ष्यः,—निरी-क्षितुमशक्यः, दुर्द्धर्ष इति यावत्, सूर्य्यतुल्यत्वादिति भावः, सौम्यभीमाविति तात्पर्य्यम। समभिव्यक्तेति।—समभिव्यक्तानि—सम्यक्प्रकटितानि, तेजांसि—प्रभावाः, दीप्तयश्च; तथा बलानि—सामर्थ्यानि; वेगा इत्यर्थः, याभ्यां तयोर्वा तौ, अत एव एकीभूतौ —समवेतौ, अन्योऽन्यानुवर्त्तिनौ च।

(१८८) शिलेति।—शिलावत् शिलाभिश्च कठिनः,—दृढः, कायबन्धः,—अवयवसंस्थानं ययोः तौ। अचलौ—अकम्पौ, कर्त्तव्ये अप्रतिहतोत्साहत्वात्, गति-रहितौ च स्थावरत्वात् इति भावः। कृतयुगेति।—कृतयुगस्य—सत्ययुगस्य; अन्यत्र, —कृतस्य—रथहलाद्याकर्षणादिसम्पन्नस्य, युगस्य—रथहलाद्यङ्ग-काष्ठभेदस्य, ("युगं रथहलाद्यङ्गे न स्त्रियास्तु कृतादिषु" इति मेदिनी) योग्यौ—समुचितौ, वहनक्षमौ च; यद्वा,—कृतयुगस्य इव योग्यः—अनुरूपः, विनीतत्वादि-गुणाभ्यासवत्त्वात् निर्म्मलसत्त्वोत्कर्षवत्त्वाच्चेति भावः; अन्यत्र,—सत्ययुगे याद्दशौ अकटादियोजना नियता आसीत् तद्योग्यौ; अतिभारवहनसामर्थ्यादिसत्त्वात् इति भावः।

(१८९) हरीति।—हरयः,—अश्वाः, एव वाहनानि—यानानि, तैः विभक्तं —विभज्य गृहीतं, स्कन्धमध्यादिभागेन स्थितमिति भावः, शरीरं—देहः ययोः तौ, पृथक्कृताश्ववाहनौ इत्यर्थः। चित्राश्वसादिकलाऽभिज्ञत्वात् इति भावः; अन्यत्र,—

(१८०) कर्णार्जुनौ इव कुण्डलकिरीटधरौ, पूर्वापरदिग्भागौ इव सर्वतेजस्विनामुदयास्तमयसम्पादनसमर्थौ, भ्रमन्तौ इव

हरः,—सूर्यस्य, विष्णोश्च, वाहने—वहनकर्मणि, विभक्तं—परिकल्पितमित्यर्थः, शरीरं याभ्यां तौ। ("यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु॥" इत्यमरः)। अरुणस्य सूर्यवाहनत्वं तत्सारथित्वात्, गरुडस्य च विष्णुवाहनत्वं प्रसिद्धमेव; अपरिमेयशक्तिमत्त्वात् इति भावः। इन्द्रः,—शचीपतिः, [इदिधातोः "ऋचेन्द्र—" (उ० २ पा० २८ सू०) इत्यादिना रन्प्रत्यये रूपम्] उपेन्द्रः,—वामनरूपी विष्णुश्च तौ, अदितिगर्भसम्भूतौ इति भावः। नागेन्द्रगतौ—नागेन्द्रवत् गतं, नागेन्द्रेण गतं—गमनमिति वा ययोक्तौ, गजेन्द्रगामिनौ, गजेन्द्रवाहनौ वा, धीरमन्थरगामित्वात् त्रिलोक्याधिनाथत्वात् वा; अन्यत्र,—नागेषु—गजेषु, पन्नगेषु च, [पन्नम्—अधोमुखं यथा यथा गच्छन्ति इति, पक्षान्न गच्छन्ति वा; अत्र "अन्येष्वपि दृश्यते" (३।२।१०१ पा०) इति सूत्रे "अपिशब्दः सर्वोपाधिव्यभिचारार्थः" इति दर्शितः, तेन पन्नोपपदात् गमधातोः डप्रत्यये रूपम्। "नागः पन्नगमातङ्गकुञ्जरेषु तोयदे" इति मेदिनी] इन्द्रः,—श्रेष्ठः, ऐरावतः श्रेष्ठश्च इत्यर्थः, तत्र गतौ—स्थितौ।

(१८०) कर्णार्जुनौ—कुन्तीसुतौ इति भावः। [इहलोकोत्तरपरमरमणीयदुर्धर्षतनोर्वक्षःकवचत्वे कवीन्द्राऽऽयहेण औपम्यानुकूल एव कुण्डलादिधारणार्थे बोधवशम्, प्रसिद्धेऽप्यप्रतिमे वैराग्यानुषङ्गे तात्पर्याभावात्, अन्यथा अप्रयुक्तत्वदुष्टौपम्येन सौभाग्ये दौर्भाग्यावतारणात्, महापुरुषमहासत्त्ववर्णनमनोहरसुरभिसदुकुसुमाञ्चिते महाहरत्नपीठे अयुक्तकीलाग्रथनोद्दीपदकपाषाणादिमत्त्वेन स्यात्]। कुण्डलेति।—कुण्डलं—कर्णालङ्कारभेदः, किरीटं—शिरोभूषणं, तयोः धरौ—धारिणौ; अन्यत्र,—कुण्डलधरः,—कर्णः, किरीटधारी—अर्जुनः, तौ। [अत्र "चन्द्रसूर्यौ" इत्यादिनाम् एतदन्तानां सहजसौभाग्यसमर्थनमेव प्रधानाशयः, इति प्रायः सहोदरार्थकोपमानशब्दे भिन्नार्थानामपि त्रिचतुराणां कृत्रिमार्थेन ग्रहणम् इति नैव शङ्कावकाशोऽपि अन्यसर्वथैवदातम्]। पूर्वेति।—पूर्वश्च—प्राक् च, अपरः,—पश्चिमश्च तौ, दिग्भागौ—दिशां विभागौ तौ इव। सर्वेति।—सर्वे च ते तेजस्विनः,—प्रतापवन्तः, राजानः, ग्रहाश्च आदित्या वा, तेषाम्। उदयेति।—उदयः,—अभ्युन्नतिः, आविर्भावश्च, अस्तमयः,—नाशः, अदर्शनञ्च, तयोः सम्पादने—विधाने, समर्थौ—क्षमौ, अनुग्रहेण उदयसम्पादनक्षमौ, निग्रहेण नाशसम्पादनसमर्थौ

अतिमानेन (१८१) आसन्नवेलार्गलनिरोधसङ्कटे कुकुटीरके तेजःपराङ्मुखीं छायामपि जुगुप्समानौ, (१८२) स्वात्मप्रतिबिम्बेन अपि पादनखलग्नेन लज्जमानौ, शिरोरुहाणामपि भङ्गेन दुःखम् अवतिष्ठमानौ, चूडामणिसङ्क्रान्तेनापि द्वितीयेन आतपत्रेण अपत्रपमाणौ, भगवति (१८३) षण्मुखेऽपि स्वामिशब्देन असूयायमानश्रवणौ, दर्पणदृष्टेन अपि प्रतिपुरुषेण दूय-

च इत्यर्थः। अमान्तौ इव—पर्य्यांसिम् अगच्छन्तौ इव। अतिमानेन—अतिगौरवेण इति यावत्।

(१८१) आसन्नेति।—आसन्ना—निकटवर्त्तिनी, वेला—जलधिजलमर्य्यादा एव, अर्गलं—प्रतिरोधनं, तेन निरोधः,—प्रसराभावः, तेन सङ्कटम्—अप्रशस्तमिति यावत्, राजकीयच्छायासम्भाराणां पर्य्याप्तम् अयोग्यमिति भावः, तस्मिन्; कुः,—पृथिवी एव,("गोवा कुः पृथिवी पृथ्वी" इत्यमरः) कुटीरकं—क्षुद्रगृहं, तस्मिन्। तेजः-पराङ्मुखीं—तेजः,—प्रतापः, पराङ्मुखं—प्रतिनिवृत्तं, प्रसरणावकाशविरहादिति भावः यस्याः तथाभूतां, छायां—शरीरप्रतिबिम्बं, जुगुप्समानौ—कथमेषा निवृत्ततेजाः, धिगेतामिति निन्दन्तौ। पृथिवी इतोऽप्यधिका विस्तृता चेत् आवयोस्तेजोऽपि दूरप्रसारि भवेत्, तदभावात् तेजसः प्रसरणस्थानाभावात् तथा जुगुप्सा इति भावः; अथवा,—तथाविधे कुकुटीरके क्षुद्रधरामण्डलात्मके तेजःपराङ्मुखीं सूर्य्यातपप्रतीपाम् उदयास्तमयनकालिकामपि यत् पूर्व्वापरकालादौ प्रत्यक्षीभूतामिति, तथाभूतां छायामपि जुगुप्समानौ निन्दन्तौ, इत्यर्थः; गर्हायां स्वार्थे सन: तथैवार्थत्वात्, अग्रेसरप्रकृतेः पराङ्मुखां शरीरकच्छायामप्यसहमानौ इति भावः, एतेन सर्व्वसमुद्रान्तभूमण्डलाधिकारः सर्व्वसमुद्राधिकारश्च एतयोः पराङ्मुखप्रवृत्तिविमुखयोः सूचितः।

(१८२) स्वात्मेति।—स्वस्य—निजस्य, आत्मनः,—शरीरस्य, ("आत्मा पुंसि स्वभावे च..... ..... शरीरब्रह्मणोरपि॥" इति मेदिनी) प्रतिबिम्बं—छाया, तेन लज्जमानौ—अपमाणौ, अभिमानातिशय्यात् ममापि चरणपतनमिति धिक्यिति भावः। शिरोरुहाणां—केशानामपि, भङ्गेन—भङ्गुरत्वेन, कुञ्चितत्वेनेत्यर्थः, युक्ते पलायनेन च। चूडामणिसङ्क्रान्तेन—शिरोरत्नप्रतिफलितेन, अत एव द्वितीयेन—एकाधिकेनेत्यर्थः, आतपत्रेण—छत्रेण, अपत्रपमाणौ—लज्जमानौ; कथमेकच्छत्रत्वेऽप्यावां, द्वितीयच्छत्रं दृश्यते इति धिक्यिति भावः।

(१८३) षण्मुखे—कार्त्तिकेये, स्कन्ददेवे इत्यर्थः। स्वामिशब्देन—स्वामी—

माननयनौ, (१८४) सन्ध्याञ्जलिघटनेषु अपि शूलायमानोत्तमाङ्गौ, (१८५) जलधरधृतेन अपि धनुषा दोदूयमानहृदयौ, आलेख्यचितिपतिभिः अपि अप्रणमद्भिः सन्तप्यमानचरणौ, (१८६) परिमितमण्डलसन्तुष्टं तेजः सवितुरपि अबहुमन्यमानौ, (१८७) भूभृदपङ्कतलक्ष्मीकं सागरमपि उपहसन्तौ, बलवन्तमज्ञातविग्रहं मारुतमपि निन्दन्तौ, हिमवतोऽपि चमरी-

---

कुमारः, प्रभुश्च, तच्छब्देन असुखायमानस्ववृत्तौ—दुःखानुभाविकर्त्तौ इत्यर्थः ; कथमस्यातिरिक्ते अपि स्वामीति प्रयुज्यते इति धियेति भावः। दर्पणदृष्टेन—आदर्शावलोकितेन। प्रतिपुरुषेण—प्रतिबिम्बगतेन, प्रतिस्पर्द्धिपुरुषेण वा ; स्वप्रतिबिम्बं दर्पणपतितं दृष्ट्वा प्रतिस्पर्द्धी अयमिति धियेति भावः। दूयमाननयनौ—असन्तुष्टनेत्रौ।

(१८४) सन्ध्येति।—सन्ध्यायाम् अञ्जलिघटनानि—सन्ध्याकालिकदेवतावन्दने शिरसि अञ्जलियोजनानि इत्यर्थः, तेषु शूलायमानं—शूलविद्धमिवाचरत्, उत्तमाङ्गं—शिरो ययोः तौ ; अन्यदभिवन्दने एव लोकैः शिरसि अञ्जलिर्बध्यते, वयन्तु कथमञ्जलिं शिरसि बध्नीम इति धियेति भावः।

(१८५) जलेति।—जलधरधृतेन—मेघधृतेन, धनुषा—शक्रधनुषेत्यर्थः। दोदूयमानहृदयौ—पुनःपुनः सन्तप्यमानमानसौ ; कथमपरेणापि धनुर्भ्रियते अस्माकं सनत्वम् इति क्रोधादिति भावः। आलेख्यचितिपतिभिः,—चित्रार्पितनृपतिभिः इत्यर्थः। सन्तप्यमानचरणौ—दह्यमानपादौ ; कथमेते अस्माकं चरणेषु न प्रणमन्तीति क्रोधादिति भावः।

(१८६) परिमितेति।—परिच्छिन्ने, इयत्तया ह्रस्वतया च इति भावः, मण्डले—बिम्बे, विषये च, देशे इत्यर्थः, ("मण्डलं परिधौ देशे कोठे द्वादशराजसु। क्रौर्येऽथ निर्यद्वं बिम्बे त्रिषु··· ॥" इति मेदिनी) सन्तुष्ट—पर्य्याप्तमित्यर्थः। सवितुः,—सूर्य्यस्य, तेजः,—आतपं, प्रभावञ्च, अबहु—न प्रभूतमित्यर्थः, मन्यमानौ—अवधारयन्तौ ; स्वस्य अपरिमिततेजःशालित्वादिति भावः।

(१८७) भूभृदिति।—भवता—मन्दराचलेन इत्यर्थः, भूभृद्भिः,—राजभिश्च, अपहृता लक्ष्मीः,—श्रीः, रत्नादिसम्पच्च यस्मात् तथाभूतं, सागरमपि उपहसन्तौ—परिहसं कुर्वन्तौ ; ततोऽपि स्वस्य दुर्बलत्वादिति भावः। अज्ञातः,—अनाचरितः, विग्रहः,—युद्धम्, अज्ञातः,—अभूतः, विग्रहः,—शरीरञ्च येन तथोक्तं, मारुतं—वायुम्। निन्दन्तौ—कुत्सयन्तौ ; यदि विग्रहवत्त्वमस्य अभविष्यत्, तदा किमन्

बालव्यजनवीजितेन दह्यमानौ, जलधीनामपि शङ्कैः क्षिप्यमानौ, चतुःसमुद्राधिपतिम् अपरं प्रचेतसमपि असहमानौ, (१९८) अनपहृतच्छत्रानपि विच्छायान् अवनिपालान् कुर्वाणौ, साधुषु अपि असेवितप्रसन्नौ, मुखेन मधु क्षरन्तौ, (१९९) दुष्टराजवंशान् उष्णा दूरस्थितानपि म्लानिमानयन्तौ, अनुदिवसं शस्त्राभ्यासश्यामिकाकलङ्कितम् अग्नेयराजकप्रतापाग्निनिर्वापण-

वत्सम् अस्माभिः अद्रक्ष्यतेति धियेति भावः। हिमवतोऽपि—हिमाद्रेरपि, चमरीणां—तदाख्यमृगभेदानां, बालव्यजनेन—पुच्छकृतव्यजनेन, वीजितं तेन, वयमेव चामरव्यजनैः वीज्यामहे, कथमयमपि इति ईर्ष्ययेति भावः। जलधीनां—सागराणाम्; शङ्कैः,—कम्बुभिः निधिविशेषैश्च, ("पद्मशङ्खादयो निधेः" इत्यमरः) क्षिप्यमानौ—क्षिप्यमाणौ; शङ्खनिधिभुजौ वयमेव, कथं जलधिषु पतत्सङ्खौ इति स्पर्धयेति भावः। अपरम्—अन्यम्, अस्मदतिरिक्तमिति भावः, प्रचेतसं—वरुणदेवम्, ("प्रचेता वरुणः पाशी" इत्यमरः)। असहमानौ—अक्षममाणौ। सर्व्वत्र विवक्षितेभ्यः उपमानभूतेभ्यः उपमेयभूतयोरितयोराधिक्यप्रतिपादनात् व्यतिरेकालङ्कारः।

(१९८) अनपहृतेति।—न अपहृतं छत्रं येषां तान्; विजित्य पुनः स्वे स्वे पदे प्रतिष्ठापितानिति भावः। विच्छायान्—विगताः छायाः,—अनातपाः येषां तथाविधान्, ये क्षत्रियाः, ते कथं विच्छायभाजः (आतपभाजः) इति आपाततः विरोधात् विरोधाभासः; परिहारस्तु—विच्छायान्—विगतकान्तीन् पराजयव्यलीकादिति भावः। अवनिपालान्—राज्ञः। साधुषु—सज्जनेषु। असेवितप्रसन्नौ—विना सेवां प्रसन्नौ—प्रसादवन्तौ, सज्जनप्रियौ इत्यर्थः, असेविता—अपीता, प्रसन्ना—मद्यविशेषः याभ्यां तौ इति च। मधु क्षरन्तौ—मधुरभाषिणौ इत्यर्थः, मधु—मद्यं, क्षरन्तौ—स्रवन्तौ इति च। यः असेवितप्रसन्नः, कथं तस्य मुखात् मधु स्रवति? इति विरोधः, परिहारस्तु पूर्व्ववत्याख्यया इति बोध्यम्।

(१९९) दुष्टराजवंशान्—दुष्टराजकुलानि, वंशान्—वेणुदण्डांश्च। उष्णा—प्रतापाग्निना, दाहकशक्त्या च, म्लानिं—मालिन्यं शुष्कतां च; उष्णा तु निकटस्थानेव मलिनीकरोति, न तु दूरस्थान् इति विरोधः; परिहारस्तु, उष्णा प्रतापाग्निना इत्यनेन प्रदर्शितः। अनुदिवसं—प्रतिदिनम्। शस्त्रेति।—शस्त्राणाम् अभ्यासेन—सञ्चालनेन, या श्यामिका—कज्जलरेखा, तया कलङ्कितं—सञ्जातकिल्बिषम्, अग्नेयानां—क्षत्रियाणां, राजकानां—राजन्यानां, प्रतापाग्नेः,—वीर्यवह्नेरित्यर्थः, निर्वापणेन—

मलिनमिव करतलमुद्वहन्तौ, (२००) योग्याकालेषु धीरैः धनुर्ध्वनिभिः अभ्यर्णोपभोगाय दिग्वधूभिः इवालपन्तौ, राज्यवर्द्धन इति हर्ष इति (२०१) सर्व्वस्यामिव पृथिव्याम् आविर्भूतशब्दप्रादुर्भावौ, स्वल्पीयसा एव कालेन द्वीपान्तरेषु अपि प्रकाशतां जग्मतुः।

एकदा च (२०२) तौ आहूय भुक्तवान् अभ्यन्तरगतः पिता सस्नेहम् अवादीत्,—"वत्सौ! प्रथमं राज्याङ्गं दुर्लभाः सङ्गत्याः। प्रायेण परमाणव इव समवायेषु अनुगुणीभूय द्रव्यं कुर्व्वन्ति पार्थिवं क्षुद्राः। क्रीडारसेन नर्त्तयन्तो मयूरतां नयन्ति

मनेन इत्यर्थः, ["निर्वापणं विश्रसनं मारणं प्रतिघातनम्" इत्यमरः। "निर्वापण—" इत्यत्र "निर्वपण—"इति पाठान्तरं न समीचीनम्; "प्रादेशनं निर्वपणम्—"इत्यमरानुशासने निर्वपणशब्दस्य दानपर्य्यायि प्रयोगदर्शनात्] मलिनमिव—मलदूषितमिव, मसीलिप्तमिवेति भावः। वज्रैर्नीरप्रक्षेपणादिरूपसाधनमन्तरेण करतलाभ्यां निर्वापणं विरुद्धं, प्रतापवज्रैः इति समाधानात् मूर्ध्नोऽग्रत्वात् करतलाग्रनिर्वापणसङ्गतेश्च विरोधाभासः।

(२००) योग्याकालेषु—अभ्यासकालेषु, ("योग्यः प्रवीणयोगार्हौ··· । ··· व्याख्यासार्कयोषितौ" इति मेदिनी) धीरैः,—मन्त्रीरैः, धनुर्ध्वनिभिः,—कार्मुकनिनादैः, अभ्यर्णः,—सन्निहितः, प्रत्यासन्न इत्यर्थः, अचिरभावीति भावः, उपभोगः,—दिक्पालानां विजयेन सम्भोगः, तस्मै। ["अभ्यर्णोपभोगाय" इत्यत्र "अभ्यर्णोपभोगात्" इति पाठान्तरम्; तत्राभ्यर्णोपभोगमभिप्रेत्येत्यर्थः, "ल्यब्लोपे कर्म्मण्यधिकरणे" (वा०) इति पञ्चमी]।

(२०१) सर्व्वस्यां—समुदायायाम् इत्यर्थः, सार्व्वभौमेश्वरतनयत्वात् अलौकिकप्रभावशालित्वात् वा इति भावः। आविर्भूतेति।—आविर्भूतः,—प्रकाशितः, शब्दप्रादुर्भावः,—ख्यातिः ययोः तौ। स्वल्पीयसैव—अत्यल्पेनैव। द्वीपान्तरेषु—अन्येषु द्वीपेषु, जम्बूद्वीपातिरिक्तेषु द्वीपेषु इत्यर्थः। प्रकाशतां—ख्याततामित्यर्थः; दुःप्रतर्क्यशक्तिशालित्वात् इति भावः।

(२०२) तौ—राज्यवर्द्धनहर्षाख्यकुमारौ। भुक्तवान्—कृताहारः, मध्यन्दिने इति भावः। अभ्यन्तरगतः,—अन्तःपुरवर्त्ती। प्रथमं—प्रधानभूतम्। राज्याङ्गं—राज्यपोषकमिति भावः। सङ्गत्याः,—सङ्गतिवाः समाहा इत्यर्थः; वैचित्र्यनरनाथानु-

बालिशाः। (२०३) दर्पणमिवानुप्रविश्य आत्मीयां प्रकृतिं सङ्क्रामयन्ति पल्लविकाः। (२०४) स्वप्ना इव मिथ्यादर्शनैः

रागयोः एकवासुलभत्वात इति भावः। क्षुद्राः,—साधारणा जना इत्यर्थः; अन्यत्र, —क्षुद्राः,—अतिसूक्ष्मावयवाः, परमाणव इव, समवायेषु—मल्लेषु, मिलित्वा मल्लयुद्धकार्येषु इत्यर्थः, मर्दनेषु च; समवायेषु अनुगुणीभूयायुतसिद्धानामाधाराधेयभूतानां कथमिह प्रत्ययहेतुः इति सभीगोऽर्थोऽवसेयः। अनुगुणीभूय—अनुकूलीभूय, अनुकूलमतं प्रदर्श्य इत्यर्थः, प्रविश्य च, अन्योऽन्यमिति भावः; पार्थिवं—राजानम्, द्रव्यं—सामान्यं जनरूपं वस्तु, अस्थापिते स्थित्यनर्हत्वादिति भावः; अन्यत्र,—पार्थिवं—पृथिवीसम्बन्धि, द्रव्यं—वस्तु, चित्यङ्गुरादिरूपमिति यावत्, प्रायेण—बाहुल्येन, कुर्वन्ति —निष्पादयन्ति; "प्रायेण" इत्यनेन घटादिकमपि ईतुरव विद्यते, प्राधान्यन्तु पुरुषकारशक्तिमतां तेषामेव इति ध्वनितम्। नीचाशयाः प्रथमं मल्लयुद्धमिव प्रविश्य राज्ञः अनुकूलमतं प्रकाश्य शनैः शनैः राजानम् आयत्तीकृत्य स्वमतानुवर्त्तिनं कुर्वन्ति इति समुदितार्थः; अवयवसमुदायः,—यथा समवायकारणैः समवायसम्बन्धेन परमाणवः सङ्घूय द्रव्याणि उत्पादयन्ति, तथा क्षुद्रा जनाः अनुगुणीभूय पार्थिवम् अन्यविधमेव घटयन्ति; क्षुद्राः भृत्याः परिहरणीया इति फलितम्। क्रीडारसेनेति।—बालिशाः,—धूर्त्ताः, [बालाः सन्ति एषाम् इति बालिनः मूर्खाः, ताल् श्यन्ति—कदर्थभावापन्नकपटान्तरितपरामर्शैः, क्षीणविचारैः वा लघुकुर्वन्ति तथोक्ताः। बाल्युपपदात् श्रीधातोः "आतोऽनुपसर्गे कः" (३।२।३ पा०) इति कप्रत्ययः] प्रहस्यनकुलरञ्जनादिभिः कौमलमतिस्वायत्तीकरणपटवः इत्यर्थः, कुमाराश्च, ("शिशावज्ञे च बालिशः" इत्यमरः) क्रीडारसेन—क्रीडारागेण, नर्त्तयन्तः,—सञ्चारयन्त इत्यर्थः। नयुरतां—धूर्त्तजनसेव्यतामित्यर्थः, धार्ष्टतां वा, शिष्टखिन्नत्वञ्च, नयन्ति—प्रापयन्ति; बालका यथा क्रीडन्तो नयूरं नर्त्तयन्ति, तथा धूर्त्ताः अमीषं नृपमन्यं वा क्रीडारसेन उल्लास्य क्रीडनकं कुर्वन्तीति भावः।

(२०३) दर्पणमिति।—दर्पणमिव अनुप्रविश्य—अभ्यन्तरं प्रविश्य, समयानुकूलचाटुकारैः मनोरञ्जनं कृत्वा इति भावः, राजानम् अन्यं वा इति शेषः, आत्मीयां प्रकृतिं—स्वभावं प्रतिकृतिञ्च, सङ्क्रामयन्ति—समारोपयन्ति; दर्पणे यथा प्रतिबिम्बं पतति, तथा रङ्गव्यङ्गमायाकुशलैः अभ्यन्तरं प्रविष्टैर्धूर्त्तैः चित्तरञ्जनेन राजा अन्यो वा स्वां प्रकृतिं धूर्त्ततां नीयते इति भावः। पल्लविकाः,—विटाः।

(२०४) स्वप्ना इव—"स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः" इत्युक्तलक्षणा

असद्बुद्धिं जनयन्ति विप्रलम्भकाः। (२०५) गीतनृत्यहसितैः उन्मत्ततामावहन्ति उपेक्षिता विकारा इव वातिकाः। (२०६) चातका इव तृष्णावन्तो न शक्यन्ते ग्रहीतुमकुलीनाः। (२०७) मानसे मौनमिव स्फुरन्तमेव अभिप्रायं गृह्णन्ति जालिकाः। (२०८) यमपट्टिका इव अम्बरे चित्रमालिखन्ति

इव, मिथ्यादर्शनैः,—असच्छास्त्रैः, अलीकवस्तुप्रकटनैश्च, असतीम्—अशोभनां, बुद्धिं—ज्ञानम्, असति—अविद्यमाने, अलीके च, बुद्धिं—धियं, जनयन्ति—उत्पादयन्ति; निरन्तरमसत्प्रपञ्चपर्य्यवेक्षणवत्त्वात् इति भावः। विप्रलम्भकाः,—प्रतारकाः, असन्मार्गप्रवर्त्तकाः इति भावः।

(२०५) गीतेति।—गीतं—गानं, नृत्यं—नर्त्तनं, हसितं—हासः तैः, उपेक्षिताः,—उपशमाय अचेष्टिता इत्यर्थः, वातिकाः,—वायुजनिता इत्यर्थः, ["तत आगतः" (४।३।७४ पा०) इति वातात् ठञि रूपम्] विकाराः,—रोगविशेषा इव, वातिकाः,—धूर्त्ताः, उन्मत्ततां—ज्ञानान्धताम्, आवहन्ति—जनयन्तीत्यर्थः, सदसद्विचारशक्तेर्दुर्बलीकरणात् इति भावः।

(२०६) चातका इव—तदाख्यपक्षिविशेषा इव, तृष्णावन्तः,—पिपासिताः, धनलब्धाश्च। अकुलीनाः,—अकुलजाः, दुष्कुलजाता इत्यर्थः; अन्यत्र,—न कौ—पृथिव्यां, लीनाश्च—आकाशचारिण इत्यर्थः, ग्रहीतुं—वशीकर्त्तुं, धर्त्तुञ्च; न शक्यन्ते—न पार्य्यन्ते; एकत्र,—दुष्टहृदयत्वात् खलप्रकृतिकत्वाच्च, अन्यच,—आकाशचारित्वात् इति भावः।

(२०७) मानसे इति।—मानसे—चित्ते, तदाख्यसरसि च; स्फुरन्तं—राजमानम्, अभिप्रायम्—आशयं, गृह्णन्ति—अवबुध्यन्ते धरन्ति च; जालिकाः,—कूटकारकाः, शठा इत्यर्थः, जालीपजीविनः कैवर्त्ताश्च; उभयत्र निरपराधसरलप्राणिनिबन्धनं समानम् इत्याशयः।

(२०८) यमपट्टिका इवेति।—उद्गीतकाः,—अतिदुश्चरितत्वेन उच्चैर्गीतं—कीर्त्तनं येषां तथाभूताः, अतिदुर्विनीता इत्यर्थः। यमपट्टिका इव—यमस्य पट्टिका येषां ते, यमदूता इत्यर्थः, यमपट्टेन—यमपट्टप्रदर्शनेन जीवन्ति इति वा ते यमपट्टिकाः इति बहुव्रीहिसमासान्तठन्नन्तयोः गृहयं, स्त्रीलिङ्गपुंलिङ्गयोः उपमानोपमेयभावत्वस्य साधुत्वाभावात्। अलक्षशासनपत्रवत्, गृहीतपट्टलिखितसपरिजनधर्म्मराजाः, वा, ते इव, अम्बरे—आकाशे, अभित्तौ इत्यर्थः, वस्त्रे च, चित्रम्—

उद्गीतकाः। (२०९) शस्त्रं हृदये निक्षिपन्ति अतिमार्गणाः। (२१०) यतः सर्वैर्दोषाभिषङ्गैः असङ्गतौ बहुधा उपधाभिः परीक्षितौ शुची विनीतौ विक्रान्तौ अभिरूपौ मालवराजपुत्रौ भ्रातरौ भुजौ इव मे शरीरात् अव्यतिरिक्तौ कुमारगुप्त-माधवगुप्तौ अस्माभिर्भवतोः अनुचरत्वार्थम् इमौ निर्दिष्टौ। अनयोः उपरि भवद्ग्रामपि न अन्यपरिजनममवृत्तिभ्यां भवितव्यम्" इत्युक्त्वा तयोः आह्वानाय प्रतीहारम् आदिदेश।

(२११) न चिरात् द्वारदेशनिहितलोचनौ राज्यवर्द्धनहर्षौ

आश्चर्यम्, असम्भावनीयं वस्तु इति भावः, आलिख्यन्ति; आलिखन्ति—चित्रयन्ति; यमदूता यथा अतर्कितमेव स्वव्यापारमनुतिष्ठन्ति, तथा तादृशा धूर्ताः सहसा असम्भाव्यमनिष्टमुत्पादयन्ति; यद्वा,—यमपट्टिका यथा विविधं चित्रं यमपुरवृत्तं वक्त्रे आलिख्य दर्शयित्वा विस्मयमुत्पादयन्ति, तथा धूर्ता आकाशकुसुमोपमं विविधं सुखचित्रं प्रदर्श्य राजानमायत्तीकुर्वन्तीति भावः।

(२०९) शस्त्रमिति।—अतिमार्गणाः,—अतिशयेन वाक्यभङ्गिप्रदर्शिनः धूर्तविशेषाः, तीक्ष्णशराश्च; हृदये—अन्तरात्मनि, वक्षसि च; शस्त्रं—व्यथाविशेषं, खं फलकञ्च; निक्षिपन्ति—निदधतीत्यर्थः।

(२१०) यत इति।—यतः,—यस्मात्, सर्वैः दोषाभिषङ्गैः,—दोषाणाम्—अविनयादीनाम्, अभिषङ्गाः,—पराभवाः, ("अभिषङ्गः पराभवे" इत्यमरः) तैः असङ्गतौ—अमिलितौ, असंसृष्टौ इत्यर्थः। बहुधा—बहुना प्रकारेण, उपधाभिः,—छलैः, भृत्यानां परीक्षणोपायविशेषैरित्यर्थः,—"उपेत्याधीयते यस्मादुपधेति ततः स्मृता। उपाय उपधा ज्ञेया तया भृत्यान् परीक्षयेत्॥" इत्युक्तेः; परीक्षितौ—अवेक्षितौ, शुची—विशुद्धचरितौ, विनीतौ—विनयवन्तौ, विक्रान्तौ—पराक्रमशालिनौ, अभिरूपौ—रमणीयौ, सुन्दराकृती इत्यर्थः, ("अभिरूपौ बुधे रम्ये" इति मेदिनी)। अव्यतिरिक्तौ—अभिन्नौ। अनुचरत्वार्थं—सहचर्यार्थम्। इमौ इति।—तत्र अवर्त्तमानयोरपि तयोरनन्तरमेव आगमनात इदंशब्देन निर्देशो ज्ञेयः। निर्दिष्टौ—निरूपितौ। तयोः,—मालवराजपुत्रयोः कुमारगुप्तमाधवगुप्तयोः भ्रात्रोः।

(२११) "न चिरात्" इत्यादौ "राज्यवर्द्धनहर्षौ···कुमारगुप्तं पृच्छतः तस्य··· माधवगुप्तं दृष्ट्वतुः" इत्यत्रेयं सङ्गतिः। प्रथमं तावत् कुमारगुप्तं विश्रिनष्टि,

प्रतीहारेण मङ्क प्रविशन्तम्, अग्रतो ज्येष्ठम् अष्टादशवर्षवयसं, नात्युच्चं, नातिखर्व्वम्, अतिगुरुभिः पदन्यासैः अनेकनरपतिसञ्चरणचलां निश्चलीकुर्व्वाणम् इव उर्व्वीम्, (२१२) अनवरताभ्यस्तलङ्घनघनोपचयकठिनमांसमेदुरात् ऊरुद्वयात् निष्पततेव अनुल्बणजानुग्रन्थिप्रसूतेन तनुतरजङ्घाकाण्डयुगलेन भासमानम्, (२१३) उल्लिखितपार्श्वप्रकाशितक्रशिम्ना मन्दरमिव सुरासुररभसभ्रमितवासुकिकषणक्षीणेन मध्येन लक्ष्यमाणम्,

प्रतीहारेणेत्यादिभिः।—प्रतीहारेण—दौवारिकेण। अष्टादशवर्षवयसम्—अष्टादशवर्षाः वयः यस्य तादृशम्। अतिगुरुभिः,—अतिभारवद्भिः, सत्त्वभारत्वादिति भावः; पदन्यासैः,—पदविक्षेपैः। अनेकेषु।—अनेकेषु—बहुषु, नरपतिषु—राजसु, सञ्चरणेन—सञ्चलनेन, चलां—चञ्चलाम्, एकस्वास्थायिनीमित्यर्थः, बहुस्वामिकामिति भावः। निश्चलीकुर्व्वाणमिव—स्थिरीकुर्व्वाणमिव, एकस्वामिकां कुर्व्वाणमिव इत्यर्थः। उर्वीं—पृथ्वीम्।

(२१२) अनवरतेति।—अनवरतम्—अविच्छेदं यथा तथा, अभ्यस्तेन—पुनः पुनः शीलितेन, लङ्घनेन—सञ्चरणेन, उल्लम्फनेन इति यावत्, बाल्यसुलभाचारात् इति भावः, घनं—सान्द्रं, निबिडमिति यावत्, उपचयेन—दृढ्या, कठिनं—दृढं, यत् मांसं, तेन मेदुरं—पुष्टं, ["भृञ्भासं—" (३। २। १६१ पा०) इत्यादिना घुरांच रूपम्] तस्मात्, ऊरुद्वयात्—ऊरुयुगलात्, निष्पततेव—निर्गच्छतेव। अनुल्बणेति।—अनुल्बणः,—अनुत्कटः, यः जानुग्रन्थिः,—जङ्घोर्वीः सन्धिः, तस्मात् प्रसृतेन—उद्गतेन, तनुतरजङ्घाकाण्डयुगलेन—तनुतरः,—क्षीणतरः, ऊर्व्वपेक्षया इति भावः, यः जङ्घाकाण्डः,—प्रसृतादण्डः, जानुगुल्फयोरभ्यन्तरदेश इत्यर्थः, तदुयुगलेन—तद्वयेन, क्षयतरजङ्घाकाण्डद्वयेन इत्यर्थः, भासमानं—राजमानम्; मांसलीकृतनुजानुशालित्वव्यतिरेकणीयत्वात् इत्याशयः।

(२१३) उल्लिखितेति।—उल्लिखितेन—तनूकृतेन, ("स्यादुल्लिखितमुत्कीर्णं तनूकृते च वाच्यवत्" इति मेदिनी) पार्श्वेन—पार्श्वदेशेन, प्रकाशितः,—प्रकटितः, क्रशिमा—कार्श्यं यस्य तेन। सुरेति।—सुराश्च असुराश्च तैः, रभसेन—वेगेन, भ्रमितस्य—सञ्चालितस्य, वासुकेः,—नागराजस्य, कषणेन—घर्षणेन, क्षीणं—क्रशं तेन, मध्येन—मध्यभागेन, कटिदेशेन इत्यर्थः। मन्दरमिव—मन्दराचलमिव, लक्ष्यमाणं—दृश्यमानम्। घर्षणेन मन्दराद्रेः तथा तानवासम्बन्धात् असम्बन्धे सम्बन्ध-

अतिविस्तीर्णेन उरसा स्वामिसम्भावनानाम् अपरिमितानाम् अवकाशम् इव प्रयच्छन्तम्, (२१४) प्रलम्बमानस्य भुजयुगलस्य निभृतललितैः विक्षेपैः अतिदुस्तरं तरन्तमिव यौवनोदधिं, (२१५) वामकरकटकमाणिक्यमरीचिमञ्जरीजालिन्या समुद्भिद्यमानप्रतापानलशिखापल्लवयेव चापकिणलेखया अङ्कितपीवरप्रकोष्ठम्, (२१६) आलोहिनीम् उच्चांसतटावलम्बिनीम् अस्त्रग्रहणव्रतविधृतां रौरवीम् इव त्वचं कर्णाभरणमणेः प्रभां

रूपातिशयोक्तिः उपमासङ्कीर्णा] अतिविस्तीर्णेन—अतिविशालेन, उरसा—वक्षःस्थलेन, स्वामिसम्भावनानां—प्रभुसमादराणां, प्रभोः स्नेहानामिति भावः। अवकाशमिव—स्थानमिव, प्रयच्छन्तं—ददतम्।

(२१४) प्रलम्बमानस्य—अत्यायतस्य इत्यर्थः। निभृतललितैः,—निभृतानि—साधारणदर्शनायोगीति भावः,ललितानि—रम्याणि तैः, विक्षेपैः,—सञ्चालनविशेषैः, अतिदुस्तरं—दुःखेनापि लङ्घितुमशक्यं, स्वल्पेनापि स्खलनेन मज्जनसम्भवादिति भावः; यौवनोदधिं—तारुण्यसागरम्। अतलस्पर्शिविषयरसरागमकरादिसङ्कुलत्वात् तथात्वम् इति हृदयम्।

(२१५) वामेति।—वामकरे—सव्यहस्ते, यः कटकः,—वलयः, तत्र यत् माणिक्यं—रत्नविशेषः, तस्य मरीचयः,—मयूखा एव, मञ्जर्यः,—वल्लर्यः, अभिनवोद्गताः सुकोमलाः पल्लवाङ्कुररूपा इत्यर्थः, तासां जालं—समूहः अस्ति अस्यामिति तथोक्तया। समुद्भिद्यमानेति।—समुद्भिद्यमानाः,—समुद्गच्छन्त्यः नीयमानाः, प्रतापानलस्य—वीर्यवह्नेः, शिखा एव—ज्वाला एव, पल्लवाः,—किसलयाः यस्यां तथाभूतया, शिखायाणां कृष्णरक्तिमाभासत्वात् इति भावः। चापकिणलेखया—धनुर्धारणजनितकलङ्करेखया। अङ्कितेति।—अङ्कितः,—चिह्नितः, पीवरः,—पुष्टः, प्रकोष्ठः,—कूर्परमणिबन्धयोः अन्तरालभागः यस्य तथोक्तम्।

(२१६) आलोहिनीम्—आरक्ताम्, ईषद्रक्तामित्यर्थः, [आलोहितशब्दात् "वर्णादनु—" (५।१।३९ पा०) इत्यादिना ङीपि तकारस्य नकारादेशे सिद्धम]। उच्चांसतटावलम्बिनीम्—उच्चम्—उन्नतम्, अंसतटं—स्कन्धदेशम्, अवलम्बते—आश्रयतीति तथोक्ताम्। अस्त्रेति।—अस्त्रग्रहणमेव व्रतं—नियमः, तस्मै विधृतां—गृहीतां, रौरवीमिव—रुरुः,—मृगविशेषः, तत्सम्बन्धिनीमिव, त्वचं—चर्म, "कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः। वसीरन्नानुपूर्वेण शाणक्षौमाविकानि च॥"

विभ्राणम्, (२१७) उत्कोटिकेयूरपत्रभङ्गपुत्रिकाप्रतिबिम्बगर्भ-कपोलं मुखं चन्द्रमसम् इव हृदयस्थितरोहिणीकम् उद्वहन्तम्, (२१८) अचपलस्तिमिततारकेण अधोमुखेन चक्षुषा शिक्षयन्तमिव लक्ष्मीलाभोन्नतानितमुखानि पङ्कजवनानि विनयं, स्वाम्यनुरागमिव अम्लातकम् उत्तंसीकृतं शिरसा धारयन्तं, (२१९) निर्दयया कङ्कणभङ्गभीतमकलकार्मुकार्पितामिव

इति भगवता मनुना ऊर्ध्वरेतसां ब्रह्मचारिणां रौरवचर्माच्छादनस्योक्तत्वादिति भावः। कर्णाभरणमणेः,—कर्णालङ्काररत्नस्य, प्रभां—कान्तिं, बिभ्राणं—दधानम्।

(२१७) उत्कोटीति।—उत्—उद्गता, कोटिः,—अग्रभागः, कोणो वा यस्य, तादृशः यः कैयूरपत्रभङ्गः—अङ्गदपत्रभङ्गः, अङ्गदस्यरचनाविशेषः इत्यर्थः, तस्य या पुत्रिका—पुत्तलिकाऽऽकृतिः, तस्याः प्रतिबिम्बं—प्रतिच्छाया, गर्भे—मध्ये यस्य तादृशौ, कपोलौ—गण्डौ यस्य तथाभूतं, मुखं—वदनम्। हृदयेति।—हृदये—उरसि, स्थिता—विराजिता, रोहिणी—स्वप्रिया यस्य तथाविधम्; चन्द्रमुखम् इति भावः।

(२१८) अचपलेति।—अचपला—अचञ्चला, स्तिमिता—स्थिरा, तारका—कनीनिका यस्य तेन, अधोमुखेन—नतेन, विनयावनम्रेणेति भावः। लक्ष्मीति।—लक्ष्म्याः,—श्रियाः, लाभेन—प्राप्त्या, उन्नतानितानि—उन्नमितानि, नीचाश्रयसुलभगर्वादिति भावः, मुखानि येषां तानि, पङ्कजवनानि—पद्मवनानि, विनयं—शिष्टाचारं, शिक्षयन्तमिव—सम्यक्समये नैव औद्धत्यं प्रदर्शितव्यमिति उपदिशन्तमिव इत्यर्थः; ["अव गतिबुद्धि—" (१।४।५२ पा०) इति सूत्रेण अणौ कर्तृणां कमलवनानां कर्मत्वं, भौवादिकस्य "शिक्षते" इत्यस्य अभ्यासार्थकत्वेन ज्ञानसामान्यार्थकत्वात्, णौ तस्य प्रयोज्यकर्तुः कर्मत्वं वेदितव्यम्; अत एव उक्तौ दीक्षिताः,—"ज्ञानसामान्यार्थानामेव ग्रहणं, न तु तदिशेषार्थानाम्" इति] सवर्गीयैः गर्वितसवर्गीयोपदेशनस्य समाहृतत्वात्; एतेनास्य कमललोचनत्वं ध्वनितम्। स्वाम्यनुरागं—प्रभुभक्तिम्। अम्लातकं—पुष्पविशेषं, कुरण्टकापुष्पभेदमिति यावत्; "आमड़ा" इति बङ्गीयैराख्यातम् आम्रातकवृक्षं वा, तस्य मुकुलमिति भावः। उत्तंसीकृतं—शेखरतां नीतम्।

(२१९) निर्दयया—दयाराहित्येन, काठिन्येन इति भावः; ["निर्दयया" इत्यत्र "निर्दयतया" इति पाठः कल्पनीयतया प्रतिभाति, दयानामभावः इति विग्रहाव्ययीभावे कृते, नञर्थस्य प्राधान्येन विवक्षितत्वे, निर्मक्षिकमित्यादिवत्

नम्रतां प्रकाशयन्तं, शैशवे एव निर्जितैः इन्द्रियैः अरिभिरिव संयतैः शोभमानं, प्रणयिनीमिव (२२०) विश्रामभूमिं कुलपुत्रताम् अनुवर्त्तमानं, (२२१) तेजस्विनमपि शीलेन आह्लादकेन सवितारमिव शशिना अन्तर्गतेन विराजमानम्, (२२२) अचलानामपि कायकार्कश्येन गन्धनम् इव आचरन्तं, दर्शनक्रीतम् आनन्दहस्ते विक्रीणानमिव जनं सौभाग्येन कुमारगुप्तं, पृष्ठतः

निर्हृयमिति पदं प्रसज्येनेति विभावनीयम्]। करुणेति।—करुणस्य—हस्ताभरणस्य, वलयस्य इत्यर्थः, भङ्गात—खण्डात्, भीतं—त्रस्तं, सकलं कार्मुकं—धनुः, तेन अर्पितां—मा एवं निर्हृयतां कुर्विति शिक्षाकल्पितामिति भावः। नम्रतां—विनीतत्वम्। शैशवे एव—बाल्ये एव, निर्जितैः,—वशीकृतैः, इन्द्रियैः,—चक्षुरादिभिः, अरिभिरिव—शत्रुभिरिव, संयतैः,—निगडितैः। सततशास्त्रव्यायामादिव्यसनवत्त्वात् जितेन्द्रियम् अविलासिनञ्च इति भावः।

(२२०) विश्रामभूमिं—प्रत्ययभाजनम्। कुलपुत्रतां—कुलीनताम, अनुवर्त्तमानम्—अनुसरन्तम् ; सत्कुलोत्पन्नतया अवश्यमेव विश्वसनीयमिति भावः।

(२२१) तेजस्विनमपि—प्रतापवन्तमपि। शीलेन—चरित्रेण, निर्मलेनेति भावः। आह्लादकेन—आह्लादयतीति तेन, आनन्दजनकेन, सदा प्रसन्नेन शान्तेन च इत्यर्थः। अन्तर्गतेन—हृदयावस्थितेन ; अन्यत्र,—विम्बागतेन इत्यर्थः, विरुद्धधर्म्ययोरसामानाधिकरण्यादिति भावः. एतेनास्य अदाम्भिकत्व प्रकटितम। उष्णशीतस्वाद्यपूर्व्वयोगवैलक्षण्यं महाऽनुभावेष्वेव "भीमकान्तैर्नृपगुणैः" इत्याद्यनुपपत्तवाक्यैः सूचितम् ; सत्स्वपि तेजस्वितादिगुणसङ्गेषु. निशायां तेजस्वितपनः यथा निशाकरमनुप्रविष्टः जनानां नयनसन्तर्पणः भवति, तथा अयमपि विनयादिगुणग्रामयोगात् सर्वेषां हृदयग्राही अभूदिति तात्पर्य्यम।

(२२२) अचलानामपि—पर्व्वतानामपि, कायकार्कश्येन—अङ्गकाठिन्येन, गन्धनमिव—विमर्दनमिव, हिंसनमिवेत्यर्थः, पराभवमिवेति भावः ; ("उत्साहने च हिंसायां सूचने चापि गन्धनम्" इत्यमरः)। आचरन्तं—कुर्वाणम् ; पर्व्वतादपि दृढशरीरमिति तात्पर्य्यम। दर्शनक्रीतं—दर्शनेन—दृष्टिमात्रेण, क्रीतम—आयत्तीकृतं, स्वयमेव वशङ्कृतमिति यावत। जनं सौभाग्येन—प्रणयित्वेन, आभाषणादिना आनन्दोत्पादनेनेत्यर्थः, आनन्दहस्ते—आह्लादकरे संस्थाप्य इत्यर्थः, [औपसेधिकाधिकरणे सप्तमी] तेन नानुचरादिपरम्परया इति भावः। विक्रीणानमिव—विक्रयं

तस्य कनीयांसम् अतिप्रांशुतया गौरतया च मनःशिला-शैलमिव सञ्चरन्तम्, (२२३) अनुल्वणमालतीकुसुमशेखर-निभेन निर्जिगमिषता गुरुणा शिरसि चुम्बितमिव यशसा, पर-स्परविरुद्धयोः विनययौवनयोः चिरात् प्रथमसङ्गमचिह्नमिव भ्रूमङ्गतकेन कथयन्तम्, अतिधीरतया हृदयनिहितां स्वामि-भक्तिम् इव निश्चलां दृष्टिं धारयन्तम्, (२२४) अच्छाच्छचन्दन-रसानुलेपशीतलं सन्निहितहारोपधानं वक्षःस्थलम् अनन्त-

---

कुर्वाणमिव, भृयसा जनं सानन्दं कुर्वाणमिव इत्यर्थः। एतेन विमुग्धीकरणं जनानां व्यज्यते। कस्यापि कार्यस्यार्थं यदस्तु प्राक् क्रीयते, पश्चात् प्रभूतलाभार्थं तदन्यस्यापि विक्रीयते इति लोकदृष्टम्; प्रकृते तु प्रथमतः स्वस्य सौम्यमूर्त्तितया दर्शनेनैव क्रीतः, पश्चात्तु हर्षोत्पादनार्थमानन्दहृल्ले जनः विक्रीतः इति फलितम्। कनीयांसं—कनिष्ठम्। अतिप्रांशुतया—अत्युन्नतकायत्वेन, गौरतया—गौराङ्गत्वेन च, मनःशिला-शैलमिव—मनःशिला—मनोह्वा, उपधातुविशेष इति यावत्, तस्य शैलमिव—तन्मयपर्व्वतमिव; तस्य तथोन्नतत्वात् मनःशिलासङ्घातेन गौराङ्गत्वाच्च इति भावः।

(२२३) अनुल्वणेति।—अनुल्वणं—सौम्यं, सुभगदर्शनमित्यर्थः, यत् मालती-कुसुमशेखरं—मालतीपुष्पशिरोमाल्यं, (शेखरस्य अनुल्वणता विनयव्यञ्जिका ज्ञातव्या) तन्निभेन—तदाभेन। निर्जिगमिषता—निर्गन्तुमिच्छता, प्रकाशमानेन इति भावः; गुरुणा—महता, पितादिगुरुजनेन च, यशसा—कीर्त्या, शिरसि चुम्बित-मिव—स्पृष्टमिव, कृतचुम्बनमिव च, आघ्रातमिवेत्यर्थः। पितादिगुरुजनेन च प्रथमं गच्छता पुत्रादयः शिरसि चुम्ब्यन्ते इति व्यवहारः। परस्परविरुद्धयोः,—अन्योऽन्यविरोधिनोः; यौवनकालस्य उद्धतप्रकृतिकत्वात् विनयस्य च तद्विरोधित्वात् तयोरेकावस्थानासम्भवादिति भावः। प्रथमसङ्गमचिह्नमिव—प्रथमसम्मेलनचिह्नमिव, भ्रूमङ्गतकेन—भ्रुवोः सङ्गतकं—सम्मेलनं तेन, कथयन्तं—सूचयन्तं, यथा भ्रुवौ मम परस्परविरोधेन युक्ते, तथा विनययौवने परस्परमविरोधिनी सती अत्र स्थास्यत इति भ्रुयुग्मसम्मिलनव्याजेन प्रकटयन्तमिव इत्यर्थः; एतेनायं युग्मभूरिति व्यञ्जितम्। निश्चलाम्—अचञ्चलां, धीरामित्यर्थः।

(२२४) अच्छेति।—अच्छाच्छः,—अतिस्वच्छः, यः चन्दनरसः,—श्रीखण्ड-द्रवः, तस्य अनुलेपेन,—अङ्गे प्रलेपनेन, शीतलं—हिमम्। सन्निहितेति।—सन्निहितस्य

मामन्तसङ्क्रान्तिश्रान्तायाः श्रियो विशालं शशिमणिशिलापट्ट-शयनमिव बिभ्राणं, (२२५) चक्षुः कुरङ्गकैः, घोणावंशं वराहैः, स्कन्धपीठं महिषैः, प्रकोष्ठबन्धं व्याघ्रैः, पराक्रमं केसरिभिः, गमनं मतङ्गजैः मृगयाक्षपितशेषैर्भीतैः उत्कोचमिव दत्तं दर्श-यन्तं माधवगुप्तं ददृशतुः।

प्रविश्य च दूरादेव (२२६) चतुर्भिः अङ्गैः उत्तमाङ्गेन च गां स्पृशन्तौ नमश्चक्रतुः। स्निग्धनरेन्द्रदृष्टिनिर्दिष्टाम् उचितां भूमिं भेजाते। मुहूर्तञ्च स्थित्वा भूपतिः आदिदेश तौ,—

—समर्पितस्य, परिहितस्येत्यर्थः, हारस्य उपधानम्—उपबर्हणम्, आश्रयमित्यर्थः, हारशोभितम् इति भावः। अमन्तेति।—अमन्तेषु—ग्रहेषु इति यावत्, सामन्तेषु—राजसु, या सङ्क्रान्तिः—सङ्क्रमणं, सञ्चरणमित्यर्थः, तया श्रान्ता—क्लान्ता, तस्याः, श्रियः,—लक्ष्म्याः, विशालं—विस्तृतं, प्रशस्तमित्यर्थः, शशिमणिशिलापट्टशयनमिव—चन्द्रकान्तमणिप्रस्तरफलकशय्यामिव; श्रान्तजनैः शीतलप्रशस्तशुभशयनीये शयित्वा विश्रम्यते इति भावः। एतेनास्य कवाटोरस्कत्वं प्रकटीकृतम्। सुखकरदृढाश्रयी एव श्रय्यते इति मनोरमाधारोऽयं रमायाः विश्रामस्य इति ध्वनितम्।

(२२५) चक्षुः,—नेत्रं, कुरङ्गकैः,—मृगविशेषैः, दत्तमित्यन्वयः, एवमुत्तरत्र। घोणावंशं—नासावंशम्। स्कन्धपीठम्—अंसतटम्। प्रकोष्ठबन्धं—हस्तावयवबन्ध-विशेषम्। केसरिभिः,—सिंहैः। मतङ्गजैः,—गजैः। मृगयेति।—मृगयया—आखेटाचरणेन, क्षपिताः,—नाशिताः, तेभ्यः शेषाः,—अवशिष्टाः तैः, भीतैः,—सर्वानेव मृगसमूहानयं निनाशयिषति, इदानीम् अस्मानपि चेत् क्षपयिष्यति इति धिया श्रद्धितैः इत्यर्थः। उत्कोचमिव—दण्डविशेषमिव। एतेनास्य कुरङ्गनेत्रत्वम् उन्नत-घोणत्वं, हयस्कन्धत्वं, पीनप्रकोष्ठत्वं, सिंहविक्रमत्वं, गजगतित्वञ्च प्रकटीकृतम्; अतीव-रमणीयाकृतिः पराक्रमी चायमिति भावः।

(२२६) चतुर्भिरिति।—चतुर्भिरङ्गैः,—जानुभ्यां हस्ताभ्याञ्च इत्यर्थः, उत्तमा-ङ्गेन—शिरसा। गां—भुवम्। अनेन प्रणामः प्रदर्शितः। स्निग्धेति।—स्निग्धेन—स्नेहवता, नरेन्द्रेण—राज्ञा प्रभाकरवर्धनेन, दृष्ट्या—नेत्रेण, नेत्रसंज्ञयेत्यर्थः, निर्दिष्टा—प्रदर्शिता ताम्; स्निग्धेति दृष्टिविशेषणं वा। उचितां—योग्यां, सम्राट्सभोपे स्वपदमर्यादानुसारेण उपवेशनार्हामित्यर्थः। भूमिं—स्थानम्, आसन-

"अद्यप्रभृति भवद्भ्यां (२२७) कुमारौ अनुवर्त्तनीयौ" इति। "यथा आज्ञापयति देवः" इति मेदिनीदोलायमानमौलिभ्याम् उत्थाय राज्यवर्द्धनहर्षौ प्रणेमतुः; तौ च पितरम्। ततश्च आरभ्य क्षणमपि (२२८) निमेषोन्मेषौ इव चक्षुर्गोचरात् अनपयान्तौ, उच्छ्वासनिश्वासौ इव नक्तन्दिवम् अभिमुखस्थितौ, भुजौ इव सततपार्श्ववर्त्तिनौ, कुमारयोः तौ बभूवतुः।

(२२९) अथ राज्यश्रीरपि नृत्यगीतादिषु विदग्धासु सखीषु सकलासु कलासु च प्रतिदिनमुपचीयमानपरिचया शनैःशनैः अवर्द्धत; (२३०) परिमितैरेव दिवसैः यौवनम् आरोढ।

मिति भावः, मेजाते—उपविविशतुरित्यर्थः। गुरुजनानुमतस्य आसनग्रहणनियमात् इति भावः, तौ—कुमारगुप्तमाधवगुप्तौ।

(२२७) कुमारौ—राज्यवर्द्धनहर्षाख्यौ। अनुवर्त्तनीयौ—अनुसरणीयौ, संसेवनीयौ इत्यर्थः, सहजसद्भावेन इत्याशयः। मेदिनीति।—मेदिन्यां—भूमौ, दोलायमानः,—लुठन्, मौलिः,—किरीटो धम्मिल्लो वा ययोः ताभ्यां, धरणीदृष्टे अवनमितशिरोभ्यामिति भावः। तौ च—राज्यवर्द्धनहर्षौ च। पितरं प्रभाकरवर्द्धनमित्यनेनान्वयः।

(२२८) निमेषोन्मेषौ इव—निमीलनोन्मीलने इव, चक्षुर्गोचरात्—दृष्टिविषयात्, अनपयान्तौ—अवहिर्गच्छन्तौ; निमेषोन्मेषौ यथा कदाचित् नेत्रं न त्यजतः, तथा अत्यक्तसमीपौ इत्यर्थः। नक्तन्दिवम्—अहर्निशम्। [अचतुर—" (५।४।७७ पा०) इत्यादिना समासः] अभिमुखस्थितौ—अभिमुखं—मुखसमीपे, सम्मुखे इत्यर्थः, स्थितौ—वर्त्तमानौ; उच्छ्वासनिश्वासावपि सदैव मुखसमीपे प्रवहन्तौ वर्त्तेते। सततपार्श्ववर्त्तिनौ—निरन्तरपार्श्वचारिणौ; कृत्यसाधनाय रक्षणाय वा बाह्वौ अपि सदैव पार्श्वदेशे लक्ष्येते।

(२२९) राज्यश्रीः,—तदाख्या राजदुहितापि। विदग्धासु—चतुरासु। सखीषु—सहचरीषु, इवेति भावः, नृत्यगीतादिषु—नर्त्तनगानादिषु; सखीनामिव नृत्यगीतादीनामपि चित्तविनोदित्वादिति भावः। कलासु—विद्यासु। उपचीयमानपरिचया—वर्द्धमानश्रिया, विशेषप्रतिभावत्त्वात् इति भावः, ["उपचीयमान—" इत्यत्र "समुपचीयमान—" इति पाठान्तरम्]।

(२३०) परिमितैरेव—अल्पैरेव; अतियत्नपरिपालनात् इति भावः।

निपेतुः एकस्यां तस्यां शरा इव लक्ष्यभुवि भूभुजां सर्वेषां दृष्टयः। दूतप्रेषणादिभिश्च तां ययाचिरे राजानः।

कदाचित्तु राजा अन्तःपुरप्रासादस्थितो (२३१)बाह्यकक्ष्यावस्थितेन पुरुषेण स्वप्रस्तावागतां गीयमानामार्य्यामशृणोत्,—

"उद्वेगमहाऽऽवर्त्तं पातयति पयोधरोन्नमनकाले।
सरिदिव तटमनुवर्षं विवर्द्धमाना सुता पितरम्" ॥ ५ ॥

(२३२) तां च श्रुत्वा पार्श्वस्थितां महादेवीम् उत्सारितपरिजनो जगाद,—"देवि! तरुणीभूता वत्सा राज्यश्रीः। एतदीया गुणवत्तेव क्षणमपि हृदयात् नापयाति मे चिन्ता। यौवनारम्भ

एकस्यां तस्यां—केवलायां राज्यश्रियां, विशेषायत्वात् इति भावः। लक्ष्यभुवि—शरव्यविषये। भूभुजां—राज्ञाम्।

(२३१) बाह्येति।—बाह्या—बहिःस्थिता, कक्ष्या—प्रकोष्ठः, "मङ्गल" इति भाषा, तत्र अवस्थितः तेन। स्वस्य—आत्मनः, प्रस्तावः,—कन्यादानविषयकः प्रसङ्गः, तेन तत्र वा आगता—उपस्थिता तां, कन्यादानविषयिणीमिति भावः; गीयमानां—कीर्त्यमानाम्, आर्य्यां—छन्दोजातिं,—"यस्याः प्रथमे पादे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये पञ्चदश चतुर्थके साऽऽर्य्या॥" इत्युक्तलक्षणाम्।

यौवनेपदवीमारोढुमुद्यतायाः अनूढायाः कन्यायाः पितुः सदैवाग्रहित्वं प्रस्तावानुकूलं यदृच्छाक्रमेण पुरुषमुखात् वर्णयति, उद्वेगेति।—अनुवर्षं—प्रतिवर्षं, प्रतिवृष्टि च, विवर्द्धमाना—वृद्धिं गच्छन्ती; एकत्र,—क्रमशः यौवनोन्मेषेण, अन्यत्र,—अजस्रवर्षजलपूरेण इति भावः; सुता—कन्या, पयोधरोन्नमनकाले—स्तनोन्नतिसमये, मेघाभ्युन्नतिकाले च, पितरं—जनयितारं, सरित्,—नदी, तटमिव—कूलमिव, उद्वेगः,—उद्वेजनं, व्याकुलचित्तता इत्यर्थः, स एव महान् आवर्त्तः,—जलभ्रमिः तस्मिन्, उद्वेग इव महान् आवर्त्तश्च; यद्वा,—उत्—उद्गतः, वेगः,—रयः यस्य तादृशः महान् आवर्त्तः तस्मिन्, पातयति—निक्षिपति; कन्यादायी नदीवेग इव महोद्वेगजनककुलकूलध्वंसाशङ्कोदयात् इति भावः। उपमाऽलङ्कारः॥ ५॥

(२३२) ताम्—आर्य्याम्। महादेवीं—यशोवतीम्। उत्सारितपरिजनः,—अपसारितपरिवारवर्गः; निर्भृतपरामर्शकरणस्यौचित्यात् इति भावः। तरुणीभूता—प्राप्तयौवना। एतदीया—एतत्सम्बन्धिनी, राज्यश्रीविषयिणीत्यर्थः।

एव च कन्यकानाम् ((२३३) इन्धनीभवन्ति पितरः सन्तापानलस्य । हृदयम् अन्धकारयति मे दिवसमिव (२३४) पयोधरोन्नतिः अस्याः । केनापि कृता धर्म्या नाभिमता मे स्थितिः इयं, यत् अङ्गसम्भूतानि अङ्गलालितानि अपरित्याज्यानि अपत्यकानि अकाण्ड एवागत्य असंस्तुतैर्नीयन्ते । एतानि तानि खलु अङ्गनस्थानानि संसारस्य । सेयं (२३५) सर्वाभिभाविनी शोकाग्नेः दाहशक्तिः, यत् अपत्यत्वे समाने जातायां दुहितरि दूयन्ते सन्तः । एतदर्थं जन्मकाल एव कन्यकाभ्यः प्रयच्छन्ति खलिलम् अम्बुभिः साधवः । (२३६) एतद्भयात् अकृतदारपरिग्रहाः परिक्षतगृहवसतयः शून्यानि अरण्यानि अधिशेरते

---

(२३३) इन्धनीभवन्ति—काष्ठभूता भवन्ति । सन्तापानलस्य—कथमेषा पावमात्क्रियते, यदि अपायगता स्यात् तदाऽतीव दुःखमिति उद्वेगाग्नेः ।

(२३४) पयोधरोन्नतिः,—स्तनोन्नतिः, मेघोन्नतिश्च । केनापि—नियन्त्रेति भावः, कृता—विहिता, प्रवर्त्तिता इत्यर्थः, धर्म्या—धर्मादनपेता, ["धर्म्मपथ्यर्थ —" (४।४।९२ पा०) इत्यादिना यत्प्रत्यये रूपम्] इयम्—एषा, कन्याया भर्तृभवनममनरूपा इत्यर्थः, स्थितिः,—मर्य्यादा, सदाचार इत्यर्थः । मे—मम, न अभिमता —न सम्मता, न अनुमोदिता इत्यर्थः । अङ्गसम्भूतानि—देहोत्पन्नानि, आत्मजानीत्यर्थः, अङ्गलालितानि—उत्सङ्गवर्द्धितानि, अपरित्याज्यानि—परित्यक्तमयोग्यानि, अपत्यकानि—कन्या इत्यर्थः, अकाण्डे एव—असमये एव, हठादेव इत्यर्थः । असंस्तुतैः,—अपरिचितैः, जनैरिति शेषः । ("संस्तवः स्यात् परिचयः" इत्यमरः) अङ्गनस्थानानि—कलङ्कस्थानानि, ("कलङ्काङ्कौ लाञ्छनञ्च" इत्यमरः) ।

(२३५) सर्वाभिभाविनी—सर्वान् जनान् अभिभवतीति तथोक्ता । अपत्यत्वे —सन्तानत्वे, समाने —तुल्ये, पुत्रेण सहेति भावः । जातायाम्—उत्पन्नायाम् । दूयन्ते —तप्यन्ते । एतदर्थम्—एतन्निमित्तम् ; दुहितुः अपायपतनादिदुर्भावनया सन्तापोत्पादकत्वात् यथा सा अतिसन्तापदायिनी न भवेत्, तदर्थमिति भावः । अम्बुभिः,—नेत्रजलवर्षणैः ; कन्यकायामुत्पन्नमात्रायामेव सा सत्पात्रगता भविष्यति न वा इत्यादि परिणामचिन्तया पित्रादिगुरुजनानामश्रूणि आविर्भवन्तीति भावः ।

(२३६) एतद्भयात्—कन्यातः सन्तापभयात्, अकृतदारपरिग्रहाः,—अकृतो-

मुनयः। को हि नाम सहते विरहम् अपत्यानाम्? यथा यथा (२३७) समापतन्ति दूता वराणां, वराकी लज्जमानेव चिन्ता तथा तथा नितरां प्रविशति मे हृदयम्। किं क्रियते? तथाऽपि (२३८) गृहगतैः अनुगन्तव्या एव लोकवृत्तयः। प्रायेण च सत्सु अपि अन्येषु (२३९) वरगुणेषु अभिजनमेव अनुरुध्यन्ते धीमन्तः। (२४०) धरणीधराणाञ्च मूर्ध्नि स्थितो माहेश्वरः पादन्यास इव सकलभुवननमस्कृतो मौखरो वंशः।

हाहा। परिहृतगृहवसतयः,—परित्यक्तगृहास्थितयः। शून्यानि—निर्जनानि। अधिशेरते—आश्रयन्ति। अर्वोपमानाश्मनत्वप्रतीतेः गृहिण्यः एव आरण्यकाः यथार्थमुखिन इति व्यतिरेको व्यज्यते। नाम—सम्भावनायाम्; पाषाणहृदयोऽपि न कदाचित् तथाविधं क्लेशं सोढुं शक्नुयादित्याशयः।

(२३७) समापतन्ति—समागच्छन्ति। वराकी—दीना, उपयुक्तोपायोद्भावनशक्त्यभावात् इति भावः। लज्जमानेव—दुहितृभाग्यानभिज्ञभावनाजनितत्रपान्विते व। नितराम्—अतिशयेन। लोकेऽपि निरतिशयलक्ष्मीतानां सुग्धाङ्गनानां सदनाभ्यन्तरतः निलयनं प्रसिद्धम्।

(२३८) गृहगतैः,—गृहस्थैः। अनुगन्तव्याः,—अनुसरणीयाः। लोकवृत्तयः,—लोकस्थितयः, लोकाचारा इत्यर्थः, सनातनसामाजिकसत्पुरुषसरणेः अवश्यत्वात् इति भावः।

(२३९) वरगुणेषु—वरस्य—उद्दीप्तः, गुणेषु — रूपयौवनश्रुतविनयादिषु। अभिजनमेव—सत्कुलमेव, सत्कुलजातत्वमेवेत्यर्थः, ("भद्रेदभिजनः ख्यातौ जन्मभूम्यां कुलध्वजे। कुलेऽपि च" इति मेदिनी)। अनुरुध्यन्ते—अनुसरन्ति।

(२४०) धरणीधराणां—राज्ञां, पर्वतानाञ्च, मूर्ध्नि—शिरसि, शिखरे च; माहेश्वरः,—महेश्वरस्य—अधीश्वरस्य, हरस्य च, अयं माहेश्वरः, ("महेश्वरो महादेवे कथितोऽधीश्वरेऽपि च" इति मेदिनी) अस्मिन् वंशे बहवो महाप्रभावा राजानः प्रादुर्बभूवुरिति भावः। पादन्यास इव—निखिलचरण इव, चरणनिक्षेप इव चेत्यर्थः, तद्वंशे समुत्पन्नत्वात्, तत्रावस्थानाच्च; 'छदभिर्छिसी भावी द्रव्यवत्प्रकाशते' इति न्यायादिति भावः। सकलैः भुवनैः,—तद्वासिभिरित्यर्थः, नमस्कृतः,—माननीयतया श्रेष्ठत्वे परिगणितः, समादृत इत्यर्थः, आराध्यतया अभिवन्दितश्च, मौखरः,—मुखरो नाम कश्चिद्वनिपतिः, तस्य अयं मौखरः, वंशः,—कुलम्; हिमाचलश्च उपरि

(२४१) तत्रापि तिलकभूतस्य अवन्तिवर्म्मणः सूनुः अग्रजो ग्रहवर्म्मा नाम ग्रहपतिरिव गां गतः पितुः अन्यूनो गुणैः एनां प्रार्थयते। यदि भवत्या अपि मतिः अनुमन्यते, ततः तस्मै दातुम् इच्छामि" इति उक्तवति भर्त्तरि दुर्विदग्धस्नेहकातरतरहृदया साश्रुलोचना महादेवी प्रत्यवाच,—"आर्य्यपुत्र! (२४२) संवर्द्धनमात्रोपयोगिन्यो धात्रीनिर्विशेषा भवन्ति खलु मातरः कन्यकानाम्। दाने तु प्रमाणम् आसां पितरः। केवलं (२४३) कृपाकृतविशेषः सुदूरेण तनयस्नेहात् अतिरिच्यते दुर्विदग्धस्नेहः। यथा यावज्जीवम् आवयोः (२४४) न आर्त्तितां प्रतिपद्यते, तथा आर्य्यपुत्र एव जानाति" इति।

यथा महेश्वरेण पादन्यासः कृतः, तथा सर्व्वेषां भूभृतामुपरि वंशोऽयं पादन्यासोऽकारि, सर्वेभ्यः राजकुलेभ्यः एतत् गरिष्ठमिति तात्पर्य्यम्।

(२४१) तत्रापि—वंशे इत्यर्थः, तिलकभूतस्य—ललाटालङ्कारभूतस्य, अवन्तिवर्म्मणः,—तदाख्यस्य नृपतेः। सूनुः अग्रजः,—ज्येष्ठपुत्रः। ग्रहपतिरिव—सूर्य्य इव। ("सूरसूर्य्यार्कमादित्य···। विभावसुर्ग्रहपतिः—" इत्यमरः) गां गतः,—दिविस्थः, अन्यत्र,—भुवमवतीर्णः, ("स्वर्गेषु पशुवाग् वज्रदिङ्नेत्रवृष्टिभूजले। लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः" इत्यमरः) पितुः,—अवन्तिवर्म्मणः इत्यर्थः, अन्यूनः—अहीनः, तुल्य इति यावत्, यथावदाकृत्यादिभिः इत्याशयः। एनां—राज्यश्रियम्।

(२४२) संवर्द्धनेति।—संवर्द्धनं—परिपोषणं, तन्मात्रे—तदैवेत्यर्थः, उपयोगिः,—व्यापारः, प्रयोजनमित्यर्थः, अस्ति आसामिति तथोक्ताः। धात्रीति।—धात्री—उपमातृका, तस्या निर्विशेषाः,—विशेषरहिताः, धात्रीसदृश इत्यर्थः। प्रमाणं—मर्य्यादा, हेतुर्वा, एतासां पितृपादा एव दानादौ कर्त्तव्याकर्त्तव्यविनिर्णयकारिण इत्यर्थः।

(२४३) कृपेति।—कृपया—अनुकम्पया, भर्तृभवनगमनसन्निचितभाविविच्छेदजनितयेति भावः, कृतः,—जनितः, विशेषः,—पार्थक्यं यस्य तथाभूतः। तनयस्नेहात्—पुत्रप्रीतिमपेक्ष्य इत्यर्थः, अतिरिच्यते—अतिरिक्ततया ख्यायते इत्यर्थः।

(२४४) आर्त्तितां—मनःपीडात्वं, प्रतिपद्यते—प्राप्नोति, मनःपीडां जनयतीत्यर्थः, दुर्विदग्धस्नेहः इति शेषः। ["न आर्त्तिताम्" इत्यत्र "नाधिताम्" इति

राजा तु (२४५) जातनिश्चयो दुहितृदानं प्रति समाहूय सुतौ अपि विदितार्थौ अकार्षीत्। (२४६) शोभने च दिवसे ग्रहवर्म्मणा कन्यां प्रार्थयितुं प्रेषितस्य पूर्व्वागतस्यैव प्रधानदूतपुरुषस्य करे सर्व्वराजकुलसमक्षं दुहितृदानजलम् अपातयत्। (२४७) जातमुदि ऋतार्थे गते च तस्मिन्, आसन्नेषु च विवाहदिवसेषु, (२४८) उद्दामदीयमानताम्बूलपटवासकुसुमप्रसाधितसर्व्वलोकं, (२४९) सकलदेशादिश्यमानशिल्पिसार्थागमनम्, अवनिपालपुरुषगृहीतसमग्रग्रामीणानीयमानोपकरण-

---

पाठेऽपि,—स एवार्थः। "आर्त्तिता" इति पाठे तु,—आर्त्तिता—दुःखभावः, प्रतिपद्यते—जायते; यादृशेन कर्म्मणा अस्माभिर्यावज्जीवं शोचितव्यं, तदार्य्यपुत्रः जानात्येव, अतो विचिन्त्य क्रियतां, यथा परिणामः विरसो न भवेत् इति भावः]।

(२४५) जातनिश्चयः,—ज्ञातनिर्णयः, निश्चितमतिरित्यर्थः। विदितार्थौ—ज्ञातार्थौ, तयोः प्राप्तवयस्कतया मित्रवदुपचरणार्हत्वात्, "प्राप्त तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत्" इति नीतेः इति भावः।

(२४६) शोभने—शुभे। दुहितृदानजलं—दुहितुः दानाय—समर्पणाय, ग्रहवर्म्मणे इति भावः, जलम्, आपातयत्—प्रायच्छत्, वाग्दानविधानेनेति भावः।

(२४७) "जातमुदि" इत्यादौ "आसीत् राजकुलम्" इत्युत्तरेण सम्बन्धः। जातमुदि—जातहर्षे। ऋतार्थे—सत्यमन्यनरेन्द्रस्वीकारात् सिद्धागमनप्रयोजने इत्यर्थः। आसन्नेषु—सन्निहितेषु।

(२४८) राजकुलं विशिनष्टि, उद्दामेति।—उद्दामम्—उच्छृङ्खलमिति भावः, दीयमानेन—अर्प्यमाणेन, ताम्बूलेन—पर्णेन, पटवासेन—गन्धद्रव्यभेदेन, कुसुमेन—पुष्पेण च, प्रसाधिताः,—अलङ्कृताः, सम्मानिता वा, सर्वे लोकाः,—जनाः यस्मिन् तत्; मङ्गलकर्म्मणि तथा प्रसाधननियमात् इति भावः।

(२४९) सकलेति।—सकलेभ्यः,—सर्वेभ्यः, देशेभ्यः,—स्थानेभ्यः, जनपदेभ्य इत्यर्थः, सकलैः देशैर्वा, आदिश्यमानम्—आज्ञाप्यमानम्, अनुमन्यमानमिति यावत्, शिल्पिसार्थानां—कारुकर्म्मिसमूहानाम्, आगमनम्—उपाहूतदर्शनम् तत्, मङ्गलरत्नमण्डपादिनिर्म्माणाय इति हृदयम्। अवनिपालेति।—अवनिपालपुरुषैः,—राजपुरुषैः, राजकर्म्मचारिपुरुषैर्वा, गृहीताः,—आदत्ताः, समयाः,—सकलाः, ग्रामी-

सम्भारं, (२५०) राजदौवारिकोपनीयमानानेकनृपोपायनम्, (२५१) उपनिमन्त्रितागतबन्धुवर्गसंवर्गणव्यग्रराजवल्लभं, (२५२) लब्धमधुमदप्रचण्डचर्मकार-करपुटोल्लालितकोणपट्टविघट्टनरणन्मङ्गलपटहं, (२५३) पिष्टपञ्चाङ्गुलमण्ड्यमानोलूखलमुसलशिलाद्युपकरणम्, (२५४) अशेषाशामुखावि-

ष्टानां—जानपदानाम्, आनीयमानाः,—उपस्थाप्यमानाः, प्रदीयमाना इत्यर्थः, उपकरणसम्भारः,—काय्यसाधनाङ्गसामग्रीसञ्चयः यस्मिन् तत्।

(२५०) राजेति।—राजदौवारिकैः,—राज्ञः द्वाररक्षिभिः, उपनीयमानानि—सङ्कृष्यमाणानि, अनेकेषां—बहूनां, नृपाणां—राज्ञां, सामन्तानां निमन्त्रितानामिति भावः, उपायनानि—उपढौकनानि यस्मिन् तत्।

(२५१) उपेति।—उपनिमन्त्रिताः,—कन्यादिवाहक्रियासमाधानार्थमाहूताः, अत एव आगताः,—उपस्थिताः, ये बन्धुवर्गाः,—बान्धवसमूहाः, तेषां संवर्गणाय—सङ्कर्षणाय, संवर्द्धनार्थमिति यावत्, व्यग्राः,—व्याकुलाः, राजवल्लभाः,—राजनमंसचिवाः यत्र तत्।

(२५२) लब्धेति।—लब्धेन—पीतेनेति यावत्, मधुना—मद्येन, यो मदः,—उल्लासः, तेन प्रचण्डाः,—मद्यपानजनितस्फूर्त्या कार्य्यतत्पराः इत्यर्थः, मद्यपानेनैव नीचानामानन्दोदयात् इति भावः, ये चर्मकाराः,—वाद्यकरा इति यावत्, तेषां करपुटेन—पाणियुगलेन, उल्लालितः,—धृतः, कोणः,—वादनदण्डः, ("कोणो वीणादिवादनम्" इत्यमरः) तस्य पटुना—नैपुण्यसहकृतेन इति यावत्, विघट्टनेन—ताडनेन, रणन्तः,—ध्वनन्तः, मङ्गलपटहाः,—आभ्युदयिकाणकाख्यवाद्यभेदाः यस्मिन् तत्।

(२५३) पिष्टेति।—पिष्टानाम्—आतर्पणानां, "पिट्ठल" इति बङ्गभाषया प्रसिद्धानाम् आलेपनद्रव्यभेदानामित्यर्थः, हरिद्राकुङ्कुमगोरोचनातण्डुलचूर्णादिकृतानाम् इत्यर्थो वा, पञ्चानाम् अङ्गुलीनां समाहारः पञ्चाङ्गुलं, ["सङ्ख्यापूर्वो द्विगुः" (२।१।५२ पा०) इति समासे "स नपुंसकम्" (२।४।१७ पा०) इति नपुंसकत्वं, "द्विगुरेक—" (२।४।१ पा०) इत्यादिना एकवचनञ्च, ततः "तत्पुरुषस्याङ्गुलेः" (५।४।८३ पा०) इति सूत्रेण समासान्तोऽच्] तेन, पञ्चाङ्गुलगृहीतपिष्टेन इत्यर्थः, मण्ड्यमानानि—अवघट्ट्यमानानि, उलूखलमुसलशिलादीनि—तदाख्यधान्यादिकण्डनसाधनानि, उपकरणानि—मङ्गलभूतद्रव्यसमूहाः यत्र तत्, दैशकुलाचारनियमात् इति भावः।

(२५४) अशेषेति।—अशेषाणां—सर्वासाम्, आशानां—दिशां, मुखेभ्यः,—

भूतचारण-परम्परा-पूर्य्यमाण-प्रकोष्ठ-प्रतिष्ठाप्यमानेन्द्राणीदेवतं, (२५५) सितकुसुमविलेपनवसनसत्कृतैः सूत्रधारैः आदीयमान-विवाहवेदीसूत्रपातम्, (२५६) उत्कूर्चककरैश्च सुधाकर्परस्कन्धैः अधिरोहणीसमारूढैः धवैः धवलीक्रियमाणप्रासादप्रतोली-प्राकारशिखरं, (२५७) चूर्ण्यमानकुसुमसम्भाराभ्र प्लव-

अन्तरालेभ्यः इत्यर्थः, आविर्भूतानाम्—आगतानां, चारणानां—कुशीलवानां, नट-विशेषाणामित्यर्थः, राज्ञां प्रशस्तिकीर्त्तकानामिति यावत्, परम्पराभिः,—समूहैः, पूर्य्यमाणेषु—भ्रियमाणेषु, प्रकोष्ठेषु—बहिर्द्वारेषु, प्रतिष्ठाप्यमाना—प्रतिष्ठां नीयमाना, इन्द्राणी—शची एव, देवता—उत्सवविघ्ननिवारिणीति भावः, यस्मिन् तत्। स्वयं-वरादिचौरकारिणः शच्या विनाश्यन्ते इति प्रसङ्गः।

(२५५) सितेति।—सितेन—शुभ्रेण, कुसुमेन—पुष्पेण, विलेपनेन—श्रीखण्डा-द्यनुलेपनद्रव्येण, वसनेन—वस्त्रेण च, सत्कृताः,—सम्मानिताः, तैः, सूत्रधारैः,—स्थप-तिभिः। आदीयमानेति।—आदीयमानः,—क्रियमाण इत्यर्थः, विवाहवेद्याः,—विवा-हार्था—परिणयार्था, वेदी—परिष्कृतभूमिः, मञ्चविशेष इत्यर्थः, तस्याः, तान्निर्माणार्थ-मिति भावः, सूत्रपातः,—तन्तुविन्यासः, समत्वविषमत्वनिर्णयार्थमिति भावः, यच्च तत्।

(२५६) उत्कूर्चककरैः,—उत्कूर्चकानि—"कार्णिका" इति ख्यातानि "राज-मिस्त्रि" इत्याख्यया प्रसिद्धानां प्रासादादिनिर्म्मापकाणाम् इष्टकाग्रहनिर्म्माण-साधनानि अस्त्राणि इत्यर्थः, करेषु—हस्तेषु येषां तैः; यद्वा,—उत्कूर्चकाः,—छत्तोलिताः, कूर्चिकाः,—तूलिकाः, "कूँची" इति ख्याताः चूर्णलेपसाधनद्रव्यविशेषाः इत्यर्थः, ("कूर्चिका सूचिकायाञ्च तूलिकायाञ्च कुञ्चलि" इति मेदनी) करेषु येषां तैः। सुधेति।—सुधानां—चूर्णद्रव्याणां, कर्पराः,—भाजनानि, स्कन्धेषु—अंसेषु येषां तैः। अधिरोहणीसमारूढैः,—अधिरुह्यते अनयेति अधिरोहणी—निःश्रेणी, ("निःश्रेणीस्त्वधिरोहणी" इत्यमरः) "निसैनी" इति भाषा, तां, ["अधिरोहणी" इत्यत्र "अधिरोहिणी" इति पाठान्तरम्] समारूढाः,—आधिष्ठिताः तैः, धवैः,—पुरुषैः, (पतिश्चाश्वियुजि धवाः" इत्यमरः)। धवलीति।—धवलीक्रियमाणानि—श्वेतीक्रिय-माणानि, चूर्णलेपनेनेति भावः, प्रासादाः,—राजभवनानि, प्रतोल्यः,—रथ्याः, ("रथ्याप्रतोल्यौ विशिखाः" इत्यमरः) प्राकाराः,—प्राचीरानि, तेषां शिखराणि—अग्राणि यत्र तत्; महोत्सवादौ प्रासादपथादिपरिष्कारणनियमदर्शनात इत्याशयः।

(२५७) चूर्ण्यमानेति।—चूर्ण्यमानानां—चूर्णितानां, क्षाल्यमानानां—धौतीक्रिय-

पूररज्यमानजनपादपल्लवं, (२५८) निरूप्यमाणयौतुकयोग्य-मातङ्गतुरङ्गतरङ्गिताङ्गनं, (२५९) गणनाभियुक्तगणकगण्यमाणलग्नगुणं, गन्धोदकवाहिमकरमुखप्रणालीपूर्ण्यमाणक्रीड़ावापीसमूहं, (२६०) हेमकारचक्रप्रक्रान्तहाटकघटनटाङ्कारवाचालितालिन्दकम्, (२६१) उत्थापिताभिनवभित्तिपात्यमानानां, कुसुम्भसम्भाराणां—महारजनपुष्पाख्यरञ्जनद्रव्यविशेषाणाम्, ["स्यात् कुसुम्भं वह्निशिख महारजनमित्यपि" इत्यमरः। "कुसुम्भ—" इत्यत्र "कुसुम्भक—" इति पाठे,—कुसुम्भकं—पङ्कं, तेषामित्यर्थः] अम्भःसु—जलेषु, प्लवपूरेण—सन्तरणपरम्परया, गमनागमनेन इति यावत्, रज्यमानाः,—चित्र्यमाणाः, जनानां पादपल्लवाः, —चरणकिसलया यस्मिन् तत्।

(२५८) निरूप्यमाणेति।—निरूप्यमाणैः,—दैयत्वेन अवधार्यमाणैः, यौतुक-योग्यैः,—विवाहेषु कन्यावरौ उद्दिश्य सम्बन्धिभिः देयं वस्तु यौतुकं, [यूमिश्रणे इति धातोः "उणादयो बहुलम्" (३।३।१ पा०) इति मव्वीणादीनां बाहुलकात् "सित—" (उ० १ पा० ६९ सू०) इत्यादिना तान प्रत्ययादेश कणि च निष्पन्नम्। "यौतुक" इत्यत्र "यौतक" इति पाठेऽपि स एवार्थः] तस्य योग्याः,—उपयोगिनः, तैः, मातङ्गैः,—हस्तिभिः, तुरङ्गैः,—अश्वैश्च, तरङ्गितानि—सञ्जाततरङ्गाणि इव लक्ष्यमाणानि इत्यर्थः, अङ्गनानि—चत्वराणि यस्मिन् यस्य वा तत्।

(२५९) गणनेति।—गणनायां—लग्ननिरूपणे इत्यर्थः, अभियुक्तैः,—अभिनिविष्टैः, गणकगणैः,—ग्रहाचार्यैः, गण्यमाणा—विचार्यमाणा, लग्नस्य—विवाहकालोदितमेषादिराशेः, गुणाः,—उत्कर्षाः यस्मिन् तत्; उच्चांशलग्नोदये माङ्गलिकोपयोगात् इति भावः। गन्धोदकेति।—गन्धोदक—मृगमदवारीत्यर्थः, वहतीति गन्धोदकवाहिनी, या मकरमुखा—मकरस्य इव मुख यस्याः, तथाभूता, प्रणाली—जलनिःसरणमार्गः, तया पूर्ण्यमाणाः—भ्रियमाणाः, क्रीड़ावापीनां—विहारसरसीनां, समूहाः यस्मिन् तत्। वाप्यादिपूरणार्थं मकरमुखी प्रणाली क्रियते लोके।

(२६०) हेमकारेति।—हेमकाराणां—स्वर्णकाराणां, चक्रैः,—हस्तैः, प्रक्रान्तं —प्रारब्धं, यत् हाटकानां—स्वर्णानां, घटनम्—अलङ्कारादिनिर्माणमित्यर्थः, तस्य टाङ्कारैः,—ध्वनिविशेषैः, वाचालिताः,—शब्दिताः, अलिन्दकाः,—बहिर्द्वारप्रकोष्ठविशेषाः यस्मिन् तत्, ("प्रघाणप्रघणालिन्दाः बहिर्द्वारप्रकोष्ठके" इत्यमरः)।

(२६१) उत्थापितेति।—उत्थापिताभ्यः,—उत्तोलिताभ्यः, घर्षिताभ्य इत्यर्थः,

मान-बहलबालुकाकणटकालेपाकुलालेपकलोकं, (२६२) चतुर-चित्रकरचक्रवाललिख्यमानमङ्ग्यालेख्यं, (२६३) लेप्यकार-कदम्बकक्रियमाण-मृन्मयमीनकूर्म्ममकर-नारिकेल-कदली-पूग-हृत्तकं, क्षितिपालैश्च स्वयमाबद्धकक्ष्यैः स्वाम्यर्पितकर्म्मशोभा-सम्पादनाकुलैः सिन्दूरकुट्टिमभूमीश्च मसृणयद्भिः (२६४) विनि-हितसरसार्तपणहस्तान् विन्यस्तालक्तकपाटलांश्च चूताशोक-

अभिनवाभ्यः भित्तिभ्यः,—कुड्येभ्यः, पात्यमानानाम्—अधःक्षिप्यमाणानां, बहलानां—प्रभूतानां, बालुकानां—सिकतानां, कणटकाः,—कणाः, तेषाम् आलेपेन—सम्पर्केण इत्यर्थः, आकुलाः,—चञ्चलाः, आलेपकाः,—प्रलेपकारिणो लोकाः यस्मिन् तत्; बालुकापतनेन चक्षुरीक्षणशङ्कया प्रलेपनालरायात् इति भावः।

(२६२) चतुरेति।—चतुरैः,—निपुणैः, चित्रकाराणाम्—आलेख्याङ्कानां, चक्रवालैः,—वृन्दैः, मण्डलैरित्यर्थः, ("चक्रवालन्तु मण्डलम्" इत्यमरः) लिख्यमानानि—चित्रीयमाणानि, मङ्ग्यानि—मङ्गलकार्य्ये हितानि, आलेख्यानि—चित्रपटा, लोकपालादिचित्राणि इत्यर्थः, यस्मिन् तत्।

(२६३) लेप्यकारेति।—लेप्यकाराणां—मृत्तिकाशिल्पिनां, कदम्बकैः,—समूहैः, क्रियमाणानि—घट्यमानानि, मृन्मयानि—मृन्निर्म्मितानि, ["प्रत्यये भाषायां नित्यम्" (वा०) इति यरोऽनुनासिकत्वम्] मीनकूर्म्ममकरनारिकेलकदलीपूगहृच-काणि—तत्तत्समूहाः यत्र तत्, मार्ङ्गलिकाङ्कत्वात् इत्याशयः, क्षितिपालैः,—राजभिः। आबद्धकक्ष्यैः,—बद्धपरिकरैः इत्यर्थः। स्वामीति।—स्वामिना—प्रभुणा, सम्राजेत्यर्थः, अर्पितानां—दत्तानां, न्यस्तभाराणामित्यर्थः, कर्म्मणां—कार्य्याणां, शोभासम्पादने—सौष्ठवविधाने, आकुलाः,—व्यापृताः तैः, सिन्दूरकुट्टिमभूमीः,—सिन्दूररञ्जिताः कुट्टिमाः,—तलदेशाः यासां तथाभूताः, भूमीः,—प्रदेशान्, मसृणयद्भिः,—चिक्कणी-कुर्व्वद्भिः।

(२६४) विनिहितेति।—विनिहिताः,—वि—विशेषेण, निहिताः,—अर्पिताः, सरसाः,—आर्द्राः, आर्त्तपणहस्ताः,—पिष्टहस्ताः, हस्तगृहीतमङ्गला-लेपनानि यैः तान्, ("आर्त्तपणं प्रौषणे स्यात् मङ्गलालेपनेऽपि च" इति मेदिनी)। विन्यस्तेति।—विन्यस्तेन—निहितेन, अलक्तकेन—लाक्षारसेन, पाटलाः,—रक्तवर्णाः तान्। चूतेति।—चूतानाम्—आम्राणां, [चुष्धातोः क्तप्रत्यये "पृषोदरादीनि—" (२।३।३२ पा०) इत्यादिना सिद्धिः] अशोकानां—सदाख्यरक्तपुष्पवृक्षाणाञ्च,

पल्लवलाञ्छितशिखरान् (२६५) उद्वाहवितर्दिकास्तम्भान् उत्तम्भयद्भिः प्रारब्धविविधव्यापारम्, (२६६) आ सूर्योदयाच्च प्रविष्टाभिः सतीभिः सुभगाभिः सुरूपाभिः सुवेशाभिः अविधवाभिः सिन्दूररजोराजिराजितललाटाभिः वधूवरगोत्रग्रहणगर्भाणि श्रुतिसुभगानि मङ्गलानि गायन्तीभिः (२६७) बहुविधवर्णकादिधाङ्कुलीभिः ग्रीवासूत्राणि च चित्रयन्तीभिः चित्रपत्रलतालेख्यकुशलाभिः कलशांश्च धवलितान् शीतल-

---

पल्लवैः,—किसलयैः, लाञ्छितानि—अलङ्कृतानि, शिखराणि—अग्राणि येषां तान्; विवाहादौ तथाऽलङ्करणनियमादिति भावः।

(२६५) उद्वाहेति।—उद्वाहवितर्दिका—विवाहवेदिका, ("स्याद्वितर्दिस्तु वेदिका" इत्यमरः) तस्याः स्तम्भाः,—स्तूणाः, चन्द्रातपमंस्थापनार्हा इति भावः, तान्, उत्तम्भयद्भिः,—उन्नमयद्भिः, ["उदः स्थास्तम्भोः—" (८।४।६१ पा०) इत्यादिना सकारस्य पूर्वसवर्णे थकारे "खरि च" (८।४।५५ पा०) इति चर्त्वे रूपम्]। प्रारब्धेति।—प्रारब्धाः,—प्रक्रान्ताः, विविधाः,—बहवः, व्यापाराः,—कर्माणि यत्र तत्। अधीनानां चिंतिपालानां महीत्वमेव स्वर्भोजनमनादौ प्रकृतिमचेष्टादयः साङ्गजिकतया उपवर्णिताः, इति स्वभावोक्तिः।

(२६६) आ सूर्योदयात्—सूर्योदयमारभ्य। सुभगाभिः,—पतिवल्लभाभिः; अविधवाभिः विधवानामुद्वाहादिमङ्गलकर्मणि योगदानस्य लोकाचारविरुद्धत्वादिति भावः। सिन्दूरेति।—सिन्दूराणां रजोराजिभिः,—परागसमूहैः, राजिताः,—अलङ्कृताः, ललाटाः,—भालदेशाः यासां ताभिः। वधूवरेति।—वधूवरयोः,—कन्यालामाद्योः, गोत्रस्य—नाम्नः, ग्रहणम्—उच्चारणमित्यर्थः, गर्भे—मध्ये, येषां तानि। श्रुतिसुभगानि—कर्णसुखजनकानि इत्यर्थः; सज्जनाहृतपुरातनाचारयोगादिति भावः।

(२६७) बहुविधेति।—बहुविधैः,—नानाप्रकारैः, वर्णकैः,—रञ्जनद्रव्यैः, हरिद्रादिभिरित्यर्थः, आदिग्धाः,—आलिप्ताः, अङ्गुलयः यासां ताभिः। ग्रीवासूत्राणि—ग्रीवाबन्धनसूत्राणि, चित्रयन्तीभिः,—रञ्जयन्तीभिः। चित्रेति।—चित्राणि—मनोज्ञानि, पत्रलतालेख्यानि—पत्राणां लतानाञ्च अङ्कनानि इत्यर्थः, तेषु कुशलाभिः,—निपुणाभिः। धवलितान्—श्वेतीकृतान्, आलेपनादिना इति भावः, शीतल-

शालाजिरश्रेणीश्च मण्डयन्तीभिः (२६८) अभिन्नपुटकार्पास-तूलपल्लवांश्च वैवाहिककङ्कणोर्णासूत्रसन्नाहांश्च रञ्जयन्तीभिः (२६९) बलाघृतघनीकृतकुङ्कमकल्कमिश्रितांश्च अङ्गरागान् लावण्यविशेषकान्ति च मुखालेपनानि कल्पयन्तीभिः कक्कोल-मिश्राः सजातीफलाः स्फुरत्स्फोतस्फटिककर्पूरशकलखचि-

शालाजिरश्रेणीश्च—शीतलपटङ्गनसमूहांश्च, अपक्वशरावसमूहांश्च वा, ["व्याख्करा-वस्तुमार्त्तिकः शालाजिरः" इति विक्रमाङ्कशेषः। "शीतलशालाजिर—" इत्यत्र "शीतलशाराजिर—" इति पाठे,—शीतलम्—अपक्वमित्यर्थः, शाराजिरं—शरावमित्यर्थः। केचित्तु "शाराजिरं—शारवम्" इति व्याख्यानयन्ति]। मण्डयन्तीभिः,—अलङ्कुर्व्वतीभिः; देशाचारादरात् इति भावः।

(२६८) अभिन्नेति।—अभिन्नानि—अविदलितानि, पुटानि—आवरणानि येषां तेषां, कार्पासतूलानां पल्लवाः,—किसलयाः तान्; ["कार्पासतूल—" इत्यत्र "कर्पासतूल—" इति पाठेऽपि स एवार्थः। केचित्तु "अभिन्नपुटः वंशादिनयत्वक्कोषः पाटलाकृतिर्जालकैः क्रियते, तच्छिद्रान्तरपूरणाय कर्पासतूलपल्लवा रज्यन्ते" इति व्याचख्युः]। वैवाहिकेति।—विवाहाय हितं, विवाहाय इदं वा वैवाहिकं, यत् कङ्कणं—हस्तसूत्रं, तस्य ऊर्णासूत्राणि—मेषादिलोमतन्तवः, तेषां सन्नाहाः,—सन्नाः तान्, रञ्जयन्तीभिः,—रञ्जनद्रव्येण चित्रोपयमाणाभिः।

(२६९) बलेति।—बलाघृतं—बला—बल्यगणपुष्पाख्या औषधिः; यद्वा,—बला—वाट्यालकाख्यः क्षुपजातीयः ओषधिविशेषः, तत्पक्वं घृतं, रक्षार्थं क्रियमाणमिति भावः, ["बलाघृत—" इत्यत्र "बलाश्वगन्धाघृत—" इति पाठे,—बलाश्वगन्धा—पुष्पाख्यौषधिरित्यर्थः] तेन घनीकृताः,—सान्द्रीकृताः, कुङ्कुमानां कल्काः,—पिष्टकुङ्कुमानि इत्यर्थः; यद्वा,—बलाघृतं घनीकृताः,—प्रचुरमानेन प्राचुर्य्येण इत्यर्थः, ये कुङ्कुम-कल्काः,—काश्मीरकुसुमकिल्कल्काः, तैः मिश्रिताः तान्। लावण्यविशेषकान्ति—कान्तिविशेषकरणि इत्यर्थः। मुखालेपनानि—मुखरञ्जनसाधनानि, द्रव्याणि इति शेषः, कल्पयन्तीभिः,—रचयन्तीभिः; विवाहादौ सङ्गच्चूर्णवत् लेहनस्नानोद्वर्त्तना-लेपनादिषु, सुषमाविशेषाय समादरः क्रियते इति सनातनः व्यवहारः इति भावः। कक्कोलमिश्राः,—कक्कोलैः,—वनकर्पूरैः, गन्धद्रव्यविशेषैः इत्यर्थः, मिश्राः,—संवलिताः, सजातीफलाः,—जातीफलसहिताः। स्फुरदिति।—स्फुरन्तः—राजन्तः, स्फीतानां—बहुलानां, स्फटिककर्पराणां—स्फटिकवद्भ्राजमानानां कर्पूरभेदानां, ["स्फटिककर्पर

तान्तरालाः लवङ्गमाला रचयन्तीभिः समन्तात् सामन्तसीमन्तिनीभिः व्याप्तम्,(२७०)बहुविधभक्तिनिर्माणनिपुणपुराणपौरपुरन्ध्रिबध्यमानैः बन्धैश्च आचारचतुरान्तःपुरजनोज्जनितपूजाराजमानरजकरज्यमानैः रक्तैश्च उभयपटान्तलग्नपरिजनप्रेङ्खोलितैः छायासु शोष्यमाणैः शुष्कैश्च (२७१) कुटिलक्रमरूपक्रियमाणप्रारम्भपरभागैः अपरैः आरब्धकुङ्कुमपङ्कस्थामकच्छुरणैः अपरैः

—" इत्यत्र "स्फाटिककर्पूर—" इति पाठेऽपि स एवार्थः] शकलैः,—खण्डैः, खचितम्—आकीर्णम्, अन्तरालम्—अवकाशः, मध्यदेश इत्यर्थः, यासां ताः, लवङ्गमालाः, —लवङ्गपुष्पग्रथिताः स्रजः, रचयन्तीभिः,—ग्रथ्नन्तीभिः। सामन्तसीमन्तिनीभिः,—अधीनराजानामङ्गनाभिः, ("नारी सीमन्तिनी वधूः" इत्यमरः) व्याप्तम्—आकीर्णम्। सामन्तसीमन्तिनीत्यत्र मत्वर्थीयः सकारलोपात् हस्वनप्रासः।

(२७०) बहुविधेति।—बहुविधा—विविधा, भक्तिः,—विच्छित्तिः, रञ्जनविशेष इत्यर्थः, तस्या निर्माणे—रचने, निपुणाः,—पटवः, पुराणाः,—स्थविराः, पौराणां,—पुरवासिनां, गृहस्थानाम् इत्यर्थः, पुरन्ध्रयः,—पतिपुत्रपौत्रादिमत्यः गृहिण्यः, ("स्यात् कुटुम्बिनी। पुरन्ध्री" इत्यमरः) ताभिः, [क्रुश्चालोऽपि पुरन्ध्रिशब्दो विद्यते, तथा हि,—पुरोपपदात् चौरादिकात् धृधातोः "संज्ञायां भृतृवृजिधारिसहितपिदमः" (३ २।४६ पा०) इति खचि मुम् "षिद्भौरादिभ्यः" (४।१।४१ पा०) इति ङीषि "पृषोदरादीनि—" (६।३ १०९ पा०) इत्यादिना तस्य आकृतिगणत्वात् गुणाभावः, ङीषः पाचिकी क्रुश्च इति सिद्धम्] बध्यमानाः,—संग्रथ्यमानाः तैः। बन्धैः,—सङ्घैः एकत्र स्तूपीकृतैरित्यर्थः। आचारेति।—आचारेषु —कुलोचितेषु व्यवहारेषु, चतुराः,—निपुणाः, या अन्तःपुरजनस्त्र्यः,—अन्तःपुरवृद्धाः, ताभिः जनितायाम्—अनुष्ठितायां, पूजायां—देवाराधनकर्मणि, राजमानाः, —शोभमानाः, रजकैन—वस्त्ररञ्जकजातिभेदैन च, रज्यमानाः,—रक्तीक्रियमाणाः, कुलाचारानुरूपरागरञ्जिताः वा, तैः। रक्तैः,—रक्तवर्णैः, कुलाचारोचितरागैर्वा। उभयेति।—उभयोः पटान्तयोः,—वसनप्रान्तयोः, लग्नाः,—सक्ताः, पटप्रान्तधारिण इत्यर्थः, परिजनाः, परिवाराः, तैः प्रेङ्खोलितैः,—सञ्चालितैः। छायासु—अनातपेषु, शोष्यमाणैः,—शीघ्रं शोषयमाणैः ; आतपे शीघ्रशोषेण वर्णविकृतिसम्भावनयेति भावः।

(२७१) कुटिलेति।—कुटिलैः,—कौटिल्ययुक्तैः, क्रमैः,—परम्पराविन्यासैः, तेषां तादृशैः, रूपैः,—प्रकारभेदैः, क्रियमाणाः,—रच्यमानाः, पल्लवाद्यैः,—

उड्डुजभुजिष्यभज्यमानभङ्गुरोत्तरीयैः क्षौमैश्च बादरैश्च दुकूलैश्च लालातन्तुजैश्चांशुकैश्च नेत्रैश्च निर्मोकनिभैः अकठोरस्थागर्भकोमलैः निश्वासहार्य्यैः स्पर्शानुमेयैः वासोभिः सर्व्वतः स्फुरद्भिः इन्द्रायुधसहस्रैः इव मञ्चादितम्, (२७२) उज्ज्वलनिचोलकावगुण्ठ्यमानहंसकुलैश्च शयनीयैः तारामुक्ताफलोपचीय-

किसलयानामिव, परभागाः,—उत्कर्षाः, प्रान्तभागाः वा, येषां तैः, [प्रान्तकीटसर्वावयवादौ महार्हवस्त्रकुशनपटुभिः सेवकैः बीजलौहयन्त्रादिभिः हस्तैरपि लतापत्रप्रसूनाद्याकृतिवन्नानाविधकुशनप्रकाराः क्रियन्ते, प्रतुष्टप्रभुप्रदत्तपारितोषिकप्राप्तये इति भावः, उपमाऽलङ्कृतिः उभयोर्वैधर्म्यवाच्यसाम्यात्] अपरैः,—अन्यजनैः। आरब्धेति।—आरब्धानि—कर्तुं प्रवृत्तानि, कुङ्कुमपङ्कस्थासकैः,—कुङ्कुमद्रवचर्च्चाभिः, पुष्टकुङ्कुमविन्यासैरित्यर्थः, ("चर्च्चा तु चार्च्चिक्यं स्थासकः" इत्यमरः) क्षुरणानि—क्षुरणानि येषु येषां वा तैः। उड्डेति।—उत—उद्गताः, भुजाः,—बाहवः येषां तैः, उत्क्षिप्तभुजैरित्यर्थः, भुजिष्यैः,—चेटैः, किङ्करविशेषैः इत्यर्थः, भज्यमानानि—आभुग्नीक्रियमाणानि, मुष्टिदानप्रयोगैः कुञ्चितीक्रियमाणानि इत्यर्थः, अत एव भङ्गुराणि—भङ्गिमति, उत्तरीयाणि—उत्तरासङ्गानि तैः, क्षौमैः,—क्षुमा—अतसी, तद्विकारैः ; बादरैः,—बदरा—कार्पासी, तद्भवैः, कार्पासैरित्यर्थः, ("तूलिकेयी समुद्गाल्या कार्पासी बदरेति च" इत्यमरः) दुकूलैः,—श्लक्ष्णवसनैः, सुचिक्कणवस्त्रैरित्यर्थः, ("दुकूलं श्लक्ष्णवस्त्रे स्यात् क्षौमे च" इति मेदिनी) लालातन्तुजैः,—कौशेयैः। अंशुकैः,—सूक्ष्मवसनभेदैः, ("अंशुकं श्लक्ष्णवस्त्रे स्याद् वस्त्रमात्रोत्तरीययोः" इति मेदिनी)। नेत्रैः,—वसनविशेषैः, [निशातीः "दात्रनी—" (३।२।१८२ पा०) इत्यादिना ष्ट्रनि रूपम्। "नेत्रं मथितगुणे वस्त्रभेदे मूले द्रुमस्य च" इति मेदिनी]। निर्मोकनिभैः,—सर्पकञ्चुकसदृशैः, श्लक्ष्णसान्द्रक्रमिकरेखाविच्छाकृतिसङ्काशैः इति भावः। अकठोरस्थागर्भकोमलैः,—मृदुलकदलीगर्भसुकुमारैः। निःश्वासहार्य्यैः,—निःश्वासवायुनाऽपि उत्क्षेपणार्हैरित्यर्थः, अतिसूक्ष्मैरिति भावः। स्पर्शानुमेयैः,—स्पर्शमात्रवेद्यैः, सूक्ष्मत्वाददृश्यप्रायैः, चमत्कृत्यातिशय्याय रत्नादिखचिताम्बरोपरिष्टात् महाभागधारणार्हैः इति भावः। वासोभिः,—वसनैः। स्फुरद्भिः,—द्योतमानैः।

(२७२) उज्ज्वलेति।—उज्ज्वलैः,—भासुरैः, निचोलकैः,—वसनैः, प्रच्छदपटैरित्यर्थः, ("निचोलः प्रच्छदपटः" इत्यमरः)। अवगुण्ठ्यमानानि—आच्छाद्यमानानि, हंसकुलानि—हंसाकाराणि वस्त्राणि येषां, यद्वा,—हंसकुलानीव हंस-

मानैश्च कञ्चुकैः (२७३) अनेकोपयोगपाठ्यमानैश्च अपरिमितैः पट्टपटीसहस्रैः (२७४) अभिनवरागकोमलदुकूलराजमानैश्च पटवितानैः (२७५) स्तवरकनिवहनिरन्तरच्छाद्यमानसमस्त-पटलैश्च मण्डपैः उच्चित्रनेत्रपटवेष्ट्यमानैश्च स्तम्भैः उज्ज्वलं, रमणीयश्च, औत्सुक्यदश्च, मङ्गल्यश्च आसीत् राजकुलम्।

देवी तु यशोवती (२७६) विवाहोत्सवपर्य्याकुलहृदया हृदयेन भर्त्तरि, कुतूहलेन जामातरि, स्नेहेन दुहितरि, उप-

कुलानि, कोणेषु दम्पत्योरविच्छेदसूचकगजदन्तादिनिर्म्मितपूर्णाङ्कयुगलमरालप्रति-कृतय इत्यर्थः, यैषु तैः; एतेन शिल्पकौशलवत्त्वं महाभागार्हत्वञ्च ध्वनितम्। श्रयनीयैः, —पर्य्यङ्कैः। तारेति।—तारा:,—नक्षत्राणि, ("नक्षत्रमस्त्रं भं तारा" इत्यमरः) वदत् यानि मुक्ताफलानि—मौक्तिकानि, तैः उपचीयमानाः,—अलङ्क्रियमाणाः तैः, कञ्चुकैः,—चोलकैः, स्तनावरणवस्त्रविशेषैरित्यर्थः, ("कञ्चुको वारवाणे···वक्षोजक-ग्रहीताङ्गस्थितवस्त्रे च चोलके" इति मेदिनी)।

(२७३) अनेकेति।—अनेकेषु उपयोगेषु—व्यवहारेषु, उपयोगाय वा; असङ्ख्याभिनवपताकाध्वजौषधजालचन्द्रातपप्रभृतिरनिर्म्माणैर्वस्त्राच्छादनमाननीयाराध-नाय इति भावः, पाठ्यमानानि—क्रियमाणानि तैः, पट्टपटीसहस्रैः,—पट्टवस्त्र-समूहैः।

(२७४) अभिनवेति।—अभिनवः,—नूतनः, रागः,—रञ्जनं येषां तानि, कोमलानि—मृदूनि, दुकूलानि—सूक्ष्मवसनानि, तैः राजमानाः,—शोभमानाः तैः, पटवितानैः,—शोभार्थं प्रान्तभागराजितबहुवर्णद्विवर्णदोलायमानाकुञ्चिकान्वितामि-नववसननिर्म्मितचन्द्रातपैः इत्यर्थः।

(२७५) स्तवरकेति।—स्तवरकाणां—वस्त्रविशेषाणां, [स्थाधातोः "क्रञ्जा-दिभ्यः—" (उ० ५ पा० ३५ सू०) इत्यादिना वुनि पृषोदरादित्वादरकादेशे रूपम्] निवहेन—समूहेन, निरन्तरम्—अविच्छेदं यथा तथा, छाद्यमानानि—आच्छाद्य-मानानि—समन्तात्, पटलानि—छदयः, यैषां तैः; मण्डपैः,—गृहैः। उच्चित्रेति।—उच्चैः,—उद्भटचित्रैः, चित्रितैरिति यावत्, नेत्रपटैः,—वसनभेदैः, वेष्ट्यमानाः,—आच्छाद्यमानाः तैः; सौष्ठवार्थमिति भावः।

(२७६) विवाहेति।—विवाहोत्सवेन—परिणयजनितानन्दजनकव्यापारेणेत्यर्थः, पर्य्याकुलं—व्याप्तं, हृदयं—चित्तं यस्याः तथाभूता। भर्त्तरि—पत्यौ, हृदयेन—मनसा,

चारेण निमन्त्रितस्त्रीषु, आदेशेन परिजने, शरीरेण सम्भ्रमे, चक्षुषा कृताकृतप्रत्यवेक्षणेषु, आनन्देन महोत्सवे, एकोऽपि बहुधा विभक्त इव अभवत्। भूपतिरपि (२७७) उपर्युपरि विसर्जिताष्टवामौजनितजामातृतोषः मत्यपि आज्ञासम्पादनदक्षे मुखेक्षणपरे परिजने समं पुत्राभ्यां दुहितृस्नुषाविक्लवः सर्वं स्वयम् अकरोत्।

(२७८) एवञ्च तस्मिन् अविधवामये इव भवति राजकुले, मङ्गलमय इव जायमाने जीवलोके, चारणमयेषु इव लक्ष्यमाणेषु दिङ्मुखेषु, पटहमये इव कृतेऽन्तरिक्षे, भूषणमये इव

विभक्त इव इत्युत्तरेणान्वयः, एवमुत्तरत्र विभक्त इत्यनेनान्वयः स्त्रीयः विपर्यासः। पतिहृदयनिहितहृदया, उभयोरैक्यात इत्यर्थः। कुतूहलेन—कौतुकेन, दर्शनौत्सुक्येन इति यावत्, जामातरि—वरे, कुतूहलविहितजामातृकृत्यः, जामातरि कौतूहलवतीति भावः; उपचारेण—सम्मुचितसम्माननेन। कृतेति।—कृतानि—सम्पादितानि, अकृतानि—असम्पादितानि च, तेषां प्रत्यवेक्षणानि—परिदर्शनानि तेषु; गृहिणीपरिदर्शनोचितव्यापारनिवर्हेषु इत्याशयः।

(२७७) उपर्युपरि—पुनःपुनरित्यर्थः। [उपर्यादिशब्दानाम् "उपर्यध्य—" (८।१।७ पा०) इत्यादिना सामीप्ये द्वित्वविधानात् तदर्थे द्वीप्ये "उभ" (वा०) द्वितीयाप्राप्तिः, इह तथाऽप्रसङ्गात् न इति ज्ञेया]। विसर्जितेति।—विसर्जिताभिः,—प्रेषिताभिः, उष्ट्रवामीभिः,—उष्ट्रीभिः, विविधद्रव्यवाहिनीभिरिति भावः; यद्वा, —उष्ट्राश्च वाम्यश्च—अस्याः, लघुहस्तित्वेन वा, ताभिः, ("वामी प्रगल्भी वडवारासभीकरभीषु च" इति मेदिनी, केचित्तु,—वामी—इयम्, अन्ये—वेसरीम् अन्ये—गुर्वीमित्याहुः) जनितः,—उत्पादितः, जामातुः,—वरस्य, तोषः,—प्रीतिः यैन तथोक्तः। ["जामाहतोषः" इत्यत्र "जामाहजोषः" इति पाठे,—जोषः,—सुखमित्यर्थः]। मुखेक्षणपरे—मुखदर्शनपरे, मुखवचनप्रतीक्षे इत्यर्थः, हृद्यवर्णवदत्वात् इति भावः। समं—सह। पुत्राभ्यां—राज्यवर्धनहर्षाभ्याम्। दुहितृस्नुषेति।—दुहितुः,—कन्यायाः, स्नुषेण—प्रीत्या, विक्लवः,—विह्वलः, व्याकुल इत्यर्थः।

(२७८) "एवम्" इत्यादौ "आजगाम विवाहदिवसः" इत्युत्तरेणान्वयः। अविधवामये इव—सधर्तृकात्मके इव, केवलसधवापूर्णे इव इत्यर्थः। जीवलोके—

भ्रमति परिजने, बान्धवमये इव दृश्यमाने (२७९) सर्गे, निर्वृतिमये इव उपलक्ष्यमाणे काले, लक्ष्मीमये इव विजृम्भमाणे महोत्सवे, निधाने इव सुखस्य फले इव जन्मनः परिणामे इव पुण्यस्य यौवने इव विभूतेः यौवराज्ये इव प्रीतेः मिश्रिकाले इव मनोरथस्य वर्त्तमाने, (२८०) गण्यमान इव जनाङ्गुलीभिः, आलोक्यमान इव मार्गध्वजैः, प्रत्युद्गम्यमान इव मङ्गल्यवाद्य-प्रतिशब्दकैः, (२८१) आह्वयमान इव मौहूर्त्तिकैः, आकृष्यमाण इव मनोरथैः, परिष्वज्यमान इव बधूसखीहृदयैः आजगाम विवाहदिवसः। प्रातरेव (२८२) प्रतीहारैः समुत्सारित-निखिलानिबद्धलोकं विविक्तम् अक्रियत राजकुलम्।

अथ प्रतीहारः प्रविश्य नृपसमीपं,—"देव! जामातुः

प्राणिपूर्णजगति, सर्व्वत्रममानीत्सवप्रसङ्गात् इति भावः। चारणमयेषु—नटमयेषु। पटहमयी—पटहादिवादित्रमयी।

(२७९) सर्गे—सृष्टौ। निर्वृतिमयी—सुखमयी। लक्ष्मीमयी—शोभामयी। विजृम्भमाणे—प्रकाश्यमाने। निधाने इव—आश्रय इव। विभूतेः,—ऋद्धेः, सर्व्वी-यसलगद्विभवीनाम् एकत्र प्राचुर्य्यात् इति भावः।

(२८०) गण्यमान इव—सङ्ख्यायमान इव, अत्यौत्सुक्यात इति भावः। आलोक्य-मान इव—दृश्यमान इव, मार्गध्वजैः,—अध्वनैजयन्तीदण्डैः, तेषाम् ऊर्द्धीभूयावस्थाना-दिति भावः। प्रत्युद्गम्यमान इव—पुरत आगम्य अभिनन्द्यमान इव। मङ्गल्येति।—मङ्गल्यवाद्यानां प्रतिशब्दकैः,—प्रतिध्वनिभिः।

(२८१) आह्वयमान इव—आकार्य्यमाण इव, मौहूर्त्तिकैः,—गणकैः। परिष्वज्यमान इव—आलिङ्ग्यमान इव। बधूति।—बध्वाः सखीनां हृदयानि तैः; सुग्धहृदयानां तथैकतानत्वात् इति भावः।

(२८२) प्रतीहारैः,—दौवारिकैः। समुत्सारितेति।—समुत्सारिताः,—अप-नीताः, निखिलाः,—समग्राः, अनिबद्धाः,—बाह्याः, कार्य्येषु अनियुक्ता इत्यर्थः, अत्यन्तनियतकार्य्यव्ययाणां निबद्धत्वमतीतेः इति भावः, लोका यस्मात् तथोक्तं, विविक्तं—विशोधितं, विजनं वा।

(२८३) अन्तिकात् ताम्बूलदायकः पारिजातकनामा सम्प्राप्तः" इत्यभिधाय स्वाकारं युवानम् अदर्शयत्। राजा तु तं दूरादेव जामातृबहुमानात् दर्शितादरः,—"बालक! कच्चित् कुशली ग्रहवर्मा?" इति पप्रच्छ। (२८४) असौ तु समाकर्णितनराधिपध्वनिः धावमानः क्वचित् पदानि उपसृत्य प्रमार्ष्य च बाहू सेवाचतुरः चिरं वसुन्धरायां निधाय मूर्द्धानम् उत्थाय,—"देव! कुशली, यथाऽऽज्ञापयसि, अर्च्चयति च देवं नमस्कारेण" इति व्यज्ञापयत्। (२८५) आगतजामातृनिवेदनागतञ्च तं ज्ञात्वा कृतसत्कारं राजा,—"यामिन्याः प्रथमे यामे विवाहकालात्ययकृतो यथा न भवति दोषः" इति सन्दिश्य प्रतीपं प्राहिणोत्।

(२८३) अन्तिकात्—समीपात्। सम्प्राप्तः,—समागतः। स्वाकारं—सुन्दराकृतिं, सौम्यदर्शनं वा। जामातृबहुमानात्—जामातरि—वरे, बहुमानात्—आदरातिशयात्; प्रथमतः परिचारकसम्मानः तत्प्रभुसमञ्जसमेव इत्याभिप्रायादिति भावः। कच्चित्—प्रश्ने, ("कच्चित् कामप्रवेदने। प्रश्ने हर्षे मङ्गले च" इति मेदिनी)।

(२८४) असौ—बालकः। समाकर्णितेति।—समाकर्णितः,—श्रुतः, नराधिपस्य—राज्ञः, ध्वनिः,—कण्ठरवः येन तथोक्तः। धावमानः,—अतित्वरमाणः, सम्भ्रमातिशय्यादित्यर्थः। सेवाचतुरः,—सेवायां निपुणः, निरन्तरं स्वप्रभोरिङ्गितनिर्दिष्टसाधनप्रवणत्वात् इति भावः। चिरं—बहुक्षणम् इत्यर्थः, सामयिकस्वोचितप्रश्रयमुद्राप्रदर्शनाय इति भावः, वसुन्धरायां निधाय मूर्द्धानं—भूमिलुण्ठितमस्तकं यथा तथा प्रणम्येत्यर्थः। अर्च्चयति—पूजयति। देवं—राजानं, भवन्तमित्यर्थः।

(२८५) आगतेति।—आगतस्य—उपस्थितस्य, राजधान्यामिति भावः; यद्वा,—उपस्थितप्रायस्य, कियद्दूरावस्थितस्य इत्यर्थः, जामातुः,—वरस्य, ("जामाता दुहितुः पतिः" इत्यमरः) निवेदनाय—उपस्थितिज्ञापनाय, आगतः तम्। कृतसत्कारं—विहितसमुचितसमादरं, जामातृप्रियकिङ्करोचितप्राप्तासाधारणपरस्कारमित्यर्थः। यामिन्याः,—रात्रेः। यामे—प्रहरे। विवाहेति।—विवाहस्य कालः,—समयः, तस्य अत्ययः,—अतिक्रमः, तेन कृतः,—जनितः, दोषः,—स्खलनं, यथा न भवति, तथा कर्त्तव्यमिति शेषः; यथा विवाहलग्नमतिक्रान्तं न भवति तथा आगन्तव्यम्, अतीते

(२८६) अथ सकलकमलवनलक्ष्मीं बधूमुखे इव सञ्चार्य ममवसिते वासरे, विवाहदिवसश्रियः पादपल्लवे इव रज्यमाने सवितरि, (२८७) बधूवरानुरागलघूकृतप्रेमलज्जितेषु इव विघटमानेषु चक्रवाकमिथुनेषु, (२८८) सौभाग्यध्वजे इव रक्तांशुकसुकुमारवपुषि नभसि स्फुरति मन्ध्यारागे, कपोतकण्ठकर्बुरे वरयात्रागमनरजसीव कलुषयति दिङ्मुखानि तिमिरे, (२८९) लग्नसम्पादनसज्जे इव उज्जिहाने ज्योतिर्गणे, विवाह-

---

मुलग्ने पुनः तात्कालाप्राप्तिप्रसङ्गात् इति भावः। प्रतीपं—विपरीतं, प्राहिणोत्—प्रेषयामास, प्रतिप्रस्थापयामास इत्यर्थः, वरपक्षीयस्कन्धावारे इति भावः।

(२८६) अथेत्यादि।—"अथ" इत्यादौ "आजगाम·····प्रत्यासन्नलग्नौ यद्वन्धौ" इत्युत्तरेणान्वयः। सकलेति।—सकलानां कमलवनानां लक्ष्मीं—श्रियम। सञ्चार्य—सङ्क्रमय्य। समवसिते इव—गतप्रायं गते इवेत्युत्प्रेक्षा। लोकेऽप्यन्तिमकालं सन्तः स्वलक्ष्मीं समुचितपात्रेषु समर्पयन्ति इति ध्वनितम्। वासरे—दिवसे। विवाहदिवसश्रियः,—विवाहदिवसीया, या श्रीः,—लक्ष्मीः तस्याः। रज्यमाने—रक्तायमाने, शोणीभवति इत्यर्थः। सवितरि—सूर्ये।

(२८७) बधूवरेति।—बधूवरयोः,—कन्याजामात्रोः, अनुरागेण—प्रेम्णा, लघूकृतं—तुच्छीकृतं, प्रेम—प्रणयं, स्वकीयमिति भावः, तेन लज्जितानि तेषु, विघटमानेषु इव—विच्छेदं गच्छत्सु इवेत्युत्प्रेक्षा। चक्रवाकमिथुनेषु—चक्रवाकदम्पतिषु; चक्रवाकमिथुनानां निशाविरहिणां सङ्गाकाङ्क्षिसमयप्रसिद्धेरिति भावः।

(२८८) सौभाग्यध्वजे इव—उत्सवीयपताकादण्डे इव। रक्तेति।—रक्तांशुकेन—रक्तवस्त्रेण, सुकुमारं—सुदर्शनं, वपुः,—अवयवः यस्य तथाभूते; नभसि—आकाशे; स्फुरति—दीप्यमाने। कपोतेति।—कपोतानां—पारावतानां, कण्ठ इव, कर्बुरं,—पांशुलं तस्मिन्। वरेति।—वरस्य—जामातुः, यात्रा—उत्सवः, [अश्वघासादिवत् तादर्थ्ये षष्ठी समासः। "यात्रा तु यापनेऽपि स्यात् गमनोत्सवयोः स्त्रियाम्" इति मेदिनी] तत्र गमनं—प्रस्थानं, तेन यत् रजः,—धूलिः, वरानुगानां हस्त्यश्वाद्यात्मकानां चतुरङ्गानां पादाहत्योत्थितमिति भावः, तस्मिन्निव। कलुषयति—आविलयति, मलिनयतीत्यर्थः। रजोऽपि सुखानि कलुषयति इति दृश्यते। तिमिरे—अन्धकारे।

(२८९) लग्नेति।—लग्नस्य—राश्युदयक्रान्तवैवाहिकशुभसमयस्य, सम्पादने—

मङ्गलकलशे इव उदयशिखरिणा समुत्क्षिप्यमाणे वर्द्धमानधवल-च्छाये ताराऽधिपमण्डले, (२९०) बध्नूवदनलावण्यज्योत्स्नापरि-पीततमसि प्रदोषे द्रुतोदितमुपहसत् इव रजनिकरम् उत्ता-नितमुखेषु कुमुदवनेषु, आजगाम मुहुर्मुहुः (२९१) उल्ला-सितस्फारस्फुरितारुणचामरैः मनोरथैः इव उत्थितरागाग्रपल्लवैः

निर्द्धारणे, सप्त०,—प्रवृत्तः तस्मिन्निव। उच्छ्रिते—उदयमाने, उच्छ्रिति इत्यर्थः। ज्योतिर्गणे—तारानिकरे, ज्योतिषकनिवह च, शास्त्रशास्त्रविदः अभेदोपचारात् इति भावः। विवाहमङ्गलकलशे इव—विवाहार्थस्थापितमङ्गल्यघटे इव; वृत्तत्वात् शैत्यात् धावल्याच्च कलशस्य अखण्डचन्द्रमण्डलमाद्यमवगन्तव्यम्; अक्षीणसुधाकरोदये विवाहादौनि मुहूर्त्तायत्ते बहुसम्मतानि इति हृदयं, कलशस्तु विवाहादिमङ्गलकर्म्मणि पिष्टादिलेपनेन धवलीक्रियत इति लोकाचारः। उदयाग्रशिखरिणा—उदयाद्रिणा, समुत्क्षिप्यमाणे—समुन्नम्यमाने। एतेन ज्ञासातङ्कभावनार्थं हस्ताभ्यां मस्तकेन वा धार्य्यमाणमङ्गलकलशं परिजनेन इव स्थिते पूर्व्वाचले इति व्यज्यते लोकाचारसमन्वयात् इति ज्ञेयम्। वर्द्धमानेति।—वर्द्धमाना—प्रवृद्धिं गच्छन्ती, सन्यालीढित्यापगमा-दिति भावः, धवला—शुभ्रा, छाया—कान्तिः, प्रभेत्यर्थः; अन्यत्र,—वर्द्धमानेन—शरावेण, शरावसम्पुटेनेत्यर्थः, तदपि मङ्गलकर्म्मणि लेपनादिना शुभ्रीक्रियते, ("शरावो वर्द्धमानकः" इत्यमरः) धवला छाया यस्य तथाभूतः। ताराऽधिपमण्डले—चन्द्रमण्डले।

(२९०) बध्नूति।—बध्वा वदनस्य लावण्यमेव—कान्तिरेव, ज्योत्स्ना—कौमुदी, तया परिपीत—ग्रस्तं, तमः,—अन्धकारं यस्य तथाभूते। प्रदोषे—रजनी-मुखे। ("प्रदोषो रजनीमुखम्" इत्यमरः) द्रुतोदितं—सपदोदयमानम्; बध्नूवदन-लावण्यनैव तत्कार्य्यसम्पादनादिति भावः। रजनीकरं—चन्द्रम्; "प्रायो मूर्खः परिभवविधौ नाभिमानं तनोति" इत्यं विचार्य्येति भावः। उत्तानितमुखेषु—उन्मुखेषु, विकसितवदनेष्विति भावः। आजगाम—आययौ, यद्वत्यर्थः।

(२९१) उल्लासितेति।—उल्लासितानि—सञ्चालितानि, स्फारस्फुरितानि—अतिशयेन राजितानि, अरुणानि—आरक्तानि, विवाहकर्म्मणि रक्तवर्णद्रव्याणां व्यव-हारस्य लोकाचारत्वादिति भावः, चामराणि—बालव्यजनानि यैः तथोक्तैः। उत्थितेति।—उत्थितः,—उद्गतः, रागः,—आरुण्यं येषां तानि, अग्रपल्लवानि—पल्लवाग्राणि, कर्णादौ भूषणीक्रियमाणानि इति भावः, यैर्वा तैः; अन्यत्र,—उत्थितः,

पुरो धावमानैः पादातैः (२९२) उत्कर्णकटकक्षयप्रतिहेषित-दीयमानस्वागतैः इव वाजिनां वृन्दैश्च आपूरितदिग्भागः, (२९३) चलत्कर्णचामराणां चामीकरमयसर्वोपकरणानां वर्णकलम्बिनां बलिनां घण्टाटङ्कारिणां करिणां घटाभिः घटयन् इव पुनः इन्दूदयविलीनम् अन्धकारं, (२९४) नक्षत्रमालामण्डितमुखीं करिणीं निशाकर इव पौरन्दरीं दिशम्

—अभ्युदितः, रागः,—अनुरागः, अयपल्लव इव, अनुरागस्य लोहित्येन वर्णनायाः प्रसिद्धत्वादिति भावः, येषां तैः। पुरः,—अग्रे, धावमानैः,—गच्छद्भिः, (मनीरथोऽपि पुरत एव धावति) पादातैः,—पादचारिभिः सैनिकैरित्यर्थः। [पद्भ्यामतति इति पदपूर्वकात् अतधातोः "इणजादिभ्यः" (वा०) इति इणि ततः "तस्य समूहः" (४।२।३७ पा०) इत्यणि रूपम्]।

(२९२) उत्कर्णेति।—उत्—उद्गताः, कर्णा येषां तेषां, कटकक्ष्यानां—राजधानीसंस्थानां, ("कटकोऽस्त्री नितम्बोऽद्रेः··· । ·····राजधानीबलयोरपि ॥" इति मेदिनी) प्रतिहेषितैः,—प्रतिहेषारवैः, वरपक्षीयाश्वानां हेषारवं श्रुत्वा तत्प्रत्युत्तररूपैरिति भावः; दीयमानं—निवेद्यमानमित्यर्थः, स्वागतं—स्वागतसम्भाषणं, सुखेन आगमनप्रश्नमित्यर्थः, येषां तथाभूतैः। वाजिनाम्—अश्वानां, वरपक्षीयाणामिति भावः, वृन्दैः,—समूहैः। आपूरितः,—आकीर्णः, दिग्भागो येन तथाभूतः।

(२९३) चलेति।—चलानि—चपलानि, कर्णयोः,—कर्णराजितानि इत्यर्थः, चामराणि येषां तेषाम्। चामीकरेति।—चामीकरमयानि—स्वर्णमयानि, सर्व्वाणि उपकरणानि—अलङ्कारा येषां तेषाम्। वर्णकलम्बिना—विचित्रवर्णरञ्जितानामित्यर्थः। बलिनां—बलवताम्। घण्टाटङ्कारिणां—घण्टाध्वनिमतां, करिणां—हस्तिनां, घटाभिः,—सङ्घैः, घटयन्निव—समाहरन्निव, करिणां सान्द्रकृष्णवर्णत्वादिति भावः; इन्दूदयविलीनं—चन्द्रोदयक्षीणम्।

(२९४) नक्षत्रेति।—नक्षत्रमालया—सप्तविंशतिमौक्तिकरचितकरिणां माला नक्षत्रमाला उच्यते, तया, करेणुमस्तकमण्डनमौक्तिकस्रजा इत्यर्थः; अन्यत्र,—नक्षत्रमालया—तारानिचयेन, मण्डितम्—अलङ्कृतं, मुखं—वदनम्, स्वकीयभागश्च यस्याः ताम्। निशाकरः,—चन्द्रः। पौरन्दरीं—पुरन्दरः,—इन्द्रः, तस्येयं पौरन्दरी—इन्द्रानुपालिता, प्राचीं इत्यर्थः, ताम्।

आरूढः, (२९५) प्रकटितविविधविहगविरुतैः तालावचरचारणैः पुरःसरैः बालो वसन्त इव उपवनैः क्रियमाणकोलाहलः, (२९६) गन्धतैलावसेकसुगन्धिना दीपिकाचक्रवालस्य आलोकेन कुङ्कुमपटवासधूलिपटलेन इव पिञ्जरीकुर्वन् सकलं लोकम्, (२९७) उत्फुल्लमल्लिकामुण्डमालामध्याध्यासितकुसुमशेखरेण शिरसा हसन्निव सपरिवेशचषाकरं कौमुदीप्रदोषम्, (२९८) आत्मरूपनिर्जितमकरकेतुकरापहृतेन कार्मुकेण इव कौसुमेन दाम्ना विरचितवैकक्ष्यकविलासः,

(२९५) प्रकटितेति ।—प्रकटितं—प्रकीर्त्तितं, प्रकाशितञ्च, विविधं—बहुप्रकारं, विचित्रमित्यर्थः, विहगेन—रागभेदेन, "वेहाग" इति भाषया प्रसिद्धेनेति भावः, विहगानां—पक्षिणाञ्च, विरुतं—सङ्गीतवादः, शब्दश्च येषां येषु वा तैः । तालेति ।—तालेन—सङ्गीताङ्गविशेषेण, अवचरन्ति—आलपन्तीति तथोक्ताः, ये चारणाः,—कुशीलवाः तैः । बालः,—नवः, तरुण इत्यर्थः, अभिनवश्च । क्रियमाणेति ।—क्रियमाणः,—उत्पाद्यमानः, कोलाहलः,—कलकलनिनादः येन सः ।

(२९६) गन्धेति ।—गन्धतैलानाम् अवसेकेन—प्रयोगेण, सुगन्धिः,—सुरभिः तेन । दीपिकाचक्रवालस्य—दीपमण्डलस्य, आलोकेन—उद्योतेन । कुङ्कुमेति ।—कुङ्कुमानां पटवासधूलयः,—वसनसौगन्ध्यकरचूर्णविशेषाः, तेषां पटलेन—निचयेन, पिञ्जरीकुर्वन्—रञ्जयन्नित्यर्थः ।

(२९७) उत्फुल्लेति ।—उत्फुल्लानां—विकस्वराणां, मल्लिकानां—तदाख्यकुसुमानां, या मुण्डमाला—शिरोमालिका, तस्या मध्यम अध्यासितं—निवेशितं, कुसुमशेखरं—पुष्पमयं शिरोभूषणं यस्य तेन । सपरिवेशचषाकरं—सपरिवेशः,—परिधिवेष्टितः, ("परिवेशस्तु परिधिरुपसूर्यकमण्डली" इत्यमरः) चषाकरः,—चन्द्रः यत्र तादृशं, कौमुदीप्रदोषं—ज्योत्स्नाऽलङ्कृतं रजनीमुखम् । अत्र चन्द्रपरिवेशोल्लेखेन, जामातुः प्रभावत्त्वातिशय्याय इति ध्वनितम् ।

(२९८) आत्मेति ।—आत्मनः,—स्वस्य, रूपेण—सौन्दर्य्येण, निर्जितस्य—पराजितस्य, मकरकेतोः,—कामस्य, करात्—हस्तात्, अपहृतम्—प्रसह्यादत्तं तेन, कार्मुकेण—धनुषा । कौसुमेन—सत्पुष्परचितेन, दाम्ना—स्रजा । विरचितेति ।—विरचितः,—सम्पादितः, वैकक्ष्यकस्य—वामस्कन्धात् तिर्य्यगवलम्बिनी हारविशेषस्य, विलासः,—श्रीभा येन तथोक्तः ।

(२९९) कुसुमसौरभगर्वभ्रान्तभ्रमरकुलकलप्रलापसुभगः पारिजात इव जातः श्रिया सह पुनः अवतारितो मेदिनीं, नववधूवदनावलोकनकुतूहलेन इव (३००) क्लथ्यमाणहृदयः, पतन्निव मुखेन प्रत्यासन्नलग्नो गृहवर्त्मा।

(३०१) राजा तु तम् उपद्वारम् आगतं चरणाभ्यामिव राजचक्रानुगम्यमानः ससुतः प्रत्युज्जगाम। अवतीर्णञ्च तं कृतनमस्कारं मन्मथमिव माधवः प्रसारितभुजो गाढम् आलिलिङ्ग। यथाक्रमं परिष्वक्तराज्यवर्द्धनहर्षश्च हस्ते गृहीत्वा अभ्यन्तरं

(२९९) कुसुमेति।—कुसुमानां—पुष्पाणां, सौरभात्—आमोदात्, गर्वेण—उल्लासेन, भ्रान्तानां—भ्रमतां, भ्रमराणां—मधुकराणां, कुलस्य—वृन्दस्य, कलप्रलापेन—मधुराव्यक्तेन झङ्कारेण, सुभगः,—मनोहरः, पारिजात इव—देवतरुविशेष इव, श्रिया—लक्ष्म्या, सौन्दर्य्येणत्यर्थः, सहोदरया इति भावः। अवतारितः,—अवतारं नीतः, विधायेति शेषः; सहनियतसत्कारवता युगपदाविर्भावादिप्राकृतिकनियमादित्याशयः।

(३००) क्लथ्यमाणहृदयः,—प्रगल्भ नीयमानमानसः। पतन्निव—त्वरयाऽधःस्खलन्निव, अतिपरिचालितधावमानतुरङ्गाट्टासंसर्पणवेगात इति भावः; मुखेन—"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च। गलो गलादिसकलं समाङ्गं मुखमुच्यते॥" इत्युक्तावयववता, वदनेन इत्यर्थः; [खनधातोः "डित्खनेर्मुट् चादात्तः" (उ० ५ पा० २० सू०) इति अचि डित्त्वात् धातोर्मुडागमे रूपम्]। वेगाक्रान्तानाम् अधोमुखेन पतन लोके प्रसिद्धम्। प्रत्यासन्नलग्नः,—प्रत्यासन्नं—समीपवर्त्ति, लग्नं—विवाहकालिकशुभराश्युदयः यस्य तथाभूतः, अनुकूलयावाप्रसादात् सन्निहितवैवाहिकशुभक्षण इत्यर्थः।

(३०१) राजेत्यादि।—उपद्वारं—द्वारसमीपं, द्वारं वा, [विभक्त्यर्थे अव्ययीभावः]। राजचक्रानुगम्यमानः,—राजचक्रैः,—स्वसभाभ्यराजसमूहैः सौहार्द्यादिसंबन्धोपस्थितैर्वा अनुस्त्रियमाणः। एतनास्य चक्रवर्त्तित्वं व्यज्यते। प्रत्युज्जगाम—प्रत्युद्गमनं चकार, अनादिविवाहप्रथावत्त्वात्, लोकैरेव कन्यापक्षभिः सभिवकुटुम्बादिभिः, सन्निकृष्टागमने आश्रिता अपि सामन्तसामान्यनरपालाः स्वयमुपगम्यन्त पादचारिभिः, एषः सदातनः सदाचारः इति गम्यते। अवतीर्णम्—अवरूढं, वैवाहिकयानादिति शेषः। माधवः,—कृष्णः, वसन्तो वा। मन्मथमिव—प्रद्युम्नमिव, काममिव

निन्ये। स्वनिर्विशेषासनदानादिना च एनम् उपचारेण उपचचार।

(३०२) न चिराच्च गम्भीरनामा नृपतेः प्रणयी विद्वान् द्विजन्मा ग्रहवर्म्माणम् उवाच, —"तात! त्वां प्राप्य चिरात् खलु राज्यश्रिया घटितौ तेजोमयौ सकलजगद्गीयमानबुधकर्णानन्दकारिगुणगणौ सोमसूर्यवंशौ इव पुष्पभूतिमुखरवंशौ। प्रथममेव कौस्तुभमणिरिव गुणैः श्लिष्टोऽसि हृदये देवस्य। इदानीन्तु शशीव शिरसा परमेश्वरेण असि वाढ्या जातः" इति।

एवं वदति एव (३०३) तस्मिन् नृपमुपसृत्य मौहूर्त्तिकाः,—

वा। यथाक्रमं—क्रमानुसारेण, ज्येष्ठानुसारेणेत्यर्थः। परिष्वक्तेति।—परिष्वक्तः,—आलिङ्गितः, राज्यवर्द्धनः हर्षश्च येन तं, ग्रहवर्म्माणमिति भावः। अभ्यन्तरं—अन्तर्भवनम् इत्यर्थः। स्वेति।—स्वस्मात्—आत्मनः, निर्विशेषम्—अपृथक्कृतं, तुल्यरूपमित्यर्थः, आसनदानादि यत्र तादृशेन। उपचारेण—पूजोपकरणेन, हृदयसमर्पणादिनार्घ्यांशांभेदेन वा; उपचचार—पूजयामास, "विष्णुं जामातरं मत्वा" इत्युक्तेरिति भावः।

(३०२) न चिरात्—नातिविलम्बेन इत्यर्थः। प्रणयी—स्निग्धः, सुहृदित्यर्थः। द्विजन्मा—ब्राह्मणः। चिरात्—बहोः कालात। राज्यश्रिया—तदाख्यया राजकन्यया, राजलक्ष्म्या च, घटितौ—योजितौ, सङ्गतौ इत्यर्थः। तेजोमयौ—प्रतापसम्पन्नौ, ज्योतिर्मयौ च। सकलेति।—सकलैः,—समग्रैः, जगद्भिः,—भुवनैः, सकलेषु जगत्सु वा, गीयमानाः,—कीर्त्यमानाः, बुधानां—विदुषां, कर्णानन्दकारिणः,—श्रुतिसुखजनकाः, बुधकर्णयोः,—चन्द्रसूर्यसूनुतयोः, आनन्दकारिणश्च, गुणगणाः,—गुणसङ्घाः, वयोः तथाभूतौ। पुष्पेति।—पुष्पभूतिः,—प्रभाकरवर्द्धनस्य पूर्व्वपुरुषः, मुखरः,—ग्रहवर्म्मणः पूर्व्वपुरुषः, तयोः वंशौ—अन्ववायौ। कौस्तुभमणिरिव—तदाख्यमहारत्नमिव। गुणैः,—धैर्य्यगाम्भीर्य्यादिभिः, सूत्रैश्च। देवस्य—राज्ञः, विष्णोश्च। हृदये—अन्तःकरणे, वक्षसि च। शशीव—चन्द्र इव। परमेश्वरेण—सार्व्वभौमेन, हरेण च। शिरसा—मस्तकेन; एकत्र—भूषणत्वात्, अन्यत्र,—जामातृत्वात् समादरेण इति भावः। वोढ्यः,—धार्य्यः; परमश्लिष्टमस्त्यन्वादिति भावः।

(३०३) तस्मिन्—गम्भीराख्ये द्विजन्मनि। मौहूर्त्तिकाः,—गणकाः।

"देव! समासीदति लग्नवेला, व्रजतु जामाता कौतुकगृहम्" इति ऊचुः। अथ नरेन्द्रेण,—"उत्तिष्ठ गच्छ" इति गदितो गृहवर्म्मा प्रविश्य अन्तःपुरं जामातृदर्शनकुतूहलिनीनां स्त्रीणां पतितानि लोचनसहस्राणि विकचनीलकुवलयवनानि इव लङ्घयन् आससाद कौतुकगृहद्वारम्; निवारितपरिजनश्च प्रविवेश।

(२०४) अथ तत्र कतिपयाप्तप्रियसखीस्वजनप्रमदाप्रायपरिवाराम्, (२०५) अरुणांशुकावगुण्ठितमुखीं प्रभातसन्ध्यामिव स्वप्रभया निष्प्रभान् प्रदीपकान् कुर्व्वाणाम्, (२०६) अतिसौकुमार्य्यशङ्कितेन इव यौवनेन नातिनिर्भरमुपगूढाम्,

---

समासीदति—समासन्नं भवति। लग्नवेला—शुभरात्र्युदयकालः। व्रजतु—गच्छतु। कौतुकगृहं—वैवाहिकमण्डपम्। जामातेति।—जामातुः,—वरस्य, दर्शने—अवलोकने, कुतूहलम्—औत्सुक्यमिति यावत्, विद्यते आसामिति तथोक्तानाम्। विकचेति।—विकचानि—प्रस्फुटितानि, नीलकुवलयवनानि—नीलोत्पलकाननानि। लङ्घयन्—अतिक्रामन्। निवारितेति।—निवारितः,—प्रतिषिद्धः, परिजनः,—अनुयायिवर्गः येन तथाभूतः। अन्तःपुरत्वात् तत्र न साधारणैः सार्द्धं गमनं सज्जनानुमोदितम् इति नयाचारः प्रदर्शितः।

(२०४) "अथ" इत्यादौ "वधूमपश्यत्" इत्युत्तरेणान्वयः। तां विशिनष्टि, कतीति।—कतिपयाः,—अल्पसङ्ख्याकाः इत्यर्थः, आप्ताः,—विश्वस्ताः, प्रियसख्यः,—स्निग्धवयस्याः एव, तथा स्वजनानां—बन्धुजनानां, प्रमदाः—अङ्गनाः, प्रायेण—बाहुल्येन, परिवाराः,—परिजनाः यस्याः तां, ताभिः वेष्टिताम् इति भावः।

(२०५) अरुणेति।—अरुणेन—रक्तेन, अंशुकेन—वसनेन, अवगुण्ठितम्—आच्छादितं, मुखं यस्याः ताम्; अन्वयः,—अरुणस्य—सूर्य्यस्य, अंशुकेन—प्रत्ययतया मृदुना किरणेनेत्यर्थः, अवगुण्ठितम्—अदर्शनतां गतं, मुखं यस्याः ताम्। प्रभातसन्ध्यामिव—प्रातःसन्ध्यामिव। निष्प्रभान्—दीप्तिरहितान्, मलिनान् इत्यर्थः।

(२०६) अतीति।—अतिसौकुमार्य्यम्—अतिमार्दवं, तेन शङ्कितं—विनाशाद् भीतमित्यर्थः, तेनेव। नातिनिर्भरं—नातिगाढम्, उपगूढा—आलिङ्गिता तां, नवयौवनामिति भावः; अतिकोमलाः न निर्विशङ्कं समाश्लिष्यन्ति इति हृदयम्।

(३०७) साध्वसनिरुध्यमानहृदयदेशदुःखमुक्तैः निभृतायतैः श्वसितैः अपयान्तं कुमारभावम् इव अनुशोचन्तीम्, (३०८) अत्युत्कम्पिनीं पतनभिया इव त्रपया निष्पन्दं धार्यमाणां, हस्तं तामरसप्रतिपक्षम् आसन्नग्रहणं शशिनमिव रोहिणीं भयवेपमानमानसाम् अवलोकयन्तीं, (३०९) चन्द्रनधवलतनुलतां ज्योत्स्नाऽऽदानसञ्चितलावण्यात् कुमुदिनीगर्भादिव प्रसूतां,

(३०७) साध्वसेति।—साध्वसेन—सुचिरमध्युषितं मद्धृदयं सर्वदि विहाय गते त्वयि अहं निराश्रया भवेयमिति भयेनेति भावः, निरुध्यमानः,—मां मा विजहीहि इति अवरुध्यमानः, हृदयदेशः,—चित्तवेश्म, तस्मात् दुःखेन—क्लेशेन, कुमारभावानिरोधजनितेनेति भावः; समापतद्भिः बलवद्भिः तारुण्यस्य तदानीं प्रस्थमार्गगमनात् तद्विरोधिनः कौमार्यस्य सहसा तद्धृदयदेशादपसरणं वेदितव्यम्, अतः अत्यायहेऽपि तन्निरोधाशक्तिरिति तात्पर्यम्; मुक्तैः,—त्यक्तैः; अत एव निभृतायतैः,—अस्पष्टदीर्घैः इत्यर्थः, उद्वेगादिति भावः। श्वसितैः,—दीर्घनिःश्वासैः, अपयान्तम्—अपसरन्तम्, आत्मानं त्यजन्तमिति यावत्, कुमारभावं—कौमारम्, अनुशोचन्तीं—विलपन्तीं, गतस्य पुनरपरावृत्तिप्रसङ्गात् इति भावः।

(३०८) अत्युत्कम्पिनीम्—अतिशयेन उत्कम्पमानाम्, अत एव पतनभिया—स्खलनाशङ्कया, त्रपया—लज्जया, निष्पन्दं—निश्चलं यथा तथा, धार्यमाणाम्—अवलम्ब्यमानाम्, अत्यधिकवयोवतीमित्यर्थः; सौभाग्यवतीभिः विवाहे तथा पतिवराधारणाचारदर्शनात् इति भावः। तामरसप्रतिपक्षं—रक्तोत्पलविरोधिनं, रक्तकमलवैरिणम् इत्यर्थश्च, तदानीं यौवनोद्गमाभावात्। आसन्नग्रहणम्—अचिरपाणिपीडनं, सन्निहितपरिणयमिति भावः, सन्निहितयासच्च, ("यद्गणं स्त्रीकारादरकरीपरागीपल्लविवन्दिषु" इति मेदिनी)। भयेति।—भयेन वेपमानं—कम्पमानं, मानसं—चित्तं यस्याः ताम्। अवलोकयन्तीं—पश्यन्तीम्। बाल्ये हृल्लतायाः धावल्यात् तस्य शशिसाम्यमवगन्तव्यम्, इदानीन्तु यौवनोद्गमात् तस्य रक्ततोत्पत्तेः; शशिनः ग्रासमये रोहिण्याः तत्प्रियायाः इव यौवनभिया अस्या वेपमानकलेवरत्वं सञ्जातमिति, एतेनास्याः यौवनकालिकः पूर्वरागः हर्षित इति।

(३०९) चन्द्रनेति।—चन्द्रनेन—चन्द्रनामुलेपनेन, चन्द्रवद्वा, निसर्गविमलाकृतित्वादिति भावः, धवला—विशदा, तनुलता—अङ्गयष्टिः यस्याः ताम्। ज्योत्स्नेति।—ज्योत्स्नानां—कौमुदीनाम्, आदानेन—ग्रहणेन, सञ्चितं—परिपुष्टं,

(३१०) कुसुमामोदनिर्हारिणीं वसन्तहृदयात् इव निर्गतां, निश्वासपरिमलाकृष्टमधुकरकुलां मलयमारुतात् इव उत्पन्नां, कृतकन्दर्पानुसरणां रतिमिव पुनर्जातां, (३११) प्रभालावण्य-मदसौरभमाधुर्यैः कौस्तुभशशिमदिरापारिजातामृतप्रभवैः सर्वरत्नगुणैः अपरामिव सुरासुररुषा रत्नाकरेण कल्पितां श्रियं,

---

लावण्यं—कान्तिविशेषः यस्य तस्मात्; कुमुदिनीगर्भात्—कैरविण्या जठरादिव, प्रसूतामिव—निर्गतामिव; अन्यथा जगदाह्लादिनी कथमेतस्याः कान्तिः? इत्युत्प्रेक्षा-बीजम्।

(३१०) कुसुमेति।—कुसुमानां—पुष्पाणाम्, आमोदः,—सौरभं, तेन निर्हरति—स्त्रीकानां मानसं रञ्जयतीति यावत्, तथोक्तां ताम्। वसन्तहृदयात्—वसन्तस्य—पुष्पसमयस्य, कन्दर्पपरिजनस्य इति यावत्, हृदयात्—वक्षःस्थलात्, प्रस्फुटितसर्वकुसुमावयवस्य वसन्तकालस्य मध्यभागादित्यर्थः, उत्पन्नामिव—सम्भूतामिव; एतेनास्याः अङ्गेषु प्रसूनसौरभसत्त्वात् पद्मिनीस्त्रीत्वं व्यञ्जीकृतमिति। एतदेव विशिष्य व्यनक्ति, निश्वासेति।—निश्वासपरिमलेन—निश्वाससौरभेण, आकृष्टानि—आनीतानि, मधु-करकुलानि—भृङ्गवृन्दानि यया ताम्। उत्तमानामङ्गनानां निश्वासादेः पद्मगन्धादि-विशिष्टत्वादिति भावः; मलयेति।—मलयमारुतस्यापि नन्दनामोदवाहित्वेन सुगन्ध-त्वादिति भावः। कृतेति।—कृतं—विहितं, कर्तुमभीप्सितमिति यावत्, कन्दर्पस्य—मदनस्य, अनुसरणम्—अनुगमनं यया ताम्। एतेनास्याः पत्युः कन्दर्पप्रतिमत्वं ध्वनितमिति वेदितव्यम्।

(३११) प्रभेति।—प्रभा—कान्तिः, लावण्यं—"मुक्ताफलेषु छायायास्तरलत्व-मिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिह स्मृतम्॥" इत्युक्तलक्षणं, मदः,—मद्य-पानजनितः उल्लासः, सौरभं—परिमलः, माधुर्यं—"सर्वावस्थाविशेषेषु माधुर्यं रमणीयता" इत्युक्तलक्षणं, तैः, कौस्तुभशशिमदिरापारिजातामृतप्रभवैः,—कौस्तुभः,—नारायणवक्षःस्थलस्थमणिविशेषः, शशी—चन्द्रः, मदिरा—मद्यं, पारिजातः,—नन्दन-काननीयपुष्पविशेषः, अमृतं—सुधा, तेभ्यः, क्षीरोदमथनोद्भूतेभ्यः इति भावः, प्रभवैः,—उद्भूतैः; तत्र कौस्तुभस्य गुणः प्रभा, शशिनो गुणो लावण्यं, मदिरायाः गुणः मदः, पारिजातस्य गुणः सौरभम्, अमृतस्य गुणो माधुर्यमिति द्रष्टव्यम्। सर्वरत्नगुणैः,—सर्वेषां रत्नानाम्—उत्कृष्टानां वस्तूनां, ("जातौ जातौ यदुत्कृष्टं तद्रत्नमिह कथ्यते" इत्युत्पलमालायां) गुणाः,—उत्कर्षाः तैः। सुरासुररुषा—देवासुरान् प्रति कोपेन,

(३१२) स्निग्धेन बालिकालोकेन सितसिन्धुवारकुसुममञ्जरीभिः इव मुक्तादीधितिभिः कल्पितकर्णावतंसां, (३१३) कर्णाभरण-मरकतप्रभाहरितशाद्वलेन कपोलस्थलीतलेन विनोदयन्ताम् इव हारिणीं लोचनच्छायाम्, (३१४) अधोमुखं वरकौतुका-लोकनाकुलं मुहुर्मुहुः कृतमुखोन्नमनप्रयत्नं सखीजनं हृदयञ्च निर्भर्त्सयन्तीं वधूम् अपश्यत्।

मन्यनेन स्वस्य निरपराधस्य सर्व्वोत्कृष्टानां बलायासमर्जितानां सयत्नराक्षितानाञ्च वस्तूनां बलात् ग्रहणजनितेन इति भावः; रत्नाकरेण—समुद्रेण। कल्पितां—निर्म्मिताम्; पुरा देवासुराभ्यां मिलित्वा बलपूर्व्वकं समुद्रं विमथ्य निखिलरत्नजातं ततः उद्धृत्य गृहीतमिति पौराणिकी वार्त्ता; एतामेवोपजीव्य, कृतरत्नेन रत्नाकरेण कौपवशा-दैव तज्जिगीषया कृतरत्नगुणान् एकत्रैव सन्निवेश्य निर्म्मितामिवेत्युत्प्रेक्षितमिति वेदितव्यम्, अन्यथा विधिः कथम् एतादृशीम् अलौकिकचमत्कृतिं निर्म्मातुं प्रभवेत् इत्याशयः।

(३१२) स्निग्धेन—प्रणयिना, बालिकालोकेन—कुमारीजनेन, सिताभिः,—शुभ्राभिः, सिन्धुवारकुसुमानां—निर्गुण्डीपुष्पाणां, मञ्जरीभिः,—वल्लरीभिः, मुक्ता-दीधितिभिरिव—मौक्तिकप्रभाभिरिव, इत्यत्रैधर्म्यसाम्ययोगादुपमाऽलङ्कारः, कल्पितः, —रचितः, कर्णावतंसः,—कर्णभूषणं यस्याः ताम्।

(३१३) कर्णेति।—कर्णाभरणेषु,—कर्णभूषणेषु, यानि मरकतानि—हरि-न्मणयः, तेषां प्रभाभिः,—कृटाभिः, हरितशाद्वलेन—बहुलश्यामघासयुक्तेनेवेत्यर्थः, ("शाद्वलः शाद्वहरिते" इत्यमरः) कपोलस्थलीतलेन—गण्डतटेन, विनोदयन्तीमिव —प्रीणयन्तीमिव, हारिणीं—मनोहारिणीं, हरिणीसम्बन्धिनीञ्च, लोचनच्छायां—नेत्रकान्तिम्; हरिणीलोचनछायामपि शाद्वलः स्थलीभागः स्वाभिरामणीयत्वेन विनोदयति इति। एतेनास्याः हरिणायतलोचनत्वं व्यज्यते।

(३१४) अधोमुखम्—अवनतमुखं, कन्यकाजनसाधारणिकयपाऽऽवेशात् इति भावः। वरेति।—वरस्य—उद्दीढुः, कौतुकेन—कुतूहलेन, आलोकने—दर्शने, आकुलं—व्याकुलम्। कृतेति।—कृतः मुखस्य उन्नमने—उत्तोलने, प्रयत्नः,—चेष्टा येन तम्। हृदयं—चित्तम्; हृदयमपि उक्तविशेषणद्वयविशिष्टमिति बोद्धव्यम्। निर्भर्त्सयन्तीं—निन्दन्तीम्; लज्जां विहाय वरदर्शनार्थं प्रयासकरणात् सखीजन-निर्भर्त्सनं, तथा दर्शनतृष्णायां प्रबलायां सत्यामपि सहजलज्जावशात् तत्कर्तुमक्षमतया

प्रविशन्तमेव (३१५) तं हृदयचौरं बध्वा समर्पितं जग्राह कन्दर्पः। परिहासस्मेरमुखीभिश्च नारीभिः कौतुकगृहे यद् यत् कार्य्यते जामाता, तत्तत्सर्व्वम् अतिपेशलं चकार। (३१६) कृतपरिणयानुरूपवेशपरिग्रहां गृहीत्वा करे बधूं निर्जगाम; (३१७) जगाम च नवसुधाधवलां निमन्त्रितागतैः तुषारशैलोपत्यकाम् इव

हृदयनिर्भर्त्सनं बोद्धव्यम्। "कन्या त्वजातौपयसा सलज्जा नवयौवना" इति दर्पणोक्तलक्षणसौसाहश्यात् नवोढायामप्येतस्यां तदानीमपि तद्गुणस्यानपायादिति विभाव्यम्।

(३१५) तं—यद्दवर्म्मांणम। हृदयचौरं—चेतोऽपहर्त्तारं, मनोहरमिति भावः। बध्वा—राज्यश्रिया। समर्पितं—धृत्वा प्रदत्तं, कन्दर्पायेति भावः; यथा लोकैः कश्चित् कमपि चौरं धृत्वा कस्यापि राजपुरुषस्य हस्ते समर्पयति, तथा राज्यश्रीरपि तं हृदयचौरं ज्ञात्वा, धृत्वा च कन्दर्पराजहस्ते मनस्यैर्य्यविचारार्थं समर्पितवतीत्यर्थः; यद्दवर्म्मा राज्यश्रियं दृष्ट्वा कन्दर्पवशगो जातः इति भावः। परिहासेति।—परिहासेन स्मेरं—मृदुहसितं, मुखं यासां ताभिः। कौतुकगृहे—वैवाहिकमङ्गल्यानुष्ठानजन्यनिर्दिष्टभवने। कार्य्यते—आचार्य्यते। अतिपेशलम्—अतिरुचिरम्, अतिदक्षं वा यथा तथा, ("पेशलो रुचिरे दक्षे" इति मेदिनी) चकार—कृतवान्; नवीनजामातरं वञ्चयित्वा आनन्दमनुभवितुं परिहासप्रियाभिः ताभिः यत्किञ्चित् सभ्यव्यवहारादिकम् अकार्य्यत सः, बध्वायत्तहृदयत्वात् तत्सर्वं सत्यं वा छलं वा इति निर्णेतुमशक्यतया अविचारितमेव तेन सर्व्वादितम् इति भावः।

(३१६) कृतेति।—कृतः परिणयस्य—विवाहस्य, अनुरूपस्य—सदृशस्य, वेशस्य—परिच्छदस्य, परिग्रहः,—स्वीकारः, परिधानमित्यर्थः, यया तथोक्ताम्; विवाहसमयोचितप्रसाधनवतीम् इत्यर्थः।

(३१७) "जगाम" इत्यादौ "वेदीम्" इत्युत्तरेणान्वयः। तां विशिनष्टि, नवेत्यादि।—नवाभिः,—नूतनाभिः, सद्यः प्रदत्ताभिरित्यर्थः, सुधाभिः,—चूर्णलेपैः इत्यर्थः, धवलां—श्वेतां ताम्। निमन्त्रिताः,—आहूता इत्यर्थः, तथाभूताः सन्तः आगताः,—उपस्थिताः तैः। तुषारशैलस्य—हिमगिरेः, ("तुषारः तुहिनं हिमम्" इत्यमरः) उपत्यकामिव—आसन्नां भूमिमिव, ("उपत्यकाद्रेरासन्ना भूमिः" इत्यमरः)।

(३१८) ताम्बकाम्बिकाविवाहाङ्कतैः भूभृद्भिः परिवृतां, (३१९) सैकसुकुमारयवाङ्कुरदन्तुरैः पञ्चास्यैः कलमैः कोमलवर्णिकाविचित्रैः अमलमुखैश्च (३२०) मङ्गल्य-फलहस्ताभिः अञ्जलिकारिकाभिः उद्भासितपर्य्यन्ताम्, (३२१) उपाध्यायोपधीयमानेन्धन-धूमायमानाग्निमन्थुक्षण-क्षणिकोपदृष्टद्विजाम्, (३२२) उपक्लृप्तानुनिहितानुप-

(३१८) ताम्बकाम्बिकाविवाहाङ्कतैः,—हरगौरीविवाहलिखितैः ; भूभृद्भिः,—राजभिः, पर्व्वतैश्च ; परिवृताम्—आकीर्णाम् । अत्र भूभृद्भिः इव भूभृद्भिः इति उपमानोपमेययोः सामान्यलक्ष्मीसमुल्लासनात् श्लेषसङ्कीर्णोपमा ।

(३१९) सैकेति ।—सैकेन—जलक्लालनेन, सुकुमारैः,—सुकोमलैः, यैः यवाङ्कुरैः,—यवप्ररोहैः, तैः दन्तुराः,—सञ्जातदन्ता इव लक्ष्यमाणाः, [दन्तशब्दात् उन्नतदन्तार्थे "दन्त—" (५।२।१०६ पा०) इत्यादिना उरच् रूपम्] तैः, पञ्चास्यैः,—पञ्चमुखैः, कलमैः,—कुम्भैः । कोमलेति ।—कोमलाभिः,—नयनसुभगाभिरित्यर्थः, वर्णिकाभिः,—वर्णविशेषैः, चन्दनादिभिः खटिकादिभिर्वा इति यावत्, विचित्रैः,—रम्यैः तैः, अमलमुखैः,—रौप्यमयैः, यद्वा,—अमलम्—आवरणपात्रविशेष इति यावत्, ("सर्व्वसाधनं भाण्डं पात्रामत्रञ्च भाजनम्" इत्यमरः) मुखे—अग्रभागे येषां तैः । ["अमलमुखैश्च" इत्यत्र "अमितमुखैश्च" इति पाठेऽपि—रूप्यमयैः इत्यर्थः]।

(३२०) मङ्गल्येति ।—मङ्गल्यं—मङ्गलाय हितं, फलं—नारिकेलाम्रादिकं, फले यासां ताभिः, अञ्जलिकारिकाभिः,—सम्पुटप्रतिमाभिः, सालभञ्जिकाभिर्वा, उद्भासितपर्य्यन्तां—विद्योतितप्रान्तभागाम् ।

(३२१) उपाध्यायेति ।—उपाध्यायेन—गुरुणा, पुरोधसेति यावत्, उपधीयमानानि—अर्प्यमाणानि, इन्धनानि—काष्ठानि, अग्निसंस्थापनार्थमिति भावः, तैः धूमायमानः,—धूमसुद्गमन्, यो ऽग्निः,—अनलः, वैवाहिकाहीनीय इति भावः ; तस्य मन्थुक्षणे—प्रज्वालने, क्षणिकः,—क्षणेन कार्य्यसम्पादनार्थी, व्ययः इत्यर्थः, ["मन्थु-क्षणक्षणिको—" इत्यत्र "मन्थुक्षणात्क्षणिको—" इति पाठे,—अक्षणिकः,—क्षणा-दतीतः अक्षणः,—कालासहिष्णुरित्यर्थः, तस्यायम् अक्षणिकः, कार्य्यनिष्पादने क्षणादिविचारबहिष्कृतः, व्यय इत्येवार्थः] उपदृष्टा—साक्षीभूतः, "उपदेशः" इति केचित्, द्विजः,—ब्राह्मणः, ऋत्विगित्यर्थः, यस्यां तथोक्ताम् ।

(३२२) उपेति ।—उपक्लृप्तानु—अग्निसमीपे, निहिताः,—स्थापिताः, अनुप-

हृतहरितकुशां, सन्निहितदृषदजिनाज्यस्रुक्समित्पुलोनिवहां, (३२३) नूतनशूर्पार्पितश्यामलशमीपलाशमिश्रलाजहासिनीं वेदीम्। आरुरोह च तां दिवमिव सज्योत्स्नः शशी। (३२४)समुत्सर्पं च वेल्लिनारुणशिखापल्लवस्य शिखिनः कुसुमायुध इव रतिद्वितीयो रक्ताशोकस्य समीपम्। हुते च (३२५) हुतभुजि दक्षिणावर्त्तप्रवृत्ताभिः वधूवदनविलोकनकुतूहलिनीभिः इव ज्वालाभिः एव सह प्रदक्षिणं बभ्राम। पात्यमाने च

हृताः,—अच्छिन्नाः, हरिताः,—हरिद्वर्णाः, सद्यः समाहृताः, महोत्सवादौ तथाविधानामेवोपयोगात् इति भावः, कुशा,—दर्भाः यस्यां ताम्। सन्निहितेति।—दृषत्—शिला, अजिनं—चर्म्म, आज्य—घृतं, स्रुक—होमभाण्डं, समिधः,—काष्ठानि, तेषां पूलाः,—श्रेणयः, तासां निवहाः,—सङ्घाः, सन्निहिताः,—समीपस्थाः यस्यां ताम्।

(३२३) नूतनेति।—नूतनैः—नवैः, शूर्पैः—प्रस्फोटनैः, "कुलो" इति बङ्गीयैः परिभाषितैः, अर्पितानि—न्यासितानि, श्यामलानि,—हरिद्वर्णानि, यानि शमीपलाशानि—शमीपलाणि, तैः मिश्राः,—सम्मिलिताः, लाजाः,—अक्षतानि, भृष्टधान्यानीत्यर्थः, "खइ" इति बङ्गीयैः "लाइ" इति च पाश्चात्यैः परिभाषितानि, तैः हसति—राजते इति तथाविधा ताम्, अतिधावल्यात् लाजानां नेष हासत्वमुपचरितं वेदितव्यं, "यशसि धवलता वर्णने हासकीर्त्योः" इति कविसमयप्रसिद्धेरिति। तां—वेदीम्, आरुरोह—आरूढवान्। सज्योत्स्नः,—ज्योत्स्नासहितः, सबधूक इति भावः।

(३२४) समुत्सर्पं — उपातिष्ठत। वेल्लिनेति।—वेल्लिताः, —चलिताः, अरुणाः,—रक्ताः, शिखाः,—ज्वालाः, पल्लवा इव—किशलया इव, शिखा इव पल्लवाश्च यस्य तथाभूतस्य, शिखिनः,—अग्नेः, हुतस्य च, ("शिखी वह्नौ बलीवर्द्दे शरे केतयर्हे द्रुमे" इति मेदिनी) कुसुमायुध इव—काम इव। रक्ताशोकस्य—विकसिताशोकपादपस्य। तस्य रक्तपल्लवत्वात् अग्निमाद्यं, मदनोद्दीपकत्वाच्च तस्य नियतकालसबन्धायिनः सस्त्रीकमदनेन सह सबधूककुमारस्य साम्यं सुसंरक्षितमेवेति ध्वन्यम्, अतः उपमाऽलङ्कारः।

(३२५) हुतभुजि—अग्नौ। दक्षिणावर्त्तप्रवृत्ताभिः,—दक्षिणायां दिशि आवर्त्तनेन प्रवृत्ताभिः, तथा च, ऋत्विजां दक्षिणा हि आज्यग्रहणार्थं समुत्सुकं प्रधाविताभिः,

लाजाञ्जली नखमयूखधवलिततनुः अदृष्टपूर्ववधूवररूपविस्मय-स्मेर इव अदृश्यत विभावसुः।

अत्रान्तरे (३२६) स्वच्छकपोलोदरमङ्गान्तमनलप्रति-बिम्बमिव निर्वापयन्ती (३२७) स्थूलमुक्ताफलविमलवाष्प-बिन्दुमन्दोहदर्शितदुर्दिना निर्वेदनविकारं रुरोद बधूः। (३२८) उदश्रुविलोचनानाञ्च बान्धवबधूनाम् उदपादि महान् आक्रन्दः। परिममापितवैवाहिकक्रियाकलापस्तु जामाता

प्रदक्षिणप्रसृताभिरित्यर्थः, दक्षिणावर्त्तस्य तस्य शुभसूचकत्वादिति भावः। ज्वालाभिः, —शिखाभिः। पात्यमाने—प्रक्षिप्यमाणे, अर्प्यमाणे इत्यर्थः। लाजाञ्जली—अक्षता-ञ्जली, सृष्टधान्याञ्जलाविति यावत्, कुशण्डिकाकर्म्मणि लाजहोममसम्पादनार्थमिति भावः। नखेति।—नखानां—कररुहाणां, वधूवरयोरिति भावः, मयूखेन,—प्रभया, धवलिता —शुभ्रीभूता, तनुः,—देहः यस्य तथाभूतः, अत एव अदृष्टेति।—अदृष्टपूर्वेण— प्रागनवलोकितेन, वधूवरयोः,—कन्याजामात्रोः, रूपेण—सौन्दर्य्येण, यो विस्मयः,— चमत्कारः, तेन स्मेर इव—सहास इव। विभावसुः,—अग्निः। शुक्लभास्वरप्रभावतः क्लृप्तानां स्वगुणत्यागात् नखमयूखैः अत्युत्कृष्टगुडधवलितत्वगुणग्रहेण तद्गुणासङ्क्रान्ति-सङ्कीर्णत्वेच्छा।

(३२६) स्वच्छेति।—स्वच्छम्—उज्ज्वलं, कपोलस्य—गण्डस्य, उदरम्—अभ्यन्तरं, तत्र सङ्गान्तः,—प्रतिफलितः तम्; अनलप्रतिबिम्बमिव—अग्निप्रतिच्छायामिव। निर्वापयन्ती—प्रशमयन्ती। अग्निपरामर्शं निराकर्त्तुमेवाश्रुविसर्ज्जनमित्युत्प्रेक्षा-बीजमवगन्तव्यम्।

(३२७) स्थूलेति।—स्थूलानि—पृथूनि, मुक्ताफलानि—मौक्तिकानि इव, विमलाः,—स्वच्छाः, वाष्पबिन्दूनाम्—अश्रुकणानां, सन्दोहाः,—समूहाः, तैः दर्शितं —प्रकटितं, दुर्दिनं—मेघाच्छन्नम् अहः, पतदजस्रनीरासारं वासरमिति यावत्, दुःखजनकं दिनञ्च; सामयिकपित्रादिविच्छेदसम्भावनया इति भावः, यया तथाभूता। निर्वेदनविकारं—निः,—नास्ति, वेदनस्य—सुखस्य, विकारः,—विक्रतिः यस्मिन् तद् यथा तथा, निःशब्दमिति भावः।

(३२८) उदश्रुविलोचनानाम्—उद्गतवाष्पनेत्राणाम्। बान्धवबधूनां—स्वजन-नारीणाम्। आक्रन्दः,—क्रन्दनम्, ("आक्रन्दः क्रन्दने ज्ञाने मित्रदारुणयुद्धयोः" इति मेदिनी)।

बध्वा समं प्रणनाम श्वशुरौ। (३२९) प्रविवेश च द्वारपक्ष-लिखितरतिप्रीतिदैवतं, प्रणयिभिः इव प्रथमप्रविष्टैः अलिकुलैः कृतकोलाहलम्, (३३०) अलिकुलपक्षपवनप्रेङ्खोलितैः कर्णोत्पलप्रहारभयप्रकम्पितैः इव मङ्गलप्रदीपैः प्रकाशितम्, (३३१) एकदेशलिखितस्तवकितरक्ताशोकतरुतलभाजा अधिज्यचापेन तिर्य्यक्कृणितनेत्रविभागेण शरमृजुकुर्व्वता

(३२९) "प्रविवेश" इत्यादौ "वासगृहम्" इत्युत्तरेण सम्बन्धः। तदेव विशिनष्टि, द्वारेत्यादि।—द्वारपक्षे—द्वारपार्श्वे, ("पक्षौ मासार्द्धकेऽपि ..... वाजिकुञ्जरपार्श्वयोः" इति मेदिनी) लिखितं—चित्रितं, रतिप्रीतिदैवतं—रतिरेव—कामबधूरेव, प्रीतिदैवतं—प्रणयदेवता यस्य तत् ; यद्वा,—रतेः,—दाम्पत्यरागस्य, प्रीतेः,—हर्षस्य, दैवतम्—अरुन्धत्यादीनां पतिव्रता-ललामभूतानां देवतानां समूहः यत्र तथाविधम् ; एताः हि दाम्पत्यसुखविधायिन्यः इति वेदितव्यम्। प्रणयिभिरिव—सुहृद्भिरिव। प्रथमप्रविष्टैः,—अग्रे एव अन्तर्गतैः, कुसुमामोदमाकृष्टैरिति भावः। प्रणयिनः प्रणयवतां अन्तःपुरादावपि स्वच्छन्दसञ्चारिणः भवन्तीति गम्यते।

(३३०) अलीति।—अलिकुलानां—भ्रमरवृन्दानां, पक्षपवनेन—पक्षवातेन, प्रेङ्खोलिताः,—कम्पिताः तैः ; अत एव कर्णेति।—कर्णोत्पलस्य, भूषणीभूतस्य इति भावः, प्रहारात्—ताडनात्, भयेन—शङ्कया, प्रकम्पितैरिव—प्रवेपितैरिव ; बहुताडितानां ताडनभयस्य सततावि भावात् इति भावः। ननु सत्स्वपि बहुषु वस्तुषु वासगृहे, कथमत्र ताडनाशङ्का मङ्गलप्रदीपानां जाता ? इति चेदुच्यते,—सत्प्रतिपक्षाः तुल्यबलाः परस्परं प्रतिहतिमाशङ्कन्ते इति दृश्यते, अत एव कर्णोत्पलायमानाः मङ्गलदीपाः भ्रमराभिलङ्घनजनितं कर्णोत्पलान्दोलनं तेषां स्वताडनार्थं समुद्योगमिवामन्यन्ते इत्युत्प्रेक्षाबीजमवधेयम्।

(३३१) एकेति।—एकदेशे—एकस्मिन् विभागे, लिखितः,—चित्रितः, स्तवकितः,—सञ्जातगुच्छः, यः रक्ताशोकतरुः,—रक्तपुष्पाशोकवृक्षः, तस्य तलं—निम्नदेशं, भजते—आश्रयति इति तथोक्तेन, तत्तलस्थितेन इत्यर्थः, अधिज्यचापेन—मौर्व्वीयुतधनुषा। तिर्य्यगिति।—तिर्य्यक्—वक्रं यथा तथा, कृणितः,—सङ्कोचितः, नेत्रविभागः,—नयनस्य तृतीयांशः येन तथाविधेन, लक्ष्यस्थिरीकरणाय अपाङ्गावलोकनतत्परेणेत्यर्थः। शरं—बाणम्, ऋजुकुर्व्वता—सन्दधतेत्यर्थः।

कामदेवेन अधिष्ठितम्, (३३२) एकपार्श्वन्यस्तेन काञ्चन-चामरकेण इतरपार्श्ववर्त्तिन्या च दान्तशफरकधारिण्या कनक-पुत्रिकया साक्षाल्लक्ष्म्येव उद्दण्डपुण्डरीकहस्तया सनाथेन सोप-धानेन स्वास्तीर्णेन शयनेन शोभमानं (३३३) शयनशिरोभाग-स्थितेन च कृतकुमुदशोभेन कुसुमायुधमाह्वायकाय आगतेन शशिनेव निद्राकलशेन राजतेन विराजमानं वामगृहम्।

तत्र च (३३४) क्रीताया नवबधूकायाः पराङ्मुखप्रसुप्ताया मणिभित्तिदर्पणेषु मुखप्रतिविम्बानि (३३५) प्रथमालापाकर्णन-कौतुकागतगृहदेवताऽननानीव मणिगवाक्षकेषु वीक्षमाणः

(३३२) एकपार्श्वन्यस्तेन—एकपार्श्वनिहितेन, काञ्चनचामरकेण—काञ्चनं—सौवर्णं, चामरकं—चमरमृगप्रतिकृतिः तेन। इतरपार्श्ववर्त्तिन्या—अपरपार्श्वे स्थापितया। दान्तेति।—दान्तं—गजदन्तमयं, शफरकं—कुमुदविशेषमित्यर्थः, धरति—गृह्णातीति तथोक्तया। कनकपुत्रिकया—काञ्चनपुत्तालकया। उद्दण्डेति।—उद्दण्डम्—उन्नतनालं, पुण्डरीकं—श्वेतपद्मं, हस्ते यस्याः तथाभूतया। सनाथेन—युक्तेन। सोपधानेन—उपधानं—"बालिश" इति वङ्गभाषया प्रसिद्धं, तत्समन्वितेन। स्वास्तीर्णेन—शोभनास्तरणशालिना। शयनेन—शय्यया, पर्य्यङ्केनेत्यर्थः।

(३३३) शयनेति।—शयनस्य—शय्यायाः, शिरोभागे—अग्रभागे, स्थितेन—निहितेन। कृतेति।—कृता—विरचिता, कुमुदेन—कैरवेण, कुमुदस्य च शोभा—सौन्दर्य्यं यस्य येन च तेन। कुसुमेति।—कुसुमायुधस्य—पञ्चशरस्य, कामस्येत्यर्थः, साह्वायकाय—साह्वाय्यकरणाय, शशिनः उद्दीपकत्वादिति भावः। राजतेन—रौप्यमयेन। निद्राकलशेन—निद्रायां—शयने, शयनगृहे इत्यर्थः, यः कलशः,—घटः, लोकपालादीनाराध्य मङ्गलार्थं स्थापित इति भावः, तेन।

(३३४) क्रीतायाः,—लज्जितायाः। पराङ्मुखप्रसुप्तायाः,—पराङ्मुख्य निद्रि-तायाः, लज्जावशादेवेति भावः। मणीति।—मणिभित्तयः,—रत्नकुड्यानि, एव दर्पणाः,—आदर्शाः तेषु। मुखप्रतिविम्बानि—आननप्रतिच्छायाः।

(३३५) प्रथमेति।—प्रथमालापस्य—आद्यसम्भाषणस्य, आकर्णने—श्रवणे, यत् कौतुकं—कौतूहलं, तस्मै आगताः,—उपस्थिताः, या गृहदेवताः,—भवनाधि-ष्ठातृदेव्यः, तासाम् आननानि इव—मुखानि इव, मणिगवाक्षकेषु—रत्नमयवातायन-

क्षणदां निन्ये। स्थित्वा च श्वशुरकुले (३३६) शीलेन अमृतमिव श्वश्रूहृदये वर्षन्, अभिनवाभिनवोपचारैः अपुनरुक्तानि आनन्दमयानि दश दिनानि स्थित्वा, दत्त्वा राजदौवारिकमिव राजकुले रणरणकं, यौतुकनिवेदितानि इव शम्बलानि आदाय हृदयानि सर्व्वलोकस्य. कथङ्कथमपि विसर्ज्जितो नृपेण बध्वा सह स्वदेशम् अगमदिति।

इति श्रीबाणभट्टविरचिते हर्षचरिते चक्रवर्त्तिजन्मवर्णनं नाम
चतुर्थ उच्छ्वासः॥ ४॥

नेषु. [गवाम् अचीव इत्यत्र "अच्याऽदर्शनात्" (५।४।७६ पा०) इति समासान्ते अचि "अवङ्—" (६।१।१२३ पा०) इत्यादौ व्यवस्थितविभाषाश्रयणात् अवङि रूपम्] वीक्षमाणः,—पश्यन्। क्षणदां—रात्रिम्। निन्ये—यापयामास इत्यर्थः।

(३३६) शीलेन—सच्चरितेन। अभिनवाभिनवोपचारैः,—प्रतिदिनं नूतननूतनसत्कारैः। अपुनरुक्तानि—अनास्वादितपूर्वाणि। राजदौवारिकं—राज्ञः द्वाररक्षकम्। रणरणकं—[रणः,—शब्दः, तत्प्रकारः क्षित्वं, ततः संज्ञायां कन्] विच्छेदजनितमुद्वेगमित्यर्थः; दौवारिको यथा नियतमेव द्वारमाक्रम्य वर्त्तते, तथा तद्गमनजनितरणरणकोऽपि सदैव राजपरिजनानां हृदयमाक्रम्य अतिष्ठदिति भावः। यौतुकैति।—यौतुकाय—वैवाहिकोपहाराय, निवेदितानि—समर्पितानि। शम्बलानि—पाथेयानि। आदाय—गृहीत्वा, हृत्वेत्यर्थः। कथङ्कथमपि—अतिक्लेशेन, आनच्छ्येत्यर्थः; अपत्यभूतं वस्तु न हि क्लेशेनापि नयनगोचरादपसारयितुं शक्यते सहसा पाषाणहृदयैरपीति भावः। विसर्ज्जितः,—गमनाय अनुमतः इति यावत्। बध्वा—राज्यश्रिया।

इत्यर्गलशास्त्राटवीमरुचरणपद्माननेन वात्स्यवंशावतंसेन पण्डितकुलपतिना वि, ए,
उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्य्येण विरचितायां,
तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-
विद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां
श्रीहर्षचरितव्याख्यायां चतुर्थ उच्छ्वासः॥ ४॥

पञ्चम उच्छ्वासः ।

नियतिर्विधाय पुंसां प्रथमं सुखमुपरि दारुणं दुःखम् ।
कृत्वाऽऽलोकं तरला तड़ित्दिव वज्रं निपातयति ॥ १ ॥
पातयति महापुरुषान् सममेव बहूननादरेणैव ।
परिवर्त्तमान एकः कालः शैलानिवानल्पः ॥ २ ॥

(१) अथ कदाचित् राजा राज्यवर्द्धनं कवचहरम् आहूय हूणान् हन्तुं हरिणान् इव हरिर्हरिणेशकिशोरम् अपरिमित-

---

इदानीं राज्ञः प्रभाकरवर्द्धनस्य स्वर्गमनं सूचयितुं नियतिकालचक्रयोः गतिं द्वाभ्यां प्रकटयति, नियतिरिति ।—नियतिः,—दैवं, ("दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः" इत्यमरः) प्रथमम्—आदौ इत्यर्थः, पुंसां—जनानां, सुखम्—आनन्दं, विधाय—दत्त्वा, तरला—चपला, तड़ित्—विद्युत्, आलोकम्—उद्योतं, कृत्वा—सम्पाद्य, उपरि—पश्चात्, वज्रमिव—अशनिमिव, दारुणं—भीषणं, दुःखं—क्लेशं, निपातयति—आनयतीत्यर्थः । अत्र तड़िता सह नियतेरवैधर्म्यसाम्यप्रतिपादनात्, निपातनादिरूपसामान्यधर्म्मादौनाञ्च वाच्यत्वात् पूर्णोपमाऽलङ्कारः । आर्य्या वृत्तम् ॥ १ ॥

पातयतीति ।—अनल्पः,—अशेषः, शैषाख्यनागश्च, एकः—केवलः, एकाकी, महायान्तरनिरपेक्षः सङ्कर्षणाख्यस्य अनन्तदेवस्य मुखाङ्गुलेन प्रचण्डानलेन जगती विध्वंसकारित्वोक्तेः । परिवर्त्तमानः,—परिभ्रमन्, शिरःपरिवर्त्तनादिकं कुर्वन्, शैलानिव—पर्व्वतानिव, सममेव—तुल्यकालमेव, युगपदेवेत्यर्थः, बहून्,—अनेकान्, महापुरुषान्—श्रेष्ठजनान्, अनादरेणैव—अवहेलयैव, पातयति—ध्वंसयति । एतेन वर्त्तमानस्य राज्ञः भाविनिधनं सूचितम् । अत्रापि पूर्व्ववदेवोपमाऽलङ्कारः । आर्य्या वृत्तम् ॥ २ ॥

(१) अथेत्यादि ।—कवचहरं—वर्म्मधरम्, ["हरतेर—" (३।२।९ पा०) इत्यादिना कवचोपपदात् हृधातोः अचि रूपम्] । हूणान्—तदाख्यान् म्लेच्छान् । हरिः,—सिंहः । हरिणेशकिशोरं—मृगेन्द्रशिशुं, सिंहशावकमित्यर्थः । हरिः हरिणेश-

बलानुयातं चिरन्तनैः अमात्यैः अनुरक्तैश्च महासामन्तैः कृत्वा साभिसारम् उत्तरापथं प्राहिणोत्।

(२) प्रयान्तञ्च तं देवो हर्षः कतिचित्प्रयाणकानि तुरङ्गमैः अनुवव्राज। प्रविष्टे च (३) कैलासप्रभाभासिनीं ककुभं भ्रातरि, वर्त्तमानो नवे वयसि विक्रमरसानुरोधिनि (४) केसरिशरभशार्दूलवराहबहुलेषु तुषारशैलोपकण्ठेषु (५) उत्कण्ठ-

---

किशोरं हरिणान् हन्तुं यथा प्रहिणोति तथा राजा राज्यवर्द्धनं कृष्णान् हन्तुं प्राहिणोदित्यन्वयः। इह हकाररेकारणकारादीनाम असकृदावृत्त्या वृत्त्यनुप्रासः, पूर्णोपमालङ्कारश्च। अपरिमितबलानुयातम्—अपरिमितैः,—प्रभूतैः, बलैः,—सैनिकैः, सामर्थ्यैश्च, अनुयातम्—अनुगतम्। चिरन्तनैः,—प्राचीनैः, मूलागतैरित्यर्थः। "सेवकान्ने पुरातने" इत्यादिभिर्निरतिशयविश्वासपात्रैः इति भावः। अनुरक्तैः,—स्वामिनि अनुरागवद्भिः। महासामन्तैः,—सामन्तप्रधानैः। साभिसारं—ससहायमित्यर्थः। ["साभिसारम्" इत्यत्र "साभिसरम्" इति पाठेऽपि स एवार्थः; यद्वा,—तैः सानुचरं, सम्राट्सुतत्वात् सामन्तैः सेवकैरिवानुसृतम्]। उत्तरापथम्—उत्तरदिक्स्थप्रदेशविशेषम्। प्राहिणोत्—प्रेषयामास।

(२) प्रयान्तं—गच्छन्तं, रणायेति शेषः। प्रयाणकानि—पथः। अनुवव्राज—अनुजगाम; निर्मलसौभ्रात्रभावात् प्रवासगमनप्रवृत्ते प्रियजने कियत्पथं तदनुसरणस्य लोकाचारसिद्धत्वाच्च इति भावः।

(३) कैलासेति।—कैलासस्य—तदाख्यस्य अद्रेः, प्रभया—कान्त्या, भासते—द्योतते इति तथोक्ता तां, ककुभं—दिशम्। भ्रातरि—राज्यवर्द्धने। नवे वयसि—प्रथमयौवने इत्यर्थः। विक्रमरसानुरोधिनि—विक्रमे—शौर्ये, यो रसः,—अनुरागः, तत्पाह इति यावत्, तम् अनुरुध्यते—अनुसरति इति तथाभूते, यौवनकालस्वभावात् विक्रमरसानन्दिनीत्यर्थः।

(४) केसरीति।—केसरिणः,—सिंहाः, शरभाः,—अष्टापदमृगाः, शार्दूलाः,—व्याघ्राः, वराहाः,—शूकराः, तैः बहुलेषु—आकीर्णेषु; यद्वा,—ते बहुलाः,—प्रभूता येषु तथोक्तेषु, दुर्गमस्थानादौ तेषां प्राचुर्यात् इति भावः, तुषारशैलोपकण्ठेषु—हिमाद्रिसन्निधिषु।

(५) उत्कण्ठेति।—उत्कण्ठमानानां—तादृशशोभनाकृतिवीरपुरुषदर्शनेन

मानवनदेवताकटाक्षांशुशारितशरीरकान्तिः क्रीडन् मृगयां मृगलोचनः कतिपयानि अहानि बहिरेव व्यलम्बत। चकार च (६) आकर्णान्ताकृष्टकार्मुकनिर्गतभासुरभल्लवर्षी स्खल्पीयोभिः एव दिवसैः निःश्वापदानि अरण्यानि।

एकदा तु (७) वासन्त्याः तुरीये यामे प्रत्युषसि एव स्वप्ने चटुलज्वालापुञ्जपिञ्जरीकृतसकलककुभा दुर्निवारेण दवहुतभुजा दह्यमानं केसरिणम् अद्राक्षीत्। तस्मिन् एव च दावदहने (८) समुत्सृज्य शावकान् उत्प्लुत्य च आत्मानं पातयन्तीं सिंहीम् अपश्यत्। आसीच्च अस्य चेतसि,—

उत्कलिकावतां, तद्दर्शनमात्रेण अनुरागोदयात् दर्शनोत्सुकानां इत्यर्थः, वनदेवतानां—वनाधिष्ठातृदेवीनां, कटाक्षाः,—सानुरागतिर्यग्वलोकितानि, तेषाम् अंशुभिः,—मयूखैः, शारिता—चित्रिता, शरीरकान्तिः,—देहलावण्यं यस्य तथाभूतः। मृगलोचनः,—हरिणायतरम्यनयनः, हर्ष इति भावः। व्यलम्बत—विलम्बं कृतवान्।

(६) आकर्णेति।—कर्णान्तात् आ आकर्णान्तं—कर्णसमीपपर्यन्तम्, ["आङ्—" (२।१।१३ पा०) इत्यादिना अव्ययीभावः] आकृष्टात्—आच्छिन्नात्, कार्मुकात्—धनुषः, निर्गतान्—निःसृतान्, भासुरान्—प्रदीप्तान्, शाणितत्वात् इति भावः, भल्लान्—तदाख्यास्त्रविशेषान्, वर्षति—मुञ्चतीति तथाभूतः। स्वल्पीयोभिः,—अत्यल्पैः। निःश्वापदानि—श्वापदरहितानि, अत्यन्तसन्धानत्वात् हिंस्रजन्तुशून्यानीत्यर्थः।

(७) वासन्त्याः,—वसन्तः,—रात्रिरेव वासन्ती, [तत्र साधुः इत्यर्थे "पथ्यतिथि—" (४।४।१०४ पा०) इत्यादिना ठञ्प्रत्ययः] तस्याः, ("वसन्तो रात्रिवेश्मनोः" इत्यमरः)। तुरीये—चतुर्थे, यामे—प्रहरे। प्रत्युषसि—प्रभाते। चटुलेति।—चटुलानां—चञ्चलानाम्, इतस्ततः सञ्चरन्तीनामित्यर्थः, ज्वालानां—शिखानां, पुञ्जैः,—समूहैः, पिञ्जरीकृताः,—पिङ्गलीकृताः, सकलाः,—समस्ताः, ककुभः,—दिशः येन तथाभूतेन। दुर्निवारेण—निवारयितुमशक्येन, अनिर्वापणीयेन इत्यर्थः। दवहुतभुजा—दावाग्निना। केसरिणं—सिंहम्; एतेन पितुर्गोवदाहरूपो व्याधिः सूचितः, प्रत्युषकालिकस्वप्नानां प्रायशः निरर्थकत्वाभावात्।

(८) समुत्सृज्य—परित्यज्य। उत्प्लुत्य—उल्लम्फ्य। पातयन्तीं—निक्षिपन्तीम्, अनुरागाधिक्यादिति भावः; एतेन अस्य मातृरक्षिप्रवेशः सूचितः।

(९) "लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः, यदाकृष्टाः तिर्य्यञ्चोऽपि एवम् आचरन्ति" इति। (१०) प्रबुद्धस्य च अस्य मुहुर्मुहुः दक्षिणेतरम् अक्षि पस्पन्दे; गात्रेषु च अकस्मादेव वेपथुः विपप्रथे; निर्निमित्तम् एव अन्तर्बन्धनस्थानात् चचाल इव हृदयम्; अकारणादेव च अजायत गरीयसी दुःखासिका। किमिदमिति च (११) समुत्पन्नविविधविकल्पविमथितमतिः अपगतधृतिः चिन्ताऽवनमितवदनः स्तिमिततारकेण चक्षुषा (१२) समुज्झियमानस्थलकमलिनीवनामिव चकार चकोरेक्षणः क्षणं क्षौणीम्। अक्षि च तस्मिन् शून्येन एव च चेतसा चिक्रीड मृगयाम्।

(९) लोके—जगति, संसारे इत्यर्थः। कठिनतराः,—अतिकठिनाः। स्नेहमयाः,—स्नेहात्मकाः। बन्धनपाशाः,—बन्धनरज्जवः। यदाकृष्टाः,—यैः,—पाशैः, आकृष्टाः,—नियन्त्रिताः, तिर्य्यञ्चः,—पशुपक्ष्यादयः। एवम्—अग्निप्रवेशेन आत्मत्यागरूपं व्यवसायमिति भावः।

(१०) प्रबुद्धस्य—जागरितस्य। दक्षिणेतरं—वामम्, अक्षि—नेत्रम्। पस्पन्दे—पुस्फोर। वेपथुः—कम्पः। विपप्रथे—प्रचकाट, आविरभूदित्यर्थः, निर्निमित्तम्—अहेतुकम्। अन्तरिति।—अन्तः,—दृढाभ्यन्तरे इत्यर्थः, यत् बन्धनस्थानं—संयमनस्थानं, हृदयस्येति भावः, तस्मात्। चचाल—चकम्पे, हृत्कम्पः जात इत्यर्थः। गरीयसी—अतिगुर्वी। दुःखासिका—दुःखेन अवस्थानम्; प्राकृतिकारत्वाविर्भावात्, निस्त्रिंशप्राया अरुन्तुदा शोकसन्ततिर्वा।

(११) समुत्पन्नेति।—समुत्पन्नेन—आविर्भूतेन, विविधेन—नानाप्रकारेण, विकल्पेन—संशयेन, विमथिता—आलोडिता, मतिः,—बुद्धिर्यस्य तथाभूतः। अपगतधृतिः,—अधीरः, शुभमशुभं वा इति निर्णेतुमशक्यत्वात् इति भावः। चिन्तेति।—चिन्तया—दुर्भावनया, अवनमितम्—अधःकारितं, वदनं—मुखं येन तथाभूतः। स्तिमिततारकेण—निश्चलकनीनिकेन।

(१२) समुज्झियमानेति।—समुज्झियमानं—विकासं गच्छत्, स्थलकमलिनीवनं—स्थलपद्मिनीकाननं यस्यां तामिव। चकोरेक्षणः,—चकोरनेत्रः, स्वाभाविकारुण्यात् इति भावः। क्षौणीं—पृथ्वीम्।

(१३) आरोहति च हरितहये मध्यमङ्को भवनम् आगत्य उभयतो मन्दमन्दं संवाह्यमाननतुतालवृन्तः क्षितितलविनताम् (१४) अतिशिशिरमलयजरसलवलुलितवपुषम् इन्दुधवलोपधान-धारिणीं वेत्रपीठिकाम् अधिशयानः साश्रङ्क एव तस्थौ।

(१५) अथ दूरादेव लेखगर्भया नीलीरागमेचककचा चीरचीरिकया रचितमुण्डमालकं, (१६) श्रमातपाभ्याम् आरोप्यमाणकायकालिमानम्, अन्तर्गतेन शोकाग्निना अङ्गा-

(१३) हरितहये—हरिदश्वे, सूर्ये इत्यर्थः, अङ्कः,—दिवसस्य, मध्यः,—मध्यभागः तम्, आरोहति—उत्पतति, मध्याह्ने जाते इत्यर्थः। उभयतः,—उभयोः पार्श्वयोरित्यर्थः। संवाह्यमानेति।—संवाह्यमानं—संवीज्यमानं, किङ्करादिभिः इति भावः, तनु—स्वल्पं, क्षुद्रमित्यर्थः, मन्दं मन्दं यथा स्यात्तथा वा, तालवृन्तं—व्यजनं यस्य तथाभूतः। क्षितितलविनतां—पृथ्वीतलविश्रान्ताम्।

(१४) अतिशिशिरेति।—अतिशिशिरेण—अतिशीतलेन, मलयजरसस्य—चन्दनद्रवस्य, लवेन—बिन्दुना, लुलितं—लिप्तं, वपुः,—अवयवः यस्यां तथोक्ताम्। इन्दुधवलेति।—इन्दुः,—चन्द्रः, तद्वत् धवलं—शुभ्रम्, उपधानं—शिरःस्थापनीपयोगितूलपूर्णद्रव्यविशेषः, उपबर्हः इत्यर्थः, तत् धरतीति ताम्, तद्विशिष्टामित्यर्थः, वेत्रनिर्मितशयनसाधनविशेषं, "शीतलपाटी" इति समाख्यया बङ्गदेशे प्रसिद्धाम्। साश्रङ्कः,—सोद्वेगः।

(१५) "अथ" इत्यादौ "दूरादेव···कुरङ्गकनामानम् आयान्तम् अद्राक्षीत्" इति अग्रेण सम्बन्धः। तं विशिनष्टि, लेखगर्भयेत्यादिभिः।—लेखगर्भया—अन्तर्गतलिप्त्या। नीलीति।—नीलीरागः,—नीलवर्णः; यद्वा,—नीली—"नील" इति प्रसिद्धः क्षुपविशेषः, तया रागः,—रञ्जनं, तेन तद्वद्वा मेचका—श्यामला, मयूरकण्ठाभा इत्यर्थः, ("कृष्णे नीलासितश्यामकालश्यामलमेचकाः इत्यमरः) कृक्—कान्तिः यस्याः तया, चीरचीरिकया—वसनखण्डेन। रचितेति।—रचितं—कृतं, मुण्डमालं—शिरोमाला, शिरोवेष्टनमित्यर्थः, येन तम्।

(१६) श्रमेति।—श्रमेण—आयासेन, आतपेन—रौद्रेण च। आरोप्यमाणेति।—आरोप्यमाणः,—उत्पाद्यमानः, कायस्य—देहस्य, कालिमा—कालौ यस्य तम्। अन्तर्गतेन—हृदयस्थेन, शोकाग्निना, अङ्गा-

रतामिव नीयमानम्, (१७) अतित्वराऽऽगमनद्रुततरपदोद्भूयमानधूलिराजिव्याजेन राजवार्त्ताश्रवणकुतूहलिन्या मेदिन्या इव अनुगम्यमानम्, (१८) अभिमुखपवनप्रेङ्खत्प्रविततोत्तरीयपटप्रान्तवीज्यमानोभयपार्श्वम् अतित्वरया कृतपक्षम् इव आशु परापतन्तं, प्रेर्यमाणम् इव पृष्ठतः स्वाम्यादेशेन, क्षुण्यमाणम् इव पुरस्तात् आयतैः श्रमश्वासमोक्षैः, (१९) स्विद्यल्ललाटतटघटमानप्रतिबिम्बकेन कार्य्यकौतुकात् अपक्रियमाणलेखमिव भास्वता, सम्भ्रमभ्रष्टैः इव इन्द्रियैः शून्यीकृतशरीरं,

---

रतामिव—अलातकृतामिव, नीयमानं—प्राप्यमाणं, सन्तापातिरेकस्य जायमानत्वात् कृष्णवर्णदेहभ्रममिति भावः।

(१७) अतीति।—अतित्वरया—अतिवेगेन, आगमनम्—आगतिः, तस्मिन् द्रुततरेण—अतिशीघ्रेण, शीघ्रनिक्षिप्तेनेत्यर्थः, पदेन—पदक्षेपेण, उद्भूयमाना—उत्क्षिप्यमाणा, या धूलीनां—रजसां, राजिः,—श्रेणी, समूह इत्यर्थः, तद्व्याजेन—तन्निषेण, राजवार्त्ताश्रवणकुतूहलिन्या—राज्ञः प्रभाकरवर्द्धनस्य संवादाकर्णनौत्सुक्यवत्या, मेदिन्येव—पृथिव्येव, क्षितिपतित्वात् राजपत्नीव इति भावः, अनुगम्यमानम्—अनुक्षिप्यमाणम्।

(१८) अभिमुखेति।—अभिमुखपवनेन—सम्मुखागतेन वायुना, प्रेङ्खत्—चलत्, प्रविततस्य—सुविस्तृतस्य, उत्तरीयपटस्य—उत्तरीयवसनस्य, यः प्रान्तः,—पर्य्यन्तभागः, तेन वीज्यमानौ—प्राप्तवीजनौ, उभयौ—द्वौ, पार्श्वौ—कक्षयोरधोभागौ यस्य तम्; अत एव कृतपक्षं—जनितगरुत्तमिव। परापतन्तम्—आपतन्तम्। प्रेर्यमाणमिव—प्रेष्यमाणमिव। स्वाम्यादेशेन—प्रभुनियोगेन। पुरस्तात्—अग्रतः, आयतैः,—दीर्घैः, श्रमश्वासमोक्षैः,—परिश्रमजनितनिश्वासमोचनैः, अविश्रमभावने तथैव सञ्चारात् इति भावः।

(१९) स्विद्यदिति।—स्विद्यत्सु—घर्म्मार्द्रेषु, ललाटतटेषु—भालदेशेषु, घटमानं—पतत्, प्रतिबिम्बं—प्रतिरूपं यस्य तथाभूतेन, भास्वता—सूर्य्येण, कार्य्यकौतुकात्—केन कार्य्यानुरोधेन अयमीदृक् द्रुततरं गच्छति इति ज्ञातुमौत्सुक्यात्, अपक्रियमाणा—क्षीयमाणा, लेखा—लिपिः यस्मात् यस्य वा तम्; ("लेखा लिपिराजिरयोरपि इति मेदिनी)। सम्भ्रमभ्रष्टैरिव—सम्भ्रमः,—कार्य्यव्यग्रता, तेन भ्रष्टानि—

(२०) लेखार्पितप्रयोजनगौरवात् इव समेऽपि वर्त्मनि शून्यहृदयतया स्खलन्तं, कालमेघशकलम् इव पतिष्यतो दुर्वार्त्तावज्रस्य, धूमपल्लवम् इव ज्वलिष्यतः शोकज्वलनस्य, बीजम् इव फलिष्यतो दुष्कृतशालेः, अनिमित्तभूतदीर्घाध्वगं कुरङ्गकनामानम् आयान्तम् अद्राक्षीत् ।

दृष्ट्वा च (२१) पूर्वानिमित्तपरम्पराऽऽविर्भूतभीतिः अभिहतेन हृदयेन । कुरङ्गकस्तु कृतप्रणामः समुन्मृत्य प्रथमम्

च्युतानि तैरिव, इन्द्रियैः,—इन्द्रपदादिभिः । शून्यीकृतमिति ।—शून्यीकृतं—विरहितमित्यर्थः, शरीरं—देहः यस्य तथोक्तम् ; महाऽऽपदि तथैव वैकल्यीत्पत्तेः इति भावः ।

(२०) लेखेति ।—लेखे—पत्रिकायाम्, अर्पितस्य—लिखितस्य, प्रयोजनस्य—कार्यस्य, गौरवं—गुरुत्वं तस्मादिव । समे—समतले, अवन्धुरे इत्यर्थः, अपि वर्त्मनि—पथि । शून्यहृदयतया—विमनस्कतया, महाराजामङ्गलाशङ्कयेति भावः । स्खलन्तं—पतन्तम् । कालमेघशकलमिव—कृष्णवर्णमेघखण्डमिव, प्रलयकालिनसंवर्त्तादिबलाहकखण्डमिव वा । दुर्वार्त्तावज्रस्य—दुः,—दुष्टा, कठिना इत्यर्थः, वार्त्ता—संवादः एव, वज्रम्—अशनिः तस्य [वज्रधातोः "ऋजेन्द्राग्र—" (उ० २ पा० २८ सू०) इत्यादिना रनि रूपम्]। धूमपल्लवमिव—धूमनिचयमिव । शोकज्वलनस्य—शोकाग्नेः । फलिष्यतः,—फलं प्रसविष्यमाणस्य, दुष्कृतशालेः,—दुःखब्रीहिभेदस्य, दुर्दैवधान्यविशेषस्य वा, त्वरितफलाविर्भावबीधनार्थं शालेरौपम्यम् । अनिमित्तभूतदीर्घाध्वगं—दुर्निमित्तसूचकं दीर्घपथिकम् ; यद्वा,—अनिमित्तभूतं—दुर्निमित्तरूपं, दीर्घम्—आयतम्, अध्वानं—पन्थानं गच्छतीति तथोक्तम् ; विशिष्टामङ्गलसम्भावनाव्यतिरेकेण ईदृशदीर्घाध्वागमनप्रयोजनाभावात् इति भावः ।

(२१) पूर्वेति ।—पूर्वाभ्यः,—प्रागनुभूताभ्यः, अनिमित्तपरम्पराभ्यः,—दुर्लक्षणसमूहेभ्यः, दुःस्वप्नदर्शनादिरूपेभ्यः इति भावः, ["पूर्वानिमित्त—" इत्यत्र "पूर्वनिमित्त—" इति पाठे,—पूर्वेषां—पूर्वदृष्टानां, निमित्तानां—हेतूनां, दुःस्वप्नादिदुर्निमित्तसूचकानामिति भावः] आविर्भूता—सञ्जाता, भीतिः,—भयं यस्य तथाभूतः, ["—आविर्भूत—" इत्यत्र "—आविर्भावित—" इति पाठान्तरम् ; तत्र पूर्वनिमित्तपरम्पराभिः कर्त्रीभिः आविर्भाविता—सञ्जनिता, भीतिः यस्य तादृशः] हृदयेन अभिहत—भग्नहृदयोऽभूदित्यर्थः, दूतस्य व्यसनिनवेशदर्शनात् इति भावः ।

आननलग्नं विषादम् उपनिन्ये, पत्रलेखम्। तच्च देवो हर्षः स्वयमेव आदाय अवाचयत्। लेखार्थेन एव च समं गृहीत्वा हृदयेन सन्तापम् अवग्रहरूपोऽभ्यधात्,—"कुरङ्गक! किं मान्द्यं तातस्य?" इति। (२२) स चक्षुषा वाष्पजलबिन्दुभिः, मुखेन च अस्खलाक्षरैः स्खरङ्गैः युगपत् आचचक्षे,—"देव! दाहज्वरो महान्" इति। तच्च आकर्ण्य सहसा सहस्रधा इव अस्य हृदयं पफाल।

आननलग्नं—स्ववदनसंसक्तं, वदनवैक्लव्येन सूचितमिति यावत्। उपनिन्ये—अर्पितवान्, राजकुमारमिति शेषः, स्वाननीयविषादस्य अन्यार्पणासम्बन्धेऽपि तत्सम्बन्धकथनादतिशयोक्तिः। लेखं—पत्रम्। अवाचयत्—अपाठयत्, परिजनेनेति शेषः; अमङ्गलाशङ्कया मतिवैकल्यात् स्वयं पठितुमसमर्थतया, राज्ञां तथाऽऽचारत्वेन वा इति भावः; यद्वा,—आदाय स्वयम् अवाचयत्—पिहसंवादत्वेन अपठत् इत्यर्थः, वाचयतेः स्वार्थिकणिजन्तस्य पठनार्थकत्वात्, अन्यथा महाराजामन्मानलाघवापनात् गौरवप्रदर्शनव्याघातः स्यात् इति ध्येयम। लेखार्थेन—लिखितवृत्तान्तेन, समं—सह। अवग्रहरूपः,—वर्षप्रतिबन्धरूपः, अवग्रहो यथा प्रश्नोत्पत्तिविघातकरत्वात् प्रजानां शोकराशिमादाय समुदेति, तथा अयमपि सन्तापसन्ततिः आमोद इत्यस्यावग्रहरूपत्वं ध्येयम्; यद्वा,—लक्षितालक्तिः, ["अवग्रहो हास्तिरोधे प्रतिबन्धे गजालिके" इति मेदिनी। अवपूर्वकाद् ग्रहधातोः"आकोशे—"(३।३।४५ पा०) इत्यादिना अनाक्रोशार्थे घञो बाधात् "ग्रहह—" (३।३।५८ पा०) इत्यादिना अपि रूपम्, हस्तिविघातार्थकस्तु "अव—" (३।३।५१ पा०) इत्यादौ विभाषाग्रयणात् इति ध्येयम्]। मान्द्यं—दैहिकम् अस्वाच्छन्द्यम्, अकुशलमित्यर्थः।

(२२) सः,—कुरङ्गकः। वाष्पजलबिन्दुभिः,—नेत्रजलपृषतैः; अत्र वाष्पपदेनैव चक्षुर्जलार्थावबोधात् पुनर्जलपदोपादानमधिकमेवेति अधिकपदत्वाख्यदोषः, "चक्षुषा जलबिन्दुभिः" इत्यनेनैव गतार्थत्वादिति ध्येयम्। अस्खलाक्षरैः,—अभग्नाक्षरैः, स्पष्टाक्षरैः इत्यर्थः। ["अस्खलाक्षरैः" इत्यत्र "स्वस्खाक्षरैः" इति पाठे,—भग्नाक्षरैः, शोकवशात् अस्पष्टाक्षरैरित्यर्थः] स्खरङ्गैः,—स्खलद्भिः, अन्तरान्तरा भङ्गमापद्यद्भिः, शोकजबाष्पावरोधेन गद्गदकण्ठतया इति भावः। अस्य—हर्षस्य। पफाल—पुस्फोट, विददारेत्यर्थः।

कृताचमनश्च (२३) जनयितुः आयुष्कामोऽपरिमितमणि-कनकरजतजातमात्मपरिवर्हम् अग्रेषं ब्राह्मणसात् अकरोत्, (२४) अभुक्त एव उच्चचाल। "दापय वाजिनः पर्य्याणम्" इति च पुरःस्थितं शिरःक्षपाणं बिभ्राणं बभाण युवानम्। (२५) वेपमानहृदयश्च समभ्रमप्रधावितपरिवर्हकोपनीतम् आरुह्य तुरङ्गमम् एकाकी एव प्रावर्त्तत।

(२६) अकाण्डप्रयाणसंज्ञाशङ्खक्षुभितन्तु सम्भ्रमात् सज्जीभूतम् उद्भूतमुखरखुररवभरितसकलभुवनविवरम् आगत्यागत्य सर्व्वाभ्यो दिग्भ्यो धावमानम् अश्वीयम् अढौकत।

(२३) जनयितुः,—पितुः। आयुष्कामः,—जीविताकाङ्क्षी। अपरिमितेति। —अपरिमितानि—असङ्ख्यानि, मणयः,—रत्नानि, कनकानि—काञ्चनानि, रजतानि,—रौप्याणि, तेषां जातं—समूहम्; आत्मनः,—स्वस्य, परिवर्हं—परिच्छदम्, अश्वोपकरणभूतमिति यावत्। अग्रेषं—समग्रम्। ब्राह्मणसात्—विप्रदेयं, ब्राह्मणाधीनमित्यर्थः।

(२४) अभुक्त एव—असम्पन्नान्नपानादिक्रिय एव। उच्चचाल—गन्तुमियेष इत्यर्थः। दापय—परिधापय। वाजिनः,—अश्वस्य। पर्य्याणं—पल्ययनम्। शिर इति। —शिरसि—मूर्द्ध, क्षपाणम्—असिं, निहितमिति भावः, बिभ्राणं—धारयन्तम्; प्रभुनिर्देशाकर्णने शस्त्रिणां तदाचारत्वात् इति भावः। बभाण—उवाच।

(२५) वेपमानहृदयः,—कम्पमानचित्तः। समभ्रमेति।—ससम्भ्रमं—सत्वरं, प्रधावितः,—प्रचलितः, परिवर्हकः,—अश्वपालः, तेन उपनीतः,—उपस्थापितः तम्। एकाकी एव—असहाय एव। प्रावर्त्तत—प्रचक्रमे, गन्तुम् इति शेषः।

(२६) अकाण्डेति।—अकाण्डे—असमये, सहसा इत्यर्थः, प्रयाणं—यात्रा, प्रत्यावर्त्तनमिति यावत्, तस्य संज्ञा—सूचना, ("संज्ञा स्यात्सूचना नाम हस्तादेश्चार्थसूचना" इत्यमरः) तस्यै शङ्खः,—शङ्खनाद इत्यर्थः, तेन क्षुभितं—समाकुलितम्। सम्भ्रमात्—आवेगात्, उद्वेगाद्; सज्जीभूतं—कृतसज्जम्। उद्भूतेति।—उद्भूतेन—उद्गतेन, मुखरेण—उच्चैः प्रसृतेन इत्यर्थः, खुराणाम्—अश्वशफानां, रवेण—नादेन, भरितम्—आपूरितं, सकलं भुवनानां—जगतां, विवरम्—अन्तरालं येन यस्य वा तथाभूतं, सर्वाभ्यः,—चतसृभ्य इत्यर्थः। अश्वीयम्—अश्वानां समूहः अश्वीयम्—

(२७) प्रस्थितस्य च अस्य प्रदक्षिणेतरं प्रयान्तो विनाशम् उपस्थितं राजसिंहस्य हरिणाः प्रकटयाम्बभूवुः। (२८) अग्निशिखरशिखमण्डलाभिमुखस्य हृदयम् अवदारयन् इव दावशुष्के दारुणि दारुणं रराण वायसः। (२९) कज्जलमय इव बहुदिवसम् उपचितबहलमलपटलमलिनिततनुः अभिमुखम् आजगाम शिखिपिच्छलाञ्छनो नग्नाटकः।

अश्वसेनाहृन्द, समादिकं, स्वयङ्गमाप्रासङ्गात् इति भावः, सन्मार्गेनयनात् तेभ्यो हितम्, अश्वारोहिसैन्यमित्यर्थो वा, ["तस्य समूहः" (४।२।३७ पा०) "तस्मै हितम्" इत्यर्थे छविधानात् इति ज्ञेयम्]। अढौकत—अनुययौ, तमिति शेषः।

(२७) प्रस्थितस्य—प्रचलितस्य। अस्य—हर्षस्य। प्रदक्षिणेतरम्—अप्रदक्षिणं यथा तथा, वामभागेन इति यावत्, प्रयान्तः,—गच्छन्तः। राजसिंहस्य—राजश्रेष्ठस्य, ("स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥" इत्यमरः) ; यद्वा,—राजा सिंह इव, राजेव सिंहस्य तस्य, हरिणाः, —मृगाः ; हरिणा हि अरण्ये उद्धतं चरन्तः तटस्थस्य सिंहाभाववत्त्वं सूचयन्ति। प्रकटयाम्बभूवुः,—सूचयामासुः ; उक्तञ्च,—"वामे शवशिवाकुम्भा दक्षिणे गोमृगद्विजाः" इति।

(२८) अग्निशिखरेति।—अग्निशिखराः,—उष्णाः, रश्मयः,—किरणाः यस्य तस्य, सूर्यस्येत्यर्थः, मण्डलं—बिम्बं, तदभिमुखः,—तल्लक्ष्यीकृत्य उपविष्ट इत्यर्थः। अवदारयन्—विदारयन्, व्यथयन्निति यावत् ; ताडृशवायसानामङ्गलसूचकत्वादिति भावः। दावशुष्के—वनाग्निना दग्धावशिष्टे इति यावत्, दारुणि—वृक्षावयवे, स्थित इति शेषः। दारुणं—अतिकठोरं यथा तथा, रराण—दध्वान ; एतस्य दुर्लक्षणत्वसूचकं वराहसिंहरिण ; यथा,—"छिन्नाग्रेऽङ्गच्छेदः कलहः शुष्कद्रुमस्थिते ध्वाङ्क्षे" इति।

(२९) कज्जलमय इव—अञ्जनमय इव। उपचितेति।—उपचितेन—सञ्चितेन, अङ्गमलेषु जीवानां सञ्चारसम्भावनया जैनशासनरतानां तत्क्षालननिषेधादिति भावः, बहलेन—प्रभूतेन, मलपटलेन—किट्टनिचयेन, मलिनिता—सञ्जातमला, तनुः, —शरीरं यस्य तथाभूतः। शिखीति।—शिखिनः,—मयूरस्य, पिच्छं—बर्हं, लाञ्छनं —चिह्नं यस्य तथाभूतः। नग्नाटकः,—नग्नः,—विवसनः मन्, अटति—भ्रमतीति तथोक्तः, नग्नत्वपक्षे इत्यर्थः, दिगम्बरबौद्धसंन्यासीति यावत्। अहिंसा परमं धर्मं वदद्भिः बौद्धैः शरीरकीटविनाशशङ्कया न शरीरसंस्कारः क्रियते, मयूरपिच्छलक्षणेन

(३०) दुर्निमित्तैः अनभिनन्द्यमानगमनश्च नितराम् अशङ्कत। हृदयेन पितृस्नेहाहितस्नेहिना च तत्तदुपेक्षमाणः, (३१) तुरङ्गमस्कन्धवल्गल्लक्ष्यं चक्षुः अविचलं दधानः, समवसितहसितसङ्कथः, (३२) तूष्णीम्भूतेन भूपाललोकेन अनुगम्यमानो (३३) बहुयोजनमभ्यर्णितम अध्वानम् एकेन एव अह्ना समलङ्घयत्।

(३४) उपलब्धनरेन्द्रमान्द्यवार्त्ताविषण्ण इव नष्टतेजसि

व्यजनेन च पांथ आकार्ण च सञ्चारिणः कोटा अपसार्यन्ते आघातीषाश्वासादिभ्यः तन्नाशभयात् इति प्रसिद्धिः, तेषाञ्च दर्शने दुर्लक्षणत्वमुक्तम् ; यथा,—"नग्नंसकव्यङ्गनग्नमुक्तकच्छसिताम्बराः। प्रस्थाने वा प्रवेशे वा नेष्यन्ते दर्शनं गताः॥" इति।

(३०)दुर्निमित्तैः,—पूर्वोक्तैः वामगहरिणादिभिः दुर्लक्षणैः, अनभिनन्द्यमानम्—अप्रशस्यमानम्,अनादृियमाणमिति यावत्, गमनं यस्य तथाभूतः,गत्वा किं द्रक्ष्यामि ? किं श्रोष्यामि ? अथवा अस्मच्छून्य एव समये कदाचित् अनर्थपातः घटेत, तर्हि किं मुखं दर्शयामः अम्बायाः ? इति विचिन्त्य मन्दात्साहगतिक इत्यर्थः। नितराम्—अतिशयेन। पितरि—जनके, स्नेहः,—भक्तिविशेषः, तेन आहितः,—जनितः, स्नेहसा—मार्दवं यस्य तेन, जनकस्नेहाकुलेन इति भावः। तत्तत्—दुर्निमित्तजातमित्यर्थः, उपेक्षमाणः,—अगणयन्।

(३१) तुरङ्गमेति।—तुरङ्गमस्य—स्ववाहनस्य, स्कन्धे—गलदेशे एव, वल्गु—लग्नमित्यर्थः, लक्ष्यं—दृष्टिविषयं यस्य तथोक्तम्। अविचलं—स्थिरं, चक्षुः,—नेत्रं, दृष्टिमित्यर्थः, दधानः,—धारयन्। समवसितेति।—समवसिता—अवसानं गता, ["समवसित—" इत्यत्र "दुःसमवसित—"इति पाठे,—"दुः,—दुःखात्, समवसिता इत्यर्थः] हसितेन—हास्येन सह, सङ्कथा—आलापः यस्य सः।

(३२) तूष्णीम्भूतेन—मौनिना, सहादृभावनया विच्छृतान्यावेशेन इति भावः।

(३३) बहुयोजनेति।—बहुभिः,—अनेकैः, योजनैः,—क्रोशचतुष्टयैः, ("स्याद् योजनं क्रोशचतुष्टयेन" इति लीलावती) सम्भिण्डितं—सम्बद्धं, पूर्णमिति यावत्, गुणितं वा, बहुयोजनविस्तृतमित्यर्थः। अह्ना—दिवसेन ["अपवर्गे तृतीया" (२।३।६ पा०) इति तृतीया]। समलङ्घयत्—अतिचक्राम।

(३४) उपलब्धेति।—उपलब्धया—विदितया, नरेन्द्रस्य—राज्ञः, मान्द्य-

अधोमुखीभवति भगवति भानुमति भण्डिप्रमुखेण प्रणयिना राजपुत्रलोकेन बहुशो विज्ञाप्यमानोऽपि न आहारम् अकरात्। (३५) पुरःप्रवृत्तप्रतीहारघट्टमानग्रामीणपरम्पराप्रकटितप्रगुणवर्त्मा च वहन्नेव निन्ये निशाम्।

(३६) अन्यस्मिन् अहनि मध्यन्दिने विगतजयशब्दम्, अस्तमिततूर्य्यनादम्, उपसंहृतगीतम्, उत्सारितोत्सवम्, अप्रगीतचारणम्, (३७) अप्रसारितापणपण्यं, स्थानस्थानेषु पवन-

---

वार्त्या—अकुशलसंवादेन, विषण्ण इव—विषादं गत इव, व्यथित इव इत्यर्थः। नष्टतेजसि—मन्दप्रभे, स्वानुरक्तसेवकक्लेशस्मरणात् इति भावः। अधोमुखीभवति—पश्चिमाशामवतरतीत्यर्थः। भानुमति—सूर्य्ये। भण्डिप्रमुखेण—भण्डिप्रभृतिना। विज्ञाप्यमानोऽपि—अनुरुध्यमानोऽपि, प्रणयप्राचुर्य्यात् सहचराचारनियमवत्त्वात् वा इति भावः।

(३५) पुर इति।—पुरः,—अग्रतः, प्रवृत्तेन—प्रचलितेन, प्रतीहारेण—द्वौवारिकेण, घट्टमानाः,—म्रियमाणाः, पथिज्ञानार्थमाहूय आनीयमाना इत्यर्थः, या ग्रामीणपरम्पराः,—ग्रामवासिगणाः, त्वमेतस्माद् ग्रामात् अयवस्तिग्रामपर्य्यन्तं पन्थानं प्रदर्शय, त्वमप्येतस्मात् पुरःस्थग्रामपर्य्यन्तमित्येवरूपेण आदिश्यमानप्रतिग्रामस्थजना इति भावः, ताभिः प्रकटितं—प्रदर्शितं, प्रगुणं—सहजं सुगमञ्च, ("ऋजावजिह्मप्रगुणौ" इत्यमरः) वर्त्म—पन्थाः यस्य तथाभूतः सन्। वहन्नेव—अविश्रान्तं चलन्नेव, पितृपाददर्शनौत्सुक्येन इति भावः।

(३६) "अन्यस्मिन्" इत्यादौ "स्नात्वावारमासमाद" इत्युत्तरेणान्वयः। मध्यन्दिने—मध्याह्ने। स्नात्वावारं विशिनष्टि, विगतेत्यादि।—विगतः,—विरहितः, जयशब्दः,—जयसूचकमङ्गलनिनादः यस्मात् यस्मिन् वा तम, महाविषादात् इत्याशयः। अस्तमितेति।—अस्तमिताः,—अस्तं गताः, नष्टा इत्यर्थः, तूर्य्याणां—वादिकभेदानां, नादाः,—ध्वनयः यस्मिन् तम्। उपेति।—उपसंहृतानि—त्यक्तानीति यावत्, गीतानि—गानानि यस्मिन् यस्माद्वा तम्। उत्सारितोत्सवम्—अपनीतानन्दम्। अप्रगीतचारणं—प्रकृष्टं गीतं येषां ते प्रगीताः, न सन्ति प्रगीताः अप्रगीताः,—अकृतसङ्गीता इत्यर्थः, चारणाः,—कुशीलवाः, नटा इति यावत्, यस्मिन् तम्।

(३७) अप्रसारितेति।—न प्रसारितानि—न विस्तारितानि, आपणेषु—पण्यवीथिकासु, हट्टेषु, इत्यर्थः, ("आपणस्तु निषद्यायां विपणिः पण्यवीथिका"

बलकुटिलाभिः कोटिहोमधूमलेखाभिः उल्लसन्तीभिः(३८)यम-महिषविषाणकोटिभिः इव उल्लिख्यमानं, कृतान्तपाश-वागुराभिः इव वेष्ट्यमानम्, (३९) उपरि कालमहिषा-लङ्कारकालायसकिङ्किणीभिः इव कटु क्वणन्तीभिः दिवसं वायसमण्डलीभिः भ्रमन्तीभिः आवेद्यमानप्रत्यासन्नाशुभं, (४०)क्वचित् प्रतिश्रायितस्निग्धबान्धवाराध्यमानाहिबुध्नं, क्वचित्

इत्यमरः) पक्षाणि—विक्रियवस्तूनि यस्मिन् तम्। पवनेति।—पवनस्य—वायोः, बलेन—वेगेन, कुटिलाः,—भङ्गिमत्यः ताभिः। कोटीति।—कोटिहोमस्य—राज्ञः घोड़ानिहत्यर्थं स्वल्पधनेषु कोटित्वः अनुष्ठितहोमस्य इति भावः, धूमलेखाभिः,—धूमराजिभिः। उल्लसन्तीभिः,—उद्गच्छन्तीभिः।

(३८) यमेति।—यमस्य—कृतान्तस्य, राज्ञो यहणार्थम् आगतस्य, इति भावः, यो महिषः, वाहनभूत इति भावः, तस्य विषाणकोटिभिरिव—शृङ्गाग्रैरिव, उल्लिख्य-मानम्—उद्धृयमाणं, समन्तादाकृष्यमाणमिति यावत्। कृतान्तेति।—कृतान्तस्य—यमस्य, पाशाः,—प्राणिसंयमनार्थं रज्जव एव, वागुराः,—पशुबन्धनजालविशेषाः, [बाधातोः "सङ्कराद्यश्च" (उ० १ पा० ४२ सू०) इति आकृतिगणत्वात् उरचि गुणागमे निपातनात् रूपम्। "वागुरा मृगबन्धनी" इत्यमरः] ताभिः, वेष्ट्यमानमिव —संयम्यमानमिव।

(३९) उपरि—ऊर्ध्वदेशे, अन्तरीक्षे इत्यर्थः। कालेति।—कालस्य—यमस्य, ("शमनो यमराड् यमः। कालो दण्डधरः" इत्यमरः) यो महिषः, तस्य अलङ्काराः, —आभरणरूपाः, याः कालायसकिङ्किण्यः,—कृष्णलौहनिर्मितक्षुद्रघण्टिकाः ताभि-रिव, कटु—श्रुतिविरसं यथा तथा, क्वणन्तीभिः,—रवतीभिः, दिवसं—क्रतुं दिनं व्याप्य इत्यर्थः, भ्रमन्तीभिः,—विचरन्तीभिः, वायसमण्डलीभिः,—काकनिवहैः। आवेद्यमानेति।—आवेद्यमानं—सूच्यमानं, प्रत्यासन्नम—उपस्थितम्, अशुभम्—अमङ्गलं, राजविनाशरूपमिति भावः, यस्मिन् तम्; महोत्पातादौ क्रूरजीवानां स्वयं सङ्गमः समापतनवत्त्वादिति भावः।

(४०) क्वचित्—कुत्रचित विभागे। प्रतिश्रायितेति।—प्रतिश्रायितैः,—कृतोपवासैः इत्यर्थः, स्निग्धैः,—राजनि अनुरक्तैरित्यर्थः, बान्धवैः,—बन्धुजनैः, आराध्य-मानः,—अर्च्यमानः, आरोग्यकामनयेति भावः, अहिबुध्नः,—अहिना शीर्षतः बुध्नः, —शीर्षं, अहेरिव बुध्नो वा यस्य सः, शिवः; सततकण्ठावेष्टितभुजङ्गवत्त्वात् घोर-

(४१) दीपिकादह्यमानकुलपुत्रकप्रसाद्यमानमातृमण्डलं, क्वचित् (४२) मुण्डोपहाराहरणोद्यतद्रविड़प्रार्थ्यमानामर्दकं, क्वचित् (४३) अभ्यर्थ्यमानबाहुवप्रोपयाच्यमानचण्डिकम्,

नीलकण्ठवत्त्वाद्वा इति भावः, यस्मिन् तम् ; मृत्युभये मृत्युञ्जयाराधनस्य शास्त्रीयदृष्टत्वात् इति हृदयम् ; ["—बान्धवाराध्यमानाङ्घ्रिबुध्नम्" इत्यत्र "—बान्धवाराध्यमानाङ्घ्रिबुध्नम्" इति पाठेऽपि स एवार्थः, ("अङ्घ्रिर्बुध्नोऽस्त्रियां मूलं गजादेरिव सद्गदः" इति कोषः)।

(४१) दीपिकेति।—दीपिकाभिः,—प्रदीपैः, सर्वासु दिक्षु प्रज्वलन्तीभिरिति भावः ; एतदपि स्वस्वयनार्थमिति बोध्यम्, एवमुत्तरत्रापि ; दह्यमानेन—तप्यमानेन, दीपमण्डलीमध्यस्थितेन इति भावः ; यद्वा,—दीपिकाभिः,—स्वर्णाधारसज्जितसद्दीपैः इत्यर्थः, दह्यमानेन, नीराजने इलावलम्बनात् इति भावः, कुलपुत्रकेण—सत्कुलजातकुमारेण, प्रसाद्यमान—सन्तर्प्यमाणम्, आराध्यमानमिति यावत्, मातृणां—ब्राह्मीत्यादीनां, मण्डलं—समूहः यस्मिन् तम् ; मातरश्चोक्ता यथा,—ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथैन्द्राणी चामुण्डाः सप्त मातरः॥" इति ।

(४२) मुण्डेति।—मुण्डं—नरशिरः, तदेव उपहारः,—बलिः, तस्य आहरणे—सङ्कल्पणे, उद्यतः,—प्रवृत्तः, द्रविड़ः,—द्रविड़देशीयोपासकविशेषः, तेन प्रार्थ्यमानः,—याच्यमानः, राज्ञ आरोग्यमिति भावः, आमर्दकः,—वेतालविशेषः, "रौद्रदेवताभेदः" इत्यन्ये, यस्मिन् तथोक्तम् ; वेतालो हि मुण्डोपहारप्रियो अलौकिकप्रभावेण उपासकानामभीष्टं साधयतीति धिया कैश्चित् द्रविड़ेन राज्ञ आरोग्यकामेन नरशिरोबलिविधानेन यत्र क्वचित् वेतालसिद्धिः क्रियते, तत्कालप्रचलितप्रथानुरूपम् इति भावः।

(४३) अभ्यर्थ्येति।—अभ्यर्थैः,—तदाख्यदेशभवैः उपासकैः, उच्चार्यमाणैः,—उक्तोल्लसनैः, ["अभ्यर्थ्यमाण—" इत्यत्र "आभ्यर्थ्यमाण—" इति पाठेऽपि स एवार्थः] बाहुभिः,—भुजैः, वप्रैरिव—वप्रसदृशैरित्यर्थः, प्राकारसदृशैः उन्नतैरिति भावः, उपयाच्यमाना—राजजीवनं प्रार्थ्यमाना, चण्डिका—तदाख्या देवीमूर्तिः यस्मिन् तम् ; "कलौ चण्डीविनायकौ" इत्यादिदर्शनात् त्वरितफलसिद्ध्याशया महामायोपासनारतत्वात् इति भावः। यत्र क्वचित् अन्याः स्वान् स्वान् बाहून् उक्तोल्लसनैः चण्डिकाऽग्रिके राजारोग्यं प्रार्थयामासुरित्याशयः। चण्डिकामाहात्म्यस्तुतेः

अन्यत्र (४४) शिरोविधृतविलीयमानगुग्गुलुविकल-नवसेवकानुनीयमानमहाकालम्, अपरत्र (४५) निशितशस्त्रीनिकृत्तात्ममांसहोमप्रसक्तामवर्गम्, अपरत्र (४६) प्रकाशनरपतिकुमारकक्रियमाणमहामांसविक्रयप्रक्रमम्,

---

रोग्यफलकत्वमुक्तं देवीमाहात्म्ये यथा.—"श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति" तथा,—"सर्वाबाधासु घोरासु वेदनाऽभ्यर्दितोऽपि वा। अस्या मैतन् माहात्म्यं नरो मुच्येत मङ्क्षटात्॥" इति च। ["अन्त्रोड्डियमाण·····चण्डिकम्" इत्यत्र "अन्त्रोड्डियमाणान्त्रोपयाच्यमानचण्डिकम" इति पाठे,—अन्त्रेण उड्डियमाणं यदन्त्रं—बलिपशोः उदरदेशस्थनाड़ीविशेषः, तेन, मङ्क्षतेन इत्यर्थः, उपयाच्यमाना —देवि! एतदन्त्रग्रहणेन सन्तुष्टा राजानं नीरुजं कुरु इति प्रार्थ्यमाना, चण्डिका यत्र तम्; तेषाम् उत्कटतन्त्रोक्ताचारवत्त्वात इत्याशयः]।

(४४) शिर इति।—शिरसा—मूर्ध्ना, विधृतेन—गृहीतेन, शिरसि स्थापितेन इत्यर्थः, विलीयमानेन—अग्न्यतापेन विगलता, गुग्गुलुना—तन्निर्यासधूप-विशेषेण, विकलः,—विह्वलः, धूपानलसन्तापात् इति भावः, यो नवः,—नवीनः, युवेत्यर्थः, ब्रह्मणा तद्धारणासामर्थ्यादिति भावः, सेवकः,—उपासकः, तेन अनुनीय-मानः,—प्रसाद्यमानः, कालकवलाद्राजरक्षणार्थमिति भावः, महाकालः,—हरः यस्मिन् तम्; तदुक्तमग्निपुराणे,—"गुग्गुलुं घृतसंयुक्तं साक्षाद् गृह्णाति शङ्करः" इति।

(४५) निशितेति।—निशितया—तीक्ष्णया, शस्त्र्या—क्षुरिकया, ("स्याच्छ-स्त्री चासिपुत्री च क्षुरिका चासिधेनुका" इत्यमरः) निकृत्तेन—छिन्नेन, आत्मनः,—स्वस्य, मांसेन—पिशितेन, यो होमः,—दैवयज्ञः, देवानुद्दिश्य मन्त्रोच्चारणपूर्वकमग्नौ आहुतिदानमित्यर्थः, तस्मिन् प्रसक्ताः,—प्रवृत्ताः, आप्तवर्गाः,—स्वजनाः यस्मिन् तम्; इतरेषां तत्साधने तथाविधानुरागायोगात् इत्याशयः; उक्तञ्च तत्रैव,—"यः स्वहृदयसञ्जातं मांसं मापप्रमाणतः। तिलमुद्गप्रमाणं वा दद्याद् भक्तियुतो नरः॥ स एव मासाभ्यन्तरे कामानिष्टानवाप्नुयात्॥" इति।

(४६) प्रकाशेति।—प्रकाशं—सर्वसमक्षं यथा तथा, नरपतीनां—राज्ञां, करदानां सामन्तानामित्यर्थः, कुमारकैः,—तनयैः, क्रियमाणः,—विधीयमानः, महामांसानां—पिशितानां, निहतबहुमेध्यपुरुषावयवगृहीतानामिति भावः, विक्रयस्य, पिशाचादिभ्य इति भावः, प्रक्रमः,—प्रारम्भः यस्मिन् तथोक्तम्; पिशाचाद्यर्थोऽपि महामांसप्राप्त्या तद्विनिमयेन अलौकिकयक्षिमत्तया विक्रेतृणामुपकारं कुर्वन्ति, अत्र तु

(४७) उपहतमिव श्मशानपांशुभिः, अमङ्गलैरिव परिगृहीतं, यातुधानैरिव विध्वस्तं, कलिकालेन इव कवलितं, (४८) पापपटलैः इव सञ्छादितम्, अधर्म्मविद्वेषैः इव लुण्ठितम्, अनित्यताधिक्कारैः इव आक्रान्तं, नियतिविलासैः इव आत्मीकृतं, शून्यमिव, सुप्तमिव, मुषितमिव, विलक्षितमिव, छलितमिव, मूर्च्छितमिव स्कन्धावारम् आससाद।

राजजीवनोपायभूतौषधादिदानमेव उपकार इति भावः। तादृशक्रियायाः राजदण्डभयात् लोकापवादभीतेः वा अप्रकाशम् अनुष्ठानं जनैः क्रियते, इह तु राजाभीष्टसिद्धये तदनुष्ठानात् नाव दण्डभयं लोकगर्हाभासो वा इति प्रकाशशब्देन आवेदितम्।

(४७) श्मशानेति।—श्मान:,—शवाः शेरतेऽत्र इति श्मशानं, [श्मन्नुपपदात् 'शॅते' इत्यस्मात् "युधि—" (उ० २ पा० ९० सू०) इत्यादिना उणादिविधीनां बाहुल्यवत्त्वात् इति आनचि तत्रैव चकारस्यकृत्यात् ङित्त्वात् ङपम्] तत्पांशुभिः,—श्मशानधूलिपङ्क्तैः इत्यर्थः, उपहतमिव—दूषितमिव, नीरसैकसमाक्रन्दनाद्यभावात् पांशुव्याप्तमिति भावः। अमङ्गलैः,—अशुभैः, परिगृहीतमिव—आक्रान्तमिव, सर्व्वत्रैव प्रबलविषादराशिसमाच्छन्नत्वादिति भावः। यातुधानैरिव—राक्षसैरिव, ("राक्षसः कौणपः क्रव्याद् क्रव्यादोऽस्रप आशरः। यातुधानः पुण्यजनः" इत्यमरः) विध्वस्तं—विशेषेण ध्वंसं गतं, सर्व्वत्र स्थितिनियमानुकूलशृङ्खलाभावात्। कवलितं—ग्रस्तं, आसनाभावेन दुर्ज्ञानां प्रभावाधिक्यात्, लुण्ठनादिव्यापारनिरतत्वात् इति भावः।

(४८) पापपटलैरिव—कलुषनिचयैरिव, सञ्छादितम्—आकीर्णम्। अधर्म्मविद्वेषैः इव—अधर्म्मसञ्चारैरिव, लुण्ठितं—कृतलुण्ठनम्। अनित्यताधिक्कारैरिव—अनित्यः,—संसारोऽयं क्षणभङ्गुरः, तस्य भावः—अनित्यता, तया धिक्काराः,—अनित्यं संसारं धिगिति वचनानि तैरिव, आक्रान्तम्—आश्रितम्; शोकावेगात् सर्व्वत्रैव कर्त्तव्येषु औदासीन्यादिति भावः। नियतिविलासैरिव—भाग्यविचेष्टितैरिव, आत्मीकृतं—गृहीतम्, अहो दुर्दैवम्! कथमस्माकमीदृशी दुर्दशा समुपस्थिता, सर्व्वत्रैव दुर्दशवाक्यप्रवर्त्तनादिति भावः। शून्यमिव—जनरहितमिव, सुप्तमिव—निद्रितमिव; महाशोकवैकल्येन सर्व्वथा निःशब्दमवस्थानादिति भावः। मुषितमिव—हृतसर्व्वस्वमिव इत्यर्थः, विभूषिताङ्गानामपि जनानां भूषणादिकं परित्यज्य दीनभावेनावस्थानादिति भावः। विलक्षितमिव—अप्रतिभमिव, लज्जितमिव वा। छलितमिव—प्रतारितमिव, दुर्भाग्यतया सुखादिवैवश्यादिति भावः। मूर्च्छितमिव—मोहं गतमिव,

प्रविशन्नेव च (४९) विपणिवर्त्मनि कुतूहलाकुलबहुल-बालकपरिवृतम् अङ्गुलयष्टिविष्कम्भवितते वामहस्तवर्त्तिनि (५०) भीषणमहिषाधिरूढप्रेतनाथमनाथे चित्रवति पटे परलोकव्यतिकरम् इतरकरकलितेन शरकाण्डेन कथयन्तं यमपट्टिकं ददर्श ; तेनैव च गीयमानं श्लोकम् अशृणोत्.—

"मातापितृसहस्राणि पुत्रदारशतानि च ।

युगे युगे व्यतीतानि कस्य ते, कस्य वा भवान्?"॥३॥इति ।

शोकावेशेन सर्व्वसंहारादिस्मादिति हृदयम् । स्कन्धावारं—कटकं, सैनिकनिवेशन-स्थानमित्यर्थः, राजधानीमिति यावत् । आससाद—प्राप, उपतस्थे इत्यर्थः, ["आस-साद" इत्यत्र "समाससाद" इति पाठेऽपि स एवार्थः] । अत्र शोच्यसहाराजः आत्म-स्वनविभावः निराशार्त्तचेष्टाद्युद्दीपनविभावाः, दैवनिन्दाक्लिष्टताद्यनुभावाः, मोहादि-व्यभिचारिणः, तैः व्यक्तीकृतः शोकः करुणरसरूपतामेत्य अङ्गितामिति ; रौद्रबीभत्सा-दयश्चान्येऽस्य अङ्गभूता ज्ञेया इति सङ्क्षेपः ।

(४९) "विपणिवर्त्मनि" इत्यादौ "यमपट्टिकं ददर्श" इत्यन्तोऽन्वयः । विपणि-वर्त्मनि—पण्यवीथिकामार्गे, ("आपणस्तु निषद्यायां विपणिः पण्यवीथिका" इत्य-मरः) । कुतूहलेति ।—कुतूहलेन—किमेतदिति कौतुकेन, आकुलाः,—आक्रान्ताः, बहुलाः,—बहवः, ये बालकाः—शिशवः, तैः परिवृतः,—वेष्टितः तम् । ऊर्द्धेति ।—ऊर्द्धा—दीर्घेति यावत्, या यष्टिः,—दण्डः, सैव विष्कम्भः,—अवष्टम्भः, स्खलनप्रति-बन्ध इत्यर्थः, अवलम्बनमिति यावत्, ("विष्कम्भो योगभेदे स्याद् विस्तारप्रतिबन्धयोः" इति मेदिनी) तत्र वितते:,—प्रसारिते; तस्मिन् । वामहस्तवर्त्तिनि—वामकरस्थिते ।

(५०) भीषणेति ।—भीषणः,—भयङ्करः, यः महिषः, तम् अधिरूढः,—अधि-ष्ठितः, प्रेतनाथः,—यमः, तन्नाथे—तदधीशे, चित्रवति—चित्रिते, पटे—फलके इत्यर्थः । परलोकव्यतिकरं—परलोके—अन्यस्मिन् जगति, प्रेतलोके इति यावत्, यः व्यतिकरः,—सम्बन्धः, शुभाशुभकर्म्मार्जितपुरस्कारदण्डरूपः इति भावः, तं, पर-लोकव्यापारमित्यर्थः । इतरकरकलितेन—दक्षिणहस्तधृतेन, शरकाण्डेन—तदाख्य-तृणविशेषस्तम्बेन ; कथयन्तं—धर्म्मशून्यमानवजीवनं निरर्थकम् इत्यावेदयन्तमित्यर्थः । यमपट्टिकं—यमपट्टेन—तत्प्रदर्शनेनेत्यर्थः, दीव्यति इति यमपट्टिकः तम् ; "तेन दीव्यति—" (४।४।२ पा०) इत्यनेन ठक्कि रूपम्] । तेनैव—यमपट्टिकेनैव ।

चित्रं प्रदर्श्य सर्वेषामेव नश्वरत्वप्रकटनव्याजेन राज्ञः अचिरविनाशं सूचयति.

(५१) तेन च अधिकतरम् अवदीर्य्यमाणहृदयः क्रमेण राजद्वारं प्रतिषिद्धसकललोकप्रवेशं ययौ। तुरगात् अवतीर्णश्च अभ्यन्तरात् निष्क्रामन्तम् अप्रसन्नमुखरागं मुक्तमिव इन्द्रियैः सुषेणनामानं वैद्यकुमारम् अद्राक्षीत्। कृतनमस्कारश्च अप्राक्षीत्,—"सुषेण! अस्ति तातस्य विशेषा न वा?" इति। सोऽब्रवीत्,—"नास्ति, इदानीं यदि भवेत् कुमारं दृष्ट्वा" इति। (५२) मन्दमन्दं द्वारपालैः प्रणम्यमानश्च दीयमानसर्वस्वं, पूज्य-

---

मातेति।—मातापितृणां—मातरपितृणाम्, ["आनङ् ऋतो हशे" (६।३।२५ पा०) इति सूत्रेण ऋदन्तायाः मातुरानङ्] सहस्राणि—समूहाः, पुत्रदारशतानि च—पुत्रकलत्रसमूहाः च, युगे युगे—प्रतियुगं, व्यतीतानि—अतिक्रान्तानि, स्व स्व सम्बन्धिनं त्यक्त्वा नाश गतानि इत्यर्थः; ते—मातापित्रादयः स्त्रीपुत्रादयश्च, कस्य?—न कस्यापि इत्यर्थः, भवान्—त्वं, वा कस्य?—न कस्यापि इत्यर्थः। श्लोकेनानेन राजसदृशे त्वया अधीरेण न भाव्यं, प्राणिनामियमेव गतिः नियता। त्वमाप्येवमेव गन्तव्यमिति उपदिष्ट इव हर्षः इति बोध्यम्। अत्र पितुश्च निधनं भविष्यति, तेन पितृविरहनिबन्धनश्लोकस्तु त्वया परिहरणीयः तत्तत्सम्बन्धस्यानित्यत्वात् अथित्वस्यावापारडार्य्यत्वादिति विशेषे प्रस्तुते वक्तव्ये मातापित्रादीनां प्रतियुगगतं अथित्वं सामान्यमभिहितमिति सामान्येन विशेषस्य गम्यमानत्वेनाप्रस्तुतप्रशंसालङ्कारः]। पद्यावृत्तं हृत्तम् ॥ ३ ॥

(५१) तेन—उक्तरूपश्लोकेन। अवदार्य्यमाणहृदयः,—भिद्यमानान्तःकरणः। प्रतिषिद्धेति।—प्रतिषिद्धः,—निवारितः, सकलानां लोकानां—जनानां, प्रवेशः,—अनागमनं यस्मिन् तत्। अभ्यन्तरात्—अन्तःपुरादिति भावः। निष्क्रामन्तं—निर्गच्छन्तम्। अप्रसन्नेति।—न प्रसन्नः,—प्रसादयुक्तः, मुखस्य रागः,—कान्तिः यस्य तम्। इन्द्रियैः,—चक्षुरादिभिः, मुक्तमिव—परित्यक्तमिव, राज्ञः रोगप्रशमनोपायानुसन्धानव्याकुलचित्ततया वाह्यव्यापाररहितमिव इत्यर्थः। विशेषः,—अवस्थापरिवर्त्तनमित्यर्थः, कियता परिमाणेन रोगोपशम इति यावत्। नास्ति, विशेष इति शेषः। भवेत्, विशेष इति शेषः; प्रवासागतपुत्रमुखनिरीक्षणेन महानन्दोदये रोगप्रशमनस्य कथञ्चित् सम्भावितत्वात् इति भावः।

(५२) "मन्दमन्दम्" इत्यादौ "प्रणम्यमानश्च……राजकुलं विवेश" इति अशेष सम्बन्धः। मन्दमन्दं—अनैः अनैः। ["मन्दमन्दम्" इत्यत्र "मन्दं मन्दं" इति

मानकुलदेवतं, (५३) प्रारब्धामृतचरुपचनक्रियं, क्रियमाण-षड़ाहुतिहोमं, (५४) क्षयमानपृषदाज्यलवलिप्तप्रचलदूर्वा-पल्लवं, (५५) पठ्यमानमहामायूरी, प्रवर्त्यमानशृङ्गशान्ति,

पाठान्तरम्] । तद् विशिनष्टि, दीयमानेत्यादिभिः ।—दीयमानानि—अर्प्यमाणानि, ब्राह्मणादिभ्य इति भावः, सर्व्वस्वं—सर्वाणि स्वानि—धनानि यत्र तत् ; ब्राह्मणा-शीर्वादा महाबाधाशान्तिकरत्वात् इति भावः । पूज्यमानेति ।—पूज्यमानाः,—अर्च्य-माना:, कुलदेवताः,—चण्डीप्रभृतयो गृहदेवताः यस्मिन् तत् ।

(५३) प्रारब्धेति ।—प्रारब्धा—प्रक्रान्ता, अमृतचरोः,—रोगशान्तये दैवैश्च: दीयमानस्य क्षीरपक्वान्नविशेषस्य, पायसस्येति यावत्, पचनक्रिया—पाकानुष्ठानं यस्मिन् तत्, पुष्पनक्षत्रजनितरोगशान्तये घृतपायसेन होमविधानादिति भावः ; उक्तञ्च षट्कर्म्मदीपिकायां,—"पुष्ये घृतपायसम्" इति । क्रियमाणेति ।—क्रियमाणः, —अनुष्ठीयमानः, षट्—षट्सङ्ख्यकाः, आहुतयः,—दैवीहेतुना अग्नौ समन्त्रघृतादि-प्रक्षेपरूपाः एव, होमा यस्मिन् तत्, षड़ाहुतिहोमानामशुभशान्तिकरत्वं तत्तन्मन्त्रै-रेवोक्तं, यथा शाकल: ;—"ॐ देवकृतस्यैनसोऽवयजनमसि स्वाहा १ । ॐ मनुष्य-कृतस्यैनसोऽवयजनमसि स्वाहा २ । ॐ पितृकृतस्यैनसोऽवयजनमसि स्वाहा ३ । ॐ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा ४ । ॐ एनसोऽवयजनमसि स्वाहा ५ । ॐ यच्चैनो विश्वांश्चार यद्वा विदांसस्य सर्व्वस्यैनसोऽवयजनमसि स्वाहा" ६ । इति । यद्वा,—"ॐ प्रजापतये स्वाहा" इत्यादिमन्त्रेण षण्णां देवतानां नामोच्चारणपूर्व्वकमग्नौ षण्णामाहुतीनां दानेन कृतः होमः षड़ाहुतिहोम उच्यते ।

(५४) क्षयमानेति ।—क्षयमाना:,—अग्नौ प्रक्षिप्यमाणाः, पृषदाज्यस्य—दधियुक्तघृतस्य, ("पृषदाज्य सदध्याज्ये" इत्यमरः) लवेन—बिन्दुना, क्षिप्ताः,—सिक्ता इत्यर्थः प्रचलाः,—अभिनवा इति भावः, दूर्वापल्लवाः,—दूर्वाकिसलयाः यस्मिन् तत् ; उक्तञ्च षट्कर्म्मदीपिकायाम्,—"आयुष्कामो घृततिलैः दूर्वाभिः आज्य-पर्णकैः ज्वरं सद्यो विनाशयेत्" इति ।

(५५) पठ्यमानेति ।—पठ्यमाना—उच्चार्य्यमाणा, महामायूरी—बौद्धविद्या-विशेषः, शैवमन्त्रविशेषो वा, यत्र तत् । सार्व्वभौमस्य निरामयत्वकामनया राष्ट्रवासि-विभिन्नसाम्प्रदायिकैः स्वमतसिद्धस्वस्ययनमन्त्रवादादीनामारंभो अनुष्ठानात् इति श्रेयम् । प्रवर्त्यमानेति ।—प्रवर्त्यमाना—सम्पाद्यमाना, शृङ्गशान्तिः,—शृङ्गदोष-

(५६) निर्वर्त्त्यमानभूतरक्षाबलिविधानं, प्रयतविप्रप्रस्तुतसंहिताजपं, (५७) जप्यमानरुद्रैकादशीशब्द्यायमानशिवगृहम्, अतिशुचि-शैवसम्पाद्यमान-विरूपाक्ष-क्षीरकलश-सहस्रस्नपनम्, (५८) अजिरोपविष्टश्च अनासादितस्वामिदर्शनदूयमानमानसैः

संग्रन्थिरिति यावत्, यत्र तत्; दुष्टग्रहाणां कोपदृष्टिशङ्कया भृत्यधः शल्याद्यवस्थितिशङ्कया वा इति भावः।

(५६) निर्वर्त्त्यमानेति।—निर्वर्त्त्यमानं—सम्पाद्यमानं, भूतेभ्यः,—देवयोनिविशेषेभ्यः, रक्षार्थं—त्राणार्थं, बलिविधानं—माषभक्ताद्युपहारप्रदानं यस्मिन् तत्, तत्प्रदानमन्त्राश्च उक्ताः यथा,—"ये भूता: प्रेता: पिशाचाश्च ये वसन्त्यत्र भूतले। ते गृह्णन्तु मया दत्तं बलिमेतं प्रसाधितम्॥ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः। ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया॥" इति। ["पठ्यमान···बलिविधानम्" इत्यत्र "पठ्यमानमहामायूरीप्रवर्त्त्यमानगृहशान्तिनिर्वर्त्त्यमानभूतरक्षाबलिविधानम" इति समस्तपाठे,—पठ्यमाना या महामायूरी, तया प्रवर्त्त्यमानायै—कर्त्तुमिष्यमाणायै, गृहस्य शान्त्यै—दोषसंशोधनाय, निर्वर्त्त्यमानं भूतरक्षाबलिविधानं यत्र तत्]। प्रयतेति।—प्रयतैः,—संयमशालिभिः, विशुद्धचित्तैः इति यावत्, विप्रैः,—द्विजैः, प्रस्तुतः,—प्रारब्धः, संहिताजपः,—वेदपाठः यस्मिन तत्; अपौरुषेयवाग्मात्मकमन्त्रस्वीकाणां निरन्तरपाठेनाशेषप्रत्यवायनाशानुशासनात् इति भावः।

(५७) जप्यमानेति।—जप्यमानया—पठ्यमानया, रुद्रैकादश्या—"नमस्ते रुद्रमन्यवे" इत्यादि यजुर्वेदीय रुद्राध्यायस्तुतिरूपया, शब्द्यायमानं—निनाद्यमानं, शिवगृहं—शिवमन्दिरं यस्मिन् तत्; दुःसाध्यपीडादौ शिवसविधे रुद्राध्यायपाठस्य सद्यःशान्तिप्रशमनत्वात् इति हृदयम्। अतिशुचीति।—अतिशुचिना—अतिपूतेन, शैवेन—शिवोपासकेन, सम्पाद्यमानम्—अनुष्ठीयमानं, विरूपाक्षस्य—शिवस्य, ["बहुव्रीहौ—" (५। ४। ११३ पा०) इत्यादिना षच्] क्षीरकलशानां—दुग्धकुम्भानां, सहस्रेण—सहस्रसङ्ख्यया, स्नपनम्—अभिषेचनं यस्मिन् तत्; शैवतन्त्रविधानेन तथाविधानुष्ठानस्य उत्पातप्रशमकत्वात् इति भावः।

(५८) अजिरोपविष्टैः,—चत्वरानीतैः [अजधातोः "अजिर—" (उ० १ पा० ५४ सू०) इत्यादिना किरचि बीभावाभावे रूपम्। "अङ्गणं चत्वराजिरे" इत्यमरः]। अनासादितेति।—अनासादितेन—अप्राप्तेन, स्वामिदर्शनेन,—प्रभुसाक्षात्कारेण, स्वामिदर्शनालाभेन इत्यर्थः, दूयमानं—दह्यमानं, मानसं—चित्तं

अभ्यन्तरनिष्पतितनिकटवर्त्तिपरिजननिवेद्यमानवार्त्तैः वार्त्तीभूतस्नानभोजनशयनैः (५९) उज्झितात्मसंस्कारमलिनवेशैः लिखितैरिव निश्चलैः नरपतिभिः नीयमाननक्तन्दिनं, (६०) दुःखदीनवदनेन च प्रघणेषु बहुमण्डलेन उपांशुव्याहृतैः केनचित् चिकित्सकदोषान् उद्भावयता, केनचित् (६१) असाध्यव्याधिलक्षणपदानि पठता, केनचित् दुःस्वप्नान् आवेदयता, केनचित् पिशाचवार्त्तां विहसता, केनचित्

यैषां तैः। अभ्यन्तरेति।—अभ्यन्तरात्—अन्तःपुरात्, निष्पतितेन—निर्गतेन, निकटवर्त्तिना—समीपस्थेन, राज्ञ इति भावः, परिजनेन—परिचारकेण, निवेद्यमाना—विज्ञाप्यमाना, वार्त्ता—राजवृत्तान्तः, यैषां तैः। वार्त्तीभूतेति।—वार्त्तीभूतानि—वार्त्तां आगतानि, कृत्याशेषाणीति भावः, स्नानानि—आप्लावाः भोजनानि—आहाराः, शयनानि—स्वापाश्च यैषां तैः, सस्राजो जीवननाशशङ्कया उद्विग्नचित्तत्वादिति भावः।

(५९) उज्झितेति।—उज्झितेन—परित्यक्तेन, आत्मसंस्कारेण—केशशरीरभार्ज्जनादिरूपेण प्रसाधनकर्म्मणा इत्यर्थः, मलिनाः,—विवर्णाः, वेशाः,—परिच्छदाः यैषां तैः। लिखितैरिव—चित्रार्पितैरिव। निश्चलैः,—निस्पन्दैः। नीयमानेति।—नीयमानम्—अतिक्रम्यमाणं, नक्तन्दिनं—रात्रान्दिवं, [नक्तञ्च दिनञ्च इत्यत्र "विप्रसिद्ध—" (२।४।१३ पा०) इत्यादिना एकवद्भावे रूपम्] यस्मिन् तत्। ["नक्तन्दिनम्" इत्यत्र "नक्तन्दिवम्" इति पाठेऽपि स एवार्थः, "अचतुर—"(५।४।७७ पा०) इत्यादिना समासः]।

(६०) दुःखेति।—दुःखेन—शोकेनेति यावत्, दीनं—म्लानं, वदनं यस्य तेन। प्रघणेषु—बहिर्द्वारप्रकोष्ठविशेषेषु ("प्रघाणप्रघणा।लन्दा बहिर्द्वारप्रकोष्ठके" इत्यमरः)। बहुमण्डलेन—मण्डलाकारोपविष्टेन। उपांशुव्याहृतैः,—अनुच्चभाषितैः। चिकित्सकदोषान्—चिकित्सका रोगमेतं न निर्णेतुं शक्नुवन्ति, औषधानि नैतेषां समीचीनानीत्येवं दोषान्, उद्भावयता—प्रकटयता।

(६१) असाध्येति।—असाध्यस्य—दुश्चिकित्स्यस्य, व्याधेः,—रोगस्य, ("रोगव्याधिगदामयाः" इत्यमरः) लक्षणपदानि—लिङ्गप्रकाशकवाक्यानि, पठता—कीर्त्तयता; सद्वैद्यत्वाभिमानित्वादिति भावः। दुःस्वप्नान्—अनर्थसूचकस्वप्नप्रबन्धान्,

(६२) कार्त्तान्तिकादेशान् प्रकाशयता, केनचित् उपलिङ्गानि गायता, अन्येन अनित्यतां भावयता, संसारञ्च अपवदता, कलिकालविलसितानि च निन्दता, दैवञ्च उपालभमानेन अपरेण धर्म्माय कुप्यता, राजकुलदेवताश्च अधिक्षिपता, अपरेण (६३) क्लिष्टकुलपुत्रकभाग्यानि गर्हयता, बाह्यपरिजनेन कथ्यमानकष्टपार्थिवावस्थं राजकुलं विवेश।

(६४) अविरलवाष्पपयःपरिप्लुतलोचनेन पित्तपरिजनेन वीक्ष्यमाणो विविधौषधिद्रव्यद्रवगन्धगर्भमुत्क्वथतां क्वाथानां

आवेदयता—ज्ञापयता, परस्परमिति भावः। पिशाचवार्त्तां—पिशाचः,—अधमदेवयोनिविशेषः, तस्य वार्त्ता—वृत्तान्तः तां, पिशाचाविष्टो वा राजा, यदस्य तथा चेष्टितं दृश्यते, इत्येवंरूपवचनमित्यर्थः, विहस्यता—प्रकटयता।

(६२) कार्त्तान्तिकादेशान्—ज्योतिर्विदादेशान्, ज्योतिर्विदः राज्ञ एवमेवमयमं निर्णीतवन्त इत्येवंरूपान्। ("सांवत्सरो ज्यतिषिको दैवज्ञगणकावपि। स्युर्मौहूर्त्तिकमौहूर्त्तज्ञानिकार्त्तान्तिका अपि॥" इत्यमरः)। उपलिङ्गानि—उत्पातविशेषान्, अमङ्गलसूचकरक्तहस्त्यादिरूपान् इति भावः, गायता—कीर्त्तयता। अनित्यतां—क्षणभङ्गुरतां, देहस्य इति भावः, भावयता—चिन्तयता। अपवदता—निन्दता। कलिकालविलसितानि—कलिकालस्य—चतुर्थयुगस्य, विलसितानि—दुश्चेष्टितानि; कलिकाले पापजनसङ्कुलसमाकुले दुष्टश्री धर्म्मपरायणो राजा कथमपि न जीवति इत्यादिरूपाणीति भावः। दैवं—विधिम्, उपालभमानेन—तिरस्कुर्वता। अधिक्षिपता—निर्भत्सयता।

(६३) क्लिष्टेति।—क्लिष्टानां—क्लेशपतितानां, दुःस्थानामित्यर्थः, कुलपुत्राणां—सत्कुलजातकुमाराणां, पित्रादिविहीनतया निराश्रयाणां राज्ञा पाल्यमानानामिति भावः, भाग्यानि—दुरदृष्टानि, गर्हयता—निन्दता। बाह्यपरिजनेन—बहिःसञ्चरतां भृत्येन। कथ्यमानेति।—कथ्यमाना—निगद्यमाना, कष्टा—दारुणा, पार्थिवस्य—राज्ञः, अवस्था—दशा यस्मिन् तत्।

(६४) अविरलेति।—अविरलैः,—निरन्तरैः, अविच्छिन्नैरिति यावत्, वाष्पपयोभिः,—नेत्रजलैः, [अत्र पयःपदमधिकमेव, वाष्पपदेनैव विवक्षितार्थलाभादिति ध्येयं] परिप्लुतानि—व्याप्तानि, लोचनानि—नयनानि यस्य तेन। विविधेति।—

सर्पिषां तैलानाञ्च पच्यमानानां गन्धम् आजिघ्रन् अवाप द्वतीयं कक्ष्यान्तरम् ।

(६५) तत्र च अतिनिःशब्दे गृहावग्रहणीग्राहिबहुवेत्रिणि, त्रिगुणतिरस्करिणीतिरोहितसुवीथीपथे, (६६)पिहितपच्चद्वारके, परिच्छत्तकवाटरटिते, घटितगवाक्षरचितमरुति, दूयमानपरिचारके, (६७) चरणताड़नस्खनत्सोपानप्रकुपितप्रतो-

विविधानां—नानाप्रकाराणाम्, ओषधिद्रव्याणां—रोगोपशमकलतागुल्मादीनां, द्रवस्य—रसस्य, गन्धः,—आघ्राणं, गर्भे—मध्ये यत्र तद् यथा तथा, उच्चक्वथतां—पच्यमानानां, क्वाथानां—रसविशेषाणाम् । सर्पिषां—घृतानाम् । अवाप—प्रविवेश । कक्ष्यान्तरं—कक्षे राज्ञः पुरे भवाः कक्ष्याः,—हर्म्यादिप्रकोष्ठाः इत्यर्थः, तासामन्तरम्—अभ्यन्तरम् ।

(६५) तत्रेत्यादि ।—"तत्र च" इत्यादौ "धवलगृहे स्थितं···पितरमद्राक्षीत्" इत्युत्तरेण सम्बन्धः । गृहेति ।—गृहावग्रहणी—देहली, द्वारारम्भप्रदेश इत्यर्थः, ("गृहावग्रहणी देहली" इत्यमरः) तद्ग्राहिणः,—तद्धारिणः, तत्रावस्थायिन इत्यर्थः, बहवः,—अनेके, वेत्रिणः,—वेत्रपाणयः पुरुषा यस्मिन् तथोक्ते । त्रिगुणेति ।—त्रिगुणाभिः,—विरावृत्ताभिः, तिरस्करिणीभिः,—जवनिकाभिः, तिरोहिताः,—अन्तर्हिताः, सुवीथिनां—गृहाङ्गानाम्, अभ्यन्तरगृहविशेषाणामित्यर्थः, ("वीथी पङ्क्तौ गृहाङ्गे च रूपकान्तरवर्त्मनोः" इति मेदिनी) पन्थानः,—अभ्यन्तरमार्गा इत्यर्थः, यस्मिन् तथोक्ते ; अमूर्यम्पश्यानां राजदाराणां निःसङ्कोचसञ्चारायेति भावः ।

(६६) पिहितेति ।—पिहितम्—आवृतं, पच्चद्वारम्—अभ्यन्तरस्थं गुप्तद्वारं, पार्श्वस्थद्वारं वा, ("प्रच्छन्नमन्तर्द्वारं यत् पच्चद्वारं तदुच्यते" इति "पच्चद्वारन्तु पच्चकः" इति च कोषामरौ) यस्य तादृशे । परिच्छत्तेति ।—परिच्छत्तं—परित्यक्तं, कवाटानाम्—अरराणां, द्वाररोधककाष्ठफलकानामित्यर्थः, रटितं—शब्दः यस्मिन् तथोक्ते, राज्ञः कर्णपीड़ाशङ्कया प्रवेशनिर्गमनयोरपि सशङ्कावरोधनात् निःशब्दे इति भावः । घटितेति ।—घटितैः,—बद्धैः, गवाक्षैः,—वातायनैः, रचिताः,—निरुद्धाः, मरुतः,—वायवः यस्मिन् तथोक्ते ; निवारितदूषितवायाविति भावः । दूयमानपरिचारके—दूयमानाः,—तप्यमानाः, परिचारकाः,—भृत्या यस्मिन् तथोक्ते ।

(६७) चरणेति ।—चरणस्य—पदस्य, इतस्ततः सञ्चरतां जनानामिति भावः, ताड़नेन—क्षेपणेन, स्खनत्—नदत्, यत् सोपानम्—अधिरोहणी, तेन प्रकुपिताः,—

द्वारे, निभृतसंज्ञानिर्दिश्यमानसकलकर्मणि, नातिनिकटोपविष्टकङ्कटिनि, (६८) कोणस्थिताह्वानचकिताचमनकवाहिनि, चन्द्रशालिकालीनमूकमौललोके, महाऽऽधिविधुरबान्धवाङ्गनावर्गगृहीतप्रच्छन्नप्रयोवके, (६९) सञ्जवनपुञ्जितोद्विग्नपरिजने,

कृष्टाः, प्रतीहाराः,—द्वारपाला यस्मिन् तादृशे ; राजपीड़ाशङ्कया प्रतिहारिभिरुपदिष्टनिःशब्दपदसञ्चारे इति भावः। निभृतेति।—निभृतया—शब्दरहितया, संज्ञया—इत्यादीनाम् इङ्गितेन, निर्दिश्यमानानि—प्रदर्श्यमानानि, सकलानि—समग्राणि, कर्माणि—अनुष्ठेयानि यस्मिन् तथाविधे ; कोलाहलपरिहारार्थमिति भावः। नातीति।—नातिनिकटे—नातिसन्निधौ, उपविष्टाः,—आसीनाः, कङ्कटिनः,—वर्म्मभृतः यस्य तथोक्ते, ("तनुत्रं वर्म्म दंशनम्। उरच्छदः कङ्कटकः···" इत्यमरः) ; तेषामवयवसञ्चालनेन वर्म्मभ्यः मर्म्मरशब्दा जायन्ते इति तत्परिहारार्थेति भावः।

(६८) कोणेति।—कोणेषु—गृहैकदेशेषु, स्थिताः,—दण्डायमाना इत्यर्थः, आह्वानेन—आकारणासावेशे, चकिताः,—व्यग्रा इत्यर्थः, आचमनकवाहिनः,—आचमनार्थं पानीयहारिणः यत्र तादृशे। ["आचमनकवाहिनि" इत्यत्र "आचमनवाहिनि" इति पाठेऽपि स एवार्थः]। चन्द्रेति।—चन्द्रशालिकायां—शिरोगृहे, प्रासादोपरिवर्त्तिनि गृहविशेषे इत्यर्थः, ("चन्द्रशाला शिरोगृहम्" इत्यमरः) लीनाः,—निश्चलोपविष्टा इत्यर्थः, [लीधातोः "निष्ठा" (३।२।१०२ पा०) इति क्तप्रत्यये "ल्वादिभ्यः" (८।२।४४ पा०) इत्यादिना निष्ठानत्वे रूपम्] मूकाः,—अवाचः, मौलाः,—कुलक्रमपालिताः, लोकाः,—प्रकृतिविशेषाः इत्यर्थः, यस्मिन् तथोक्ते ; शिक्षितत्वेऽपि मोहात् इति भावः। महेति।—महद्भिः,—प्रबलैः, आधिभिः,—मानसव्यथाभिः, ("पुंस्याधिर्मानसी व्यथा" इत्यमरः) विधुराणां—व्याकुलानां, बान्धवाङ्गनानां—बन्धुस्त्रीणां, वर्गैः,—समूहैः, गृहीतम्—अधिष्ठितं, प्रच्छन्नं—निर्ज्जनं, गुप्तमित्यर्थः, प्रयोवकं—कक्ष्याविशेषः, वातायनं वा यस्मिन् यस्य वा तथोक्ते ; यद्वा,—महाधिविधुरबान्धवाङ्गनावर्गैः गृहीताः,—अवलम्बिताः, अन्योऽन्यमिति भावः, प्रच्छन्ने—निभृतदेशे, प्रयोवकाः,—प्रकृष्टा यौवाः, शोभनकन्यका इत्यर्थः, यत्र तादृशे ; स्त्रीकर्त्तृकेषु परस्परं यौवानवलम्ब्य प्रच्छन्नभावेनावस्थानस्य प्रकृतिसिद्धाबलाजनाचारात् इति भावः।

(६९) सञ्जवनेति।—सञ्जवने—चतुःशालायाम्, अन्योऽन्याभिमुखावस्थितगृहचतुष्कयुतभवने इत्यर्थः, ("सञ्जवनस्त्विदम्। चतुःशालम्" इत्यमरः) पुञ्जिताः,

प्रविष्टकतिपयप्रणयिनि, गम्भीरज्वरारम्भभीतभिषजि, दुर्मनायमानमन्त्रिणि, (७०)मन्दायमानपुरोधसि, सौदत्सुहृदि, निद्राणविपश्चिति, सन्तप्तप्तसामन्ते, (७१) विचित्तचामरग्राहिणि, दुःखक्षामशिरोरक्षिणि, क्षीयमाणप्रसादवित्तमनोरथसम्पदि,

—समवेताः, उद्विग्नाः,—उत्कण्ठिता इत्यर्थः, परिजनाः,—परिवारवर्गाः यस्मिन् तथोक्ते; बहुसङ्ख्याकानां तेषां तथाविधप्रशस्तस्थाने अवस्थानस्य सुघटत्वात् इति भावः। प्रविष्टेति।—प्रविष्टाः,—अभ्यन्तरागताः, कतिपये—अल्पा इत्यर्थः, प्रणयिनः,—सुहृदः यत्र तादृशे। गम्भीरेति।—गम्भीरस्य—"गम्भीरस्तु ज्वरो ज्ञेयो ज्ञानदर्शनहृत्क्षया। आनद्धत्वेन चात्यर्थं स्रोतसां रोधनेन च॥" इत्युक्तलक्षणस्य कृच्छ्रसाध्यस्य, ज्वरस्य, आरम्भात्—प्रवृत्तिदर्शनादित्यर्थः, भीताः,—शङ्किताः; तस्य असाध्यज्वरलक्षणे पठितत्वात् इति भावः; भिषजः,—चिकित्सकाः यस्मिन् तथाविधे, ("भिषग्वैद्यौ चिकित्सके" इत्यमरः)। दुर्मनायमानेति।—दुर्मनायमानाः,—विमनायमानाः, सचिन्तान्तःकरणा इत्यर्थः, व्यथितमनसः इति यावत्, ("दुर्मना विमना अन्तर्मनाः" इत्यमरः) मन्त्रिणः,—सचिवाः यस्मिन् तादृशे।

(७०) मन्देति।—मन्दायमानः,—विषादं गच्छन्निव इत्यर्थः, पुरोधाः,—पुरोहितो यस्मिन् तथोक्ते। सौदेति।—सौदन्तः,—अवसादं गच्छन्तः, क्लिश्यन्त इत्यर्थः, सुहृदः,—बान्धवाः यस्मिन् तथोक्ते। निद्राणविपश्चिति—निद्राणाः,—स्वपन्तः, जपहोमाद्यनुष्ठानैः समस्तरात्रिजागरणादिति भावः, विपश्चितः,—विद्वांसः, उपाध्यायाः इति यावत्, यस्मिन् तथोक्ते, ("विद्वान् विपश्चिद्दीधयुः" इत्यमरः)। सन्तप्तेति।—सन्तप्ताः,—व्यथिता इत्यर्थः, आप्ताः,—विश्वस्ताः, सामन्ताः,—राजानः यत्र तादृशे; उत्तरोत्तरनरेन्द्ररोगयत्नजनितश्रमवशादिति भावः।

(७१) विचित्तेति।—विचित्ताः,—विचेतनप्रायाः, चामरग्राहिणः,—व्यजनधारिणः यत्र तथोक्ते। दुःखेति।—दुःखेन—क्लेशेनेति यावत्, क्षामः,—क्षीणः, शिरोरक्षा—शीर्षरक्षकः यस्मिन् तथाविधे। क्षीयमाणेति।—क्षीयमाणा—क्षयमापद्यमाना, आराध्यनरेन्द्रेण इति भावः, प्रसादवित्तानां—प्रसादख्यातानां, राजानुग्रहेण प्रतिपादितानामित्यर्थः; यद्वा,—प्रसादः,—राजानुग्रह एव, वित्तं—धनं येषां तथोक्तानां, मनोरथसम्पत्—अभिलाषसमृद्धिः यस्मिन् तादृशे; आ बाल्यात् मनुष्याधिकस्य राज्ञः अभावे तेषां जीविकानिर्वाहस्य कृच्छ्रलभ्यत्वात् इति भावः।

(७२) स्वामिभक्तिपरित्यक्ताहारक्षीयमाणबलविकलवल्लभभूभृति, (७३) क्षितितलपतितसकलरजनीजागरूकराजपुत्रकुमारके, (७४) कुलक्रमागतकुलपुत्रनिवहोद्यमानशुचि, श्लोकसङ्कुचितकञ्चुकिनि, निरानन्दवन्दिनि, निश्वसद्विराग्यासन्नसेवके, विस्मृतताम्बूलधूसराधरवारयोषिति, (७५) विलक्ष-

(७२) स्वामीति।—स्वामिनि—प्रभौ, भक्तिः,—अनुरागातिशयः, तया परित्यक्तः,—उत्सृष्टः, आहारः,—भोजनं, तेन क्षीयमानं—क्षीयमाणं, बलं—सामर्थ्यं, तेन विकलाः,—अपटवः, वल्लभाः,—प्रियाः, भूभृतः,—राजानः यस्मिन् तथोक्ते; सहभोजिनां राज्ञां तमन्तरा त्यक्तभोजनात् श्लोकपात्रता ज्ञातेति हृदयम्।

(७३) क्षितीति।—क्षितितलेषु—भूतलेषु, पतिताः,—लुठिताः, "निद्रार्थाभ्यां क्त च भूः क्त शय्या" इति भावः, सकलाः,—सर्वे, रजनीषु—रात्रिषु, जागरूकाः,—जागरणशीलाः, ["जागरूकः" (३।२।१६५ पा०) इति जागर्तेः ऊकप्रत्ययः] स्वामिपरिचर्यार्थमिति भावः, राजपुत्राः,—राजतनया एव, कुमाराः,—शिशवः, युवराजा वा, यत्र तथाभूते।

(७४) कुलेति।—कुलक्रमेण—वंशपरम्परया, आगतानां—प्रतिपालितानामिति भावः, कुलपुत्राणां—कुलीनसन्तानानां, सत्कुलजातजनानामिति यावत्, निवहैः,—समूहैः, उद्यमाना—धार्य्यमाणा, शुक्—शोकः यत्र तथोक्ते; कृतज्ञत्वयोगात् इति भावः। श्लोकेति।—श्लोकेन—शुचा, सङ्कुचिताः;—कुण्ठिताः, उद्विग्ना इत्यर्थः, कञ्चुकिनः,—"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते॥" इत्युक्तरूपाः राजान्तःपुररक्षकाः पुरुषा यस्मिन् तथोक्ते। निरानन्देति।—निरानन्दाः,—निरुत्साहा इति भावः, वन्दिनः,—स्तुतिपाठकाः यस्मिन् तादृशे। निश्वसदिति।—निश्वसन्तः, दीर्घं इति शेषः, निराशाः,—आशाशून्याः, राजजीवने स्वभाग्ये च इति भावः, आसन्नसेवकाः,—अन्तिकचरभृत्या यस्मिन् तथोक्ते। विस्मृतेति।—विस्मृतताम्बूलाः,—परित्यक्ताताम्बूलाः, ["विस्मृतताम्बूल—" इत्यत्र "निःसृतताम्बूल—" इति पाठे,—निःसृतानि—निर्गतानि, परित्यक्तानीत्यर्थः, ताम्बूलानि यासु; ताः इति स एवार्थः] अत एव धूसराधराः,—शोकात् ताम्बूलपरित्यागेन पाण्डुलाधरा इत्यर्थः, वारयोषितः,—वाराङ्गनाः, परिचर्य्यार्थं दर्शनार्थं वा आगता इति भावः, यत्र तथोक्ते।

(७५) विलक्षेति।—विलक्षेण—लज्जितेन इत्यर्थः, रोगापनयनाक्षमत्वात्

वैद्योपदिश्यमानपथ्याहरणावहितपौरोगवे, अनुजीविपीय-
मानोच्चषकधारावारिविनोद्यमानास्यशोषरुजि, राजाभिलाष-
भोज्यमानबहुभुजि, (७६) भेषजसामग्रीसम्पादनव्यग्रसमग्र-
व्यवहारिणि, मुहुर्मुहुः आह्रियमाणतोयकर्म्मान्तिकानुमित-
घोरातुरतृषि, तुषारपरिकरितकरकणिग्रिरीक्ष्यमाणोदञ्चिति,

कणिकेन इति यावत्, वैद्येन—भिषजा, उपदिश्यमानस्य—निर्दिश्यमानस्य इत्यर्थः, पथ्यस्य—राजभोग्यस्य हितजनकस्य आहार्यद्रव्यस्य, रोगोपशमनापधीनिनी भक्ष्य-द्रव्यस्य इति यावत्, आहरणे—आर्याजने, अवहितः,—अभिनिविष्टः, पौरोगवः,—पाकशालाध्यक्षः [परोऽग्रे पाच्यवस्तुन्यित्यर्थः गौः नेतं यस्येति बहुव्रीहौ "गोरतद्धितलुकि" (५।४।९२ पा०) इति सूत्रेण समासान्ते अचि निष्पादितात् पुरोगशब्दात् स्वार्थे "प्रज्ञादिभ्यश्च" (५।४।३८ पा०) इत्यण्] यस्मिन् तथोक्ते, ("रसवत्यान्तु पाकस्थानमहानसम् । पौरोगवस्तदध्यक्षः" इत्यमरः)। अनुजीवीति ।—अनुजीविभिः,—सेवकैः, ("सेवकास्त्वनुजीविनः" इत्यमरः) पीयमानेन उच्चषकधारावारिणा—ऊर्द्धीकृतपानपात्रनिःसृतजलेन, ("चषकोऽस्त्री पानपात्रम्" इत्यमरः) विनोद्यमाना—शाम्यमाना, आस्यस्य—मुखस्य, शोषरुक्—शोषाख्यव्याधिः यस्मिन् तथोक्ते; रोगिणः अधिकजलपाननिषेधात् तदकर्त्तव्येऽपि तत्समीपे सेवकैः उद्धृतजलपात्रात् धारावारि पीयमानं पश्यतः तस्य मुखशोषनिवृत्तिः जायते इति भावः। राजेति ।—राज्ञः,—नृपस्य, अभिलाषेण—इच्छया, भोज्यमानाः,—आहारं कार्य्यमाणाः, बहु-भुजः,—प्रभूतभोजनक्षमाः पुरुषा यत्र तथोक्ते; स्वयं भोक्तुमशक्तस्य जनस्य अन्यभोजन-दर्शनेनापि कियद्धि तृप्तिः जायते इति भावः।

(७६) भेषजेति ।—भेषजस्य—औषधस्य, याः सामग्र्यः,—उपकरणानि, तासां सम्पादने—समाहरणे, व्यग्राः,—व्याकुलाः, समग्राः,—सकलाः, व्यवहारिणः,—व्यवहाराभिज्ञाः, द्रव्यगुणपरीक्षकाः इति भावः, यत्र तादृशे। आह्रियमाणेति ।—आह्रियमाणेन—आकार्य्यमाणेन, तोयकर्म्मान्तिकेन—तोयदानकर्म्मणि निरतेन, पुरुषे-णेति शेषः; अनुमिता—तर्किता; निरन्तरमेव जलदानार्थं सेवकानां समाह्वानप्रवृत्ता-दिति भावः, घोरा—दारुणा, आतुरस्य—रोगिणः, तृषा—पिपासा यस्मिन् तादृशे; घोरज्वरजनितप्रचण्डमुखशोषादौ दुःसहतृष्णोपमर्दर्शनात् इति भावः। तुषारेति ।—तुषारैश्च—नीहारैश्च, तदृता द्रव्यादिना वा, परिकरितः,—संयुक्तः; यद्वा,—

श्वेतार्द्रकर्पटार्पितकर्पूरपरागशीतलीकृतशलाके, (७७) नाग्यान-पङ्कलिप्यमाननवभाण्डगतगण्डूषग्रहणमस्तुनि, तिग्म्यत्कोमल-कमलिनीपलाशप्रावृतमृदुमृणालके, सनालनीलोत्पलपूली-सनाथ-सलिलपानभाजन-भुवि, धारानिपात-निर्वाप्यमाण-

तुषारस्य—हिमस्य, परिकरः,—समारम्भः, घनसान्निवेशः इत्यर्थः, तज्जातः यः करकः, —जलसङ्घातविशेषः, वर्षोपलरूपः इत्यर्थः, "वरफ़" इति बङ्गभाषा; यद्वा,—तुषारैश्च परिकरितः,—मिलितः, यः करकः,—कमण्डलुः, ("कमण्डलौ च करकः" इत्यमरः), तेन, तत्र स्थापनेनेत्यर्थः, शिशिरीक्रियमाणं—शीतलीक्रियमाणम्, उदञ्चित् —अर्द्रीदकं तक्रं यस्मिन् तथोक्ते, ("तक्रं स्यादश्चिम्मथितं पादाम्बुछांभु निर्जलम्" इत्यमरः)। श्वेतेति।—श्वेते—शुभ्रे, धौते इत्यर्थः, आर्द्रे—जलसिक्ते इत्यर्थः, कर्पटे —जीर्णवस्त्रखण्डे, अर्पितैः,—निहितैः, कर्पूराणां—घनसाराणां, [क्रियधातोः "स्वार्ज्ज —" (उ० ४ पा० ६० सू०) इत्यादिना ऊरप्रत्यये खत्वाभावे रूपम्] परागैः,— रजोभिः, शीतलीकृताः,—शिशिरीकृताः, शलाकाः,—शिलाकणिकाः; यद्वा,— सीसकादिकृतवर्तुलायतद्रव्यावयवाः इत्यर्थः, शिरोहृदयादिषु चक्षुःश्रवणाद्यतिसुकुमा-राङ्गेषु च तस्य प्रयोगेण क्षणिकशैत्यविनोदानुभवात् इति भावः, यत्र तथोक्ते।

(७७) नाग्यानेति।—नाग्यानेन—अघनेन, तरलेन इत्यर्थः, [आङ्पूर्व्वकस्य "ग्यायते" इत्यस्य निष्ठायां रूपं, पश्चात नञ्समासः] पङ्केन—कर्दमेन, मुखशोषप्रश-मनाय शीतलीकरणार्थमिति भावः, लिप्यमानं—संयुज्यमानं, यत् नवं—नूतनं, भाण्डं —घटः, तद्गतं—तत्स्थं, गण्डूषग्रहणाय—मुखपूरणाय इत्यर्थः,("गण्डूषौ मुखपूर्त्तौभि-पुष्करप्रसृतौन्मिते" इति मेदिनी) मस्तु—दध्न उपरिभागात् निःसृतं दधिसम्पृक्तं जलं यत्र तादृशं, तस्य मुखशोषादुपशमकरगुणवत्त्वात् इति भावः, ("मस्तु दधिभवं मस्तु पौयूषोऽभिनवं पयः" इत्यमरः)। तिग्म्यदिति।—तिग्म्यता—आर्द्रीकुर्व्वता, जलार्द्रेण इत्यर्थः, कोमलेन—मृदुना, कमलिनीपलाशेन—पद्मिनीपत्रेण, प्रावृतानि—आच्छा-दितानि, मृदूनि—कोमलानि, मृणालकानि—उशीराणि, बिसानि वा, (मृणालं नलदं क्लीवं पुनपुंसकयोर्बिसं" इति मेदिनी। नलदम्—उशीरम्) यस्मिन् तथोक्ते, एतत्स्थलात् अङ्गदाहस्य कथञ्चिदुपशमः स्यादिति द्रव्यगुणविदामाशयः। सना-थेति।—सनालानां—नालसहितानां, नीलोत्पलानाम्—इन्दीवराणां, पूलीभिः,— समूहैः, सनाथा—युक्ता, आच्छादितेति यावत्, सलिलपानभाजनानां—जलपान-पात्राणां, भूः,—स्थानं यस्मिन् तथोक्ते; सुरभितां शीतलतां च नेतुं भूमौ सनाल-

क्वथिताम्भसि, (७८) पटुपाटलशर्करामोदमुचि, मञ्चकाश्रितसिकतिलकर्करीविश्रान्तातुरचक्षुषि, (७९) सजलश्रेवलवलयितगलद्दोलयन्त्रके, गल्वर्कशालाजिरोल्लासितलाजमक्तुनि, पीतमसारपारीपरिगृहीतकर्कशर्करे,

नोत्तोल्लसमूहं विन्यस्य तदुपरि सजलपात्रं स्थापितवान् इति भावः। धारेति।—धारणा—प्रपातानां, जलस्येति भावः, निपातेन—पातनेन, निर्वाप्यमाणानि—शीतलीक्रियमाणानि, क्वथितानि—सिद्धानि, अम्भांसि—जलानि यस्मिन् तादृशं; त्वरितश्रैत्यविधानागमयेति भावः।

(७८) पटुरिति।—पटु—प्रबलं यथा तथा, पाटलायाः,—श्वेतरक्तवर्णायाः, शर्करायाः,—पुष्परागस्य, ("शर्करा स्यादगस्त्यादि पुष्परेणुपिशाचयोः। इक्षुपाक विशेषे च पुमान् मैत्रेयवनाग्र्ययोः" इति रभसः) आमोदं—सौरभं, मुञ्चति—त्यजतीति तस्मिन्। मञ्चकेति।—मञ्चकम्—आधारविशेषः, तत्र आश्रिता—आधारिता, सिकतिला—सिकतामयी, प्रायशो बालुकानिर्मितेति भावः, [सिकताशब्दात् "टेर्ण लुक्लिलचौ च" (५।२।१०५ पा०) इतीलचि रूपम्] या कर्करी—वारिधानी, जलाधारभाण्डविशेषः, ("कर्करो भाण्डभेदे ना दर्पणे कांठने त्रिषु" इति मेदिनी) तस्यां विश्रान्ते—अचलिते, प्रायशः स्थिते इति यावत्, अतितृष्णार्त्तत्वादिति भावः, आतुरस्य—पीडितस्य राज्ञः, चक्षुषी—नयने यत्र। ["विश्रान्तातुरचक्षुषि" इत्यत्र "विश्रान्तान्तरचक्षुषि" इति पाठे,—आन्तरे—अन्तर्निलीने, रोगार्तिशय्यात् कोटरं गते इति भावः, चक्षुषी, राज्ञ इति भावः, यस्मिन् यस्य वा तथोक्ते।

(७९) सजलेति।—सजलैः,—जलसहितैः, ["सजल—" इत्यत्र "सरल—" इति पाठे,—सरलैः,—ऋजुभिः, दीर्घैरिति यावत्] श्रेवलैः,—शैवालैः, वलयितं—वेष्टितं, गलत्—स्यन्दमानं, गोलयन्त्रकं—बहुच्छिद्रं जलपात्रं, सहजधारेति प्रसिद्धं यस्मिन् तथोक्ते; सदनस्य श्रैत्यविधानार्थम् इति भावः। गल्वर्केति।—गल्वर्कः,—मणिविशेषः, तस्य शालाजिरः,—शरावः, गल्वर्कनिर्मित इति यावत्, ("स्याच्छरावस्तु मार्त्तिकः शालाजिरः" इति विकाण्डशेषः) तत्र उल्लासिताः,—उद्भासिताः, लाजमक्तवः,—सृष्टधान्यचूर्णानि यत्र तथोक्ते, कदाचित् पथ्यार्थमिति भावः। पीतेति। —पीतः,—पीतवर्णः, यो ममारः,—मणिविशेषः, तस्य पारी—शरावविशेषः, ("पारी पात्रशरावयोः" इति विश्वः) तत्र परिगृहीताः,—स्थापिताः, कर्कशर्कराः, —श्वेतशर्करा यत्र तादृशे।

(८०)शिशिरौषधरसचूर्णावकीर्णस्फटिकशुक्तिशङ्खसञ्चये, सञ्चित-प्रचुरप्राचीनामलकमातुलुङ्गद्राक्षादाडिमादिफले, (८१) प्रति-याहितविप्रविप्रकीर्य्यमाणशान्त्युदकविप्रुषि, प्रेष्यापेष्यमाण-श्लक्ष्णलेपोपदिग्धदृषदि धवलगृहे स्थितं, (८२) परलोक-विजयाय नीराज्यमानमिव ज्वरज्वलनेन अनवरतपरिवर्त्तनैः तरङ्गिणि शयनीये शेषमिव विषोष्मणा क्षीरोदन्वति विचेष्टमानं,

(८०) शिशिरेति।—शिशिरौषधानां—शैत्यकारकाणाम् औषधानां, रसैः,—द्रवैः, चूर्णैः,—चौर्दैश, अवकीर्णाः,—आकीर्णाः, स्फटिकानां—स्वनामख्यातमणीनां, शुक्तीनां—मुक्तास्फोटानां, शङ्खानां—कम्बूनाञ्च, सञ्चयाः,—समूहाः यस्मिन् तथोक्ते; सर्वेषां शैत्यगुणाधायकत्वात् इति भावः। सञ्चितेति।—सञ्चितानि—सङ्गृहीतानि, औषधार्थमिति भावः, प्रचुराणां—प्रभूतानां, प्राचीनानां—पुरातनानाम्, आमल-कानां—धात्रीफलानां, मातुलुङ्गानां—बीजपूराणां, जम्बीरविशेषाणामित्यर्थः, द्राक्षाणां—मृद्वीकानां, दाडिमादीनाञ्च फलानि यत्र तादृशे।

(८१) प्रतियाहितेति।—प्रतियाहिताः,—प्रतियहं याहिताः, दत्तदक्षिणा इति यावत्, ये विप्राः,—ब्राह्मणाः, तैः विप्रकीर्य्यमाणाः,—समन्तात् विक्षिप्यमाणाः, शान्त्युदकानां—शान्तिजलानां, विप्रुषः,—बिन्दवः यस्मिन् तथोक्ते; सदक्षिणं शान्त्युदकानां यद्दर्शनेन त्वरितफलावाप्तेः इति भावः, ("पृषन्तिबिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः" इत्यमरः)। प्रेष्येति।—प्रेष्याभिः,—दासीभिः, पेष्यमाणेन—चूर्ण्य-मानेन, श्लक्ष्णलेपेन—श्लक्ष्णलेपनद्रव्येण, उपदिग्धाः,—संलिप्ताः, दृषदः,—शिला यस्मिन् तथोक्ते। धवलगृहे—स्फटिकशिलानिर्म्मिते सुधाधवलिते वा भवने।

(८२) परलोकेति।—परलोकस्य—स्वर्गस्य, विजयाय—आत्मसात्करणाय, लाभायेत्यर्थः, ज्वरज्वलनेन—ज्वराग्निना, नीराज्यमानमिव—निर्मञ्छ्यमानमिव, क्रियमाणाऽऽरार्त्तिक्रियमिवेत्युत्प्रेक्षा, विजयप्रवृत्तस्य जिगीषोः नीराजना क्रियते इति प्रसिद्धिः। अनवरतपरिवर्त्तनैः,—अव्याहतं निरन्तरलुण्ठनैः, तरङ्गिणि—भङ्गीमति, सङ्कीर्णशालिनि इत्यर्थः, शयनीये—शय्यातले, शेषमिव—अनन्तनागमिव, विषोष्मणा—विषोत्तापेन। क्षीरोदन्वति—क्षीरसागरे। विचेष्टमानं—लुण्ठन्तम्। अत्र शेषेण महाधैर्य्यसाम्यबोधादुपमालङ्कारः।

(८३) मुक्ताफलबालुकाधूलिधवलितं जलधिमिव क्षयकाले शुष्यन्तं, (८४) कालेन कैलासमिव दशाननेन उद्धियमाणम्, अविरतचन्दनचर्चापराणां परिचारकाणाम् अत्युष्णावयव-स्पर्शभस्मीभूतोदरैः इव धवलैः करैः स्पृश्यमानं, लोकान्तर-प्रस्थितं स्थास्नुना स्वयशसैव चन्दनानुलेपनच्छलेन आपृच्छ्यमानम्, (८५) अविच्छिन्नदीयमानकमलकुमुदेन्दी-वरदलं कालकटाक्षपतनशबलमिव शरीरम् उद्वहन्तं,

(८३) मुक्तेति ।—मुक्ताफलानां—मौक्तिकानां, बालुका इव—सिकता इव, धूलयः,—चूर्णानि, ताभिः धवलितः,—शुभ्रीकृतः, तापशान्त्यै स्वभावशीतलतदुर्ण-लेपनादिति भावः ; अन्यत्र,—मुक्ताफलानामिव बालुकानां धूलयः,—सिकता इति यावत्, ताभिः धवलितं तम् ; अतिशीक्ष्ण्यात् इति भावः ; क्षयकाले—कल्पान्ते, शुष्यन्तं—शोषं गच्छन्तम् ; प्रचण्डरूपेणोदितस्य द्वादशात्मनो दिवाकरस्य प्रखरकिरण-सम्पर्कात् इति भावः ।

(८४) कालेनेति ।—कालेन—यमेन, कृष्णवर्णेन च, दशाननेन—रावणेन, उद्धियमाणम्—उत्क्षिप्यमाणं, स्वभावात् नेतुमभीप्सयेति भावः । अविरतेति ।—अविरतम्—अविच्छिन्नं यथा तथा, चन्दनचर्चायां—चन्दनरसलेपने, परायां—निपु-णानामित्यर्थः, परिचारकाणां—भृत्यानाम् । अतीति ।—अत्युष्णानाम्—अतिसन्तप्ता-नाम्, अवयवानाम्—अङ्गानां, स्पर्शेन—सम्पर्केण, भस्मीभूतानि—दग्धानि, उद-राणि—अन्तराणि येषां तथाभूतैरिव, धवलैः,—श्वेतैः, चन्दनसम्पर्कादिति भावः ; करैः,—हस्तैः, स्पृश्यमानं—संवाह्यमानम् । लोकान्तरप्रस्थितं—लोकान्तरप्रस्थानाय उद्यतमित्यर्थः, अत एव स्थास्नुना—स्थितिशीलेन, ["ग्लाजिस्थश्च क्नुः" (३।२।१३९ पा०) इति क्नुप्रत्यये रूपम्] स्वयशसैव—निजकीर्त्यैव । आपृच्छ्यमानम्—आमन्त्र्य-माणम् ; आश्रितानां प्रभोः प्रस्थानादौ पृच्छादिसज्जनाचारवत्त्वात् इति भावः ।

(८५) अविच्छिन्नेति ।—अविच्छिन्नम्—अनवरतं, दीयमानानि—निधीय-मानानि, कमलानां—पद्मानां, कुमुदानां—कैरवाणाम्, इन्दीवराणां—नीलोत्पला-नाञ्च, दलानि—पत्राणि यस्मिन् तथोक्तम्, अत एव कालस्य—यमस्य, कटाक्षाणां, रक्तश्वेतकृष्णवर्णवत्त्वात् कमलादिसदृशानामपाङ्गदर्शनानामिति भावः, पतनेन—निक्षेपेण, शबलमिव—चित्रितमिव, शरीरं—कलेवरम् ।

(८६) निविड़दुकूलपट्टनिपीड़ितकैशान्तकथ्यमानकष्टवेदनाऽनुबन्धं मूर्द्धानं धारयन्तं, (८७) दुर्द्धरवेदनोन्नमन्नौलशिराजालककरालेन च कालकराङ्गुलिलिख्यमानलेखाख्यातमरणावधिदिवससङ्ख्यानेन इव ललाटफलकेन भयमुपजनयन्तम्, (८८) आसन्नयमदर्शनोद्वेगादिव च किञ्चिदन्तःप्रविष्टतारकं, शुष्यद्दशनपङ्क्तिप्रसृतधूमरदौधितितरङ्गिणीं मृगतृष्णिकामिव उष्णां निश्वासपरम्पराम् उद्वहन्तम्, (८९) अत्युष्णनिश्वासदग्धया इव श्यामायमानया रसनया निवेद्यमान-

(८६) निविड़ेति।—निविड़—दृढ़ेन, दुकूलपट्टेन—सूक्ष्मोत्तरीयवस्त्रेण, निपीड़ितः,—दृढ़निबद्ध इत्यर्थः, यः कैशान्तः,—केशप्रान्तभागः, ललाटादिर्वा इत्यर्थः, तेन कथ्यमानः,—निवेद्यमानः, कष्टः,—क्लेशः, वेदनाऽनुबन्धः,—व्यथानैरन्तर्यं यस्य तथाभूतं, मूर्द्धानं—शिरः, ("मूर्द्धा ना मस्तकोऽस्त्रियाम्" इत्यमरः)।

(८७) दुर्द्धरेति।—दुर्द्धरया—दुःसहया, वेदनया—पीड़या, शिरस इति भावः, उन्नमत्—उद्गच्छत्, नील—कृष्ण, शिराणां—नाड़ीनां, जालक—समूहः, तेन करालं—दन्तुरं, व्याप्तं वा तेन। कालेति।—कालस्य—अन्तकस्य, कराङ्गुलिभिः,—हस्ताङ्गुलिभिः, ["कालकराङ्गुलिभिः" इत्यत्र "कालाङ्गुलिभिः" इति पाठे,—कालस्य—यमस्य, अङ्गुलिभिः; करस्य इति भावः] लिख्यमानया—अङ्क्यमानया, लेखया—रेखया, ख्यातं—प्रकाशितं, मरणस्य—मृत्योः, अवधिदिवसानां—मर्य्यादादिनानां, सङ्ख्यानं—गणना यस्मिन् तेनैव।

(८८) आसन्नेति।—आसन्नम्—आगतप्रायं, यमस्य—कृतान्तस्य, दर्शनम्—अवलोकनं, तेन उद्वेगः,—भीतिः तस्मादिव, किञ्चित—ईषत्। अन्तरिति।—अन्तःप्रविष्टा—कोटरं गता, तारका—कनीनिका यस्य तम्। शुष्यदिति।—शुष्यन्त्याः,—शोषं गच्छन्त्याः, दशनानां—दन्तानां, पङ्क्त्याः,—श्रेण्याः, प्रसृताः,—निःसृताः, धूसराः,—पांशुलाः, दौधितयः,—मयूखाः, तासां तरङ्गाः,—ऊर्मयः सन्ति अस्यामिति तथोक्ताम्। मृगतृष्णिकामिव—मरीचिकामिव, उष्णां—तप्तां, निश्वासपरम्परां—निश्वाससततिम्।

(८९) अत्युष्णेति।—अत्युष्णैः,—अतितप्तैः, निश्वासैः,—नासावायुभिः, दग्धा—भस्मीभूता तया इव; दग्धानां वैवर्ण्योत्पत्तेः इति भावः। श्यामायमानया—

दारुणसन्निपातारम्भम्, (९०) उरःस्थलस्थापितमणिमौक्तिकहारचन्दनचन्द्रकान्तं कृतान्तदूतदर्शनयोग्यमिव आत्मानं कुर्वाणम्, (९१) अङ्गभङ्गवलनोत्क्षिप्तभुजयुगलं पर्य्यस्तहस्तनखमयूखैः धारागृहमिव तापशान्त्यै रचयन्तं, (९२) नेदिष्ठमलिलमणिकुट्टिमादर्शोदरेषु निपतद्भिः प्रतिबिम्बैरपि कृत्या-

श्यामतामापद्यमानया, ["लोहितादि—" (३।१।१३ पा०) इत्यादिना क्यषि क्त आनच्] रसनया—जिह्वया, घोरसान्निपातिकज्वरे रसना क्लाम्यति इति वैद्यकैः। निवेद्यमानेति।—निवेद्यमानः,—कथ्यमानः, प्रकाश्यमान इत्यर्थः, दारुणः,—भीषणः, सन्निपातस्य—दोषत्रयसम्भूतस्य ज्वरस्य, आरम्भः,—उपक्रमः यस्य तथोक्तम्।

(९०) उरःस्थलेति।—उरःस्थलं—वक्षसि, स्थापिताः,—निहिताः, तापशान्त्यै इति भावः; मणीनां—रत्नानां, मौक्तिकानाञ्च—मुक्ताफलानाञ्च, हाराः,—एकावल्यः, चन्दनानि—श्रीखण्डानि, चन्द्रकान्ताश्च—तदाख्यमणिभेदाश्च यस्य तम्; अत एव कृतान्तेति।—कृतान्तः,—अन्तकः, राजा इति भावः, तस्य दूतेन—वार्त्तावहेन, दर्शनं—साक्षात्कारः, तस्य योग्यः,—अनुरूपः तमिव; राजान्तरदूतानां सन्निधौ स्वस्याधिकैश्वर्य्यप्रदर्शनाय राजभिः सुसज्जितैर्भूयते इति भावः। कृतान्तदूतानां दर्शनयोग्यं वा, आ जीवनात्तथाविधालङ्कारालङ्कृतनयनाभिरामरूपादर्शनात् इत्याशयः; [पूर्वपदसङ्कल्प उत्तरपदसङ्कल्पनात्कत्वात् काव्यलिङ्गम्, अतिशयोक्त्यसम्भावनानां मौक्तिकहारादीनाञ्च विन्यासेनासम्भवस्यैव दाहज्वरेण प्रकटनात्, यमदूतदर्शनयोग्यत्वसाक्षात्सम्भावनादुत्प्रेक्षा चेत्यनयोः सङ्करः]।

(९१) अङ्गेति।—अङ्गानाम्—अवयवानां, भङ्गः,—मोटनं, "गामोड़ा" इति बङ्गभाषा, तस्मै वलनं—सञ्चालनं, तेन उत्क्षिप्तम्—उन्नमितं, भुजयुगलं—बाहुद्वयं यस्य तथोक्तम्; अत एव पर्य्यस्ताः,—समन्तात् प्रसृताः, हस्तयोः,—करयोः, नखानां मयूखाः,—किरणाः तैः। धारागृहं—"फ़ोयारा" इति प्रसिद्धं जलयन्त्रागारं, दाहार्त्तस्य तादृशगृहे अवस्थानस्य विधानात् इति भावः। रचयन्तं—कल्पयन्तम्, उत्तालितकरयोः अधोमुखीभूतेभ्यः नखेभ्यः प्रसृतानां शुभ्रकिरणानां जलधारारूपेण अतीयमानत्वादिति भावः।

(९२) नेदिष्ठेति।—नेदिष्ठेषु—अतिसन्निहितेषु, [अन्तिकशब्दात् "अतिशायने—" (५।३।५५ पा०) इत्यादिना इष्ठनि "अन्तिकबाढयोः—" (५।३।६२ पा०)

पातिशयमिव कथयन्तं, सृशन्तीं प्रणयिनीमिव विश्रामभूमिं मूर्च्छां बहु मन्यमानम्, (९३) अन्तकाह्वानाक्षरैः इव सभयभिषग्दृष्टैः अरिष्टैः आविष्टं, महाप्रस्थानकाले स्वसन्तापसन्तानम् आप्तहृदयेषु सञ्चारयन्तम्, अरतिपरिगृहीतम् दुर्ध्यया इव

इत्यादिना नेदादृशः] सलिलेषु—जलेषु, मणिकुट्टिमानां—मणिमयगृहतलानाम्, आदर्शानां—दर्पणानाञ्च, गृहस्थितानामिति भावः, उदरेषु—अभ्यन्तरेषु, निपतद्भिः, —प्रतिफलद्भिः, प्रतिबिम्बैरपि—प्रतिकृतिभिरपि, आतुरस्य राज्ञ इति शेषः ; प्रतिबिम्बानामपि एतादृशः सन्तापः यत, तच्छमनाय तैरपि सलिलादिकं प्रविश्यते, का कथा राज्ञः सन्तापश्च इति भावः। प्रणयिनीमिव—प्रेयसीमिव, सृशन्तीं—शरीरं संवाहयन्तीं, जायमानाञ्च, आश्रयन्तीमित्यर्थः, विश्रामभूमिम्—अतिविश्रान्तिविशिष्टानाम्—आयतानामिति भावः, श्वासानां—निश्वासानां, भूमिः,—स्थानं तामिति च, हेतुभूतामिति भावः ; मूर्च्छायां निश्वासानाम् अत्यायतत्वं प्रसिद्धम् ; तदवस्थायां सन्तापानुभवाभावात् मूर्च्छायाः यातनाप्रशमकत्वेन विश्रामभूमित्वमिति वा, अत एव बहु मन्यमानम्—अतिशयेन आद्रियमाणं, सुचिकित्सकत्वादिति भावः ; यद्वा,—विश्रामभूमिं सृशन्तीमित्यन्वयः, विश्रामस्थानत्वं गतवतीम्, अतिविश्रान्तामिति तु तदर्थः।

(९३) अन्तकेति।—अन्तकस्य—यमस्य, आह्वानम्—आकारणं, तस्य अक्षराणि—वर्णाः, "आगच्छ राजन्! मदालयम्" इत्येवंरूपा इति भावः, तैरिव, तेषां नियतमृत्युज्ञापकत्वात्। सभयैः।—सभयैः,—विभ्यद्भिः इत्यर्थः, भिषग्भिः,—चिकित्सकैः, दृष्टानि—अवलोकितानि तैः। अरिष्टैः,—दुर्लक्षणैः, नियतमृत्युबोधकचिह्नैरिति भावः, "नियतमरणाख्यापकं लिङ्गमरिष्टम्" इत्युक्तेः ; आविष्टं—युक्तम। महेति।—महत् प्रस्थानम्—अन्तकसदनगमनमित्यर्थः, "अङ्ग तैलं तथा मांसं" इत्यादिनियमं यात्राशब्दवत् प्रस्थानशब्दस्यापि महोपपदत्वे प्रोक्तार्थकत्वबोधकत्वदर्शनात्, तस्य कालः,—समयः तस्मिन्। स्वसन्तापानां—निजव्यथानां, सन्तानः,—समूहः तम्। आप्तहृदयेषु—स्वजनमनःसु, सञ्चारयन्तं—सङ्क्रमयन्तं, स्वजनान् नितरां सन्तापयन्तमिति यावत्, पुनरागमनकप्रस्थानेऽपि खांशकात्मायविधेर्गोऽसह्यः, किं पुनरपुनरागमनके इत्याशयः। अरतिपरिगृहीतम्—अरतिः,—एकत्र अनवस्थितिः, अस्थिरता इत्यर्थः, वस्तुवैराग्यं वा, काचित् नारीति भावः, [अत एव लिङ्गात् समासोक्त्यलङ्कारः] तया परिगृहीतः,—आश्रितः तम् ; अत एव दुर्ध्यया इव—

क्षायया मुच्यमानम्,(९४)उद्योगमिव उपद्रवाणां,मर्व्वास्त्रमोक्ष-मिव क्षामतायाः, हस्तीकृतं विहस्ततया, विषयीकृतं वैषम्येण, क्षेत्रीकृतं क्षयेण,गोचरीकृतं ग्लान्या, दृष्टं दुःखासिकया, आत्मी-कृतम् अस्वास्थ्येन, विधेयीकृतं व्याधिना, क्रोडीकृतं कालेन, लक्ष्यीकृतं दक्षिणाश्रया, पीतमिव पीडाभिः, जग्धमिव जागरेण,

---

हेषिणेव, क्षायया—क्षान्त्या, अपरया क्षान्तयेति भावः, मुच्यमानं—परित्यज्यमाणं, सपत्नीमूलभविद्वेषाक्रान्ततयेति तात्पर्य्यम् ; दुःसहवेदनया अधीरं विप्लुभत इति भावः।

(९४) उद्योगमिव—उपक्रममिव, स्वपराक्रमप्रदर्शनाय विविधचेष्टायाः स्थान-मिवेत्यर्थः,उपद्रवातिशययुक्तमिति भावः ; उपद्रवाणां—रोगाख्यकदोषप्रकोपजन्यानाम-न्यविकाराणां, हिक्कामूर्च्छाऽतीसारादीनामिति यावत्। सर्वास्त्रमोक्षमिव—सर्वेषाम् अस्त्राणाम्—आयुधानां, मोक्षः,—प्रक्षेपः तमिव, क्षामतायाः,—क्षीणतायाः, क्षीण-तया सर्वथा आक्रान्तमिति भावः। विहस्ततया—व्याकुलीभावेन, (विहस्तव्याकुली समौ" इत्यमरः) हस्तीकृतम—आयत्तीकृतमित्यर्थः, [इति प्रतीयमानोत्प्रेक्षा] अत्याकुलमिति भावः। वैषम्येण—विषमावस्थया, दारुणावस्थयेत्यर्थः, विषयीकृत—स्वगोचरीकृतं, हस्ते कृतमित्यर्थः, विषमावस्थाप्राप्तमिति भावः। क्षयेण—नाशेन, अल्पतया इति यावत्, धातूनामिति भावः, क्षेत्रीकृतं—स्थानीकृतम्, आधारीकृत-मित्यर्थः, क्षीणधातुकमिति भावः। गोचरीकृतं—विषयीकृतं, कवलितमित्यर्थः, ग्लान्या—वेदनाविशेषाऽभावेन हर्षाभावेनेत्यर्थः, अतीव ग्लानमिति यावत्। दृष्टं—यत्नं, दुःखासिकया—कष्टावस्थानेन, शय्याऽऽसनादिष्वपि अनुभूतक्लेशमिति यावत् ; यद्वा,—दुःखासिकया—क्लेशखञ्जन, दृष्टं—ज्ञातम्। आत्मीकृतम—आयत्ततां नीतम्, अस्वास्थ्येन—रोगजनितेन क्लेशेन, आत्मीयमिति मत्वा अस्वास्थ्यमाविष्टं, क्षणमपि नानुभूतस्वास्थ्यमिति भावः। विधेयीकृतं—आयत्तीकृतम्, आयत्तीकृतमित्यर्थः, ("विधेयौ विनयग्राही वचनेस्थित आश्रवः" इत्यमरः) ; अविचारेण प्रतिपालित-व्याध्यादेशमिति भावः। क्रोडीकृतम्—उत्सङ्गं नीतमित्यर्थः, कालेन—कृतान्तेन, अचिरमेव कालभवनगमनोन्मुखमिति भावः। लक्ष्यीकृतम—दृष्टम् ; दक्षिणाश्रया —दक्षिणया दिशा, यमपालितयेति भावः। पीतमिव—ग्लपितमिव, कङ्कालमात्रावशे-षत्वादिति भावः। जग्धमिव—भक्षितमिव, जागरेण—अनिद्रया ; व्याधिजदुःखेन

निगीर्णमिव वैवर्ण्येन, (९५) ग्रासीकृतं गात्रभङ्गेन, क्रियमाणमिव विपद्भिः, वध्यमानमिव वेदनाभिः, लुठ्यमानमिव दुःखैः, आदित्सितं दैवेन, निरूपितं नियत्या, घ्रातम् अनित्यत्वेन, अभिभूयमानम् अभावेन, परिकलितं परासुतया, दत्तावकाशं क्लेशस्य, निवासं वैमनस्यस्य, समीपे कालस्य, अन्तिकेऽन्त्योच्छ्वासस्य, मुखे

निद्राऽभावादिति भावः। निगीर्णमिव—कवलितमिव, वैवर्ण्येन—मालिन्येन, रोगजक्लेशेन कान्तिक्षयात् अतीव विवर्णमिति भावः।

(९५) गात्रभङ्गेन—"गा मोड़ा" इति वङ्गभाषया प्रसिद्धेन दृढभोटनेन, ग्रासीकृतं—कवलीकृतम्, [अत्र "इव"पदाप्रयोगात् प्रतीयमानाक्रियोत्प्रेक्षाऽलङ्कारः]; दीर्घप्रायत्वात् निरन्तरकृतगात्रभङ्गमिति भावः। क्रियमाणमिव—चीर्यमाणमिव, नीयमानमिवेत्यर्थः, विपद्भिः,—आपद्भिः, विपदाक्रान्तमित्यर्थः। वध्यमानमिव—विभज्यमानमिव; मुखे नासिकायाञ्च श्वासेन, चक्षुषि कोटरप्रविष्टत्वेन, कर्णे बाधिर्य्येण, एवम् एकैकस्मिन् अङ्गे एकैकया वेदनया विभज्य ग्रस्यमाणमिवेत्यर्थः। लुठ्यमानमिव—स्वातन्त्र्यात् वश्यानङ्गीकारत्वेन बलपूर्व्वकं नीयमानमिव, अतीव दुःखमनुभवन्तमित्यर्थः। आदित्सितं—गृहीतमिष्टम्। [आददातेः सनि "सनि—" (७।४।५४ पा०) इत्यादिना अत्र इत्सनि "निष्ठा" (३।२।१०२ पा०) इति कर्म्मणि क्तः]। दैवेन—प्राक्तनेन कर्म्मणा, दैवानां समूहः दैवं तेन, दैवसमूहेन इत्यर्थो वा। निरूपितं—निर्द्धारितं, गृहीतमिति भावः, नियत्या—भाग्येन, ("भाग्यं स्त्री नियतिर्विधिः" इत्यमरः)। घ्रातमिव—सृष्टमिव, अनित्यत्वेन—अस्थायित्वेन; अचिरमेव नश्यमानत्वात् इति भावः। अभिभूयमानम्—आक्रम्यमाणम्, अभावेन—अविद्यमानतया। परिकलितं—कवलितं, परासुतया—गतप्राणतया, मृतधर्म्मेणेत्यर्थः, ("परासुप्राप्तपञ्चत्वपरेतप्रेतसंस्थिताः। मृतप्रमीतौ त्रिष्वेते" इत्यमरः)। दत्तः,—अर्पितः, अवकाशः,—स्थानं येन तम्; क्लेशेन यद्दृच्छया निरन्तरं क्लिश्यमानमिति भावः। निवासम—आश्रयं, वैमनस्यस्य—विकृतमनस्कतायाः; विधिबोधितान् अवश्यकरणीयान् अभिलषितानसम्पाद्य असमयपरलोकगमनाशङ्कया मुहुर्मुहुः विमनायमानमिति भावः। समीपे, वर्त्तमानमिति उत्तरेणान्वयः। कालस्य—यमस्य, प्रायेण निधनं गतमिति भावः। अन्तिके—सन्निधौ, अन्त्योच्छ्वासस्य—चरमनिश्वासस्य, प्राणापानवायोः वियोगरूपस्येत्यर्थः। मुखे—वदने, कण्ठे इति

महाप्रयासस्य, हारि दीर्घनिद्रायाः, जिह्वाग्रे जीवितेशस्य वर्त्तमानं, विरलं वाचि, चलितं चेतसि, विह्वलं वपुषि, क्षीणमायुषि, प्रचुरं प्रलापे, सन्ततं श्वासेषु, जितं जृम्भिकाभिः, पराधीनम् आधिभिः, (९६) अनुबद्धम् अनुबन्धिकाभिः, पार्श्वोपविष्टया अनवरतरोदनोच्छूननयनया गृहीतचामरिकयाऽपि निश्वसितैः एव वीजयन्त्या विविधौषधिधूलिधूसरितशरीरया मुहुर्मुहुः,—"आर्य्यपुत्र! स्वर्पिष?" इति व्याहरन्त्या

भावः; महाप्रयासस्य—महतः क्लेशस्य। हारि—हारसमीपे, दीर्घनिद्रायाः,—चिरनिद्रायाः, मृत्योरित्यर्थः। जिह्वाग्रे—रसनाग्रे, जीवितेशस्य—यमस्य, ("जीवितेशो यमे पुंसि त्रिषु स्याज्जीवितेश्वरे" इति मेदिनी)। विरलम्—अल्पं, वाचि—वाक्यकथने; वाक्यं कथयितुमशक्नोमिति भावः। चलितं—भ्रष्टं, चेतसि—चित्ते, असह्यक्लेशेन विगतचित्तमित्यर्थः; नष्टसंज्ञामिति भावः। विह्वलं—विवशं, वपुषि—देहे, अवशशरीरमित्यर्थः। क्षीणं—क्षयं गतम्, आयुषि—जीवितकाले। प्रचुरं—प्रभूतं, प्रलापे—असम्बद्धभाषणे, अर्थरहितवचने इत्यर्थः, ("प्रलापोऽनर्थकं वचः" इत्यमरः); अनवरतं प्रलपन्तमिति भावः। सन्ततं—निरन्तरं, श्वसितेषु—श्वासनिःसरणे, पुनः पुनः अतिशयेन निश्वसन्तमित्यर्थः। जृम्भिकाभिः,—जृम्भणैः, वदनव्यादानपूर्व्वकश्वासग्रहणमोचनरूपाभिः आलस्यप्रकटनक्रियाभिरित्यर्थः, जितम्—अभिभूतं, मुहुर्मुहुः जृम्भावेशेन अवसन्नमित्यर्थः। आधिभिः,—मनःपीडाभिः; सहसा प्रेयोमरणपरित्यागोद्भवाभिः इत्याशयः; पराधीनम्—आयत्तीकृतं, प्रियपुत्रकलत्रादीनामायुर्वियोगसम्भावनया पीड्यमानमिति निष्कर्षः।

(९६) अनुबन्धिकाभिः,—गात्रसन्धिपीड़ाभिः, यदा,—एधानरोगानुवर्त्तिनीभिः, मूर्च्छापिपासादिभिः पीड़ाभिरिति भावः, ("अनुबन्धः शिरो दीर्घोत्पाटे मुख्यानुयायिनि" इति मेदिनी) अनुबद्धम्—अविच्छिन्नम, अतियन्त्रितमित्यर्थः। पार्श्वोपविष्टया—पार्श्वे आसीनया। अनवरतेति।—अनवरतेन—अविरतेन, रोदनेन—क्रन्दनेन, उच्छूने—स्फीते, नयने—लोचने यस्याः तथाभूतया। गृहीतचामरिकया—चामरेण वीजयन्त्येति यावत्। निश्वसितैः,—मुहुर्मुहुः पतद्भिः दीर्घनिश्वासैरिति यावत्। विविधेति।—विविधानां—नानाप्रकाराणाम्, औषधीनां—वीरोपशमकश्चलतादीनां, धूलिभिः,—चूर्णैः, धूसरितम्—ईषत्पाण्डुभूतं, शरीरं—गात्रं यस्याः तथाभूतया। व्याहरन्त्या—जल्पन्त्या; श्रीकसिन्धुपारादर्शनेन विकलाय-

देव्या यशोवत्या शिरसि वज्रमिव च म्रियमाणं पितरम् अद्राक्षीत्।

दृष्ट्वा च (९७) प्रथमदुःखसम्पातमथ्यमानमतिः आशङ्कित इव भागधेयेभ्यः समभवत्। अन्तकपुरवर्त्तिनमिव च पितरम् अमन्यत। निराकृत इव च अन्तःकरणेन त्यागम् आसीत्। अवधूतश्च धैर्य्येण, क्षेत्रीकृतः क्षोभेण, रिक्तीकृतो रत्या, विषयीकृतो विषादेन, पावकमयमिव हृदयम् उद्वहन्, विषमविषदूषितानीव मुह्यन्ति इन्द्रियाणि बिभ्राणः, तमसा रसातलमपि विशेषयन्, शून्यत्वेन आकाशमपि अतिशयानो न

मानयीति भावः। अत्र महाराजः आलम्बनविभावः, तस्य महाक्लेशानिष्टापत्तिप्रभृतयः उद्दीपनविभावाः, क्रन्दितभूपातादयः अनुभावाः, मोहविषादादयश्च व्यभिचारिणः, एतैः व्यक्तीकृतः शोकः करुणरसरूपतामापन्नः इत्यनवद्यम्।

(९७) प्रथमेति।—प्रथमेन—आद्येन, इतः पूर्वं कदाप्यननुभूतत्वात् इति भावः, दुःखानां—मनःपीडानां, सम्पातेन—समागमेन, मथ्यमाना—विलोड्यमाना, मतिः,—बुद्धिः यस्य तथाभूतः, भागधेयेभ्यः,—दुर्भाग्येभ्यः; पितृविनाशहेतुभ्य इति भावः; आशङ्कित इव—जातशङ्क इव, समभवत्—समजायत, पितृविनाशं शङ्कितवानित्यर्थः। अन्तकपुरवर्त्तिनमिव—यमपुरगतमिव। अन्तःकरणेन—अन्तरिन्द्रियेण, मनसा इत्यर्थः, निराकृत इव—भग्नित इव, पितृमहाक्लेशप्रदर्शनातिशोकक्षोभेण नष्टसंज्ञ इवेत्यर्थः। अवधूतः,—विचलितः, धैर्य्यविहीन इत्यर्थः; कठोराघाते तथाभावात इति भावः। क्षेत्रीकृतः,—विषयीकृतः, क्षोभेण—दुःखेन, दुःखाधीन इत्यर्थः। रिक्तीकृतः,—विरहितः, रत्या—सन्तोषेण, अरतियुक्त इत्यर्थः। विषयीकृतः,—गोचरीकृतः। विषादेन—अप्रसादेन, अप्रसन्नतयेत्यर्थः, विषेण इति यावत। पावकमयमिव—अग्निमयमिव, महातापात्: ज्वलितमिव इत्यर्थः, अतीव सन्तप्यमानमानसः इति भावः। विषमेति।—विषमेण—दारुणेन, विषेण—हलाहलेन, दूषितानीव—विकृतानीव, अत एव मुह्यन्ति—मोहं गच्छन्ति, विमूढानीति यावत; व्यापाररहितानीति भावः; इन्द्रियाणि—चक्षुरादीनि। तमसा—अन्धकारेण, शोकेन च, शोकजमोहेन इत्यर्थः,("तमो ध्वान्ते गुणे शोके क्लीवे वा ना विधुन्तुदे" इति मेदिनी)। रसातलं—पातालमपि, विशेषयन्—अतिशयानः, अत्यतमससङ्कुलात् पातालादपि

अविन्दत कर्त्तव्यम्। पस्पर्श च हृदयेन भियम् उत्तमाङ्गेन च गाम्।

(९८) अवनिपतिस्तु दूरादेव दृष्ट्वा अतिदयितं तनयं तदवस्थोऽपि निर्भरस्नेहावर्जितः प्रधावमानो मनसा प्रसार्य भुजौ "एहि एहि"इति आह्वयन् शरीरार्द्धेन शयनात् उदगात्। ससम्भ्रमम् उपसृतञ्च एनं विनयावनम्रम् उन्नमय्य बलात् उरसि निवेश्य, विश्रान्तिव प्रेम्णा निशाकरमण्डलमध्यं, मज्जन् इव अमृतमये महासरसि, (९९) स्नान् इव महति हरिचन्दनरसप्रस्रवणे, अभिषिच्यमान इव तुषाराद्रिद्रवेण, पीड़यन्

तमसाऽभिभूत इत्यर्थः। शून्यत्वेन—विरहितत्वेन; नीरूपमाकाशमिव सर्व्वद्रव्यसम्पन्नोऽप्यसौ पितृवियोगमन्यावनया सर्वैरेव विरहितमिव आत्मानम् अमन्यत इति भावः। आकाशमपि—गगनमपि, अतिशयानः,—अभिभवन्। कर्त्तव्यं—तात्कालिककार्य्यं, न अविन्दत—न अवबुबुधे। भियं—भौतिम, ("भौतिर्भीः साध्वस भयम" इत्यमरः); साश्रुहृदयः अभवदिति भावः। उत्तमाङ्गेन—शिरसा, गां—भूमिं, पस्पर्श—स्पृष्टवान्, भूमिपतितः पितरं प्रणनामेत्यर्थः। अत्र प्रस्तुतयोः हृदयोत्तमाङ्गयोः स्पर्शरूपैककियाऽभिसम्बन्धात् तुल्ययोगिताऽलङ्कार इति ज्ञेयम्।

(९८) अवनिपतिः,—भूपालः, प्रभाकरवर्द्धन इति यावत्। अतिदयितम्—अतिप्रियम्। तदवस्थोऽपि—तथा अवस्थोऽपीत्यर्थः। निर्भरेति।—निर्भरेण—निरतिशयेन, स्नेहेन—प्रेम्णा, आवर्जितः,—आप्लुतः। मनसा—चित्तेन, न तु शरीरेण; उत्थानसामर्थ्याभावादिति भावः। शरीरार्द्धेन—पूर्व्वकायेन, कांटदशात् शिरःपर्य्यन्तेनेत्यर्थः। उदगात—उत्तस्थौ। ससम्भ्रमं—सत्वरम्। उपसृतम्—उपगतम्। प्रेम्णा—स्नेहेन। निशाकरमण्डलमध्यं—चन्द्रमण्डलाभ्यन्तरम्; तनयालिङ्गनस्य दुःसन्तापनिवारकत्वेनातीव प्रीतिजननत्वात् चन्द्रमण्डलमध्यप्रवेशवदानन्दानुभव इति बोद्धव्यम्; चन्द्रमण्डलस्यापि हृदयाह्लादकपीयूषगुणवत्त्वेनोक्तत्वेन तथाविधत्वादिति भावः; एवममृतमयादिष्वपि उन्नेयम्। अमृतमये महासरसि—अमृतपूर्णह्रदे।

(९९) स्नान् इव—स्नानं कुर्व्वानिव, [आधातोः "लटः—" (३।२।१२४ पा०) इत्यादिना अप्रथमान्तेन सामानाधिकरण्ये शतृशानचोः विधानात् कथमत्र लक्षणानुगमः? अत्र दीक्षिताः,—"लडित्यनुवर्त्तमाने पुनर्लड्ग्रहणम् आधुनिकभा-

अङ्गैः अङ्गानि, कपोलेन कपोलम् अवघट्टयन्, निमीलयन् पक्ष्मायमाणश्रिताजस्राश्रुविस्राविणौ विलोचने, विस्मृतज्वरसंज्वरः सुचिरम् आलिलिङ्ग। (१००) कथङ्चिदपि चिरात् विमुक्तम् उपसृत्य कृतनमस्कारं प्रणतजननीकम् उपागतम् आसीनञ्च शयनान्तिके पिबन् इव विगतनिमेषनिश्चलेन चक्षुषा व्यलोकयत्। पश्यंश्च पुनःपुनः वेपथुमता पाणितलेन। स्पृशन्नाम-

---

नार्थं, तेन प्रथमा सामान्यनिकरणेऽपि क्वचित्" इति शङ्करप्रत्ययः]। हरिचन्दनेति। —हरिचन्दनस्य—हरेः,—इन्द्रस्य, ("हरिश्चन्द्रार्कवातास्त्र·····। ·····शक्रे लोकान्तरे पुमान्॥" इति मेदिनी) प्रियं चन्दनं—देवतरुविशेषः इत्यर्थः, गोशीर्षाख्यः मलयैकदेशजः चन्दनभेदो वा, ("हरिचन्दनमस्त्री स्यात् देवतानां महीरुहे। नपुंसकन्तु गोशीर्षे ज्योत्स्नाकुङ्कुमशीरयोः॥" इति मेदिनी) हरेः,—विष्णोः, प्रियं चन्दनं, श्वेतचन्दनमित्यर्थो वा, तेषामतीव शैत्यगुणवत्त्वेन दाहनाशकत्वात्, तस्य रसः,—द्रव एव, प्रस्रवणं—निर्झरः तस्मिन्। तुषारगिरिद्रवेण—हिमाचलस्रावेण, अङ्गैः, स्वीयैरिति भावः, अङ्गानि, कुमारस्येति भावः; पीडयन्—बद्धाकाङ्क्षितत्वात् निबिडमाश्लिष्यन्नित्यर्थः। अवघट्टयन्—सङ्घर्षयन्। निमीलयन्—मुद्रयन्; आत्मजाश्लेषजहर्षभरेण अपूर्वानन्दोदयात् इति भावः। पक्ष्मेति।—पक्ष्मणां—नेत्रलोमाम्, अग्रेषु—प्रान्तेषु, श्रितानि—सङ्गतानि, अजस्राणि—अविच्छिन्नानि, अश्रूणि—वाष्पाणि, विस्रवतः, —विगलतः इति तथोक्ते, विलोचने—नेत्रे। विस्मृतेति।—विस्मृतः,—अननुभूतः इत्यर्थः, ज्वरस्य—दाहज्वरस्य इति भावः, संज्वरः,—सन्तापः येन तथाभूतः, ("सन्तापः संज्वरः समौ" इत्यमरः)।

(१००) कथङ्चिदपि—अतिकृच्छ्रेण, अनिच्छन्नपीत्यर्थः; पुनरप्राप्तिदुर्भावनोदयादिति भावः। विमुक्तं—त्यक्तम्। कृतनमस्कारं—कृतप्रणामम्; पितेव इति भावः। उपसृत्य—समीपं गत्वा; मातुरिति भावः। प्रणतेति।—प्रणता—वन्दिता, जननी—माता येन तथाभूतम्। उपागतम्—उप—समीपे, आगतं—प्राप्तवन्तम्; मातृप्रणामानन्तरमिति भावः। आसीनम्—उपविष्टम्। शयनान्तिके—शय्यासन्निधौ। विगतेति।—विगतः,—परिहृतः, निमेषः,—निमीलनं यस्मिन् तथाभूतम्, अत एव निश्चलं—स्थिरं तेन। वेपथुमता—कम्पमानेन, [वेपृधातोः "ट्टितोऽथुच्" (३।३।८९ पा०) इत्यथुच्, ततः "तदस्य—" (५।२।९४ पा०) इत्यादिना

कण्ठस्य कृच्छ्रात् इव अवादीत्,—"वत्स! कृशोऽसि" इति। भण्डिस्तु अकथयत्,—"देव! तृतीयमह्नः कृताहारस्य अस्य अद्य" इति।

(१०१) तत् श्रुत्वा वाष्पवेगस्खलमानाक्षरं कथञ्चिदपि आयतं निश्वस्य उवाच,—"वत्स! जानामि त्वां पितृप्रियम् अतिमृदुहृदयम्। ईदृशेषु विधुरयति धीमतोऽपि धियम्। अतिदुर्दरा बान्धवस्नेहः सर्व्वप्रमाथी; अतो न अर्हसि आत्मानं शुचे दातुम्। (१०२) उद्दामदाहज्वरदग्धोऽपि दग्धे खलु अहम् अधिकतरम् अनेन आयुष्मदाधिना। निर्घृणमिव ग्रस्तं तक्षणोति मां त्वदीयः तनिमा। सुखञ्च राज्यञ्च वंशश्च प्राणाश्च

मतुप्]। चयेति।—चयेण—चौणतया, क्षामः,—क्षीणः, अवरुद्धः इत्यर्थः, कण्ठः,—गलदेशः, कण्ठध्वनिरिति यावत्, यस्य तथाभूतः। भण्डिः,—हर्षस्य मातुलात्मजः। अद्य—अस्मिन्नहनि, तृतीयम् अहः,—त्रयाणां पूरणभूतं दिनम्। कृताहारस्य—कृतभोजनस्य; पथि दिवसत्रयमुपोषितवान्, इदानीमप्यसौ न भुक्तवान् इति भावः।

(१०१) तत्—दिनत्रयाभोजनमित्यर्थः। वाष्पेति।—वाष्पवेगेन—उद्गताश्रुप्रवाहेण, स्खलमानानि—अवरुध्यमानानि, अक्षराणि—वर्णाः यस्मिन् तदयथा तथा। आयतं—दीर्घम्। पितृप्रियं—पिता प्रियः यस्य, पितरि प्रियो वा तं, पितृभक्तमित्यर्थः। अतिमृदुहृदयम्—अतिकोमलान्तःकरणम्; अल्पेनैव महदुःखेन त्वम् अतिविधुरतां गतोऽसीति भावः। ईदृशेषु—एवंविधेषु, महत्सु दुर्गतिष्विति भावः। विधुरयति—व्याकुलयति। धीमतोऽपि—बुद्धिमतोऽपि, अतिधीरस्यापीत्यर्थः, धियं—मतिं, ("धीः प्रज्ञा शेमुषी मतिः" इत्यमरः)। अतिदुर्दरः,—अतिदुःखेन म्रियते इति तथोक्तः; अतिदुःखेनापि त्यक्तुमशक्य इति भावः। सर्व्वप्रमाथी—सर्व्वजनत्यथाकरः। शुचे—शोकाय, ["चतुर्थी—" (२।३।१३ पा०) इत्यादिना चतुर्थी] दातुं—शोकाधीनं कर्त्तुमित्यर्थः।

(१०२) उद्दामेति।—उद्दामेन—अत्युत्कटेन, दाहज्वरेण—दाहप्रधानेन ज्वरेण, पित्तज्वरसन्तापेनेत्यर्थः, दग्धोऽपि—सन्तप्तोऽपि। दग्धे—भस्मीभूते। आयुष्मदाधिना—आयुष्मतः,—दीर्घायुषः, वत्सस्य ते इत्यर्थः, आधिना—मनःपीडया, मन्निमित्तयेति यावत्, ("पुंस्याधिर्मानसी व्यथा" इत्यमरः)। निर्घृणं—तीक्ष्णम्।

त्वयि मे स्थिताः। यथा मम, तथा सर्वासां प्रजानाम्। त्वद्विधानां पीडाः पीडयन्ति सकलमेव भुवनतलम्। न हि अल्पपुण्यभाजां वंशम् अलङ्कुर्वन्ति भवादृशाः। (१०३) फलमसि अनेकजन्मान्तरोपार्जितस्य अकलुषस्य कर्मणः। करतलगतमिव कथयन्ति चतुर्णाम् अपि अर्णवानाम् आधिपत्यं ते लक्षणानि। त्वज्जन्मनैव कृतार्थोऽस्मि, निरभिलाषोऽस्मि जीवितव्ये। भिषगनुरोधः पाययति माम् औषधम्। (१०४) अपि च सर्वप्रजापुण्यैः सकलभुवनतलपरिपालनार्थम् उत्पत्स्यमानानां भवादृशां जन्मग्रहणोपायः पितरौ। प्रजाभिस्तु बन्धु-

---

तक्ष्णोति—निकृन्तति, कृशीकरोति वा। तनिमा—तनोः,—क्षीणस्य भावः, कृशत्वमित्यर्थः। सुखमेत्यादि।—त्वयि वत्से कुशलिनि सति मम सुखादिकं सर्वमेव अधिकतरं स्थास्यति इति भावः।

(१०३) अनेकेति।—अनेकेषु—बहुषु, जन्मान्तरेषु—पूर्वपूर्वजन्मसु, उपार्जितम्—अनुष्ठितं तस्य, अकलुषस्य—अनघस्य, कर्मणः,—सुकृतरूपस्य, फलं—परिणामभूतः, असि—भवसि, त्वम् इति शेषः; मदीयपूर्वपूर्वजन्मार्जितबहुसुकृतिपरिणामेन पुण्यसन्तानरूपः विशुद्धसत्त्वगुणसम्पन्नस्त्वम् उत्पन्नोऽसि इति भावः। करतलगतमिव—हस्ततलस्थितमिव, चतुर्णामपि, न त्वेकस्य द्वयोस्त्रयाणां वा इत्यपिकारार्थः। अर्णवानां—सागराणाम्; आधिपत्यं—प्रभुत्वम्। लक्षणानि—शुभचिह्नानि। त्वज्जन्मनैव—तव उत्पत्तिमात्रेणैव, नान्येनेत्यर्थः; अन्ययोगव्यवच्छेदकोऽयमेवकारः। कृतार्थः,—चरितार्थः, सिद्धकाम इत्यर्थः। निरभिलाषः,—निस्पृहः। जीवितव्ये—प्राणधारणविषयभूतवस्तुनि; सर्वगुणवतः तव जननेनैव देवादिऋणेभ्यो मुक्तिलाभात् प्राणधारणफलं प्राप्तम्, अतोऽन्यफलाकाङ्क्षाभावात् कृतकृत्योऽस्मि इदानीमिति भावः। यदि त्वं जीवने वीतस्पृहः, तत् कथमौषधं सेव्यते? इत्यत आह, भिषगिति।—भिषजां—चिकित्सकानाम्, अनुरोधः,—निर्बन्धः, आग्रहातिशय इति यावत्; माम् औषधं पाययति, न तु जीवितार्थिता इति भावः।

(१०४) पक्षान्तरमाह, अपि चेत्यादिना। सर्वेति।—सर्वासां प्रजानां—जनानां, पुण्यैः,—सुकृतैः; न केवलं ममेति भावः। सकलभुवनतलपरिपालनार्थं—सकलभूमण्डलरक्षणार्थम्, उत्पत्स्यमानानां—जनिष्यमाणानां, ["क्ष्ट.—"(३।३।१४

मन्तो राजानः, न ज्ञातिभिः। तत् उत्तिष्ठ, कुरु पुनरेव सर्वाः क्रियाः। कृताहारे च त्वयि अहमपि स्वयम् उपयोक्ष्ये यथम्" इत्येवम् (१०५) अभिहितस्य च अस्य धक्ष्यन्निव हृदयमतितरां शोकानलः सन्दुधुक्षे। तत्क्षमात्रम् स्थित्वा पिता पुनः आहारार्थम् आदिश्यमानो धवलगृहात् अवततार; चकार च चेतसि,—"अकाण्डे खलु अयं समुपस्थितो महाप्रलयो व्यस्य इव वज्रपातः। सामान्योऽपि तावत् शोकः, मोक्ष्यामि मरणम्;

मा०) इत्यादिना ग्यनच्] भवादृशां—भवदिधानां, जन्मयष्टीपाय:,—जन्मयष्टिरस्य —उत्पत्तिलाभस्य, उपाय:,—साधनं, निमित्तभूतो इत्यर्थः; [उद्देश्यविधेयभावस्थले लिङ्गवचनैकत्वे नास्ति तत्रता इति वचनविषयोऽयं:]। पितरौ—माता च पिता च तौ; उक्तञ्च वसिष्ठेन,—"एकशेषेऽधिकसमत्वः पुत्रो मातापितृनिमित्तकः" इति; भवादृशां महात्मनां अरीरक्षिषुणार्थमेव पितोः जीवनधारणस्य प्रयोजनीयता, तव जन्मना तन्निवृत्तेः इदानीं सञ्जीवनस्य तथा नास्ति काप्युपयोगिता इति भावः। प्रजाभिः,—मृतलकासिभिर्जनैः, बन्धुमन्तः,—स्वजनवन्तः, राजानः,—नृपाः, न ज्ञातिभिः,—पितृादिभिः स्वजनैः, बन्धुमन्त इति भावः; प्रजा एव राज्ञां बन्धवः, न ज्ञातयः, परस्परपोषकत्वादिभिः अन्वयव्यतिरेकात् इत्याशयः, अतः मदभावे न त्वं निर्बान्धवो भविष्यसि, न च त्वया मदर्थे शोचितव्यम्; यथा प्रजानां हितं भवति, तथा क्रियतामिति निष्कर्षः। सर्वाः क्रियाः,—स्नानाहारादिकाः इत्यर्थः; त्वयि जीवति प्रजाः सनाथाः भविष्यन्ति, तेन आत्मजीवनमवश्यमेव त्वया रक्षितव्यम्, अतः स्नानाहारादिषु लोपेक्षा कर्तव्या इति भावः। उपयोक्ष्ये—स्नादिष्यामि।

(१०५) अभिहितस्य—उक्तस्य, पिता इति शेषः। अस्य—हर्षस्य। धक्ष्यन्निव —भस्मीकरिष्यन्निव। अतितराम्—अतिशयेन। सन्दुधुक्षे—सन्दिदीपे, पितृजीवननैराश्यात् इति भावः। आदिश्यमानः,—आत्मानमानः, अनुरुध्यमान इति यावत्। अकाण्डे—सहसा। महाप्रलयः,—कल्पान्तकल्पः महाक्षयः, अत्यसाधनधिकरणीमृतकाल इत्यर्थः। व्यसः,—विरसः, विपर्यय इत्यर्थः। सामान्यः,—अल्पः। शोकः, —प्रियजनविच्छेदजं दुःखमित्यर्थः। मोक्ष्यामि—परित्यास्यामि, मरणं—मृत्युः; मरणे निश्वासापगमः स्यात्, शोकरूपे मरणे तु तत्सद्भाव इति भावः। श्वासवत्त्वात् व्यवच्छेदेन मरणादतिरिच्यते शोकः इति व्यतिरेकध्वनिः।

(१०६) अनुपदिष्टौषधो महाव्याधिः, अमस्त्रीकरणोऽग्निप्रवेशः, अनुपरतस्य एव नरकवासः, निर्ज्योतिः अङ्गारवर्षम्, अप्रकलीकरणं क्रकचदारणम्, (१०७) अव्रणो वज्रसूचीपातः; किमुत विश्लेषाश्रितः? किमत्र करवाणि?" इति।

(१०८) राजपुरुषेण अधिष्ठितस्य गत्वा स्वधाम (१०९) धूममयान् इव कृताश्रुपातान्, अग्निमयान् इव जनितहृदय-

(१०६) अनुपदिष्टेति।—न उपदिष्ट—न कथितम्, औषध—भेषजं यस्य तथाभूतः, स्त्रीकौशलेनैवरहित इत्यर्थः। ["अनुपदिष्टौषधः" इत्यत्र "अनुपदिष्टौषधी" इति पाठान्तरम्] महाव्याधिः,—महान् रोगः, महती व्याधिः स्त्रीकौशलेन प्रतीकारः स्यात्, शोकस्य तु न तथेति भावः। अमस्त्रीकरणः,—अदहन इत्यर्थः, अग्निप्रवेशोऽदाहः स्यात्, शोके तु न तथा, किन्तु केवलं ज्वलनमिति भावः। अनुपरतस्य—अमृतस्य, जीवत इत्यर्थः, नरकवासः,—नरके—निरवच्छिन्नदुःखनिलये स्थानविशेषे, वासः,—अवस्थानं, मृतस्यैव यमयातनैकात् नरकेऽवस्थान, शोकार्तस्य तु तदभावेऽपि इति भावः। निर्ज्योतिः,—निष्प्रभम्। अङ्गारवर्षं—ज्वलदग्निस्फुलिङ्गवृष्टिः; तादृशाङ्गारवर्षे दह्यमानो दृश्यते, शोकवर्षे तु अन्तर्वेगात् बहिः निष्प्रभता एव भवतीति भावः। अप्रकलीकरणम्—अखण्डीकरणम्। क्रकचदारणं—करपत्रविदारणम्; करपत्रच्छेदने वस्तुनः द्वेधा त्रेधा वा विपाटनं भवति, शोके तु न तथा, परं तादृशः क्लेश एवेति भावः।

(१०७) अव्रणः,—अक्षतकरणः, वज्रसूचीपातः,—कुलिशशलाकापतनम्; वज्रसूचीपाते शरीरं क्षतं स्यात्, शोकपाते तु न तथा, किन्तु तत्पतनक्लेश इति भावः; यद्वा,—हीरकसूच्यरवेधः, हीरकस्य अतीव काठिन्यात् तेन विद्धायाः निरतिशयक्लेशदायकत्वात्। किमुत—किं पुनः। विश्लेषाश्रितः,—विश्लेषम् आश्रितः, असामान्य इत्यर्थः, पितृवियोगज इति भावः; सामान्येऽपि शोके यदा एवं क्लेशः सञ्जायते, तदा पित्रादिवियोगजशोकस्य दारुणत्वे किं पुनर्वक्तव्यम्? इति निष्कर्षः।

(१०८) "राजपुरुषेण" इत्यादौ "कथनात् अश्रुपातात्" इत्युत्तरवाक्यम्; राजपुरुषेण—राजकीयेन, ["षष्ठी" (२।२।८ पा०) इति समासः] अधिष्ठितः,—अनुगतः। स्वधाम—स्वमावासम्।

(१०९) कथनात् विभिन्नाः, धूमिताः।—कृतः,—विहितः, अश्रूणां—बाष्पाणां, पातः,—पतनं यैः तान्, अत एव धूममयानिव—धूमाक्रान्तानिव धूमाच्छन्नानिव वा;

दाहान्, विषमयान् इव दत्तमूर्च्छाविगान्, महापातकमयान् इव उत्पादितघृणान्, क्षारमयान् इव आनीतवेदनान् कतिचित् कवलान् अग्रहीत्। (११०) आचमंश्च चामरग्राहिणम् आदिदेश,—"विज्ञाय आगच्छ, कथम् आस्ते तातः" इति। गत्वा च प्रतिनिवृत्य च,—"देव! तथैव" इति विज्ञापितः तेन अगृहीतताम्बूल एव उत्तान्यता मनसा अस्ताभिलाषिणि सवितरि सर्वान् आहूय उपहरे,—"वैद्याः! किमस्मिन्नेवंविधे

ष्टेन यथा दृष्टिविघातकरम् अश्रु आविर्भवति, तथा तत्कवलग्रहणकाले उच्छ्वसितशोकाश्रुणा दृष्टेरवरोधादिति भावः। जनितेति।—जनितः,—उत्पादितः, हृदयस्य—अन्तःकरणस्य, दाहः,—ज्वलनं यैः तान्, अत एव अग्निमयानिव—अनलसन्निभानिति यावत्। दत्तेति।—दत्तः,—जनित इत्यर्थः, मूर्च्छायाः,—मोहस्य, वेगः,—जवः, प्रसर इति यावत्, यैः तान्, अत एव विषमयानिव—विषमिश्रितानिवेत्यर्थः; विषस्य मोहजनकत्वादिति भावः। उत्पादितेति।—उत्पादिता—जनिता, घृणा—जुगुप्सा, पितुरनिष्टाशङ्कया स्वजीवने निस्पृहत्वादिति भावः, यैः तान्, अत एव महापातकमयानिव—"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः तत्संसर्गश्च पञ्चमः॥" इत्युक्तानि पञ्चविधानि महान्ति—घोराणि, पातकानि—पातित्यजननानि, तन्मयान्—तत्प्रचुरान् इव; पापानि यथा लोकैः जुगुप्स्यन्ते, तथा तदानीम् अस्य कवलेषु घृणा आसीदिति भावः। आनीतवेदनान्—जनितक्लेशान्, अत एव क्षारमयान् इव—लवणमयान् इव; यथा समधिकलवणव्यञ्जनादिभक्षणे क्लेशः स्यात्, तथा तत्कवलग्रहणेऽस्य जात इति भावः; यद्वा,—क्षारमयानिव—मृष्टकादिभक्षणकृतसुतीक्ष्णरसविशेषात्मकानिवेत्यर्थः, दैवस्य कुत्रचित्कदाचित् खिन्नः क्षारो यथा अतीव सन्तापकरो भवति, तथा तदन्नभक्षणेऽपि सन्तापोऽस्य महाशोकक्षतहृदयस्य जात इति भावः, ("क्षारो रसान्तरे धूर्ते लवणे काचभस्मनोः" इति मेदिनी)। कतिचित्—स्वल्पान् इत्यर्थः, दिनानीति यावत्; पितुर्निर्देशगौरवात् इति भावः; कवलान्—अन्नग्रासान्।

(११०) आचमंश्च—आचमनं कुर्वंश्च। चामरग्राहिणं—बीजनकारिणमिति यावत्। किं—कीदृक्। तथैव—यथा प्रागासीत्, अधुनाऽपि तत्सदृश एव इत्यर्थः। अगृहीतताम्बूलः,—अभक्षितवदनः। उत्तान्यता—ऊर्ध्वता। अस्ताभिलाषिणि—

विधेयमधुना ?" इति विषण्णहृदयः पप्रच्छ। ते तु व्यज्ञापयन्, —"देव! धैर्यमवलम्बस्व; कतिपयैः एव वासरैः पुनः स्वां प्रकृतिमापन्नं स्वस्थं श्रोष्यसि पितरम्" इति।

तेषान्तु भिषजां मध्ये (१११) पौनर्वसवो युवा, अष्टादशवर्षदेशीयः, तस्मिन्नेव राजकुले कुलक्रमागतः, (११२) गतः पारम् अष्टाङ्गस्य आयुर्वेदस्य, भूभुजा सुतनिर्विशेषं लालितः,

---

अस्ताचलं गन्तुमभिलषति। सर्वान्, वैद्यानिति शेषः। उपक्षरे—रहसि, विजने इत्यर्थः, ("रहोऽल्लिकमुपक्षरे" इत्यमरः)। वैद्याः! इति सम्बोधनम्। अस्मिन्नेवंविधे —ईदृशे रोगे, अस्यामवस्थायामित्यर्थः। विधेयं—कर्त्तव्यम्। ते—वैद्याः। व्यज्ञापयन्—न्यवेदयन्। कतिपयैः,—स्वल्पैः। वासरैः,—दिवसैः, [अपवर्गे तृतीया]। स्वां प्रकृतिं—निजस्वभावं, स्वाहजिकीमवस्थामित्यर्थः। आपन्नं—प्राप्तम्। स्वस्थ—प्रकृतिस्थं, रोगमुक्तमिति यावत्। "स्वां प्रकृतिमापन्नं स्वस्थम्" इत्यनेन प्रकृतिम्—कृत्यक्तरूपत्वम्, अव्यक्ततत्त्वमित्यर्थः; चित्त्यादिमहाभूतेषु लयरूपमिति भावः; "मरणं प्रकृतिः शरीरिणाम्" इत्युक्तेः, आपन्नं—प्राप्तं, पृथिव्यादिरूपेण परिणतिमित्यर्थः; पार्थिवादिदेहस्य क्षये तत्तदंशस्य तत्र तत्र परिणमनादिति भावः; स्वस्थम्—अविकृतं, "विकृतिर्जीवितमुच्यते बुधैः" इति स्मरणात् कृतमिति भावः, स्वर्गस्थमिति वा, इत्यपि ध्वन्यते; "जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च। तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥" इति शास्त्रात्।

(१११) पौनर्वसवः,—पुनर्वसुनक्षत्रे जातः, पुनर्वसोः अपत्यं पुमान् पौनर्वसव इति वा; यद्वा,—पुनर्वसुना मुनिना प्रोक्तम् आयुर्वेदं वेत्ति अधीते वेति पौनर्वसवः। अष्टादशवर्षदेशीयः,—प्रायेण अष्टादशवर्षवयस्कः, ["दृष्टदसमासौ—" (५।२।९० या०) इत्यादिना देशीयरप्रत्ययः]। कुलक्रमागतः,—वंशपरम्परया चिकित्सकपदाधिष्ठित इत्यर्थः।

(११२) अष्टाङ्गस्येति।—अष्टौ अङ्गानि यस्य तथोक्तस्य; तथा चोक्तम्,—"कायबालग्रहोर्द्धाङ्गशल्यदंष्ट्राजरावृषान्। अष्टावङ्गानि तस्याहुः चिकित्सा तेषु संश्रिता॥" इति। "ततोऽल्पायुष्ट्वम् अल्पमेधस्त्वञ्चावलोक्य नराणां भूयोऽष्टधा प्रणीतवान्, शल्यं, शालाक्यं, कायचिकित्सा, भूतविद्या, कौमारभृत्यम्, अगदतन्त्रं, रसायनतन्त्रं, वाजीकरणतन्त्रम्" इति सुश्रुतसंहिता। आयुर्वेदस्य—आयुर्विद्यते—लभ्यते येन सः, आयुरनेन विन्दति—लभते इति वा, आयुर्वेत्ति—जानाति अनेनेति वा, आयुर्वेदः,—

प्रकृत्यैव अतिपटीयस्या प्रज्ञया यथावत् विज्ञाता व्याधिस्वरूपाणां, रसायनो नाम वैद्यकुमारकः मासः तूष्णीम् अधोमुखोऽभूत्। पृष्टश्च राजसूनुना,—"सखे! रसायन! कथय तथ्यं,यदि असाधु इव पश्यसि?" इति। सोऽब्रवीत्,—"देव! श्वः प्रभाते यथाऽवस्थितम् आवेदयितास्मि" इति।

अत्रैव च (११३) अन्तरे भवनकमलिनीपालः कोकम् आश्वासयन् अपरवक्त्रमुच्चैः अपठत्,—

"विहग! कुरु दृढं मनः स्वयं त्यज शुचमास्व विवेकवर्त्मनि।
सह कमलसरोजिनीश्रिया अयति सुमेरुशिरो विरोचनः" ॥४॥

वैद्यकुमारकमित्यर्थः, तस्य। पार मतः,—पारदृश्वा, अष्टाङ्गायुर्वेदज्ञातीत्यर्थः। नृपसुता—राज्ञा। प्रकृत्यैव—स्वभावेन एव, अतिपटीयस्या—अतिचतुरया, अतितीक्ष्णयेत्यर्थः, प्रज्ञया—बुद्ध्या, यथावत्—यथार्थं, व्याधिस्वरूपाणां—रोगप्रकृतीनाम। विज्ञाता—वेत्ता। मासः,—क्षणपूर्वलोचनः, राज्ञः अतिप्रियत्वात्। तूष्णीं—मौनम्। राजसूनुना—हर्षेण। तथ्यं—प्रकृतवृत्तान्तम्। असाधु—अशुभं, दुर्लक्षणमित्यर्थः; अवश्यम्भाविषु शोभनं निष्प्रयोजनम् इत्याशयः। श्वः,—परदिने, आगामिनि दिने इत्यर्थः, ("अनागतेऽह्नि श्वः" इत्यमरः)। यथाऽवस्थितं—प्रकृतावस्थामित्यर्थः। आवेदयितास्मि—कथयितास्मि।

(११३) अन्तरे—अवसरे। भवनेति।—भवनकमलिनीपालः,—कमलं—कलम् अस्यामस्तीति कमलिनी—पुष्करिणी, ("कलिलं कमलं कलम्" इत्यमरः) भवने—गृहे, या कमलिनी, तां पालयति—रक्षति इति, गृहसरसीरक्षकः इत्यर्थः, कोकं—चक्रवाकं, ("कोकश्चक्रवाकः" इत्यमरः) मानविच्छेदविधुरमिति भावः। आश्वासयन्—प्रबोधयन् सान्त्वयन् वा, अपरवक्त्रं—छन्दोविशेषम्, "अयुजि नयरसा गुरुः समे तदपरवक्त्रमिदं नजौ जरौ" इत्युक्तलक्षणं, तान्त्रवङ्गीकामिति यावत्।

कोकसादृश्यं यदृच्छया पांशुलेनावेन शोकेन राज्ञः आत्मविनाशं सूचयन्नाह, विहगेति।—हे विहग!—पक्षिन्! चक्रवाक इति यावत्, त्वं स्वयम्—आत्मना, मनः,—चित्तं, दृढं—धीरमिति यावत्, कुरु—विधेहि; शुचं—शोकं, मानविच्छेदविधुरतामिति भावः, त्यज—मुञ्च, विवेकवर्त्मनि—ज्ञानमार्गे, संसारसुखस्य चञ्चलप्रदर्शिनि इति भावः, आस्व—तिष्ठ, स्थिरो भवेत्यर्थः। विरोचनः,—सूर्यः, ("सूर-

(११४) तच्च आकर्ण्य वाङ्मित्रज्ञः पितरि सुतरां जीविताशां शिथिलीचकार। गतेषु च भिषक्षु च्युतधृतिः त्रपामुखे क्षितिपालसमीपम् एव पुनः आरुरोह धवलं गृहम्। (११५) तत्र च,—"दाहो महान्, आहर हारान् हरिचि !, मणिदर्पणान् मे देहे देहि वैदेहि !, हिमलवैर्लिम्प ललाटं लीलावति !, घन-

मृत्योरित्यादि···। चिरभावार्थवाचनः॥" इत्यमरः) कमलसरोजिनीप्रिया—कनकयुक्ता सरोजिनी—तत्प्रसूनसमन्विता पद्मिनी, पद्मलतेत्यर्थः, तस्याः श्रीः,—शोभा तया, सह—सार्द्धं, सुमेरोः,—कनकाचलस्य, शिरः,—शृङ्गं, श्रयति—अवलम्बते, श्रयसीति भावः; विधातुर्नियोगोऽयं यत्, प्रतिदिनं सूर्यस्य उदयास्तमने स्याताम्, उदये युष्माकं सम्मेलनात् सुखम्, अस्तमने च वियोगदुःखं, तदत्र नियते अपरिहार्ये च विषये तथा शोकं परिहृत्य धैर्यमवलम्ब्यतामिति निष्कर्षः। तेजस्विनामपि पतनं नियतमेव इति सम्भवदस्तुनः विम्बानुविम्बत्वेन बोधनात् निदर्शनाऽलङ्कृतिः; अपि च राज्ञः प्रभाकरवर्द्धनस्य मृत्युतुल्यस्य राज्यसंस्था सह सुमेरुशिरोरुहस्वर्गप्राप्तिः अचिरभाविनी इति अवश्यम्भाविनि विषये कुमारेण त्वया धैर्यावलम्बनमेव कर्त्तव्यमिति प्रस्तुतस्य, अप्रस्तुतेन विहगसमाश्वासनरूपेण वस्तुना प्रतीतेः अप्रस्तुतप्रशंसाऽलङ्कारः, समाश्रयस्य सम्भवभेदादेव भेदेन अभेदाध्यवसायरूपातिशयोक्तिमूलकसङ्कीर्णालङ्कारस्य इत्येतेषामङ्गाङ्गिभावेन संसृष्टिः सङ्करः। अपरवक्त्रं छन्दः॥४॥

(११४) तत्—पठितश्लोकम्। वाङ्मित्रज्ञः,—वाचः,—वाक्यस्य, निमित्त—शुभाशुभलक्षणं जानातीति तथोक्तः। सुतरां—यतो वाङ्मित्रज्ञः अत एवेत्यर्थः, कथितवाक्यस्य लोकपालालङ्कारसूचकत्वादिति भावः। शिथिलीचकार—मन्दीचकार। भिषक्षु—वैद्येषु। च्युतधृतिः—विच्युतधैर्यः; आत्मवर्गाणां वियोगाशङ्कायां तथाभवनस्य नियतत्वात् इति भावः। त्रपामुखे—रात्रौमुखे। क्षितिपालसमीपं—राजालिकम्। ["आरुरोह धवलं गृहम्" इत्यत्र "आरुरोह" इत्येतावन्मात्र एव पाठः पुस्तकान्तरे]।

(११५) "तत्र च" इत्यादौ "आरुदेव निशामनैषीत्" इत्युत्तरेणान्वयः। तत्र—क्षितिपालसमीपे धवलगृहे। आहर—अर्पय, अङ्गेषु इति शेषः योज्यः। हरिचि !—तदाख्यायाः परिचारिकायाः सम्बोधनम्; एवमुत्तरत्र। हिमलवैः,—तुषारकणैः, "बरफ" इति बङ्गभाषया प्रसिद्धैः घनीभूततुषारखण्डैरित्यर्थः, चन्दनबिन्दुभिरिति वा, ("हिमं तुषारसलयोर्द्वयोः स्यान्नपुंसकम्" इति मेदिनी)। लिम्प

सारस्वोदधूलीर्निधेहि धवलाक्षि !, निक्षिप चक्षुषि चन्द्रकान्तं कान्तिमति !, कपोले कलय कुवलयं कलावति !, चन्दनचर्चां रचय चारुमते !, पाटय पटमारुतं पाटलिके !, मन्दय दाहम् इन्दुमति ! अरविन्दैः, जनय जलार्द्रया मुदं मदिरावति !, समुपानय मृणालानि मालति !, तरलय तालवृन्तम् आवन्तिके !, (११६) मूर्द्धानं धावमानं बधान बन्धुमति !, कन्धरां धारय धारणिके !, उरसि सशीकरं करं कुरु वरङ्गवति !, संवाहय बाहू बलाहिके !, पीडय पादौ पद्मावति !, गृहाण गाढमङ्गम् अनङ्गसेने !, का वेला विलासवति ! नैति निद्रा, कथाः कथय बहुविधाः !" इत्येवंप्रायान् पितुरालापान् कर्णवरतम् आकर्णयन् दूयमानहृदयो दुःखदीर्घां जागरेण निशाम् अनैषीत्।

—खिन्नम् कुरु। घनेति।—घनसारस्य—कर्पूरस्य, ("अथ कर्पूरमस्त्रियाम्। घनसारः…॥" इत्यमरः) क्षीदाः,—चूर्णानेव, धूलयः,—पांशवः ताः, निधेहि—अर्पय। चन्द्रकान्तं—तदाख्यमणिशिलाविशेषं, तस्य शीतलत्वात्। कपोले—गण्डदेशे। कलय—निधेहि। कुवलयं—नीलोत्पलम्। चन्दनचर्चां—चन्दनलेपम्। पाटय—सञ्चालय इत्यर्थः। पटमारुतं—वस्त्रव्यजनं, "टानापाखा" इति बङ्गभाषया प्रसिद्धम्। मन्दय—ह्रासय। अरविन्दैः,—पद्मैः, पद्मपर्णैरिति यावत्। जलार्द्रया—जलेनार्द्रा तया, जलयुक्तातालवृन्तेन इत्यर्थः, ("धुविवं तालवृन्तं स्यात् तदुत्क्षेपणञ्च तत्। जलेनार्द्रं जलार्द्रा स्यात्" इति वैजयन्ती) मुदं—प्रीतिं, दाहशान्त्या इति भावः। समुपानय—समाहर, ["समुपानय" इत्यत्र "समुपनय" इति पाठान्तरम्]। तरलय—सञ्चालय।

(११६) मूर्द्धानं—मस्तकं, धावमानं—लुठन्तं, यातनाऽतिशयात् चलन्तमित्यर्थः, बधान—स्थगय, धारयेत्यर्थः। कन्धरां—ग्रीवाम्। उरसि—वक्षसि, सशीकरं—सान्द्रकणं, जलार्द्रमित्यर्थः। कुरु—स्थापयेत्यर्थः। संवाहय—परामृश, मर्दय इति वा। पीडय—संवाहय। गाढं—दृढं यथा तथा। अङ्गं—इक्षपदाद्यवयवम्। का वेला—कियान् समयः, बहुचक्षमित्यर्थः; कियन्मात्रावशिष्टा क्लेशनिशा इत्यर्थो वा, व्याधीनां रात्रावेव विशेषप्रकोपात् तस्याः दुष्परत्वप्रतीतेः सार्वत्रिकत्वादिति भावः। एति—आगच्छति। कथाः कथय—मया सह आलापयानि कुरु इत्यर्थः। एवंप्रायान्

(११७) उषसि च अवतीर्य राजद्वारदेशोपसर्पिणा परिवर्हकेन उपस्थापितेऽपि तुरङ्गे चरणाभ्यामिव आजगाम स्वमन्दिरम्। तत्र च (११८) त्वरमाणो भ्रातुः आगमनार्थम् उपर्य्युपरि क्षिप्रपातिनो दीर्घाध्वगान् प्रजविनश्च उष्ट्रपालान् प्राहिणोत्। प्रवालितवदनं परिजनोपनीतमपि प्रतिकर्म न अग्रहीत्। (११९) अग्रतः स्थितानां राजपुत्रयूनां विमनसां "रसायनो रसायनः" इति जल्पितम् अश्रौषीत्। पर्य्यपृच्छच्च तान्,—"भद्राः! किं रसायनः?" इति। पृष्टाश्च ते

—उत्तरूपभूयिष्ठान्; यातनासूचकानिति भावः। अनवरतं—निरन्तरम्। आकर्णयन् —शृण्वन्। दूयमानहृदयः,—तप्यमानचित्तः। दुःखदीर्घां—दुःखेन—क्लेशेनेति यावत्, दीर्घाम्—आयतां, दीर्घवत् प्रतीयमानामित्यर्थः। अनैषीत्—अतिवाहयामास।

(११७) उषसि—प्रभाते। अवतीर्य—अवरुह्य, धवलगृहादिति शेषः। राज्ञेति।—राज्ञः द्वारदेशे—राज्ञाधिष्ठितधवलगृहद्वारि, उपसर्पति—उपतिष्ठते इति तथोक्तेन, परिवर्हकेन—अश्वपालेन। उपस्थापिते—आनीते, हर्षस्य आरोहणार्थमिति भावः।

(११८) त्वरमाणः,—सत्वरो भवन्। भ्रातुः,—राज्यवर्द्धनस्य। उपर्य्युपरि—निरन्तरं, क्षणेक्षणमित्यर्थः; [अत्र "उभसर्व्वतसोः—" इत्यादिना न द्वितीया, "उपर्य्यध्वसः सामीप्ये" (८।१।७ पा०) इत्युपर्य्यादिशब्दानां सामीप्ये द्वित्वविधानात् तदर्थे सप्तम्यै द्वितीया, इह न तथा प्राप्तिरिति सङ्क्षेपः]। क्षिप्रपातिनः,—द्रुतगामिनः। दीर्घाध्वगान्—दीर्घं—बहुविस्तृतम्, अध्वानं—मार्गं, गच्छन्ति—गन्तुं शक्नुवन्तीत्यर्थः, तथोक्तान्। प्रजविनः,—प्रकृष्टवेगशालिनः। उष्ट्रपालान्—उष्ट्ररक्षकान्, उष्ट्रारोहिणो दूतानिति यावत्, उष्ट्राणां द्रुततया दूराध्वगमने सामर्थ्यातिशयादिति भावः, ["अनभिहिते" (२।३।१ पा०) इत्यधिकृत्य "कर्म्मणि—" (२।३।२ पा०) इत्यादिना द्वितीया]। प्राहिणोत्—प्रेषयामास। प्रतिकर्म—प्रसाधनम्, ("आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम्" इत्यमरः); पिहितिच्छदाशङ्कया विमनस्कत्वात् इति भावः।

(११९) अग्रतः,—पुरतः, स्थितानां—दण्डायमानानां, राजपुत्रयूनां—तरुणानां राजसुतानाम्। विमनसां—विकृतचेतसां, दुःखातिशयादिति भावः। जल्पितं —भाषितम्। अश्रौषीत्—अशृणोत्। भद्राः,—साधवः, सच्चरिता इत्यर्थः, ("भद्रः

सर्वे समम् एव तूष्णीम्बभूवुः। भूयोभूयश्च (१२०) अनुबध्यमाना दुःखेन कथञ्चथमपि आचचक्षिरे,—"देव! पावकं प्रविष्टः" इति। तच्च श्रुत्वा (१२१) मुष्ट इव अन्तस्तापेन मद्यो विवर्णताम् अगात्। उत्प्लाव्यमानमिव च न शशाक शोकाम्बं धारयितुं हृदयम्। आसीच्च अस्य चेतसि,—"कामं स्वयं न भवति, न तु श्रावयति अप्रियं वचनम् अरतिकरम् इतर इव अभिजातो जनः। (१२२) कृच्छ्रे च यथा अनेन अनुष्ठितम्, उज्ज्वलीकृतम् अधिकतरं ज्वलनप्रवेशेन कल्याणप्रकृति कान्तस्वरमिव कौल-

श्रिये खञ्जरीटे···। त्रिषु श्रेष्ठे च साधौ स्यात्···॥" इति मेदिनी)। समसमेव—तुल्यकालमेव, युगपदेवेत्यर्थः। तूष्णीम्बभूवुः,—मौनिनो जाताः; किंकर्तव्यविमुग्धचेतना आसन् इति भावः।

(१२०) अनुबध्यमानाः,—अनुरुध्यमानाः। कथञ्चथमपि—केनापि प्रकारेण, अतिकृच्छ्रेणेत्यर्थः। आचचक्षिरे—ऊचुः। पावकम्—अग्निं, प्रविष्टः, रसायन इति शेषः। राज्ञा सुतनिर्विशेषं पालितेन तेन वैद्यकुमारेण राज्ञि प्रीतिबाहुल्यात् मध्यावितत्तदियोयमौकं साद्भुतशक्तवता, पूर्वप्रतिश्रुतिमनुस्त्य कुमारहर्षाय अप्रियसत्यम् आवेदयितुमसमर्थतया वा प्रागेव अग्निप्रवेशौकारि इति बोध्यम्।

(१२१) मुष्टः,—दग्धः। अन्तस्तापेन—मनःसन्तापेन। मद्यः,—तत्क्षणमेव। विवर्णतां—मलिनतां, कृष्णवर्णतामित्यर्थः। अगात्—प्राप्त। उत्प्लाव्यमानमिव—उच्छ्रियमाणमिव। धारयितुं—स्थिरीकर्तुम्। कामम्—इष्टं, पर्याप्ततयेत्यर्थः,("कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम्" इत्यमरः)। स्वयम्—आत्मना। न भवति—न जीवति। अरतिकरम्—असन्तोषकरम्। इतर इव—नीच इव। अभिजातः,—सत्कुलजातः, पण्डितो वा, ("अभिजातः कुलीने स्यात् व्याप्यपण्डितयोरपि" इति मेदिनी) कुलीनः पण्डितो वा स्वजीवनविसर्जनमपि इष्टत्वेन स्वीकरोति, किन्तु परपीडाकरं तथ्यमपि अप्रियं वचः न कथयति, "सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्" इति नीतिस्मरणादिति भावः।

(१२२) कृच्छ्रे—क्लेशे, क्लेशेनापि उच्चारयितुमशक्ये दुष्टमरतिकराप्रियसत्यकथनरूपे वाक्यसङ्कटे इत्यर्थः, अनेन—रसायनेन, यथा—यत्, अग्निप्रवेशरूपं यत्कार्येनित्यर्थः, अनुष्ठितम्—आचरितम्; अत्र "एतेन" इति पदमूह्यमेयम्; एतेन ज्वलनप्रवेशेन—अग्निप्रवेशेन करणेन, कल्याणप्रकृति—सौम्यस्वभावं, सुखस्वभावञ्च,

पुत्रमस्य" इति। पुनश्च अचिन्तयत्,—"समुचितम् एव अथवा स्नेहस्य इदम्। किमस्य तातो न तातः? किं वा अम्बा न जननी? वयं न भ्रातरः? (१२३) अन्यस्मिन्नपि तावत् स्वामिनि दुर्लभीभवति भवन्ति असवो म्रियमाणा क्षौद्दितवो लोके, किमुत अमृतमये जीवितानां निर्व्याजबान्धवे अवश्यप्रसादे सुगृहीतनाम्नि तातै? सम्प्रति साम्प्रतम् आचरितमनेन आत्मानं दहता। (१२४) किं वा अस्य आकल्पम् अवस्थितस्य स्वेयसा

कार्त्तस्वरमिव—सुवर्णमिव, विमलमुज्ज्वलमित्यर्थः, ("स्वर्णं सुवर्णं··· । रूक्मं कार्त्तस्वरं जाम्बूनदमष्टापदीऽस्त्रियाम् ॥" इत्यमरः) अस्य—आत्मनः, रसायनस्येत्यर्थः, कौलपक्ष—कुलपक्षः,—कुलीनतनयः, तस्य भावः, सत्कुलमभूतत्वमिति फलितम्। उज्ज्वलीकृतं—सुवर्णसमसमुज्ज्वलगुणांशुभिः भास्वरीकृतमित्यर्थः; उदात्ताचारवत्त्वात् पूतीकृतमिति भावः। समुचितं—सुसदृशम्। इदम्—अग्निप्रवेशरूपानुष्ठानम्। तातः, —पिता, अस्माकमिति शेषः, अस्य—रसायनस्य, तातो न किम?—तात एवेत्यर्थः। अम्बा—माता, अस्माकमिति भावः, किं न जननी? अस्येति शेषः, जनन्येव, आ बाल्यात् आत्मजनिर्विशेषेण पालनादिति भावः। वयं न भ्रातरः? किम् इति शेषः; भ्रातर एव; पितृस्यां सह्यैव पालनाद्युपचारवत्त्वेन वर्द्धनात् इति भावः; अत एवानेन पितृवियोगशङ्कया यत् कृतं, तत् युक्तमेवेति हृदयम्।

(१२३) अन्यस्मिन्—इतरस्मिन्, मत्पितुरिति शेषः, यादृशि तादृशि इति भावः। स्वामिनि—प्रभौ। दुर्लभीभवति—दुष्प्राप्ये सति, मृते सतीत्यर्थः। असवः, —प्राणाः, ("स्त्रियां भृत्यासवः प्राणाः" इत्यमरः)। म्रियमाणाः—त्यज्यमाणाः इत्यर्थः। क्षौद्दितवः,—खल्वाटकराः; यथातथाविधस्यापि स्वामिनः वियोगे प्राणधारणस्य अनौचित्यात् इति भावः। लोके—जगति। किमुत—किं पुनः। अमृतमये—सुधामये, निरतिशयबान्धवत्वेनैवतथात्वमित्यर्थः। अजीविनाम्—आश्रितानाम्। निर्व्याजबान्धवे—अकपटसुहृदि। अवश्यप्रसादे—सफलानुग्रहे, आत्मनिर्विशेषेण पोषणादिति भावः। सुगृहीतनाम्नि—प्रातःस्मरणीये, "स सुगृहीतनामा स्यात् यः प्रातः स्मर्यते बुधैः" इति लक्षणात्। सम्प्रति—इदानीम्; साम्प्रतं—युक्तं, ("युक्ते हे साम्प्रतं स्थाने" इत्यमरः)। आचरितम्—अनुष्ठितम्। अनेन—रसायनेन। आत्मानं—स्वदेहम्। दहता—भस्मीकुर्वता।

(१२४) आकल्पं—प्रलयकालपर्यन्तम्, अवस्थितस्य—वर्त्तमानस्य। श्रेयसः,—

यशोमयस्य दह्यते ? (१२५) पतितः स केवलं दहने, दग्धास्तु वयम्। धन्यः खलु असौ अग्रणीः पुण्यभाजाम्। अपुण्यभाक् तु इदमेव राजकुलं, कुलपुत्रेण यत् तादृशा वियुक्तम्। अपि च ममापि कः खलु एतेषां प्राणानां (१२६) कार्य्यातिभारः, कृत्यशेषो वा ? का वा व्यापृतता, येन न अद्यापि निष्ठुराः प्राणाः प्रतिष्ठन्ते ? को वा अन्तरायो हृदयस्य, येन सहस्रधा न दलति ?" इति। दुःखार्त्तश्च न जगाम राजसद्म। समुत्ससर्ज च सर्व्वकार्य्याणि। (१२७) शयनीये निपत्य उत्तरीयवाससा सोत्तमाङ्गम् आत्मानम् अवगुण्ठ्य अतिष्ठत्।

अतिथितिशीलस्य। यशोमयस्य—पुण्ययशसः, यशोरूपस्य देहस्य वा। किं दह्यते ?—किं भस्मीक्रियते ? अनलेनेति शेषः, "चलच्चित्तं चलद्वित्तं चलज्जीवनयौवनम्। चलाचलमिदं सर्व्वं कीर्त्तिर्यस्य स जीवति॥" इति स्मरणात्; दग्धीभूतनश्वरदेहोऽपि सुकृतलक्ष्मेनाविनश्वरेण यशःशरीरेण आकल्पजीवी अयमिति भावः। इहाधिकस्य न्यूनेन विनिमयात् चमत्कारातिशयनिबन्धना परिवृत्तिरलङ्कारः।

(१२५) सः,—रसायनः। दहने—अग्नौ। केवलं पतितः,—प्रविष्ट एव, न तु दग्धः, अविनाशियशोलाभादिति भावः। वयं दग्धाः,—वयमेव भस्मीभूताः, तच्छोकेन, पितृजीवननैराश्यशोकेन चेति भावः। असौ—रसायनः। अग्रणीः,—अग्रगण्यः; पितृतुल्यस्य राज्ञः शोकभोगावसराभावात्, प्रभोः जीवनरक्षणे असामर्थ्यतया अकिञ्चित्करत्वबोधेन राजभक्त्या स्वजीवनपरित्यागाच्चेति भावः। तादृशा—तथाविधेन, कुलपुत्रेण—सत्कुलजातेन, वियुक्तं—विरहितम्।

(१२६) कार्य्यातिभारः,—कार्य्यगौरवम्। कृत्यशेषः,—करणीयावशेषः, अस्ति इति शेषः। व्यापृतता—कार्य्यनियोगः, कार्य्यासक्तता इति यावत्। प्रतिष्ठन्ते—अपगच्छन्ति, प्रस्थानं कुर्व्वन्तीत्यर्थः; यद्वा,—प्रतिष्ठन्ते—अग्रगामिनो भवन्ति, ("पुरोगामेसरप्रष्ठाग्रतःसरपुरःसराः" इत्यमरः), प्रतिष्ठां कुर्व्वन्ते वा इत्यर्थः; तथाविधानाचरणे तदलाभात् इति भावः। अन्तरायः—विघ्नः। ससृत्ससर्ज—परित्याज, निष्कृत्याहृत्वादिति भावः।

(१२७) शयनीये—शय्यायाम्, ("शय्यायां शयनीयवत्" इत्यमरः)। उत्तरीयवाससा—उत्तरीयवसनेन। सोत्तमाङ्गम्—आमस्तकमित्यर्थः। आत्मानं—

(१२८) इत्यभूते च देवे हर्षे, राजनि च तदवस्थे, सर्वस्य लोकस्य कपोलेषु कीलिता इव कराः, लोचनेषु (१२९) लेप्यमय्य इव अश्रुसृतयः, नासाग्रेषु ग्रथिता इव दृष्टयः, कर्णेषु (१३०) उत्कीर्णा इव रुदितध्वनयः, जिह्वासु (१३१) सहजानि इव हा कष्टानि, लपनेषु पल्लवितानि इव श्वसितानि, अधरेषु (१३२) लिखितानि इव परिदेवितपदानि, हृदयेषु निधानीकृतानि इव दुःखानि अभवन्। (१३३) उष्णाश्रुदाह-

शरीरम्, ("आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि। धृतावपि मनीषायां शरीरब्रह्मणोरपि॥" इति मेदिनी)। अवगुण्ठा—आच्छाद्य।

(१२८) इत्यभूते—ईदृगवस्थे। राजनि—प्रभाकरवर्द्धने। तदवस्थे—संगृहितजीवने इत्यर्थः। कपोलेषु—गण्डदेशेषु, कराः,—हस्ताः, कीलिता इव—कीलग्रोथिता इव; सर्वे लोकाः कपोलनिहितकराः सततं चिन्तामग्ना जाता इति भावः।

(१२९) लेप्यमय्य इव—लेपाय—लेपनकर्मणे हितं, लेप्यं, तन्मय्य इव, लिप्ता इवेत्यर्थः, अविच्छिन्ना इति भावः। अश्रुसृतयः,—अश्रुपाताः; सदैव सर्वे रुरुदुः इति भावः। ग्रथिता इव—निबद्धा इव। दृष्टयः,—नयनानि; इतः परं किं भविष्यति इत्यादिध्यानपरायणा बभूवुः इति भावः।

(१३०) उत्कीर्णा इव—उल्लिखिता इव; सततसन्निहिता इति भावः। रुदितध्वनयः,—रोदननिनादाः; अनवरतं रोदनध्वनिरभूवत इति भावः।

(१३१) सहजानि इव—स्वाभाविकानि इव, हा कष्टानि—हा कष्टं किमेतदित्येवंवचनानीत्यर्थः; सर्वे शोकार्त्ताः अनवरतमेव हा कष्टम् इति ऊचुः इति भावः। लपनेषु—मुखेषु, ("लपनं मुखम्" इत्यमरः) पल्लवितानीव—सञ्जातपल्लवानीव, विस्तारं गतानीत्यर्थः, श्वसितानि—निश्वासाः; सदैव महोद्वेगोदयात् दीर्घनिश्वासं त्यजन्तीत्यर्थः।

(१३२) लिखितानि इव—चित्रितानि इव। परिदेवितपदानि—विलापाक्षराणि, ("विलापः परिदेवनम्" इत्यमरः) लिखितपदानि यथा कदाऽपि न विलुप्तीभवन्ति, तथा विलापाक्षराण्यपि सदैव प्रावर्त्तन्त इत्यर्थः। निधानीकृतानि इव—निहितानि इव, आस्पदीकृतानीवेत्यर्थः; सर्वे दुःखमथितहृदया जाता इति भावः।

(१३३) उष्णेति।—उष्णैः,—तप्तैः, अश्रुभिः,—नेत्रजलैः, दाहात्—भस्मी-

भीता इव न अभजत नेत्रोदराणि निद्रा। (१३४) निश्वास-वातविधुता इव व्यलीयन्त हासाः। (१३५) निरवशेषदग्धा इव च सन्तापेन न प्रावर्त्तत वाणी। कथासु अपि न अश्रूयन्त परिहासाः। क्व अगमन्निति न अज्ञायन्त गीतगोष्ठ्यः। (१३६) जन्मान्तरानीतानि इव न अस्मर्यन्त लास्यानि। स्वप्नेऽपि न अगृह्यन्त (१३७) प्रसाधनानि। वार्त्ताऽपि न अलभ्यत उपभोगानाम्। नामापि न अकीर्त्यत आहारस्य। (१३८) खपुष्पप्रतिमानि आसन् आपानमण्डलानि। लोका-

---

भवनात्, भीता इव—त्रस्ता इव, नेत्रोदराणि—नयनान्तराणि, न अभजत—न सिषेवे; सदैवाग्रङ्क्या जागराञ्चक्रुः, रात्रावपि निद्रां न लब्धवन्तः इति भावः।

(१३४) निश्वासेति।—निश्वासवातेन—नासामुखनिःसृतेन प्राणवायुना, विधुता इव—सञ्चालिता इव, निरस्ता इवेत्यर्थः। व्यलीयन्त—विलयं गता इत्यर्थः; कैऽपि न जहसुः इति भावः।

(१३५) निरवशेषदग्धा इव—निःशेषभस्मीकृता इव। प्रावर्त्तत—उदचरत्। वाणी—वाक्; सदैव मौनिनः अतिष्ठन् इति भावः। परिहासाः,—नर्महसितानि; व्यवहारतः ते दूरे सन्तु, परिहास इति पदमपि न उच्चरितवन्तः इति भावः। क्व—कुत्र। अज्ञायन्त—अबुध्यन्त। गीतगोष्ठ्यः,—सङ्गीतालापाः; सर्वैः व्यथितान्तरत्वात् गानानि परित्यक्तानीति भावः।

(१३६) जन्मान्तरानीतानि इव—जन्मान्तरगतानि इव, ["जन्मान्तरानीतानि" इत्यत्र "जन्मान्तरातीतानि" इति पाठे,—जन्मान्तराय—पुनर्जन्मने, अतीतानि—गतानि, मृतानीत्यर्थः]। लास्यानि—नर्त्तनानि; राजभवने तस्मिन् प्राक् कदाऽपि नर्त्तनादिकमभवत् इत्यस्यापि संस्कारस्य विच्छेदाभावेन न स्मर्तुमशक्नुवन्निति भावः।

(१३७) प्रसाधनानि—अलङ्काराः। वार्त्ताऽपि—प्रवृत्तिरपि, कथाऽपीत्यर्थः। उपभोगानां—स्त्रीणां, स्रक्चन्दनवनितादिविलासादीनामिति यावत्। अकीर्त्यत—अकथ्यत, अश्रूयतेति यावत्; किमुत आहारः इति भावः।

(१३८) खपुष्पप्रतिमानि—आकाशकुसुमसमानि, अलीकानि इत्यर्थः। आपानमण्डलानि—पानगोष्ठीरुमृडाः, ("आपानं पानगोष्ठिका" इत्यमरः); वयस्य-प्रेयस्यादिभिः सह मद्यपानार्थं समवेतलोकरिक्तानां रुमाजाः सर्वदा अकार्ष्टिता इति

न्तरम् इव अनीयन्त वन्दिवाचः। युगान्तर इव अवर्त्तन्त निर्वृतयः। (१३९)पुनरिव अदह्यत शोकाग्निना मकरकेतुः। दिवाऽपि न असुध्यन्त शयनानि। (१४०)शनैः शनैश्च महापुरुषविनिपातपिशुनाः समं समन्तात् समुदभवन् भुवने भूयांसो भूपतेः अभावाय भयम् उत्पादयन्तो (१४१) भूतानां महोत्पाताः।

भावः। लोकान्तरमिव—परलोकमिव; राजपुरे तदुच्चारणाभावादिति भावः। अनीयन्त—प्राप्यन्त; महाराजमसुखयता दुर्दैवेनेति भावः। वन्दिवाचः,—वैतालिकस्तुतयः। युगान्तर इव—युगावसान इव, कल्पान्त इवेति यावत्। अवर्त्तन्त—अतिष्ठन्। निर्वृतयः,—सुखानि, शान्तय इत्यर्थः, निश्चलता इति यावत्; प्रलयावसाने जीवासङ्गाभावात् यथा सर्व्वत्र निश्चलत्वेन महाशान्तिः विराजते, तथा सर्वेषां मूकीभावात् तत्रापीति भावः, ("निर्वृतिः स्वस्थितावस्तं गमने च सुखेऽस्त्रियाम्" इति मेदिनी)।

(१३९) मकरकेतुः,—कामः, पुनरिव—भूय इव; हरकोपाग्निना प्राक् दग्धोऽपीति भावः, अदह्यत—दग्धीभूत; सर्व्वत्रैव तत्प्रसङ्गराहित्यादिति भावः। असुध्यन्त—त्यक्तानि; दुर्भावनाऽवसादाधिक्यादिति भावः। शयनानि—शय्याः।

(१४०) शनैः शनैः,—मन्दं मन्दम्, अल्पश इत्यर्थः। महापुरुषेति।—महापुरुषस्य—महाजनस्य, विनिपातः,—विध्वंसनं, तस्य पिशुनाः,—सूचकाः, ("पिशुनौ खलसूचकौ" इत्यमरः)। समं—युगपत्। समन्तात्—चतुर्दिक्षु। समुदभवन्—समुद्भूताः। भूयांसः,—बहवः। अभावाय—विनाशाय, तज्ज्ञापयितुमित्यर्थः, ["क्रियार्थोपपदस्य—" (२।३।१४ पा०) इत्यादिना चतुर्थी]। उत्पादयन्तः,—जनयन्तः।

(१४१) भूतानां—प्राणिनां, महोत्पाताः,—महान्तः,—प्रबलाः, उत्पाताः,—प्रकृतिविपर्य्यासरूपाः भूकम्पादयः; तदुक्तं नारदसंहितायाम्,—"उत्पाता विविधा लोके दिव्यभौमान्तरीक्षजाः। दैवतौघाः प्रवृत्यन्ति पतन्ति प्रज्वलन्ति च॥ सुष्वर्गायन्ति रोदन्ति प्रस्विद्यन्ति हसन्ति वा। वमन्त्यग्निं तथा धूमं खेदं रक्तं पयो बलम्॥ अधोमुखं प्रतिष्ठन्ति स्थानात् स्थानं व्रजन्ति वा। एवमाद्याय दृश्यन्ते विकाराः प्रतिमादिषु॥ गन्धर्व्वनगरस्यैव दिवा नक्षत्रदर्शनम्। रूक्षोल्कापातनं कष्टं वृथा रक्तप्रवर्षणम्॥ गान्धर्व्वदाहो दिग्दाहो भूमिकम्पो दिवानिशि। अनग्नौ च स्फुलिङ्गाः स्युर्ज्वलनश्च विनेन्धनम्॥ निशीन्दुचापमग्रुकाग्निखरं श्वेतवायसम। प्रतिसूर्य्यावतस्थुषु स्युर्दिक्षु युगपद्रवैः॥ जम्बूको यामसंवेशः केतूनाञ्च प्रदर्शनम्। काकानामाकुलं रात्रौ कपोतानां दिवा यदि॥" इति।

तथा हि (१४२) दोलायमानसकलकुलाचलचक्रवाला पत्या सार्द्धं गन्तुकामा इव प्रथमम् अचलत् धरित्री। (१४३) धान्वन्तरः इव अन्तरे तस्मिन् स्मरन्तः परस्परास्फालन-वाचालवीचयो विजुघूर्णिरेऽर्णवाः। (१४४) भूभृदभावभीतानां वितताग्निशिखाकलापविकटकुटिलाः केशपाशा इव ऊर्ध्वीबभूवुः

(१४२) दोलायमानेति।—दोलायमानं—कम्पमानं, सकलानां—सर्वेषां, कुलाचलानां—"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥" इत्युक्तानां, चक्रवालं—मण्डलं यस्यां तथाभूता, ("चक्रवालन्तु मण्डलम्" इत्यमरः)। पत्या—प्रभाकरवर्द्धनेन राज्ञेति भावः। सार्द्धं—सह। अचलत्—अकम्पत। धरित्री—पृथिवी; पतिव्रतायाः पत्न्याः पतिसहगमनस्य शास्त्रानुमोदितत्वेन तदाचारप्रतिपालनार्थमिति भावः, प्रथममुत्पातरूपो भूमिकम्पः प्रादुरासीदिति हृदयम्।

(१४३) धान्वन्तरैः,—धन्वन्तरिरेव धान्वन्तरिः, प्रसिद्धः स्वर्वैद्यविशेषः तस्य, [कर्मणि षष्ठी] धन्वन्तरिमित्यर्थः, ["धान्वन्तरः" इत्यत्र "धन्वन्तरेः" इति पाठेऽपि स एवार्थः]। स्मरन्तः,—यदि इदानीं धन्वन्तरिरस्मदायुर्यैऽस्थास्यत, तदा राजानमरोगिणम् अकरिष्यदित्येवं चिन्तयन्त इति यावत। तस्मिन् अन्तरे—अवसरे। परस्परेति।—परस्परस्य—अन्योऽन्यस्य, आस्फालनेन—सञ्चालनेन; वागाडम्बरेणेति भावः। वाचालाः,—नदन्त्य इत्यर्थः, [कुत्सितं बहु भाषन्ते इत्यर्थे "आलजाटचौ बहुभाषिणि" (५।२।१२५ पा०) "कुत्सित इति वक्तव्यम्" (वा०) इत्यालच्] वीचयः,—तरङ्गाः यैषां ते, अर्णवाः,—समुद्राः, विजुघूर्णिरे—चुक्षुभुः; अक्षोभ्याः समुद्रा अपि भूपालनिधनोत्पातमहावातेन क्षुभिताः बभूवुः इति भावः। पुरा धन्वन्तरेः समुद्रगर्भस्थितिः पश्चात् तदुत्थानञ्च पुराणेषु प्रसिद्धम्; तथा च,—"क्षीरोदधेर्मथ्यमानात् काश्यपैरमृतार्थिभिः। उदतिष्ठत् महाराज! पुरुषः परमाद्भुतः॥ अमृतापूर्णकलसं बिभ्रद् वलयभूषितः। धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक्॥" इति।

(१४४) भूभृदिति।—भूभृतः,—राज्ञः, अभावात्—भाविविनाशात्, भीताः,—शङ्किताः तासाम्; राज्ञः दिक्पालांशसम्भूतत्वात् पतिवियोगात्तासामिति भावः, ककुभां—दिशां, केशपाशा इव—केशनिचया इव। विततेति।—विततेन—विस्तृतेन, अग्निशिखाकलापेन—ज्वालानिचयेन, ["विततग्निशिखाकलाप—" इत्यत्र "विततग्निशिखिकलाप—" इति पाठे,—विततेन—विस्तृतेन, अग्निशिखिकलापेन—अग्निसमूहेन, अनल-

धूमकेतवः ककुभाम्। (१४५) धूमकेतुकरालितदिङ्मुखं दिक्पालारब्धायुष्कामहोमधूमधूम्रमिव अभवत् भुवनम्। (१४६) भ्रष्टभासि तप्तकालायसकुम्भबभ्रुणि भानुमण्डले भयङ्करकबन्धकायव्याजेन कोऽपि पार्थिवप्राणितार्थी पुरुषोपहारमिव उपजहार। (१४७) ज्वलितपरिवेशमण्डलाभोग-

शिखावत्प्रभानिचयेनेत्यर्थः; अन्यत्र,—शिखिनः,—मयूरस्य, कलापेन—बर्हेण, ("शिखी वह्नौ बलीबर्हे·····। मयूरे कुक्कुटे····· ॥" "कलापः महतौ बर्हे···" इति च मेदिनी) विकटाः,—उत्कटाः, कुटिलाः,—भङ्गिभृत इत्यर्थः, धूमकेतवः,—उत्पातसूचकाः ग्रहविशेषाः, अग्नयश्च; ऊर्ध्वमभवन्,—उत्तस्थुः; उक्तञ्च कालिदासेन, —"उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" इति; भीतानां केशपाशाश्च ऊर्ध्वीभवन्ति, अग्नेरपि ऊर्ध्वज्वलनं प्रसिद्धम्।

(१४५) धूमकेतवेति।—धूमकेतुभिः,—उत्पातविशेषैः, अग्निभिश्च, ("स्याद्धूमकेतूत्पातभेदे वैश्वानरे पुमान्" इति मेदिनी) करालितानि—भीषणीकृतानि, व्याप्तानि च, दिशां—ककुभां, मुखानि यस्य तथोक्तम्; अत एव दिक्पालेति।—दिक्पालैः,—इन्द्रादिभिः लोकपालैः, आरब्धस्य—उत्पातशान्त्यर्थं प्रस्तुतस्य, आयुष्कामस्य—राज्ञः आयुर्वर्द्धनार्थमभिलषितस्य, होमस्य—दैवयज्ञस्य, धूमैः धूम्रमिव—धूम्रलमिव, कृष्णलोहितमिवेति यावत्। उत्पातधूमबहुलत्वात् तथोक्तिः।

(१४६) भ्रष्टेति।—भ्रष्टाः,—च्युताः, भासः,—दीप्तयः यस्य तथोक्ते, निष्प्रभे इत्यर्थः; धरित्रीपतेः तदानीं भूलोकत्यागोद्योगेन तीव्रशोकोदयात् वैवर्ण्यप्रादुर्भावः इत्याशयः। तप्तेति।—तप्तम्—अग्न्युत्तापेन ज्वलितमित्यर्थः, यत् कालायसं—कृष्णवर्णलौहविशेषः, तस्य कुम्भः,—तन्निर्मितकलस इत्यर्थः, तद्वत् बभ्रु—पिङ्गलं तस्मिन्। भानुमण्डले—सूर्य्यबिम्बे, [अधिकरणे सप्तमी]। भयङ्करेति।—भयङ्करः,—भयजनकः, कबन्धकायः,—छिन्नशिरःशरीरं, ("कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम्" इत्यमरः) तस्य व्याजेन—मिषेण, कोऽपि, जन इति शेषः। पार्थिवेति।—पार्थिवस्य—राज्ञः, प्राणितं—जीवितं, तस्य अर्थी—तत्काम इत्यर्थः। पुरुषोपहारमिव—नरबलिमिव, उपजहार—उपहृतवान्; पुरुषोपहारेण सूर्य्यदेवम् आराधितवान् इव इत्युत्प्रेक्षा; सूर्य्यमण्डलं निष्प्रभं जातं तथा तव कबन्धाकारश्च समदृश्यत इति भावः।

(१४७) ज्वलितेति।—ज्वलितस्य—प्रदीप्तस्य, परिवेशमण्डलस्य—परिधिवल-

भास्वरो जिघृक्षाजृम्भमाणस्वर्भानुभयात् उपरचिताग्निप्राकार इव प्रत्यदृश्यत श्वेतभानुः। (१४८) अवनिपतिप्रतापप्रसाधिताः प्रथमतरकृतपावकप्रवेशा इव अदह्यन्त अनुरक्ता दिशः। (१४९) स्रुतशोणितशीकरासारारुणिततनुः अनुमरणाय प्रावृतपाटलांशुकपटेव अदृश्यत वसुधाबधूः। (१५०) नराधिपविनाश-

---

स्य, आभोगेन—वेष्टनेन, भास्वरः,—दीप्यमानः। जिघृक्षेति।—जिघृक्षया—ग्रहीतुमिच्छया, यासिच्छयेति यावत्, जृम्भमाणः,—सुखं व्याददत्, यः स्वर्भानुः,—राहुः, ("तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः" इत्यमरः) तस्मात् भयं—त्रासः तस्मात्। उपरचितेति।—उपरचितः,—कृच्छ्राकारेण कल्पितः, राहुप्रवेशनिवारणार्थमिति भावः, अग्निप्राकारः,—अग्निमयो वरण इत्यर्थः, ("प्राकारो वरणः साल:" इत्यमरः) येन तथाविध इव, श्वेतभानुः,—सितांशुः, चन्द्र इत्यर्थः, प्रत्यदृश्यत—अलक्ष्यत; सुधांशोः रक्तवर्णपरिवेशस्य जगदमङ्गलसूचकत्वात् इति भावः।

(१४८) अवनीति।—अवनिपतेः,—राज्ञः प्रभाकरवर्द्धनस्य, प्रतापेन—तेजसा, कीर्षदग्धजनेति यावत्,("स प्रतापः प्रभावश्च यत्तेजः कीर्षदग्धजम्" इत्यमरः) प्रसाधिताः,—आवर्जिताः, अलङ्कृताश्च। प्रथमेति।—प्रथमतरम्—अतिपूर्वमित्यर्थः, महाराजस्वर्गारोहणात् पूर्वमेवेति भावः, कृतः—अनुष्ठितः, पावकै—अग्नौ, प्रवेशः याभिः तथाभूता इव, अदह्यन्त—दग्धा अभवन्। अनुरक्ताः,—वशीभूताः, लोहितस्वर्व्यवयवाः वा, अनुरागिण्यः कामिन्यश्च; अनुरागिण्यः कामिन्यः यथा पत्युर्मरणं निश्चितं विभाव्य तन्मरणात् पूर्वमेव अग्नौ प्रविशन्ति, तथा दिग्वध्वोऽपीति भावः; दिग्दाहोऽभूदिति फलितम्। एतेन दिग्वधूनां स्त्रीयात्वमुत्प्रेक्षितम्, "पतिव्रता स्त्रीया" इत्यादिलक्षणसमन्वयात् इत्याशयः।

(१४९) स्रुतेति।—स्रुतानां—हृष्टानामित्यर्थः, शोणितानां—रक्तानां, शीकरासारेण—बिन्दुधारया, अरुणिता—रञ्जिता, रक्तीकृतेत्यर्थः, तनुः,—कलेवरं यस्याः तथाभूता, वसुधाबधूः,—वसुधा—पृथ्वी एव, बधूः,—राजपत्नीति भावः, अनुमरणाय—पत्युर्मरणात् परं मरणाय। प्रावृतेति।—प्रावृतः,—आच्छादितः, परिहित इति यावत्, पाटलः,—रक्त इति भावः, अंशुकपटः,—वस्त्ररूपमावरणं यया तथाभूता इव; अनुमरणे तादृशवस्त्रपरिधानस्याचारवत्त्वात् इति भावः; भुवनभयङ्करी रक्तवृष्टिः आसीदिति फलितम्।

(१५०) नराधिपेति।—नराधिपस्य—राज्ञः, विनाशेन—मरणेन, आविला

सम्भ्रमभीतैः लोकपालैः इव कालायसकवाटपुटैः अकाल-कालमेघपटलैः अरुध्यन्त दिग्द्वाराणि। (१५१) प्रेत-पतिप्रयाणप्रहताः पटवः पटहा इव आरटन्तो हृदयस्फोटनाः पस्फायिरे निर्घातानां घोरा निर्घोषाः। (१५२) निकटी-भवद्यममहिषखुरपुटोद्भूता इव द्युमणिधाम धूसरीचक्रुः

इति भावः, यः सम्भ्रमः,—आवेगः, तस्मात् भीताः,—त्रस्ताः तैः; तस्य लोकपालसख-त्वादिति भावः। लोकपालैः,—इन्द्रादिभिरिव। कालेति।—कालायसं—कृष्णवर्ण-लौहविशेषः, तस्य कवाटानां पुटानि—आवरणानि तैः, कृष्णलौहनिर्मितकवाटपर-म्पराभिरिति यावत्। अकालेति।—अकाले—असमये, प्रावृड्व्यतिरिक्ते इत्यर्थः, ये कालमेघाः,—नीलनीरदाः, तेषां पटलानि—वृन्दानि तैः। दिग्द्वाराणि—दिशां द्वार-देशाः, अरुध्यन्त—आच्छाद्यन्त; राज्ञः प्रतापेन लोकपाला निष्कण्टकं स्वं स्वमधिकारं पालयन्ति स्म, इदानीं तन्निधनात् असुराणां प्रादुर्भावात् पुनः स्वाधिकारेषु उपद्रवो भविता इति आशङ्क्य कवाटावरणेन तन्निरोधयाञ्चक्रुः इति भावः; अकालमेघी-दयरूपा उत्पाताः प्रादुरासन् इति निष्कर्षः।

(१५१) प्रेतेति।—प्रेतपतेः,—अन्तकस्य, प्रयाणे—यात्रायां, प्रहताः,—ताडिताः, पटवः,—गम्भीररवा इत्यर्थः. पटहा इव—वादित्रभेदा इव, आरटन्तः,—नदन्तः, हृदयस्फोटनाः,—हृदयविदारिण इत्यर्थः, निर्घातानां—वायुविशेषाणां, "यदन्तरीक्षे बलवान् मारुतो मरुताहतः। पतत्यधः स निर्घातो जायते वायु-सम्भवः॥" इत्युक्तलक्षणानां, घोराः,—दारुणाः, निर्घोषाः,—शब्दाः, पस्फायिरे —बहिरे, उदभवन् इत्यर्थः; हृदयकम्पनोत्खण्ध्वानोद्गमस्य जगज्जीवदारुणदुःख-ज्ञापकत्वात् इति भावः।

(१५२) निकटीभवदिति।—निकटीभवन्—समीपमागच्छन्, यमस्य—कृता-न्तस्य, राज्ञः प्राणानामादातुरिति भावः, यो महिषः,—वाहनमित्यर्थः, तस्य खुराणां —शफानां, पुटैः,—युगलैः, उद्भूता इव—उत्क्षिप्ता इव, ["खुरपुटोद्भूताः" इत्यत्र "खुरपुटोद्भूताः" इति पाठे,—खुरपुटेभ्यः उद्भूताः,—सञ्जाताः, उद्गता इत्यर्थः]। क्रमेलकेति।—क्रमेलकस्य—उष्ट्रस्य, ("उष्ट्रे क्रमेलक-मय-महाङ्गाः" इत्यमरः) कचा इव—केशा इव, लोमानि इव इति यावत्, ("कचः केशः शिरोरुहः" इत्यमरः) कपिलाः,—धूसराः, पांशुवृष्टयः,—रजोवर्षणानि, द्युमणेः,—सूर्यस्य, ("सूरसूर्य्यार्क-मादित्य···। द्युमणिस्तरणिर्मित्रः···" इत्यमरः) धाम—स्थानम्, अन्तरौचमित्यर्थः,

क्रमेलककचकपिलाः पांशुवृष्टयः। (१५३) विरसविराविणीनाम् उन्मुखीनां शिखिनो ज्वालाः प्रतीच्छन्त्य इव पतन्तीः उल्का नभसो ववाशिरे शिवानां राजयः। (१५४) राजधामनि धूमायमानकवरीविभागविभावितविकाराः प्रकीर्णकेशपाशप्रकाशितशोका इव प्राकाशन्त प्रतिमाः कुलदेवतानाम्। (१५५) उपसिंहासनमाकुलं कालरात्रिविधूयमानवृजिन-

---

धूसरीचक्रुः,—धूम्रवर्णीकृतवन्तः, व्यादयामासुः इति भावः; महापुरुषपातरूपघोरविप्रवादिवीधकः पांशुवृष्टिरूपोत्पातः प्रादुरभवदिति निष्कर्षः।

(१५३) विरसेति।—विरसं—कठोरं, ["विरस—" इत्यत्र "विस्वर—" इति पाठे,—विस्वरं—विस्तरं यथा तथा, उच्चैरित्यर्थः] विरुवन्ति—नदन्तीति तथोक्तानां, कठोरनादिनीनाम् इत्यर्थः, उन्मुखीनाम्—ऊर्ध्वमुखीनां, शिवानां राजयः,—शृगालवृन्दानि, शिखिनः,—अग्नेः, ज्वालाः,—शिखाः, प्रतीच्छन्त्य इव—गृह्णन्त्य इव, जिघृक्षव इव इति यावत्; तासां स्वायां विवृतमुखीनां तासां मुखान्तः ज्वलदग्निवत् परिदृश्यमानत्वादिति भावः; नभसः,—आकाशात्, पतन्तीः,—भ्रश्यन्तीः, उल्काः,—ज्वलन्मसृणप्रलम्बदण्डमुल्कराद्याकृतितेजोविशेषान्, "दृष्टिच्छिखा च सुच्छाया रक्तनीलशिखोज्ज्वला। पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता॥" इत्युक्तलक्षणान् इत्यर्थः, ववाशिरे—आह्वयन्ति स्म; तदानीम् उल्कामुखः वदनेभ्यः अग्निशिखा उद्गीर्य कठोरं व्यनदन्, उल्कापाताय अभवन् इति वाक्यार्थः।

(१५४) राजधामनि—राजमन्दिरे। धूमेति।—धूमायमानेन—धूममुद्गिरन्तीति धूमायमानः तेन, स्नेहाभ्यङ्गाभावात् रूक्षेणेत्यर्थः, कवरीविभागेन—केशनिचयेन इत्यर्थः, विभावितः,—प्रकटितः, विकारः,—विकृतिभावः यासां ताः; अत एव प्रकीर्णेति।—प्रकीर्णेन—प्रस्खलितेन, समन्तादालुलायितेन इति यावत्, केशपाशेन—कुन्तलकलापेन, प्रकाशितः,—प्रकटितः, शोकाः,—शुक् याभिः ता इव। प्राकाशन्त—अराजन्त; शोकार्ता इव अलक्ष्यन्त इति भावः। गृहदेवप्रतिमानां स्वयमर्चाप्रसाधनगृङ्गारविमर्दस्य दैन्यसापकरत्वज्ञापनात् इति बीध्यम्।

(१५५) उपसिंहासनं—सिंहासनस्य समीपे; कुलदेवतानां राज्ञो वा इति भावः; ["अव्ययं—" (२।१।६ पा०) इत्यादिना सामीप्यार्थेऽव्ययीभावः] आकुलं—अचलम्। कालेति।—कालरात्रेः,—सर्वकलुषरात्रीपलक्षितायाः कल्पान्तरात्रेः,

वेणीबन्धविभ्रमं बिभ्राणं बभ्राम भ्रामरं पटलम्। (१५६) अटतां अन्तःपुरस्य उपरि क्षणमपि न शशाम व्याक्रोशो वायसानाम्। (१५७) श्वेतातपत्रमण्डलमध्यात् जीवितमिव राज्यस्य सरसपिशितपिण्डलोहितं चञ्चच्चक्षुः उच्चैः उच्चखान खण्डं माणिक्यस्य कूजन् जरद्गृध्रः, महोत्पातदूयमानश्च कथमपि निनाय निशाम्।

(१५८) अन्यस्मिन् अहनि समीपमस्य राजकुलात् द्रुत-

संहाररजन्याः इत्यर्थः, मृत्युदेव्या इति भावः, विधूयमानः,—विलाप्यमाणः, वृजिनः,—कुटिलः, ("वृजिनं कल्मषे क्लीवं केशे ना कुटिले त्रिषु" इति मेदिनी) यः वेणीबन्धः,—केशबन्धः, केशविन्यास इति यावत्, तस्य विभ्रमः,—विलासः तं, बिभ्राणं—दधानं, भ्रामरं पटलं—भ्रमरवृन्दं, बभ्राम—भ्रमति स्म; सिंहासनं परित. अकस्माद्विरफसङ्घानामाकुलभ्रमणं लोकानामङ्गलसूचकम् इति भावः। अत्र अन्यस्य बिभ्रमं कथमन्यो बिभर्तु इति वेणीबन्धस्य विभ्रममिव विभ्रममिति बिम्बानुबिम्बप्रतीतेः निदर्शनाऽलङ्कारः; तदुक्तं दर्पणे,—"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना॥" इति।

(१५६) अटतामिति।—अन्तःपुरस्य—अवरोधस्य, उपरि—ऊर्ध्वदेशे, अटतां—सञ्चरतां, वायसानां—काकानां, व्याक्रोशः—विकृतशब्दविशेषः, क्षणमपि—कियत्कालमपि, न शशाम—न निवृत्त इत्यर्थः, अविरलकठोरकरटरटितानां जनपदभीतिसञ्चारकत्वात्।

(१५७) श्वेतातपत्रमण्डलमध्यात्—श्वेतच्छत्रसमूहमध्यात्। सरसेति।—सरसम्—अपर्युषितत्वया शोणितार्द्रं, सद्यस्कम् इति भावः, पिशितपिण्डं—मांसपिण्डं, तद्वत् लोहितं—रक्तम्। चञ्चच्चक्षुः,—चञ्चली—आमिषलोभेन स्फुरन्तौ, चक्षुः,—नेत्रे यस्य तथाभूतः। उच्चखान—उत्खातवान्, उत्पाटितवान् इत्यर्थः। कूजन्—विरसं नदन्। जरद्गृध्रः,—जरन्—स्थविरः, गृध्रः,—"शकुनिः" इति प्रसिद्धः पक्षिविशेषः। महेति।—महद्भिः,—अतिभयजनकैः इति भावः, उत्पातैः,—प्रागुक्तैः, अशुभसूचकैः भूकम्पादिभिः, दूयमानः,—सन्तप्यमानः; दुःखं इति शेषः।

(१५८) "अन्यस्मिन्" इत्यादौ "वैला इति नाम्ना यशोवत्याः प्रतीहारी आजगाम" इति अग्रेण सम्बन्धः। अस्य—हर्षस्य। समीपं—निकटं, ["द्यन्तरूपसर्गेभ्योऽप ऊर्त्" (५।३।९७ पा०) इति ऊर्त्वम्]। राजकुलात्—राजभवनात्,

गतिवशविशीर्य्यमाणालङ्कारझाङ्कारिणी विजयघोषणेव विषादस्य, (१५९) आकुलचरणचलत्तुलाकोटिक्वणितवाचालिताभिः उड्डीवाभिः किं किमिति पृच्छ्यमानेव दूरादेव भवनहंसीभिः, (१६०) स्खलितविशालश्रोणिशिञ्जानरशनानुराविणीभिश्च वाष्पान्धा समुपदिश्यमानमार्गेव गृहसारसीभिः, (१६१) अदृष्टकवाटपट्टसङ्घट्टस्फुटितललाटपट्टरुधिरपटलेन पटान्तेन इव रक्तांशुकस्य मुखम् आच्छाद्य प्ररुदती,

राज्ञाज्ञापुरादित्यर्थः। वेलां विशिनष्टि, द्वनेति।—द्रुतगतिवर्शन—शीघ्रगमनवेगेन, विशीर्य्यमाणैः,—स्खलद्भिः, अलङ्कारैः,—भूषणैः, झाङ्कारिणी—झाङ्कारशब्दवती, अत एव विषादस्य—दुःखस्य, विजयघोषणा इव—विजयख्यापनी इव, वीर्य्यरटना इव इत्यर्थः; विजयिनां त्वरितजयघोषणाप्रचारस्य स्वाभाविकत्वात् इति भावः।

(१५९) आकुलेति।—आकुलर्यौः,—अस्थिरयोः, समधिषमस्थानानवबोधेन विक्षिप्तयोरिति भावः, चरणयोः,—पादयोः, चलन्त्योः,—चञ्चलयोः, तुलाकोट्योः,—नूपुरयोः, ("पादाङ्कदं तुलाकोटी मञ्जीरी नूपुरोऽस्त्रियाम्" इत्यमरः) क्वणितेन—रणनेन, वाचालिताः,—मुखरीकृताः ताभिः; मञ्जीररावविणीनां हंसीनां नूपुररवश्रवणेन तदनुकरणशीलत्वादिति भावः; उड्डीवाभिः,—उन्नमितकन्धराभिः। भवनहंसीभिः,—गृहपालितहंसीभिः। पृच्छ्यमाना—अनुयुज्यमाना; अतिव्ययसञ्चरणं किमर्थं क्रियते? इति प्रश्नः कृत इव इति भावः।

(१६०) वाष्पान्धा—अश्रुपूरितनेत्रा इति यावत्; राज्ञः शोकादिति भावः; अत एव स्खलितेति।—स्खलितां—शिथिलितां, विशालायां—पृथ्वां, श्रोण्यां—नितम्बे, शिञ्जानां—स्वनन्तीं, रशनां—काञ्चीम्, अनुरवन्ति—अनुनदन्तीति तथोक्ताभिः, गृहसारसीभिः,—भवनस्थसारसरमणीभिः। समिति।—समुपदिश्यमानः,—प्रदर्श्यमानः, मार्गः,—पन्थाः यस्याः यस्यै वा तथोक्ता; दृष्टिहीनत्वे पथप्रदर्शनस्य सज्जनाचारत्वात् इति भावः। सारसयोषितः रसनारणनवत् रुवन्ति इति प्रसिद्धिः।

(१६१) अदृष्टेति।—अदृष्टस्य—अलक्षितस्य; सहाद्रीभात् व्यसनतया वाष्पान्धतया वेति भावः; कवाटपट्टस्य—कवाटफलकस्य, सङ्घट्टेन—सङ्घर्षेण, स्फुटितात्—आहतात्, विदीर्णात् इत्यर्थः, ललाटपट्टात्—भालफलकात्, यत् रुधिरपटलं—रक्तनिचयः, निःसृत इति भावः, तेन। रक्तांशुकस्य—रक्तवस्त्रस्य, पटान्तेन इव—अञ्चलेन इव, मुखमाच्छाद्य—अवगुण्ठ्य।

(१६२) सन्तापबलविलीनकनकवलयरसधारामिव वेल्लताम् उत्सृजन्तो, (१६३)मुखमरुत्तरङ्गितामुत्तरीयांशुकपटीं स्फुरन्तीं फणिनो इव निर्मोकमञ्जरीम् आकर्षन्ती, नम्रांससंसिना अनिलविलोलेन नीलतमेन तमालचीरचीवरेणेव शोकोचितेन धम्मिल्लरचनारहितेन शिरोरुहसञ्चयेन चञ्चता प्रावृतकुचा, (१६४) कुचताड़नपीड़या संमुच्छूनाताम्रश्यामतलं मुहुर्मुहुः अत्युष्णाश्रुप्रमार्ज्जनप्रदग्धम् इव करकिसलयं धुनाना,

(१६२) सन्तापेति।—सन्तापस्य—शोकजोत्तापस्य, बलेन—वेगेन, विलीनस्य—गलितस्य, कनकवलयस्य—स्वर्णकङ्कणस्य, रसधारामिव—द्रवपरम्परामिव, वेल्लतां—प्रतीहारत्वेन स्वेन प्रियमाणां वेत्रयष्टिम्, उत्सृजन्ती—पातयन्ती।

(१६३) मुखेति।—मुखमरुता—मुखवायुना, शोकोद्वश्वासरूपेण इति भावः, तरङ्गिता—सञ्जाततरङ्गा तां, कुञ्चितामिति भावः, ["तदस्य—" (५।२।३६ पा०) इत्यादिना इतच्] उत्तरीयांशुकपटीम्—उत्तरासङ्गवसनम्। स्फुरन्तीं—प्रेङ्खन्तीम्। फणिनीव—भुजङ्गीव। निर्मोकमञ्जरीं—कञ्चुकवल्लरीम्। आकर्षन्ती—निरुन्धाना इत्यर्थः; वैकल्येऽपि स्त्रीजनस्वभावसिद्धाचारात् इति भावः। नम्रांससंसिना—नम्रात्—आनतात्, अंसात्—स्कन्धदेशात्, संसते—लम्बते इति तथोक्तेन, अनिलविलोलेन—मरुत्तरलेन, नीलतमेन—अतिनीलेन। तमालेति।—तमालस्य—कालस्कन्धाख्यवृक्षभेदस्य, चीरचीवरेण—सूक्ष्मचर्मपेण वसनेनेव; शोककाले तद्दाससंग्रहणस्याचारात् इत्याशयः; शोकोचितेन—शोकसमययोग्येन, धम्मिल्लरचनारहितेन—बन्धनरहितेनेत्यर्थः, ("धम्मिल्लः संयताः कचाः" इत्यमरः) शिरोरुहसञ्चयेन—केशनिचयेन। चञ्चता—स्फुरता। प्रावृतकुचा—आच्छादितस्तनी।

(१६४) कुचेति।—कुचयोः,—स्तनयोः, ताड़नम्—आघातः, तेन या पीड़ा—व्यथा तया। संमुच्छूनेति।—संमुच्छूनं—सम्यक् स्फीतम्, आताम्रम्—आरक्तं, श्यामञ्च—कृष्णञ्च तलं यस्य तथाभूतम्। अत्युष्णेति।—अत्युष्णानाम्—अतिसन्तप्तानाम्; अतिशोकोद्रेकात् इति भावः; अश्रूणां—नेत्रजलानां, प्रमार्ज्जनेन—प्रमोचनेन, प्रदग्धं—प्रकर्षेण दुष्टमिव, करकिसलयं—हस्तपल्लवं, धुनाना—कम्पयन्ती, सञ्चालयन्ती इत्यर्थः; शोकावेगेन वक्षसि करावातम् अश्रुप्रमार्ज्जनं तथा द्रुतगमनवशात् हस्तकम्पनञ्च कुर्व्वतीति भावः।

(१६५) चक्षुर्निर्झरे श्रीर्यति स्रपयन्ती इव शोकाग्निप्रवेशाय स्वकपोलतलप्रतिविम्बितम् आसन्नलोकं, (१६६) लोललोचनप्रहृत्तैः तरलैः तारकांशुभिः श्यामायमानम् आत्मदुःखेन दिवसमपि दहन्ती इव "क्व कुमारः ? क्व कुमारः ?" इति पुरुषं पृच्छन्ती, वेलेति नाम्ना यशोवत्याः प्रतीहारी आजगाम। (१६७) विषण्णलोकलोचनप्रत्युद्गता च उपसृत्य कुट्टिमन्यस्तहस्तयुगला गलन्तीभिः सिञ्चन्ती इव शुष्यन्तं दशनदीधितिधाराभिः आधूसरम् अधरम् अधोमुखी विज्ञापितवती,—"देव!

---

(१६५) श्रीर्यति—प्रसरति, चक्षुर्निर्झरे—नेत्रवारिप्रस्रवणे, ("उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः" इत्यमरः) स्रपयन्ती इव—स्नानं कारयन्तीव। स्वेति।—स्वस्य—आत्मनः, कपोलतले—गण्डभागे ; अविरलनयनजलेन प्रक्षालनादतिस्वच्छे इति भावः ; प्रतिबिम्बितं—प्रतिफलितम्, आसन्नलोकं—पार्श्ववर्त्तिनं जनमित्यर्थः ; कृतस्नानस्याचारवतः शरीराहवनाय क्लृप्तानुप्रवेशाधिकारात् इत्याशयः।

(१६६) लोलेति।—लोलात्—चञ्चलात्, लोचनात्—नयनात्, प्रहृत्ताः,—निःसृताः तैः। तरलैः,—स्फुरद्भिरित्यर्थः। तारकांशुभिः,—तारकायाः,—कनीनिकायाः, ("तारकाक्षः कनीनिका" इत्यमरः) अंशुभिः,—मयूखैः, श्यामायमानं—मलिनायमानम्। आत्मदुःखेन—स्वीयशोकसन्तापेन इत्यर्थः। दहन्तीव—भस्मीकुर्वतीव ; दग्धस्य श्यामो भवतीति भावः ; एतेन तदा अपराह्णः सञ्जात इति सूचितम्। पुरुषम्—अन्वेषितं जनं, यं कञ्चित् पश्यति, तमेवेति भावः। प्रतीहारी—द्वाररक्षिणी।

(१६७) विषण्णेति।—विषण्णानां—विषादयुक्तानां, ["रदाभ्यां—" (८।२।४२ पा०) इत्यादिना निष्ठायाः, धातोर्दकारस्य च नत्वम्] लोकानां—जनानां, लोचनैः,—नयनैः, प्रत्युद्गता—अभिवीक्षितेति भावः। कुट्टिमन्यस्तहस्तयुगला—कुट्टिमे—गृहाभ्यन्तरतले, न्यस्ते—निहिते, हस्तयुगले—करद्वये यया तथाभूता, भूतलस्पृष्टकरेति यावत् ; शोकक्षामतया स्वात्मसामर्थ्यात् अवलम्बनार्थं, प्रभुसमीपे तादृशाचारप्रदर्शनस्य अनुज्ञाविनाम् अवश्यकर्त्तव्यत्वाद्वा इति भावः। गलन्तीभिः,—स्रवन्तीभिः, दशनदीधितिधाराभिः,—दन्तकिरणपरम्पराभिः ; विमलवारिधारावत् प्रतीयमानाभिरिति भावः ; शुष्यन्तं—शोषमापद्यमानम् ; शोकसन्तापादिति भावः ; अत

परित्रायस्व परित्रायस्व, जीवत्येव भर्त्तरि किमपि अध्यवसितं देव्या" इति।

ततस्तत् (१६८) अपरम् आकर्ण्य च्युत इव सत्त्वेन, द्रुत इव दुःखेन, आचान्त इव चिन्तया, तुलित इव तापेन, अङ्कीकृत इव आतङ्केन अप्रतिपत्तिः आसीत्; आसीच्च अस्य चेतसि (१६९) प्रतिपन्नसंज्ञस्य,—"बहुशोऽपि हृदये दुःखाभिषङ्गो निपतन् अश्मनीव लोहप्रहारः कठिने हुतभुजम् उत्थापयति, न तु भस्मसात्करोति मे निरनुक्रोशस्य कायम्" इति उत्थाय च

एव आधूसरम्—आपाण्डुन, अधरम्—अधोरदनच्छदं, सिञ्चन्तीव—चालयन्तीव, आर्द्रीकुर्वतीवेत्यर्थः, अधोमुखी—अवनतवदना। लोकेऽपि सर्वे अधःस्थद्रव्यसिञ्चनकाले अधोमुखा भवन्तीति दृश्यते। भर्त्तरि—स्वामिनि, रात्रि प्रभाकरवर्जने इति यावत्। किमपि—अनिर्व्वचनीयम्, अतिशोचतया वक्तुमशक्यमिति भावः। अध्यवसितम्—उद्युक्तम्। देव्या—यशोवत्या।

(१६८) अपरम्—अन्यत् अशुभमित्यर्थः; श्रीककारणमिति भावः। च्युत इव—भ्रष्ट इव, सत्त्वेन—बलेन, अतिदुर्बल इत्यर्थः। द्रुत इव—गलित इव, दुःखाम्बुधिनिमग्न इत्यर्थः; अतिकारुण्यरसोद्रेकात् इति भावः। आचान्त इव—निपीत इव, चिन्तामग्न इत्यर्थः। तुलित इव—लघुतां नीत इव, तापेन—आधिना, शोकावसन्न इत्यर्थः। अङ्कीकृत इव,—क्रोडनिहित इवेत्यर्थः। आतङ्केन—उद्वेगेन, भयाक्रान्त इत्यर्थः। अप्रतिपत्तिः,—इतिकर्त्तव्यताविमूढः, मूर्च्छित इत्यर्थः, [अत्र च्युतत्व-द्रुतत्वादीनां सर्व्वासामेव क्रियाणाम् उत्कटैककोटिकसंशयोदयादुत्प्रेक्षाऽलङ्कारः।

(१६९) प्रतिपन्नसंज्ञस्य—लब्धचैतन्यस्य। बहुशः,—बहुवारान्, पुनःपुनरपीत्यर्थः, कठिने—दृढ़े, अश्मनि—प्रस्तरे, लोहप्रहारः,—लोहाघात इव, निरनुक्रोशस्य—निर्दयस्य, निष्ठुरस्येति यावत्, मे—मम, कठिने हृदये—अन्तःकरणे, निपतन्—आविशन्नित्यर्थः, दुःखाभिषङ्गः,—दुःखाभिघातः, हुतभुजम्—अग्निम्, उत्थापयति—जनयति। न तु भस्मसात् करोति—न दहत्येव; अतिकठोरहृदयत्वादिति भावः; यथा लोहाहताद्धि कठिनप्रस्तरात् अग्निरुत्तिष्ठते, न तु स प्रस्तरः तदुद्भूतेन तेन दह्यमानः क्रियते, तथा पाषाणकठोरे मम हृदयेऽपि पुनः पुनरापतन् दुःखातिशयः शोकाग्निं प्रवर्द्धयत्येव, न तु तेनाग्निना मां निःशेषं दहति, अहो! कष्टम् इति निष्कर्षः।

त्वरमाणोऽन्तःपुरम् अगात्। (१७०) तत्र च मर्त्तुमुद्यतानां राजमहिषीणाम् अशृणोत् दूरादेव,—"तात! चूत! चिन्तय आत्मानं, प्रवसति ते जननी। वत्स! जातीगुच्छ! गच्छामि, आपृच्छस्व माम्। मया विना अद्य अनाथा भवसि भगिनि! भवनदाडिमलते! रक्ताशोक! मर्षणीयाः पादप्रहाराः कर्णपूरपल्लवभङ्गापराधाश्च। (१७१) पुत्रक! अन्तःपुरबालवकुलक! वारुणीगण्डूषग्रहणदुर्ललित! दृष्टोऽसि। वत्से! प्रियङ्गुलतिके! गाढम् आलिङ्ग मां, दुर्लभा भवामि ते। भद्र! भवन-

(१७०) "तत्र" इत्यादौ "राजमहिषीणामशृणोत्.....इत्येवंप्रायालापान्" इत्युत्तरेण सम्बन्धः। तात!—वत्स! चूत!—आम्र! आत्मानं—स्वं, चिन्तय—स्वस्य योगक्षेमं स्वयमेव सम्पादयेति यावत्। प्रवसति—दूरं गच्छति। जननी—उत्पादिका; या त्वामुत्पादितवती इयन्तं कालं पालितवती च, सा इदानीं स्वामिजीवननैराश्यात् परलोकं गच्छतीति भावः। जातीगुच्छ!—जातीलवक! मां—ते जननीं, पालयित्रीमिति यावत्। आपृच्छस्व—सम्भाषस्व; पुनः समागमाभावात् इति भावः, ["आङि नुप्रच्छां:" (वा०) इत्यात्मनेपदम्]। अनाथा—निराश्रया; स्नेहयोगेन पोषिकाभावादिति भावः। भवनदाडिमलते—गृहप्राङ्गणरोपितदाडिमवल्लि इति यावत्। रक्ताशोक!—विकसिताशोक! लोहितप्रसूनवत्त्वात् इति भावः; मर्षणीयाः,—सोढव्याः, क्षन्तव्या इत्यर्थः। पादप्रहाराः,—चरणताडनानि, "पादाहतः प्रमदया विकसत्यशोकः" "पादाघातादशोकं विकरोति" इति च कविसमयसिद्धेः। कर्णेति। —कर्णपूरार्थं—कर्णभूषणार्थं, पल्लवानां—किसलयानां, भङ्गाः,—छेदनानि एव, अपराधाः,—दोषाः।

(१७१) पुत्रक!—वत्स! क्रमिमपुत्र! इति वा। अन्तःपुरबालवकुलक!—अवरोधस्थनवकेशरक! वारुणीति।—वारुणी—मदिरा, तस्या गण्डूषः,—मुखपूरणं, मुखपूरणमदिरारस इत्यर्थः, तस्य ग्रहणेन—लाभेन; स्वप्रसूनविकाशकदोहदव्यापारे मत्सकाशादिति भावः; दुर्ललित!—दुर्विनीत! मदीयप्रश्रयेणात् अन्यस्मादपि बलाद्गृह इति भावः; "शोकं लङ्घसि वकुलो मुखसीधुसिक्तः" "वकुलं योषितामास्यमद्यैः" इति च कविसमयसिद्धेः। दृष्टोऽसि—एतावत्कालम् अवलोकितोऽसि; अतःपरं न द्रक्ष्यसे शरीरपरित्यागात् इति भावः। गाढं—निर्भरम्। दुर्लभा—

हारसहकारक! दातव्यो निवापतोयाञ्जलिः, अपत्यमसि। भ्रातः! (१७२) पञ्जरशुक! यथा न विस्मरसि मां, किं व्याहरसि? दूरीभूताऽस्मि ते। शारिके! स्वप्ने नः समागमः पुनर्भूयात्। मातः! मार्गलग्नं कस्य समर्पयामि गृहमयूरकम्? (१७३) अम्ब! सुतवल्लालनीयमिदं हंसमिथुनं, मन्दपुण्यया मया न सम्भावितोऽस्य चक्रवाकयुगलस्य विवाहोत्सवः। (१७४) मातृवत्सले! निवर्त्तस्व गृहहरिणिके! समुपनय सौविदल्ल!

दुष्प्रापा, अदर्शनीयेति यावत्; ते—तव, [ननु "न लोकाव्यय—" (२।३।६९ पा०) इत्यादिना षष्ठीप्रतिषेधात्, दुर्लभेति खलर्थप्रत्ययान्तस्य कर्त्तरि "ते" इत्यत्र कथं षष्ठी, इति चेत्? अतीच्यते,—"सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः, शेषे षष्ठी तु स्यादेव" इति दौचितवचनात् अवागत्या शेषे षष्ठी इति वक्तव्या, कर्तृपदान्तरमपेक्षमित्यकामेनाप्यङ्गीकरणीयमिति विवेकः]। भवनहारसहकारक!—गृहहारारोपितातिसुरभिचूततरो! दातव्यः,—देयः, त्वया इति शेषः। निवापतोयाञ्जलिः,—निवापतोयं—निवापः,—पितृलोकमुद्दिश्य दानं, ("पितृदानं निवापः स्यात्" इत्यमरः) तत्कर्म्मभूतं यत् तोयं—जलं, तर्पणसलिलमित्यर्थः, तत्पूर्णः अञ्जलिः,—युक्तकरगृहीतसलिलमित्यर्थः। यतः अपत्यमसि—पुत्रोऽसि, अपत्यशब्देषु निवापादिकर्म्मणामवश्यकर्त्तव्यतया विधानात् इति भावः।

(१७२) पञ्जरशुक!—पिञ्जरस्थशुकीर! यथा मां न विस्मरसि, तथा कार्य्यमिति शेषः। व्याहरसि?—ब्रवीषि? यद्वा,—न विस्मरसि माम् इति किं व्याहरसि?—किमर्थं ब्रवीषि, मृताऽपि त्वां न विस्मरामि इति भावः; ते—तव, त्वन्मनोपादित्यर्थः। मार्गलग्नं—मार्गे—पथि, लग्नः,—संसक्तः तं, मार्गरोधकमित्यर्थः; मयि दृढानुरागात् इति भावः। गृहमयूरकं—गृहपालितमयूरशावकम्।

(१७३) अम्ब!—मातः!, सुतवत्—पुत्रवत्, लालनीयं—यत्नेन पालनीयम्। हंसमिथुनं—हंसदम्पती। मन्दपुण्यया—अपुण्ययेत्यर्थः, अधन्ययेति यावत्। सम्भावितः,—सम्पादितः। चक्रवाकयुगलस्य—कोकदम्पत्योः।

(१७४) मातृवत्सले!—मातृभक्ते! गृहहरिणिके!—गृहपालितक्षुद्रहरिणि! निवर्त्तस्व—प्रतिनिवृत्ता भव; अतःपरं मया सह मा गच्छेति भावः। समुपनय—

वल्लभवल्लकीं, परिष्वजे तावत् एनाम्। चन्द्रसेने ! (१७५) सुदृष्टः क्रियतामयं जनः। विन्दुमति ! इयं ते अम्बा वन्दना। चेटि ! मुञ्च चरणौ। आर्ये ! कात्यायनिके ! किं रोदिषि ? नीताऽस्मि दैवेन। तात ! कञ्चुकिन् ! किं माम् अलक्षणां प्रदक्षिणीकरोषि ? धातेयि ! धारय आत्मानं, किं पादयोः पतसि ? भगिनि ! गृहाण माम् अपश्चिमां कण्ठे, कष्टम् ! न दृष्टा प्रियसखी मलयवती। कुरङ्गवति ! अयम् (१७६) आमन्त्रणाञ्जलिः। सानुमति ! अयमन्त्यः प्रणामः। कुवलयवति ! एष ते अवसानपरिष्वङ्गः। सख्यः ! चन्तव्याः प्रणयकलहाः" इत्येवंप्रायान् आलापान्।

(१७७)दह्यमानश्रवणश्च तैः प्रविशन्नेव निर्य्यान्तीं, दत्तसर्व्व-

---

समुपस्थापय। सौविदल्ल !—कञ्चुकिन् ! ("सौविदल्लाः कञ्चुकिनः" इत्यमरः)। वल्लभवल्लकीं—प्रियवीणाम्। परिष्वजे—आलिङ्गामि। एनां—वल्लकीमित्यर्थः।

(१७५) सुदृष्टः,—प्रीत्या अवलोकितः। अम्बा—चरमा। मुञ्च—त्यज। दैवेन—विधिना, दौर्भाग्येण इत्यर्थः। अलक्षणां—दुर्लक्षणाम्। धातेयि !—उपमातनये ! आत्मानं धारय—धैर्य्यमवलम्बस्व इत्यर्थः। अपश्चिमाम्—अपुनः आगामिनीमित्यर्थः। कष्टं—खेदे, दुःखकरमेतदित्यर्थः।

(१७६) आमन्त्रणाञ्जलिः,—विदायाञ्जलिः, विदायकालिककरद्वयसंयोग इत्यर्थः। अन्त्यः,—चरमः। अवसानपरिष्वङ्गः,—श्लेषालिङ्गनम्। चन्तव्याः,—मर्षयितव्याः। प्रणयकलहाः,—प्रेमविवादाः, तेषां जीवनावधित्वात् इति भावः। एवंप्रायान्—एतद्रूपान् भूयिष्ठानित्यर्थः।

(१७७) "दह्यमानश्रवणः" इत्यादौ "मातरं ददर्श" इत्यतेश्च सम्बन्धः। तैः,—आलापैः, प्रागुक्तैरिति यावत्, दह्यमानं—भक्तत्वमापद्यमानम्; अतिसन्तापजनकत्वात् इति भावः; श्रवणं—श्रोत्रेन्द्रियं यस्य तथाभूतः। मातरं विज्ञिनष्टि, निर्य्यान्तीमित्यादि।—निर्य्यान्तीं—निर्गच्छन्तीम्, अन्तःपुरादिति शेषः। दत्तेति।—दत्तानि—वितरितानि, पात्रसात्कृतानीत्यर्थः, सर्व्वाणि—समग्राणि, स्वपतौ स्थितानि

स्वापतेयां, (१७८) गृहीतमरणप्रसाधनां, जानकीमिव जातवेदसं पत्युः पुरः प्रवेक्ष्यन्तीं, प्रत्यग्रस्नानार्द्रदेहतया श्रियमिव भगवतीं सद्यः समुद्रात् उत्थितां, (१७९) कुसुम्भबभ्रुणी वाससी दिवमिव तेजसी साय्ये दधानां,

स्वापतेयानि—धनानि, स्वाधिक्रतानि यौतुकादिद्रव्याणि इत्यर्थः, ["पथ्यतिथि—" (४।४।१०४ पा०) इत्यादिना ढञ्] यया तां, ("द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु" इत्यमरः) महाराजमङ्गल्यार्थम् अर्थिसात् कृतात्मसर्व्वधनामित्यर्थः।

(१७८) गृहीतेति।—गृहीतानि—स्वीकृतानि, मरणाय मरणस्य वा प्रसाधनानि—अलङ्काराः, सहमरणोचितरक्तवसनादय इत्यर्थः, यया तथोक्ताम्। जानकीमिव—जनकदुहितरमिव, सीतामिव इत्युपमा; वैदेही यथा पुरा लङ्कापुरे स्वशुद्धार्थं पत्युः समक्षमेव वह्नौ आत्मानं विसृष्टवती तथेत्यर्थः; तथा हि अन्यारोहणधर्म्मे मृतस्य पत्युः प्रज्वलितायामेव सतीनां प्रवेशो दृश्यते, इह तु तदसत्त्वात्, जीवतः पत्युः पुरतः ज्वलनं प्रविशन्त्याः सीतायाः साम्यं प्रदर्शितम्, एवम्भूतं निदर्शनमतीव दुर्लभमेव; अत्र तु एतावानेव विशेषः यत् तत्र स्वशुद्धिप्रदर्शनार्थम्, इह तु जीवत्यपि पत्यौ भावितद्विरहजशोकं सोढुमशक्नुवत्तया प्रागेव चितायामारोहणमिति एवञ्च उपमागतासाहश्यादिनिबन्धनदोषः न शङ्कनीय इति। जातवेदसम्—अग्निम्, ("अग्निर्वैश्वानरो वह्निः··· । ···जातवेदाश्चनूनपात् ॥" इत्यमरः)। पुरः,—अग्रतः। प्रवेक्ष्यन्तीं—प्रवेष्टुमिच्छन्तीम्, अग्नेरन्तरिष्यन्तीम् इत्यर्थः। प्रत्यग्रेति।—प्रत्यग्रेण—नवेन, अचिरकृतेन इति यावत्, स्नानेन—आप्लावेन, आर्द्रः,—सिक्तः, देहः,—अवयवः यस्याः तस्या भावः, तत्ता तया हेतुना; ज्वलने प्रवेष्टुकामेन अग्निप्रवेशात् पूर्वं कृतस्नानेन पुरुषेण तथा स्त्रियाऽपि भूयते इति प्रसिद्धिः। श्रियमिव—लक्ष्मीमिव; मथ्यमाननीरनिधेराविर्भावत्वेन उत्थितिकालिकसाहश्यसत्त्वात् इति भावः।

(१७९) कुसुम्भेति।—कुसुम्भवत्—महाराजनेत्यपराख्यस्वनामख्यातपुष्पवत्, बभ्रुणी—पिङ्गले, ("बभ्रुर्ना पिङ्गले त्रिषु" इत्यमरः) वाससी—वसने; परिधानमुत्तरीयञ्च इति भावः। दिवमिव—आकाशमिव, साय्ये—सन्ध्याकालीने, तेजसी—सूर्य्याचन्द्रमसौ इत्यर्थः। इहोभयोरुपमानोपमेययोः अवैधर्म्म्यसाम्यसत्त्वादुपमा। यदि सायं युगपत् द्वयोः तेजस्विनोः उदयास्तमयनकृतसत्तायां विरोधः कथित् आशङ्क्यते, तदा तेजःपदस्य तेजस्त्वार्थकतां परित्यज्य दीप्त्यर्थकता ऊररीकरणीया, तथा च साय्यरागौ इव लोहितायमाने वाससी दधानामित्यर्थः।

(१८०) ताम्बूलदिग्धरागान्धकाराधरप्रभापटलपाटलं पट्टांशुकमिव विधवामरणचिह्नम् अङ्गलग्नम् उद्वहन्तीं, (१८१) रक्तकण्ठसूत्रेण कुचान्तरावलम्बिना स्फुटितहृदयविगलितरुधिरधाराशङ्कां कुर्वतीं, १८२) तिर्यक्कुटिलकुण्डलकोटिकण्टकाकृष्टतन्तुना हारेण वलितेन सितांशुकपाशेन इव कण्ठम् उत्पीड्यन्तीं, (१८३) सरसकुङ्कुमाङ्गराग-

(१८०) ताम्बूलेति ।—ताम्बूलानां—पर्णानां,पुनः पुनः चर्व्यितानामिति भावः, दिग्धः,—लिप्तः, घनीभूत इति भावः, रागः,—लौहित्यम्, अन्धकारः इव—तमः इव, स्वाभाविकदीप्तेरावरकत्वात् आवरणभूतः यश्चित्र तादृशः, [उपमितसमासः] योऽधरः, —अधोरदनच्छदः, तस्य प्रभापटलेन—द्युतिपुञ्जेन, पाटलम्—अरुणं, पट्टांशुकमिव —रक्तपट्टवसनमिव । विधवेति ।—विधवानां—पतिहीनानाम् ; पत्युपरमानन्तरं सहमरणप्रवृत्तानामिति भावः ; मरणचिह्नं—सहगमनलक्षणं, रक्तपरिच्छदादिकमिति शेषः । अङ्गलग्नम्—अङ्गासक्तम् । ["ताम्बूल···पटलपाटलम्" इत्यत्र "ताम्बूलदिग्धरागान्धकारप्रभापटलं पाटलम्" इति पाठः समीचीनतया प्रतिभाति ; तत्र ताम्बूलदिग्धरागान्धकाराधरस्य प्रभायाः,—द्युतेः, पटलं—समूहः यत्र तादृशम्, अत एव पाटलं—रक्तवर्णं, पट्टांशुकमिव इति योजना ; तथात्वे पाटलमित्यस्य पट्टांशुकविशेषणत्वेन अधंगरीयस्त्वमिति भावः] ।

(१८१) रक्तेति ।—रक्तं—रक्तवर्णं, कण्ठसूत्रं—गलदेशनिहिततन्तुः तेन, कुचान्तरावलम्बिना—स्तनान्तरविलम्बमानेन । स्फुटितेति ।—स्फुटितात्—विदीर्णात् ; भर्त्तृशोकेन इति भावः ; हृदयात्—वक्षसः, विगलितानि—स्रुतानि, यानि रुधिराणि—शोणितानि, तेषां धाराशङ्कां—प्रवाहसंशयं, कुर्वतीं—जनयन्तीम् ; लोकानां द्रष्टृणामिति भावः ।

(१८२) तिर्यगिति ।—तिर्यक्—वक्रं यथा तथा, कुटिलेन—भङ्गिमता, कुण्डलकोटिकण्टकेन—कर्णभूषणाग्रसूच्या, आकृष्टः,—आकान्तः, तन्तुः,—सूत्रं यस्य तेन । वलितेन—वेष्टनकारिणा, हारेण—एकावल्या, सितांशुकपाशेनेव—श्वेतवसनरूपेण पाशेन, रज्ज्वा इत्यर्थः । उत्पीड्यन्तीम्—उद्बध्नतीम् इव लक्ष्यमाणाम् ; महाशोकाकुलत्वात् इत्याशयः ।

(१८३) सरसेति ।—सरसैः,—आर्द्रैः, कुङ्कुमैः,—वाह्लीकैः, अङ्गरागः,—

तया कवलितामिव दिधक्षता चिताऽर्चिषता, चितानलार्चनाकुसुमैः इव धवलधवलैः अश्रुबिन्दुभिः अंशुकोत्सङ्गम् आपूरयन्तीं, (१८४) गृहदेवताऽऽमन्त्रणबलिमिव वलयैर्विगलद्भिः पदे पदे विकिरन्तीम्, आप्रपदीनां करठे गुणकुसुममालां यमदीलाम् इव आरूढाम्, (१८५) अन्तर्गुञ्जन्मधुकरमुखरेण आमन्त्र्यमाणलोचनोत्पलामिव कर्णोत्पलेन, (१८६) प्रदक्षिणीक्रियमाणामिव मणिनूपुरबन्धुभिर्वल्गमण्डलं भ्रमद्भिर्भवनहंसैः, सन्निहितप्राणसमं मर-

---

अङ्गलेपनं यस्याः, तस्या भावः, तत्ता तया हेतुना, कवलितामिव—ग्रस्तामिव इत्युत्प्रेक्षा। दिधक्षता—दग्धुमिच्छता, चिताऽर्चिषता—चितानलेन। चितेति।—चितानलस्य—स्तदाहनाग्नेः, अर्चनाकुसुमानि—पूजार्थपुष्पाणि तैरिव, इत्यवैधर्म्यसाम्यावगमादुपमालङ्कारः। धवलधवलैः,—अतिस्वच्छैः, अश्रुबिन्दुभिः,—नयनजलकणैः, अंशुकोत्सङ्गं—वसनमध्यभागम, आपूरयन्तीं—परिपूर्णं कुर्वतीम्; स्त्रियो हि पूजार्थकुसुमानि उच्चित्य वसनाञ्चले संरचन्ति इति दृश्यते लोके। गलदश्रुधारया सिक्तवक्षोवसनामिति भावः।

(१८४) पदे पदे—प्रतिपादक्षेपं, विगलद्भिः,—भ्रश्यद्भिः, शोकक्लान्ताभ्यां हस्ताभ्यां इति भावः, वलयैः,—कङ्कणैः, गृहदेवतानां—भवने प्रतिष्ठितकुलदेवतानाम्, आमन्त्रणाय—सम्भाषणाय, बलिमिव—उपहारमिव, विकिरन्तीं—विक्षिपन्तीम्, अर्पयन्तीमिति यावत्। आप्रपदीनां—प्रपदं—पादस्याग्रं, ("पादाग्रं प्रपदम्" इत्यमरः) तन्मर्य्यादाकृत्य आप्रपदं तत्राप्नोति इति आप्रपदीना ताम्, ["आप्रपदं प्राप्नोति" (५.२।८ पा०) इति खञ्] गुणकुसुममालां—तन्तुगुम्फितपुष्पस्रजं, यमदीलामिव—यमस्य समादरेण प्राणिविशेषानयनार्थं दीलायत्नमिव, आरूढाम्—अधिष्ठिताम्।

(१८५) अन्तः,—अभ्यन्तरे, गुञ्जद्भिः,—ध्वनद्भिः, मधुकरैः,—भृङ्गैः, मुखरं—वाचालितं तेन, कर्णोत्पलेन—कर्णावतंसीकृतेन इन्दीवरेणेति यावत्। आमन्त्र्यमाणेति।—आमन्त्र्यमाणं—सम्भाष्यमाणं, लोचनं—नयनम्, उत्पलमिव—इन्दीवरमिवेत्यर्थः, यस्याः तामिव, सजातीयत्वात् कृताभाषणनीलनीरजनयनामिवेति भावः।

(१८६) प्रदक्षिणीक्रियमाणामिव—अप्रदक्षिणा प्रदक्षिणा क्रियमाणा प्रद-

णाय चित्तमिव चित्रफलकमविचलं धारयन्तीम्, (१८७) अर्च्चा-बद्धोह्यमानधवलपुष्पदामकां पतिव्रतापताकामिव पतिप्रास-यष्टिमिष्टामुपगूहमानां, बन्धोरिव निजचारित्रधवलस्य नृपात-पत्रस्य पुरो नेत्रोदकमुत्सृजन्तीं, (१८८) पत्युः पादपतनसमु-द्गमदभ्यधिकबाष्पाम्भःप्रवाहप्रतिरुद्धदृशः कथमपि प्रतिपन्नादे-शान् सचिवान् सन्दिशन्तीम्, (१८९) अनुनयनिवर्त्तितविधुर-

---

क्षिणीक्रियमाणा—विष्वग्भाव्यमाणा तामिव, मणिनूपुरयोः,—रत्नमञ्जीरयोः,बन्धुभिः,—सुहृद्भिः ; मणिनूपुरसदृशस्वनैरिति भावः। बद्धमङ्गलं—विरचितचक्राकारवेष्टन-मित्यर्थः। सन्निहितेति।—सन्निहितः,—चित्रित इति यावत्, प्राणसमः,—जीवन-सदृशः, पतिरिति भावः, यत्र तादृशम्। अविचलं—निश्चलम्, एकाग्रञ्च ; चित्रफलकम्—आलेख्यपटं, धारयन्तीं—दधानाम् ; तीव्रशोकावेगेन कृतमरणनिश्चया-मिति भावः।

(१८७) अर्च्चेति।—अर्च्चा—पूजा, तस्यै बद्धं—संयमितम्, उह्यमानं—कल्प्यमानं, धवलं—श्वेतं, पुष्पदाम—कुसुममाल्यं यत्र तथोक्तां, पतिव्रतापताकामिव —पातिव्रत्यसूचनीं वैजयन्तीमिव, पत्युः,—भर्त्तुः, प्रासयष्टिम्—कुन्ताख्यास्त्रविशेषम्, इष्टां—प्रियां, भर्त्तुरिति शेषः ; यद्वा,—भर्त्तुः प्रियत्वात् आत्मनः प्रियाम् ; प्रियप्रियेषु प्रियवदुपचारवत्त्वात् इति भावः। उपगूहमानाम्—आश्लिष्यन्तीम्। बन्धोरिव—सुहृद इव, निजं—स्वीयं, चारित्रं—विशुद्धं चरितमिव, धवलं—शुभ्रं तस्य, नृपात-पत्रस्य—राजच्छत्रस्य, पुरः,—अग्रतः, नेत्रोदकं—बाष्पम्, उत्सृजन्तीं—मुञ्चन्तीम् ; स्वजनायतः शोकस्य प्राबल्येन प्रकाशः स्वभावसिद्धः इति भावः ; "स्वजनस्य हि दुःखमयती विहतद्वारमिवोपजायते" इत्यादि महाकविप्रयोगदर्शनात्।

(१८८) पत्युः,—स्वामिनः, पादपतने—चरणप्रणिपातकाले, समुद्गमतां—समुच्छलतां, अभ्यधिकानाम्—अधिकाधिकानां, बाष्पाम्भसाम्—अश्रुजलानां, प्रवाहेण—स्रोतसा, प्रतिरुद्धाः,—आवृताः, दृशः,—नेत्राणि येषां तान्, प्रतिपन्ना-देशान्—आज्ञाकारिणः इत्यर्थः, सचिवान्—अमात्यान्, कथमपि—अतिक्लेशेन ; शोकावेगेन रुद्धकण्ठत्वात् इति भावः। सन्दिशन्तीम्—एतत्परमेवमेवं युष्माभिः वर्त्तितव्यमित्यादिशन्तीम्।

(१८९) अनुनयेति।—अनुनयेन—सान्त्वनेन, परलोकेऽपि परिचर्य्यार्थं पति-परायणानां पुरोगमनस्य प्रवीणपण्डितसम्मतत्वात् मदियोगदुःखं मा कुरुत, इत्येवं

हृद्बन्धुवर्गवर्द्धमानध्वनिभिः गृहाक्रन्दैः आक्रम्यमाणश्रवणां, (१९०) भर्तृभाषितनिभैः पञ्जरसिंहहृंहितैर्क्रियमाणहृदयां, धात्र्या भर्तृभक्त्या च निजया प्रसाधितां, जरत्या मूर्च्छया च संस्तुतया धार्य्यमाणां, सख्या पीड़या च व्यसनसङ्गतया समालिङ्गितां, परिजनेन सन्तापेन च (१९१) गृहीतसर्वावयवेन परीतां, कुलपुत्रोच्छ्वसितैश्च महत्तरैः अधिष्ठितां,

प्रबोधवाक्येन इति भावः; निवर्त्तितानां—स्त्रीकृतानां, विधुराणां—विधोगार्त्तानां, हृद्यानां—स्त्रीणां, बन्धुवर्गाणां—सुहृद्गणानां, वर्द्धमानाः,—वृद्धिं गच्छन्तः, उच्चैरोदनादित्यर्थः, ध्वनयः,—विलापाक्षराणीत्यर्थः, यैषु ताद्दशैः, गृहाक्रन्दैः,—स्वगृहमध्ये रुदितरवैः, आक्रम्यमाणं—बलपूर्व्वकं नीयमानमित्यर्थः, महाचीत्कारैः अधिरीक्रियमाणमिति भावः, श्रवणं—श्रोत्रेन्द्रियं यस्याः ताम्।

(१९०) भर्तृभाषितेति।—भर्तुः,—स्वामिनः, भाषितं—वचनं, तन्निभानि—तत्सदृशानि तैः, गम्भीरनिर्घोषत्वादिति भावः, पञ्जरसिंहहृंहितैः,—पञ्जरबद्धसिंहगर्জ্জनैः, क्रियमाणहृदयाम्—आक्रम्यमाणचित्ताम्; भर्तुरज्ञानसादृश्यत्वेन हृदयहारित्वात् इति भावः। धात्र्या—उपमात्रा, भर्तृभक्त्या च—पतिभक्त्या च, प्रसाधितां—प्रकर्षेण निवर्त्तनाय चेष्टिताम्, अलङ्कृताञ्च। जरत्या—वृद्धया, कयाचिदिति शेषः, मूर्च्छया च—मोहेन च, संस्तुतया—परिचितया, एकत्व,—आविवाहं सहावस्थानात्, अन्यत्व,—भर्तुरनिष्टाशङ्कया पुनःपुनरागमनात् इति भावः; धार्य्यमाणाम्—अवलम्ब्यमानां, गृह्यमाणाञ्च। सख्या—वयस्यया, पीड़या—आसन्नभर्तृविरोगजदुःखेनेत्यर्थः। व्यसनसङ्गतया—व्यसने—विपदि, सङ्गतया—सम्मिलितया, सहायभूतयेत्यर्थः, व्यसनात्—विपदः क्षतेः समुपस्थितया च, समालिङ्गितां—समाश्लिष्टाम्, आक्रान्ताञ्च।

(१९१) गृहीतेति।—गृहीताः,—अवलम्बिताः, आक्रान्ताश्च, सर्व्वे,—सकलाः, अवयवाः,—अङ्गानि येन तथोक्तेन। परीतां—वेष्टितां, युक्ताच्च, [परिजनसन्तापादीनां प्रस्तुतानाम् एकक्रियाऽभिसम्बन्धात् तुल्ययोगिताऽलङ्कृतिः]। कुलपुत्रेति।—कुलपुत्राणां—सत्कुलजातानाम्, उच्छ्वसितैः,—दीर्घनिश्वासैः, महत्तरैः,—महामहिमशालिभिः पुरुषैश्च, ["कुलपुत्रोच्छ्वसितैः" इत्यत्र "कुलपुत्रैरुच्छ्वसितैश्च" इति पाठे,—कुलपुत्राः,—कुलीनतनयाः तैः, उच्छ्वसिताः,—ऊर्द्ध्वश्वासाश्च तैः, महत्तरैः,—अतिमहद्भिः, अतिप्रबलैश्च] अधिष्ठितां—परिवृताम्, अभिभूतामित्यर्थश्च]।

(१९२) कञ्चुकिभिः दुःखेन अतिवृद्धैः अनुगतां, भूपालवल्लभान् कौलेयकान् अपि सास्रमालोकयन्तीं, सपत्नीनामपि पादयोः पतन्तीं, (१९३) चित्रपुत्रिका अपि आमन्त्रयमाणां, गृहपतत्रिणामपि अञ्जलिं पुरस्तात् उपरचयन्तीं, पशूनपि आपृच्छमानां, भवनपादपानपि परिष्वजमानां मातरं ददर्श ।

दूरादेव च (१९४) वाष्पायमाणदृष्टिः अभ्यधात्,—"अम्ब ! त्वमपि मां मन्दपुण्यं त्यजसि ? प्रमोद, निवर्त्तस्व" इत्यभिदधान एव च सस्नेहमिव (१९५) नूपुरमणिमरीचिभिः चुम्बामान-

---

(१९२) कञ्चुकिभिः,—प्रागुक्तलक्षणैः अन्तःपुरचारिभिः द्विजविशेषैः । अतिवृद्धैः,—अतिस्थविरैः, महद्भिश्च ; अनुगताम्—अनुसृताम्, अभिभूताच्च । भूपालवल्लभान्—राजप्रियान्, कौलेयकान्—सारमेयान्, कुक्कुरान् इत्यर्थः, सत्कुलसम्भूतान् जनान् वा ("कौलेयकः सारमेये कुलीने" इति मेदिनी) । सास्रं—सबाष्पम ; त्वत्प्रियप्रभुः अचिरमेव इहलोकात् प्रस्थास्यति, त्वं निराश्रया कुत्र गमिष्यसि ? इति कारुण्यात् इति भावः । सपत्नीनां—समानपतिकानां, पादयोः पतन्तीम्—एतावन्तं कालं मया युष्मासु सपत्नीसुलभमीर्ष्यया यत्किञ्चिदपराद्धं, मरणान्तानि वैराणीति मत्वा इदानीमस्मिन्समये तत्सर्वं क्षन्तव्यमित्युक्त्वा चरणौ गृह्णन्तीम् इति भावः ।

(१९३) चित्रपुत्रिकाः,—आलेख्यस्थाः पुत्तलिकाः । आमन्त्रयमाणां—सम्भाष्यमाणाम् । गृहपतत्रिणां—गृहपालितपक्षिणाम् । उपरचयन्तीं—कुर्वतीम् । पशून्—गवादीन् । आपृच्छमानां—सम्भाष्यमाणाम्, ["आङि नुप्रच्छ्याः" (वा०) इत्यात्मनेपदम्, अतः शानच्] भवनपादपान्—गृहप्राङ्गणरोपितवृक्षान् । परिष्वजमानाम्—आलिङ्गन्तीम् ।

(१९४) वाष्पायमाणदृष्टिः,—वाष्पायमाणा—वाष्पमुद्वमन्ती, दृष्टिः,—नेत्रं यस्य तथोक्तः, अश्रुपूर्णनयनः इत्यर्थः । अम्ब !—मातः ! मन्दपुण्यं—क्षीणसुकृतं, पापिनमित्यर्थः, दुर्भाग्यमिति यावत् । निवर्त्तस्व—विरता भव ; मरणाध्यवसायादिति भावः ।

(१९५) नूपुरेति ।—नूपुरयोः,—मञ्जीरयोः, मातुरिति भावः, ("मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः) ये मणयः,—रत्नानि, तेषां मरीचिभिः,—किरणैः,

चूडः चरणयोः न्यपतत्। (१९६) देवी तु यशोवती तथा तिष्ठति पादनिहितशिरसि विमनसि कनीयसि प्रेयसि तनये गुरुणा गिरिणा इव उद्वेगवेगेन अवष्टभ्यमाना, मूर्च्छान्धतमसं रसातलमिव प्रविशन्ती, (१९७) वाष्पप्रवाहेण इव चिरनिरोधसम्पिण्डितेन स्नेहसम्भारेण निर्भरावि र्भूतेन अभिभूयमाना, कृतप्रयत्नापि निवारयितुं न शशाक वाष्पोत्पतनम्। (१९८) उत्कटकुचोत्कम्पप्रकटितासह्यशोकाकूता च, गद्गदिकागृह्यमाणगलविकला, निःसामान्यमन्युतरलोक्रियमाणाधरोद्देशा,

---

चुम्ब्यमानचूड:,—चुम्बमाना—स्पृश्यमाना, चूडा—शिखा यस्य तथाभूतः; चरणार्पितोत्तमाङ्गः इति भावः।

(१९६) "देवी तु" इत्यादौ "निवारयितुं न शशाक वाष्पोत्पतनम्" इत्यन्तेनान्वयः। तथा—तेन प्रकारेण, तदवस्थायामित्यर्थः, तिष्ठति—वर्त्तमाने। पादनिहितशिरसि—चरणन्यस्तमूर्द्धनि। विमनसि—दुर्मनसि, पितुर्जीवननैराश्येन मातुस्त्राट्शाश्वत्यवसायदर्शनेन च चित्तविकृतत्वेसति इत्यर्थः। कनीयसि—कनिष्ठे। [अल्पशब्दात् "द्विवचन—" (५।३।५७ पा०) इत्यादिना ईयसुनि "युवाल्पयोः—" (५।३।६४ पा०) इत्यादिनाऽल्पस्य कनादेशः]। प्रेयसि—अतिप्रियतमे। गुरुणा—महता, गिरिणा इव—पर्व्वतेन इव, उद्वेगवेगेन—दुःखातिरेकेण, अवष्टभ्यमाना—आक्रम्यमाणा। मूर्च्छेति।—मूर्च्छा—मोह एव, अन्धतमसं—गाढान्धकारम्।

(१९७) वाष्पप्रवाहेण—अश्रुस्रोतसा। चिरनिरोधसम्पिण्डितेन—चिरं—बहुक्षणं व्याप्य, निरोधः,—अवरोधः, तेन सम्पिण्डितः,—पुञ्जीभूतः, एकत्र समवेतः इत्यर्थः, तेन। स्नेहसम्भारेण—स्नेहातिशयेन। निर्भरावि र्भूतेन—समधिकमुदयमानेन, नितरामुच्छ्वसितेन इत्यर्थः। अभिभूयमाना—बाध्यमाना। कृतप्रयत्ना—विहितोद्यमा इत्यर्थः। वाष्पोत्पतनम्—अश्रुप्रवाहम्; सवेगं प्रवहतां प्रवाहाणां दुर्वारत्वात् इति भावः।

(१९८) उत्कटेति।—उत्कटेन—उद्दामेन, अत्यन्तेन इत्यर्थः, कुचयोः,—स्तनयोः, उत्कम्पेन—उद्वेपनेन, प्रकटितं,—प्रकाशितं, असह्यं,—दुःसहं, शोकाकूतं—शोकाभिप्रायः यया तथाभूता। गद्गदिकेति।—गद्गदिकया—गद्गदस्वरेण, गृह्यमाणः,—अभिभूयमानः, यः गलः,—कण्ठः, तेन विकला—विप्लवा, महा-

(१९९) पुनरुक्तस्फुरणनिपीड़ितनासापुटा, निमील्य नयने नयनाम्भःसेकप्लवेन प्लावयन्ती विमलौ कपोलौ, (२००)सञ्छाद्य करनखमयूखमालाखचितदशाऽन्तेन तनुना तन्वन्तरनिर्गच्छदच्छासस्रोतसा इव अंशुकपटान्तेन किञ्चित् उत्तानितं वदनेन्दुं दूयमानमानसा, (२०१) स्मरन्ती प्रस्नुतस्तनी प्रसवादिवसात् आरभ्य सकलम् अङ्गग्लायिनः शैथिल्यम् अस्य,

---

विचेताकुलत्वात् सगद्गदं भाषमाणा इत्यर्थः। निःसामान्येति।—निःसामान्येन—असाधारणेन, मन्युना—शोकेन, तरलीक्रियमाणः,—स्फुर्यमाणः, वेपमान इत्यर्थः, अधरोष्ठेन,—अधरभागः यस्याः तथाभूता।

(१९९) पुनरिति।—पुनरुक्तेन—पुनः पुनः प्रवृत्तेन, उत्तरोत्तरं वर्द्धमानेनेत्यर्थः, स्फुरणेन—स्पन्दनेन, निपीड़ितं—विचलितं, ["निपीड़ित—" इत्यत्र "निविड़ित—" इति पाठः,—निविड़ित—घनीभूत, सङ्कुचितमित्यर्थः] नासापुटं—नासिकायुगलं यस्याः तथोक्ता। निमील्य—मुद्रयित्वा। नयनाम्भःसेकप्लवेन—बाष्पजलाभिषेकप्रसरेण, प्लावयन्ती—आपूरयन्ती, मज्जयन्ती, सिञ्चन्ती वेत्यर्थः।

(२००) सञ्छाद्य—आवृत्य। करेति।—करनखानां—इन्दुनखराणां, मयूखमालाभिः,—किरणराजिभिः, खचितः,—व्याप्तः, दशाऽन्तः,—वस्त्रप्रान्तः, अञ्चलप्रान्त इत्यर्थः, यस्य तथोक्तेन। तनुना—सूक्ष्मेण, ["करनख···तनुना" इत्यत्र करनखमयूखमालाखचिततनुना" इति पाठे,—करनखमयूखमालाभिः खचितश्च तथा तनुश्च तेन, खचितः तनुः,—अवयवः यस्य तथोक्तेन इति वा अर्थः]। तन्वन्तरेति।—तन्वन्तरात्—अवयवमध्यात्, निर्गच्छत्—निःसरत्, अच्छं—निर्मलम् असस्रोतः,—अश्रुप्रवाहः यस्य तथाभूतेन इव। अंशुकपटान्तेन—वसनाञ्चलेन। उत्तानितम्—उन्नमितं, वदनेन्दुं—मुखचन्द्रम्। दूयमानमानसा—सन्तप्यमानचित्ता; प्रियात्मजं शोकविह्वलम् अनुशोचन्ती इहेति भावः।

(२०१) स्मरन्ती—ध्यायन्ती। प्रस्नुतस्तनी—चरितपयोधरा, निःसृतस्तन्या इति यावत्, वात्सल्याविर्भावादिति भावः। प्रसवादिवसात्—गर्भमोचनवासरात्, हर्षसोत्पत्तिदिवसादित्यर्थः, [अत्र आरभ्याधिकप्रभृत्यादिशब्दयोगे एव पञ्चमी अनुशिष्टा, न तु आरभ्येति क्रियायोगे, क्रियाक्रान्ततया "प्रसवादिवसात्" इत्यत्र द्वितीया प्रसक्तात्, तथा च ल्यप्लोपे पञ्चमीं विधाय कथञ्चिदेतत्समाधातव्यम्; आरभ्येति

(२०२) ज्ञातिगृहगतहृदया, "अम्ब! तात! न पश्यतं पापां परलोकप्रस्थितां माम् एवम् अतिदुःखिताम्" इति मुहुर्मुहुः आक्रन्दन्ती पितरौ, "हा वत्स! (२०३) विश्रान्तभागधेयया न दृष्टोऽसि" इति प्रेष्ठं ज्येष्ठं तनयम् असन्निहितं क्रोशन्ती, "अनाथा जाता" इति श्वशुरकुलवर्त्तिनीं दुहितरम् अनुशोचन्ती, "निष्करुण! किम् अपराद्धं तव अमुना जनेन?" इति दैवम् उपालभमाना, "नास्ति मत्समा सीमन्तिनी दुःखभागिनी" इति निन्दन्ती बहुविधम् आत्मानं, (२०४) "मुषितास्मि नृशंस! त्वया" इति अकाण्डे कृतान्तं

क्रियापदस्य कर्म्मान्तरयोहनीयमिति राघवान्तः]। अङ्कशायिनः,—उत्सङ्गवर्त्तिनः। अस्य—हर्षस्य।

(२०२) ज्ञातीति।—ज्ञातिगृहं—पितृभवनमित्यर्थः, गतं—प्रस्थितं, हृदयं—चित्तं यस्याः तथोक्ता, स्त्रीत्वभावसाधारण्यात् च्युतपितृकुलेति भावः। अम्ब!—मातः! ["अम्बार्थै—" (७।३।१०७ पा०) इत्यादिना ह्रस्वे "एङ् ह्रस्वात्सम्बुद्धेः" (६।१।६९ पा०) इति सम्बुद्धिलोपः] तात!—पितः! पापां—दुष्कृतकारिणीं, दुरदृष्टामिति यावत्। परलोकप्रस्थितां—लोकान्तरं प्रस्थातुमुद्यताम्। आक्रन्दन्ती—रुदती, सविक्लवस्वरमाह्वयन्ती वा। पितरौ—मातरं पितरञ्च।

(२०३) विश्रान्तभागधेयया—निवृत्तभाग्यया, अभाग्यया इत्यर्थः; जीवत्येव स्वयं भर्त्तुर्लोकान्तरगमनमभावनादिति भावः। प्रेष्ठम्—अतिप्रियम्। ज्येष्ठं—वृद्धतमं, तनयं—पुत्रं, राज्यवर्द्धनमित्यर्थः। असन्निहितं—दूरस्थमिति यावत्। क्रोशन्ती—तमुद्दिश्य रुदती, सहार्त्तस्वरमाह्वयन्ती वा इत्यर्थः। अनाथा—अशरणा इत्यर्थः; दुष्टग्रहविधियोगेन कदाचिदापदि तथाभूतस्निग्धशरण्यलाभासम्भवादिति भावः। दुहितरं—कन्यां, राज्यश्रियम् इति यावत्, अनुशोचन्ती—सशोकं स्मरन्ती। निष्करुण!—निर्दय! किमपराद्धं—कीदृशोऽपराधः कृतः। अमुना जनेन—मया इत्यर्थः। दैवं—नियतिम्। उपालभमाना—तिरस्कुर्व्वती। सीमन्तिनी—नारी, ("नारी सीमन्तिनी वधूः" इत्यमरः)।

(२०४) मुषिता—विप्रलब्धा, जीवनेश्वरहरणदोषेण हृतसर्व्वस्वा इति यावत्। नृशंस!—निष्ठुर! अकाण्डे—सहसा। कृतान्तम्—अन्तकम्।

गर्हमाणा मुक्तकण्ठम् अतिचिरं प्राकृतप्रमदा इव प्रारोदीत्।

(२०५) प्रशान्ते च मन्युवेगे सस्नेहम् उत्थापयामास सुतम्। हस्तेन च अस्य प्रकृदितस्य (२०६) पक्ष्मपालीपुञ्ज्यमाननखकिरणनिवहां द्रुताम् इव अधिकतरं चरन्तीं दृष्टिम् उन्मार्ज्ज। स्वयमपि (२०७) कठोररागपरिपीयमानेन धवलिम्ना मुच्यमानोदरे (२०८) क्षणदक्षयत्पर्य्यन्ते शुक्लश्रीकरतारतारकितपक्ष्मणी (२०९) सूक्ष्मतराश्रुबिन्दुपरिपाटीपतनानुबन्धविधुरे लोचने पुनः पुनः आपूर्य्यमाणे प्रमृज्य

गर्हमाणा—निन्दन्ती। मुक्तकण्ठम्—उच्चैरिति यावत्। प्राकृतप्रमदा इव—सामान्या नारी इव। "देवी तु" इत्यारभ्य अस्मिन् सन्दर्भे महाश्वेताकादम्बर्योः स्त्रीजातीयविलापादीनां यथावद्वर्णनात् कवीन्द्रचमत्कारातिशया स्वभावोक्तिः यथासम्भवमलङ्कारे च उत्प्रेक्षारूपकादिभिः सङ्कीर्णा इत्यवदातम्।

(२०५) प्रशान्ते—निवृत्ते। मन्युवेगे—शोकप्रसरे। सुतं—हर्षमित्यर्थः।

(२०६) पक्ष्मेति।—पक्ष्मणां—नेत्रलोम्नां, पालीषु—श्रेणीषु, पुञ्ज्यमानः,—पुञ्जीक्रियमाणः, सङ्क्ष्यमाणः इत्यर्थः, उन्मार्ज्जनकाले इति भावः; नखकिरणानां—करजमयूखानां, निवहः,—समूहः यस्यां तां, द्रुतामिव—द्रवीभूतामिव। चरन्तीं—भ्रमन्तीम्। दृष्टिं—नेत्रं, नेत्रजलमित्यर्थः। उन्मार्ज्ज—विशोधयामास, प्रोञ्छितवती इत्यर्थः।

(२०७) कठोरेति।—कठोरेण—घनेन, गाढेनेत्यर्थः, रागेण—लौहित्येन, रोदनवशादिति भावः; परिपीयमानः,—आत्रियमाणः, निरस्यमान इत्यर्थः, तेन। धवलिम्ना—धावल्येन। मुच्यमानं—क्षीयमाणम्, उदरम्—अभ्यन्तरं यथोः तथाभूते, अनवरतरोदनेन आताम्रे इत्यर्थः।

(२०८) क्षणदेति।—क्षणता—उच्चतां गच्छता, अश्रुणा—नयनवारिणा, क्षयत्—क्षीयमाणं मच्छत्, पर्य्यन्तः,—प्रान्तभागः ययोः तादृशे। शुक्लेति।—शुक्लेन—धवलेन, श्रीकरेण—बाष्पकणेन, तारम्—अत्यन्तं, तारकितानि—सञ्जाततारकाणि, पक्ष्माणि—लोमानि ययोः तथाविधे।

(२०९) सूक्ष्मेति।—सूक्ष्मतराणाम्—अतिसूक्ष्माणाम्, अश्रुबिन्दूनां—नेत्रजल-

(२१०) वाष्पार्द्रगण्डगृहीताञ्च श्रवणशिखरम् आरोप्य शोकलम्बाम् अलकलताम्, (२११) अधःस्रस्तविलोलबालिकाव्याकुलिताञ्च समुत्सार्य्य तिरश्चीं चिकुरसटाम्, (२१२) अश्रुप्रवाहपूरितम् आर्द्रञ्च किञ्चित् च्युतमुत्क्षिप्य हस्तेन स्तनोत्तरीयं तरङ्गितमिव नखांशुपटलेन, (२१३) मग्नांशुकपटान्ततनुताम्रलेखालाञ्छितलावण्यकुञ्जकावर्जितराजतराजहंमाम्य-

कर्णानां, परिपाट्याः,—परम्परायाः, पतनानुबन्धेन—चरणसातत्येन, अविच्छिन्नपतनेन इत्यर्थः, विधुरे—कातरे। आपूर्य्यमाणे—भ्रियमाणे, अश्रुभिरिति शेषः।

(२१०) वाष्पेति।—वाष्पेण—नेत्रोदकेन, आर्द्रः,—सिक्तः, गण्डः,—कपोलः, तेन गृहीता—धृता, तत्र सम्बद्धा इत्यर्थः, तां, वाष्पार्द्रकपोलपतितामिति यावत्। श्रवणेति।—श्रवणशिखरं—कर्णाग्रं, कर्णोपरीत्यर्थः। आरोप्य—स्थापयित्वा। शोकलम्बां—शोकेन लम्बते इति तथोक्तां, मन्युवशात् प्रसाधनसंयमनादिराहित्यात् स्रस्तामित्यर्थः। अलकलतां—लतावत् लम्बमानं चूर्णकुन्तलम्।

(२११) अध इति।—अधःस्रस्ता—बन्धनशैथिल्यात् अधःपतिता, विलोला—विशीर्य्यन्ती, बालिकया—कयाचित् बालया, व्याकुलिता—विपर्य्यासेन धृता ताम्; यद्वा,—बालिकया—कर्णभूषणेन, व्याकुलिता—विपर्य्यस्ता तास्; कतिचित् केशानां कर्णभूषणे आबद्धत्वादिति भावः; ("बालिका। बालायां बालुका-पत्रकाहले कर्णभूषणे" इति मेदिनी)। तिरश्चीं—वक्रां, भङ्गिमतीमिति भावः, ["उगितश्च" (४। १। ६ पा०) इति ङीप्] चिकुरसटां—केशराजिम्। समुत्सार्य्य—अपनीय, मुखादिप्रदेशादिति भावः।

(२१२) अश्रुप्रवाहेति।—अश्रूणां—नयनाम्बूनां, प्रवाहेण—स्रोतसा, पूरितं—पूर्णम्, अत एव आर्द्रं—सिक्तम्। च्युतं—स्खलितं, स्वस्थानादिति भावः। उत्क्षिप्य—उत्तोल्य, यथास्थाने अवस्थाप्य इत्यर्थः। स्तनोत्तरीयं—स्तनावरणभूतः यः उत्तरासङ्गः तम्। तरङ्गितमिव—सञ्जातभङ्गमिव, आकुञ्चितमिवेत्यर्थः। नखांशुपटलेन—नखरप्रभासमूहेन। ["नखांशुपटलेन" इति पाठस्तु क्वचित् पुस्तके न दृश्यते; तत्र तु अश्रुप्रवाहपूरितत्वेन स्वस्थानच्युतत्वेन च तरङ्गितमिवेति बोद्धव्यम्]।

(२१३) मग्नेति।—मग्नस्य—अश्रुप्लुतयोः कपोलयोः मसक्तस्य, अंशुकपटान्तस्य—उत्तरीयवसनाञ्चलस्य, तनूनाम्—अवयवानां, तन्वीनामिति भावः, ताम्रलेखाभिः,—रक्तरेखाभिः, लाञ्छितं—विच्छायीकृतं, लावण्यं—कान्तिः यस्याः तथाभूता, या

भृङ्गारकास्यसमुद्गीर्णेन पयसा प्रक्षाल्य मुखकमलं, (२१४) कल-मूकलोककरविधृते धौतवासःशकले शुचिनि समुन्मृज्य पाणौ, (२१५) सुतवदनविनिहितनिभृतनयनयुगला चिरं स्थित्वा पुनः पुनः आयतं निश्वस्य अवादीत्,—"वत्स! नामि (२१६) न-प्रियो निर्गुणो वा परित्यागार्हो वा। स्तन्येन एव सह त्वया पीतं मे हृदयम्। अस्मिंश्च समये प्रभूतप्रभुप्रसादान्तरिता त्वां न पश्यति दृष्टिः। अपि च

कुञ्जिका—उन्नतपृष्ठपरिचारिकाविशेषः, तया आवर्जितस्य—आनीतस्य, राजतस्य—रौप्यमयस्य, राजहंसास्यालङ्कारकस्य—राजहंसमुखाकाररचितस्य "गाडु" इति ख्यातस्य जलाधारविशेषस्य इत्यर्थः, आस्यं—मुखं, तस्मात् समुद्गीर्णेन—निर्गतेन, ["मग्नांशुक·····समुद्गीर्णेन" इत्यत्र "मग्नांशुकपटान्ततनुतामलेखालाञ्छितलावण्य-कुञ्जिकावर्जितराजतराजहंसास्यसमुद्गीर्णेन" इति पाठे,—मग्नः,—आच्छन्नः, वस्त्रे-णेति भावः, अंशुकपटान्तस्य तनूनां तामलेखाभिः खाञ्छितं लावण्यं यस्य तथाभूतस्य तथा कुञ्जिकया—"चाबि" इति ख्यातेन मञ्जूषादिपिहटनयन्त्रभेदेनेत्यर्थः, आवर्जितः,—आयत्तीकृतः, उद्घाटित इत्यर्थः, राजतः,—रौप्यनिर्मितः, यः राजहंसः,—राजहंसाकृतिजलाधारविशेषः, तस्य आस्यसमुद्गीर्णेन इत्यर्थः]। पयसा—जलेन।

(२१४) कलेति।—कलमूकः,—जन्ममूकः, लोकः,—जनः, तस्य करेण—पाणिना, विधृतं—गृहीतं तस्मिन्। ["कलमूकलोककरविधृते" इत्यत्र "कल-मूकलोकविधृते" इति पाठान्तरम्]। धौतवासःशकले—प्रक्षालितवसनखण्डे, [पुस्तकान्तरे "धौत" इति पाठो न दृश्यते]। शुचिनि—धवले पवित्रे वा। पाणौ—हस्तौ, समुन्मृज्य—शोधयित्वा, निर्जलीकृत्येत्यर्थः।

(२१५) सुतेति।—सुतस्य—पुत्रस्य, वदने—मुखे, विनिहितम्—अर्पितं, निभृतं—निश्चलं, निर्निमेषमित्यर्थः, नयनयुगलं—नेत्रद्वयं यया तथाभूता; अतिस्नेहो-दयात् निमेषालसपक्ष्मपङ्क्तिरिति भावः। आयतं—दीर्घम्।

(२१६) न-प्रियः,—अप्रियः, द्वेष्य इत्यर्थः [इह नञ्शब्देन "सहसुपा" (२।१।४ पा०) इति समासः; समासे च हलि परतः नञः अकारभागस्य वैकल्पिकत्वात् अत्र तदभावपक्ष एवाश्रितः]। स्तन्येन—जनदुग्धेन। प्रभूतेति।—प्रभूतेन—समधिकेन, प्रभुप्रसादेन—स्वामिभक्त्या, अन्तरिता—आच्छादिता;

पुत्रक! (२१७) पुरुषान्तरविलोकनव्यसनिनी राज्योपकरणाकरुणा वा न अस्मि लक्ष्मीः क्षमा वा। (२१८) कुलकलत्रम् अस्मि चारित्रधना धर्मधवले कुले जाता। (२१९) किं विस्मृतोऽसि मां समरशतशौण्डस्य पुरुषप्रकाण्डस्य केशरिण इव केशरिणीं गृहिणीम्? वीरजा वीरजाया वीरजननी च माद्दशी पराक्रमक्रीता कथमन्यथा कुर्य्यात्? एवंविधेन पित्रा ते भरतभगीरथनाभागनिभेन नरेन्द्रहृन्दारकेण गृहीतः पाणिः।

यद्वा,—निरतिशयस्वाम्यनुग्रहेण तिरस्कृता, अकालं तेन परित्यक्ततया तदनुग्रहलाभवञ्चितेत्यर्थः।

(२१७) पुरुषान्तरेति।—पुरुषान्तरस्य—अपरपुरुषस्य, पतीतरस्य इत्यर्थः, विलोकने—दर्शने, व्यसनिनी—अत्यासक्ता। राज्योपकरणेति।—राज्यस्य—राजत्वस्य, उपकरणे—उपकारक्रियायाम्, अकरुणा—निर्दया। ["राज्योपकरणाकरुणा" इत्यत्र "राज्योपकरणमकरुणा" इति पाठः,—राज्योपकरण—राज्यस्य अङ्गभूता इत्यर्थः, शोभावर्द्धनार्थमिति भावः,"लक्ष्मीः क्षमा वा" इत्यन्वयः]। क्षमा—पृथिवी; लक्ष्मीः क्षमा च यथा नित्यं चला—पुंश्चली इव बहुपुरुषासक्ता, राज्ञी लोकनरक्षणरूपोपकारकरणे च निर्दया, तथाभूता अहं नास्मि इति भावः।

(२१८) कुलकलत्रं—कुलाङ्गना; सत्कुलप्रसूता इति भावः। चारित्रधना—विशुद्धपतिपरायणताचारसर्व्वस्वा, पातिव्रत्यमेव धनं यस्याः सतीं रक्षणीयमिति अनिशं विभावयन्ती इत्यर्थः; तस्य ऐहिकपारलौकिकाक्षयसौख्यसाधनत्वादित्याशयः। धर्म्मधवले—अमलसतीधर्म्मोज्ज्वले इति भावः।

(२१९) किं विस्मृतः?,—कस्य पुत्री, कस्य पत्नी, कस्य जननी इति विस्मरणमापन्नः किम्? समरशतशौण्डस्य—शतशतसङ्ग्रामकुशलस्य, अनेकसङ्ख्यकयुद्धविजयिन इत्यर्थः। पुरुषप्रकाण्डस्य—पुरुषश्रेष्ठस्य। केशरिणः,—सिंहस्य। केशरिणीं—सिंहीम्। वीरजा—वीरप्रसूता, वीरकन्या इत्यर्थः। वीरजाया—वीरपत्नी। वीरजननी—वीरपुत्री। पराक्रमक्रीता—वीर्य्यशुल्का। अन्यथा—अन्यप्रकारं, प्रोक्तविधनारीविगर्हिताचरणमित्यर्थः; भर्तुरभावेऽपि जीवनधारणरूपमिति भावः। एवंविधेन—समरशतशौण्डेन पुरुषप्रकाण्डेन इत्यर्थः। भरत-भगीरथ-नाभागनिभेन—भरतादिसदृशेन; लोकपालदुर्द्धर्षप्रभावशालिना चक्रवर्त्तिना इति भावः। नरेन्द्रहृन्दारकेण—

(२२०) आसेवितः सेवासम्भ्रान्तानन्तसामन्तसीमन्तिनीसमावर्जितजाम्बूनदघटाभिषेकः शिरसा। (२२१) लब्धो मनोरथदुर्लभो महादेवीपट्टबन्धसत्कारलाभो ललाटेन। आपीतो युष्मद्विधैः (२२२) पुत्रैः अभिलषकलत्रवन्दीवृन्दविधूयमानचामरमरुच्चलचीनांशुकधरो पयोधरौ। सपत्नीनां शिरःसु

नरेन्द्रश्रेष्ठेन। पाणिः,—करः, ममेति शेषः; गृहीतः,—स्वीकृतः, अहमुपयेमे इत्यर्थः।

(२२०) आसेवितः,—लब्धः। सेवेति।—सेवायै—परिचर्यायै, सम्भ्रान्ताः,—अहमहमिकया व्याकुलाः, अनन्ताः,—बहव इत्यर्थः, सामन्तानाम्—अधीश्वराणां, याः सीमन्तिन्यः,—नार्यः, ताभिः समावर्जितैः,—समाहृतैः, स्वपत्नार्थं मां शिरसः उपरि धृतैर्वा; जाम्बूनदघटैः,—काञ्चनकलसैः, ("स्वर्णं सुवर्णं कनकं··· । रूक्मं कार्तस्वरं जाम्बूनदमष्टापदीऽस्त्रियाम्" इत्यमरः) यः अभिषेकः,—स्नानमित्यर्थः; पट्टमहिषीसम्मानानुरूपम् इति भावः।

(२२१) लब्धः,—प्राप्तः। मनोरथदुर्लभः,—मनोरथैः,—अभिलाषैः, अपीति भावः, दुर्लभः,—दुष्प्रापः, महासौभाग्यवतीलभ्यत्वात् इत्याशयः। महादेवीति।—महादेवी—राज्ञः प्रधानमहिषी, तस्याः यः पट्टबन्धः,—शिरोभूषणभूतकिरीटबन्धनं, तेन सत्कारलाभः,—पूजालाभः, सर्व्वराजदाराभ्यः सम्मानातिशय इत्यर्थः; यद्वा,—महादेवीपट्टस्य—प्रधानमहिषीपदबोधकलेख्यपत्रस्य विशिष्टशिरोभूषणादिरूपस्येत्यर्थः, यो बन्धः,—धारणं, तेन यः सत्कारः,—सर्व्ववसमादरः, तस्य लाभः,—प्राप्तिः, मुकुटधारणपूर्व्वकं नारीसमाजेषु यत्कर्व्वोन्नतपदलाभः इत्यर्थः। ललाटेन—भालदर्शनेन। एतया सर्व्वोच्चपदप्राप्त्या आश्वास्यान्तरं मे नास्ति, येन अतः परं जिजीविष्यते इति व्यज्यते।

(२२२) पुत्रैः,—पुत्रदुहितृभिः इत्यर्थः, [पुत्री च दुहिता च इति विग्रहे "भाट्टपुत्री—" (१।२।६८ पा०) इत्यादिना एकशेषे रूपम्]। अभिलषेति।—अभिलाषाणां—शत्रूणां, कलत्राणि—नार्य्य एव, वन्दाः,—विजयश्रुताः स्त्रियः, तासां वृन्दानि—समूहाः, तैः विधूयमानानां—सञ्चाल्यमानानां, चामराणां—बालव्यजनानां, मरुता—वायुना, चलतः,—स्फुरतः, चीनांशुकस्य—सूक्ष्मवसनस्य, धरौ—धारकौ; एतेन सौभाग्योत्कर्षवत्त्वमस्याः द्योतितम्; पयोधरौ—स्तनौ।

(२२३) निहितं नमन्निखिलकटककुटुम्बिनीकिरीटमाणिक्यमालाऽर्चितं चरणयुगलकम्। (२२४) एवं कृतार्थसर्ववयवा किमपरम् अपेक्षे क्षीणपुण्या? मर्त्तुम् (२२५) अविधवैव वाञ्छामि। न च शक्नोमि (२२६) दग्धस्य भर्तुः आर्य्यपुत्रविरहिता रतिः इव निरर्थकान् प्रलापान् कर्त्तुम्। पितुश्च ते (२२७) पादधूलिः इव प्रथमं गगनगमनम् आवेदयन्ती बहुमता भविष्यामि शूरानुरागिणीनां सुराङ्गनानाम्।

(२२३) निहितं—स्थापितम्। नमदिति।—नमन्तीनां—प्रणिपतन्तीनां, निखिलानां—समस्तानां, कटककुटुम्बिनीनां—सैनिकरमणीनां, किरीटेषु—मुकुटेषु, शिरोभूषणेषु इत्यर्थः, या माणिक्यमालाः,—रत्नस्रजः, ताभिः अर्चितं—राञ्जितमित्यर्थः। सपत्नीनां शिरःसु निहितमित्यनेन स्वामिनः एवं हृदयप्रेयसी भूत्वा इदानीं तद्विरहितप्राणान् धर्त्तुं कथमहमुत्सहे? इति व्यज्यते।

(२२४) एवम्—इत्थम्। कृतार्थेति।—कृतार्थाः,—सिद्धकामाः; नरेन्द्रश्रेष्ठयहणादिति भावः; सर्वे—समस्ताः, अवयवाः,—अङ्गानि, पाण्यादय इत्यर्थः, यस्याः तथाभूता। अपरम्—अन्यत्। अपेक्षे?—याचे, आशां करोमि? इत्यर्थः। यतः क्षीणपुण्या—पुण्यक्षयवती; पूर्वोक्तभोगेन तत्क्षयानुमानात् इति भावः; पुण्यान्तरसद्भावे तु भर्तुरीदृशी दशा न स्यादिति तात्पर्यम्। भर्तुः महापीड़ादर्शनेन स्वस्य सुकृतक्षयोऽनुमीयते इत्यनुमानालङ्कृतिः व्यज्यते]।

(२२५) अविधवा—अनुपभुक्तवैधव्येति यावत्; सधवेति भावः।

(२२६) दग्धस्य—श्मशानानलेन हरकोपेन च प्लुष्टस्य, भर्तुः,—स्वामिनः, [सम्बन्धविवक्षया षष्ठी]। आर्य्यपुत्रविरहिता—स्वामिवियुक्ता, मृतपतिका इति यावत्। रतिरिव—कामपत्नीव। निरर्थकान्—निष्प्रयोजनान्। प्रलापान्—अनर्थकवचांसि, ("प्रलापोऽनर्थकं वचः" इत्यमरः); तदा प्रतीकारोपायाभावादिति भावः। पुरा रतिर्यथा हरकोपानले भर्तुर्दाहानन्तरं तदर्थं बहुधा प्रलापं कृतवती, नाहं तथा कर्तुं शक्नोमीति निष्कर्षः। अत्र व्यतिरेको व्यज्यते।

(२२७) पादधूलिः,—चरणरजः। गगनगमनं—खगेगमनम्, आकाशगमनञ्च; आवेदयन्ती—निवेदयन्ती। बहुमता—बहुसत्कृता। शूरेति।—शूरेषु—वीरेषु, अनुरागिण्यः,—आसक्ताः तासां, सुराङ्गनानां—देवमहिलानाम्; पदधूलिः पुरो-

(२२८) प्रत्यग्रदृष्टदारुणदुःखदग्धायाश्च मे किं धक्ष्यति धूमध्वजः ? मरणाच्च मे जीवितम् एव अस्मिन् समये साहसम्। (२२९) अतिशीतलः पतिविरहशोकानलात् अक्षयस्नेहेन्धनात् अस्मात् अनलः। (२३०) कैलासकल्पे प्रवसति जीवितेश्वरे जरत्तृणकणिकालघीयसि जीवितं लोभ इति क्व घटते ? अपि

यायिनी यथा कन्यापि आगमनं ज्ञापयति, तथा अहं तव पितुर्वीरस्य आगमनम् अयतः तासां निवेद्य बहु सम्मानं ताभ्यः लप्से इति भावः।

(२२८) प्रत्यग्रेति।—प्रत्यग्रम्—अभिनवम, अननुभूतपूर्व्वमिति यावत्, दृष्टम्—इदानीमनुभूतं, यत दारुणं—भीषणं, दुःखं—शोक इति यावत्; भर्तृपीडाजनित इति भावः; तेन दग्धायाः,—भस्मीभूतायाः, ["प्रत्यग्रदृष्ट—" इत्यत्र "प्रत्यक्षदृष्ट—" इति पाठे,—प्रत्यक्षं—साक्षात्, दृष्टम्—अवलोकितं, त्वयेति शेषः]। धक्ष्यति ?—भस्मीकरिष्यति। धूमध्वजः,—अग्निः। साहसं—महसा—बलेन कृतम्; मरणस्य तापनिवृत्तिकरत्वेनाक्लेशकरत्वात्, जीवनस्य तु महायत्नसाध्यत्वेन निरतिशयक्लेशहेतुत्वात् जीवितुमिच्छा नास्तीति भावः।

(२२९) पतिविरहशोकानलात्—भर्तृवियोगशोकाग्नेः। ["पतिविरहशोकानलात्" इत्यत्र "पतिशोकानलात्" इति पाठान्तरम्]। अक्षयेति।—अक्षयम्—अविनाशि, स्नेहः,—प्रेम एव, इन्धनं—काष्ठं यस्य तथाभूतात्। अस्मात्—अनुभूयादित्यर्थः। अनलः,—लौकिकः अग्निरित्यर्थः, अतिशीतलः,—जलेनेव दग्धीकरणात् जलशीतलस्पर्शवानेवेति भावः। अत्र विरहशोकानलात् लौकिकानलस्यातिशैत्यकथनात् तदुत्कर्षप्रतीतेः व्यतिरेकालङ्कारो व्यज्यते।

(२३०) कैलासकल्पे—कैलासपर्व्वतनिभे, महासारत्वादतिनिर्म्मलाशये इति ध्वनिः; जीवितेश्वरे—प्राणनाथे, ["जीवितेश्वरे" इत्यत्र "जीवेश्वरे" इति पाठान्तरम्] प्रवसति—परलोकं जिगमिषति इत्यर्थः, ["धातुसम्बन्धे प्रत्ययाः" (३।४ १ पा०) इति भविष्यति वर्त्तमानप्रयोगवत्त्वम्]। जरदिति।—जरन्ती—जीर्णा, शुष्का इत्यर्थः, या तृणकणिका—तृणलेशः, तद्वत् लघीयसि—अतिलघुनि, जीविते—जीवने, लोभः,—स्पृहेत्यर्थः, इति क्व—कुत्र, घटते ?—युज्यते ? न कुत्रापीत्यर्थः; जीवितेश्वरापगमे जीवितस्य स्थितिः न कथमपि सङ्गच्छते, आश्रयनाशे आश्रयिनाशस्यान्वयव्यतिरेकसिद्धत्वात् इति भावः।

च जीवन्तीम् अपि मां (२३१) नरपतिमरणावधीरणमहापातकिनीं न स्प्रक्ष्यन्ति पुत्र! पुत्रराज्यसुखानि। दुःखदग्धानाञ्च हृदि भूतिः अमङ्गला च अप्रशस्ता च निरुपयोगा च भवति। वत्स! (२३२) विश्वस्तानां स्थास्नुना यशसा स्थातुम् इच्छामि लोके, न वपुषा। तत् अहमेव त्वां तावत् तात! (२३३) प्रसादयामि, न पुनः मनोरथप्रातिकूल्येन कदर्थनीया अस्मि" इत्युक्त्वा पादयोः अपतत्।

(२३१) नरपतीति।—नरपतेः,—राज्ञः, मरणं—मृत्युः, तस्य अवधीरणम्—अवज्ञानम्; स्वजीवनरक्षणकामनया उपेक्षणमिति भावः; तेन यत् महत् पातकं—पापं, तत् विद्यतेऽस्या इति तथाभूताम्; स्वामिमरणेऽपि निजजीविष्यमिति भावः। न स्प्रक्ष्यन्ति—न आश्रयिष्यन्ति इत्यर्थः; महापातकिस्पर्शनिषेधादिति भावः। पुत्रेति।—पुत्रस्य—तनयस्य, राज्ये—राजत्वे, पुत्रे राजासनाधिरूढे इत्यर्थः, यानि सुखानि—आनन्दाः तानि; स्वामिविरहे राजमाता भूत्वाऽपि नाहं सुखिनी भवेयम्; अनाथत्वात् इति भावः। भूतिः,—स्थितिरित्यर्थः, भस्म च। अमङ्गला—अशिवा; मङ्गलानुष्ठानादौ योगदानानर्हत्वादिति भावः। अप्रशस्ता—प्रशंसाऽनर्हा, हीनत्वज्ञापिका इत्यर्थः; लोकैरवज्ञातत्वादिति भावः। निरुपयोगा—निष्प्रयोजना; कस्यापि उपकारादिकरणासामर्थ्यादिति भावः। अस्मादपि अमङ्गलम् अप्रशस्तम् अप्रयोजनीयञ्च इति बोद्धव्यम्।

(२३२) विश्वस्तानां—विधवानां, ("विश्वस्ताविधवे समे" इत्यमरः)। स्थास्नुना—स्थिरतरेण, ["ग्लाजिस्थश्च स्नुः" (३।२।१३९ पा०) इति स्नुप्रत्ययः। "स्थास्नुना" इति पाठस्तु पुस्तकान्तरे नास्ति] यशसा—कीर्त्या; भर्तुः अयशमनजनितया इति भावः। स्थातुं—वर्त्तितुम्; अविनाशितया निरवच्छिन्नत्वात् इति भावः। वपुषा—देहेन; "कीर्तिर्यस्य स जीवति" इति स्मरणात् अक्षय्ययशसैव जीवितुमिच्छामि, न नश्वरदेहेन इति भावः।

(२३३) प्रसादयामि—प्रसन्नं कारयामि, मरणे अनुमोदनरूपां प्रसन्नतां प्रार्थये इत्यर्थः। मनोरथप्रातिकूल्येन—अभीष्टव्याहत्या, कदर्थनीया—क्लेशनीया। पादयोरपतदिति।—पुत्रस्य पदतले पतनं नीतिविगर्हितं तथा विसङ्गमपि तदानीं विवेकवैकल्यात् स्वभाविपतिविधेयं सोढुमसमर्थतया भर्तुः प्रागेव जीवनविसर्जने आग्रहातिशयद्योतनार्थं, तथा स्वाभिप्रेतविषये प्रतिबन्धकाचरणाशङ्कया अनुनयनार्थञ्च मन्तव्यम्।

(२३४) स तु ससम्भ्रमम् अपनीय चरणयुगलम् अवनमिततनुः उभयकरविधृतवपुषम् (२३५) अवनिगतशिरसम् उदनमयत् मातरम्। (२३६) दुर्निवारतान्च शुचः समवधार्य्य, कुलयोषिदुचिताञ्च तामिव श्रेयसीं मन्यमानः क्रियां, कृतनिश्चयाञ्च तां ज्ञात्वा तूष्णीम् अधोमुखोऽभवत्।

(२३७) अभिनन्दति हि स्नेहकातरापि कुलीनता देशकालानुरूपम्। देवी अपि यशोवती परिष्वज्य समाघ्राय च तं शिरसि, निर्गत्य चरणाभ्यामेव च अन्तःपुरात् (२३८) पौराक्रन्दनिर्भराभिः उपरुध्यमाना इव दिग्भिः सरस्वतीतीरं ययौ। तत्र च स्नोस्नभावकातरैः दृष्टिपातैः

(२३४) सः,—हर्षः। ससम्भ्रमं—सत्वरं, सत्यर्यमिति यावत्; अपनीय—अपसार्य्य। अवनमिततनुः,—प्रणमितकायः। उभयेति।—उभयाभ्यां—द्वाभ्यां, कराभ्यां—हस्ताभ्यां, विधृतं—गृहीतं, वपुः,—शरीरं यस्याः तथोक्ताम्।

(२३५) अवनिगतशिरसं—भूतलपतितमस्तकाम्। उदनमयत्—उत्थापयामास।

(२३६) दुर्निवारतां—दुःसहताम्। शुचः,—शोकस्य। कुलयोषिदुचितां—कुलाङ्गनासदृशीं, तां क्रियाम्—अग्निप्रवेशरूपाम् इत्यर्थः। श्रेयसीं—प्रशस्याम्। कृतनिश्चयां—दृढसङ्कल्पामित्यर्थः। तां—मातरमित्यर्थः। ज्ञात्वा—विभाव्य, "क इङ्गितार्थस्थिरनिश्चयं मनः पयश्च निम्नाभिमुखं प्रतीपयेत्" इत्यादि महाजनवाक्यात् इति भावः।

(२३७) अभिनन्दति—प्रशंसति, आद्रियते इत्यर्थः, लङ्घितुं न शक्नोतीति भावः। स्नेहकातरा—स्नेहव्याकुला, मातृवियोगशङ्कया विधुरापीति भावः। कुलीनता—सत्कुलजातता। देशकालानुरूपं—तत्तद्देशकालोचितम्, आचारम् इति शेषः; तत्काले तद्देशे च सत्कुलजातानां नारीणां पत्यनुगमनस्य सदाचारत्वेनावश्यानुष्ठेयतया अनिच्छन्नपि हर्षः मातुरग्निप्रवेशं प्रतिरोद्धुं न इयेष इति भावः। तं—हर्षम्। ["पुस्तकान्तरे "तम्" इति पाठो न दृश्यते]।

(२३८) पौरेति।—पौराणां—पुरवासिनाम्, आक्रन्देन—रोदनेन, निर्भराः,—आपूरिता इत्यर्थः, ताभिः। उपरुध्यमाना इव—निरुध्यमाना इव; स्त्रीसुलभ-

(२३९) प्रविकसितरक्तपङ्कजपुञ्जैः इव अर्चयित्वा भगवन्तं भानुमन्तमिव मूर्त्तिः ऐन्दवी चित्रभानुं प्राविशत्। (२४०) इतरोऽपि माहमरणविह्वलो बन्धुवर्गपरिवृतः पितुः पार्श्वं प्रायात्, अपश्यच्च स्वल्पावशेषप्राणवृत्तिं परिवर्त्स्यमानतारकं तारकराजमिव अस्तम् अभिलषन्तं जनयितारम्। (२४१) असह्यशोकोद्रेकाभिद्रुतश्च त्याजितः पितृस्नेहेन धैर्य्यम्। (२४२) आश्लिष्य अस्य सकलदुर्मदमहीपालमौलिमालालालितौ पादपद्मौ,

स्वभावादिति भावः। अत्र पौरजनानामाक्रन्दस्य दिगङ्गनासु आरोपात् कथम् अन्यधर्मस्यान्यत्राधानमिति बिम्बप्रतिबिम्बभाववत्तया समाधानात् निदर्शना उत्प्रेक्षाऽङ्गम् इति सङ्क्षेपः।

(२३९) प्रविकसितेति।—प्रकर्षेण विकसितानां—सम्पूर्णप्रस्फुटितानां, रक्तपङ्कजानां—रक्तपद्मानां, पुञ्जैः,—राशिभिः इव। अविच्छिन्नरोदनेन चक्षुषोः रक्तवर्णतया रक्तपङ्कजपुञ्जौपम्यं बोद्धव्यम्। भानुमन्तमिव—सूर्य्यमिव, [अत्र भानुमता सह चित्रभानोरवैधर्म्यसाम्यावगमादुपमालङ्कारः] भानुमन्तं—दीप्तिमन्तञ्च। ऐन्दवी—इन्दुः,—चन्द्रः,तत्सम्बन्धिनी; अमावस्यायाम् ऐन्दवी कला सूर्य्यं प्रविशतीति शास्त्रात्। चित्रभानुम्—अग्निम्,("अग्निर्वैश्वानरो वह्निः··· । ···चित्रभानुर्विभावसुः॥"इत्यमरः)।

(२४०) इतरः,—इदंः। स्वल्पेति।—स्वल्पः,—ईषत्, अवशेषो यस्य तथाभूता, प्राणवृत्तिः,—जीवनव्यापारः, निश्वासप्रवृत्तिरित्यर्थः, यस्य तथोक्तम्। परिवर्त्स्यमानतारकं—परिवर्त्स्यमाने—विलीयमाने, विकृतिं नीयमाने इत्यर्थः, तारके—कनीनिके यस्य तथाभूतम्; परिवर्त्स्यमानाः,—पश्चिमाशायां लम्ब्यमानाः,तारकाः,—नक्षत्राणि यस्य तथाभूतञ्च, तारकराजमिव—चन्द्रमिव, अस्तं—नाशम्, अस्ताचलञ्च। जनयितारं—पितरम्।

(२४१) असह्येति।—"असह्य" इत्यादौ "चिरं रुरोद" इति वक्ष्यमाणेनान्वयः। असह्यस्य—दुःसहस्य, शोकस्य—मन्योः, उद्रेकेण—आवेगेन, अभिद्रुतः,—अभिभूत इत्यर्थः। पितृस्नेहेन—पितृप्रेम्णा, असाधारणपितृभक्त्या इति यावत्। [क्वचित् "पितृस्नेहेन" इत्यत्र "स्नेहेन" इति पाठान्तरम्]। धैर्य्यं—धीरत्वं, त्याजितः,—मोचितः, त्यक्तधैर्य्य इत्यर्थः।

(२४२) अस्य—पितुः, पादपद्मौ—चरणकमले, ["वा पुंसि पद्मं नलिनम्"

(२४३) अन्तस्तापात् मुखचन्द्रमिव द्रवीभवन्तं, दशन-ज्योत्स्नाजालमिव द्रवतामापद्यमानम्, अञ्जिलावण्यमिव विलीयमानं, (२४४) मुखचन्द्रसुधारसमिव स्यन्दमानम्, (२४५) अच्छाच्छम् अश्रुस्रोतसां सन्तानं महामेघमयविलोचन इव वर्षन् निरन्तरविमुक्तारावः चिरं रुरोद।

राजा तु तम् (२४६) उपरुध्यमानदृष्टिः अपि अविरत-

इत्यमरानुशासने सत्यपि, प्रसिद्धकविभिः पद्मशब्दस्य पुंसि प्रयोगस्यानादृतत्वात् "भाति पद्मः सरोवरे" इतिवत् "पादपद्मौ" इति प्रयोगस्य अकविजुष्टत्वदोषग्रस्तत्वं ज्ञेयम्] आश्लिष्य—आलिङ्ग्य, वक्षसि स्थापयित्वा इत्यर्थः। पादपद्मे विशिनष्टि, सकलैरिति।—सकलैः,—सर्वैः, दुर्मदैः,—दुर्दर्षैः, उद्दामबलदुरन्तैरित्यर्थः; महीपालैः,—भूपालैः, मौलिमालया—किरीटश्रेण्या, लालितौ—सेवितौ; प्रतापप्रकर्षपराजितत्वात् इति भावः।

(२४३) अन्तस्तापात्—आभ्यन्तरसन्तापात्, मुखचन्द्रमिव—वदनसुधाकरमिव, द्रवीभवन्तं—गलन्तम्; दशनज्योत्स्नाजालमिव—दन्तकिरणनिचयमिव, द्रवतां—तरलताम्, आपद्यमानं—गच्छत्, जलकणैः परिणमदिव इति यावत्। ["द्रवताम्" इत्यत्र "जलताम्" इति पाठान्तरम्]। अञ्जिलावण्यं—नयनकान्तिम्। ["अञ्जिलावण्यम्" इत्यत्र "लोचनलावण्यम्" इति पाठान्तरम्]। विलीयमानं—विलीनतामापद्यमानम्।

(२४४) मुखेति।—मुखचन्द्रस्य—वदनसुधाकरस्य, सुधारसम्—अमृतद्रवम्, ["मुखचन्द्रसुधारसमिव" इत्यत्र "मुखसुधारसमिव" इति पाठे,—मुखस्य, चन्द्रोपमस्य इति भावः]। स्यन्दमानं—स्रवन्तम्।

(२४५) अच्छाच्छम्—अत्यच्छम्; "प्रकारे गुणवचनस्य" (८।१।१२ पा०) इति द्विर्भावः]। अश्रुस्रोतसां—बाष्पवारिप्रवाहाणां, सन्तानं—समूहम्। महेति।—महामेघमये—निबिडजलधरात्मके, विलोचने—नयने यस्य तथाभूत इव। वर्षन्—सुचन्। निरन्तरविमुक्तारावः,—अविरतनिःसृतनिनादः, मुक्तकण्ठ इत्यर्थः, सशब्द इति भावः। ["निरन्तर—" इत्यत्र "इतरवत्" इति पाठे,—नीचजनसदृश इत्यर्थः]।

(२४६) उपरुध्यमानदृष्टिः,—उपरुध्यमाना—आवियमाणा, दृष्टिः,—दर्शन-

क्रन्दितशब्दाश्रितश्रवणः प्रत्यभिज्ञाय शनैः शनैः अवादीत्,—"पुत्र! न अर्हसि (२४७)एवं भवितुम्। भवद्विधा न हि अमहामत्त्वाः। महासत्त्वता हि प्रथमम् अवलम्बनं लोकस्य, पश्चात् राजबीजिता। सत्त्ववतां च अग्रणीः सर्वातिशयाश्रितः क्व भवान्? क्व वैक्लव्यम्? (२४८) 'कुलप्रदीपोऽसि' इति दिवसकरसदृशतेजसस्ते लघूकरणमिव। 'पुरुषसिंहोऽसि' इति

ज्ञप्तिः, ज्ञेयं वा ज्ञानं वा,("दृष्टिज्ञानेऽचिदज्ञेये" इत्यमरः) यस्य तथाभूतः,—चीयमाश्चीवनज्ञप्तित्वात् इति भावः। [क्वचित् "आप" इत्यनेन क्वीन: पाठः दृश्यते, तत्र नार्थसौष्ठवम्, अज्ञक्यकरणोद्यमरूपार्थबोधाभावात]। अविरतेति।—अविरतम्—अविच्छिन्नं, क्रन्दितशब्दं—रोदनध्वनिम्, आश्रितं—स्पृष्टं, श्रुतमित्यर्थः, श्रवणं—कर्णः यस्य तथाभूतः। प्रत्यभिज्ञाय—पुत्रीयं रौदिति इति ज्ञात्वा विज्ञाय इत्यर्थः; चिरपरिचितकण्ठस्वरसंस्कारबलात्।

(२४७) एवम्—अधीर इति भावः। अमहामत्त्वाः,—अमहाऽनुभावाः, न हि—नैव, महाऽनुभावसम्पन्ना एवेत्यर्थः; महासत्त्वगुणसमन्विताः दृढचित्ता वा इति भावः। महासत्त्वता—महाऽनुभावत्वं, महासत्त्वगुणसमन्वितत्वं मनस्विता वा इत्यर्थः, प्रथमं—मुख्यम् आद्यं वा, अवलम्बनम्—आश्रयः; उदारचेतसां वसुधाकुटुम्बकत्वादिति भावः। राजबीजिता—राजा बीजी—बीजपुरुषः यस्य तस्य भावः, राजपुत्रत्वमित्यर्थः, पश्चात्—द्वितीयमवलम्बनमित्यर्थः; बहिःसाधनत्वात् इति भावः; केवलेन राजवंशजत्वेन लोकस्थितिः कर्तुं न शक्यते, तेन तु महाऽनुभावेन सता शक्यते एव इत्याशयः। सत्त्ववतां—सत्त्वगुणसम्पन्नानां मनस्विनां वा, ["अतश्च—" (२।३।४१ पा०) इत्यादिना निर्द्धारणे षष्ठी] अग्रणीः,—अग्रगण्यः। सर्वेति।—सर्वेभ्यः अतिशयः,—अतिरिक्तो गुणराशिरित्यर्थः, तम् आश्रितः, भवान् क्व? वैक्लव्यं—व्याकुलत्वञ्च, क्व? महासत्त्वेषु भवादृशेषु नैतयोः सङ्गतिः युज्यते इति भावः। अत्र विरूपसङ्घटनारूपः विषमालङ्कारः, क्रन्दितेन महतोऽन्तरस्य सूचनात्।

(२४८) कुलप्रदीपः,—वंशोज्ज्वलकर इत्यर्थः। इति, कथनमिति शेषः, एवमुत्तरत्र। दिवसकरसदृशतेजसः,—मार्त्तण्डसमप्रभावस्य, ते—तव, लघूकरणमिव—तुच्छीकरणमिव; दिवसकरसदृशतेजस्त्वात् कुलप्रदीपोऽसि इति उक्तौ तव लाघवं प्रतिभाति, तदर्थे तेषां निष्प्रभत्वेन प्रतीयमानत्वात् इति भावः।

(२४९) शौर्य्यपटुप्रज्ञोपहृंहितपराक्रमस्य निन्देव । 'क्षितिः क्षयं तव' इति (२५०) लक्षणाख्यातचक्रवर्त्तिपदस्य पुनरुक्तम् इव । 'गृह्यतां श्रीः' इति स्वयमेव (२५१) श्रिया गृहीतस्य विपरीतमिव । (२५२) 'अध्यास्यताम् अयं लोकः' इति उभयलोकविजिगीषोः अपुष्कलमिव । (२५३) 'क्रीक्रियतां कोषः' इति शशिकरनिकरनिर्मलयशःसञ्चयैकाभिनिवेशिनो निरूपयोगमिव ।

(२४९) शौर्य्येति ।—शौर्य्येण—शूरत्वेन, पराक्रमप्रदर्शनेनेत्यर्थः, पटुः—निपुणा, या प्रज्ञा—बुद्धिः, शौर्य्यातिशयशालिनी मतिः इत्यर्थः, तया उपहृंहितः,—वर्द्धितः, पराक्रमः,—विक्रमः, सामर्थ्यं वा, यस्य तथाभूतस्य, ते इति शेषः, निन्दा इव—निन्दाकरणमिव, तस्य निर्विवेकपथप्रयाणत्वात् ; इतोऽपि अधिकोक्तिः त्वयि सङ्कुचति इति भावः ।

(२५०) लक्षणेति ।—लक्षणेन—ध्वजादिचिह्नेन, आख्यातं—कथितं, चक्रवर्त्तिपदं—साम्राज्यं यस्य तथाभूतस्य, ते इति शेषः । पुनरुक्तमिव—लक्षणेनैव प्रायुक्तत्वात् आमेडितमिव ; विधावेव चक्रवर्त्तित्वे अभिषिक्तस्य तव तादृशवचनम् ; अनुवादमात्रत्वात् निरर्थकमिवेति भावः ।

(२५१) श्रिया—लक्ष्म्या । गृहीतस्य—स्वीकृतस्य, पतित्वेनेति भावः । विपरीतमिव—असङ्गतमिव इत्यर्थः ; तथा प्राक् स्वयमेव स्वीकृतत्वेन तथाकथनं प्रमत्तनियोगवत् इति भावः ।

(२५२) अध्यास्यताम्—अधिष्ठीयताम् । अयं लोकः,—मर्त्यलोकः, राजसिंहासनमिति भावः, ["अधिशीङ्—" (१।४।४६ पा०) इत्यादिना आधारस्य कर्मत्वम् उक्तत्वच्च] । उभयलोकविजिगीषोः,—मर्त्यस्वर्गयोः जयाभिलाषिणः । अपुष्कलमिव—अपूर्णमिव ; स्वर्गस्यापि सिंहासनोचितस्य केवलमर्त्यसिंहासनारोहणोपदेशस्य सामान्यत्वेनानुचितत्वादिति भावः ।

(२५३) क्रीक्रियतां—गृह्यतां, कोषः,—धनागारम् । शशीति ।—शशिनः,—चन्द्रस्य, करनिकरः,—मयूखनिचयः, तद्वत् निर्मलानां—शुभ्राणां, यशसां—कीर्त्तीनां, सञ्चये—सङ्ग्रहे, एकः,—केवलः, अभिनिवेशः,—सायहः मनोयोगः विद्यते यस्य तथाभूतस्य, ते इति शेषः । निरूपयोगमिव—निष्प्रयोजनमिव ; यशस्विनां सर्व्वजनप्रियतया स्वत एव धनागमात्, कीर्त्तिकामत्वेन धनसञ्चारादिव्यर्था इति भावः ।

(२५४) 'आत्मीक्रियतां राजकम्' इति गुणगणात्मीकृत-जगतो गतार्थमिव। (२५५) 'उह्यतां राज्यभारः' इति भुवनत्रयभारोचितस्य अनुचितनियोग इव। 'प्रजाः परिरक्ष्यन्ताम्' इति (२५६) दीर्घदोर्दण्डार्गलितदिङ्मुखस्य अनुवाद इव। 'परिजनः परिपाल्यताम्' इति लोकपालोपमस्य (२५७) आनुषङ्गिकमिव। 'शस्त्राभ्यासः कार्यः' इति (२५८) धनुर्गुणकिणकलङ्ककालीकृतप्रकोष्ठस्य किम् आदिश्यते? (२५९) 'निग्राह्यतां चापलम्' इति नूतनतरवयसि

(२५४) आत्मीक्रियताम्—आयत्तीक्रियतां, राजकं—राजसमूहः; अकरणे मर्य्यादालङ्घनसम्भावनादिति भावः। गुणेति।—गुणानां—दयादाक्षिण्यादीनां, गणैः, —समूहैः, आत्मीकृतम्—अधीनीकृतं, जगत—लोकः येन तथाभूतस्य, तेन इति शेषः, गतार्थमिव—व्यर्थमिव; राजकानामपि जगदन्तर्निविष्टत्वादिति भावः।

(२५५) उह्यताम्—अवलम्ब्यतां, पाल्यतामित्यर्थः। भुवनत्रयभारोचितस्य —त्रिजगद्भारवहनयोग्यस्य। अनुचितनियोगः,—अयुक्तादेश इव; महाभारवहनोचितस्य अल्पभारवहनादेशे न्यूनत्वप्रतिपादनादिति भावः।

(२५६) दीर्घेति।—दीर्घेण—आयतेन, दोर्दण्डेन—भुजयष्ट्या, अर्गलितं—निरुद्धमिति यावत्, दिङ्मुखं—दिगन्तरालं येन तथोक्तस्य, तेन इति शेषः। अनुवाद इव—भाषाऽनुकरणमिव; आजानुलम्बितभुजेनैव प्रजापालनव्रतपरायणतायाः व्यक्तीभावादिति भावः।

(२५७) आनुषङ्गिकमिव—अनुषङ्गादागतमिव, ["ठगायस्थानेभ्यः" (४।३।७५ पा०) इति ठक्]। अवान्तरकार्य्यस्य उपदेश इव इत्यर्थः; नित्यसम्बन्धवक्तृत्वादनादेशेऽपि तत्कार्य्यस्य सिद्धत्वादिति भावः।

(२५८) धनुर्गुणेति।—धनुषः,—चापस्य, गुणाः,—मौर्व्यः, तैः, तदाकर्षणैरित्यर्थः, किणः,—चर्म्मादियन्थिः एव, कलङ्कः,—चिह्नं, तेन कालीकृतः,—श्यामीकृतः, प्रकोष्ठः,—कफोणिमणिबन्धयोः अभ्यन्तरभागः यस्य तथाभूतस्य। आदिश्यते—आज्ञायते, निष्प्रयोजनादेश इत्यर्थः; नित्यमनादिष्ट एव तत्कार्य्यकरणेन तदुपदेशस्य वैयर्थ्यापातादिति भावः।

(२५९) निग्राह्यतां—निवर्त्यतां, परित्यज्यतामित्यर्थः, चापलं—चाञ्चल्यम्।

निगृहीतेन्द्रियस्य निरवकाशा इव मे वाणी। (२६०) 'निरवशेषतां प्रतवो नेयाः' इति सहजस्य तेजस एव दृयं चिन्ता" इत्येवं वदन्नेव (२६१) अपुनरुन्मीलनाय निर्मिमील राजकुलसिंहो लोचने।

अस्मिन्नेवान्तरे (२६२) पूषा अपि आयुषा इव तेजसा व्ययुज्यत। ततश्च लज्जमान इव (२६३) नरपतिजीवितापहरणजनितात् आत्मापराधात् अधोमुखः समभवत्।

नूतनतरवयसि—नूतनतरम्—अतिशयेन नूतनं, वयः,—बाल्याद्यवस्थाविशेषः यस्य तादृशे, नवयौवने इत्यर्थः। निगृहीतेन्द्रियस्य—वशीकृतेन्द्रियस्य, निरवकाशा इव—अनवसरा इव; तरुणयौवने स्वयमनुपदिष्ट एव इन्द्रियनियहकरत्वादिति भावः।

(२६०) निरवशेषतां—निःशेषताम्। [अत्र नयतेः द्विकर्मकत्वात् कर्मणि निरवशेषतायाश्च भाक्तत्वात् तत्र द्वितीया, अन्यत्र मुख्यत्वात् प्रथमा; दृष्टे श्रुते निरवशेषता न नीयते, परन्तु निरवशेषतायामेव श्रुतवः नीयन्ते इति वक्तुरभिप्रायः, तेनैतेषां मुख्यत्वं ज्ञेयम्]। नेयाः,—प्रापणीयाः। सहजस्य—स्वाभाविकस्य, तेजसः,—प्रतापविशेषस्य। चिन्ता—भावना; तेजस्विनां तादृशाभिलाषस्य प्रकृतिसिद्धत्वात् तदुपदेशः निरर्थक इति भावः।

(२६१) अपुनरुन्मीलनाय—पुनरुन्मेषनिवृत्तये, चिराय इत्यर्थः। निर्मिमील—निमीलितवान्, मुद्रिते चकारेत्यर्थः। राजकुलसिंहः,—नृपश्रेष्ठ इत्यर्थः, प्रभाकरवर्द्धन इति यावत्, ["राजकुलसिंहः" इत्यत्र "राजसिंहः" इति पाठान्तरम्]।

(२६२) पूषा—सूर्यः, अपि—महीपतिप्रभाकरवर्द्धनवत् सूर्योऽपीत्यर्थः, [अत्र अपिकारः समुच्चयार्थकः] आयुषेव—राज्ञः प्राणधारणकालेनेव, तेजसा—स्वप्रभावसमूहेन, व्ययुज्यत—व्यहीयत; एकत्र अपराद्धभावात् अन्यत्र च जीवनपरित्यागात् निस्तेजा अभूदिति भावः।

(२६३) नरपतिरिति।—नरपतेः,—राज्ञः, जीवितस्य—जीवनस्य, अपहरणं—मोषणं, तेन जनितः,—उत्पन्नः, तस्मात्; आत्मापराधात्—निजकृतात् दोषात्; स्वात्मजेन यमेन तत्कृतत्वात् निजापराधतुल्यत्वं मन्तव्यम्; "आत्मा वै जायते पुत्रः" इति श्रुतेः; यद्वा,—स्वाधिकारसमये एवापहरणात् स्वयं रक्षितुमशक्यतया अन्यकृतमपि स्वकृतमिव मत्वा स्वस्मिन्नपराधः शङ्कितः इति विभाव्यम्। अधोमुखः,—अवनतवदनः, अस्ताचलगमनोन्मुख इत्यर्थः।

(२६४) भूपालाभावशोकाग्निखिना इव अन्तस्ताप्यमानः तान्नतां प्रपेदे। मन्दं मन्दम् (२६५) अप्रियप्रश्नोत्तरपरिहारार्थमिव स्थितिमनुवर्त्तमानो लौकिकीम् अवातरद्दिवः। (२६६) दित्सुरिव जनेशाय जलाञ्जलिम् अपरजलनिधिसमीपमुपससर्प। (२६७) सद्योदत्तजलाञ्जलिः दुःखदहनदग्धमिव करसङ्गम् आलोहितम् अधत्त।

(२६४) भूपालेति।—भूपालस्य—राज्ञः; सुतिसंतुरचकस्य स्वप्रियसेवकस्य च इति भावः; अभावेन—निधनेन, यः शोकः,—मन्युः, स एव शिखी—अग्निः तेनेव। अन्तः,—अभ्यन्तरे, ताप्यमानः,—दाह्यमानः। तान्नतां—रक्तवर्णताम्। प्रपेदे—लेभे।

(२६५) अप्रियेति।—अप्रियप्रश्नस्य—राज्ञविनाशरूपायाः अप्रीतिकरजिज्ञासायाः इत्यर्थः, उत्तरपरिहारार्थमिव—कथं राजा मृतः? केन रोगेण वा? इत्यादिजिज्ञासायाः उत्तरपरिजिहीर्षया इव, स्वदोषापाकरणाय किमेतस्य कारणमिति तु प्राक् तत्त्वतः विदित्वा पुङ्खानुपुङ्खशः दैवज्ञगणसमीपे उत्तरदानार्थमिव इति वा, ["अप्रियप्रश्नोत्तरपरिहारार्थमिव" इत्यत्र "अप्रियप्रश्नार्थमिव" इति पाठे,—अप्रीतिकरजिज्ञासानिमित्तमिव, कथं राजा मृतः? इति ज्ञातुमिच्छयेवेति भावः। एतदुत्प्रेक्षणे तु पूर्ववत् नार्थगौरवं परिलक्ष्यते, प्रत्यक्षावलोकिनां साक्षिणाम् अन्यतो जिज्ञासाऽनुपपत्तेः इति ज्ञेयम्]। लौकिकीं—लोकसम्बन्धिनीं, स्थितिं—मर्य्यादां, व्यवहारमिति यावत्। अनुवर्त्तमानः,—अनुसरन्; यथा आत्मपरिजनेन आत्मना वा निहतं कमपि दृष्ट्वा कश्चित् जनसमीपे तद्विशेषविवरणगोपनेच्छया तस्मात् अन्तर्द्धत्ते, तथा सूर्य्योऽपीति भावः; ["अप्रियप्रश्नार्थमिव" इति पक्षे तु,—यथा आत्मीयलोकाः कस्यापि विनाशमुपश्रुत्य तद्बन्धुसमीपे तद्विशेषप्रश्नार्थमागच्छन्ति, तद्वदिति भावः]। दिवः,—अन्तरीक्षात्; उच्चस्थानाच्च इति ध्वन्यते, लोकलोचनसमीपादिति भावः; अवातरत्—अवारोहत्।

(२६६) दित्सुः,—दातुमिच्छुः, ["सनाशंसभिक्ष उः" (३।२।१६८ पा०) इति सन्नन्तात् उः प्रत्ययः]। जनेशाय—नरपतये प्रभाकरवर्द्धनाय। जलाञ्जलिं—तर्पणजलपूर्णसञ्जलिम्। अपरजलनिधिं—पश्चिमसागरम्। उपससर्प—उपजगाम। राज्यवर्द्धनहर्षयोः आत्मांशसम्भूतत्वेन तत्सम्बन्धापेक्षिजलाञ्जलियोगवक्तव्योत्प्रेक्षणम् इह अतिरम्यम्।

(२६७) सद्य इति।—सद्यः,—तत्क्षणं, दत्तः,—अर्पितः, जलाञ्जलिः,—युक्त-

(२६८) एवञ्च महानराधिपनिधननिधीयमानविपुल-वैराग्ये इव शान्तवपुषि विशति गिरिगुहागह्वरं गभस्तिमालिनि, (२६९) समुपोह्यमानमहाजनाश्रुदुर्दिनार्द्रीकृते इव निर्वाति आतपे, (२७०) रोदनताम्रसकललोकलोचनरुचा इव लोहितायति जगति, (२७१) उष्णायमानानेकनरनिश्वास-सन्तापप्लुष्टे इव च नीलायमाने दिवसे,(२७२) नृपानुगमनप्रच-

---

करपूर्णजलम् इत्यर्थः, येन तथाभूतः । करसहस्रं—कराणां—किरणानां, सहस्राणां, सहस्रं—दशशतसङ्ख्यकं, बहुसङ्ख्यकं वा, आलोहितम्—आरक्तम्, अधत्त—दधार, अलभत इत्यर्थः ।

(२६८) "एवञ्च" इत्यादौ "नरेन्द्रः···हुताशनसत्क्रियया यशःशेषतामनीयत" इत्युत्तरेणान्वयः । महीति ।—महानराधिपस्य—महाराजस्य, निधनेन—मरणेन, निधीयमानं—जन्यमानं, विपुलं—महत्, वैराग्यं—संसारेषु वीतस्पृहत्वमित्यर्थः, यस्य तथाभूत इव । शान्तवपुषि—सौम्यकलेवरे, निश्चेष्टसौति भावः । गिरिगुहा-गह्वरं—गिरेः,—अस्ताचलस्य, गुहा—विलम् एव, गह्वरं—विवरम् । एतेन वीत-रागाचारः सूच्यते । गभस्तिमालिनि—अंशुमालिनि, सूर्य्ये इत्यर्थः ।

(२६९) समुपोह्यमानेति ।—समुपोह्यमानैः,—सङ्कृष्यमाणैः ; शरीरेषु पतनात् धार्य्यमाणैरिति भावः, वर्द्धमानैरित्यर्थो वा ; महाजनानां—साधुजनानाम्, अश्रु-दुर्दिनैः,—अविरलधारं नेत्रवारिवर्षणैः, आर्द्रीकृते इव—आर्द्रतां नीते इव । निर्वाति—निर्वाणं गच्छति । आतपे—सूर्य्यालोके ।

(२७०) रोदनेति ।—रोदनेन—क्रन्दनेन, ताम्राणि—रक्तानि, सकलानां—सर्वेषां, लोकानां—जनानां, यानि लोचनानि—नेत्राणि, तेषां रुक्—प्रभा तया इव । लोहितायति—अलोहितं लोहितं भवति, ["लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा०) इति क्यषि "वाक्यषः" (१।३।९० पा०) इति पक्षिकपरस्मैपदित्वात् शतृ-प्रत्ययः] ।

(२७१) उष्णेति ।—उष्णायमानैः,—उष्णा इव आचरद्भिः, अनेकेषां—बहूनां, नराणां—जनानां, निश्वासैः,—नासावायुभिः, यः सन्तापः,—सम्यक् तपनं, तेन प्लुष्टे इव—दग्धे इव, नीलायमाने—कृष्णायमाने ; नैशान्धकारागमनादिति भावः ।

(२७२) नृपेति ।—नृपस्य—राज्ञः, अनुगमनं—पश्चात् प्रयाणं, सङ्गमनमिति

लितया इव लक्ष्म्या मुच्यमानासु कमलिनीषु, (२७३)पतिशुचा इव परिवृत्तच्छायायां श्यामायमानायां भुवि, कुलपुत्रेषु इव परित्यक्तनिजकलत्रेषु कृतकरुणप्रलापेषु वनान्तान् आश्रयत्सु दुःखितेषु चक्रवाकेषु, (२७४) क्षत्रभङ्गभीतेषु इव निगूढकोशेषु कुशेशयेषु, स्फुटितदिग्वधूहृदयरुधिरप्लवे इव गलिते रक्तातपे,

भावः, तस्यै प्रचलिता—प्रस्थिता तया इव, लक्ष्म्या—श्रिया, राजपत्न्येति भावः। मुच्यमानासु—विश्लीयमानासु। कमलिनीषु—पद्मिनीषु; मुद्रितकमलिनीषु इति भावः।

(२७३) पतिशुचा इव—पतिमरणशोकेन इव। परिवृत्तच्छायायां—परिवृत्ता—विपरीता, छाया—आतपप्रतिपत्तजातिः, कान्तिश्च यस्याः तथाभूतायां, श्यामायमानायां—श्यामा—नियामा, रात्रिरिति यावत्, अप्रसृताङ्गना च, काचिन्नायिका इति भावः, ("श्यामो वटे प्रयागस्य·····। स्त्री रात्रौवौषधौ। अप्रसृताङ्गनायाञ्च प्रियङ्गावपि वायुजौ। यमुनायां नियामायाम्" इति मेदिनी) तद्वदाचरन्त्यां, श्यामतामापद्यमानायामित्यर्थः, भुवि—पृथिव्याम्। [इहाचारक्यङ्योगवत्त्वात् धर्म्मलुप्तोपमा, उत्प्रेक्षाया अङ्गम्]। कुलपुत्रेषु इव—सत्कुलजातेषु इव। परित्यक्तेति। —परित्यक्तानि—विसृष्टानि; राजसमरणदुःखात् विधिनियोगाच्च इति भावः; निजकलत्राणि—निजस्त्रियः यैः तथोक्तेषु, ["परित्यक्तनिजकलत्रेषु" इत्यत्र "परित्यक्तकलत्रेषु" इति पाठः पुस्तकान्तरसम्मतः]। कृतकरुणप्रलापेषु—करुणं विलपत्सु इत्यर्थः। वनान्तान्—जलान्तदेशान्, काननान्तांश्च, ("वनं नपुंसकं नीरे निवासालयकानने" इति मेदिनी); रात्रौ तेषां वियुक्तभावेन जलाशयतीरे अवस्थानस्य प्रकृतिसिद्धत्वादिति भावः।

(२७४) क्षत्रेति।—क्षत्रभङ्गः,—राजविनाशः, राजविनाशज उपद्रवः इति यावत्, ("क्षत्रभङ्गोऽपि वैधव्ये क्षतत्राणनृपनाशयोः" इति मेदिनी) क्षत्राकारपचसङ्कोचश्च, तस्मात् भीतेषु—त्रस्तेषु इव। निगूढेति।—निगूढः,—गोपितः, सम्पुटितश्च, कोशः,—कर्णिका, बीजकोशश्च इत्यर्थः, घनसन्निवेशश्च यैः तथोक्तेषु, कुशेशयेषु—कमलेषु, ["शयवासः—" (६।३।१८ पा०) इत्यादिना समस्याः अलुक्। "सहस्रपत्रं कमलं शतपत्रं कुशेशयम्" इत्यमरः]। स्फुटितेति।—स्फुटितानि—पतिशोकात् विदीर्णानि, दिशो वध्व इव, तासां हृदयानि—वक्षांसि, तेषां रुधिरप्लवे इव—रक्तप्रवाहे इव, गलिते—निःसृते, रक्तातपे—अस्तकालिकारक्तसौरालोके।

क्रमेण च (२७५) लोकान्तरम् उपगतवति अनुरागशेषे जाते तेजसाम् अधीशे, गगनतलवितन्यमानबहलरागपाटलायां प्रेतपताकायाम् इव प्रवृत्तायां सन्ध्यायां, (२७६) श्रवशिविकालङ्कारकृष्णचामरमालासु इव स्फुरन्तीषु दर्शनप्रतिकूलासु तिमिरलेखासु, (२७७) असितागुरुकालकाष्ठायां केनापि चितायाम् इव रचितायां रजन्यां, (२७८) दन्तामलपत्रप्रसाधितकर्णिकासु केसरमालाकल्पितसुखण्डमालिकासु

(२७५) लोकान्तरम्—अन्याचलं, परलोकक्षेत्रमित्यर्थः, उपगतवति—प्राप्तवति। अनुरागशेषे—रक्तवर्णभावावशिष्टे, लोकानुरागभावावशेषे च, जाते—भूते, तेजसामधीशे—सूर्ये, रात्रौ च। गगनेति।—गगनतले—आकाशदेशे, वितन्यमानेन—विस्तीर्यमाणेन, बहलेन—प्रभूतेन, रागेण—लौहित्येन, पाटलां—श्वेतरक्तां तस्याम्। प्रेतपताकायामिव—मृतवैजयन्त्यामिवेत्युपमा, श्रवस्य दाहार्थं श्मशानभूमिनयनसमये तदानीं पताकादिभिः शोभायात्रा अक्रियतेत्यनुमीयते, तेन तदनुकूलवर्णना परस्परात् दृश्यते इति विभाव्यम्; यद्वा,—प्रेतेतिपदं रात्रौकात् सर्व्वत्रैव निरूढ्यतया तदानीन्तनसन्ध्याया भीषणत्वद्योतनाय इति बोद्धव्यम्। प्रवृत्तायाम्—उपस्थितायाम्।

(२७६) श्रवेति।—श्रवस्य—मृतस्य, शिविका—यानविशेषः, तस्याः अलङ्काराः,—आभरणभूताः, कृष्णाः,—कृष्णवर्णाः, चामरमालाः,—बालव्यजनश्रेण्यः; तासु इव, स्फुरन्तीषु—द्योतमानासु। दर्शनप्रतिकूलासु—दृष्टिरोधिनीषु, अन्यत्र,—भीतिवहासु; तिमिरलेखासु—अन्धकारश्रेणिषु।

(२७७) असितेति।—असितानि—कृष्णानि, अगुरूणि—सुगन्धिकाष्ठवृक्षविशेषा इव, कालानि—कृष्णवर्णानि, काष्ठानि—दारूणि, इन्धनानि इत्यर्थः, काला:,—कृष्णवर्णाः; अन्धकारागमादिति भावः; काष्ठाः,—दिशश्च यस्यां यस्यां वा तथाभूतायाम्। ("काष्ठा दारुहरिद्रायां… । …दिशि च स्त्री दारुणि स्यान्नपुंसकम्" इति मेदिनी)। चितायां—मृतदाहार्थकाष्ठचुल्ल्यामिव, परिदृश्यमानायामिति शेषः।

(२७८) दन्तेति।—दन्तवत्—गजदन्त इव, अमलं—शुभ्रं, पत्रं—दलम्; अन्यत्र,—दन्तस्य—गजदन्तस्य, अमलं पत्रं, गजदन्तनिर्मितस्वच्छपत्रमित्यर्थः, तेन प्रसाधिताः,—अलङ्कृताः, शोभिता इति यावत्, कर्णिकाः,—बीजकोषाः, कर्णभूषणानि च यासां तासु। ("कर्णिका करिहस्तायें… । …अलवराटे कर्णभूषणे"

अनुमर्तुमिव उद्यतासु प्रहसितमुखीषु कुमुदलक्ष्मीषु,
(२७९) अनवरतविदग्धविमानकिङ्किणीक्षणिते इव श्रूयमाणे
(२८०) शाखिशिखरकुलायनिलीयमानशकुनिकुलकलकूजिते,
(२८१) नाकपथप्रस्थितपार्थिवप्रत्युद्गतपुरुहूतातपत्र इव

इति मेदिनौ)। केसरेति।—केसराणां—किञ्जल्कानां, बकुलानाच, ("केसरं किञ्जले क्लीवं किञ्जल्के न स्त्रियां पुमान्। सिंहसटायां पुन्नागे बकुले नागकेशरे" इति मेदिनी) मालया—श्रेण्या, स्रजा च, कल्पिता—रचिता, मुण्डमाला—शीर्षशीर्षाभिहारविशेषः याभिः तथाभूतासु। अनुमर्तुं—सहमरणाय इत्यर्थः। उद्यतासु—प्रहृतासु; पतिशोकादिति भावः। प्रहसितमुखीषु—प्रस्फुटितासु इत्यर्थः, हसन्मुखीषु च; स्वामिसङ्गमनामोदादिति भावः। कुमुदलक्ष्मीषु—उत्पलश्रीषु, राजमहिषीषु इति भावः।

(२७९) अनवरतेति।—अनवरतम्—अविच्छिन्नं, ["अनवरत—" इत्यत्र "अवतरत्—" इति पाठे,—अवतरतः,—अवरोहतः, व्योममार्गात् इत्यर्थः, अन्यदुभयसाधारणम् इति श्लेषम्]। विदग्धविमानस्य—दिव्यौषधयानस्य, दिवस्थस्य इत्यर्थः; राज्ञः स्वर्गेनयनार्थम् आगतस्येति भावः; किङ्किणीनां—क्षुद्रघण्टिकानां, क्षणिते इव—निस्वने इव, यद्वा,—अनवरतविदग्धविमानानां—राज्ञः पारलौकिकावलोकनाय निरन्तरं समवेतानां सुरसङ्घातानां यानि आकाशयानानि तेषामित्यर्थः, किङ्किणीनां क्षणिते इव।

(२८०) शाखीति।—शाखिनां—द्रुमाणां, शिखरेषु—अग्रेषु, ये कुलायाः,—नीडानि, ("कुलायो नीडनिलयाम्" इत्यमरः) तेषु निलीयमानानाम्—उपविशतां, निविशमानानामित्यर्थो वा, शकुनीनां—पक्षिणां, कुलस्य—वृन्दस्य, कलकूजितं—मधुराव्यक्तध्वनिः तस्मिन्। ["निलीयमानशकुनिकुलकलकूजिते" इत्यत्र "लीयमानशकुनिकुलकूजिते" इति पाठे,—तत्र लीयमानानां—श्लिष्यतां, संश्लिष्टावयवानामित्यर्थः, नैयतनःसङ्घातात् इति भावः, शकुनिकुलानां कूजितम्—अव्यक्तशब्दः तस्मिन् इत्यर्थः]।

(२८१) नाकपथेति।—नाकपथं—स्वर्गमार्गं, प्रस्थितः,—प्रचलितः, यः पार्थिवः,—राजा, तं प्रत्युद्गतः,—प्राप्तः, तदभिनन्दनार्थम् उपस्थितः इत्यर्थः, यः पुरुहूतः,—इन्द्रः, ("इन्द्रो मरुत्वान् मघवा···। ···पुरुहूतः पुरन्दरः" इत्यमरः) तस्य आतपत्रमिव—छत्रमिव तस्मिन्; अतिविशदे इति भावः,। [सर्वत्र भावे

पूर्व्वस्यां दिशि दृश्यमाने चन्द्रमसि, नरेन्द्रः स्वयं समर्पितस्कन्धैः गृहीत्वा शवशिविकां शिविसमः सामन्तैः पौरैश्च पुरोहितपुरःसरैः सरितं सरस्वतीं नीत्वा नरपतिसमुचितायां चितायां हुताशनसत्क्रियया यशःशेषताम् अनीयत।

देवोऽपि हर्षः (२८२) पुञ्जीभूतेन सकलेनेव जीवलोकेन लोकेन राजकुलसम्बन्धेनाशेषेण शोकमूकेन परिजनेन च परिवृतः, अन्तर्वर्त्तिनाऽपि पितृशोकानलतप्तेन स्नेहद्रवेण वह्निरिव सिच्यमानः, निर्व्यवधानायां धरण्याम् उपविष्ट एव तां निशो-

सप्तमी]। नरेन्द्रः,—प्रभाकरवर्द्धनः, [उक्ते कर्म्मणि प्रथमा]। स्वयं समर्पितस्कन्धैः,—राज्ञि बहुमानात आत्मनैव दत्तस्कन्धैः। शवशिविकां—मृतवाहनीमित्यर्थः। शिविसमः,—शिविर्नामनृपतिर्विशेषः तत्समः, अर्थिमार्थप्रार्थितार्थपूरणव्रतत्वयोगात् इति भावः। सामन्तैः,—अधीश्वरैः। पुरोहितपुरःसरैः,—पुरोहितः,—पुरोधाः, पुरःसरः,—अग्रगामी, और्द्धदैहिककृत्यसम्पादनाय इति भावः, येषां तैः। सरितं सरस्वतीं—सरस्वतीनदीतीरमित्यर्थः। नरपतिसमुचितायां—राजयोग्यायाम्; चन्दनकाष्ठादिरचितायामिति भावः। हुताशनसत्क्रियया—अग्निसत्कारेण, ["हुताशनसत्क्रियया" इत्यत्र "हुताशसत्क्रियया" इति पाठेऽपि स एवार्थः] यशःशेषताम्—कीर्त्तिमात्रावशेषताम्, भस्मीभूततामिति भावः, [नयतेः द्विकर्म्मकत्वेन कर्म्मणि गौणत्वादत्र द्वितीया ज्ञेया] अनीयत—प्रापित इत्यर्थः; दग्धदेहः कृत इति भावः।

(२८२) पुञ्जीभूतेन—एकत्र समवेतेन, सकलेन—कृत्स्नेन, जीवलोकेनेव—भुवनवासिप्राणिनेव, लोकेन—प्रजाजनेनेति यावत्। राजकुलसम्बन्धेन—राजवंशसङ्गतेन, अशेषेण—समस्तेन, शोकमूकेन—शोकनिस्तब्धेन इत्यर्थः, परिजनेन—परिवारवर्गेण, [क्वचित् "परिजनेन च" इति पाठो न दृश्यते। तत्र "लोकेन" सह विशेषणसम्बन्धः, राजकुलसम्बन्धेन परिजनेन इति भावः]। अन्तर्वर्त्तिना—अन्तःस्थितेन। ["पितृशोकानलतप्तेन" इत्यत्र "शोकानलतप्तेन" इति पितृपदविनिर्मुक्तः पाठः पुस्तकान्तरे विद्यते]। स्नेहद्रवेण—स्नेहरसेन, पितृभक्त्या इति भावः। सिच्यमानः,—आर्द्रीक्रियमाणः; पितृशोकेन अतीवाकुल इति भावः; स्नेहद्रव्यं हि यथा अग्न्युत्तापेन समधिकं स्फीतं सत् प्रबलवेगेन आधारगर्भमतिक्रम्य तद्बहिरवयवमपि सिक्तीकरोति, तथा सोऽपि महाशोकसन्तापतरलितयः अन्तर्वर्त्तिन्या अपि पितृ-

थिनौ भीमरथीभीमाम् अखिलां सराजको जजागार ; अजनि च अस्य चेतसि,—"तातें (२८३) दूरीभूते अनाथीभूतः सम्प्रति एतावान् खलु जीवलोकः। तथा हि लोकस्य भग्नाः पन्थानः, मनोरथानां खिलीभूतानि भूरिस्थानानि, स्थगितानि आनन्दस्य द्वाराणि, सुप्ता सत्यवादिता, लुप्ता लोकयात्रा, (२८४) विलीना बाहुशालिता, प्रलीना प्रियालापिता,

---

भग्ना उच्छलिततया बहिः प्रकटितया अतीव विगलितहृदयः अभवदित्याशयः। निर्व्यवधानायां—निरासनायामिति यावत्। निशीथिनीं—रजनीम्, [अत्र व्याप्त्यर्थं द्वितीया]। भीमरथीभीमां—भीमरथी—नरकनदी, कालरात्रिः वा, तद्वत् भीमा—भयङ्करी ताम्; केचित्तु—"सप्तसप्ततिमे वर्षे सप्तमे मासि सप्तमी। रात्रिर्भीमरथी नाम नराणामतिदुस्तरा॥" इत्युक्त्वा सप्तसप्तत्यां वर्षेषु तत्सङ्ख्यकमासेषु दिनेषु च षट्सु गतेषु एका सप्तमी रात्रिर्भवति, सप्तसप्ततितमे वर्षे सप्तमे मासि सप्तमी रजनी एव सा वेदितव्या, सा भीमरथीत्युच्यते, तामतिक्रान्तो वर्षशतजीवी नरो भवति इति आचक्षते। अखिलां—सर्व्वाम्। सराजकः,—राजसमूहैः परिवृतः।

(२८३) दूरीभूते—परलोकं गते सति, सम्प्रति—अधुना, एतावान् खलु—एतत्पर्य्यन्त एव, सुविशाल इत्यर्थः; जीवलोकः,—संसारः, अनाथीभूतः,—प्रभुशून्यः, ["अनाथीभूतः" इति पाठः पुस्तकान्तरे न दृश्यते]। इतः परं संसारसुखस्य अपगमाल्लोकानामिति भावः। ["तथा हि" इति पाठः पुस्तकान्तरे नास्ति]। लोकस्य—जगतः, भुवनस्येति यावत्, ("लोकस्तु भुवने जने" इत्यमरः)। पन्थानः,—स्थितिमार्गाः, मर्य्यादा इत्यर्थः, भग्नाः,—विपर्य्यस्ताः। मनोरथानाम्—अभिलाषाणां, भूरिस्थानानि—प्रभूता विषयाः, ["भूरिस्थानानि" इत्यत्र "भूतिस्थानानि" इति पाठे,—समृद्धिविषयाः, उच्चाभिलाषा इत्यर्थः] खिलीभूतानि—अप्रहतीभूतानि, कुण्ठीभूतानि इति यावत्, प्रार्थनाशतपूरकाभावात् शून्यानि इति भावः, ("हे खिलाप्रहते समे" इत्यमरः)। आनन्दस्य—प्रमोदस्य, द्वाराणि—कपाटानि इति यावत्, स्थगितानि—निरुद्धानि इति यावत्। सत्यवादिता—तथ्यभाषणशीलता, सुप्ता—निद्रिता। लोकयात्रा—संसारयापनं, सुखेन संसारस्थितिः इति यावत्, लुप्ता—विनष्टा।

(२८४) बाहुशालिता—बाहुवीर्य्यमिति भावः, विलीना—विलयं गता। प्रियालापिता—मधुराभाषित्वं, प्रलीना—विध्वस्ता।

(२८५) प्रोषिताः पुरुषकारविहारविकाराः, समाप्ता समरशौण्डता, (२८६) ध्वस्ता परगुणप्रीतिः, विश्रान्ता विश्वासभूमयः, अपदानि अवदानानि, निरुपयोगानि शास्त्राणि, (२८७) निरवलम्बना विक्रमैकरसता, कथाऽवशेषा विशेषज्ञता, (२८८) ददातु जनो जलाञ्जलिम् और्जित्याय, प्रतिपद्यतां प्रव्रज्यां प्रजापालता, (२८९) बध्नातु वैधव्यवेणीं वरमनुष्यता, समाश्रयतु राजश्रीः आश्रमपदं,

(२८५) पुरुषेति ।—पुरुषकारस्य—पौरुषस्य, विहारः,—विलसितं, तस्य विकाराः,—विविधरूपता इत्यर्थः, प्रोषिताः,—दूरं गता इति भावः। समरशौण्डता—रणमत्तता, आहवदक्षता वा, सङ्गामे वीरत्वप्रकटनमित्यर्थः, समाप्ता—समाप्तिं गता ।

(२८६) परगुणप्रीतिः,—अन्योत्कर्षाभिनन्दनमिति यावत्, ध्वस्ता—नाशं गता। विश्वासभूमयः,—प्रत्ययस्थानानि, विश्रान्ताः,—विश्रान्तिं गताः। अवदानानि—यशस्कराणि कर्माणि इत्यर्थः, ["अवदानं कर्म हृत्तम्" इत्यमरः। "अवदानानि" इत्यत्र "अपदानानि" इति पाठेऽपि स एवार्थः। इह अपदानासङ्गत्यास्यत्वेन इत्यनुप्रासः इति ज्ञेयम्]। अपदानि—निराश्रयाणि। शास्त्राणि—आगमाः, हितानुशासनयन्त्रा इति यावत्, [शासधातोः "सर्वधातुभ्यः ष्ट्रन्" (उ० ४ पा० १५८ सू०) इति ष्ट्रनि रूपम्] निरुपयोगानि—निष्प्रयोजनानि ; नैगमसेतुपालकाभावेन शास्त्रविहितकर्माकरणादिति भावः।

(२८७) विक्रमेति ।—विक्रमे—शौर्यप्रदर्शने एव, एकः,—मुख्यः, रसः,—रागो येषां तेषां भावः तत्ता, निरवलम्बना—निराश्रया। विशेषज्ञता—विशिष्टं ज्ञानं, कथाऽवशेषा—कथामात्रशेषा, विनष्टा इत्यर्थः। इह "भग्नाः पन्थानः" इत्यारभ्य एतदवधि असम्बन्धे सम्बन्धरूपातिशयोक्तिः, मार्गविपर्यासादीनाम् असम्बन्धानां सम्बन्धत्वप्रतिपादनात् इति सङ्क्षेपः ।

(२८८) जनः,—लोकः, और्जित्याय—उर्जितस्य—बलान्वितस्य भावः और्जित्यं तस्मै, तेजस्विताये इत्यर्थः,[उर्ज्यते: चौरादिकस्य निष्ठायां भावे व्यञि रूपम्]। जलाञ्जलिं—तर्पणसलिलं, ददातु ; और्जित्यं विलुप्तमिति भावः। प्रजापालता—प्रजापालनकर्म, प्रव्रज्यां—सन्यासधर्मं, प्रतिपद्यताम्—आश्रयतु ; स्वाश्रयाभावादिति भावः।

(२८९) वरमनुष्यता—मनुष्यश्रेष्ठता, वैधव्यवेणीं—विधवाधार्यं वेणीबन्ध-

(२९०) परिधत्तां धवले वाससी वसुमती, वहतु वल्कले विलासिता, तपस्यतु तपोवनेषु तेजस्विता, (२९१) प्राहणीतु चीवरे वीरता, (२९२) क्व गम्यतां पुनस्तस्य कृते कृतज्ञतया ? क्व पुनः प्राप्स्यति तादृशान् महापुरुषनिर्माणपरमाणून् परमेष्ठी ? शून्याः संवृत्ता दश दिशो गुणानां, जगत् जातम् अन्धकारं धर्मस्य, निष्फलम् अधुना जन्म शस्त्रोपजीविनाम्। तातेन विना (२९३) कुतस्त्या दिवसम् अममसमर-

---

मित्यर्थः, बध्नातु—गच्छतु। राजश्रीः,—राजलक्ष्मीः, आश्रमपदं—तपोवनमित्यर्थः, समाश्रयतु—गच्छतु।

(२९०) वसुमती—पृथ्वी, धवले—शुभे, न तु रक्ते इति भावः; वाससी—वसने, परिधत्तां—धारयतु, वैधव्यादिति भावः। विलासिता—विलसनशीलता, वल्कले—तरुत्वचौ, वहतु—धारयतु; तपस्यां करोतु इति भावः। तेजस्विता—प्रतापशालित्वं, तपोवनेषु—आश्रमेषु, तपस्यतु—तपश्चरतु।

(२९१) प्राहणीतु—आच्छादयतु, परिदधातु इत्यर्थः, चीवरे—वसनखण्डे; कौपीनं तदुचितमुत्तरीयञ्च इति भावः। वीरता—वीरधर्म्मः।

(२९२) कृतज्ञतया—कृतोपकारवेदितया, तस्य—दिवस्य, पितुरिति भावः; कृते—निमित्तं, तन्मरणादेव कारणादित्यर्थः, पुनः क्व गम्यताम् ?—न कुत्रापि इति भावः। जगति स एक एव कृतज्ञ आसीत्, अतस्तदभावे कृतज्ञता निराश्रया जाता इति तात्पर्य्यम्। परमेष्ठी—विधाता, तादृशान्—तथाभूतान्। महापुरुषनिर्म्माणस्य—नरश्रेष्ठरचनायाः, परमाणून्—द्व्यणुकभूतानां चित्यादीनां चतुर्णाम् आरब्धकान् अन्तिमावयवान्, भूतांशनिवहान् इत्यर्थः, क्व—कुत्र, पुनः प्राप्स्यति ?—न कुत्रापि इति भावः; तादृशमहापुरुषः पुनर्नोत्पत्स्यते इति निष्कर्षः। गुणानां—दयादाक्षिण्यादीनां, दश दिशः शून्याः,—रिक्ताः, संवृत्ताः,—जाताः। धर्म्मस्य—सुकृतस्य, जगत्—लोकः, अन्धकारं—तमोमयमिति यावत्, जातं—भूतम्। अधुना शस्त्रोपजीविनां—शस्त्रव्यवसायिनां, जन्म—उत्पत्तिः, निष्फलं—निरर्थकम्; तन्निकषरूपस्य सज्जनस्य अपायत्वेन तद्गुणपरीक्षाया अयोगत्वादिति भावः।

(२९३) कुतस्त्याः,—कुत आगताः, न कुतोऽपि आगमिष्यन्तीति यावत्; न पुनः भविष्यन्तीति भावः। ["अव्ययात्यप्" (४।२।१०४ पा०) इत्यत्र "अमैवाव्ययेन" (४।२।१०३ पा०) इत्यस्य

रससमारब्धकलहकथाकण्टकितसुभटकपोलभित्तयो वीरगोष्ठ्यः ? अपि नाम स्वप्नेऽपि दृश्येत दीर्घरक्तनयनं पुनः तन्मुखसरोजम् ? जन्मान्तरेऽपि पुनः (२८४) परिष्वज्येत तल्लोहस्तम्भाभ्यधिकगरिमगर्भं भुजयुगलम् ? लोकान्तरेऽपि (२८५) पुत्र ! पुत्र ! इति आलपतः श्रूयेत सा सुधारसमुद्गिरन्ती मथ्यमानक्षीरसागरोद्गारगम्भीरा भारती ?" इति। एतानि च अन्यानि च चिन्तयत एव अस्य कथमपि सा क्षयम् इयाय यामिनी।

तत्रिभ्य एव" (वा०) इत्यत्रीय तसेर्योगात्त्यप्] दिवसं—समस्तं दिनं व्याप्येत्यर्थः, ["कालाध्वनोरत्यन्तसंयोगे" (२।३।५ पा०) इति सूत्रेण द्वितीया]। असमेति।—असमेन—अतुल्येन, अनुपमेयेन इत्यर्थः, समररसेन—सङ्ग्रामानुरागेण, समारब्धा—उपक्रान्ता, या कलहकथा—विग्रहवार्त्ता, युद्धविषयकालाप इति भावः, तया कण्टकिताः,—हर्षितलोमानः, सुभटानां—योद्धॄणां, कपोलभित्तयः,—गण्डतटाः यासु ताः, वीरगोष्ठ्यः,—वीरसभाः। इह स-म-र-क-वर्णानां असकृदावृत्त्या वृत्त्यनुप्रासः। अपि—प्रश्ने। नाम—सम्भावनायाम्। दीर्घेति।—दीर्घे—आयते, रक्ते—रक्तवर्णे, नयने—लोचने यत्र तादृक्।

(२८४) परिष्वज्येत—आलिङ्गेत। तदिति।—तस्य—पितुः, लोहस्तम्भात्—आयसस्थूणातः, अभ्यधिकः,—अतिरिक्तः, गरिमा—गौरवं, गर्भे—अभ्यन्तरे यस्य तथाभूतं, भुजयुगलं—बाहुद्वयम्।

(२८५) ["पुत्र ! पुत्र !" इत्यत्र "पुत्र !" इति पाठः पुत्रकालरे दृश्यते ; तथाभिन्नितमन्यतार्थलाभावान्न तथाऽर्थसौष्ठवम् इति क्षेयम्]। आलपतः,—आभाषमाणस्य। सुधारसम्—अमृतद्रवम्। उद्गिरन्ती—वर्षन्ती। मथ्यमानेति।—मथ्यमानस्य—विलोड्यमानस्य, क्षीरसागरस्य—क्षीरोदस्य, उद्गारवत्—निनादवत् इति यावत्, [उद्गारशब्दस्य गौणार्थावलम्बनेन जुगुप्साव्यञ्जकत्वाभावात् अश्लीलत्वदोषस्य शङ्का न कार्येति] गम्भीरा—गभीरा, भारती—वाणी। अस्य—हर्षस्य [अनादरे षष्ठी] हर्षमनादृत्येत्यर्थः। क्षयम्—अन्तमित्यर्थः। इयाय—जगाम ; अयं महाशोकेन चिन्ताकुलतया निशीथिन्यां निमेषार्द्धमपि न निद्रां इत्याशयः।

(२९६) ततः शुचेव मुक्तकण्ठम् आरटत्सु क्रकवाकुकुलेषु, गृहगिरितरुशिखरेभ्यः पातयत्सु आत्मानं मन्दिरमयूरेषु, परित्यक्तनिजनिवासेषु च वनाय प्रस्थितेषु पत्ररथकुलेषु, सद्यस्तनूभूते ताम्यति तमसि, (२९७) मन्दीभूतात्मस्नेहेषु अभावम् अभिलषत्सु प्रदीपेषु, २९८) स्फुरदरुणवल्कलप्राहृतवपुषि प्रव्रज्यामिव प्रतिपन्ने नभसि, (२९९) प्रभातसमयेन समुच्चीय-

(२९६) "ततः" इत्यादौ "चचाल देवी हर्षः" इत्यत्रेणान्वयः। शुचा—शोकेन। पदमेतत् क्रकवाकुप्रभृतिष्वपि समुच्चयबलात् अन्वेतव्यम्। वक्ष्यमाणसमुच्चयार्थकेन चशब्देन योगात् सकृत्प्रयोगस्य सकृदर्थबोधकत्वेन तत्रैवान्वयः यद्यप्युचितः, तथाऽपि समुच्चयस्य तु पर्य्यवसाने सम्बन्धं विना चारितार्थ्याभावात् इति ध्येयम्। मुक्तकण्ठं—स्फुटगलम्, उच्चैरित्यर्थः। आरटत्सु—ध्वनत्सु। क्रकवाकुकुलेषु—ताम्रचूडवृन्देषु, ("क्रकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः" इत्यमरः)। गृहेति।—गृहगिरितरूणां—भवनपर्व्वतवृक्षाणां, शिखराणि—अग्रभागाः तेभ्यः, आत्मानं—स्वं, पातयत्सु—निक्षिपत्सु, अवरोहत्सिति भावः, मन्दिरमयूरेषु—गृहमयूरेषु। परित्यक्तनिजनिवासेषु—उत्सृष्टनीडेषु, ["परित्यक्तनिजनिवासेषु" इत्यत्र "परित्यक्तनिवासेषु" इति पाठान्तरम्]। वनाय—अरण्याय, अरण्यमित्यर्थः; ["क्रियार्थोपपदस्य—" (२।३।१४ पा०) इत्यादिना अप्रयुज्यमानस्य तुमुनः कर्म्मणि चतुर्थी] प्रस्थितेषु—चलितेषु, पत्ररथकुलेषु—पक्षिवृन्देषु, ["पत्ररथकुलेषु" इत्यत्र "पत्ररथेषु" इति पाठान्तरम्]। सद्यः,—तत्क्षणं, तनूभूते—विरलीभूते। ताम्यति—अवसादं गच्छतीत्यर्थः। तमसि—अन्धकारे।

(२९७) मन्दीभूतेति।—मन्दीभूतः,—ह्रासं गतः, आत्मनः,—स्वस्य, स्नेहः,—तैलम्, आत्मनि—स्वस्मिन्, स्नेहः,—ममता च येषां तेषु, अभावं—नाशम्, अभिलषत्सु—वाञ्छत्सु, तैलाभावात् आत्मवैराग्याच्च निर्वाणोन्मुखेषु इति भावः।

(२९८) स्फुरदिति।—स्फुरत्—उद्गच्छत्, अरुणः,—सूर्य्यसारथिः, वल्कलमिव—इचलगिव, स्फुरत्—दीप्यमानम्, अरुणं—रक्तवर्णं, वल्कलमिति च, तेन प्राहृतम्—आच्छादितं, वपुः,—शरीरं यस्य तथाभूते, प्रव्रज्यामिव—सन्न्यासधर्म्ममिव, प्रतिपन्ने—प्राप्ते, नभसि—आकाशे; अरुणोदयवेलायामिति भावः।

(२९९) प्रभातसमयेन—प्रातःकालेन, समुच्चीयमानासु—एकैकशः गृहीत्वा

मानासु पार्थिवास्थिशकलकलासु इव कलविङ्ककन्धराधूसरासु तारकासु, (३००) भूभृद्धातुगर्भकुम्भधारिषु (३०१) विविधसरःसरित्तीर्थाभिमुखेषु प्रस्थितेषु वनकरिकुलेषु, (३०२) श्यावशुचिसिक्थपटलपाण्डुरे पिण्डे इवापरपयोनिधिपुलिनपरिसरे

निजपेटिकायां सञ्चीयमानासु इत्यर्थः ; विलयं नीयमानास्विति भावः ; ["समुज्झीयमानासु" इत्यत्र "समुत्सीर्यमाणासु" इति पाठे,—अवरुध्यमानासु इत्यर्थः ; प्रभावाधिक्येन तेजस्विरस्करणात् अदृश्यतां प्राप्यमाणासु इति भावः]। पार्थिवस्य—राज्ञः, अस्थ्नां—कीकसानां, ("कीकसं कुल्यमस्थि च" इत्यमरः) शकलाः,—खण्डाः इव, याः कलाः,—चन्द्रकलाः तास्विव ; यद्वा,—अस्थिशकलानां—कीकसखण्डानां, कलाः,—सङ्घाः तास्विवेत्युत्प्रेक्षा ; कलविङ्कस्य—यामचटकस्य, ("चटकः कलविङ्कः स्यात्" इत्यमरः) कन्धरा—ग्रीवा इव, धूसराः,—ईषत्पाण्डुवर्णाः तासु, ["कृधूमदिभ्यः कित्" (उ० ३ पा० ३ सू०) इति सरन्प्रत्ययस्य कित्त्वात् वार्तिकोक्तयङ्लुगभावे घत्वाभावाच्च रूपम्] तारकासु—नक्षत्रेषु। मृताहात् परमस्थिसञ्चयनकृत्यमुक्तं कात्यायनेन,—"अपरेद्युस्तृतीये वा अस्थ्नां सञ्चयनं स्मृतम्। ततो यज्ञीयवृक्षोत्थां शाखामादाय वाग्यतः॥ प्रेतस्यास्थीनि सङ्गृह्णाति प्रधानाङ्गेष्वनेन ॥" इति।

(३००) भूभृदिति।—भूभृतः,—पर्वतस्य, धातवः,—गैरिकादयः, गर्भे—मध्ये ययोः तादृशौ, कुम्भौ—कपोलपिण्डौ, धरन्तीति तथोक्तेषु; अन्यत्र,—भूभृतः,—राज्ञः, धातवः,—पूर्वोक्तानि सञ्चितानि अस्थीनि, गर्भे—अभ्यन्तरे येषां तादृशान्, कुम्भान्—कलशान्, धारयन्तीति तथाविधेषु, जलेष्विति भावः ; मृतास्थां कुम्भमध्ये रक्षणमुक्तं निर्णयसिन्धौ यथा,—"प्रक्षिप्य स्वल्पमेधाखे नवे साच्छादने शुभे। गृहीत्वाऽस्थीनि तद्वच्च नीत्वा तोये विसर्जयेत् ॥" इति।

(३०१) विविधेति।—विविधानि—बहूनि इत्यर्थः, सरांसि—सरोवराः, सरितः,—नद्यः, तीर्थानि—पुण्यक्षेत्रसलिलानि, तेषाम् अभिमुखाः,—सम्मुखाः, तान्युद्दिश्य यायिनः इत्यर्थः, तेषु, वनकरिकुलेषु—वन्यगजवृन्देषु।

(३०२) श्यावेति।—श्यावं—धूसरं, शुचि—शुद्धं, सिक्थं—मधूच्छिष्टं, तस्य पटलं—सङ्घः, तद्वत् पाण्डुरं—शुभ्रं तस्मिन् ; अन्यत्र,—श्यावः,—श्यावसम्बन्धी, शुचि—शुद्धं, यत् सिक्थपटलं—भक्तयामसमूहः, ("सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्" इति मेदिनी) पाण्डुरः,—गौरः यच्च तथाभूतः तस्मिन्, पिण्डे इव—प्रेतदेयगोलाकारान्ने इव, अपरपयोनिधिपुलिनपरिसरे—पश्चिमसमुद्रसैकतदेशकपाव-

पात्यमाने शशिनि, क्रमेण (३०३) नृपचितानलधूमविसर-धूसरीकृततेजसि इव नरपतिशोकपावकदाहकिणकलङ्ककालीकृतचेतसि इव (३०४) प्रोषितसमस्तान्तःपुरपुरन्ध्रिमुखचन्द्रहृन्दोहैगविद्राणवपुषि इव (३०५) प्रथमास्तमितरोहिणीरणरणकविमनसि इव च अस्तमुपगते रजनिकरे, राजतीव देवे दिवम् आरूढे सवितरि, परिवृत्ते राज्ये इव रजनीप्रबन्धे, (३०६) प्रबुद्धराजहंसमण्डलप्रबोध्यमानः पङ्कजाकर इव

तने, पात्यमाने—क्षिप्यमाणे, क्षीयमाणे च। शशिनि—चन्द्रमसि। अस्तोन्मुखे च चन्द्रमसि इति भावः।

(३०३) नृपेति।—नृपस्य—राज्ञः, चितानलस्य—शवदाहनवह्नेः, धूमविसरेण—धूमनिचयेन, धूसरीकृतम्—ईषत्श्यामीकृतं, तेजः,—प्रभा यस्य तथाभूते इव। नरपतेरिति।—नरपतेः,—राज्ञः, शोकः,—मन्युः, पावक इव—अग्निरिव, तस्य दाहेन—सन्तापेन, यः किणकलङ्कः,—शुष्कव्रणचिह्नं, तेन कालीकृतं—मलिनीकृतं, चेतः,—हृदयम्, अन्तरङ्गमिति भावः, यस्य तथाभूते इव।

(३०४) प्रोषितेति।—प्रोषितानां—पतिशोकात् परलोकं प्रस्थितानां, समस्तानां—समग्राणाम्, अन्तःपुरपुरन्ध्रीणाम्—अन्तःपुरमहिलानां, मुखानि—आननानि, चन्द्रहृन्दानि इव—शशधरसमूहा इव, तेभ्यः उद्वेगः,—त्रासः, तेन विद्राणं—पलायमानं, [विद्राते: निष्ठायां "संयोगादेरातो—" (८।२।४३ पा०) इत्यादिना निष्ठातस्य नत्वे "अट्कुप्वाङ्—" (८।४।२ पा०) इत्यादिना णत्वम्] वपुः,—शरीरं यस्य तथाभूते।

(३०५) प्रथमेति।—प्रथमं—प्राक्, अस्तमिता—अस्तं गता, या रोहिणी—स्वप्रेयसीति यावत्, तस्यां रणरणकेन—उत्सवत्वया, उद्वेगेन वा, विमनाः,—विक्लवं मनो यस्य तथाभूते इव, रजनिकरे—चन्द्रे। राजतीव—विराजमाने इव, देवे—अमरे, राजनि प्रभाकरवर्द्धने च। दिवं—गगनं, स्वर्गञ्च, ("द्यौः स्त्री स्वर्गे च गगने दिवं क्लीवं तयोः श्रुतम्" इति मेदिनी)। सवितरि—सूर्ये, जनके च। परिवृत्ते—परिवर्त्तं—विनिमयः, तत्प्राप्ते, विपर्य्यस्ते इत्यर्थः; रजनीप्रबन्धे—निशागमे।

(३०६) प्रबुद्धेति।—प्रबुद्धानां—जागरितानां, प्रागिति शेषः, राज्ञां—नृपाणां, हंसानामिव—श्वेतच्छदानामिव, मण्डलानि—समूहाः तैः; अन्यत्र,—प्रबुद्धानां राजहंसानां—"राजहंसास्तु ते चञ्चुचरणैः लोहितैः सिताः" इत्युक्तलक्ष-

चचाल देवो हर्षः। (३०७) ततश्च नूपुरखविराममूकमन्द-मन्दिरहंसेषु, शोकाकुलकतिपयकञ्चुकिमात्रावशेषेषु शुद्धान्तेषु, (३०८) पतिततयूथपे इव वनगजचये कक्ष्यान्तरवर्त्तिनि पित्र-परिजने विषादिनि, उपरिरुदन्निषादिनि च स्तम्भनिषण्णे

णानां हंसविशेषाणां, मञ्जुलैः,—श्रेणीभिः, प्रबोध्यमानः,—सान्त्व्यमानः ; अन्यत्र,—जागर्य्यमाणः, पङ्कजाकर इव—कासार इव, चचाल—उत्तस्थौ, धरापृष्ठात् इति शेषः। इह नृपादिषु हंसत्वारोपनियतं रूपकं, श्लिष्टपदनिबन्धनपदश्लेषस्याङ्गम्।

(३०७) "ततश्च" इत्यादौ "दृश्यमानदृष्टिः निर्जगाम राजकुलात्" इत्युत्तरेण सम्बन्धः। नूपुरेति।—नूपुराणां—मञ्जीराणां, रवस्य—शब्दस्य, विरामेण—अपगमेन ; नृपवियोगशोकेन पुराङ्गनाभिः भूषणादिपरित्यागादिति भावः ; मूकाः,—निःशब्दाः ; हंसानां नूपुरशिञ्जनानुकरणस्य कविवर्णनीयवस्तुषु प्रसिद्धेरिति भावः ; अत्र तदभावात् मूकत्वं बोद्धव्यम् ; मन्दाः,—अपटवः, मन्दिरहंसाः,—गृहमरालाः येषु तथोक्तेषु। शोकेति।—शोकेन—शुचा, आकुलानि,—विह्वलानि, कतिपयानि—अल्पानि, कञ्चुकिमात्राणि,—सौविदल्ला एव, ("मात्रा कर्णविभूषायां विज्ञे माने परिच्छदे। अवरावयवे स्वल्पे क्लीवं कात्स्न्येऽवधारणे॥" इति मेदिनी) अवशिष्यन्ते इति अवशेषाः शेषु तथाविधेषु, राजप्रियाणां सर्व्वासां चिताऽऽरोहणात् परिजनानां परिचारिकाणामल्पत्वाच्च हर्षेण सह स्नानाय गमनादिति भावः ; केवलमन्तःपुररक्षणार्थमेव तेषां तत्र स्थापनादिति तु फलितम् ; शुद्धान्तेषु—अन्तःपुरेषु।

(३०८) पतितेति।—पतितः,—विनष्ट इत्यर्थः,—यूथपः,—यूथपतिः यस्य तादृशे इव, वनगजचये—आरण्यगजवृन्दे, ["वनगजचये" इत्यत्र "वनगजयूथे" इति पाठेऽपि स एवार्थः]। अत्र वनगजेत्युक्तिः परिजनानां बहुत्वद्योतनार्थं भर्त्तरि एकान्तानुरक्तिप्रकटनार्थञ्च बोद्धव्या। कक्ष्यान्तरवर्त्तिनि—प्रकोष्ठान्तरस्थिते, पित्र-परिजने—पितुः परिचारकवर्गे, विषादिनि—विषादं गते। उपरीति।—उपरि—पृष्ठभागे, रुदन्—क्रन्दन्, निषादी—हस्तिपकः, हस्तिपाल इत्यर्थः, यस्य तथोक्ते, ("आधोरणा हस्तिपका हस्त्यारोहा निषादिनः" इत्यमरः)। स्तम्भनिषण्णे—आलानस्तम्भमाश्रित्य स्थिते इत्यर्थः, ["सदिरप्रतेः" (८।३।६६ पा०) इति षत्वेन निषीदतेः निष्ठायां "रदाभ्यां—" (८।२।४२ पा०) इत्यादिना नत्वं, पूर्व्वदकारस्यापि नत्वं, ततः प्रथमस्य "खरवसानयोः—" (८।४।१ पा०) इत्यादिना द्वितीयस्य च "ष्टुना ष्टुः"

निष्पन्दमन्दे राजकुञ्जरे, (३०९) मन्दुरापालकाक्रन्दव्यथिते च अजिरभाजि राजवाजिनि, (३१०) विश्रान्तजयशब्द-कलकले च शून्ये च महास्थानमण्डपे दह्यमानदृष्टिः निर्जगाम राजकुलात्; अगाच्च सरस्वतीतीरं, (३११) तस्यां स्नात्वा पितॄन् ददौ उदकम्। (३१२) अपस्नातस्य अनिष्पीड़ित-मौलिरेव परिधाय उद्गमनीयदुकूलवाससी, निश्वासपरः,

(८।४।४१ पा०) इति णत्वम्] निष्पन्दमन्दे—निश्चेष्टे इति यावत्। राजकुञ्जरे—राजहस्तिनि।

(३०९) मन्दुरेति।—मन्दुरा—अश्वशाला, ("वाजिशाला तु मन्दुरा" इत्यमरः) तां पालयन्तीति ते मन्दुरापालकाः,—अश्वपाला इति यावत्, तेषाम् आक्रन्देन—रोदननिनादेन, व्यथिते—सन्तप्ते; ["मन्दुरापालकाक्रन्दव्यथिते" इत्यत्र "मन्दुरा-पालकाक्रन्दकथिते" इति पाठे,—मन्दुरापालकैः,— स्वरचकैः, आक्रन्दः,—रोदन-ध्वनिः, कथितः,—व्यक्तीकृतः यत्र तस्मिन्नित्यर्थः]; अजिरभाजि—अङ्गनवर्त्तिनि, ("अङ्गनं चत्वराजिरे" इत्यमरः)। राजवाजिनि—राजघोटके।

(३१०) विश्रान्तेति।—विश्रान्तः,—विरतः, [विश्रान्यते: भूते कर्त्तरि क्तप्रत्ययः] जयशब्दः,—जयध्वनिरेव, कलकलः,—कोलाहलः यस्मिन् तथाभूते। शून्ये—निर्जने इत्यर्थः। महास्थानमण्डपे—प्रशस्तसभागृहे, ("सभासमितिरंसदः। आस्थानी क्लीवमास्थानम्" इत्यमरः)। दह्यमानदृष्टिः,—भस्मीभूयमानेव; नित्यं जनकोलाहलमुखरितस्य पित्र्या अधिष्ठितस्य सभागृहस्य एकमात्रस्य नृपस्याभावेन जनविरहिततया निस्तब्धत्वेन शून्यसंज्ञासमदर्शनेन च पितृशोकानलोद्दीपनादिति भावः। राजकुलात्—राजभवनात्, ("कुलं जनपदे गोत्रे सजातीयगणेऽपि च। भवने च····· ॥" इति मेदिनी)।

(३११) तस्यां—सरस्वत्याम्। उदकं—तर्पणसलिलाञ्जलिं, ददौ—अर्पया-मास।

(३१२) "अपस्नातः" इत्यादौ "भवनमाजगाम" इत्युत्तरेण सम्बन्धः। अप-स्नातः,—प्रेतकार्य्यमुद्दिश्य कृतस्नानः। अनिष्पीड़ितमौलिः,—न निष्पीड़ितः,—निर्जलीकृतः, अपीड़ितः इत्यर्थः, मौलिः,—केशचयः येन तथोक्तः, ("चूड़ा किरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः)। उद्गमनीये—धौते, ("तस्मादुद्गमनीयं यत्

निश्चामरः, निरातपत्रः, निरुत्सारणः, समुपनीतेऽपि सप्तौ चरणाभ्यामिव (३१३) नासाऽग्रासक्तेन रक्ततामरसताम्रेण चक्षुषा हृदयावशेषस्य अपि पितुर्दाहशङ्कया शोकाग्निमिव उद्गिरन्, अताम्बूलस्यापि सुचिरप्रक्षालितस्य कल्पतरुकिसलयस्य इव स्वभावपाटलस्य अधरस्य अधरपल्लवस्य प्रभया मांसरुधिरकवलान् इव हृदयाभिघातात् उद्गमन् उष्णनिश्वासमोक्षैः भवनम् आजगाम।

धौतयोर्वस्त्रयोर्युगम्" इत्यमरः) दुकूले—सितांशुके एव, ("दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके" इति शब्दार्णवः)। वाससी—वस्त्रे, परिधाय—परिहिते कृत्वा, निश्वासपरः,—पुनः पुनरायतं निःसृजन् इत्यर्थः; शोकजोभात् इति भावः। निश्चामरः,—चामरव्यजनरहितः। ["निश्चामरः" इति पाठः ग्रन्थान्तरे न दृश्यते, तथा-युतसिद्धसम्बन्धवत्त्वात् वक्ष्यमाणनिरातपत्रतयैव निश्चामरार्थप्रतीतेः इत्यनवद्यम्]। निरातपत्रः,—छत्रवर्जितः; पित्रादिगुरुजनविरोगे छत्रचामरादिधारणनिषेधादिति भावः। निरुत्सारणः,—उत्सारणा—लोकानामपसारणं, तद्रहित इत्यर्थः; राज्ञां गमनकाले रक्षिभिः पुरःस्थलोका अपसार्यन्ते इति नियमः, तदा तु सर्वेषामेव शोकविह्वलतया बान्धवबुद्ध्या भेदज्ञानाभावात्, महापदि प्रक्रियाभावाच्च तत्र कृतमिति भावः। समुपनीते—समुपस्थापिते। सप्तौ—अश्वे, ("……तुरङ्गास्तुरङ्गमाः। ……हयसैन्धवसप्तयः॥" इत्यमरः)। चरणाभ्यामिव, मातापितृवियोगे ब्रह्मचर्यनियमपालनाय पादचारेण गमनस्य प्राशस्त्यादिति भावः।

(३१३) नासाऽग्रासक्तेन—नासिकाऽग्रलग्नेन। रक्ततामरसताम्रेण—रक्तकमललोहितेन। हृदयावशेषस्य—हृदयमात्रस्थितस्य; न तु बहिर्जगतु इति भावः। अताम्बूलस्य—वर्जिततताम्बूलस्य, सुचिरप्रक्षालितस्य—बहुक्षणधौतस्य। कल्पतरुकिसलयस्य इव—कल्पवृक्षपल्लवस्य इव, स्वभावपाटलस्य—सहजरक्तस्य, अधरपल्लवस्य—अधरः,—क्षीणः, पराभूत इत्यर्थः, पल्लवः,—किसलयः यस्मात् तथोक्तस्य, अधरस्य—निम्नोष्ठस्य; यद्वा,—अधरस्य—निम्नावस्थितस्य, अधरपल्लवस्य—अधरः पल्लव इव तस्य; मांसरुधिरकवलान् इव—पिशितरक्तग्रासान् इव, सरक्तमांसदिग्धानिवेत्यर्थः। हृदयाभिघातात्—हृदये—चेतसि, अभिघातात्—आघातात्, शोकवज्रप्रहारजनित-

(३१४) राजवल्लभास्तु भृत्याः सुहृदः सचिवाश्च तस्मिन् एव अहनि निर्गत्य, प्रियं पुत्रदारम् उत्सृज्य, उद्दाण्डैः बन्धुभिः वार्य्यमाणा अपि (३१५) बहुनृपगुणगणकृत-कृदयाः केचित् आत्मानं भृगुषु ववन्धुः; केचित् तत्रैव तीर्थेषु तस्थुः, केचित् (३१६) अनशनैः आस्तीर्णतृण-कुशा व्यथमानमानसाः शुचम् अशमाम् अशमयन्, केचित् शलभा इव वैश्वानरं शोकावेगविवशा विविशुः, केचित्

चतादिति भावः। उष्णनिश्वासमोचैः,—तप्तनिश्वासपातैः, ["इत्थम्भूतलक्षणे" (२।३।२१ पा०) इति विशेषणे तृतीया]।

(३१४) राजवल्लभाः,—राजप्रियाः। निर्गत्य—बहिर्गत्वा, भवनादिति शेषः। पुत्रदारम्—अपत्यकलत्राणि। [इह समाहारद्वन्द्वविषयात् च्युतसंस्कारताख्यदोषः, अदोषसमाधानन्तु "गवाश्वप्रभृतीनि च" (२।४।११ पा०) इत्यत्र महाकविप्रयोगेणा-कृतिगणत्वं प्रकल्प्य कथञ्चिन्निर्वाहाज्ज्ञेयम्] उद्दाण्डैः,—उच्छृङ्खलैः। वार्य्यमाणा—निषिध्यमाना।

(३१५) बहुनृपेति।—बहुभिः,—प्रभूतैः, नृपस्य—राज्ञः, गुणगणैः,—दया-दाक्षिण्यादिसमूहैः, कृतानि—आकृष्टानि, हृदयानि—चेतांसि येषां तथाभूताः। भृगुषु—प्रपातेषु, पर्व्वतस्य उच्चप्रदेशेषु इत्यर्थः, ("प्रपातस्त्वतटो भृगुः" इत्यमरः) आत्मानं—स्वं, ववन्धुः,—संयेमुः, तेभ्यः पतनाय कृतहस्तादिबन्धनाः तस्थुरित्यर्थः। ["ववन्धुः" इत्यत्र बभञ्जुः" इति पाठे,—तेभ्यः पतनेन आत्मानं चूर्णयामासुरित्यर्थः]। तत्रैव—तेष्वेव, भृगुष्वेव इत्यर्थः, तीर्थेषु—पुण्यक्षेत्रेषु; यद्वा,—तत्रैव—राजपुरे एव, तीर्थेषु—पुण्यक्षेत्रेषु, न तु स्वदेशं स्थानान्तरं वा इति भावः। महाप्रभावस्य सर्व्वभूत-हितैषिणः राज्ञः लोकाश्रयत्वात् तस्याः पुण्यक्षेत्रत्वं बोद्धव्यम्।

(३१६) अनशनैः,—अभोजनैः, व्रतोपवासैरित्यर्थः। आस्तीर्णतृणकुशाः,—आस्तीर्णाः,—आवर्जिताः, तृणानि—शष्पादीनि, कुशाः,—दर्भाश्च यैः तथाभूताः, तृणकुशास्तीर्णभूमौ स्थिता इत्यर्थः। व्यथमानमानसाः,—पीड़ितचित्ताः। अशमाम्—अतृप्ताम्, शुचं—शोकम्, अशमयन्—शमयामासुः; वनं गत्वा प्राणविसर्জ্জनाय अनशने स्थिता इति भावः। शलभा इव—पतङ्गविशेषा इव। वैश्वानरम्—अग्निम्। शोकेति। —शोकस्य—शुचः, आवेगः,—सम्भ्रमः, उत्कण्ठा इत्यर्थः, तेन विवशाः,—विह्वलाः।

(३१७) दारुणदुःखदहनदह्यमानहृदया गृहीतवाचः तुषारशिखरिणं शरणं ययुः, केचित् (३१८) विन्ध्योपत्यकासु वनकरिकुलकरशीकरासारसिच्यमाननवः पल्लवशयनशायिनः सन्तापम् अशमयन्, केचित् (३१९) सन्निहितान् अपि विषयान् उत्सृज्य सेवाविमुखाः परिच्छिन्नैः पिण्डकैः अटवीभुवः शून्या जगदुः, केचित् पवनाशना धर्मधना धमद्दमनयो मुनयो बभूवुः, केचित् गृहीतकाषायाः

(३१७) दारुणेति ।—दारुणेन—उत्कटेन, दुःखदहनेन—शोकाग्निना, दह्यमानं—सन्तप्यमानं, हृदयं—चित्तं येषां तथाभूताः । गृहीतवाचः,—गृहीता—निगृहीता, संयमिता इत्यर्थः, वाग् यैः ते, मौनव्रतधारिणः इत्यर्थः । ["स्त्रियाः—" (६ । ३ । ३४ पा०) इत्यादिना पुंवद्भावे "शेषाद्विभाषा" (५।४।१५४ पा०) इति पाक्षिककबाभावः] । तुषारशिखरिणं—हिमाद्रिं, शरणम्—आश्रयं, ययुः,—प्रतस्थिरे, आश्रितवन्तः इत्यर्थः ; यतिनो जाताः इति भावः । दग्धा अपि दारुज्वालाप्रशमनार्थं शीतलस्थानमाश्रयन्ति ।

(३१८) विन्ध्येति ।—विन्ध्यस्य—तदाख्यगिरेः, उपत्यकासु—आसन्नभूमिषु, ("उपत्यकाद्रेः आसन्ना भूमिरूर्ध्वमधित्यका" इत्यमरः) । वनेति ।—वनकरिकुलानां—वन्यगजसङ्घानां, करा:,—शुण्डाः, तेषां शीकरासारैः,—अम्बुकणधाराभिः, सिच्यमानाः,—आर्द्रीक्रियमाणाः, नवाः,—अरीराणि येषां तथाभूताः, पल्लवशयनशायिनः,—किसलयशय्याश्रायिनः, सन्तापं, शोकजमिति भावः, अशमयन्—निर्वापयामासुः ; वानप्रस्थाश्रमं गृहीतवन्त इति भावः ।

(३१९) सन्निहितान्—करस्थितानिति भावः, विषयान्—भोग्यवस्तूनि, उत्सृज्य—त्यक्त्वा, सेवाविमुखाः,—भोगपराङ्मुखाः, परिच्छिन्नैः,—परिमितैः, पिण्डकैः,—भक्तग्रासैः, तदुपलक्षिता इत्यर्थः ; यद्वा,—परिच्छिन्नैः,—परिमितैः, स्वल्पैरित्यर्थः, क्षुद्रैरिति भावः, पिण्डकैः,—शरीरैः, तदुपलक्षिता इत्यर्थः, शून्याः,—जनविरलाः, अटवीभुवः,—वनभूमीः, जगदुः,—आश्रिताः । पवनाशनाः,—वायुभोजिनः, धर्मधनाः,—धर्ममात्रधनकामा इत्यर्थः, धमद्दमनयः,—धमन्यः,—काश्चित् ताम्यन्त्यः, स्रवन्त्य इत्यर्थः, धमन्यः,—शिराजालानि येषां तथाभूताः ; अनेन व्रतकार्श्यं लक्ष्यते । गृहीतकाषायाः,—गृहीतम्—अवलम्बितं, काषायं—कषायेण रक्तं वस्त्रं

कापिलं मतम् अधिजगिरे गिरिषु, केचित् (३२०) आचोटितचूडामणिषु शिरःसु शरणीकृतधूर्जटयो जटा जघटिरे, अपरे (३२१) परिपाटलप्रलम्बचीवराम्बरसंवीताः स्वाम्यनुरागम् उज्ज्वलं चक्रुः ; अन्ये (३२२) तपोवनहरिणजिह्वाऽग्रलोल्लिख्यमानमूर्च्छयो जरां ययुः। अपरे पुनः (३२३) पाणिपल्लवप्रमृष्टैः आताम्ररागैः नयनपुटैः कमण्डलुभिश्च वारि वहन्तो गृहीतव्रता मुण्डा विचेरुः।

ये: तथाभूताः, कापिलं—कपिलसम्मतं साङ्ख्यशास्त्रम्, अधिजगिरे—अधीतवन्तः, साङ्ख्यशास्त्रमधीत्य प्रकृतिपुरुषतत्त्वावगमात् योगिनः बभूवुरिति भावः।

(३२०) आचोटितेति।—आचोटिताः,—छेदिताः, [आङ्पूर्वकस्य चोटतेः णिचि निष्ठायां रूपम्] अपसारिता इति भावः, चूडामणयः,—चूडारत्नानि येभ्यः तथाभूतेषु, त्यक्तचूडारत्नालङ्कारेषु इति यावत्, शिरःसु—मूर्द्धसु। शरणीकृतधूर्जटयः,—शरणीकृताः,—आश्रिता इत्यर्थः, धूर्जटिः,—हरः यैः तथाभूताः, गृहीतपाशुपतव्रता इत्यर्थः। जघटिरे—बबन्धुः।

(३२१) परिपाटलेति।—परिपाटलेन—परितो रक्तेन, प्रलम्बेन—आयतेन इत्यर्थः, चीवराम्बरेण—वसनखण्डेन, संवीताः,—प्रावृताः, आच्छादितदेहा इत्यर्थः, धृतमुनिवेशा इति भावः। स्वाम्यनुरागं—प्रभुभक्तिम्। उज्ज्वलं—भास्वरं, प्रशस्यमिति यावत्।

(३२२) तपोवनेति।—तपोवनहरिणानाम्—आश्रममृगाणां, जिह्वाऽग्रलैः,—रसनाप्रान्तैः, उल्लिख्यमानाः,—उल्लिख्यमानाः, आस्वाद्यमाना इत्यर्थः, मूर्च्छयः,—शरीराणि येषां तथाभूताः, तापसा इत्यर्थः। जरां—वार्द्धकम्।

(३२३) पाणीति।—पाणिः,—करः, पल्लव इव—किसलय इव, तेन प्रमृष्टाः,—प्रमार्जनं नीताः, गृहीताश्च तैः, आताम्ररागैः,—आरक्तप्रभैः, शोकावेगजनितरोदनात् महापुरुषबलवत्त्वेन स्वभावसिद्धत्वाच्च इति भावः। नयनपुटैः,—नेत्रविवरैः। कमण्डलुभिः,—जलपात्रविशेषैः। वारि—अश्रुजलं, तीर्थजलञ्च। गृहीतव्रताः,—व्रतधारिणः। मुण्डाः,—उप्तशिरसः। विचेरुः,—भ्रमन्ति स्म। यौवनरागा अपि चिराभ्यस्तसंस्कारेण परलोकस्थेऽपि राजनि अत्यन्तानुरागाः आसन्, इति लोकातिशय्यशालिनी नरेन्द्रस्य काचिदसाधारणी शक्तिः समर्थ्यते इति वस्तुध्वनिः।

(३२४) देवमपि हर्षं तदवस्थं पितृशोकविह्वलोज्झितम् ; श्रियं शाप इति, महीं महापातकमिति, राज्यं रोग इति, भोगान् भुजङ्गा इति, (३२५) निलयं निरय इति, बन्धुं बन्धनमिति, जीवितम् अयश इति, देहं द्रोह इति, कल्यतां कलङ्क इति, आयुः अपुण्यफलमिति, आहारं विषमिति, विषममृतमिति, चन्दनं दहन इति, कामं क्रकच इति, हृदय-

(३२४) "देवमपि हर्षम्" इत्यादौ "कुलपुत्रादयः ..... पर्यवारयन्" इति अर्थेन सम्बन्धः। तं विशिनष्टि, तदवस्थमित्यादि।—श्रियं—राजलक्ष्मीं, शापः,—अभिसम्पातः, दुःखाकर इति भावः ; भोगनिस्पृहत्वादिति तात्पर्यम् ; इति मन्यमान-मित्यनेन सम्बन्धः, एवमुत्तरत्र। महीं—पृथ्वीं, महापातकं—महत् पापम् ; तदधि-कारस्य केवलपापबहुलत्वादिति भावः। रोगः,—व्याधिः ; क्लेशबहुलत्वादिति भावः। भोगान्—सुखसाधनानीत्यर्थः, भुजङ्गाः,—सर्पाः ; यातनाप्रदत्वादिति भावः।

(३२५) निलयं—गृहं, निरयः,—नरकम् ; पितृव्यक्तस्य गृहस्य दुःखा-करत्वादिति भावः। बन्धुं—स्वजनं, बन्धनं—बन्धनहेतुभूतः ; तदनुरोधेन गृहं त्यक्तु-मसामर्थ्यादिति भावः। जीवितं—जीवनधारणम्, अयशः,—अकीर्त्तिकर इत्यर्थः ; पितृशोकेनापि तदवलम्बनस्य निष्फलत्वबाधकत्वादिति भावः। देहं—शरीरं, द्रोहः,—अनिष्टचिन्तनम्, अनिष्टचिन्ताकर इति यावत् ; कथमद्यापि न नश्यति ? तन्नाम्नि असहनीयः सन्तापः मां न दग्धुं समर्थः भविष्यति इति भावः। कल्यतां—निरा-मयत्वम्, आरोग्यमित्यर्थः, ("वार्त्ता निरामयः कल्यः" इत्यमरः) कलङ्कः,—अप-वादः ; तादृशावस्थायां शोकजातीयादिकठिनरागाक्रान्तचक्षुषौचित्यादिति भावः। आयुः,—जीवितकालम्, अपुण्यफल—दुष्कृतपरिणामः ; औचित्यं दुःखशतभोगस्य अपरिहार्य्यत्वादिति भावः। आहारं—भोजनं, विषं—गरलम् ; पितृशोकार्त्तदेहो-षकत्वेन विषवत् विषादहेतुत्वादिति भावः। विषं—गरलम् अमृतं—सुधा ; ("पीयूषममृतं सुधा" इत्यमरः) अमृतं यथा सन्तापनाशनं, तथा शोकदग्धजीवनस्य नाशेन सन्तापप्रशमनात् अनिष्टकरं विषभूतमपि वस्तु इष्टकरममृतप्रायमेवेति इति भावः। चन्दनं—श्रीखण्ड, दहनः,—अग्निः ; प्रभूतचन्दनलेपनेनापि पितृदाहाप्रशमन-स्मरणात् विरक्तानाम् उपभोगसाधनेषु स्पृहायाः ईप्सितप्राप्तिकृच्छ्राकाङ्क्षणाद्वा इति भावः। क्रकचः,—करपत्रम् ; भोगविमुखतया करपत्रच्छेदनवत् बन्धनापत्त्वादिति

स्फोटनम् अभ्युदय इति च मन्यमानं, सर्व्वासु क्रियासु विमुखं, (३२६) पितृपितामहपरिग्रहागताः चिरन्तनाः कुलपुत्राः, वंशक्रमार्पितगौरवाश्च आङ्गिरो गुरवः, श्रुति-स्मृतीतिहासविशारदाश्च जरद्विजातयः, (३२७) श्रुताभिजन-शीलशालिनो मूर्द्धाऽभिषिक्ताश्च अमात्या राजानः, यथावत् अधिगतात्मतत्त्वाश्च संस्तुता मस्करिणः, समदुःखसुखाश्च मुनयः, संसारासारत्वकथनकुशला ब्रह्मवादिनः, शोकापनयननिपुणाश्च पौराणिकाः पर्य्यवारयन्।

भावः, ("क्रकचोऽस्त्री करपत्रम्" इत्यमरः)। हृदयस्फोटनं—हृदयविदारणम्, अभ्युदयः,—मङ्गलम्; सर्व्वसन्तापप्रशमनत्वादिति भावः; [सर्व्वत्र निरङ्कुशकमलङ्कारः]। विमुखं—पराङ्मुखं, विरतमित्यर्थः।

(३२६) पितृति।—पिता च पितामहश्च ["मातृपितृभ्यां पितरि डामहच्" (वा०) इति डामहच्। इह "आनङ् ऋतो द्वन्द्वे" (६।३।२५ पा०) इत्यत ऋतः इत्यस्य "ऋतो" (६।३।२३ पा०) इत्यादितः एवानुवृत्तिसम्भवेऽपि पुनरुद्ग्रहणेन "विद्यायोनिसम्बन्धवाचिनामुद्भूतानां द्वन्द्वे आनङ् स्यादुत्तरपदे परे" इति दीक्षितोक्त्या च सगीत्रे समानविद्ये च ऋकारान्तशब्दे परत एव आनङः विधानात्, अत्र तु पितामहशब्दस्य ऋकारान्तत्वाभावात् पूर्व्वपदस्य न आनङः शङ्का करणीयेति सङ्क्षेपः] तयोः परिग्रहेण—स्वीकारेण, आश्रयदानेन इत्यर्थः, आगताः,—वर्त्तमानाः इत्यर्थः, पालिताः इति यावत्। चिरन्तनाः,—पुरातनाः, प्राचीना इति यावत्। कुलपुत्राः,—सत्कुलजाताः जनाः, हितैषिणश्च इत्यर्थः। वंशेति।—वंशस्य—कुलस्य, क्रमेण—पारम्पर्य्येण, आर्पितम्—अर्पितं, गौरवं—सम्मानं येषां ते, याङ्गिरः,—हितानुवर्त्तितया स्वीकार्य्यवाचः, उपदेष्टार इत्यर्थः। जरद्विजातयः,—स्थविरब्राह्मणाः, श्रुत्यादिविहितविविधज्ञानोपदेशेन प्रबोधदानकुशला इति भावः।

(३२७) श्रुतेति।—श्रुतं—शास्त्रज्ञानम्, अभिजनः,—कुलं, शीलं—चारित्रं, तैः शालन्ते—शोभन्ते इति तथोक्ताः, मूर्द्धाऽभिषिक्ताः,—मूर्द्धसु कृताभिषेकाः, राज्य-प्रतिष्ठिता इत्यर्थः, क्षत्रिया वा, ("मूर्द्धाभिषिक्तो भूपाले मन्त्रिण्यपि क्षत्रियेऽपि च" इति मेदिनी) अमात्याः,—मन्त्रिणः, मन्त्रिभूताः इत्यर्थः, राजानः,—अधीश्वरभूताः। यथावत्—यथाविधि। अधिगतेति।—अधिगतं—विदितम्, आत्मतत्त्वम्—आत्म-

(३२८) अस्खतन्त्रीकृतस्य तैः मनसाऽपि न अलभत शोकम् अनुप्रचरितुम्। अनुनीयमानस्य कथङ्कथमपि आहारादिकासु क्रियासु आभिमुख्यम् अभजत। भ्रातृगतहृदयस्य अचिन्तयत्, —"अपि नाम तातस्य मरणं महाप्रलयसदृशम् इदमुपश्रुत्य आर्य्यो वाष्पजलस्नातो न गृह्णीयात् वल्कले? न आश्रयेद्वा राजर्षिः आश्रमपदम्? न विशेद्वा पुरुषसिंहो गिरिगुहाम्? (३२९) अस्रसलिलनिर्भरभरितनयननलिनयुगलो वा न

ज्ञानमित्यर्थः, ये: तथोक्ताः, ब्रह्मविदः इत्यर्थः। संस्तुताः,—परिचिताः, ("संस्तवः स्यात् परिचयः" इत्यमरः)। मस्करिणः,—भिक्षवः, सन्न्यासिनः इत्यर्थः, ("भिक्षुः परिव्राट् कर्म्मन्दी पाराशर्य्यपि मस्करी" इत्यमरः); जगद्धिताय वीतरागाणामपि भव्यपक्षपातित्वं लोकसिद्धमित्याशयः। समेति।—समे—तुल्ये, दुःखसुखे—विषादसन्तोषौ येषां ते, सुखदुःखयोः समज्ञानाः इत्यर्थः। मुनयः,—तापसाः। ब्रह्मवादिनः,—वैदान्तिकाः। पौराणिकाः,—पुराणपाठकाः, ते तु पुराणोक्तज्ञानाऽऽख्यायिकावर्णनेन शोकानपनोदयितुमीशते। पर्य्यवारयन्—पर्य्यवेष्टन्त।

(३२८) अस्खतन्त्रीकृतः,—अस्वाधीनीकृतः, क्षणमपि अमुक्त इत्यर्थः, तैः,—कुलपुत्रादिभिः पौराणिकान्तैः सर्वैरित्यर्थः। न अलभत—अविन्दत, अवसरमिति भावः। शोकं—पितृविनाशजनितं सन्तापम्। अनुप्रचरितुम्—अनुशीलितुम्, अनुभवितुमित्यर्थः। आभिमुख्यं—साभुख्यं, प्रवृत्तिम् इत्यर्थः। भ्रातृगतहृदयः,—सोदरार्पितचित्तः, भ्रातरं मनसि कृत्वेत्यर्थः। अपि—प्रश्ने। नाम—सम्भावनायाम्। तातस्य —पितुः। आर्य्यः,—राज्यवर्द्धनः। वाष्पजलस्नातः,—अश्रुजलसिक्तशरीरः। न गृह्णीयात्—न स्वीकुर्य्यात्, न पिदधीत इत्यर्थः। वल्कले—तरुत्वचौ; तपस्विपरिधेये इति भावः। पितृवियोगमाकर्ण्य शोकात् वल्कलवसने परिधाय वनं यास्यति इति सम्भावयामीति निष्कर्षः। एवमुत्तरत्रापि अपि नाम इत्यव्ययस्य अर्थः आकलनीयः। राजर्षिः,—राजा ऋषिरिव, पूतत्वात् जितेन्द्रियत्वाच्चेति भावः। आश्रमपदं—तपोवनम्। विशेत्—आश्रयेदित्यर्थः, [सर्व्वत्र "सम्भावनेऽलमिति—" (३।३।१५४ पा०) इति सूत्रेण सम्भावनायां लिङ्]। पुरुषसिंहः,—नरश्रेष्ठः।

(३२९) अस्रेति।—अस्रसलिलेन—वाष्पवारिणा, निर्भरम्—अतिमात्रं यथा तथा, भरितं—पूरितं, नयननलिनयुगलं—नेत्रपद्मद्वयं यस्य तथाभूतः। ["न

पश्येत् अनाथां पृथिवीम् ? (३३०) प्रथमव्यसनविषमविषविह्वलः न स्मरेत् आत्मानं वा पुरुषोत्तमः ? (३३१) अनित्यतया जनितवैराग्यो वा न निराकुर्य्यात् उपसर्पन्तीं राज्यलक्ष्मीम् ? (३३२) दारुणदुःखदहनप्रज्वलितदेहो वा न प्रतिपद्येत अभिषेकम् ? इहागतो वा राजभिः (३३३) अभिधीयमानो न पराचीनताम् आचरेत् ? (३३४) अतिपिष्टपक्षपाती खलु आर्य्यः। सर्व्वदा तातश्लाघया माम् अभिधत्ते,—

पश्येत्" इत्यत्र "पश्येत्" इति नञ्रहितपाठे,—पश्येत् किम् ? नैव द्रष्टुं शक्नुयात् इति सम्भावयामीति भावः]। अनाथां—निराश्रयाम् ; पतिवियोगादिति भावः।

(३३०) प्रथमेति।—प्रथमम्—आद्यम्, अपूर्व्वमिति भावः, व्यसनं—विपदेव, विषमं—दारुणं, विषं—हलाहलं, तेन विह्वलः,—विमुग्धः। आत्मानं—स्वं, वा न स्मरेत् ? आत्मघाती भवेदिति भावः। ["न स्मरेत्" इत्यत्र "स्मरेत्". इति नञ्रहितपाठे,—आत्मानं स्मरेत् वा ? आत्मा अवश्यमेव रक्षणीयः इति स्मरेत् किम् ? नैव स्मरेत् इति सम्भावयामि ; अतः आत्मघाती भवेदिति भावः]। नारायणोऽपि प्रथमाविर्भूतरूक्षागरलघोरप्रतापेन विमूढः क्षणमात्मानं विसस्मार इति पौराणिकाः। अत्र पुरुषोत्तमपदस्वरस्यात् उपमाध्वनिः शब्दशक्तिमूलकः, पुरुषोत्तम इव पुरुषोत्तमः इति प्रतीतेः।

(३३१) अनित्यतया—क्षणिकतया, जनितवैराग्यः,—उत्पन्ननिर्वेदः। उपसर्पन्तीम्—उपगच्छन्तीम्, आश्रयन्तीमित्यर्थः। निराकुर्य्यात्—त्यजेदित्यर्थः, शोकेन विरागवतां विषयादिषु निःस्पृहत्वदर्शनात् इत्याशयः।

(३३२) दारुणेति।—दारुणेन—उत्कटेन, दुःखदहनेन—शोकाग्निना, प्रज्वलितः,—सन्तप्तः, देहः,—शरीरं यस्य तथाभूतः, अभिषेकं—राज्याभिषेकमित्यर्थः, न प्रतिपद्येत वा—न स्वीकुर्य्याद्वा। ["न प्रतिपद्येत" इत्यत्र "प्रतिपद्येत" इतिमात्रपाठे,—स्वीकुर्य्यात् किमिति काकुलभ्यार्थः, नैव प्रतिपद्येत इति सम्भावयामीति भावः]।

(३३३) अभिधीयमानः,—कथ्यमानः, अनुरुध्यमान इति यावत्। पराचीनतां—पराङ्मुखतां, प्रतिकूल्यं वा इत्यर्थः ; राज्याभिषेके इति भावः। ("पराङ्मुखः पराचीनः" इत्यमरः)।

(३३४) अतिपिष्टपक्षपाती—अतिशयेन पिष्टवत्कल इत्यर्थः। तातश्लाघया—

(३३५) "तात! हर्ष! कस्यचित् अभूत् भविष्यति वा पुनः काञ्चनतालतरुप्रांशु कायप्रमाणम् इदम्? ईदृक् च दिवसकरप्रीत्या दिवसम् उन्मुखविकसितं मुखमहाकमलम्? एतौ च (३३६) वज्रस्तम्भास्थिरौ भुजकाण्डौ? एते च (३३७) हसितमदालसमहलधरविभ्रमा विलासाः? कोऽन्यो मानी विक्रान्तो वदान्यो वा?" इति। एतानि च अन्यानि च चिन्तयन् दर्शनोत्सुकहृदयो भ्रातुः आगमनम् उदीक्षमाणः कथञ्चिदपि अतिष्ठत् इति।

इति श्रीबाणभट्टविरचिते हर्षचरिते प्रभाकरवर्धनमरणं नाम पञ्चमः उच्छ्वासः ॥ ५ ॥

तातेति—पितरि, या श्लाघा—आदरः तया; तद्गुणकर्मादीनां विशेषस्मरणात् इत्यर्थः। अभिधत्ते—वक्ति।

(३३५) तात!—वत्स! कस्यचित्, जनस्य इति शेषः। काञ्चनेति।—काञ्चनतालतरुः,—सौवर्णतालवृक्षः, तद्वत् प्रांशु—उन्नतम्। कायप्रमाणम्—देहपरिमाणम्। ईदृक्—एवम्प्रकारम्; मन्यितुः मन्तुर्शमिति भावः। दिवसकरप्रीत्या—सूर्यभक्त्या, सूर्यप्रेम्णा च; दिवसं—वासरं व्याप्य इत्यर्थः, [अत्यन्तसंयोगे द्वितीया]। उन्मुखविकसितम्—उन्मुखम्—उद्मुखं, सूर्यप्रीतिकरकार्ये प्रवृत्तमित्यर्थः, तादृशञ्च तत् विकसितं—भास्वरम् इत्यर्थः; अन्यत्र,—उन्मुखम्—ऊर्ध्वमुखञ्च तत् विकसितं—प्रस्फुटितं, मुखमहाकमलं—मुखमेव महत् पद्मं, मुखं महाकमलमिव वा [इत्युपमितसमासः]।

(३३६) वज्रेति।—वज्रस्तम्भौ इव—कुलिशमयस्तम्भे इव, भास्वरौ—प्रभान्वितौ; दृढौ इति भावः; भुजकाण्डौ—भुजौ—बाहुयुगलं, काण्डौ—दण्डौ इव, तौ, बाहुदण्डौ इत्यर्थः, ("काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु" इत्यमरः)।

(३३७) हसितेति।—हसितेन—हासेन, मदालसस्य—मदविह्वलस्य, हलधरस्य—बलदेवस्य, विभ्रमा इव विभ्रमाः,—विचेष्टितानि येषु तथाविधाः। विलासाः,—श्रीभाविशेषाः। [कथमस्य अन्यस्य विभ्रमं दधातु इति दृष्ट विम्बप्रतिबिम्बभावात् तन्निबन्धननिदर्शनालङ्कृतिः] अन्यः, मन्यितुरिति शेषः। मानी—मानोन्नतः। विक्रान्तः,—शूरः। वदान्यः,—दानशौण्डः ["दुर्वदान्यस्तुलुक्कस्त्यदानशौण्डा

षष्ठ उच्छ्वासः ।

उच्चित्योच्चित्य भुवि प्रहितनिगूढात्मदूतनीतानाम् ।
विजिगीषुरिव कृतान्तः शूराणां सङ्गरं कुरुते ॥ १ ॥

बहुप्रदे" इत्यमरः) । दर्शनेति ।—दर्शनाय—अवलोकनाय, भ्रातुरिति भावः, उत्सुकं—सायहम्, उत्कण्ठितम् इति यावत्, हृदयं—चित्तं यस्य तथाविधः । उदीक्षमाणः,—प्रतीक्षमाणः ।

इत्यर्थशास्त्राटवीसञ्चरणपञ्चाननेन वात्स्यवंशावतंसेन पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-विद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां श्रीहर्षचरितव्याख्यायां पञ्चम उच्छ्वासः ॥ ५ ॥

कृतान्ताचरणवर्णनव्यपदेशेन वात्स्यवर्द्धनस्य उपांशुहननं सूचयति, उच्चित्येति ।—कृतान्तः,—अन्तकः ; अन्यत्र,—कृतान्तः,—कृतः अन्तः,—नाशः, प्रतिवीरमिति भावः, येन तथाभूतः, प्रभाकरनामा गौडाधिपतिरिति भावः, विजिगीषुः इव—विजयार्थी नृप इव, भुवि—पृथिव्याम्, उच्चित्य उच्चित—अन्विष्य अन्विष्य, प्रवरं प्रवरं विचित्य इति भावः, प्रहितनिगूढात्मदूतनीतानां—प्रहिताः,—प्रेषिताः, निगूढाः,—गुप्ताः, अदृश्या इत्यर्थः ; आत्मन्,—कपटचारिणः इति यावत्, आत्मनः,—स्वस्य, दूताः,—किङ्कराः ; अन्यत्र,—वात्स्यवंशाः, निजचारा इति यावत्, तैः नीताः,—वशं प्रापिताः, आनीता इत्यर्थः, स्वाधीनमिति भावः, तेषां, शूराणां—बलवतां, वीराणां मानवानामिति यावत् ; अन्यत्र,—शूराणां—वात्स्यवर्द्धनानुगतानां प्रधानराजपुत्राणां, सङ्गरम्—आयत्तताम्, कुरुते—स्वाधीनं नयति, अन्यत्र,—स्ववशान् करोतीत्यर्थः । एतेन प्रभाकरः निजदूतैः अन्विष्य अन्विष्य शूराणां सङ्गरं कृत्वा दूतमुखेन कन्याप्रदानप्रलोभितं राज्यवर्द्धनं स्वगेहानीतं विश्वस्तं भुञ्जानं छलेन व्यापादितवानिति षष्ठोच्छ्वासार्थः सूचितः । अत्र विजिगीषुणा सह कृतान्तस्यैधर्म्य-साम्यप्रतीतेरुपमालङ्कारः, कृन्तति इव कृतान्त इत्युपमाध्वनिश्च ; एतेन विजिगीषुः कालस्तत्काठोराशयः इति वस्तु व्यज्यते । आर्या वृत्तम् ॥ १ ॥

विस्रब्धघातदोषः स्वबधाय खलस्य वीरकोपकरः।
नवतरुभङ्गध्वनिरिव हरिनिद्रातस्करः करिणः ॥ २ ॥

(१) अथ प्रथमप्रेतपिण्डभुजि भुक्ते द्विजन्मनि, गतेषु उद्वेजनीयेषु अशौचदिवसेषु, (२) चक्षुर्दाहदायिनि (३) दीयमाने द्विजेभ्यः शयनासनचामरातपत्रवस्त्रपत्रशस्त्रादिके नृप-

---

परापकृतिचेष्टा आत्मनाशाय भवति इति वर्णनप्रसङ्गेन विश्वासघ्नः शशाङ्कस्य हर्षेण निर्यातनं सूचयति, विस्रब्धेति।—खलस्य—दुर्जनस्य, गौडाधमशशाङ्कस्येति भावः, विस्रब्धघातदोषः,—विश्वासितजनवधापराधः, राज्यवर्द्धनहननरूप इति भावः, वीरकोपकरः,—वीरस्य—वीर्यवतः, रुत्कृष्टस्य इत्यर्थः, हर्षस्येति भावः, कोपं—क्रोधं, करोति—जनयतीति तथाभूतः, अत एव हरेः,—सिंहस्य, निद्रायाः,—स्वापस्य, तस्करः,—चौरः, निद्राभङ्गकारीत्यर्थः, करिणः,—हस्तिनः, नवः,—अपूर्वः, तरोः,—वृक्षस्य, भङ्गध्वनिरिव—भञ्जनरव इव, स्वबधाय—निजनाशाय, भवतीति शेषः। एतेन यथा तरुभञ्जनरवेण प्रबोधितः सिंहः निद्राभङ्गकारिणं करिणं निपातयति, तथा विश्वस्तं भ्रातरं राज्यवर्द्धनं स्वालयं नीत्वा छद्मना तद्विनाशकारिणं शशाङ्कं नाम गौडाधिपं वीरो हर्षो व्यापादितवानिति सूचितम्। विस्रब्धघातदोषनवतरुभङ्गरूपधर्म्ययोः सादृश्यलक्ष्मीरुल्लसत्यनेन उपमालङ्कृतिः। आर्या वृत्तम् ॥ २ ॥

(१) अथेति।—"अथ" इत्यादौ "देवो हर्षः…मौलेन अकालि आत्मानं वेद्यमानमद्राक्षीत्" इत्युत्तरेणान्वयः। प्रथमेति।—प्रथमम्—आद्यं, प्रेतपिण्डं—पितृभ्यो देयमन्नपिण्डं, भुङ्क्ते—खादति इति तथाभूते, द्विजन्मनि—ब्राह्मणे, अयदानीये इति भावः, भुक्ते—भुक्तमस्यास्तीति भुक्ते तस्मिन्, प्रेतपिण्डं भुक्तवतीत्यर्थः, प्रेतस्य पारलौकिककार्ये महाब्राह्मणानामेव प्रथमसमर्चायाः विधिबद्धत्वात् इत्याशयः। उद्वेजनीयेषु—उद्वेगजननेषु, अशौचदिवसेषु—दशाहे इत्यर्थः, "शुध्येत् विप्रो दशाहेन द्वादशाहेन भूमिपः" इति स्मरणात्।

(२) चक्षुर्दाहेति।—चक्षुषोः,—नेत्रयोः, दाहः,—ज्वलनमित्यर्थः, तं ददाति—जनयतीति तथोक्ते; ["सुप्यजातौ—" (३।२।७८ पा०) इत्यादिना ताच्छील्ये णिनिः] दर्शनेन पितृशोकोद्दीपनात् अतीव व्यथाजनके इति भावः।

(३) शयनेति।—शय्या, आसनं—पीठं, चामरं—व्यजने, आतपत्रं—छत्रं, वस्त्राणि—वसनानि, ["आतपत्रवस्त्र—" इत्यत्र "आतपत्रामच—" इति

निकटोपकरणकलापे, (४) नीतेषु तीर्थस्थानानि सह जनहृदयैः कौकसेषु, (५) कल्पितशोकशल्ये सुधानिचयचिते चिताचैत्यचिह्ने, (६) वनाय विसर्जिते च महाजिजिति राजगजेन्द्रे, क्रमेण मन्देषु आक्रन्देषु, विरलीभवत्सु च विलापेषु,

पाठे,—अमत्राणि—पात्राणि, राजव्यवहृतसौवर्णभाजनादीनीत्यर्थः, "पात्रामत्रञ्च भाजनम्" इत्यमरः] पत्राणि—वाहनानि, रथाश्वशिबिकादीनि इति यावत्, ("पत्रं वाहनपत्त्रयोः" इत्यमरः) शस्त्राणि—तलवार्य्यादीनि, एतानि आदीनि यस्य तस्मिन्, ["शेषाद्विभाषा" (५।४।१५४ पा०) इति समासान्तः पाक्षिकः कप्]। नृपेति।—नृपस्य—राज्ञः, निकटानि—सततसन्निहितानि, उपकरणानि—परिच्छदाः, तेषां कलापः,—समूहः तस्मिन्। द्विजेभ्यः,—ब्राह्मणेभ्यः, दीयमाने—समर्प्यमाणे।

(४) कौकसेषु—अस्थिषु, ("कौकसं कुल्यमस्थि च" इत्यमरः) जनानां—लोकानां, हृदयैः,—चित्तैः, सह—सार्द्धं, तीर्थस्थानानि—गङ्गादीनि, नीतेषु—प्रापितेषु।

(५) कल्पितेति।—कल्पितं—जनितं, शोकशल्यं—शोकः,—मन्युः, शल्यं—शङ्कुः, अस्त्रविशेष इवेत्यर्थः, मर्म्मपीड़ाकरत्वादिति भावः, येन तादृशं, दर्शनमात्रेण शोकोद्दीपके इति यावत्, चिताचैत्यचिह्ने—चितायां—शवदाहार्थकाष्ठचुल्ल्यां, तदुपलक्षितस्थाने वा, चैत्यस्य—दाह्यस्य, आयतनस्य वा, ("चैत्यमायतनं तुल्ये" इत्यमरः,) चिह्ने—लक्ष्म, भस्मादिकं स्मारकरूपक्षेत्यर्थः, तस्मिन्, सुधानिचयेन—चूर्णद्रवसमूहेन, चिते—व्याप्ते, लिप्ते इत्यर्थः, सुधाविधौते कृते इति भावः ; यद्वा,—चिताचैत्यचिह्ने—चितायां—चितोपरि शवदाहस्थाने इत्यर्थः, यत् चैत्यं—चित्यमेव चैत्यं, मृतकचैत्यमित्यर्थः, ("चित्यं मृतकचैत्ये स्यात्" इति मेदिनी) शवदाहस्थानोपरि मृतस्य स्मरणार्थम् आयतनविशेषः इति यावत् ; तदेव चिह्नं—मृतस्य ज्ञापकविशेषः तस्मिन्, सुधानिचयचिते—चूर्णलेपेन धवलीकृते इत्यर्थः ; यद्वा,—चिताचैत्यचिह्नं—स्मारकनवारोपितास्त्रत्वक्चादिकं तस्मिन्, सुधानिचयचिते—तन्मूलदेशमिष्टकया आवेष्य दत्तचूर्णलेपे इत्यर्थः।

(६) महाजिजिति—उत्कटसङ्ग्रामजेतरि, राजगजेन्द्रे—राज्ञः,—प्रभाकरवर्द्धनस्य, गजेन्द्रे—करिश्रेष्ठे, वाहनभूते इति भावः, वनाय—अरण्याय, विसर्जिते—प्रेषिते, बन्धनविमुक्तीकृते इत्यर्थः ; शोकजनकत्वेन द्रष्टुमशक्यत्वादिति भावः। ["विसर्जिते च"इत्यत्र पुस्तकान्तरे "विसर्जिते" इति चकारहीनः पाठो दृश्यते। "क्रमेण"

(७) विश्राम्यति अश्रुणि, शिथिलीभवत्सु श्वसितेषु, अविस्पष्टेषु हाकष्टाक्षरेषु, (८) उत्साद्यमानासु च व्यसनशय्यासु, उपदेशश्रवणाक्षमेषु श्रोत्रेषु, (९) अनुरोधावधानयोग्येषु हृदयेषु, गणनीयेषु नृपगुणेषु, प्रदेशवृत्तिताम् आश्रयति शोके, (१०) क्रुतेषु कविरुदितकेषु, जाते च स्वप्नावशेषदर्शने हृद-

इत्यत्र "क्रमेण च" इति चकारयुतश्च पाठान्तरम्]। आक्रन्देषु—रोदनेषु, मन्देषु—शिथिलीभूतेषु, विलापेषु—खेदवचःसु, विरलीभवत्सु—ह्रासं गच्छत्सु; कालात्यये शोकस्य क्रमाद्ह्रासात् इति भावः।

(७) अश्रुणि—नेत्रवारिणि, विश्राम्यति—विरमति। श्वसितेषु—दीर्घनिश्वासेषु, शिथिलीभवत्सु—मन्दीभवत्सु। अविस्पष्टेषु—अनुच्चेषु, प्रायेण अश्रुतेषु इत्यर्थः, हाकष्टाक्षरेषु—हाकष्टम् इति वर्णेषु।

(८) व्यसनशय्यासु—मृतशय्यासु, यासु राजा मृतः, यासु वा पुरा राज्ञा शायितं तासु इत्यर्थः, मरणान्तरमशौचकालिकस्खलनशय्यासु कम्बलान्तरणादिषु इति वा, उत्साद्यमानासु—अपसार्यमाणासु; यद्वा,—व्यसनशय्यासु—व्यसनेविपदि, राज्ञः पीडाकाले इत्यर्थः, याः शय्याः,—शयनीयाः, शोकावसन्नदेहतया निरन्तरं स्वजनैरध्यासिताः शय्या इति यावत्, तासु. उत्साद्यमानासु—अपनीयमानासु; शोकशय्यां विहाय पुनः स्वकर्मणि प्रवृत्तेषु परिजनेषु इति भावः। श्रोत्रेषु—श्रवणेन्द्रियेषु, उपदेशश्रवणाक्षमेषु—उपदेशग्रहणयोग्येषु इत्यर्थः; अविमनायमानेषु जनेषु इति भावः।

(९) हृदयेषु—चेतःसु। अनुरोधेति।—अनुरोधेन—निर्बन्धेन, आयत्तेत्यर्थः; यद्वा,—अनुरोधे—अनुवर्त्तने, कस्यचित्प्रार्थितेष्टसम्पादनेच्छायाम्, ("अनुरोधोऽनुवर्त्तनम्" इत्यमरः) अवधानं—मनोयोगः, तस्य योग्यानि—उचितानि तेषु। नृपगुणेषु—राजगुणेषु, गणनीयेषु—सङ्ख्येयेषु, अङ्गनीयेषु इत्यर्थः, मरणानन्तरमत्यधिकशोकावेशेन विस्मृतेः मृतस्य गुणानामगणयता क्रियते, क्रमेण शोकक्लेशेऽनायासगणयता इति भावः। शोके—शुचि, प्रदेशवृत्तितां—शयनवस्त्रादिरूपदेशविशेषनिष्ठताम्, आश्रयति—अवलम्बमाने; क्वचित् किमपि दृष्ट्वा श्रुत्वा वा मृतस्य स्मरणात् सञ्जातशोके शोके इति भावः।

(१०) कविरुदितकेषु—कवेः,—काव्यरचयितुः रुदितानीव, रुदितकानि—रोदनानि, रोदनवर्णनानि इति भावः, तेषु, क्रुतेषु, जनैरिति शेषः; जनानां रुदितं

यावशेषस्थाने चित्रावशेषाकृतौ काव्यावशेषनाम्नि नरनाथे, देवो हर्षः कदाचित् (११) उत्सृष्टव्यापारः पुञ्जीभूतहृद्यबन्धुवर्गाग्रेसरेण अवनतमूकमुखेन महाजनेन मौलेन अकाले आत्मानं वेष्ट्यमानम् अद्राक्षीत्।

दृष्ट्वा च अकरोत् मनसि,—(१२) "किमन्यत् आर्य्यम् आगतम् आवेदयति अयं शोकपराभूतो (१३) लोकाकरः ?"

यथा सहृदयादस्य कोऽपि नावबुध्यते, नापि वा तदितरेषां मनसि समुदेति, तथाकवयाविलपितेषु राज्ञः गुणग्राहिषु अतीवालरङ्गजनेषु प्रायशः समुदयमानेषु इति तात्पर्य्यम्; यद्वा,—कविभिः, अस्माभिरिवेति ध्वनिः, रुदितकेषु—रोदनेषु, स्वकाव्येषु मृतराजविषयकरोदनोद्दीपकप्रबन्धेषु इत्यर्थः, क्लृप्तेषु—विरचितेषु; यद्वा,—कविभिः,—प्राज्ञैः, रुदितकेषु—क्रन्दनेषु, क्लृप्तेषु—पठ्यमानेषु, सङ्कोचं नीतेषु इत्यर्थः; जातस्य हि ध्रुवो मृत्युः इति विचार्य्य इति भावः। नरनाथे—राज्ञि। स्वप्नावशेषदर्शने—कदाचित् स्वप्नावस्थामात्रदर्शनीये; कथामात्रशेषतां गते इति तात्पर्य्यम्; हृदयावशेषस्थाने—केवलं हृदयमात्रवासिनि इत्यर्थः; चाक्षुषप्रत्यक्षाभावात् इति भावः। चित्रावशेषाकृतौ—आलेख्यमात्रस्थितमूर्त्तौ, काव्यावशेषनाम्नि—काव्यमात्रस्थितनामधेये। जाते—हते सति, ["यस्य भावेन—" (२।३।३७ पा०) इत्यादिना भावे सप्तमी]।

(११) उत्सृष्टव्यापारः,—सत्यङ्कराजकार्य्ये इत्यर्थः। पुञ्जीभूतेति।—पुञ्जीभूतः,—समवेतः, हृद्यः,—प्रवयाः, बन्धुवर्गः,—स्वजनसमूहः, तस्य अग्रेसरः,—पुरोवर्त्ती तेन। अवनतमूकमुखेन—अधोमुखनिलम्बवदनेन, मौलेन—मूलाधानेन, वंशपरम्परागतेन इति यावत्, महाजनेन—सम्भ्रान्तजनगणेन, वेष्ट्यमानं—परिवार्य्यमाणम्, आत्मानं—स्वम्।

(१२) आर्य्यं—ज्येष्ठं भ्रातरम्, आगतम्—उपस्थितम्, अन्यत्—विना, किम् आवेदयति ?—निवेदयति ? आर्य्यागमनवार्त्तां विना एवंविधे अनुचितसमये किं कथयितुम् आगच्छति ? आर्य्य एव समागत इति सम्भावयामीति निष्कर्षः। शोकपराभूतः,—शोकेन विह्वलितः।

(१३) लोकाकरः,—शोकसमूहः, ["शोकाकरः" इत्यत्र "लोकोत्करः" इति पाठे उत्करशब्दस्य लक्षणया समूहार्थकत्वेन स एवार्थः]।

इति (१४) वेपमानहृदयश्च पप्रच्छ प्रविशन्तम् अधिकतरप्रचारम् अन्यतमं पुरुषम्,—"अङ्ग ! कथय किमार्य्यः प्राप्तः ?" इति । स मन्दम् अब्रवीत्,—"देव ! यथाऽऽदिशसि, हारि" इति श्रुत्वा च (१५) सौदर्य्यस्नेहनिर्हितनिरतिशयमन्युमृदूकृतमनाः कथमपि न ववाम वाष्पवारिप्रवाहोत्पीड़ेन सह जीवितम् ।

(१६) अनन्तरञ्च द्वारपालमुक्तेन प्रथमप्रविष्टेन परिजनेन

(१४) वेपमानहृदयः,—कम्पमानवक्षाः ; चिरात् प्रवासप्रत्यागतप्रियदिदृक्षोर्हृदयेन, किं वाऽन्यदेते अशुभं कथयिष्यन्ति इत्युद्वेगेन वा इति भावः । अधिकतरप्रचारम्—अधिकतरः,—अतित्वरित इत्यर्थः, प्रचारः,—गतिर्यस्य तथाभूतम् । अङ्ग इति सम्बोधनम् । मन्दं—शनैः, अनुच्चैरिति यावत् । यथा—यदित्यर्थः, आदिशसि—आज्ञापयसि, कथयसीत्यर्थः, अनुमिनोषीति यावत्, तथेति शेषः, आर्य्यः प्राप्त इति भावः । हारि—हारदेशे, वर्त्तते इति शेषः ।

(१५) सौदर्य्येति ।—सौदरस्य—सहोदरस्य अयं सौदर्य्यः, यः स्नेहः,—प्रणयातिशयः ; यद्वा,—समाने उदरे भावितः सौदर्य्यः,—भ्राता, ["सौदराद्यः" (४।४।१०९ पा०) इति यप्रत्ययः] तस्मिन् यः स्नेहः,—भक्त्युत्कर्षः, तेन निर्हितः,—जनितः, निरतिशयः,—अत्यन्तः, मन्युः, —शोकः, पितृमरणज इति भावः, "स्वजनस्य हि दुःखमयतो विदृतद्वारमिवोपजायते" इति कुमारसम्भवे कालिदासः । तेन मृदूकृतं—मन्दीकृतम्, आर्द्रीकृतमित्यर्थो वा, मनः,—चित्तं यस्य तथाभूतः, अतिविरसचित्त इत्यर्थः, विगलितहृदय इत्यर्थो वा, कथमपि—अतिकृच्छ्रेणेत्यर्थः । वाष्पेति ।—वाष्पवारीणां—नेत्रजलानां, प्रवाहेण—स्रोतसा, अविरतप्रवृत्तनेत्रजलेनेत्यर्थः, यः उत्पीड़ः,—पीड़नं तेन । जीवितं—जीवनं, न ववाम—न उज्झामार ; कथमपि जीवनं दधारेति भावः । इह वाष्पवारिषु प्रवाहत्वाध्यवसायेन उक्तिप्रसिद्धिमतिक्रान्ततया अतिशयोक्तिरलङ्कृतिः इति सङ्क्षेपः ।

(१६) "अनन्तरम्" इत्यादौ "ज्येष्ठं भ्रातरमप्रच्छत्" इत्यनेन सम्बन्धः । तं विशिनष्टि, द्वारेत्यादि ।—द्वारपालैः,—दौवारिकैः, मुक्तेन—त्यक्तेन, त्यक्तमार्गेणेति यावत् ; यद्वा,—द्वारपालमुक्तेन—दौवारिकाकृष्टनिःसृतेनेत्यर्थः, द्वारपालकृतेनेति यावत् ; पूर्वं प्रायशः तेषामेव दर्शनयोगात् इति भावः ।

इव आक्रन्देन कथ्यमानं, (१७) दूरद्रुतागमनमुषितबाहुल्येन विच्छिन्नच्छत्रधारिणा लम्बिताम्बरवाहिना (१८) भ्रष्टभृङ्गार-ग्राहिणा च्युताचमनधारिणा ताम्यत्ताम्बूलिकेन (१९) खञ्जत्-खड्गग्राहिणा कतिपयप्रकाशदासेरकप्रायेण (२०) बहुवासरान्त-रितस्नानभोजनशयनश्यामच्छामवपुषा परिजनेन परिवृतम्,

आक्रन्देन—रोदनध्वनिना, कथ्यमानम्—आगतो राज्यवर्द्धन इति निवेद्य-मानम्।

(१७) दूरेति।—दूरात्—दीर्घमार्गादित्यर्थः, द्रुतागमनेन—शीघ्रोपस्थित्या, मुषितं—विप्रलब्धं, त्यक्तमिति यावत्, बाहुल्यं—समवायः यत्र तेन, अल्पसङ्ख्यकेन इत्यर्थः। विच्छिन्नच्छत्रधारिणा—अतिक्रान्तच्छत्रधारिपुरुषेण, पश्चात्कृतच्छत्रधारिणे-त्यर्थः। लम्बिताम्बरवाहिना—लम्बितं—वेगागमनात् स्खलितमित्यर्थः, अम्बरं—वसनं, वहति—धत्ते इति तथोक्तेन।

(१८) भ्रष्टेति।—भ्रष्टः,—दूरपतितः, भृङ्गारयाही—कनकालुकापरपर्या-यकजलपात्रविशेषवाही यत्र तेन; ["भृङ्गारभृङ्गारौ" (उ० ३ पा० १३६ सू०) इति भृञः आरन्नुम् गुक् ङ्वे च रूपम्। "भृङ्गारः कनकालुका" इत्यमरः]। च्युतेति।—च्युतः,—स्खलितः, पथि स्थितः इति यावत्, आचमनधारी—आचमनार्थजल-याही यत्र तेन। ताम्यत्ताम्बूलिकेन—ताम्यन्—वेगमत्या क्लिश्यन्, ताम्बूलिकः,—ताम्बूलदायी ताम्बूलयाही वा यत्र तेन।

(१९) खञ्जदिति।—खञ्जन्—द्रुतगमनेन विकलचरणः, खड्गयाही—असि-वाही यत्र तेन। कतिपयेति।—कतिपये—अल्पे, प्रकाशाः,—अल्पत्वतत्वात् दृश्य-माना इत्यर्थः, ये दासेरकाः,—उष्ट्राः, ["मूलेरादयः" (उ० १ पा० ६२ सू०) इति दासतेः एरक्, ततः कन्]; यद्वा,—प्रकाशाः,—सुज्ञेयाः, पादचारित्वात् सुज्ञेया इति भावः, ये दासेरकाः,—दासीपुत्राः, ["क्षुद्राभ्यो वा" (४।१।१३१ पा०) इति ट्रक्, ततः कन्] ("दासेरकस्तु करभे दासीपुत्रे च धीवरे" इति मेदिनी) तेषां प्रायः,—बाहुल्यं यस्मिन् तेन।

(२०) बहुरिति।—बहूनि—अनेकानि, वासराणि—दिवसान् व्याप्येत्यर्थः, अन्तरितेन—व्यवहितेन, परित्यक्तेन वा, अवज्ञातेनेत्यर्थः, स्नानेन—आप्लवेन, भोजनेन—आहारेण, शयनेन—निद्रया च, श्यामं—मलिनं, छामं—शीर्णञ्च, वपुः,—शरीरं यस्य तेन। परिजनेन—पार्श्वचरेण जनेन, परिवृतं—परिवेष्टितम्।

(२१) अविरलमार्गधूलिधूसरितशरीरतया शरणीकृतमिव अशरणया क्रमागतया वसुन्धरया, (२२) क्षणनिर्जयसमरशरव्रणबद्धपट्टकैः दीर्घधवलैः समासन्नराज्यलक्ष्मीकटाक्षपातैः इव शवलीकृतकायम्, (२३) अवनिपतिप्राणपरित्राणार्थमिव च शोकहुतभुजि हुतमांसैः अतिकृशैः अवयवैः आवेद्यमानदुःखभारम्, (२४) अपगतचूडामणिनि मलिनाकुलकुन्तले शेखरशून्ये शिरसि शुचम् आरूढां मूर्त्तिमतीम् इव दधानम्,

(२१) अविरलेति ।—अविरलाभिः,—सान्द्राभिः, मार्गधूलिभिः,—अध्वरजोभिः, धूसरितम्—दूषित्वाच्छ्भूतं, विवर्णमित्यर्थः, शरीरं—देहः यस्य तस्य भावः तत्ता तया हेतुना, अशरणया—अनाश्रयया, क्रमागतया—वंशपरम्परागतया, वसुन्धरया—पृथ्व्या, शरणीकृतमिव—अशरणं शरणं कृतमिव, आश्रितमिवेत्यर्थः ।

(२२) क्षणेति ।—क्षणानां—तज्जातीयानां क्षत्रियाणां, निर्जयाय—निःशेषं विजयाय, यः समरः,—सङ्ग्रामः, तस्मिन् शरैः,—शरप्रहारैः इत्यर्थः, ये व्रणाः,—क्षतानि, तेषु बद्धानि—सन्नद्धानि, पट्टकानि—"पट्टी" इति वङ्गभाषया प्रसिद्धानि तैः, दीर्घधवलैः,—आयतश्वेतैः ; कटाक्षपातोऽपि दीर्घधवलो ज्ञेयः । समासन्नेति ।—समासन्ना—समुपस्थिता, या राज्यलक्ष्मीः, तस्याः कटाक्षपाताः,—अपाङ्गवीक्षणानि तैरिव, शवलीकृतकायं—चित्रितशरीरम् । इह व्रणपट्टकेषु राजलक्ष्मीकटाक्षपातसम्भावनया उत्प्रेक्षया तद्गुणो व्यज्यते इति सङ्केपः ।

(२३) अवनीति ।—अवनिपतेः,—राज्ञः, पितुरिति भावः ; प्राणानां—जीवनस्य, परित्राणार्थम् इव—परिरक्षणार्थम् इव, शोकहुतभुजि—शोकाग्नौ, हुतमांसैः,—हुतानि मांसानि—पिशितानि येषां तैः, अत एव अतिकृशैः,—अतिक्षीणैः, अवयवैः,—अङ्गैः । आवेद्यमानेति ।—आवेद्यमानः,—ज्ञाप्यमानः, दुःखभारः,—शोकातिशय्यमिति यावत्, येन तं, क्षीणदेहानुमेयदारुणयत्नलक्षणमित्यर्थः ।

(२४) अपगतेति ।—अपगतः,—अपनीतः, चूडामणिः,—शिरोरत्नं यस्मात् तथाभूते । मलिनाकुलकुन्तले—मलिनाः,—मलदिग्धाः, रूक्षा इति यावत्, आकुलाः,—विस्रस्ताः, कुन्तलाः,—केशाः यत्र तादृशे । शेखरशून्ये—उष्णीषवर्जिते, रत्नदामाबद्धकिरीटवर्जिते इति यावत् ; आपीडवर्जिते वा, मान्यविरहिते इत्यर्थः, ("शिरोदामापीडशेखरौ" इति मान्यविवरणे अमरः) । शुचं—शोकम् । आरूढाम्

(२५) आतपगलितस्वेदराजिना कृदता इव पितृपादपतनोत्कण्ठितेन ललाटपट्टेन लक्ष्यमाणं, (२६) प्रथीयसा वाष्पपयःप्रवाहेण अभिमतपतिमरणमूर्च्छितामिव महीम् अनवरतं सिञ्चन्तम्, (२७) अनन्तसन्ततास्रुप्रवाहनिपतननिम्नीकृतौ इव दुःखक्षामौ कपोलौ उद्वहन्तम्, (२८) अत्युष्णमुखमारुतमार्गगतेन द्रवता इव गलिततताम्बूलरागेण अधरबिम्बेन उपलक्षितं,

—आश्रिताम् ; सवर्णेषु सर्व्वानुरागसिद्धेः प्रायो दर्शनात् इत्याशयः, केशानां कार्ष्ण्यं प्रत्यक्षमेव, श्लोकस्य तु "कार्ष्ण्यश्वाकीर्त्त्यघादिषु" इति कविसमयसिद्धत्वादिति ज्ञेयम्। मूर्त्तिमतीं—साक्षाद्दृश्यमानाम्। दधानं—धारयन्तम्।

(२५) आतपेति।—आतपेन—सूर्य्यमयूखेन, गलिता,—निःसृता, स्वेदराजिः,—घर्मपरम्परा यस्मात् तथोक्तेन, कृदता इव—अश्रूणि मुञ्चता इव। पितृपादेति।—पितुः,—जनकस्य, पादपतनार्थं—चरणे प्रणिपातनिमित्तम्, उत्कण्ठितेन—उद्विग्नेन, ललाटपट्टेन—भालतटेन, [करणे तृतीया] लक्ष्यमाणं—दृश्यमानम्।

(२६) प्रथीयसा—अतिविस्तृतेन, अतिप्रबलेनेत्यर्थः, वाष्पपयःप्रवाहेण—अश्रुस्रोतसा इत्यर्थः। अभिमतेति।—अभिमतस्य—इष्टस्य, पत्युः,—भर्तुः, राज्ञ इति भावः; मरणेन—मृत्युना, मूर्च्छितामिव—नष्टचेतनामिव, महीं—पृथिवीम्, अनवरतम्—अविच्छिन्नं यथा तथा, सिञ्चन्तं—वर्धन्तम्; मूर्च्छापनोदनार्थं नीरनिषिञ्चनस्य शास्त्रलोकसम्मतत्वात् इति भावः।

(२७) अनन्तेति।—अनन्तेन—प्रभूतेन इत्यर्थः, सन्ततेन—विस्तृतेन, अविच्छिन्नेन इत्यर्थः, अश्रुप्रवाहनिपतनेन—वाष्पस्रोतोनिर्गमनेन, निम्नीकृतौ इव—निम्नतां नीतौ इव, उच्चस्थानपतज्जलं स्थलमपि निम्नीभवति, दुःखक्षामौ—दुःखेन क्षीणौ, कपोलौ—गण्डदेशौ, उद्वहन्तं—धारयन्तम्।

(२८) अत्युष्णेति।—अत्युष्णस्य—अतिसन्तप्तस्य, श्लोकवेगादिति भावः; मुखमारुतस्य—प्रश्वासस्य, मार्गं—पन्थानं, गतः,—प्रचलितः तेन, द्रवता—द्रवीभूतेन; सन्तापयोगादिति भावः; गलिततताम्बूलरागेण इव—गलितः,—प्रच्युतः, ताम्बूलस्य—पर्णवल्लस्य, रागः,—लौहित्यं यस्मात् तथाभूतेन इव। अधरबिम्बेन—बिम्बफलामिनोष्ठेन, उपलक्षितं—युक्तम्; आरक्तोष्ठमिति भावः; यद्वा,—द्रवता—पलायमानेनेव, सन्तापभयादिति भावः। गलितेति।—गलितः,—भ्रष्टः, विरहित इत्यर्थः,

(२९) पविरिकामात्रावशेषेन्द्रनीलिकांशुश्यामायमानम् अचिरश्रुतपितृमरणमहाशोकाग्निदग्धमिव श्रवणपाशम् उद्वहन्तम्, (३०) अस्फुटाभिव्यक्तव्यञ्जनेन अपि अधोमुख-स्तिमित-नयन-नील-तारक-मयूख-माला-खचितेन शोकप्ररूढश्मश्रुश्यामलेन इव मुखश्रिया लक्ष्यमाणं, (३१) केशरिणम् इव महाभूभृद्-दिनिपातविह्वलनिरवलम्बनं, दिवसमिव तेजःपतिपतनपरि-

ताम्बूलरागः,—पर्णभक्षणजनितरक्तिमा इति यावत्, यस्मात् तथाभूतेन; पितृशोकात् त्यक्ताम्बूलेन विवर्णेन इति भावः।

(२९) पविरिकेति।—पविरिकामात्रं—विगुद्धतामात्रम्, उज्ज्वलतामात्रमित्यर्थः, न तु अलङ्कारार्थमिति भावः, अवशेषः यस्याः तथाभूता, या इन्द्रनीलिका—नीलकान्तमणिविशेषः, तस्या अंशुभिः,—किरणैः; दुःखातिरेकात् कर्णभूषणानामपसारणेऽपि इन्द्रनीलमणिमात्रावशेषतया तदुद्भूतैरिति भावः; श्यामायमानं—श्याममिव आचरन्तम्; अत एव अचिरेति।—अचिरश्रुतस्य—अल्पदिनमाकर्णितस्य, पितृमरणस्य—जनकात्ययस्य, महाशोकाग्निना—प्रबलमन्युवह्निना, दग्धमिव—भस्मीभूतमिव, श्रवणपाशं—शोभनकर्णं, ["पाशः केशादिपूर्व्वः स्यात्तत्कर्णे कर्णपूर्व्वकः। सुकर्णे च..... ॥" इति मेदिनी। "श्रवणपाशम्" इत्यत्र "श्रवणप्रदेशम्" इति पाठान्तरम्]। उद्वहन्त—दधानम्।

(३०) अस्फुटेति।—अस्फुटम्—अस्पष्टम्, ईषदित्यर्थः, अभिव्यक्तं—प्रकाशितं, व्यञ्जनं—लक्षणं, श्मश्रु इति यावत्, यत्र तथाभूतेनापि। अधोमुखेति।—अधोमुखयोः,—अवनतयोः, स्तिमितयोः,—निश्चलयोः, नयनयोः,—चक्षुषोः, नीलानां—कृष्णानां, तारकमयूखानां—तारांशूनां, तारकमयूखानामिव तारकमयूखानाम् इति निदर्शना; मालया—परम्परया, खचितः,—व्याप्तः तेन; अत एव शोकेति।—शोकेन—शुचा, प्रकृढ़—सञ्जातं, प्रवृद्धमित्यर्थः; चौरकर्म्माभावादिति भावः; यत् श्मश्रु—कूर्चं, मुखलोम इति यावत्, तेन श्यामलः,—सकलङ्क इति यावत्, तेन। मुखश्रिया—वदनचन्द्रेण, [करणे तृतीया] लक्ष्यमाणं—दृश्यमानम्।

(३१) केशरिणमिव—सिंहमिव। महेति।—महान्—पराक्रान्त इत्यर्थः, उन्नतश्च; भूभृत्—राजा, गिरिश्च; तस्य विनिपातेन—विध्वंसेन, एकत्र,—अन्यत्र,

म्लानश्रियं श्यामीभूतं, नन्दनम् इव भग्नकल्पपादपं विच्छायं, दिग्भागमिव प्रोषितदिक्कुञ्जरशून्यं, गिरिम् इव गुरुवज्रपातदारितं कम्पमानं, (३२) क्रीतमिव कृशिम्ना, किङ्करीकृतमिव कारुण्येन, दासीकृतमिव दौर्मनस्येन, श्रिष्यीकृतमिव शोचितव्येन, (३३) आत्मीकृतमिव आधिना, मूकीकृतमिव मौनेन, पिष्टमिव पीड़या, खिन्नमिव सन्तापेन, उञ्चितमिव चिन्तया, लुप्तमिव विलापेन, धृतमिव वैराग्येण, प्रत्याख्यातमिव प्रतिसङ्ग्या-

---

अन्यत्र,—पतनेन इत्यर्थः; विह्वलं—व्याकुलं, निरवलम्बनं—निराश्रयञ्च। दिवसमिव—वासरमिव। तेज इति।—तेजःपतेः,—प्रतापवतो राज्ञः, सूर्यस्य च; पतनेन—नाशेन, अस्तगमनेन च; परिम्लाना—मलिना, श्रीः,—शोभा यस्य तम्; अत एव श्यामीभूतं—मलिनकायम्, अन्धकारमयीभूतञ्च। नन्दनमिव—देवोद्यानमिव, भग्नकल्पपादपं—भग्नः,—विनष्ट इत्यर्थः, कल्पपादपः,—कल्पवृक्षवत् मनोरथपूरकः पिता यस्य तं, भग्नकल्पतरुञ्च; अत एव विच्छायं—विगतप्रभं, छायाशून्यञ्च। प्रोषितेति।—प्रोषितः,—विनष्टः, प्रवासं गतश्च, दिक्कुञ्जरः,—दिग्गजवत् बली पिता, दिग्गजश्च; तेन शून्यः,—विरहितः तम्। गुर्व्विति।—गुरुः,—पिता, वज्र इव—कुलिशमिव; शत्रुदारकत्वादिति भावः; तस्य पातेन—नाशेन; अत्यन्त,—गुरुणा—महता, वज्रपातेन—कुलिशपतनेन, दारितं—पाटितम्, अत एव कम्पमानं—वेपमानम्। मालोपमाऽलङ्कारः।

(३२) क्रशिम्ना—कार्श्येन, क्रीतमिव—अधीनीकृतमिव, अतिकृशमित्यर्थः। कारुण्येन—शोकेन, किङ्करीकृतमिव—दासीकृतम् इव, अतिशोकातुरमित्यर्थः। दौर्मनस्येन—दुःखितमनस्कतया, दासीकृतं—भृत्यीकृतं, दुर्मनायमानमित्यर्थः। श्रिष्यीकृतमिव—अन्तेवासितां नीतमिव। शोचितव्येन—शोकेन, अतिदुःखितोकारमित्यर्थः।

(३३) आत्मीकृतमिव—आयत्तीकृतमिव। आधिना—मनःसन्तापेन; अतीव मनःपीड़ितमिति निष्कर्षः। मूकीकृतमिव—निर्वचनीकृतमिव, मौनेन—तूष्णीम्भावेन, निस्तब्धाकारमित्यर्थः। पिष्टमिव—पेषणं नीतमिव। खिन्नमिव—पक्वमिव, शोकविवर्णमित्यर्थः। उञ्चितमिव—गृहीतमिव, सदा चिन्तापरमित्यर्थः। लुप्तमिव—अदृष्टमिव। विलापेन—परिदेवितेन, अविरतमनुशोचनमित्यर्थः। धृतमिव—आश्रितमिव। वैराग्येण—निर्वेदेन; अनासक्तमिति भावः। प्रत्याख्यातमिव—

नेन, अवज्ञातमिव प्रज्ञया, (३४) दूरीकृतमिव दुरभिभवत्वेन, (३५) अबोध्येन वृद्धबुद्धीनाम्, असाध्येन साधुभाषितानाम्, अगम्येन गुरुगिराम्, अशक्येन शास्त्रशक्तीनाम्, अपथेन प्रज्ञाप्रयत्नानाम्, अगोचरेण सुहृदनुरोधानाम्, अविषयेण विषयोपभोगानाम्, अभूमिभूतेन कालक्रमोपचयानां शोकेन कवलीकृतं ज्येष्ठं भ्रातरम् अपश्यत्। (३६) आवेगोद्गतकृत्स्नस्नेहोत्कलिकाकलापोत्क्षिप्यमाणकाय इव च परवशः समुदगात्।

निराकृतमिव। प्रतिसङ्क्षानेन—विवेकिन्या मत्या; विवेकविमूढमिति भावः; अवज्ञातमिव—तिरस्कृतमिव। प्रज्ञया—बुद्ध्या, धृतधियमित्यर्थः।

(३४) दुरभिभवत्वेन—दुरपनेयत्वेन हेतुना; यद्वा,—दुः,—दुःखेन, अभिभवः,—पराजयः, तस्य भावः तत्त्वेन, दुर्जयत्वेनेत्यर्थः; दूरीकृतमिव—निराकृतमिव; सर्वाभिभवनीयाकारमिति भावः।

(३५) वृद्धबुद्धीनां—स्थविरमतीनां, प्राचीनत्वात् बहुदर्शिनीनामिति भावः; अबोध्येन—प्रबोधयितुमशक्येन इत्यर्थः। साधुभाषितानां—सज्जनवचनानां, सुहृद्वाक्यानां वा, प्राप्तवचनानामित्यर्थः, असाध्येन—अनपनेयेन। गुरुगिरां—गुरुजनवचसाम्, अगम्येन—अविषयेण, अस्थानेन इति यावत्; गुरुजनप्रबोधवचसामपि अशक्यनीहेनेति भावः। शास्त्रशक्तीनां—शास्त्रज्ञानानामिति यावत्, अशक्येन—असाध्येन; शास्त्रतत्त्वज्ञानसद्भावेऽपि धैर्यस्खलनं प्रतिपादयतीति भावः। अपथेन—अविषयेण, प्रज्ञाप्रयत्नानां—प्रज्ञायाः,—बुद्धेः, प्रयत्नानां—प्रयासानाम्; विशिष्टज्ञाने सत्यपि अधैर्यं वर्धयता इति भावः। अगोचरेण—अचिन्तेन; बन्धुजनानुरोधेनापि अनपगच्छता इति भावः। अविषयेण—अगोचरेण। विषयोपभोगानां—सकुचन्दनवनितादुपसेवनानुरागाणां, विषयसङ्गे अनासक्तिं जनयता इत्यर्थः। कालक्रमेति।—कालक्रमेण—समयानुसारेण, ये उपचयाः,—वृद्धयः तेषाम्, अभूमिभूतेन—अनास्पदेन; कालवशेन समुदितः शोकः तादृक् हृदयविदारकः न भवति, यादृक् सपदि प्रवर्धितः इति तात्पर्यम्; सद्य एव प्रवर्धमानेन, न तु कालक्रमेण उपचयं गच्छता इति वा भावः। कवलीकृतं—ग्रस्तम्।

(३६) आवेगेति।—आवेगेन—सम्भ्रमेण, उद्गताः,—उद्गताः, कृत्स्नाः,—समग्राः, स्नेहः,—प्रेमा, तेन य उत्कलिकाकलापः,—उत्कण्ठातिशयः, तेन उत्क्षिप्यमाणः,—

अथ दूरादेव (३७) दृष्ट्वा देवो राज्यवर्द्धनः चिरकालकलितं वाष्पवेगं मुमुक्षुः सुदूरप्रसारितेन सङ्कल्पयन् इव सर्व्वदुःखानि दीर्घेण दोर्दण्डद्वयेन गृहीत्वा कण्ठे मुक्तकण्ठं पुनः पतितचौमे चामे वक्षसि, पुनः कण्ठे, पुनः स्कन्धभागे, पुनः कपोलोदरे निधाय तथा तथा रुरोद, यथा सबन्धनानि इव उदपाट्यन्त हृदयानि। (३८) स्मृतनृपतिना राजवल्लभेनापि प्रतिशब्दनिभेन निर्भरमिव अरुद्यत। सुचिराच्च कथङ्कथमपि निर्हृष्टनयनजलः पर्जन्य इव शरदि स्वयमेव उप-

---

ऊर्द्धं नीयमानः, उत्थाप्यमान इत्यर्थः, कायः,—दृष्टः यस्य तथाभूत इव, परवशः,—विह्वलः, समुदगात्—समुत्तस्थौ, समुज्जगाम वा।

(३७) दृष्ट्वा, हर्षमिति शेषः। चिरकालेति।—चिरकालकलितं—चिरधृतं, चिरनिरुद्धमिति यावत्, वाष्पवेगम्—अश्रुभरं, मुमुक्षुः,—त्यक्तुमिच्छुः,["सनाशंसभिक्ष उः" (३।२।१६८ पा०) इति सन्नन्तादुप्रत्ययः] सुदूरात्—बहुदूरादेव, प्रसारितेन—विस्तारितेन, दीर्घेण—महता, आयतेनेत्यर्थः, दीर्घदण्डद्वयेन—बाहुदण्डयुगलेन। सर्व्वदुःखानि—पितृशोकजनितसन्तापमूर्च्छान्, सङ्कल्पयन्निव—चिन्तयन्निव। मुक्तकण्ठम्—उच्चैरित्यर्थः। पतितचौमे—पतितं—स्खलितं, चौमं—पट्टोत्तरीयं यस्मात् तथाभूते। चामे—चीने। निधाय—संस्थाप्य, हर्षमिति शेषः, हर्षस्य वक्षःस्थलादौ स्खलनं संस्थाप्य इति वा। सबन्धनानि इव—सन्धिबन्धनानि इव, सन्धिबन्धनसहितानि इव इत्यर्थः। उदपाट्यन्त—उच्छेदं प्राप्तानि इत्यर्थः; स्वयमेवाच्छिद्यन्त इति भावः, [पाटयतेः कर्म्मकर्त्तरि रूपम्]।

(३८) स्मृतेति।—स्मृतः,—ज्ञानविषयतां नीतः, कृतस्मरण इत्यर्थः, नृपतिः,—राजा, प्रभाकरवर्द्धन इति यावत्, येन तथाभूतेन, नृपतिं स्मरतेत्यर्थः। राजवल्लभेन—मृतस्य राज्ञः प्रियजनेन; का कथा वल्लभजनस्य, सर्व्वैरपि अविशेषेण इत्यपकारार्थः। प्रतिशब्दनिभेन—प्रतिध्वनिसदृशेन, राज्यवर्द्धनरोदनस्येति भावः; निर्भरमिव—अतिमात्रमिव। सुचिराच्च इति चकारेण पूर्व्ववाक्ये सम्बन्धाभावेऽपि इतः पुना राज्यवर्द्धनस्यैव सम्बन्धवत्त्वं ख्याप्यते; निर्हृष्टनयनजलः,—निःशेषं यथा तथा हृष्टानि—पातितानीत्यर्थः, नयनजलानि—नयनयोः,—नेत्रयोः, जलानि—अश्रूणि येन तथाभूतः; यद्वा,—निर्हृष्टानि नयनयोः जलानि अश्रूणि जलधरजलानीव येन [इत्युपमित-

शशाम। उपविष्टश्च (३९) परिजनोपनीतेन तोयेन तत्कर-नखमयूखपुञ्जतया महाजलह्रदजायमानफेनलेखमिव पुनः पुनः प्रमृष्टमपि (४०) पक्ष्मायसङ्गलद्बिन्दुवृन्दमन्दोन्मेषमुषित-दर्शनं कथञ्चिदम्भ्यम् अपि चक्षुरक्षालयत्। (४१) ताम्बूलिकोप-स्थापितेन च वाससा चन्द्रातपशकलेनेव हृष्यद्वाष्पदग्धं वदनम् उन्ममार्ज। तूष्णीमिव च चिरं स्थित्वा उत्थाय स्नानभूमिम् अगात्। तस्यां च स्थित्वा (४२) विभूषं विवस्त्रव्यस्तकुन्तलं मौलिम् अनादरात् निष्पीड्य, सावश्यायमन्तःस्फुरितेन जिजी-

---

समासः]। पर्जन्य इव—निःशेषनिर्दोषान्; कंचन इव, इन्द्र इव वा, सः हि वर्षणं कारयति, ("पर्जन्यो रसदश्मेन्द्रौ" इति विश्वः, ऋषभः)। उपशशाम—शान्तिं लेभे; वर्षणव्यापारात् न्यवर्त्तेत्यर्थः।

(३९) परिजनोपनीतेन—परिचारकसमुपस्थापितेन, तोयेन—जलेन। तदिति।—तस्य—राज्यवर्द्धनस्य, करनखानां—हस्तनखराणां, मयूखपुञ्जः,—किरण-राशिः, लग्नः इति भावः, यस्मिन् तस्य भावः तत्ता तया हेतुना। महेति।—महाजले—जलराशौ, नेत्रसलिले इति भावः, ह्रदेन—हृन्तरेण, जायमाना—उत्पद्यमाना, फेनलेखा—फेनराजिः यस्मिन् तथोक्तमिव। प्रमृष्टमपि—प्रक्षालितमपि।

(४०) पक्ष्मेति।—पक्ष्मभ्यां—नेत्रलोमभ्याम्, अयेभ्यः,—प्राप्तेभ्यः, सङ्गलद्भ्यः,—निःसरद्भ्यः, ये बिन्दवः,—पृषताः, ("पृषन्तिबिन्दुपृषताः पुमांसः" इत्यमरः) तेषां वृन्दैः,—समूहैः, मन्दः,—अल्पः, यः उन्मेषः,—उन्मीलनं, तेन मुषितं—हृतं, दर्शनम् —अवलोकनव्यापारः यस्य तत्। अक्षालयत्—प्रामार्जयत्; वेगवतां नेत्रप्रवाहाणां रुद्धप्रायेन दर्शनं कथञ्चित् साध्यमासीदित्याशयः।

(४१) ताम्बूलिकेन—ताम्बूलवाहिना, उपस्थापितेन—उपनीतेन, वाससा —वस्त्रेण। चन्द्रातपशकलेनेव—चन्द्रमरीचिखण्डेनेव, वितानखण्डेनेव वा, शुभ्रेण जलार्द्रतया शीतलेन चेति भावः। उष्णेन—तप्तेन, बाष्पेण—अश्रुणा, दग्धम्— उत्तप्तम्, ["उष्णबाष्पदग्धम्" इत्यत्र "उष्णीषबाष्पदग्धम्" इति पाठे,—उष्णीषेन— अतितप्तेनेत्यर्थः]। वदनं—मुखम्, उन्ममार्ज—प्रमृष्टवान्।

(४२) विभूषं—भूषारहितम्। विवस्त्रेति।—विवस्त्राः,—ऋजवः स्त्रियः इत्यर्थः,

विषता इव (४३) जलधौतसुभगम् आत्मानमपि चुचुम्बिषता इव अधरेण, क्षालितस्य चक्षुषः (४४) श्वेतिम्ना च शारदशशिकरविकसितविषदकुमुदवनदलावलिबलिविक्षेपैः इव दिग्देवताऽर्चनकर्म्म कुर्व्वाणः, (४५) चतुःशालवितर्द्दिकायां नीचापाश्रयविनिहितैकोपवर्हायां पर्य्यङ्किकायां निषद्य जोषम् अस्थात्।

देवोऽपि हर्षस्तथैव ज्ञात्वा-(४६) धरणितलनिहितकुथा-

व्यक्ताः,—विस्रस्ताः, कुन्तलाः,—केशाः यत्र तथोक्तम्। मौलिं—शिरःसंयतकेशान्, धम्मिल्लकल्पान् इत्यर्थः, ("चूडा किरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः)। अनादरात्—अयत्नात्, महागुरोर्निपातादिति भावः, निष्पीड्य—प्रोञ्छ्य, निर्जलं विधायेत्यर्थः। सावशेषमनुस्फुरितेन—सावशेषेण—अवशिष्टेन, मन्युना—शोकेन, स्फुरितः,—स्यन्दित इत्यर्थः, तेन। जिजीविषता इव—जीवितुमिच्छता इव; शोकाग्निदाहक्लेशादिति भावः।

(४३) जलेति।—जलेन—तोयेन, धौतः,—क्षालितः, अत एव सुभगः,—सुन्दरः तम्। आत्मानं—स्वम्, उत्तरोष्ठेन अधरोष्ठमिति भावः, चुचुम्बिषता इव—चुम्बितुमिच्छता इव।

(४४) श्वेतिम्ना—धावल्येन। शारदेति।—शारदः,—शरत्कालिकः, शशिकरः,—चन्द्रकरः, तद्वत् तेन वा विकसितानि—प्रस्फुटितानि, विषदानि—स्वच्छानि, शुभ्राणि इत्यर्थः, कुमुदानि—उत्पलानि, तेषां वनानि—समूहाः, तेषां दलावलयः,—पत्रराजय एव, बलिविक्षेपाः,—पूजोपहारप्रक्षेपाः तैः इव, दिग्देवताऽर्चनकर्म्म—दिग्देवतानां—दिगधिष्ठात्रीणां देवतानाम्, अर्चनकर्म्म—पूजनम्।

(४५) चतुःशालवितर्द्दिकायां—चतुःशाले—चतुर्दिगवस्थितगृहमध्यस्थायां, या वितर्द्दिका—वेदिका तस्यां, ("स्यादितर्द्दिस्तु वेदिका" इत्यमरः)। नीचेति।—नीचेषु—निम्नेषु, तलभागेष्विति यावत्, अपाश्रयस्य—चन्द्रातपस्य, विनिहितः,—स्थापितः, एकः,—अद्वितीयः; यद्वा,—एकः,—केवलः, न तु आस्तरणादिकं किञ्चिदासीदिति भावः; उपवर्हः,—उपधानम्, ("उपधानन्तूपवर्हः" इत्यमरः) यस्यां तथोक्तायाम्। जोषं—तूष्णीं, ("तूष्णीमर्थे सुखे जोषम्" इत्यमरः) अस्थात्—स्थितः। इह यथावद्गुरुजनातिरोधाने महापुरुषकर्त्तव्यवर्णनदर्शनात् स्वभावे स्थिरत्वमुक्तम्।

(४६) धरणीति।—धरणितले—भूतले, निहितायाम्—स्थापितायां,

प्रसारितमूर्त्तिः अदूरे एव अस्य तूष्णीमेव समवातिष्ठत। दृष्ट्वा दृष्ट्वा दूयमानमानसम् अग्रजन्मानं समस्फुटदिव अस्य सहस्रधा हृदयम्। (४७) औरसदर्शनं हि यौवनं शोकस्य। लोकस्य तु नरपतिमरणदिवसादपि दारुणः स बभूव दिवसः। सर्व्वस्मिन् एव नगरे न केनचित् (४८) अपाचि, न केनचित् अस्नायि, न अभोजि, सर्व्वत्र सर्व्वेण अरोदि। केवलम् अनेन क्रमेण अतिचक्राम दिवसः। (४९) स च प्रत्यग्र-त्वष्टृटङ्कतष्टतनुः इव वहद्बहलरुधिररसमांसच्छविः अपर-

---

कुथायां—वर्णकल्कले, चित्रितकल्कलविशेषे इत्यर्थः, ("कुथः स्त्रीपुंसयोर्वर्णकल्कले पुंसि बर्हिषि" इति मेदिनी) प्रसारिता—विस्तारिता, मूर्त्तिः,—तनुः येन तथा-भूतः। अदूरे—निकटे। दूयमानमानसं—क्लिश्यमानचित्तम्। अग्रजन्मानं—ज्येष्ठम्। समस्फुटदिव—अदीर्य्यदिव, विदीर्णमभवदिवेत्यर्थः।

(४७) औरसदर्शनं—सहोदरदर्शनमिति भावः। यौवनम्—अत्युद्दीपकमिति भावः, शोकस्य—पितृमरणजस्य मन्योः। दारुणः,—भीषणः, क्लेशकर इत्यर्थः। स दिवसः,—राज्यवर्द्धनागमनदिनम् इत्यर्थः।

(४८) अपाचि—रन्धनं कृतम्। अस्नायि—स्नातम्। अभोजि—भुक्तम्। अरोदि—रुदितम्। क्रमेण—रूपेण, प्रकारेणेत्यर्थः, शोकविलापेनेति भावः; अति-चक्राम—गतः।

(४९) स च—प्रसिद्ध इत्यर्थः। प्रत्यग्रेति।—प्रत्यग्रम्—अभिनवं यथा तथा त्वष्टा—विश्वकर्म्मणा, देवशिल्पिना इत्यर्थः, ("देवशिल्पिन्यपि त्वष्टा" इत्यमरः) टङ्केन—पाषाणदारणास्त्रविशेषेण, ("टङ्कः पाषाणदारणः" इत्यमरः) तष्टा—तृष्टा, तनूकृता इत्यर्थः, [तक्ष्णोतेः कर्म्मणि निष्ठायां रूपम्; "तष्टत्वष्टौ तनूकृते" इत्यमरः] तनुः,—शरीरं यस्य तथाभूत इव, निस्तेजा इवेत्यर्थः। पुरा विश्वकर्म्मणः सुता संज्ञा सूर्य्यमहिषी पत्युस्तेजोऽतिरेकम् असहमाना विसोढुं पितरम् उपेत्य व्यजिज्ञपत्। स तु कन्यायाः क्लेशपरिक्लिष्टौषध्या सूर्य्ये जामातरं शातयन्नेष निशाय चौषधतेजस्कम् अकरोत् इति पुराणवार्त्ता अत्र अनुसन्धेया। बहदिति।—बहत्—निःसरत्, बहुलः,—बहुलः, रुधिररसः,—रक्तद्रवः यस्मात् तादृशं, यत् मांसं—पिशितं, तस्मिन् छविः,—कान्तिर्यस्य तथोक्तः, रक्तवर्ण इति यावत्, अतीक्ष्णकर इति भावः। अपर-

पारावारपयसि ममज्ज मञ्जिष्ठारुणोऽरुणसारथिः। (५०) मुकुलायमानकमलिनीकोषविकलं चकाण चञ्चरीककुलं कमलसरसि। (५१) सविधविरहव्याधिविधुरबधूबाध्यमानं बबन्ध बन्धो इव विबुद्धबन्धूकभासि भास्वति सास्रां दृशं चक्रवाकचक्रबालम्। (५२) सञ्चरन्त्याः समधुकररवं कैरवाकरं कलहंसरमणीरमणीयं माणिक्यकाञ्चीकिङ्किणीजालमिव

पारावारपयसि—पश्चिमसागरसलिले। मञ्जिष्ठारुणः,—मञ्जिष्ठा—रक्तवर्णलताभेदः, तद्वत् अरुणः,—रक्तः। अरुणसारथिः,—सूर्यः। ममज्ज—अवगाहिष्ट, अस्तम् अगमत् इत्यर्थः।

(५०) मुकुलेति।—मुकुलायमाने—मुकुलीभावमापन्ने, मुद्रिते इत्यर्थः, कमलिनीकोषे—पद्मिनीबीजकोषे, विकलं—विवर्णं, मुखाश्रयसङ्कोचात् विह्वलं वा इत्यर्थः, बद्धमिति भावः; सूर्यास्तमनेन सहसा पद्मानां निमीलनात् मकरन्दपानोन्मत्तानां बीजकोषगतानां भ्रमराणां पुटादिव ततः बहिरायातुमशक्यत्वादिति तात्पर्यम्। चकाण—आर्त्तस्वरं लुलुज्ञ; [आर्त्तस्वरार्थकात् भौवादिकात् कणतेः लिटि रूपम्]। चञ्चरीककुलं—भ्रमरवृन्दं, ["फर्फरीकादयश्च"(उ० ४ पा० २० सू०) इति यङ्लुगन्तात् चरतेः ईकनि निपातनात् चञ्चरीकः]। कमलसरसि—पद्मसरोवरे।

(५१) सविधेति।—सविधेन—सन्निहितेन, उपस्थितेन इत्यर्थः, निशागमनादिति भावः, विरहव्याधिना—विच्छेदपीडया, विधुरया—कातरया, बध्वा—चक्रवाक्या इति यावत्, बाध्यमानम्—अमुच्यमानमिति भावः, चक्रवाकचक्रवालं—कोकमण्डलं, बन्धो इव—बुद्धहृदि इव; प्रियासङ्गमप्रदत्वादिति भावः। विबुद्धेति।—विबुद्धं—विकसितं, यद् बन्धूकं—तदाख्यपुष्पविशेषः, तद्वत् भासः,—दीप्तयः यस्य तथाभूते, भास्वति—रवौ, सास्राम्—सबाष्पां, दृशं—नेत्रं, बबन्ध—निदधे; अन्योऽपि विपदि बन्धुमुखं निरीक्षते इति भावः। इह बबधानाममङ्गल्यात् भकारस्य च सङ्गल्यात् इत्यनुप्रासः।

(५२) समधुकररवं—मधुकराणां—भ्रमराणां, रवैः,—ध्वनिभिः, झङ्कारैरित्यर्थः, सह वर्त्तमानं, कैरवाकरं—कुमुदनिवहं कुमुदसरः वा। कलहंसेति।—कलहंसानां—आदन्त्याख्यहंसविशेषाणां, रमणी—वधूः, कलहंसीत्यर्थः, ("कादम्बः कलहंसः स्यात्" इत्यमरः) ताभिः रमणीयं—मनोज्ञम्। सञ्चरन्त्याः,—सञ्चलन्त्याः,

आचकाण श्रियः। (५३) प्रकटकलङ्कम् उदयमानं विशङ्कटविषाणोत्कीर्ण-पङ्कमङ्करशङ्करशकुरशङ्करककुद-कूटसङ्काशम् आकाशत आकाशे शशाङ्कमण्डलम्।

अस्याञ्च (५४) वेलायाम् अनतिक्रमणीयवचनैः उपसृत्य प्रधानसामन्तैः विज्ञाप्यमानः कथङ्कथमपि अभुक्त। (५५) प्रभातायाञ्च शर्वर्यां सर्व्वेषु प्रविष्टेषु राजसु समीपस्थितं हर्षदेवम् उवाच,—"तात! भूमिरसि गुरुनियोगानाम्। (५६) शैशव एव अग्राहि गुणवत्पताका इव भवता तातस्य

श्रियः,—लक्ष्म्याः, शोभाया इति भावः। माणिक्येति।—माणिक्यस्य—रत्नविशेषस्य, काञ्ची—रसना, तस्याः किङ्किणीजालं—क्षुद्रघण्टिकानिचयः, आचकाणेव—रराणेव। तदानीं प्रदोषस्यागमात् कुमुदानां विकाशेन लक्ष्म्याः आविर्भावोऽभूत्, तेन हि तस्याः किङ्किणीरणनमुत्प्रेक्षितमिति वेदितव्यम्।

(५३) प्रकटकलङ्कम्—प्रस्फुटलाञ्छनम्, उदयमानम्—उद्गच्छत्। विशङ्कटेति।—विशङ्कटं—विशालं, ("विशङ्कटं पृथु बृहत् विशालं पृथुलं महत्" इत्यमरः) विषाणं—शृङ्गं, तेन उत्कीर्णः,—उद्धृतः, यः पङ्कः,—कर्दमः, तेन सङ्करः,—सङ्गः यस्य तथाभूतं, शङ्करस्य—हरस्य, शकुरशङ्करस्य—दान्तवृषभस्य, यत् ककुदकूटम्—अंसप्रदेशः, ग्रीवास्थमांसपिण्डमित्यर्थः, "झुँटी" इति बङ्गभाषया प्रसिद्धं, ("प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्" इत्यमरः) तत्सङ्काशं—तत्सदृशं, मध्ये श्यामलं धवलवृषभककुदमिवेति भावः, शशाङ्कमण्डलं—चन्द्रबिम्बम्, आकाशे—गगने, अकाशत—व्यद्योतत।

(५४) वेलायां—समये। अनतिक्रमणीयवचनैः,—अलङ्घ्यवाक्यैः। विज्ञाप्यमानः,—अनुरुध्यमानः। कथङ्कथमपि—अतिकृच्छ्रेण इत्यर्थः; अनिच्छायां सत्यामपि माननीयस्य पितुः प्रियसामन्तस्य आसनमनुल्लङ्घ्य इति भावः।

(५५) शर्वर्यां—रजन्याम्; ("अथ शर्वरी। निशा निशीथिनी रात्रिः" इत्यमरः) प्रभातायां—मातुं प्रवृत्तायाम्; अवसानायामिति भावः। राजसु—मित्रनृपसमूहेषु, सामन्तराजवृन्देषु च। उवाच, राज्यवर्द्धन इति शेषः। तात—वत्स! भूमिः,—पात्रम्। गुरुनियोगानां—गुरुजनादेशानाम्।

(५६) शैशवे—बाल्ये। अग्राहि—गृहीता, विद्धेति यावत्। गुणवत्पताका

चित्तवृत्तिः। यतो भवन्तमेवंविधं (५७) विधेयं विधिविधानोपनतनैर्घृण्यम् इदं किमपि बिभणिषति मे हृदयम्। (५८)न अवलम्बनीया बालभावसुलभा प्रेमविलोमा वामता। (५९) वैधेय इव मा कृथाः प्रत्यूहम् ईहितेऽस्मिन्। न खलु न जानामि लोकवृत्तम्। (६०) लोकत्रयत्रातरि मान्धातरि मृते किं कृतं पुरुकुत्सेन? (६१)भूमृतादिष्टाष्टादशद्वीपे दिलीपे वा रघुणा?

इव—गुणशालिनी वैजयन्ती इव, तातस्य—पितुः, चित्तवृत्तिः,—मनोऽभिप्रायः, हृदयस्थितिः वा; निरन्तरं तदनुमताचाराद्यनुवर्त्तनात् इति भावः।

(५७) विधेयं—वचनस्थितं, ("विधेयो विनयग्राह्यो वचनस्थित आश्रयः" इत्यमरः)। विधीति।—विधेः,—दैवस्य, विधानेन—विलसितेन, उपनतम्—उपस्थितं, नैर्घृण्यं—निष्करुणं, वैराग्यमिति भावः, यस्य तथाभूतम्, इदं मे—मम, हृदयं—चित्तं, किमपि—यत्किञ्चित् इत्यर्थः, बिभणिषति—भणितुमिच्छति।

(५८) बालभावसुलभा—शैशवसहजा। प्रेमविलोमा—प्रेम्णः,—स्नेहवात्सल्यस्येति भावः, विलोमा—विरोधिनी, वामता—प्रतिकूलता, अवाध्यतेत्यर्थः, न अवलम्बनीया—न ग्रहणीया।

(५९) वैधेय इव—मूर्ख इव, ("मूर्खवैधेयबालिशाः" इत्यमरः) अस्मिन्—ईदृशे, ईहिते—चेष्टिते, प्रत्यूहं—विघ्नं, ("विघ्नोऽन्तरायः प्रत्यूहः स्यात्" इत्यमरः)। लोकवृत्तं—लोकाचारम्। न जानासि—न वेत्सि, खलु—निश्चये, इति न, जानास्येवेत्यर्थः। विषयदार्ढ्ये नकारद्वयं वामनाभिसम्मतम् इति ज्ञेयम्।

(६०) लोकत्रयत्रातरि—त्रिलोकीत्राणक्षमे इति भावः, मान्धातरि—तदाख्ये राजर्षिनृपतौ। पुरुकुत्सेन—तत्पुत्रेण इत्यर्थः, किं कृतम्?—राज्यमेव गृहीतं, न तु वनमाश्रितमिति भावः। एवमुत्तरत्रापि बोध्यम्।

(६१) भूमृतेति।—भूमृतया—भूभृत्येति भावः, आदिष्टानि—आज्ञप्तानि, अष्टादशद्वीपानि येन तथाभूते; अष्टादशद्वीपाधिपतौ इति भावः। ननु सप्तद्वीपा हि पृथिवी श्रूयते, लवणादिभिः सप्तभिः समुद्रैः परिवेष्टितानि जम्बूप्रभृतीनि सप्त द्वीपानि भवन्तीति, सत्यमेवं द्वीपानामष्टादशत्वे महाकविप्रयोगः; यथा हि,—"अष्टादशद्वीपनिखातयूपः" इति रघौ कालिदासः। दिलीपे—तदाख्ये इक्ष्वाकुवंश्ये राजनि, सति इति शेषः, रघुणा—तत्पुत्रेण इत्यर्थः, किं कृतम्? इति पूर्वेणान्वयः।

(६२) महाऽसुरसमरमध्याध्यासितत्रिदशरथे दशरथे वा रामेण ? (६३) गोष्पदीकृतचतुरुदन्वदन्ते दुष्मन्ते वा भरतेन ? तिष्ठन्तु तावदेते, (६४) तातेनैव श्रुतसमधिकाध्वरधूमविसरधूसरितवासववयसि (६५) सुगृहीतनाम्नि तत्रभवति परासुतां गते पितरि किं न अकारि राज्यम् ? यच्च किल शोकः (६६) समभिभवति, तं कापुरुषम्

(६२) महाऽसुरेति।—महाऽसुराणां—दैत्यप्रवराणां, समरमध्ये—रणाभ्यन्तरे, अध्यासितः,—स्थापितः, अध्युषित इत्यर्थः, त्रिदशरथः,—देवरथः येन तथाभूते, इन्द्रसाहाय्यार्थम् असुरान् हन्तुम् अध्यासितदेवरथे इति भावः, दशरथे, मृते इति शेषः, रामेण—तत्पुत्रेण इत्यर्थः, किं कृतम् ? इति पूर्वेणान्वयः।

(६३) गोष्पदीति।—गोष्पदीकृताः,—गौः पदं, प्रमाणं, गावः पद्यन्ते यस्मिन् देशे इति वा, गोष्पदं—गोः पदजातः गर्त्त इत्यर्थः, ["गोष्पदं—" (६।३।१४५ पा०) इत्यादिना प्रमाणसंवितार्थयोरव निपातनम्] अगोष्पदं गोष्पदं कृताः गोष्पदीकृताः, गोष्पदवत् तुच्छीकृता इत्यर्थः; अवहेलयैव उल्लङ्घिता इति भावः; चतसृणाम् उदन्वतां —समुद्राणां, अन्ताः,—सीमाः येन तथाभूते, ससागरधराऽधीश्वरे इत्यर्थः, दुष्मन्ते—चन्द्रवंशीयप्रसिद्धनृपविशेषे, मृते सति इति शेषः, भरतेन—तत्पुत्रेण इति यावत्, किं कृतम् ? इति पूर्वेणान्वयः। तिष्ठन्तु—दूरं सन्तु; बहुतीतकालिकत्वादेतेषामिति भावः। एते—मान्धातृादयः।

(६४) तातेन—पित्रा, प्रभाकरवर्द्धनेन इति भावः। श्रुतेति।—श्रुतात्—श्रुतसङ्ख्यकेभ्यः, समधिकाः,—अतिरिक्ताः, अध्वराः,—यज्ञाः, अश्वमेधादयः इति यावत्, तेषां धूमविसरैः,—धूमविस्तारैः, यज्ञाग्निसमुत्थधूमैरित्यर्थः, धूसरितः,—मलिनीकृत इत्यर्थः, वासवः,—इन्द्र एव, वयः,—पक्षौ येन तथाभूते; ("वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्" इति मेदिनी) धूमोद्गमेन इक्षवाः पक्षिणः धूसरीक्रियन्ते, अस्य तु यज्ञानां तथा धूमोद्गतिः जाता, यथा स्वर्गाधिपतिरपि धूसरताम् अयासीत् इति भावः।

(६५) सुगृहीतनाम्नि—सुष्ठु गृहीतं, जनैरित्यर्थः, नाम यस्य तथाभूते, प्रातःस्मरणीये इत्यर्थः, तत्रभवति—पूज्ये, पितरि—अस्मत्पितामहे इति भावः, परासुतां—परत्वं, गते—प्राप्ते सति, राज्यं किं न अकारि ?—न कृतं किम् ?

(६६) समभिभवति—परिक्षिपति, आयत्तीकरोतीत्यर्थः। कापुरुषं—पुरुषा-

आचक्षते शास्त्रविदः। स्त्रियो हि विषयः शुचाम्। तथाऽपि किं करोमि; स्वभावस्य सेयं कापुरुषता वा (६७) स्त्रैणं वा, यदेवम् आस्यदं पितृशोकहुतभुजो जातोऽस्मि। मम हि (६८) भूभृति पर्य्यस्ते निरवशेषतः प्रस्रवणानि इव स्रुतानि अश्रूणि, अस्तमिते (६९) महति तेजसि अन्धकारीभूतदशाशस्य प्रनष्टः प्रज्ञालोकः, प्रज्वलितं हृदयम्, (७०) आत्मदाहभीत इव स्वप्नेऽपि न उपसर्पति विवेकः, बलीयसा सन्तापेन (७१) जातुषमिव विलीनम् अखिलं धैर्य्यम्; (७२) पदे पदे दिग्धरोपाहता इव हरिणी मुह्यति मतिः, पुरुषद्वेषिणी इव

धनम्। विषयः,—देशः, पार्वमित्यर्थः। शुचां—शोकानाम्; स्त्रिय एव शोकविवशा भवितुमर्हन्ति, न तु पौरुषभूषिताः पुरुषा इति भावः। तथाऽपि—स्त्रीणामिव शोकविषयत्वे सत्यपि। स्वभावस्य—प्रकृतेः। कापुरुषता—नीचता।

(६७) स्त्रैणं—स्त्रीसम्बन्धित्वम्। आस्यदं—पातं, क्षेत्रमित्यर्थः। पितृशोकहुतभुजः,—पितृशोकानलस्य।

(६८) भूभृति—राज्ञि, पर्व्वते च; पर्य्यस्ते—विध्वस्ते, निरवशेषतः,—कार्त्स्न्येन, प्रस्रवणानि इव—निर्झरा इव, स्रुतानि—गलितानि।

(६९) महति—प्रभूते, तेजसि—तेजःसम्पन्ने पितरि, मूर्य्ये च। अन्धकारीभूतदशाशस्य—अन्धकारीभूताः,—ध्वान्तसमाच्छन्ना इत्यर्थः, दश आशाः,—दिशो यस्य तादृशस्य, मनीति पूर्वेणान्वयः, दशाऽपि दिशोऽन्धकारमयीः इव पश्यामि इत्यर्थः। प्रनष्टः,—अदर्शनं गतः, विलुप्त इत्यर्थः, प्रज्ञा—बुद्धिः एव, आलोकः,—उद्योतः।

(७०) आत्मेति।—आत्मनः,—स्वस्य, दाहात्—ज्वलनात, भीतः,—जाततङ्कः; प्रज्वलितहृदये उपस्थित्या इति भावः। उपसर्पति—उपगच्छति, आविर्भवतीत्यर्थः। विवेकः,—पृथगात्मता, इदं तथ्यमिदमतथ्यम् इत्यादि विचारवती बुद्धिरित्यर्थः।

(७१) जातुषमिव—लाक्षानिर्म्मितमिव, ["जतुनी विकारः अण् षुगागमः। लाक्षा राक्षा जतु क्लीबे यावोऽलक्तौ द्रुमामयः" इत्यमरः]। विलीनं—विलयं गतम्।

(७२) पदे पदे—प्रतिपदं, प्रत्येकशब्दोच्चारणे, प्रत्येकपदक्षेपणे च इत्यर्थः। दिग्धेति।—दिग्धेन—विषाक्तेन, रोपेण—इषुणा, शरेणेत्यर्थः, ("कलत्रमार्गणशरा:

दूरत एव भ्रमन्ती परिहरति स्मृतिः, अम्बा इव तातेनैव सह गता धृतिः, (७३) वार्द्धुषिकप्रयुक्तानि इव वित्तानि प्रतिदिवसं वर्द्धन्ते दुःखानि, (७४) शोकानलधूमसञ्चारसम्भृताम्भोधर-भरितमिव वर्षति नयनवारिधाराविसरं शरीरम्। सर्व्वः (७५) पञ्चजनः पञ्चत्वमुपरतः प्रयाति, वितथमेतद्वदति बालो

घती रोष इषुः इषोः" इत्यमरः)। यद्यपि "वाणे विषाक्ते दिग्धलिप्तकौ" इत्यमर-वचनात दिग्धशब्देनैव विषाक्तो बाणो लभ्यते, तथाऽपि पुनः रोषग्रहणं तस्य अति-भीषणत्वद्योतनार्थमिति बोद्धव्यम्। आरूढेव—विद्धेव। सृच्छति—मोहं गच्छति। पुरुषद्वेषिणी इव—पुरुषं दृष्ट्वा पलायनपरा कामिनी इव इत्यर्थः। भ्रमन्ती—चलन्ती, पलायमाना इत्यर्थः। परिहरति—परित्यजति, मामिति शेषः। अम्बा इव—माता इव। धृतिः,—सन्तोषः।

(७३) वार्द्धुषिकैति।—वृद्ध्या—ऋणादौ प्रयुक्तेभ्यः धनेभ्यः लाभरूपया, जीवतीति वार्द्धुषिकः,—वृद्ध्याजीवः, कुसीदजीविवणिक् इत्यर्थः, ["प्रयच्छति गर्ह्यम्" (४।४।३० पा०) इति वृद्धेः ठक्कि "वृद्धेर्द्वेधुषि भावो वक्तव्यः" (वा०) इति द्वधुषः द्वधौ रूपम्] ("कुसीदिको वार्द्धुषिको वृद्ध्याजीवश्च वार्द्धुषिः" इत्यमरः) तेन प्रयुक्तानि —कस्मिंश्चित् कार्य्ये ऋणादिरूपे नियुक्तानि इव, वित्तानि—धनानि। वर्द्धन्ते—वृद्धिं गच्छन्ति।

(७४) शोकैति।—शोकानलस्य—शोकाग्नेः, धूमसञ्चारेण—धूमनिवहेन, सम्भृतः,—सञ्जातः, योऽम्भोधरः,—मेघः; तथा हि मेघदृते,—"धूमज्योतिःसलिल-मरुतां सन्निपातः क्व मेघः" इति कालिदासः; तेन भरितमिव—आपूरितमिव, शरीरं—देहः; अनेन विशेषणेन तात्पर्य्यबलात गगनमिति च आयातम्; एतेन शरीरस्य उत्प्रेक्षणीयादियूयता व्यज्यते। नयनवारिधाराविसरं—बाष्पधारासन्तानं, वर्षति—मुञ्चति। [इहोत्प्रेक्षोत्थापितपूर्व्वपदार्थस्य उत्तरवाक्यगतत्वेन पदार्थहेतुकं काव्यलिङ्गमुत्प्रेक्षाङ्गमिति सङ्क्षेपः]।

(७५) पञ्चजनः,—पञ्चभूतनिर्म्मितो मानवः, ("स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः" इत्यमरः) उपरतः,—मृतः सन्, पञ्चत्वं—पञ्चानां क्षित्यादीनां भावः तत्त्वं, पञ्चसु पृथिव्यादिषु विलयरूपतामित्यर्थः, ("पञ्चत्वं पञ्चानां भावे प्राप्यानामत्यधी-ऽपि च" इति मेदिनी) प्रयाति—गच्छति। वितथम्—असत्यम्। बालः,—अज्ञः, मूर्ख इति यावत्, ("मूर्खेऽर्भकेऽपि बालः स्यात्" इत्यमरः)।

लोकः। (७६) तातो हुताशनतामेव केवलमापन्नः, येनैवं दहति माम्। इदमसाम्परायिकमिव हृदयमवष्टभ्य व्युत्थितः शोको दुर्निवारः वाडव इव वारिराशिं, पवरिव पर्व्वतं, क्षय इव क्षपाकरं, राहुरिव रविं, दहति दारयति तनूकरोति कवलयति। न शक्नोति मे हृदयं तादृशस्य सुमेरुकल्पस्य महापुरुषस्य विनिपातम् अश्रुभिरेव केवलैः अतिवाहयितुम्। राज्ये (७७) विषे इव चकोरस्य मे विरक्तं चक्षुः।

(७६) कथं वितथं वदसि ? इत्यत आह, तात इति।—तातः,—पिता, [केचित्तु "तातः" इत्यत्र "ततः" इति पठित्वा "पञ्चसु पृथिव्यादिषु लयात् पुरुषः तादृश्यं प्रतिपद्यते इत्यर्थः" इति व्याचक्षुः]। हुताशनताम्—अग्नित्वमेव, न तु पृथिव्यादित्वमित्येवकारार्थः। आपन्नः,—प्राप्तः, केवलं हुताशने एव लयं गत इत्यर्थः। येन—हुताशनभावेन इत्यर्थः। इह दाहस्य साधनव्यापकत्वज्ञानात् अनुक्तित्यलङ्कृतिः प्रतीयमानोत्प्रेक्षाङ्गं चमत्कारातिशय्यात्। असाम्परायिकमिव—अयुद्धमिव, असात्त्विकं वा; यद्वा,—असाम्परायिकं—साम्परायिकं—युद्धं, ("युद्धमायोधनं···। ···समीकं साम्परायिकम्" इत्यमरः) तन्नार्हति इति असाम्परायिकं—युद्धानर्हं, अभयमित्यर्थः, इदं हृदयं—चित्तम्, अवष्टभ्य—आक्रम्य, व्युत्थितः,—विशेषेण उत्थितः, शोकः,—कन्दुः, दुर्निवारः,—अनिवार्यः; यो हि भीतः, स कथं व्युत्थितं निवारयितुमर्हति ? इति भावः; वाडव इव—वडवानल इव, वारिराशिं—समुद्रम्। पविरिव—वज्रमिव, ("क्लीबे वज्रकरुणौ स्यात् कुलिशं भिदुरं पविः" इत्यमरः)। क्षय इव—राजयक्ष्मा इव। क्षपाकरं—चन्द्रम्। दहति—ज्वलयति। दारयति—भिनत्ति, छिनत्तीत्यर्थः, द्विधा विपाटयति वा। तनूकरोति—क्षीणीकरोति। कवलयति—ग्रसति, सर्व्वत्र मार्ष्टि शेषः। "वाडवः" इत्यादिवाक्येषु "दहति" इत्यादिक्रियाणां क्रमेणान्वयः। सुमेरुकल्पस्य—सुमेरुपर्व्वतनिभस्य, सर्व्वगुणरत्नवत्त्वात्, आश्रितार्थोत्पूरकत्वाच्चेति भावः। अतिवाहयितुं—यापयितुं, शमयितुमित्यर्थः, न्यग्भावयितुमिति वा; लोकप्रवादैः न महागिरीन्द्राः परिचालनार्हाः इत्याशयः।

(७७) विषे इव—गरले इव, ["इवेन समासो विभक्त्यलोपश्च" (वा०) इति एकपदीभावः, सान्तरेव केवलं पाठान्तरे दृश्यते इति] चकोरस्य—पक्षिविशेषस्य;

(७८) बहुमृतपटावगुण्ठनां रञ्जितरङ्गां जनङ्गमानामिव वंश-वाह्याम् अनार्य्यां श्रियं त्यक्तुमभिलषति मे मनः। अगमपि (७९) दग्धगृहे शकुनिरिव न पारयामि स्थातुम्। सोऽहमिच्छामि,मनसि (८०)वाससीव मुलग्नं स्नेहमलमिदम् अमलैः शिखरिशिखरप्रस्रवणरूक्षस्रोतोऽम्भिः क्षालयितुम् आश्रमपदे।

विधे दृष्टे चकोरस्य आक्षिणी विरज्येते इति प्रसिद्धिः। विरक्तम्—अनासक्तं, रक्तिम-विरहितमित्यर्थः।

(७८) बहुति।—बहवः,—अनेके, मृतानां—मृतानाम्; एकत्र,—युद्धे हतानां प्रतिपक्षवीराणाम्, अन्यत्र,—कारणान्तरेण गतजीवानां जनसामान्यानामिति भावः; पटाः,—वस्त्राणि, अवगुण्ठनानि—मस्तकाच्छादनानि, शिरोवेष्टनानि च यस्याः तां, रञ्जितरङ्गां—रञ्जितः,—श्रीखितीकृतः, रङ्गः,—रणभूमिः यस्यै तां ("काम्मेऽपि च रङ्गो ना रागे नृत्ये रणेऽपि सौ" इति मेदिनी); अन्यत्र,—रञ्जितः,—अनुरक्तीकृतः, रङ्गः,—नृत्यसमाजः यया तथोक्तां, जनङ्गमानां—चाण्डालानां, ["गमश्च" (३।२।४७ पा०) इति खच् "अर्हादिभ्यः—" (५।१।७७ पा०) इत्यादिना मुम्। "चण्डालश्वपचमातङ्गदिवाकीर्त्तिजनङ्गमाः" इत्यमरः]। वंशवाह्यामिव—वंशानुक्रमेण वहनीयामिवेत्युत्प्रेक्षा, अतिगर्ह्यणीयामित्यर्थः, कौलीन्यवाहिस्मृताच्च; यद्वा,—वंशेन—वेणुदण्डेन, वाह्यां—प्राप्यां, वंशानिर्मितध्वजदण्डोचितामित्यर्थः। अनार्य्याम्—असाध्वीं, नीचप्रकृतिमित्यर्थः; एकत्र,—बहुनरपतिभोग्यत्वात्, अन्यत्र,—नीचाश्रयत्वात्। श्रियं—सम्पदं, राजलक्ष्मीमित्यर्थः, श्रीभाञ्च।

(७९) दग्धगृहे—भस्मीभूतावासे; पिञ्जरपरित्यक्तत्वात् विगतस्नेहे इति भावः; शकुनिरिव—गृहपालितपक्षीव, गृहचटकिकेव इत्यर्थः, ["शकुनिरिव" इत्यत्र "शकुलिरिव" इति पाठेऽपि स एवार्थः; "गृहसारिका" इति कैश्चित्]।

(८०) वाससि इव—वसने इव, मुलग्नं—संसक्तं, इदं स्नेहमलं—स्नेहः,—संसारेषु अनुरागः, मलमिव—पुरीषमिव, खेटश्लेष्मादिसञ्चयमिव वा; अन्यत्र,—स्नेहस्य—तैलादेः, वस्त्रलग्नस्येति भावः, मलं—मालिन्यम्। अमलैः,—निर्मलैः। शिखरीति।—शिखरिणः,—पर्वतस्य, शिखरेषु—शृङ्गेषु, यानि प्रस्रवणानि—निर्झराः, तेषां स्वच्छानि—विशदानि, स्रोतांसि—प्रवाहाः, तेषाम् अम्भोभिः—जलानि तैः। क्षालयितुं—शोधयितुम्। आश्रमपदे—तपोवने; यथा निर्मलपयोभिः

(८१) अतस्त्वम् अन्तरितयौवनसुखाम् अनभिमतामपि जरामिव पुरुः आत्मया गुरोर्गृहाण मे राज्यचिन्ताम्। (८२) त्यक्तसकलबालक्रीड़ेन हरिणा इव दीयताम् उरो लक्ष्म्या। परित्यक्तं मया शस्त्रम्" इत्येवमभिधाय खड्गग्राहिणो हस्तात् आदाय निजं निस्त्रिंशम् उत्ससर्ज धरण्याम्।

मलिनमं वासः शुष्यति, तथा निष्कामाराधनमेव मे अन्तर्मलशोधकं भविष्यतीत्याशयः।

(८१) अतः,—आत्मनगमनाभिलाषात् ["अतः" इत्यत्र "यतः" इति पाठे,—यस्या इच्छायाः, यस्मादभिलाषादित्यर्थः]। अन्तरितेति।—अन्तरितं—व्यवहितं, दूरीकृतमित्यर्थः, यौवनसुखं—तारुण्योचितविषयोपभोगानन्दः यस्यां तथाविधां, वर्जितयौवनोचितविषयरुग्भोगसुखामित्यर्थः; एकतः,—प्रजानां हितचिन्तायां राज्यरक्षणचिन्तायाश्च सदा अवधानतौचित्यात; अन्यतः,—स्त्रीजनोपघातकतया उपभोगसाकल्याभावादिति भावः; अत एव अनभिमताम्—अनभिलषिताम्, अप्रियामित्यर्थः। जरामिव—वलिपलितादिना कायवैरूप्यापादकदशादर्शनमिव, वार्द्धकमिवेति यावत्। पुरुः,—ययातिनृपतेः कनीयान् सुतः, स इव। गुरोः,—ज्येष्ठस्य भ्रातुः, यदोरित्यर्थः। राज्यचिन्ताम्—राज्यभारम्। पुरा ययातेः शुक्राचार्यसुतां देवयानीम् अवमत्य, तस्या दासीभूतां वृषपर्वणोऽसुरराजस्य कन्यां शर्मिष्ठां निर्भरं कामयमानो दुर्दैवनिर्वादतेन शुक्रेण, "जरां प्राप्नुहि" इति शप्तः विषयभोगाढ्यया ज्येष्ठान् सुतान् यदुप्रभृतीन् "मदीयां जरां गृह्णीत" इत्यादिशन्नपि तैः अवमतः कनीयसे पुत्राय पुरवे जरां दत्तवान्, स तु पुरुः पितुराज्ञया तां जरां प्रतिपेदे इति भारती वार्त्ता।

(८२) त्यक्तेति।—त्यक्ता—उत्सृष्टा, सकला—समग्रा, बालक्रीड़ा—शैशवोचितक्रीड़ा येन तथाभूतेन, बालभावं परित्यजता इत्यर्थः। हरिणेव—विष्णुनेव; हरिरपि द्वापरे कृष्णजन्मनि कंसवधानन्तरं तद्राज्ये उग्रसेनं संस्थाप्य शासनसौकर्य्यार्थं तत्रैव स्थित्वा सर्व्वा वृन्दावनलीलाः बालोचिताः परिजहार, लक्ष्म्याश्च समभूतां रुक्मिणीञ्च उरसि अध्यापयत्। लक्ष्म्या—राजश्रियै, कमलायै च; उरः,—वक्षःस्थलं, दीयतां—समर्प्यताम्। निस्त्रिंशम्—असिम्; ["षड्ग्राया: तत्पुरुषस्य वाच्यः" (वा०) इति निर्गतः त्रिंशतोऽङ्गुलिभ्यः इति विग्रहे उच् प्रत्ययः। "खड्गं तु निस्त्रिंशचन्द्रहासासिरिष्टयः" इत्यमरः]। उत्ससर्ज—परित्याज।

अथ तच्छ्रुत्वा (८३) निशितशिखेन शूलेन इव आहतः प्रविदीर्णहृदयो देवो हर्षः समचिन्तयत्,—"किं नु खलु माम् अन्तरेण आर्यः केनचित् असहिष्णुना किञ्चिदाहितः कुपितः स्यात्? उत अनया दिशा परीक्षितुकामो माम्? उत (८४) शोकजन्मा चेतसः समाक्षेपोऽयमस्य? आहोस्वित् आर्य एव अयं न भवति? किं वार्य्येण अन्यदेवाभिहितम् अन्यदेव अश्रावि मया (८५) शोकशून्येन श्रवणेन्द्रियेण? आर्यस्य वा अन्यदेव विवक्षितम् अन्यदेव आपतितं मुखेन? अथवा सकलवंशविनाशाय विनिपातनोपायोऽयं विधेः? मम वा (८६) निखिलपुण्यपरिक्षयोपक्षेपः? कर्म्मणाम्

(८३) निशितशिखेन—तीक्ष्णाग्रेण। माम् अन्तरेण—विना, मयि असन्निहिते इत्यर्थः। असहिष्णुना—आवयोः सौभ्रात्रं सोढुमशक्नुवता इत्यर्थः। आहितः,—अवबोधितः; किञ्चित् महुरुपेक्षितमिति भावः। उत—अथवा, अनया दिशा—नयेन इत्यर्थः। परीक्षितुकामः,—परीक्षार्थी, आत्मानं प्रति मदीयाभिप्रायज्ञानेच्छुरित्यर्थः।

(८४) शोकजन्मा—मन्युप्रभवः। समाक्षेपः,—समाकर्षः, समाकुलता वा, विक्लवतेति यावत्। आहोस्वित्—अथवा।

(८५) शोकशून्येन—शोकेन—शुचा, शून्यं—स्वव्यापारहीनमित्यर्थः, विनलक्षतया सम्यगर्थग्रहणशक्तिविरहितमिति भावः, तेन। विवक्षितं—वक्तुम् इष्टम्। आपतितम्—उपस्थितं निर्गतं वा। सकलेति।—सकलस्य—कृत्स्नस्य, वंशस्य—कुलस्य, अस्माकमिति भावः, विनाशाय—ध्वंसाय, अस्मान् निर्वंशीकर्तुम् इत्यर्थः; आर्ये वनं गते अहमप्यवश्यमेव तमनुगामिष्यामि, मय्यपि गते वंशोऽयं कर्णधारविहीना नौरिव विपद्यासं प्राप्स्यति, तेन च अस्य लोपः अवश्यम्भावीति भावः। विनिपातनोपायः,—ध्वंसप्रयत्नः, ["विनिपातनोपायः" इत्यत्र "निपातनोपायः" इति पाठेऽपि स एवार्थः]। विधेः,—दैवस्य, प्रतिकूलस्य इति भावः; विधातुर्वा,("विधिर्नियतौ काले विधाने परमेष्ठिनि" इति मेदिनी)।

(८६) निखिलेति।—निखिलानां—समग्राणां, पुण्यानां—श्रेयसां, परिक्षयः,—प्रलयः, तस्य उपक्षेपः,—प्रसङ्गः।

(८७) अननुकूलसमयग्रहचक्रवालविलसितं वा? अथवा (८८) तातविनाशनिःशङ्ककालिकालक्रीडितम्?—येन अयं यः कश्चित् इव यत्किञ्चनकारिणं माम् अपुष्पभूतिवंशसम्भूतमिव, अतातनयमिव,(८९)अनात्मानुजमिव,अभक्तमिव,दृष्टदोषमिव,

(८७) अननुकूलेति।—अननुकूलाः,—प्रतिकूलाः, समयाः,—सर्वे, ग्रहाः,—रव्यादय इति यावत्, तेषां चक्रवालस्य—समूहस्य, विलसितं—विजृम्भितं, विचेष्टितमिति यावत्; अननुकूले ग्रहसमूहे कथमेवं घटेत? इत्याशयः।

(८८) तातेति।—तातस्य—पितुः, विनाशेन—उपरमेण, निःशङ्कः,—निर्भयः, यः कालिकालः,—चतुर्थयुगः, तस्य क्रीडितं—विलसितम्। जीवति तातेऽधर्मशीलानां प्राबल्यवति तच्छासनात् कलियुगः जनानां धर्मविगर्हितकर्मणि प्रवृत्तिरूपं स्वप्रभावं विस्तारयितुं न प्राभवत्, इदानीं तस्यापायात् निर्भयस्य निर्भरकालिकालस्य स्वप्रभावविस्तारफलमिदं भवेत्? इति भावः। येन—कालिक्रीडितेन इत्यर्थः, कलिप्रभावेण इति यावत्। अयम्—आर्यः, यः कश्चिदिव—साधारणजन इव। यत्किञ्चनकारिणं—यथेच्छचारिणम्, उत्सृष्टितगुरुजनशासनमिवेत्यर्थः; यः गुरुजनादेशमतिक्रम्य यथेष्टमाचरति, स एव दृढशकटीरवाक्यताडनं प्राप्तुमर्हति, न सदृशः गुरुजनानुरक्तः इति भावः; यद्वा,—यत्किञ्चनकारिणम्—अकिञ्चनम्, अल्पबुद्धिसामर्थ्यादिकमिति यावत्, बाल्यसुलभक्रीडनाद्यनुरक्तम्, अत एव राज्यशासनादिदुरूहव्यापारानभिज्ञत्वात् अधीग्यमिति भावः। अपुष्पभूतिवंशसम्भूतमिव—पुष्पभूतिः,—तन्नामा आदिराजः, तस्य वंशे—अन्ववाये, असम्भूतमिव—अनुत्पन्नमिव; यः तादृशस्य सुनयस्य पुष्पभूतेः वंशे समुत्पन्नः, स कथमीदृशमनयमाचरेत् शक्नुयादिति भावः। अतातनयमिव—अतातस्य—तातभिन्नस्य अन्यस्य, तनयमिव—पुत्रमिव, ["वाक्यमखिलमिति: कयन्" (उ० ४ पा० ९९ सू०) इति तनेः कयन्]; प्रख्यातधार्मिकस्य पितुः पुत्री भूत्वा ईदृशं धर्मविगर्हितं कर्म्माणि प्रवृत्तिः मे कदाऽपि न सम्भवेदिति भावः।

(८९) अनात्मानुजमिव—अनात्मनः,—आत्मभिन्नस्य, अनुजमिव—कनिष्ठभ्रातरमिव; एवं निःस्नेहस्य अस्य भ्रातुर्मे ईदृशी दुराकाङ्क्षा असम्भवा एवेति भावः। अभक्तमिव—अननुरक्तमिव; अननुरक्ते एवंविधम् अप्रियमवश्यं वक्तुं युज्यते, न सर्व्वथाऽनुरक्ते मयि इति भावः। दृष्टदोषमिव—कृतापराधमिवेत्यर्थः; अपराधिनः भ्रातुः एवंविधस्य त्यागः कदाचिद् युज्यते, न निर्दोषस्य ममेति भावः।

(९०) श्रौत्रियमिव सुरापाने, सद्भृत्यमिव स्वामिद्रोहे, सज्जनमिव नीचोपसर्पणे, सुकलत्रमिव व्यभिचारे, अतिदुष्करे कर्मणि समादिष्टवान् ? (९१) तदेतत् तावत् अनुरूपं यत्, शौर्य्योन्मादमदिरोन्मत्त-समस्तसामन्तमण्डल-समुद्रमथन-मन्दरे तादृशि पितरि मृते तपोवनं वा गम्यते, वल्कलानि वा गृह्यन्ते, तपांसि वा सेव्यन्ते ? या तु मयि (९२) राज्याज्ञा, सा दग्धे-

(९०) श्रौत्रियमिव—वेदपारगमिव, ("श्रौत्रियश्छान्दसौ समौ" इत्यमरः) सुरापाने—मद्यपाने; केनचित् सुरां पातुमादिष्टेन श्रौत्रियेण यथा तत्कर्म्म अतिदुष्करं भवति, तथेति भावः। स्वामिद्रोहे—प्रभोरनिष्टाचरणे, सद्भृत्यमिव—उत्तमं किङ्करमिव; प्रभोरनिष्टाचरणे केनचित् नियुक्तेन प्रभुभक्तदासेन यथा तत्कर्म्म न सुकरं भवति, तथेति भावः। नीचोपसर्पणे—हीनानुगमने, प्राकृतजनसेवायामित्यर्थः, सज्जनमिव—साधुजनमिव; केनचित् बलात् नीचसेवायां प्रवर्त्तितेन उत्तमप्रकृतिकेन यथा तत्कर्म्म न सुकरं भवति, तथेति भावः। व्यभिचारे—परपुरुषप्रसक्तौ, सुकलत्रमिव—सतीं स्त्रियमिव; केनचित् बलात् व्यभिचारे नियोजितया पतिव्रतया यथा तत्कर्म्म जीवनसंशयेऽप्यनादरणीयं भवति, तथेति भावः। अतिदुष्करे—अतिदुर्वहे, दुःखेनापि कर्त्तुमशक्ये इत्यर्थः, ज्येष्ठकर्मोल्लङ्घनरूपे इति भावः; कर्म्मणि—राजपदग्रहणरूपकार्य्ये, कनिष्ठानुरूराज्यचिन्तायामिति भावः। इह सन्दर्भे शङ्काऽसूयाऽधैर्य्यवितर्कदैन्यविमोहादीनां शबलता विद्युद्दायजविषयकरतिभावस्याङ्गम्, इति भावशबलीऽलङ्कारः।

(९१) एतत्—वक्ष्यमाणतपोवनगमनादिरूपं कर्म्म इत्यर्थः, अनुरूपं—युक्तम्। शौर्य्येति।—शौर्य्योन्मादेन—पराक्रमजनितौद्धत्येन, मदिरोन्मत्ता इव—सुरापानमत्ता इव, ये समस्ताः,—सर्वे, सामन्ताः,—अधीश्वराः, तेषां मण्डलं—चक्रवालम् एव, समुद्रः,—सागरः, तस्य मथने—विलोडने, मन्दरः,—मन्दराख्यो गिरिः तस्मिन्। तादृशि—प्रख्याते वीरे, समुद्धतराजन्यगणविजेतरि इत्यर्थः, जङ्गाश्यान्तर्हितसाररत्नसमुच्चयानामुद्धर्त्तरि इत्यर्थश्च; एतेन उन्मत्तोन्मादभञ्जनपुरःसररत्नाविष्कारः, विजिगीषोः परलोकस्थभूपालस्य लोकोपकारार्थकः, न तु हिंसार्थकः इति व्यज्यते। सेव्यन्ते—चर्य्यन्ते।

(९२) राज्याज्ञा—राजकार्य्यादेशः। दग्धे—सन्तप्ते, पितृशोकेन प्रखरसूर्य्य-

ऽपि दाहकारिणी मयि अवग्रहग्लपिते धन्वनि इव अङ्गार-वृष्टिः। तत् असदृशम् इदम् आर्यस्य। यद्यपि च (९३) विभुः अनभिमानः, द्विजातिः अनेषणः, मुनिः अरोषणः, कपिः अचपलः, (९४) पण्डितः अमत्सरः, वणिक् अतस्करः, रम्यजानिः अकुहनः, साधुः अदरिद्रः, (९५) द्रविणवान् अखलः, कौनाशोऽनच्चिगतः, मृगयुः अहिंस्रः, (९६) पाराशरी

किरणेन च इति भावः। अवग्रहग्लपिते—अवग्रहः,—प्रतिबन्धः, पितृमरणरूपविघ्न इत्यर्थः, वृष्टिरोधश्च, ("अवग्रहो वृष्टिरोधे प्रतिबन्धे गजालिके" इति मेदिनी) तेन ग्लपिते—ग्लानिं नीते; अवसन्न विगुप्ते च इति भावः। धन्वनि इव—मरौ इव, ("समानौ मरुधन्वानौ" इत्यमरः) अङ्गारवृष्टिः,—अग्निस्फुलिङ्गवर्षणम्। असदृशम्—अयुक्तम्, अनुचितमित्यर्थः; दग्धदाहनमप्रयोजनमित्याशयः।

(९३) विभुः,—प्रभुः, अनभिमानः,—निरहङ्कारः। द्विजातिः,—ब्राह्मणः, अनेषणः,—निरभिलाषः, अयाचक इत्यर्थः, अधिगतार्थतिरस्कर्त्ता इत्यर्थो वा। मुनिः, —तापसः, अरोषणः,—अक्रोधनः। कपिः,—वानरः, अचपलः,—अचञ्चलः, धीर इत्यर्थः।

(९४) पण्डितः,—विद्वान्, ["पण्डितः" इत्यत्र "कविः" इति पाठेऽपि स एवार्थः] अमत्सरः,—अन्यगुणद्वेषरहितः। वणिक्—व्यवसायी, अतस्करः,—अचौरः। रम्यजानिः,—रम्या—प्रिया, सुन्दरीत्यर्थः, जाया—भार्या यस्य तथोक्तः, सुन्दरभार्य इत्यर्थः, ["रम्यजानिः" इत्यत्र "प्रियजानिः" इति पाठे,—प्रिया—प्रियदर्शना, सुन्दरी-त्यर्थः] अकुहनः,—नास्ति कुहना—ईर्ष्या शङ्का वा यस्य तथाभूतः, ("कुहना दम्भ-चर्य्यायामीर्ष्यायाञ्च" इति मेदिनी) परपुरुषभयवर्জ্জित इत्यर्थः, स्त्रियाः पुरुषान्तरा-सक्तिशङ्कायून्यः "भार्य्या रूपवती शत्रुः" इत्यादिप्रामाण्यात् इति भावः। साधुः,— सज्जनः, खलतावर्জ্জित इत्यर्थः, अदरिद्रः,—धनी।

(९५) द्रविणवान्—धनी, अखलः,—अदुर्জनः, भद्र इत्यर्थः। कौनाशः,— क्षतान्तः, क्षुद्रश्च, नीचाशय इत्यर्थः, ("क्षतान्ते पुंसि कौनाशः क्षुद्रकार्षिककर्षीस्त्रिषु" इत्यमरः) अनच्चिगतः,—अदृश्यः, प्रिय इति यावत्, ("देये त्वच्चिगतः" इत्यमरः) मृगयुः,—व्याधः, [मृगं यातीत्यर्थे "मृगयुादयश्च" (उ० १ पा० १८ सू०) इति कुप्रत्यये निपातनम्] अहिंस्रः,—हिंसावर्জ্জित इत्यर्थः।

(९६) पाराशरी—भिक्षुः, ("भिक्षुः परिव्राट् कर्म्मन्दी पाराशर्य्यपि मस्करी"

ब्राह्मण्यः, सेवकः सुखी, कितवः कृतघ्नः, (९७) परिव्राट् बुभुक्षुः, नृशंसः प्रियवाक्, अमात्यः सत्यवादी, (९८) राजसूनुः अदुर्विनीतश्च जगति दुर्लभः, तथाऽपि मम आर्य्य एव आचार्य्यः। को हि नाम (९९) तद्विधे निपतिते राजगन्धकुञ्जरे जनयितरि, (१००) दृष्टशे च विफलीकृतविशालशिलास्तम्भोरुभुजे भूभुजि भ्रातरि त्यक्तराज्ये ज्यायसि नववयसि तपोवनं गच्छति, (१०१) सकललोकलोचनजलपातात्प्लावितं

इत्यमरः) ब्राह्मण्यः,—ब्राह्मणानुष्ठानरतः। सेवकः,—भृत्यः। कितवः,—धूर्तः, द्यूतकृदित्यर्थः, ("धूर्त्तोऽक्षदेवी कितवोऽक्षधूर्त्तौ द्यूतकृत्समाः" इत्यमरः)। कृतघ्नः,—कृतोपकारवित्।

(९७) परिव्राट्—यतिः, बुभुक्षुः,—भोजनार्थी, प्रायः दृश्यते ब्रह्मसमाधिमग्नानां भोजनाभिलाषः कादाचित्कः आश्रितसेवकानुरोधेन, न तु स्वेच्छयेत्याशयः; ["परिव्राट् बुभुक्षुः" इत्यत्र परिव्राड्बुभुक्षुः" इति पाठे,—परितो व्रजति गच्छतीति परिव्राट्—पर्य्यटकः, दूराच्चविहरणशील इत्यर्थः, अबुभुक्षुः,—अभोजनेच्छुः, अक्षुधित इत्यर्थः]। नृशंसः,—निष्ठुरः, प्रियवाक्—मधुरभाषी। अमात्यः,—राजकर्म्मचारी, सत्यवादी—सत्यभाषणशीलः; शासनतन्त्रे सर्व्वत्र सत्यशीलत्वेन न कार्य्यसिद्धिः इत्याशयः।

(९८) राजसूनुः,—राजतनयः, अदुर्विनीतः,—सुशील इत्यर्थः; राजपक्षे मां दुर्विनीतं मत्वा यद्यत्तदुक्तवान् ममार्य्य इति भावः। आचार्य्यः,—गुरुः, उपदेष्टा इत्यर्थः; आर्य्यः यथा माम् अभिचयत्, तथैव मया शिक्षितमिति भावः।

(९९) तद्विधे—तादृशे; निरुपमप्रतापशालिनि इति भावः। राजेति।—राजा एव गन्धकुञ्जरः,—गन्धहस्तिः तस्मिन्। जनयितरि—पितरि।

(१००) दृष्टशे—एवम्भूते। विफलीकृतेति।—विफलीकृतौ—हतौकृतौ इति यावत्, विशालौ—विपुलौ, महाभारौ इत्यर्थः, शिलास्तम्भौ—प्रस्तरस्थूणे याभ्यां तादृशौ, उरू—महान्तौ, भुजौ—बाहू यस्य तथाभूते, भुभुजि—भूपतौ। ज्यायसि—अग्रजे। नववयसि—यौवने।

(१०१) सकलेति।—सकलानां—सर्वेषां, लोकानां—जनानां, लोचनजलस्य—बाष्पवारिणः, पातेन—वर्षणेनेत्यर्थः, आप्लावितं—समन्तात् व्याप्तं, पङ्किलं इति

सट्टीलके वसुधाऽभिधाने (१०२) धनमदखेलनिखिलखलमुख-विकारलक्षणाख्यायमाननीचाचरणां (१०३) सुभटकुटुम्ब-कर्म्मकुम्भदासीं श्रीसंज्ञिकां चण्डालः कामयेत? कथमिव सम्भावितम् अत्यन्तम् अनुचितम् इदम् आर्य्येण? (१०४) किम् उपलक्षितम् अनवदातम् इदं मयि? किं वा अस्य चेतसः च्युतः सौमित्रिः? विस्मृता वा दुकोदरप्रभृतयः?

यावत्। सट्टीलके—सट्टीखण्डे, अतितुच्छे इति भावः, वसुधाऽभिधाने—पृथिव्याख्ये।

(१०२) धनमदेति।—धनमदेन—ऐश्वर्यगर्वेण, खेलाः,—क्रीडा येषां तथाभूताः, ये निखिलाः,—समग्राः, खलाः,—दुर्जनाः, तेषां मुखविकाराणां—वदनभङ्गीनां, लक्षणेन—चिह्नेन, आख्यायमानं—कथ्यमानं, सूच्यमानमिति यावत्, नीचाचरणं—निकृष्टव्यवहारः यस्याः ताम्। आश्रयभूतानां दुष्टानां धनिनां नीचतासूचकविकृतमुखभङ्ग्यादिदर्शनेन तदाश्रितायाः लक्ष्म्या अपि नीचाचारवत्त्वमनुमितम् आधाराधेययोः अभेदाध्यवसायात् इति बोद्धव्यम्।

(१०३) सुभटेति।—सुभटानां—सुवीराणां, शूराणामिति यावत्, कुटुम्बस्य—परिवारस्य, कर्म्म—सेवारूपं कार्य्यं, तत्र कुम्भदासीं—जलवाहिनीं किङ्करीं ताम्; तस्याः पराक्रमलभ्यत्वात् वीरकुटुम्बानां किङ्करत्वं बोद्धव्यम्। श्रीसंज्ञिकां—लक्ष्मीनाम्नीम्। कामयेत—अभिलषेत्। अयजे तपोवन गते नाहं राज्यलक्ष्मीम् अभिलषामि इति समयवाक्यार्थः; यद्यहं राजलक्ष्मीकामुकः, तदा मां चण्डालाधमं जानीयुः लोका इति भावः। ["सकललोक···कामयेत" इत्यत्र "सकललोकलोचनजलपातापवित्रं सट्टीलकं वसुधाऽभिधानं धनमदखेलनिखिलखलमुखविकारलक्षणाख्यायमाननीचाचरणां श्रीसंज्ञिकां सुभटकुटुम्बकर्म्मकुम्भदासीं चण्डालोऽपि कामयेत?" इति पाठे,—सकललोकलोचनजलपातेन अपवित्रं—दूषितं, सट्टीलकं श्रीसंज्ञिकाञ्च चण्डालोऽपि कामयेत? चण्डालोऽपि न कामयेत इत्यर्थः। अस्मिन् पक्षे उभयोरेव कर्म्मत्वम्; पूर्व्वपक्षे—"सट्टीलके" इत्यस्य अधिकरणत्वं, सट्टीलके स्थितं इति भावः]। सम्भावितम्—आश्रयितम्। अनुचितम्—अन्याय्यं, साधुजनविगर्हितमित्यर्थः।

(१०४) किं—कथम्। उपलक्षितम्—अनुमितम्। अनवदातम्—अशुभं, मलिनमित्यर्थः, अयशस्करमिति यावत्। चेतसः,—मनसः। च्युतः,—प्रभ्रष्टः।

(१०५) अनपेक्षितभक्तजना स्वार्थैकनिष्पादननिष्ठुरा न आसीत् इयमार्यस्य ईदृशी प्रभविष्णुता? अपि च आर्ये तपोवनं गते जिजीविषुः को हि नाम महीं मनसाऽपि ध्यायेत्? (१०६) कुलिशशिखरखरनखर-प्रचय-प्रचण्ड-चपेटापाटितमत्तमातङ्गोत्तमाङ्गमदच्छटाच्छुरित-चारुकेसरभारभास्वरमुखे केशरिणि वनविहाराय विनिर्गते

सौमित्रिः,—लक्ष्मणः। बकोदरप्रभृतयः,—भीमसेनादयः; तेषां सौभ्रात्रं किमार्थेण विस्मृतम्? येनाहं भ्रातृद्रोही इव एवमादिष्टः? इति भावः; यथा रामस्य अनुजो लक्ष्मणः, यथा वा युधिष्ठिरस्य अनुजा भीमादयः ज्येष्ठानुगामिन आसन्, तथा अहमपि ज्येष्ठमेव तम् अनुवर्त्ते इति तात्पर्यम्।

(१०५) अनपेक्षितेति।—न अपेक्षिताः,—अनुकूलाः, भक्तजनाः,—सेवकजनाः, यया तथाभूता, अगणितानुगतजनसुखदुःखा इति यावत्। स्वार्थेति।—स्वार्थस्य—स्वकार्यस्य, एकं—केवलं, निष्पादनं—सम्पादनं, तेन निष्ठुरा—नृशंसा, स्वार्थमात्र-सम्पादनपरायणा, न तु परार्थपरा इति भावः। प्रभविष्णुता—प्रभुता। ["भुवश्च" (३।२।१३८ पा०) इति इष्णुच् कृन्दस्येव कथमत्र प्रयोगः तत्रेत्युच्यते,—"जगत्प्रभो-रप्रभविष्णु वैष्णवम्" इत्यादिवत् लोकेऽपि तथाप्रयोगात् कवीन्द्रनिरङ्कुशत्वावलम्बनात् इति समाधेयम्, व्याकरणलक्षणहीनत्वात् च्युतसंस्कृतापददोषो नाकलनीयः इति दिक्] आर्यस्य इयं प्रभविष्णुता ईदृशी अनपेक्षितभक्तजना स्वार्थैकसम्पादननिष्ठुरा न आसीदित्यन्वयः। जिजीविषुः,—जीवितुमिच्छुः।

(१०६) कुलिशेति।—कुलिशस्येव—वज्रस्येव, शिखरम्—अग्रं यस्य तथाभूतः यः, खरनखराणां—तीक्ष्णनखानां, प्रचयः,—समूहः, तेन प्रचण्डः,—दारुणः, यश्चपेटः,—प्रतलः, विस्तृताङ्गुलिः पाणिरित्यर्थः, करतलाघात इति यावत्, ("पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुली" इत्यमरः) तेन आपाटितः,—निपातितः, यो मत्तमातङ्गः,—मदहस्ती, तस्य उत्तमाङ्गे—शिरसि, या मदच्छटाः,—दानधाराः, ताभिः क्षुरितेन—रञ्जितेन; आघातवेगेन उत्प्लुत्य लग्नत्वात् इति भावः; चारुणा—मनोहरेण, केसरभारेण—जटाजालेन, भास्वरं—दीप्तं, ["स्यभास—" (३।२।१७५ पा०) इत्यादिना वरच्] मुखं—वदनं यस्य तथाभूते। केशरिणि—सिंहे। वन-विहाराय—काननपर्यटनाय, तपोवननिवासायेति ध्वनिः।

(१०७) निवासं गिरिगुहां कः पाति पृष्ठतः? प्रताप-सहाया हि सत्त्ववन्तः। (१०८) कः चपलां लक्ष्मीं प्रति आर्य्यस्य,—यत् इयमपि चीरान्तरितकुचा कुशकुसुममसमित्पलाशपूलिकां वहन्ती तत्रैव तपोवने वनमृगी इव न नीयते जराजालिनी? किं वा मम अनेन वृथा बहुधा

(१०७) निवासं—वासभूमिम्। पृष्ठतः,—पश्चात् स्थितामिति भावः। पाति—रक्षति। स्वप्रतापपराजितपराक्रान्तप्रतिपक्षनृपतिचक्रे आर्य्ये तपोवनं गते तन्निवासभूतामिमां राजधानीं को रक्षति इति ध्वनिः। पदार्थहेतुकाव्यलिङ्गालङ्कृतिः व्यङ्ग्या इति चमत्कारातिशयः। सत्त्ववन्तः,—महाऽनुभावाः, प्रतापसहायाः,—प्रतापः,—कोषदण्डजतेज एव, सहायः,—अनुकूलः येषां तथोक्ताः। सत्त्ववन्तो हि किञ्चिदक्लान्ताऽपि स्वप्रभावेणैव सर्व्वान् वशमानेतुं प्रभवन्ति इत्यर्थः। एतेन किमप्यकुर्व्वत्यपि ज्येष्ठे अत्र स्थित्वा एव राज्यं सुरक्षितं स्थास्यति, अन्यथा एतस्य रक्षणं दुष्करमिति व्यज्यते।

(१०८) चपलाम्—अस्थिरां, लक्ष्मीं—राजश्रियं, प्रति आर्य्यस्य—ज्येष्ठस्येत्यर्थः, अयम्—एषः, अनुरोधः,—उपरोधः, आग्रहः इत्यर्थः, कः,—कोऽर्थः? यत्—यदि, इयं—लक्ष्मीः, चीरान्तरितकुचा—चीरं—वल्कलं जीर्णवसनखण्डं वा, तेन अन्तरितौ—आवृतौ, कुचौ—स्तनौ यस्याः तथाभूता। ["यत इयमपि चीरान्तरितकुचा" इत्यत्र "यदि इयमपि न चीरान्तरितकुचा" इति पाठान्तरम्]। कुशैरिति।—कुशाः,—दर्भाः, कुसुमानि—पुष्पाणि, समिधः,—काष्ठानि, पलाशाः,—पत्राणि, तेषां पूलिका—समूहः तां, तापसीमुलभामिति भावः; स्वयमपि प्रयत्नेन एतत् सर्वं वहति; वहन्ती—दधाना, तत्रैव तपोवने—आर्य्याधिष्ठिताश्रमे। न नीयते—न प्राप्यते, स्वयमेव न गम्यते इत्यर्थः, यद्येनं लक्ष्मीर्नानुसरति इति भावः; यद्वा,—न नीयते—नेतुं न शक्यते, आर्य्येणेति शेषः, ["न नीयते" इत्यत्र "नीयते" इति पाठान्तरम्]। जराजालिनी—जरायाः जालं—कैशशुक्लतादिकम् अस्या अस्ति इति तथाभूता, अतिस्थविरा इत्यर्थः, पुरुषपरम्परयागतत्वेन सनातनी इति भावः। मया दुर्वहा चिरन्तनी इयं लक्ष्मीः तपोवने यदि न आर्य्यमनुसरति, तस्यास्तु तथा प्रकृतेः अभावात्, तदा तस्याः पालने कोऽयम् आग्रहः तत्रभवतः इत्याशयः। यदि सा आर्य्यं नापेक्षते, तदा आर्य्येणापि तदपेक्षा निष्प्रयोजना इति निष्कर्षः।

(१०९) विकल्पितेन ? तूष्णीमेव आर्य्यम् अनुगमिष्यामि। गुरुवचनातिक्रमकृतञ्च किल्बिषम् एतत् तपोवनं तप एव अपास्यति" इति अवधार्य्य मनसा प्रथमतरं गतस्तपोवनम् अधोमुखः तूष्णीम् अवातिष्ठत।

(११०) अत्रान्तरे पूर्व्वादिष्टेन एव रुदता वल्कर्म्मान्तिकेन समुपस्थापितेषु वल्कलेषु, (१११) निर्दयकरतलताड़नभिया इव क्वापि गतहृदये रटति राजस्त्रैणे, (११२) तारम् अन्नाख्यम् ऊर्द्धदोष्णि विरुदति विप्रजने,

(१०९) विकल्पितेन—मयालोचितेन, अनुशोचनेन इति यावत्। तूष्णीमेव—मौनमास्थाय एव इत्यर्थः, किमप्युत्तरमदत्त्वैवेति यावत्। गुर्व्वीति।—गुरोः,—ज्येष्ठस्य, वचनातिक्रमेण—वाक्यलङ्घनेन, राज्यग्रहणरूपादेशाकरणेनेत्यर्थः, कृतं—जनितं, किल्बिषं—पापं, ("पापं किल्बिषकल्मषम्" इत्यमरः)। तपः,—चान्द्रायणादिकं व्रतं, ("…तपो लोकान्तरेऽपि च। चान्द्रायणादौ धर्म्मे च पुमान् शिशिरमाघयोः॥" इति मेदिनी)। अपास्यति—क्षपयिष्यति, अपनेष्यति इत्यर्थः। अवधार्य्य—निश्चित्य, प्रथमतरं—ज्येष्ठस्य गमनात् अतिपूर्व्वमित्यर्थः। अवातिष्ठत—अवर्त्तत।

(११०) "अत्रान्तरे" इत्यादौ "संवादको नाम…सदसि आत्मानमपातयत्" इत्यत्रेणान्वयः। पूर्व्वादिष्टेन—पूर्व्वमादिष्टेन। वल्कर्म्मान्तिकेन—परिच्छदाधिकारिणा। समुपस्थापितेषु—समीपमानीतेषु। वल्कलेषु—तरुत्वक्, तापसोचितपरिधेयेषु इति यावत्।

(१११) निर्दयेति।—निर्दयं—निष्करुणम्, उत्कटमित्यर्थः, तद् यथा तथा, करतलेन—पाणितलेन, ताड़नम्—आघातः, तस्मात् भीः,—भयं तया इव। गतहृदये—गतं—चलितं, हृदयं—चेतः यस्य तथाभूते, मूढमनसि इत्यर्थः; अचेतनप्राये इति भावः, ["गतहृदये" इत्यत्र "गते हृदये" इति पाठान्तरम्]। रटति—नदति, सार्त्तस्वरं रुदतीत्यर्थः, राजस्त्रैणे—राजास्त्रीपरिजने।

(११२) तारम्—उच्चैः यथा तथा, ऊर्द्धदोष्णि—उत्क्षिप्तबाहौ। अन्नाख्यम्—अवध्यीक्रियाविशेषः, ("अन्नाख्यम् अवध्यीकौ" इत्यमरः) तत [समुहीयेत्यध्याहृतक्रियायाः कर्म्मपदं द्वितीयान्तम्] मा अस्मान् परित्यागेन अहीयेवंरूपं वचनपूर्व्वकमित्यर्थः, विरुदति—विशेषेण क्रन्दति।

(११३) पादप्रणतिपरे फूत्कुर्व्वति पौरवृन्दे, विद्राति विद्रुतचेतसि चिरन्तने परिजने, परिजनावलम्बिते वेपमानवपुषि पर्य्याकुलवासमि शोकगद्गदवचमि गलितनयनपर्यमि निवारणोद्यतमनमि वर्षीयमि विशति बन्धुवर्गे, (११४) निराशेषु नखलिखितमणिकुट्टिमेषु अवाङ्मुखेषु निश्वसत्सु सामन्तेषु, सबाष्पवृद्धासु तपोवनाय प्रस्थितासु सर्व्वासु प्रजासु, सहसा एव प्रविश्य (११५) शोकविक्लवः प्रचरितनयनसलिलो राज्यश्रियः परिचारकः संवादको नाम प्रज्ञाततमो विमुक्ताक्रन्दः सदसि आत्मानम् अपातयत्।

(११३) पादप्रणतिपरे—चरणपतनपरायणे। फूत्कुर्व्वति—चीत्कारं कुर्व्वति इत्यर्थः, मुक्तकण्ठं रुदतीति यावत्। पौरवृन्दे—पुरवासिवर्गे। विद्राति—धावति, विद्रुतचेतसि—विचलितमनसि, चिरन्तने—पुरातने, ["सायञ्चिरं—" (४।३।२३ पा०) इत्यादिना ट्युः तुडागमश्च] वंशपरम्परागते इत्यर्थः, परिजने—परिचारकवर्गे। परिजनावलम्बिते—परिवारगृहीतहस्ते इत्यर्थः; वार्द्धकात् स्वयमागन्तुमसामर्थ्यादिति भावः। वेपमानवपुषि—कम्पमानदेहे। पर्य्याकुलवासमि—विस्रस्तवसने; कठोरसंवादश्रवणेन ससम्भ्रमागमनादिति भावः। शोकेति।—शोकेन—मन्युना, गद्गदम्—अस्पष्टमित्यर्थः, बाष्पावरुद्धकण्ठत्वादिति भावः; वचः,—वचनं यस्य तथाभूते। गलितनयनपर्यसि—चरितनेत्रवारौ। निवारणेति।—निवारणाय—प्रतिषेधाय, तपोवनगमनायेत्यस्य इति भावः; उद्यतं—प्रवृत्तं, कर्त्तव्यमित्यर्थः, मनः,—चित्तं यस्य तथाभूते। वर्षीयसि—अतिवृद्धे। ["वृद्धशब्दात् "द्विवचन—" (५।३।५७ पा०) इत्यादिना ईयसुनि "प्रियस्थिर—" (६।४।१५७ पा०) इत्यादिना वृद्धस्य वर्ष्यादेशः] बन्धुवर्गे—ज्ञातिसमूहे।

(११४) निराशेषु—हताशेषु। नखेति।—नखैः,—कररुहैः, लिखितानि—अङ्कितानि, कृतरेखाणीत्यर्थः, मणिकुट्टिमानि—रत्नखचितगृहाभ्यन्तरतलानि यैः तथोक्तेषु। अवाङ्मुखेषु—अधोमुखेषु। निश्वसत्सु—निश्वासं त्यजत्सु, आयतमिति शेषः, सामन्तेषु—अधीनभूपतिराजेषु। प्रस्थितासु—प्रस्थातुमुद्यतासु इत्यर्थः।

(११५) शोकविक्लवः,—मन्युविह्वलः। प्रचरितेति।—प्रचरितं—प्रकर्षेण स्रुतं, नयनसलिलं—नेत्रजलं यस्य तादृशः। राजश्रियः,—तदाख्यायाः राज्यवर्द्धन-

अथ (११६) सम्भ्रान्तो भ्राता सह स्वयं देवो राज्यवर्द्धनः तं पर्य्यपृच्छत्,—"भद्र ! भण भण, किम् अस्मद्व्यसनव्यवसाय-वर्द्धनबद्धधृतिः (११७) अवनिपतिमरणमुदितमतिः अधृतिकरम् अपरम् अधिकतरम् इतः समुपनयति विधिः ?" इति। स कथङ्कथमपि अकथयत्,—"देव ! पिशाचानामिव (११८)नीचात्मनां चरितानि छिद्रप्रहारीणि प्रायशो भवन्ति ; यतो यस्मिन् अहनि अवनिपतिः उपरत इति अभूत् वार्त्ता, तस्मिन्नेव देवो ग्रहवर्म्मा दुरात्मना मालवराजेन जीवलोकम् आत्मनः सुकृतेन

भगिन्याः। प्रज्ञाततमः,—अतिपरिचित इत्यर्थः, इतः पूर्व्वं प्रभाकरवर्द्धनस्यैव परिचारकत्वादिति भावः। विमुक्ताक्रन्दः,—उच्चैः रुदन्नित्यर्थः। सदसि—सभायाम्।

(११६) सम्भ्रान्तः,—सम्भ्रमोद्विग्नः। पर्य्यपृच्छत्—अन्वयुङ्क्त। अस्मदिति।—अस्माकं व्यसनानि—विपदः एव, व्यवसायाः,—वाणिज्यानि, तेषां वर्द्धने—अभ्युन्नतिकरणे, बद्धा—निश्चला, धृतिः,—धैर्य्यं सन्तोषः वा येन तथाभूतः, अस्मद्विपद्वर्द्धनैकपर इत्यर्थः।

(११७) अवनीति।—अवनिपतेः,—राज्ञः प्रभाकरवर्द्धनस्य, मरणेन—मृत्युना, मुदिता—प्रहृष्टा, मतिः,—बुद्धिः यस्य तथाविधः ; तत्कर्त्तृत्वं स्वप्रभावं प्रकटायितुमुद्यत इति भावः। अधृतिकरम्—असन्तोषकरम्, अधैर्य्यकरं वा। इतः,—अस्मात्, पितोः व्यसनादिति भावः। समुपनयति—समुपस्थापयति। विधिः,—दैवम्। इह प्रतिपक्षगतबलवत्त्वात्मगतदुर्बलत्वयोः समुल्लेखात् प्रत्यनीकालङ्कृतिः।

(११८) नीचात्मनां—क्षुद्रचेतसां, दुरात्मनामित्यर्थः। चरितानि—स्वभावाः। छिद्रप्रहारीणि—छिद्रेषु—रन्ध्रेषु, प्राप्तेषु इति भावः, प्रहरन्ति—आघातयन्तीति तथाविधानि, अन्यदा प्रहारसाहसाभावात् इत्याकूतम्। अवनिपतिः,—राजा, प्रभाकरवर्द्धन इत्यर्थः। उपरतः,—मृतः। वार्त्ता—जनश्रुतिः, ("वार्त्ता स्त्री जनश्रुतौ" इत्यमरः)। ग्रहवर्म्मा—प्रभाकरवर्द्धनस्य जामाता। जीवलोकं—प्राणिपूर्णं जगत्, इहलोकमित्यर्थः। आत्मनः,—स्वस्य, मालवराजस्येति यावत्, सुकृतेन—पुण्येन, येन सुकृतेन स एतावन्तं कालं जीवितोऽपि, ग्रहवर्म्मविनाशनेन तस्य

सह त्याजितः। (११९) भर्तृदारिकाऽपि राजश्रीः कालायसनिगडयुगलचुम्बितचरणा चौराङ्गना इव संयता कान्यकुब्जे कारायां निक्षिप्ता। किंवदन्ती च, यथा किल अनायकं साधनं मत्वा जिघृक्षुः सुदुर्मतिः एतामपि भुवम् आजिगमिषति, इति विज्ञापितं प्रभुः प्रभवति" इति।

ततश्च तादृशम् (१२०) अनुपेक्षणीयम् असम्भावितम् आकस्मिकम् अपरं व्यतिकरम् आकर्ण्य, अश्रुतपूर्वत्वात् परिभवस्य, परपरिभवासहिष्णुतया च स्वभावस्य, दर्पबहुलतया

तस्मृतमपि चयं गतम्; चौरपुरुषस्य तस्य अचिरेणैव भवाङ्गविनङ्क्षमाणत्वादिति भावः। त्याजितः,—क्षापितः, परलोकं प्रापित इत्यर्थः।

(११९) भर्तृदारिका—राजसुता, ("राज्ञो भट्टारकी दैवतात्सुता भर्तृदारिका" इत्यमरः)। कालेति।—कालायसनिगडयुगलन—कृष्णलौहनिर्मितशृङ्खलाद्वयेन, चुम्बितौ—वेष्टितौ, चरणौ—पादौ यस्याः तथाभूता। चौराङ्गना इव—तस्करनारीव। संयता—बद्धा। कान्यकुब्जे—तदाख्यतद्देशीयप्रधाननगरविशेषे। कारायां—बन्धनागारे। किंवदन्ती—जनश्रुतिः। अनायकम्—अराजकं, साधनं—सैन्यं, ("साधनं मृतसंस्कारे सैन्ये सिद्धौषधौ गतौ" इति मेदिनी)। जिघृक्षुः,—आचिक्रमिषुः। एतामपि भुव—राज्य, श्रीकण्ठजनपदमित्यर्थः, आजिगमिषति—आगन्तुमिच्छति। विज्ञापितं—निवेदितं, मयेति शेषः। प्रभवति—समर्थो भवति; सोदरप्रययदुवर्म्मविश्रसनप्रतिशोधने, भर्तृदारिकाया उद्धारे राज्यरक्षणे च यत्कर्त्तव्यं, तत्कर्त्तुमर्हति इति भावः।

(१२०) अनुपेक्षणीयम्—अकर्त्तव्यापेक्षं, नावहेलनीयमित्यर्थः। असम्भावितम्—अतर्कितम्। आकस्मिकं—सहसा उपस्थितम्। व्यतिकरं—व्यसनं, विपदमित्यर्थः, ("अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदिनी)। परिभवस्य—अवमानस्य इत्यर्थः, अश्रुतपूर्वत्वात्—पूर्वं कदाऽपि अश्रुतत्वादित्यर्थः, ["भूतपूर्वे चरट्" (५।३।५३ पा०) इत्यत्र पूर्वनिपातनिर्देशात् सर्वत्र क्वान्ते पूर्वशब्दस्य पूर्वनिपातनम् इति ज्ञेयम्]। परेति।—परात्—अन्यस्मात्, यः परिभवः,—तिरस्क्रियया, अवमाननमित्यर्थः, ("परिभवः परीभावः तिरस्क्रियया" इत्यमरः) तस्य असहिष्णुतया—असहनशीलतया। दर्पबहुलतया—

च नवयौवनस्य, (१२१) वीरचेत्रसम्भवत्वाच्च जन्मनः, क्षपाभूमिभूतायाश्च स्वसुः स्नेहात्, स ताटशोऽपि बद्धमूलोऽपि अत्यन्तगुरुः एकपद एव अस्य ननाश शोकावेगः ; विवेश च सहसा केशरीव गिरिगुहाग्रहं गम्भीरं हृदयं भयङ्करः कोपावेगः । (१२२) केशिनिसूदनशङ्काऽऽकुलकालियकुलभङ्गुरभ्रूभङ्गतरङ्गिणी श्यामायमाना यमस्वसा इव प्रथीयसि ललाट-

---

अहङ्कारप्रबलतया, नवयौवनस्य—अचिरोद्गततारुण्यस्य, नवयौवनसुलभदर्पवशादित्यर्थः ।

(१२१) वीरेति ।—वीराणां—शूराणां, चेत्रं—भूमिः, उत्पत्तिस्थानमित्यर्थः, वीरप्रसविनी भूमिरिति यावत् ; यद्वा,—वीरस्य—शूरस्य, चेत्रं—कलत्रं, वीरपत्नीत्यर्थः, शूरवतीति भावः ; यद्वा,—वीरस्य—प्रभाकरवर्द्धनस्य इत्यर्थः, चेत्रं—शरीरं, पुत्रस्य अङ्गजत्वादिति भावः, ("चेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" इति मेदिनी) तस्मात् सम्भवः,—समुत्पत्तिः यस्य तथाभूतः, तस्य भावः तत्त्वात् । क्षपाभूमिभूतायाः,—दयाऽर्हायाः इत्यर्थः, स्वसुः,—भागिन्याः, राज्यश्रियः इत्यर्थः । बद्धमूलः,—दृढ़ इत्यर्थः । एकपद एव—तत्काल एव, अवसरक्षण एव इत्यर्थः, ("एकपदं तत्काले नपुंसकम्" इति मेदिनी) । अस्य—राज्यवर्द्धनस्य, ननाश—नाशं गतः । विवेश—डुढौके, आश्रयामासेत्यर्थः । केशरीव—सिंह इव ।

(१२२) केशीति ।—केशी नाम अश्वाकारः कश्चिदसुरविशेषः, तस्य निसूदनः,—घातनः, कृष्णः इत्यर्थः, तस्मात् शङ्का—भयं, तेन आकुलं—विह्वलमित्यर्थः, कालियस्य—तदाख्यस्य नागविशेषस्य, यमुनावासिन इति भावः, कुलं—वंशः, सर्पराजीत्यर्थः, तद्वत् भङ्गुराः,—कुटिलाः, आकुञ्चिता इत्यर्थः, ये भ्रूभङ्गाः,—भ्रूविकारभेदाः, तेषां तरङ्गाः,—ऊर्म्मयः ; भ्रूसङ्कोचनेन ललाटे वलिप्रादुर्भावात् तरङ्गवच्छेदवत्त्वादिति भावः, सन्ति अस्यामिति तथाभूता ; अन्यत्र,—केशिनिसूदनशङ्काकुलानि कालियकुलानि यस्यां सा, सा च भङ्गुरा—भङ्गप्रवणा, तटभङ्गशीला इत्यर्थः, वक्रतासमन्विता इत्यर्थो वा, सा चासौ भ्रूभङ्गतरङ्गिणी चेति कर्म्मधारयः, भ्रुवोः भङ्गाः इव,—तिर्य्यक्चालनानीव तरङ्गाः, इत्युपमितसमासः, ते सन्त्यस्यामिति भ्रूभङ्गतरङ्गिणी । श्यामायमाना—कृष्णकाया इत्यर्थः, उभयत्रापि समानम् आचारार्थप्रत्ययवत्त्वात् ; यमस्वसा इव—यमुना इव, ("यमुना यमनस्वसा" इत्यमरः) ।

पट्टे भीषणा भ्रुकुटिः उदभिद्यत। (१२३) दर्पात् परामृशन् नखकिरणसलिलनिर्झरैः समरभारसम्भावनाऽभिषेकमिव चकार दिङ्नागकुम्भकूटविकटस्य बाहुशिखरकोषस्य वामः पाणिपल्लवः। (१२४) सङ्गलत्स्वेदसलिलपूरितोदरो निर्मूलं मालवोन्मूलनाय गृहीतकेश इव दुर्मदश्रीकचग्रहोत्कण्ठया

प्रथीयसि—अतिविस्तीर्णे। भीषणा—भयङ्करी। भ्रुकुटिः—भ्रूकौटिल्यम्। उदभिद्यत—उद्गतं गता इत्यर्थः, [कर्मकर्तरि प्रयोगः]। उद्रिक्तकोधानामुद्दाम्यानां प्राथमिककोधोदयज्ञापकमेतत्, "व्योम्नीव भ्रुकुटिच्छलेन" इत्यादिष्वपि तथैवार्थसामञ्जस्यात् इत्याशयः।

(१२३) दर्पात्—अहङ्कारात्। परामृशन्—स्पृशन्। नखेति।—नखानां—करजहाणां, किरणा एव—प्रभा एव, सलिलानि—जलानि, तेषां निर्झरैः,—प्रवाहैः, ("प्रवाहो निर्झरो झरः" इत्यमरः)। समरेति।—समरभारः,—सङ्ग्रामधुरा, तस्य सम्भावनं—ग्रहणं, तस्मिन् अभिषेकः,—स्नानं तमिव। दिङ्नागेति।—दिङ्नागस्य—ऐरावतस्य, कुम्भ एव—शिरःस्थमांसपिण्ड एव, मस्तकांश एवेति यावत्, ("कुम्भौ घटिभमूर्द्धांशौ" इत्यमरः) कूटः,—शृङ्गं, तद्वत् विकटः,—भीषणश्चासौ। बाहुशिखरमिव—हस्तोपरिभाग एव, कोषः,—खड्गपिधानं, सकोषः खड्ग इति भावः, ("कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः) तस्य। पाणिपल्लवः,—करकिसलयः। वामः पाणिपल्लवः परामृशन् बाहुशिखरकोषस्य समरभारसम्भावनाऽभिषेकमिव चकार इत्यन्वयः।

(१२४) सङ्गलदिति।—सङ्गलता—निःसरता, अतिक्रोधोदयादिति भावः; स्वेदसलिलेन—घर्मोदकेन, पूरितं—भरितम्, उदरं—तलभागः यस्य तथोक्तः। निर्मूलं—निःशेषं यथा तथेत्यर्थः। मालवेति।—मालवस्य—तद्देशाधिपस्येत्यर्थः, उन्मूलनाय—विनाशाय। गृहीतकेश इव—केशाः गृहीताः यस्य स इव, [निष्ठायाः बहुव्रीहौ पूर्वनिपातः] केशेषु गृहीत इव इत्यर्थः, श्रिया इति शेषः; तूर्णं मालवः श्रियतां इति त्वरयितुमिति भावः। दुर्मदेति।—दुर्मदया—मदोद्धतया, श्रिया—राजलक्ष्म्या, यः कचग्रहः,—मां विहाय क्व यास्यसि इति ज्ञात्वा केशाकर्षणं, तेन या उत्कण्ठा—उत्कलिका, उद्वेग इत्यर्थः, तया इव; यद्वा,—दुर्मदायाः,—मदोद्धतायाः, गर्व्वान्धायाः इत्यर्थः, श्रियाः,—मालवराजलक्ष्म्या इत्यर्थः, कचग्रहः,—दण्डदानार्थम्

इव च क्रम्यमानः पुनरपि समुत्सर्पं भीषणं कृपाणं पाणिः अपरः। (१२५) शस्त्रग्रहणमुदितराजलक्ष्मीक्रियमाणदिष्ट-हृद्विधुतसिन्दूरधूलिः इव कपिलः कपोलयोः अदृश्यत रोषरागः। (१२६) समासन्नसकलमहीपालचूडामणिचक्राक्रमणजाताहङ्कार इव च समारुरोह वामम् ऊरुदण्डम् उत्तानितः चरणो दक्षिणः। (१२७) निष्ठुराङ्गुष्ठकर्षणनिष्ठूत-

आत्माधीनीकरणार्थेन्च केशाकर्षणा, तस्यै उत्कण्ठा—उद्वेग इत्यर्थः, तयैव; स्त्रियाः केशाकर्षणस्य विगर्हितया तत्कर्तुमुद्यतस्य कम्पोऽजनीति वेदितव्यम्; यद्वा,—कामिनीकचग्रहणं प्रति उत्कण्ठावान् कन्दर्पवशश्च खिन्नाङ्गः कम्पते इति लोके दृश्यते। समुत्सर्पं—उपजगाम, ग्रहीतुम् इति शेषः। कृपाणं—खड्गम्। अपरः,—दक्षिणः। क्रौधस्यायिनः रौद्रस्य तदनुभावस्य स्वेदाङ्गस्य सात्त्विकविकारत्वसम्भावनया अङ्गारानुकूलतायाः, परिपन्थिरसाङ्गपरिग्रहरूपा रसदोषः, "रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि" इत्यालङ्कारिकानुशासनात् इति शेषम्।

(१२५) शस्त्रेति।—शस्त्रस्य—असेः इत्यर्थः, प्राक् त्यक्तस्य इति भावः; ["सर्वधातुभ्यः ष्ट्रन्" (उ० ४ पा० १५८ सू०) इति ष्ट्रन्] ग्रहणेन—धारणेन, मुदिता—हृष्टा, स्वस्य नाथवत्त्वाशया इति भावः; या राजलक्ष्मीः,—राजश्रीः, प्रेयसी इति भावः; तया क्रियमाणा—विधीयमाना, या दिष्टहृद्धिः,—आनन्दोत्सवः, तया विधुता—विक्षिप्ता, सहर्षं त्यक्ता इत्यर्थः, या सिन्दूरधूलिः,—नागसम्भवपरागः, सीसकीभूतरक्तवर्णचूर्णविशेष इति यावत्, ("सिन्दूरं नागसम्भवम्" इत्यमरः) सा इव। कपिलः,—पाटलः, रोषरागः,—क्रोधजनितशोणिमा।

(१२६) समासन्नेति।—समासन्नानां—समुपस्थितानां, सकलानां—सर्वेषां, महीपालानां—राज्ञां, चूडामणयः,—शिरोरत्नानि, तेषां चक्रेण—समूहेन, आक्रमणं—ग्रहणं, प्रणिपातावसरं इति भावः, तेन जातः,—उत्पन्नः, यः अहङ्कारः,—गर्वः स इव, मूर्त्तिमानहङ्कार इवेत्यर्थः। उत्तानितः,—उत्तोलित इत्यर्थः। दक्षिणः,—अपसव्यः, चरणः,—पादः, वामं—सव्यम्, ऊरुदण्डम्—ऊरुः,—सक्थि, दण्डः इव—यष्टिरिव तं, समारुरोह—आचक्राम, आश्रितवान् इत्यर्थः; वामोरौ दक्षिणं चरणमवस्थाप्य आसाञ्चक्रे राज्यबन्धेन इति भावः। शत्रुनिर्जये निःसंशयत्वस्यापिका वीरत्वव्यञ्जका च महासत्त्वपुरुषसाधारणी प्रौढ़ासनमुद्रेयम्।

(१२७) निष्ठुरेति।—निष्ठुरं—दृढ़ यथा तथा, अङ्गुष्ठस्य—पादाङ्गुष्ठस्येत्यर्थः,

धूमलेखो निर्वीरोर्वीकरणाय विमुक्तशिख इव लिलेख मणिकुट्टिमम् इतरः पादपद्मः। (१२८) दर्पस्फुटितसरसव्रणोच्छलितरुधिरच्छटाऽवसेकैः शोकविषप्रसुप्तं प्रबोधयन् इव पराक्रमम् अनुजमवादीत्,—"आयुष्मन्! इदं राजकुलम्, अमी बान्धवाः, परिजनोऽयम्, इयं (१२९) भूमिः, भूपतिभुजपरिघपालिताश्च एताः प्रजाः; गतोऽहमद्यैव मालवराजकुल-

---

कर्षण—घर्षणं, भूमौ इति भावः, तेन हेतुनानिष्ठ्यूता—निश्चिप्ता, धूमलेखा—धूमराजिः, रजोनिकर इति भावः, येन तथाभूतः। निर्वीरोर्वीकरणाय—पृथिवीं निर्वीरां कर्तुमित्यर्थः। विमुक्तशिखः,—विमुक्ता—विसृष्टा, शिखा—ज्वाला येन तथोक्तः; घोरः किल रोषेण केशसंयमनं शत्रोः आपरिभवतिरस्कारं न कुर्वन्ति इति भावः। इतरः,—वाम इत्यर्थः, पादपद्मः,—चरणकमलम्; तथा तेजोवत्तया अग्निरूप इति भावः, ["वा पुंसि पद्मम्" इत्यमरानुशासनात् पद्मशब्दोऽव पुंलिङ्गः प्रयुक्तः। कोषकारसम्मतोऽपि पुंलिङ्गः पद्मशब्दः कवीन्द्रैः न क्वापि प्रयुक्तः, कविसमयप्रसिद्धलिङ्गपरित्यागेन केनाप्यप्रयुक्तालिङ्गप्रयोगेन च दोषः अप्रयुक्ततारूपः अवाप्ति इत्यवधेयम्]। मणिकुट्टिमं—मणिखचितगृहतलम्। लिलेख—सञ्जघर्ष।

(१२८) दर्पेति।—दर्पेण—क्रोधवेगजनितेन संरम्भण इति भावः, स्फुटितेभ्यः,—स्फुटन प्राप्तेभ्यः, विदीर्णेभ्यः इत्यर्थः, अत एव सरसेभ्यः,—आर्द्रेभ्यः, व्रणेभ्यः,—क्षतेभ्यः; भूतपूर्वसङ्ग्रामे प्रतिवारप्रहितशस्त्रा घातजनितेभ्य इति भावः; उच्छलितानां—वेगेन निर्गलितानां, रुधिराणां—रक्तानां, छटाभिः,—धाराभिः, ये अवसेकाः,—अभिषेकाः तैः। शोकेति।—शोकः,—मन्युः एव, विषं—गरलं, तेन प्रसुप्तः,—आच्छन्न इत्यर्थः, विमोहं गतः इति यावत्, तम्। पराक्रमं—शौर्यमित्यर्थः, प्रबोधयन्निव—जागरयन्निव, रुधिरसलिलसेचनैः अपनीतमोहं कुर्वन्निव इत्यर्थः; शोकविषेण विगतसंज्ञस्येव पराक्रमस्य प्रत्युज्जीवनार्थं शोणितच्छटाभिरभिषेकः पराक्रमस्योपरि अकारीति भावः; दृश्यते हि विषविमुग्धस्य उपरि सलिलेन सेचनमिति। शोके विषत्वारोपेण रुधिरच्छटायामवसेकत्वारोपात् परम्परितं रूपकमलङ्कारः, प्रबोधयन्निवेति क्रियोत्प्रेक्षया सङ्कीर्यते। अनुजं—हर्षमित्यर्थः।

(१२९) भूमिः,—देशः, राज्यमित्यर्थः। भूपतीति।—भूपतेः—राज्ञः, पितुरिति भावः, भुजः,—बाहुरेव, परिघः,—लोहमुद्गरविशेषः, तेन पालिताः,—रक्षिताः, प्रजाः,—प्रकृतिपुञ्जा इत्यर्थः, स्थिता इति शेषः; राजकुलादिकमेतत् सर्वं

प्रलयाय। (१३०) इदमेव तावत् वल्कलग्रहणम्, इदमेव तपः, शोकापगमोपायश्च अयमेव, यत् अत्यन्ताविनीतारिनिग्रहः। (१३१) सोऽयं कुरङ्गकैः कचग्रहः केशरिणः, भेकैः करपातः कालसर्पस्य, वत्सकैः वन्दिग्रहो व्याघ्रस्य, अलगर्दैः गलग्रहो गरुडस्य, दारुभिः दाहादेशो दहनस्य, तिमिरैः तिरस्कारो रवेः, यो मालवैः परिभवः पुष्यभूतिवंशस्य। (१३२) अन्तरितः तापो

तवैव अधिकारि मुखापेक्षितया स्थितं, त्वमिदानीमेतत् शत्रुभ्यो रक्षयित्वा यथान्यं राजधर्ममनुवर्त्तयस्व इति भावः। मालवेति।—मालवराजानां—मालवाधिपानां, कुलस्य—वंशस्य, प्रलयाय—अन्ययाय, विनाशाय इत्यर्थः।

(१३०) इदमेव—अरिनिग्रहणमेवेत्यर्थः, वल्कलग्रहणं—वृक्षत्वक्परिधानं, तादृशव्रतविशेष इत्यर्थः। तपः,—तपश्चरणम्; शोकापगमोपायः,—शोकविनाश-साधनम्। अत्यन्तेति।—अत्यन्तम्—अत्यधिकम्, अविनीतस्य—दुर्विनीतस्य, उद्धतस्य इत्यर्थः, अरेः,—शत्रोः, निग्रहः,—व्यापादनम्; अरिनिग्रहणमेवाक्षाक्षं विधिबोधितं मुख्य व्रतं विनोदनोपायभूतञ्च इति भावः।

(१३१) सोऽयं—मालवकृतपरिभव इत्यर्थः। कुरङ्गकैः,—मृगैः, केशरिणः,—सिंहस्य, कचग्रहः,—केशाकर्षणरूपम्, एवेति रूपकालङ्कारः, एवमुत्तरत्र। भेकैः,—दर्दुरैः, करपातः,—हस्तक्षेपः, करतलप्रहार इत्यर्थः, कालसर्पस्य—कृष्णसर्पाख्यस्य सद्योमारकविषधरविशेषस्य, मुखे अङ्गे वेति शेषः। "करपातश्चपेटाघातः" इति केचित्। वत्सकैः,—गोशिशुभिः, व्याघ्रस्य—शार्दूलस्य, वन्दिग्रहः,—कारावद्धरूप-तया नयनमित्यर्थः। अलगर्दैः,—जलव्यालैः, जलसर्पैरित्यर्थः, विषमूर्त्तेरिति भावः, ("अलगर्दो जलव्यालः" इत्यमरः) गलग्रहः,—गले ग्रहणं, कण्ठवेष्टनमित्यर्थः। दारुभिः,—काष्ठैः, अग्निदाह्यैरिति भावः, दाहादेशः,—दाहस्य आज्ञादानम्। दहनस्य—अग्नेः, खभक्षकस्य इति भावः। तिमिरैः,—अन्धकारैः, तिरस्कारः,—निर्भर्त्सनम्, आच्छादनमिति भावः। रवेः,—सूर्यस्य, तिमिरारिरिति भावः। मालवैः,—मालववंशीयैः राजभिरित्यर्थः। परिभवः,—तिरस्कारः, अवमाननमित्यर्थः। इहैकस्य पुष्यभूतिवंशस्य मालवैः परिभवे बहुष्वेवोपमानभूतेषु तादात्म्या-रोपात् मालारूपकालङ्कृतिः इति ज्ञेयम्।

(१३२) अन्तरितः,—व्यवहितः, आच्छादित इत्यर्थः। तापः,—शोक-

मे महीयसा मन्युना। तिष्ठन्तु सर्व्व एव राजानः करिणश्च त्वया एव सार्द्धम्, अयमेको (१३३) भण्डिः अयुतमात्रेण तुरङ्गमाणाम् अनुयातु माम्" (१३४) इत्यभिधाय च अनन्तरमेव प्रयाणपटहम् आदिदेश।

(१३५) तञ्च तथा समादिशन्तम् आकर्ण्य जामिजामातृवृत्तान्तविज्ञानप्रकोपाधानदूयमाने मनसि (१३६) निवर्त्तनादेशेन दूरप्रकृढ़प्रणयपीड़ इव प्रोवाच देवो हर्षः,—"कमिव

ज्वलनम्। महीयसा—अतिमहता, मन्युना—क्रोधेन। तिष्ठन्तु, अवैवेति शेषः। राजानः,—मत्सदोयसामन्तनृपाः। करिणः,—गजाः। सार्द्धं—सह; विपदं: चेत् राजधानी आक्रान्ता भवेत्, तदा तद्रक्षणायेत्याशयः।

(१३३) भण्डिः,—राज्यवर्द्धनस्य मातुलपुत्रः। अयुतमात्रेण—दशसहस्रसङ्ख्यानात्रेण, सहेति शेषः, तुरङ्गमाणाम्—अश्वानां, दशसहस्राश्वारोहिसैन्यसमेतो भण्डिरित्यर्थः। अनुयात्—अनुसरतु; अतिमतां परिवृढानां सेनायाः परिच्छदरूपतयैष नियोगः, न साहाय्यायेति निगूढाशयः।

(१३४) इति—इत्थम्, अभिधाय—आख्याय, चकारोऽत्र विनियोगे, परत्र सम्बन्धवत्त्वात् इति सङ्गतः। प्रयाणपटहं—युद्धयात्रावाद्यविशेषम्।

(१३५) तं—राज्यवर्द्धनम्। तथा—पूर्वोक्तप्रकारं, सराजकरिवरादिसङ्गसमेतस्य हर्षस्य तत्रैवावस्थानमित्यर्थः। समादिशन्तम्—आज्ञापयन्तम्। जामीति।—जामिः,—स्वसा, भगिनीत्यर्थः, ("जामिः स्वसृकुलस्त्रियोः" इत्यमरः) जामाता—तत्पतिः, [जायां माति इति विग्रहे, "नप्तृनेष्टृ—" (उ० २ पा० ९६ सू०) इत्यादिना तृच्] अतिप्रिय इत्यर्थः, तव कन्यकापतिसम्बन्धाभावात्, तयोः; यद्वा,—जामिः,—भगिनी, तस्याः जामाता—श्वः, पतिरित्यर्थः, तस्य, भगिनीपतेरित्यर्थः ("जामाता दुहितुः पत्यौ सूत्यावर्त्ते धवे पुमान्" इति मेदिनी) वृत्तान्तस्य—कारावासोपरमरूपवार्त्तायाः, विज्ञानेन—श्रवणत्या, यः प्रकोपः,—प्रबलक्रोधः, तस्य आधानेन—आवेशेन, दूयमाने—सन्तप्यमाने तस्मिन्। मनसि—चित्ते, चित्तस्य तादृशावस्थाया मित्यर्थः।

(१३६) निवर्त्तनादेशेन—निवर्त्तनम्—अनुगमननिवृत्तिः, तस्य आदेशेन—आज्ञया। दूरेति।—दूरम्—अत्यन्तं यथा तथा, प्रकृढ़ा—जाता, प्रणयपीड़ा—

दोषं पश्यति आर्य्यो मम अनुगमनेन ? (१३७) यदि बाल इति,—नितरां तर्हि न त्याज्योऽस्मि । (१३८)रक्षणीय इति,—भवद्भुजपञ्जरं रक्षास्थानम् । (१३९) अशक्त इति,—क्व परीक्षितोऽस्मि ? संवर्द्धनीय इति,—वियोगः तनूकरोति। (१४०) क्लेशसह इति,—स्त्रीपदे निक्षिप्तोऽस्मि । सुखम् अनुभवतु इति,—त्वया एव सह तत्प्रयाति । महान् अध्वनः

प्रार्थनाभङ्गः, अभिमानजदुःखमित्यर्थः, यस्य तथाभूतः, सोदरैकशरणस्य आत्मनः तादृग्योक्तत्तादृग्याया भ्रातुस्तथाविधोदासीन्यादेग्यवधात् कृतात्यधिकाभिमान इव इत्यर्थः।

(१३७) यदि बालः,—शिशुः, इति—इति धिया इत्यर्थः, अनुगमने निवर्त्तयति आर्य्य इति शेषः, तर्हि—तदा, बालत्वे सत्यपि इति भावः, नितराम्—अतिशयेन, कथमपीति भावः, न त्याज्योऽस्मि—हातव्योऽस्मि, भवता इति शेषः ; बालकं मां परित्यज्य पितृव्यानीयेन भवता कुत्रापि न गन्तव्यमिति भावः ; सहैव नेतव्योऽहम् इति फलितम् ।

(१३८) रक्षणीयः,—पालनीयः, इति, धियेति चेदिति शेषः, तदपि न वक्तव्यमिति भावः, यतः भवदिति ।—भवतः,—तव, भुजपञ्जरं—बाहुपिञ्जरम् ; पञ्जरमध्ये अवस्थितस्य विपत्तेरभावादिति भावः ; रक्षास्थान—शरणास्पदम् ; भवद्भुजपञ्जरे निर्भयं स्थितिरेव मम औचित्यमिति भावः ; त्वयि गते को मां रक्षिष्यति ? अतः त्वया सहैव मे गन्तव्यमिति निष्कर्षः ।

(१३९) अशक्तः,—अबलः, इति धियेति चेत् ? तत्रोत्तरम् ;—क्व—कुत्र, विषये इति शेषः, परीक्षितोऽस्मि—समर्थो वा असमर्थो वा इति निरूपितोऽस्मि, भवतेति शेषः ; न कुत्रापि विषये अशक्तोऽहमिति परीक्षितवान् आर्य्य इति भावः। संवर्द्धनीयः,—स्थूलदेहः करणीयः, इति धियेति चेत् । वियोगः,—भवद्विच्छेद इत्यर्थः, तनूकरोति—कृशीकरोति, निरुत्साहं करोति वा, मामिति शेषः, तद्धियाघातात् जीवनसंशये कुतो वर्द्धनमिति भावः ।

(१४०) क्लेशसहः,—न क्लेशं सोढुं शक्यः, इति धियेति चेत् ? तत्रोत्तरम् ;—स्त्रीपदे,—नारीस्थाने, निक्षिप्तोऽस्मि—न्यासितोऽस्मि ; क्लेशासहतया नारीरूपलेनाहं भवता परिगणितोऽस्मीति भावः । सुखम्—आनन्दम्, अनुभवतु—भुङ्क्ताम्, इति

क्लेश इति,—विरहोऽविषह्यतरः। (१४१) कलत्रं रक्षतु इति,—श्रीस्ते निस्त्रिंशेऽधिवसति। पृष्ठतः तिष्ठतु इति,—तिष्ठति एव प्रतापः। (१४२) राजकम् अनधिष्ठितमिति,—तत् सुबद्धम् आर्य्यगुणैः। न वाह्यः सहायो महत इति,—व्यतिरिक्तमिव मां गणयति। प्रलघुपरिकरः प्रयामि इति,—

धियेति चेत्? तत्रोत्तरम्;—तत्—सुखम्; त्वयि गते नाहं सुखेन स्थास्यामि, महदुःखजननायैव तव गमनप्रवृत्तिरिति भावः। अध्वनः,—पथः। विरहः,—तव विच्छेदः, अविषह्यतरः,—अतिशयेन सोढुमशक्य इत्यर्थः; त्वद्वियोगक्लेशात् अध्वपर्य्यटनक्लेशः अतीव सुबद्ध इति भावः।

(१४१) कलत्रं—स्त्रियं, स्त्रीलोकमित्यर्थः। श्रीः,—लक्ष्मीः, स्त्रीति भावः। निस्त्रिंशे—तरवारौ। [अधिपूर्व्वकात् वसतेरधिकरणस्य कर्म्मत्वानुशासनात् "निस्त्रिंशे" इत्यस्य कर्म्मत्वापत्तिः, अत्र तदकरणात् व्याकरणलक्षणहीनत्वेन च्युतसंस्कारत्वरूपः दोषः विज्ञेयः।] अधिवसति—तिष्ठति; तव खड्गबलेनैव तत्पुरश्चितं भवति, न तत्र मम किमपि उपयोगित्वं सामर्थ्यं वा इति भावः। पृष्ठतः,—पृष्ठशत्रुनिवारणायेति भावः। प्रतापः,—कोषदण्डजं तेजः, अरातिपरिभाविशक्त्युत्कर्षो वा, तवेति शेषः; येन पृष्ठशत्रवः दूरात् निरस्यन्ते इति भावः; तत्रापि न मे काऽपि आवश्यकता इति फलितम्।

(१४२) राजकं—राजन्यवर्गः, अनधिष्ठितम्—अनाश्रितम्, अनायकमिति यावत्; त्वया मदनुगामिना इति शेषः; अन्यमाश्रयिष्यतीति भावः; इति विचार्य्यते चेत्? तत्रोत्तरम्;—तत्—राजकम्, आर्य्यगुणैः,—आर्य्यस्य—भवत इत्यर्थः, गुणाः,—और्य्यदाक्षिण्यादयः तैः, सुबद्धं—सुसंयतम्, अतिशयेन अधीनीकृतमिति यावत्, दृढानुरागरूपाभ्युपपत्तिशृङ्खलासंयतानां परिस्खलनाशङ्काऽपि न वर्त्तते इत्याशयः। महतः,—महाऽनुभावस्य, बाह्यः,—बहिः स्थितः, खेतर इत्यर्थः। सहायः,—सहकारीत्यर्थः, न, उपयुज्यते इति शेषः; स्वेनैव सर्व्वार्थसाधकत्वादिति भावः; इति—इत्यवगम्यते चेत्? तत्रोत्तरम्;—व्यतिरिक्तमिव—भिन्नमिव, अनात्मीयमिवेत्यर्थः, मां गणयति—विचारयति, आर्य्य इति शेषः; नाहम् आर्य्याङ्घ्रिः, तवैवांशभूत इति भावः। प्रलघुपरिकरः,—स्वल्पपरिच्छदः, अल्पपरिजन इति यावत्; आडम्बराधिक्ये गमनविलम्बादिति भावः। प्रयामि—गच्छामि। इत्यायहेय चेत्?

पादरजसि कोऽतिभारः ? (१४३) द्वयोः गमनम् असाम्प्रतमिति,—माम् अनुगृह्णाग गमनाज्ञया। कातरो भ्रातृस्नेह इति,—सदृशो दोषः। (१४४) का इयम् आत्मम्भरिता भुजस्य ते, यत् एकाकी क्षीरोदफेनपटलपाण्डुरम् अमृतमिव यशः पिपासति ? (१४५) अवञ्चितपूर्व्वोऽस्मि प्रसादेषु।

तर्कोत्तरम्।—पादरजसि—चरणधूलौ, तत्कृत्ये मयि इति भावः; अतिभारः,—गुरुत्वमेव इति यावत्; पादसंसक्तं रजः यद्वा नातिभारमृतं भवति, तद्वत् अहमपि ज्ञातव्यः त्वयेति भावः।

(१४३) द्वयोः,—उभयोः, भावयोरिति भावः। असाम्प्रतम्—अयुक्तम्; नगरस्य रक्षित्वभावादिति भावः। अनुगृह्णाग—अनुकम्पस्व; मामेव गमनाय अनुमन्यस्व, त्वमिहैव तिष्ठ इति समुदितवाक्यार्थः। उत्तरमिदम् आत्मन एव प्राथमिकाभियानप्रार्थनरूपमित्यवधातव्यम्। एतेन सिंहासनादिरक्षा भवत्प्रतापेन सुसाध्या, तेन हि विपक्षनियहः अमर्षवानायाससाध्यः इति व्यज्यते। कातरः,—भीतः, विपदाशङ्कया आकुल इत्यर्थः; विपत्सङ्कुलं रणक्षेत्रं त्वां नेतुं बिभेमि इति चेत् इति भावः। सदृशः,—तुल्यसम्बन्धवतः सोदरत्वस्य इत्यर्थः, भावाभावयोः उभयत्र समानदुःखदायकत्वात् इति भावः; यद्वा,—सदृशः,—तुल्यः, दोषः,—दूषणम्, अनिष्टशङ्का इत्यर्थः; मयि भ्रातरि स्नेहात् तव यादृशी दोषाशङ्का, त्वयि भ्रातर्य्यपि सहजभक्तिभावात् समापि तादृशी एव अनिष्टाशङ्का इति भावः।

(१४४) ["का इयम्" इत्यत्र "का चेयम्" इति पाठान्तरम्]। आत्मम्भरिता—स्वार्थैकपरतेति भावः। ["फलेग्रहिरात्मम्भरिश्च" (२।२।२६ पा०) इत्यात्मनो मुमागमः भृञ् इन् निपात्यते] क्षीरोदेति।—क्षीरोदस्य—क्षीरसागरस्य फेनपटलं—फेनराशिः, तद्वत् पाण्डुरं—शुभ्रं, यशः,—कीर्त्तिं, अनुनाशत्रूनिति भावः। एकाकी—एकः एव, पिपासति ?—पातुमिच्छति ? अनुजीविजनं वञ्चयित्वा एकाकिनो एवाहं तादृशयशःपीयूषं पास्यामि इति पिपासुता तव भुजस्य, इत्यहो ! अतीव स्वार्थपरता ते, ईदृशी स्वार्थपरता तु नोचिता इति भावः।

(१४५) भवत्येकाकिनी एव पिपासुता, तत्र को दोषः ? इत्यवाह, अवञ्चितेति।—अवञ्चितपूर्व्वः,—अप्रतारितपूर्व्वः, प्राक् त्वया कदाऽपि न प्रतारित इत्यर्थः। प्रसादेषु—अनुग्रहेषु; इतः पूर्व्वं सदैव तव प्रसादमुपभुज्य कृतार्थोऽभवम्, इदानीमपि तदधिकारात् मा वञ्चयस्व इति भावः।

तत्प्रसीदतु आर्यः, नयतु मामपि" इत्यभिधाय क्षितितल-विनिहितमौलिः पादयोः अपतत्।

(१४६) तम् उत्थाप्य पुनः अग्रजो जगाद,—"तात! किमेवम् अतिमहारम्भपरिग्रहणेन गरिमाणम् आरोप्यते बलात् अतिलघीयानपि अहितः? (१४७) हरिणार्थम् अतिक्लेपणः सिंहसम्भारः। तृणानाम् उपरि कति कवचयन्ति आशुशुक्षणयः? अपि च तव (१४८) अष्टादशद्वीपाष्टमङ्गलक-मालिनी मेदिनी अस्ति एव विक्रमस्य विषयः। न हि कुल-

(१४६) तं—हर्षम्। उत्थाप्य—उत्तोल्य। अग्रजः,—ज्येष्ठः, राज्यवर्द्धन इत्यर्थः। तात!—वत्स! अतीति।—अतिमहान्—भूयान् इत्यर्थः, आरम्भः,—उद्योगः, तस्य परिग्रहणम्—आश्रयणं तेन। अतिलघीयानपि—अतिक्षुद्रोऽपि, अहितः,—शत्रुः, बलात्—बलमाश्रित्य, निरर्थकमिति भावः; गरिमाणं—गौरवम्, आरोप्यते—नीयते, त्वयेति शेषः। महारम्भेण लघुसत्त्वे सदृशप्रतिभटता समा-रोपिता भवेत् इति निगूढाशयः।

(१४७) हरिणार्थं—मृगवधार्थमित्यर्थः, सिंहसम्भारः,—सिंहस्य—मृगेन्द्रस्य, सम्भारः,—विशिष्टप्रयास इत्यर्थः, अतिक्लेपणः,—अतिलज्जाकरः; क्षुद्रहरिणवधार्थं सिंहस्य सायासकसमबन्धः यथा लज्जाजनकः निष्प्रयोजनश्च, तथा अतिलघुसालववधिना-शाय उभयोरेव गमनमसौ लज्जाकरं निष्प्रयोजनञ्चेति निष्कर्षः। कति—कियन्-मात्राः, ["किमः—" (५।२।४१ पा०) इत्यादिना सङ्ख्यापरिमाणार्थे डतिप्रत्ययः] आशुशुक्षणयः,—अग्नयः, ("अग्निर्वैश्वानरो वह्निः···। ···शिखावानाशुशुक्षणिः॥" इत्यमरः) कवचयन्ति—सन्नह्यन्ति, कवचावृतशरीरा भवन्तीत्यर्थः; स्फुलिङ्गमात्र-संयोगेनैव तृणानि अवलीलया अनलेन भस्मावशेषाणि क्रियन्ते, अतः तृणवल्लघु-सालववधिनाशाय विपुलायोजनं दीप्ततेजसस्ते गमनञ्च निरर्थकमेवेति भावः।

(१४८) अष्टादशेति।—अष्टादशद्वीपान्येव अष्टमङ्गलकानि—कङ्कणानि, स्त्रीणां माङ्गल्यालङ्कारः कङ्कणम् इति भावः, तेषां माला—श्रेणिः विद्यतेऽस्याः तथाभूता; यद्वा,—अष्टादशद्वीपानि, "लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताश-नः। हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः॥" इत्युक्तानि अष्टमङ्गलानि च, तेषां माला विद्यते अस्याः ताहशी; विषयः,—स्थानम्; अष्टादशद्वीपाष्टमङ्गल-

शैलनिवहवाहिनो वायवः सन्नह्यन्ति अतितरले तूलराशौ। (१४९) न सुमेरुवप्रप्रणयप्रगल्भा वा दिक्करिणः परिणमन्ति अणीयसि वल्मीके। (१५०) ग्रहीष्यसि सकलपृथ्वीपतिप्रलयोत्पातमहाधूमकेतुं मान्धाता इव चारुचामीकरपल्लताऽलङ्काराङ्कायं कार्मुकं ककुभां विजये। मम तु

समन्विता मेदिन्यपि त्वया लेतुं समर्था, अतः अतितुच्छमालवजये तव प्रयाणं स्वयमक्लेशं सागरं तर्तुं समर्थस्य गोष्पदोत्तरणाय तरणीसङ्गम इव प्रतिभाति इति भावः। कुलेति।—कुलशैलानां—महेन्द्रादीनां प्रागुक्तानां सप्तानां कुलपर्व्वतानां, निवहान्—समूहान्, सप्त इति यावत्, वहन्ति—स्थानात् स्थानान्तरं नयन्तीति तथाभूताः। अतितरले—अतिचपले, अतिलघौ इत्यर्थः। सन्नह्यन्ति—कवचयन्ति, कवचेन स्वदेहं सन्नद्धयन्तीत्यर्थः, पराक्रमं प्रदर्शयन्तीति भावः; तूलराशिवत् निःसारमालवोन्मूलनाय कुलाचलवद्दृढसत्त्वनृपचक्रोन्मूलनसमर्थस्य तव गमनं निष्प्रयोजनमेव इति निष्कर्षः।

(१४९) सुमेरोरिति।—सुमेरोः,—काञ्चनाद्रेः, वप्रेषु—तटेषु, ("वप्रस्तातेऽनानस्त्री रेणौ क्षेत्रे चये तटे" इति मेदिनी) यः प्रणयः,—समासक्तिः, तत्र वप्रक्रीडायामिति भावः, तेन प्रगल्भाः,—धृष्टा, दुर्ललिता इति भावः, दिक्करिणः,—दिग्गजाः। अणीयसि—अतिलघुनि, वल्मीके—"ऊयीलूप" इति वङ्गभाषया प्रसिद्धे वल्मीकाख्यकीटनिर्म्मिते मृत्पिण्डे इत्यर्थः, न परिणमन्ति—न तिर्य्यग्भावेन दन्तप्रहारकारिणो भवन्तीत्यर्थः, ("तिर्य्यग्दन्तप्रहारस्तु गजः परिणतो मतः" इति कोषात्) तत्र न वप्रक्रीडामाचरन्तीति भावः; सुमेरुतटभञ्जनसमर्थस्य दिग्गजस्य वल्मीकरूपोन्मूलनप्रयास इव अवलीलया महापुरराजन्यसङ्घविनाशनसमर्थस्य ते प्रलघुमालवविनाशाय गमनेच्छा न साधीयसी इति भावः।

(१५०) सकलेति।—सकलानां—सर्वेषां, पृथ्वीपतिनां—भूपालानां, प्रलये—संहारे, यः उत्पातः,—उपद्रवव्यञ्जक इति यावत्, महान्—दारुण इत्यर्थः, धूमकेतुः,—उपद्रवविशेषः तम्; तन्निभमिति भावः। मान्धाता इव—युवनाश्वतनयप्रवीरचक्रवर्त्तिनृपविशेष इव। चारुरिति।—चारुभिः,—मनोज्ञैः, चामीकरपल्लताऽलङ्कारैः,—सौवर्णपल्लवभङ्गिरचितभूषाभिः, अङ्कः,—चिह्नं यस्य तादृशः, कायः,—अवयवो यस्य तथाभूतं, कार्मुकं—धनुः, ककुभां—दिशां, विजये—विजयार्थम् इत्यर्थः, ग्रहीष्यसि इत्यन्वयः; दिग्विजयायैव तव प्रयाणमुचितं, न तु क्षुद्रशत्रुविजयायेति भावः। कियदनन्तरमेव विजयलक्ष्मीवधूकरग्रहणप्रयाणं भवतैव सम्पा-

(१५१) दुर्निवारायाम् अस्यां विपक्षक्षपणक्षुधि क्षुभितायां क्षम्यताम् अयम् एकाकिनः कोपकवल एकः। तिष्ठतु भवान्" इत्यभिधाय च तस्मिन् एव वासरे निर्जगाम अभ्यमित्रम्।

अथ (१५२) तथा गते भ्रातरि, उपरते च पितरि, प्रोषितजीविते च भगिनीपतौ, मृतायाञ्च मातरि, संयतायाञ्च स्वसरि, स्वयूथभ्रष्ट इव वन्यः करी देवो हर्षः कथङ्कथमपि एकाकी कालं तम् अनैषीत्। (१५३) अतिक्रान्तेषु बहुषु वासरेषु कदाचित् तयैव भ्रातृगमनदुःखासिकया दत्तप्रजागरः

दनीयम् इति राज्यवर्द्धनवाक्याशयः। सन्दर्भेऽस्मिन् हरिणाद्यर्थं सिंहसम्भारादीनाम् अप्रस्तुतानां समुपन्यासानां प्रस्तुते गमननिषेधरूप एव कार्ये पर्य्यवसानात् निमित्तकाव्यलिङ्गचमत्कृतिनिचयाऽप्रस्तुतप्रशंसाऽलङ्कृतिः मान्धातैवेत्युपमया सङ्कीर्त्यत्वमनल्पम्।

(१५१) दुर्निवारायां—कथमपि निवारयितुमशक्यायां, क्षुभितायाम्—उद्दामायां, विपक्षक्षपणक्षुधि—शत्रुध्वंसनरूपायां क्षुधायाम्। क्षम्यतां—सह्यताम्। एकाकिनः,—अद्वितीयस्य, मम इति शेषः। कोपकवलः,—क्रोधग्रासः। एकः,—एकमात्रः; एकमात्रः ममैव कोपकवलविषयो मालवकुलपांसनो भवतु, न तव गमनमत्यावश्यकं आकलयामि इति भावः। वासरे—दिवसे। अभ्यमित्रम्—अभिशत्रु, शत्रुं प्रति इत्यर्थः। ["लक्षणेनाभिप्रती—" (२।१।१४ पा०) इत्यादिना समासः]।

(१५२) तथा—युद्धार्थमिति यावत्। उपरते—मृते। प्रोषितजीविते—गतासौ इत्यर्थः। भगिनीपतौ—ग्रहवर्म्मणि इत्यर्थः, ["भगिनीपतौ" इत्यत्र "जामातरि" इति पाठेऽपि स एवार्थः व्यङ्ग्यत्वेनापादनीयः। दुहितृपत्यर्थे प्रयुक्तस्य जामातृशब्दस्य भगिनीपत्यर्थे प्रयोगस्य यद्यपि न समीचीनता, तथापि असाधारणपरिचायकतया लोकव्यवहारदर्शनात् तथाविधः प्रयोगः न दोषाय इति समाधानीयम्; ज्येष्ठभ्रातुः पितृतुल्यत्वात् तथाविधः प्रयोगो वा इति]। संयतायां—कारारुद्धायाम्। स्वसरि—भगिन्यां राजश्रीनाम्न्याम्। स्वयूथभ्रष्ट इव—निजदलच्युत इव। वन्यः करी—आरण्यगजः। अनैषीत्—अतिवाहयामास।

(१५३) अतिक्रान्तेषु—अतीतेषु। तयैव—प्रागनुभूतयैवेत्यर्थः, भ्रातृगमनचर्चे यद्दुःखमनुभूतं, तेनैव दुःखेनेत्यर्थः; भ्रातृगमनदुःखासिकया—भ्रातुः,—सोदरस्य, गमनं—प्रयाणं, स्वपरित्यागेन इति भावः, तेन या दुःखासिका—

त्रिभागशेषायां त्रियामायां यामिकेन गीयमानाम् इमाम् आर्यां शुश्राव,—

द्वीपोपगीतगुणमपि समुपार्ज्जितरत्नराशिसारमपि ।
पोतं पवन इव विधिः पुरुषमकाण्डे निपातयति ॥ ३ ॥

(१५४) तां च श्रुत्वा सुतराम् अनित्यतामावनया दूयमान-

दुःखावस्थानं तेन । दत्तेति ।—दत्तः,—जनितः इत्यर्थः, प्रजागरः,—दीर्घजागरणं यस्य तथाभूतः । त्रिभागेति ।—त्रिभागः,—तृतीयः अंशः, चरमप्रहर इत्यर्थः, शेषः,—अवशिष्टः यस्याः तथाभूतायां, त्रियामायां—रात्रौ । "त्रियामा रजनौ प्राहुः त्यक्त्वाद्यत्तचतुष्टयम्" इति समयनिर्णयकाराः । यामिकेन—प्रहरिणा, प्रहरपालेन इति यावत् । इमां—वक्ष्यमाणामित्यर्थः ।

यामिकेन यदृच्छया पठितं विधिविलसितवर्णनमाश्रित्य राजकुलस्य भावि अशुभं सूचयन्नाह, द्वीपेति ।—विधिः,—दुर्दैवमिति यावत्, पवनः,—प्रतिकूलवायुरिति भावः, पोतमिव—नावमिव, अर्णवयानमिव इत्यर्थः, ["अग्निवादिभ्य इवौ" (उ० ४ पा० १७२ सू०) इति इवः] द्वीपेषु—इयोरिव दिशोः अद्भिः परिवेष्टितेषु स्थलेषु, "द्वीपाऽस्त्रियान्तरीपं यदन्तर्वारिणस्थलम्" इत्यमरानुशासनात्, जलमध्यस्थस्थलभागार्थकतया, समन्तात् जलवेष्टितभूभागेषु इत्यर्थः ; ["कृकमुर—" इत्यत्र्यं कृते, ततः "ह्रस्वरूपसर्गेभ्योऽप ईत्" (६।३।९७ पा०) इति सूत्रेण अपस्य ईत्, तथा हि, द्वौ त्रिताः द्विगताः आपो यस्मिन्निति द्वीपम्] तेषां सप्तसु अष्टादशसु वा इति भावः, उपगीताः,—कीर्त्तिताः, गुणाः,—शौर्य्यदाक्षिण्यादयः, अभङ्गुरत्वमनीक्षत्वादयश्च यस्य तथाभूतमपि, समुपार्ज्जितरत्नराशिसारमपि—समुपार्ज्जितः,—अरातिजयेन लब्धः, वणिग्वाहितत्वात् स्ववक्षसि गृहीत इत्यर्थश्च, रत्नराशिः,—रत्नाकरः, मणिसमूहश्च, तस्य सारः,—श्रेष्ठवस्तुजातश्च इत्यर्थः. येन तथाविधमपि, पुरुषं—नरश्रेष्ठमिति यावत्, अकाण्डे—सहसा, विनिपातयति—विनाशयति । एतेन राज्यवर्द्धनस्य मरणं सूचितम् । इह पोतेन सह पुरुषस्य साम्यबोधनात् उपमा, द्वीपोपगीतगुणादिरूपविशेषणस्य श्लिष्टत्वादर्थश्लेषसङ्कीर्णा, अकाण्डे इत्यादिशब्दशक्त्या राज्यवर्द्धनस्यावश्यं पतनम् आशु भविष्यति, इत्यलङ्कारोत्थापितं वस्तु व्यङ्ग्यम् इति सङ्क्षेपः । आर्या इत्तम् ॥ ३ ॥

(१५४) ताम्—आर्याम् । सुतराम्—अतिशयेन, अनित्यतामावनया—

हृदयं: प्रक्षीणभूयिष्ठायां क्षपायां क्षणमिव निद्राम् अलभत; स्वप्ने च अभ्रलिहं लोहस्तम्भं भज्यमानम् अपश्यत्। (१५५) उत्कम्पमानहृदयश्च पुनः प्रत्यबुध्यत, अचिन्तयच्च,—"किं नु खलु माम् एवम् अमी सततम् अनुबध्नन्ति दुःस्वप्नाः? स्फुरति च दिवानिशम् अकल्याणाख्यानविचक्षणम् अदक्षिणम् अक्षि। (१५६) सुदारुणाश्च अक्षुद्रक्षितिपक्षयम् आचक्षाणाः क्षणमपि न शाम्यन्ति पुनरुत्पाताः। प्रत्यहं (१५७) राहुः अविकल-

---

संसारोऽयम् अनित्यः, तेन हि अवश्याः सर्वे नियतमेव जराव्याध्यादिभिः पीड्यन्ते, कति च महापुरुषाः अकाले कालकवलिता भवन्ति, नास्ति तेषामियत्ता, न कोऽपि अत्र स्थिराः इत्यादि चिन्तया, दूयमानहृदयः,—मन्तप्यमानचित्तः, प्रक्षीणभूयिष्ठायां—प्रायेण क्षयं गतायामित्यर्थः, अत्यल्पमेवावशिष्टायामिति भावः, क्षपायां—रात्र्याम्। क्षणमिव—अत्यल्पकालमिव, [व्याप्त्यर्थे द्वितीया] इवशब्दोऽत्र वाक्यालङ्कारे। अभ्रलिहम—अभङ्कषम्, अत्युन्नतमित्यर्थः, मेघमार्गभेदितया गगनस्पृशमिति यावत्। ["वहाभ्रे लिहः" (३।२।३२ पा०) इति खश्प्रत्ययः] भज्यमानं—खण्ड्यमानं, छिद्यमानं क्रियमाणमित्यर्थः, केनापि इति शेषः। एतद्धि दुःस्वप्नदर्शनं भाव्यनिष्टसूचकमिति क्षेयम्।

(१५५) उत्कम्पमानहृदयः,—वेपमानवत्या इत्यर्थः। प्रत्यबुध्यत—अजागः। किं नु—वितर्के। एवम्—अनेन प्रकारेण, अनुबध्नन्ति—अनुसरन्ति। स्फुरति च—स्पन्दते च। दिवानिशम्—अहोरात्रम्। अकल्याणेति।—अकल्याणम्—अशुभम्, आख्यानं—कथनं, तत्र विचक्षणं—निपुणम्, अशुभसूचकमित्यर्थः, अदक्षिणं—वामं, प्रतिकूलञ्च, अक्षि—चक्षुः।

(१५६) सुदारुणाः,—अतिभयङ्कराः। अक्षुद्रेति।—अक्षुद्रस्य—महतः, श्रेष्ठस्य इत्यर्थः, क्षितिपस्य—राज्ञः, क्षयः,—नाशः तम्, आचक्षाणाः,—कथयन्तः, सूचयन्त इत्यर्थः। न शाम्यन्ति—न विरमन्ति। पुनः,—पक्षान्तरे, अपि चेत्यर्थकं वा, सविशेषपर्य्यालोचनानुभूतत्वात् पितृपरलोकवासात् प्राक् पर्य्यवेक्षणाच्च इति ज्ञातव्यम्। उत्पाताः,—उत्पतन्ति—अशुभसूचनार्थम् आविर्भवन्तीति तथोक्ताः, अशुभनिदानभूता भूकम्पोल्कापातादयः इत्यर्थः।

(१५७) राहुः,—सिंहिकासुतः। अविकलेति।—न विकलः,—विपर्यस्तः,

कायबन्ध इव कबन्धवति ब्रध्नबिम्बे घटमानो विभाव्यते। (१५८) तपःकरणकालकवलितानिव धूमरितसमग्रग्रहान् उद्गिरन्ति धूमोद्गारान् समिधः। दिने दिने दारुणा दिशां दाहा दृश्यन्ते। (१५९) दिग्दाहभस्म-कणनिकर इव निपतति नभस्तलात् तारागणः।

कायबन्धः,—शरीरसंयोगः यस्य तथाभूतः; यद्वा,—न विकलः कृत्तशिरस्कः कायबन्धः शरीरसंस्थानं यस्य तथाविधः, सशिरःशरीरवान् इत्यर्थः. कबन्धे शिरोमात्रस्यादर्शनात्, अपमूर्द्धदेहवतः मूर्ध्नबिम्बस्य शिरोमात्रस्य एव स्वस्य च परस्परयोगात् राहुरपि इदानीं लब्धकाय इव आभाति इति भावः। कबन्धवति—छिन्नशिरःकायवत्यपि इत्यर्थः, ब्रध्नबिम्बे—सूर्यमण्डले. ("सूरसूर्य्यार्यमादित्यहादशात्मादिवाकराः। भास्कराहस्करब्रध्नप्रभाकरविभाकराः॥" "बिम्बोऽस्त्री मण्डलं त्रिषु—" इति अमरः) घटमानः,—सङ्गच्छन्, विभाव्यते—लक्ष्यते; आकाशिकराहुयुक्त इव सूर्यबिम्बः प्रतीयते इति तात्पर्यम्। सूर्यमण्डले कबन्धदर्शनस्य अतीव अयुक्तमूचकत्वं बोद्धव्यम्।

(१५८) तपःकरणेति।—तपसः,—ऊर्ध्वपादाधोमुखोभावेन स्थित्वा धूम-पानरूपस्य व्रतस्य, करणकाले—अनुष्ठानसमये, कवलितानिव—ग्रस्तानिव। धूमरितेति।—धूमरिताः,—पाण्डुभूताः, निष्प्रभाः इति यावत्, ये समिधाः—सूर्वे, यद्वा,—आकाशचारिणो ज्योतिःपदार्थाः तान्, धूमोद्गारान्—कवलितधूमनिवहान्, निष्प्रभतया धूमसमयान् इत्यर्थः, उद्गिरन्ति—उद्गमन्ति, समिधः,—समन्ताच्चे ऋषयः च इति तथोक्ताः, ["ऋत्यकः" (६।१।१२८ पा०) इति प्रकृतिभावविकल्पात् पक्षे गुणः] मरीच्यत्रिप्रभृतयः पुलस्त्यपुलहक्रतुवसिष्ठा इत्यर्थः; कृत्वा दिशो धूमाच्छन्नाः ज्योतिर्गणाश्च निष्प्रभा बभूवुरिति निष्कर्षः। दिने दिने—प्रतिदिनं, दिशां—ककुभां, दाहाः,—ज्वलनानि; दिक्समूहः अग्निव्याप्त इव दृश्यते इत्यर्थः, ["कर्तृकर्मणोः कृति:" (२।३।६५ पा०) इति कर्मणि षष्ठी इति ज्ञेयम्]।

(१५९) दिगिति।—दिशां—काष्ठानां, दाहे—ज्वलने, [षष्ठी समासः, "कर्मणि च" (२।२।१४ पा०) इति षष्ठीसमासप्रतिषेधस्य आशङ्का न करणीया, कर्तृकर्मणोरुभयत्र षष्ठीप्राप्तिस्थले एव तन्निषेधात्, इह तु तदभावादिति विभाव्यम्]; यद्वा,—दिग्धु, दह्यन्ते इति दाहः तस्मिन्, ["तत्पुरुषे—" (६।३।१४ पा०) इत्यादिना पाक्षिकः समासोऽपः] ये भस्मनां—भूतीनां, कणाः,—बिन्दवः, तेषां निकर इव—समूह इव, नभस्तलात्—आकाशात्।

(१६०) तारापातशुचेव निष्प्रभः शशी। (१६१) निशि निशि इतस्ततः प्रज्वलिताभिः उल्काभिः उग्रं ग्रहयुद्धमिव वियति विलोकयन्ति विलोलतारकाः ककुभः। (१६२) राज्यसञ्चारसूचकः सञ्चारयति इव क्ष्मां क्षपि (१६३) वहद्बहलरजःपटलकलिलशर्कराशकलसूत्कारी मारुतः। (१६४) न कुशलमिव पश्यामि लग्नस्य। अस्मिन् अक्षहंशे करिण इव करीरं कोमलमपि कलयतः

(१६०) तारेति।—तारायां—नक्षत्रायां, पातेन—पतनेन, या शुक्—शोकः तयेव, निष्प्रभः,—निस्तेजाः; तारायां स्वस्य स्वीकृतत्वेन तद्वियोगादिति भावः।

(१६१) निशि निशि—प्रतिनिशम्। प्रज्वलिताभिः,—ज्वलन्तीभिः, उल्काभिः,—रेखाकाराभिः गगनात् पतन्तीभिः तेजःकणिकाभिः। उग्रं—दारुणं, ग्रहयुद्धं—ग्रहयोः ग्रहाणां—रव्यादीनां वा, युद्धं—सङ्गमं, विरुद्धसमागमसङ्घर्षरूपमिति भावः, वियति—आकाशे। विलोलतारकाः,—विलोलाः,—प्रस्खलन्त्यः, चञ्चलाश्च, तारकाः,—नक्षत्राणि, अक्ष्णां कनीनिकाः च यासु यासां वा ताः, ककुभः,—दिशः; कश्चित् स्त्रियश्च इति ध्वनिः। सङ्गरावलोकनात् कोमलावलानां चक्षुषो विलोलत्वं जायते।

(१६२) राज्यसञ्चारसूचकः,—राज्यस्य सञ्चारः,—संहार इत्यर्थः; अन्यत्र—सङ्क्रमणमित्यर्थो वा, तस्य सूचकः,—व्यञ्जकः। सञ्चारयतीव—सम्यक् चालयतीव। क्ष्मां—पृथ्वीम्।

(१६३) वहदिति।—वहता—प्रसरता, बहलेन—प्रभूतेन, रजसां—धूलीनां, पटलेन—समूहेन, कलिलानि—गहनानि, व्याप्तानि इत्यर्थः, ("कलिलं गहनं समे" इत्यमरः) शर्कराशकलानि—कर्परखण्डानि, ("शर्करा कर्परांशेऽपि" इत्यमरः) सुष्ठु—प्रबलं यथा तथा, उत्किरति—उत्क्षिपतीति तथाभूतः, मारुतः, —झञ्झावायुरिति भावः।

(१६४) लग्नस्य—राशीनामुदयस्य, ("राशीनामुदयो लग्नम्" इत्यमरः) कुशलं—शुभम्; विविधदुर्निमित्तदर्शनेन अशुभलग्नं समुदितमिति मन्य इति निष्कर्षः। अक्षहंशे—अक्षाकं कुलि, वेणुलम्बे च। करिणः,—गजस्य। करीरं—वंशाङ्कुरं, ("वंशाङ्कुरे करीरोऽस्त्री" इत्यमरः) वंशसन्तानस्य बीजभूतमित्यर्थश्च। कोमलं—

कृतान्तस्य कः परिपन्थी? सर्वथा (१६५) स्वस्ति भवतु आर्य्याय" इति चिन्तयित्वा च अन्तर्भिन्नभ्रातृस्नेहकातरं द्रवत् इव हृदयं कथञ्चिदपि संस्तभ्य उत्थाय यथाक्रियमाणं क्रियाकलापम् अकरोत्।

(१६६) आस्थानगतस्य सहसा एव प्रविशन्तम्, अनुप्रविशता विषसवदनेन लोकेन अनुगम्यमानम्, असह्यदुःखोष्णनिश्वासधूमरक्ततन्तुना इव मलिनेन पटेन प्रावृतवपुषं,

स्तदुल, सुकुमारश्च; का कथा बलवतः इति अपिशब्दार्थः। अत्र स्ववंशीयानां शत्रुत्कर्षमाविष्कर्तुम् अत्युक्तिरूपायां सम्भावनायाम् अपिशब्दः प्रयुक्तः, प्रासङ्गिकतात्पर्य्ययोगात्, तेन हि स्ववंशीयानामनीयसां निधनेऽपि नास्ति कृतान्तस्य करुणा इति सूचितम्; कलयतः,—भक्षतः, नाशयतश्च; कृतान्तस्य—अन्तकस्य, दैवस्य वा, ("कृतान्तो यमदैवयोः" इत्यमरः)। परिपन्थी—प्रतिबन्धी, कः?—न कोऽपि इत्यर्थः। अनुकूलदैवम् अन्तरा अस्मदग्रजविनाशैषिणः कृतान्तात् कोऽस्मान् वारयेत? इति भावः।

(१६५) स्वस्ति—मङ्गलम्। अन्तरिति।—अन्तर्भिन्नेन—अन्तः,—अभ्यन्तरे, हृदये इत्यर्थः, भिन्नेन—सङ्क्षतेन, हृदयस्थेन इत्यर्थः; यद्वा,—अन्तः भिन्नं—दलितं, विदारितमित्यर्थः, असङ्गलाशङ्कासम्भूतशोकेन करुणेन इति भावः, येन, अन्तर्भेदकेन इत्यर्थः, भ्रातृस्नेहेन—सोदरप्रेम्णा, कातरं—व्याकुलम्। द्रवदिव—गलदिव, चिन्तोष्णेन इति भावः; संस्तभ्य—स्थिरीकृत्य, कथञ्चित् उत्थाय इति भावः; शयनादिति शेषः। यथाक्रियमाणं—नित्यमाचर्य्यमाणं, शौचसन्ध्यादिकमिति यावत्। क्रियाकलापं—कार्य्यजातम्।

(१६६) "आस्थानगतस्य" इत्यादौ "सहसा एव प्रविशन्तं.....कुललं नाम हृदयद्वारं.....ददर्श" इति उत्तरेण सम्बन्धः। आस्थानगतः,—सभागतः, ("आस्थानी क्लीबमास्थानं सभासमितिसंसदः" इत्यमरः)। सहसा—असमये इति यावत्। असह्यौ। असह्येन—सोढुमशक्येन, दुःखेन—सन्तापेनेत्यर्थः, ये उष्णनिश्वासाः,—तप्तनासावायवः, तेषां धूमेन रक्ताः,—धोमाः, धूमाक्ता इत्यर्थः, मलिनरागा इति भावः, तन्तवः,—सूत्राणि यस्य तेन, पटेन—वसनेन, प्रावृतवपुषम्—आच्छादितदेहम्। दुःखोष्णनिश्वासे धूमासम्बन्धेऽपि तत्सम्बन्धकथनादतिशयोक्तिः, उत्प्रेक्षाऽङ्गम् इति सङ्करः।

(१६७) जीवितधारणलज्जया इव अवनतमुखं, नासावंशस्य अग्रे ग्रथितदृष्टिं, (१६८) दुःखदूरप्ररूढलोभ्रा मूर्कनापि मुखेन (१६९) स्वामिव्यसनम् अविच्छिन्नैः अश्रुबिन्दुभिः विज्ञापयन्तं, कुन्तलं नाम बृहदश्ववारं राज्यवर्द्धनस्य प्रमादभूमिम् अभिजाततमं ददर्श। दृष्ट्वा च (१७०) जाताशङ्कः चक्षुषि सलिलेन, मुखवर्णिनि श्वासितेन, हृदये हुताशेन, उत्सङ्गे भुवा, दारुणाप्रिय-श्रवणसमये सममिव सर्व्वेषु अङ्गेषु अगृह्यत लोकपालः।

---

(१६७) जीवितेति।—जीवितस्य—प्राणानां, धारणं—रक्षणमित्यर्थः, तेन या लज्जा—वपा तया इव; प्रभोर्जीवनरक्षणासामर्थ्यात् तस्मिन् विगतेऽपि स्वजीवनापरित्यागादिति वा भावः। नासावंशस्य अग्रे—नासिकायाश्चरिभागे, ग्रथितदृष्टिं—निबद्धचक्षुषम्; महालज्जया किमप्यन्यदपश्यन्तमिति भावः।

(१६८) दुःखेति।—दुःखेन—क्लेशेन हेतुना, दूरम्—अत्यन्तं, प्ररूढानि—जातानि, चौरकर्म्माकरणात् प्रवर्द्धितानि इति भावः, लोभ्राणि—रसाञ्जनानि; यस्मिन् तेन। ["दुःखदूरप्ररूढलोभ्रा" इत्यत्र "दुःखदूरप्ररूढरोभ्रा" इति पाठेऽपि स एवार्थः; रवर्णस्यानुकदाहृत्या हल्यनुप्रासोऽलङ्कारः]। मूकेनापि—वाग्व्यापाररहितेनापि, किमपि अकथयन्तमपीति भावः।

(१६९) स्वामिव्यसनं—स्वामिनः,—प्रभोः, राज्यवर्द्धनस्येति यावत्, व्यसनं—विपत्तिं, विनाशम् इत्यर्थः, ("व्यसनं विपदि भ्रंशे……" इत्यमरः)। अविच्छिन्नैः,—अविरलप्रवृत्तैः, धारावाहिभिरित्यर्थः। बृहदश्ववारं—महान्तमश्वारोहिसैनिकमित्यर्थः; भूतपूर्व्वं कृष्टरणकौशलप्रदर्शनजनितपरितोषप्राप्तौ च धिकारमित्याशयः। प्रसादभूमिं—कृपापात्रम्। अभिजाततमम्—महाकुलीनतया सदंशसम्भूतम्।

(१७०) जाताशङ्कः,—भीतः। सलिलेन—जलाधिपतिना वरुणेन इत्यर्थः; सलिलस्य जड़तया कस्यचिद्बृहणशक्त्यसम्भवात्, शब्दशक्त्या स्वाधीश्वरादित्यपुरुषप्रत्यायनादिह स्वरूपाभिव्यक्तिः अङ्गीकृता इति सङ्केयः। अविच्छिन्नधाराभिरश्रीणां रुरोद इति तात्पर्य्यम्। श्वसितेन—निश्वासवायुना। हुताशेन—अग्निना। उत्सङ्गे—क्रोड़े, देहे इति भावः, भुवा—पृथिव्या। दारुणेति।—दारुणस्य—भीषणस्य, कठोरस्येत्यर्थः, अप्रियस्य—अशुभवार्त्तायाः, श्रवणसमये—श्रवणकाले। सममिव—युगपदिव। लोकपालः,—राजा, हर्ष इत्यर्थः। ["लोकपालः" इत्यत्र "लोकपाले" इति

(१७१) तस्माच्च हेलानिर्जितमालवानीकमपि गौड़ाधिपेन मिथ्योपचारोपचितविश्रम्भं मुक्तशस्त्रम् एकाकिनं विश्रब्धं स्वभवन एव भ्रातरं व्यापादितम् अशौषीत्।

श्रुत्वा च महातेजस्वी (१७२) प्रचण्डकोपपावकप्रसर-परिचीयमानशोकावेगः सहसैव प्रजज्वाल। (१७३) ततश्च अमर्षविधुतशिरोविशीर्ष्यमाणशिखामणिशकलाङ्कारितम् इव

पाठे,—लोकपालैः,—वरुणादिभिः, अगस्त्यस्य, हर्ष इति शेषः]। तादृग्दारुण-प्रियश्रवणसमये युगपदेव चक्षुः बाष्पाकुलं, मुखं दीर्घनिश्वासवाहि, हृदयं शोकाग्नि-सन्तप्तम्, उत्सङ्गदेशः भूतलपतित आसीदिति भावः।

(१७१) तस्मात्—कुन्तलाभिधानात् अश्ववारात्। हेलेति।—हेलया—अव-ज्ञया, निर्जितं—पराभूतं, मालवानीकं—मालवसैन्यं येन तथाभूतम्। गौड़ाधिपेन —गौड़राजेन। तत्सामयिकेन केनचित् आबङ्गभुवनेशान्तवसुन्धराऽधिपतिना इत्यर्थः, "बङ्गदेशं समारभ्य भुवनेशान्तगं शिवे। गौड़देशः समाख्यातः····· ॥" इत्यादि अभिधानकारोद्धृततन्त्रोक्तप्रमाण्यात् इत्याशयः। मिथ्येति।—मिथ्या—अलीकं, कपट इत्यर्थः, उपचारः,—प्रलोभनं, तेन उपचितः,—जनितः, वर्द्धितः इति यावत्, विश्रम्भः,—प्रत्ययः यस्य तथोक्तम्, अत एव मुक्तशस्त्रं—त्यक्तायुधं, निरस्त्रमित्यर्थः। विस्रब्धं—विश्वस्तम्। व्यापादितं—निहतम्।

(१७२) प्रचण्डेति।—प्रचण्डस्य—अत्युग्रस्य, कोपपावकस्य—क्रोधाग्नेः, प्रसरेण —आविर्भावेण, परिचीयमानः,—सङ्गच्छमानः, प्रवर्द्धमानः इत्यर्थः, शोकावेगः,—मन्युप्रसरः यस्य तथोक्तः, शोकासमर्थाभ्यां सममेव अभिभूयमान इत्यर्थः। प्रजज्वाल—बहिर्दीपे। प्रागेवोद्दीपनस्य प्रचण्डशोकानलस्य पुनः सजातीयेन कोपपावकाग्निना सम्बन्धात् नरेन्द्रस्याक्ष्णिकप्रज्वलनातिशय्यप्रतिपादनेन पदार्थहेतुकं काव्यलिङ्गम्।

(१७३) "ततश्च" इत्यादौ "परां भीषणतामयासीत्" इत्युत्तरेणान्वयः। अमर्षेति।—अमर्षात्—क्रोधात्, विधुतात्—कम्पितात्, शिरसः,—मस्तकात्, विशीर्ष्यमाणं—स्वयमेव भ्रश्यमानं, ["शिरोविशीर्ष्यमाण—" इत्यत्र "शिरःशीर्ष्य-माण—" इति पाठेऽपि स एवार्थः] शिखामणिशकलं—चूड़ारत्नखण्डं, तेन अङ्गा-रितः,—जाताङ्गारः तमिव; ज्वलदङ्गारमिव इति भावः। ["अङ्गारितम्" इत्यत्र "अङ्गारकितम्" इति पाठेऽपि स एवार्थः]। अत्रोत्साहस्थायिभावकः वीररसः क्रोधस्थायिना स्वानुकूलेन रौद्रेण अङ्गभूतेन किञ्चिदर्थोगात् वर्णनातीतचमत्कृति-

(१७४) रोषाग्निम् उद्वमन्, अनवरतस्फुरितेन पिबन् इव सर्वतेजस्विनाम् आयूंषि रोषनिर्भुग्नेन दशनच्छदेन, (१७५) लोहितायमानलोचनालोकविक्षेपैः दिग्दाहान् इव दर्शयन्, रोषानलेन अपि (१७६) असह्यमहजशौर्योष्मदहनदह्यमानेन इव वितन्यमानस्वेदसलिलशीकरासारदुर्दिनः, (१७७) स्वावयवैः अपि अदृष्टपूर्वप्रकोपभीतैः इव कम्पमानैः उपेतः, हर इव (१७८) कृतभैरवाकारः, हरिरिव प्रकटितनरसिंहरूपः,

द्योतक इति ज्ञेयम्, अन्यथा उत्तमप्रकृतिकधीरोदात्ते कोऽपि विरोधाभासः स्यात् इत्यवधातव्यम्।

(१७४) रोषाग्निं—क्रोधानलम्, उद्वमन्—उद्गिरन्। अनवरतस्फुरितेन—अविरतस्यन्दितेन, सर्वतेजस्विनां—सकलप्रतापवतां, प्रतिपक्षवीरसमूहानामित्यर्थः। आयूंषि—जीवितकालान्। रोषनिर्भुग्नेन—क्रोधदष्टेन इत्यर्थः, क्रोधवक्रीकृतेन वा, दशनच्छदेन—ओष्ठेन।

(१७५) लोहितायमानेति।—लोहितायमानयोः—रक्तामापद्यमानयोः, लोचनयोः,—नयनयोः, आलोकविक्षेपैः,—प्रभाविसरणैः। दर्शयन्—प्रकटयन्।

(१७६) असह्येति।—असह्यस्य—सोढुमशक्यस्य, सहजस्य—स्वाभाविकस्य, शौर्यस्य—वीर्यस्य, उष्मा—सन्तापः, गर्व इत्यर्थः, एव दहनः,—अग्निः, तेन दह्यमानः,—प्रज्वल्यमानः तेन इव। वितन्यमानेति।—वितन्यमानः,—विस्तीर्यमाणः, स्वेदसलिलानां—घर्मजलानां, शीकरासारः,—बिन्दुधारासम्पात एव, दुर्दिनं—वर्षणं यस्मिन् तथाभूतः; स्वयं क्रोधानलोऽपि तस्य वीर्यवह्निना दह्यमानः स्वदाहज्वालाशमनार्थं तस्मात् स्वेदसलिलं निःसार्य्य तेन आत्मानं सिञ्चति इव इति भावः। दृश्यते च लोके दह्यमानः जलेनात्मानम् अभिवर्षति इति; स्वेदाप्लुतकलेवरो जात इति निष्कर्षः।

(१७७) स्वावयवैः,—निजाङ्गैः। अदृष्टेति।—अदृष्टपूर्वात्—पूर्वमदृष्टात्; कदाऽपि क्रोधाकरणादिति भावः; प्रकोपात्—प्रबलरोषात, भीताः,—शङ्किताः, तैः इव, उपेतः,—युक्तः, क्रोधकम्पितकलेवर इत्यर्थः।

(१७८) कृतेति।—कृतः,—जनित इत्यर्थः, भैरवः,—भीषणः, आकारः,—मूर्त्तिः; अन्यत्र,—कृतः,—धृतः, भैरवस्य—स्वमूर्त्तिभेदस्य, आकारः येन तथाभूतः। प्रकटितेति।—प्रकटितं—प्रकाशितं, नरसिंहस्य—नरः सिंह इव इत्युपमितसमासात

(१७९) सूर्य्यकान्तशैल इव अपरतेजःप्रसरदर्शनप्रज्वलितः, (१८०) क्षयदिवस इव उदितद्वादशदिनकरदुर्निरीक्ष्यमूर्त्तिः, महोत्पातमारुत इव सकलभूभृत्कम्पकारी, विन्ध्य इव (१८१) विवर्द्धमानविग्रहोत्सेधः, महाऽऽशीविष इव दुर्नरेन्द्राभिभवरोषितः, (१८२) पारिक्षित इव सर्वभोगिदहनोद्यतः,

प्रशस्तो नरः नरसिंहः तस्य ; तथा चामरः ;—"सुकुक्षरपदं व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥" इति ; यथा,—वपुषि नरः मुखे च सिंह इव [नीललोहितवक्त्रभासः] तस्य, नृसिंहाकारमूर्त्तिभेदस्य च, रूपम्—आकारः येन तथोक्तः।

(१७९) सूर्य्यकान्तशैल इव—सूर्य्यकान्तमणिमयपर्व्वत इव। अपरेति।—अपरस्य—विपक्षस्य, सूर्य्यस्य च इति भावः, तेजसां—प्रतापानां, प्रभाणाञ्च ; प्रसरस्य—विकासस्य, दर्शनेन—अवलोकनेन, प्रज्वलितः,—प्रदीप्तः। सूर्य्यकान्तमणिः सूर्य्यकिरणसम्पर्कात् प्रज्वलति इति प्रसिद्धिः।

(१८०) क्षयदिवस इव—कल्पान्तदिनमिव, ("क्षयः कल्पान्तः इत्यपि" इत्यमरः)। उदितेति।—उदितानाम्—उदयं गतवतां, द्वादशानां—द्वादशसङ्ख्यकानां, दिनकराणां—सूर्य्याणामिव, दुर्निरीक्ष्या—निरीक्षितुमशक्या, क्षौरैरिति भावः, मूर्त्तिः,—आकारः यस्य तथाभूतः। महोत्पातमारुत इव—प्रचण्डझञ्झावात इव। सकलेति।—सकलानां—सर्व्वेषां, भूभृतां—राज्ञां, पर्व्वतानाञ्च, कम्पकारी—वेपनहेतुः ; भयात् सञ्चालनादिति भावः।

(१८१) विवर्द्धमानेति।—विवर्द्धमानः,—विवर्द्धिं गच्छन् ; क्रोधेन उन्नमनेन च इति भावः ; विग्रहस्य—सङ्गरस्य, देहस्य च ; उत्सेधः,—उद्योग इति भावः, उच्छ्रायः यस्य तथाभूतः। महाऽऽशीविष इव—महान् भुजङ्ग इव। दुर्नरेन्द्रेति।—दुर्नरेन्द्रस्य—दुर्विनीतस्य राज्ञः, गौड़ाधिपतेः इत्यर्थः, दुष्टस्य विषवैद्यस्य च, ("नरेन्द्रस्तु महीपालि विषवैद्ये च पुंस्ययम्" इति मेदिनी)। अभिभवेन—पराजयेन, भ्रातृवधरूपेण गारुड़ादिमन्त्रप्रयोगरूपेण च इति भावः, रोषितः,—कोपितः।

(१८२) पारिक्षित इव—परिक्षितः अपत्यं पुमान्, पारिक्षितः,—जनमेजयः, स इव, ["तस्यापत्यम्" (४।१।९२ पा०) इत्यण्]। सर्वेति।—सर्वेषां—समस्तानां, भोगिनां—सुखभोगरतानां परिपन्थिराजानामित्यर्थः, सर्पाणाञ्च, ("भोगी भुजङ्गेऽपि स्यात् रामपावे नृपे पुमान्" इति मेदिनी) दहने—भस्मीकरणे, इन्धनेष्व

(१८३) वृकोदर इव रिपुरुधिरपानतृषितः, सुरगज इव प्रतिपक्षवारणप्रधावितः, (१८४) पूर्वागम इव पौरुषस्य, उन्माद इव मदस्य, (१८५) आवेग इव अवलेपस्य, तारुण्यावतार इव तेजसः, सर्वोदूर्योग इव दर्पस्य, (१८६) युगागम इव यौवनोष्णः, राज्याभिषेक इव समररसस्य, नीराजनदिवस इव असहिष्णुतायाः परां भीषणताम् अयासीत्।

सर्पमेधयज्ञेन च इति भावः; उद्यतः,—प्रवृत्तः। पुरा पितरि परिक्षिति तक्षकेण नागेन दष्टे मृते च सति, क्रुद्धो जनमेजयः सर्पकुलजिघांसया सर्पमेधयज्ञमन्वतिष्ठत् इति वार्त्ता भारतीया अत्र अनुसन्धेया।

(१८३) वृकोदर इव—भीमसेन इव। रिपुरिति।—रिपोः,—शत्रोः, गौडाधिपस्य, द्रौपद्याः वेण्याः कर्षकस्य वीरस्य दुःशासनस्य च इत्यर्थः, रुधिरपाने—रक्तपाने, तृषितः,—तृष्णान्वितः, शत्रुवधार्थी इति यावत्। ["रिपुरुधिरपानतृषितः" इत्यत्र "रिपुरुधिरतृषितः" इति पाठे,—रिपोः रुधिराय—रक्तपानायेत्यर्थः, तृषितः, —पिपासितः, जातकाङ्क्ष इत्यर्थः]। सुरगज इव—ऐरावत इव। प्रतिपक्षेति।—प्रतिपक्षस्य—शत्रोः, वारणाय—दमनाय, विरोधिगजाय च; प्रधावितः,—चलितः। अत्र भूयसां साम्यप्रदर्शनात् श्लिष्टा मालोपमाऽलङ्कारः।

(१८४) पौरुषस्य—पुरुषकारस्य, पराक्रमस्य इत्यर्थः, पूर्वागम इव—प्रथमोपस्थितिः इव, प्रथमः मूर्त्तिमान् पराक्रम इव इत्यर्थः। मदस्य—सौभाग्ययौवनादिजनितावलेपस्य, उन्माद इव—उन्मत्तभाव इव, समुद्भूतो मद इव इत्यर्थः।

(१८५) अवलेपस्य—गर्व्वस्य, आवेग इव—त्वरा इव, विग्रहवान् गर्व्वप्रसर इव इत्यर्थः। तेजसः,—प्रतापस्य, तारुण्यावतार इव—यौवनाविर्भाव इव, अभिनवोत्पन्नः मूर्त्तिमान् प्रताप इव इत्यर्थः। दर्पस्य—अहङ्कारस्य, सर्व्वोदूर्योग इव—पूर्णोद्यम इव, सर्वथा समुद्भूतस्य मूर्त्तिमतो दर्पस्य प्रयत्नसङ्ग इव इत्यर्थः।

(१८६) यौवनोष्णः,—यौवनस्य—तारुण्यस्य, उष्मा—उष्णत्वं तस्य, युगागम इव—नवयुगावतार इव, देहधारी यौवनगर्व्व इवेत्यर्थः। समररसस्य—सङ्ग्रामानुरागस्य, ["समररसस्य" इत्यत्र "रणरसस्य" इति पाठेऽपि स एवार्थः]; राज्याभिषेक इव—राजकर्म्मणि अभिषेचनमिव, नवे राज्येऽभिषिक्तः सङ्ग्रामरस इव कायवान् इत्यर्थः। असहिष्णुतायाः,—अक्षमायाः, शत्रुनिधने कालविलम्बासहनशीलतायाः इत्यर्थः। नीराजनदिवस इव—शान्तिकर्म्मविशेषवासर इव तनुमान् इत्याशयः; राज्ञां

अवादीच्च,—(१८७) "गौड़ाधिपम् अपहाय कः तादृशं महापुरुषं तत्क्षण एव (१८८) निर्व्याजभुजवीर्य्यनिर्जित-समस्तराजकं मुक्तशस्त्रं कलसयोनिमिव क्रुष्णवर्त्मप्रसूतिः दुष्ट-शेन (१८९) सर्वलोकविगर्हितेन मृत्युना शमयेत् आर्य्यम् ?

युद्धयात्राकाले नीराजना क्रियते इति व्यवहारः ; विजिगीषोः यात्राकाले तद्दिनं यथा भीषणं दृश्यते, तद्भीषणम् इत्यर्थः । परां—महतीं, भीषणतां—भयङ्करताम् । इह बहूनामुत्प्रेक्षितानाम् एकस्मिन् वस्तुनि सम्बन्धवत्त्वात् यथायथं जातिद्रव्यगुणरूपोत्प्रेक्षा, श्वेतसलिलशीकरासारेण दुर्दिनासम्बन्धेऽपि तत्सम्बन्धकथनात् अतिशयोक्तिः, क्रत-भैरवाकारादिश्लिष्टपदार्थयोगात् श्लेषः इति ; क्रोधोद्वेगादयः अयुजविषयकानुरागाङ्ग-भूताः इति रसाभासः ; एतेषां पारस्परिकाश्रयाश्रयित्वेन स्थितत्या सङ्करः, बहुरत्ना-कुरीयसौन्दर्य्यवत् चमत्कृत्वातिशय्योतकः इति सङ्क्षेपः ।

(१८७) गौड़ाधिपं—शशाङ्कनामधेयम्, अपहाय—परित्यज्य, तं विना इत्यर्थः । तत्क्षण एव—तदानीमेव, दृष्टिपातक्षण एव इत्यर्थः ; आर्य्यं विनैवेति भावः ।

(१८८) निर्व्याजेति ।—निर्व्याजेन—अकपटेन, कूटव्यवहारविमुखेन इति भावः ; भुजवीर्य्येण—बाहुबलेन, निर्जितं—पराभूतं, समस्तं—सकलं, राजकं—राजन्यवर्गः ; एकत्र,—मालवादिप्रतिपक्षराजाः, अन्यत्र,—युधिष्ठिरादिपाण्डवाः येन तथाभूतं, मुक्तशस्त्रं—त्यक्तायुधं, निरस्त्रमित्यर्थः, युद्धापगमात् पक्षशोकाच्च इति भावः । कलसयोनिमिव—कुम्भयोनिमिव, द्रोणाचार्य्यमिव इत्यर्थः, ("कुम्भयोनि-रगस्त्ये स्याद्घटमिश्रद्रोणयोः पुमान्" इति मेदिनी) । क्रुष्णवर्त्मप्रसूतिः,—क्रुष्णस्य—क्रुष्णवर्णापन्नस्य, अन्यायस्य इत्यर्थः, वर्त्म—मार्गः, दुराचार इत्यर्थः, तस्य प्रसूतिः,—योनिः, उत्पत्तिहेतुरित्यर्थः, ["स्त्रियां क्तिन्" (३।३।९४ पा०) इति क्तिन्] ; अन्यत्र, —क्रुष्णवर्त्मा—अग्निः, ("क्रुष्णवर्त्मा पुमानग्नौ दुराचारे विधुन्तुदे" इति मेदिनी) प्रसूतिः,—योनिः यस्य सः, यज्ञाग्निसमुद्भूतः, धृष्टद्युम्न इत्यर्थः ; कुतश्चित् कारणात् द्रोणाचार्य्येणावमानितेन द्रुपदेनानुष्ठितस्य यज्ञस्य फलभूततया द्रोणघातकः धृष्ट-द्युम्नाग्नेः उत्थितः असौ इत्यामनन्ति पौराणिकाः ।

(१८९) सर्वलोकविगर्हितेन—सर्वजननिन्दितेन, विश्वासघातपूर्वकमुपांशु-हननादिति भावः ; मृत्युना—मरणेन, कूटप्रयोगजनितेन इति भावः ; शमयेत्—निर्वापयेत् ? लोकान्तरं नयेदित्यर्थः ; नीचाशयं विश्वासहन्तारं गौड़ाधिपं विना इदृ-ङ्नीचः पापकारी कोऽपि नास्ति इति समुदितार्थः । अत्र स्फुटावगत्यर्थं विशदीकृत्य

(१८०) अनार्य्यञ्च तं मुक्ता भागीरथीफेनपटलपाण्डुराः केषां
(१८१) मनःसु सरःसु राजहंसा इव परशुरामपराक्रमस्मृति-
क्रतो न कुर्य्युः आर्य्यशौर्य्यगुणाः पक्षपातम् ? (१८२) कथमिव

पुराणमतमुपन्यस्यते ; तथा हि—पुरा द्रोणेन निर्जितः पञ्चालाधिपतिर्द्रुपदः तत्कृतावमाननाप्रतिक्रियार्थं द्रोणनाशनं यागमन्वतिष्ठत् ; सम्पूर्णे च यज्ञे यज्ञकुण्डात् सखड्गः पुरुषः एका कन्या चैवापरा उदतिष्ठताम् ; स च पुमान् धृष्टद्युम्नः, कन्या च द्रौपदीति नाम्ना विख्यातौ अभूताम्। ततश्च प्रवृत्ते कुरुक्षेत्रसमरे सेनापतिना द्रोणाचार्य्येण महता रयेण पाण्डवसैन्यं हन्यमानं दृष्ट्वा क्रोधेन प्रेरितो युधिष्ठिरः अनिच्छन्नपि "अश्वत्थामा हतः" इति उच्चैः "इति गजः" इति च अनुच्चैः तमवादीत। स च "इति गजः" इति वाक्यस्य नीचतया उच्चरितत्वात् द्रोणमशृण्वन् सत्यवादिनो युधिष्ठिरस्य प्रथमोक्तेन वचनेन पुत्रमरणं दृढप्रत्ययः द्रोणाचार्यः शोकात् अस्त्रं परित्यज्य रथस्योपरि विषण्णः उपाविशत्। धृष्टद्युम्नश्च तदा तत्रागत्य तं खड्गेन निजघान इति।

(१८०) अनार्य्यम्—अभद्रं, नीचमित्यर्थः ; अतिथौ अपि पापाचरणादिति भावः ; तं—शशाङ्कं, मुक्ता—विहाय, तं विना इत्यर्थः। भागीरथीति।—भागीरथ्याः,—गङ्गायाः, फेनानां—हिम्फीराणां, पटलानि—पुञ्जाः, तद्वत् पाण्डुराः,—शुभ्राः।

(१८१) परशुरामेति।—परशुरामस्य—भार्गवस्य, यः पराक्रमः,—शौर्य्यं, तस्य स्मृतिः,—स्मरणं, तां कुर्व्वन्ति—जनयन्तीति तथोक्ताः, शौर्य्यविशेषेण जामदग्न्यस्मारकाः इत्यर्थः। आर्य्येति।—आर्य्यस्य—ज्येष्ठस्य, शौर्य्याणि—पराक्रमाः एव, गुणाः, —उत्कर्षाः। मनःसु—चित्तेषु, निर्म्मलाशयत्वात् इति भावः। सरःसु—जलाशयेषु, राजहंसक्रीडासम्भृतेषु च मानसाख्येषु इति भावः ; राजहंसा इव, "भागीरथी—" इत्यादि "परशुराम—" इत्यादि च विशेषणद्वयं राजहंसेऽपि योजनीयम् ; पुरा भगवतः शङ्करात् धनुर्विद्यामधीयानेन परशुरामेण किल कैलासैकदेशं क्रौञ्चं शिखरिणं स्कन्दस्य स्वर्द्धया अतिनिशितविशिखमुखेन सृत्पिण्डभेदं भित्त्वा हंसमार्गः कृतः इति श्रूयते, अतः हंसानां तत्पराक्रमस्मृतिकृत्त्वमुक्तमित्यवधेयम्। पक्षपातम्—अनुरागं, पक्षैः,—पतत्रैः, पातः,—पतनं, उड्डीय क्रौञ्चरन्ध्रपथेन मानसे सरसि गमनमित्यर्थश्च।

(१८२) कथमिव—केन प्रकारेण इव, ["किमश्च" (५।३।२५ पा०) यमु-

अत्युग्रस्य अस्य आर्य्यजीवितहरणे निदाघरवेरिव(१८३)कमलाकरसलिलशोषणेऽनपेक्षितप्रीतयः प्रसृताः कराः? कां नु (१८४) गतिं गमिष्यति? कां वा योनिं प्रवेक्ष्यति? कस्मिन् वा नरके निपतिष्यति? श्वपाकोऽपि क इदम् आचरेत्? नामापि गृह्णतोऽस्य पापकारिणः पापमलेन लिप्यत इव मे जिह्वा। (१८५) किं वा अङ्गीकृत्य कार्य्यम् आर्य्यः तेन क्षुद्रेण अनुप्रविश्य विगतघृणेन घुणेन इव (१८६) सकलभुवनाह्लादनचतुरः चन्दनस्तम्भः क्षयम् उपनीतः?

प्रत्ययः] अत्युग्रस्य—अतिदारुणस्य, अतिप्रखरस्य च। अस्य—प्रशाङ्कस्य। आर्य्येति।—आर्य्यस्य—पूज्यस्य, जीवितं—जीवनं, तस्य हरणं—शोषणं, हननमित्यर्थः, तस्मिन्। निदाघरवेरिव—ग्रीष्ममूर्य्यस्येव।

(१८३) कमलाकरसलिलशोषणे—कमलसुशोभितसरोवरजलशुष्कीकरणे। अनपेक्षितेति।—न अपेक्षिता—नानुरुद्धा, प्रीतिः,—स्नेहः; एकत्र,—शौर्य्यतारुण्यप्रियदर्शनत्वादिगुणसहस्रसमलङ्कृतत्वात्, अन्यत्र,—सौरभादिगुणशतभूषितायाः स्वप्रियायाः पद्मिन्याः आश्रयभूतत्वात् इति भावः, यैः तथाभूताः, करैः,—हस्तैः, किरणैश्च; प्रसृताः,—प्रवृत्ताः; एतेन निदाघरविसाम्येन गौड़ाधिपतेः भीष्मत्वं शौर्य्यशालित्वं स्वकार्य्यसाधने निर्ममत्वञ्च ध्वन्यते।

(१८४) गतिं—दशामित्यर्थः। प्रवेक्ष्यति—जनुर्यदृच्छाय कीदृशीं योनिमाश्रयिष्यति इत्यर्थः। "गमिष्यति" इत्यादौ "निपतिष्यति" इत्यन्ताक्रियासु स इति कर्तृपदमूहनीयम्। श्वपाकः,—चाण्डालः। पापमलेन—पापं—निन्दितं कर्म एव, मलं—शुक्लत्वं, मालिन्यजननं वा, तेन। जिह्वया पापकारिणो नामोच्चारणात् तत्स्पर्शेन तस्याः मलालिप्तत्वम्; "कथाऽपि खलु पापानामलमश्रेयसे यतः" इत्याद्याप्तानुशासनस्मरणात् इत्याशयः।

(१८५) किं वा कार्य्यम् अङ्गीकृत्य—आश्रित्य, कस्य कार्य्यस्य अनुरोधेन इति भावः। क्षुद्रेण—नीचेन, क्रूरेणेत्यर्थः, अणुना च; तेन—प्रशाङ्केन, अनुप्रविश्य—अभ्यन्तरं प्रविश्य, विश्वास्य इति भावः, अन्तरं गत्वा च। विगतघृणेन—निर्दयेन, घुणेन इव—घुणाख्यकाष्ठकीटकविशेषेण इव।

(१८६) सकलेति।—सकलानां—समग्राणां, भुवनानां—जगताम्, आह्लादने

(१९७) नूनं न अनेन मूढ़ेन मधुरमास्वादलुब्धेन मधु इव आर्य्यजीवितम् आकर्षता भावी दृष्टः शिलीमुखमभ्यातोपद्रवः। (१९८) निजगृहदूषणं जालमार्गप्रदीपकेन कज्जलमिव अतिमलिनं केवलम् अयशः सञ्चितं गौड़ाधमेन; न तु (१९९) आशु एव अस्तम् उपगतवत्यपि त्रिभुवनचूड़ामणौ सवितरि (२००) वेधसा आदिष्टः सत्पथशत्रोः अन्धकारस्य निग्रहाय ग्रह-

—प्रीणने; एकत्र,—दयादाक्षिण्यपरोपकारित्वादिगुणेन, अन्यत्र,—शैत्यसुगन्धित्वदर्शनीयत्वादिगुणेन इत्यर्थः, चतुरः,—प्रवणः, चन्दनस्तम्भः,—चन्दनतरुनिर्म्मिता गृहावलम्बनभूता स्थूणा इत्यर्थः, क्षयम् उपनीतः,—नाशं गमितः; न जाने, किं कार्य्यमुद्दिश्य निरस्तः विलक्षस्य आर्य्यः तेन पापेन शशाङ्केन हृत्येव घातितः, अहो! नैष्ठुर्य्यमिति समुदितार्थः।

(१९७) नूनं—निश्चितम्, उत्प्रेक्षे वा। मधुनि।—मधुनः,—पुष्परसस्य, रसः,—माधुर्य्यमित्यर्थः, तस्य आस्वादे—लेहनकर्म्मणि, लुब्धः,—लोलुपः तेन। आकर्षता—आक्षिपता, विनाशयता, सङ्कल्पता च इत्यर्थः। भावी—भविष्यन्, कियदनन्तरमेवात्मन उपरि प्रपतिष्यन् इत्यर्थः। शिलीमुखेति।—शिलीमुखानां—शराणां, भ्रमराणाञ्च, ("अलिभ्राणौ शिलीमुखौ" इत्यमरः) सम्पातः,—सम्पतनमेव, उपद्रवः,—अत्याचारः, दृष्टः,—तर्कित इति यावत्। स्वार्थलोलुपतया मूढाशयानां न भविष्यदर्थाहितज्ञानं वर्त्तते इति निष्कर्षः।

(१९८) निजगृहदूषणं—स्वगृहक्षयहेतुः इत्यर्थः, मत्कोपेन तस्य राजधान्याः अचिराद्देव विनङ्क्ष्यमाणत्वादिति भावः; स्वगृहकालिमा इत्यर्थश्च। जालमार्गप्रदीपकेन—जालस्य—ग्रन्थनायाः, मार्गे—पन्थानं, व्यवहारमिति यावत्, प्रदीपयति—प्रकाशयति यः तेन, कूटवर्त्मप्रवर्त्तकेन, गवाक्षमार्गोष्णतेन दीपेन इत्यर्थश्च। केवलम् अयशः,—अकीर्त्तिमात्रम्; न तु कृतस्य कर्म्मणः किमपि इष्टं फलमिति भावः; तस्य अचिराद्देव मया यमसदनप्रापणादिति हृदयम्।

(१९९) आशु—शीघ्रम्, अल्पकालमेवेत्यर्थः; अस्तम्—अस्ताचलं, नाशञ्च; उपगतवति—प्राप्तवति। त्रिभुवनचूड़ामणौ—त्रिलोकीशिरोरत्ने, एकत्र,—जगत्प्रकाशकत्वात्, अन्यत्र,—शौर्य्यदाक्षिण्यादिगुणोत्कर्षादिति भावः; सवितरि—सूर्य्ये; तत्सदृशे तेजस्विनि राज्यवर्द्धने च इति भावः।

(२००) वेधसा—विधात्रा, सत्पथशत्रोः,—सतः—शोभनः विद्यमानो वा,

षण्डविहारैकहरिणाधिपः शशी ? (२०१) विनयविधायिनि भग्नेऽपि चाङ्गे विद्यत एव व्यालवारणस्य विनयाय सकल-

पत्याः,—मार्गः, सदाचारश्च, ["ऋक्पू—" (५।४।७४ पा०) इत्यादिना समासान्तः अप्रत्ययः] तस्य शशी,—शिवः ; एकत्र,—निबिडप्रदोषान्धकारेण आवृततया मार्ग-दर्शनाक्षमत्वात्, अन्यत्र,—कृत्रिमाचारप्रवर्त्तनेन सदाचारविनाशादिति भावः। अन्ध-कारस्य—तिमिरस्य, तमः प्रकृतेः महापापपङ्कोद्धामस्य इत्यर्थः ; निग्रहाय—विध्वंस-नाय। यद्वेति।—यद्वषण्डेषु—सङ्कुलादियद्वन्देषु मध्ये, विहाराय—विचरणाय, एक एव हरिणः,—मृगः, वाहनभूत इति भावः, तस्य अधिपः,—प्रभुः, तदारूढ इति यावत् ; पक्षे,—यद्वाः,—दण्डेन यद्वगौर्याः, दमनयोग्या इत्यर्थः, उद्दामा इति यावत्, ये षण्डाः,—वृषभाः ; वृषभवत् दर्मदाः गौड़ा इति भावः ; तेषां विहारे—विशेषेण हरणे, नाशने इत्यर्थः, यद्वा,—तेषु विहारः,—निर्भयपर्य्यटनं, षण्डभङ्गेषु सिंहानां तथा निर्भीकतया गमनप्रसिद्धेरिति भावः, तत्र एकः,—एकमात्रः, हरिणा-धिपः,—मृगराजः, सिंह इत्यर्थः। शशी—चन्द्रः, चन्द्र इव अहमिति च भावः, न तु आदिष्टः ?—आज्ञप्तः ? अपि तु आदिष्ट एव इत्यर्थः ; तेनास्मिन् राज्यवर्द्धने हतेऽपि हर्षः जीवति, स एव तस्य शास्ता भविष्यति, एषा विधिनियोग एव इति भावः। अत्र अप्रस्तुतात्, रवेः अस्तगमनोत्तरं चन्द्रस्य तिमिरध्वंसनात्, प्रस्तुतं राज्यवर्द्धन-ध्वंसनोत्तरं तत्सोदरेण हर्षेण गौड़ाधिपवधरूपं वस्तु गम्यते, इति अप्रस्तुतात् प्रस्तुतप्रतीतिरूपा अप्रस्तुतप्रशंसाऽलङ्कारः ; तदुक्तं दर्पणे,—"क्वचिद्विशेषः सामान्यात् सामान्यं वा विशेषतः। कार्य्यात्तन्निमित्तं कार्य्यञ्च हेतोरथ समात् समम् ॥ अप्रस्तुतात् प्रस्तुतं चेद् गम्यते पञ्चधा ततः। अप्रस्तुतप्रशंसा स्यात्····· ॥" इति। यद्वषण्डेति विशेषणेन शशिनः स्वल्पसाधनस्यापि यद्वगणमध्ये वैशिष्ट्योक्तिः हर्षस्य स्वल्प-साधनस्यापि अरिजयसामर्थ्यं सूच्यते। ["आत्त एव" इत्यत्र "आत्त इव" इति पाठे, इवशब्दस्य शशिना सह अन्वये, न अप्रस्तुतप्रशंसा, परन्तु उपमैव ; तथा हि,—सवित्-प्रतिमे ज्यायसि सहोदरे दिवं गतेऽपि यवीयसि भ्रातरि हर्षे शशिनमसे समुदयति सति किमु खलु सत्ता सम्भवति गौड़ाधिपस्य अन्धकारसन्निभस्य इत्यौपम्यपर्य्यव-सितार्थः इत्यवधेयम]।

(२०१) विनयविधायिनि—दण्डविधानसमर्थे। अङ्गे—कृशे, हस्ति-ताड़नास्त्रविशेषे इति यावत् ; अङ्गशब्देन राज्यवर्द्धने इति प्रस्तुतम्। व्यालवारणस्य —दुष्टगजस्य, क्रूरशशाङ्कस्येति च प्रस्तुतं, विनयाय—दण्डनाय, शासनायेत्यर्थः।

मत्तमातङ्गकुम्भस्थलस्थिरशिरोभागभिदुरः खरतरः केसरिनखरः। तादृशाः (२०२) कुवैकाटिका इव तेजस्विरत्नविनाशकाः कस्य न वध्याः? क्व इदानीं यास्यति दुर्बुद्धिः?"

(२०३) इत्येतत् अभिदधत एव अस्य पितुरपि मित्रं, सेनापतिः, समग्रविग्रहप्रायहरः, (२०४) हरितालशैलावदातदेहः,

सकलेति।—सकलानां—सर्वेषां, मत्तानां—मदोत्कटानां, मातङ्गानां—हस्तिनां, कुम्भस्थलमेव—शिरःस्थीभयपार्श्वतनमांसपिण्डभाग एव, स्थिरः,—कठिनः, दुर्भेद्य इति भावः, यः शिराभागः,—मूर्द्धदेशः; यद्वा,—मत्तमातङ्गानां यत् कुम्भस्थलं, तथाभूतः यः स्थिरः शिराभागः, तस्य भिदुरः,—विदारणः, स्वयं विपाटनपटुः इति वा अर्थः, [विदिभिदि—" (३।२।१६२ पा०) इत्यादिना कर्त्तरि कुरच्, मुख्यकर्त्तर्यपि प्रयोक्तृतः इति, तथा हि कालिकाः,—"विदादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु कुरच् प्रत्ययो भवति, विदुरः पण्डितः, भिदुरं काष्ठं, छिदुरा रज्जुः। भिदिच्छिदी: कर्मणि कर्त्तरिप्रयोगः" इति]। खरतरः,—अतितीक्ष्णः, केसरिनखरः,—सिंहनखः; केसरिनखरूपः हर्ष इति च प्रस्तुतम्। अत्रापि अप्रस्तुतेन प्रस्तुतस्य प्रतीतेः पूर्ववदप्रस्तुतप्रशंसाऽलङ्कारः।

(२०२) कुवैकाटिका इव—कुत्सिता वैकाटिकाः,—प्रकृतिवैकल्यकारिणः, "कुत्सिताः स्वर्णकारा इव" इति कोचित्, "वैकाटिकाः रत्नवन्धकः" इत्यपरे। तेजस्विरत्नविनाशकाः,—तेजस्विनां—प्रभावतां, दीप्तिमतां च इत्यर्थः; रत्नानाम्—उत्कृष्टवस्तूनां, ("जातौ जातौ यदुत्कृष्टं तद्रत्नमिह कथ्यते" इति कोषः) विनाशकाः,—विध्वंसकारिणः इत्यर्थः। कस्य न वध्याः,—मारणीयाः? सर्व्वस्यैव वध्या इति भावः। सद्रत्ननाशका गुणानामपरीक्षका मूढा इव कपटपरिक्षपितमहातेजसः नीचाः कथमपि न मर्षणीया इत्याशयः।

(२०३) "इत्येतत्" इत्यादौ "सेनापतिः.....सिंहनादनामा.....समररसमानयन् विज्ञापितवान्" इति अग्रेण सम्बन्धः। अभिदधतः,—कथयतः, विलपत इत्यर्थः। सेनापतिं विशिनष्टि, समग्रेति।—समग्राणां—सकलानां, विग्रहाणां—युद्धानां, तथाविधेषु युद्धेषु वा, प्रायहरः,—अग्रेसरः; सेनानीतया समरायग्रायी इत्यर्थः।

(२०४) हरीति।—हरितालस्य—खनामख्यातोपरसविशेषस्य, शैलः,—पर्व्वतः, तद्वत् अवदातः,—गौरः, देहः,—शरीरं यस्य तथाभूतः, कनकौघसौम्यवपु-

परिणतप्रगुणसालप्रकाण्डप्रकाशः, प्रांशुः, अतिशौर्य्यश्रिया इव परिपाकम् आगतः, गतभूयिष्ठे वयसि वर्त्तमानः, (२०५) बहुशरशयनसुप्तोत्थितोऽपि हसन्निव शान्तनवम् अतिदीर्घेण आयुषा, (२०६) दुरभिभवशरीरतया जरयाऽपि भीतभीतया इव प्रकटितप्रकम्पया परामृष्टः, कथमपि (२०७) सारमयेषु शिरोरुहेषु शशिकरनिकरसितसरलशिरोरुहसटालां

स्थितः। परिणतेति।—परिणतः,—प्रवृद्धः, प्रगुणः,—शोभनः, सालप्रकाण्डः,—सालवृक्षस्य इव, प्रकाशते—द्योतते इति तथोक्तः। प्रांशुः,—उन्नतः; सालवृक्ष इव समुन्नतशरीर इत्यर्थः। अतिशौर्य्यश्रियेव—अतिशौर्य्येण—पराक्रमातिशयेन, य ऊष्मा—अन्तःसारस्य उष्णत्वं तेन इव, परिपाकं—परिणतिं, प्राचीनत्वमित्यर्थः, आगतः,—प्राप्तः; दृढवृद्धकाय इति भावः। गतभूयिष्ठे—अतीताधिकांशे, वयसि—यौवने, प्रौढावस्थायां, वार्द्धके वा इत्यर्थः।

(२०५) बहुरिति।—बहवः,—अनेके, शराः,—बाणाः, तैः, शत्रुप्रक्षिप्तैः इति भावः; शयनं—प्रहारार्त्ततया पतनमिति भावः, तेन सुप्तः,—पूर्वं मोहं गत इति यावत्, पश्चाद् उत्थितः,—तत्तत्प्रहारवेदनाम् अपनीय पुनर्युद्धार्थमुद्गत इत्यर्थः; अत्यन्तं,—बहवः,—प्रचुराः, शराः,—इषवः एव, शयनं—शय्या, तत्र सुप्तः,—निद्रितः, उत्थितः,—प्रबुद्धस्तम्, इति विभक्तिविपरिणमेन योजनीयम्। शान्तनवं—भीष्मं, हसन्निव—परिहासास्पदं कुर्वन्निव; भीष्मस्तु शरशयने स्थित एव निधनं गतः, अयन्तु तस्मात् उत्थितः पुनः सङ्ग्रामाय अवातरत् इति हासकारणमिति भावः। इवोपमेयस्य उपादानादाधिक्यप्रतीतेः व्यतिरेकसङ्कीर्णोत्प्रेक्षालङ्कारः इति क्षेयम्।

(२०६) दुरभिभवशरीरतया—दुर्जयदेहतया, जरयाऽपि—विस्रसयाऽपि, वलिपलितादिना कायशैथिल्यापादकावस्थाभेदेनापीत्यर्थः, वार्द्धकेनापीति भावः; भीतभीतया—अतिभीतयेत्यर्थः; अत एव प्रकटितप्रकम्पया—प्रकटितः,—आविष्कृतः, प्रकम्पः,—वेपथुः यया तथोक्तया, भीतत्वात् कम्पितदेहया इत्यर्थः; हसहजकम्पमानदेहतया इति भावः। परामृष्टः,—स्पृष्टः, जरसः कम्पितकायत्वोत्प्रेक्षणात्, वार्द्धकप्रारम्भे स्थितः इत्यर्थः।

(२०७) सारमयेषु—दृढेषु, केशपतनाभावात् इति भावः। शिरोरुहेषु—केशेषु। शशीति।—शशिनः,—चन्द्रस्य, करनिकराः,—किरणचयाः, तद्वत् सिता—धवला, वार्द्धक्ये सम्यक् अप्रकटितेऽपि कायस्तवकविकाशा इत्यर्थः, सरला—

सैंहीमिव (२०८) निष्कपटपराक्रमरसरचितां सङ्क्रान्तो जीवन्नेव जातिम्, (२०९) अपरस्वामिमुखदर्शनमहापातकपरिजिहीर्षया इव भ्रूयुगलेन (२१०) वलितशिथिलप्रलम्बचर्मणा स्थगितदृष्टिः, (२११) धवलस्थूलगुच्छापिच्छप्रच्छादितकपोलभागभास्वरेण वमन् इव विक्रमकालम् अकालेऽपि (२१२) विकाशिकाशकाननविशदं शरदारम्भं भीमेन मुखेन,

---

अकुटिला, शिरोरुहसटा—शिरःस्थजटा, विद्यतेऽस्या इति तथोक्ता, सैंहीमिव—सिंहस्य इयं सैंही ताम् इव, सिंहसम्बन्धिनीमिवेत्यर्थः।

(२०८) निष्कपटेति।—निष्कपटः,—कापट्यरहितः, यथार्थ इति भावः, यः पराक्रमः,—शौर्यं, तस्मिन् रसेन—अनुरागेण, रचिता—निर्मिता तां, जातिं—सिंहत्वमित्यर्थः, जीवन्नेव—प्राणन् एव इत्यर्थः, सङ्क्रान्तः,—अधिगतः। केशरोपमकेशकलापेन सिंहविक्रमतया च साक्षात् सिंह इव विराजमानः, इत्युत्प्रेक्षा।

(२०९) अपरेति।—अपरः,—अन्यः, प्रभाकरवर्द्धनवंश्यादिति भावः, स्वामी—प्रभुः, तस्य मुखदर्शनं—मुखावलोकनमेव, महत्—घोरं, पातकं—पापं, तस्य परिजिहीर्षयेव—तत्परिहर्त्तुमिच्छन् इवेत्यर्थः।

(२१०) वलितेति।—वलितं—वलियुक्तम्, आकुञ्चितमिति भावः, शिथिलं—ग्रथीभवत्, प्रलम्बं—लम्बमानं, चर्म्म—त्वक् यस्य तथाभूतेन। स्थगितदृष्टिः,—आवृतनेत्रः; अतीव प्रभुभक्तः लोलचर्म्मा च इति भावः।

(२११) धवलेति।—धवला—शुभ्रा, स्थूला—पृथुः, दीर्घेत्यर्थः, या गुच्छा—उत्तरोष्ठस्योपरि रोमराजिः, "गौंफ" इति वङ्गभाषया प्रसिद्धा इति भावः, तस्याः पिच्छं—पक्ष्मणिः, परम्परा वा, तेन प्रच्छादितः,—आवृतः, यः कपोलभागः,—गण्डदेशः, तेन भास्वरेण—प्रदीप्तेन; मुखेनेत्यनेनान्वयः। वमन्निव—उद्गिरन्निव। विक्रमकालं—पराक्रमप्रदर्शनोचितसमयम्; शरदारम्भमित्यस्य विशेषणं, तत्र विजिगीषुभिः युद्धयात्रा क्रियते इति शास्त्रात्। अकालेऽपि—असमयेऽपि, शरदारम्भस्य इति शेषः, शरदृतिरिक्ते ग्रीष्मादिऋतौ इति भावः।

(२१२) विकाशेति।—विकाशिना—विकसनशीलेन, काशकाननेन—पोटगलाख्यतृणविशेषवनेन, काशानां भूयस्त्वया शरदि कुसुमानि विकसन्ति; विशदं—धवलं, शरदारम्भं—शरत्कालागमनम्। भीमेन—भीषणेन, [बिभेत्यस्मात् इति

मृतमपि (२१३) हृदयस्थितं स्वामिनम् इव सितचामरेण वीजयन् नाभिलम्बेन कूर्चकलापेन परिणामेऽपि धौतासिधारा-जलपानहर्षितैः इव विहृतवदनैः बृहद्भिः व्रणविदरैः विषमित-विशालवक्षाः, (२१४) निशितशस्त्रटङ्ककोटिकुट्टितबहुबृहद्व्रणा-क्षरपङ्क्तिनिरन्तरतया च (२१५) सकलसमरविजयपर्व्वगण-

व्युत्पत्त्या "भीमादयोऽपादाने" (३।४ ७४ पा०) इति भियः अपादाने मक्] काश्म-कुसुमसुरभिगुम्फाशोभितवदनेन शरद्विलासं जनयन्नित्यर्थः ।

(२१३) हृदयस्थितम्—अन्तर्वर्त्तिनं, गुणावलिनिर्जितहृदयत्वादिति भावः । स्वामिनं—प्रभाकरवर्द्धनमिति यावत् । सितचामरेण—श्वेतबालव्यजनेन, सितच्छत्र-चामरादीनां सम्राडुचितोपकरणत्वादिति भावः । नाभिलम्बेन—नाभिदेशपर्य्यन्त-लम्बिना, कूर्चकलापेन—श्मश्रुनिचयेन, ("कूर्चमस्त्री भ्रुवोर्मध्ये कठिनश्मश्रुकैतवे" इति मेदिनी) । परिणामेऽपि—वार्द्धकेऽपि । धौतेति ।—धौता—विशोधिता, शाणिता इति भावः, असिधारा—खड्गस्य निशितमुखम् एव, जलं—सलिलं, तस्य पानाय हर्षिताः,—पिपासाऽऽकुलाः तैरिव, विहृतवदनैः,—व्यात्तमुखैः, व्रणविदरैः,—शत्रु-प्रेषितशस्त्रक्षतस्फोटैः, ("विदरः स्फुटनं भिदा" इत्यमरः) विषमितम्—उन्नतानतं, बन्धुरमित्यर्थः, विशालं—विस्तृतं, वक्षः,—उरःस्थलं यस्य तथाभूतः । आनाभि-लम्बिश्वेतश्मश्रुमण्डनेन सुशोभितकायस्य सेनापतेः विशाले वक्षसि प्राक् पतन्निशित-खड्गधाराचिह्नशतैः एवमनुमीयते यत्, सङ्ग्रामे शत्रुभिः कृतैः उरःक्षतैः पिपासितैः सद्भिः जलपानार्थं विहृतमुखैः अद्यापि स्थीयते इति समुदितार्थः; असौ सङ्ग्रामशत-विजयी आसीत्, तथा आनाभिश्वेतश्मश्रुलः वार्द्धकेऽपि अनिर्वापितरणोत्साहश्च भवति इति भावः । इह धौतासिधारायां जलस्यैव केवलं रूपणात् निरङ्गं रूपकम् इत्यल-ङ्कारान्तरीत्यत्वेन उद्देश्यायां चमत्कृत्यतिशयः प्रतिपादितः इति सङ्क्षेपः ।

(२१४) निशितेति ।—निशितानि—तीक्ष्णानि, शस्त्राण्येव—आयुधान्येव, टङ्काः,—पाषाणदारणास्त्रविशेषाः, तेषां कोटिभिः,—कोणैः, अग्रैः इत्यर्थः,("कोणस्तु स्त्रियः पार्श्वस्थिकोटयः" इत्यमरः) कुट्टितानि—दलितानि, बहूनि—अनेकानि, बृहन्ति—आयतानि इत्यर्थः, व्रणानि एव—क्षतानि एव, अक्षरपङ्क्तयः,—वर्णा-वलयः, ताभिर्निरन्तरतया—व्याप्ताङ्गतया इत्यर्थः ।

(२१५) सकलेति ।—सकलानां—सर्वेषां, समराणां—सङ्ग्रामाणां, विजया एव—जयलाभा एव, पर्व्वाणि—दिनानि, उत्सवाः इत्यर्थः, ("तिथिभेदे च पर्व्व"

नाम् इव कुर्व्वन्, पूर्व्वपर्व्वत इव पादचारी, (२१६) विविध-वीररसहृत्तान्तरामणीयकेन महाभारतमपि लघयन् इव, (२१७) प्रतिपत्तक्षपणातिनिर्बन्धेन परशुराममपि शिक्षयन् इव, (२१८) अब्भ्रमणेन अनादरश्रीसमाकर्षणविभ्रमेण मन्दर-

इत्यमरः) तेषाम्; यदा,—सकलसमरविजयानां पर्व्वभिः,—ग्रन्थिभिः, अङ्गुलि-ग्रन्थिभिरिव व्रणग्रन्थिभिरिति भावः; गणनामिव—सङ्ख्यानमिव; बहुसमरविजयी इति भावः। पूर्व्वपर्व्वत इव—उदयगिरिः इव। पादचारी—चरणसञ्चरणशीलः, अत्युन्नतकायत्वात् तदानीमेव उदितत्वाच्चेति भावः; पूर्व्वपूर्व्वतोऽपि बहुभिः, पादैः, —प्रत्यन्तपर्व्वतैः, चरति—भुवं समाक्रम्य तिष्ठति इत्यर्थः; ("पादा प्रत्यन्तपर्व्वताः" इत्यमरः)।

(२१६) विविधेति।—विविधानां—बहुप्रकाराणां, वीररसानाम्—उत्साह-स्थायिभावानाम् उत्तमप्रकृतिकसमास्वाद्यमानवस्तुविशेषाणाम्; प्रकारभेदेन बहु-भेदाख्यापनाभीप्सितया अत्र रसबहुत्वोक्तिः न दोषाय इत्यवधातव्यम्; पक्षे,—विविधाः,—अनेके, वीराः,—भीष्मद्रोणादयः शूराः, तेषां रसस्य—युद्धानुरागस्य च, हृत्तान्तेन—प्रक्रियया, अनुष्ठानेनेत्यर्थः, प्रस्तावेन च, विवरणेन च इत्यर्थः, ("हृत्तान्तः प्रक्रियायां स्यात् कृत्स्नवार्त्तांप्रभेदयोः। प्रस्तावे····· ॥" इति मेदिनी) रामणीयकं —रमणीयत्वं, तेन कारणेन। लघयन्निव—लघूकुर्व्वन्निव; महाभारतवर्णितवीर-रसादपि अधिकवीरकर्म्मानुष्ठायीति भावः।

(२१७) प्रतिपत्तेति।—प्रतिपत्तीनां—शत्रूणां, क्षपणे—संहारे, अतिनिर्बन्धेन —अत्याग्रहेण। परशुरामं—परशुधारी रामः तं, भार्गवमित्यर्थः, ["शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसङ्ख्यानम्" (वा०) इति समासः] शिक्षयन्—उप-दिशन्; परशुरामस्यापि शत्रुनिर्य्यातनात्यायहविषये आचार्य्यकर्म्म कुर्व्वन् इत्यर्थः। अवायमाशयः;—तथा हि,—भोः भृगुनन्दन! त्वमेकविंशतिवारं क्षत्रियान् हत्वाऽपि तान् निःशेषान् कर्त्तुं नाशक्नोः, तेन हि तव तवैव रणकर्म्मणि अनभिज्ञता प्रतिभाति, अहं यथा समूलघातं शत्रून् विनाशयामि, तद्दृष्ट्वा अस्मत्तः शत्रूणां समूलोन्मूलनकौशलं शिक्षयतु भवान् इति वदन् इवेति।

(२१८) अब्भ्रमणेनेति।—अब्भ्रमणम्—अब्भिः अम्भसि वा भ्रमणं, समुद्रयात्रा इत्यर्थः, युद्धार्थं साङ्ग्रामिकपीतमाकृष्य द्वीपान्तरस्यशासनाय इति भावः; जलदस्युकृतकठो-रोत्पातप्रशमनाय वा इत्याशयः, जले परिवर्त्तनञ्च तेन। अनादरेति।—अनादरेण—

मपि मन्दयन् इव, (२१९) वाहिनीनायकमर्य्यादाऽनुवर्त्तनेन अम्भोधिमपि अभिभवन् इव, (२२०) स्थैर्य्यकार्कश्यान्नतिभिः अचलानपि क्षेपयन् इव, (२२१) सहजप्रचण्डतेजःप्रसरपरिस्फुरणेन सवितारमपि तृणीकुर्व्वन्निव,

अवहेलेन, यत् श्रीसमाकर्षणं—श्रियाः,—राजलक्ष्म्याः, कमलायाश्च, समाकर्षणं—बलादायत्तीकरणं, समुद्धरणञ्च; अन्यत्र: समुद्राच्च इति भावः, तेन विभ्रमः,—विलसितं यत्र तेन। मन्दरं—मन्दरगिरिम्; समुद्रमन्थनदण्डभूतमिति भावः; मन्दयन्—लघयन्; मन्दरगिरिः असकृदेव अपि परिभ्रम्य एकां श्रियं समाजहार, असौ पुनः सकृत् तथा कृत्वा बहूनां राज्ञां श्रियं समाजहार इति भावः। अन्यस्य श्रियो हरणासम्भवेऽपि श्रीरिव श्रीः हृता इति बिम्बप्रतिबिम्बभावबाधात् असम्बद्धसम्बन्धरूपा निदर्शना, उपमानाधःकरणात् तस्मादपि स्वोत्कर्षप्रतीतेश्च व्यतिरेकालङ्कारश्च, इत्येतयोः साङ्कर्य्यम्।

(२१९) वाहिनीति।—वाहिनीनां—सेनानां, नदीनाञ्च, ("वाहिनी स्यात् तरङ्गिण्यां सेनासैन्यप्रभेदयोः" इति मेदिनी) नायकमर्य्यादा—पतिसम्मानना, सेनापतित्वं सरित्पतित्वञ्च इति यावत्, तस्या अनुवर्त्तनेन—अनुसरणेन, अम्भोधिं—सागरमपि, अभिभवन्निव—जयन्निव; नदीनां परिमिततया सेनानान्तु अपरिमिततयेति भावः; यद्वा,—नदीनां प्रत्यक्प्रस्थानशक्त्यभावात्, सेनानां यथेप्सितं यत्र तत्र प्रस्थानशक्तिमत्त्वेन इत्याशयः; अत्र सरित्पतितः स्वस्याधिक्यं प्रतिपादनात् पूर्व्ववत् व्यतिरेकालङ्कारः।

(२२०) स्थैर्य्येति।—स्थैर्य्यं—सङ्ग्रामादचलत्वमित्यर्थः, एकत्रावस्थायित्वञ्च; कार्कश्यं—काठिन्यम्, अङ्गस्येति भावः, उभयत्रापि समानम्; यद्वा,—कार्कश्यं—अतौ निर्दयत्वम्; उन्नतिः,—उच्छ्रायः ताभिः, अचलानपि—पर्व्वतानपि, क्षेपयन्निव—खञ्जयन्निव; अचलादपि स्थैर्य्यादिमानमासीत् इति व्यतिरेकः।

(२२१) सहजेति।—सहजस्य—स्वाभाविकस्य, प्रचण्डस्य—उग्रस्य, तेजसां—प्रभावाणां, प्रसरस्य—विस्तारस्य, परिस्फुरणेन—उद्भासनेन, तृणीकुर्व्वन्निव—तुच्छीकुर्व्वन्निव; सवितुः तेजसां प्रसरः दिवा एव, अस्य तु रात्रिन्दिवमपि प्रसरति, इति स्वतेजसामधिककालिकत्वमेव तृणीकरणे हेतुरिति भावः; यद्वा,—तत्तदाश्रिताश्रितेरेवाधिक्यप्रतीतेः, इह दाक्षिणात्यौत्कलिकयोरुभयोरपि समानोत्कर्षत्वम् इत्यतिप्रसिद्धमेव।

(२२२) ईश्वरभारोद्वहनघृष्टपृष्ठतया हरवृषभमपि हसन्निव ; (२२३) अरणिः अमर्षाग्नेः, ऐश्वर्यं शौर्यस्य, मदो मदस्य, विसर्पो दर्पस्य, हृदयं हठस्य, जीवितं जिगीषुतायाः, उच्छ्वसितम् उत्साहस्य, अङ्कुशो दुर्मदानां, नागदमनो दुष्टभोगिनां, (२२४) विरामो वरमनुष्यतायाः, कुलगुरुः वीरगोष्ठीनां,

(२२२) ईश्वरेति।—ईश्वरस्य—हरस्य, स्वामिनश्च, ["अशीतिरायुकर्मणि वरट् च" (उ० ४ पा०.५७ सू०) इति वरट्। तत्रैव "चकारादुपधाया ईत्वम्" इति ज्ञेयम्, आयुवरदातर्यकत्वे एवेतत् ; ईष्टे प्रभवति इत्यर्थकत्वे तु आदादिकस्य ईशः कर्तरि वरचि "ईश्वरः" इतिपदं सिध्यति, तथा च सूत्रम् ;—"स्थेशभासपिसकसो वरच्" (३। २। १७५ पा०) इति] भारोद्वहनेन—पृष्ठस्योपरि भारोद्वहणरूपेण, आदेशपालनरूपेण च इत्यर्थः, घृष्टं—दलितं, विगतरोमत्वक्कमित्यर्थः, पृष्ठं—पश्चाद्देशः यस्य तथाभूतः, तस्य भावः तत्ता तया, कार्यत्वेन: लोके घृष्टपृष्ठः कथ्यते, हरवृषभं—शङ्करवृषं, हसन्निव—अवजानन्निव ; हरवृषभस्य भारोद्वहनेन पृष्टस्य घृष्टत्वम्, अस्य तु स्वामिभारोद्वहनेन न तथेति हासहेतुरिति भावः ; यद्वा,—तत्र वनवासिनः विरागिणश्च लघुभारेण पृष्ठः घृष्टः, इह साम्राज्यरक्षातत्त्वभारोऽपि अकिञ्चित्करः इति परिहासे निगूढ कारणम् इत्याशयः।

(२२३) अमर्षाग्नेः,—क्रोधानलस्य, अरणिः,—अग्निमन्थनदारु, ("निर्मन्थ्यदारुणि त्वरणिर्द्वयोः" इत्यमरः) ; घर्षणमात्रेणैव अरणितो यथा अग्निरुत्पद्यते, तथा स्वल्पेनैव शत्रुकृतविमर्देनास्य क्रोधप्रदीप्तिः भवति इत्यर्थः ; परिभवासहिष्णुरिति भावः। ऐश्वर्यं—विभूतिभूतं, सर्वस्वमिति भावः, महाशूरः इति निष्कर्षः। मदः,—गर्वः, मदस्य—गर्वस्य, अभिमानी इत्यर्थः ; महातेजस्वीति भावः। विसर्पः, —प्रसरः। हृदयं—वक्षःस्थलं, हठस्य—साहसस्य, सततमुत्साहसमन्वितः, निर्भीक इत्यर्थः। जिगीषुतायाः,—शत्रुविजयाभिलाषस्य, शत्रुमनिर्जित्य अपरावृत्त इति यावत्। उच्छ्वसितं—जीवितं, महोत्साहीत्यर्थः। अङ्कुशः,—रुणिः, दमनकारकास्त्रविशेषः इति यावत्, दुर्मदानां—दुर्विनीतानामित्यर्थः, मत्तगजानाञ्च ; दुर्जनशास्ता इति यावत्। नागदमनः,—गजमर्दनः, प्रमत्तनृपतिशासनो वा, गरुडश्च ; दुष्टभोगिनां—दुष्टानां राज्ञां, क्रूरसर्पाणाञ्च।

(२२४) वरमनुष्यतायाः,—श्रेष्ठमानुषत्वस्य, विरामः,—पराकाष्ठेत्यर्थः ; औदार्यादिगुणवत्त्वादिति भावः। वीरगोष्ठीनां—शूरसमाजानां, सर्ववीरवरेण्य

तुला शौर्य्यशालिनां, सीमान्तदृश्वा शस्त्रग्रामस्य, निर्वोढा प्रौढ़वादानां, (२२५) संस्तम्भयिता भग्नानां, पारगः प्रतिज्ञायाः, मर्मज्ञो महाविग्रहाणाम्, आघोषणापटहः समरार्थिनां, सन्निधौ एव समुपविष्टः सिंहनादनामा स्वरेण एव दुन्दुभिघोषगम्भीरेण (२२६) सुभटानां समररसम् आनयन् विज्ञापितवान्,—

"देव! (२२७) न क्वचित् कृताश्रयया मलिनया मलिनतराः कोकिलया काका इव कापुरुषा हतलक्ष्म्या विप्रलभ्यमानम्

इति यावत्। तुला—उपमा; महावीराणां सङ्ग्रामे प्रायः सर्व्वाधकीर्त्तितनामा इति भावः। सीमान्तदृश्वा—पारदर्शी। शस्त्रग्रामस्य—आयुधसमूहस्य; सर्व्वशस्त्रकोविद इत्यर्थः। निर्वोढा—निर्वाहकः, समुचितप्रतिकारक इत्यर्थः। प्रौढ़वादानां—प्रगल्भवचनानाम्; शत्रुप्रयुक्तानामिति भावः।

(२२५) संस्तम्भयिता—आश्वासयिता, भग्नानां—शत्रुभयात् पलायितानाम्। पारगः,—पारगामी, प्रतिज्ञायाः,—शपथस्य; अवश्यप्रतिज्ञ इति भावः। मर्म्मज्ञः,—वेत्ता, महाविग्रहाणां—महतां सङ्ग्रामाणाम्; कदा केन विधिना सङ्ग्रामे जिते अवश्यमेव जयो भवेत् इत्यादिनिर्द्धारणे कुशलः, परपक्षच्छिद्रोद्घाटननिपुणश्चेति भावः। आघोषणापटहः,—युद्धयात्रायां ताड्यमानवाद्यविशेष इत्यर्थः, युद्धोत्साहवर्द्धक इति भावः, ताडनः; यथा आघोषणापटहः समरोत्साहमुद्दीपयति, तथा अयमपीति भावः। सन्निधौ एव—इत्थं निकषैवेत्यर्थः। दुन्दुभीति।—दुन्दुभिः,—भेरी, तस्य घोषः,—शब्दः, तद्वत् गम्भीरः,—गभीरः तेन, प्रगल्भाहतभेरिघोरमन्द्ररवसमेन इत्यर्थः।

(२२६) सुभटानां—सुयोद्धॄणां, समररसं—सङ्ग्रामोत्साहम्, आनयन्—जनयन्, उद्दीपकवाक्यैः वर्द्धयन् इत्यर्थः।

(२२७) न क्वचिदिति।—न क्वचित्—कुत्रापि, कृताश्रयया—चापल्यात् चिरं कुत्रापि अतिष्ठन्त्यापि क्रियत्कालमाश्रयन्त्या इत्यर्थः, अन्यत्र,—काककुलायादपरत्र कुत्रापि अनाश्रितया इत्यर्थः। मलिनया—पापया इत्यर्थः, कृष्णवर्णया इत्यर्थश्च; मलिनतराः,—अतिदुष्टाशया इत्यर्थः, अतिकृष्णवर्णा इत्यर्थश्च। कापुरुषाः,—नीचपुरुषाः। हतलक्ष्म्या—दुष्टया श्रिया। विप्रलभ्यमानं—प्रतार्य्यमाणम्।

आत्मानं न चेतयन्ते। (२२८) श्रियो हि दोषान्धतादयः कामला विकाराः। (२२९) छत्रच्छायान्तरितरवयो विस्मरन्ति अन्यं तेजस्विनं जड़धियः। किं वा करोतु वराकः, येन अतिभीरुतया नित्यपराङ्मुखेण न तु दृष्टानि एव

चेतयन्ते—अवबोधयन्ते, [ज्ञानार्थकतया चेतेः णिचि अधिकर्तुः आत्मनः कर्मत्वं ज्ञेयम्]। कोकिलया प्रसवानन्तरमेव निजशावकाः काकीनीड़े संस्थाप्य ताभिः पोष्यन्ते, काक्यः अपि वर्णसाम्यात् स्वशावकबुध्या तान् पालयन्ति ; अतस्तेषां परैः प्रतिपालनात् परभृतिति संज्ञा समजनि। ततः जाते तु उड्डयनसामर्थ्ये शावकाः तन्मातॄरुपेत्य स्वसमाजे सङ्गच्छन्ते, इत्थं काकीनां कोकिलया विप्रलभ्यत्वं लोके प्रसिद्धमेव।

(२२८) कस्मात्तान् हतलक्ष्मीर्विप्रलभते ? इत्याह, श्रिय इति।—श्रियः,—लक्ष्म्याः, दोषान्धतादयः,—दोषैः,—कुपुरुषानुरागादिभिः, वातादिभिश्च इति व्यज्यते ; अन्धतादयः,—अन्धता एव आदिर्येषां ते, सदसत्कार्य्यालोचनादयः इति यावत्, दृष्टिहीनत्वादयश्च इति व्यज्यते ; कामलाः,—कमलसम्बन्धिनः, कमलात् आगता वा, विकाराः,—स्वस्याः कमलालयत्वात् नियतकमलवासेन आश्रयदोषात् जाताः रोगा इत्यर्थः, "कामला" इति प्रसिद्धाः पाण्डुरोगभेदजा इत्यपि व्यज्यते ; तस्मिन् रोगे जाते सति कनकस्य शङ्खादौ पीतत्वादिज्ञानम् अन्धतादयश्च दोषा जायन्ते ; कमलस्य यथा दोषा—रात्रौ, [अव्ययमेतत्, "दोषा रात्रौ च तन्मुखे" इति अव्ययवर्गे मेदिनी] अन्धतादयः,—सूर्य्यस्यासन्नगमनात् सङ्कोचादयः विकारा जायन्ते, तथा लक्ष्म्या अपि तन्निवासात् समजायन्त दोषान्धतादयः,—दोषा एव अन्धतादयः,—सत्पुरुषासत्पुरुषयोर्विचाराचलत्वम् इति भावः।

(२२९) छत्रेति।—छत्रस्य—आतपत्रस्य, छायया—आतपप्रतिपक्षभूतया, अनातपेनेत्यर्थः, अन्तरितः,—व्यवहितः, तिरस्कृतो वा ; छत्रावरितदर्शनत्वात् इति भावः ; रविः,—सूर्य्यः ["अच इः" (उ० ४ पा० १३८ सू०) इति गत्यर्थकऋधातोः इः] यैः तथोक्ताः, जड़धियः,—मूर्खाः ; लक्ष्मीमदमत्ततया इष्टानिष्टानभिज्ञाः इति भावः ; तेजस्विनं—प्रतापवन्तम्, अन्यम्—अपरं पुरुषं, विस्मरन्ति—न पश्यन्तीति भावः ; आत्मानमेव एकमात्रं तेजस्विनं मन्यन्ते, नान्यं कमपि, छत्रेण महाप्रभावत्सूर्य्यकिरणानामपि तिरस्करणात् कोऽन्येषां कथाप्रसङ्ग इति तात्पर्य्यम् ; एवम् अनुसूयते यथा,—घनाच्छन्नदृष्टिः अर्कमपि घनाच्छन्नमिति मन्यते। वराकः,—तपस्वी, दुर्बलप्रकृतिः इति यावत्। येन—वराकेण, गौड़ेश्वरेण जड़धियेत्यर्थः। नित्य-

(२३०) सर्वातिशायिशौर्यातिशयक्षयथुकपिलकपोलपुलकप्लवितकोपानलानि कुपितानां तेजस्विनां मुखानि। नासौ तपस्वी जानाति एवं, यथा (२३१) अभिचारा इव विप्रकृताः सद्यः सकलकुलप्रलयम् उपहरन्ति मनस्विनः। जलेऽपि ज्वलन्ति ताड़िताः तेजस्विनः। (२३२) सकलवीरगोष्ठीबाह्यस्य तस्यैव इदम् उचितम् अनुत्तारनिरयनिपातनिपुणं

पराङ्मुखेण—नियतविमुखेन ; साहसकर्मणि कदाप्यप्रवृत्तेन इति भावः ; न तु दृष्टानि—अवलोकितानि, द्रष्टुं पारितानि इत्यर्थः।

(२३०) सर्वेति।—सर्वातिशायी—सर्वपरिभावी, शौर्यातिशयः,—पराक्रमातिशय्यसमन्वितश्च, क्षयथुः,—स्फीतिः, वर्द्धनमित्यर्थः, विकाश इति यावत्, दैवस्य राज्यवर्द्धनस्य महावीराणां वा इति भावः, येषु तथाविधाः, कपिलाः,—आरक्ताश्च; ये कपोलाः,—गण्डदेशाः, तेषां पुलकेन—रोमहर्षेण ; अप्रतिहतात्मशक्तिसमुत्कर्षस्मृतिसुखोदयात् इति भावः ; प्लवितः,—विसृतः, प्रकटीभूतो वा, कोपानलः,—क्रोधवह्निः येषु तानि। तेजस्विनां—महातेजसाम्, अस्मत्प्रभृणामिति विजिगीषुनृपाणां वा इति भावः।

(२३१) अभिचारा इव—आथर्वणा मारणादयो विधय इव, विप्रकृताः,—निकृताः, अवमानिताः इति यावत्, ("निकृतः स्यादिप्रकृतः" इत्यमरः) विप्रैः,—ब्राह्मणैः, कृतायैः ; सद्यः,—अचिरादेव इत्यर्थः, सकलकुलप्रलयं—सर्ववंशविनाशम्, उपहरन्ति—उपायनीकुर्वन्ति, जनयन्तीति यावत्। मनस्विनः,—प्रशस्तमनसः, महावीरा इत्यर्थः, ["अस्मायामेधास्रजो विनिः" (५।२।१२१ पा०) इति विनिप्रत्ययः]। जलेऽपि—सलिलेऽपि, आत्मसम्भूतेऽपीति भावः, "आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी" इति स्मरणात् ; जड़ेऽपि च, ताड़िताः,—वैशुताः, प्रहृताश्च ; तेजस्विनः,—अग्नयः, प्रतापवन्तश्च। अत्र मनस्विभिः तेजस्विभिश्च समं सकलकुलप्रलयजननत्वज्वलनत्वादिधर्म्मैः स्वस्य विम्बप्रतिविम्बभावबोधात् दृष्टान्तालङ्कारः ; "दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिविम्बनम्" इति दर्पणलक्षणात्।

(२३२) सकलेति।—सकलानां—कृत्स्नानां, वीराणां—शूराणां, गोष्ठी—समाजः, तस्याः बाह्यः,—बहिष्कृतः, ततो निष्कासित इत्यर्थः, तस्य ; कापुरुषतादिदोषैः वीरसमाजेषु अगण्यस्य इति भावः। गोष्ठीबाह्यस्य अनुपासितसत्पुरुषत्वात् धर्म्मं न जानाति, अतस्तस्य तथाभूतस्य निरयोचितमिदं कर्म्म युज्यते इति सङ्गतिः।

कर्म। (२३३) मनस्विनां हि प्रधनप्रधानधने धनुषि म्रियमाणे, सति च कमलाकलहंसीकेलिकुवलयकानने कृपाणे, कृपणोपायाः पयोधिमथनप्रभृतयोऽपि श्रीसमुत्थानस्य ; किं पुनः ईदृशाः ? (२३४) येषाञ्च धात्रा धरित्रीं त्रातुं नियुक्ताः

तस्य—गौड़ाधिपस्य। उचितं—सदृशम्। अनुत्तारेति।—नास्ति उत्तारः,—उद्धारः यस्मात् तादृगे, निरये—नरके, निपातः,—निपतनं, तव तस्य वा निपुणं—समर्थम्, उचितमित्यर्थः, इदं—विश्वासघातनम् ;—"मित्रद्रोही कृतघ्नश्च ये च विश्रम्भघातकाः। ते नरा नरकं यान्ति यावच्चन्द्रदिवाकरौ॥" इत्युक्तेः। उपायः कूटप्रयोगेण महाराजराज्यवर्द्धनस्य विशसनं वीरसङ्घत्यकृतस्य गौड़ाधमस्यैवानुरूपम्, इति तस्य सामाजिकसङ्घात् बहिर्भाव एव तथाविधानुष्ठाने हेतुः, इति पूर्वपदार्थस्य हेतुभूततया निर्देशात् पदार्थहेतुकं काव्यलिङ्गम् इति क्षेयम।

(२३३) मनस्विनां—वीराणाम्। हि इहावधारणेऽर्थे। प्रधनेति।—प्रधनस्य—सङ्ग्रामस्य, युद्धस्येत्यर्थः, ("युद्धमायोधनं जन्य प्रधनं प्रविदारणम्" इत्यमरः) प्रधानं—श्रेष्ठ, धनं—महामूल्यवद्वस्तु, साधनमिति भावः, तस्मिन्। धनुषि—कार्मुके, म्रियमाणे—यष्टिमात्रे। कमलेति।—कमला—लक्ष्मीरिव, कलहंसी—राजहंसी ; कमलायाः कलहंस्याश्च उभयोरिव कुवलयवनसञ्चारित्वसाम्यादारोपात् रूपकालङ्कारः ; नृपश्रेष्ठमहिषौ वा, ("कलहंसस्तु कादम्बे राजहंसे नृपोत्तमे॥" इति मेदिनी) तस्याः केलिः,—क्रीडा यत्र तादृशं, कुवलयकाननं—नीलोत्पलवनं तस्मिन्, तथाभूते इत्यर्थः ; निशितानां कृपाणानां नीलोज्ज्वलप्रभावत्त्वादिति भावः ; कृपाणे—करवाले, सति च—विद्यमाने च, म्रियमाणे इत्यनुषङ्गेणान्वयो वा, तेन म्रियमाणे सतीत्यर्थः ; वीराणां कृपाणे एव कमला प्रतिवसतीति भावः। श्रीसमुत्थानस्य—लक्ष्मीसमाहरणस्य, पयोधिमथनप्रभृतयोऽपि—मन्दरगिरिणा क्षीरसागरविलोड़नादयोऽपि, कृपणोपायाः,—दीनचेष्टाः ; कापुरुषाचारा इति भावः। एतेन क्षीरसागरविलोड़नचेष्टा तु दैवेव, पौरुषमेव लक्ष्मीलाभे हेतुः, इति पौरुषस्य सर्वोत्कृष्टत्वप्रतिपादनात् व्यतिरेकालङ्कारः व्यज्यते। ईदृशाः,—विश्वासघातनादयः इत्यर्थः, किं पुनः ?—दीनोपाया इति किं वक्तव्यमित्यर्थः ; विश्वासघातत्वादयः कापुरुषाचारा एवेति भावः।

(२३४) येषां—मनस्विनां वीराणामित्यर्थः, [सम्बन्धविवक्षया षष्ठी]। धात्रा—ब्रह्मणा, धरित्रीं—पृथिवीं, त्रातुं—रक्षितुं, नियुक्ताः,—आदिष्टा इत्यर्थः ; गिरीणां

स्वयम् असमर्था इव (२३५) कुलिशकर्कशभुजपरिघप्रहरणहेतोः उद्गिरन्ति गिरयोऽपि लोहानि ते कथमिव बाहुशालिनो मनसाऽपि विमलयशोबान्धवा ध्यायेयुः अकार्य्यम् ? (२३६) सर्व्वग्रहाभिभवभास्वराणां हि सुभटकराणाम् अग्रतो दिग्गृहणे पङ्गवः पतङ्गकराः।

गौवसंज्ञत्वादिति भावः। असमर्था इव—अचला इव; अचलत्वादिति भावः। ["असमर्था इव" इत्यत्र "असमर्था एव" इति पाठान्तरम्]।

(२३५) गिरयः,—पर्व्वता अपि; अचेतनप्रस्तरमया अपीति भावः। कुलिशेति।—कुलिशवत्—वज्रवत्, कर्कशः,—कठिनः, भुजः,—बाहुः, तत्र यत् परिघप्रहरणं—मुद्गरास्त्रं, तस्य हेतोः,—तन्निमित्तं, परिघनिर्म्माणार्थमित्यर्थः, लोहानि—तदाख्यधातुविशेषान्, उद्गिरन्ति—उद्गमन्ति, प्रसूयन्ते इति यावत्, ते—येषामर्थं अचेतना बाहुविरहिताः गिरयोऽपि लोहान्युद्गीर्य्य धर्म्मानुसारेण पृथिवीं पातुं सहायकं कुर्व्वन्ति, तादृशा राजान इत्यर्थः। गिरीणां परिघप्रहरणार्थोद्गिरणासम्बन्धेऽपि इह सम्बन्धः प्रतिपादितः इत्यतिशयोक्तिः; असमर्थत्वरूपगुणोत्प्रेक्षाऽङ्गम्। कथमिव—किमर्थमित्यर्थः। बाहुशालिनः,—प्रशस्तबाहव इत्यर्थः; लोहोत्पत्त्या इति भावः। विमलेति।—विमलानि—शुभ्राणि, यशांसि—कीर्त्तय एव, बान्धवाः,—मित्राणि येषां तथाभूताः, पूतयशोधना इत्यर्थः, मनसाऽपि—चेतसाऽपि; किं पुनर्बहिरनुष्ठानेनेति भावः; अकार्य्यं—दुष्कार्य्यं, ध्यायेयुः,—चिन्तयेयुः ? नैव कदापि चिन्तयन्ति इत्यर्थः; येषां यथाकथञ्चित् बाहुबलमस्ति, ते मनसाऽपि न एतादृशं गर्हितमाचरन्तीति भावः।

(२३६) सर्व्वेति।—सर्व्वस्य—सकलवस्तुनः, ग्रहाभिभवः,—ग्रहः,—बलाद् ग्रहणमेव, अभिभवः,—तिरस्कारः, वस्तुस्वामिनामिति भावः; सर्वे ग्रहाः,—चन्द्रादयश्च, तेषामभिभवः,—महता तेजसा विज्ञानताजननरूपतिरस्कारश्च, तेन भास्वराणां—दीप्यमानानाम्; भास्वराः,—उज्ज्वलाश्च, इति लिङ्गविपरिणामेन "पतङ्गकराः" इत्यत्र योजनीयम्। सुभटकराणां—वीरबाहूनाम्, अग्रतः,—पुरतः, पतङ्गकराः,—सूर्य्यकिरणाः, ("पतङ्गौ पक्षिसूर्य्यौ च" इत्यमरः) करा: इलाय इति ध्वनिः। दिग्ग्रहणे—पूर्व्वपश्चिमयोः दिशोः, ग्रहणे—ज्ञाने, अवलम्बने वा; पङ्गवः,—अचलाः, दिग्बोधाक्षमाः, दिग्गृहणासमर्थाः वा इत्यर्थः; तासां स्त्रीत्वेन महावीरसङ्घर्षांश्चलयेति ध्वनितम्। यदा महावीराः अस्त्राणां वृष्टिभिः गगनमाच्छादयन्ति,

(२३७) महामहिषशृङ्गतरङ्गभङ्गुरभीषणान्तराला लोकप्रवादमात्रेण दक्षिणाशा, परमार्थतो भटभ्रुकुटिः अधिवासो यमस्य। (२३८) चित्रञ्च यत्, उन्मुक्तसिंहनादानां सहसा साहसरसरोमाञ्चकण्टकनिकरेण सह न निर्य्यान्ति सटाः

तदा सर्वा दिशः समा एव इति मत्वा काः दिशमाश्रयेदिति, दिग्वधूनायकः सुभटः समाक्रमेत् चेत् अत्याहितं भवेत् इत्याशङ्कया वा चिन्ताकुलाः मृत्योरग्रगण्यौ भवन्तीति भावः; यद्वा,—वीरबाहव एव दिशां चतुर्णां ग्रहणे निरायासं समर्थाः, न तु पतङ्गस्येव—अग्निकीटविशेषस्येव, अतितुच्छस्येति भावः; पतङ्गस्य—मृत्योः, करः,—हस्ता इति यावत्; तेषां पूर्व्वपश्चिमयोर्द्वयोरेव दिशोः विशेषतः ग्रहणादिति भावः; यद्वा,—पतङ्गस्य—खद्योतस्य, कीटविशेषस्य "जोनाकीपोका" इति बङ्गभाषया प्रसिद्धस्य करः, अकारप्रश्लेषेण अपकरः प्रभाविकारोऽप्यपराङ्मुखाः भवन्ति, वीरकरस्तूपकरैः सर्व्वेषां मृत्योर्दिग्ग्रहाणामभिभवात्; एतेन वीराणां सर्व्वतेजोऽभिभावित्वं गौडाधिपस्यापि प्रकाशमानत्वञ्च ध्वनितम्। अत्र पतङ्गकरादपि वीरकरस्य आधिक्यप्रतीतेः व्यतिरेकालङ्कारः।

(२३७) महीति।—महामहिषस्य—यमवाहनस्य इत्यर्थः, यमस्य दक्षिणदिगधिपतित्वात् इति भावः; शृङ्गयोः,—विषाणयोः, तरङ्गभङ्गवत्—ऊर्म्मिच्छेदवत्, भङ्गुरं—भङ्गिमत् कुटिलं वा; बहुलपर्व्वतादिमत्त्वादिति भावः; यद्वा,—शृङ्गाभ्यां तरङ्गभङ्गवत् भङ्गुरं, दर्पातिरेकशिरोविधूननात् इति भावः; भीषणं—भयानकम्, अन्तरालं—मध्यं यस्याः सा; दक्षिणाशा—दक्षिणा दिक्। लोकप्रवादमात्रेण—जनश्रुतिमात्रेण इति यावत्, यमस्य—कृतान्तस्य, अधिवासः,—वसतिः, वासभूमिरित्यर्थः, परमार्थतः,—वस्तुतः, भटभ्रुकुटिः,—भटस्य—योद्भृपुरुषस्य, भ्रुकुटिः,—भ्रूभङ्गिरित्यर्थः, यमस्य अधिवासः इति शेषः; तत्रैव सर्व्वदा प्रत्यक्षत्वेन प्रतीयमानत्वात् इत्याशयः। यमस्य वासभूमिः दक्षिणा दिक् इति वचनन्तु प्रवादमात्रपरतया अलीकमेव, परमार्थस्तु वीराणां सरोषभ्रूभङ्गिरेव यमावासभूमिः, इति भटभ्रुकुटौ यमाधिवासासम्बन्धेऽपि तत्सम्बन्धकथनादतिशयोक्तिरलङ्कारः।

(२३८) चित्रञ्च—आश्चर्य्यञ्च। रणेषु—सङ्ग्रामेषु, सहसा—अकस्मादित्यर्थः, उन्मुक्तसिंहनादानां—सिंहनादं कुर्व्वतामित्यर्थः, शूराणां—वीराणाम्। साहसेति।—साहसरसेन—बलसम्पाद्यकर्म्मसु अतिप्रणयितया, ("साहसन्तु बलात्कारकृतकार्य्ये दमेऽपि च" इति मेदिनी) ये रोमाञ्चाः,—रोमहर्षाः; भीषणकर्म्मसम्पादनादिति

शूराणां रणेषु। इयमेव च (२३९) चतुःसागरसम्भूतस्य भूतिसम्भारस्य भाजनं, प्रतिपक्षदाहि दारुणं बड़वामुखं वा महापुरुषहृदयं वा। (२४०) तेजस्विनः सकलान् अनवाप्य पयोराशिमहजस्य कुतो निर्वृत्तिः उष्णः? (२४१) हृथाविततविपुलफणाभारो भुजङ्गानां भर्त्ता, बिभर्त्ति यो भोगेन मृत्पिण्ड-

भावः, ते एव कण्टकानि—क्षुद्रशत्रवः, मृण्मयरूपाणि वा, तेषां निकरः,—समूहः तेन। सटाः,—केसराः; सिंहानामिव इति भावः। न निर्यान्ति—न निर्गच्छन्ति; वीराणां रोमहर्षणसिंहनादेनैव दुर्बलप्रकृतयः शत्रवो निधनं गच्छन्ति, परन्तु सिंहान्यूनानामपि शूराणां सिंहानाम् इव केशरा यत न विद्यन्ते इत्येव चित्रम् इति समुदितार्थः। वीरास्तु अकेशराः केशरिण एव, अतस्तदाक्रान्तानां रिपूणां कुतो जीवनाशा? इति भावः।

(२३९) चतुःसागरेति।—चतुर्णां सागराणां—समुद्राणां समाहारः चतुःसागरम्, [अत्र "अकारान्नोत्तरपदो द्विगुः स्त्रियामिष्टः" (वा०) इति न प्रवर्त्तते, "पात्राद्यन्तस्य न" (वा०) इति निषेधात् न ङीष्] तस्मात् तत्र वा; यद्वा,—चत्वारः सागराः चतुःसागराः, तेभ्यः तेषु वा सम्भूतस्य—समुत्पन्नस्य, भूतिसम्भारस्य—भस्मनिचयस्य; बाड़वानलतेजसा तत्रत्यवस्तुजातानां दग्धीभूतत्वात् इति भावः, रत्नादिसम्पत्समूहस्य च, ("भूतिः भस्मनि सम्पदि" इत्यमरः) भाजनं—स्थानम्। प्रतिपक्षाणां—विरोधिनां, जलानामित्यर्थः, अग्निसापराख्यस्य अनलस्य सलिलशोषकत्वात्, शत्रूणाञ्च इत्यर्थः, दाहि—दाहकं, दारुणं—तीव्रम्। बड़वामुखम्—अश्वामुखं, तदुद्भूतत्वेनातिदैप्तात् बड़वानलं इत्यर्थः। महापुरुषहृदयं—महाऽनुभावचित्तम्; क्षुद्राशया भीरवश्च न सम्यङ्नयनानि भवन्ति, अतः ताहृशः गौड़ाधिपः अवश्यम् अचिरादेव विनङ्क्ष्यति इत्याशयः।

(२४०) तेजस्विन इति।—पयोराशिसहजस्य—पयोराशौ—समुद्रे, सहजः,—यत उत्पन्नः तस्य, समुद्रसहजस्य च; गाम्भीर्यातिशयादिति भावः; तेजस्विनः,—बड़वानलस्य, वीरपुरुषस्य च; उष्णः,—तेजसः, प्रतापस्य च; सकलान्—क्षत्रान्, शत्रून्, दाह्यानिति च शेषः; अनवाप्य—अनिर्जित्य इति यावत्। कुतो निर्वृत्तिः?—नैव कथमपि निर्वृत्तिर्भवेदित्यर्थः।

(२४१) हृथेति।—हृथा—विकृतं यथा तथा, विततः,—विस्तृतः, विपुलः,—महान्, फणाभारः,—फटासङ्घं यस्य तथाभूतः; भुजङ्गानां—नागानां, भर्त्ता—

मेव केवलम्। (२४२) अप्रतिहतशासनाक्रान्त्युपभोगसुखरसन्तु रसायाः (२४३) दिक्कुञ्जरकरभारभास्वरप्रकोष्ठा वीरबाहव एव जानन्ति। (२४४) रविरिव उन्मुखपद्माकरगृहीतपादपल्लवः सुखेन अखण्डिततेजा दिवसान् नयति शूरः।

प्रभुः, ईषादिः इत्यर्थः; पृथ्वीभारधारीति भावः। यः,—भुजङ्गाधिपतिः, भीमेन—दंष्ट्रेण, फणमण्डलेन वा, ("भीमः सुखे स्यादिसृतावहेश्च फणकायथोः" इत्यमरः) केवलं मृत्पिण्डं—मृत्तिकाराशिं, बिभर्त्ति—धत्ते। केवलं मृत्पिण्डवहनार्थमेतादृक् प्रयासो न तस्य उचित इत्यर्थः, शशाङ्कसदृशनिःसारमृत्पिण्डभावधारिण्याः पृथिव्याः धारणार्थं तस्य सहस्रफणावहनक्लेशस्वीकारः वृथैव, भारस्यास्य परित्याग एव उचित इति भावः।

(२४२) अप्रतिहतेति।—रसायाः,—भुवः, ("भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा" इत्यमरः)। अप्रतिहतेति।—अप्रतिहतेन—प्रतिघातवर्जितेन, अनतिक्रमणीयेन इत्यर्थः, शासनेन—आज्ञया, प्रतापेनेति यावत्, या आक्रान्तिः,—आक्रमणं, प्रभावविस्तार इत्यर्थः, तया य उपभोगः,—सम्भोगः, तेन यः सुखरसः,—सुखास्वादः तम्।

(२४३) दिक्कुञ्जरेति।—दिक्कुञ्जरस्य—दिग्गजस्य, करभारः,—शुण्डाभोगः, तद्वत् भास्वरः,—दीप्यमानः, प्रकोष्ठः,—कूर्परमणिबन्धयोः अन्तरभागः, ("प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च" इति मेदिनी) येषां तथाभूताः, वीरबाहवः,—वीराणां—सुभटानां, बाहवः,—भुजा एव, जानन्ति—अनुभवन्तीत्यर्थः; वीरभोग्या एव वसुन्धरा, न तु शशाङ्कसदृशकापुरुषाः निमेषार्द्धमपि तदाधिपत्यकर्त्तव रक्षणीयाः इति भावः।

(२४४) रविरिति।—शूरः,—वीरपुरुषः, रविः इव—सूर्य्य इव, अखण्डिततेजाः,—अखण्डितम्—अप्रतिहतं, तेजः,—प्रतापः, ज्योतिश्च यस्य तथाभूतः, अत एव उन्मुखेति।—उन्मुखया—उत्सुकया, तत्परयेत्यर्थः, सानुरागयेति भावः, पद्मया—लक्ष्म्या, करेण—हस्तेन, गृहीतः,—सेवितः, पादपल्लवः,—चरणकिसलयः; अन्यत्र,—उन्मुखैः,—ऊर्द्धमुखैः, पद्माकरैः,—कमलसमूहैः, पद्मसरोभिः वा, गृहीताः,—स्पर्शिकाग्रकत्वेन प्राप्ता इत्यर्थः, पादपल्लवाः,—किरणसञ्चयाः यस्य तथाभूतः। दिवसान्—वासरान्, नयति—अतिवाहयति, प्रापयति च, करोतीत्यर्थः; रविः दिवसकरत्वात्; अखण्डिततेजसो वीरा भवाद्दशा एव निर्भयं सुखेन स्थातुं

(२४५) कातरस्य तु शशिन इव हरिणहृदयस्य पाण्डुरपृष्ठस्य कुतो द्विरात्रमपि निश्चला लक्ष्मीः ? (२४६) अपरिमितयशःप्रकरवर्षी विकामी वीररसः । (२४७) पुरःप्रवृत्तप्रतापप्रहृताः प्रत्यानः पौरुषस्य । (२४८) शब्दविद्रुतहिषन्ति भवन्ति द्वाराणि

योग्याः, न भीरवः कृतमहापराधाः गौडाधमाः इति भावः ; शशाङ्कस्य महत्त्वं समुपस्थितम् इति फलितम् ।

(२४५) कातरस्य—दीनस्य, भीतस्येत्यर्थः, कापुरुषस्य इति भावः, शशिन इव —चन्द्रस्य इव, हरिणहृदयस्य—हरिणस्य इव—तदाख्यपशोरिव इत्यर्थः, विवेकविच्युतस्य इव, अतिभीतस्येव इति वा भावः ; हरिणानां भीरुत्वं प्रसिद्धं लोके ; हृदयं—मनः यस्य तथाविधस्य, दुर्बलान्तःकरणस्य इति यावत् ; अन्यत्र,—हरिणः,—मृगः, हृदये—उत्सङ्गे यस्य तथाभूतस्य, मृगलाञ्छनस्येत्यर्थः । पाण्डुरपृष्ठस्य—पाण्डुरं—धवलं, पृष्ठम्—उपरिभागः, बहिःप्रदेश इति यावत्, यस्य तथाभूतस्य, बहिर्निर्मलावभासस्य किन्तु अन्तर्मलिनस्य अत एव विषगर्भस्य पयोमुखस्य इति भावः ; दंशभाषया निर्लज्जस्येति वा ; अन्यत्र,—शशोपरिभागस्य, लक्ष्मीः,—श्रीः, शोभा च, द्विरात्रमपि—एकरात्रादूर्ध्वमपीत्यर्थः, निश्चला—स्थायिनीत्यर्थः, कुतः ?—नैव इत्यर्थः ; यथा शशिनः केवलं पौर्णमास्यामेव एकस्यां रात्रौ शोभातिशयः, न तु अन्यस्यां तिथौ, तथा कातरस्य क्रूरहृदयस्य चण्डिका श्रीरिति भावः ; अतः शशाङ्कस्यापि लक्ष्मीश्चञ्चला भूता इति फलितम् ।

(२४६) अपरिमितेति ।—अपरिमितानां—परिमातुमशक्यानां, प्रभूतानामित्यर्थः, यशसां—कीर्तीनां, प्रकरं—सञ्चयं, वर्षति—ददातीति यावत्, तथोक्तः, अत एव विकामी—विकामशीलः, सर्ववाञ्छादायी इत्यर्थः ; वीरत्वप्रकटनेनैव यशसः सञ्चयापितं जायते, न तु कापुरुषतया नृशंसाचारतया वा इति भावः ; नीतिविगर्हितेन अनेन कर्मणा कापुरुषोचितेन तस्य दुष्कीर्तिरेव सर्वत्र प्रख्याता, अतः दुष्कृतिनः निर्लज्जमनस्कस्य विनाशने न कापि बाधा इति फलितम् ।

(२४७) पौरुषस्य—पुरुषकारस्य, विक्रमस्येत्यर्थः, प्रत्यानः,—मार्गाः । पुर इति ।—पुरःप्रवृत्तेन—अग्रतश्चलितेन, प्रतापेन—तेजसा, प्रहृताः,—क्षुण्णाः, परिष्कृता इति यावत्, अविहता इति भावः । पौरुषशालिनस्ते सिद्धिः निश्चिता एव इत्याशयः ।

(२४८) दर्पस्य—औद्धत्याभिमानस्य, द्वाराणि—अवकाशाः, शूरत्वप्रख्यापनानि

दर्पस्य। (२४९) शस्त्रालोकप्रकाशिताः शून्या दिशः शौर्यस्य। (२५०) रिपुरुधिरशीकरासारेण भूरिव श्रीरपि अनुरज्यते। (२५१) बहुनरपतिमुकुटमणिशिलाशाणकोण-कषणेन चरणनखराजिः इव राजतापि उज्ज्वलीभवति।

इत्यर्थः। शब्देति।—शब्देन—शौर्याभिमानिनः ध्वनिना इत्यर्थः, विद्रुताः,—पलायिताः, द्विषन्तः,—शत्रवः येभ्यः तथाभूतानि; तव प्रयाणवार्त्तायवणेनैव भीरुः स पलायिष्यते, अतस्तूर्णं जिगीषुर्भव, अन्यथा न सम्यक्कार्य्यसिद्धिः, पलायने यथोचितप्रति-शोधदानाप्रसङ्गात् इति भावः; यद्वा,—दर्पस्य—वीरोचितगर्वातिरेकस्य, दारणि—प्रवेशस्थानानि, तल्लाभोपाया इत्यर्थः। शब्देति।—शब्देन—दर्पसूचकध्वनिनादेन, विद्रुताः,—विलक्षाः सन्तः अपसृताः, द्विषन्तः,—विपक्षाः येभ्यः तथाभूतानि भवन्ति; दर्पोद्रेकात् महाशौर्यसूचकाद्धते शत्रूणां निर्जयः कदाऽपि न सम्भवति, अतः शौर्य-दर्प एव प्रागाश्रयणीयः इति तात्पर्यम्।

(२४९) शस्त्रेति।—शस्त्राणाम्—आयुधानाम्, [शास्त्रेः "सर्व्वधातुभ्यः ष्ट्रन्" (उ० ४ पा० १५८ सू०) इति ष्ट्रनि रूपम्] आलोकेन—उद्योतेन, प्रकाशिताः,—उद्भासिताः, शौर्यस्य—वीर्यप्रकटनस्य, दिशः,—ककुभः, पन्थान इति यावत्, शून्याः,—अनाहताः, जनरहिता इत्यर्थः; तवागमनवार्त्तायवणेनैव पलायितप्रतिपक्षत्वादिति भावः। निशितकृपाणप्रभाभिर्विना शौर्यरूपाः दिशो हि न ज्योतिष्कादिभिः उद्भासिताः भवन्ति इति तात्पर्यम्।

(२५०) रिपुरिति।—रिपूणां—शत्रूणां, रुधिराणि—शोणितानि, तेषां शीकरासारः,—विन्दुधारासम्पातः तेन। भूरिव—रणभूमिरिवेत्यर्थः। श्रीरपि—लक्ष्मीरपि, अनुरज्यते—अनुरक्ता भवति, हस्तगता भवतीति भावः, अनुलिप्ता भवति इत्यर्थश्च; अवश्यमेव विजयलक्ष्मीलाभाश्रयिष्यतीत्याशयः। रिपूणां समूलोन्मूलन-जन्यरुधिरेण श्रीर्दुर्लभेवेति तात्पर्यम्। वीरानुरक्ता हि राजश्रियः भवन्ति इति उपमया ध्वन्यते।

(२५१) बहुरिति।—बहूनाम्—अनेकेषां, नरपतीनां—राज्ञां, चरणपतितानामिति भावः, मुकुटेषु—किरीटेषु, या मणिशिलाः,—रत्नानि इत्यर्थः, ताः शाणाः,—निकषशिलाः इव, ("शाणस्तु निकषः कषः" इत्यमरः) तासां कोणैः,—अग्रभिः, कषणं—घर्षणं तेन। चरणनखराजिरिव—पादनखश्रेणिरिव। राजतापि—राजत्वमपि, साम्राज्यमिति भावः; उज्ज्वलीभवति—उज्ज्वलतामापद्यते इत्यर्थः,

(२५२) अनवरतशस्त्राभ्यासेन करतलानि इव रिपुमुखानि श्यामीभवन्ति । (२५३) विविधव्रणबद्धपङ्कजतैः शरीरमिव यशोऽपि धवलीभवति । (२५४) क्वचिषु रिपूरःक्वाटेषु पात्यमानाः पावकशिखामिव श्रियमपि वमन्ति निष्ठुरा निस्त्रिंशप्रहाराः । (२५५) यस्यार्हितहतस्वजनो मनस्विजनो

भूयसीभवति इत्यर्थः ; नृपचक्रसेवितपादपद्माः हि भवन्ति सम्राजः इति भावः । विजितनरपालचूडामणिमरीचिभिः विजेतुः राज्ञः यथा चरणनखराजयः राज्ञः, तथा साम्राज्यमपि, इति साम्यात् उपमालङ्कृतिः ।

(२५२) अनवरतेति ।—अनवरतेन—सन्ततेन, शस्त्राणाम्—आयुधानाम्, अभ्यासेन—अनुशीलनेन, सञ्चालनेन इत्यर्थः, करतलानि इव—हस्ततलभागा इव, रिपूणां—शत्रूणां, मुखानि—वदनानि, श्यामीभवन्ति—सञ्जातकिट्टानि, मलिनानि च भवन्ति इत्यर्थः ; प्रबलप्रतिपक्षस्य शस्त्राभ्यासजनितपराक्रमप्रकरेण विभवेषु जीवनेऽपि च नैराश्योदयादिति भावः ।

(२५३) विविधेति ।—विविधेषु—बहुप्रकारेषु, व्रणेषु—सङ्ग्रामव्यापारितोत्यादितेषु शस्त्रक्षतेषु इत्यर्थः, बद्धानि—व्रणापनयनार्थं संयमितानि, यानि पङ्कजानि—सप्रेषजबस्त्रखण्डसमूहाः तैः । धवलीभवति—शुभ्रीभवति, उज्ज्वलीभवति च ; तेषां बहुयुद्धनिदर्शनतया वीर्य्यातिशय्यप्रकटनपरत्वादिति भावः ।

(२५४) क्वचिषु—वक्षःस्थलेषु इति यावत्, ("तनुरं वक्षं दंशनम् । ...उरः क्वचोऽस्त्रियाम्" इत्यमरः) । रिपूरिति ।—रिपूणाम्—अरीणाम्, उरःक्वाटेषु—वक्षःस्थलकपाटावरणकाष्ठफलकेषु, पात्यमानाः,—क्षिप्यमाणाः । पावकशिखामिव—अग्निज्वालाम् इव इत्यर्थः । वमन्ति—उद्गिरन्ति, अलन्ति च इत्यर्थः, ददति इति यावत् ; सानुरागां कारयन्ति इति भावः । निष्ठुराः,—निर्दयं प्रहर्तारः, प्रमादा इत्यर्थः, निस्त्रिंशप्रहाराः,—असिताडनानि । कठोरचन्द्रहाससम्पाताः शत्रुनिपातनेन राजलक्ष्मीं स्ववशमानयन्तीति निष्कर्षः । शत्रूणां शिखासमेषु हृदेषु वक्षःस्थलेषु जिगीषुणा निर्दयं निपातितेभ्यः करवालेभ्यः तीक्ष्णेभ्यः समुद्भूताः ऊर्मिसमूहाः अयशस्यः दवाग्नय इति तात्पर्यम् ; तेनात्र ज्वालसमप्रभायाः लक्ष्म्याः समानधर्मवैशुर्यस्य लक्ष्यत्वात् साध्यसम्यक्त्वमेवेति बोध्यम् ।

(२५५) यस्येति ।—मनस्विजनः,—वीरपुरुषः । अर्हितहतस्वजनः,—अर्हितेन—प्रभुणा, हतः,—नष्टः, स्वजनः,—बन्धुजनः यस्य तथाभूतः सन् ; यः,—

द्विषद्योषिदुरस्ताड़नेन कथयति हृदयदुःखम्; परुषासि-लतानिपातपवनेन उच्छ्वसिति; (२५६) निरुच्छ्वसित-शत्रुशरीरास्रधारापातेन रोदिति; (२५७) विपच्च-वनिताचक्षुषा ददाति जलं, स श्रेयान्, नेतरः।

अहितानां—रिपूणां, हताः,—विनाशिताः, स्वे—आत्मीयाः, जनाः,—लोका अपि येन, समूलोत्पाटितशत्रुरित्यर्थः। द्विषदिति।—द्विषतः,—अहितस्य; येन यैषां वा स्वबान्धवी नाशितः, तस्येति भावः; योषितां—नारीणाम्, उरस्ताड़नेन—वक्षःस्थला-घातेन, भर्तृनिधनशोकजनितेन इति भावः, हृदयदुःखं—मनोदुःखं, शत्रुकृतबन्धुजन-निधनजनितमिति भावः; कथयति—प्रकाशयति, स्वजनजीवननाशे यादृशः शोकः प्रदर्शनीयः, प्रत्यर्थङ्करोरस्ताड़नैरेव तमावेदयति, न तु दीनवत् विक्षोभकरक्रन्दना-दिभिः इत्यर्थः; शत्रून् विनाश्य तदङ्गनानां प्रबलशोकसमुत्पादनेन प्रतिशोधपिपासां शमयतीति भावः। परुषेति।—परुषाणां—निष्ठुराणाम्, असिलतानां—खड्गवल्लीनां, लतावद्दीर्घतरलानामसीनामित्यर्थः, निपातः,—सञ्चालनं, तेन यः पवनः,—वायुः तेन। उच्छ्वसिति—प्राणिति, आयतं निश्वसिति इत्यर्थः; आत्मीयविनाशशोकादिति भावः; असिसञ्चालनेन शोकप्रतिकारं करोति, न तु कापुरुषवत्स्वयमुष्णोच्छ्वास-मोचनैः हृद्या प्राणान् वहति इति फलितम्।

(२५६) निरुच्छ्वसितेति।—निरुच्छ्वसिताः,—उच्छ्वासरहिताः, निहताः इति भावः; ये शत्रवः,—द्विषन्तः, तेषां शरीराणि—देहाः, विशेषतः चक्षुरादयः इत्यर्थः, तेभ्यः अस्रधारापातेन—नेत्रासारवर्षणेन; मृत्युपूर्वक्षणे अनुभूताघातवेदनया पुच्छ-स्फलनादिभ्यो वियोगाशङ्कया वा प्रतिवीरमनिहत्याकालि वीरलोकप्रस्थानेन वा हेतुना सपदि विगलितेन इति भावः; यद्वा,—शरीराणि,—देहाः, तेषु अस्रधारापातेन—पतितेन नयननीरासारेण; निहतभर्तृकाणां रिपुपत्नीनामिति भावः।

(२५७) विपच्चेति।—विपच्चाणां—शत्रूणां, वनिताः,—कान्ताः, तासां चक्षुषा—नेत्रेण, अञ्जलिभूतेन इति भावः; जलं—तर्पणसलिलमिति यावत्, ददाति—अर्पयति; अहितनिहताय स्वजनाय इति भावः। श्रेयान्—श्रेष्ठः, प्रशस्यतमः इति यावत्। नेतरः,—इतरः,—अन्यः, य उक्तरूपप्रतिकारं न कर्तुं समर्थः, स इत्यर्थः; न, श्रेयानिति शेषः; स कापुरुषः निन्दनीयश्च इति भावः। भवताऽपि अचिरेणैव उक्तरूपं प्रतिविधातव्यम्, अन्यथेतरपक्षीयकलङ्कपङ्कप्रपातावश्यम्भावित्वम् इति फलितम्।

(२५८) न च स्वप्नदृष्टनष्टेषु इव क्षणिकेषु शरीरेषु निबध्नन्ति बन्धुबुद्धिं प्रबुद्धाः। (२५९) स्थायिनि यशसि शरीरधीः वीराणाम्। (२६०) अनवरतप्रज्वलिततेजःप्रसर-भास्वरस्वभावश्च मणिप्रदीपमिव कलुषः कज्जलमलो न स्पृशति एव तेजस्विनं शोकः। (२६१) स त्वं सत्त्ववताम् अग्रणीः, प्राग्रहरः प्राज्ञानां, प्रथमः समर्थानां, प्रष्ठोऽभि-

(२५८) स्वप्नेति।—स्वप्नेषु—निद्राऽवस्थायां विषयानुभवेषु, दृष्टानि—अवलोकितानि, नष्टानि—समनन्तरम् एव अदर्शनं गतानि इत्यर्थः, तेषु इव ; क्षणिकेषु—क्षणमात्रस्थायिषु कियत्समयान्तरमेव भङ्गुरेष्वित्यर्थः ; स्वप्नदृष्टालीवालौकानि खलु भवन्ति शरीराणीति भावः। निबध्नन्ति—स्थापयन्ति। बन्धुबुद्धिम्—आत्मीयत्वज्ञानम्। प्रबुद्धाः,—प्रकृष्टज्ञानिनः, सौगतसिद्धान्तविदः वा, "यत्तत्सत्क्षणिकम्" इत्याद्यो. यत् सत्, तत्क्षणिकमिति क्षणभङ्गवादस्य तेषां सिद्धान्तेन निर्णीयमानत्वात् इति भावः, जागरितास्थ ; ममत्वबुद्ध्या नश्वरशरीरनाशभयात् रक्षपरायुक्तता नोचिता इति भावः।

(२५९) स्थायिनि—अविनश्वरे, चिरस्थाने इति भावः, ["नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (३।१।१३४ पा०) इति स्थाधातोः णिनिः]। शरीरधीः,—देहबुद्धिः ; वीरा यशःशरीरमेव अत्यत्नबुद्ध्या रक्षितुं यतन्ते, न पाञ्चभौतिकं क्षणिकमिति भावः। इह भवादृशानां वीरव्रतचर्योपार्जितयशःशरीराभिरुचिरेव श्रेयस्करी इति विशेषे वक्तव्ये साधारणवीररूपसामान्यमभिहितम् इत्यप्रस्तुतप्रशंसाभेदोऽलङ्कारः।

(२६०) अनवरतेति।—अनवरतं—सन्ततं, प्रज्वलितेन—अतैलपूरतयाऽपि भास्वता, तेजसां—प्रतापानां, ज्योतिषाञ्च ; प्रसरेण—प्रकाशेन, भास्वरः,—दीप्तिमान्, स्वभावः,—प्रकृतिः यस्य तथाभूतं, तेजस्विनं—प्रतापवन्तं, प्रज्वलन्तञ्च। मणिप्रदीपमिव—रत्नदीपमिव ; स्वभावोज्ज्वलमिति भावः। कलुषः,—कृष्णवर्णः, पापपरिणामभूतश्च, तमोबहुल इत्यर्थः। कज्जलमलः,—कज्जलम्—अञ्जनम्, अग्निशिखोद्भूतधूमसञ्चयसम्भूतम् इत्यर्थः, तदेव मलः,—मालिन्यम् ; कज्जलवत् मलः,—मलिनः इत्यर्थश्च। न स्पृशति—नाश्रयति ; प्रतिकारस्पृहायाः बलवत्त्वात् शोकप्रतिपक्षकोधोद्रेकाच्च इति भावः ; अन्यत्र,—मणिमत्त्वेन धूमसम्बन्धाभावादिति भावः।

(२६१) स त्वं—सर्वविभवसम्पन्नो भवान् इत्यर्थः, एतेन सर्वकार्य्याणामना-

जातानाम्, अग्रेसरः तेजस्विनाम्, आदिः असहिष्णूनाम्। (२६२) एताश्च सततसन्निहितधूमायमानकोपाग्नयः सुलभासिधारातोयदुस्तर्या विकटबाहुवनच्छायोपगूढा धीरतायानिवासशिशिरभूमयः स्वायत्ताः सुभटानाम् उरःकवाटभित्तयः।

याससाधनचमत्कृतं हर्षस्य सूचितम्। सत्त्ववतां—महाप्राणशालिनाम्, अग्रणीः,—अग्रगण्यः। प्राज्ञानां—प्रकृष्टबुद्धिशालिनां, प्राग्रहरः,—प्रधानं, वरेण्य इति यावत्, ("ज्ञेये प्रधानं··· । मुख्यवर्ये वरेण्याश्च··· । पराङ्मुखे प्राग्रहरः··· ॥" इत्यमरः)। प्रथमः,—आद्यः, समर्थानां—शक्तिमताम्। श्रेष्ठः,—श्रेष्ठः, ("प्रशस्तिश्चयगे श्रेष्ठ" इति मेदिनी) अभिजातानां—महाकुलीनानाम्। अग्रेसरः,—मुख्यः, ["तत्पुरुषे कृति बहुलम्" (६।३।१४ पा०) इति सप्तम्याः पाचिकोऽलुक्] तेजस्विनां—प्रतापवताम्। आदिः,—प्रथमः, मुख्य इत्यर्थः। असहिष्णूनाम्—अहितविक्रमासहनशीलानामिति यावत्; एतादृशस्य सर्व्वगुणवतश्च ते विपक्षदमने न कालातिक्रमः करणीय इत्याशयः।

(२६२) एतास्चेति।—एताः,—परिदृश्यमानाः, त्वत्कार्य्यार्थमवरुद्धा इति यावत्, स्वायत्ताः,—स्वस्य—आत्मनः, भवतः इति भावः, आयत्ताः,—अधीनाः, सुभटानां—महायोद्धृणाम्। उरः इति।—उरांसि—वक्षःस्थलानि एव, कवाटभित्तयः,—कवाटकुड्यानि, कवाटवद्दृढप्रशस्तवक्षःस्थलानीत्यर्थः। कथम्भूताः ताः? इत्याह, सततेति।—सततसन्निहिताः,—नियतसमीपस्थिताः, धूमायमानाः,—धूमसुद्गमन्त इत्यर्थः, सीत्काहुमवदिङ्गितालकुलपवनाभावेन असम्यग्ज्वलिततया निर्व्वाणोन्मुखा इति भावः; कोपाग्नयः,—क्रोधानलाः यासु तथोक्ताः; भवदभिलाषमावेणैव युद्धाय प्रस्थानैषिणः इति भावः। सुलभेति।—सुलभा—सुप्रापा, ईप्सिता इति यावत्; असिधारातोयेन—शत्रुनिपातितनिस्त्रिंशधाराजलेन, हृप्तिः,—सौहित्यं, पिपासानिवृत्तिरित्यर्थः, आनन्द इति यावत्, यासां तथाविधाः; रणाङ्गने शत्रूणाम् असिप्रहारान् आकाङ्क्षमाणाः इति भावः। विकटेति।—विकटं—विशालं, दुरवगाहमित्यर्थः, बाहुरेव—भुजः एव, वनम्—अरण्यं, तस्य छायाभिः,—अनातपैः इत्यर्थः, बाहुवीर्य्यैरिति भावः; उपगूढाः,—आलिङ्गिताः, सङ्गता इत्यर्थः। धीरतायाः,—धैर्य्यशालितायाः। निवासेति।—निवासस्य—अवस्थानस्य, शिशिरभूमयः,—शीतलप्रदेशाः; न केवलम् उद्दामवीर्य्यशालिनः, किन्तु धीरा अपि इत्यर्थः; बुध्यध्वं बलसम्पन्नत्वेऽपि विवेकवन्तः, न तु दृढकारिणः इति भावः।

(२६३) यतः किं गौड़ाधिपेन एकेन? (२६४) तथा कुरु,—यथा न अन्योऽपि कश्चिदाचरति एवं भूयः। (२६५) सर्व्वोर्वीश्रद्धाकामुकानाम् अलीकविजिगीषूणां सञ्चारय चामराणि अन्तःपुरपुरन्ध्रिनिश्वसितैः। (२६६) उच्छ्वसि रुधिरगन्धान्धगृध्रमण्डलच्छादनैः क्षुण्णच्छायाव्यसनानि। (२६७) अपाकुरु कदुष्णशोणितोदकस्खलैः कुलश्लोकुलटा-

(२६३) "यतः" इत्यत्र "यतः" इति पाठो युक्त इत्यवधेयम्; अथवा पूर्व्ववाक्येन सहास्य अन्वयं कृत्वा, यतः एताः सुभटानामुरःकवाटभित्तयः तव स्वायत्ताः, अतः किं गौड़ाधिपेन इत्येवं सङ्गमयितव्यम्। एकेन—केवलेन, ("एके मुख्यान्यकेवलाः" इत्यमरः)।

(२६४) तथा—तादृशम्। यथा—येन करणेन, यादृशदण्डदानेन इत्यर्थः। अन्योऽपि—गौड़ाधिपात् अपरोऽपि। एवम्—ईदृशम्, अधर्ममिति भावः। भूयः,—पुनः। सर्व्वानेव दुर्विनीतान् राज्ञः दण्डेन शिक्षय इति भावः। अखिलस्यैव दिग्विजयप्रयाणं करणीयम् इति तात्पर्य्यम्।

(२६५) सर्वेति।—सर्व्वा—सकला, उर्वी—पृथ्वी, तस्यां श्रद्धा—अनुरागविशेषः, तां कामयितुं शीलमेषामिति तथोक्तानां, तस्याः कामुकानां वा; मान्याधिनामिति भावः; अलीकविजिगीषूणां—वृथा जेतुमिच्छूनामिति यावत्। अन्तःपुरपुरन्ध्रिनिश्वसितैः,—अन्तःपुरपुरन्ध्रीणाम्—अवरोधकामिनीनां, निश्वसितैः,—निश्वासैः; मर्त्तृनिधनशोकात् दीर्घैरिति भावः। चामराणि—चमरीबालव्यजनानि, सञ्चारय—सञ्चालय, समरेषु निहतेषु विपक्षेषु इति शेषः; सस्वाङ् भव इति भावः।

(२६६) उच्छ्वसि—उत्सादय, नाशय इत्यर्थः। रुधिरेति।—रुधिराणां—शोणितानां, गन्धेन—घ्राणग्राह्येण गुणभेदेन, अन्धानि—दिग्विदिग्ज्ञानरहिततया व्याकुलानि इति यावत्, गृध्राणां—शकुनाख्यपक्षिभेदानां, मण्डलानि—सङ्घाः, तैर्षां छाद्यते एभिरिति छादनानि—पक्षाः तैः। क्षुण्णेति।—क्षुण्णस्य—आतपवतः, छायाः,—अनातपाः, तासु व्यसनम्—आसक्तिः, अवस्थानानुराग इति भावः, तानि; प्रागुक्तानाम् अलीकविजिगीषूणाम् इति शेषः; क्षुण्णच्छायासु सततमासीनाः ते रणभूमौ पतिता गृध्रपक्षच्छायाः सेवन्तामिति भावः।

(२६७) अपाकुरु—उपशमय। कदुष्णेति।—कदुष्णानि—ईषदुष्णानि,

कटाक्षचञ्चूरागरोगान्। (२६८) उपशमय निर्मितशर-शिराविधैः अकार्य्यशौर्य्यक्षयथून्। (२६९) उन्मूलय लोह-निगड़ापीड़मालामलमहौषधैः पादपीठदोहददुर्ललितपाद-

---

दूषणानि इत्यर्थः,["कोः कत्तत्पुरुषेऽचि" (६।३।१०१ पा०) इतीषदर्थकस्य कुशब्दस्य कादेशः] निर्मितशस्त्राघातेन सद्यो निर्गलितसर्षेति भावः; शोणितानि—रुधिराणि एव, अर्हितानामिति भावः; उदकानि—जलानि, किञ्चिदुष्णानीति भावः; तैः खेदाः,—खेदनानि, तापविशेषा इति यावत्, तैः। कुलस्त्रीति।—कु—कुत्सिता, चपलेति भावः, लक्ष्मीरेव—श्रीरेव, कुलटा—पुंश्चली, दुश्चारिणी नारी इत्यर्थः; खेच्छया बहुपुरुषगामित्वादिति भावः,तस्याः कटाक्षप्रधानाः,—पुरुषान्तरं प्रीणयितुम् अपाङ्गप्रेक्षितानि यानि विहितानि तत्प्रधानाः इत्यर्थः, ये चञ्चूरागाः,—दर्शनप्रीतयः, [आकर्षार्थिवस्त्रमासः] ते एव रोगाः,—व्याधयः तान्; यद्वा,—चञ्चूरागरोगाः, —दर्शनानुरागरूपा व्याधयः, नेत्रयोः रक्तवर्णतारूपा व्याधयश्च तान्; यथा कुलटा नारी पुरुषान्तररूपदर्शनेन जातचञ्चूरागा तं प्रति स्वाभिलाषद्योतकान् कटाक्षान् निक्षिपति,चपला लक्ष्मीरपि तथा, अतः तत्तत्पुरुषनिधनेन लक्ष्मीम् अचपलां कुर्व्वन्ति भावः। निःशेषं शमयन् अहं इति तात्पर्य्यम्। चक्षुःपीड़ायां सञ्जातायां तादृश-व्याध्युपशमाय उष्णोदकेन खेदः क्रियते इत्यायुर्वेदप्रसिद्धिः।

(२६८) उपशमय—शान्तिं नय। निर्मितेति।—निर्मितैः,—तीक्ष्णैः, शरैरेव —बाणभूतैरित्यर्थः, शिराणां—नाड़ीनां, अक्षुसम्बन्धिनीनामिति भावः, ("नाड़ी तु धमनिः शिरा" इत्यमरः) वेधैः,—व्यधनसाधनैः। अकार्य्येति।—अकार्य्येषु— अशोभ्यकर्म्मसु, विश्वस्तघातनादिरूपेषु इति भावः; शौर्य्याणि—पराक्रमप्रकटनानि एव, क्षयथवः,—शौर्यरोगविशेषाः तान्; क्षयथुरोगे व्याधेर्निर्मूलनाय शिरावेधनेन रक्तादिक्लेदानां निःसारणं क्रियते इति प्रसिद्धिः। अत्र अकार्य्यशौर्य्येषु क्षयथूनामा-रोपः निर्मितशरेषु शिरावेधास्त्राणां समारोपस्य निमित्तभूततया उक्तः इति परम्परित-रूपकम्।

(२६९) उन्मूलय—अपाकुरु, समूलोत्पाटनेन शान्तिं नय इत्यर्थः। लोहेति। —लोहनिगड़ाः,—लोहशृङ्खलाश्चेव, आपीड़मालाः,—शिरोभूषणभूतमाल्यशेखराः, रत्नहारकपालङ्कारविशेषाः इति भावः, ता एव अमलानि—निर्दोषाणि इति यावत्, महौषधानि—उत्कृष्टभेषजानि तैः। पादेति।—पादपीठेषु—चरणासनेषु, दोहदानि —आस्वादनाभिलाषाः, तैः दुर्ललिताः,—चरणैः, कमलमिव शिरोभूषणमाला इत्यर्थः,

पटुमान्द्यानि। (२७०) क्षपय तीक्ष्णाज्ञाचरचारपातैः जयशब्दश्रवणकर्णकण्डूः। (२७१) अपनय चरणनखमरीचिचन्दनचर्चाललाटलेपैः अनमितास्तमितमस्तकस्तम्भविकारान्। (२७२) उद्धर करदानसन्देशसन्दंशैः द्रविणदर्पोन्मायमाण-

ये पादाः,—चरणानि, विद्विषामिति भावः; तेषां पटूनि—विह्वलानि, मान्द्यानि—जड़त्वानि, आलस्यानि इत्यर्थः, रोगविशेषाश्च तानि; अहितानां पादपीठोचितानि गत्यनुसानि पदानि लोहशृङ्खलैः संवेश्य कारायां सञ्चरणोचितानि कुर्विति भावः। यद्यपि लोहनिगड़ाः पादेषु धार्य्यन्ते, आपदुन्नालास्तु शिरसि इति, तथाऽपि तत्र अमलमहौषधत्वरूपणात् अन्यायदृसदृकारेण धार्य्यत्वसम्भावनया न रूपकविधौ कश्चिद्विरोध इति प्रत्येतव्यम्।

(२७०) क्षपय—अपनय। तीक्ष्णेति।—तीक्ष्णानि—दारुणानि, आज्ञाचराणि—आदेशवचनानि एव, चाराः,—लवणविशेषाः, तेषां पाताः,—अर्पणानि तैः। जयेति।—जयशब्दानां—विजयकोलाहलानामिति यावत्, श्रवणीयानामिति भावः; श्रवणे—आकर्णने, या: कर्णकण्डूः,—श्रुतिकण्डूयनानि, ता एव कर्णरोगविशेषाः ताः; निर्जितान् शत्रून् प्रति तथाऽऽज्ञाचराणि प्रयुज्यन्तां, यथा तानि श्रुत्वा तेषां स्वानुजीविगणैः प्रीत्यमानानां जयशब्दानां श्रवणे अत्याकाङ्क्षा झटिति विरमेदिति भावः। कर्णकण्डूरोगे चारप्रयोगः चिकित्साशास्त्रप्रसिद्धः।

(२७१) अपनय—दूरीकुरु। चरणेति।—चरणानां—पादानां, नखाः,—नखराः, तेषां मरीचयः,—मयूखा एव, चन्दनचर्चाः,—चन्दनानुलेपाः, शुभ्रलसाधर्म्यादिति भावः, ता एव ललाटलेपाः,—भालतटनिहितप्रलेपाः, प्रणिपातावसरे संलग्ना इत्यर्थः, शिरोरोगशमनार्थं न्यस्ता इति भावः, तैः। अनमितेति।—अनमितानाम्—अविधेयीभूतानाम्, अप्रणिपातितानामिति यावत्, गर्वितानामिति भावः; स्तिमितानां—निश्चलानां, मस्तकानां—शत्रुशिरसामिति भावः; स्तम्भविकाराः,—अनत्या स्तम्भभावेन अवस्थानरूपा इति यावत्, शिरःस्तम्भपरीगाय तान्; यथा शत्रवः त्वरितमेव चरणतलेषु प्रणिपतन्ति तथा कुर्विति भावः। शिरःपीड़ायां ललाटे चन्दनप्रलेपः औषधम् इति दृश्यते।

(२७२) उद्धर—उत्पाटय। करेति।—करस्य—राजग्राह्यांशस्य, ("बलिषड्भागाश्च कराः" इत्यमरः) दानम्—अर्पणं, प्रेरणमिति यावत्, तस्य सन्देशाः,

दुःशीललीलाशल्यानि। (२७३) भिन्धि मणिपादपीठ-दीधितिप्रदीपिकाभिः शुष्कसुभटाटोपभ्रुकुटिबन्धान्धकारान्। (२७४) जय चरणलङ्घनलाघवगलितशिरोगौरवारोग्यैः मिथ्या-

—वाचिकानि, त्वया एवमस्माभ्यं कर्तव्यं इत्येवमादेशवचनानि इति यावत्, ("सन्देशवाग्वाचिकं स्यात्" इत्यमरः) ते एव सन्देशाः,—"शाँड़ाशी" इति वङ्ग-भाषया प्रसिद्धाः शल्याकर्षणयन्त्रविशेषाः तैः। द्रविणेति।—द्रविणदर्पेण—धनाह-ङ्कारेण, उन्मायमानाः,—उन्मादम् उद्गच्छन्तः, या दुःशीलानां—दुर्विनीतानाम्, अहितानामिति यावत्, लीलाः,—विचेष्टितानि एव, शल्यानि—कीलाः तानि; निहतावशेषान् विद्विषतः करदानाज्ञाप्रेषणेन विगतदर्पान् कुर्व्वन्ति भावः। सन्देश-यन्त्रेण शल्यमाकर्षति लोकः इति दृश्यते।

(२७३) भिन्धि—विदारय, नाशयेत्यर्थः। मणीति।—मणिमयं—रत्नमय-मित्यर्थः, मणीनां वा यत्पादपीठं—स्वं चरणविन्यासासनं, तस्य दीधितयः,—मयूखा एव, प्रदीपिकाः,—आलोकसाधनानि ताभिः। शुष्केति।—शुष्काः,—रसवर्जिता इत्यर्थः, सङ्ग्रामस्याप्राप्तेः अभ्यासरक्षणार्थं केवलं रचिता इति भावः, सुभटानां—सुयोद्धृणाम्, आटोपेन—संरम्भेण, क्रोधावेशेन इत्यर्थः, भ्रुकुटिबन्धाः,—भ्रुभङ्गा एव, अन्धकाराः,—तमांसि तान्; रणकण्डूयतां अहितानां सर्वेषामेव विजयेन सम्प्रति स्वसैनिकवीरान् क्रोधवर्জ্জितान् नाममात्रेण सुभटान् कुर्व्वन्ति भावः; यद्वा,—शुष्क-सुभटानां—अधर्म्मपथप्रवृत्तानां वीराणाम्, आटोपभ्रुकुटिबन्धाः,—संरम्भभ्रूसञ्चाराः, निर्भयप्रकृतभ्रूभङ्गा वा, त एव अन्धकाराः,—तमःसङ्घाः तान्; पापयोद्धॄन् इत्या-दर्शान्धान् उन्मथ्य सदसत्पथपरिदर्शनक्षमान् विधेहीत्याशयः; आभ्यामपसारः प्रदीप-क्षीनैः साध्यते इत्यनवद्यम्।

(२७४) जय—पराभव, अपनय इत्यर्थः। चरणेति।—चरणयोः,—पादयोः, लङ्घनं—प्रणिपतनमित्यर्थः, तदेव लाघवं—लघुत्वं, शिरसः लम्बरूपत्वाभिमानापगमा-दिति भावः, तेन गलितानि—अपनीतानीत्यर्थः, शिरोगौरवाणि—मूर्द्धगुरुत्वानि, प्रणाम्यनवनतमस्तकरूपता इति भावः, तान्येव आरोग्याणि—अरोगाय हितानि, रोगापनयनकुशलानि औषधानि इत्यर्थः, तैः; अत्रापि,—लङ्घनेन—अभोजनेन, यत् लाघवं—लघुत्वं, शिरस इति भावः, तेन गलितं—विलीनं, दूरीभूतमित्यर्थः, शिरसो गौरवं—जाड्यं, तदेव आरोग्यं—रोगोपशमनम्, औषधमित्यर्थः, तैः। मिथ्येति।—

ऽभिमानमङ्गामन्निपातान् । (२७५) मृदय सततसेवा-ऽञ्जलिमुकुलितकरसम्पुटोष्माभिः इष्वसनगुणकिणकार्कश्यानि । (२७६) येन एव ते गतः पिता पितामहः प्रपितामहो वा, तमेव मा हासीः त्रिभुवनस्पृहणीयं पन्थानम् । अपहाय कुपुरुषोचितां शुचं प्रतिपद्यस्व कुलक्रमागतां केसरी इव कुरङ्गीं राजलक्ष्मीम् । देव ! देवभूयं गते नरेन्द्रे, (२७७) दुष्ट-गौड़भुजङ्गजग्धजीविते च राज्यवर्द्धने, इक्तेऽस्मिन् महाप्रलये

मिथ्याऽभिमानाः,—हया गर्वाः, अङ्गितानामिति भावः, ते एव सन्निपाताः,—असाध्यरोगविशेषाः तान् ; अतएव चरणयोः निपात्य निरभिमानाः क्रियन्तामिति भावः । सन्निपाते शिरसो गौरवं भवति, तच्च लङ्घनादिना प्रशाम्यति इति दृश्यते ।

(२७५) मृदय—शिथिलय, कोमलानि कुरु इत्यर्थः । सततेति ।—सततं—निरन्तरं क्रियमाणा इत्यर्थः. सेवायां—परिचर्य्यायां, भवच्चरणयोरिति शेषः ; यः अञ्जलिः,—युतौ करौ इत्यर्थः, "तौ युतौ अञ्जलिः पुमान्" इति करविवरणे अमरः) तव मुकुलितस्य—मुकुलतां गतस्य, संहतस्य इत्यर्थः, करसम्पुटस्य—युतकरद्वयस्य इत्यर्थः, उष्मभिः,—सन्तापैः ; सततकरद्वयसङ्घर्षजनितैरिति भावः । इष्वति ।—इषवः,—शराः, अस्यन्ते—क्षिप्यन्ते अनेन इति इष्वसनम्—धनुः, तस्य गुणः,—मौर्वी तेन, तदाकर्षणेन इति यावत्, ये किणाः,—कालङ्कचिह्नानि, तेषां कार्कश्यानि—काठिन्यानि, शत्रुकरणाम् इति शेषः ; उष्मस्वेदेन किणकार्कश्यम् अपनीयते इति प्रसिद्धिः । शत्रून् धनुर्ज्याऽऽस्फालनत्याजनेन सेवकान् कुर्विति भावः । इह किणाङ्गमार्दवविधानेन विपक्षाणां सार्व्वकालिकशस्त्रवर्ज्जनव्यापारदर्शनात् हर्षस्य समाजः असाधारणविक्रमत्वं प्रदर्शितम् इति सङ्क्षेपः ।

(२७६) येन, पथा इति शेषः । मा हासीः,—मा त्याक्षीः । त्रिभुवन-स्पृहणीयं—जगत्त्रयलोभनीयम् । पन्थानं—मार्गं, वीरोचितमिति भावः ; अपहाय—परित्यज्य । कुपुरुषोचितां—कापुरुषयोग्याम् । शुचं—शोकम् । प्रतिपद्यस्व—गृहाण । कुलक्रमागतां—वंशपरम्परायाप्राप्ताम् । केसरीव—सिंह इव । कुरङ्गीं—मृगीम् । देवभूयं—देवत्वम् । नरेन्द्रे—राजनि, प्रभाकरवर्द्धने इति यावत्, विबुधेऽपि च, ("नरेन्द्रस्तु महीपाले विबुधेऽपि च पुंस्ययम्" इति मेदिनी) ।

(२७७) दुष्टेति ।—दुष्टः,—दुर्जनः, सविषश्च; गौड़ः,—गौड़ विष एव, भुजङ्गः,—आशीविषः, तेन जग्धं—भक्षितं, हतं इत्यर्थः, जीवितं—जीवनं यस्य तथाभूते ।

धरणीधारणाय अधुना त्वं शेषः। (२७८) समाश्वासय अशरणाः प्रजाः। (२७९) क्ष्मापतीनां शिरःसु शरत्सविता इव ललाटन्तपान् प्रयच्छ पादन्यासान्। (२८०) अहितानाम् अभिनवसेवादीक्षादुःखसन्तप्तश्वासधूममण्डलैः नखम्पचैः प्रचलितचूडामणिचक्रवालबालातपैश्च आयाहि कल्माषपादताम्।

हते—उपस्थिते। महाप्रलये—महासङ्कटे, समरकल्पे इति भावः, कल्पान्ते च। धरणीधारणाय—पृथ्वीपालनाय, पृथ्वीभारवहनाय च। शेषः,—अवशिष्टः, अनन्तनागश्च। इह श्लिष्टपदोपन्यासेनोक्तार्थप्रतीतेः श्लेषानुप्राणितं व्यक्तरूपकम्।

(२७८) समाश्वासय—सान्त्वय। अशरणाः,—निराश्रयाः; प्रभाकरवर्द्धनराज्यवर्द्धनयोः अकाले कालेन दुरात्मना कवलनात् सम्प्रति निरवलम्बाः इत्याशयः।

(२७९) क्ष्मापतीनां—राज्ञां, विद्विषामिति भावः, गोत्राणाञ्च, पर्व्वतानामित्यर्थः। शरत्सविता इव—शारदीयः सूर्य्य इव। ललाटन्तपान्—भालतापिनः, पादन्यासावसाननात् शिरःपीडाकरानित्यर्थः, अतिप्रचण्डानित्यर्थश्च, ["अमूर्य्यललाटयोर्द्वेशितपोः" (३। २। ३६ पा०) इति खश्; "अरुर्द्विषद्—" (६। ३। ६७ पा०) इत्यादिना सुमागमश्च] पादन्यासान्—चरणकल्पन्यासवस्तूनि, स्वचरणपातानित्यर्थः, किरणविक्षेपांश्च; प्रयच्छ—निधेहि; सर्व्वान् विद्विषः स्वचरणे प्रणतान् कुरु इत्यर्थः। अत्र विशेषणश्लेषात् श्लिष्टोपमाऽलङ्कारः।

(२८०) अहितानां—शत्रूणाम्। अभिनवेति।—अभिनवाः,—अपूर्वाः, अननुष्ठितपूर्व्वतयेति भावः, याः सेवाः,—चरणसंवाहनानि, ताः एव दीक्षाः,—अवश्यकर्त्तव्यव्रतविशेषाः, तासु यत् दुःखं—क्लेशः, वह्निरूप इति भावः, तेन सन्तप्तानि—उष्माणि, श्वासधूमानां—निश्वासरूपाणामनलजन्यानां द्रव्यविशेषाणामित्यर्थः, मण्डलानि—समूहाः तैः। नखम्पचैः,—नखान्—पादनखरानिति यावत्, पचन्ति—तपन्तीति नखम्पचाः तैः; ["मितनखे च" (३।२।३४ पा०) इति खश्] प्रणतिकाले दुःखानलसन्तप्तश्वासवायुसंयोगात् चूडामणिसमूहातपतापसम्बन्धाच्चेति भावः। प्रचलितेति।—प्रचलितानां—प्रलुण्ठितानां, चूडामणीनां—शिरोरत्नानां, पादपतितानाम् अहितानामिति भावः, चक्रवालानि—मण्डलानि, तेषां बालातपाः,—नवोदितसूर्य्यकिरणकल्पावभासाः तस्य, कल्माषपादतां—चित्रचरणत्वं, धूमेन आतपेन च योगात् कृष्णपाण्डरचरणत्वमित्यर्थः, ("चित्रं किर्म्मीरकल्माषशबलैताय कर्ब्बुरे" "कल्माषो यातुधाने च कृष्णपाण्डरकृष्णयोः" इत्यमर-मेदिन्यौ) तदाख्यराजर्षिप्रवरत्वञ्च। इह श्लोकोक्तधूमैः चरण-

अपि च (२८१) हृते पितरि एकाकी तपस्वी मृगैः सह संवर्द्धितः, सहजब्राह्मण्यमार्दवसुकुमारमनाः, कृतनिश्चयः, (२८२) चण्डचापवनाटनिटाङ्कारनादनिर्मदीकृतदिग्गजं (२८३) गुञ्जज्ज्याजालजनितजगज्ज्वरं समयम् उद्यतम् एकविंशतिकृत्वःकृत्तवंशम् उत्खातवान् राजन्यकं परशुरामः ।

पतितनरपतिचूडामणिचक्रवालबालातपैश्च धूमलेखचकिततया महाहरभासुरतया च चित्रचरणत्वापादनेन स्वगुणत्यागपूर्वकः अत्युत्कृष्टगुणयोगोऽभूत् इति तृतीयः अलङ्कारः।

(२८१) पितरि—जमदग्नौ, हृते—व्यापादिते, कार्त्तवीर्य्येण इति शेषः। एकाकी—असहायः, साधनविवर्जित इति यावत्, ["एकादाकिनिच्चासहाये" (५ । ३ । ५२ पा०) इत्याकिनिच्]। तपस्वी—तापसः, शान्तात्मा इति भावः। संवर्द्धितः,—पालितः ; स्वभावभीरुककुरङ्गसङ्गसङ्गात् प्रकृत्या कातरोऽपीति भावः। सहजेति।—सहजस्य—स्वाभाविकस्य, ब्राह्मण्यस्य—ब्राह्मणानां भावो ब्राह्मण्यं तस्य, ब्रह्मवर्चसस्य विप्रत्वस्य वा, मार्दवेन—मृदुत्वेन, ब्राह्मणसुलभेनेत्यर्थः ; सुकुमारम्—अतिकोमलं, मनः,—चित्तं यस्य तथाभूतः, सौम्यप्रकृतिरिति यावत्। कृतनिश्चयः,—पितृघ्नान् निहन्मि एवेति कृतप्रतिज्ञः सन्।

(२८२) चण्डेति।—चण्डानाम्—उग्रदर्शनानां, भीतिप्रदानामित्यर्थः, चापवनानां—धनुःसङ्घानाम्, अटनयः,—कोटयः, अग्रभागा इत्यर्थः, ("कोटिरस्याटनिः" इति धनुःप्रकरणे अमरः) तासां टाङ्कारवादेन—टङ्कारध्वनिना, गुणाकर्षणकालिकेनेत्यर्थः, निर्मदीकृताः,—मदशून्यीकृताः, दिग्गजाः,—ऐरावतादयः येन तथाभूतं, दिग्गजमदशीर्षधनुष्टङ्कारमिति यावत् ; महाशूरमिति भावः।

(२८३) गुञ्जदिति।—गुञ्जद्भिः,—मदद्भिः, ज्याजालैः,—धनुर्मौर्वीनिचयैः, आकर्षणजनितैरिति भावः ; जनितः,—उत्पादितः, जगतां—भुवनानां, ज्वरः,—सन्तापः येन तथोक्तम्। समयं—सकलम्, उद्यतं—सङ्ग्रामप्रवृत्तमित्यर्थः। राजन्यकं—क्षत्रियसमूहम्। एकेति।—एकविंशतिकृत्वः,—एकविंशतिवारम् ; ["सङ्ख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" (५।४।१७ पा०) इति सङ्ख्यावाचकाच्छब्दात् अभ्यावृत्तिगणनेऽर्थे कृत्वसुच्] कृत्तः,—छिन्नः, वंशः,—कुलं यस्य तथाभूतम्। उत्खातवान्—उन्मूलितवान्। पुरा कार्त्तवीर्य्यार्जुनो हैहयाधिपतिः तपोवनं मृगयाप्रसङ्गादागतः जमदग्निना मुनिना कामधेनुप्रभावेण सत्कृतः। दृष्ट्वा च नृपतिः अतीव प्रीतः कामधेनुं तां याचितवान्। मुनिस्तु दैवतापितिथिक्रियार्थां तां

किं पुनः (२८४) नैसर्गिककायकार्कश्यकुलिशायमानमानसो मानिनां मूर्द्धन्यो देवः ? तदद्य एव (२८५) कृतप्रतिज्ञो गृहाण गौड़ाधमजीवितध्वस्तये जीवितसङ्कलनाकुलकालाकाण्डदण्डयात्राचिह्नध्वजं धनुः। न हि अयम् (२८६) अरातिरक्तचन्दनचर्चाग्निशिरोपचारमन्तरेण शाम्यति परिभवानल-

---

न दातुमैच्छत्। तेन हि रुष्टो राजा बलात्तां जहार। मुनिरपि क्रोधितस्तेन तव भाधामजनयत्; एवमन्योऽन्ययोः सङ्घर्षे समुत्पन्ने राजा मुनिं निहत्य धेनुं तां बलात् स्वगृहमानिनाय। प्रवासप्रत्यागतः परशुरामः श्रुत्वा तु पितृनिधनं सहारोषकषायितचेताः हैहयाधिपं कार्त्तवीर्यं प्राक् निहत्य एकविंशतिवारं पृथिवीमुरुक्षात्तत्रियां कृत्वा तेषां रुधिरप्रवाहेण पितॄन् तर्पयामासेति पौराणिकी वार्त्तांऽत्रानुमन्येया।

(२८४) नैसर्गिकेति।—नैसर्गिकेण—स्वाभाविकेन, कायकार्कश्येन—देहकाठिन्येन, कुलिशायमानं—कुलिशं—वज्रं, तद्वदाचरत्, अतिकठिनतया कुलिशोपममिति भावः, मानसं—चित्तं यस्य तथाभूतः; क्षत्रियत्वादिति भावः। मानिनां—मानवतां, मानधनानामिति यावत्, मूर्द्धन्यः,—शिरःस्थित इत्यर्थः, मुख्य इति यावत्; यदि तावद्गः स्वभावकोमलः ब्राह्मणः परशुरामोऽपि अमर्षवशः घातकान् शबून् निःशेषमुन्मूलितवान्, तर्हि किं पुनः प्रकृतिकठोरक्षत्रवंशसम्भूतस्य भवतः सम्बन्धे वक्तव्यम् ? अवश्यमेव भवता गौड़ापसदादयः शत्रवः समूलघातं हन्तव्या इत्याशयः। एतेन परशुरामादपि आधिक्यप्रतिपादनात् व्यतिरेकालङ्कारः।

(२८५) कृतप्रतिज्ञः,—गृहीतसत्यः, तमहत्वा न प्रत्यावर्त्तिष्ये इत्येवं विहिताङ्गीकारः इत्यर्थः। गौड़ेति।—गौड़ाधमस्य—गौड़ापसदस्य, जीवितध्वस्तये—जीवनध्वंसनाय। जीवितेति।—जीवितानां—प्राणानां, प्राणिनामिति भावः, सङ्कलनाय—सङ्ग्रहणाय, आकुलः,—व्याप्तः, यः कालः,—अन्तकः, यम इत्यर्थः, तस्य अकाण्डे—सहसा, दण्डयात्रा—युद्धप्रयाणं, तस्याः चिह्नं—लक्ष्मभूतं, ध्वजं—पताका, तत्स्वरूपमित्यर्थः। दृश्यते हि भटाः युद्धयात्रायां पताकादिभिरुपशोभिताः भवन्ति, भवांस्तु असङ्ख्येयैः धनुर्भिः प्रतिदिशं तथाऽभूतां, यथा जनानां भवतः धनुष्काण्डेषु प्राणिप्राणहरणपटीयसः यमस्य किङ्करार्थां प्राणहरणप्रयाणे विजयपताकाभ्रान्तिर्भवेदिति तात्पर्यम्। धनुः,—कार्मुकं, गृहाण—प्रतिपद्यस्व। अचिरमेव तस्य प्राणान् नाशय इति समुदितार्थः।

(२८६) अरातीति।—अरातीनां—विपक्षाणां, रक्तानि—रुधिराणि एव,

पच्यमानदेहस्य देवस्य दुःखदाहज्वरः सुदारुणः। (२८७) निकारसन्तापशान्त्युपायपरिचये हि छिड़िम्बा-चुम्बनास्वादितमिव रिपुरुधिरामृतम् अमन्दरोपायम् अपाथि पवनात्मजेन। (२८८) जामदग्न्येन च शाम्यन्मन्युशिखिशिखा-

---

चन्दनानि—रक्तचन्दनानि इति यावत्, तेषां चर्चा—चार्चिक्यं, स्वदेहे अङ्गलेपभूतानां तेषां विन्यास इत्यर्थः, स एव शिशिरोपचारः,—शैत्यक्रिया तम्, अन्तरेण—विना। परिभवेति।—परिभवः,—अवमानना; भ्रातृवधरूप इति भावः, स एव अनलः,—अग्निः, तेन पच्यमानः,—दह्यमानः, देहः,—शरीरं यस्य तथाभूतस्य। दुःखेति।—दुःखं—भ्रातृविनाशशोकः इत्यर्थः, स एव दाहज्वरः,—सन्निधिकसन्तापप्रबलः रोग-विशेषः। सुदारुणः,—अतितीव्रः। चन्दनलेपनादिशीतोपचारेण दाहज्वरः प्रशाम्यति इति दृश्यते लोके।

(२८७) निकारेति।—निकारेण—स्वेषां परिभवेण, स्वजननिकारजनितः वा, यः सन्तापः,—उष्मा, तस्य शान्तिः,—उपशमः, तस्य उपायः,—साधनं, स एव परिचयः,—रिपूणां निहिंसनं, तस्मिन् विषये इत्यर्थः; अरीणां हननेन प्राक् तैः कृतं स्वनिकारं परिशोधयितुम् इति भावः। छिड़िम्बेति।—छिड़िम्बा—तन्नाम-राक्षसी, स्वप्रेयसीति भावः, तस्याश्चुम्बनेन—ओष्ठाधरसाध्यपानव्यापारेण इत्यर्थः, आस्वादितमिव—पीतमिव, इत्युत्प्रेक्षा। स्वप्रेयस्याः छिड़िम्बायाः राक्षसीत्वात् नूनं तदधरं रुधिरराञ्जितमासीत् भीमसेनेन तच्चुम्बनादवश्यमेव रुधिरास्वादः पूर्वमपि अनुभूत इति भावः। रिपोरिति।—रिपोः,—शत्रोः, दुःशासनस्य इति भावः; रुधिरं—रक्तम्, अमृतमिव—सुधेव, अमन्दरोपायं—नास्ति मन्दरूपः उपायः यस्मिन्निति विग्रहः, मन्दरूपोपायविनाकृतमिति तदर्थः; तथा हि,—मन्दराद्रिः अमृतोद्धरणे उपायभूतः आसीत्, तद्रहितं, मन्दराद्रिणा अनुत्थापितमित्यर्थः; अत एव ततोऽप्युत्कर्षप्रतीतेः व्यतिरेकालङ्कारः; अपाथि—पीतम्। पवनात्मजेन—भीमेन। दुःसहपराभवस्य साधारणशासनेन प्रतिशोधो नैव भविष्यति इति मत्वा मनुष्योऽपि क्रूरोदरः राक्षसायमानः दुःशासनस्य वक्षःशोणितममृतमपिबत्, तदनुसृत्य वैरनिर्यातनार्थं त्वयाऽपि कोमलता परित्यक्तव्या, भीषणोपायश्च अवलम्बनीय इति भावः।

(२८८) जामदग्न्येन—परशुरामेण, ["गर्गादिभ्यो यञ्" (४।१।१०५ पा०) इति गोत्रापत्यार्थे यञ्]। शाम्यदिति।—शाम्यन्—उपशमं गच्छन्, अनुदिधनेनेति भावः, यः मन्युः,—क्रोधः, स एव शिखी—अग्निः, तस्य शिखा—ज्वाला, तस्याः

संज्वरसुखायमानस्पर्शशीतलेषु क्षत्रियक्षतजकर्दमेषु अक्षायि" इत्युक्त्वा व्यरंसीत्।

देवस्तु हर्षस्तं प्रत्यवादीत्,—"करणीयमेव इदम् अभिहितं (२८९) मान्येन। इतरथा हि मे गृहीतभुवि भोगिनाथेऽपि दायाददृष्टिः ईर्ष्यालोः भुजस्य। (२९०) उपरि गच्छति इच्छति निग्रहाय ग्रहगणेऽपि भ्रूलता चलितुम्। अनमत्सु शैलेषु अपि कचग्रहम् अभिलषति दातुं करः।

संज्वराः,—सन्तापाः, तैः सुखायमानाः,—सुखं वेदयमानाः, सुखं निरन्तरमुत्पादयन्त इत्यर्थः, ["सुखादिभ्यः कर्तृवेदनायाम्" (३।१।१८ पा०) इति सुखशब्दात् कर्तरि क्यङि ज्ञानचि च रूपम्] सुखपदाः इति भावः, स्पर्शेन शीतलाय—हिमस्पर्शाय [तृतीयासमासोत्तरं विशेषणसमासः] तेषु। क्षत्रियेति।—क्षत्रियाणां—राजन्यानां, क्षतजानि—रुधिराणि, तेषां कर्दमाः,—शोणितपूर्णगाधजलाशयाः तेषु, अक्षायि—स्नातम्। स्वभावकोमलब्राह्मणोऽपि परशुरामः शत्रुरुधिरैः स्नात्वा परिभवप्रतीकारं कृतवान्, कठोरप्रकृतिक्षत्रियेण त्वया तदवश्यकर्त्तव्यमेव इत्यत्र न कापि विचिकित्सा इति तात्पर्यम्। व्यरंसीत्—विरराम, मौनमवलम्बितवानित्यर्थः।

(२८९) मान्येन—आर्येण। इतरथा हि—अन्यथैव; करणीयत्वोपदेशाकीर्त्तनेऽपि इति भावः; यद्वा,—इतरथा हि—अन्यथाऽपि, अरिनिग्रहार्थं कार्कश्यानवलम्बने इत्यर्थः। गृहीतभुवि—भूभारयाहिणि इत्यर्थः, भोगिनाथे—शेषाहौ, नरनाथे च, दायादृष्टिः,—दायं—पैतृकं धनम्, आदत्ते इति दायादः,—पैतृकस्वकृग्रहर इत्यर्थः, तस्मिन्निव दृष्टिः,—विरुद्धदर्शनमिति यावत्, मत्तोऽन्योऽपि भूभारयाही अस्ति इति प्रतिपत्तबुद्धिरिति भावः; ईर्ष्यालोः,—परोत्कर्षासहिष्णोः, परान् विद्वेष्टुरित्यर्थः; ईर्ष्यां लाति इति विग्रहे "सृगृद्यादयश्च" (उ० १ पा० ३८ सू०) इति कुप्रत्ययान्तो निपात्यते, तथाविधस्येत्यवधेयम्।

(२९०) उपरीति।—उपरि—ऊर्ध्वदेशे, अन्तरीक्षे इत्यर्थः, गच्छति—चरति, ग्रहगणे—ज्योतिर्गणेऽपि, निग्रहाय—कथं मे उपरि गच्छतीति रोषात् दण्डदानाय, भ्रूलता—भ्रूवल्ली, चलितुं—कुटिलीभवितुमित्यर्थः, इच्छति—अभिलषति; सामतिक्रम्य येन केन भावेन कश्चिदपि गमिष्यति इति तु दुःसहम् एवेति भावः। शैलेषु—पर्वतेषु, अनमत्सु—नतिमकुर्वत्सु इत्यर्थः; प्राकृतिकजात्येन, न चाभिमानादिनेति

(२८१) तेजोदुर्विदग्धान् अर्ककरान् अपि चामराणि ग्राहयितुमीहते हृदयम्। (२८२) राजशब्दरुषा मृगराजानामपि शिरांसि वाञ्छति पादः पादपीठीकर्त्तुम्। (२८३) स्वच्छन्दलोकपालस्वेच्छागृहीतानाम् आशापादेशाय दिशाम् अपि स्फुरति अधरः, किं पुनः ईदृशे दुर्जाते जाते? जातामर्षनिर्भरे च मनसि नास्त्येव अवकाशः

भावः; करः,—हस्तः, मनसीति शेषः, कचग्रहं—केशाकर्षणं, दातुं—कर्त्तुमिति यावत्; मदग्रे सर्वैरेव नतमूर्द्धभिर्भवितव्यमित्येवाभिलषामि इति भावः।

(२८१) तेज इति।—तेजोभिः,—ज्योतिर्भिः, दुर्विदग्धान्—दुर्विनीतान्, दुःशीलानिति यावत्, प्रचण्डानिति भावः। अर्ककरान्—सूर्यकिरणान्। ईहते—चेष्टते; मदन्यः तेजस्विसंज्ञकः कश्चिदपि न स्थितिमान् भवितुमर्हति लोके, तेन हि सर्वे एव तेजस्विनः निगृहीताः करैः चामरादिकं गृहीत्वा मां सेवन्तामित्येव मे सततसङ्कल्प इति भावः।

(२८२) राजशब्दरुषा—राजेति शब्दः,—मृगराजेत्याख्या, तत्र या रूट्—रोषः तया, मदन्योऽपि राजेति क्रोधेन इत्यर्थः। मृगराजानां—सिंहानां, तत्र पशुजातिश्च उत्कृष्टसत्त्वादिसम्बन्धात् राजशब्दार्थोग इति भावः। पादः,—चरणः, मनसीति भावः। पादपीठीकर्त्तुम्—अपादपीठानि पादपीठानि कर्त्तुं पादपीठीकर्तुं—चरणविन्यासास्पदीकर्त्तुम्; ["कृभ्वस्ति—" (५।४।५० पा०) इत्यादौ "अभूततद्भाव इति वक्तव्यम्" (वा०) इति च्विः] सर्व्व एव राजानः मच्चरणे प्रणमन्तु, न कश्चित् मदन्यः राजशब्दभाक् भवतु इत्याशयः।

(२८३) स्वच्छन्देति।—स्वच्छन्दैः,—स्वाधीनैः, लोकपालैः,—इन्द्रादिभिः, स्वेच्छया—स्वाभिलाषेण, गृहीताः,—आश्रिताः, पाल्यत्वेन स्वीकृता इति यावत्, तासां, दिशां—ककुभां, नारीणामिति ध्वनिः; आशापादेशाय—इरणाज्ञार्थं अपि, अधरः,—रदनच्छदः, स्फुरति—स्पन्दते; दिगधिपतीनामिन्द्रादीनामपि लोकपालत्वमपहृत्य स्वयमेव सर्व्वदिगाधिपत्यं कर्त्तुमिच्छतीव मे मनः इति भावः; यद्वा,—आशापादेशाय—निर्भर्त्सनाज्ञार्थं, कथं नु यूयमेतादृशेष्वनुरूपेषु नायकेषु सूर्य्यायं मां विहाय अनुरक्ताः इति ताः तिरस्कर्त्तुमिति भावः। ईदृशे—एवंविधे, दुर्जाते—दुर्घटने, आहतधपरिभवे इति भावः, जाते—इत्ते, किं पुनः वक्तव्यमिति शेषः;

शोकक्रियाकरणस्य। अपि च (२८४) हृदयविषमशल्ये मुसल्ये जीवति जाल्मे जगद्विगर्हिते गौड़ाधिपाधमचण्डाले जिह्रेमि शुष्काधरपुटः पोटेव प्रतिकारशून्यं शुचा सूत्कर्तुम्। (२८५) अकृतरिपुबलाबलाविलोललोचनोदकदुर्दिनस्य मे कृतः करयुगलस्य जलाञ्जलिदानम्?

भवदुपदेशात् दुष्टग्रदुर्घटनापातादा प्रागेव मे एवंविधः अभिलाषः प्रादुर्भूतः, अधुना दुष्टग्रदुर्जातजननानन्तरं तत्साधने किं पुनर्वक्तव्यम्? अवश्यमेव तत्साधयिष्यामि इति भावः; जातामर्षनिर्भरे—असहनवेगापूरिते इत्यर्थः। शोकक्रियाकरणस्य—शोकसूचककर्माचरणस्य, अवकाशः,—अवसरः। नास्त्येव—न किञ्चिदपि वर्त्तते; अथवा,—किं पुनः इति परत्र अन्वेतव्यम्; तथा च,—दुष्टग्रे दुर्जाते जाते जातामर्षनिर्भरे च मनसि, शोकक्रियाकरणस्य अवकाशः नास्त्येव इत्यत्र किं पुनः वक्तव्यम्; प्रागेव तथाविधः अभिलाषः जातः, अधुना भ्रातुस्तादृशशोचनीयमृत्युना सर्वानेव दुर्विनीतान् दण्डयिष्यामि, नास्ति मे शोकावसरः, क्रोध एव शोकस्थानमध्यकार्षीत् इति भावः।

(२८४) हृदयविषमशल्ये—अन्तरिन्द्रियनिदारुणव्यथाजनके; यद्वा,—हृदये—चेतसि, विषमं—दुःसहमित्यर्थः, शल्यं—शङ्कुः यस्मात् तथाभूते, मनःपीडादायके इत्यर्थः, हृदयनिखातविषमशल्यभूते इत्यर्थो वा, अतिदारुणशल्यास्त्रभूते इति यावत्, मुसल्ये—मुसलेन—अधोऽयेण, अस्त्रविशेषेण इत्यर्थः, बध्यः,—नाश्यः तस्मिन्, ["विध्यो विषेण यो बध्यो मुसल्यो मुसलेन यः" इत्यमरः। मुसलम् अर्हति इति विषयेण "दण्डादिभ्यो यत्" (५।४।६६ पा०) इति यत्] जाल्मे—पामरे, ("जाल्मः स्यात् पामरे क्रूरेऽसमीक्ष्यकारिणि त्रिषु" इति मेदिनी) जगद्विगर्हिते—त्रिभुवननिन्दिते इत्यर्थः। गौड़ाधिपाधमचण्डाले—हीनस्वपचसदृशे गौड़राजे, जीवति—प्राणिति सति, जिह्रेमि—लज्जे, पोटेव—पुंलक्षणयुता स्त्रीव, स्तनश्मश्रुादिमती नारीवेत्यर्थः, ("पोटा स्त्रीपुंसलक्षणा" इत्यमरः) शुचा—शोकेन। सूत्कर्तुं—सूत्कारम्—अस्पष्टशब्दविशेषं कर्तुमित्यर्थः। तादृशसूत्कृत्यादिभिः शोकसूचकाव्यक्तध्वनिविकाराः क्रियन्ते अधमैः पुरुषैः, न तु वीरैरिति हृदयम्।

(२८५) अकृतेति।—न कृतं—न जनितं, रिपुबलाबलानां—शत्रुसैनिकाङ्गनानां, विलोलानां—चञ्चलानां, लोचनानां—नयनानाम्, उदकैः,—अश्रुभिः, दुर्दिनं—मेघाच्छन्नमहः, यैन तथाभूतस्य, रिपुरमणीनां नयनासारैरजनितमेघा-

(२८६) अदृष्टगौड़ाधमचिताधूममण्डलस्य वा चक्षुषः स्वल्पमपि अश्रुसलिलम् ? श्रूयतां मे प्रतिज्ञा,—शपामि आर्यस्यैव पादपांशुस्पर्शेन, यदि परिगणितैः एव वासरैः (२८७) सकलचापचापलदुर्ललितनरपतिचरणरणरणायमाननिगड़ां निर्गौड़ां न करोमि मेदिनीं ततः तनूनपाति पीतसर्पिषि पतङ्ग इव

क्षुण्णाहस्येत्यर्थः, मे—मम, [कर्तरि षष्ठी] करयुगलस्य—भुजद्वयस्य, [शेषे षष्ठी, जलाञ्जलिना सहास्यान्वयः] जलाञ्जलिदानं—तर्पणार्थम् उदकाञ्जलिदानं, भावे इति भावः ; कुतः ? न कुतोऽपि जलात् तस्मादन्यस्मादित्यर्थः ; रिपुनारीणां हतभर्तृकाणां नयनसलिलैरेव अञ्जलिं पूरयित्वा भ्रातरं तर्पयिष्यामि इति भावः ।

(२८६) अदृष्टेति ।—न दृष्टम्—नावलोकितं, गौड़ाधमस्य—पापगौड़ाधिपस्य, चिताधूममण्डलं—शवदाहार्थविरचितप्रज्वलत्काष्ठचुल्लीद्भूतवह्निध्वजसमूहः येन तथाभूतस्य, चक्षुषः,—नेत्रस्य, मे इति शेषः, स्वल्पमपि—किञ्चिदपीत्यर्थः, अश्रुसलिलं—बाष्पवारि, कुतः ? इति पूर्वेणान्वयः, अतः अवदैहदहा नैव अञ्जलं कियदपि पातयिष्यामीत्यर्थः । [अत्र "अश्रुनेचाश्रुरोदनयोश्चास्रमश्रु च" इत्यमरोक्तेः अश्रुशब्देनैव गतार्थत्वात् सालिलपदमधिकमिति अधिकपदत्वं दोषः इत्यवधेयम्] ; शपामि—शपथं करोमि ; [अत्र "शप उपालम्भे" इति वार्त्तिकबलात्, आक्रोशार्थकात् शपतेः आत्मनेपदमेव नियमितम्, इह तु तल्लक्षितमिति व्याकरणबलबाधितत्वात् च्युतसंस्कारत्वं दोषः इत्यवधेयम्] । पादपांशुस्पर्शेन—चरणरजःस्पर्शेन, तत्स्पर्शनं कृत्वेत्यर्थः । परिगणितैः,—सङ्ख्यातैः, कृतसङ्ख्यतया स्वल्पैरित्यर्थः, वासरैः,—दिवसैः ; ["अपवर्गे तृतीया" (२।३।६ पा०) इति फलप्राप्तेः द्योतितत्वात् कालवाचकात् वासरशब्दादत्यन्तसंयोगे तृतीया ज्ञेया] ।

(२८७) सकलेति ।—सकलानां—समग्राणां, चापचापलेन—धनुश्चाञ्चल्येन ; धनुर्धरा एव वयमित्यभिमानेनेति भावः ; दुर्ललितानां—दुर्विनीतानां, नरपतीनां—राज्ञां, चरणेषु—पादेषु, रणरणायमानाः,—[रणशब्दस्य "नित्यवीप्सयोः" (८।१।४ पा०) इति द्वित्वे पश्चात् "कर्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति उपमानात् कर्तुः रणरणशब्दात् क्यङि आनचि च कृपमेतदिति ज्ञेयम्] रणरणशब्द इव आचरन्तः, रणरणस्वनं कुर्वन्तः इत्यर्थः, निगड़ाः,—लौहशृङ्खलानि यस्यां तथाभूतां, तथा निर्गौड़ां—निहतगौड़पतिं, गौड़ाधिपवर्जितामित्यर्थः ; दुष्टगौड़ेश्वरं निहत्य सर्व्वानेव अन्यान् दुर्विनीतान् नृपान् विजित्य च लौहशृङ्खलनियमितपादान् यदि तान् कारायां

पातकी पातयामि आत्मानम्" इत्युक्त्वा च (२९८) महासन्धिविग्रहाधिकृतम् अवन्तिम् अन्तिकस्थम् आदिदेश,—"लिख्यताम्। आ रविरथचक्रचीत्कारचकितचारणमिथुनमुक्तसानोः उदयाचलात्, (२९९) आ त्रिकूटकटककुट्टाकटङ्कलिखितकाकुत्स्थलङ्कालुण्ठनव्यतिकरात् सुवेलात्,

न निक्षिपामि इति समुदितार्थः। ततः,—तर्हि तन्नूनपातं—अग्निं,("अग्निर्वैश्वानरो वह्निः.....। .....जा वेदास्तनूनपात्॥" इत्यमरः)। पीतसर्पिषि—खादितघृते, दत्तहविषीत्यर्थः; घृतप्रक्षेपेण अतिप्रज्वलिते इति भावः।

(२९८) महासन्धिविग्रहाधिकृतं—महति—प्रधाने चासौ, सन्धौ—विपक्षैः सह मेलनोपायभूते मैत्रीकरणरूपे व्यापारे इत्यर्थः, विग्रहे—युद्धे च, अधिकृतः,—तत्तत्कर्मसम्पादनार्थं राज्ञा नियुक्तः तम्; यद्वा,—सन्धिविग्रहेषु—राजकीयसम्मेलनसङ्गरान्यतरविनिर्णयव्यापारेषु अधिकृतः,—अधिकारवान्, महांश्चासौ सन्धिविग्रहाधिकृतश्चेति तथाविधम्; कदा सन्धिः कर्त्तव्यः? विग्रहो वा विधेयः? इत्यादिमन्त्रणायामधिकृतेषु मन्त्रिषु प्रधानमित्यर्थः, सन्धिविग्रहविषयकादेशनिषेधादौ स्वतन्त्राधिकारवन्तम् इत्यर्थो वा, अवन्तिं—तदाख्यं राजपुरुषम्, अवन्तिदेशवासिनं वा। अन्तिकस्थं—समीपोपविष्टम्, आ—इति अभिविधौ, स चेह दैशिकः इति ज्ञेयम्। रवेरिति।—रवेः,—सूर्यस्य, रथचक्रस्य—रथाङ्गस्य, चीत्कारेण—घर्घररवेण, चकितैः,—भीतैः, चारणमिथुनैः,—गन्धर्वदम्पतिसमूहैः, कीर्त्तिसञ्चारकलनटद्भिर्वा, मुक्तः,—त्यक्तः, सानुः,—प्रस्थदेशः, समतलभूमिरित्यर्थः, यस्य तथाभूतात्; उदयाचलात्—पूर्व्वपर्व्वतात्, ["आङ्मर्य्यादावचने" (१।४।८९ पा०) इति कर्म्मप्रवचनीयतया "पञ्चम्यपाङ्परिभिः" (२।३।१० पा०) इति आङ्शब्दयोगे पञ्चमी]।

(२९९) त्रिकूटेति।—त्रिकूटस्य—लङ्कापुरसन्निहितस्य सुवेलाख्यस्य गिरेः, शृङ्गत्रयशोभितपर्व्वतविशेषस्य इत्यर्थः, कटकाः,—नितम्बभागाः, मध्यदेशा इत्यर्थः, ("कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः) तेषां कुट्टाकेन—कुट्टनकारिणा, छेदकेनेत्यर्थः, ["जल्पभिक्षकुट्टलुण्टवृङ. षाकन्" (३।२।१५५ पा०) इति सूत्रेण, कुट्टयति छिनत्तीति विग्रहे कुट्टयतेः चौरादिकात् कर्त्तरि षाकन्]; टङ्केन—पाषाणदारणास्त्रविशेषेण, लिखितः,—खोदितः, काकुत्स्थस्य—रामस्य, लङ्कालुण्ठनव्यतिकरः,—लङ्कासुवेलगिरिस्थितां स्वनामप्रसिद्धां रावणपुरीं, तस्या लुण्ठनमेव—विध्वंसनमेवेति यावत्, व्यतिकरः,—घटना यस्य तथाभूतात्, सुवेलात्—त्रिकूटाख्यगिरेः, दक्षिणाशा-

(३००) आ वारुणीमदस्खलितवरुणवरनारीनूपुरवमुखर-कुहरकुक्षेः अस्तगिरेः, (३०१) आ गुह्यकगेहिनीपरिमल-सुगन्धिगन्धपाषाणवासितगुहागह्वराच्च गन्धमादनात् सर्वेषां राज्ञां,—(३०२) 'सज्जीक्रियन्तां करा: करदानाय गच्छतच्छ-

स्थितादिति ग्रैवः ; विकूटसुवेलयोरेकस्य गिरेर्वाचकतया, भगवतो रामस्य विजय-वार्त्ता वा विकूटगिरिगाने ठक्कुरेन अङ्कापिता सा सुवेलगिरावपि, तेन श्रीरामचन्द्र-विजयवार्त्ताङ्कितसुवेलगिरिपर्य्यन्तमिति समुदितार्थः। तथा च वाल्मीकीये "तत-स्तमक्षोभ्यबलं लङ्कायां नृपतेश्वरः। सुवेलं राघवं शैले निविष्टं प्रत्यवेदयन्॥" रा० ल० ३१ स० १ श्लो०।

(३००) वारुणीति।—वारुणी—सुराभेदः, तस्याः मदेन—तत्पानजनित-विकारेणेत्यर्थः, स्खलिताः,—उन्मत्ततया विपर्य्यस्तचरणा इति भावः, वरुणस्य—पश्चिमदिक्पालस्य, वराः,—उत्तमाः, नार्य्यः,—स्त्रियः, तासां नूपुरवेण—चरण-निहितानां मञ्जीराणां निनादेन, मुखरः,—सशब्दः, कुहरकुक्षिः,—गह्वरोदरं यस्य तथाभूतात्, अस्तगिरेः,—अस्ताचलात् ; पश्चिमदिगवस्थितादिति भावः। यस्मिन्नस्त-गिरौ अधिपतेः वरुणस्य वरवर्णिन्यः वारुणीं सुरां निपीय उन्मत्ततया पतित्वा सततं मञ्जीरारवेण गह्वरं मुखरयन्ति, तत्पर्य्यन्तमिति समुदितार्थः।

(३०१) गुह्यकेति।—गुह्यकानां—दैवयोनिविशेषाणां, गेहिन्यः,—नार्य्यः, तासां परिमलेन—सङ्गमविमर्द्दोत्थगन्धेन,("विमर्द्दोत्थे परिमलः" इत्यमरः) सुगन्धयः, —सौरभवन्तः, ये गन्धपाषाणाः,—गन्धप्रधानाः शिलाः, गन्धकधातुमय्यः शिला वा, तैर्वासितानि—सुरभितानि, गुहाः,—कन्दरा एव, गृहाणि—भवनानि यस्य तथा-भूतात्, गन्धमादनात्—तदाख्यपर्व्वतात्, उत्तरगिरेः इत्यर्थः, [सर्व्वत्र आङ्योगे पञ्चमी]। अवायमाशयः,—गन्धमादनशैलो हि निसर्गगन्धवासिताभिः शिलाभिः सङ्कीर्णः, तथापि गुह्यकगेहिन्यः सुयानाः निधुवनविलासजनितेन परिमलेन गुहा-गृहाणि निरन्तरं सुगन्धीनि कुर्व्वन्तीति, अपूर्व्वविलासमुनिरेषः भवति हि, तेन तत्पर्य्यन्तमिति भावः। सर्वेषां राज्ञां—समस्तानां नराधिपानाम्, ["षष्ठी शेषे" (२।३।५० पा०) इति सम्बन्धसामान्यविवक्षायां षष्ठी] लिख्यताम् इति योजना, एव-मिति ग्रैवः।

(३०२) किं तत् यल्लिखितुमुपदिश्यते इत्याकाङ्क्षायामाह, सज्जीत्यादि।—सज्जीक्रियन्तां—प्रवर्त्यन्तां, त्वर्य्यन्तामित्यर्थः, कराः,—इक्षाः, करदानाय—राजभाग-

याय वा, गच्छन्तां दिशः चामराणि वा, नम्यन्तां शिरांसि धनूंषि वा, कर्णपूरीक्रियन्ताम् आज्ञा मौर्व्यो वा, (३०३) शैखरीभवन्तु पादरजांसि शिरस्त्राणि वा, घटन्ताम् अञ्जलयः करिघटाबन्धा वा, (३०४) मुच्यन्तां भूमय इषवो वा, समालम्ब्यन्तां वेतयष्टयः कुन्तयष्टयो वा, (३०५) सुदृष्टः क्रियताम् आत्मा मच्चरणनखेषु

दानाय, (इति सन्धिप्रस्तावः); अस्त्रयुद्धाय—युद्धकरणायेति भावः, (इति विग्रहप्रस्तावः)। सर्वे एव मह्यं सम्राजे स्वीकृत्य करं ददतु, तदन्यथा चेत् युद्धं कुर्वन्तु इति समुदितार्थः; मां सम्राट्त्वेन न स्वीकुरुथ चेत् तदा युद्धे युष्मान् विजित्याचिरादेव मदधीनतां नेष्यामीत्याशयः। एवमुत्तरत्रापि। दिशः,—आज्ञाः, गच्छन्तां—राज्यं विहाय पलाय्य आश्रीयन्तां, चामराणि वा—बालव्यजनानि वा, गच्छन्तां—धार्यन्तां, मत्सेवार्थमिति भावः; युष्माभिरिति शेषः। शिरांसि—मस्तकानि, युष्माभिः इति शेषः, नम्यन्तां—मच्चरणयोः प्रणिपत्यन्तां, धनूंषि—चापाः वा, नम्यन्तां—ज्यारोपणेन आकृष्यन्तां, तानि युद्धाय सज्जितानि क्रियन्ताम् इत्यर्थः। आज्ञाः,—आदेशाः, मदीया इति शेषः, कर्णपूरीक्रियन्तां—श्रवणानामलङ्कारीक्रियन्ताम्; कर्णभूषणं यथा सततं कर्णेस्थितं शोभते, तथा मदीयाज्ञा नियतं कर्णेन्द्रियैः सादरं निपीयतामिति भावः; मौर्व्यः,—शिञ्जिन्यः, धनुर्गुणा इत्यर्थः; ("मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरः) कर्णपूरीक्रियन्ताम्—आकर्णमाकृष्यन्तां, युद्धार्थम् इति भावः। इह आज्ञानां मौर्वीणाञ्च कर्णपूरीकरणयोः सन्निविग्रहोपधायकयोरेकदा कर्तुमशक्यत्वादिरोधः, स चैकपक्षाश्रयणपर्य्यवसानः, तुल्यबलत्वनिदानाच्चामौर्वीकर्णपूरीकरणयोः दुर्योरपि, तेन तयोरेकशेषं कर्तुमशक्यत्वात् सन्देहस्यैव पर्य्यवसानतया विकल्पालङ्कृतिः इत्यवदातम्।

(३०३) पादरजांसि—पदधूलयः, मदीयानीति भावः; शैखरीभवन्तु—शिरोभूषणभूतानि भवन्तु, युष्माकमिति शेषः। शिरस्त्राणि वा—युद्धकाले शिरोरक्षार्थं शिरोबन्धनविशेषाः वा, शैखरीभवन्त्वित्यन्वयः। अञ्जलयः,—युक्तकराः, युक्तकरद्वयम् इत्यर्थः, घटन्तां—जायन्तां, प्रणतये युज्यन्ताम् इत्यर्थः, करिघटाबन्धा वा—हस्तिमुद्गरचनाः वा, घटन्तां—भवन्तु इत्यर्थः।

(३०४) मुच्यन्तां—त्यज्यन्तां, भूमयः,—राज्यानीति यावत्। इषवः,—शराः। समालम्ब्यन्तां—गृह्यन्तां, वेतयष्टयः,—वेतलताः; मद्गृहेषु भृत्यभावेन स्थीयतामिति भावः। कुन्तयष्टयः,—कुन्ताख्यास्त्राणि।

(३०५) सुदृष्टः,—सुष्ठु निरीक्षितः, प्रतिबिम्बित इत्यर्थः। मच्चरणनखेषु—

कृपाणदर्पणेषु वा। (३०६) परागतोऽहम्'। पङ्गोः इव मे कुतो निवृत्तिः तावत्, यावच्च कृतः सर्वद्वीपान्तरसञ्चारी सकलनरपतिमुकुटमणिशिलालोकमयः पादलेपः" इति कृतनिश्चयश्च (३०७) मुक्ताखानो विसर्जितराजलोकः स्नानारम्भाकाङ्क्षी सभाम् अत्याक्षीत्। उत्थाय च स्वस्थवन्निःशेषम् आह्निकम् अकार्षीत्; अगलच्च दर्पप्रसर इव श्रुतप्रतिज्ञस्य ग्राम्यदुषा दिवसः त्रिभुवनस्य।

मम पादनखरेषु, स्वच्छतया दर्पणरूपेष्विति भावः; मयि प्रणिपातः क्रियतामिति फलितार्थः। कृपाणाः,—असय एव, दर्पणाः,—मुकुराः तेषु, युद्धार्थमसिं गृह्णातेति भावः; एताः विकल्पपरम्पराप्रतिपादितोक्तयः युयुत्सोः हर्षस्य लोकाधिकसत्त्ववत्त्वज्ञापिकाः, तेन तु सामरिकनीत्यनुसारतः स्वकीयशूरसङ्कल्पदर्शनाय समीरिताः नाभिमानप्रदर्शनाय इति बोद्धव्यम्।

(३०६) परागतः,—प्रस्थितः, विजयार्थमिति शेषः। पङ्गोरिव—पादविकलस्येव। कुतः,—कथमित्यर्थः। निवृत्तिः,—समरप्रयाणात् विरतिः, प्रत्यावर्तनमित्यर्थः, भवेदिति शेषः। कृतः, मयेति शेषः। सर्वेति।—सर्वेषां—सकलानां, समानामसादृश्यानां वा इति भावः, द्वीपानां—जम्बूप्लाक्षादीनामित्यर्थः, अन्तरे—मध्ये, सञ्चरति—भ्रमति इति तथोक्तः, सर्वद्वीपाभ्यन्तरविहारीत्यर्थः। सकलेति।—सकलानां—सर्वेषां, नरपतीनां—राज्ञां, मुकुटेषु—किरीटेषु, या मणिशिलाः,—रत्नानि इत्यर्थः, तासाम् आलोकमयः,—मयूखमयः, अगण्यराजन्यवरेण्यमुकुटमणिमरीचिचयचर्चित इति यावत्, पादलेपः,—चरणप्रलेपः; यद्वा,—पादलेपः,—पादौ लिप्येते—लेप्येते अनेनेति तथोक्तः, पादुका इत्यर्थः। अत्र "सर्वद्वीपान्तरसञ्चारिसकलनरपति—" इत्यादि समस्तपाठः युक्तियुक्ततया प्रतिभाति, "सर्वद्वीपान्तरसञ्चारी" इत्यत्र सञ्चारीति धात्वर्थस्य कर्तृगामितया मुख्यार्थबाधं विना अन्यत्रान्वयस्य व्युत्पत्तिविरुद्धत्वात् इति दिक्। यावत् सर्वे नरपतयः मच्चरणयोः न प्रणिपतेयुः, तावद्ग्राहसङ्गात् व्यापारात् विरमेयमिति भावः।

(३०७) मुक्ताखानः,—त्यक्तसभः, ("आखानो क्लीवमाखानं सभासमितिसंसदः" इत्यमरः)। स्नानारम्भाकाङ्क्षी—स्नानक्रियामभिलषन्। स्वस्थवत्—प्रकृतिस्थ इव, निःशेषं—सकलम्, आह्निकं—दैनिकं, सन्ध्यावन्दनादिक्रियाकलापव्यापार-

(३०८) ततश्च निजाधिकारापहारभीत इव भगवति अंशुमालिनि अपि क्वापि गते गततेजसि अहिमभासि, ताम्रसवनेषु अपि निगूढश्लिलीमुखालापेषु त्रासादिव सङ्कुचत्सु, (३०९) विहगगणेषु अपि समुपसंकृतनिजपक्षविक्षेपनिश्चलेषु भिया इव

मित्यर्थः। अगच्छत्—अतिचक्राम, अचिरणादित्यर्थः, सायमभवत् इति यावत्। दर्पप्रसर इव—अहङ्कारावेग इव। श्रुतप्रतिज्ञस्य—शपथं श्रुतवत इत्यर्थः। शाम्यदुष्णा—शाम्यन्—अपगच्छन्, अधोमुख इत्यर्थः, उष्णा—तेजः, औष्ण्यं च यस्य तथाभूतः; "उष्णो घर्मेऽश्रुणि ज्येष्ठे पुमानूष्मा स्त्रियां त्रिषि" इति कोषात् उष्णशब्दो नान्तोऽदन्तश्च दृश्यते, तेन नान्तस्यैवोष्णशब्दस्यायं प्रयोगः इति क्षेयम। यी हि राज्ञः हर्षस्य एवं दर्पोद्दीप्तं वचनमशौषीत, तस्य गर्वः सपदि विलुप्तोऽभूत, का कथा अन्येषां, स्वयं दिवसोऽपि स्वाभाविकसुखं विहाय भयात् अशमिति तात्पर्यम्।

(३०८) "ततश्च" इत्यादौ "प्रदोषाख्याने नातिचिरं तस्थौ" इति परेण सम्बन्धः। निजेति।—निजस्य—आत्मनः, अधिकारस्य—स्वामित्वस्य, जगत्प्रतपनरूपे कर्मणि इति भावः, अपहारात्—अपहरणकरणात्, भीत इव—त्रस्त इव; हर्षं विलोक्याः दर्पोन्मूलनाय बद्धपरिकरं दृष्टेति भावः। गततेजसि—निष्प्रभे इत्यर्थः, क्वापि गते—अदर्शनं प्राप्ते इत्यर्थः, अस्तमिते इति भावः। अहिमभासि—उष्णरश्मौ, रवौ इत्यर्थः। ताम्रसवनेषु—पद्मकाननेषु, ("अथ ताम्रसं पद्मे ताम्रकाञ्चनयोरपि" इति मेदिनी)। निगूढेति।—निगूढाः,—गुप्ताः; नायकस्य प्रभाकरस्य अस्तमनमवलोक्य विरहदुःखादिव पद्मानां मुकुलीभावेन तद्रसपिपासूनां भ्रमराणां सपदि तत्रावरुद्धत्वादिति भावः; श्लिलीमुखानाम्—भ्रमराणां, बाणानाञ्च, ("अलिबाणौ श्लिलीमुखौ" इत्यमरः) आलापाः,—गुञ्जनानि इत्यर्थः, शत्रुषु पातयच्छा इत्यर्थश्च, येषु तथाभूतेषु। त्रासादिव—भयादिव, सङ्कुचत्सु—निमीलत्सु; अन्तरात्मे स्थित्वा गुप्तभावेन मन्त्रणाकरणात् कथमेते एवं जल्पन्ति, किमेषां मनसि वर्त्तते इति विविच्य इति भावः; भ्रमराः शरपतनभयादिव कमलाभ्यन्तरमन्तर्गृहमिवाश्रियन्तीत्यपि व्यज्यते; लोकेऽपि गृहाभ्यन्तरे प्रच्छन्नं मन्त्रयतां केषाञ्चित् अव्यक्तगुञ्जनमाकर्ण्य गृहाधिकारो भयात् सङ्कुचितो भवतीत्यपि दृश्यते।

(३०९) विहगगणेषु—विहायसा—आकाशमार्गेण गच्छन्ति इति ["ङि च विहायसो विड्वादेशो वक्तव्यः" (वा०) इति डः] तथोक्ताः, तेषां गणाः तेषु, पक्षिसङ्घेषु इत्यर्थः। समुपेति।—समुपसंकृतः,—सङ्कुचित इत्यर्थः, निजपक्षाणां—

अप्रकटीभवत्सु, भुवनव्यापिनीं सन्ध्यां प्रतिज्ञामिव मानयति नतशिरसि घटिताञ्जलिवने जने सकले, (३१०) स्वपदच्युतिचकितदिक्पालदीयमानाभ्रंलिहलोहप्राकारवलयासु इव बहलतिमिरमालातिरोधीयमानासु दिक्षु प्रदोषास्थाने न अतिचिरं तस्थौ। (३११) नमद्भूपलोकलोलांशुकपवनकम्पितशिखैः दीपिकाचक्रवालैः अपि प्रणम्यमान इव प्राहिणोत् लोकं, प्रतिषिद्धपरिजनप्रवेशश्च शयनगृहं

स्वपतवाणां, विक्षेपः,—चालनमित्यर्थः, ये तथाभूताः, अत एव निश्चलाः,—अचञ्चलाः, स्थिरा इत्यर्थः,तेषु. [विशेषणसमासः] अन्यत्र,—समुपसंहृतः,—समाप्तिं गतः, सपदि स्वयमेव विनष्ट इत्यर्थः ; तमसाः हर्षस्याभ्युदयं दृष्टेति भावः ; निजपक्षाणान्—आत्मसहायानां, यः विक्षेपः,—प्रसार इत्यर्थः, तेन निश्चलाः तथाभूतेषु इत्यर्थः, भियेव—त्रासेनेव, हर्षादिति शेषः ; एकत्र,—स्वपक्षसङ्कोचात्, अन्यत्र,—स्वसहायाल्पत्वाच्च इति भावः ; अप्रकटीभवत्सु—अप्रकाशतां गच्छत्सु। भुवनव्यापिनीं—तमसा जगदावरणकारिणीं, जगति ख्यातिमापन्नामित्यर्थश्च, प्रतिज्ञामिव—प्रपथमिव, हर्षस्य इति भावः। मानयति—पूजयति, आद्रियमाणे इत्यर्थः, नतशिरसि—प्रणतमस्तके इत्यर्थः। घटिताञ्जलिवने—कृताञ्जलिसमूहे ; सन्ध्यासमागमात् शिरसि अञ्जलिं बद्ध्वा उपासितुं प्रवृत्ते इत्यर्थः।

(३१०) स्वपदेति।—स्वस्य—आत्मनः, पदस्य—अधिकारस्य, लोकपालकीयत्वरूपस्य इति भावः, च्युतिः,—भंगः, तस्मात् तेन वा चकिताः,—शङ्किताः, ये दिक्पालाः,—दिगधिपतय इन्द्रादयः, तैः दीयमानं—निधीयमानम्, अभ्रंलिहं—गगनस्पर्शि, ["बहाभ्रे लिहः" (३।२।३२ पा०) इति खश्] लोहप्राकारवलयम्—आयसवरणमण्डलं यासु तथाविधासु इव, ("प्राकारो वरणः सालः" इत्यमरः)। बहलेति।—बहलया—प्रभूतया, तिमिरमालया—अन्धकारपटलेन, तिरोधीयमानासु—आच्छाद्यमाणासु, दिक्षु—आशासु, प्रदोषास्थाने—रजनीमुखीयसभाभवने, सायमुपवेशनार्हसभामण्डपे इत्यर्थः।

(३११) नमदिति।—नमतां—प्रणिपतताम्, नृपलोकानां—राजजनानां, लोलस्य—चञ्चलस्य, सम्भ्रमनमनजोभादिति भावः ; अंशुकस्य—वसनस्य, पवनेन—वायुना, कम्पिताः,—सञ्चालिताः, शिखाः,—ज्वालाः येषां तैः,दीपिकाचक्रवालैः,—दीपमण्डलैः। लोकं—परिजनमिति भावः। प्राहिणोत्—विससर्ज, स्वसमीपादिति

प्राविशत्, उत्तानश्च मुमोच अङ्गानि शयनतले। दीपद्वितीयश्च तम् अभिसर इव लब्धावसरस्तरसा भ्रातृशोको जग्राह। जीवन्तमिव हृदये निमीलितलोचनो ददर्श अग्रजम्। (३१२) उपर्युपरि भ्रातृजीवितान्वेषिण इव प्रससृः श्वासाः। धवलांशुकपटान्तेन इव च अश्रुजलप्लवेन मुखम् आच्छाद्य निःशब्दम् अतिचिरं रुरोद; चकार च चेतसि,—(३१३) "कथं नाम आकृतेः तादृश्या युक्तः परिणामोऽयम् ईदृशः? पृथुशिलासङ्घातकर्कशकायबन्धात् तातात् अचलात् इव लोहधातुः

शेषः, यथास्थानं वा। प्रतिषिद्धेति।—प्रतिषिद्धः,—निवारितः, परिजनानां—भृत्यानामिति यावत्, प्रवेशः,—अन्तर्गमनं येन तथाभूतः। उत्तानः,—ऊर्ध्वमुखग्राही, ("उत्तानमगभीरे स्यादूर्ध्वास्यग्रहिते त्रिषु" इति मेदिनी) मुमोच—प्रससारेत्यर्थः। शयनतले—शय्यायाम्। दीपद्वितीयं—दीपमात्रसहचरमित्यर्थः, एकाकिनमिति भावः; तं—हर्षम्। अभिसर इव—दस्युरिव, लब्धावसरः,—प्राप्तावकाशः, एकाकित्वादिति भावः, तरसा—बलेन। जग्राह—आचक्राम। तदानीं भ्रातृशोकः समुदियाय इति भावः। भीषणो दस्युः यथा कृतप्रवेशकाङ्क्षिणं दृष्ट्वा बलादाक्रामति, तथैव शोकः सपदि तद्धृदयतलमधिचकारेति समुदिततात्पर्यम्।

(३१२) उपर्युपरि—अविरतमित्यर्थः, ["उपर्यध्यधसः सामीप्ये" (८।१।७ पा०) इति सामयिकसामीप्ये द्विर्वचनम्]। भ्रातृजीवितान्वेषिण इव—भ्रातृजीवनस्यानुसन्धायिन इव, श्वासाः,—निश्वासमरुतः, अन्वेषणायेति भावः; प्रससृः,—निर्गच्छन्ति स्म। धवलांशुकपटान्तेन इव—श्वेतवसनाञ्चलेन इव, अश्रुजलप्लवेन—बाष्पवारिपूरेण; अश्रुजलमेव तस्य क्रन्दनकालिकमुखाच्छादनवस्त्रकृत्यं चकार इति भावः, लोकेऽपि अमङ्गलव्यञ्जकादये वस्त्राञ्चलेन मुखमाहत्य रौदिति इति दृश्यते।

(३१३) नाम—वितर्के। तादृश्याः,—रमणीयायाः, सुदृढायाश्चेत्यर्थः; युक्तः,—उचितः। परिणामः,—विपाकः, अपमृत्युरित्यर्थः। ईदृशः,—एवंविधः, शोच्य इत्यर्थः। पृथ्विति।—पृथुः,—विशालः, ["प्रथिमृदि—" (उ० १ पा० २९ सू०) इत्यादिना कुः सम्प्रसारणञ्च] शिलासङ्घातः,—पाषाणस्तूप इत्यर्थः, तद्वत्, तेन च कर्कशः,—कठिनः, कायबन्धः,—कलेवरघटनं यस्य तथाविधात्, तातात्—पितुः, अचलादिव—पर्वतादिव, लोहधातुः,—लोहनामा खनिजः पदार्थविशेषः।

कठिनतर आसीत् आर्य्यः। कथञ्च अस्य मे (३१४) हृतहृदयस्य आर्य्यविरहे सकृदपि युक्तम् उच्छ्वसितुम्? (३१५) इयं सा प्रीतिर्भक्तिः अनुवृत्तिर्वा? बालिशोऽपि कः सम्भावयेत् आर्य्यमरणे मज्जीवितम्? (३१६) तत् तादृशम् ऐक्यम् एकपद एव क्वापि गतम्? अयत्नेन एव कृतविधिना पृथक्कृतोऽस्मि। (३१७) दग्धरोषाल्पशेषितशुचा सुचिरं क्रन्दितमपि न मुक्तकण्ठं गतघृणेन मया!! सर्वथा (३१८) लूतातन्तुच्छटाच्छिदुराः तुच्छाः प्रीतयः प्राणिनाम्।

कठिनतरः,—अतिकठिनः; पाषाणोत्पन्नमपि लौहं पाषाणादपि कठिनं भवतीति प्रत्यक्षमिति भावः। अचलादुद्भूतोऽपि लोहधातुर्यथा तनोऽपि कठिनतरः दृश्यते, तथैव पितुरपि अयम् दृढकायः आसीदिति तात्पर्य्यम्।

(३१४) हृतहृदयस्य—भर्त्तारक्तस्य, आत्मसमर्पणव्यवस्थितत्वादिति भावः। सकृदपि—एकं क्षणमपि। उच्छ्वसितुं—प्राणितुम्।

(३१५) इयमिति।—सा प्रीतिः,—तथाविधः दृढतरः उभयोः प्रणयः। सा भक्तिः,—पूज्यतया एकपदः अनुरागः। सा अनुवृत्तिः,—आनुगत्यम्, इयम्—ईदृशभावं प्राप्नोत्यर्थः। बालिशोऽपि—मूर्खोऽपि। सम्भावयेत्—आशंसेत्।

(३१६) तत्—तातस्यैवंविधायां परोत्कर्षमात्रतम्, आ बाल्यादेकत्र शयनासनादिना प्रवृद्धमिति भावः। तादृशं—सर्व्वलोकविदितमित्यर्थः। ऐक्यम्—एकीभावः, अभिन्नभाव इत्यर्थः। एकपद एव—तत्काल एव, आर्य्यस्य मरणादनन्तरमेवेत्यर्थः, ("एकपदं तत्काले नपुंसकं वर्त्तनि स्त्री स्यात्" इति मेदिनी)। अयत्नेन—यत्नं विना एव, अनायासेनैवेत्यर्थः। कृतविधिना—दुर्दैवेन। पृथक्कृतः,—विभिन्नः कृतः, वियोजित इति भावः।

(३१७) दग्धेति।—दग्धेन—कृतेन, अतिदुर्वैवेति भावः; रोषेण—अरातिं प्रति कोपेन, अल्पशेषिता—स्वल्पीकृता, तिरोहितेति यावत्, शुक्—शोकः यस्य तथाभूतेन, अरातिनिधनाय क्रोधोदयात् शोकं विस्मरतीत्यर्थः, गतघृणेन—निर्दयेन,("घृणा दयाऽनुकम्पा स्यात्" इत्यमरः) मया मुक्तकण्ठम्—उच्चैः, सुचिरं—दीर्घकालं, न क्रन्दितमपि—न क्रन्दितमपि।

(३१८) लूतेति।—लूतातन्तुच्छटा—लूता—ऊर्णनाभः, आखुकरः कीट-

(३१९) लोकयात्रामात्रनिबन्धना बान्धवता, यतोऽहमपि नाम पर इव आर्य्ये स्वर्गस्थे स्वस्थ इव आसे; किं च दैवहतकेन फलम् आसादितम् ईदृशि परस्परप्रीतिबन्धनिर्वृतहृदये सुखभाजि भ्रातृमिथुने विघटिते? (३२०) तथा चन्द्रमया इव जगदाह्लादिनो लोकान्तरीभूतस्य लग्नचिताग्नय इव आर्य्यस्य त एव दहन्ति गुणाः" इत्येतानि च अन्यानि च

विशेषः इति यावत्, ("लूता स्त्री तन्तुवायोर्णनाभमर्कटका: समाः" इत्यमरः) तस्याः तन्तुच्छटा—सूत्रनिचयः, तद्वत् छिद्दुराः,—अक्लेशेन छेदार्हा इत्यर्थः, अत एव तुच्छाः,—हेयाः, असारत्वेन गर्हणीया इत्यर्थः। प्रीतयः,—प्रणयाः।

(३१९) लोकयात्रामात्रनिबन्धना—लोकव्यवहारमात्रफला, संसारव्यापनैकमात्रप्रयोजना इति यावत्, बान्धवता—बन्धुत्वम्; स्वार्थसाधनार्थमेव लोके बन्धुत्वं क्रियते, न तु अविकृतगाढानुरागेण परोपकरणार्थम् इति भावः। नाम—कुत्सायां, विस्मये वा। पर इव—अन्य इव, सोदरभिन्न इव इत्यर्थः। स्वस्थ इव—प्रकृतिस्थ इव, यथावत् नित्यक्रियाकरणात् सुखित इव इत्यर्थः। आसे—तिष्ठामि। दैवहतकेन—दग्धविधिना, किं फलं—को लाभः, आसादितं—प्राप्तम्। ईदृशि—एवम्प्रकारे। परस्परेति।—परस्परेषाम्—अन्योऽन्येषां, प्रीतिबन्धेन—प्रणयभरेणेत्यर्थः, निर्वृतं—सुखं, सुखितमिति यावत्, ("निर्वृतिः स्वस्थितावूनं गमने च सुखे स्त्रियाम्" इति मेदिनी) हृदयं—चेतः यस्य तथाभूते, सुखभाजि—सुखभोगनिरते, भ्रातृमिथुने—सोदरयुगले, विघटिते—विच्छिन्ने, जाते सति इति शेषः। अस्मत्पूर्वजाग्रे सम्प्राप्य नीचविधेः कः फललाभोऽभूदिति भावः; दुर्जना हि फलमनपेक्ष्यैव केवलमात्मविनोदाय परेषामपभसम्पादने प्रवर्त्तन्ते इति तात्पर्यम्। "स्त्रीपुंसौ मिथुनं द्वन्द्वम्" इत्यमरोक्तेः, मिथुनशब्दस्य स्त्रीपुंसयोरभिधायकतया, अत्र सामान्ययुगलार्थे प्रयोगः अवाचकत्वदोषायाहयत्न इति विभाव्यम्।

(३२०) लोकान्तरीभूतस्य—परलोकप्रस्थितस्य, मृतस्येत्यर्थः, आर्य्यस्य—ज्येष्ठस्य, चन्द्रमया इव—इन्दुमयसुखव्याप्ता इव, सन्तापादिहरणेन प्रीणनादिति भावः; तथा—ताद्रूप्यः, सर्व्वलोकानुभूता इत्यर्थः, जगदाह्लादिनः,—भुवनवासिजनानाम् आनन्दवर्द्धना इत्यर्थः, त एव—जीवति आर्य्ये ये तदीया गुणाः सर्व्वसन्तापनाशकाः स्युः, ते एवेत्यर्थः, इदानीमिति भावः। गुणाः,—वात्सल्यशौर्य्यदाक्षिण्यादयः। लग्नेति।—लग्नाः,—संसक्ताः, चिताग्नयः,—चितानलाः; अतस्य तस्य दाहकारिका

हृदयेन पर्य्यदेवयत्। प्रभातायाञ्च (३२१) शर्वर्य्यां प्रातरेव प्रतीहारम् आदिदेश अशेषगजसाधनाधिकृतं स्कन्दगुप्तं द्रष्टुम् इच्छामि इति।

(३२२) अथ युगपत्प्रधावितबहुपुरुषपरम्पराऽऽह्वयमानः, स्वमन्दिरात् (३२३) अप्रतिपालितकरेणुः चरणाभ्यामिव सम्भ्रान्तः, ससम्भ्रमैः दक्षिभिः उत्साद्यमाणजानपदः,

---

इति भावः; यैषु तथाभूता इव, चिताग्निभिः सह संयुक्ता इव इति यावत्, दहन्ति—भस्मीकुर्वन्ति; सर्व्वलोकजीवनभूताः दाहनाशनाः; शीतरश्मी जलादयोऽपि अग्निसम्पर्कादुष्णा यथा दहन्ति, तथा तर्पयितारः सतस्य तस्य आर्य्यस्यापि गुणाः चितानलसम्पर्कादुष्णाः सन्तः इदानीं निरतिशयं मां दहन्तीति भावः; तस्य गुणराशीनां स्मृत्या शोका अतीव प्रज्वलिताः सन्तः मां सन्तापयन्तीति तात्पर्य्यम्। पर्य्यदेवयत्—परिदेवितवान्, विललापेत्यर्थः।

(३२१) शर्वर्य्यां—रात्रौ। प्रतीहारं—दौवारिकम्; ["उपसर्गस्य—" (६।३।१२२ पा०) इत्यादिना पाक्षिकी दीर्घः, अमनुष्ये इति निषेधात् कथमिह प्रयुक्तः? इत्याशङ्क्याह उद्दीपितं ज्ञानेन्द्रसरस्वतीभिः,—"कथं तर्हि दौवारिके प्रतीहारशब्दप्रयोग इति चेत्, अवाङ्मुखः प्रतिहारो द्वारम्; तात्स्थ्यात्ताच्छब्द्यमिति"] अशेषगजसाधनाधिकृतं—समस्तगजारोहसैनिकाधिपतिम्।

(३२२) "अथ" इत्यादौ "स्कन्दगुप्तः विवेश राजकुलम्" इति परेण सम्बन्धः। तं विशिनष्टि, युगपदित्यादि।—युगपत्—समकालं, प्रधावितानां—समभ्यमं प्रद्रुतानां, बहूनाम्—अनेकेषां, पुरुषाणां—भृत्यजनानामिति यावत्, परम्पराभिः,—श्रेणिभिः, आह्वयमानः—आकार्य्यमाणः; महाराजकुलादेश्यगौरवात् इति भावः।

(३२३) अप्रतिपालितकरेणुः,—अनपेक्षितगजवाहन इत्यर्थः। सम्भ्रान्तः,—सत्वरः। ससम्भ्रमैः,—सत्वरैः, आदरातिशयवद्भिर्वा; गजसेनाऽधिपतौ सम्मानप्रदर्शनार्थमिति भावः; दक्षिभिः,—याष्टीकैः, सेनापतेः शरीररक्षिभिः सैनिकैरिति यावत्। उत्साद्यमाणजानपदः,—उत्साद्यमाणाः,—अपसार्य्यमाणाः, जानपदाः,—जनसङ्घाः, पुरःसमागता इति भावः, यस्मात् यस्य वा तथोक्तः। ["उत्साद्यमाणजानपदः" इत्यत्र "उत्साद्यमानजनपदः" इति पाठेऽपि स एवार्थः,—"भवेज्जानपदो जानपदोऽपि जनदेश्यौ:" इति मेदिनीवचनात्]।

(३२४) पदे पदे प्रणमतः प्रतिदिग्गमिभमिषग्वरान् वरवारणानां विभावरीवार्त्ताः पृच्छन्, (३२५) उच्छ्रितशिखिपिच्छप्रालिप्तवंशलतावनगहनगृहीतदिगायामैः विन्ध्यवनैः इव (३२६) वारणबन्धविमर्दोद्योगागतैः पुरःप्रधावद्भिः अनायत्तमण्डलैः आधोरणगणैश्च, (३२७) मरकतहरितघासमुष्टीश्च दर्शयद्भिः, नवग्रहगजपतींश्च प्रार्थ्यमानैश्च,

(३२४) पदे पदे—प्रतिपदक्षेपमित्यर्थः। प्रतिदिग्—दिशि दिशि, चतसृभ्यः दिग्भ्यः समागतान्, चतुर्दिगवस्थितान् वा इति भावः। गमिभिषग्वरान्—गजवैद्यप्रवरान्। वरवारणानां—श्रेष्ठगजानां, विभावरीवार्त्ताः,—रात्रिवृत्तान्तान्, रात्रौ ते कीदृशाः आसन् इत्यादिप्रकारानित्यर्थः, पृच्छन्—जिज्ञासमानः। रात्रिवृत्तजिज्ञासया गजेन्द्रचक्रदिनचर्यायां वृत्तम् आपदोषं तस्य सम्यग्ज्ञातमेवेति मन्यते, एतेन चास्य स्वकर्त्तव्यकर्म्मणि अनौदासीन्यं प्रकटीकृतम्।

(३२५) उच्छ्रितेति।—उच्छ्रितैः,—उन्नतैः, शिखिनां—मयूराणां, पिच्छैः,—बर्हैः, लाञ्छितानि—मण्डितानि, वंशलतावनानि—वेणुवल्लीकाननानि, मयूराणां सर्व्वदा तत्र सञ्चारादिति भावः, येषु तथाविधैः, गहनैः,—अरण्यैः, गृहीताः,—अधिकृताः, दिशां—ककुभाम्, आयामाः,—आभोगाः, यैः तादृशैः; विन्ध्यवनैरिव—विन्ध्याचलकाननैरिव, परिदृश्यमानैरिति शेषः; कृष्णवर्णोन्नतदेहत्वात् निबिड़श्मश्र्वादिधारित्वाच्चेति भावः।

(३२६) वारणेति।—वारणानां—हस्तिनां, बन्धे—धारणे, रोधने इति यावत्, यो विमर्दः,—प्रयासः, तस्य उद्योगात्—उपक्रमात्, आगताः,—उपस्थिताः तैः; हस्तिनां वशीकरणार्थं सङ्कटार्थं वा देशान्तरात् समागतैरिति समुदितार्थः। पुरः,—अग्रतः, प्रधावद्भिः,—प्रद्रवद्भिः, अनायत्तमण्डलैः,—न आयत्तं—वशीभूतं, मण्डलं—सङ्घः येषां तैः, अनधीनानुचरैरित्यर्थः, अचिरागमनादिति भावः; ["अनायत्तमण्डलैः" इत्यत्र "अनायतमण्डलैः" इति पाठे,—अनायतं—न दीर्घं, मण्डलं—सङ्घस्य गमनादिव्यवस्था येषां तथाविधैः, सङ्घसविपर्य्यस्तपरिधावनात् इति भावः]। आधोरणगणैः,—हस्तिपकसङ्घैः, ("आधोरणा हस्तिपका हस्त्यारोहा निषादिनः" इत्यमरः)।

(३२७) मरकतेति।—मरकतवत्—तदाख्यहरिद्वर्णमणिवत्, हरिताः,—श्यामलाः, घासानां—यवसानां, मुष्टीः,—कवलान्, मुष्टिगृहीतघासानित्यर्थः, दर्शयद्भिः,—दृश्यथद्भिः; ईदृशीः घासमुष्टीर्नु भक्षते न वा इति जिज्ञासयेति भावः।

(३२८) लब्धाऽभिमतमत्तमातङ्गमुदितमानसैश्च सुदूरम् उपसृत्य नमस्यद्भिः, (३२९) आत्मीयमातङ्गमदागमांश्च निवेदयद्भिः, डिण्डिमाधिरोहणाय च विज्ञापयद्भिः, (३३०) प्रमादपतितापराधापहृतहिरददुःखधृतदीर्घश्मश्रुभिः अग्रतो गच्छद्भिः, (३३१) अभिनवोपसृतैश्च कर्पटिभिर्वारणाप्तिसुखप्रत्याशया धावमानैः, गणिकाऽधिकारिगणैः,

नवेति ।—नवः,—नूतनः, ग्रहः,—ग्रहणं, धारणमित्यर्थः, येषां ताडया; ये गजपतयः,—प्रधानहस्तिनः तान्, प्रार्थयमानैः,—एतान् वन्यकरीन्द्रान् ग्रिक्षणाय अस्मदधीनान् क्रीणीति याचमानैः इत्यर्थः ।

(३२८) लब्धेति ।—लब्धाः,—प्राप्ताः, पाल्यत्वेनेति भावः, अभिमताः,—इष्टाः, प्रार्थिता इति भावः, मत्ताः,—मदोत्कटाः, मातङ्गाः,—हस्तिनः, तैः हेतुभिः मुदितानि—हृष्टानि, मानसानि—मनांसि येषां तैः ; अत एव सुदूरं—दूरत एव, अस्मत्सामीप्यादिति भावः । नमस्यद्भिः,—प्रणिपतद्भिः । ["नमोवरिवश्चित्रङः क्यच्" (३।१।१९ पा०) इति क्यजन्तात् शतृप्रत्ययः] ।

(३२९) आत्मीयेति ।—आत्मीयाः,—स्वाधिकृता इति यावत्, ये मातङ्गाः,—गजाः, तेषां मदागमान्—मदवारिस्रावसञ्चारान्, निवेदयद्भिः,—विज्ञापयद्भिः ; तेषां कर्मणि नियोज्यत्वं ख्यापयद्भिः इति भावः ; डिण्डिमाधिरोहणाय—गजस्योपरि पटहवादिवविधानाय इत्यर्थः ।

(३३०) प्रमादेति ।—प्रमादेन—अनवधानतया, पतितं—पतनं, हस्तिपृष्ठादिति भावः, [भावे क्तप्रत्ययः] तदेव अपराधः,—दोषः तेन हेतुना, अपारकोऽयं हस्तिपृष्ठमारोढुमिति धियेति भावः ; यद्वा,—प्रमादात्—अनवधानात्, हस्तिपालने अवहेलनादिति यावत्, पतितः,—उपस्थितः, सञ्जात इत्यर्थः, य अपराधः तेन हेतुना ; हस्तिपालनानुपयुक्तोऽयमिति धिया इति भावः ; अपहृतः,—आच्छिद्य नीत इत्यर्थः, यो हिरदः,—गजः, स्वाधिकृत इति भावः, तस्य दुःखेन—क्लेशेन ; तदपहरणजनितेन इति भावः ; धृतानि—रचितानि इत्यर्थः, दीर्घाणि—प्रलम्बानि, श्मश्रूणि—भ्रूश्मश्रवः, यैः तथाभूतैः ।

(३३१) अभिनवोपसृतैः,—अल्पदिनसागतैः, कर्पटिभिः,—जीर्णमलिनवसनधारिभिः । वारणेति ।—वारणस्य—गजस्य, आप्तौ—लाभे, यत् सुखम्—आनन्दः, तस्य प्रत्याशया—लाभेच्छया, धावमानैः,—प्रद्रवद्भिः, गणिकाऽधिकारिगणैः,

चिरलब्धान्तरैः, उच्छ्रितकरैः, (३३२) कर्मण्यकरेणुका-सङ्कथनाकुलैः, (३३३) उल्लासितपल्लवचिक्काभिः अरण्यपालपङ्क्तिभिश्च निष्पादितनवग्रहनागनिवहनिवेदनोद्यताभिः उत्तम्भिततुङ्गतोत्रवनाभिः, (३३४) महामात्रपेटकैश्च प्रकटितकरिकर्मचर्मपुटैः, (३३५) अभिनवगजसाधन-

—गणिका—गजानां लोभनार्था हस्तिनी, यया प्रलोभ्य हस्तिनो ग्रियन्ते इति भावः, ("करिण्यापि गणिका" इत्यमरः) तस्या अधिकारिणस्ताः,—अध्यक्षवर्गाः तैः। चिरलब्धान्तरैः,—चिरेण—दीर्घकालानन्तरमित्यर्थः, लब्धं—प्राप्तम्, अन्तरम्—अवकाशः, गजमङ्गहणे स्कन्दगुप्तदर्शने वा इति भावः, यैः तथोक्तैः; उच्छ्रितकरैः,—उद्धृतहस्तैः; करेणुसान्त्वनाय स्कन्दगुप्तं सम्मानप्रदर्शनाय वा इति भावः।

(३३२) कर्मण्येति।—कर्मण्या—करियूथनकुशला, या करेणुका—हस्तिनी, तस्याः सङ्कथने—समालपने, आकुलाः,—व्यापृताः तैः, गजसेनापतिना सह करेणुविषयकालापपरैरित्यर्थः।

(३३३) उल्लासितेति।—उल्लासिताः,—उद्धृताः, पल्लवा एव—किसलयान्येव, चिह्नानि—लक्षणानि, वयमारण्यपाला इति सूचकानीति भावः; याभिः तथोक्ताभिः, अरण्यपालपङ्क्तिभिः,—गजबन्धनार्थं वनरक्षिवर्गैरित्यर्थः। निष्पादितेति।—निष्पादितः,—सम्पादितः, नवग्रहाणां—नवधृतानां, नागानां—गजानां, निवहः,—समूहः, तस्य निवेदने—विज्ञापने, उद्यताभिः,—प्रवृत्ताभिः। उत्तम्भितेति।—उत्तम्भितम्—उल्लासितं, तुङ्गम्—उन्नतं, तुदति अनेनेति तोत्रं—वैशुकं, हस्तिशासनचमदण्डविशेष इति भावः; ("तोत्रं वैशुकम्" इत्यमरः) ["दात्रो—" (३।२।१८२ पा०) इत्यादिना ष्ट्रन् "तितुत्र—" (७। २। ९ पा०) इत्यादिना इडभावः] तदर्थं वनम्—अरण्यजातं दारु इत्यर्थः, याभिः तथोक्ताभिः; यद्वा,—उत्तम्भितानि—ऊर्ध्वमुन्नीलितानि, तुङ्गतोत्रवनानि—अत्युच्चवैशुकारण्यानि, प्रभूतत्वादिति भावः, याभिः ताडशीभिः।

(३३४) महामात्रेति।—प्रधानहस्तिपकहन्दैः, ("महामात्रः समूहे चामात्ये हस्तिपकाधिपे" "पेटकः पुल्लकादीनां सङ्घातायां कटम्बके" इत्युभयत्र मेदिनी)। प्रकटितेति।—प्रकटितानि—आविष्कृतानि, प्रदर्शितानीत्यर्थः, करिणां—हस्तिनां, कर्मणे—युद्धादिशिक्षायै इत्यर्थः, चर्मपुटानि—चर्मनिर्मिता हस्त्याकारा यैः तथोक्तैः।

(३३५) अभिनवेति।—अभिनवं—नूतनं, गजानां—करिणां, साधनं—वशी-

सञ्चरणवार्त्तानिवेदनविसर्जितैश्च नागवनवीथीपालदूतवृन्दैः, (३३६) प्रतिक्षणप्रत्यवेक्षितकरिकवलकूटैः कटभङ्गसङ्ग्रहं ग्रामनगरनिगमेषु निवेदयमानैः (३३७) कटकक्रदम्बकैः क्रियमाणकोलाहलः, (३३८) स्वामिप्रसादसम्भृतेन महाऽधिकाराविष्कारिणा स्वाभाविकेन च अवष्टम्भाभोगेन उदासीनोऽप्यादिशन् इव, (३३९) असङ्ख्यकरिकर्णशङ्खसम्पत्तसम्पादनाय

करणं, तस्मै सञ्चरणं—समुदयोगः, तस्य वार्त्तानिवेदनाय—वृत्तान्तज्ञापनाय, तान् तान् गजान् वशीकर्तुं प्रवृत्तोऽस्मि इत्यादिसंवादनिवेदनाय इति भावः; विसर्जितैः,—प्रेषितैः, केनचित् अरण्यानीरक्षकाध्यक्षेण इति भावः। नागेति।—नागानां—हस्तिनां, वनवीथी—अरण्यश्रेणी, तस्याः पालाः,—अध्यक्षाः, तेषां दूतवृन्दैः,—वार्त्तावहनिवहैः।

(३३६) प्रतिक्षणेति।—प्रतिक्षणं—क्षणे क्षणे, मुहुर्मुहुरिति यावत्, प्रत्यवेक्षितानि—परिदृष्टानि, करिणां—गजानां, कवलकूटानि—ग्रासमुष्टयः यैः तथाभूतैः। ग्रामनगरनिगमेषु—ग्रामः,—पल्ली, नगरं—बहुजनैर्वासभूतं सम्बद्धं स्थानं, निगमः,—वणिक्पथः तेषु, ("वणिक्पथः पुरं वेदी निगमः" इत्यमरः) कटभङ्गसङ्ग्रहं—इक्षुच्छिन्नशस्यसञ्चयं, प्रथमगोधूमादिसङ्ग्रहमिति यावत्; करिणां भोजनार्थमिति भावः; ("कटभङ्गस्तु शस्यानां इक्षुच्छेदे वृथायथे" इति मेदिनी)। निवेदयमानैः,—विज्ञापयद्भिः। राजद्वारि जीवपतीनां शस्यमूल्यावाप्तये इति भावः, एतेन प्रतारणबलात्कारचौर्य्यादिभिः तृणशस्यादीनामप्यानयनं हर्षनिषिद्धम् इति सूच्यते।

(३३७) कटकक्रदम्बकैः,—कटकाः,—हस्तिकर्म्मनियुक्ताः, तेषां कदम्बकानि—वृन्दानि तैः। क्रियमाणेति।—क्रियमाणः,—विधीयमानः, कोलाहलः,—कलरवः यस्य; यं प्राप्य एतैः स्वस्वव्यापारसंसिद्धये कोलाहलः कृत इति भावः। इह यथावदस्तुवर्णने विच्छित्तिविशेषदर्शनात् स्वभावोक्तिरलङ्कृतिः।

(३३८) स्वामीति।—स्वामिनः,—प्रभोः, प्रसादः,—अनुग्रहः, तेन सम्भृतः,—जनितः तेन। महेति।—महाऽधिकारस्य—उन्नतपदस्य, गजसेनाऽध्यक्षतारूपस्य इति भावः, आविष्कारेण—प्रकटनेन, स्वाभाविकेन—स्वतःसिद्धेन, अवष्टम्भाभोगेन—गर्वावेशेन, गाम्भीर्य्यभरेण इत्यर्थो वा; उदासीनः,—मध्यस्थः, आदेशदानानधिकारी इत्यर्थः। आदिशन्निव—आज्ञापयन्निव, अनादिशन्नपि प्रभाववदाकारेङ्गितादिना समर्थयमान इवेत्यर्थः; अनुजीविन इति भावः।

(३३९) असङ्ख्येति।—असङ्ख्यानां—बहूनामिति यावत्, करिणां—गजानां,

समुद्रान् आज्ञापयन् इव, (३४०) शृङ्गारगैरिकपङ्काङ्गराग-सङ्ग्रहाय गिरीन् मृष्णन् इव, (३४१) दिग्गजाधिकारं ककुभाम् ऐरावतमिव अपहरन्, हरेर्हरपदभरनमितकैलासगिरि-गुरुभिः पादन्यासैः गुरुभारग्रहणगर्वमुर्व्याः संहरन्निव,

कर्णेषु—श्रुतिमूलेषु इत्यर्थः, शङ्काः,—कम्बव एव, शङ्कनिर्मितालङ्कारा एवेत्यर्थः, सम्पदः,—भूषणानीति भावः, तासां सम्पादनाय—सङ्ग्रहाय, समुद्रान्—सागरान्; आज्ञापयन् इव—आदिशन् इव; हस्तिकर्णशोभासम्पादनाय तूर्णं स्वगर्भस्थितान् शङ्खान् उद्धृत्यानेतुं समुद्रानपि आज्ञापयन्निव इति भावः। एतेन तस्य समुद्रेष्वोऽपि गाम्भीर्यवत्त्वं सूचितम्; असङ्ख्येयानां करीणां कर्णेषु एतावत्यः शङ्खराशयः तेन विनिवेशिताः, यथा समुद्रगर्भस्थिताः शङ्खनिवहाः निःशेषाः एवाभूवन्निति व्यञ्जितम्।

(३४०) शृङ्गारेति।—शृङ्गारः,—गजभूषणं, ["शृङ्गारः सुरते नाट्यरसे च गजमण्डने" इति मेदिनी। "शृङ्गारभृङ्गारौ" (उ० ३ पा० १३६ सू०) इति शृधातोः आरन् नुम् गुक् च रूपम्] यः गैरिकपङ्कः,—गैरिकद्रवः, स एव अङ्गरागः,—गजानामङ्गरञ्जनार्थं लेपविशेषः, तस्य सङ्ग्रहाय—सञ्चयाय, गिरीन्—पर्वतान्, मृष्णन् इव—अपहरन् इव, गैरिकाणीति शेषः; गजाङ्गरागसम्पादनाय गिरेरपि गैरिकत्वमपोऽकारि इति भावः; एतेन तस्य पर्वतादपि दृढदार्ढ्यं सूचितम्। सर्व्वत्र गजानामातिशय्यद्योतनाय एवमुत्प्रेक्षेति ज्ञेयम्।

(३४१) दिग्गजाधिकारं—दिग्गजाधिकारिणं, सर्व्वदिग्गजश्रेष्ठमित्याशयः। ककुभां—दिशाम्। ऐरावतम्—अमलमातङ्गं, पूर्व्वदिग्गजमिति यावत्। अपहरन्निव—मृष्णन् इव, गजवीर्य्यं तत्सम्पदा च ऐरावतमपि अतिक्रामन्निवेत्यर्थः; यद्वा,—केवलसप्तगजाधिकारिणमैरावतम् असङ्ख्यगजेन्द्राधिकारप्रदर्शनेन न्यक्कुर्व्वन् इव इत्याशयः। हरेः,—वराहरूपिणः नारायणस्य इति भावः, उर्व्याः,—पृथिव्याः, गुरुभार-ग्रहणगर्वं—महाभारोद्वहनाहङ्कारम्। हरेति।—हरस्य—शिवस्य, पदभरेण—चरणवेगेन, चरणस्यापनरभसेनेत्यर्थः, नमितः,—आवर्जितः, भाराक्रान्ततया अधोगत इत्यर्थः, यः कैलासगिरिः,—कैलासपर्व्वतः, तद्गुरुभिः,—भारवद्भिः, पादन्यासैः,—पदविक्षेपैः, संहरन्निव—सङ्कोचयन्निव; गुरुपादन्यासेन वराहरूपिणो नारायणस्यापि दन्तयोः व्यर्थां जनयन्निवेति भावः। पदभरेण वराहदन्तस्यापि नमनोत्प्रेक्षणादस्य महासारवत्त्वं सूचितम्। इहोर्व्वीनमनेन भगवतः वराहस्यापि दन्ताश्चलनसमं समुत्प्रेक्षितम्; अपि चोपमेयगतोत्कर्षदर्शनात् व्यतिरेकोऽपि व्यज्यते।

(३४२) गतिवशविलोलस्य च आजानुलम्बस्य बाहुदण्डद्वयस्य विक्षेपैः आलानशिलास्तम्भमालामिव उभयतो निखनन्, ईषदुत्तुङ्गलम्बेन अधरबिम्बेन अमृतरसस्वादुना नवपल्लवकोमलेन कवलेन इव श्रीकरेणुकां विलोभयन्, (३४३) निजनृपवंशदीर्घं नासावंशं दधानः, अतिस्निग्धमधुरधवलविशालतया पीतक्षीरोदेन इव पिबन् ईक्षणयुग्मायामेन दिशाम् आयामम्, (३४४) मेरुतटादपि विकटविपुलालिकः, सततम्

(३४२) गतीति :—गतिवशेन—गमनवेगेनेत्यर्थः, विलोलस्य—चञ्चलस्य। विक्षेपैः,—सञ्चालनैः। आलानेति।—आलानानि—गजबन्धनानि, गजबन्धनार्था इत्यर्थः, ये शिलास्तम्भाः,—पाषाणस्थूणाः, तेषां मालामिव—श्रेणिमिव, उभयतः,—उभयोः पार्श्वयोः, निखनन्—आरोपयन्; पाषाणकठिनप्रलम्बभुजशालीति भावः। ईषदुत्तुङ्गलम्बेन—अल्पोन्नतलम्बिना। अधरबिम्बेन—बिम्बोष्ठेन। अमृतेति।—अमृतरसवत्—सुधास्वाद इव, स्वादुना—सुरसेन; सरसेन नारीलीभनीयेन वा इति भावः। नवेति।—नवपल्लववत्—अभिनवोद्गतकिसलयवत्, कोमलेन—सुकुमारेण, मृदुना च; एतेन अधरस्य आरक्तत्वमपि सूचितम्। कवलेनेव—ग्रासेनेव, श्रीकरेणुकां—लक्ष्मीहस्तिनीं, सुलक्षणां हस्तिनीमिति यावत्, विलोभयन्—आकर्षयन्।

(३४३) निजेति।—निजः,—स्वीयः, नृपवंशः,—राजकुलं, तस्य राजवंशसम्भूतत्वेनेति भावः, तद्वत् दीर्घम्—आयतम्, इत्युपमितसमासाश्रयणात् आर्थीयमुपमालङ्कारः। स्वकीयवंशः सुदीर्घः आसीत् इत्यावेदयितुमेव सुदीर्घां नासिकां धृतवानिति भावः; नासावंशं—नासिकादण्डम्। अतीति।—अतिस्निग्धम्—अतिकोमलमित्यर्थः, मधुरं—मनोहरं, धवलं—शुभ्रं, विशालम्—आयतं तस्य भावः, तत्ता तया। पीतक्षीरोदेन—दुग्धसागरपायिना। ईक्षणयुग्मायामेन—नेत्रयुगलविस्तारेण। आयामं—दैर्घ्यम्। पिबन् इव—यस्निव; आयतनेत्र इति भावः।

(३४४) मेरुतटात्—सुमेरुतटात्, सुमेरोरौन्नत्यादित्यर्थः। विकटेति।—विकटम्—अत्यन्तं, विपुलं—विशालम्, अलिकं—भालदेशः, ललाटतट इत्यर्थः, ("ललाटमलिकं गोधिः" इत्यमरः) यस्य तथाभूतः।

(३४५) अविच्छिन्नच्छन्नच्छायाप्ररूढ़िवशादिव नितान्तायत-नीलकोमलच्छविसुभगेन स्वभावभङ्गुरेण कुन्तलबालवल्लरी-वेल्लितविलासिना लुनद्भिव लुप्तालोकान् अर्ककरान् वर्वरकेण, (३४६) अरिपक्षपरिक्षयपरित्यक्तकार्मुककर्मापि सकल-दिगन्तश्रूयमाणगुरुगुणध्वनिः, आत्मस्थसमस्तमत्तमातङ्गसाधनो-

(३४५) अविच्छिन्नेति।—अविच्छिन्ना—विच्छेदरहिता, या छवच्छाया—आतपेन सौरतापावरणम् इत्यर्थः, ["विभाषा सेना—"(२।४।२५ पा०) इत्यादिना क्लीवत्वस्य पाक्षिकत्वात् अत्र तदभावः] तस्याः प्ररूढिः,—आतिशय्यं, मुहूर्त्तमपि छत्रशून्यतया अनवस्थानमित्यर्थः, तद्वशादिव—तत्सम्पर्कादिवेत्यर्थः। नितान्तेति।—नितान्तम्—अत्यन्तम्, आयता—दीर्घा, नीला—कृष्णा, कोमला—स्निग्धा इत्यर्थः; सुखस्पर्शा इति भावः, या छविः,—कान्तिः, तया सुभगं—रम्यं, तेन; आतपेन शोषणाभावादिति भावः। स्वभावभङ्गुरेण—सहजभङ्गिलता, ["भङ्गभासमिदो घुरच्" (३।२।१६१ पा०) इति घुरच्]। कुन्तलेति।—कुन्तलाः,—केशाः, लम्बमानाः कतिपयकेशगुच्छा इति भावः; बालवल्लयः इव,—नूतनलतायः इव, तासां वेल्लितेन—स्फुरणेन, विलसति—उल्लसते इति तथोक्तेन। वर्वरकेण—केशेन, केशबन्धेन इत्यर्थः, ("वर्वरः पामरे केशे चक्रले नीलदन्तरे" इति मेदिनी)। लुप्तालोकान्—लुप्ताः,—विनष्टाः, आलोकाः,—उद्योता येषां तान्, अर्ककरान्—सूर्यमयूखान्, लुनद्भिव—खण्डयद्भिव, कुत्सितगाढ़कृष्णकेशपाशेन सूर्यकिरणान् मलिनय-द्भिवेत्यर्थः।

(३४६) अरीति।—अरिपक्षाणां—शत्रुसङ्घातानां, परिक्षयेण—समूलनाशेन, परित्यक्तम्—उत्सृष्टं, कार्मुककर्म—धनुराकर्षणादिकं येन तथाभूतः; न चासामर्थ्या-दौदासीन्याद्वा इत्याशयः। सकलेति।—सकलेषु—सर्वेषु, दिगन्तेषु—आशाप्रान्तेषु, श्रूयमाणः,—आकर्ण्यमानः, गुरुः,—महान्, गुणानां—शौर्याणां, शौर्यादीनाञ्च, ध्वनिः,—शब्दः यस्य तथाभूतः। अत्र परित्यक्तकार्मुककर्मापि श्रूयमाणगुरुगुणध्वनिः इति आपाततः विरोधः, स च शौर्यादिगुणध्वनिश्रवणरूपार्थान्तरपर्य्यवसानः इति विरोधाभासोऽलङ्कारः। आत्मस्थेति।—आत्मस्थानि—आयत्तानि, स्वाधिकृतानीति यावत्, समस्ताः,—सर्वे, मत्तमातङ्गाः,—मदोत्कटगजा एव, साधनानि—सेना-ङ्गानि यस्य तथाभूतः, आत्मस्थानि समस्तमत्तमातङ्गसाधनानि—निखिलमदस्राव-

ऽपि अस्पृष्टो मदेन, (२४७) भूतिमानपि स्नेहमयः, पार्थिवोऽपि गुणमयः, कारुणामिव (२४८) दानवताम् उपरि स्थितः, स्वामितामिव स्पृहणीयां भृत्यतामपि अपरिभूताम् उद्वहन्, (२४९) एकभर्तृभक्तिनिश्चलां कुलाङ्गनामिव अनन्यगम्यां प्रभुप्रसादभूमिम् आरूढः, (२५०) निष्कारणबान्धवो विदग्धानाम्, अभृतभृत्यो भजताम्, अक्रीतदासो विदुषां, स्कन्दगुप्तो विवेश राजकुलम्। दूरादेव च

मजारोहिसैन्या यस्य तथाभूत इत्यर्थो वा। मदेन—मद्यपानजनितेन विकारेण, गर्वेण वा, दानवारिणा च; अस्पृष्टः,—अनाक्रान्तः। आत्मस्थमत्तसातङ्गसाधनोऽपि मदेन अस्पृष्टः इति विरोधः, समाधानन्तु प्रदर्शितार्थभेदेनोह्यम्।

(२४७) भूतिमान्—सम्पन्नः, भस्ममयश्च। स्नेहमयः,—प्रेममयः, तैलादिस्नेहमयश्च; य भस्ममयः, कथं भवति स तैलादिस्नेहमय इति विरोधः। पार्थिवः,—पृथिवीपरमाणुघटितः, राजा च। गुणमयः,—औदार्यादिगुणसमन्वितः, तन्तुमयश्च; यो हि पृथिवीपरमाणुघटितो भवति, स कथं तन्तुमयः पटादिरूपः स्यादिति विरोधः।

(२४८) दानवतां—दानशौण्डानां, मदस्राविणाञ्च। उपरि स्थितः,—शिरोदेशे वर्त्तमानः, दाढ्यैश्च इत्यर्थः। अपरिभूताम्—अनवमतां, भृत्यतां—भृत्यभावमपि, स्पृहणीयां—लोभनीयामित्यर्थः, स्वामितामिव—प्रभुतामिव, उद्वहन्—स्वीकुर्वन्; भृत्यत्वेऽपि प्रभुप्रसादाधिगमात् प्रभाववान्, दुःसाध्यसिद्धकर्मसाधनेन राज्ञोऽप्रियत्वादिति भावः।

(२४९) एकेति।—एकस्मिन् एव भर्तरि—प्रभौ, उद्वोढरि च, भक्तिः,—अनुरागः, निश्चला—स्थिरा यस्याः ताम्। अनन्यगम्याम्—अन्यदुर्लभां, पुरुषान्तरसङ्क्रमशून्याच्च। प्रभुप्रसादभूमिं—राज्ञानुग्रहपात्रतां, पतिप्रीतिपात्रताञ्च, आरूढः,—अधिगतः। इह स्वामिप्रसादलाभे कुलाङ्गनासाम्योक्तेः श्लेषानुप्राणितोपमाऽलङ्कारः।

(२५०) विदग्धानां—विदुषाम्; अतिकठोराभिः कल्पनाकोटिकल्पज्वालाभिः असारतर्कहतानां निःशेषतः दग्धीकरणात् तेषां विदग्धत्वम् इति भावः। निष्कारणबान्धवः,—अकृत्रिममित्रम्। भजतां—सेवमानानाम्, अभृतभृत्यः,—भियते असौ इति भृतः,—भृतिभुक्, वैतनिक इत्यर्थः, [बिभर्तेः कर्मणि निष्ठा] स न भवतीति अभृतः, भृत्यः,—सेवकः, अवैतनिकाकिङ्कर इत्यर्थः। अक्रीतदासः,—

(३५१) उभयकरकमलावलम्बितं स्पृशन् मौलिना महीतलं नमस्कारम् अकरोत्।

उपविष्टं (३५२) नातिनिकटे तं तदा जगाद देवो हर्षः, —"श्रुतो विस्तर एव अस्य आर्य्यव्यतिकरस्य अस्माभिः कीर्त्तितस्य च; अतः शीघ्रं प्रवेश्यन्तां प्रचारनिर्गतानि गजसाधनानि। न शाम्यति अतिस्वल्पम् अपि आर्य्यपरिभवपीड़ापावकः प्रयाणविलम्बम्" इत्येवम् अभिहितस्य प्रणम्य व्यज्ञापयत्,— (३५३) "कृतम् अवधारयतु स्वामी समादिष्टं, किन्तु स्वल्पं

क्रीतः,—क्रयेण निष्पन्नः, दासः,—सेवकः, स न भवतीति [नञ्समासः], भृतिमयद्दीचापि सता परिचर्य्याविधौ निरतः इत्यर्थः।

(३५१) उभयेति।—उभाभ्यां—द्वाभ्यां, ["उभादुदात्तो नित्यम्" (५।३।४४ पा०) इति सूत्रस्य योगविभागमाश्रित्य, "उभशब्दात् डतिविषये नित्यमयच् स्यात् स्वार्थे" इत्युक्तो तत्त्वबोधिनीकारैः; एवञ्च समासे उभशब्दस्य उभयरूपत्वे परिणतिरिति मूलानीचकीयम्] करकमलाभ्यां—पाणिपद्माभ्याम्, अवलम्बितं—धृतम्। महीतलं—भूतलम्। मौलिना—शिरसा।

(३५२) नातिनिकटे—अनतिदूरे इत्यर्थः। आर्य्यव्यतिकरस्य—आर्य्यव्यसनस्य, तस्य गुप्तदूत्याथा: इत्यर्थः, ("अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदिनी)। अस्माभिः कीर्त्तितस्य—अस्माभिः कर्त्तुमारब्धस्य। विस्तरः,—वाक्प्रपञ्चः, ["स च शब्दस्य विस्तरः" इत्यमरोक्तेः। "कृदोरप्" (३। ३। ५० पा०) इत्यप्]। प्रचारनिर्गतानि—प्रचाराय—सञ्चरणाय; यानिर्गमादौ भृत्यसङ्कटार्थं, वन्यकरिधृतार्थं वा इति भावः; निर्गतानि—निष्क्रान्तानि, गजसाधनानि—करिसैन्यानि, प्रवेश्यन्तां—रणभूमौ प्रेष्यन्तामिति भावः; यद्वा,—प्रवेश्यन्ताम्—आनीयन्तां, राजधानीमिति शेषः; युद्धयात्रार्थमिति भावः। आर्य्येति।—आर्य्यस्य—ज्येष्ठस्येत्यर्थः, परिभवेण—तिरस्कारेण, अस्माभ्यहननेनेत्यर्थः, या पीडा—व्यथा, सैव पावकः,—अग्निः। प्रयाणविलम्बं—युद्धयात्राकालातिक्रमणम्। शाम्यति—सहते,["शमामष्टानां दीर्घः श्यनि" (७।३।७४ पा०) इति दीर्घः]।

(३५३) स्वामी—प्रभुः, भवानिति शेषः, समादिष्टम्—आज्ञप्तं, भवता यत् इति शेषः, तत्, कृतं—सम्पादितमेव, अस्माभिरिति शेषः, इति अवधारयतु—निश्चि-

विज्ञप्यमस्ति भर्तृभक्तेः ; तत् आकर्णयतु देवः,—देवेन हि पुष्यभूतिवंशसम्भूतस्य अजात्यस्य सदृशस्य तेजसः, दिक्करिकर-प्रलम्बस्य बाहुयुगलस्य, असाधारणस्य च सौदरस्नेहस्य सर्वं सदृशम् उपक्रान्तम्। काकोदराभिधानाः कृपणाः कृमयोऽपि न सृष्यन्ति विकारं, किमुत भवादृशाः तेजसां राशयः? केवलं (३५४) देवराज्यवर्द्धनोदन्तेन क्रियदपि दृष्टमिव देवेन दुर्जनदौरात्म्यम्। ईदृशाः खलु लोकस्वभावाः, प्रतिग्रामं प्रति-नगरं प्रतिदेशं प्रतिद्वीपं प्रतिदिशञ्च भिन्ना वेशाश्च आकाराश्च

नीतु ; भवदाज्ञा अपरिहार्य्यैव, तेनेदानीमकृतमपि कृतमेव तदित्यवधारयतु स्वामी इति तात्पर्यम्। भर्तृभक्तेः,—स्वाम्यनुरागार्द्रतेः। अजात्यस्य—जातौ भवं जात्यं, तन्न भवतीति तथोक्तस्य, चक्रियजात्यतिशायिन इति भावः। सदृशस्य—स्वाभाविकस्य, प्रकृतिसिद्धस्य इत्यर्थः। दिगिति।—दिक्करिणां,—दिग्गजानां, करवत्—शुण्डादण्डवत्, प्रलम्बस्य—दीर्घस्येत्यर्थः; आजानुलम्बितस्येति भावः। सदृशम्—अनुरूपम्, उपक्रान्तम्—आरब्धम्। काकोदराभिधानाः,—भुजङ्गनामानः,("…भुजङ्गी-ऽहिर्भुजङ्गमः। …काकोदरः फणी" इत्यमरः) कृपणाः,—दुर्बलाः, कृमयः,—कृमिसदृशाः कीटविशेषाः, विकारं—परभिभवं, न सृष्यन्ति—न जानन्ति, न सहन्ते इत्यर्थः। भुजङ्गानामपि दुर्बलकीटविशेषत्वाभिधानेन अस्य महातेजस्वित्वं प्रकटितम्। किमुत—किं पुनः ; भवादृशानां तादृशविकारासहने वक्तव्यमेव नास्तीत्याशयः।

(३५४) देवेति।—देवस्य—राज्ञः, राज्यवर्द्धनस्य उदन्तेन—उत्—उद्गतः, अन्तः,—निर्णयो यस्मात् तादृशेन, इत्तान्तेन इत्यर्थः, ("वार्त्ता प्रवृत्तिर्वृत्तान्तः उदन्तः स्यात्" इत्यमरः)। देवेन—राज्ञा भवता इति भावः। दुर्जनदौरात्म्यं—दुर्जनानां—खलानां, दौरात्म्यं—दुष्टता, क्रियदपि—अल्पमात्रमित्यर्थः। अपिरत्र सम्भाव्यार्थकः इत्यवधेयम, "अपिः पदार्थसम्भाव्यगर्हानुज्ञासमुच्चये" इत्यमरः। दृष्टं—ज्ञातमित्यर्थः। लोकस्वभावाः,—जनानां प्रकृतयः, खलु—निश्चयेन, ईदृशाः,—एवंविधाः, दौर्जन्य-प्रधाना इति भावः। प्रतिग्रामं—"विप्राश्च विप्रवत्याश्च यत्र चैव वसन्ति हि। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव वा॥" इत्युक्तलक्षणं विप्रादीनां वासस्थानं, ग्रामे ग्रामे इत्यर्थः। ["अव्ययम्—" (२। १। ६ पा०) इत्यादिना वीप्सायां

आहाराश्च व्यवहाराश्च जनपदानाम्। तत् इयम् (३५५) आत्मदेशाचारोचिता स्वभावसरलहृदयजा त्यज्यतां सर्वविश्वासिता। (३५६) प्रमाददोषाभिषङ्गेषु श्रुतबहुवार्त्त एव प्रतिदिनं देवः। (३५७) यथा,—नागकुलजन्मनः सारिकाश्रावितमन्त्रस्य आसीत् नाशो नागसेनस्य पद्मावत्याम्। (३५८) शुकश्रुतरहस्यस्य च श्रीः अशीर्य्यत श्रुतवर्मणः आवन्त्याम्।

पाचिकोऽव्ययीभावः]। एवं परवालोचनीयम्। भिन्नाः,—पृथग्वर्त्मानः। वेशाः,—परिच्छदाः। व्यवहाराः,—आचरणानि इत्यर्थः। जनपदानां—जनानां, ("भवेज्जनपदो जानपदोऽपि जनदेश्ययोः" इति मेदिनी)।

(३५५) आत्मेति।—आत्मनः,—स्वस्य, ["सातिभ्यां मनिन्मनिणौ" (उ० ४ पा० १५२ सू०) इथतेः मनिण्] देशाचारस्य—देशप्रचलितरीतेः, सर्व्वविश्वासिताऽपाया इति यावत्, उचिता—अनुरूपा; यद्यपि पवित्रोदाराशयाः श्लोकस्थजानपदवास्तव्याः, तथाऽपि अन्ये मानवाः प्रवञ्चकपिशाचाचाराः भवितुमर्हन्ति इति वक्तुराशयः। स्वभावेति।—स्वभावेन—प्रकृत्या, सरलम्—अकुटिलम्, उदारमित्यर्थः, हृदयम्—अन्तःकरणं, तस्मात् जायते—उद्भवति इति तथाभूता, प्रकृतिसरलोदारचित्तप्रसूता इत्यर्थः। सर्व्वविश्वासिता—सर्वेषु जनेषु विश्वासस्थापनम्।

(३५६) प्रमादेति।—प्रमाददोषेषु—अनवधानताऽपराधेषु, अभिषङ्गाः,—पराभवाः तेषु। श्रुतेति।—श्रुताः,—आकर्णिताः, बहवः,—अनेकाः, वार्त्ताः,—वृत्तान्ताः येन तथाभूतः।

(३५७) प्रतिदिनमित्यादिभिरुपक्रान्तं निदर्शयितुमाह,—यथेति। नागकुलजन्मनः,—नागः,—तन्नामा कश्चिद्राजा, तस्य कुलं—वंशं, जन्म—उत्पत्तिः यस्य तथाविधस्य। सारिकेति।—सारिका—पक्षिविशेषः, तया, तन्मुखेन इति भावः; श्रावितः,—आकर्णितः, प्रकाशित इत्यर्थः, मन्त्रः,—गुप्तमन्त्रणं यस्य तथाभूतस्य, नागसेनस्य—तदाख्यस्य नृपस्य, पद्मावत्यां—तदाख्यायां नगर्य्यामित्यर्थः, नाशः,—निधनम्। पुरा पद्मावत्यां नागसेनो नाम राजा मन्त्रिणम् अङ्गराज्यहरणदोषेण ताडयितुं सारिकासमक्षं मन्त्रमकरोत्; स च मन्त्री सारिकामुखात् तदिज्ञाय विश्वासपूर्व्वकं तं नागसेनं हतवानिति कथा अवानुसन्धेया।

(३५८) शुकेति।—शुकात्—कीरात्मपक्षिणः, श्रुतम्—आकर्णितं, रहस्यं—

(३५८) स्वप्नायमानस्य च मन्त्रभेदोऽभूत् मृत्यवे मृत्तिकावत्यां स्वर्णचूडस्य। (३६०) चूडामणिलग्नलेखप्रतिबिम्बवाचिताक्षरा च चारुचामीकरचामरयाहिणी यमतां ययौ यवनेश्वरस्य। (३६१) लोभबहुलस्य बहुलनिधि निधानम् उत्खनन्तम्

गुप्तमन्त्रणं यस्य तथाभूतस्य, श्रुतवर्मणः,—तदाख्यस्य नृपतेः, श्रावन्त्यां—धर्मपत्तनापराख्यनगरान्तर्गतायां नगर्यां, ["श्रावन्त्याम्" इत्यत्र "श्रावस्त्याम्" इति पाठान्तरम्] श्रीः,—लक्ष्मीः, अग्रीयत—व्यनश्यत्, युक्तमुखेन मन्त्रभेदात् इत्यर्थः। इह यकेत्यादिवाक्यस्थपदजातेषु शकारस्यासकृदावृत्त्या शब्दानुप्रासः। पुरा श्रावस्तीश्वरो श्रुतवर्मोऽपि पूर्वत्र युक्तमुखात् विभिन्नमन्त्र राज्यभ्रष्टोऽभूदिति वार्ता। एतेन आख्यानकेन विजिगीषुणा यत्नात् गूढमन्त्रेण भाव्यमित्युक्तम्।

(३५९) स्वप्नायमानस्य—स्वप्नः,—स्वप्नवान्, स इव आचरतः, निद्रादशायां गूढं मन्त्रं प्रकाशयत इत्यर्थः; हृदयदौर्बल्यादित्यनुसन्धेयम्। स्वर्णचूडस्य—तदाख्यस्य राज्ञः, मृत्तिकावत्यां—तदाख्यायां नगर्यां, मन्त्रभेदः,—रहस्यप्रकाशः, मृत्यवे—निधनाय, निधनकारणमित्यर्थः, अभूत्। पुरा मृत्तिकावत्यां नगर्यां स्वर्णचूडो नाम राजा कश्चित् विस्रब्धपूर्वकं निगूढं मन्त्रितवान्; तदेव तस्य निद्रादशायां पस्कार। तच्च अवगम्य शत्रुप्रयुक्तेन केनचित् एतच्छरारुक्षेण मूत्वा असौ निहतं व्यापादित इति वार्ता। अनेन अज्ञातकुलशीलो भृत्यो न नियोज्य इत्युक्तम्।

(३६०) चूडामणीति।—चूडामणिः,—शिरोरत्न, तत्र लग्नं—सङ्क्रान्तं, यत् लेखप्रतिबिम्बं—लिपिच्छाया, तेन वाचितानि—पठितानि इत्यर्थः, अक्षराणि—वर्णाः, लेखस्या इति शेषः, यया तथाभूता; चूडामणिप्रतिफलितलेखाक्षराणि पठितेति भावः; चारुचामीकरचामरयाहिणी—मनोहरकाञ्चनदण्डबालव्यजनष्टत्तेत्यर्थः; नाट्येन चामरेण वीजयन्तीति भावः; यवनेश्वरस्य—यवनाधिपस्य, यमतां—कृतान्तां, ययौ—प्राप। पुरा यवनेश्वरः केनचित् शत्रुणा व्यापादयितुमिष्टः इति ज्ञात्वा तद्दत्तात् लेखेन बोधितः; लेखपृष्ठे च तेन लिखितं, स्वयं वाचयितव्यमिति। तच्च लेखं स्वयं वाचयतः यवनेश्वरस्य चूडामणिप्रतिबिम्बितानि अक्षराणि, शत्रुप्रयुक्ता काचित् चामरयाहिणी निगूढं वाचयित्वा स्वस्वामिने सर्वं व्यजिज्ञपत्, ततः तेनोपलब्धा सा निहतं तं जघान इति वार्ता। अनेन सूक्ष्मोऽपि मन्त्रभेदोपायः परिहर्तव्य इति सूचितम्।

(३६१) लोभेति।—लोभबहुलम्—अतिलुब्धम्। बहुलनिधिं—द्रव्यपञ्च-

उत्खातखड्गप्रमाथिनो ममन्थ माथुरं बृहद्रथं विदूरथबलिनो। (३६२) नागवनविहारशीलस्य मायामातङ्गात् निर्गता महासेनसैनिका वत्सपतिं न्यर्यसिषुः। (३६३) अतिदयितलास्यस्य च शैलूषमध्यमध्यास्य मूर्धानम् असिलतया मृणालमिव अलुनात् अग्निमित्रात्मजस्य सुमित्रस्य मित्रदेवः।

रत्नस्य, निधानं—भूमर्भस्थितं रत्नम्, उत्खननम्—उद्धरणं, माथुरं—मथुराऽधिपं, बृहद्रथं—तदाख्यं राजानं, विदूरथबलिनो—विदूरथस्य—तदाख्यस्य मृत्यवंशीयराजस्य, बलिनो—सेना, ("ध्वजिनी वाहिनी सेना···। बलिनी बलं सैन्यम्···" इत्यमरः)। उत्खातेति।—उत्खातेन—उत्पाटितेन, उद्धृतेन इत्यर्थः, खड्गेन—असिना, प्रमथ्नाति—ताडयतीति तथाभूता सती, ममन्थ—जघान। विदूरथमन्त्रिणेन गूढप्रयुक्तराजत्वहरणेन प्रलोभितो बृहद्रथो नाम राजा कृष्णपक्षनिशायां विदूरथविवादयक्षखनितो रत्नजातमुद्धर्तुं प्रवृत्तः, तत्कैनिकैः निहत इति वार्त्ता। एतेन सुमित्रस्य कर्त्तव्यमित्युक्तम्; "सहसा विदधीत न क्रियाम्" इत्याद्युक्तेः।

(३६२) नागेति।—नागानां—गजानां, वनं—काननं, हस्तिबहुलमरण्यमित्यर्थः, तत्र विहारे—भ्रमणे, शील—स्वभावः यस्य तथाभूत, वत्सपतिं—वत्सराजम्, उदयनमिति यावत्, महासेनस्य—महासेनाख्यस्य कस्यचित् राज्ञः, सैनिकाः,—सैन्याः, मायामातङ्गात्—मायया—कपटेन रचितः, मातङ्गः,—हस्ती, तस्मात्—अवयवः तस्मात्, निर्गताः,—निःसृताः सत्यः, न्यर्यसिषुः,—अवस्रंसुः। पुरा महासेनो नाम उज्जयिनीपतिः स्वां दुहितरं वासवदत्तां उदयनाय दित्सुः अलर्कमृढ़सैनिकं मायामातङ्गं वने संस्थाप्य कृष्णप्रयुक्तैश्वरैः नागवनविहाराय तं प्रलोभितवान्; सोऽपि मज्जयन्तिसनिभया अविचार्यैव कतिपयपरिजनपरिवृतः वीणां वादयन् तत्र गतः। ततश्च सिद्धाभिप्रायः महासेनः मायामातङ्गशरीरनिर्गतैः स्वसैनिकैः तं नियम्य स्वगृहमानीय कन्यां ददौ इति वार्त्ता। एतेन माल्पसाधनैः संवीत्य च विश्वसेभ्योऽमित्युक्तम्।

(३६३) अतीति।—अतिदयितम्—अतिप्रियं, लास्यं—नृत्यं यस्य तथोक्तस्य, नृत्यप्रियस्य इत्यर्थः, ("लास्यं नृत्यञ्च नर्त्तने" इत्यमरः)। शैलूषमध्यं—नटमध्यं, ("शैलूषो नटविल्वयोः" इति मेदिनी)। अध्यास्य—अधिष्ठाय, नटच्छद्मना इति भावः, ["अधिशीङ्स्थासां कर्म्म" (१।४।४६ पा०) इत्याधारस्य कर्म्मसंज्ञा]। अलुनात्—चिच्छेद। मित्रदेवः,—तन्नामा कश्चित् सुमित्ररिपुः। पुरा सुमित्रो नाम राजा कृत्यव्यसनी नटजने विश्वस्तः मित्रदेवेन नटरूपिणा व्यापादितः, तेन च योगचूर्ण-

(३६४) प्रियतन्त्रीवाद्यस्य अलाबुवीणाभ्यन्तरशुषिरनिहित-निश्चिततरवारयो गान्धर्वच्छात्रच्छद्मानः चिच्छिदुरशनकेश्वरस्य शरभस्य शिरो रिपुपुरुषाः। (३६५) प्रज्ञादुर्बलश्च बलदर्शन-व्यपदेशदर्शिताशेषसैन्यः सेनानीः अनार्यो मौर्ख्यं हृहद्रथं पिपेष पुष्पमित्रः स्वामिनम्। (३६६) आश्चर्यकुतूहली च चण्डोपतिः दण्डोपनतयवननिर्मितेन नभस्तलयायिना यन्त्रयानेन अनीयत

प्रयोगतिरोहितरूपेण बभूवे इति कथा। अनेन च व्यसनिता प्राक्तनजने विश्वस्तता च उर्व्वथा नोचिता इति प्रकटितम्।

(३६४) प्रियेति।—प्रियं—दयितं, तन्त्रीवाद्यं—वीणावाद्यं यस्य तथाभूतस्य, तन्त्रीवाद्यप्रियस्येत्यर्थः, अशनकेश्वरस्य—अशनकाख्यजनपदाधिपस्य, शरभस्य—तदाख्यस्य नृपतेः, शिरः,—मूर्द्धानं, रिपुपुरुषाः,—शत्रुप्रयुक्ताः पुरुषाः। अलाम्बेति।—अलाबुः,—तुम्बी, तद्रचिता वीणा—विपञ्ची, तस्या अभ्यन्तरशुषिरे—अन्तरालगर्भे, निहितः,—स्थापितः, निश्चितः,—तीक्ष्णः, तरवारिः,—असिः यैः तथोक्ताः। गान्धर्वच्छात्र-च्छद्मानः,—गान्धर्वं—सङ्गीतं, तस्य छात्राः,—शिष्याः, तदेव छद्म—कपटं येषां तथाभूताः; वयं भवत्सकाशं गान्धर्वं शिक्षितुमागता इति छद्मेन समुपस्थिता इति भावः। चिच्छिदुः,—चक्रतुः। शरभो नाम राजा बाद्यविद्याविशारदानाम् अवारितद्वारं प्रवेशमदात्, तेनासौ छद्मना प्रविष्टैः गूढायुधैः शत्रुपुरुषैः निहत इति वार्त्ता। एतेन व्यसनासक्तिलेशोऽपि सर्व्वथैव परिहर्त्तव्यः इति पूर्व्वोक्तिरेव दृढ़ीकृता।

(३६५) प्रज्ञादुर्बलं—बुद्धिबलहीनम्। बलेति।—बलानां—सैन्यानां, दर्शनम् —अवलोकनमेव, व्यपदेशः,—छलं, तेन दर्शितानि—अवलोकितानि, अशेषाणि—अतिबहूनि इत्यर्थः, सैन्यानि—बलानि, स्वाधिकृतानि इति भावः; यैन तथाभूतः, सेनानीः,—सेनापतिः। अनार्य्यः,—असाधुः। मौर्ख्यं—मौर्ख्यवंशोद्भवम्। स्वामिनं—प्रभुम्। पिपेष—जघान। एतेन कोऽपि न सर्व्वाधिकारिणी कर्त्तव्या इति व्यक्तीकृतम्।

(३६६) आश्चर्येति।—आश्चर्य्यं—विस्मयकरव्यापारं, तद्दर्शने इत्यर्थः, कुतूहली —कौतुकवान्, चण्डोपतिः,—चण्डोनाम नगरी, तस्याः पतिः,—प्रभुः। दण्डेति।—दण्डेन—सङ्ग्रामेण, उपनताः,—निर्जिता इति यावत्, यवनाः,—तद्देशवासिनो म्लेच्छविशेषा इत्यर्थः, तैः निर्मितं—रचितं तेन। नभस्तलयायिना—आकाशमार्गगामिना, नयनमार्गे अनधोपयोगिना इत्यर्थः, यन्त्रयानेन—विमानविशेषेण, यन्त्रचालितरथेन

ज्ञापि। (३६७) काकवर्णः शैशुनारिरिव नगरोपकण्ठे कण्ठे निचक्रते निस्त्रिंशेन। अतिस्त्रीसङ्गरतम् अनङ्गपरवशं (३६८) शुङ्गम् अमात्यो वसुदेवो देवभूतिदासीदुहित्रा देवीव्यञ्जनया वीतजीवितम् अकारयत्। (३६९) असुरविवरव्यसनिनं चापजङ्घः अपरिमितरमणीमणिनूपुरझणझणाङ्कारमय्या मागधं गोधनगिरिसुरङ्गया स्वविषयं मेकलाधिपमन्त्रिणः।

इत्यर्थः, ज्ञापि—कुत्रापि, अनिर्दिष्टदेशमिति यावत्, अनीयत—प्राप्यत, अदर्शनं नमित इत्यर्थः। पुरा चण्डीपतिः यवनान् विजित्य तैः उपायनीकृतेन क्षुरचित्तेन यत्नयानेन परदारान् गच्छेति प्रलोभ्य स्वदेशं नीत्वा व्यापादित इति वार्त्ता। एतेन प्रभुषु तत्प्रदत्तोपायनेषु च न विश्वासः विधेयः इति प्रकटीकृतम्।

(३६७) काकवर्णः,—तन्नामा कश्चिद्राजा। शैशुनारिः,—शिशुनाराख्यजनपदाधिपतिः। नगरोपकण्ठे—पुरीसमीपे, ("समीपे निकटासन्न···। उपकण्ठान्तिकाभ्यर्णा···" इत्यमरः)। निचक्रते—निकृत्तः, चिच्छिदे इत्यर्थः, केनचित् प्रभुणेति शेषः। निस्त्रिंशेन—खड्गेन।

(३६८) शुङ्गं—तदाख्यं नृपं, देवभूतिदासीदुहित्रा—देवभूतेः,—तन्नामप्रसिद्धस्य कस्यचित्, दासी—कांचित् परिचारिकां, तस्याः दुहित्रा—तनयया, [प्रयोज्यकर्तरि तृतीया, करोतेः णिचि प्रयोज्यकर्तुः कर्मत्वस्य पाणिकत्वादिति क्षेयम्]। देवीव्यञ्जनया—देवी—राज्ञी एव व्यञ्जनं—छद्म यस्याः तथाभूतया, महिषीवेशधारिण्येत्यर्थः। वीतजीवितम्—अपगतजीवनं, विनष्टमित्यर्थः। अनेन वनितादिविषयेषु अत्यासक्तिः दूरतः परिहार्य्या इति बोधितम्।

(३६९) असुरविवरव्यसनिनम्—असुरविवरं—असुराणां—दानवानां, ["असेर्वरन्" (उ० १ पा० ४१ सू०) इति उरन्] विवरम्—आवासरन्ध्रं, पातालम् इत्यर्थः, तत्र व्यसनी—कुतूहलीत्यर्थः, तं, पातालदर्शनाय प्रलोभितमित्यर्थः, मागधं—मगधराजम्। अपरिमितेति।—अपरिमितानां—बहूनां, रमणीनां—नारीणां, मणिनूपुराणां—रत्नमञ्जीराणां, झणझणाङ्कारः,—झणत्कारशब्दः, तेन रम्या—मनोज्ञा तया, श्रवणसन्तर्पणशिञ्जितसुषमयेत्यर्थः। गोधनगिरिसुरङ्गया—गोधनाख्यपर्वतान्तःकृतविवरवर्त्मना। "गोधनगिरिः तूर्य्याख्यः पर्वतः" इति कश्चित्। स्वविषयं—स्वजनपदम्। मेकलाधिपमन्त्रिणः,—मेकलाधिपस्य—तदाख्यपर्वतवेष्टितदेशस्वामिनः, "मेकलो विन्ध्याद्रिः" इति कश्चित्, मन्त्रिणः,—सचिवाः। अपजङ्घः,—

(३७०) महाकालमहे च महामांसविक्रयवादवातूलं वेताल: तालजङ्घो जघान जघन्यजं प्रद्योतस्य पौण्किं कुमारं कुमारसेनम्। (३७१) रसायनरसाभिनिवेशिनश्च वैद्यव्यञ्जना: सुबहुपुरुषान्तरप्रकाशितौषधगुणा गणपते: विदेहराजसुतस्य

अपहृतवन्त:; स्वविषयं नीत्वा व्याघादवामासुरिति भाव:। सिद्धाधिपमल्लिभि: छद्मचारिभि: मागधै: इत्थं प्रलोभित: यत्, अस्माभि: तपोबलेन पातालविवरद्वारमाविष्कृतं, तत्र च अविरतं सञ्चरन्तीनां नागरमणीनां नूपुरशब्दा: श्रूयन्ते इति। मागधैरपि तादृशमाहतोयरमणीदर्शनाकृष्टै: तत्सङ्घातवर्त्मा तत्र प्रविशन् तै: खदंशं नीत: निहतश्च इति वार्त्ता। एतेन मानवीयशक्त्याशक्यतामविज्ञस्य यत्र कुत्र प्रयाणमश्रेयसे भवति इति प्रतिपादितम्।

(३७०) महाकालमहे—महाकालस्य—महाकालाख्यशिवमूर्त्तिभेदस्य, मह:,—उत्सव: तस्मिन्, ("मह उद्भव उत्सव:" इत्यमर:)। महेति।—महामांसस्य—नरमांसस्य, विक्रयवाद:,—महामांसमहं विक्रीणे इति वाद इत्यर्थ:, तत्र वातूल:,—भूत: तम्। ["वातात्ममूढे च" (वा०) इति ऊलप्रत्यय:] तालजङ्घो नाम वेताल:,—भूतविशेष:, भूताधिष्ठितशवभेदी वा; जघान—हतवान्, पूर्वप्रतिश्रुतनरामिषाप्राप्तेरिति भाव:। जघन्यजं—कनिष्ठं, शूद्रं वा, ("शूद्राद्यावरवर्णास्तु हयलाश्च जघन्यजा:" इत्यमर:) दासीगर्भसम्भूतमिति भाव:। प्रद्योतस्य—तदाख्यस्य राज्ञ:। पौण्किं—पुण्कस्य अपत्यं पुमान् तं, पुण्कगीतीयमित्यर्थ:; पुण्की नाम काचित् दासी तस्या: सुतं वा। आत्मशक्तिमनालोच्य असाध्यसाधनस्पर्द्धायां कदाचित्प्रलयाय सम्पद्यते इत्यवगन्तव्यम्।

(३७१) रसायनेति।—रसायनरस:,—विषादिजनित औषधविशेष:, तत्र अभिनिवेशिन:;—कृतप्रयत्ना:; यद्वा,—रसायने—विष्णुरसरसकादीनां लाभोपायभूत:, जराव्याधिविध्वंसीति यावत्, रस:,—पारदादिधातुविशेष:, तत्र अभिनिवेशिन:,—वयम् उत्कृष्टरसायनयोगमाविष्कर्त्तुं चेष्टामहे इत्यादि प्रकाशयन्त: इति भाव:। वैद्यव्यञ्जना:,—चिकित्सकच्छद्मान:, कपटभिषज इत्यर्थ:। सुबहुभि:—अतिबहुभि:, पुरुषान्तरै:,—अन्यजनै:; स्वपक्षीयैरिति भाव:; प्रकाशिता:,—ख्यापिता:, औषधगुणा:,—भेषजोत्कर्षा: यै: तथाभूता:; एषामौषधानि सद्य:-फलानि, न क्वचित् विफलानि भवन्ति इत्यादि छद्मलक्षणै: वाचयन्त इति भाव:।

राजयक्ष्माणम् अजनयन् । (३७२) स्त्रीविश्वासिनश्च महादेवीगृहगूढभित्तिभाक् भ्राता भद्रसेनस्य अभवन मृत्यवे कालिङ्गस्य वीरसेनः । (३७३) मातृशयनीयतूलिकातलनिषण्णश्च तनयोऽन्यं तनयम् अभिषेक्तुकामस्य दभ्रस्य करूषाधिपतेः अभवन् मृत्यवे । (३७४) उत्सारककृचिश्च रहसि समचिवमेव दूरीचकार चकोरनाथं शूद्रकदूतः चन्द्रकेतुं जीवितात् ।

गणपतेः,—तदाख्यस्य राजपुत्रस्य । राजयक्ष्माणं—क्षयरोगविशेषम् । अजनयन्—उदपादयन् ; कुभेषजं पाययित्वा इति भावः ; एतेन अविज्ञातमौषधं न पातव्यमित्युक्तम् ।

(३७२) स्त्रीविश्वासिनः,—नारीषु विश्वासं कुर्वतः, कालिङ्गस्य—कालिङ्गदेशाधिपस्य, भद्रसेनस्य—तदाख्यस्य, भ्राता—अनुजः इत्यर्थः, वीरसेनः । महादेवीति ।—महादेव्याः,—राजमहिष्याः ; देवरेण पूर्वमुपजप्ताया इति भावः ; गृहे—कक्षमध्ये इत्यर्थः, गूढं—सुगुप्तं यथा तथा, भित्तिं—कुड्यं, भजते—आश्रयते इति तथाभूतः सन्, मृत्यवे—मृत्युमुत्पादयितुं, निधनायेत्यर्थः, ["क्रियार्थोपपदस्य—" (२ । ३ । १४ पा०) इत्यादिना चतुर्थी] अभवत ; ज्यायांसं भ्रातरं निधनमकरोदिति भावः । एतेन स्त्रीष्वपि विश्वासः नैव कर्त्तव्यः इति व्यञ्जितम् ।

(३७३) मातेति ।—मातुः,—जनन्याः, शयनीयतूलिका—तूलरचितशयनोपकरणं, "गद्दी" इति वङ्गभाषया प्रसिद्धा, तस्याः तले—निम्नदेशे, निषण्णः,—स्थितः । तनयः,—पुत्रः, कनिष्ठ इति भावः, दभ्रस्य—तदाख्यस्य, करूषाधिपतेः,—करूषजनपदाधीशस्य । अन्यं तनयम्—अपरपुत्रं, ज्येष्ठमिति भावः ; अभिषेक्तुकामस्य—राज्ये अभिषिक्तं कर्त्तुमिच्छोः । मृत्यवे—मरणाय, अभवत्—अजायत, निधनमकरोदित्यर्थः ; पितृहत्यां चकारेति भावः । एतेन राजभिः शय्यादिकमपि सविशेषं परीक्ष्य शयितव्यं, तथा पत्नीष्वपि नैव विश्वसनीयः इति प्रकटीकृतम् ।

(३७४) रहसि—विजने, समचिवं—मन्त्रिसहितं, चकोरनाथं—चकोराख्यजनपदाधिपं, चन्द्रकेतुं—तदाख्यम्, उत्सारककृचिम्—उत्सारके—दूरीकरणे, रुचिः,—अभिलाषो यस्य तथाभूतम् ; शूद्रकं नृपं दूरीकर्त्तुकाममिति भावः ; उत्सारकः,—द्वारपालः, तेन हि प्रभुद्वारतो जनाः दूरीक्रियन्ते इति वाचस्पतीयाभिधानेः दर्शनात्, तस्मिन् रुचिः,—प्रीतिः यस्य तथाविधं, समागतं शूद्रकदूतमनाहृत्य द्वारपालवच्चक्षि

(३७५) मृगयाऽऽसक्तस्य च मथ्नतो गण्डकान् उद्दण्डनड्वलनल-वननिलीनाश्च चम्पाधिपचमूचरभटाः चामुण्डीपतेः आचेमुः प्राणान् पुष्करस्य । (३७६) वन्दिरागपरश्च परप्रयुक्ता जय-शब्दमुखरमुखा मङ्का मौखरिं मूर्खं चक्रवर्माणम् उदखनन् । (३७७) अरिपुरे च परकलत्रकामुकं कामिनीवेशगुप्तश्च

दत्तावधानमित्यर्थो वा ; गुप्तकृतः,—तदाख्यनृपतेः वार्त्ताविदः ; विदिततद्गुणान इति भावः ; जीवितात—प्राणेभ्यः, दुरीचकार—अपसारयामास, निजघान इत्यर्थः । एतेन मन्त्री नैव प्रकाशनीयः इति सूचितम् ।

(३७५) मृगयाऽऽसक्तस्य—आखेटव्यसनिनः, गण्डकान्—खड्गिनः, "गण्डार" इति बङ्गभाषया प्रसिद्धान्, ("गण्डके खड्गखड्गिनौ" इत्यमरः) मथ्नतः,—व्यापादयत इत्यर्थः, चामुण्डीपतेः,—चामुण्डीनाम नगरी, तस्याः पतिः,—ईश्वरः तस्य, पुष्करस्य —तदाख्यस्य राज्ञः । उद्दण्डेति ।—उद्दण्डानि—उन्नतलालानि, नड्वलानि—नड-भूयिष्ठानि, नलवनानि—नलाख्यतृणवनानि इत्यर्थः,["नड्प्राये नड्वान् नड्वल इत्यपि" इत्यमरः । "नडशादाड्वलच्" (४।२।८८ पा०) इति ड्वलच्] तेषु निलीनाः,—सुगूढं स्थिताः । चम्पेति ।—चम्पाधिपस्य—तदाख्यनगरीपतेः, चमूषु—सेनासु, चरन्ति—भ्रमन्ति, तिष्ठन्तीति यावत् तथोक्ताः, भटाः,—वीराः, चम्पाधिपरैनिका इत्यर्थः, प्राणान्—जीवनमित्यर्थः, आचेमुः,—भक्षयामासुः, तं जघ्नुरित्यर्थः । एतेन मृगयायामपि अत्यासक्तिः परिहर्त्तव्या इति प्रदर्शितम् । वाक्येऽस्मिन् मण्डनलक्षणा-मसक्तदातृत्वा इत्यनुप्रासोऽलङ्कारः इति ज्ञेयम् ।

(३७६) वन्दीति ।—वन्दिनः,—स्तुतिपाठकाः, वैतालिका इति यावत्, तेषु रागः,—अनुरागः, प्रीतिरिति यावत्, स एव परः,—प्रधानं यस्य तथाविधं, तदासक्त-मित्यर्थः, मौखरिं—मुखरवंशसम्भूतं, मूर्खं—निर्बोधं, चक्रवर्माणं—तदाख्यं राजानं, परप्रयुक्ताः,—शत्रुप्रहिताः । जयेति ।—जयशब्देन—विजयतां विजयताम् इत्याकार-ध्वनिना, मुखराणि—शब्दायमानानि, मुखानि—वदनानि येषां तथाभूताः, मङ्काः, —तदाख्याः चारिण्यः, वैतालिकच्छद्मना जयशब्दसुच्चारयन्त इति भावः ; ["मङ्काः" इत्यत्र "सङ्काः" इति पाठान्तरम् अयौक्तिकं, सवर्णग्रहणाख्यां सकारस्य विज्ञानीयतया इत्यनुप्रासानुकूलत्वात् इति सङ्क्षेपः] । उदखनन्—उदपाटयन्, निजघ्नुरित्यर्थः । एतेनापि आसक्तिः सर्व्वथैव परिहर्त्तव्या इति प्रकटीकृतम् ।

(३७७) अरिपुरे—शत्रुनगरे, परकलत्रकामुकं—परस्त्रीसक्तचित्तम् ।

चन्द्रगुप्तः शकपतिम् अघातयदिति। (३७८) प्रमत्तानां प्रमदाक्षताः प्रमादाः श्रुतिविषयम् आगता एव देवस्य। यथा —(३७९) मधुमोदितं मधुरकसंलिप्तैः लाजैः सुप्रभा पुत्रराज्यार्थं महासेनं काशिराजं जघान। (३८०) व्याजजनितकन्दर्पदर्पा च दर्पणेन क्षुरधारापर्यन्तेन अयोध्याधिपतिं

कामिनीति।—कामिनीवेशेन—स्त्रीपरिच्छदं गृहीत्वेत्यर्थः, गुप्तः,—गोपायितस्वरूपः, छद्मचारी सन्नित्यर्थः। शकपतिं—शकाख्यक्षत्रियविशेषराजम्, अघातयत्—व्यधीत। चन्द्रगुप्तभ्रातृवधूं ध्रुवदेवीं कामयमानः शकाधिपतिः ध्रुवदेवीवेशिना चन्द्रगुप्तेन गूढं व्यापादित इति वार्त्ता। एतेन कैरपि परकलत्रं नैव द्रष्टव्यं, विशेषतो लोकप्रासकराजैः इति व्यङ्ग्यीकृतम्।

(३७८) प्रमत्तानां—प्रमादशालिनां, प्रमदाक्षताः,—प्रमदाभिः,—कामिनीभिः, क्षताः,—सम्पादिता इत्यर्थः; प्रमादाः,—अनवधानतानिबन्धना विपदः इत्यर्थः, देवस्य—भवतः इति भावः, श्रुतिविषयं—कर्णपथम्, आगताः,—प्राप्ताः, भवता श्रुता इत्यर्थः; तथाऽपि कार्यान्तरव्यासक्तचित्ततया ते विस्मृतिस्थेत् स्यादिति मत्वा अनुजीविभिरवश्यकर्त्तव्यतया एवं संस्मार्यते, न त्वश्रुतपूर्व्वाय ते विज्ञाप्यते इत्याशयः। एतेन प्रभोः समक्षम् आत्मश्लाघवख्यापनमेवाधिकारिणां प्रभुपरायणतायाः परिचायकम् इत्याख्येदितम्।

(३७९) मधुमोदितं—मधुना—मद्येन, मोदितम्—लब्धासितं, मधुरकसंलिप्तैः,—मधुरकेण—मधुरमेव मधुरकं तेन, विषविशेषेण इत्यर्थः; ("मधुरा मदपुष्पार्थां··· । क्लीबं विषे पुंसि रसे···" इति मेदिनी) संलिप्तैः,—दिग्धैः, लाजैः,—भृष्टधान्यैः, सुप्रभा—तन्नामप्रसिद्धा स्वमहिषी, पुत्रराज्यार्थं,—तनयं राज्ये अभिषेक्तुमित्यर्थः, महासेनं—तन्नामानं, काशिराजं—वाराणसीपतिं, जघान—निहतवती। ("लाजैर्भूपुरैरित्यर्थः; तथा च,—'विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम्' इति मनुटीकायां कुल्लूकभट्टधृतवचनम्" इति कैश्चित्)।

(३८०) व्याजेति:—व्याजेन—छलेन, जनितः,—उत्पादितः, कन्दर्पस्य—कामस्य, दर्पः,—आवेशातिशय इत्यर्थः, यया तथाविधा; छलिकस्वकामभावप्रदर्शनेन लाक्षस्य कामसुद्दीपयन्तीति भावः। क्षुरेति।—क्षुरधारा—क्षुरस्येव—स्वनामप्रसिद्धास्त्रविशेषस्येव, धारा—तीक्ष्णता इत्यर्थः, पर्य्यन्ते—प्रान्तदेशे यस्य तादृशेन, क्षुराग्रवच्छिनेनेत्यर्थः, दर्पणेन—आदर्शेन। अयोध्याधिपतिम्—अयोध्याराजं,

परन्तपं रत्नवती जारूथम्; (३८१) विषचूर्णचुम्बितमकरन्देन च कर्णेन्दीवरेण देवकी देवरानुरक्ता देवसेनं सौम्यम्; (३८२) योगपरागविरसवर्षिणा च मणिनूपुरेण वल्लभा सपत्नीरुषा वैरन्त्यं रन्तिदेवम्; (३८३) वेणीनिगूढेन च शल्केन विन्दुमती हृषिं विदूरथम्; (३८४) रसदिग्धमध्येन च मेखलामणिना हंसवती सौवीरं वीरसेनम्;

परन्तपं—शत्रुतापिनं, ["क्विप्चन्परयोस्तापे:" (३।२।३९ पा०) इति खच् "खचि ह्रस्व:" (६।४।९४ पा०) इत्युपधाया ह्रस्व:] जारूथं—तदाख्यं नृपं, रत्नवती—तन्नाम काचित कामिनी; जघ्न इति पूर्वेणान्वय:। एवमुत्तरत्र।

(३८१) विषेति।—विषचूर्णेन—गरलचोदेन, चुम्बित:,—लिप्त:, मकरन्द:,—मधु यस्य तादृशेन, कर्णेन्दीवरेण—कर्णपूरनीलोत्पलेन, देवसेनं—तदाख्यं, सौम्या—सुन्नदेशाधिपम्। देवरानुरक्ता—देवर—पत्यु: कनीयसि भ्रातरि,अनुरक्ता—आसक्ता।

(३८२) योगेति।—योगपराग:,—अभिचारार्थं रचित: मन्त्रपूतौषधचूर्ण-विशेष:, तेन विरसं—विरुद्धं, वर्षतीति तथोक्तेन; यद्वा,—विरस:,—विषमं विषं, ("...रसो गन्धरसे जले। शृङ्गारादौ विषे वीर्ये तिक्तादौ द्रवरागयो:॥" इति मेदिनी) तद्वर्षिणा—तत्स्रावित्रा, सविषपरागखिन्नमुखेनेत्यर्थ:, मणिनूपुरेण—रत्न-मञ्जीरेण, वल्लभा—प्रिया, महिषीत्यर्थ:, सपत्नीरुषा—अकस्मादाहत्य सपत्नीं प्रति क्षमासक्त इति क्रोधेनेति भाव:; वैरन्त्यं—वैरन्ती नाम नगरी तस्या अधिप्र: वैरन्त्य: तं, ["इदमर्थेऽस्त्रा—" (४।१।१७१ पा०) इत्यादिना अञ्] रन्तिदेवं—तन्नामानं नृपम्।

(३८३) वेणीनिगूढेन—केशपाशे गोपायित्वा निहितेन। विन्दुमती—तन्नाम महिषी, हृषिं—हृषिवंशप्रभुतं, विदूरथं—तन्नामानं राजानम्; तथा च—"शल्केन वेणीविनिगूहितेन विदूरथं वै महिषी जघान" इति मनुटीकायां कुल्लूकभट्टधृतवचनम्।

(३८४) रसदिग्धमध्येन—रस:,—विषं, ("शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस:" इत्यमर:) तेन दिग्धं—लिप्तं, मध्यम्—अभ्यन्तरं यस्य तथाविधेन। मेखलामणिना—काञ्चीदाममध्यनिवद्धरत्नेन, हंसवती—तन्नाम्नी राजमहिषी, सौवीरं—तदाख्यजनपदाधिपतिं, वीरसेनं—तदाख्यं नृपम्। एतै: प्रबन्धै: स्वप्रेयस्योऽपि स्वार्थान्धा: कदाचित्कालसर्पिण्य: भवन्ति इति विभाव्य वरेन्द्रै: सततं सावहित्रै: ज्ञातव्यम् इति प्रदर्शितम्।

(३८५) अदृश्यागदलिप्तवदना च विषवारुणीगण्डूषपायनेन पौरवी पौरवेश्वरं सोमकम्" इत्युक्ता (३८६) विरराम स्वाम्यादेशसम्पादनाय च निर्जगाम।

देवोऽपि हर्षः (३८७) सकलराज्यस्थितीश्चकार। ततश्च तथा कृतप्रतिज्ञे (३८८) प्रयाणं विजयाय दिशां समादिशति देवे हर्षे, गतायुषां प्रतिसामन्तानाम् उदवसितेषु बहुरूपाणि उपलिङ्गानि विततिरे। तथा हि (३८९) अविप्रकृष्टाः कालदूतदृष्टय इव दृतस्ततः चेरुः चटुलाः कृष्णशारङ्गेक्षणाः।

(३८५) अदृश्येति।—अदृश्येन—गूढेन, अगदेन—तदाख्यौषधेन; आत्मरक्षार्थं विषनाशकेन इति भावः; लिप्त—दिग्धं, वदनं—मुखं, मुखकुहरमित्यर्थः, यस्याः यया वा तथाभूता। सविषास्यमद्यपायनेन राजानं जिघांसन्ती राज्ञी चेत् तेन स्वप्राणवियोगो भवेत् इति शङ्कया विषनाशकौषधं स्वमुखाभ्यन्तरं उपालिम्पदिति विभाव्यम्। विषेति।—विषवारुणी—गरलयुक्ता सुरा, तस्या गण्डूषं—मुखपूरणं, तस्य पायनेन—पायनक्रियया, स्वभर्तारं राजानं पाययित्वा इत्यर्थः; पौरवी—तन्नाम महिषी, पौरवेश्वरं—पुरुवंशीयानामधिपं, सोमकं—तदाख्यं नृपम्। उक्तौ: वचनजातेः स्त्रीविहितवञ्चनार्थप्रदर्शनेन संहारद्रुमस्य बाह्मणोरमप्रमूनानां करण्डरुपाः स्त्रियो हि सदैव परिवर्जनीया इति प्रतिपादितम्।

(३८६) विरराम—तूष्णीम्बभूव। स्वाम्यादेशसम्पादनाय—प्रभोराज्ञां पालयितुमित्यर्थः।

(३८७) सकलराज्यस्थितीः,—समस्तराज्यव्यवस्थाः, राजकार्यस्य सुष्ठु निर्वाहविधानानीत्यर्थः। विजिगीषुभिः प्रयाणकाले प्रथमं स्वाधिकाररक्षणस्य अवश्यकर्तव्यत्वादिति भावः।

(३८८) दिशां विजयाय—दिग्विजयाय, प्रयाणं—यात्राम्। समादिशति—आज्ञापयति सति इत्यर्थः। गतायुषां—निःशेषजीवितकालानां, प्राप्तकालानामिति भावः; प्रतिसामन्तानां—हर्षवर्धनस्य शत्रुभूतनृपाणाम्। उदवसितेषु—गतेषु, उपलिङ्गानि—उपलिङ्गन्ते—अनुमीयन्ते अमूभानि यैः तानि, अनिमित्तानि इत्यर्थः, उत्पातचिह्नानीति यावत्, विततिरे—आनशिरे, विस्तारं प्रापुः इति भावः।

(३८९) अविप्रकृष्टाः,—सन्निहिताः। कालेति।—कालस्य—यमस्य, दूताः,

(३९०) प्रचलितलक्ष्मीनूपुरप्रणादप्रतिमा मधुसरघासङ्घात-झङ्कारा जङ्घादिरेऽजिरे । (३९१) विततविकटवदनविवर-विसृतवह्निविसरा वासरेऽपि विरसं विरेसुः चिरम् अशिवार्थम् अशिवाः शिवाः । (३९२) शवपिशितप्रगुढ़प्रणया इव कपिपोतकपोलकपिलपञ्चतयः काननकपोताः पेतुः ।

—अनुचरा इत्यर्थः, तेषां दृष्टय इव—नेत्राणि इव । चेटकः,—भ्रमन्ति अ । चटुलाः, —चञ्चलाः, कृष्णशारङ्गेणयः,—कालसारास्यमृगविशेषाः ; जनविरले कानने ग्राम्ये चाश्रमपदे नियतं विहरणशीलानां भीतप्रकृतिकानां तेषां जनपदादौ निर्भयं पर्यटनस्य अचिरादेव बहुलजनक्षयेण जनपदादीनामरण्यीभवनसूचकत्वादिति भावः ।

(३९०) प्रचलितेति ।—प्रचलितायाः,—प्रस्थितायाः ; तेषां भवनं परित्यज्य इति भावः ; लक्ष्म्याः,—श्रियाः, नूपुराणां—मञ्जीराणां, प्रणादप्रतिमाः,—निस्वन-सदृशाः, मधुसरघाणां—मधुमक्षिकाणां, ("सरघा मधुमक्षिका" इत्यमरः) सरघा-शब्देनैव मधुमक्षिकायामुक्तायामपि पुनः मधुपदं मधुसञ्चयासन्नत्वद्योतकं ज्ञातव्यम् ; सङ्घातस्य—समूहस्य, झङ्काराः,—शब्दविशेषाः, गुञ्जनानि इत्यर्थः, अजिरे—अङ्गने, जङ्घादिरे—व्यजृम्भन्त, मधुकरा जगुरुः इत्यर्थः । निरन्तरं सदनादौ मधुकरस्वं विमुच्य उड्डीयमानानां सरघाणां संरावोऽप्यनर्थशापकः इत्याशयः ।

(३९१) विततेति ।—विततानां—व्यादत्तानाम्, अत एव विकटानां—विकटानां, वदनानां—मुखानां, विवरेभ्यः,—अन्तरेभ्यः, विसृताः,—निर्गताः, वह्नि-विसराः,—अग्निप्रसराः यासां तथाभूताः, व्याप्तवदनैः अग्निमुद्गिरन्त्य इति यावत् । वासरे—दिवसे, का कथा निशाया इति अपिशब्दार्थः ; निशायां प्रतियामं शिवाः शब्दायन्ते, अतः तदतिरिक्ते काले क्रोष्टूनां निनादाः अशुभसूचकाः इति ध्येयम् । विरसं—विकटम् । विरेसुः,—शब्दायन्ते स्म । अशिवार्थम्—अमङ्गलार्थम् । अशिवाः, —अमङ्गलसूचिन्यः । शिवाः,—शृगालाः, स्त्रीजातय इति यावत् । [इह बहु-रूपाणामसकृदावृत्त्या इत्यनुप्रासः] ।

(३९२) शवेति ।—शवानां—मृतदेहानां, पिशितेषु—मांसेषु, प्रगुढ़ाः,—प्रबद्धाः, प्रणयाः,—स्पृहा यैषां तथाभूता इव, शवपिशिताशनकाङ्क्षिण इवेति यावत् । कपीति ।—कपिपोतानां—वानरशावकानां, कपोलाः,—गण्डदेशा इव, कपिलाः, —पिङ्गलाः, पञ्चतयः,—पञ्चा यैषां तथाविधाः, काननकपोताः,—अरण्यपारावताः, "शुभ्राः" इति कैश्चित् । पेतुः,—पतन्ति अ । नगरवासावमन्यमानां वन्यकपोतकां

(३९३) आमन्त्रयमाणा इव दधुः अकालकुसुमानि समम् उपवनतरवः। (३९४) तरलकरतलप्रहारप्रहृतपयोधरा रुरुदुः प्रसभं सभाशालभञ्जिकाः। दृष्टयः (३९५) आसन्नकचग्रह-भयोद्भ्रान्तोत्तमाङ्गमिव आत्मानं कबन्धम् आदर्शादिषु योधाः। (३९६) चूडामणिषु चक्रशङ्खकमललक्ष्माणः प्रादुरभवन्

बन्यफलमूलनिरतानाम् अकस्मात् नगरोपशल्यसम्पातः, हतनृपतिपिशितभक्षणक्षया इव इत्युत्प्रेक्षातात्पर्यम् ; तेषां तथाविधप्रडीनं महोत्पातज्ञापकम् इति शाकुनिकाः।

(३९३) आमन्त्रयमाणा इव—शैघ्र्यालापं कुर्वन्त इव, भोगावशेषं सर्पादि सम्पादयितुमभिनन्दयन्त इवेत्यर्थः। दधुः,—धारयन्ति स्म, जनयन्ति स्मेति भावः। अकालकुसुमानि—असामयिकपुष्पाणि, पुष्पोद्गमायोग्यकालेऽपि पुष्पाणि इत्यर्थः। समं—युगपत्। दोहददानप्रयत्नादिकमन्तरेणापि आकालिककुसुमाद्युद्गमः दैवोपद्रवसूचक इत्याशयः।

(३९४) तरलेति।—तरलेन—चञ्चलेन, करतलेन—पाणितलेन, यः प्रहारः,—आघातः, तेन प्रहृतौ—ताडितौ, पयोधरौ—स्तनौ याभिः तथाविधाः, सभाशाल-भञ्जिकाः,—सभापुत्तलिकाः, प्रसभं—सहसा, रुरुदुः,—रुदन्ति स्म, इवेति शेषः; ताः भाविवियोगशोकात् वक्षःस्थलं प्रहृत्य करतलैः भृशं चक्रन्दुरिवेत्युत्प्रेक्षा बोद्धव्या। प्रतिमास्यन्दनं प्रबलशोकदुर्निमित्तज्ञापकम् इति ज्ञेयम्।

(३९५) आसन्नेति।—आसन्नात्—अतिसन्निहितात्, अचिरभाविन इत्यर्थः, कचग्रहात्—केशाकर्षणात्; हर्षेण हर्षभटैर्वा इति भावः; भयेन—त्रासेन, उद्भ्रान्तं—विघूर्णितम्, उत्तमाङ्गं—शिरो यस्य तथाभूतमिव, आत्मानं—स्वदेहम्, आदर्शादिषु—मुकुराभ्यन्तरेषु, कबन्धम्—अशिरस्कम्; ("कबन्धस्तु क्रियायुक्तमपमूर्द्धकलेवरम्" इत्यमरः)। योधाः,—सैनिकाः। आदर्शादौ कबन्धच्छायादर्शनं त्वरितमृत्युज्ञापकमिति बोध्यम्।

(३९६) चूडामणिषु—स्वमुकुटेषु। चक्रेति।—चक्रादीनां—रथाङ्गादीनां, पादन्यसतानां सम्राड्व्यञ्जनानामिति भावः; लक्ष्माणि—चिह्नानि येषु तथाभूताः, पादन्यासाः,—चरणनिवेशाः; विजेतुश्चक्रवर्त्तिन इति भावः। प्रादुरभवन्—समपतन्। राज्ञः हर्षस्य रथाङ्गादिशोभितं पदं क्षणिष्यमाणरिपुरमणीनां शिरोमणिषु प्रतिबिम्बितमिदानीमेवाभूदिति फलितम्। चरणादीनामभावेऽपि तच्चिह्नप्रतिबिम्बनात् विभावनाऽलङ्कारः, विजिगीषोर्दिव्यविभूतिमत्त्वसूचनेन द्योतितम् इत्यलङ्कारेण वस्तुध्वनिः।

पादन्यासा राजमहिषीणाम्। (३९७) चेटीचामराणि अकस्मात् अधावन्त पाणिपल्लवात्। प्रणयकलहेऽपि दत्तपृष्ठाः चिरम् अभवन् भटाः पराङ्मुखा मानिनीनाम्। (३९८) करिकपोलेषु व्यघटन्त मधुलिहां मधुमदिरापानगोष्ठ्यः। (३९९) समाघ्रातयममहिषगन्धा इव ताम्यन्तः स्तम्बकरिम् अपि हरयो हरितं नवयवसं न चेरुः।

---

(३९७) चेटीति।—चेटीनां—दासीनां, बीजनकारिणीनामिति भावः; चामराणि—बालव्यजनानि, पाणिपल्लवात्—करकिसलयात्, अधावन्त—अच्यवन्त। दत्तपृष्ठाः,—दत्तं—प्रदर्शितमित्यर्थः, पृष्ठं—पश्चाद्देशः यैः तथाभूताः; प्रणयकलहे परजितततया पृष्ठप्रदर्शनं कृतवन्त इति भावः। भटाः,—वीराः। चिरं पराङ्मुखाः,—चिरं विमुखाः, पलायनपरा इति भावः, अभवन्—अजायन्त; अबलाकृतकृतककलहेऽपि पराजयः तेषां भाविमहासङ्ग्रामे अवश्यं पराभवं बोधयति इति भावः।

(३९८) करिकपोलेषु—करिणां—हस्तिनां, कपोलेषु—गण्डेषु, अस्रुतमदेषु इति भावः, मधुलिहां—भ्रमराणाम्। मधुलिहां—मधु—मदजलरूपः पुष्परस एव, मदिरा—मद्यं, तस्याः पानगोष्ठ्यः,—पानसभाः, व्यघटन्त—व्ययुज्यन्त, विमुखाः भूताः इत्यर्थः; मकरन्दलोलुपा अपि मधुपाः कुसुमनिकरवसतिं परित्यज्य स्रवन्मदकरिकपोलेषु प्राक् नितरामवसन्, इदानीन्तु रिपुकरिणां मदस्रावित्वाभावात् अलीनां सभाः पूर्ववत् तत्र नासन्निति भावः; शत्रुगजाः निस्त्रैरुख्याः मदं न विससर्जुः इति समुदितार्थः; कुञ्जराणां कपोलादिदेशात् भ्रमराणां पलायनस्य दुर्निमित्तसूचकत्वादिति भावः।

(३९९) समाघ्रातेति।—समाघ्रातः,—सम्यक् आघ्रातं प्राप्त इत्यर्थः, यममहिषस्य—कृतान्तवाहनस्य इति यावत्, गन्धः,—घ्रेयः यैः तथाभूता इव, ताम्यन्तः,—क्लिश्यन्तः; आसन्नमृत्युसम्भावनया इति भावः; स्तम्बकरिं—स्तम्बं—गुच्छं करीति यस्मं, व्रीहिमित्यर्थः, हरितं—श्यामलं, नवयवसं—नूतनं घासम्। इह समुच्चयार्थको ऽपिशब्दः, तेन श्यामलं नवयवसं स्तम्बकरिमपि इत्यन्वयः, अन्यथा ["स्तम्बशकृतो रिन्" (५।२।२४ पा०) इत्यत्र "व्रीहिवत्स्यौरिति वक्तव्यम्" (वा०) इति व्रीह्यर्थे एव इनः विधानात्] यद्वा,—स्तम्बफलपसवीभ्युक्षमपि सुरसं यवसं वाजिनः न अभुञ्जत इति अन्वयलभ्यार्थः; हरयः,—वाजिनः, घोटका इत्यर्थः, ("यमानिलेन्द्रचन्द्रार्कविष्ण-

(४००) चलवलयावलीवाचालबालिकातालिकातोद्यलालिता अपि न ननृतुः मन्दा मन्दिरमयूराः। निशि निशि (४०१) रजनिकरहरिणनिहितनयन इव उन्मुखः तारम् उपतोरणम् अकारणम् अकाणीत् कौलेयकगणः। (४०२) गणयन्तीव गतायुषः तर्जनतरलया तर्जन्या दिवसम् आट वाटकेषु

सिंहाग्र्यवाजिषु। यूकाछिक्कपिभेकेषु हरिणी कपिले त्रिषु॥" इत्यमरः) न चेहुः,—न भवयामासुरित्यर्थः।

(४००) चलेति।—चलाभिः,—तरलाभिः, चञ्चलाभिरित्यर्थः, वलयावलीभिः,—कङ्कणश्रेणीभिः, वाचालाः,—मुखराः, सशब्दा इत्यर्थः, या बालिकाः,—कन्याः, तासां तालिका—करतलध्वनिरेव, आतोद्यं—वाद्यभेदः, ("वादित्रातोद्यनामकम्" इत्यमरः) तेन लालिता अपि—नर्त्तिता अपि, उत्तेजिता अपीति भावः; करतालमन्द्रध्वनिश्रवणसमकालं प्राक् सहर्षं नृत्यन्तः अपीति तात्पर्य्यम्। मन्दाः,—विवशाः, स्वपालकानां राज्ञां भाविवियोगशोकात् इति भावः। मन्दिरमयूराः,—गृहपालितशिखिनः।

(४०१) रजनीति।—रजनिकरस्य—चन्द्रस्य, यो हरिणः,—मृगः, अङ्कस्थित इति भावः, तस्मिन् निहिते—निक्षिप्ते, नयने—नेत्रे येन तथाभूत इव, दंशनेच्छया, तस्य मृगदंशकाख्यवादिति भावः; उन्मुखः,—ऊर्द्धमुखः। तारम्—उच्चैः। उपतोरणं—बहिर्द्वारसमीपे, ("तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः)। अकारणम्—अहेतुकम्। अकाणीत्—व्यभाषिष्ट, चीत्कार इत्यर्थः। कौलेयकगणः,—कुक्कुरसमूहः, ("कौलेयकः सारमेयः कुक्कुरो मृगदंशकः" इत्यमरः)। कुक्कुराः हि भवन्ति पिशितप्रियाः, तेन हि ते मृगयायां यथा उन्मुखीभूय मृगाननुयान्ति, तथैव मृगाङ्कांशयं कुरङ्गमाक्रमितुमिव उन्मुखीभूय अकस्मात् सर्व्वेव धावितुमारेभिरे इत्युत्प्रेक्षितार्थतात्पर्य्यम्; अथवा यं समुदितांशयः, प्रतिनिशं मतारं कुर्वतां गुणां शब्देनानुमीयते यदेते राजवियोगशोकादुन्मुखीभूय निर्भरमरुदन्निवेति।

(४०२) गणयन्तीव—सङ्ख्यान्तीव। गतायुषः,—गतजीवितान्, के के गतायुषो जाता इति गणनां कुर्व्वन्तीवेत्यर्थः। तर्जनतरलया—तर्जनं—निर्भर्त्सनं, तत्र तरला—चञ्चला तया, तर्जन्या—अङ्गुष्ठानन्तरवर्त्तिन्या अङ्गुल्या। दिवसं—दिनं व्याप्येत्यर्थः, [व्याप्त्यर्थे द्वितीया], आट—बभ्राम। वाटकेषु—वाटः,—मार्गः, स एव वाटकः तेषु, पथिषु इत्यर्थः, ("वाटो मार्गे क्षितिस्थाने" इति मेदिनी)।

कोटवी। (४०३) कुट्टिमेषु कुटिलहरिणखुरवेणीतरङ्गिण्यः अध्वराजयोऽजायन्त। (४०४) जनितवेणीबन्धानि निरञ्जनरोचनारोचींषि चषकमधुनि मुखकमलप्रतिबिम्बानि अदृश्यन्त भटीनाम्। (४०५) समासन्नात्मापहारचकिता इव चक्रम्पिरे भूमयः। (४०६) बध्यालङ्काररक्तचन्दनरसच्छटा इव अलक्ष्यन्त शूराणां पतिताः शरीरेषु विकसितबन्धूककुसुमशोणितशोचिषः

कोटवी—नग्ना स्त्री, उन्मत्ता इति भावः; ("स्त्री नग्निका कोटवी स्यात्" इत्यमरः)। प्रकाशराजपथेषु अपरिहार्यभाविपतिविधोगमनिमं भावयन्त्यः उन्मत्ताः अत एव विवस्त्राः रिपुप्रमदाः सौहृदं पश्यादुः, तेनानुमीयते यत् ताः प्रतिपन्नविधोगतया विधुराः प्रमत्ताश्च जाता इति।

(४०३) कुट्टिमेषु—गृहाभ्यन्तरतलेषु। कुटिलेति।—कुटिलाभिः,—वक्राभिः, हरिणानां—मृगाणां, खुरवेणीभिः,—शफपरम्पराभिः, तरङ्गिण्यः,—भङ्गवत्यः; सञ्जाततरङ्गा इव प्रतीयमाना इति भावः; अध्वराजयः,—अभिनवहतगवेधयः; रिपूणां राजश्रीविहीनानि गृहाणि वन्यहरिणानां प्रचरणयोग्यानि अरण्यानीव प्रतीयिरे इति भावः।

(४०४) जनितेति।—जनितः,—कृतः, वेणीबन्धः,—केशसंयमनं येषां येषु वा तानि, एकवेणीधराणीत्यर्थः; प्रोषितभर्तृकाणां वेणीबन्धनियमस्य शास्त्रीयत्वादिति भावः। निरञ्जनेति।—निरञ्जनानि—कज्जलवर्जितानि, अत एव रोचनावत्—गोरोचना इव, रोचींषि—प्रभा येषां तथाभूतानि, पीताभनयनानीति भावः। चषकमधुनि—पानपात्रवर्त्तिनि मद्ये; तैलमद्यप्रभृतिषु प्रतिच्छायादर्शनस्य अमङ्गलसूचकत्वादिति भावः। भटीनां—सैनिकनारीणाम्। वीतनाथानामिव स्वासां तथाविधमलक्षणदर्शनमात्मप्रतिबिम्बादौ झटिति समुत्पद्यमानस्य दौर्भाग्यस्याभिज्ञापकम् इत्याशयः।

(४०५) समासन्नेति।—समासन्नः,—अतिसन्निकृष्टः, आत्मनः,—स्वस्य, यः अपहारः,—अपहरणम्; परहस्तगमनमिति भावः; तेन चकिता इव—शङ्किता इव; भूमयः,—भुवः; तत्तद्देशा इति भावः; चक्रम्पिरे—प्रवेपन्ते स्म; अरात्यधिकृतजनपदेषु भूकम्पोऽभूदिति भावः।

(४०६) बध्येति।—बध्यानां—वधार्थं वध्यस्थानं नीयमानानां जनानाम्, अलङ्काराः,—भूषणानि, रक्तचन्दनरसच्छटाः,—रक्तचन्दनद्रवानुलेपा इव; राजदण्डेन बध्याः रक्तचन्दनैरनुलिप्यन्ते इति प्रसिद्धिः। शूराणां—भटानाम्। विक-

शोणितवृष्टयः। (४०७) पर्य्यग्नीकुर्वाणा इव विनश्वरीं श्रियम्, अविरलस्फुरत्स्फुलिङ्गाङ्गारोद्गारदग्धतारागणा गगनाः पतन्तः प्रज्वलन्तो न व्यरंसिषुः उल्कादण्डाः। प्रथममेव (४०८) प्रतीहारीव अपहरन्ती प्रतिभवनं चामरातपत्र-व्यजनानि परुषा बभ्राम वात्येति।

इति श्रीबाणभट्टकृते हर्षचरिते प्रयाणप्रतिज्ञावर्णनं नाम

षष्ठ उच्छ्वासः॥ ६॥

सितेति।—विकसितानि—प्रस्फुटानि, बन्धूकस्रजमानीव—बन्धूजीवपुष्पाणि इव, ("बन्धूको बन्धुजीवकः" इत्यमरः) शोणितानि—रक्तानि, शोचिर्षि—अर्चिषः यासां तथाविधाः, शोणितवृष्टयः,—रक्तवर्षाणि; रक्तचन्दनैः चर्चिताः रक्तकरवीरदामभिश्च विभूषिताः बध्याः इव रिपवोऽपि सर्व्वत्र समादृश्यन्त इति समुदितार्थः; शत्रुनगरीषु महीपातसूचकरुधिरवृष्टयो बभूवुरिति तु सङ्क्षेपः।

(४०७) पर्य्यग्नीति।—विनश्वरीं—विनाशिनीं नाशोन्मुखीमित्यर्थः, श्रियं—लक्ष्मीं, पर्य्यग्नीकुर्वाणा इव—अग्नये परिम्लाना पर्य्यग्निः, ["पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्या" (वा०) इति चतुर्थीतत्पुरुषः] अग्निसंयोगात् दग्धशरीरेत्यर्थः, ततः अपर्य्यग्निं पर्य्यग्निं कुर्व्वाणा इति अभूततद्भावे च्विः करोतिर्योगात्; या हि श्रीः प्राक् अग्निना परिम्लाना नासीत्, तामिदानीं परिम्लानां कुर्व्वन्तः इत्यर्थः; अग्निना परिवेष्टयन्त इवेति भावः; "विनष्टम् अग्निना दहेत्" इति शास्त्रादित्याशयः। अविरलेति। —अविरलं—निरन्तरं यथा तथा, स्फुरन्तः,—दीप्यमानाः, स्फुलिङ्गाः,—अग्निकणा येषां तथाभूताः, ये अङ्गाराः,—ज्वलदुल्मुकाः, ("अङ्गिसदिमन्दिभ्य आरन्" (उ० ३ पा० १३४ सू०) इत्यारन्] तेषाम् उद्गारेण—निःसारणेन, दग्धाः,—भस्मीकृताः, तप्ताः वा, तारागणाः,—नक्षत्रवृन्दानि यैः तथाविधाः। गगनाः,—सङ्घाः, बहुत्व इत्यर्थः। उल्कादण्डाः,—दण्डाकारा अग्निरेखाः। न व्यरंसिषुः,—न विरताः, अविरतमाविरभवन् इत्यर्थः। अजस्रोल्कापातः राजविनाशसूचकः इति बोध्यम्। निरन्तरं गगनात् रेखाकारेण पतन्तः तेजसां पुञ्जाः उल्कारूपाः, प्रज्वलत्स्फुलिङ्गोद्गारैः तारकाराजिं दग्धीकर्त्तुमारेभिरे, तैर्नैतदनुमीयते यत्, रिपूणामाशुविनाशिनीं श्रियमेते स्वज्वालाभिः भस्मीकर्त्तुमेव समुदिताः इति समुदितोत्प्रेक्षितवाक्यतात्पर्य्यम्।

(४०८) प्रतीहारी इव—दौवारिकी इव; विजयिनृपस्येति भावः; अपहरन्ती —अपसारयन्ती। चामरेति।—चामराणि—प्रकीर्णकाणि, बालव्यजनानीत्यर्थः,

सप्तम उच्छ्वासः ।

अङ्गनवेदी वसुधा कुल्या जलधिः स्थली च पातालम् ।
वल्मीकश्च सुमेरुः कृतप्रतिज्ञस्य वीरस्य ॥ १ ॥

आतपत्राणि—छत्राणि, नृपलक्षणानीति यावत्, व्यजनानि—तालहरितानि तानि । परुषा—कर्कशा । वात्या—वायुसङ्घातः, शत्रुपुरीषु प्रचण्डः पवनः विजिगीषोः प्रतिहारी इव विचेरुः इत्युत्प्रेक्षा, ["पाशादिभ्यो यः" (४।२।४९ पा०) इति समूहार्थे यप्रत्ययः] । विजेतुः प्रतीहारीभिः स्वप्रतापावजितानां विपक्षाणां छत्रचामरादीनि स्वतन्त्रनृपलक्षणानि अपहार्यन्ते इति लोकव्यवहारः । ततश्च प्रतिकूलमरुतः एवंभूता बभूवुः, येन प्रतिहार्यैः विपक्षाणां राज्ञां शिरसि छत्रादिकं धारयितुमपि नाशक्नुवन्ति भावः ।

इत्यग्निषशास्त्राटवीसञ्चरणपटुाननेन बाल्यवंशावतंसेन पण्डितकुलपतिना वि, ए,
उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां,
तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-
विद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां
श्रीहर्षचरितव्याख्यायां षष्ठ उच्छ्वासः ॥ ६ ॥

अथ हर्षस्य युद्धयात्रां विवर्णयिषन् कविः, कदाचित् कोऽपि एवमाशङ्केत चेत् यत् सम्भावितात्मभुवनविजेतृबलस्यापि हर्षस्य ईदृशी असम्भाव्या प्रतिज्ञा सर्व्वथैवानुचिता, रिपवश्चेत् दुर्गमदेशे पलायिता भवेयुः, तदा कथं स प्राक् कृतां प्रतिज्ञां पूरयितुमीशीत ? कथं वा बहुराजां पृथ्वीमेक एव जयेदित्याशंसायां समाधत्ते, अङ्गनेति ।—कृतप्रतिज्ञस्य—अपथमारूढस्य, शत्रून् समूलघातं घातुं धृतपरिकरस्येत्यर्थः, सत्त्वौर्जित्येन एवं करिष्याम्येव इति दृढसङ्कल्पस्य इति भावः ; वीरस्य—शूरस्य, वसुधा—पृथ्वी, अङ्गनवेदी—अजिरवर्त्तिनी परिच्छृता भूमिः एवेत्यर्थः, शूराः पृथिव्या असीमत्वं तुच्छीकृत्य विजित्य च तां, स्वगृहाङ्गणवत् लीलयैव तत्र यथासुखं विचरन्तीति भावः ; जलधिः,—समुद्रः, कुल्या—अल्पा क्षुद्रिमा सरिदेवेत्यर्थः, ("कुल्याल्पा क्षुद्रिमा सरित्" इत्यमरः) । दुष्पारं समुद्रं अनायासवत् सुपारं मत्वा तत्परपारस्थमपि

धृतधनुषि बाहुशालिनि शैला न नमन्ति यत्तदाश्चर्यम्।
रिपुसंज्ञकेषु गणना कैव वराकेषु काकेषु ? ॥ २ ॥

(१) अथ व्यतीतेषु च केषुचित् दिवसेषु, मौहूर्त्तिकमण्डलेन श्रुतश्रः सुगणिते सुप्रशस्तेऽहनि

भवम् अनायासेनैव विनिघ्नन्ति इति भावः ; पातालम्—अधोभुवनं, स्थली—अक्रविमभूमिभृतम् ; ["जानपद—" (४।१।४२ पा०) इत्यादिना ङीष्] अच्छः भूभाग इति भावः ; दुर्गमं पातालमपि समतलभूभागवत् अनायासेन रिपुजयार्थं प्रविशन्ति इति भावः ; सुमेरुः,—हैमाद्रिः ; स्वर्गराज्यमिति भावः ; वल्मीकः,—कीटविशेषरचितमृत्तिकास्तूप इत्यर्थः ; तुङ्गशृङ्गं सुमेरुमपि वल्मीकस्तूपवत् अवलीलया आक्रामन्तीति भावः ; शूरा हि निजशौर्यप्रभावेण त्रिभुवनं करतलफलमिव मन्यन्ति, न तु स्ववीर्यगुणानां तेषां साधनान्तरपरीक्षणमिति निष्कर्षः। अत्र केवलायाः वसुधायाः अङ्गनावेदीरूपत्वोक्तेः, तथा जलधेः कल्या रूपतया पातालस्य स्थलीभूततया सुमेरोः वल्मीकरूपत्वोक्तेश्च निरङ्गाणां रूपकाणां सजातीयानां संसृष्टिः। आर्या वृत्तम् ॥ १ ॥

वीराणां प्रभावमाह, धृतेति।—बाहुशालिनि—भुजवीर्यवति इत्यर्थः, जने इति शेषः, धृतधनुषि—धनुष्याणौ सति, त्रिभुवनमेव जेष्यामि इति प्रतिज्ञाय गृहीतचापे सतीत्यर्थः, [अत्र समासान्तविधेरनित्यत्वात् "धनुषश्च" (५। ४ ।१३२ पा०) इति बहुव्रीहिरनङादेशाभावः इति ज्ञेयम्, अन्यथा धृतधन्वनि इति स्यादिति विभाव्यम्] शैलाः,—पर्वताः, न नमन्ति—न तं प्रणमन्ति ; आत्मविनाशभयादिति भावः ; इति यत्, तत्—अनमनमिति यावत्, आश्चर्यं—चित्रम् ; पर्वतानपि वीरा धनुर्बलेन नमयितुं शक्नुवन्तीति भावः ; रिपुसंज्ञकेषु—शत्रुनामधारिषु, वराकेषु—दीनेषु, काकेषु—सङ्कल्पजःसु, तत्तुल्यनिर्वीर्येषु स्वल्पवीर्येषु वा ; यद्वा,—कर्णकठोरवचनमात्रपरायणोच्छिष्टभोजिषु इति भावः ; कैव गणना ?—का आदरः ? इत्यर्थः ; अन्ये वायसतुल्याः शत्रवस्तस्य बाहुबलशालिनः सकाशं न गच्छन्ति, तान् हि असौ हनाय मन्यते च इति भावः। एतेन वीरस्य भावि त्रिभुवनविजयित्वं सूच्यते। अत्र रिपुषु काकरूपत्वोक्तेः निरङ्गं रूपकम्। आर्या वृत्तम् ॥ २ ॥

(१) अथेति।—"अथ" इत्यादौ "भवनाभिर्जगाम" इति परेण सम्बन्धः। क्रमेण विशिनष्टि, व्यतीतेषु इति।—व्यतीतेषु—अतिक्रान्तेषु, मौहूर्त्तिकमण्डलेन—ज्योतिर्विद्वर्गेण, श्रुतश्रः,—पुनः पुनरित्यर्थः। सुगणिते—सुनिरूपिते।

(२) दत्ते चतसृणामपि दिशां विजययोग्ये दण्डयात्रालग्ने, सलिलमोक्षविशारदैः शारदैरिव अम्भोधरैः कालधौतैः शातकौम्भैश्च कुम्भैः स्नात्वा, (३) विरचय्य परमया भक्त्या भगवतो नीललोहितस्य अर्चाम्, उदर्चिषं हुत्वा प्रदक्षिणावर्त्तशिखाकलापम् आयुयुक्षणिं, दत्त्वा द्विजेभ्यो रत्नवन्ति राजतानि जातरूपमयानि च सहस्रशः तिलपात्राणि,

(२) दण्डयात्रालग्ने—दण्डः,—सैन्यं, चतुरङ्गं बलमिति भावः, ("दण्डोऽस्त्री लगुडे पुमान्। सैन्ये कालि मानभेदे……" इति मेदिनी) तस्य यात्रा—प्रयाणं, तस्याः ; यद्वा,—दण्डाय—युद्धाय, तुरीयोपायभूतायेत्यर्थः, यात्रा—प्रयाणं, तस्याः लग्नम्—अनुकूलराश्युदयः, शुभक्षण इत्यर्थः तस्मिन्, दत्ते—निर्दिष्टे। सलिलेति।—सलिलस्य—जलस्य, मोक्षे—निःसारणे, उद्गिरणे इत्यर्थः, विशारदाः,—पटवः तैः ; सुखेनिःसार्यजलैरिति यावत्, प्रशस्तमुखैरिति भावः ; अन्यच,—सलिलानां मोक्षेण—वर्षासु वर्षणेन, विशारदाः,—शुभाः तैः, शारदैः,—शरत्कालिकैरिव, अम्भोधरैः,—जलधरैः, मेघैश्च, कालधौतैः,—राजतैः, ("कलधौतं रौप्यहेम्नोः" इत्यमरः) ; अन्यच,—कालेन—वर्षाऽपगमेन, धौताः,—निर्हृताः श्वेता वा तैः, शातकौम्भैः,—काञ्चनैः, काञ्चनमयैरित्यर्थः, ("स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम्। तपनीयं शातकुम्भम्" इत्यमरः)। अम्भोधरैः सह कुम्भानामवैधर्म्यसाम्योक्तेः, श्लेषानुप्राणितोपमाऽलङ्कारः।

(३) विरचय्य—विधाय। नीललोहितस्य—नीलः कण्ठे, लोहितः जटायां तस्य, हरस्येत्यर्थः, ["वर्णो वर्णेन" (२।१।६९ पा०) इति समासः। "धूर्जटिर्नीललोहितः। हरः स्मरहरः…" इत्यमरः)। अर्चां—पूजाम्। उदर्चिषम्—उद्गतशिखम्। प्रदक्षिणेति।—प्रदक्षिणम्—दक्षिणभागमनुसृत्येत्यर्थः, आवर्त्तते—उद्गच्छति यः तथाविधः ; दक्षिणावर्त्तवह्नेः शुभसूचकत्वादिति भावः ; शिखाकलापः,—ज्वालासमूहः यस्य तथाभूतम्, आयुयुक्षणिम्—अग्निम्, ("अग्निर्वैश्वानरो वह्निः……शिखावानायुयुक्षणिः" इत्यमरः)। हुत्वा—तर्पयित्वा, पावके हविःप्रक्षिप्येति भावः। द्विजेभ्यः,—ब्राह्मणेभ्यः। रत्नवन्ति—रत्नभूयिष्ठानि। राजतानि—रौप्यमयानि। जातरूपमयानि—स्वर्णमयानि, ("स्वर्णं सुवर्णं……। चामीकरं जातरूपम्……॥" इत्यमरः)। सहस्रशः,—बहुशः, अनेकसङ्ख्याकानीति यावत्, ["सङ्ख्यैकवचनाच्च वीप्सायाम्" (५।४।४३ पा०) इति शस्]। तिलपात्राणि—तिलपूर्णानि भाजनानि।

(४) कनकपत्रलताऽलङ्कृतशफशृङ्गशिखरा गाश्च अर्व्वुदशः, समुपविश्य विततव्याघ्रचर्म्मणि भद्रासने, (५) विलिप्य प्रथमविलिप्तायुधो निजयशोधवलेन आ चरणतः चन्दनेन शरीरं, परिधाय राजहंसमिथुनलक्ष्मणी महति दुकूले, (६) परमेश्वरचिह्नभूतां शशिकलाम् इव कल्पयित्वा सितकुसुममुण्डमालिकां शिरसि, नीत्वा कर्णाभरणमरकतमयूखमिव कर्णगोचरतां गोरोचनाच्छुरितम् अभिनवं दूर्व्वापल्लवं, विन्यस्य सह

(४) कनकेति।—कनकपत्रलताभिः,—सुवर्णपत्रभङ्गिभिः, अलङ्कृतानि—मण्डितानि, शफानि—खुराः, शृङ्गशिखराणि—विषाणाग्राणि च यासां तथाभूताः, गाः,—धेनूः, अर्व्वुदशः,—दशकोटिशः, बहुसङ्ख्याका इत्यर्थः। विततेति।—विततं—विस्तृतं, व्याघ्रचर्म्म—शार्दूलत्वक् यस्मिन् तथोक्ते, भद्रासने—नृपासने, हैमसिंहासने इति यावत्, ("नृपासनं यत्तद्भद्रासनं सिंहासनन्तु तत्। हैमम्" इत्यमरः) राज्ञां व्याघ्रचर्म्मासनस्य चक्रवर्त्तिसार्व्वभौमत्वज्ञापकत्वादिति भावः।

(५) प्रथमेति।—प्रथमम्—अग्रे एव इत्यर्थः, विलिप्तानि—अनुरञ्जितानि, आयुधानि—कोदण्डगदाशक्तिचन्द्रहासादीनि येन तथाभूतः। निजयशोधवलेन—निजेन—स्वकीयेन, यशसा—कीर्त्त्या, धवलं—समधिकं श्वेतं तेन। आ चरणतः,—चरणपर्य्यन्तम्। शरीरं—देहं, चन्दनेन—श्रीखण्डेन, श्वेतचन्दनेनेति यावत्, विलिप्य—उपलिप्य। राज्ञेति।—राजहंसमिथुनं—रक्तचञ्चुचरण-श्वेतवर्णहंसविशेषदम्पतीत्यर्थः, ("राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः" इत्यमरः) लक्ष्म—चिह्नं ययोः तथाभूते, ("चिह्नं लक्ष्म च लक्षणम्" इत्यमरः) महति—अनुरूपे, राजयोग्ये इत्यर्थः, दुकूले—वसने, उत्तरीयाधोऽंशुके इत्यर्थः, परिधाय—परिधित्य; यथोपयुक्ताचारेण इत्याशयः।

(६) परमेश्वरचिह्नभूतां—परमेश्वरस्य—महाराजस्य, हरस्य च, चिह्नभूतां—लक्षणरूपां, सार्व्वभौमलक्षणां, अरहरप्रसादीकृताञ्च इत्यर्थः; नैष्ठिकोपासकैः इष्टदेवसमर्पणसम्भारैः माल्यवसनभूषणादयः नैव स्वीक्रियन्ते इति भावः। कल्पयित्वा—कृत्वा। सितकुसुममुण्डमालिकां—श्वेतपुष्पहारविशेषम्। कर्णाभरणमरकतमयूखमिव—श्रवणभूषणहरिन्मणिकिरणमिव। गोरोचनाच्छुरितं—गोरोचनया—माङ्गल्यद्रव्यविशेषेण, कुरितं—प्रलिप्तम्। अभिनवम्—अम्लानं, हरिद्वर्णमिति यावत्, दूर्व्वा-

(७) प्रासनवलयेन गमनमङ्गलप्रतिसरं प्रकोष्ठे, (८) परिपूजितप्रहृष्टपुरोहितकरप्रकीर्य्यमाणशान्तिसलिलशीकरनिकराभ्युक्षितशिरा: सम्प्रेष्य (९) महार्हाणि वाहनानि, बहुलरत्नालोकलिप्तककुभि च भूषणानि (१०) भुभुजां संविभज्य, (११) क्लिष्टकार्पटिककुलपुत्रलोकमोचितै: प्रसाददानैश्च विमुच्य

पल्लवं—शतपत्रिकाकिशलयं, कोमलदूर्वाटक्लमित्यर्थ:; दूर्वाश्च पल्लवानि च तत्समुदायम् इति वा, ["विभाषा—" (२।४।१२ पा०) इत्यादौ "फलसंभावनव्यतिसर्गप्रकीर्णचुटज्जलधान्यतृणानां बहुपक्षतिरेव इन्द्र एकवद्भवति वाच्यम्" (वा०) इति बहुवचनात्समाहारेऽपि एकवद्भाव:] कर्णगोचरतां—श्रुतिविषयतां, कर्णदेशमित्यर्थ:, नीत्वा—प्रापय्य, कर्णे कृत्वा इत्यर्थ:।

(७) प्रासनवलयेन—मृदाकटकेन, "मोदर" इति बङ्गभाषया प्रसिद्धेन, राजकीयलक्षादीनामुपरि कङ्कणाङ्कितेन, राजानुमोदनज्ञापकचिह्नविशेषयुक्तेन करभूषणेनेति यावत्, गमनमङ्गलप्रतिसरं—यात्रिकशुभसूत्रमूर्वं, विदिषां विजयाय युद्धयात्राया: साफल्यार्थं करधार्यं मन्त्रपूतं सूत्रविशेषमित्यर्थ:, ("दक्षसूत्रे प्रतिसरो-ऽस्त्रियाम्" इत्यमर:)। प्रकोष्ठ—कूर्परमणिबन्धयो: अन्तरे।

(८) परिपूजितेति।—परिपूजितेन—समर्चितेन, अत एव प्रहृष्टेन—प्रीतेन, पुरोहितेन—पुरोधसा, करेण—हस्तेन, प्रकीर्य्यमाणानां—विक्षिप्यमाणानां, शान्तिसलिलानां—शान्त्युदकानां, शीकरनिकरै:,—कणसमूहै:, अभ्युक्षितं—सिक्तं, शिर:,—मस्तकं यस्य तथाभूत:। पूजाप्रीतपुरोहितशान्तिनीराभिषेकात् अन्तरायाः शरीरच्छायामपि न स्पृष्टमर्हन्ति इति विवेक:।

(९) महार्हाणि—महामूल्यानि, वाहनानि—हस्त्यादीनि। बहुलेति।—बहुलानां—प्रभूतानां, रत्नानां—मणीनाम्, आलोकेन—प्रभया, लिप्ता:,—रञ्जिता:, ककुभ:,—दिश: यै: तानि, भूषणानि—अलङ्कारान्।

(१०) भुभुजां—राज्ञां, स्वपक्षाश्रितसामन्तानामिति भाव:; संविभज्य—समविभागेन दत्त्वा इत्यर्थ:; दानरूपविनीतोपायप्रयोगेण मित्रराजानां वशीकरणायेति भाव:। एतेनास्य नीतिकुशलता प्रदर्शिता।

(११) क्लिष्टेति।—क्लिष्टकार्पटिका:,—जीर्णमलिनवसना:, अतीव दरिद्रा: इत्यर्थ:, ये कुलपुत्रलोका:,—सत्कुलजातजना:, सत्प्रावाणीत्यर्थ:, तेषु मोचितै:,—विनियुक्तै:, दारिद्र्यक्लेशविघटनपटीयोभि: इति भाव:; प्रसाददानै:,—अनुग्रह-

बन्धनानि, नियुज्य तत्कालस्मरणस्फरणेन कथितात्मानमिव च अष्टादशद्वीपजेतव्याधिकारे दक्षिणं भुजस्तम्भम्, अहमहमिकया सेवकैः इव सुनिमित्तैः अपि समग्रैः अग्रतो भवद्भिः, (१२) प्रमुदितप्रजाजन्यमानजयशब्दकोलाहलो हिरण्यगर्भ इव ब्रह्माण्डात् कृतयुगकरणाय भवनात् निर्जगाम।

(१३) नातिदूरे च नगरात् उपसरस्वति निर्मिते महति तृणमये, समुत्तम्भिततुङ्गतोरणे, वेदीविनिहितपल्लवललामहेम-

---

वितरणैः। बन्धनानि—दारिद्र्यनिगडमन्दानानि, अस्निग्धाभावयन्त्रणाबहुलानि बन्धनवत् पीडाकराणि दारिद्र्यदुःखानि वा इति भावः; विमुच्य—अपाकृत्येत्यर्थः, कुलपुत्रीकानामिति भावः। तत्कालस्मरणस्फरणेन—तत्कालस्य—तात्कालिकदुःखस्य, भाद्रपरिभवरूपस्य इति भावः; स्मरणेन—मनसि उदयेन, यत्स्फुरणं—वाङ्मीः स्पन्दनम्, उद्दीपनमिति भावः; तेन, कथितः,—निवेदितः, आत्मा—स्वरूपं यस्य तथाभूतमिव; निवेदितप्रतिहिंसाभिप्रायमिव इति भावः। अष्टादशेति।—अष्टादशानाम्—अष्टादशसङ्ख्यकानां, द्वीपानां—जम्बूप्लक्षादीनां, जेतव्यानां—विजेतुमर्हाणां, यः अधिकारः,—आवश्यकरणं, सेनापत्यमिति यावत्, तस्मिन्; पुंसां दक्षिणभुजस्पन्दनस्य शुभसूचकत्वादिति भावः। अहमहमिकया—अहमग्रे अहमग्रे इत्येवं स्पर्द्धया, ("अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कारः" इत्यमरः)। सुनिमित्तैः,—शुभसूचकैः लक्षणैः। अग्रतो भवद्भिः,—पुरतो गच्छद्भिः; तस्य गमनकाले बहूनि सुलक्षणानि प्रादुरासन् इति भावः।

(१२) प्रमुदितेति।—प्रमुदिताभिः,—प्रहृष्टाभिः, प्रजाभिः,—प्रकृतिवर्गैः, जन्यमानः,—क्रियमाणः, जयशब्दकोलाहलः,—जय जयेति कलरवः यस्य तथाभूतः, हिरण्यगर्भ इव—ब्रह्मा इव। ब्रह्माण्डात्—हैमाण्डात्, कृतयुगकरणाय—सत्ययुगस्थापनाय; कृतस्य—आचरितस्य, अवज्ञनितस्य भाद्रपदीयस्य इति भावः, युगकरणाय—प्रतीकाराय इत्यर्थः; दुर्जनान् समूलं विनाश्य कृतयुगवत् सुजनानां स्थापनाय इत्यर्थो वा। इह हिरण्यगर्भहैमयोः सादृश्यावधीधादुपमा, ब्रह्माण्डेन सह भवनस्याभेदारोपाच्च रूपकमिति सङ्करः।

(१३) उपसरस्वति—सरस्वत्याः समीपे [इत्यव्ययीभावः]। तृणमये—तृणरचिते। समिति।—समुत्तम्भितः,—समुत्थापितः, [उत्पूर्वकस्तम्भेः कर्मणि

कलशे, (१४) बद्धवनमालादाम्नि, धवलध्वजमालिनि, भ्रमच्छुक्लवाससि, पठद्विजन्मनि, मन्दिरे प्रस्थानम् अकरोत्। तत्रस्थस्य च अस्य (१५) ग्रामाक्षपटलिकः सकलकरणिपरिकरः

सकारलोपः] तुङ्गः,—उन्नतः, तीरणः,—बहिर्द्वारं यस्य तथाभूते। वेदीति।—वेद्यां—परिष्कृतभूमौ, विनिहितः,—स्थापितः, पल्लव एव—नवकिसलय एव, आम्रादीनामिति भावः, ललामं—चिह्नं, माङ्गल्यबोधकमिति भावः; यद्वा,—ललामं—भूषणं यस्य तथाभूतस्य, पल्लवभूषितस्येत्यर्थः, ("ललामं लाञ्छने ध्वजे। श्रेष्ठे प्रधाने भूषायाम्" इति मेदिनी) हेमकलसः,—स्वर्णकुम्भः, मङ्गलघट इति भावः, यस्मिन् तथोक्ते।

(१४) बद्धेति।—बद्धं—विरचितं, वनमालादाम—वनपुष्पमालाप्रसरः, वनमालालक्षणं तथा हि,—"आजानुलम्बिनीमाला सर्व्वर्तुकुसुमोज्ज्वला। मध्यस्थूलदलाढ्या च वनमालेति कीर्त्तिता॥" इति पुष्पपल्लवप्रतियोजितं माल्यं वा यस्मिन् तथोक्ते। धवलध्वजानां—शुक्लपताकानां, माला—श्रेणिः अस्ति अस्मिन्निति तथाभूते। भ्रमदिति।—भ्रमन्ति—इतस्ततः नीयमानानि, वायुनेति भावः; शुक्लानि—शुभ्राणि, वासांसि—पताकानां वस्त्राणि; द्वारादौ आवरणभूतानि वेति भावः; यद्वा,—भ्रमन्तः,—इतस्ततः सञ्चरन्तः, शुक्लवाससः,—शुभ्रवसनपरिधायिनः परिचारकजनाः यस्मिन् तथोक्ते। पठदिति।—पठन्तः,—अधीयानाः, सतारं वेदान् धर्म्मशास्त्राणि वा समुच्चारयन्त इति भावः; द्विजन्मानः,—ब्राह्मणा यस्मिन् तथोक्ते। प्रस्थानं—स्थितिमित्यर्थः।

(१५) ग्रामाक्षपटलिकः,—अक्षाणां—भूतानां, पटली—समूहे, नियुक्तः अक्षपटलिकः, ग्रामस्य अक्षपटलिकः ग्रामाक्षपटलिकः; ग्रामवासी वेतालसाधकः, तान्त्रिकविधानवेत्ता वा इति भावः; यद्वा,—अक्षाणां—व्यवहाराणां, विवादानामित्यर्थः; अक्षाणां—द्यूताङ्गानां, द्यूतसाधनपाशकादीनामित्यर्थो वा, ("अक्षोऽक्षिन्द्रिये। ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे" इत्यमरः) पटलीं नियुक्तः अक्षपटलिकः, ग्रामस्य अक्षपटलिकः, ग्राम्यव्यवहारदर्शक इत्यर्थः, ग्रामीणानां विवादमीमांसायां राजनियुक्तः अधिकरणिकविशेष इति यावत्; ग्राम्यद्यूतकराध्यक्षो वा। सकलकरणिपरिकरः,—सर्व्वप्रकारलेख्यरचनानिपुण इति यावत्, ["करणिः,—कायस्थः" इति क्वचित्। तथात्वे सर्व्वकायस्थपरिवृत इत्यर्थः]।

"करोतु देवो (१६) दिवसग्रहणम् अद्यैव अवन्त्यशासनः शासनानाम्" इति अभिधाय (१७) वृषाङ्काम् अभिनवघटितां हाटकमयीं मुद्राम् उपनिन्ये, जग्राह च तां राजा। समुपस्थापिते च प्रथमत एव मृत्पिण्डे परिभ्रश्य करकमलात् अधोमुखो महीतले पपात मुद्रा। (१८) मन्दाश्यानपङ्कपटले मृदुमृदि सरस्वतीतीरे स्फुटं व्यराजन्त राजयो वर्णानाम्। अमङ्गलाशङ्किनि च (१९) विषीदति परिजने नरपतिः अकरोत् मनसि एतत्,—"अतत्त्वदर्शिन्यो हि भवन्ति अविदग्धानां

(१६) अवन्त्यशासनः,—अप्रतिहताज्ञः। शासनानां—राज्यपालनानामिति यावत्, दिवसग्रहणं—सामयिकसङ्ख्यानिरूपणम् इत्यर्थः; अद्यप्रभृति भवान् प्रजाशासनाधिकारे नियुक्त इत्येवं निश्चयार्थं भवन्नामाङ्कितमुद्रायाग्रहणमिति भावः।

(१७) वृषाङ्कां—धर्मचिह्नाम्। अभिनवघटितां—नवरचितां, हाटकमयीं—काञ्चनमयीं, मुद्रां—वर्णावलिखचितकाञ्चनपट्टकविशेषम्, उपनिन्ये—अर्पयामास, करकमलात्—पाणिपद्मात्, हर्षस्थैर्यात् इति भावः; प्रथमतः,—आदौ एव, समुपस्थापिते—समानीते, कैनचिदिति भावः; मृत्पिण्डे—मृत्तिकागोलके, परिभ्रश्य—निपत्य, अधोमुखी—स्वयं राजशासनाङ्कनायावनतपूर्वभागा इत्यर्थः।

(१८) मन्देति।—मन्दाश्यानम्—ईषच्छुष्कं, पङ्कपटलं—कर्दमचयः यस्मिन् तथोक्ते, अत एव मृदुमृदि—मृदौ—कोमला, मृत्—मृत्तिका यस्मिन् तथाभूते, सरस्वतीतीरे—तदाख्यनदीतटे। स्फुटं—स्पष्टम्। वर्णानां—मुद्राऽक्षराणाम्। राजयः,—श्रेणयः। व्यराजन्त—बभासिरे। मुद्राऽक्षरपङ्क्तयः सरस्वतीतीरकोमलमृत्तिकायामङ्किता अभवन्निति निष्कर्षः। एतेन समुद्रमुद्रितनिखिलवसुधया स्वयमादरादाज्ञाशासनमुद्रायाग्रहणं कृतमिति द्योतितं, तच्च विशेषदैवप्रसादपरिचायकम् इति निगूढाशयः।

(१९) विषीदति—विषण्णोभवति; प्रेम पश्यति भयान्यपदेऽपीति भावः। अतत्त्वदर्शिन्यः,—अयाथार्थ्यप्रविष्टाः, अदीर्घदर्शिन्य इति यावत्, कुसंस्काराच्छन्ना इति भावः। ["अतत्त्वदर्शिन्यः" इत्यत्र "तत्त्वदर्शिन्यः" इति पाठे,—स्थूलदर्शिन्यः, स्थूलदर्शिन्य इति यावत्, उपस्थितदर्शिन्यः अन्तःपश्यैवेक्षणशक्त्यभावात् इति भावः]। अविदग्धानाम्—अज्ञानाम्।

धियः। तथा हि (२०) एकशासनमुद्राङ्का भूर्भवतो भविष्यतीति निवेदितमपि निमित्तेन अन्यथा गच्छन्ति ग्राम्याः" इति (२१) अभिनन्द्य मनसा महाऽनिमित्तं तत् सीरसहस्रसम्मितसीम्नां ग्रामाणां शतमदात् द्विजेभ्यः, निनाय च तत्र तं दिवसम्। प्रतिपन्नायां शर्वर्यां सम्मानितसर्वराजलोकः सुष्वाप। (२२) अथ गलति तृतीये यामे सुप्तसमस्तसत्त्वनिःशब्दे दिक्कुञ्जरहंहणगम्भीरध्वनिः अताडयत प्रयाणपटहः।

(२०) एकेति।—एका—अद्वितीया एव, शासनमुद्रा—राजनामाङ्कितः आज्ञासूचकः पट्टविशेष इति यावत्, अङ्कः,—चिह्नं, अङ्के—क्रोडे वा यस्याः तथाभूता, एकच्छत्रा इति भावः। भूः,—पृथिवी। निमित्तेन—शकुनेन, लक्षणेन इत्यर्थः, अधोमुखेन पतनादङ्गनरूपेण शुभचिह्नेनेति भावः, ("निमित्तं हेतुलक्षणोः" इत्यमरः); निवेदितमपि—कथितमपि। अन्यथा—अनिमित्तमित्यर्थः। ग्राम्याः,—अविदग्धा इत्यर्थः।

(२१) तत्—पूर्वोक्तम्, अधोमुखेन पतनरूपमित्यर्थः; महाऽनिमित्तं—ग्राम्यैः महादुर्लक्षणतया अवधारितमिति यावत्, अभिनन्द्य—प्रशस्य; वस्तुतस्तु तस्य सुनिमित्तरूपतया इति भावः। सीरेति।—सीराणां—हलानां, लाङ्गलानामित्यर्थः, ["युस्यञ्जिसीमानां दीर्घश्च" (उ० २ पा० २५ सू०) इति क्रन्] सहस्रेण—दशशतसङ्ख्यया, सहस्रलाङ्गलेनेत्यर्थः, सम्मिताः,—परिच्छिन्नाः, परिमिता इत्यर्थः; सीमानः,—मर्यादा येषां तथाभूतानां, सहस्रसङ्ख्यकहलवाह्यमानपर्यन्तानामिति यावत्। निनाय—अतिवाहयामास। प्रतिपन्नायाम्—उपस्थितायाम्। शर्वर्यां—रात्रौ। सम्मानितेति।—सम्मानितः,—समादृतः, सर्वे राजलोकाः,—नृपजनाः येन तथोक्तः, प्रियभाषणादिना सन्तोषितराजलोक इत्यर्थः। सुष्वाप—निद्रौ, निःसंशयत्वादित्याशयः; युद्धयानस्यापि आखेटकाभिसरणस्येव महाशक्तिशालिनोऽस्य प्रमोदविषयत्वादिति भावः।

(२२) गलति—अतिक्रामति। तृतीये यामे—तृतीयप्रहरे। सुप्तेति।—सुप्तैः,—निद्रितैः, समस्तैः,—समग्रैः, सत्त्वैः,—प्राणिभिः इत्यर्थः, निःशब्दे—नीरवे। दिक्कुञ्जरेति।—दिक्कुञ्जराणां—दिग्गजानां, हंहणवत्—हंहितमिव इत्यर्थः, गम्भीरः,—गम्भीरः, ["गभीरगम्भीरौ" (उ० ४ पा० ३५ सू०) इतीरन्, गमेर्भः पक्षे नुम् च]

(२३) अथतः स्थित्वा च मुहूर्त्तमिव पुनः प्रयाणक्रोशसंख्यापकाः स्पष्टम् अष्टौ अदीयन्त प्रहाराः पटहे पटीयांसः।

(२४) ततो रटत्पटहे, नन्दन्नान्दीके, गुञ्जत्कुञ्जे, कूजत्काहले, शब्दायमानशङ्खे, (२५) क्रमोपचीयमानकटककल-

ध्वनिः,—निनादः यस्य तथाभूतः, ["दिकुञ्जरहृंहणगम्भीरध्वनिः" इत्यत्र "दिकुञ्जरजृम्भमाणगम्भीरध्वनिः" इति पाठे,—दिकुञ्जराणां जृम्भमाणः,—प्रवर्द्धमान इत्यर्थः, गम्भीरध्वनिरिव ध्वनिः यस्य तथाभूतः]। प्रयाणपटहः,—युद्धयात्राकालिकवाद्यभेद इत्यर्थः। अताडयत—अवाद्यत इत्यर्थः, पाटहिकैरिति शेषः।

(२३) अथतः,—अथे, अनन्तरमिति भावः। स्थित्वा—विरम्येत्यर्थः। मुहूर्त्तमिव—मुहूर्त्तमात्रमित्यर्थः। इव शब्दोऽत्र अवधारणे। प्रयाणेति।—प्रयाणस्य—यात्रायाः, क्रोशाः,—"चतुर्विंशत्यङ्गुलिभिर्हस्तं तत्त्वविदो विदुः। सहस्रैरष्टभिः ख्यातं हस्तैः क्रोशनामकम्॥" इत्युक्तलक्षणा अष्टसहस्रहस्तमिताः अध्वान इत्यर्थः; केचित्तु सहस्रहस्तमाना इत्याहुः, तेषां सङ्ख्यापकाः,—अद्य अष्टौ क्रोशा गन्तव्या इत्येव सङ्ख्यासंख्यापकाः। पटीयांसः,—अतिपटवः, ["द्विवचनविभज्योपपदे—" (५।३।५७ पा०) इत्यादिना ईयसुन्]। प्रहाराः,—ताडनानि।

(२४) "ततः" इत्यादौ "प्रयाणसमये·····राजभिः आपूपुरे राजद्वारम्" इत्यत्रेणान्वयः। प्रयाणसमये इति विशिनष्टि, रटत्पटहे इत्यादि।—रटन्तः,—ध्वनन्तः, पटहाः,—आणकाख्यवाद्यविशेषाः यस्मिन् तथोक्ते। नन्दन्नान्दीके—नन्दन्त्यः,—राजलोकान् उत्साहयन्त्य इति यावत्, नान्द्यः,—भेरीसदृशमाङ्गल्यवाद्यभेदाः, आशीर्वचनसंयुक्ताः स्तुतयो वा,—"आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति कीर्त्यते॥" इति लक्षणात्, ताः यस्मिन् तथोक्ते। गुञ्जत्कुञ्जे—गुञ्जन्तः,—ध्वनन्तः, कुञ्जाः,—शङ्खभेदाः, ते तु "मन्त्राः" इति नाम्ना प्रसिद्धाः, पृष्ठे च तेषां जतु परिकलितं भवतीति विज्ञानम्, ते यस्मिन् तथोक्ते। कूजत्काहले—कूजन्त्यः,—ध्वनन्त्यः, काहलाः,—वाद्यभेदा यस्मिन् तादृशे, ("काहला वाद्यभाण्डस्य भेदे चाप्सरसां भिदि" इति मेदिनी)। शब्दायमानशङ्खे—शब्दायमानाः,—ध्वनन्तः, शङ्खाः,—कम्बवः, "मुखशङ्खाः" इति प्रसिद्धाः यस्मिन् तथोक्ते। शङ्खनादानां सुभटहृदयोल्लासकत्वात् माङ्गलिकत्वाच्च युद्धकाव्यादौ विशेषव्यवहारः सदातनः इति शेयम्।

(२५) क्रमेति।—क्रमेण—शनैःशनैरिति यावत्, उपचीयमानः,—वृद्धिं

कले, परिजनोत्थापनव्यापृतव्यवहारिणि, (२६) द्रुतद्रुघण-घातघट्यमानकोणिकाकीलकोलाहलकलितककुभि, (२७) बलाधिकृतबध्यमानपाटीपतिपेटके, जनज्वलितोल्कामहस्रा-लोकलुप्यमानत्रियामातमसि,(२८) यामचेटीचरणचलनोत्थाप्य-मानकामिमिथुने, (२९) कटूककटूकनिर्दशनश्वभ्रिद्रोम्निष-

---

गच्छत्, कटकानां—सैनिकानामिति यावत्, कलकलः,—कोलाहलः यस्मिन् तथोक्ते। परिजनेति।—परिजनानां—पार्श्वचराणां, निर्दिष्टानाम इति भावः, उत्थापने—प्रबोधने, व्यापृताः,—प्रवृत्ताः, व्यवहारिणः,—कर्मचारिणः यत्र तथाभूते।

(२६) द्रुतेति।—द्रुतं—सत्वरं, द्रुघणस्य—मुद्गरस्य इति प्रसिद्धस्य, घातेन—ताडनेन, घट्यमाना—आहन्यमाना, या कोणिका—ताडनयष्टिविशेषः, तस्याः कीलस्य—अयोभागस्य, कोलाहलेन—निनादेन, कलिताः,—पूरिताः, ककुभः,—दिशो यत्र तथोक्ते; यद्वा,—द्रुतं द्रुघणस्य—मुद्गरस्य, ("द्रुघणो मुद्गरेऽपि स्यात्" इति मेदिनी) घातेन—ताडनेन, घट्यमानाः,—चाल्यमानाः, ये कोणिकाकीलाः,—कोण एव कोणिका—वाद्यभेदः, वस्त्रगृहैकदेशो वा, ("कोणो वाद्यप्रभेदे स्यात् वीणादीनाञ्च वादने। एकदेशे गृहादीनामग्रौ च त्रिषण्डयपि च॥" इति मेदिनी) तत्र ये कीलाः,—शङ्कवः, चर्मपट्टनिबद्धाः, वस्त्रगृहधारणार्थं तन्त्रनिबद्धा वा, तेषां कोलाहलैः कलिताः ककुभः यत्र तथोक्ते; त्रिप्रमुद्गराघातोत्पाट्यमानाऽनल्पकीलक-कठोरारावः भुवनव्यापी सङ्गरः; एतेन वस्त्रगृहाणाम् आनल्यं द्योतितम् इत्यवगन्तव्यम्।

(२७) बलेति।—बलाधिकृतैः,—सैन्याधिकारिभिः, बध्यमानं—ताड्यमानं, पाटीप्रतिपेटकं—प्रतिनियतरक्षकवर्गः, प्रमादीति भावः यत्र तथोक्ते। जनेति।—जनैः,—परिजनैरिति यावत्, ज्वलितानां—प्रज्वालितानाम्, उल्कामहस्राणाम्—शुष्ककमहस्राणां, दीपसमूहानामिति यावत्, आलोकेन—प्रभया, लुप्यमानं—विनाश्यमानं, त्रियामातमः,—रात्रितिमिरं यस्मिन् तथोक्ते।

(२८) यामेति।—यामचेटीभिः,—प्रहरिकादासीभिः, प्रहरिणीभिरित्यर्थः, चरणचलनेन—पदक्षेपनिनादेन इति यावत्, पादस्पर्शेनेत्यर्थो वा, उत्थाप्यमानं—प्रबोध्यमानं, कामिमिथुनं—कामियुगलं यस्मिन् तथोक्ते।

(२९) कटूकेति।—कटूकानां—इक्षिपकनिर्योक्तॄणां, कटूकेन—कर्कशेन, निर्देशेन—आज्ञया, नश्यन्ती—अपगच्छन्ती, या निद्रा—स्वापः, तया उन्निघ्नः,—

निषादिनि, (३०) प्रबुद्धहास्तिकशून्यीक्रियमाणशय्यागृहे, (३१) सुप्तोत्थिताश्वीयविधूयमानसटे, (३२) रटत्कटकमुखरखनित्रखन्यमानत्रौणीपाशे, (३३) समुत्कील्यमानकीलशिञ्जानहिञ्जीरे, (३४) उपनीयमाननिगडतालकलरवोत्तालतुरङ्गतरङ्गमाणखुरपुटे, (३५) लेखिकमुच्यमान-

विकसन्नयना इत्यर्थः, निषादिनः,—हस्तिपकाः यस्मिन् तथोक्ते, ("आधोरणा हस्तिपका हस्त्यारोहा निषादिनः" इत्यमरः)।

(३०) प्रबुद्धेति।—प्रबुद्धैः,—जागरितैः, हास्तिकैः,—गजताभिः, हस्तिसमूहैः इत्यर्थः, ("हास्तिकं गजता हस्ते" इत्यमरः), शून्यीक्रियमाणं—रिक्तीक्रियमाणं, शय्यागृहं—हस्तिशाला इति भावः, यस्मिन् तथोक्ते।

(३१) सुप्तेति।—सुप्तोत्थितैः,—भग्ननिद्रैः, अश्वीयैः,—अश्वसमूहैः, ["कैंशाश्वाभ्यां यञ्छावन्यतरस्याम्" (४।२।४८ पा०) इति छः। "छन्दे लक्ष्वीयमाश्वत्" इत्यमरः]। विधूयमाना—कम्प्यमाना, सटा—जटा यस्मिन् तथोक्ते।

(३२) रटदिति।—रटद्भिः,—शब्दायमानैः, कटकैः,—बलैः, (कर्तृभिः) मुखरेण—अस्पष्टं नदता, खनित्रेण—खननसाधनेन अस्त्रविशेषेण, (करणेन) खन्यमानाः,—विदार्यमाणाः, त्रौणीपाशाः,—भूबन्धनानि, पटमण्डपरचनायां कृतानीति भावः, यत्र तथोक्ते।

(३३) समुत्कील्यमानेति।—समुत्कील्यमानेन—समुत्खन्यमानेन, कीलेन—शङ्कुना, शिञ्जानं—स्वनत्, हिञ्जीरं—लौहशृङ्खलं, गजादिबन्धनसाधनमिति भावः, यस्मिन् तथोक्ते।

(३४) उपनीयमानेति।—उपनीयमानस्य—परिधीयमानस्य, निगडतालस्य—बन्धनार्थं तालपत्रविशेषस्य, कलरवेण—शब्दविशेषेण; यद्वा,—उपनीयमाने निगडे यः तालः,—करास्फालनं, हस्तसञ्चार इत्यर्थः, ("तालः करतलं··· । ··· करास्फाले द्रुमान्तरे" इति मेदिनी) तेन यः कलरवः,—झणझणाध्वनिविशेषः तेन, ["निगडताल: लौह एवाश्वबन्धनविशेषः" इत्यन्ये] उत्तालम्—उत्कटं यथा तथा, तुरङ्गैः,—अश्वैः, ["गमेः सुपि वाच्यः" (वा०) इति खच्, मुम च, "खञ्च डिद्वा वाच्यः" (वा०) इति वैकल्पिकं डित्त्वम्] तरङ्गमाणाः,—कुटिलीक्रियमाणाः, खुरपुटाः,—शफसमूहाः यस्मिन् तथोक्ते।

(३५) लेखिकेति।—लेखिकैः,—घासिकैः, हस्तिभ्यो घासदायिभिः इति

मदस्यन्दिदन्तिसन्तान-शृङ्खलाखनखन-निनादनिर्भर-भरितदश-दिशि, (३६) घासपूलकप्रहारप्रमृष्टपांशुलकरिपृष्ठप्रमार्ज्य-माणप्रस्फोटितचर्म्मणि, (३७) गृहचिन्तकचेटकसंवेष्ट्यमान-पटकुटीकाष्ठपटमण्डपपरिवस्त्रावितानके, (३८) कील-कलापापूर्य्यमाणचिपिटचर्म्मपुटे, (३९) मञ्चाण्डायमान-भाण्डागारिणि, भाण्डागारवहनवाह्यमानबहुबलीवार्द्धिके,

---

भावः ; मृज्यमानाः,—परिक्रियमाणाः, मदस्यन्दिनां—दानजलस्राविणां, दन्तिनां—गजानां, यै सन्तानशृङ्खलाः,—बन्धनशृङ्खलाः, तेषाम. आ—सम्यक्, खनखननिनादेन—खनखन इति शब्दविशेषेण, निर्भरम—अत्यन्तं यथा तथा. भरिताः,—पूरिताः, दश दिशः,—दशसङ्ख्काः ककुभः यस्मिन् तथोक्ते ।

(३६) घासेति ।—घासपूलकस्य—यवसमूलवकस्य, प्रहारेण—ताडनेन, मार्ज्जनेनेति यावत्, प्रमृष्टं—परिष्कृतं, पांशुलं—रजोबहुलं, स्वेनैव विकीर्णत्वादिति भावः, यत् करिपृष्ठं—हस्तिपृष्ठ, तत्र प्रमार्ज्यमाणम—भासनार्थं विस्रार्ज्यमाणं, प्रस्फोटितं—प्रमृष्टं. ताडितं वा, धूल्यादापनयनार्थमिति भावः, ("प्रस्फोटनन्तु सूर्पे स्यात् ताडने च विकाशने" इति मेदिनी) चर्म्म—अजिनं यस्मिन तथोक्ते ।

(३७) गृहेति ।—गृहाणां—भवनानां, सैनिकावासाग्निविराटीनामित्यर्थः, चिन्तकाः,—कार्य्येदर्शिन इत्यर्थः, ये चेटकाः,—भृत्याः, तैः संवेष्ट्यमानाः,—परि-क्रियमाणाः, सङ्कुच्यमाना इत्यर्थो वा, पटकुट्यः,—पटैः,—वस्त्रैः, कुट्यः,—मृण्मयगृह-भेदाः, स्कन्धावारसरणिभेदाः इत्यर्थः, काष्ठपटमण्डपाः—काष्ठपटाः,—काष्ठ इव पटाः,—"कानात्" इति प्रसिद्धाः पटभेदाः, तस्य सङ्कोचनेन हस्वकाष्ठरूपता लम्बरूपता वा आयते इयत: काष्ठपट इति संज्ञा, तद्रचितमण्डपाः—गृहाः, परिवस्त्राः,—अवलिकाः, वितानकाः,—उल्लोचाः, चन्द्रातपभेदाः इति यावत्, ("अस्त्री वितानमुल्लोचः" इत्यमरः) तत्र तथोक्ते ।

(३८) कीलेति ।—कीलानां—अङ्कानां, कलापैः,—समूहैः, आपूर्य्यमाणाः,—स्थिरमाणाः, पश्चि पुनः स्कन्धावारसंस्थापनार्थमिति भावः ; चिपिटाः,—क्षुद्राः, क्षुद्रा इति यावत्, चर्म्मपुटाः,—चर्म्मनिर्म्मितभाजनविशेषाः यस्मिन् तथोक्ते ।

(३९) मञ्चेति ।—मञ्चाण्डायमानाः,—भाण्डानि सञ्चिन्वन्तः, सङ्ख्या-यावान् एकत्रीकुर्व्वन्त इत्यर्थः, ["आण्डाण्डमाचयने" (वा०) इति णिच्, क्विप्-

(४०) निषादिनिश्चलानेकानेकपारोप्यमाणकोशकलसपीड़ापीड़सङ्कटायमानसामन्तौकसि, (४१) दूरगतदत्तदासेरकक्षिप्रप्रक्षिप्यमाणोपकरणसम्भारभ्रियमाणदुष्टदल्लिनि (४२) तिर्य्यगानमज्जाघनिकरङ्कच्छाकृष्टलम्बमान परतन्त्र-तुन्दिलचुन्दो-

दात्मनेपदं, ततः शानच्] भाण्डागारिणः,—भाण्डपूर्णगृहरक्षका इत्यर्थः, यस्मिन् तथोक्ते। भाण्डेति।—भाण्डागारस्य—"भाण्डार" इति प्रसिद्धस्य सद्रव्यपात्रसमूहावस्थानगृहस्य इत्यर्थः, वहनाय—प्रापणाय, स्थानान्तरनयनाय इत्यर्थः, वाह्यमानाः,—नीयमानाः, बहवः,—अनेके, बल्लीवाड़िकाः,—बल्लीवड़ाः यस्मिन् तथोक्ते। ["बल्लीवाड़िके" इत्यत्र "नाल्लीवाड़िके" इति पाठे,—नाल्लीवाड़िकाः,—करिणां घासगृहणनियुक्ता हस्तिपकविशेषाः, "मेट्" इति प्रसिद्धाः। करिवरसैन्यमहाऽमात्यादिपरिचर्य्यानियतानां राजकीयभाण्डागारवहनतियोगः न तथा सदर्थपरिचायकः इत्येषः पाठः न सम्बाहलः इति ध्येयम्।

(४०) निषादीति।—निषादिभिः,—आरोहिभिः, चतुरहस्तिपकैः वा, तदभावे प्रमादाश्रङ्कापातात् इति भावः; निश्चलेषु—स्थिरेषु, तिष्ठत्सु इत्यर्थः, अनेकेषु—बहुषु, अनेकपेषु—हस्तिषु, ["सुपि स्थः" (३।२।४ पा०) इति सूत्रे सुपीति योगो विभज्यते, तेन सुप्युपपदे आदन्तात्कः इति कप्रत्ययः। "·····हस्ती द्विरदोऽनेकपो द्विपः" इत्यमरः] तत्पृष्ठेषु इति भावः; आरोप्यमाणानां—निधीयमानानां, कोशकलसानां—धनपूर्णकुम्भानां, पीड़ापीड़ेन—सङ्कीर्णतया स्थापनेन इति भावः; सङ्कटायमानानि—सङ्कीर्णानि इति यावत्, सामन्तानां—राज्ञाम्, अध्यासितानामिति भावः; ओकांसि—स्थानानि यत्र तथोक्ते।

(४१) दूरेति।—दूरगतैः,—विप्रकृष्टस्थानस्थैः, अतीव इत्यर्थो वा, दत्तैः,—आरवहनार्थमैः इति यावत्; यद्वा,—दूरगते—दूरगमने, दत्ताः,—अर्पिताः, दासेरकैः,—उष्ट्रैः, क्षिप्र—सङ्केति यावत्, प्रक्षिप्यमाणाः,—भूमौ प्रास्यमानाः, ये उपकरणसम्भाराः,—परिच्छदसमूहाः, तैः भ्रियमाणाः,—पूरितपृष्ठा इति यावत्, दुष्टाः,—लोकानां वहने दीर्घकारिण इत्यर्थः, उत्कटा इति यावत्, दल्लिनः,—गुल्मा यस्मिन् तथोक्ते।

(४२) तिर्य्यगिति।—तिर्य्यक्—कुटिलं यथा तथा, आनमत्—आनतीभवत्, येन कोऽपि न पश्यतीति भावः; जाघनिकः,—जघनस्पर्शी, कामुक इति भावः, ["जाघनिक" इत्यत्र "जाघनि" इति पाठेऽपि स एवार्थः] तेन करेण—हस्तेन,

जनजनितजनहासे, (४३) पीड्यमानशारशारिवरत्राणगुणग्राहितगात्रविहारदृंहदृढदृढदृढुम्मदकरिणि, (४४) करिघटाघटमानघण्टाटङ्कारक्रियमाणकर्णज्वरे, पृष्ठप्रतिष्ठाप्यमानकण्ठालकक्रूदर्थितकूजत्करभे, (४५) अभिजातराजपुत्रप्रेष्यमाण-

क्लेशेन—कष्टेन, आकृष्टा—आलिङ्गितेति भावः, लक्ष्यमाना—अपसरन्तीति भावः; अथ च परतन्त्रा—पराधीना, अपसर्तुमशक्येति यावत्, तुन्दिला—हृदुत्कुक्षिः, स्थूलोदरीत्यर्थः, स्थूलाङ्गी इति भावः, ("तुन्दिलस्तुन्दिकस्तुन्दी हृदुत्कुक्षिः पिचण्डिलः" इत्यमरः) या तुन्दी—कुक्षिनी, सा एव जनः,—लोकः, तेन जनितः,—उत्पादितः, जनानां—लोकानां, तत्रत्यानामिति भावः; हासः,—हास्यं यस्मिन् तथोक्ते, तथाभूतां कुक्षिनीं दृष्ट्वा हसज्जने इत्यर्थः।

(४३) पीड्यमानेति।—पीड्यमाना—जीर्णतादिदोषेण क्षिप्यमानेत्यर्थः, शारा—शबला, चित्रिता इत्यर्थः, ("शारः स्यात् शबले वाच्यलिङ्गः पुंसि सभीरणे" इति मेदिनी) या शारिः,—मञ्जरी, रणहस्तिपर्य्याणमिति यावत्, ("शारिर्नाऽऽशोपकरणे स्त्रियां शकुनिकान्तरे। युद्धार्थगजपर्य्याणे व्यवहारान्तरेऽपि च॥" इति मेदिनी) तस्या वरत्रागुणैः,—कक्ष्यारज्जुभिः, कक्षबन्धनरज्जुभिरित्यर्थः, नद्धीरज्जुभिर्वा, चर्मरज्जुभिरित्यर्थः,("चूषा कक्ष्या वरत्रा स्यात्" "नद्धी बद्धी वरत्रा स्यात्" इति चामरः) ग्राहितानि—संयमितानि, गात्राणि—शरीराणि, तेषां विहारेण—कम्पेन, दृंहलाः,—नदन्तः, बहवः,—अनेके, दृढलाः,—मदालाः, उन्मदाः,—मदमत्ताः, करिणः,—हस्तिनः यत्र तथोक्ते।

(४४) करीति।—करिणां—हस्तिनां, घटासु—घटनासु, श्रेणिषु इत्यर्थः, ("करिणां घटना घटा" इत्यमरः) घटमानानां—संलग्नतीनां, घण्टानां—वाद्यविशेषाणां, टाङ्कारेण—टाङ्कृति निनादेन, क्रियमाणः,—जन्यमानः, कर्णज्वरः,—श्रवणपीडा यस्मिन् तथोक्ते। पृष्ठेति।—पृष्ठेषु—उपरिदेशेषु इत्यर्थः, प्रतिष्ठाप्यमानेन—आरोप्यमाणेन, कण्ठालकेन—ग्रीवाभेदेन, द्रोणीभेदेन वा इत्यर्थः, ["कण्ठाला तु द्रयोर्द्रोणीप्रभेदे ना कमेलके" इति मेदिनी। अल्पार्थे कप्रत्ययः] कदर्थिताः,—क्लेशिताः, अत एव कूजन्तः,—रुवन्तः, भाराऽसहिष्णुतया इति भावः; करभाः,—करिशावका यस्मिन् तथोक्ते।

(४५) अभिजातेति।—अभिजातैः,—कुलीनैः, अनभ्यस्तवाहपरिचालनव्यापारैरिति भावः; राजपुत्रैः,—नृपकुमारैः, प्रेष्यमाणानि—चाल्यमानानि, अत एव

कृप्रयुक्ताकुलकुलीनकुलपुत्रकलत्रवाहने, (४६) गमनवेलाविप्रलब्धवारणाधोरणान्विष्यमाणनवसेवके, (४७) प्रसादवित्तपत्तिलीयमाननरपतिवल्लभवरवाजिनि, (४८) चारुचारभटसैन्यन्यस्यमाननासीरमण्डलाडम्बरस्थूलस्थासके, (४९) स्थानपालपर्य्याणलम्बमानलवणकलापोकिङ्किणीनालीसनाथसङ्कलिततल-

कृप्रयुक्तेन—असङ्कुचसञ्चालनेन, आकुलानां—बन्धूनां, कुलीनानां—सत्कुलजातानां, कुलपुत्रकलत्राणां—कुलीनकुलाङ्गनानां, वाहनानि—यानानि यस्मिन् तथोक्ते। इङ्गारीयोग्यमानवाच्यस्यनिमित्तभावात् "वाहनमाहितात्" (८।४।८ पा०) इति ण त्वत्वम्]।

(४६) गमनवेलेति।—गमनवेलायां—यात्राकाले, विप्रलब्धाः,—प्रतारिताः, अविदितगमनवेला इत्यर्थः, अत एव वारणानां—इभानाम्, आधोरणैः,—निषादिभिः, पालकैरित्यर्थः, ("आधोरणा इभारूढा इभ्यारोहा निषादिनः" इत्यमरः) अन्विष्यमाणाः,—अनुसन्धीयमानाः, नवसेवकाः,—नूतनभृत्या यस्मिन् तथोक्ते; कार्य्यानभिज्ञतया नवभियुक्ताः प्रायः प्रतारिताः स्युः इत्याशयः।

(४७) प्रसादेति।—प्रसादेन—राज्ञानुग्रहेण, वित्ताः,—ख्याताः, ("प्रतीते ग्रथितख्यातवित्तविज्ञातविश्रुताः" इत्यमरः) ये पत्तयः,—पदातिसैन्यानि, तैः लीयमानः,—प्राप्यमाणः, चाल्यमान इत्यर्थः, नरपतेः,—राज्ञः, वल्लभः,—प्रियः, वरः,—श्रेष्ठः, वाजी—अश्वः यस्मिन् तथोक्ते, ["वरवाजिनि" इत्यत्र "वारवाजिनि" इति पाठे,—नरपतेः वल्लभाः, वारवाजिनः,—वारे—अवसरे, अनुग्रहयोग्यकाले इत्यर्थः, प्राप्ताः इति भावः, ("निवहावसरौ वारः" इत्यमरः) वाजिनः यस्मिन् तथोक्ते, राजप्रसादलब्धवाटकाढ्यसैनिके इत्यर्थः]।

(४८) चार्व्विति।—चारुः,—मनोज्ञः, चारः,—गतिर्येषां तथाभूतानि, भटसैन्यानि—योधबलानि, ("भटा योधाश्च योद्धारः" इत्यमरः) तैः न्यस्यमानाः,—निधीयमानाः, नासीरमण्डलाडम्बरस्य—सेनाऽयनादिसैन्यनिवहस्य, स्थूलाः,—महान्त इत्यर्थः, स्थासकाः,—अलङ्करणानि यस्मिन् तथोक्ते; यद्वा,—चारुचारभटसैन्यैः न्यस्यमानाः,—आत्मन एव क्रियमाणाः, नासीरेण—कर्पूरेण, मण्डलाडम्बराय—सैन्यसमूहशोभावर्द्धनाय, स्थूलाः,—महान्तः, दीर्घा इति यावत्, स्थासकाः,—चर्म्मा, तिलकविशेषाः इत्यर्थः, यस्मिन् तथोक्ते, ("चर्म्मा तु चार्म्मिकं स्थासकः" इत्यमरः)।

(४९) स्थानेति।—स्थानपालानाम्—अश्वपालानां, पर्य्याणेषु—पल्ययनेषु,

सारिके, (५०) कुण्डलीकृतावरचिणीजालजटिलवल्लभपालाक्र-
घटानिवेश्यमानशाखामृगे, (५१) परिवर्हकाक्रष्यमाणार्द्रजग्ध-
प्राभातिकयोग्याशनप्रारोहके, (५२) व्याक्रोशीजघ्यमाण-
घासिकघोषे, (५३) गमनसंभ्रमभ्रमदुत्तुङ्गतरुणतुरङ्गमतल्प-

अश्वसज्जायामित्यर्थः, लम्बमाना—दोलायमाना, लवणकलापी—सा च शुनाङ्गनि-र्दोषमयी क्रियते इति, ("लवणकलापी" इत्यत्र "लवणकलायी" इति पाठेऽपि स एवार्थः] किङ्किणी—क्षुद्रघण्टिका, नाली—वैणवी यष्टिः, ताभिः सनाथा—सहिता इत्यर्थः, सङ्कलिता—विरचिता, तलसारिका—ऊर्णादिचित्रसूत्रमयी सुखपट्टिका, "खरःपट्टिका" इति केचित्, यत्र तथोक्ते ; सुखमाविशंघार्थम् अवलम्बनार्थञ्च तुरग-पल्ययने तथाकृतिव्यवहारात् इति भावः।

(५०) कुण्डलीति।—कुण्डलीकृतैः,—वलयितैरित्यर्थः, अवरचिणीजालैः,—बन्धनरज्जुभिरित्यर्थः, जटिलैः,—संयमितैः, ["लोमादि—" (५। २। १०० पा०) इत्यादिना पिच्छादिलादिलच्] वल्लभपालैः,—मुलक्षणाश्वपालकैः, ("वल्लभो दयिते-ऽश्वे सल्लक्षणतुरङ्गमे" इति मेदिनी)। केचित्तु "वलवला येन हृदाकारेण तुरगीप-करणं घासचणकादिकं नीयते स वल्लभपालोऽश्वपालः" इति व्याचख्युः। अश्वघटासु —तुरङ्गबन्धेषु, तत्पृष्ठेष्विति भावः ; निवेश्यमानैः,—आरोप्यमाणैः, शाखामृगैः,—वानरैः यत्र तथोक्ते, ("कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः। मर्कटो वानरः" इत्यमरः) स च अश्वानां रोगादिप्रतिषेधार्थं मन्दुरायां स्थाप्यते इति लोकव्यव-हारः।

(५१) परिवर्हकेति।—परिवर्हकेन—अश्वपालेन, आक्रष्यमाणैः,—आकार्य्य-माण इत्यर्थः, आर्द्रजग्धम्—आर्द्रभक्षितं, प्राभातिकं—प्रभातकालिकं, योग्यम्—उप-युक्तं, भोजनार्हमित्यर्थः, अशनं—भोजनीयं द्रव्यं येन तादृशश्च, प्रारोहकैः,—अश्वा-रोहिसैन्यमित्यर्थः, यस्मिन् तथोक्ते।

(५२) व्याक्रोशीति।—व्याक्रोशीषु—परस्पराह्वानेषु, जघ्यमाणाः,—वर्ज्यमानाः, घासिकानां—घासदायिनां, घोषाः,—निनादा यस्मिन् तथोक्ते ; त्वरितगमनादिस्थाने इति भावः।

(५३) गमनेति।—गमनेषु—यानेषु, यः संभ्रमः,—त्वरा, तेन भ्रमन्तः,—घूर्णन्तः, उत्तुङ्गाः,—उन्नमितमुखाः, तरुणाः,—युवानः, ये तुरङ्गमाः,—अश्वाः,

मानानेकमन्दुराविमर्दे, (५४)सञ्जीक्रतकरेणुकारोहाह्वानसत्वर-सुन्दरीदीयमानमुखालेपने, (५५) चलितमातङ्गतुरङ्गप्रधावित-प्राकृतप्रातिवेश्यकलोकलुण्ठ्यमाननिर्यासशस्यसञ्चये, सञ्चरच्चेल-चक्राक्रान्तचक्रीवति, (५६) चक्रचीत्कारिगन्त्रीगणगृह्यमाण-

---

तैः तत्यमानः,—क्रियमाणः, अनेकानां—बहूनां, मन्दुराणां—वाजिशालानां, ["मन्दिवाशि—" (उ० १ पा० ३९ सू०) इत्यादिना उरच्। "वाजिशाला तु मन्दुरा" इत्यमरः] विमर्दः,—विध्वंसः यत्र तथोक्ते।

(५४) सञ्जीक्रतेति।—सञ्जीक्रतासु—क्रतकल्पनासु, आरोहणार्थम् आस्तरणादिना अलङ्कृतासु इत्यर्थः, ("कल्पना सज्जना सज्जे" इति गजप्रकरणे अमरः), करेणुकासु—क्षुद्रहस्तिनीषु, ("करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे" इति मेदिनी) आरोहाय—आरोहणार्थमित्यर्थः, आह्वाने—आकारणायां, कस्यचित् सामन्तस्येति भावः; यद्वा,—सञ्जीक्रतकरेणुकारोहाह्वानेन—सञ्जीक्रतायाः करेणुकायाः आरोहः,—निषादी, तेन आह्वानम्—उच्चैराकारणं तेन, अलङ्कृतहस्तिनीनिषादितारस्वरेण इत्यर्थः, सत्वरा—त्वरावती, या सुन्दरी—कामिनी, हस्तिपकस्य इति भावः, तया दीयमानं—निधीयमानं, मुखालेपनं—सिन्दूरादिना मुखानुलेपः, करेणुकायै इति भावः; यस्मिन् तथोक्ते।

(५५) चलितेति।—चलितेषु—प्रस्खलितेषु, मातङ्गेषु—हस्तिषु, तुरङ्गेषु—अश्वेषु च, प्रधावितैः,—सत्वरमापतितैः, प्राकृतैः,—साधारणैः, प्रातिवेश्यकलोकैः,—प्रतिवेशिजनगणैः, समीपवासिजनैरित्यर्थः, लुण्ठ्यमानाः,—क्रियमाणाः, निर्यास-शस्यसञ्चयाः,—निः,—निष्टाः, त्यक्ता इत्यर्थः, भुक्तावशिष्टा इति यावत्, घासाः,—यवसाश्च, शस्यानि च—यवगोधूमादीनि च, तेषां सञ्चयाः,—समूहाः यत्र तादृशे। सञ्चरदिति।—सञ्चरन्तः,—इतस्ततो भ्रमन्तः, तथा चेलचक्रेण—वस्त्रसमूहेन, ("चेलं वस्त्रेऽधमे त्रिषु" इत्यमरः) "चेलचक्रेण वालकसङ्घेन" इति कश्चित्, आक्रान्ताः,—आपूरितपृष्ठाः, समारूढपृष्ठा इत्यर्थः, चक्रीवन्तः,—गर्दभा यत्र तथोक्ते, ["आसन्दी-वत्—" (८।२।१२ पा०) इत्यादिना मतुपि निपातनात्सिद्धम्। "चक्रीवन्तस्तु वालेया रासभा गर्दभाः खराः" इत्यमरः। "चक्रीवन्तः,—उष्ट्राः" इति केचित्]।

(५६) चक्रेति।—चक्रैः,—रथाङ्गैः, चीत्कारिभिः,—उच्चैः कूजद्भिः, ये गन्त्री-णाः,—रथभवाश्चक्रकटन्दाः, ("गन्त्री कन्यलिवाश्चक्रम्" इत्यमरः। अत्र कन्यलि-वाश्चक्रं—रथभवचक्रनीयचक्रकटमित्यर्थः) तैः गृह्यमाणानि—आक्रम्यमाणानि, अत

प्रहृतवर्त्मनि, (५७) अकाण्डदीयमानभाण्डभरितानडुहि, (५८) निकटघासलाभलुभ्यल्लम्बमानप्रथमप्रसार्यमाणसारसौरभेयि, (५९) प्रमुखप्रवर्त्तमानमङ्गलामन्त्रमहानसे, पुरःप्रधावद्वृजवाहिनि, (६०) प्रियप्रतोपलभ्यमानसङ्कटकुटीरकान्तरालनिःसरसे, (६१) करिचरणदलित मठिकोत्थितलोकलोष्टा-

---

एव प्रहृतानि—क्षुण्णानि, प्रकटचक्रैश्च सञ्जातक्षतानीत्यर्थः, वर्त्मानि—मार्गाः यस्य तथोक्ते।

(५७) अकाण्डेति।—अकाण्डे—सहसा, दीयमानेन—आरोप्यमाणेन, भाण्डेन—द्रव्यपूर्णपात्रेण, भरितः,—पूरितपृष्ठ इति यावत्, अनड्वान्—वृषः यस्मिन् तथोक्ते, ("अनड्वान् सौरभेयो गौः" इत्यमरः)।

(५८) निकटेति।—निकटे—समीपे, घासस्य—तृणस्य, लाभेन—प्राप्त्या, लुभ्यन्तः,—लोलुपतां गच्छन्तः, लम्बमानाः,—प्रलम्बदेहाः, घासग्रहणेच्छया इति भावः; प्रथमम्—अग्रे, प्रसार्यमाणाः,—प्रक्षाप्यमानाः, सारसौरभेयाः,—बलवद्वृषीवर्दा यस्मिन् तथोक्ते।

(५९) प्रमुखेति।—प्रमुखे—अग्रे, प्रथममेवेत्यर्थः, प्रवर्त्यमानं—प्रक्षाप्यमानम्, आगामिरक्षाधारसन्निवेशस्थानमुद्दिश्येति भावः; मङ्गलामन्त्राणां—मङ्गलवृषतीनां, मङ्गलसं—रक्षणशालां यस्मिन् तथोक्ते, ("रक्षणस्थानु पालस्थानमङ्गलसम्" इत्यमरः)। पुर इति।—पुरः,—अग्रतः, प्रधावन्तः,—प्रचलन्तः, व्रजवाहिनः,—व्रजाकाधारिणः; सैनिकियेका यत्र तथोक्ते।

(६०) प्रियप्रतेति।—प्रियप्रतैः,—चाटुवाक्यसमूहैः, उपलभ्यमानं—प्राप्यमाणं, सङ्कटात्—सङ्कीर्णात्, कुटीरकाणां—क्षुद्रगृहाणाम्, अन्तरालात्—मध्यात्, निःसरसं—सुखं, निर्गमनमार्गं इत्यर्थः, यस्मिन् तथोक्ते; यद्वा,—प्रियप्रतैः,—प्रीतिकरवचनैः, उपलभ्यमानं—प्राप्यमाणं, सङ्कटकुटीरान्तरालात्—सङ्कीर्णक्षुद्रनिकेतनमध्यात् इत्यर्थः, निःसरसं—मोचः, मुक्तिरित्यर्थः, यस्मिन् तथोक्ते, ["सुखं निःसरसम्" "अथ निःसरणं मृत्युपायमोचेषु निर्गमे" इत्यमर-मेदिन्यौ। "प्रियप्रतोपलभ्यमानसङ्कट—" इत्यत्र "प्रियप्रतोपलभ्यमानासङ्कट—" इति पाठे,—आसङ्कटात्—दुःखसङ्कीर्णात् इत्यर्थः]।

(६१) करीति।—करिणां—हस्तिनां, चरणैः,—पादैः, दलितायाः,—

हन्यमानाऽऽधोरण क्रियमाणासन्नसाचिणि, (६२) सङ्घट्टविघट्टमानव्याधकुटीपलायमानक्षुद्रकुटुम्बके, (६३) कलकलीपद्रवद्रवद्रविणबलीवर्दविद्राणवणिजि, (६४) पुरःसरदीपिकाऽऽलोकविरलायमान-लोकोत्पीड़-सुखप्रस्थितान्तःपुर-करिणी-कदम्बके,

---

मर्दितायाः, मठिकायाः,—क्षुद्रगृहात्, उत्थितैः,—उद्भूतैः, लोकैः,—तद्गृहवासिभिः जनैः, लोष्टेन—कठिनमृत्खण्डेन, आहन्यमानैः,—ताड्यमानैः, गृहभङ्गात् इति भावः; आधोरणैः,—हस्तिपकैः, ["करि···लोष्टाहन्यमानाधोरण···" इत्यत्र "करि··· लोष्टहन्यमानमेण्ढ···" इति पाठे,—लोष्टेन—मृत्खण्डेन, हन्यमानैः,—प्रक्षिप्यमाणैः, मेण्ढैः,—"मेढ्" इति प्रसिद्धैः करिणां यवसतरुन्नादिवाहिपरिचारकविशेषैरित्यर्थः। "मेण्ढैः,—जागरिकैः" इति केचित्]। क्रियमाणाः,—विधीयमानाः, आसन्नाः,—समीपस्थाः, लोका इति भावः; साचिणः,—प्रत्यक्षदर्शिनः, राजद्वारे अभियोगार्थमिति भावः, यत्र तथोक्ते।

(६२) सङ्घट्टेति।—सङ्घट्टेन—सङ्घर्षणेन, सैनिकानाम् अश्वगजादिवाहनानां वा इति भावः; विघट्टमाना—विनश्यन्ती, या व्याधकुटी—हरणनिर्मितकुटीभेदः, ['व्याधकुटी" इत्यत्र "व्याघ्रपल्ली" इति पाठेऽपि स एवार्थः] तस्याः पलायमानं—प्रद्रवत्, क्षुद्रकुटुम्बकं—स्वल्पपरिजनः यस्मिन् तथोक्ते।

(६३) कलकलेति।—कलकलीपद्रवेण—कलरवरूपोत्पातेन, द्रवन्ति—पतन्ति, द्रविणानि—धनानि, द्रव्याणि इति यावत्, येभ्यः तथाविधा ये बलीवर्दाः,—वृषाः, तैः विद्राणाः,—पलायमानाः सशोका वा, वणिजः,—व्यवसायिनः यस्मिन् तथोक्ते।

(६४) पुर इति।—पुरःसरैः,—अग्रगैः, दीपिकानाम्—आलोकवर्त्तिकानाम्, आलोकैः,—प्रभाभिरित्यर्थः, विरलायमानेन—स्वल्पीभवता, अपसरतेति भावः; लोकोत्पीड़ेन—जनसम्मर्देन, सुखप्रस्थितानि—अनायासप्रचलितानि, जनसम्मर्दापसरणेन अनिरुद्धमार्गतयेति भावः; ["पुरःसर···लोकोत्पीड़सुखप्रस्थिता—" इत्यत्र "पुरःसर·····लोकोत्पीड़प्रस्थिता—" इति पाठान्तरम्] अन्तःपुराणाम्—अन्तःपुरवासिनीनां नारीणामिति यावत्, करिणीकदम्बकानि—हस्तिनीवृन्दानि, अन्तःपुरिकाणां वाहनभूतानीति यावत्, यस्मिन् तथोक्ते।

(६५) हयारोहाह्वयमानलम्बितशुनि, (६६) सरभसचरण-निपतननिश्चलगमनसुखायमान-खक्खटस्तूयमान-तुङ्गतुङ्गगुणे, (६७) स्खलद्वेसरविसंवादिसीदद्दाक्षिणात्यसादिनि, (६८) रजोध्वस्तजगति प्रयाणसमये, (६९) प्रतिदिशमागच्छद्भिः

(६५) हयेति।—हयारोहैः,—अश्वारोहिभिः, आह्वयमानाः,—आकार्यमाणाः, लम्बिताः,—पश्चात् स्थिताः, शुनः,—कुक्कुरा यस्मिन् तथोक्ते; गुप्तभावेन विपक्षकृतनैशाक्रमणसूचनाय मृगयासाहाय्याय च सारमेयाणामावश्यकत्वादिति भावः।

(६६) सरभसेति।—सरभसेन—सवेगेन, चरणनिपतनेन—पादक्षेपणेन, निश्चलगमनेन च—धीरचलनेन इति भावः; सुखायमानाः,—सुखमनुभवन्तः, ये खक्खटाः,—वृद्धाः, परिहासकथाप्रसङ्गे धीराणां रणश्रमापनेतारः, अन्यथा सङ्ग्रामोन्मुखवाहिनीषु वर्षीयसामभिनिवेशः निष्प्रयोजनो भवेत् इति गूढाशयः, ["शकादिभ्योऽटन्" (उ० ४ पा० ८१ सू०) इति ढासाश्चकखक्खटेरटन्] तैः स्तूयमानः,—प्रशस्यमानः, तुङ्गानाम्—उन्नतानां, तुङ्गवानाम्—अश्वानां, तदाख्यदेशजाश्वानां वा, ["तुङ्गव" इत्यत्र "तङ्गण इति पाठान्तरम्] गुणः,—गतिसौष्ठवायुत्कर्षविशेषः यस्मिन् तथोक्ते।

(६७) स्खलेति।—स्खलान्—भ्रष्टान्, पश्चात् पतितानिति भावः; वेसरान्—अश्वतरान्, विसंवदन्ति—परिशीलयन्ति, अनुशीलयन्तीति भावः, तथोक्ताः विसंवादिनः, अनुशीलयन्तः इत्यर्थः, द्रुतगमनाक्षमत्वेन अश्वीयसङ्गभ्रष्टत्वात्, दक्षिणापथे वेसरा न वर्तन्त इत्यनभ्यासवैशरारोहणतया द्रुतगमनाक्षमत्वेन पश्चात्पतनात् पथिभालिशङ्कया वा इति भावः; अत एव सीदन्तः,—अवसादं गच्छन्तः, दुःखिता इति भावः; दाक्षिणात्याः,—दक्षिणापथजाताः, सादिनः,—अश्वारोहाः, ("अश्वारोहास्तु सादिनः" इत्यमरः) यस्मिन् तथोक्ते।

(६८) रज इति।—रजोभिः,—धूलिभिः, ध्वस्तानि—विनष्टानि, अदर्शनं गतानीत्यर्थः, आपूरितानीति यावत्, जगन्ति—भुवनानि यस्मिन् तथोक्ते। ["रजोध्वस्तजगति" इत्यत्र "रजोजग्धजगति" इति पाठे,—रजोभिः,—धूलिभिः, जग्धानि—ग्रस्तानीत्यर्थः, आच्छन्नानीति यावत्, जगन्ति—भुवनानि यत्र तथोक्ते]। इह नीलरजोधूलिलीलैर्जगतामाच्छादनमित्यसम्बन्धे सम्बन्धलाभ्यवसायसिद्धेः तद्रूपातिशयोक्तिः सान्दर्भिकस्वभावोक्तेरङ्गम्।

(६९) प्रतिदिशमागच्छद्भिः,—समन्तात्प्रसृतैः, ["अव्ययं—" (२।१।६ पा०)

गजवधूसमारूढैः, आधोरणोर्द्ध्वध्रियमाणहेमपत्रभङ्गशारङ्गार्द्धैः, अन्तरासनासीनान्तरङ्गगृहीतासिभिः, ताम्बूलिकविधूयमानचामरपल्लवैः, (७०) पश्चिमासनिकाऽर्पितभस्त्राभरणभिन्दिपालपुत्रिकैः, (७१) पत्रलताकुटिलकलधौतनलकपल्लवितपर्य्याणैः, (७२) पर्य्याणपक्षकपरिक्षेपपट्टिकाबन्धनिश्चल-

इत्यादिना प्रतियोगे वीप्सायामव्ययीभावः] गजवधूसमारूढैः,—कारिणीपृष्ठस्थैः। आधोरणैति।—आधोरणैः,—हस्तिपालैः, ऊर्द्ध—उपरिभागे, आरोहिणां पतनप्रतिरोधार्थं पृष्ठोपरि स्थापितस्य धातुनिर्म्मितस्य वेष्टनीविशेषस्य "हाओदा" इति प्रसिद्धस्य इति भावः; ध्रियमाणानि—स्थाप्यमानानि, हेमपत्रभङ्गेण—काञ्चनपत्ररचनया, शाराणि—चित्राणि, शार्ङ्गाणि—धनूंषि येषां तैः, ["शार्ङ्गं कार्मुकमात्रेऽपि विष्णोरपि शरासने" इति मेदिनी। "आधोरणोर्द्ध—" इत्यत्र "आधोरणैरूर्द्ध—" इति व्यत्यपाठ,—प्रतिदिशमागच्छद्भिः गजवधूसमारूढैराधोरणैरित्येकवाक्यतयाऽन्वयः, एतत्पक्षे सापेक्षत्वेऽपि गमकत्वात् समासः]। अन्तरेति।—अन्तरासनेषु—मध्यवर्त्तिषु पीठेषु, समीपेषु इति भावः; आसीनैः,—उपविष्टैः, अन्तरङ्गैः,—स्वजनैः, गृहीताः,—धृताः, असयः,—करवालाः येषां तैः। ताम्बूलिकेति।—ताम्बूलिकैः,—ताम्बूलदायिभिः परिजनैः, ["तदस्य पण्यम्" (४।४।५१ पा०) इति ठक्] विधूयमानाः,—सञ्चाल्यमानाः, चामरपल्लवाः,—किसलयकोमलबालव्यजनानि येषां तैः।

(७०) पश्चिमेति।—पश्चिमासनिकायां—पश्चादर्पितानि आसने, अर्पितानि—स्थापितानि, भस्त्राभरणानि—तृणभेदा इति यावत्, भिन्दिपालाः,—हस्तक्षेप्यास्त्रविशेषाः, ("तोमराः" इति केचित्, तत्कोशकारासम्मतार्थवत्त्वादयुक्तम्) तेषां पुत्रिकानि—समूहा येषां तैः।

(७१) पत्रेति।—पत्रलतया—पत्रावलिरचनया, कुटिलानि—भङ्गिमन्ति, कलधौतनलकेन—काञ्चननिर्म्मितनलाकारेण, पल्लवितानि—रञ्जितानि इति भावः, पर्य्याणानि—पल्ययनानि, आसनविशेषा इति भावः, येषां तैः।

(७२) पर्य्याणेति।—पर्य्याणस्य—पल्ययनस्य, पक्षकः,—पार्श्वः, पार्श्वं वा तस्य, ("पक्षकस्तु पुमान् पार्श्वहारे च पार्श्वमात्रके" इति मेदिनी); यद्वा,—पर्य्याणपक्षकस्य—पर्य्याणालङ्कृतहस्तिपार्श्वभागस्य, ("पक्षभागः पार्श्वभागः" इति गजावयवविवरणे अमरः) परिक्षेपपट्टिका—वेष्टनपट्टी, तया बन्धेन—संयमनेन, निश्चलम्—अचञ्चलं,

पट्टोपधानस्थिरावधानैः, (७३) प्रचलपाद-फलिकाऽऽस्फालन-स्फायमान-पदबन्ध मणिशिलाशब्दैः, (७४) उच्चित्रनेत्र-सुकुमारस्खस्थापनस्थगितजङ्घाकाण्डैश्च, (७५) कार्ष्मिक-पटकल्माषितपिशङ्गपिङ्गैः, अलिनीलमसृणप्रान्तसमुत्पादित-सितसमायोगपरभागैश्च (७६) अवदातदेहविराजमानराजा-

यत् पट्टोपधानं—पट्टवसननिर्म्मितम् उपधानं, "बालिश" इति वङ्गभाषया प्रसिद्धं, तस्मिन् स्थिरं—निश्चलम्, अवधानम्—अभिनिवेशः, निर्भरभावेन देहभारसन्निवेश इति भावः, येषां तैः।

(७३) प्रचलेति।—प्रचला—लम्बमाना इत्यर्थः, या पादफलिका—उभयोः पार्श्वयोः पर्य्यन्ते पादस्थापनार्थं या क्रियते "रेकाब" इति वङ्गभाषया प्रसिद्धा इति भावः; "आगुल्फं पादत्राणम्" इत्यन्ये; तस्या आस्फालनेन—चालनेन, स्फायमानः,—प्रवर्द्धमानः, पदबन्धमणिशिलानां—पादकटकखचितरत्नानामित्यर्थः, शब्दः,—ध्वनिः येषां तैः।

(७४) उच्चित्रेति।—उच्चित्रेण—उत्कीर्णालिख्येन, नेत्रेण—पट्टवसनविशेषेण, उच्चित्रनेत्रे—कारुखचितपल्ल्यङ्कपटे इत्यर्थौ वा, ("नेत्रं मथितगुणे वस्त्रभेदे मूले द्रुमस्य च" इति मेदिनी) सुकुमारं—सुकोमलं, यत् स्वस्थापनं—स्वरचणस्थानमित्यर्थः, ["स्वस्थापन—" इत्यत्र "स्वस्थगन—" इति पाठेऽपि स एवार्थः] तस्मिन् स्थगिताः,—निहिताः, जङ्घाकाण्डाः,—जङ्घादण्डा यैः तथोक्तैः।

(७५) कार्ष्मिकेति।—कर्ष्मेन रक्ताः कार्ष्मिकाः,—धूसरवर्णरञ्जित इत्यर्थः, यः पटः,—वसनभेदः, तेन कल्माषिताः,—रञ्जिताः, चित्रिता इत्यर्थः, पिशङ्गाः,—कपिलाः, स्वभावत एवेति भावः; पिङ्गाः,—जङ्घा येषां तैः; यद्वा,—पिशङ्गाः,—पिङ्गलवर्णाः, पिङ्गाः,—जाङ्घिकाः, दूतविशेषा इति यावत्; यद्वा,—पिङ्गाः,—जङ्घालाः, द्रुतगामिनोऽनुचरविशेषा इति यावत्, येषां तैः। अलीत।—अलिनीलः,—भ्रमरकृष्णः, मसृणः,—श्लक्ष्णः, चिक्कण इत्यर्थः, यः प्रान्तः,—निम्नभाग इत्यर्थः, परिहितकञ्चुकस्येति भावः; तेन, ["अलिनीलमसृणप्रान्त—" इत्यत्र "अलिनीलमसृणसतूला—" इति पाठे,—अलिनीलमसृणा च या सतूला—अर्द्धजङ्घिका इत्यर्थः, अधःपरिधानीया वीरवस्त्रविशेषा "जाङ्घिया" इति प्रसिद्धा, तया] समुत्पादितः,—सञ्जातः, सितस्य—शुभ्रस्य, समायोगस्य—संयोगस्य, परभागः,—वर्णोत्कर्षः येषां तैः।

(७६) अवदातेति।—अवदातेषु—गौरेषु, ("अवदातः सितो गौरः" इत्यमरः)

वसनैश्चकैः कञ्चुकैश्च उपचितचीनचोलकैश्च, (७७) तारमुक्ता-स्तवकित-स्तवरकवारबाणैश्च, नानाकषायकर्व्वुरकूर्पासकैश्च, (७८) शुकपिच्छच्छायाऽऽच्छादनकैश्च, (७९) व्यायामोल्लुप्तपार्श्व-प्रदेशप्रविष्टचारुशस्त्रैश्च, (८०)गतिवशवेल्लित हारलतालग्नलील-कुण्डलोन्मोचनप्रधावितपरिजनैः, (८१) चामीकरपत्राङ्कुर-

---

ढेषु—शरीरेषु, विराजमानाः,—शोभमानाः, राजावर्षवत्—कृष्णपाषाणवत्, मेचकाः,—श्यामलाः तैः। कञ्चुकैः,—वर्म्मभिः, उपचितैः इति योजनीयम्, ["इत्यभूत—" (२।३।२१ पा०) इत्यादिना तृतीया]। उपचितेति।—उपचितं—शोभितम्, ["उपचितम्" इत्यत्र "अपचितम्" इति पाठे,—पूजितम्, उत्कर्षतां गतमित्यर्थः; यद्वा,—अपचितं—न्यग्रितं, अचितमित्यर्थः, कञ्चुकवर्षणादिति भावः। "भवेदपचितिः पूजान्यग्भावनिष्क्रीतदानिषु" इति मेदिनी] चीनं—सूक्ष्मांशुकं यावत्, चोलकं—वसनं येषां तैः।

(७७) तारेति।—तारा:,—विशुद्धाः, मुक्ताः,—मौक्तिकानि, ("तारो बालरभिस्मुक्ताविशुद्धयोः शुद्धमौक्तिके" इति मेदिनी) ताभिः स्तवकिताः,—सञ्जातगुच्छाकाराः, स्तवरकाः,—वस्त्रभेदाः, वारबाणाः,—कञ्चुकाश्च येषां तैः। नानेति।—नानाकषायेण—विविधनिर्य्यासविशेषेण, रञ्जनद्रव्येणेत्यर्थः, कर्व्वुराः,—चित्राः, रञ्जिता इत्यर्थः, कूर्पासकाः,—चोलकाः, वस्त्रभेदा इति यावत्, तैः।

(७८) शुकेति।—शुकस्य—पक्षिभेदस्य, पिच्छं—बर्हं, पक्ष इत्यर्थः, तस्य छाया—कान्तिरिव कान्तिः येषां ताद्दशानि, आच्छादनानि—उत्तरीयाणि येषां तैः, हरिद्वर्णोत्तरीयैरित्यर्थः।

(७९) व्यायामेति।—व्यायामेन—अङ्गचालनाविशेषेण, उल्लुप्तेषु—प्रदृष्टेषु, क्षीणेषु इत्यर्थः, पार्श्वप्रदेशेषु—कक्षयोरधोभागेषु, कटिदेशेषु इति यावत्, प्रविष्टानि—क्षिप्तानि इत्यर्थः, चारूणि—रम्याणि, शस्त्राणि—आयुधानि येषां तैः।

(८०) गतीति।—गतिवशेन—द्रुतमत्येति यावत्, वेल्लितायां—दोलितायां, हारलतायां—मुक्ताऽऽवलीयष्ट्यां, शिरःस्थितायामिति भावः; लग्नं—संलग्नम्, ["लग्न—" इत्यत्र "गलत्—" इति पाठे,—पतत्, सङ्गच्छमानमित्यर्थः] यत् लीलं—तरलं, गतिवशादेव इति भावः; कुण्डलं—कर्णभूषणं, तस्य उन्मोचनाय—निष्कासनाय, प्रधावितः,—द्रुतोपसृतः इत्यर्थः, परिजनः,—परिचारक इति यावत्, येषां तैः।

(८१) चामीकरेति। चामीकरः, सौवर्ण इत्यर्थः, पत्राङ्कुरः,—दलप्ररोहः

कर्णपूरकविघट्टमानवाचालबालपाग्रैश्च, (८२) उष्णीषपट्टावष्टब्धकर्णोत्पलनालैश्च, (८३) कुङ्कुमरागकोमलोत्तरीयाम्बरितोत्तमाङ्गैश्च, (८४) चूडामणिखण्डखचितकौमचोलैश्च, (८५) मायूरपत्रायमाणशेखरोड्डीयमानषट्पदपटलैश्च, (८६) मार्गागतशारिकशारिवाहवेगदक्षैः,

यस्य तथाभूतं, यत् कर्णपूरकं—कर्णभूषणं, तत्र विघट्टमानः,—सङ्घर्षमाणः, अत एव वाचालः,—मुखरितः, "ठंठङ" इति शब्दं कुर्वन् इत्यर्थः, बालपाशः,—अपरकर्णाभरणविशेषः येषां तैः।

(८२) उष्णीषेति।—उष्णीषपट्टेन—शिरोवेष्टनवस्त्रेण, ("अभ्युष्णीषः शिरोवेष्टकिरीटयोः" इत्यमरः) अवष्टब्धानि—आक्रान्तानि, संसक्तानीत्यर्थः, कर्णोत्पलनालानि—कर्णभूषणीकृतनीलोत्पलदण्डानि येषां तैः।

(८३) कुङ्कुमेति।—कुङ्कुमेन—काश्मीरजेन, रागः,—रञ्जनं, तेन कोमलैः,—मृदुलैः, मनोज्ञैरिति यावत्, उत्तरीयैः,—उत्तरासङ्गैः, अम्बरितं—वेष्टितम्, उत्तमाङ्गं—शिरः येषां तैः।

(८४) चूडामणीति।—चूडामणीनां—शिरोरत्नानां, खण्डेन—शकलेन, खचितं—बद्धं, संयुक्तमित्यर्थः, कौमचोलं—दुकूलवसनं, शिरःस्थमिति भावः ; येषां तैः।

(८५) मायूरेति।—मयूरस्य इदं मायूरं—मयूरसम्बन्धि इत्यर्थः, ["तस्येदम्" (४।३।१२० पा०) इत्यण्] पत्रं—पिच्छमित्यर्थः, तदिव आचरत्, मयूरपिच्छवत् दृश्यमानमित्यर्थः, यत् शेखरं—शिरोभूषणं, तस्मिन् उड्डीयमानानाम्—उड्डयनं कुर्वतां, षट्पदानां—भ्रमराणां, पटलं—समूहः येषां तैः। ["मायूरपत्रायमाणशेखरोड्डीयमानषट्पदपटलैः" इत्यत्र "मायूरपत्रायमाणशेखरषट्पदपटलैः" इति पाठे,—मायूरपत्रायमाणं शेखरे षट्पदपटलम्, उड्डीयमानमिति भावः ; येषां तैः]।

(८६) मार्गागतेति।—मार्गागताः,—पथिप्राप्ताः, शारिकशारिवाहवेगानां—हंसभेदानां, दक्षाः,—लघवः, यैः तथोक्तैः ; यद्वा,—मार्गागतानां—पथि द्रुतगमनार्थमानीतानामित्यर्थः, अश्वपालैरिति भावः ; शारिकशारिवाहानां—शारिणः,—अरहणसम्बन्धिनः, याः कशाः,—अश्वताड्यः, ताः अरयः,—शत्रवः, प्रहरणत्वादिति भावः, येषां तादृशाः ये वाहाः,—अश्वाः, तेषां वेगार्थं—द्रुतचालनार्थं, दक्षाः,—ताड्यः, दक्षे इति भावः, येषां तैः ; यद्वा,—मार्गागताः,—सरक्षणमुत्तरीयः प्रसक्तत्वादिति भावः ; शारिः,—युद्धार्थगजपर्याणमेव शारिका ("शारिर्नाडीपकरणे

(८७) पुरश्चञ्चामरकिर्मीरकार्ङ्कचर्ममण्डलमण्डनोड्डीयमानचटुलडामरचारभटभरितभुवनान्तरैः, (८८) आस्कन्दत्काम्बोजवाजिशत-शिक्षानजातरूपायानरव-मुखरितदिङ्मुखैश्च, (८९) निर्दयप्रहतलम्बापटहशतपटुरवबधिरीकृतश्रवणविवरैः, (९०) उद्दीप्यमाणनामभिः, उन्मुखपादातप्रतिपाल्यमानाज्ञापातैः राजभिः आपुपूरे राजद्वारम्।

स्त्रियां शकुनिकान्तरे। युद्धार्थगजपर्य्याणे व्यवहारान्तरेऽपि च॥" इति मेदिनी) तथाः शारिः,—श्येणिः येषां ते तथोक्ताः, ["स्त्रियाः—" (६।३।३४ पा०) इत्यादिना पुंवद्भावः] ते च ते वाहाः तथोक्ताः वेगदक्षाः,—तरक्षुदक्षिणः येषां तथोक्तैः।

(८७) पुर इति।—पुरः,—अग्रतः, चञ्चद्भिः,—भ्राम्यद्भिः, चामरैः,—बालव्यजनैः, किर्मीराणि—शबलानि, कार्ङ्कराणि—कार्ङ्करदेशोद्भवानि, चर्ममण्डलानि—अजिनसमूहा एव, मण्डनानि—भूषणानि, बहुसुवर्णसूचरचितत्वादिति भावः; तैः सह उड्डीयमानानि—नभसि उत्प्लवमानानि, चटुलानि—तरलानि, डामराणि—विशालानि, उत्कटानि इत्यर्थः, चारभटानि—तदाख्यदेशीयसैनिकानि, गूढपुरुषच्छद्मसैनिकानि इत्यर्थो वा, तैः भरितम्—आपूरितं, भुवनान्तरं—भूमण्डलावकाशः येषां तथोक्तैः।

(८८) आस्कन्ददिति।—आस्कन्दताम्—आस्कालयतां, वल्गतामित्यर्थः, काम्बोजवाजिनां—काम्बोजदेशीयाश्वानां, शतानि—समूहा इत्यर्थः, तेषु शिक्षानानि—रथनि, जातरूपाणि—सौवर्णानि, आयानानि—अश्वभूषणविशेषाः, [अत्र "आयान—" इति पाठः लिपिकरप्रमादपठितः इति प्रतीयते, "आदान—" इत्येव सङ्गतः पाठः, "आदानं यष्टयेऽपि स्यादलङ्कारे च वाजिनाम्" इति मेदिनीवचनात्] तेषां रवेण—भ्रूयत्कारेण, मुखरितं—ध्वनितं, दिङ्मुखं—ककुभान्तरालमित्यर्थः, यैः वा तैः।

(८९) निर्दयेति।—निर्दयं—दृढं यथा तथा, प्रहतानां—ताडितानां, लम्बापटहानां—पटहाख्यवाद्यभेदानां, "तमिस्रा" इति देशविशेषे प्रसिद्धानां, शतानि—समूहा इत्यर्थः, तेषां पटुरवैः,—विकटशब्दैः, बधिरीकृतं—श्रवणशक्तिहीनीकृतं, पूरितमिति यावत्, श्रवणविवरं—कर्णरन्ध्रं येषां यैः वा तैः।

(९०) उद्दीप्यमाणेति।—उद्दीप्यमाणं—कीर्त्यमानं, बन्दिभिरिति भावः, नाम—आख्या येषां तैः; राज्ञां बहिर्गमनसमये बन्दिनां तादृशाचारस्य अवश्यं

उदिते च भगवति दिनकृति राज्ञः (९१) समायोगग्रहण-समयशंसी सखान संज्ञाशङ्खो मुहुर्मुहुः। (९२) अथ न चिरादिव प्रथमप्रयाण एव दिग्विजयाय दिग्गजसमागममिव (९३) गमनविलोलकर्णतालदोलाविलासैः कुर्वाणया करेणुकया उह्यमानः, (९४) वैदूर्यदण्डविकटेन उपरि

कर्त्तव्यत्वादिति भावः। उन्मुखैरिति।—उन्मुखैः,—ऊर्ध्वमुखैः, आदेशग्रहणार्थमिति भावः; पादातैः,—पदातिभिर्न्यैः, ["तस्य समूहः" (४।२।३७ पा०) इत्यण्] प्रतिपाल्यमानः,—प्रतीक्ष्यमाणः, आज्ञाप्रापः,—आदेशवचनमिति यावत्, तैर्यैः तैः। राजभिः,—सामन्तनृपतिभिरित्यर्थः। आपपुरे—व्याप्तमित्यर्थः। राजद्वारं—हर्षशिविरप्रवेशतोरणम्। इह "ततो वटत्यट्टहे" इत्यारभ्य एतदवधि हर्षशिविरद्वारे, समायितसामन्तवाहिनीनां, यथावर्णनकविवैभविच्छित्तितया स्वभावोक्तिरलङ्कारः; अङ्गी, इत्यनुप्रासातिशयोक्त्यादयः अङ्गानि इत्यवधेयम्।

(९१) समायोगेति।—समायोगः,—संविधानं, सन्नाह इति यावत्, कवचादिरिति भावः; यद्वा,—समायोगः,—प्रयोजनं, प्रयोजनीयं वस्तु इत्यर्थः, शास्त्रिकपरिच्छदादिकमिति भावः; ("समायोगस्तु संयोगे समवाये प्रयोजने" इति मेदिनी) तस्य ग्रहणं—स्वीकारः, परिधानादिरूप इत्यर्थः, तस्य समयः,—कालः, तं शंसति—सूचयतीति तथोक्तः। सखान—दध्मौ। संज्ञाशङ्खः,—सङ्केतशङ्खः। यात्रासमयः समागतः, अत एव सज्जितो भव इति ज्ञापनार्थं शङ्खध्वनिं चक्रुः सत्कर्म्माधिकृताः इति निष्कर्षः।

(९२) अथेति।—"अथ" इत्यादौ "दिग्विजयाय···निर्ययौ नरपतिः" इति परेण सम्बन्धः। ["न चिरादिव" इत्यत्र समस्तपाठे नञर्थकनञ्शब्देन "सह सुपा" (२।१।४ पा०) इति समासः]। प्रथमप्रयाणे एव—प्रथमयात्रायामेव। दिग्गज-समागममिव—ऐरावतसङ्गमिव।

(९३) गमनेति।—गमनेन—गतिवशादित्यर्थः, विलोलाः,—चञ्चलाः, ये कर्णतालाः,—कांस्यतालवत् कर्णदेशाः, साम्यमनुहृत्य चालितकर्णा इत्यर्थो वा, तेषां दोलाविलासैः,—कम्पनविभ्रमैः। करेणुकया—हस्तिन्या। उह्यमानः,—नीय-मानः, अत्युच्चकरिणीपृष्ठसमारूढ इत्यर्थः।

(९४) वैदूर्येति।—वैदूर्यं—विदूरपर्व्वतजो मणिः, तस्य दण्डः,—तन्निर्म्मित-त्वात्, इत्यर्थः, तेन विकटम्—उज्ज्वलं तेन।

(८५) प्रत्युप्तपद्मरागखण्डखचिततया सूर्य्योदयदर्शनकोपादिव लोहितायतया म्रियमाणेन मङ्गलातपत्रेण, (८६) कदलीगर्भाभ्यधिकस्निग्धा नवनेत्रनिर्म्मितेन द्वितीय इव भोगिनाम् अधिपतिः अङ्गलग्नेन कञ्चुकेन, (८७) अमृतमथनदिवस इव क्षीरोदफेनपटलधवलाम्बरवाही, बाल एव पारिजातपादप इव आखण्डलभूमिम् आरूढः,

(८५) प्रत्युप्तेति।—प्रत्युप्तैः,—खचितैः, पद्मरागाणां—रक्तमणिविशेषाणां, खण्डैः,—शकलैः, खचितं—रञ्जितं, तस्य भावः तत्ता तया। सूर्य्योदयदर्शनकोपादिव—भास्करप्रकाशावलोकनक्रोधादिव, लोहितायतया—लौहित्यरूपधर्मकत्वेत्यर्थः, [अलोहितो लोहितो भवतीत्यर्थे "लोहितादिडाज्भ्यः क्यष्" (३।१।१३ पा०) इति क्यषि, लोहितायनामधातोः कर्त्तरि पचाद्यच्त्वादचि लोहितायेति सिद्धे, ततः भावे तलि रूपम्; "लोहितायमानेन" इति प्रकल्प्यपाठस्तु अर्थसौकर्य्यात् समीचीन एवेति प्रतीयते] म्रियमाणेन—गच्छमानेन, क्षयधारिणेति शेषः। मङ्गलातपत्रेण—राजलक्षणकत्वेन, ["इत्थम्भूतलक्षणे" (२।३।२१ पा०) इति तृतीया, करणे वा]।

(८६) कदलीति।—कदली—रम्भातरुः, तस्या गर्भः,—उदरम्, अभ्यन्तरभाग इत्यर्थः, तस्मादभ्यधिकः,—अतिशयः, स्निग्धा—मार्दवं यस्य तेन, नवनेत्रनिर्म्मितेन—नवपट्टवस्त्रविशेषकल्पितेन, ("नेत्रं मध्यगुणे वस्त्रभेदे मूले द्रुमस्य च" इति मेदिनी)। भोगिनां—सर्पाणाम्, अधिपतिः,—प्रभुः, अनन्तनागः इत्यर्थः, अङ्गलग्नेन—देहसंसक्तेन, कञ्चुकेन—वर्म्मणा, गात्रावरणविशेषेण इत्यर्थः, निर्म्मोकेण च, ("कञ्चुको वारवाणे स्यान्निर्म्मोके कवचेऽपि च। वज्रोपकरहीताङ्गस्थितवस्त्रे च चोलके॥" इति मेदिनी)।

(८७) क्षीरोदेति।—क्षीरोदस्य—दुग्धसागरस्य, फेनपटलं—हिण्डीरपुञ्जः, तद्वत् धवलं—शुभ्रम्, अम्बरं—वस्त्रम्, अन्तरीयञ्च, वहति—परिधत्ते इति तथोक्तः, अत एव अमृतमथनदिवस इव—अमृताय—पीयूषाय, मथनं—विलोडनं, क्षीरोदस्येति भावः; तद्दिवस इव—तद्दिनमिव, परिदृश्यमान इति शेषः। बाल एव—क्षीरोदधेः नवीभूत इत्यर्थः; उत्तरीत्तरसद्वृद्धिमानिति भावः; एवञ्च अमृतमथनकालिकत्वज्ञापनाय अवैधर्म्यसाम्यप्रतिपत्तये पारिजातपादपे बालत्वधर्म्मस्य पृदेश इत्यवगन्तव्यम्। आखण्डलभूमिम्—इन्द्रस्थानं, नन्दनोद्यानमित्यर्थः, इन्द्रसदृशनेपथ्यश्च; ऐरावतीपम-

(९८) विधूयमानचामरमरुद्विधूतकर्णपूरकुसुमसञ्जरीरजसा सकलभुवनवशीकरणचूर्णेन इव दिशः क्षुरयन्, (९९) अभिमुखचूडामणिघटमानपाटलप्रतिबिम्बम् उदयमानं सवितारमपि पिबन् इव तेजसा, (१००) बहलताम्बूलसिन्दूरच्छुरितया विलभमान इव द्वीपान्तराणि ओष्ठमुद्रया, अनुरागस्य (१०१) स्फुरन्महाहारमरीचिचक्रवालानि चामराणि इव दिशोऽपि

गजवराधिष्ठितत्वादिति भावः; यद्वा,—आरूढखलभूमिम्—इन्द्रस्थानं, राजेन्द्रसभ्यादामित्यर्थः, भूलोकैकाधिकारित्वात् इति भावः; आरूढः,—अधिश्रितः।

(९८) विधूयमानेति।—विधूयमानयोः,—चाल्यमानयोः, चामरयोः,—बालव्यजनयोः, मरुता—वायुना, विधूतायाः,—कम्पितायाः, कर्णपूरकुसुमसञ्जर्याः,—कर्णभूषणीकृतपुष्पवल्ल्याः, रजः,—परागः तेन। सकलेति।—सकलानां—कृत्स्नानां, भुवनानां—जगतां, वशीकरणाय—जयाय, चूर्णेन—रजः, मत्तपुंसौषधविशेष इति यावत्, तेनेव। क्षुरयन्—व्याप्नुवन्।

(९९) अभिमुखेति।—अभिमुखे—सम्मुखवर्त्तिनि इत्यर्थः, चूडामणौ—शिरोरत्ने, घटमानं—प्रतिफलत्, पाटलं—श्वेतरक्तम्, अरुणवर्णमित्यर्थः, प्रतिबिम्बं—प्रतिच्छाया यस्य तम्। उदयमानम्—उद्गच्छन्तं, सवितारं—सूर्यम्; सूर्यादपि अधिकतेजस्वीति भावः।

(१००) बहलेति।—बहलेन—प्रभूतेन, ताम्बूलसिन्दूरेण—पर्णरागेण, छुरिता—व्याप्ता, रञ्जिता इत्यर्थः, तया, ओष्ठमुद्रया—रदनच्छदविभागेन। विलभमान इव—विलीभवन् इत्यर्थः; आत्मानं भञ्जयितुं मुद्राप्रदर्शनेन द्वीपान्तरान् प्रलोभयन्निवेति भावः; एतेनास्य भाविसप्तद्वीपाधिपतित्वं प्रकटीकृतम्। केचित्तु—"विलभमानः अर्थित्वात् कुर्वन्। मुद्रया हि संसिन्दूरया विलभ्यते" एवं व्याख्यानयन्ति; व्याख्यानेनानेन अस्य अतीव दाक्षिण्यम् अखण्डभुवनशासकत्वञ्च सूचितम्।

(१०१) स्फुरदिति।—स्फुरत्—विकसत्, यो महाहारः,—उत्कृष्टमुक्तावलीकलापः, तस्य मरीचीनां—मयूखानां, चक्रवालानि—वृन्दानि। अनुरागस्य—प्रीतेः, हर्षे प्रतीति शेषः, चामराणि—बालव्यजनानीव, दिशोऽपि—दिग्वधूरपीति यावत्; अनुरागात् दिग्वधूरपि तं वीजयन्त्य इवासन्निति भावः; एतेनास्य सर्वदिगाधिपत्यं सूचितम्।

आहृयन्,(१०२)राजकेक्षणोत्क्षिप्तत्रिभागया त्रीन् अपि लोकान् करदानाय आज्ञापयन् इव सविभ्रमं भ्रूलतया,द्राघीयसा बाहु-प्राकारेण परिक्षिपन् इव रिरक्षया सप्तापि सागरमहाखातान्, अखिलमिव क्षीरोदमाधुर्य्यम् आदाय उन्नतया लक्ष्म्या समुपगूढः गाढम्, अमृतमय इव (१०३) पीयमानः कुतू-हलोत्तानकटकलोकलोचनसहस्रैः, स्नेहार्द्रेषु राज्ञां हृदयेषु गुणगौरवेण मज्जन्निव, लिम्पन्निव सौभाग्यद्रवेण द्रष्टृणाम्,

(१०२) राजकेति।—राजकानां—राजन्यानाम्, ईक्षणं—दर्शनं, उत्क्षिप्तः, —उन्नमितः, त्रिभागः,—तृतीयो भागः, [क्वचित् सङ्ख्याशब्दानां पूरणार्थत्वमपि दृश्यते] यस्याः तथाभूतया। सविभ्रमं—सविलासं, हेलयेव इति यावत्; एतेन तस्य लोकत्रयाधिपत्यार्हत्वं प्रकटीकृतम्। द्राघीयसा—अतिदीर्घेण, ["द्विवचन—" (५।३।५७ पा०) इत्यादिना ईयसुन् ततः "प्रियस्थिर—" (६।४।१५७ पा०) इत्यादिना दीर्घस्य द्राघादेशः] बाहुप्राकारेण—भुजप्राचीरेण, परिक्षिपन्निव—परि-वेष्टयन्निव। रिरक्षया—रक्षितुमिच्छया, सुशासनगुणेन स्वस्मिन् अनुरक्तीकरणेच्छया इत्यर्थः, [लिपिकरप्रमादात्, ङ्कारमीषेण रिरक्षयेत्यत्र रिरक्षया ज्ञाता, तेन रज्यतेः सप्तम्यन्तात् भावे अप्रत्यये टापि च रूपमेतदिति ज्ञेयम्]। सागरमहाखातान्—सागराः,—समुद्रा एव,महान्ति—दुरुत्तारत्वात् इत्यर्थः,खातानि—पुष्करिण्यः, प्राकार-वेष्टनानीत्यर्थः, ("पुष्करिण्यान्तु खातं स्यात्" इत्यमरः) येषां तान्, क्षोपानिति शेषः। एतेनास्य आजानुलम्बिबाहुत्वं सूचितम्। अखिलं—सम्पूर्णं, क्षीरोदमाधुर्य्यं—दुग्ध-समुद्रस्य रमणीयताम्,आदाय—गृहीत्वा, उन्नतया—उत्थितया। गाढम्—अश्रिथिलं यथा तथा, समुपगूढः,—समालिङ्गितः; दुग्धधवलकान्तिः सुश्लीकृत इति भावः।

(१०३) पीयमानः,—सादरं दृश्यमान इति भावः। कुतूहलेति।—कुतू-हलेन—आश्चर्यरूपमिदमिति कौतुकेन, उत्तानानाम्—उत्क्षिप्तानां, कटकलोचनानां —सैनिकनयनानां, सहस्राणि—समूहा इत्यर्थः, तैः। स्नेहार्द्रेषु—स्नेहेन—प्रीत्या, आर्द्रेषु—सरसेषु, प्रीतिरससिक्तेषु इत्यर्थः, राज्ञां—सामन्तनृपाणां, हृदयेषु—अन्तः-करणेषु, गुणगौरवेण—गुणानां—शौर्य्यदाक्षिण्यादीनां, गौरवेण—भारेण, मज्जन्निव —मग्नइव, अन्तःप्रविशन्निवेत्यर्थः, गुणानुरक्तानां राज्ञां हृदये कृतदृढासन इति भावः; भारवहस्तु अपि आर्द्रस्थलेषु मज्जतीति दृश्यते। द्रष्टृणां—दर्शनकर्तृणां जनानां, सौभाग्यद्रवेण—सौभाग्यं—शुभादृष्टं, तद्दर्शनहेतुभूतमिति भावः; तदेव

(१०४) अमरपतिरिव अयजबधकलङ्कप्रक्षालनाकुलः, पृथुरिव पृथिवीपरिशोधनावधानसङ्कलितसकलमहीभृत्समुत्सारणः, पुरःसरैः आलोककारकैः सहस्रसंख्यैः अर्क इव किरणैः, (१०५) अधिकारचातुर्य्यचञ्चलचरणैः व्यवस्थास्थापननिष्ठुरैः (१०६) भयपलायमानलोकोत्पीडाऽन्तरिता दशाऽपि दिशो याहयद्भिः

द्रवः,—रसः, कुङ्कुमचन्दनादिपङ्कद्रव इति भावः ; तेन ; लिम्पन्निव—उपदिहन्निव ; तद्दर्शनं सौभाग्यनिमित्तकं मत्वा द्रष्टृभिरनिमेषनयनेन दृश्यमान इति भावः।

(१०४) अमरपतिरिव—इन्द्र इव। अयजेति।—अयजस्य—ज्येष्ठस्य, अन्यत,—अयजन्मनः, ब्राह्मणस्येत्यर्थः, बध एव—नाश एव, कलङ्कः,—कालिमा, अन्यत,—अपवाद इत्यर्थः, तस्य प्रक्षालनाय—शोधनाय, आकुलः,—उत्सुकः। पुरा त्वष्टृतनयस्य असुरपक्षपातिनो ब्राह्मणस्य त्रिशिरसः तद्भ्रातृहतस्य च शक्रेणाकरि नाशः, तेन पातकं तमशिश्रियत् इति वार्त्ता। पृथुरिव—वेणतनय इव। पृथिवीति।—पृथिव्याः,—धरण्याः, परिशोधनं—संस्करणं, तस्मिन् अवधानेन—मनोनिवेशेन, सङ्कलिताः,—कृताः, व्यवस्थापिताश्च, सकलानां—सर्वेषां, महीभृतां—राज्ञां, पर्व्वतानाञ्च, समुत्सारणा—उचितस्थाने प्रतिष्ठापनं, सञ्चालनञ्च येन तथोक्तः। पुरःसरैः,—अग्रगामिभिः, आलोककारकैः,—आलोकः,—स्तुतिवाक्यम्, ("आलोकस्तु पुमान् द्यौते दर्शने वन्दिभाषणे" इति मेदिनी) तं कुर्व्वन्तीति तथोक्तैः, "आलोकशब्दं वयसां विरावैः" इति रघुः, तत्र, "आलोकशब्दं जयशब्दम्" इति मल्लिनाथः ; तेन हि स्तुतिपाठकैरित्यर्थः, उद्घोषकारैश्च। सहस्रसङ्ख्यैः,—अनेकैः, दशशतसङ्ख्याकैश्च।

(१०५) अधिकारेति।—अधिकारस्य—नियोगस्य, चातुर्य्येण—नैपुण्येन, चञ्चलाः,—सत्वरा इत्यर्थः, चरणाः,—पदनिक्षेपा इति यावत्, यैषां तैः। व्यवस्थेति।—व्यवस्था—लोकस्थितिः, तस्याः स्थापने—रक्षणे, निष्ठुराः,—निर्दयाः तैः ; राज्ञः पुरोयायिणां दण्डप्रदर्शनेन निर्भर्त्सनादिना च समुत्सारणादिति भावः।

(१०६) भयेति।—भयेन—त्रासेन, पलायमानाः,—इतस्ततो विद्रवन्तः, ये लोकाः,—जनाः, तेषाम् उत्पीडैः,—समूहैः, अन्तरिताः,—व्यवहिताः, आच्छन्ना इत्यर्थः ; याहयद्भिः,—आनयद्भिरित्यर्थः, जनैरिति शेषः ; राजाज्ञिके दिक्समूहानामपि बलपूर्व्वकं समुपस्थापनार्थं सैनिकजनान् प्रेरयद्भिरिवेति भावः। एतेन हर्षस्य महाप्रतापवत्त्वं सूचितम्।

इव (१०७) चलितकदलिकासम्पातपीतप्रचारं पवनमपि विनये स्थापयद्भिः इव (१०८) द्रुतचरणोद्धूतधूलिपटलावधूतान् दिनकरकिरणान् अपि उत्सारयद्भिः इव कनकवेत्रलताऽऽलोकविच्छिप्यमाणं दिनमपि दूरीकुर्वद्भिः इव दण्डिभिः इतस्ततः समुत्सार्यमाणजनसमूहो निर्जगाम नरपतिः।

(१०९) अवनमति च विनयनमितवपुषि, भयचकितमनसि, चलनशिथिलमणिकनकमुकुटकिरणनिकररुचिरशिरसि, (११०) विलुलितकुसुमशेखररजसि राजचक्रे, प्रभामुचां चूडामणीनाम् अवाचः तिर्यञ्च उदञ्चश्च चञ्चन्तो मरीचयः चाष-

(१०७) चलितेति।—चलितानां—कम्पितानां, पताकाधारिभिः स्थानान्तरे नयनादिति भावः; कदलिकानां—वैजयन्तीनां, ("रम्भाद्वयेऽथ कदली पताकाख्यभेदयोः" इति मेदिनी) सम्पातेन—सञ्चारेण, वायुवेगेन इतस्ततो धावनादिति भावः; पीतः,—यस्तः, कृत इत्यर्थः, प्रचारः,—चलनं यस्य तथाभूतम्। विनये—नम्रतायां, स्थापयद्भिः,—रचयद्भिरित्यर्थः; हर्षस्थायतः पवनमपि नम्रतां नयद्भिरित्यर्थः। एतेनास्य अप्रक्षेप्यपताकावाहिसेन्यसन्तानवत्त्वं प्रकटीकृतम्।

(१०८) द्रुतेति।—द्रुतैः,—शीघ्रगतिभिरित्यर्थः, चरणैः,—पादैः, उद्धूतानि—उत्क्षिप्तानि, यानि धूलिपटलानि—रजःसङ्घाताः, तैः अवधूताः,—तिरस्कृताः, आच्छन्ना इत्यर्थः, तान्। उत्सारयद्भिः इव—निराकुर्वद्भिरिव। कनकेति।—कनकवेत्रलता—स्वर्णमयी वेत्रयष्टिः, दण्डिधार्य्या इति भावः; तस्याः आलोकेन—उद्योतेन, प्रभया इति यावत्, विच्छिप्यमाणं—तिरस्कुर्वन्तम्, अवधीरयन्तमित्यर्थः, दिवालोकादपि प्रभावद्वेत्रयष्टिधारिभिरिति समुदितार्थः। दण्डिभिः,—राजपुरोवायिभिः दण्डधारिपुरुषैः।

(१०९) अवनमति—प्रणमति। विनयनमितवपुषि—नम्रतामूषितकलेवरे। चलनेति।—चलनेन—पदनिक्षेपेण, शिथिलाः,—विस्रस्थाः, दोलायमाना इति यावत्, मणयः,—रत्नानि यस्य तादृशस्य, मुकुटस्य—किरीटस्य, किरणनिकरेण—मयूखचयेन, रुचिरम्—उज्ज्वलं, शिरः,—मस्तकः यस्य तथोक्ते।

(११०) विलुलितेति।—विलुलितं—प्रसृतं, गतिवेगोद्धूतपवनेन इति भावः, कुसुमशेखरस्य—शिरोभूषणपुष्पस्य, रजः,—परागः यस्य तथाभूते, राजचक्रे—नृपति-

राशय इव सुशकुनसम्पादनाय चेलुः। (१११) मेघायमान-रेणुमेदुरं मन्दिरशिखण्डिन इव खमुड्डीयमानाः कोमल-कल्पपादपपल्लवचन्दनमालाकलापा इव आवध्यन्त। (११२) दिग्द्वारेषु दिक्पालैः प्रणम्यमानश्च, नेत्रत्रिभागैश्च कटाक्षैश्च समग्रेक्षितैः भ्रूवक्षितैश्च अर्धस्मितैश्च परिहासैश्च छेकालापैश्च

हन्दे। प्रभामुचाम्—आलोकवर्षिणाम्। अवाचः,—अधःप्रसरन्तः। तिर्यञ्चः,—पार्श्वेषु चरन्तः। उदञ्चः,—उद्गच्छन्तः, ऊर्ध्वं प्रसरन्त इत्यर्थः, चञ्चलाः,—स्फुरन्तः। चाषराशय इव—नीलकण्ठाख्यपक्षिसमूहा इव। सुशकुनसम्पादनाय—मुनिभिः प्रकटनाय। विजिगीषुराजेः चाषपक्षी विजयादशमीदिवसे सर्वत्र विजयकामनया दृश्यते इति व्यवहारः। चेलुः,—भ्रमन्ति स्म।

(१११) मेघेति।—मेघायमानाः,—मेघा इव आचरन्तः, अन्तरीक्षाच्छादनादिति भावः; ये रेणवः,—रजांसि, तैः मेदुरं—स्निग्धं, समाच्छन्नमिति भावः; ["अश्वाघस्यात इदाप्सुपि" (३।२।१४१ पा०) इति घुरच्]। खम्—आकाशम्, उड्डीयमानाः,—उद्गच्छन्तः, मरीचय इति शेषः। मन्दिरशिखण्डिन इव—गृहमयूरा इव, परिलक्ष्यमाणा इति शेषः; सितपीतनीलादिविविधवर्णानां मणीनां प्रभापटलानि कलापिपिच्छबर्हाणि इव परिलक्ष्यन्ते इति निष्कर्षः। कोमलेति।—कोमलाः,—मृदुलाः, कल्पपादपस्य—दैवतकविशेषस्य, ये पल्लवाः,—किसलयाः, तेषां चन्दनमालाकलापा इव—चन्दनधारारचनानि इव, आवध्यन्त—ससज्यन्त, समसज्यन्त इत्यर्थः, स्वयमेवेति शेषः।

(११२) दिग्द्वारेषु—दिक्षुखेषु इत्यर्थः। दिक्पालैः,—इन्द्रादिभिः; आज्ञापालकसामन्तप्रवरैः हर्षाज्ञया मालव्यसम्पादनाय नानादिग्भ्यः विदिग्भ्यश्च समुपस्थितैरिति भावः; एतेन भूलोकनाथस्य दिक्पालेष्वप्याज्ञा अस्खलितैवेति गम्यते। प्रणम्यमानः,—नमस्क्रियमाणः; दशानामपि दिशामधिपस्य समाजी हर्षस्य समीपे एकैकदिगधिपानां सामन्तानामिवेन्द्रादीनां देवविशेषाधीश्वराणां वा प्रणामस्य अवश्यकर्तव्यत्वादिति भावः। नेत्रत्रिभागैः,—त्रिभागोन्मीलितदृष्टिभिरित्यर्थः, सङ्कुचितदर्शनैरिति यावत्, कांचिद्राज्ञ इति शेषः, एवमुत्तरत्र। कटाक्षैः,—अपाङ्गदर्शनैः, वक्रदृष्टिभिरित्यर्थः, समग्रेक्षितैः,—सम्पूर्णदर्शनैः, पूर्णोन्मीलितदृष्टिभिरित्यर्थः; अतिप्रियराज्ञः इति भावः। भ्रूवक्षितैः,—भ्रूभङ्ग्या रहितैः, प्रसन्नदृष्टिभिरिति भावः; ["भ्रूवक्षितैः" इत्यत्र "भ्रूवाक्षितैः" इति पाठे,—भ्रुवा—भ्रुविक्षेपेण, अक्षितैः,—

कुम्भस्थलप्रश्नेषु प्रतिप्रणामेषु उन्मत्तभ्रूवीक्षितेषु आघ्राणदानेषु आक्रीणन् इव मानमयान् प्राणान् प्रणयदानैः प्रवीराणां वीरो यथाऽनुरूपं विबभाज राजकम्।

अथ प्रस्थिते राजनि (११३) कलकलवस्तदिङ्नागसूत्कार-रव इव इतस्ततः तस्तार तारतरः तूर्य्याणां प्रतिध्वनिः आशातटेषु। दिग्गजेभ्यः प्रकुपितानां विप्रसृतानां करिणां मदप्रस्रवणवीथीभिः अलिकुलकालीभिः कालिन्दीवेणिकासङ्काशानि इव सस्यन्दिरे। (११४) सिन्दूररेणुराशिभिः अरु-

---

जनौघैः, उन्नतैकभ्रूवीक्षितैः इत्यर्थः]। अङ्कस्थितैः,—ईषद्धास्यैरित्यर्थः। हिक्काक्षोपैः,—वक्रोक्तिभिः, अन्तरालरावाक्षरैरित्यर्थो वा। उन्मत्तेति।—उन्मत्तैः,—उन्मादरोग-ग्रस्तस्येव पीतमदस्येव वा चञ्चलैरित्यर्थः, भ्रूवीक्षितैः,—भ्रूसञ्चालनैः, परिहासार्थमिति भावः। आक्रीणन्निव—विक्रीणन्निव। ["आक्रीणन्निव" इत्यत्र "आक्रीडन्निव" इति पाठे,—क्रीडां कुर्व्वन् इव; तान् प्रति स्वानुग्रहभावज्ञापनार्थमिति भावः। प्रथमतः नेत्रविभागैरित्यादिभिः प्राणान् आक्रीणन् इति न्यूनेनाधिकविनिमयान् परिहसन्निव अलङ्कृतिं निगमयन् पश्चादत्यधिकमेश्वर्यं स्वस्य प्रतिपादितवान् इति सङ्क्षेपः]। प्रवीराणां—वीरश्रेष्ठानां, राज्ञामिति शेषः। मानमयान्—अभिमान-धनानित्यर्थः। प्रणयदानैः,—प्रीतिज्ञापनैरित्यर्थः। वीरः, हर्ष इति शेषः। यथा-ऽनुरूपं—यथोचितम्। विबभाज—विभज्य स्थापितवान् इत्यर्थः।

(११३) कलकलेति।—कलकलेन—कलरवेण, जनसमूहानामिति भावः; त्रस्तानां—भीतानां, दिङ्नागानां—दिग्गजानां, सूत्काररव इव—वासमृषकमृच्छब्द-विशेष इव, "यूत्" "यूत्" इत्याकारक इत्यर्थः। तस्तार—व्याप। तारतरः,—उच्चैस्तरः। तूर्य्याणां—वाद्यविशेषाणाम्। आशातटेषु—दिग्विभागेषु। दिग्गजेभ्यः,—दिग्गजान् प्रतीत्यर्थः, ["क्रुधदुह—" (१।४।३७ पा०) इत्यादिना चतुर्थी]। विप्रसृतानां—विभिः अङ्गैः कपोलादिभिः, प्रसृताः,—मदवर्षिणः तेषान्। मद-प्रस्रवणवीथीभिः,—दानजलस्रावरेखाभिः। अलिकुलकालीभिः,—भृङ्गकुलश्याम-लाभिरित्यर्थः। कालिन्दीवेणिकासङ्काशानि इव—यमुनाप्रवाहसदृशानि इव। सस्यन्दिरे—प्रसुस्रुवुः, दानजलानीति शेषः।

(११४) सिन्दूरेति।—सिन्दूररेणूनां—नागसम्भवचूर्णानां, करिकलेवर-

णायमानबिम्बे रवौ अस्तमयसमयं शशङ्किरे शकुनयः। करिणां (११५) षट्पदकोलाहलमांसलैः कर्णतालनिस्वनैः तिरोदधिरे दुन्दुभिध्वनयः। (११६) दोधूयमानश्च सचराचरम् आचचाम चामरसङ्घातो विश्वम्। (११७) अश्रीयश्वास-निश्चितैः शिथिलन्दे सिन्धुवारदामशुचिभिः निरन्तरम् अन्तरीक्षं फेनपिण्डैः। (११८) पिण्डीभूततगरस्तवकपाण्डुराणि पपुः

निहितानाम् इति भावः; राशिभिः,—निचयैः, अरुणायमानं—लोहितायमानं, तत्र प्रतिफलनादिति भावः; बिम्बं—मण्डलं यस्य तथाभूते; एतेन हर्षस्य गजानामतिबाहुल्यं महौन्नत्यञ्च सूचितम्; रवौ—सूर्ये, सतीति भावः। अस्तमयसमयम्—अस्तगमनकालं, सन्ध्याकालमित्यर्थः, शशङ्किरे—शङ्कितवन्तः। शकुनयः,—चक्रवाकाः इति यावत्; तेषां तथा दर्शनेन वियोगशङ्का जातेति भावः। इह कविप्रौढोक्तिसिद्धो भ्रमः अस्तगामिसूर्यबिम्बसाम्यातिशय्यव्यङ्गकः, तेन हि शकुनानाम् अस्तमनोन्मुखे रवौ अस्तमनोन्मुखत्वबुद्धिरुदयात् भ्रान्तिमदलङ्कारः।

(११५) षट्पदेति।—षट्पदानां—भ्रमराणां, मदवारिलुब्धानामिति भावः; कोलाहलेन—कलकलेन, मांसलाः,—प्रहृष्टा इत्यर्थः, तैः, ["सिध्मादिभ्यश्च" (५।२।९७ पा०) इति पाशिकी लच्]। कर्णेति।—कर्णौ—श्रवणे एव, तालौ—करतलास्फालने, काष्ठनिर्मितवाद्यविशेषौ वा, तयोः निःस्वनैः,—शब्दैः। तिरोदधिरे—तिरस्कृताः। कर्णतालशब्दबाहुल्येन दुन्दुभिध्वनयः न श्रुतिगोचरा अभवन्नित्यर्थः।

(११६) दोधूयमानः,—पुनःपुनः सञ्चाल्यमानः, [धुनीतेः धूनातेः धवतेर्वा यङ्लुकि कर्मणि शानचि रूपम्]। सचराचरं—स्थावरजङ्गमसहितम्। आचचाम—जग्रास, आच्छादयामासेति यावत्।

(११७) अश्रीयेति।—अश्रीयम्—अश्रूणां समूहः, तस्य श्वासेन—निश्वासपवनेन, निश्चितानि—पातितानीत्यर्थः, तैः। सिन्धुवारदामशुचिभिः,—निर्गुण्डीमालाविशदैः। फेनपिण्डैः,—हिण्डीरचयैः। शिथिलन्दे—शुक्लतां प्रापयाञ्चक्रे, [श्लिन्दतेः भौवादिकस्य कर्मणि लिटि रूपम्]। एतेनास्य अश्रूणामपि अतिबाहुल्यं सूचितम्।

(११८) पिण्डीभूतेति।—पिण्डीभूतः,—राशीभूतः, यः तगरस्तवकः,—तगरपुष्पगुच्छः, तद्वत् पाण्डुराणि—शुभ्राणि। पपुरिव—जगमुरिव, अनेकरूपकः

इव परस्परसङ्घट्टनष्टाष्टदिशं दिवसम् उच्चचामीकरदण्डानि आतपत्रवनानि। (११९) रजोरजनीनिमीलितो मुकुटमणिशिलावलीबालातपेन विचकास वासरः। (१२०) राजतैः हिरण्मयैश्च मण्डनकभाण्डमण्डलैः क्रादमानैः हरितीकृताः परिक्रादा हरितो बधिरतां दधुः। (१२१) अरिप्रतापानलनिर्मूलनाय इव मदोष्मशीकरैः शिशीकिरे करिणः ककुभां चक्रम्। (१२२) चक्षुषाम् उन्मेषं मुमुषुः तडिच्चञ्चलानि

ह्रवच्छायया दिवालोकस्य प्रतिहतत्वादिति भावः। परस्परेति।—परस्परासाम्—अन्योऽन्यासां, दिशामेवेति भावः, सङ्घट्टन—सङ्घर्षणेन, नष्टाः,—अदर्शनं गताः, अष्टौ—अष्टसङ्ख्याकाः, दिशः,—ककुभः यत्र तम्। उच्चचामीकरदण्डानि—उच्चाः,—उन्नताः, चामीकरदण्डाः,—सौवर्णयष्टयः येषां तानि। आतपत्रवनानि—छत्रारण्यानि, अनेकसङ्ख्याकछत्राणीत्यर्थः।

(११९) रज इति।—रज एव—धूलिरेव, सन्ध्यपदीप्तितमिति भावः; रजनी—रात्रिः; गगनमण्डलाच्छादनादिति भावः; तत्र निमीलितः,—रजसा आच्छन्न इति यावत्। मुकुटेति।—मुकुटमणिशिलावलीनां—किरीटरत्नानां, बालातपेन—नवातपेन, मन्दकिरणेनेति यावत्, विचकास—विदिद्युते, व्यद्योतत इत्यर्थः। वासरः,—दिवसः। रजसाऽन्धकारीभूतोऽपि दिवसः मुकुटमणिप्रभया प्रचकाशे इति निष्कर्षः।

(१२०) राजतैः,—रौप्यैः, हिरण्मयैः,—सौवर्णैश्च, मण्डनकभाण्डमण्डलैः,—मण्डनकानि—शोभाजनकानि, यानि भाण्डानि—अश्वाभरणानि, ("स्याद्वाण्डमश्वाभरणे" इत्यमरः) भूषणपात्राणि वा, तेषां मण्डलैः,—समूहैः, क्रादमानैः,—रणद्भिः, परिक्रादाः,—परितो निस्वनपूरिताः, राजतादिभाण्डनिचयैः निनादिता इत्यर्थः, [क्रादते: कर्मणि घञ्]। हरितीकृताः,—श्यामीकृताः, सर्व्वतः धान्यलम्बादिना इति भावः; यद्वा,—हरितीकृताः,—शबलीकृता इत्यर्थः; आभरणप्रभाभिरिति भावः; हरितः,—दिशः, ("दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यमरः)।

(१२१) अरीति।—अरीणां—शत्रूणां, प्रतापानलस्य—तेजोवह्नेः, निर्मूलनाय इव—निर्वापणाय इव। मदोष्मशीकरैः,—दानवारिणां सन्तप्तकणिकाभिः, ककुभां—दिशां, चक्रं—मण्डलं, शिशीकिरे—सिषिचुः, ["श्रीकृते" इत्यस्य भौवादिकस्य लिटि रूपम्]; अजस्रसन्ततमदासारैः सिक्तवन्तः इत्याशयः।

(१२२) चक्षुषां—नेत्राणाम्; तत्त्वत्यजनायेति भावः; उन्मेषं—विकासं,

चूडामणीनामर्चींषि। स्वयमपि (१२३) विसिस्मिये बलानां भूपालः सर्वतो विक्षिप्तचक्षुश्च अद्राक्षीत् आवासस्थानसकाशात् प्रतिष्ठमानं स्कन्धावारम्, (१२४) अधोक्षजकुक्षेः इव युगादौ निष्पतन्तं जीवलोकम्, अम्भोनिधिमिव कुम्भभुवो वदनात् प्लावितभुवनम् उद्गच्छन्तम्, (१२५) अर्जुनबाहुदण्डसहस्रसम्पिण्डितोन्मुक्तमिव सहस्रधा प्रवर्त्तमानं प्रवाहं नर्मदायाः। (१२६)"प्रसर तात! भाव! किं विलम्बसे? त्वङ्कृति

मुमुषुः,—अहरन्; दृष्टात् तीव्रालोकसम्पातस्य दृष्टिप्रतिबन्धकत्वादिति भावः। विद्युत्सरखानि—विद्युत्सरखानि। अर्चींषि—किरणाः।

(१२३) विसिस्मिये—अद्भुतम् अमन्यत इत्यर्थः। बलानां—सैन्यानाम्। [अत्र "षष्ठी शेषे" (२।३।५० पा०) इति षष्ठी] भूपालः,—हर्षः। विक्षिप्तचक्षुः,—पातितनेत्रः। प्रतिष्ठमानं—प्रचलन्तम्। स्कन्धावारं—शिबिरं, चतुरङ्गवाहिनीसोमम् इत्यर्थः। सर्व्वतो विक्षिप्तचक्षुः भूपालः स्वयमपि आवासस्थानसकाशात् प्रतिष्ठमानं बलानां स्कन्धावारम् अद्राक्षीत् विसिस्मिये च इत्यन्वयः।

(१२४) अधोक्षजकुक्षेरिव—नारायणोदरादिव। युगादौ—सत्ययुगप्रारम्भे। निष्पतन्तं—निःसरन्तम्। कुम्भभुवः,—अगस्त्यस्य, ("अगस्त्यः कुम्भसम्भवः" इत्यमरः)। प्लावितभुवनं—प्लावितं भुवनं येन तथाभूतं, व्याप्तजगतमित्यर्थः; यद्वा,—क्रियाविशेषणचैतत्, प्लावितं भुवनं यस्मिन् कर्म्मणि तद्यथा स्यात् तथेत्यर्थः। उद्गच्छन्तं—निःसरन्तमित्यर्थः।

(१२५) अर्जुनेति।—अर्जुनस्य—कार्त्तवीर्य्यस्य इति भावः, बाहुदण्डानां—भुजयष्टीनां, सहस्रेण—दशशतसङ्ख्यया, आदौ सम्पिण्डितं—समाहृतं, पश्चादुन्मुक्तमिव—परित्यक्तमिव। सहस्रधा—सहस्रभागीभूयेत्यर्थः। प्रवर्त्तमानं—प्रसरन्तम्। पूर्वं कार्त्तवीर्य्यार्জ্জুনेन हैहयाधिपतिना पुरन्ध्रीभिः सह नर्म्मदायां जलकेलिनिरतेन तत्प्रवाहो भुजसहस्रेण उभयतो रुद्धा पश्चात्यक्तः इति वार्त्ता। इह आवासस्थानसकाशात्प्रतिष्ठमानं स्कन्धावारमारभ्येतदवधि स्कन्धावारस्योपमानानि अधोक्षजात् निष्पतज्जीवलोकादिकानि अनेकानि एकवाक्यान्वितानि इति मालोपमा।

(१२६) प्रसर—गच्छ। तात—वत्स! भाव!—विद्वन्!, मान्य इत्यर्थः। विलम्बसे—चिरयसि। अङ्कति तु—चलति तु, प्रचण्डवेगेन तु धावसीति भावः,

तुरङ्गमः। भद्र! भग्नचरण इव सञ्चरसि यावदमी पुरःसराः सरभसम् उपरि पतन्ति। वाहयसि किमुष्ट्रम्? न पश्यसि निर्दय! शुकशिशुं शयानम्? वत्स रामिल! (१२७)रजसि यथा न नश्यसि। नो पश्यसि? गलति शक्तुप्रसेवकः। किमिवम् (१२८) इत्वर! त्वरसे? सौरभेय! सरणिम् अपहाय? हयमध्यं धावसि? धीवरि! विशसि गन्तुकामा; मातङ्गि! मातङ्गमार्गम्? अङ्ग! गलति तिरश्चीना चणकगोणी। गणयसि न मामारटन्तम्? अवटम् अत-

[अङ्गते: भौवादिकस्य लटि रूपं, लुकारस्य किन्वथकत्वं ज्ञेयम्]। भग्नचरण इव—स्खलितपद इव। पुरःसराः,—अग्रगामिनः। सरभसं—सवेगम्। शयानं शुकशिशुं पक्षा दलन् यासीति भावः। ["शुकशिशुम्" इत्यत्र "निःशुकशिशुम्" इति पाठे,—निःशुकं—निःशिशुम्, अजातचौडसंस्कारत्वादत्यल्पवयस्कमित्यर्थः; अत एव सर्वथा क्षपाऽऽस्पदम् इति भावः]।

(१२७) रजसि—धूलिराशौ इति भावः, यथा न नश्यसि—न अदर्शनं यासि, तथा कुर्विति शेषः; यद्वा,—यथा रजसि—यादृक् अनुरक्तोभवसि, तथेति भावः; [रजतेः भौवादिकस्य लटि रूपम्] न नश्यसि—न प्राणान् गच्छसि; एतादृगनुरागस्य अभ्युदयहेतुत्वादिति भावः। गलति—दूरं गच्छतीत्यर्थः। शक्तुप्रसेवकः,—शक्तुना—तन्नामवस्तुकेन इति भावः, प्रकर्षेण सेवते इति तथोक्तः, भक्तदास इत्यर्थः; शक्तुभावबेतनो भृत्य इति भावः; तदाख्यो वा; यद्वा,—शक्तूनां प्रसेवकः,—शक्तुपूर्णः स्यूतः, शणपट्टादितन्तुनिर्मितः धान्याद्याधारविशेषः इत्यर्थः, ("स्यूतप्रसेवौ" इत्यमरः); "प्रसेवकः भस्त्राभरणम्" इत्येके, गलति—पतति, नो पश्यसि—नावलोकसे? ["नो" इत्यत्र "न" इति पाठान्तरम्] शक्तुदन्त्यादिरपि दृश्यते।

(१२८) इत्वर!—गमनशील! [इण् गतावित्यस्मात् "इण् नश—" (३। २। १६३ पा०) इत्यादिना क्वरप्प्रत्ययः]। त्वरसे—सत्वान्तोऽसि, द्रुतं धावसीत्यर्थः। सौरभेय!—वृषभ!, वृषभवत् दान्त इति भावः, ("……ऋषभो वृषभो वृषः। अनड्वान् सौरभेयो गौः" इत्यमरः) सरणिं—पन्थानम्। अपहाय—उत्सृज्य। धीवरि!—धीवरकन्ये! हयमध्यम्—अश्वाभ्यन्तरं, धावसि?—द्रुतं यासि? विशसि—आश्रयसि, प्रविशसीत्यर्थः। मातङ्गि!—चण्डालतनये इत्यर्थः, ("चण्डालश्वपचमातङ्ग…" इत्यमरः) मातङ्गमार्गं—इलिसरणिम्। अङ्गेति सम्बुद्धौ। गलति—; अवते। तिरश्चीना—अनृजुनिहितेति भावः। चणकगोणी—चणकाख्यधान्य-

टेन अवतरसि ? (१२९)सुखमास्स स्वैरिणि ! सौवीरक ! कुम्भो भग्नः। मन्थरक ! खादिष्यसि गतः सन्निम्बम्। उत्तानं प्रसादय। कियच्चिरं चिनोषि चेट ! वदराणि ? दूरं गन्तव्यम्। किमद्यैव विद्रासि ? द्रोणक ! द्राघीयसी दण्डयात्रा।(१३०)विनैकेन निष्ठुरकेण निष्क्रेयम् अस्माकम्। अयतः पन्थाः स्थपुटकः। स्थावरक ! यथा न भनक्ति फाणितस्थालीम्। (१३१) गरीयान् गण्डकतण्डुलभारको न निर्वहति दम्यः। दासक ! माषीणात्

स्थलिका। गण्यसि—बहु मन्यसे। आरटन्तं—भ्रमन्तम्। अवटं—गर्तं, ("गर्त्तावटौ भुवि श्वभ्रे" इत्यमरः) अतटेन—असार्गेण, अप्रशस्तार्धभागीयपथेनेत्यर्थः।

(१२९) आस्सु—स्थितिं कुरु। स्वैरिणि !—स्वेच्छाचारिणि ! ["स्वादीरेरिणीः" (वा०) इति ङीः] सौवीरक !—कान्जिकतत्त्वावधायकेत्यर्थः, उत्तानं—ह्रस्वम्। ("उत्ता भद्रो बलीवर्दः कृषभो वृषभो ह्रस्वः" इत्यमरः)। प्रसादय—सान्त्वय इत्यर्थः। चिनोषि—गच्छसि ? वदराणि—कोलफलानि। दूरं गन्तव्यं—दूरमध्वानमित्यर्थः; केचन दासाः क्षुत्परीताः पथि कर्कन्धुफलं भोक्तुं प्रवृत्ताः, तन्निवृत्त्यर्थमियमुक्तिरिति ज्ञेयम्। विद्रासि—प्रयासि, व्रजसि इति यावत्। अद्यैव—इदानीमेव। द्राघीयसी—अतिदीर्घा, अतिमहतीत्यर्थः। दण्डयात्रा—सङ्ग्रामप्रयाणम्, अस्माकमिति शेषः; अतः अद्यैव गन्तव्यदेशे गमनम् असम्भावितमेवेति मन्यामहे इति भावः।

(१३०) विनैकेन—एकेन—केवलेन विना, ["पृथग्विना—" (२।३।३२ पा०) इत्यादिना पञ्चमी तृतीया] निष्ठुरकेण—निर्दयाचरणेन, सङ्ग्रामेण इति भावः; यद्वा,—एकेन—एकमात्रेण, निष्ठुरकेण—निर्दयेन, अप्राप्तेन इत्यर्थः, विना—अप्राप्तप्राप्तिमन्तरेणेत्यर्थः, निष्क्रेयम्—ऋणं, शोधनीयं न भवतीति शेषः। स्थपुटकः,—विषमस्थानसञ्चारी, बलीवर्दतेन पथा गच्छति, अयतः पन्थाः किं न पश्यति भवान् इत्यर्थः। भनक्ति—भग्नां करोति। फाणितस्थालीं—फाणितम्—इक्षुविकारः, गुड इति यावत्, तस्य स्थालीं—भाण्डमित्यर्थः; यद्वा,—फाणिः,—दधिमिश्रितशक्तुः, सोऽस्यास्तीत्यर्थे इतचि, तत्पूर्णस्थालीमिति यावत्।

(१३१) गण्डकेति।—गण्डकतण्डुलभारकः,—गण्डकेषु—पशुविशेषेषु, खड्गिषु इत्यर्थः, तण्डुलभारकः,—तण्डुलभारः, गरीयान्—अतीव गुरुः, महानित्यर्थः। दम्यः,—दमनीयः, शिक्षयितुं योग्य इति भावः; यद्वा,—गण्डकः,—सङ्ग्रामभेदः, तत्परिमित इत्यर्थः, तण्डुलः,—वितुषं धान्यं, तं बिभर्त्ति वहति यत्तण्डुलः, अत्यल्पतण्डुल-

अमुतः द्राग् दात्रेण मुखघासपूलकं लुनीहि। को जानाति (१३२) यवसगतं गतानाम्? धव! वारय बलीवर्दान्। वाहीकरक्षितं क्षेत्रमिदम्। (१३३) लम्बिता शकटी, शाक्करं धुरन्धरं धुरि धवलं नियुङ्क्ष्व। यक्षपालित! प्रमदाः पिनष्टि, अक्षिणी किं ते स्फुटिते? हत हस्तिपक रे! (१३४) दोष्यसि करिकरदण्डे? समद सम्मर्द! कर्दमे खलसि? भ्रातर्भाव विधुरबन्धो! उद्धर पङ्कात् अनड्वाहम्। हत एहि (१३५) माणवक! घनैर्भघटासंघट्ट-

---

वाही इति यावत्। निर्वहति—वोढुं शक्नोति। माषीणात्—माषकलायचेष्टात्, ("तिक्खतैलौनवन्माषीमाणभङ्गाद् हिङ्पता" इत्यमरः) अमुतः,—अमुष्मात्, द्राक्—झटिति। मुखघासपूलकं—किञ्चिन्मात्रबुभुक्षानिवृत्तये घासः मुखघासः, तस्य पूलकं—गुच्छम्। लुनीहि—छिन्धि।

(१३२) यवसगतं—यवसं—घास एव, गतं—गतिरित्यर्थः, मत, "कृदभिहिती भावो द्रव्यवत् प्रकाशते" इति न्यायात् इति भावः। गतानां—प्रस्थितानां, पशूनामिति शेषः; पशवो यवसं विना क्षणमपि जीवितुं नोत्सहन्ते इति को जानाति!! इति भावः। धव—पुरुष! ("धवः पुमान् नरे धूर्ते पत्यौ हृक्षान्तरेऽपि च" इति मेदिनी)। बलीवर्दान्—वृषभान्, वारय—अस्मच्चेत्रात् ताडय इत्यर्थः। वाहीकरक्षितं—परिपालकरक्षितम्; दूषदप्यत्यादृतो महाप्रमादः प्रमज्ञेत् इत्याशयः।

(१३३) लम्बिता—भारावदनमसमित्यर्थः। शकटी—क्षुद्रशकटम्। शाक्करं—शक्कर एव शाक्करः तं, शुद्ध युवानं वा वृषभमित्यर्थः, शक्करशब्दस्यापि वृषभवाचकत्वं दृश्यते; दृष्टसञ्ज्ञाभिः षष्ठ पुष्ट पृष्ठ शक्करशब्दस्य वृषभवाचकत्वं, यथा—"शक्करशक्कर-शक्कर—" इति। धुरन्धरं—भारवहनक्षममित्यर्थः। धुरि—यानमुखे, ("धूः स्त्री क्लीबे यानमुखम्" इत्यमरः)। धवलं—श्वेतकायम्; नियुङ्क्ष्व—योजय इत्यर्थः। यक्षपालित! —सम्बोधनपदमिदम्। प्रमदाः,—स्त्रियः, पिनष्टि—दलसि? पदलिखेपेण इति भावः, [पिषेः रौधादिकस्य रूपम्] स्फुटिते—विदीर्णे; अन्यः किमु भवानिति भावः।

(१३४) दोष्यसि—क्रीडसि। करिकरदण्डे—हस्तिशुण्डादण्डे, हस्तिशुण्डोपरि इत्यर्थः। समद!—मत्त इत्यर्थः, सम्मर्द! इति कस्यचित् सम्बोधनम्। खलसि—पतसि। भ्रातर्भाव—मान्य, विधुरबन्धो!—दीनदयालो! अनड्वाहम्—वृषम्।

(१३५) माणवक!—बालक! ("बालस्तु स्यान्माणवकः" इत्यमरः)।

सङ्कटे नास्ति निस्तरणम्" (१३६) इत्येवमादिप्रवर्त्तमानानेकसंलापं, क्वचित् (१३७) स्वेच्छामृदितोद्दामग्रस्यघासविघस-सुखसम्पन्नान्नपुष्टैः केलिकोकिलैः किलकिलायमानैः मेण्ढवण्ड-वठरलम्बनलेम्निकलुण्ठकचेटचाटचण्डालमण्डलैः आखीरैः स्तूय-

घनेति।—घना—निबिड़ा, इभघटा—हस्तिसङ्घः, तस्याः सङ्कटेन—सम्मर्देन, सङ्कटं—सम्बाधं तस्मिन्। निस्तरणं—निस्तारः, उद्धार इत्यर्थः।

(१३६) "इत्येवमादिप्रवर्त्तमानानेकसंलापं"·····"वीचमाथः कटकं जगाम" इत्युत्तरेणान्वयः। इत्येवमादिप्रवर्त्तमानानेकसंलापम्—इत्यादिप्रवर्त्तमानबहुविध-सङ्कथम्। कटकं विशिनष्टि, क्वचिदित्यादि।

(१३७) स्वेच्छेति।—स्वेच्छया—स्वच्छन्देन, मृदितानि—दलितानि, चिबात् समाहृत्य दधत्यादिभिरसनेन परिष्कृतानीत्यर्थः, उद्दामानि—उद्भटानि, प्रभूतानि इति यावत्, ग्रस्यानि—धान्यादयः, तथा घासाः,—यवसानि, तथा विघसाः,—भृत्याद्युपयोगशिष्टानि अन्नानि, ("अमृतं विघसो यज्ञशेषभोजनशेषयोः" इत्यमरः) परस्परलुण्ठनानि वा, तैः विनिमयभूतैरिति भावः; सुखेन—अनायासेन, सम्पन्नानि—सङ्गृहीतानि, यानि अन्नानि—भोज्यानि, सैन्येभ्यो धान्यादिकं दत्त्वा लब्धानि भक्ष्याणि इत्यर्थः. तैः पुष्टाः,—पूरितोदराः तैः, केलिकोकिलैः,—क्रीड़ापरैः कोकिलैः, कोकिलमङ्गलैरिति यावत्, परान्नपुष्टत्वादिति भावः; ["केलिकोकिलैः" इत्यत्र "केलिकलैः" इति पाठे,—क्रीड़ाप्रियैः, प्रहसनपरैरित्यर्थः, बहुभाषिभिर्वा। किलकिलायमानैः,—अतिनीचत्वात् किलकिलाशब्दं कुर्वद्भिरित्यर्थः। मेण्ढेति।—मेण्ढाः,—हस्तिजागरिकाः, एतच्छब्दस्याप्रसिद्धत्वात् "मेटाः" "मेडाः" वा इति मन्यामहे, तथात्वे उन्मत्ताः तदर्थ इति श्रेयम्; वण्डाः,—अकृतविवाहाः तरुणाः, हस्त्यारूढविकला वा "बँड़े" इति बङ्गभाषा, ["वण्ड—" इत्यत्र "वण्ठ" इति पाठे,—वण्ठाः,—खर्व्वाः, "बँटे" इति बङ्गभाषा] वठराः,—मूर्खाः, लम्बनाः,—गर्हभदासाः, लेम्निकाः,—जनपरिचारकाः, लुण्ठकाः,—चौराः, चेटाः,—दासाः, चाटाः,—धूर्त्ताः, ["चाट—" इत्यत्र "शाट—" इति पाठान्तरम्] चण्डालाः,—अश्वपाला इत्यर्थः, तेषां मण्डलानि—समूहाः तैः, आखीरैः,—प्रगल्भैः, मूर्खवद्भिर्वा, अण्डानि—पुंसामङ्गावयवविशेषाः, तानि सन्ति एषामिति व्युत्पत्त्या "आण्डाण्डादीरजीरचौ" (४।२।१११ पा०) इत्यण्प्रत्ययादित्यर्थे दूरम्; ["आखीरैः" इत्यत्र "राण्डीरैः" इति पाठे,—राण्डीरैः,—रण्डापुत्रैः, रण्डा—विधवा स्त्री, ("रण्डा

मानं, क्वचित् (१३८) असहायैः क्लेशार्जितकुग्रामकुटुम्बिसम्पादितसीदत्सौरभेयसम्बलसंवाहनायासावेगागतसंयोगैः (१३९) स्वयङ्गृहीतगृहोपस्करैः "इयम् एका कथञ्चित् दण्डयात्रा यातु, यातु पातालतलं तृष्णा (१४०) भूतेः अभवनिर्भवतु,

मूषिकपर्णाच्च विषवायाश्च यौषिति" इति मेदिनी); एतत्पक्षे रण्डाशब्दादप्यर्थे ईरन् स्यात् इति सङ्क्षेपः ; यद्वा,—रण्डाशब्दात् "बाह्वादिभ्यश्च" (४।१।९६ पा०) इति इञि राण्डिरितिसिद्धे, तमीरयति पुष्णाति इत्यर्थे ईरयतेः पचाद्यजादिकमिति शेषं, रण्डापुत्रपोषकैरिति तदर्थः] श्रूयमानं—स्तुत्या प्रशस्यमानमित्यर्थः।

(१३८) असहायैः,—अप्राप्तसाहाय्यैरित्यर्थः। क्लेशेति।—क्लेशेन—आयासेन, अर्जितं—लब्धं, कुग्रामकुटुम्बिभिः,—नीचग्रामीणैः, सम्पादितं—दत्तं, यत् सीदतः,—कृच्छ्रं गतस्य, सौरभेयस्य—कुकुरस्य इत्यर्थः, सम्बलं—पाथेयं, प्राणधारणोपयोगि यत्किञ्चिददनीयं द्रव्यमित्यर्थः, तस्य संवाहने—सङ्क्रमणे, य आयासः,—क्लेशः, तेन हेतुना य आवेगः,—त्वरा तेन, आगतः,—प्राप्तः, संयोगः,—सङ्गः यैः ; अन्नकष्टातिशयमसहिष्णुभिः अतः सहागतकुकुरभक्त्यलाभाशया समागतैरिति भावः ; यद्वा,—क्लेशार्जितकुग्रामकुटुम्बिसम्पादिताः,—क्लेशार्जितैः,—भूयसा श्रमेण लब्धैरन्नादिभिः, करणैः, कुग्रामकुटुम्बिभिः,—पल्लीवासलब्धैः, कर्तृभिः, सम्पादिताः,—पोषिताः, अत एव सीदन्तः,—अवसादं गच्छन्तः, यथेष्टखाद्यप्राप्तेरभावादिति भावः ; सौरभेयाः,—वृषभा एव, सम्बलाः,—अवश्यिष्टधनभूताः, पाथेयप्रायाः इत्यर्थः, संवाहनानि—भारादिवाहकाश्च ; [संपूर्वकात् वहतेः णिच करणे ल्युट्] येषां तथाभूतानां दुरवस्थकृषीवलानामित्यर्थः, यै आयासावेगागतसंयोगाः राष्ट्रीयदुरवस्थाज्ञापनायेति भावः, तैः।

(१३९) स्वयमिति।—स्वयङ्गृहीतानि—आत्मनैव धृतानि, आनीतानीत्यर्थः, न तु दासादिनेति भावः ; गृहस्य—भवनस्य, उपस्करणानि—सामग्र्याः, शय्याऽऽसनादीनि भूषणजातानि इति भावः, ["उपात्प्रतियत्न—" (६ । १ । १३९ पा०) इत्यादिना उपात्कृञः सुट्] यैः तथाभूतैः। इयं—पुरोवर्त्तिनी, दण्डयात्रा—युद्धार्थं प्रचलिता सेनेति यावत्, एकैव—अस्माकं सहायभावमप्राप्तैव इत्यर्थः, यातु—गच्छतु। तृष्णा—लोभः, आशेति यावत्, अस्माकमिति शेषः, पातालतलं—पातालस्यापि अधः इत्यर्थः, यातु—गच्छतु ; एतत्सङ्गेन अस्माकं सुखाशा विरमतु इति भावः।

(१४०) भूतेः,—सम्पदः, अभवनिः,—अनुत्पत्तिरित्यर्थः, ["आकोशे नञ्यनिः"

शिवं सेवा करोतु, स्वस्ति (१४१) सर्वदुःखकूटाय कटकाय" इति दुर्विधकुलपुत्रकैः निन्द्यमानं, क्वचित् (१४२) अतितीक्ष्णसलिलस्रोतःपातिनीगतैः इव ग्रथितैः इव षड्ङ्घ्रिभूतैर्जनैः अतिदुतं द्रवद्भिः (१४३) क्षुण्णकठिनस्कन्धगुरुलगुडैः गृहीतसौवर्णपादपीठीकरङ्ककलशपतद्ग्राहावगाहैः (१४४) प्रत्यासन्नपार्थिवोपकरणग्रहणगर्व्यदुर्वारैः सर्व्वमेव बहिः-

(३।३।११२ पा०) इत्यनिप्रत्ययः] भवतु—सम्पद्यताम् ; मंसारे मृतिः नश्यतु इति भावः। सेवा—सत्यभावः, शिवं—मङ्गलं, करोतु—विदधातु ।

(१४१) सर्व्वदुःखकूटाय—समग्रक्लेशसङ्घातरूपावेश्यर्थः ; कटकाय—सैनिकाय, सैनिकहस्तये इति भावः ; स्वस्ति—शुभम्, अस्तिति शेषः, ["नमःस्वस्ति—" (२।३।१६ पा०) इत्यादिना चतुर्थी। "शिवं सेवा·····कटकाय" इत्यत्र "शिवसेवा करोतु स्वस्ति सर्व्वदुःखकूटाय कटकाय" इति पाठे,—शिवसेवा—शिवाराधना, सर्व्वदुःखकूटाय कटकाय स्वस्ति करोतु इत्यन्वयः ; शिवसेवा सैनिकहस्ते रचतु लोकानिति भावः]। दुर्विधेति।—दुर्विधाः,—दरिद्राः, ("निःस्वस्तु दुर्विधो दीनो दरिद्री दुर्गतोऽपि सः" इत्यमरः) कुलपुत्रकाः,—कुलक्रमागतसेवका इत्यर्थः, तैः। ["दुर्विधकुलपुत्रकैः" इत्यत्र "दुर्विधबहुकुलपुत्रकैः" इति पाठान्तरम्]।

(१४२) अतितीक्ष्णेति।—अतितीक्ष्णम्—अत्युग्रम्, अतिवेगवदित्यर्थः, यत् सलिलस्रोतः,—जलप्रवाहः, तत्र पातिनौ—चलन्तौ, नावं—तरणिं, गताः,—अधिष्ठिताः तैरिव। ग्रथितैरिव—गुम्फितैरिव ; लोकाधिक्यादविरलभावेनावस्थितैः द्रुतगामिभिरिति भावः। षड्ङ्घ्रिभूतैः,—भ्रमिवद्भैः, द्रवद्भिः,—गच्छद्भिः।

(१४३) क्षुण्णेति।—क्षुण्णेषु—नियतभारोद्वहनात् म्लानीभूतेष्वित्यर्थः, कठिनेषु—दृढेषु, स्कन्धेषु—अंसदेशेषु, गुरवः,—महान्तः, लगुडाः,—दण्डाः येषां तैः। गृहीतेति।—गृहीताः,—अवलम्बिताः, सौवर्णपादपीठ्यः,—काञ्चनपादपीठानि, करङ्काः,—ताम्बूलपात्राणि, च कलशाः,—कुम्भाः, तथा पतद्ग्राहाः,—पतताम्—सुखादिभ्यः स्रवताम्, जलादीनामिति शेषः, ग्राहाः,—ग्रहणं यत्र तैः, निष्ठीवनपात्राणि इत्यर्थः, ("प्रतिग्रहः पतद्ग्रहः" इत्यमरः) अवगाहाः,—आलम्बो यस्य यैः तथाभूतैः।

(१४४) प्रत्यासन्नेति।—प्रत्यासन्नस्य—निकटस्थस्य, पार्थिवस्य—राज्ञः, उपकरणानाम्—आसनादीनां, ग्रहणेन—धारणेन, वहनेनेत्यर्थः, ये गर्व्याः,—

कारयद्भिः भूपतिभृतकभारिकैः महानसोपकरणवाहिभिश्च (१४५) बहुवराहवर्ध्रवार्ध्रीणसैः (१४६) लम्बमानहरिणचटुक-चटकजूटजटिलैः शिग्रुशशकशाकपत्रवेत्रायसङ्कहसङ्काहिभिः (१४७) शुक्लकर्पटप्राहृतमुखैकदेशदत्तार्द्रमुद्रागुप्तगोरसभाण्डैः

अहङ्कारः; वयं राजभृत्या इत्येवंरूपा इति भावः, तैः; दुर्वाराः,—वारयितुमशक्याः, उद्धता इति यावत्, तैः। सर्व्वमेव—जनमिति शेषः, वहिः कारयद्भिः,—निरस्यद्भिरित्यर्थः, पदगर्वेण अवज्ञया इवेति भावः। भूपतिभृतकभारिकैः,—भूपतेः,—राज्ञः, भृतकं—भरणोपयोगि अन्नादिकमित्यर्थः, तस्य भारिकाः,—भारवाहिनः तैः। महानसोपकरणवाहिभिः,—महानसे—पाकशालायां, ("समानौ रसवत्यान्तु पाकस्थानमहानसम्" इत्यमरः) यानि उपकरणानि—द्रव्यसम्भाराः, तानि वहन्ति—नयन्ति ये तैः, रन्धनसामग्रीवाहकैरित्यर्थः।

(१४५) बहुति।—बहूनि—सङ्गृहीतानि, वराहवर्ध्राणि—शूकरचर्म्माणि, शूकरचर्म्मनिर्म्मितरज्जुविशेषा इत्यर्थः, तथा वार्ध्रीणसाः,—वर्द्धीयच्छागविशेषाः, तच्चर्म्माणि वा यैः तथाभूतैः। ["बहुवराहवर्ध्रवार्ध्रीणसैः" इत्यत्र "बहुवराहवर्ध्रवार्ध्रीणसैः" इति पाठान्तरम्]।

(१४६) लम्बेति।—लम्बमानाः,—स्कन्धे धारणादिति भावः, हरिणस्य—मृगविशेषस्य, चटुकाः,—पूर्व्वभागाः, चटकाः,—पक्षिविशेषाश्च, तेषां जूटैः,—समूहैः, जटिलाः,—युक्ताः तैः। शिग्रुशेति।—शिग्रवः,—अत्यल्पवयसः, शशकाः,—पशुभेदाः, शाकपत्राणि—शाकानां—हरितकानां, व्यञ्जनोपयोगिद्रव्याणामित्यर्थः, ("अस्त्री शाकं हरितकम्" इत्यमरः) पत्राणि—पर्णानि, वेत्रायाणि—वंशाङ्कुराः, वानीराख्यलतायभागा वा, तेषां सङ्ग्रहैः—समाहृतौ, ("समाहृतिस्तु सङ्ग्रहः" इत्यमरः) नियुक्ता ये सङ्ग्राहिणः,—सञ्चयकारकाः, तथोक्तैः। वराङ्कुरप्रभृतिपादितव्यञ्जनानि स्वादवत्युष्टिवर्द्धनानि देशविशेषे बह्वाहृतानि दृश्यन्ते, इति शिग्रुशशकशाकैः तस्य सहयोगो न विषमयीजनागमकः इत्यवधेयम्।

(१४७) शुक्लेति।—शुक्लेन—श्वेतेन, कर्पटेन—वसनेन, प्राहृतम्—आच्छादितं, मुखं—वदनं येषां तानि, तथा एकदेशे—एकस्मिन् विभागे, दत्ता—लिखिता, आर्द्रा—अभिनवेति भावः, मुद्रा—चिह्नविशेषः येषां तानि, अत एव गुप्तानि—अप्रकाशानि, सुरक्षितानीत्यर्थः; राजपेषतया विषप्रयोगादिभयादिति भावः; गोरसभाण्डानि—गव्यपात्राणि यैः तथाभूतैः। एतेन शत्रुप्रयुक्तैः पुरुषैः गूढचारिभिः

(१४८) तलकतापकतापिकाहस्तकताम्रचरुकटाहसङ्कटपिटकभारिकैः समुत्सार्थ्यमाणपुरोवर्त्तिजनं क्वचित् (१४९) "क्लेशोऽस्माकं, फलकाले अन्य एव विटाः समुपस्थास्यन्ते" इति मुखरैः पदे पदे पततां दुर्बलबलीवर्दानां खेटने नियुक्तैः खेटचेटकैः (१५०) खेद्यमानासंविभक्तकुलपुत्रलोकं, क्वचित् (१५१) नरपतिदर्शनकुतूहलादुभयतः व्रजवितप्रधावितग्रामेयकजनपदं,

---

विजिगीषूणां भोज्यपानीयादौ किञ्चित् छिद्रलब्ध्वा विषादिकं सञ्चिक्षिपते इति सूचितम्।

(१४८) तलकेति।—तलकः,—अग्निमकटिका, लोहचुल्लीति यावत्, तापकः,—ताम्रादिनिर्मितं सूपादिकरणपात्रं, तापिका—काकपालिका, यत्र तैलादिभिः भक्ष्याणि परिपच्यन्ते, "कटाहजातीयः" इति गम्यते; हस्तकः,—शूलं, मांसादिपाकसाधनमिति भावः; ताम्रचरुकटाहः,—ताम्रनिर्मितपायसान्नपाकार्थः कटाहविशेषः इत्यर्थः, सङ्कटपिटकः,—क्षुद्रभाण्डं, तेषां भारिकाः,—भारवाहिनः तैः। समुत्सार्थ्यमाणेति।—समुत्सार्थ्यमाणाः,—दूरीक्रियमाणाः, पुरोवर्त्तिनः,—अग्रस्थायिनः, जनाः,—लोकाः यस्य यत्र वा तथाभूतम्।

(१४९) क्लेशोऽस्माकं, बलीवर्दबहनादिना इति भावः, किन्तु फलकाले—पुरस्कारकपफलप्राप्तिसमये। विटाः,—धूर्त्ताः। समुपस्थास्यन्ते—सन्तोषयिष्यन्ते, प्रभुवा इति शेषः; न वयमिति भावः। मुखरैः,—वाचालैः। पदे पदे—प्रतिपदन्यासे, पतताम्—स्खलताम्, दौर्बल्यादिति भावः; दुर्बलबलीवर्दानां—क्लान्तवृषाणां, खेटने—प्रेरणे, चालने इति यावत्; ["खेटने" इत्यत्र "स्खलने" इति पाठे,—स्खलने—स्खलनादुद्धरणे इति भावः] नियुक्तैः,—आदिष्टैः। ["खेटने नियुक्तैः" इत्यत्र "नियुक्तैः खेटने" इति पाठान्तरम्]। खेटचेटकैः,—बालकभृत्यैः, ["खेटचेटकैः" इत्यत्र "स्खलचेटकैः" इति पाठे,—स्खलचेटकैः,—दुष्टभृत्यैरित्यर्थः]।

(१५०) खेद्यमानेति।—खेद्यमानाः,—क्लेश्यमानाः, चेटैरसह्यक्लेशा इति भावः; असंविभक्ताः,—कर्मविशेषेण सम्यगदत्तविभागाः, विशेषकर्मवाह्या इत्यर्थः; कुलपुत्रलोकाः,—कुलक्रमागतसेवकजना इत्यर्थः, यत्र तथोक्तम्।

(१५१) नरपतीति।—नरपतेः,—राज्ञः, दर्शने—अवलोकने, यत् कुतूहलम्—औत्सुक्यं तस्मात्, उभयतः,—उभयोः पार्श्वयोः, कटकस्येति भावः।

(१५२) मार्गग्रामनिर्गतैराग्रहारिकजाल्मैः पुरःसरजरन्मङ्क्तरो-त्तम्भिताभ्रःकुम्भैः(१५३)उपायनीकृतदधिगुडखण्डकुसुमकरण्डैः घटितपेटकैः सरभसं समुत्सर्पद्भिः (१५४) प्रकुपितप्रचण्ड-दण्डिविद्रावनविद्रुतैः दूरगतैरपि खलखड्गिरपि पतद्भिरपि नरेन्द्र-

---

प्रजविनेति।—प्रजविनं—सवेगं यथा स्यात्तथा, प्रधाविताः,—चलिताः, ग्रामेयकाः,—ग्राम्याः, जनपदाः,—जनाः ("भवेज्जनपदो जानपदोऽपि जनदेश्ययोः" इति मेदिनी) यस्मिन् तथाभूतम्।

(१५२) मार्गग्रामनिर्गतैः,—मार्गे—प्रयाणमार्गसमीपे स्थिता इत्यर्थः, ये ग्रामाः,—संवसथाः, विप्रादिवर्णप्राया: प्राकारपरिखादिरहिता: बहुजनवसतय इत्यर्थः, ("समौ संवसथग्रामौ" इत्यमरः) तेभ्यः निर्गताः,—निःसृताः तैः, आग्रहारिकजाल्मैः,—आग्रहारिकाः,—ग्रस्यरक्षणनियुक्ताः; यद्वा,—अग्रहारोऽग्रभारः नियतं दीयते येभ्यः इति व्युत्पत्त्या अग्रहारशब्दात् ढकि रूपम्; अग्रदानीयविप्राः इत्यर्थः, तेषु जाल्माः,—निर्बोधाः पुरुषाः तैः। पुरःसरैरिति।—पुरःसरैः,—अग्रगैः, जरद्भिः,—स्थविरैः, मङ्क्तरैः,—मङ्क्तजनैः, उत्तम्भिताः,—ऊर्ध्वीकृताः, अभ्रःकुम्भाः,—जलपूर्णकलशाः येषां तैः; याचिकगृहीतजलार्थमिति भावः।

(१५३) उपायनीकृतैरिति।—उपायनीकृतानि—उपढौकनत्वेन दत्तानि, राज्ञे इति भावः; दधीनि—क्षीरोत्तरावस्थाभावाः, ("दधि क्षीरोत्तरावस्थाभावे शीवासवासयोः" इति मेदिनी) गुडाः,—इक्षुपाकभेदाः,("गुडो गौडेक्षुपाकयोः" इत्यमरः) खण्डाः,—फाणितानि, इक्षुविकारविशेषाः इत्यर्थः,("मत्स्यण्डी फाणितं खण्डविकारौ" इत्यमरः) कुसुमानि—पुष्पाणि, एषां करण्डाः,—भाजनानि, ["अण्डन् करण्डभण्डाः" (उ० १ पा० १२८ सू०) इति कृत्योऽण्डन्] यैः तथाभूतैः। घटितपेटकैः,—कल्पितकदम्बकैः, श्रेणिबद्धैरित्यर्थः; यद्वा,—उपायनीकृतानां दध्यादीनां करण्डैः,—भाजनैः, घटिताः,—पूरिता इत्यर्थः, पेटकाः,—मञ्जूषाः यैस्तैः, ("पेटकः पुस्तकादीनां मञ्जूषायां कदम्बके" इति मेदिनी)। सरभसं—सवेगं, समुत्सर्पद्भिः,—समुपगच्छद्भिः। अहमहमिकया अन्यस्मादग्रत एव राजदर्शनाभिलाषात् इत्याशयः।

(१५४) प्रकुपितेति।—प्रकुपितानाम्—अतिक्रुद्धानां, प्रचण्डानाम्—उग्राणां, दण्डिनां—वेत्रधारिणां, विद्रावनेन—भयप्रदर्शनेन, विद्रुताः,—पलायिताः तैः। दूरगतैरपि—सुदूरमपसृतैरपि। खलखड्गिरपि—भक्षखड्गिरपि। नरेन्द्रेति।—नरेन्द्रे—

निहितदृष्टिभिः (१५५) असतोऽपि पूर्व्वभोगपतिदोषानुद्भावयद्भिः अतिक्रान्ताऽऽयुक्तकृतानि च शंसद्भिः (१५६) चिरन्तनचाटापराधांश्चाभिदधानैः उड्डूयमानधूलिपटलं, क्वचित् (१५७) एकान्त-प्रवृत्ताश्ववारचक्रचर्व्यमाणागामि-गौड़विलुप्यमाणशस्यसंरक्षणम्, (१५८) अपरैः आदिष्टपरिपालकपुरुषपरितुष्टैः-

---

राजनि हर्षे, निहिताः,—न्यस्ताः, दृष्टयः,—नेत्राणि यैः तैः। राजपुरुषकदर्थनाखलनाघातादीनि हर्षदर्शनार्थमविगणय्य खलनात् मद्दाराजदर्शनकुतूहलस्य चरमोत्कर्षः सूच्यते।

(१५५) असतोऽपि—मिथ्याभूतानपीत्यर्थः। पूर्व्वेति।—पूर्वे—प्राग्वर्त्तिन इत्यर्थः, ये भोगपतयः,—अन्नाच्छादनाधिकारिणः, तेषां दोषान्—निन्दा इति यावत्, उद्भावयद्भिः,—प्रकटयद्भिः। अतिक्रान्तेति।—अतिक्रान्तानां—पूर्व्ववर्त्तिनाम्, आयुक्तकानां—कर्म्मणि सम्यक् व्यापृतानां, कृतानि—समूहान्, शंसद्भिः,—सद्दोषयद्भिः; गुणतो दोषतो वा इति भावः; यद्वा,—अतिक्रान्तानि—गतानि, अयुक्तकानाम्—अयुक्तव्यवहाराणां, कृतानि—समूहान्, शंसद्भिः,—कथयद्भिः।

(१५६) चिरन्तनेति।—चिरन्तना,—अतिचिरस्थायिनः, ["सार्वं चिरम्—" (४।३।२३ पा०) इत्यादिना ष्ट्युः तुडागमश्च] ये चाटाः,—धूर्त्ताः, तेषाम् अपराधाः,—दोषाः तान्, अभिदधानैः,—कथयद्भिः। उड्डूयमानेति।—उड्डूयमानानि—उत्क्षिप्यमाणानि, सवेगपदक्षेपणेनेति भावः; धूलीनां—पांसूनां, पटलानि—निचया यत्र तथाभूतम्।

(१५७) एकान्तेति।—एकान्तप्रवृत्तानां—अतिद्रुतचलितानाम्; अश्ववाराणाम्—अश्वारोहिणां, चक्रैः,—समूहैः, चर्व्यमाणानि—भक्ष्यमाणानि, आगामिषु—भाविषु, कृष्यनुवर्त्तिनोऽन्त्यर्थः; गौड़ेषु—गौड़देशेषु, विलुप्यमाणानि—अन्विष्यमाणानि, अनुसन्धानलक्ष्यानीति यावत्, शस्यानां—धान्यकादीनामिति यावत्, संरक्षणानि—सञ्चयाः, संरक्षितशस्यानि इति यावत्, यस्य तथोक्तं, "क्रुदभिहितौ भावो द्रव्यवत् प्रकाशते" इति न्यायादिति भावः; गौड़े सङ्ग्रामकाले भक्ष्यार्थं ज्ञानपदैः सञ्चितानि शस्यानि अश्ववारैर्यत्र भक्षितानि इति तात्पर्य्यम्।

(१५८) अपरैः,—अन्यैः पुरुषैरिति शेषः। आदिष्टेति।—आदिष्टाः,—एते परिपाल्या इति राज्ञा निर्द्दिष्टाः, परिपालकाः,—परिपालयन्ति—सम्यक् पोषयन्तीत्यर्थः, इति तथाभूताः ये पुरुषाः,—लोकाः, तेषु परितुष्टाः,—सन्तोषं गताः तैः,

"धर्मः प्रत्यक्षो देवः" इति स्तुतौः आतन्वद्भिः अपरैः (१५९) लूयमाननिष्पत्रशस्यप्रकटितविषादैः खेदशुचा सकुटुम्बैरेव निर्गतैः (१६०) प्रवृद्धप्राणच्छेदैः परितापत्याजितभयैः "क्व राजा ? कुतो राजा ? कोदृशो वा राजा ?" इति (१६१) प्रारब्धनरनाथनिन्दं, प्रग्रकैश्च पदे पदे प्रजविप्रचण्डदण्डपाणिपेटकानुबद्धैः गिरिगुडकैः इव हन्यमानैः इतस्ततः मन्थरद्भिः, अपरैः युगपत् परापतित-

["परितुष्टैः" इत्यत्र "अपरितुष्टैः" इति पाठान्तरम्। उत्तरत्रापि "धर्मः प्रत्यक्षो देवः" इति व्याजस्तुतिरवगन्तव्यम्; देवः,—सम्राट् इव, प्रत्यक्षो धर्मः,—वियद्वान् धर्म एव, भवतीत्यर्थः, न तस्य दीर्घलेशोऽपि दृश्यते, यतो दुर्गतानन्यान् सम्यक्पालयितुमादिदेश, अधिक्षत्तास्तु परमदुर्जनाः, ते पुनः सज्ज्ञानेव सञ्चारात्मसात् कृत्वा आश्रितान् क्लेशयन्ति इति भावः]। स्तुतौः,—स्तवान्, प्रशंसावादानित्यर्थः। आतन्वद्भिः,—कुर्वद्भिः।

(१५९) लूयमानेति।—लूयमानैः,—छिद्यमानैः, सैनिकसङ्घैरिति भावः; अत एव निष्पत्रैः,—पर्णहीनीकृतैः, शस्यैः,—व्रीहिगोधूमादिकर्मभिरित्यर्थः, प्रकटितः,—प्रकाशितः, विषादः,—विषण्णता, कातरता इति यावत्, यैः येषां वा तथाभूतैः, खेदशुचा—खेदानां शस्यनाशजनितशोकेन इति यावत्। सकुटुम्बैरेव—सपरिवारैरेव।

(१६०) प्रवृद्धेति।—प्रवृद्धः,—सञ्जातप्रायः, प्राणानां—जीवनानां, छेदः,—कर्त्तनं, नाश इत्यर्थः, येषां तथाभूतैः; खेदशस्यनाशः तेषां प्राणनाशतुल्यदुःखदायक इति भावः। ["प्रवृद्धप्राणच्छेदैः" इत्यत्र "प्रवृद्धच्छेदैः" इति पाठे,—प्रवृद्धः,—जातः, छेदः, अङ्गानामिव इति भावः; येषां तथाभूतैः]। परितापेति।—परितापेन—शस्यनाशदुःखेन, त्याजितं—मोचितं, भयं—त्रासः, सैन्यादिभ्य इति भावः; येषां तथाभूतैः; निर्भयैरिति भावः। कुतः,—कस्मात्, कस्माद्देशागतोऽयं राजा इति भावः।

(१६१) प्रारब्धेति।—प्रारब्धा—उपक्रान्ता, नरनाथस्य—राज्ञः, निन्दा—दोषकीर्त्तनं यत्र यैर्न वा तथोक्तम्। "प्रग्रकैः" इत्यादौ "आयुषो बलात् कृतकवलकलम्" इत्यमरान्वयः। प्रग्रकान् विशिनष्टि, प्रजवीति।—प्रजविनः,—प्रकृष्टवेगशालिनः, प्रचण्डाः,—उग्राः, ये दण्डपाणयः,—वेत्रधारिणः पुरुषाः, तेषां पेटकेन—उदन्यकेन, समूहेन इत्यर्थः, अनुबद्धाः,—अनुसृताः तैः। गिरिगुडकैः इव—पाषाणखण्डैः इव, हन्यमानैः,—ताड्यमानैः। युगपत्—समकालं, परापतितैः,—समुप-

महाजनग्रस्तैः तिलशो विलुप्यमानैः (१६२) अनेकजन्तुजङ्घान्तरालनिःसरणकुशलिभिः (१६३) कुटिलिकाव्यंसितसादिबहुखभिः (१६४) पतल्लोष्टलगुडकोणकुठारकीलकुद्दालखनित्रदात्रयष्टिभिरपि निःसरद्भिः आयुषो बलात् कृतकलकलम्, अन्यत्र (१६५) सङ्गशो घासिकैः बुसधूलिधूस-

स्थितैः, महाजनैः,—महत्तरैः लोकैः, यस्ताः,—आक्रान्ताः तैः। तिलशः,—तिलं तिलं कृत्वा, विलुप्यमानैः,—गृह्यमाणैः।

(१६२) अनेकेति।—अनेकेषां—बहूनां, जन्तूनां—प्राणिनां, जङ्घान्तरालेभ्यः,—जङ्घयोः,—प्रसृतयोः, जानुगुल्फयोर्मध्यभागयोरित्यर्थः, ("जङ्घा तु प्रसृतौ" इत्यमरः) अन्तरालेभ्यः,—अभ्यन्तरेभ्यः, निःसरणे—निर्गमने, कुशलिनः,—निपुणाः, क्षुद्रदेहत्वादिति भावः; तैः, [कुशलशब्दस्यात्र विशेषणत्वमेव वेदितव्यं, तस्य च विशेषणत्वे मत्वर्थीयस्य पिष्टपेषणवत् निरर्थकत्वमेवेति क्षेयम्]।

(१६३) कुटिलिकेति।—कुटिलिकया—वक्रगमनेन, व्यंसिताः,—वञ्चिताः, सादिनाम्—अश्ववाराणां, बहवः,—अनेके, श्वानः,—कुक्कुराः, मृगयायां प्रयुताड्नार्थमानीता इति भावः; यैः तथाभूतैः। एतेन मूर्खहल्कायाध्यवसायाः मतिमद्भिरल्पविग्रहैरपि दुर्जेयगतिभिः प्राणिभिः सुधा क्रियन्ते इत्यवगम्यते।

(१६४) पतदिति।—पतन्तः,—वर्षन्तः इत्यर्थः, लोष्टानि—मृद्गुडकानि, ("लोष्टानि लेष्टवः पुंसि" इत्यमरः) लगुडाः,—दण्डाः, कोणाः,—वादनयष्टयः, ("कोणो वीणादिवादनम्" इत्यमरः) कुठाराः,—परशवः, कीलाः,—शङ्कवः, कुद्दालाः,—भूमिदारणाख्यास्त्रविशेषाः, "कोदाल" इति वङ्गभाषया प्रसिद्धाः, ("कुद्दालः स्यात् पुमान् भूमिदारणे युगपत्रके" इति मेदिनी) खनित्राणि—अवदारणानि, "खन्ता" इति प्रसिद्धानि खननसाधनानि अस्त्राणि इत्यर्थः, ("खनित्रमवदारणम्" इत्यमरः) ["अर्शिलू—" (३।२।१८४ पा०) इत्यादिना सूत्रः] दात्राणि—लवित्राणि, "दा" इति प्रसिद्धानि, ("दात्रं लवित्रम्" इत्यमरः) यष्टयः,—अस्त्रभेदाः, भुजदण्डानि वा, ("यष्टिः पुंसि स्यात् भुजदण्डके। स्त्रीहारलतायां मूर्धपुष्पाग्रास्त्रभेदयोः॥" इति मेदिनी) येषु तथोक्तैः। आयुषः,—जीवनकालस्य, दीर्घपरमायुष इत्यर्थः, बलात्—प्रभावात्। निःसरद्भिः,—निर्गच्छद्भिः; तत्तदस्त्राघातस्राभावादिति भावः। सङ्गशैरिति पूर्वोक्तैः योजना, कृतकलकलं—कृतकोलाहलम्।

(१६५) सङ्गशः,—बहुशः, घासिकैः,—घासे नियुक्तैः, घासकुट्टादिभिः

रितघासजालजालकितजघनैश्च (१६६) पुराणपर्य्याणैकदेश-दोलायमानदात्रैश्च शीर्णोर्णाशकलशिथिलमलिनमलकुथैश्च (१६७) प्रभुप्रसादीकृतपाटितपटच्चरचलच्चोलकधारिभिश्च धावमानैः उद्धूयमानधूलिपटलं, क्वचित् (१६८) एकान्तप्रवृत्ताश्ववारचक्रचर्व्यमाणागामिगौड़विग्रहं, क्वचित्

घासवाड़िभिर्वा इत्यर्थः। बुसेति।—बुसेन—कड़ङ्करेण, ("कड़ङ्करो बुसं क्लीवे" इत्यमरः) तथा धूलिभिः,—पांशुभिः, धूसरितानाम्—आकीर्णानां, घासानां—यवसानां, जालेन—समूहेन, जालकितानि—सञ्जातजालानि इव लक्ष्यमाणानि, जघनानि—नितम्बभागा इत्यर्थः येषां तैः।

(१६६) पुराणेति।—पुराणस्य—पुरातनस्य, पर्य्याणस्य—पल्ययनस्य, एक-देशे—एकस्मिन्नंशे, पश्चाद्देशे इति भावः; दोलायमानानि—लम्बमानानि, दात्राणि—घासच्छेदनास्त्रविशेषा येषां तैः। शीर्णेति।—शीर्णानि—जीर्णानि, जीर्णानि इति यावत्, ऊर्णानां—मेषादिलोम्नाम् ("ऊर्णा मेषादिलोम्नि" इत्यमरः) शकलानि—खण्डानि, तैः शिथिलाः,—दुर्बला इत्यर्थः, सूत्रविरला इति भावः, मलिनाः,—मलदिग्धाः, मलकुथाः,—उत्तरीयाणि, (कृष्णास्तरणानि इति कैश्चित्, कौषे तु कुथ-शब्द एव दृश्यते; तथा च "प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः" इत्यमरः) येषां तैः। कश्चित् "मलकुथा—मलपट्टी, कुविरित्यर्थः" इति व्याख्यातवान्।

(१६७) प्रभ्विति।—प्रभुणा—स्वामिना, प्रसादीकृतं—कृपया दत्तं, पश्चात् पाटितं—छिन्नं, यत् पटच्चरं—जीर्णवस्त्रं, ("पटच्चरं जीर्णवस्त्रम्" इत्यमरः) तस्मात् चलत्—भ्रश्यत्, यत् चोलकं—वस्त्रखण्डं, तत् धारयन्ति—वहन्ति, अङ्गे इति भावः; तथोक्तैः। धावमानैः,—द्रुतं गच्छद्भिः। उद्धूयमानेति।—उद्धूयमानानि—उत्क्षिप्य-माणानि, द्रुतपदक्षेपवेगादिति भावः; धूलिपटलानि—पांशुसमूहाः, मार्गगतानीति भावः, यत्र तथोक्तम्।

(१६८) एकान्तेति।—एकान्तप्रवृत्तैः,—एकस्मिन्नंशे अवस्थितैरित्यर्थः, अश्ववार-चक्रैः,—सादिसमूहैः, चर्व्यमाणः,—भक्ष्यमाणः, आलोच्यमान इति यावत्; आगा-मिनः,—भाविनः, सम्मुखावस्थितस्य इति यावत्, गौड़स्य—गौड़राज्यस्य इति यावत्, विग्रहः,—युद्धम्; युद्धेषु गुणभागभवित्यर्थः, गौड़े यदि युद्धं भविष्यति, तदा कः परावर्त्तिष्यते इत्येवंरूप इति यावत् यत्र तथोक्तम्; यद्वा,—आगामिनः,—युद्धार्थं तूर्णमागमि-ष्यतः, कृतयुद्धोद्योगस्येति भावः, गौड़स्य—गौड़ाधिपस्य, विग्रहः,—शरीरं यत्र तथोक्तम्।

(१६८)पङ्किलप्रदेशपूरणादेशाकुलसकललोकलूयमानतृणपूलकं, क्वचित् (१७०) तलवर्त्तिवेत्रिवेत्रविभास्यमानग्राम्यिग्रिखरगत-विक्रोशद्विवादिब्राह्मणं, क्वचित् (१७१) कुलण्डकपाशविवेश्य-मानग्रामीणग्रासाकृष्टकौलेयकं, क्वचित् (१७२)अन्योऽन्यविभव-स्पर्द्धोद्धुरराजपुत्रवाह्यमानवाजिसङ्घट्टमण्डितम, अनेकहस्तान्त-

(१६८) पङ्किलेति।—पङ्किलस्य—कर्दमवतः, प्रदेशस्य—भूभागस्य, पूरणा-देशेन—भरणाज्ञया, कर्दमवति प्रदेशे गतागतिषु बलानां क्लेशाधिक्यापनोदनाय निम्नीभूततत्स्थानस्य तृणादिभिः समाच्छादनाज्ञया इत्यर्थः; आकुलैः,—व्याप्तैः, आदेशपालनाय व्याप्तैः इत्यर्थः, सकलैः,—सर्वैः, लोकैः,—जनैः, मार्गकर्मणि अधिकृतैरिति यावत्, लूयमानानि—छिद्यमानानि, तृणानाम्—अर्जुनानां, नल-घासादिविविधजातीयानामिति भावः; ("तृणमर्जुनम्" इत्यमरः) पूलकानि—समूहाः, पङ्क्तीपरि प्रदानार्थमिति भावः, यत्र तथोक्तम्।

(१७०) तलवर्त्तीति।—तलवर्त्तिभिः,—अधःस्थितैः इत्यर्थः, हट्टाधामिति भावः, वेत्रिभिः,—दण्डिभिः, वेत्रेण—दण्डेन, विभास्यमानाः,—भीतिं प्रदर्श्यमानाः इत्यर्थः, अत एव ग्राम्यिणां—हट्टाधां, ग्रिखरम्—अग्रं, गताः,—आरूढाः; सैन्य-समाममदर्शनेन भयवशादिति भावः; विक्रोशन्तः,—ग्रहयमानाः, अपलपन्तः इत्यर्थः, विवादिनः,—विरुद्धभाषिणः, गालिं ददानाः इत्यर्थः, राजसमीपे व्यवहारार्थिन इत्यर्थो वा, ब्राह्मणाः,—विप्राः यत्र तथोक्तम्।

(१७१) कुलण्डकेति।—कुलण्डकपाशैः,—कुक्कुरबन्धनरज्जुभिः, ["कुलण्डक—" इत्यत्र "कुलण्डक—" इति पाठे,—कुलण्डकेषु—कुक्कुरबन्धनाय लगुडेषु, ये पाशाः, —रज्जवः, तैः] तत्र विवेश्यमानैः,—बध्यमानैः, ग्रामीणानां—ग्राम्यजनानां, ग्रासेन—अन्नस्य कवलेन, "कुक्कुटाण्डप्रमाणं वा यावद्वा प्रविशत्यास्यम्। एतं ग्रासं विजानीयात्" इत्युक्तलक्षणमुखपूरणरूपेण इत्यर्थः; ["ग्रास—" इत्यत्र "ग्राम—" इति पाठे,—ग्रामैः,—समूहैरित्यर्थः] आकृष्टाः,—शब्दविशेषैः आहूता इत्यर्थः, कौलेयकाः,—सारमेयाः, कुक्कुरा इत्यर्थः; यत्र तथाभूतम्।

(१७२) अन्योऽन्येति।—अन्योऽन्यस्य—परस्परस्य, विभवः,—सम्पद्, तत्र तेन वा स्पर्द्धा—अहङ्कारः, तया उद्धुरैः,—उद्धतैः, राजपुत्रैः,—नृपकुमारैः, वाह्यमानानां —चाल्यमानानां, प्रतिस्पर्द्धितया इति भावः; वाजिनाम्—अश्वानां, सङ्घट्टेन—सङ्घर्षेण, मण्डितम्—अलङ्कृतम्; कः अन्ये गन्तुं प्रक्रामति इति स्पर्द्धां कृत्वा पश्चपूर्व्वकं

तया कौतुकजननं, प्रलयजलधिम् इव (१७३) जगद्ग्रास-ग्रहणाय प्रवृत्तं, पातालमिव महाभोगिनां गुप्तये समुत्पादितं, कैलासमिव परमेश्वरवसतये सृष्टं, (१७४) दृश्यमानसकल-प्राणिपर्य्यायं चतुर्युगसर्गकोशमिव प्रजापतीनां, क्रमबहुलमपि तपःकरणमिव क्रमकारणं कल्याणानाम्, एवञ्च वोच्यमाणः कटकं जगाम।

(१७५) आसन्नवर्त्तिनाञ्च तत्रभवतां,—"मान्धाता प्रव-

ख्यायमानास्पदीभितमिति भावः; अनेकहस्तान्ततया—बहुव्यापारतया, उत्कटेन इति भावः; कौतुकजननं—चमत्कारावहम्।

(१७३) प्रलयजलधिमिव—कल्पान्तकालिकसमुच्छ्रसितसमुद्रमिव। जगदिति।—जगदेव—भुवनमेव, ग्रासः,—ग्रसनं, तस्य ग्रहणाय—स्वीकरणाय, ग्रासनाय इत्यर्थः, सर्व्वजगदात्माधीनीकरणाय सर्व्वजगत्ग्रासनाय च इति यावत्। महाभोगिनां—महान्तः,—उद्दामा इत्यर्थः; भोगिनः,—सुखभोगरताः लोकाः, सर्पाश्च तेषाम्। गुप्तये—रक्षणाय, समुत्पादितं—संविहितं, दुर्वृत्तेति शेषः, दुर्वृत्तानामत्याचारात्लोकान् त्रातुं, सङ्घटितमिति समुदितार्थः। परमेश्वरवसतये—परमेश्वरः,—हरः, हरस्य, तस्य वसतये—स्थितये।

(१७४) दृश्यमानेति।—दृश्यमानाः,—दृश्यमाणाः, सकलानां—सर्वेषां, प्राणिनां—जीवानां, पर्य्यायाः,—क्रमाः, प्रकारभेदा इत्यर्थः; यद्वा,—पर्य्यायः,—परि—समन्तात् आयः,—आगमनं यत्र तथोक्तं, सर्व्वप्राणिसमाकीर्णमिति यावत्। चतुर्युगेति।—चतुर्णां—चतुःसङ्ख्यकानां, युगानां—कृतादीनां, समाहृतानामिति भावः; सर्गकोशमिव—सृष्टिस्थानमिव। प्रजापतीनां—ब्रह्मादीनाम्। तपःकरणमिव,—तपश्चरणमिव; सिद्धिलाभजनकत्वादिति भावः। क्रमकारणं—क्रमेण श्रेयसां साधनम्; दुर्जनोपद्रवनिवारणेनेति भावः। ["क्रमकारणम्" इत्यत्र "क्रमकारिणम्" इति पाठे,—क्रमः,—कल्पः, अङ्गभूतो विधिरित्यर्थः; यद्वा,—क्रमः,—अनुक्रमः, उपक्रमः इत्यर्थः, ("क्रमश्चानुक्रमे शक्तौ कल्पे चाक्रमणेऽपि च" इति मेदिनी) तस्य, कारी तम्।

(१७५) "आसन्नवर्त्तिनाम्" इत्यादौ "इत्येवंप्रायान्.....बालापान् पार्थिवकुमाराणाम् बाहुशालिनां मुखन् एव आससाद आवासम्" इत्युत्तरेण सम्बन्धः।

स्थिताः पत्यानो दिग्विजयाय ; (१७६) अप्रतिहतरथरंहसा रघुणा लघुना एव कालेन अकारि ककुभां प्रसादनम् ; शरासनद्वितीयः करदीचकार चक्रं क्रमागतभुजबलाभिजनधन-मदावलिप्तानां भूभुजां पाण्डुः ; पाण्डवः (१७७) सव्यसाची चीनविषयम् अतिक्रम्य राजसूयसम्पदे (१७८) क्रुध्य-दन्यञ्चधनुष्कोटिटङ्कारकूजितकुञ्जं हेमकूटपर्व्वतं पराजैष्ट ;

स्वातापप्रकारमाह, आमन्त्रेति।—आमन्त्रवर्त्तिनाम्—अन्तिकचराणां, तवभवतां—मान्यानां, पार्थिवकुमाराणामित्यनेनान्वयः। मान्यान्—युवनाश्वसुतेन मुग्धवयसीन राज्ञा, दिग्विजयाय—सर्व्वदिगवस्थितानां राज्ञां पराभवायेत्यर्थः, पत्यानः,—सरणयः, उपायाः इति यावत्, प्रवर्त्तिताः,—प्रदर्शिता इत्यर्थः।

(१७६) अप्रतिहतरथरंहसा—अप्रतिरुद्धस्यन्दनवेगेन। लघुनैव—अल्पेनैव, कालेन—समयेन, ["प्रकृत्यादिभ्य उपसङ्ख्यानम्" (वा०) इति तृतीया] ककुभां—दिशां, प्रसादनं—वृष्टराजप्रासनजनितकलङ्कापनोदनेन प्रसन्नताविधानमित्यर्थः, वशी-करणम् इति यावत्। शरासनद्वितीयः,—धनुर्मात्रसहायः ; अन्यसाहाय्यानपेक्ष इति भावः। करदीचकार—शासनाधीनं विदधे। चक्रं—मण्डलम्। क्रमागतेति।—क्रमागतस्य—पितृपितामहादिभ्यः प्राप्तस्य, भुजबलस्य—बाहुवीर्य्यस्य, अभिजनस्य—वंशमर्य्यादायाः, धनानाम्—अर्थानाञ्च, मदेन—गर्वेण, अवलिप्तानां,—उद्धतानां तेषाम्। भूभुजां—राज्ञाम्। पाण्डुः,—युधिष्ठिरादीनां जनकः।

(१७७) सव्यसाची—सव्येन—वामेन, वामभुजेनापीति यावत्, सचति—वर्षति, निक्षिपति, बाणान् यः सः, अर्জ্জुनः इत्यर्थः। चीनविषयं—चीनराज्यम्, अतिक्रम्य—निर्জ্জित्येत्यर्थः। राजसूयसम्पदे—महाक्रतुभेदसम्पत्तिनिमित्तं, राजसूय-यज्ञसम्पादनोचितधनार्थमित्यर्थः, [राज्ञा सूयते असौ राजसूयः क्रतुः इत्यर्थे, "राज-सूयसूर्य्य—" (३।१।११४ पा०) इति सूत्रेण क्यबन्तो निपात्यते]।

(१७८) क्रुध्यदिति।—क्रुध्यतां—क्रुध्यन्तां, सन्यञ्चां—ईषन्नीचविशेषाणां, धनुष्कोटेः,—कार्मुकाटनेः, टङ्कारेण—ज्यानिस्वनेन, कूजिताः,—शब्दिताः, कुञ्जाः, —निकुञ्जाः, लतादिपिहितस्थानानीत्यर्थः, ("निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितौ-दरे" इत्यमरः) यस्य तथोक्तम्। हेमकूटपर्व्वतं—सुमेरुपर्व्वताधिवासिनं गन्धर्व्वसमूह-मिति यावत्। पराजैष्ट—जिगाय, जयतेर्लुङि रूपं, ["विपराभ्यां जेः" (१।३।१९ पा०) इति आत्मनेपदम्]।

(१७९) सङ्कल्पान्तरितो विजयः तरस्विनाम्; (१८०) सहिम-हिमवद्व्यवहितोऽप्युवाह बाहुबलव्यतिकरकातरः करं कौरवे-श्वरस्य किङ्कर इव अक्रतौ द्रुमः; (१८१) नातिजिगीषवः खलु पूर्वे येन अल्प एव भूभागे भूयांसो भगदत्तदन्तवक्रक्राथकर्ण-कौरवशिशुपालसाल्वजरासन्धसिन्धुराजप्रभृतयोऽभवन् भूप-तयः; (१८२) सन्तुष्टो राजा युधिष्ठिरः, यो हि अमहत समीप एव धनञ्जयजयजनितजगत्कम्पः किम्पुरुषाणां

(१७९) तरस्विनां—बाह्यशालिनाम्। विजयः,—शत्रुपराभव इति यावत्, सङ्कल्पान्तरितः,—मननमात्रव्यवहितः, सङ्कल्पमात्रमाश्रय इत्यर्थः; सङ्कल्पमात्रव्यवहितो हि विजयः तेजस्विनामिति फलितार्थः। विजिगीषूणां विजये सङ्कल्पादन्यत् किमपि प्रतिबन्धमुत्पादयितुं न शक्नोति, सङ्कल्पात् परमेव ते कार्ये सम्पादयन्तीति भावः।

(१८०) सहिमेति।—सहिमेन—तुषाराकीर्णेन, हिमवता—हिमाद्रिणा, व्यवहितः,—अन्तरितः, दुर्जय इति भावः। बाहुबलव्यतिकरकातरः,—भुजवीर्य-सम्बन्धरहित इति यावत्। कौरवेश्वरस्य—दुर्योधनस्य। अक्रतौ—अक्षमः, दुर्बल इत्यर्थः, द्रुमः,—तदाख्यः किन्नरनरपतिः। करं—राजयाह्यभागम्, उवाह—वहति स्म; दुर्गमप्रदेशस्थमपि द्रुमं तेजस्वी दुर्योधनः सङ्कल्पमात्रेणैव करदं चकारेति समुदितार्थः।

(१८१) नातिजिगीषवः,—नातिविजयाकाङ्क्षिण इत्यर्थः। पूर्वे—पुरातना राजानः, आसन्निति शेषः;. येन—येन हेतुना, नातिजिगीषुतयेत्यर्थः, अल्पे एव भूभागे—अदूरवर्त्तिप्रदेशमध्ये, अल्पीयसि भूमिभागे इत्यर्थः, भूयांसः,—अतिबहवः। भगदत्तः,—प्राग्ज्योतिषाधिपतिः दुर्योधनश्वशुरः, दन्तवक्रः,—कृष्णद्वेषिनृपविशेषः, क्राथः,—नृपविशेषः, कर्णः,—अङ्गाधिपः दुर्योधनसुहृत्, कौरवः,—दुर्योधनः, शिशुपालः,—चेदिराजः कृष्णद्वेषी, साल्वः,—सौभाधिपतिः, जरासन्धः,—मगधाधि-पतिः, सिन्धुराजः,—जयद्रथः, तत्प्रभृतयः,—तदादयः। एतेषां जिगीषुत्वे च अल्पीयसि भूभागे एकस्यैव भूपतित्वं न्याय्यमिति फलितार्थः।

(१८२) सन्तुष्टः,—अल्पेनैव मुदित इत्यर्थः; अजिगीषुरपि वीतस्पृहतया कारुण्यपूर्णतया वा हिंसाबहुले दण्डविधौ अलस इति भावः; युधिष्ठिरः,—राज्ञः पाण्डोः ज्येष्ठसुतः, युधि स्थिरः इति अलुक्समासे "गवियुधिभ्यां स्थिरः" (८।३।९५

राज्यम् ; अलसः चण्डकोपो यो न प्राविक्षत् क्ष्मां जित्वा स्त्रीराज्यम् ; (१८३) कृसीय एवान्तरं तुषारगिरिगन्धमादनयोः उत्साद्विनः। किष्कुः तुरुष्कविषयः ; (१८४) प्रादेशः पारमीकदेशः ; शशपदं शकस्थानम् ; अदृश्यमानप्रतिप्रहारे

पा०) इति सत्यं षत्वम्। यः,—युधिष्ठिरः। धनञ्जयेति।—धनञ्जयस्य—अर्जुनस्य, जयेन—राज्ञां पराभवेण, जनितः,—उत्पादितः, जगतां—जगद्वासिनामित्यर्थः, क्षयः,—विपद्भुः,वासजनित इति भावः; यैन तादृशः ; यस्य हि राज्ञः एवं जगद्वीषकर्त्तीयैः सहोदर आसीदिति भावः। समीपे—सन्निधौ एव, स्वराज्यस्य इति भावः, स्थितमिति शेषः, किम्पुरुषाणां—किन्नराणां, राज्य—देशम्। अमहत—मोढवान् ; समर्थोऽपि युधिष्ठिरः किन्नरराज्यं न आत्माधीनं चकार इति समुदितार्थः। चण्डकोपः,—तदाख्यो नृपतिः। यः,—चण्डकोपः। प्राविक्षत्—प्रविष्टवान्, [विशतेः लुङि रूपम्]। क्ष्मां—पृथ्वीम्। स्त्रीराज्यं जित्वा—स्त्रीवशगोभूतां भूत्वा इत्यर्थः। समर्थोऽपि स्त्रैणत्वात् दिग्विजयं न चकारेति निष्कर्षः ; यदा,—स्त्रीराज्य—स्त्रीजनशासितं राज्यम् ; सर्व्वां भूमिं विजित्यापि अलसतया चण्डकोपनृपतिः स्त्रीभूयिष्ठं राज्यं न जिगायेति भावः, स्त्रीराज्यकथाऽपि दृश्यते भारते अश्वमेधपर्व्वणि ; तद्विवरणन्तु तत्र दृश्यम्।

(१८३) कृसीयः,—अल्पतरम्। अन्तरं—व्यवधानम्। तुषारगिरिः,—हिमाद्रिः, उत्तरापथस्थित इति यावत्, गन्धमादनः,—दक्षिणापथस्थितः स्वनामप्रसिद्धः पर्व्वतविशेषः ; उत्साद्विनः,—उत्साद्वशालिनः, जनस्येति शेषः। उभयदिगन्तावस्थयोरपि एतयोर्व्यवधानम् उत्साद्विभिरत्यल्पमेव मन्यते इति भावः। किष्कुः,—हस्तो वितस्तिः वा, तत्परिमितः अल्पपरिसरः इति भावः, ("किष्कुर्हस्ते वितस्तौ च" इत्यमरः)। तुरुष्कविषयः,—तुरुष्कजनपदः ; सुदूरं तुरुष्कदेशमपि उत्साद्वसम्पन्नाः किष्कुपरिमाणव्यवहितमिव मन्यन्ते, जयैषिणां शतयोजनशतमपि न दूरमिति भावः।

(१८४) प्रादेशः,—व्यवहितौ प्रदेशिन्यङ्गुष्ठयोः अन्तरपरिमाणसम्मित इति यावत्, उत्साद्विनः इति पूर्वेणान्वयः। अतिक्षुद्र इति भावः ; ("प्रादेशतालगोकर्णाः सर्ज्जन्यादियुते तते। अङ्गुष्ठे—" इत्यमरः)। शशपदं—शशस्य—क्षुद्रपशुभेदस्य, पदं—पदपरिमितम्। शकस्थानं—शकदेशः। अदृश्यमानेति।—न दृश्यमानः,—न दृश्यमाणः, प्रतिप्रहारः,—प्रतिद्वन्द्विविक्रमः यत्र तादृशे, निर्वीर्य्ये इति भावः ;

पारियात्रे यात्रैव शिथिला; (१८५) शौर्य्यशुल्कः सुलभो दक्षिणापथः; (१८६) दक्षिणार्णवकल्लोलानिलचलित-चन्दनलतासौरभसुन्दरीकृतदरीमन्दिरात् ददुरात् अद्रेः नेदीयसि मलयः; मलयलग्न एव च महेन्द्रः" इत्येवमायान् उद्योगद्योतकानाम् आलापान् पार्थिवकुमाराणां बाहुशालिनां शृण्वन् एव आससाद आवासम्। (१८७) मन्दिरद्वारि च उभयतः सबहुमानं भ्रूलताभ्यां विसर्जितराजलोकः प्रविश्य च अवततार, वाह्यास्थानमण्डपस्थापितम् आसनम् आचक्राम; अपास्तसमायोगश्च क्षणमासिष्ट।

पारियात्रे—तदाख्ये देशे पर्व्वते वा, यात्रा—युद्धार्थगमनं, शिथिला—निरर्थकेति भावः; निर्वीर्य्याणां तेषां युद्धेति वार्त्ताश्रवणमात्रेणैव पलायनपरत्वादिति तात्पर्य्यम्।

(१८५) शौर्य्यशुल्कः,—शौर्य्यं—वीर्य्यमेव, शुल्कः,—पणः यस्य तथाभूतः; विक्रमलभ्य इति भावः। दक्षिणापथः,—दाक्षिणात्यः, कलिङ्गादिप्रदेश इत्यर्थः; सुलभः,—सुप्रापः; गमनमात्रेणैव तं जेष्याम इति भावः।

(१८६) दक्षिणेति।—दक्षिणार्णवस्य—दाक्षिणसमुद्रस्य, कल्लोलानिलेन—तरङ्गवायुना, चलितानां—कम्पितानां, चन्दनलतानां—श्रीखण्डवल्लीनां, सौरभेण—गन्धेन, सुन्दरीकृतं—मनोज्ञीकृतं, दरी—गुहा एव, मन्दिरं—गृहं यस्य तथाभूतात्, ददुरात्—तदाख्यात्, अद्रेः,—पर्व्वतात्, नेदीयसि—अतिनिकटे, [अतिशयेन अन्तिके इत्यर्थे इयसुनि, अन्तिकस्य "अन्तिकबाढ़योर्नेदसाधौ" (५।३।६३ पा०) इति नेदादेशः] मलयः,—तदाख्यपर्व्वतः। महेन्द्रः,—तदाख्यपर्व्वतः; अत एव तावपि सुलभौ इति भावः। उद्योगद्योतकानाम्—उत्साहवर्द्धकानाम्। पार्थिव-कुमाराणां—सामन्तराजपुत्राणाम्। बाहुशालिनां—भुजवीर्य्यवताम्। आससाद—प्राप। आवासं—निवासस्थानम्।

(१८७) मन्दिरेति।—मन्दिरस्य—गृहस्य, द्वारि—द्वारदेशे, उभयतः,—आत्मानमिति शेषः, स्वस्य उभयपार्श्वे इत्यर्थः, निपातिताभ्यां भ्रूलताभ्यामित्यन्वयः। सबहुमानं—ससमादरम्। भ्रूलताभ्यां—भ्रूसङ्केतेन इति भावः। प्रविश्य,—मन्दिरमिति शेषः। अवततार—अवतीर्णवान्, वाहनादिति शेषः। वाह्येति।—वाह्यं—बहिर्देशस्थम्, आस्थानमण्डपं—सभागृहं, तत्र स्थापितं—निहितम्। आचक्राम

अथ तत्र (१८८) प्रतीहारः पृथ्वीपृष्ठप्रतिष्ठापितपाणिपल्लवो विज्ञापितवान्,—"देव ! (१८९) प्राग्ज्योतिषेश्वरेण प्रहितो हंसवेगनामा दूतोऽन्तरङ्गः तोरणमध्यास्ते" इति। राजा तु "तमाशु प्रवेशय" इति सादरम् आदिदेश। अथ (१९०) दक्षतया क्षितिपालादराच्च प्रतीहारः स्वयमेव निरगात्। अनन्तरञ्च हंसवेगः सविनयम् (१९१) आकृत्यैव नयनानन्दसम्पादनसुभगाभोगभद्रया (१९२) समुल्लङ्घ्यमानगुणगरिमा, प्रभूतप्राभृतभृतां पुरुषाणां समूहेन महता अनु-

—अधितष्ठौ। अपाल्लसमायोगः,—त्यक्तसन्नाहः; यद्वा,—अपास्तः,—अपगतः, समायोगः,—सम्बन्धः, प्रयोजनं वा यस्य तथाभूतः, कार्य्यान्तरसम्बन्धरहितः, निश्चिन्तः भूत्वेत्यर्थः। आसिष्ट—उपाविशत्, [आस्ते इत्यादादिकस्य लुङि रूपम्]।

(१८८) प्रतीहारः,—दौवारिकः। पृथ्वीति।—पृथ्वीपृष्ठे—भूतले, प्रतिष्ठापितः,—निहितः, पाणिपल्लवः,—करकिसलयः, अभिवादनार्थमिति भावः, येन तथाभूतः; भूमौ करौ संस्थाप्य साष्टाङ्गं प्रणिपत्येति यावत्।

(१८९) प्राग्ज्योतिषेश्वरेण—कामरूपाधिपतिना। ["प्राग्ज्योतिषेश्वरेण महित:" इत्यत्र "प्राग्ज्योतिषेश्वरेण कुमारेण प्रहित:" इति पाठे,—कुमारेण—तदाख्येनेत्यर्थः]। अन्तरङ्गः,—स्वजनः; प्राग्ज्योतिषाधिपतेरेवेति भावः। तोरणं—बहिर्द्वारम्; ["अधिशीङ्स्थासां कर्म्म" (१।४।४६ पा०) इति आधारस्य तोरणस्य कर्म्मत्वं ज्ञेयम्]; अध्यास्ते—अधितिष्ठति, तं—हंसवेगम्।

(१९०) दक्षतया—निपुणतया। क्षितिपालादरात्—क्षितिपाले—राजनि हर्षे, आदरात्—बहुमानात्; स्वयमेव निरगात्—न त्वन्यं कञ्चित् प्रेषयामास; राजादेशस्यावश्यपालनीयत्वधिया इति भावः; ["इण्" गतौ इत्यादिकस्य एतेः लुङि रूपम्, "इणो गा लुङि" (२।४।४५ पा०) इति गाऽऽदेशः]।

(१९१) आकृत्यैव—अवयवेनैव। नयनेति।—नयनानन्दः,—चक्षुःप्रीतिः, तस्य सम्पादने—सङ्घटने, सुभगः,—अनुकूलः, यः आभोगः,—विस्तारः, परिपूर्णता अपरास्तेति यावत्, तेन भद्रा—मनोहारिणी तया; सौम्यमूर्त्या सङ्केपः।

(१९२) समुल्लङ्घ्यमानेति।—समुल्लङ्घ्यमानः,—निर्जीयमानः, गुणानां—औदार्य्यनम्रतादीनां, गरिमा—गौरवं येन तथाभूतः; गुणगौरवादपि आकृतिगौरव-

गम्यमानः प्रविवेश राजमन्दिरम्। (१८३) आरादेव पञ्चाङ्गालिङ्गिताङ्गनः प्रणाममकरोत्। "एह्येहि" इति (१८४) सबहुमानमाहूतश्च प्रधावितोऽपसृतः पादपीठलुठितललाटलेखो न्यस्तहस्तः पृष्ठे पार्थिवेन उपसृत्य भूयो नमश्चक्रे। स्निग्धनरेन्द्रदृष्ट्या निर्दिष्टम् अविप्रकृष्टं स प्रदेशमध्यास्त। ततो राजा (१८५) तिरश्चीं तनुम् ईषत् इव दधानश्चामरग्राहिणीम्

धारणादिति भावः; यद्वा,—समुल्लङ्घ्यमानः,—प्राप्यमाणः इत्यर्थः, प्रकाश्यमान इति यावत्, गुणगरिमा यस्य तथाभूतः; राजदूतस्य हंसवेगस्य निसर्गसौम्यमूर्त्या असौ सर्वगुणवतामग्रेसर एव भवतीति प्रतीयते इति समुदितार्थः। प्रभृतप्राभृतभृतां —प्रभूतं—विविधं, प्राभृतम्—उपायनद्रव्यं ("प्राभृतन्तु प्रदेशनम्। उपायनमुपायाश्चमुपहारस्तथोपदा॥" इत्यमरः) बिभ्रति—धारयन्ति ये तथाविधानां, बहुलोपढौकनं धृतवतां इत्यर्थः।

(१८३) आरादेव—दूरादेव, ("आराद्दूरसमीपयोः" इत्यमरः)। पञ्चाङ्गेति। —पञ्चभिः,—पञ्चसङ्ख्यकैः,—अङ्गैः,—शिरश्चरणादिभिः, आलिङ्गितं—स्पृष्टम्, अङ्गनं—चत्वरं येन तथाभूतः। "जानुभ्यान्च तथा पद्भ्यां पाणिभ्यामुरसा धिया। शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः॥" इति वचनात्, यद्यपि प्रणामस्य अष्टाङ्गत्वं दृश्यते, तथाऽप्यत्र भूमिसंस्पर्शविधौ योग्यानामेवावयवानामत्रावश्यकतया प्राधान्यात् प्रणामस्याङ्गपञ्चकसाध्यत्वमुक्तमित्यदोष इत्यवधेयम्।

(१८४) सबहुमानेति।—सबहुमानं—सादरम्, आहूतः,—आकारितः, राज्ञा इति शेषः। प्रधावितः,—किञ्चित्पुरोगतः इत्यर्थः, आह्वानचणे एवेति भावः; अपसृतः,—अनन्तरं किञ्चित्पश्चाद्गतः इत्यर्थः, भूयः,—पुनश्च, उपसृत्य—राजानम् इति शेषः; राज्ञः समीपं गत्वा इत्यर्थः। पादेति।—पादपीठे—चरणासने, हर्षस्य इति शेषः; लुठिता—घृष्टा, निहिता इत्यर्थः, ललाटलेखा—भालरेखा येन तथाभूतः, तथा पार्थिवेन—हर्षेण, पृष्ठे—पृष्ठदेशे, न्यस्तहस्तः,—स्थापितपाणिः, अर्पितकरः सन्, नमश्चक्रे—प्रणाममकरोत्; एवंविधप्रणामस्तु तत्कालप्रचलिताचारवशादनुष्ठित इति ज्ञातव्यम्। स्निग्धेति।—स्निग्धया—प्रीतिपूर्णया, नरेन्द्रस्य—राज्ञः, दृष्ट्या—वीक्षणेन, निर्दिष्ट—प्रदर्शितम्। अविप्रकृष्टं—सन्निकृष्टम्।

(१८५) तनुं—वर्तुलितां यावत्, ईषत्—किञ्चित्। तिरश्चीं—तिर्यक्-भ्रमणीम्, एकस्मिन् पार्श्वे किञ्चिदवनमितामिति यावत्, दधानः,—कुर्वन् इत्यर्थः।

अन्तरालवर्त्तिनीं समुत्सार्य्य सम्मुखानस्तं सप्रश्रयं पप्रच्छ,—"हंसवेग! श्रीमान् कच्चित् कुशली कुमारः?" इति। स तमन्ववादीत्,—"अद्य कुशलो, येन एवं स्नेहस्रपितया सौहार्द्रवार्द्रया सगौरवं गिरा पृच्छति देवः" इति।

स्थित्वा च मुहूर्त्तमिव पुनः (१८६) स चतुरमुवाच,—"चतुरम्भोधिभोगभूतिभाजनभूतस्य देवस्य सद्भावगर्भम् अपहाय हृदयमेकम् अन्यत् अनुरूपं प्राभृतमेव दुर्लभं लोके; तथाऽप्यस्मत्स्वामिना सन्देशम् अशून्यतां नयता

अन्तरालवर्त्तिनीं—मध्यस्थितामित्यर्थः। समुत्सार्य्य—अपसार्य। सम्मुखानः,—अभिमुखः सन्नित्यर्थः, दूतस्येति भावः। सप्रश्रयं—सप्रणयं, प्रीतिप्रदर्शनपुरःसरमित्यर्थः, [क्रियाविशेषणमेतत्। "प्रश्रयप्रणयौ समौ" इत्यमरः]; यद्वा,—सप्रश्रयं—प्रश्रयेण सह वर्त्तमान, सविनयमित्यर्थः, विनीतामिति यावत्; "तम्" इत्यस्य विशेषणम्। कच्चित् इति प्रश्नसूचकमव्ययं, ("कच्चित् कामप्रवेदने। प्रश्ने हर्षे सङ्गले च" इति मेदिनी)। स्नेहस्रपितया—प्रीतिसिक्तया; [स्नातेः णिचि निष्ठायां रूपम्]। सौहार्द्रेति।—सौहार्द्रं—सुहृदो भावः, मित्रता इत्यर्थः, तदेव द्रवः,—रसः, जलमिति यावत्, तेन आर्द्रया—सिक्तया, अतिबन्धुत्वसूचिकयेति भावः; तव भवतः स्नेहगर्भसौहार्दसम्भाषणेन इदानीमेव सौभाग्यवान् सञ्जातः, न तु प्राक्; एवंविधस्निग्धप्रणयसम्भाषणं हि शुभादृष्टफलमित्येव नास्ति सन्देहलेश इति तात्पर्य्यम्।

(१८६) सः,—हंसवेगः। चतुर—निपुण, दूतोचितदक्षतासहकृतं यथा तथेत्यर्थः; क्रियाविशेषणमेतत्। चतुरम्भोधीति।—चतुर्णां—चतुःसङ्ख्याकानाम्, अम्भोधीनां—समुद्राणां, भोगभूतिः,—भोगैश्वर्य्यं, तस्या भाजनभूतस्य—पात्रस्वरूपस्य। सद्भावगर्भं—सदाशयपूर्णम्। एकं—केवलं, हृदयम् अपहाय इत्यन्वयः; अन्यत्—अपरम्, अनुरूपं—योग्यं, तव इति शेषः, प्राभृतम्—उपढौकनम्; अस्माकं प्रभोः साधुभावपूर्णात् हृदयात् विना अन्यत् भवते प्रदेयमुपायनं किमपि नास्तीति भावः। अस्मत्स्वामिना—अस्माकं प्रभुणा, कामरूपेश्वरेणेति यावत्, सन्देशं—वाचिकार्थकथनं, दूत्यमिति यावत्, दूतस्य सन्देशहरत्वादिति भावः; अशून्यतां नयता—पूर्णतां प्रापयता, समुचितोपहारप्रदानेन सन्देशं सफलं कुर्व्वता इत्यर्थः, उपायनमन्तरेण सन्देशप्रेषणस्यावश्यजनकत्वसम्भावनया सम्राजः रिक्तहस्तेन दर्शनस्य अनौचित्यादिति भावः।

(१९७) पूर्वजोपार्जितं वारुणातपत्रम् आभोगाख्यम् अनुरूपस्थानन्यासेन कृतार्थीकृतमेतत्। (१९८) अस्य च कुतूहलकृन्ति बहूनि आश्चर्याणि दृश्यन्ते। प्रतिदिवसं प्रविशति (१९९) शैत्यहेतोश्छायायाः किरणसहस्रादेकैकः सोमस्य रश्मिः अस्मिन्। (२००) अस्मिन् प्रविष्टे प्रध्यानानन्तरं स्रादवो दन्तवीणोपदेशाचार्यास्त्रोतन्ति चन्द्रभासामश्मसां मणिशलाकाभ्यो यावदिच्छ-

(१९७) पूर्वजोपार्जितं—पूर्वपुरुषलब्धम्। वारुणातपत्रं—वरुणटत्तच्छत्रं, जलस्थाविच्छत्रं वा; निरतिशयशैत्यसंविधायकमातपत्रमिति भावः। आभोगाख्यम्—आभोगनामकम्। अनुरूपस्थानन्यासेन—योग्यस्थानार्पणेन, दैवसदृशसत्पात्रे प्रदानेनेत्यर्थः; भवानेक एवास्य भोगसौभाग्यभाक् नान्य इति मत्वेति भावः।

(१९८) अस्य—आभोगस्य। कुतूहलकृन्ति—कौतुककराणि; अपूर्वगुणयोगात् दर्शनौत्सुक्यजनकानीति भावः।

(१९९) छायायाः,—अनातपस्य, छत्रस्येति शेषः, शैत्यहेतोः,—शीतलतासम्पादननिमित्तम्। किरणेति।—किरणानां—मरीचीनां, सहस्राणि—सहस्रसङ्ख्या यस्य तस्मात्, सूर्यादित्यर्थः। सोमस्य—चन्द्रस्य, रश्मिः,—मयूखः। अस्मिन्—आतपत्रे इत्यर्थः। ननु दिवा सोमस्योदयाभावात् कथमातपत्रे तस्य किरणस्य प्रवेशस्य सम्भवः इति चेत्? अत्राहुः,—सूर्यातापेन छत्रच्छाया सन्तप्ता मा भूदिति हेतोः सूर्यस्य एकैकः रश्मिः चन्द्ररश्मिरूपेण परिणतः सन् तत्र प्रविशति इति तात्पर्यम्। दृश्यते च लोके प्रखरसूर्यकिरणैनीतस्यातपत्रस्य शैत्यविधानार्थं जलेनार्द्रीकरणम्, अत्र तु तादृशसन्तापसमयेऽपि आर्द्रीकरणस्य प्रयोजनाभावः, इत्येवास्य कुतूहलजनकत्वम्।

(२००) अस्मिन्—चन्द्ररश्मौ, प्रविष्टे—उपगते, आभोगाख्यछत्राभ्यन्तरमिति शेषः। प्रध्यानानन्तरं—प्रकृष्टभावनात् परं, छत्रधारिपुरुषाणामिति भावः; यद्वा,—रश्मीनां सम्यगेकीभूतभावनात्परमित्यर्थः। स्रादवः,—सुमधुराः। दन्तेति।—दन्तवीणा—श्रौतीव्रः दन्तानामन्योऽन्याघातः, अतिशैत्यात् इति भावः; तस्या उपदेशः—शिक्षायाम्, आचार्याः,—गुरवः; शीतस्यातिशयात् वेपथूदयेन दन्तानामन्योऽन्यघर्षणजननात् इति भावः; चन्द्रभासां—चन्द्रवत्प्रभावतां, शुभ्राणामित्यर्थः। मणिशलाकाभ्यः,—मणिमयच्छत्रशलाकाभ्यः, यावदिच्छं—[यावती इच्छा तावत् स्रोतन्ति

मच्छा धाराः। (२०१) प्रचेता इव यत्नतुर्णाम् अर्णवानाम् अधिपतिर्भूतो भावी वा, तमनुगच्छति छायया, न इतरम्। इदञ्च न (२०२) सप्तार्चिर्दहति, न पृषदश्वो हरति, न उदकम् आर्द्रयति, न रजांसि मलिनयन्ति, न जरा जर्जरयति। एतत् तावदनुगच्छतु इयं देवः; सन्देशमपि विस्रब्धं श्रोष्यति" इत्येवम् अभिधाय विहृत्य आत्मीयं पुरुषम् अभ्यधात्,—"उत्तिष्ठ, दर्शय देवस्य" इति।

(२०३) स वचनानन्तरम् उत्थाय पुमान् ऊर्ध्वीचकार तत्, धौतदुकूलकल्पिताच्च निचोलकात् अक्षोषीत्।

इति विग्रहे "यावदवधारणे" (२। १। ६ पा०) इत्यव्ययीभावः] यत्नेष्टमित्यर्थः। अच्छाः,—निर्मलाः।

(२०१) प्रचेता इव—वरुण इव, ("प्रचेता वरुणः पाशी" इत्यमरः)। भूतः,—सञ्जातः। भावी—भविष्यन्नित्यर्थः। छायया—अनातपेन, छायाविस्तारेणेत्यर्थः; तं—चतुःसमुद्रवेष्टितायाः पृथिव्या अधिपतिं, सम्राजमित्यर्थः। अनुगच्छति—एवंविधराज्ञि एव ह्यवनिदं पूर्वोक्तिगुणान् बिभर्त्ति इति निष्कर्षः। चतुर्णवाधिपतिमेवासौ सेवते, त्वञ्च तथा भविष्यसि, अतः तव एव एतदयुक्तमिति सूच्यते। अदो हि चतुरुदधिभोगसौभाग्यभाजमेव प्रोक्तगुणैः सेवते, नान्यमेतदेवास्य विश्रब्धकरत्वमिति भावः।

(२०२) सप्तार्चिः,—अग्निः, ("अग्निर्वैश्वानरो वह्निः…। सप्तार्चिर्दमुनाः…" इत्यमरः); पृषदश्वः,—वायुः, ("अनलः स्वर्गनो वायुर्मातरिश्वा सदागतिः। पृषदश्वः…" इत्यमरः)। उदकं—जलम्। रजांसि—पांशवः। जरा—जीर्णता, पुरातनत्वमित्यर्थः। जर्जरयति—खण्डयतीत्यर्थः; जरसि नैतत् जीर्य्यति, सदैव प्रत्यग्रमिव वर्त्तते इति भावः। एतत्—आतपवमित्यर्थः। विस्रब्धं—विश्रब्धं यथा तथा, रहसि इति भावः। विहृत्य—सुखं परावर्त्येत्यर्थः। देवस्य—सम्राजः हर्षस्य, [सम्बन्धविवक्षया षष्ठी, "अभिवादिदृशोरात्मनेपदे वेति वाच्यम्" इति वार्त्तिकबलात्, दर्शेरात्मनेपदस्य प्रयोगाभावात् न प्रयोज्यकर्तुः देवस्य कर्मत्वं, तथा च तृतीयाया अत्रि अवसर इति विभाव्यम्]।

(२०३) सः,—आत्मीयः, दूतस्यानुचरविशेष इत्यर्थः। ऊर्ध्वीचकार—उद्धृतानित्यर्थः। धौतेति।—धौतेन—क्षालितेन, शुभ्रेण इत्यर्थः, दुकूलेन—वस्त्रेण,

(२०४) आकृष्यमाणे एव च यस्मिन् अतिसितमहसि सरभसम् अहासि इव हरेण, (२०५) रसातलात् उदलासीव शेषफणि-फणाफलकमण्डलेन, अस्थायि इव चक्रीभूय अन्तरिक्षे क्षीरोदेन, अघटीव गगनाङ्गने गोष्ठीबन्धः शारदेन बलाहकव्यूहेन, (२०६) विश्रान्तम् इव वितनपक्षतिना वियति पितामह-विमानहंसयूथेन, (२०७) अलिनेत्रनिर्गतस्य धवलधाम-

---

कल्पितात्—रचितात्, निर्चोलकात्—प्रच्छदपटात्, आवरणवस्त्रात् इत्यर्थः, ("निर्चोलः प्रच्छदपटः" इत्यमरः)। अकोषीत—निष्कोषितवान्, आतपवस्त्रावरणमुन्मोचितवानित्यर्थः।

(२०४) आकृष्यमाणे—निष्कृष्यमाणे, प्रच्छदपटादिति शेषः। —समूहेन, आतपत्र; ["अस्य च भावेन भावलक्षणम्" (२।३।३७ पा०) इति भावलक्षण-अतिसितमहसि—अतिशुभ्रत्विषि। सरभसं—सवेगम्। हरेण—शिवेन, अट्ट—इव—अट्टट्ट हसितमिव। एतदातपत्रस्थातिशुभ्रत्वेन झटिति तदाकर्षणात् हरस्याट्ट-हासवत् तत् शोभते इति फलितार्थः; "यशसि धवलता वर्ण्यते हासकीर्त्याः" इत्यादि कविसमयप्रसिद्धेः, अतिधवलत्वप्रतिपत्त्यर्थं हरहासरूपत्वेनोत्प्रेक्षितमिति वाच्या क्रियोत्प्रेक्षेयमिति क्रियम्।

(२०५) रसातलात्—पातालात्। उदलासि इव—उल्लसितमिव, [लसतेः भावे लुङि रूपम्]। शेषेति।—शेषफणी—अनन्तनागः, तस्य फणाफलकमण्डलं—भोगपट्टकसमूहः तेन। अस्थायि इव—स्थितमिव। चक्रीभूय—मण्डलीभूय। क्षीरोदेन—दुग्धसागरेण। अघटि इव—घटित इव, रचित इव इत्यर्थः, [घटेः णिचि कर्मणि लुङि रूपम्]। गोष्ठीबन्धः,—समाजः, सङ्घीभूयावस्थानमित्यर्थः। शारदेन—शरत्कालिकेन; निर्जलत्वात् शुभ्रेण इति भावः। बलाहकव्यूहेन—मेघ-मण्डलेन, ("अभ्रं मेघो वारिवाहः क्षणदिनबलाहकः" इत्यमरः)।

(२०६) विश्रान्तमिव—विश्रामः कृत इव। वितनपक्षतिना—विस्तृतपक्षेण। वियति—आकाशे। पितामहविमानहंसयूथेन—ब्रह्मणोरथवाहनहंससङ्घेन; एत-दातपत्रं विलोक्य भ्रमैः प्रसारितपक्षाः ब्रह्मणः विमानहंसाः व्योममार्गे विश्राम्यन्तीवेति मेनिरे इति तात्पर्यम्।

(२०७) अलिनेत्रनिर्गतस्य—अलेः,—तदाख्यस्य ब्रह्मणो मानसपुत्रस्य मुनि-

मण्डलमनोहरो दृष्ट इव जनेन जन्मदिवसः कुमुदबन्धोः, प्रत्यक्षीकृत इव उद्गमनक्षणो नारायणनाभिपुण्डरीकस्य, (२०८) आङ्कित इव कौमुदीप्रदोषदर्शनानन्दहसितरक्षणाम्, उदमाङ्क्षीत् इव मन्दाकिनीपुलिनमण्डलं महदम्बरोदरे,

---

विर्गमस्य, नेत्रात्—नयनात, निर्गतस्य—निःसृतस्य, चन्द्रो हि प्रजासर्गार्थं तपस्यतोऽत्रेर्नेत्रात् जातः, तथा हि हरिवंशे,—"पिता सोमस्य वै राजन् जज्ञेऽत्रिर्भगवानृषिः। ब्रह्मणो मानसात् पूर्वं प्रजासर्गे विधित्सतः॥" अपि च तत्रैव,—"नेत्राभ्यां वारि मुमुचे दशधा दीप्ततेजसः। तद्गर्भविधिना दृष्टा दिशो दैव्यो दधुस्तदा॥ सम्यक्त्वं धारयामासुर्न च ताः समशक्नुवन्। स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभास्वितः॥ ——यन् लोकान् द्योतायः सर्व्वभावनः॥" इति। अत एवाह रघौ (२ स० इति विग्रहे ") कालिदासः,—"अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः" इत्यादि। अच्छाः,—[illegible],—चन्द्रस्य। धवलेति।—धवलं—शुभ्रं, यत् धाममण्डलं—परिधिः, तेन (२ हरः,—रमणीयः। जन्मदिवसः,—उत्पत्तिदिनं, दृष्ट इव—दर्शित इव, इत्युत्प्रेक्षा; दर्शनञ्चात्र "स हि जन्मदिवस एवायं किमु" इत्याकारकप्रत्यभिज्ञारूपतया प्रत्यक्षत्वस्यार्थात् सम्भवनमेवेतदिति विभाव्यम्। प्रत्यक्षीकृत इव—साक्षात्कृत इव; पूर्ववदत्राप्युत्प्रेक्षालङ्कारः। उद्गमनक्षणः,—उत्पत्तिसमयः। नारायणनाभिपुण्डरीकस्य—विष्णोर्नाभिर्देशस्थस्य श्वेतपद्मस्य।

(२०८) आङ्किता इव—अङ्किता इव। कौमुदीति।—कौमुदीप्रदोषः चन्द्रिकासमन्विता रजनी; यद्वा,—कौमुदी नाम दीपोत्सवतिथिः। तदुक्तं भविष्योत्तरे,—"कौ मोदन्ते जना यस्यां नानाभावैः परस्परम्। दृष्टास्तुष्टाः सुखाः पद्मासीना सा कौमुदी मता॥" इत्युक्तलक्षणा कार्त्तिकपौर्णमासी आश्विनपौर्णमासी वा इति वदन्ति, तस्याः प्रदोषः,—रजनीमुखं, तस्य दर्शनेन—अवलोकनेन, य आनन्दः,—सुखं, तेन हसितः,—प्रीतिः। अक्षणां—चक्षुषाम्। अस्य हि सन्दर्शनं तथैव नयनसन्तर्पणं भवति, यथा कौमुदी समुदित्यैव दर्शकानां चेतस्येषु सुधाधारां स्रावं स्रावं नियतं तान् प्रीणयति मानसञ्चावर्ज्जयति इति। कौमुद्याः नयनरञ्जकत्वमुक्तं रघौ (१ स० १ श्लो०) यथा,—"सद्वीजनीचेतसकौमुदीमुखम्" इत्यादि। उदमाङ्क्षीदिव—उत्पतमिवेत्यर्थः, [मज्जतेः लुङि रूपम्]। मन्दाकिनीपुलिनमण्डलं—स्वर्गङ्गासैकतनिवहः। महत्—विशालम्। अम्बरोदरे—गगनमध्ये इत्यर्थः। मन्दाकिनीपुलिनस्य शुभ्रत्वेनैवमुत्प्रेक्षितमिति ज्ञेयम्।

(२०९) परिवर्त्तित इव दिवसः पौर्णमासीनिशया, (२१०) मन्दमन्दमिन्दूदयसन्देहदूयमानमानसैः विघटितं घटमानचञ्चुच्युतमृणालकोटिभिः आसन्नकमलिनीचक्रवाकमिथुनैः, (२११) शरज्जलधरपटलाशङ्कासङ्कोचितकेकारवमूकमुखपुटैः पराक्षखीभूतं भवनशिखण्डिमण्डलैः,

(२०९) परिवर्त्तित इव—विनिमित इव, परावर्त्तित इवेत्यर्थः; स्निग्धधवलकान्तिमत्वादिति भावः। पौर्णमासीनिशया—पूर्णिमारात्र्या, स्निग्धत्वशुभत्वादिगुणसङ्गयोगात् पौर्णमासी निशीथिनी दिवसरूपेण परिणतेवेति विभाव्यते इति विशदार्थः। [ननु "स्त्रियाः पुंवद्भाषित—" (६।३।३४ पा०) इति सूत्रेण भाषितपुंस्कस्य पौर्णमासीशब्दस्य समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे परतः कथं इति चेन्न, पूर्णः मासः अस्ति अस्याः इति व्युत्पत्त्या, "प्रज्ञादिभ्यश्च" (५।४—समूहेन, इति अणि ङीपि चासाः सिद्धावपि संज्ञाभूतया दत्ताऽऽदिवत् अवापि मन्तक्रपूरण्योश्च" (६।३।३८ पा०) इति सूत्रेण पुंवद्भावप्रतिषेध इति ज्ञेयम्]। —

(२१०) मन्दमन्दम्—ईषदीषत्, इन्दोः,—चन्द्रस्य, उदयः,—प्रकाशः, तस्मिन् सन्देहेन—संशयेन; किमयमिन्दूदयः, उतान्यत् किञ्चित्? एवंरूपेण इत्यर्थः; दूयमानं—सन्तप्यमानम्; ["…दूयमान…" इत्यत्र "…ह्रियमान…" इति पाठे,—ह्रियमानं—निपीड्यमानमित्यर्थः, ह्रियतेः जुहोतेर्वा कर्मणि शानचि रूपम्]; चन्द्रोदये तेषां विरहसङ्कटशङ्कया इति भावः; मानसं—चित्तं, येषां तैः। घटमानेति।—घटमानायाः,—मीलितायाः, विरहशङ्कया अप्रफुल्लमानसतया स्वतः सङ्कुचिततयेति भावः; चञ्चुः,—तुण्डस्य, च्युता—भ्रष्टा, मृणालकोटिः,—विसाग्रं, विसखण्डमङ्गावलीढमित्यर्थः, येषां तैः। आसन्नेति।—आसन्ना—समीपवर्त्तिनी, कमलिनी—पद्मिनी, यस्याः सा सरसीत्यर्थः, तस्यां चक्रवाकमिथुनैः,—चक्रद्वन्द्वैः, विघटितं—वियुक्तं, परस्परं दूरस्थैरभावि इत्यर्थः, आतपवस्य चन्द्रवदतिशुभत्वेन चक्रद्वन्द्वैरेव चन्द्रभ्रान्त्या परस्परं वियुक्तमिति तात्पर्यम्। अत्र चक्रद्वन्द्वानां तदातपत्रे चन्द्रभ्रान्त्या विघटनोक्तेर्भ्रान्तिमानलङ्कारः।

(२११) शरदिति।—शरदि—घनात्यये, यत् जलधरपटलं—मेघमण्डलम्; निर्दुष्टत्वात् शुभमिति भावः; तस्य आशङ्कया—संशये, किमिदं कृत्रम्, उत शारदः जलधर इत्येवंरूपया इत्यर्थः, सङ्कोचितेन—मुद्रितेन, स्तब्धीभूतेनेत्यर्थः, केकारवेण—केकावाण्या, मूकानि—निःशब्दानि, केकावाणीशून्यानीति यावत्, मुखपुटानि—पुट-

(२१२) प्रबुद्धम् आवद्धच[illegible]जं[illegible]स्ट्रानन्दोद्दामोद्दलद्दलपुटाट्टहासविशदं कुमुदषण्डैः ।

(२१३) चिचीयमाणचेतास्च सराजको राजा दण्डानुसारावरोहिण्या दृष्ट्या सो[illegible]दरमैक्षिष्ट तत्तिलकम् इव त्रिभुवनस्य, शैत्यवम् इव श्वेतद्वीपस्य[illegible], अंशावतारम् इव शरदिन्दोः, हृदयम् इव धर्म्मस्य, निवेशम [illegible]ता इव शशिलोकस्य, दन्तमण्डल-

वत् वदनानि येषां तथाभूतैः, भवनशिखण्डि[illegible]॥ [illegible]मण्डलैः,—गृहमयूरनिचयैः, पर[illegible] भूतं—किञ्चिदर्धोन्मुखतां गतम् ; अत्रापि पूर्ववत् [illegible]ण्डमण्डलानां क्षण मुखमेघ[illegible] पराङ्मुखीभवनवर्णनात् भ्रान्तिमदलङ्कारः ।

(२१२) प्रबुद्ध—विकसितम् । आवद्धेति ।—आवद्धः,—निहितः, चन्द्रे—इन्दौ, य[illegible] आनन्दः,—प्रीतिः,—तस्य उद्दामेन—औत्कर्ष्येण, आतिशय्येनेत्यर्थः, उद्दलन्ति[illegible]—विकासं गच्छन्ति, यानि दलपुटानि—पुटवन्मुद्रितपर्वाणि इत्यर्थः, चन्द्रोदये [illegible]र्षां स्वत एव विकाशादातपत्रे च तस्मिन् चन्द्रश्मादिति भावः ; तान्येव अट्टहासाः,—हासविशेषाः, तैः विशदं—निर्मलं यथा तथा, [क्रियाविशेषणमिदम्] ; हासस्य धवलिम्नः कविप्रयोगप्रसिद्धत्वात् "धवलता वर्ण्यते हासकीर्त्योः" इत्युक्तेः । कुमुदषण्डैः,—कैरवसङ्घैः ; कुमुदषण्डानि चन्द्रोदयं प्राप्य यथा सम्यक् विकसन्ति, तथैव तस्मिन् कुवे आकृष्यमाणऽपीति भावः । अत्र दलपुटेषु अट्टहासत्वारोपादूपकं, पूर्ववत् भ्रान्तिमदलङ्कारस्य इत्यनयोः सङ्करः ।

(२१३) चिचीयमाणचेताः,—चिचीयमाणम्—आश्चर्यं कुर्वत्, चेतः,—मानसं यस्य तथाविधः, चमत्कृतचित्तः, विस्मयमानमानसः इत्यर्थः, ["नमो वरिवश्चित्रङः क्यच्" (३।१।१९ पा०) इति सूत्रेण आश्चर्यकरणार्थे क्यचि शानचि च रूपम्] । दण्डानुसारेति ।—दण्डानुसारेण—कुवस्य नालमनुसृत्येत्यर्थः, अवरोहति—उत्तिष्ठति ; तथाकृतया कुवर्त्योन्नीतया निहितया इत्यर्थः । कुवदण्डात् प्रभृति तत्पटं यावत् निपातितयेति यावत् । तत्—कुवमित्यर्थः । तिलकं—ललाटभूषणभूतं, सर्वसौन्दर्य-निधानभूमिमित्यर्थः । शैत्यवं—बाह्यं, क्षुद्रश्वेतद्वीपमिवेत्यर्थः ; श्वेतद्वीपस्य शुभ्रत्वात् आतपवत्साम्य, तत्रावैधर्म्यसाम्योपपत्तये शिशुत्वव्यपदेश इति विभाव्यम् । अंशावतारम् —अंशेन—खण्डेन, कलयेत्यर्थः, अवतारः,—अवतरणम्, आविर्भाव इत्यर्थः, तमिव । शरदिन्दोः,—शरच्चन्द्रस्य । हृदयमिव—अन्तःकरणमिव, निर्मलत्वादिति भावः । निवेशमिव—आयतनमिव, शशिलोकस्य—चन्द्रमण्डलस्य । दन्तेति ।—

धवलं मुखमिव चक्रवर्त्तित्वस्य, (२१४) मौक्तिकजालपरिकरमितं सौमन्तचक्रमिव दिवः, (२१५) बहुलज्योत्स्नाशुक्लोदरमैन्दवम् इव परिवेशवलयं, (२१६) शौक्ल्यहसितशङ्कश्रीकं श्रवणमण्डलम् इव निश्चलतां गतमैरावतस्य, (२१७) श्वेतगङ्गावर्त्तपाण्डुरं पदमिव त्रिभुवनवन्दनीयं त्रिविक्रमस्य,

दन्तमण्डलवत्—दशनचक्रवालवत, धवलं—शुभ्र, दन्तमण्डलेन—दशनसमूहेन धवलश्च। चक्रवर्त्तित्वस्य—सार्वभौमत्वस्य, मुखमिव—आरम्भमिव, वदनमिव च, चक्रवर्त्तित्वस्यङ्गकानां द्वात्रिंशतां प्रथमभिवेति यावत्, सितछत्रस्य चक्रवर्त्तित्वस्यङ्गकत्वादिति भावः, ("मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि" इति मेदिनी)।

(२१४) मौक्तिकेति।—मौक्तिकानां—मुक्ताफलानां, जालेन—समूहेन, दाम्नेति यावत्, यः परिकरः,—वेष्टनं, तेन मितम्—उज्ज्वलं, शुभ्रञ्च। सौमन्तचक्रमिव—केशविन्यासनिचयमिव, ("सीमन्ताः केशविन्यासाः") इति कोषः। दिवः,—स्वर्गस्य, द्युनारीधम्मिल्लशोभिमुक्ताजालमिवेति भावः।

(२१५) बहुलेति।—बहुलया—प्रभूतया, ज्योत्स्नया—चन्द्रिकया, शुक्लं—शुभ्रम, उदरम्—अभ्यन्तरं यस्य तथाभूतम, ऐन्दवं—चान्द्रमसं, परिवेशवलयमिव,—परिधिमण्डलमिव, ("परिवेशस्तु परिधिः" इत्यमरः); राकाशशधरमिवेति भावः।

(२१६) शौक्ल्येति।—शौक्ल्येन—श्वेतगुणेन, हसिता—तिरस्कृतेत्यर्थः; शङ्खादपि अधिकशौक्ल्यादिति भावः; शङ्खस्य—कम्बोः, श्रीः,—कान्तिर्येन तथोक्तं, श्रवणमण्डलमिव—कर्णमण्डलमिव; ऐरावतस्य स्वभावशुभत्वात साम्यमत्याहृतं वेदितव्यम्; हस्तिकर्णस्य सदैव चञ्चलत्वात्, निश्चलतां गतं—स्थिरत्वं प्राप्तम, एकत्रैवावस्थितमिति यावत्; अन्यथा स्वभावतः स्थिरस्य चञ्चलवस्तुना सह साम्यं न घटते, तेनैवमुक्तमिति ध्येयम्।

(२१७) श्वेतेति।—श्वेतगङ्गायाः,—शुभ्रसलिलायाः जाह्नव्याः, आवर्त्तवत्—भ्रमिर्यस्य भ्रम इव, पाण्डुरं—धवलम्; अत्र,—श्वेतायाः,—शुभ्रवर्णायाः, गङ्गायाः,—विष्णुपद्याः, आवर्त्तन—आवर्त्तनेन, अवस्थानेनेति यावत्; गङ्गाया विष्णुपदीभूतत्वादिति भावः; पाण्डुरं—धवलम्। पदमिव—चरणमिव। त्रिभुवनवन्दनीयं—त्रिलोकीपूज्य, त्रिजगदादरणीयञ्च। त्रिविक्रमस्य—वामनावतारस्य विष्णोः इत्यर्थः। अत्र एकस्यैवातपत्रस्य भूयसामुपमानानां सत्त्वात् मालोपमाऽलङ्कारः।

(२१८) प्रचेतसचूडामणिमरीचिशिखाभिः इव श्लिष्टाभिर्मानसविसतन्तुमयीभिः चामरिकावल्लीभिः विरचितपरिवेशम्, उपरि (२१९) चक्रवर्त्तिलक्ष्मीनूपुरस्वनश्रवणदोहदानिश्चलेन इव लक्ष्मणा विततपत्रेण हंसेन सनाथीकृतशिखरं,(२२०)स्पर्शवता च प्रभावस्तम्भितेन मन्दाकिनीमृणालेन मुकुलितफणेन, वासुकिना इव नीतेन दण्डतां द्योतमानं, (२२१) धवलिम्ना चालयत् इव नक्षत्रपथं, प्रभाप्रवाहप्रथिम्ना प्लावयत् इव

(२१८) प्रचेतसः,—वरुणस्य, चूडामणिः,—शिरोरत्नं, मस्तकस्थितमिति भावः; तस्य मरीचिशिखाभिरिव—मयूखाग्रैरिवेत्युत्प्रेक्षा, श्लिष्टाभिः,—संसक्ताभिः, मानसविसतन्तुमयीभिः,—मानससरोवरकमलमृणालसूत्ररचिताभिः; अतिशौभ्यादिति भावः; चामरिकाऽऽवल्लीभिः,—क्षुद्रबालव्यजनश्रेणीभिः, विरचितः,—कल्पितः, परिवेशः,—परिधिर्यस्य तथोक्तं, समन्तात् चामरिकाऽऽवल्लीवेष्टितमित्यर्थः।

(२१९) चक्रेति।—चक्रवर्त्तिनः,—सम्राजः, या लक्ष्मीः,—श्रीः, तस्या नूपुरस्वनस्य—मञ्जीररणितस्य, श्रवणे—आकर्णने, यत् दोहदम्—अभिलाषः; हंसानां नूपुररवप्रियत्वादिति भावः; तेन निश्चलः,—स्थिरः, तेनेव। विततपत्रेण—विस्तृतपक्षेण, लक्ष्मणा—चिह्नभूतेन सारसपक्षिणा, हंसेन—हंसाकारेण चेत्यर्थः; यद्वा,—लक्ष्मणा—चिह्नेन, हंसाकारकेणेत्यर्थः, सनाथीकृतशिखरं—संयुक्तशिरोभागम्, उपरिभागे विन्यस्तविस्तृतपक्षप्रालिङ्गितमहंसमित्यर्थः।

(२२०) स्पर्शवता—सुखस्पर्शेनेत्यर्थः, ["रसादिभ्यश्च" (५।२।९५ पा०) इति मतुप्, "भूमनिन्दाप्रशंसासु—" इत्यादिवार्त्तिकात् प्रशंसायाम् अतिशायने वाऽर्थे प्रयुक्तमिति ज्ञेयम्]। प्रभावस्तम्भितेन—प्रभावेण—अलौकिकमहिम्ना, स्तम्भितं—निश्चलतां गतं तेन; मृणालस्य अतिकोमलत्वेऽपि प्रभाववशात् दृढीभूतेनेति भावः; मन्दाकिनीमृणालेन—मन्दाकिन्याः,—स्वर्गङ्गायाः, मृणालेन—पद्मनालेन, मुकुलितफणेन—सङ्कुचितफणामण्डलेन, दण्डतां नीतेन—नालतां गतेन, वासुकिनेव—सर्पराजेनेव, द्योतमानं—राजमानम्। स्वर्नद्याः मुक्तिप्रदैकमृणालत्वं हि असामान्यभोगसौभाग्यसम्पत्तये एतच्छत्रदण्डरूपतया परिणतम्, अतः फणसहस्रं मुकुलीकृत्य श्रद्धाहिणा स्थितमिवेति प्रतीयते, इति समुदितार्थः।

(२२१) धवलिम्ना—शैल्येन, ["वर्णदृढा—" (५।१।१२३ पा०) इति इमनिचि

दिवसं, समुच्छ्रायेण अधः कुर्व्वदिव दिवम्, उपरिस्थितम् इव सर्व्वमङ्गलानां, श्वेतमण्डपम् इव श्रियः, स्तवकमिव ब्रह्मस्तम्भस्य, नाभिमण्डलम् इव ज्योत्स्नायाः, विशदं हासमिव कीर्त्तेः, फेनराशिम् इव खड्गधाराजलानां, यशःपटलम् इव शौर्य्यशालितायाः, त्रैलोक्याद्भुतं महत् छत्रम्।

रूपम्]; नलवपत्रम्—अलरीत्रम्; [नलवाणां पत्त्राः इति तत्पुरुषे "ऋक्पूर—" (५।४।७५ पा०) इत्यादिना समासान्तः अप्रत्ययः]। छायापथनामकः ज्योतिश्चक्रमध्यवर्त्ती कश्चित् तिरश्चीनः अवकाशोऽयमिति प्रतीयते, तस्य हि क्षीरसमधवलत्वं प्रसिद्धमेव; तथा हि रघौ वधोद्यमे रश्मौ कालिदासः,—"छायापथेनेव शरत्प्रसन्नम्" इति। त्रालयदिव—श्रीणयदिव; परिष्कुर्व्वदिवेत्यर्थः। प्रभेति।—प्रभाणां—दीप्तेः, प्रवाहस्य—स्रोतसः, प्रसरस्येत्यर्थः, प्रथिम्ना—विस्तारेण; ["पृथ्वादिभ्य—" (५।१।१२२ पा०) इत्यादिना इमनिच्; "रक्षती—" (६।४।६१ पा०) इति रत्वञ्च, फेयम्]। प्राच्छादयदिव—आच्छादयदिव। समुच्छ्रायेण—समुन्नत्या। अधःकुर्व्वदिव—निम्नीकुर्व्वदिव, पराभवदिवेत्यर्थः। दिवं—द्यौम्। सर्व्वमङ्गलानां—कल्याणकरछत्रद्रव्याणामित्यर्थः, प्रभूतमङ्गलजनकादिति भावः। श्वेतमण्डपमिव—शुभभवनमिव; राजलक्ष्म्याः वासभवनमिवेत्युत्प्रेक्षा। स्तवकमिव—पुष्पगुच्छमिव, ब्रह्मस्तम्भस्य—ब्रह्माण्डस्येति यावत्; छत्रस्य स्तवकाकृतित्वादिति भावः; चतुर्दशभुवनभृतं ब्रह्माण्डं राज्ञः उपभोगार्थमेकत्र प्रसूनस्तवकमिव सम्मिलितं सन्तस्थितमिवेत्युत्प्रेक्षा। नाभिमण्डलमिव—नाभिभागमिव, कौमुद्याः प्रभवस्थानमिवेत्यर्थः, नाभिमण्डलस्य छत्राकृतित्वात्, छत्रस्य च शीतत्वादिगुणाधिक्यादेव नाभिरुपत्वमुत्प्रेक्षितमित्यभिप्रायः। विशदं—शुभ्रम्; हासमिव—मधुरहास्यरूपविकाशमिवेत्यर्थः; कीर्त्तेः ज्योत्स्नायाश्च शुभत्वेन कविवर्णनीयत्वादतिधवलमिति भावः। खड्गधाराजलानां—असिनिशितायभागरूपोदकानाम्; फेनराशिमिव—हिण्डीरपुञ्जमिव; कृपाणधारानीराणि फेनायमानानि पुञ्जीभूयैवात्र संस्थितानीवेत्युत्प्रेक्षा; तस्य विक्रमैकरक्षणीयत्वादिति भावः। शौर्य्यशालितायाः,—शौर्य्येण शालते शोभते यः सः शौर्य्यशाली, तस्य भावः तत्ता, तस्याः, महाबीर्य्यविभूषितस्य सौन्दर्य्यविधायिनः प्रकाशमानपराक्रमस्य इत्यर्थः; यशःपटलमिव—दिशां विदिशाञ्चान्तरालमपि व्याप्नुवतीनां कीर्त्तीनां सङ्घातमिवेत्युत्प्रेक्षा; तस्य वीरैकभोगास्पदीभूतत्वादिति भावः।

दृष्टे च (२२२) तस्मिन् राज्ञा प्रथमे शेषमपि प्राभृतं प्रकाशयाञ्चक्रुः क्रमेण कार्म्माः ; तद्यथा,—परार्द्ध्यरत्नांशुगणीकृतदिग्भागान् भगदत्तप्रभृतिख्यातपार्थिवपरागतान् आहृतलक्षणान् अलङ्कारान्, प्रभालेपिनाञ्च चूडामणीनां समुत्कर्षान्, क्षीरोदधेः धवलताहेतून् इव हारान्, (२२३) अनेकरागरुचिरवेत्रकरण्डकुण्डलीकृतानि शरच्चन्द्रमरीचिरूक्षि शौचक्षमाणि क्षौमाणि, (२२४) कुशलशिल्पिलोकोल्लिखिता-

(२२२) तस्मिन्—आतपत्रे इत्यर्थः। प्रथमे—मुख्या इत्यर्थः ["प्रथमचरम—" (१।१।३३ पा०) इत्यादिना सर्व्वनामत्वस्य वैभाषिकत्वात् जसः औत्वं शेषम्]। कार्म्माः,—कर्म्मचारिणः, परिजना इत्यर्थः। शेषमपि—अन्यदपि इत्यर्थः। प्राभृतम्—उपदाम्, उपहारमित्यर्थः, ("प्राभृतन्तु प्रदेशनम्। उपायनमुपदाप्राभृतोपहाराः समाः पदा" इत्यमरः)। प्रकाशयाञ्चक्रुः,—प्रकटितवन्तः, दर्शयामासुरित्यर्थः। तद्यथा—तथा हि। परार्द्ध्येति।—परार्द्ध्यानाम्—अत्युत्कृष्टानाम्, अमूल्यानामित्यर्थः, ("पराद्ध्याऽयप्रायहरप्राय्याऽय्यार्घ्यमर्घ्यम्" इत्यमरः)। रत्नानां—मणीनाम्, अंशुभिः,—किरणैः, गणीकृताः,—सङ्ख्यीकृताः, दिग्भागाः,—आशातटाः यैः तथोक्तान्। भगदत्तेति।—भगदत्तः,—दुर्य्योधनस्यश्वशुरः नृपभेदः, तदादिभिः,—तत्प्रभृतिभिः, ख्यातैः,—प्रसिद्धैः, पार्थिवैः,—नृपैः, परागतान्—व्यवहृतान्, आहृतलक्षणान्—गुणैः प्रसिद्धान्, ("गुणैः प्रतीते तु कृतलक्षणाहृतलक्षणौ" इत्यमरः)। प्रभालेपिनां—कान्तिपूर्णानाम्, समुत्कर्षान्—अतिशयान्, गुणातिशयव्यञ्जकानित्यर्थः ; कङ्कणानि ताडङ्कानि चूडारत्नानि इति भावः। क्षीरोदधेः,—दुग्धार्णवस्य, धवलताहेतूनिव—शुभ्रतानिदानानि इव ; अतिशुभ्रस्य तस्य हारस्यैव समुद्गर्भे अवस्थानात् तत्प्रभयैव क्षीरसमुद्रस्य धवलता जाता इव इत्युत्प्रेक्षितार्थः।

(२२३) अनेकैरिति।—अनेकैः,—विविधैः, रागैः,—वर्णैरित्यर्थः, रुचिराः,—मनोज्ञाः, ये वेत्रकरण्डाः,—वेत्रनिर्म्मितसमुद्गकाः, तेषु कुण्डलीकृतानि—सङ्कोचितानि, सङ्कोच्य स्थापितानीत्यर्थः, शरच्चन्द्रमरीचिरूक्षि—शारदेन्दुकिरणप्रभाणि, शौचक्षमाणि—क्षालनार्हाणि ; क्षौमवस्त्राणि तु प्रायश एव क्षालनानर्हाणि भवन्ति, इमानि तु न तादृशानि इति भावः ; यद्वा,—पवित्रतासम्पादनदक्षाणि। क्षौमाणि—वसनविशेषान्।

(२२४) कुशलेति।—कुशलैः,—निपुणैः, शिल्पिलोकैः,—कारुजनैः,("कारुः

नाश्च शुक्तिशङ्खगल्वर्कप्रमुखाणां पानभाजनानां निचयान्, (२२५) निचोलकरचितरुचश्च रुचिरकाञ्चनपत्रभङ्गभङ्गुराणाम् अतिबभ्रुरपरिवेशानां कादरङ्गचर्म्मणां सम्भारान्, भूर्जत्वक्कोमलाः स्पर्शवतीः जातीपट्टिकाः, (२२६) चित्रपटानाञ्च मृदीयसां चमूरुकोपधानादीन् विकारान्,

शिल्पी" इत्यमरः)। उल्लिखितानाम्—उद्धर्षितानां, प्रमृष्टानामिति यावत्। शुक्तीति।—शुक्तयः,—मुक्तास्फोटाः (मुक्तास्फोटः स्त्रियां शुक्तिः" इत्यमरः) शङ्खाः,—कम्बवः, गल्वर्काः,—मरकाख्या मणिभेदाः, "चन्द्रकान्ता" इति केचित्, चषकाः वा, प्रमुखाः,—आदयः,—श्रेष्ठा वा, श्रेष्ठा इत्यर्थः, येषां तथाभूतानां, तत्तद्रचितानामिति भावः; शुक्तिशङ्खचषकरूपाणां वा, पानभाजनानि तन्मयान्यपि दृश्यन्ते; पानभाजनानां—पानपात्राणां, निचयान्—सङ्घान्।

(२२५) निचोलकैरिति।—निचोलकैः,—आवरणवस्त्रैः, रचिताः,—स्थापिता इत्यर्थः; रुचः,—प्रभा येषां तथोक्तानाम्, औज्ज्वल्यपरिरक्षणार्थम् आवरणवस्त्रैराहृतानामित्यर्थः। रुचिरैरिति।—रुचिरैः,—मनोज्ञैः, काञ्चनपत्रभङ्गैः,—सौवर्णपत्ररचनाभिः, भङ्गुराणि—भङ्गिमन्ति, तेषाम्; अतिबभ्रुरपरिवेशानाम्—अतिशयेन उन्नतानतताभोगानामित्यर्थः। कादरङ्गचर्म्मणां—कादरङ्गटप्रजसमृगविशेषाजिनानाम्; यद्वा,—कर्दः,—कर्दमः, स एव, कार्दः, [स्वार्थे अण्] रङ्गः,—रागः, [रजेः भावे घञ्]; कार्दः इव रङ्गः येषां तथाभूतानां चर्म्मणां, कर्दमाभानां कृष्णसारप्रभृतीनां त्वचामित्यर्थः; धूमाभानां मसृणाजिनानामिति भावः; सम्भारान्—निचयान्। भूर्जत्वक्कोमलाः,—भूर्जस्य—स्वनामख्यातवल्कलप्रधानवृक्षस्य, त्वच इव—वल्कलानि इव, कोमलाः,—मृदुलाः, स्पर्शवतीः,—सुखस्पर्शाः, जातीपट्टिकाः,—उत्कृष्टानि सघनग्रथनसाधनानि सूत्राणीत्यर्थः; यद्वा,—जात्याः,—मालत्याः, तत्प्रसूनसुगन्धय इति यावत्, याः पट्टिकाः,—पट्टैः भृताः, ["तमधीष्टे—" (५।१ ८० पा०) इति ठञ्] कोमलांशुकानि, जातीकुसुमसुवासितानि कौशेयवसनानि इति यावत्।

(२२६) चित्रपटानां—विचित्रवसनानाम्। मृदीयसाम्—अतिमृदूनाम्। चमूरुकोपधानादीन्—चमूरुकः,—मृगभेदः, तस्य उपधानादीन्, तदाकाराकारितशिरोधानादीन्, ["चमूरुकोपधानादीन्" इत्यत्र "समूरुकोपधानादीन्" इति पाठेऽपि स एवार्थः]। विकारान्—रूपान्तराणि, अतिकोमलविचित्रवसननिर्म्मित-

(२२७) प्रियङ्गुप्रसवपिङ्गलत्विषि च आसनानि वेत्रमयाणि, अगुरुवल्कलकल्पितसञ्चयानि च सुभाषितभाञ्जि पुस्तकानि, (२२८)परिणतपाटलपटोलत्विषि च तरुणहारीतहरिन्नि क्षीरक्षारोणि च पूगानां पल्लवलम्बीनि सरसानि फलानि, (२२९) सहकारलतारसानाञ्च कृष्णागुरुतैलस्य च (२३०) कुपितकपिकपोलकपिलकापोतिकापलाशकोशीकवचिताङ्गीः स्थवीयसी-

चमूरुहगाकारशिरोधानादिविविधद्रव्याणीत्यर्थः ; यद्वा,—विचित्रैः कोमलैश्च पटैः समाच्छादितानि, राङ्कवाणि मृगचर्मोपकरणानीति यावत् ।

(२२७) प्रियङ्गुरिति ।—प्रियङ्गुप्रसवः,—प्रियङ्गुलतापुष्पं, तद्वत्—पिङ्गलाः,—पिशङ्गाः त्वचः,—वल्कलानि, आच्छादनानीत्यर्थः, येषां तानि, वेत्रमयाणि—वेतसलतानिर्म्मितानि, आसनानि—पीठानि । अगुरुरिति ।—अगुरुवल्कलेन—अगुरुकाष्ठत्वचा, कल्पितः,—विरचितः, सञ्चयः,—पत्राणां सङ्घः इत्यर्थः, येषां तथोक्तानि, पत्रावरणार्थं वल्कलेन निर्म्मितकपाटिकानीति यावत् ; सुभाषितभाञ्जि—सदुक्तिपूर्णानि सुवचनवन्तीत्यर्थः, पुस्तकानि—सुपाठ्यान् ग्रन्थान् ।

(२२८) परिणतेति ।—परिणतं—परिपक्वम्, अत एव पाटलं—श्वेतरक्तं, यत् पटोलं—खनामप्रसिद्धः कूलकापरपर्य्यायः फलविशेषः, तस्य त्विषः,—कान्तयः इव त्विषः येषां तानि । तरुणहारीतहरिन्नि—तरुणः,—नवीनः, यः हारीतः,—पक्षिविशेषः, तद्वत् हरिन्नि—श्यामलानि, क्षीरक्षारोणि—दुग्धवच्छुभ्रनिर्य्यासोक्षारोणि, निरतिशयस्वादूनीत्यर्थः ; पूगानां—गुवाकतरूणां, पल्लवलम्बीनि—किसलययुतानीति भावः ; सरसानि—रसवन्ति, मधुराणि इति भावः ।

(२२९) सहकारेति ।—सहकारलता—अतिसौरभाऽऽम्रतरुः, ("आम्रयूतौ रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः) तस्या रसाः,—निर्य्यासाः, तेषां, ["सहकारलतारसानाम्" इत्यत्र "लतासहकाररसानाम्" इति पाठे,—लतारूपो यः सहकारः,—आम्रः, तस्य रसाः तेषामित्यर्थः ।

(२३०) कुपितेति ।—कुपितस्य—क्रुद्धस्य, कपेः,—वानरस्य, कपोलः,—गण्डः, तद्वत् कपिला—पिङ्गला, या कापोतिका—ओषधिविशेषः, तस्याः पलाशानां—पत्राणां, कोशीभिः,—कोशाकारैः पुटसमूहैः, कवचितानि—आहतानि इत्यर्थः, अङ्गानि—अवयवाः यासां ताः, स्थवीयसीः,—अतिस्थिराः, दृढा इत्यर्थः, ["स्थूल-

वैणवीर्नाडीश्च, (२३१) पट्टसूत्रप्रसेवकार्पितांश्च भिन्नाञ्जन-क्षुण्णस्य क्षुण्णागुरुणः गुरुपरितापमुषश्च गोशीर्षचन्दनस्य (२३२) तुषारशिलाशकलशिशिरस्वच्छसितस्य च कर्पूरस्य कस्तूरिकाकोशकानाञ्च, पक्वफलजूटजटिलानाञ्च कक्कोलपल्लवानां लवङ्गपुष्पमञ्जरीणां, जातीफलस्तवकानाञ्च राशीन्; (२३३) अतिमधुरमधुरसामोदनिर्हारिणीश्च उल्लककलशीः,

दूर—" (६।४।१५६ पा०) इति ईयसुनि यणादिरूपपरस्य लोपात् गुणात् च सिद्धं, ततः ङीष्] वैणवीः,—वंशसम्बन्धिनीः, नाडीः,—पादविशेषान्।

(२३१) पट्टेति।—पट्टसूत्राणां—कौषेयतन्तूनां, प्रसेवकाः,—गोण्यः, भाजनविशेषाः इत्यर्थः, तेषु अर्पिताः,—निहिताः, तान्। भिन्नाञ्जनक्षुण्णस्य—भिन्नं,—मर्दितं, यदञ्जनं—रसाञ्जनं, कज्जलं वा, तद्वत् क्षुण्णं—श्यामं, तस्य। गुरुपरितापमुषः,—गुरुः,—महान्, परितापः,—सन्तापः, दाह इत्यर्थः, तं मुष्णाति—हरतीति तथोक्तस्य, गोशीर्षचन्दनस्य—हरिचन्दनाख्यचन्दनविशेषस्य, ("तैलपर्णिकगोशीर्षं हरिचन्दनमस्त्रियाम्" इत्यमरः)।

(२३२) तुषारेति।—तुषारशिलाः,—हिमशिलाः, वर्षोपलाः इत्यर्थः, तासां शकलं—खण्डं, तद्वत् शिशिरं—शीतलं, तथा स्वच्छं—निर्मलं, सितं—शुभ्रञ्च, तस्य। [अत्र विशेषणपदानां परस्परं विशेष्यत्वं परिकल्प्य कर्मधारयः स्वीकरणीयः]। कस्तूरिकाकोशकानां—कस्तूरिकाहेतुभूतमृगविशेषाणां नाभीनां, मृगनाभीनामित्यर्थः। पक्वेति।—पक्वानां—परिणतानां, फलानां—शस्यानां, जूटैः,—समूहैः, जटिलाः,—युक्ताः, तेषां, कक्कोलपल्लवानां—सुगन्धितरुविशेषकिसलयानाम्; लवङ्गपुष्पमञ्जरीणां—लवङ्गलताकुसुमानां वल्लरीणाम्; जातीफलस्तवकानां—जातीफलगुच्छानां, राशीन्—सञ्चयान्।

(२३३) अतीति।—अतिमधुरः,—अतिसुरसः, सुभोग्य इत्यर्थः, [पदमेतत् आमोदमेव विशिनष्टि, अन्यथा मधुररसायाः स्वाद्याः द्राक्षाया एव वाचकतया तद्विशेषणत्वेनोपन्यासः पिष्टपेषणवत् निरर्थकः स्यादिति विभाव्यम्] मधुरसायाः,—द्राक्षायाः, केचित् "मधुरसं—मकरन्दद्रवम्" इत्याहुः, ("मृद्वीका गोस्तनी द्राक्षा स्वादी मधुरसेति च" इत्यमरः) आमोदः,—अतिदूरं प्रसरत् मनोहरं सौरभम्, ("आमोदः सोऽतिनिर्हारी" इत्यमरः)। निर्हारी च—हृदयाकर्षकः गन्धः, ("समाकर्षी तु निर्हारी" इत्यमरः) यासु ताः। उल्लककलशीः,—उल्लकः,—

सितासितस्य च चामरजातस्य निचयान्, (२३४) अवलम्ब-
मानतूलिकाऽलाबुकांश्च, लिखितानालेख्यफलकसम्पुटान्,
(२३५) कुतूहलकृन्ति कनकयष्टुल्लानियमितग्रीवाणां किन्नरा-
णाञ्च वनमानुषाणाञ्च जीवञ्जीवकानाञ्च जलमानुषाणाञ्च
मिथुनानि, (२३६) परिमलामोदितककुभश्च कस्तूरिकाकुर-
ङ्गान्, गेहपरिसरणपरिचिताश्च चमरीः, (२३७) चामीकर-
रसाचित्रवेत्रपञ्जरान्तर्गतांश्च सुबहुसुभाषितजल्पार्काजङ्कांश्च

सुगन्धिफलविशेषरसः, आसवविशेषः इति कैचित्, तस्य कलसीः,—कुम्भान्। सिता-
सितस्य—श्वेतस्य कृष्णस्य च। चामरजातस्य—बालव्यजनसमूहस्य।

(२३४) अवलम्बमानेति।—अवलम्बमानाभिः,—लम्बमानाभिः, पार्श्वे
निविशमानाभिरित्यर्थः, तूलिकाभिः,—दूँषिकाभिः, चित्रकर्म्मसाधनीभिरिति यावत्,
("दूँषिका तूलिका समे" इत्यमरः) सहिताः अलाबुकाः,—तुम्बाः, वर्णकभाजना-
नीति भावः, तान्। लिखितेति।—लिखिताः,—चित्रिताः, अनालेख्याः,—
अचित्रिताः, ये फलकसम्पुटाः,—चित्राधारकाष्ठफलकविशेषाः तान्; यद्वा,—
अवलम्बमानाः तूलिकाः अलाबुकाश्च येषु तान्। लिखितान्—चित्रितान्, विविध-
लतापत्रादिचित्रसमन्वितानित्यर्थः, आलेख्यफलकसम्पुटान्—आलेख्यफलकानां—
चित्रपटानां, सम्पुटान्—आधारविशेषानित्यर्थः।

(२३५) कुतूहलकृन्ति—कौतुकावहानि। कनकेति।—कनकयष्टुल्लया—
काञ्चनदाम्ना, नियमिता—निबद्धा, ग्रीवा—कन्धरा येषां तथोक्तानां, किन्नराणां—
कुत्सितदैवयोनिभेदानाम्, अश्वमुखनरदेहविशेषाणां, नरमुखाश्वदेहानां वा इत्यर्थः।
जीवञ्जीवकानां—चकोराणां, ("जीवञ्जीवश्चकोरकः" इत्यमरः)। जलमानुषाणां—
सलिलान्तःस्थितनरविशेषाणां, मिथुनानि—द्वन्द्वानि।

(२३६) परिमलेति।—परिमलेन—मनोहरसौरभेण, आमोदिताः,—
सुरभिताः, ककुभः,—दिशः यैः तथाभूतान्, कस्तूरिकाकुरङ्गान्—सुगन्धिनाभिकोष-
युक्तहरिणभेदान्। गेहेति।—गेहेषु—गृहेषु, परिसरणे—विचरणे, परिचिताः,—
अभ्यस्ताः ताः, गृहवासाभ्यस्ता इत्यर्थः, चमरीः,—महिषाकारहरिणीः।

(२३७) चामीकरेति।—चामीकरस्य—स्वर्णस्य, द्रुतस्येति भावः; रसेन—
द्रवेण, चित्राः,—रञ्जिताः, वेत्राः,—वेतसाः, तेषां पञ्जरावलि—तद्रचितानि पिञ्जरावलि

शुकशारिकाप्रभृतीन् पक्षिणः, (२३८) प्रवालपञ्जरगतांश्च चकोरान्, जलहस्तिनाम् उदग्रकुम्भमुक्ताफलदामदन्तुराणि च दन्तकाण्डकुण्डलानि।

राजा तु कुलदर्शनात् प्रहृष्टहृदयः (२३९) प्रथमप्रयाणे शोभननिमित्तमिति मनसा जघ्राह; हंसवेगश्च प्रीयमाणो ब्रभाषे,—"भद्र! सकलरत्नधाम्नः परमेश्वरशिरोधारणार्हस्य अस्य महाऽऽतपत्रस्य महार्णवात् इव कुमुदबान्धवस्य कुमारात् लाभो न विस्मयाय। बालविद्याः खलु महताम् उपक्रतयः"

इत्यर्थः, तेषाम् अन्तर्गताः,—मध्यस्थिताः तान्। सुवचनानि।—सुवचनानि—प्रभूतानि, सुभाषितानि—सूक्तयः, सद्वचनानि इत्यर्थः, तेषां जल्पाकान्—पुनः पुनरुच्चारणशीलान्, वाचालान् इत्यर्थः, ("स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक्" इत्यमरः) जिह्वा—रसना येषां तान्।

(२३८) प्रवालेति।—प्रवालः,—विद्रुमाख्यरत्नविशेषः, ("अथ विद्रुमः पुंसि प्रवालः पुंनपुंसकम्" इत्यमरः) तस्य पञ्जराणि—पिञ्जराणि, तानि गताः,—प्राप्ताः, तत्र आयद्धा इत्यर्थः, तान्, ["द्वितीयाश्रितातीत—" (२।१।२४पा०) इति द्वितीयासमासः]। जलहस्तिनां—जलचराणां करिणाम्। उदग्रेति।—उदग्रेषु—उन्नतेषु, कुम्भेषु—शिरःस्थप्रदेशविशेषेषु, जायमानानि मुक्ताफलानि—मौक्तिकानि, गजशिरःसम्भूतमुक्ताफलानीत्यर्थः, तेषां दाम्ना—स्रजा, दन्तुराणि—उच्चलानीति भावः; दन्तकाण्डकुण्डलानि—हस्तिदशनलक्ष्मरचितकर्णभूषणविशेषान्।

(२३९) प्रथमप्रयाणे—प्रथमयात्रायाम्। शोभननिमित्तं—शुभलक्षणम्। मनसा जघ्राह—आकलयामास इत्यर्थः। सकलरत्नधाम्नः,—सर्वरत्नाकरस्य, सर्वगुणाधारस्येति यावत्, परमेश्वरस्य—हरस्य, चक्रवर्त्तिनश्च, शिरोधारणार्हस्य—मस्तकधारणयोग्यस्य। महाऽऽतपत्रस्य—उत्कृष्टच्छत्रस्य। महार्णवात्—गभीरसागरात्। कुमुदबान्धवस्य—चन्द्रस्य। कुमारात्—तदाख्यकामरूपाधिपात्। उपक्रतयः,—परोपकरणानीति यावत्, महतां—सत्पुरुषाणां, बालविद्याः,—बालाः,—प्रथमाभ्यस्ताः, विद्याः,—ज्ञानानि, अध्ययनार्हा इति यावत्; यद्वा,—बालानां—शिशूनां, विद्याः,—पाठाभ्यासाः, इवेति शेषः; महान्तो हि प्रथममेव परोपकारः अवश्यकर्त्तव्यः इत्येवं ज्ञानमर्ज्जयन्ति; यद्वा,—शिशवो यद्वा अल्पकर्म्माणः सन्तः

इति। (२४०) अपनीते च तस्मात्प्रदेशात् प्राभृतसम्भारे, क्षणम् इव स्थित्वा,—"हंसवेग! विश्रम्यताम्" इति प्रतीहारभवनं विसर्ज्जयाम्बभूव। स्वयमपि उत्थाय स्नात्वा मङ्गलाकाङ्क्षी प्राङ्मुखः प्राविशत् आभोगस्य छायाम्।

अथ विशत एव अस्य (२४१) छायाजन्मना जड़िम्ना चूड़ामणिताम् अनीयत इव शशिबिम्बम्। (२४२) अम्बु-बिन्दुमुचः चुचुम्बुः इव चन्द्रकान्तमणयो ललाटतटम्। कर्पूररेणव इव व्यलीयन्त लोचनयुगले। (२४३) गल-त्तुहिनकणनिकरकृतनीहारा हारा इव अवध्यन्त।

केवलं विद्यामेवाभ्यस्यन्ति, महान्तोऽपि तथैव सर्व्वकर्म्म परित्यज्य परोपकारनिरता भवन्ति, अतो मदुपकारार्थं परोपकारनिरतस्य कुमारस्य एवं दानं न विस्मयजनकमिति भावः।

(२४०) अपनीते—अपसारिते, भाण्डागारं प्रापिते इति भावः। प्राभृत-सम्भारे—उपदासङ्घे, उपढौकनद्रव्यसमूहे इत्यर्थः। प्रतीहारभवनं—दौवारिकावासम्; यद्वा,—प्रतीहारे—द्वारि, बहिर्द्वारसमीपे इत्यर्थः, भवनम्—आगारं, दूतनिवासमिति भावः। आभोगस्य—तदाख्यस्य महाऽऽतपत्रस्य।

(२४१) विशतः,—प्रविशत इत्यर्थः, अस्य—हर्षस्य, [सम्बन्धे षष्ठी, चूड़ामणिताम् इत्यनेन सम्बन्धः]। छायाजन्मना—अनातपजातेन, छत्रस्येति भावः; जड़िम्ना—जाड्येन, शैत्येन कर्त्तृभूतेन इत्यर्थः, शशिबिम्ब—चन्द्रकिरण इत्यर्थः, [मुख्ये कर्म्मणि प्रथमा] छायाजन्मना जड़िम्ना घनीभूतमिति यावत्, पूर्व्वोक्तः प्रतिदिनं छायायाः शैत्यहेतोः छत्राभ्यन्तरं प्रविशन् एकैकः सोमरश्मिरिति भावः। चूड़ामणितां—मुकुटरत्नतां, [गौणे कर्म्मणि द्वितीया] हर्षस्य मुकुटे प्रतिफलनादिति भावः।

(२४२) अम्बुबिन्दुमुचः,—जलकणस्राविणः। चुचुम्बुरिव—प्रसृमरिव। कर्पूररेणवः,—घनसाररजांसि, लोचनयुगले—नेत्रयुग्मे, व्यलीयन्त—विलीनाः अभवन्, आश्लिष्यन् इत्यर्थः, [लीयतेः दैवादिकस्य कर्त्तरि लङि रूपम्]।

(२४३) गलदिति।—गलद्भिः,—स्रवद्भिः, तुहिनकणानां—हिमबिन्दूनां, निकरैः,—समूहैः, तुहिनकरकिरणसमुद्भूतैरिति भावः, कृताः,—विरचिताः, नीहाराः,—हिमकणा येषु तथाविधाः, हिमकणनिर्म्मिता इत्यर्थः। [अत्र "नीहारा

(२४४) हरिचन्दनरसासारेण इव अपाति सन्ततम् उरसि। कुमुदमयम् इव हृदयम् अभवत् अतिशिशिरम्। अन्तर्हिंतहिमशिला इव विलीयमाना व्यलिम्पत् अङ्गानि। जातविस्मयश्च अकरोत् मनसि, (२४५) "एकमजर्यं मङ्गतम् अपहाय काऽस्ति अन्या प्रतिकौशलिका ?" इति। आहारकाले च हंसवेगाय (२४६) धवलकर्पटप्राहृतधौतनारिकेलपरिगृहीतं विलिप्तशेषं चन्दनम् अङ्गसृष्टे च वाससी (२४७) अरत्तारकाऽऽकारतारमुक्तास्तवकितपदं परिवेशं नाम कटिसूत्रम्

हारा इव" इत्यत्र "नीहारहारा इव" इति समीचीनतया प्रतिभाति ; तेन गलन्तिः तुहिनकणनिकरैः कृताः नीहारहाराः,—तुहिनरचितहारा इवेत्यर्थः]। अवश्यन्त—कण्ठे समसज्यन्तेति भावः, [बध्नातेः कर्मणि लङि रूपम]।

(२४४) हरिचन्दनेति।—हरिचन्दनरसानां—चन्दनविशेषद्रवाणाम्,आसारः,—धारासम्पातः तेनैव, अपाति—पतितं, [पततेः कर्मणि लुङि रूपम]। सन्ततम्—अजस्रम्। उरसि—वक्षसि। कुमुदमयं—कैरवमयम्। अतिशिशिरम्—अतिशीतलम्। अन्तर्हिंतहिमशिला—अदृश्यकरका इत्यर्थः। विलीयमाना—द्रवीभवन्ती।

(२४५) एकं—केवलम्, अजर्यम्—अक्षयं, सङ्गतं—मैत्रीम्, अपहाय—त्यक्त्वा, अन्या—अपरा, प्रतिकौशलिका—प्रत्युपकृतिः, का अस्ति ?—नैव कापीत्यर्थः ; केवलमकृत्रिमं सख्यमेव अस्य प्रतिदानं नान्यत् किमपि वस्तु इति भावः।

(२४६) धवलेति।—धवलेन—धौतेन इत्यर्थः, कर्पटेन—वस्त्रेण, प्राहृतः,—आच्छादितः, यः धौतः,—सृष्टः, विशुद्ध इत्यर्थः, नारिकेलः,—नारिकेलसम्भवः इत्यर्थः, ["नारिकेल" इत्यत्र "नालिकेर" इति पाठेऽपि स एवार्थः] तेन परिगृहीतं —तत्रार्पितमिति यावत्, विलिप्तशेषं—स्वानुलिप्तावशिष्टमित्यर्थः, अङ्गसृष्टे—अङ्गक्षुते, स्वपरिधानयोग्ये इत्यर्थः ; स्वाङ्गानुलेपनावशिष्टचन्दनप्रदानं तथा स्वाङ्गसृष्टोचितवासःप्रदानञ्च अनुग्रहातिशय्यप्रदर्शनार्थं, राजयोग्यवसनादिरूपप्रसादप्राप्तेः सम्मानबोधकत्वादिति भावः।

(२४७) अरदिति।—अरदः,—अरट्टतीः, तारकाः,—नक्षत्राणि, तासाम् आकारा इव—मूर्त्तय इव, मेघाद्यावरणराहित्यात् अतिसमुज्ज्वला इति भावः ; तारा:,—मौक्तिकानि, या मुक्ताः,—मुक्ताफलानीत्यर्थः, तैः खचितं—ग्रथितं, पदम्—

(२४८) अतिमहार्हपद्मरागालोकलोहितीकृतदिवसञ्च तरङ्गकं नाम कर्णाभरणं प्रभुतञ्च भोज्यजातं प्राहिणोत्। एवंप्रायेण च क्रमेण जगाम दिवमः।

ततः (२४९) कटकस्थबलबहुलधूलिभूमरितवपुरंशुमाली मलीमसम् अङ्गमिव क्षालयितुम् अपरजलनिधिम् अवातरत्। (२५०) आभोगाऽऽतपत्रप्रदानवार्त्तामिव निवेदयितुं वरुणाय वारुणीं दिशम् अयासीत्। (२५१) मुकुलायमानमकलङ्कमलवना प्रमुख एव बद्धसेवाञ्जलिपुटा इव सहोपा भूः

अवयव इत्यर्थः, यस्य तथाभूतं, परिवेशं नाम—परिवेश इत्याख्यं, परिधिरूपत्वादिति भावः।

(२४८) अतीति।—अतिमहार्हस्य—महामूल्यस्य, पद्मरागस्य—रत्नविशेषस्य, कर्णाभरणनिर्मितस्य इति भावः; आलोकेन—उद्योतेन, लोहितीकृतः,—रक्तीकृतः, दिवसः,—वासरः, येन तथाभूतं, तरङ्गकं नाम—तरङ्गकैतिसंज्ञकम्, आन्दोलनादिति भावः; कर्णाभरणं—कुण्डलम्।

(२४९) कटकेति।—कटकं—इत्यमरपदातसन्निवेशः, तस्मिन् तिष्ठतीति कटकस्थं, यत् बलं—सैन्यं, तस्य बहुलाभिः,—प्रभूताभिः, धूलिभिः,—रजोभिः; सैन्यानां पदनिक्षेपवेगोत्क्षिप्ताभिरिति भावः; धूसरितम्—आपाण्डुरीकृतं, वपुः,—शरीरं यस्य तथाभूतः, अंशुमाली—सूर्यः। मलीमसं—मलिनम्; सैन्यपदोत्थरजःसम्पर्कादिति भावः। अपरजलनिधिं—पश्चिमसागरम्।

(२५०) आभोगेति।—आभोगनामकम् आतपत्रं—छत्रं, तस्य प्रदानम्—अर्पणं, कुमारेण प्राभृतीकरणमित्यर्थः, तस्य वार्त्ता—संवादः, तामिव। वरुणाय—प्रचेतसे, पश्चिमाशाधिपतये इति भावः। वारुणीं—वरुणाधिष्ठितां, प्रतीचीमित्यर्थः; मृत्योस्य तस्यामेव अस्तगमनादिति भावः। अत्र आभोगातपत्रस्य वारुणतया अधिपतिं वरुणमन्तरेण कथं तदुपभोगः राज्ञा हर्षेण क्रियते, कथं वा अन्यस्य वस्तु अन्येनापरस्मै दीयते इति वार्त्तां वरुणाय विज्ञापयितुमेव वारुणदिक्प्रयाणं तपनस्य इत्युत्प्रेक्षितम्।

(२५१) मुकुलायमानेति।—मुकुलायमानं—निमीलदिति भावः; सकलं—समग्रं, कमलवनं—पद्मकाननं यस्याः यस्यां वा तथाभूता। प्रमुख एव—अग्र एव।

अभूत् भूपतेः। (२५२) नृपानुरागमय इव निखिलजीवलोक-लोकाञ्जलिबन्धबन्धुर्जगत् जग्राह सन्ध्यारागः। (२५३) गौड़ापराधग्रङ्गिनी इव श्यामतां प्रपेदे दिक् प्राची। (२५४) प्रचित-तिमिरनिवहा निर्वाणान्यनृपप्रतापानलकलापा इव कालिमानम् अतानीत् मेदिनी। (२५५) मेदिनीशप्रदोषाऽऽस्थान-पुष्पनिकरम् इव (२५६) विकचतगरर्क्षचरम् अवचकरुः

बद्धमेवाञ्जलिपुटा इव—सेवार्थं रचितकरद्वयसंयोगा इव इत्यर्थः। सन्ध्या—अर्घो-दानहोपवती।

(२५२) नृपेति।—नृपे—राजनि, इव इति यावत्, अनुरागमयः,—प्रीति-पूर्णः। निखिलेति।—निखिलस्य—सकलस्य, जीवलोकस्य—संसारस्थ, लोकाना—नराणाम्, अञ्जलिबन्धस्य—करद्वयसंयोगस्य, बन्धुः,—मित्रम्; संयोगघटकत्वादिति भावः; कृताञ्जलिभिः लोकैः सन्ध्या उपास्यते इति तात्पर्यम्। जगत्—भुवनं, जग्राह—याचकाम; सन्ध्याकालः संवृत्त इति भावः।

(२५३) गौड़ेति।—गौड़स्य—गौड़राज्याधिपस्य इत्यर्थः, अपराधात्—दोषात्, राज्ञः सौरवधजनितादिति भावः; ग्रहणे—विमर्दनीति तथोक्तेव। श्यामतां—मलिनतां, प्रपेदे—प्राप। प्राची—पूर्वा; अस्तोन्मुखसूर्यस्य आलोहित्येन पाण्डुमंदशायाः औज्ज्वल्यात् पूर्वाशा निष्प्रभा जाता इति भावः।

(२५४) प्रचितेति।—प्रचितः,—उदितः, सञ्चित इत्यर्थः, तिमिरनिवहः,—अन्धकारनिचयः यस्यां यस्यां वा तथोक्ता। निर्वाणेति।—निर्वाणः,—शान्तः, विनष्ट इत्यर्थः, अन्येषाम्—इतरेषां, नृपाणां—राज्ञां, प्रतापानलकलापः,—प्रभावाग्निसमूहः यस्यां तथाभूता इव; निर्वाणाग्नेः कृष्णवर्णा-ङ्गारूपेण परिणमनादिति भावः; कालिमानं—कृष्णत्वं, तिमिराच्छन्नत्वमिति भावः। अतानीत्—विस्तारयामास।

(२५५) मेदिनीति।—मेदिनीशस्य—भूपतेः, प्रदोषाऽऽस्थानं—रजनीसुख-सभामण्डपं, सायमुपवेशनाङ्गसमितिस्थानमिति यावत्, तस्य पुष्पनिकरः,—कुसुम-निचयः, मण्डपशोभावर्धनार्थं परिचारकवर्गैः व्यापितः इति भावः; तमिव।

(२५६) विकचेति।—विकचैः,—प्रस्फुटितैः, तगरैः,—पुष्पविशेषैः, रुचिरं—मनोज्ञं, विकचानि—प्रस्फुटानि, तगराणि—तदाख्यकुसुमानि, तद्वत् रुचिरं—मनो-

उडुनिकरम् अविरलं ककुभः। (२५७) स्कन्धावार-गन्धगजमदाऽऽमोदधावितस्य इव मार्गो वियति विरराज रजःपाण्डुः ऐरावतस्य। (२५८) कुपितनृपव्याघ्राऽऽघ्रा-ताम् उपसृष्टाम् इव पौरुहूतीं विहाय विहायस्तलम् आरुरोह रोहिणीरमणः। (२५९) प्रयाणवार्त्ता इव मानिनीनां हृदयभेदिन्यो ययुः इन्दुदीधितयो दश दिशः।

टीका। उडुनिकरं—नक्षत्रनिचयं, ("नक्षत्रमृक्षं भं तारा तारकाप्युड्डु वा स्त्रियाम्" इत्यमरः)। अवचकरुः,—आविश्चकुः। अविरलं—सान्द्रम्। ककुभः,—दिशः; बहूनि नक्षत्राणि समुदितानीति समुदिताः। (२५७) स्कन्धावारेति।—स्कन्धावारस्य—कटकस्य, ये गन्धगजाः,—गन्ध-प्रधाना हस्तिनः, तेषां मदाऽऽमोदेन—दानवारिसौरभेण, धावितस्य इव—विद्रुतस्य इव; तं प्रति क्रोधादिति भावः। ऐरावतस्य—खनामप्रसिद्धस्य इन्द्रगजस्य। रजःपाण्डुः,—रजोभिः,—धावनवेगेन उत्क्षिप्तैः पांशुभिः इत्यर्थः, पाण्डुः,—धवलः। वियति—आकाशे, मार्गः,—पन्थाः, आकाशमार्ग इत्यर्थः। विरराज—शुशुभे, चन्द्रिकाधवलो वियन्मार्गः ऐरावतरजःपाण्डुरिव विरराज इति भावः। (२५८) कुपितेति।—कुपितेन—क्रुद्धेन, नृपव्याघ्रेण—राजश्रेष्ठेन, शार्दूलाधिपेन च, ('स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थ-वाचकाः॥" इत्यमरः) आघ्राता—आक्रान्तेति यावत्, ताम्; पौरुहूतीं—पुरुहूतेन—इन्द्रेण अधिष्ठिता, प्राचीमित्यर्थः, ["इन्द्रो मरुत्वान्मघवा··· ।···पुरुहूतः पुरन्दरः"॥ इत्यमरः। "पौरुहूतीम्" इत्यत्र "पौरुष्टुतीम्" इति पाठेऽपि स एवार्थः]। विहाय-सतलम्—अन्तरीक्षतलं, ("नभोऽन्तरीक्षं गगनम्···। ···पुंस्याकाशविहायसी॥" इत्यमरः)। रोहिणीरमणः,—चन्द्रः, रोहिणी—गौः, ("माहेयी सौरभेयी गौरुक्षा माता च रुक्मिणी। अर्जुन्यघ्न्या रोहिणी" इत्यमरः) तस्या रमणः,—धवः, पतिरित्यर्थः, ("रमणं पटोलमूले नाथ्यां स्त्री ना धवे करे" इति मेदिनी) वृषस्य इत्यर्थः, वृषभश्च कुपितव्याघ्रशालिनीं सोपद्रवां दिशं विहाय स्थानान्तरं गच्छतीति भावः। (२५९) प्रयाणवार्त्ता इव—युद्धयात्राप्रस्तुतय इव। मानिनीनां—प्रियान् प्रति प्रणयकोपवतीनां, हृदयभेदिन्यः,—चित्तस्फोटादायिन्यः; एतत्,—भर्तृणां

(२६०) नवनृपदण्डयात्रात्रासाऽऽतुरा इव तरलितसत्त्वसमूहत्वयः चुक्षुभुः पतयो वाहिनीनाम्। (२६१) चिन्तेव भूभृतां हृदयानि विवेश गुहाविवराणि विमुक्तसर्व्वोर्वीतिमिरसन्ततिः। प्रतिसामन्तचक्षुषाम् इव ननाश निद्रा कुमुदवनानाम्।

अस्याञ्च वेलायां (२६२) विततवितानतलवर्त्ती नरेन्द्रः, —"यात तावत्" इति विसर्ज्य अनुजीविनो हंसवेगम् आदिष्टवान्,—"कथय मन्देशम्" इति; प्रणम्य स कथयितुं प्रास्था-

---

भटानां युद्धगमनेन विरहाशङ्कत्वात्, अन्यत्र,—उद्दीपकत्वादिति भावः। इन्दोर्दीधितयः,—चन्द्रकिरणाः।

(२६०) नवेति।—नवस्य—नूतनस्य, नवाभिषिक्तस्य इति यावत्, नृपस्य—राज्ञः, दण्डयात्रा—युद्धप्रयाणं, तया त्रासः,—भीतिः, तेन आतुरा इव—कातरा इव। तरलितेति।—तरलिता—चलिता, शिथिलिता च, सत्त्वानां—प्राणिनां, सत्त्वस्य—सत्त्वगुणस्य, सत्त्वगुणकार्य्यधैर्य्यस्य इत्यर्थश्च, ("सत्त्वं गुणे पिशाचादौ धैर्य्ये द्रव्यस्वभावयोः। आत्मत्वे व्यवसायासुचित्तेष्वस्त्री तु जन्तुषु॥ इति मेदिनी) इति:,—व्यवहारः येषां तथाभूताः, वाहिनानां—सैनिकानां, रिपुपक्षीयाणामिति भावः, नदीनाञ्च, ("वाहिनी स्यात्तरङ्गिण्यां सेनासैन्यप्रभेदयोः" इति मेदिनी) पतयः,—स्वामिनः, राजानः, समुद्राश्चार्थः, चुक्षुभुः,—विस्मयिरे, पस्खालिरे च; चन्द्रोदयदर्शनेन समुद्रक्षोभः प्रसिद्ध एव।

(२६१) भूभृतां—राज्ञां, पर्व्वतानाञ्च। गुहाविवराणि—कन्दराभ्यन्तरांशोऽर्थः। विमुक्तेति।—विमुक्ता—त्यक्ता, सर्वा—समग्रा, उर्वी—पृथ्वी यया तथाभूता, तिमिरसन्ततिः,—अन्धकारसमूहः। ["विमुक्तसर्व्वोर्वीतिमिरसन्ततिः" इत्यत्र "विमुक्तसर्व्वाशातिमिरसन्ततिः" इति पाठे,—विमुक्ताः सर्वाः आशाः,—दिशः यया तथाभूता तिमिरसन्ततिः]। चन्द्रोदयेन अन्धकारः दूरीभूतः इति समुदितार्थः। प्रतिसामन्तचक्षुषामिव—प्रतिपक्षनृपतिनयनानामिव। निद्रा—सङ्कोचः, लोपश्च। ननाश—नष्टा; हर्षभयात्, चन्द्रोदयाच्चेति भावः।

(२६२) विततेति।—विततस्य—उपरि विस्तृतस्य, वितानस्य—उल्लोचस्य, चन्द्रातपस्येत्यर्थः, ("अस्त्री वितानमुल्लोचः" इत्यमरः) तलवर्त्ती—अधःस्थितः।

वीत्,—"देव ! पुरा (२६३) वराहसम्पर्कसम्भूतगर्भया भगवत्या भुवा नरको नाम सूनुः असावि रसातले। वीरस्य यस्य अभवन् बाल्य एव पादप्रणामप्रणयिनः चूडामणयो लोकपालानाम्; यस्य च (२६४) त्रिभुवनभुजो भुजशौण्डस्य भवनकमलिनीचक्रवाकीकोपकुटिलकटाक्षेक्षितोऽपि (२६५) भयचकितारब्धपरिवर्त्तितरथो न आश्रया विना रविः अस्तम् अव्राजीत्; यस्य वरुणस्य (२६६) बर्हिर्हृत्ति हृदयम् इदम् आतपत्रम् अङ्कार्षीत्। महात्मनः तस्यान्वये भगदत्तपुष्पदत्त-

यात—मच्छत। विसर्ज्य—परित्यज्य, सम्प्रेष्येति यावत्, स्थानान्तरमिति भावः। अनुजीविनः,—परिजनान्। सन्देशं—वाचिकम्। प्राब्रवीत्—प्रचक्रमे।

(२६३) वराहेति।—वराहः,—भगवतो विष्णोरवतारविशेषः, तस्य सम्पर्केण सङ्गेन, सम्भूतः,—सञ्जातः, गर्भः,—भ्रूणः यस्याः तथाभूतया, भुवा—पृथिव्या। नरकः,—तन्नाम्ना प्रसिद्धः। सूनुः—पुत्रः। असावि—प्रसूतः। यस्य—नरकस्य। लोकपालानाम्—इन्द्रादीनाम्। चूडामणयः,—मुकुटरत्नानि। पादेति।—पादयोः,—चरणयोः, प्रणामे—नमस्क्रियौ, प्रणयिनः,—आसक्ताः इत्यर्थः, सन्ति एषामिति तथोक्ताः; नियतनरकचरणप्रणतिपरायणा इत्यर्थः, येन लोकपालाः सर्वे निर्जिता इति भावः।

(२६४) त्रिभुवनभुजः,—त्रिलोकीभोगिनः, त्रिलोकीश्वरस्य इति यावत्। भुजशौण्डस्य—भुजेन—बाहुना, बाहुबलदर्पेणेति यावत्, शौण्डस्य—मत्तस्य, ("मत्ते शौण्डोत्कटौ समौ।" इत्यमरः) बाहुबलशालिन इति यावत्। भवनेति।—भवनकमलिनी—गृहसरसि पद्मिनी, गृहसमीपस्था पुष्करिणी वा, तत्र या चक्रवाकी—चक्रवाकवधूः, तस्याः कोपेन—क्रोधेन, कुटिलः,—वक्रः, यः कटाक्षः,—अपाङ्गदर्शनम्; सूर्यालोकनमने तस्या विरहोत्पत्तेरवश्यम्भावितया तद्गमननिवारणार्थं सकोपदर्शनमिति भावः; तेन ईक्षितोऽपि—दृष्टोऽपि; अस्तगमनोत्सुकोऽपि इति भावः।

(२६५) भयेति।—भयेन—भीत्या, चकितः,—त्रस्तः, योऽरब्धः,—तदाख्यः स्वसारथिः, तेन परिवर्त्तितः,—प्रत्यावर्त्तितः, रथः,—स्यन्दनं यस्य तथाभूतः। अव्राजीत—अगमत्।

(२६६) बर्हिर्हृत्ति—बर्हिःस्थितम्; अतिप्रियमिति भावः। अङ्कार्षीत्—

वज्रदत्तप्रभृतिषु व्यतीतेषु बहुषु (२६७) मेरूपमेषु महत्सु महीपालेषु, प्रपौत्रो महाराजभूतिवर्म्मणः, पौत्रः चन्द्रमुखवर्म्मणः, पुत्रो देवस्य कैलासस्थिरस्थितेः स्थितिवर्म्मणः सुस्थिरवर्मा नाम महाराजाधिराजो जज्ञे तेजसां राशिः, मृगाङ्क इति यं जना जगुः। (२६८) यो यमजेनेवाजायत सहैवाहङ्कारेण। यश्च बाल एव प्रीत्या (२६९) द्विजातीन् अप्रीत्या च अरातीन् समग्रान् प्रतिग्रहान् अग्राहयत्;

बलपूर्व्वकमग्रहीदित्यर्थः। तस्य—नरकस्य। अन्वये—वंशे। व्यतीतेषु—अतिक्रान्तेषु, परलोकं प्रस्थितेषु इत्यर्थः।

(२६७) मेरूपमेषु—सुमेरुतुल्येषु; धनमानाधृष्यत्वादिभिरत्युन्नततयेति भावः। महत्सु—प्रवरेषु। महीपालेषु—राजसु। कैलासेति।—कैलासे—तदाख्ये शिवाऽऽवासभूते पर्व्वते, स्थिरा,—निश्चला, निश्चयात्मिका इति यावत्, स्थितिः,—अवस्थानं यस्य तथाभूतस्य; स्वकीययुगकर्म्मबलात् अवश्यमेव शिवपार्षदो भूत्वा कैलासे चिरावस्थानं कुर्व्वतः इति भावः; पश्यतः इति तात्पर्य्यम्। महेति।—महाराजेषु—श्रेष्ठनृपतिष्वपि, अधि—अधिकः, उत्कर्षवानित्यर्थः, राजा—नृपतिः तथाभूतः, सार्व्वभौम इत्यर्थः। जज्ञे—बभूव। मृगाङ्कः,—चन्द्रवत् जगतां प्रीत्युत्पादकत्वात् इति भावः; एतेन सः अतीव प्रजारञ्जनपरायण आसीत् इति सूच्यते। जगुः,—कीर्त्तयामासुः।

(२६८) यः,—मृगाङ्कापरनामा सुस्थिरवर्म्मा इति यावत्। यमजेनैव—युग्मजातेनैव; अहङ्कारेण सहैवोत्पन्नत्वादिति भावः। अजायत—उदपद्यत। अहङ्कारेण—अभिमानेन; अहङ्कारः स च युगपदेव अवतीर्णः इत्यर्थः; सः अतीव अभिमानी आसीदिति भावः।

(२६९) प्रतिग्रहान्—दानीयद्रव्याणि, द्विजेभ्यो विधिवद्देयानीति यावत्, सैन्यपदाङ्गानां च, परालयद्रव्यलोकानीति भावः, ("प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे। द्विजेभ्यो विधिवद्देये तद्ग्रहे च यथान्तरे॥" इति मेदिनी) प्रीत्या द्विजान् दानीयद्रव्यस्वीकारस्वरूपप्रतिग्रहान् अग्राहयत्; अतश्च अप्रीत्या सैन्यानां पदाङ्गानाञ्च स्वरूपप्रतिग्रहान् अग्राहयत् इति निष्कर्षः। स दानशीलः वीर्य्यवांश्चासीदिति तात्पर्य्यम्।

(२७०) यत्र च अतिदुर्लभं लवणालयसम्भूतायाः परं माधुर्यम् अभूल्लक्ष्म्याः; तथा च यो (२७१) वाहिनीनाथानां शङ्कान् जहार, न रत्नानि; पृथिव्याः स्थैर्यं जयाह, न करम्; (२७२) अवनिभृतां गौरवमादत्त, न नैष्ठुर्यम्। तस्य च सुग्रहीतनाम्नो देवस्य देव्यां श्यामादेव्यां भास्करद्युतिर्भास्करवर्माऽपरनामा तनयः प्रान्तनोर्भागीरथ्यां भीष्म इव कुमारः समभवत्। अयम् (२७३) अस्य च शैशवादारभ्य सङ्कल्पः स्थेयान् स्थाणुपादारविन्दद्वयादृते न अहम् अन्यं नमस्कुर्यामिति; दृष्टश्च अयं मनोरथः त्रिभुवनदुर्लभः त्रयाणाम् अन्यतमेन सम्पद्यते; सकलभुवनविजयेन

(२७०) यत्र—यस्मिन् राजनि। लवणालयसम्भूतायाः,—लवणसागरसमुत्पन्नायाः, लक्ष्म्याः,—श्रियाः; स परं श्रीमान् आसीदिति भावः।

(२७१) वाहिनीनाथानां—प्रतिसेनापतीनां, समुद्राणाञ्च, शङ्कान्—युद्धारम्भे वाद्यमानान् विजयशङ्खान्, समुद्रगर्भस्थान् कम्बूंश्च इत्यर्थः। जहार—शत्रून् विजित्य बलपूर्वकं जयाह, समुद्रात् सङ्गृह्याह च। स्थैर्यं—चिरस्थितम्। करं—राजग्राह्यभागम्; धीरः सः स्वधैर्य्येण पृथिवीमपि अतिचक्राम इति भावः।

(२७२) अवनिभृतां—राज्ञां, पर्वतानाञ्च, गौरव—गुरुत्वं, सम्मानमित्यर्थश्च। नैष्ठुर्यं—क्रूरत्वं, काठिन्यञ्च; राज्ञां सम्मानं ननाम, तथा पर्वतवत् सारवांश्चासीत् इति भावः। तस्य—मुस्थिरवर्म्मणः। सुग्रहीतनाम्नः,—प्रातःस्मरणीयस्य। भास्करद्युतिः,—सूर्य्यवत् तेजस्वी। प्रान्तनोः,—तदाख्यस्य चन्द्रवंशीयनृपभेदस्य। कुमारः,—कुमार इत्याख्यः।

(२७३) अस्य—भास्करवर्म्माऽपराख्यस्य कुमारस्य। सङ्कल्पः,—अभिलाषः, वासनेति यावत्। स्थेयान्—अतिस्थिरः, दृढतर इति यावत्। स्थास्यति।—स्थाणोः,—हरस्य, ("हरः सरहरो भर्गः…। …स्थाणुरुद्रौ उमापतिः" ॥ इत्यमरः) पादारविन्दद्वयात्—चरणकमलयुगलात्, ऋते—विना। त्रिभुवनदुर्लभः,—त्रिजगद्वासिभिः दुष्प्राप इत्यर्थः। त्रयाणां—सकलभुवनेत्यादिना वक्ष्यमाणानां त्रिविधानामित्यर्थः। अन्यतमेन—केनचिदेकेन। सम्पद्यते—घटते। सकलभुवनविजयेन—त्रिजगद्वशीकरणेन; त्रिभुवनं विजेतुं समर्थयेत् न कमपि नमस्कुर्य्यात्, तमेव सर्वं

वा, मृत्युना वा, (२७४) यदि वा प्रचण्ड-प्रतापज्वलनदिग्दाहेन जगत्येकवीरेण दैवोपमेन मित्रेण। मैत्री च प्रायः (२७५) कार्य्यव्यपेक्षिणी क्षीणीभृताम्। कार्य्यञ्च कौट्टयं नाम तद्भवेत्, यत् (२७६) उपन्यस्यमानम् उपनयेत् मित्रतां दैवम्। दैवस्य हि यशांसि (२७७) सञ्चिचीषतो बहिरङ्गभूतानि धनानि। बाहावेव च केवले निषण्णस्य शेषावयवानामपि साहायक-सम्पादनमनोरथो निरवकाशः, किमुत बाह्यजनस्य?—

नमस्करिष्यन्तीति भावः। मृत्युना वा—मरणेन वा; इदानीमेव म्रियते चेत्, नान्यस्मै नमसः अवसरं लभेत इति भावः।

(२७४) यदि वा—अथवा। प्रचण्डेति।—प्रचण्डेन—तीक्ष्णेन, प्रतापज्वलनेन—वीर्यवह्निना, दिशां—ककुभां, दाहः,—सन्तापः येन तथाभूतेन। दैवोपमेन—दैवसदृशेन, भवता तुल्येन इत्यर्थः; भवान् मित्रचेत् तदा त्वत्साहाय्येन सर्वानेव विजेतुं शक्ष्यति सः, तथात्वे न कोऽपि तस्य नमस्कारयोग्यः स्थास्यति इति भावः।

(२७५) कार्य्यव्यपेक्षिणी—कार्य्यानुरोधिनी। क्षीणीभृतां—राज्ञाम्; परस्परोपकारादिना राज्ञां मित्रता जायते इति समुदितार्थः।

(२७६) उपन्यस्यमानं—कथ्यमानम्। उपनयेत्—प्रापयेत्; कौट्टयेन पुनः कार्य्येणात्स्वामी दैवस्य मित्रतां लब्धुं शक्ष्यति, तत् नाद्यापि निर्धीतं भवति इति सरलार्थः।

(२७७) सञ्चिचीषतः,—सञ्चेतुमिच्छतः, सञ्चिक्षपत इत्यर्थः। बहिरङ्गभूतानि—बाह्यानि, हेयानीति यावत, अनाशास्यानीति भावः; दैवी हि यशसि एव कामुकः, न च तुच्छेषु धनेषु, अतो धनदानेन भवतो मैत्रीकामना दूरापास्ता इति तात्पर्यम्। बाहावेव—भुजवीर्ये एव। निषण्णस्य—उपविष्टस्य, निर्भरमवस्थितस्येत्यर्थः। शेषावयवानामपि—बाहुव्यतिरिक्तानाम् अन्येषामङ्गानामिति यावत, साहायकसम्पादन-मनोरथः,—साहाय्यकरणाभिलाषः, निरवकाशः,—अवकाशरहितः, निरर्थक इति भावः; केवलं बाहुबलेनैव दैवेन यशांसि सञ्चितानि, तव चक्षुरादीनामन्येषामङ्गानामपि साहाय्यं नैव गृहीतमिति निष्कर्षः। किमुत—किं पुनः, बाह्यजनस्य—बहिःस्थितस्य जनादेरिति भावः।

(२७८) चतुःसागरग्रामग्रहणघस्मरस्य पृथिव्येकदेशदानोपन्यासेनापि का तुष्टिः ? अभिरूपकन्याविश्राणनविलोभनमपि (२७९) लक्ष्मीमुखारविन्ददर्शनदुर्ललितदृष्टेः अकिञ्चित्करम्। एवम् (२८०) अघटमानसकलोपायसम्पादितपदार्थेऽस्मिन् प्रार्थनामात्रमेव केवलम् अनुरुध्यमानः शृणोतु देवः ;—(२८१) प्राग्ज्योतिषेश्वरो हि देवेन एकपिङ्ग

(२७८) चतुःसागरेति।—चत्वारः सागराः,—समुद्राः, ससागरा मेदिनी इति यावत्, ग्रामाः इव—संवसथा इव, क्षुद्रप्रदेशाः इवेति यावत्, ["ग्राम—" इत्यत्र "ग्राम—" इति पाठे,—चत्वारः सागरा एव ग्रामाः,—कवलाः, चतुरब्धिवेष्टितमेदिनीग्रसनोद्यतस्य इत्यर्थः] तेषां ग्रहणे—आयत्तीकरणे, घस्मरः,—लोलुप इति भावः, तस्य, यश्चतुरुदधिमेखलां पृथ्वीमपि क्षुद्रग्रामामिव मन्यते, तस्येति भावः ; पृथिव्येति।—पृथिव्याः,—धरायाः, एकदेशस्य—एकांशस्य, स्वल्पप्रदेशस्य इति यावत्, दानोपन्यासेन—वितरणकीर्त्तनेन। अभिरूपेति।—अभिरूपायाः,—रम्यायाः, सुन्दर्याः इत्यर्थः, ("अभिरूपौ वृधे रम्ये" इति मेदिनी) कन्यायाः,—कुमार्याः, विश्राणनं—दानं, ("त्यागो विहापितं दानमुत्सर्जनविसर्जने। विश्राणनम्—" इत्यमरः) तेन विलोभनं—लोभप्रदर्शनम्।

(२७९) लक्ष्मीति।—लक्ष्म्याः,—कमलायाः, मुखारविन्दस्य—वदनसरोजस्य, दर्शनेन—अवलोकनेन, दुर्ललिता—दुर्विनीता, अन्यदर्शननिरभिलाषेति भावः ; दृष्टिः,—नेत्रं यस्य तथाभूतस्य ; नियतकमलालिङ्गितवक्षःस्थलतया अन्यसुन्दरीस्पृहाऽपि ते नास्ति, अतस्तत्प्रलोभनमपि न ते मैत्रीसाधनम् इति भावः।

(२८०) अघटमानेति।—अघटमानेन—योजयितुमशक्येन, दुर्घटेनेति यावत्, सकलेन—समग्रेण, उपायेन—साधनेन, सम्पादितं—कृतं, पदमेव—शब्द एव, अर्थः,—विषयः तस्मिन् ; अनन्योपायसाध्ये इति भावः। अस्मिन्—भवन्मैत्रीकरणे इति भावः। अनुरुध्यमानः,—अनुरुध्यमानः, अनुनीयमान इत्यर्थः, अस्मामिरिति शेषः, ("अनुरोधोऽनुवर्त्तनम्" इत्यमरः)।

(२८१) प्राग्ज्योतिषेश्वरः,—कामरूपेश्वरः। देवेन—महाराजाधिराजेन भवतेति भावः। एकपिङ्ग इव—एकम्—एकनेत्रमिति यावत्, पिङ्गं—पिङ्गलं यस्य सः, कुबेर इव इत्यर्थः, ("कुबेरश्रीवत्सधनदा यक्षराट् गुह्यकेश्वरः। यक्षेश-

इव अनङ्गद्विषा, दशरथ इव गोत्रभिदा, धनञ्जय इव पुष्कराक्षेण, (२८२) वैकर्त्तन इव दुर्य्योधनेन, मलयानिल इव माधवेन, अजर्य्यं सङ्गतम् इच्छति। यदि च देवस्यापि मैत्रीयति, हृदयम् अवगच्छति च पर्य्यायान्तरितं दास्यम् अनुतिष्ठन्ति सुहृद इति; ततः किमास्यते? समाज्ञाप्यताम्, अनुभवतु विष्णोर्मन्दरगिरिः इव (२८३) विकटकेयूरकोटिमणिविघट्टनक्षुण्णितकटकमणिशिलाशकलानि गाढोपगूढानि देवस्य कामरूपाधिपतिः। (२८४) अस्मिन्नात्मनः अनवरतविमललावण्यसौभाग्यसुधानिर्झरिणि मुखशशिनि चिरात्

पिङ्गलविलः" इत्यमरः)। कुबेरो हि मातुर्यं गौरीं निरीक्ष्य तच्छापात् नष्टैकनेत्रो जातः, पुनः शिवप्रसादात् तच्चक्षुषः पिङ्गलत्वं जातमिति पौराणिकी वार्त्ता। अनङ्गद्विषा—हरेण। गोत्रभिदा—इन्द्रेण, ("इन्द्रो मरुत्वान्मघवा···। सुदामा गोत्रभिदृजी···" इत्यमरः)। धनञ्जय इव—अर्जुन इव। पुष्कराक्षेण—पुण्डरीकाक्षेण, कृष्णेनेत्यर्थः।

(२८२) वैकर्त्तन इव—सूर्यसुतः कर्ण इव। माधवेन—वसन्तेन। अजर्य्यम्—अजय्यम्। सङ्गतं—मैत्रीम्। मैत्रीयति—मैत्रीमिच्छति, स इति शेषः, तथाऽपि हृदयं—वित्त, तस्येति भावः; सुहृदः,—मित्राणि, पर्य्यायान्तरितं—पर्य्यायेण—एकार्थवाचकशब्दान्तरेण, अन्तरितम्—आच्छन्नं, मैत्रीनाम्ना व्यवहृतमित्यर्थः, दास्यं—कैङ्कर्य्यम्, अनुतिष्ठन्ति—आचरन्ति, इति अवगच्छति—जानाति च। ततः,—तस्मात्, मित्रताया अपि दास्यापरपर्य्यायकत्वादित्यर्थः, किम् आस्यते?—किं तूष्णीं स्थीयते इत्यर्थः, अस्मत्प्रभुणेति शेषः; मित्रतामपि दास्यस्य नामान्तरं विदित्वा किं भवता सह मैत्रीं न करिष्यति? इति भावः।

(२८३) विकटेति।—विकटस्य—उन्नतस्य, उज्ज्वलस्य वा, केयूरकोटिमणेः,—अङ्गदायनिहितरत्नस्य, विघट्टनेन—सङ्घर्षेण, क्षुण्णितानि—क्षतानि, ["क्षुण्णित—" इत्यत्र "कर्षित—" इति पाठेऽपि स एवार्थः] कटकस्य—नितम्बस्य, सन्दराद्रेरिति यावत्, अङ्गदस्य च, मणिशिलाशकलानि—रत्नपाषाणखण्डानि येषु तथाभूतानि, गाढोपगूढानि—दृढालिङ्गितानि।

(२८४) अस्मिन्—परिदृश्यमाने, भवदीये इति यावत्। अनवरतम्—अविरतं,

चक्षुषी लालयतु प्राग्ज्योतिषेश्वरश्रीः। न अभिनन्दति चेत् देवः प्रणयम्, आज्ञापयतु, किं कथनीयं मया स्वामिनः?" इति।

(२८५)विरतवचसि तस्मिन् भूपालः पूर्वोपलब्धैरेव गुरुभिः गुणैः आरोपितबहुमानः कुमारे सुदूरमाऽऽभोगाऽऽतपत्र-व्यतिकरेण तु परां कोटिम् आरोपिते प्रेम्णि लज्जमान इव सादरं जगाद,—"हंसवेग! कथमिव तादृशि महात्मनि महाऽभिजने पुण्यराशौ गुणिनां प्राग्वरे परोक्षसुहृदि स्निह्यति मद्विधस्य अन्यथा स्वप्नेऽपि प्रवर्त्तेत मनः? (२८६) सकलजगदुत्तापन-

विमलं—स्वच्छं, लावण्यमेव—"मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इत्युक्तलक्षणसौन्दर्यविशेष एव, सौभाग्यं—सुभगत्वं, नेतरजनत्वमिति भावः; तदेव सुधा—अमृतं, तस्या निर्भरः—प्रस्रवः, तद्वति; मुखशशिनि—वदनचन्द्रे। प्रमिति।—प्राग्ज्योतिषेश्वरस्य—कामरूपाधिपस्य, श्रीः,—लक्ष्मीः, चिरात्—चिरकालम्; आतृषेः—आसन्नीषम्, आकाङ्क्षां पूरयित्वेत्यर्थः, चक्षुषी—नयने, लालयतु—पीषयतु, सन्तर्पयत् इत्यर्थः, चिरं तृप्तिं लभताम् इति यावत्। नाभिनन्दति—न प्रशंसति, नानुमन्यते इत्यर्थः। प्रणयं—प्रार्थनाम्।

(२८५) विरतवचसि—तूष्णीम्भूते इत्यर्थः। तस्मिन्—हंसवेगे इत्यर्थः। पूर्वोपलब्धैः,—पूर्वविदितैः। गुरुभिः,—महद्भिः। कुमारे—तदाख्ये कामरूपेश्वरे। सुदूरम्—अत्यर्थम्, आरोपितबहुमानः,—जनितबहादरः। आभोगातपत्रव्यतिकरेण—आभोगाख्यच्छत्रप्रदानसम्पर्केणेत्यर्थः, प्रेम्णि—प्रणये, कुमारं प्रतीति भावः; परां कोटिं—परमोत्कर्षम्, आरोपिते—नीते। महाऽभिजने—महान्—श्रेष्ठः, अभि-जनः,—कुलं, ("सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ" इत्यमरः) यस्य तस्मिन्, महाकुलप्रसूते इत्यर्थः। प्राग्वरे—मुख्ये, श्रेष्ठे इत्यर्थः, ("मुख्यवर्ष्यवरेण्याग्र्य···। परार्ध्याद्यप्राग्वर·····" इत्यमरः)। परोक्षसुहृदि—अप्रत्यक्षमित्रे, अदृष्टकल्पे इत्यर्थः। स्निह्यति—स्नेहपरायणे, मयीति भावः। अन्यथा—विरुद्धमिति भावः। कथमिव—केन प्रकारेण, प्रवर्त्तेत?—प्रवृत्तं भवेत्? तस्य प्रणयभङ्गं कर्तुं नैव शक्नुयादित्यर्थः।

(२८६) सकलेति।—सकलानां—सम्पूर्णानां, जगतां—भुवनानाम्, उत्ता-

पटवोऽपि शिशिरायन्ते त्रिभुवननयनानन्दकरे कमलाकरे करास्तिग्मतेजसः। सुबहुगुणकीर्तास्य के वयं सख्यस्य? सज्जनमाधुर्य्याणामभूतदास्यो दश दिशः। (२८७) एकान्तावदातोत्तानस्वभावसम्भृतसादृश्यस्य कुमुदस्य कृते केनाभिहितः शिशिररश्मिः? श्रेयांश्च (२८८) सङ्कल्पः कुमारस्य। स्वयं बाहुशाली मयि च समालम्बितशरासने सुहृदि हराद्रते कमन्यं नमस्यति? संवर्द्धिता मे प्रीतिः अमुना सङ्कल्पेन। अवलेपिनि प्रभौ अपि केसरिणि बहुमानो हृदयस्य, किं पुनः

पटवः—सन्तापजनने, पटवः,—समर्थाः। शिशिरायन्ते—शीतलायन्ते। त्रिभुवननयनानन्दकरे—त्रिलोकवासिनां नेत्रसुखप्रदे, कमलाकरे—पद्मसमूहे। कराः,—किरणाः, हस्ताश्च। तिग्मतेजसः,—सूर्यस्य। सुबहुगुणकीर्तेः,—प्रभूतदाक्षिण्यविनयादिभिरात्मीकृता इत्यर्थः, ["सुबहुगुणकीर्तेः" इत्यत्र "सुबहुगुणगणकीर्तेः" इति पुस्तकान्तरधृतपाठस्तु न मनोरमः, सुबहुशब्देनैव गणार्थस्य गम्यमानत्वात्] सख्यस्य—मित्रतायाः; प्रवरगुणवतस्तस्य गुणनिर्जिता भृत्यप्राया वयमेव सम्भिलाषार्हाः इति भावः। सज्जनमाधुर्य्याणां—सत्पुरुषाणां विनयादिमयसुमधुराचरणानामित्यर्थः। अभूतदास्यः,—अवेतबकिङ्कर्यः; सर्वे एव आत्मानं सज्जनानां दासं मन्यन्ते इति निष्कर्षः।

(२८७) एकान्तेति।—एकान्तम्—अत्यन्तम्, अवदातेन—श्वेतेन, निर्मलेन च, उत्तानेन—उन्मुखेन, उन्नतेन च, स्वभावेन—प्रकृत्या, सम्भृतम्—अधिगतं, सादृश्यम्—उपमा, कुमारेण सहेति भावः; यैव तथाभूतस्य। कृते—निमित्तम्। शिशिररश्मिः,—चन्द्रः, इति, केन अभिहितः?—कथितः? चन्द्रः केनाप्यनुपदिष्ट एव कुमुदस्य गुणेनैव प्रभावी जातः इत्यर्थः; कुमारस्य उदारगुणेनैवाऽऽकृष्टोऽहं तत्सङ्कल्पसाधनार्थं यतिष्यामीति भावः।

(२८८) सङ्कल्पः,—अभिलाषः। बाहुशाली—भुजबलसम्पन्नः, वीर्यवानित्यर्थः। समालम्बितशरासने—सम्भृतकार्मुके। हराद्रते—शिवं विना। नमस्यति—नमस्करोति। अवलेपिनि—गर्व्वशालिनि, गौरववतीति यावत्; मानशालिनीति भावः। केसरिणि—सिंहे। हृदयस्य—चेतसः, बहुमानः,—समादरः। सुहृदि—मित्रे, अवलेपिनि इति भावः; किं पुनः,—आत्मसम्मानरक्षणीयमनसि पक्षावपि

सुहृदि ? तत् तथा यतेथाः, यथा न चिरमियम् अस्मान् क्लेशयति कुमारदर्शनोत्कण्ठा" इति ।

हंसवेगस्तु विज्ञापयाम्बभूव,—"देव ! किमपरम् इदानीं क्लेशयति ? (२८९) अभिजातम् अभिहितं देवेन । सेवाभीरवो हि सन्तः, तत्रापि विशेषेण अयम् अहङ्कारधनो वैष्णवो वंशः । आस्तां तावत् अस्मत्स्वामिवंशः । पश्यतु देवः, पुरुषस्य हि सेवां प्रति (२९०) दुर्जनन्या इव अतिदृढया दुर्गत्या वा अभिमुखीक्रियमाणस्य, (२९१) कुटुम्बिन्या इव असन्तुष्टया तृष्णया वा प्रेर्यमाणस्य, दुरपत्यैः इव यौवनजनितैः नानाऽभिलाषिभिः असत्सङ्कल्पैर्वा आकुलीक्रियमाणस्य, (२९२) जरत्कुमारीमिव परमार्गणयोग्याम् अतिमहतीं वा अवस्थां पश्यतः स्वगृहे,

---

मम श्रद्धा जायते, तादृशसङ्कल्पवति सुहृदि कुमारे किं पुनर्वक्तव्यम् ? अवश्यमेव समादरः तत्सङ्कल्परक्षणप्रयत्नश्च करणीयः इति भावः ; तथेति ।—यथा इयं कुमारस्य दर्शनोत्कण्ठा चिरम् अस्मान् न क्लेशयति, तथा यतेथाः,—यत्नं कुरु ; यथा शीघ्रं कुमारं द्रक्ष्यामि तथा कुर्विति भावः ।

(२८९) अभिजातं—न्याय्यं, सुन्दरमित्यर्थः, ("अभिजातः कुलीने स्याद्याय्ये प्रख्यातयोरपि" इति मेदिनी) । सेवेति ।—सेवायां—परपरिचर्यायां, भीरवः,—परासुखा इत्यर्थः । अहङ्कारधनः,—मानधन इत्यर्थः, वैष्णवः,—विष्णोः अवतारस्य वराहस्य अयमित्यर्थः, वंशः,—कुलं, विशेषेण, सेवाभीरुः इति शेषः ।

(२९०) दुर्जनन्या इव—दुष्टया मात्रा इव । अतिदृढया—अतिस्थविरया, अतिप्रबलया च, दुर्गत्या—दैन्येन, अभिमुखीक्रियमाणस्य—अभिमुखतां नीयमानस्य ।

(२९१) कुटुम्बिन्या इव—गृहिण्या इव, असन्तुष्टया—अतृप्तया, असन्तुतया च, अपूर्णयेत्यर्थः, तृष्णया—धनलालसया, प्रेर्यमाणस्य—नियोज्यमानस्य । दुरपत्यैरिव—कुपुत्रैरिव, यौवनजनितैः,—यौवनकालोत्पन्नैः, नानाऽभिलाषिभिः,—बहुभावहिः, असत्सङ्कल्पैः,—दुर्वासनाभिः, आकुलीक्रियमाणस्य—आकुलतां नीयमानस्य ।

(२९२) जरत्कुमारीमिव—वृद्धस्थामदृतां कन्यामिव, परमार्गणयोग्यां—परस्य—अन्यस्य पत्युः, धनस्वामिनश्च इत्यर्थः, मार्गणम्—अन्वेषणम् ; यद्वा,—परस्य—अन्यस्य, पारलौकिकस्येत्यर्थः, मार्गणम्—अन्वेषणं, परलोके—अन्यस्मिन्, धनस्वामिनि इत्यर्थः,

(२८३) दुर्बन्धुभिः इव दुःस्थितैः समग्रैः ग्रहैर्वा ग्राह्यमाणस्य अभियोगं, पुरातनैः अतिदुस्त्यजैः भृत्यैरिव (२८४) मलिनैः कर्म्मभिर्वा अनुवर्त्त्यमानस्य, सकलशरीरसन्तापकरं करीषाग्निमिव दुष्कृतिनः कृतचित्तस्य सम्प्रवेष्टुं राजकुलम्, (२८५) उपहृतसकलेन्द्रियशक्तेरिव मिथ्या एव (२८६) हृदयगतविषयग्रामग्रहणाभिलाषस्य, प्रथममेव तोरणतले वन्दनमालाकिशलयस्य इव शुष्यतो द्वाररक्षिभिः निरुद्धस्य, पौड़ि-

---

मार्गणं—याञ्चा इति च, ("मार्गणो याचके शरे। याञ्चाऽन्वेषणयोः क्लीबम्" इति मेदिनी) तस्य योग्या—उपयोगिनी ताम्, अतिमहतीम्—अतिप्रहृद्धाम्, अवस्थां—कष्टां दशामित्यर्थः, पश्यतः,—अवलोकयतः।

(२८३) दुर्बन्धुभिरिव—दुष्टैः ज्ञातिभिरिव, दुःस्थितैः,—दुर्गतैः, दुः,—दुष्टतया, विरुद्धत्वेन इति भावः, स्थितैश्च, समग्रैः,—सकलैः, ग्रहैः,—रव्यादिभिः, अभियोगम्—असद्भावं, ग्राह्यमाणस्य—प्राप्यमाणस्य।

(२८४) मलिनैः,—मालिन्याऽऽपादकैः, पापैरित्यर्थः; पूर्व्वकृतैरिति भावः। अनुवर्त्त्यमानस्य—अनुस्रियमाणस्य। दुष्कृतिनः,—पापिनः, सकलशरीरसन्तापकरं—सर्व्वाङ्गदाहजननमित्यर्थः, सर्व्वदेहपीड़ाजनकञ्च; राजपुरुषाणां परुषवचनात् श्रमबाहुल्यादिति वा भावः; करीषाग्निमिव—तुषानलमिव, राजकुलं—राजद्वारं, सम्प्रवेष्टुं—गन्तुमित्यर्थः, कृतचित्तस्य—विहितमानसस्य।

(२८५) उपहृतेति।—उपहृता—विलुप्ता, सकलानां—सर्व्वेषाम्, इन्द्रियाणां—चक्षुरादीनामित्यर्थः, शक्तिः,—सामर्थ्यं यस्य तथाभूतस्य, मिथ्या एव—वृथा एव; राजकुले प्रवेशलाभाभावादिति भावः।

(२८६) हृदयेति।—हृदयगतस्य—मनोरथोपस्थितस्य, न तु वस्तुतः समुपस्थितस्य इति भावः; विषयाणां—स्रक्चन्दनवनितादीनां भोग्यवस्तूनां, ग्रामस्य—समूहस्य, ग्रहणे—प्राप्तौ, अभिलाषः,—स्पृहा; यद्वा,—हृदयं गतः,—मनोरथमात्रेण पर्य्यवसितः, न तूपभोगसमर्थ इति भावः; विषयग्रामस्य ग्रहणे अभिलाषी यस्य तथाभूतस्य। प्रथमम् एव—आदौ एव, प्रवेशक्षणे एवेत्यर्थः, तोरणतले—बहिर्द्वारतलभूमौ, वन्दनमालाकिसलयस्येव—वन्दनं—तोरणस्य मङ्गलमित्यर्थः, तस्य माला—स्रक्; यद्वा,—वन्दनं—पूजनं, श्रीभासम्पादनमित्यर्थः, तोरणस्येति भावः; तदर्थं

तस्य प्रविशतो द्वारे हरिणस्य इव अपरैः हन्यमानस्य, (२९७) करिकर्मचर्मपुटस्य इव मुहुर्मुहुः प्रतीहारमण्डलकरप्रहारैः निरस्यमानस्य, (२९८) निधिपादपप्ररोहस्य इव द्रविणाभिलाषात् अधोमुखीभवतो दूरम्, अमार्गणस्य अपि अतिविप्रकृष्टविवृत्तविसर्जितस्य उद्देगं व्रजतः,

---

माला, तस्यां तस्या वा यः किसलयः,—पल्लवः तस्य इव, यष्यतः,—ग्रीवं प्रागुन्नतः, धृत्तिपाषाऽऽकुलत्वात् मूर्ध्नोत्तापाच्च इति भावः; निरुद्धस्य—अवरुद्धस्य। पीडितस्य—वेत्रादिना ताडितस्य। अपरैः,—रक्षिपुरुषव्यतिरिक्तैः राजपरिजनैः इति भावः; हन्यमानस्य—ताड्यमानस्य।

(२९७) करीति।—करिणां—हस्तिनां, कर्मणे—युद्धमित्यर्थमिति भावः; चर्मपुटस्य इव—चर्मनिर्मितकोशाकारस्य इव; अचलस्य इति भावः। प्रतीहारेति।—प्रतीहारमण्डलेन—दौवारिकसमूहेन, करप्रहारैः,—चपेटाघातैः इत्यर्थः, प्रतिहारेण—प्रतिसंहरणेनेत्यर्थः, गुण्डासङ्कोचनेन इति भावः; मण्डलं—मण्डलाकारं इत्यर्थः, यस्य तथाविधः करः,—गुण्डादण्डः, तस्य प्रहारैः,—आघातैरिति च। निरस्यमानस्य—निराक्रियमाणस्य, दूरीक्रियमाणस्येत्यर्थः।

(२९८) निधिपादपप्ररोहस्य इव—निधिः,—भूतलनिहितधनराशिः, तस्य पादपप्ररोहः,—तस्य उपरि जातः यः द्रुमाङ्कुरः, द्रुमावरोह इत्यर्थो वा, तस्य इव। द्रविणाभिलाषात्—धनलाभलाभात्, अधोमुखीभवतः,—प्रणतस्येत्यर्थः, अवाङ्मुखस्य च इत्यर्थः; याच्ञालाघवात् स्वभावाच्चेति भावः; यत्र भूतले निधयः तिष्ठन्ति, तदुपरिस्थद्रुमस्य शाखाऽवरोहादयः अत्यर्थमधोलम्बिनो भवन्ति इति प्रसिद्धिः। अमार्गणस्यापि—अयाचकस्य, अन्यत्र,—मार्गणः,—शरः, तद्विलक्षणस्यापि, दूरविक्षेपानर्हस्यापि इति, भावः। अतीति।—अतिविप्रकृष्टम्—अतिदूरं यथा तथा, विहस्तः,—परादृष्टः विसर्जितः,—विक्षिप्तस्य, राजपुरुषैरिति भावः; यद्वा,—अतिविप्रकृष्टैः,—अतिदूरवर्तिभिरित्यर्थः, राजकुलासंसृष्टैः प्राकृतैरिति भावः; विहस्तः,—स्वत एव दर्शनं दत्त्वा नाम किमपि स्वप्नासे इत्याद्युक्त्या प्रकटित इत्यर्थः, पश्चात् विसर्जितः,—परित्यक्तः तस्य; अन्यत्र,—अतिविप्रकृष्टम्—अतिदूरं यथा तथा, आकर्णमिति यावत्, विहस्तः,—वि—विशेषेण, हस्तः,—क्षिप्त इत्यर्थः, आकृष्ट इति यावत्, विसर्जितः,—निक्षिप्तः तस्य। उद्वेगम्—आधिं, व्रजतः,—प्राप्नुवतः; नाहं धनाऽऽदावा कर्षं प्राप्ता-

(२९९) अकण्टकस्यापि चरणतललग्नस्य आकृष्य क्षेपीयः क्षिप्यमाणस्य, अमकरकेतोरपि (३००) अकालोपसर्पण-प्रकुपितेश्वरदृष्टिदग्धस्य प्रलयम् उपगच्छतः, (३०१) कपेरिव क्रोधनिर्भर्त्सितस्यापि अभिन्नमुखरागस्य, ब्रह्मघ्न इव प्रतिदिवस-वन्दनोद्वृष्टशिरःकपालस्य स्वयंरक्षितस्य अशुभकर्माणि निर्वहतः,

अथवा अवागतवान्, तथाऽपि मां राजद्वारोपस्थितेरेव याचकं मत्वा एवं व्यवहरन्ति राजपुरुषा इति धियेति भावः ; उद्धतवेगं गच्छतश्च ।

(२९९) अकण्टकस्य—अक्षुद्रशत्रोः, शल्यादिरहितस्यापीत्यर्थः, कण्टकभिन्नस्य च, ("कण्टकौ ना स्त्रियां क्षुद्रशत्रौ सस्यादिकोकसि । नेयायिकादिदोषांशे स्यादङ्गे रोमाञ्चदुर्नाम्नोः" ॥ इति मेदिनी) । चरणतललग्नस्य—चरणनिपतितस्य, चरणतलं विद्धा स्थितस्य च । आकृष्य—धृत्वा, गलं इति भावः ; सन्दंशादिना आनीय इत्यर्थश्च । क्षेपीयः,—अतिक्षिप्रम् । अमकरकेतोः,—अकामस्य, अयाचकस्येत्यर्थः, मकरकेतुः,—कामः, तद्भिन्नस्य इत्यर्थश्च ।

(३००) अकालेति ।—अकाले—असमये, दर्शनायोग्यकाले, पार्वतीविरहकाले च इत्यर्थः, उपसर्पणम्—उपस्थितिः, तेन प्रकुपितस्य—क्रुद्धस्य, ईश्वरस्य,—प्रभोः, हरस्य च, दृष्ट्या—नेत्रविक्षेपेण, दग्धस्य—सन्तापितस्य, भस्मीकृतस्य च । प्रलयः,—प्र—प्रकर्षेण, लयः,—भित्त्यादिषु लीनत्वम्, अत एव प्रायेण नाश इत्यर्थः, नाशस्य तम्, उपगच्छतः,—व्रजतः ।

(३०१) कपेरिव—वानरस्य इव, क्रोधनिर्भर्त्सितस्य—क्रोधेन तिरस्कृतस्य, प्रभुणा इति शेषः । अभिन्नमुखरागस्य—अविकृतवदनप्रभस्य इत्यर्थः ; यद्वा,—अभिन्नमुखरागस्य—तुल्यमुखवर्णस्य, मनःक्षोभेण रक्तमुखस्येत्यर्थः, कपेरारक्तमुखत्वादिति भावः । ब्रह्मघ्न इव—ब्रह्मवधकृत इव, ब्रह्महत्याकारिण इवेत्यर्थः । प्रतीति ।—प्रतिदिवसं—प्रतिदिनं, वन्दनाय—प्रणतये, उद्वृष्ट—भूमौ पुनः पुनः घृष्टं, शिरसः,—मस्तकस्य, कपालं—कर्परम्, अस्थिविशेष इत्यर्थः, येन तथाभूतस्य ; ब्रह्महा प्रत्यहं कुटीचरो भूत्वा द्वादशवर्षं चतुर्विंशतिवर्षं वा तपश्चरन् देवान् प्रणमतीति शास्त्रीयत्वादिति भावः ; सेवकोऽपि प्रसादकामनायै प्रतिदिनं प्रभुं प्रणमति इति लोकव्यवहारः । स्वयंरक्षितस्य—केनापि न रक्ष्यमाणस्य ; यद्वा,—स्वयंरक्षितस्य, पापाचारत्वात् स्वशक्तिकत्वाच्चेति भावः ; अशुभकर्माणि—पापकर्माणि, पदसंवाहनादीनि हीनकर्माणि च, निर्वहतः,—सम्पादयतः ।

(३०२)त्रिशङ्कोरिव उभयलोकभ्रष्टस्य नक्तन्दिनम् अर्वाक्शिरसः तिष्ठतः, (३०३) वाजिन इव कवलवशेन सुखवाञ्छम् आत्मानं विदधानस्य, अनशनशायिन इव हृदयस्थापितजीवनाशस्य शरीरं क्षपयतः, (३०४) शुन इव निजदारपराङ्मुखस्य जघन्यकर्म्म-लग्नमात्मानं ताड़यतः, (३०५) प्रेतस्य इव अनुचितभूमिदीय-

(३०२) उभयलोकभ्रष्टस्य—ऐहिकं संसारसुखमनभमानस्य पारलौकिकं तपश्चरणादिकञ्च नाचरत इत्यर्थः; ऐहिकं राज्यसुखं परित्यज्य स्वर्गमधिरोपितस्यापि नतः परिश्रमेण अन्तरीक्षे अधोमुखं तिष्ठतश्च। नक्तन्दिनम्—अहोरात्रं, सदाकाल-मित्यर्थः। अर्वाक्शिरसः,—अधोनमितमस्तकस्य। पुरा विशङ्कुः नाम राजा गुरुशापात्चण्डालत्वमापन्नो विश्वामित्रेण तद्गुरुद्वेषिणा याजयित्वा स्वर्गमधिरोपितोऽपि कुपितशतक्रतुवज्रहुङ्कारेण तर्जितः निपतित्वरेव विश्वामित्रेण स्वप्रभावात् अन्तरीक्षे एव अधःशिराः स्थापित इति पुराणवार्त्ता। सेवकोऽपि प्रभुसन्निधौ सदैव अवनतशिरा-स्तिष्ठति इति दृश्यते।

(३०३) वाजिन इव—अश्वस्येव। कवलवशेन—अन्नइतीः, यासइतीश्च, सुखवाञ्छं—सुखेन वहनीयं, यथेच्छं प्रापणीयमित्यर्थः, सुखाद् वाञ्छं—वहिर्भूतञ्च; सेवाधर्म्मस्य अतिगहनत्वादिति भावः। विदधानस्य—कुर्व्वतः। अनशनशायिन इव—अनशनेन—अभोजनेन, शेते—तिष्ठति इत्यर्थः, तथोक्तस्य इव। हृदयेति।—हृदये—हृत्पद्मे इति भावः, स्थापितस्य—कृताधिष्ठानस्येत्यर्थः, जीवस्य—जीवात्मनः, नाशः,—अपगम इति यावत्, यस्य तथाभूतस्य, हृदये—मनसि, स्थापिता—निहिता, जीवनस्य—जीविकाया इत्यर्थः, आशा—तृष्णा, अभिलाष इत्यर्थः; राज-सेवायां प्रभूतमर्थमर्जयित्वा सुखं स्थास्यामि इत्येवंरूपा इति भावः, येन तथोक्तस्य इति च। शरीरं—देहं, क्षपयतः,—क्षयं नयतः; जीवनविसर्জने कृतसङ्कल्पतया भोजनाकरणात्, राजाज्ञापालनगौरवेण स्वास्थ्यप्रतिपालनासामर्थ्याच्च इति भावः।

(३०४) शुन इव—कुक्कुरस्य इव, निजदारपराङ्मुखस्य—निजकलत्रसङ्गो-वर्জितस्य इत्यर्थः; अहोरात्रं प्रभुसन्निधाववस्थानादिति भावः। जघन्येति।—जघने भवं जघन्यं—निकृष्टमित्यर्थः, जघनः,—कनीयान् सुतश्च, तत्,तस्य च कर्म्म—आचरणं, पालनादिक्रिया च, तस्मिन् लग्नं—समासक्तम्। ताड़यतः,—आघातयतः, अनुशोचयतः इत्यर्थश्च।

(३०५) प्रेतस्य इव—निकृष्टयोनेरिव, मृतप्राक्कस्येव च। अनुचितेति।—

मानान्नपिण्डस्य, (२०६) बलिभुज इव जिह्वालौल्योपयुक्त-पुरुषवर्चसो वृथाविहितायुषो जीवतः, (२०७) श्मशान-पादपानिव पिशाचस्य दग्धभूत्या परुषीकृतान् राजवल्लभान् उपसर्पतः, (२०८) विपरीतजिह्वाजनितमाधुर्यैः ओष्ठमात्र-प्रकटितरागैः राजशुकाऽऽलापैः मिश्रीरिव मुग्धविलोभ्यमानस्य,

अनुचितायाम्—अयुक्तायां, भूमौ—प्रदेशे, चितायाः पश्चादनुचिता या भूमिः तस्यां च, दीयमानम्—अर्प्यमाणम्, अन्नपिण्डं—भक्तग्रासः, प्रेतोद्दिश्यकपिण्डरूपान्नञ्च यस्य यस्मै वा तथाभूतस्य।

(२०५) बलिभुज इव—काकस्येव। जिह्वेति।—जिह्वायाः,—रसनायाः, लौल्यं—चापल्यं, तृष्णा च, अभिलाष इत्यर्थः, ("लौल्यः स्याद्वाञ्छिलुब्धकः। तृष्णे अचले" इति मेदिनी) तेन उपयुक्तं—व्ययीकृतं, भुक्तञ्च ; पुरुषवर्चः,—पौरुषं तेजः, पुरीषञ्च, विष्ठा इत्यर्थः, ("वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि" इति मेदिनी) येन तथाभूतस्य। वृथेति।—वृथा—निरर्थकं, विहितं—कृतम, आयुः,—जीवित-काको येन तथाभूतस्य, पौरुषतेजोविसर्जनादिति भावः ; वृथा—निरर्थकमेव ; काकापि उपकारकरणाभावादिति भावः ; विभ्यः,—पक्षिभ्यः, वीर्यां—पक्षिणां वा, हितम्—उत्कृष्टं, काकानां दीर्घायुष्टादिति भावः ; आयुर्यस्य तथाभूतस्य च, जीवतः,—प्राणान् धारयतः।

(२०७) पिशाचस्य—पिशाचवत् हिताहितबोधरहितस्य इत्यर्थः, निर्बोधस्य इति यावत्, निकृष्टदैवयोनिविशेषस्य च, मृतस्येति भावः ; दग्धभूतिः,—दग्धा—अङ्गारा इति भावः, भूतिः,—सम्पत्, दहनभस्म च तया, ("भूतिर्भस्मनि सम्पदि" इत्यमरः)। परुषीकृतान्—कठोरस्वभावानित्यर्थः, मलिनीकृतांश्च। श्मशान-पादपानिव—मृतदाहस्थानस्थवृक्षानिव ; लोकानां भीत्युत्पादकत्वादसेव्यानिति भावः ; राजवल्लभान्—नृपतेः प्रियपरिजनान्, उपसर्पतः,—उपासीनस्य, आराधयत इति यावत्।

(२०८) विपरीतेति।—विपरीतं—हृदयाद् भिन्नमिति यावत्, कैवलं लौखिकमिति भावः, तद् यथा तथा, जिह्वया—रसनया, कैवलवाक्येनेति भावः ; जनितम्—उत्पादितं, माधुर्यं—मनोहरत्वं येषां तैः। ओष्ठेति।—ओष्ठमात्रेण—कैवलेन ओष्ठेन, न तु मनसा इति भावः ; प्रकटितः,—प्रकाशितः, रागः,—अनुरागः, प्रणय इति यावत्, लौहित्यञ्च येषु तथाविधैः। राजशुकाऽऽलापैः,—राज-

(३०९) वेतालस्य इव नरेन्द्रप्रभावाविष्टस्य किञ्चित् न आचरतः, (३१०) चित्रधनुष इव अलीकगुणाध्यारोपणैक-क्रियानित्यनम्रस्य निर्व्याणतेजसः, (३११) सम्मार्ज्जनीसमुपार्ज्जितरजसोऽवकरकूटस्येव निर्म्माल्यवाहिनः,

शुकाः,—राजानः,—भूपाः, शुका इव—कीरा इव, शुकविशेषा इत्यर्थः, तेषाम् आलापैः,—वचनैः; शुकवदयथावाक्योच्चारणैः, न तु कार्य्यतः सम्यगयमानैरिति भावः। मुग्धविलोभ्यमानस्य—मुग्धं—सुन्दरं यथा तथा,("मुग्धः सुन्दरमूढयोः" इति कोषः) विलोभ्यमानस्य—विशेषेण आश्वासं नीयमानस्य इति यावत्।

(३०९) वेतालस्येव—भूतस्येव, भूताधिष्ठितशवदेहस्येव वा। नरेन्द्रेति।—नरेन्द्रः,—राजा, भौतिकमन्त्रविद्, तस्य प्रभावेण—सामर्थ्येन, आविष्टस्य—वशङ्गतस्य। किञ्चित् न आचरतः,—किमपि कर्त्तव्यम्, उपद्रवादिकञ्च न अनुतिष्ठतः; केवलं राज्ञानुमतमेव सम्पादयतः, न तु अन्यविधमवश्यकर्त्तव्यमिति भावः।

(३१०) चित्रधनुष इव—आलेख्यलिखितकार्मुकस्य इव। अलीकेति।—अलीकानाम्—असत्यानाम्, अविद्यमानानामित्यर्थः, गुणानां—दयादाक्षिण्यादीनां, प्रभोः इति भावः; अध्यारोपणं—कीर्त्तनमिति भावः; तदेव एका—केवला, क्रिया—कार्य्यं, तया नित्यं—सततं, नम्रः,—आनतः तस्य, सदैव अवनतशिरसा राज्ञः असतोऽपि गुणान् उद्घोषयतः इत्यर्थः; अन्यच्च,—अलीकस्य—कल्पितस्य, चित्रत्वात्, न तु वास्तवस्येति भावः; गुणस्य—मौर्व्याः, अध्यारोपणं—संयोजनमेव, एकक्रिया—एकमात्रकार्य्यम्; न तु शरसंयोजनादिकमिति भावः; तया नित्यं—सततं, नम्रम्—आवर्ज्जितं तस्य। निर्व्याणतेजसः,—निर्व्याणं—प्रशान्तं, तेजः,—तैजस्विता इत्यर्थः, अलीकगुणकीर्त्तनेन केवलं प्रभुचित्तरञ्जनादिति भावः, यस्य; अन्यत्र,—निः,—निर्गतं, निराकृतमित्यर्थः, अविद्यमानमिति यावत्, व्याजस्य—शरस्य, तेजः,—सामर्थ्यं यस्मात् यस्मिन् वा तथाभूतस्य; यद्वा,—निः,—नास्ति, व्याजस्य—शरस्य, तेजः,—प्रभा, औज्ज्वल्यमित्यर्थः, यत्र तथाभूतस्य।

(३११) सम्मार्ज्जनीति।—सम्मार्ज्जन्या—झाधन्या, समुपार्ज्जितानि—सञ्चितानि, रजांसि—पांशवः यस्य यत्र वा तथाभूतस्य; अन्यत्र,—सम्मार्ज्जन्या—सम्मार्ज्जनीप्रहारेण इत्यर्थः, सम्मार्ज्जनीप्रहारवत् पक्षपातादिना इत्यर्थो वा, समुपार्ज्जितं,—सञ्चितं, हृद्विकृतमित्यर्थः, रजः,—रजोगुणः यस्य तथाभूतस्य; सदैव कर्कशस्वभावस्येति भावः। अवकरकूटस्येव—अवकराः,—सङ्कराः, सम्मार्ज्जनीविघ्नानां

(३१२) कफविकारिण इव दिने दिने कटुकैः उद्वेज्यमानस्य, (३१३) सौगतस्येव अर्थशून्यविज्ञप्तिजनितवैराग्यस्य कषायाणि अभिलषतः, (३१४) निशासु अपि माहबलिपिण्डस्य इव दिक्षु विक्षिप्यमाणस्य, (३१५) अशौचगतस्य इव कुशयनजनित-

---

दयादीनां सङ्घातः इत्यर्थः, ("सम्पर्ज्जनी शोधनी स्यात् सङ्करोऽवकरस्तया। चिते" इत्यमरः) तेषां कूटः,—राशिः तस्य इव। निर्माल्यवाहिनः,—निर्माल्यम्—उपभुक्तद्रव्यं, हेयमित्यर्थः, वहति—धारयतीत्यर्थः, यस्तस्य, निर्माल्य—देवोच्छिष्टं द्रव्यं, लक्षणया अत्र प्रभोरुच्छिष्टमपि प्रतीयते, तत् वहति—व्यवहरतीति तथाभूतस्य च; यद्वा,—निः,—नास्ति, माल्यं—स्रक्, मालाग्रन्थनमित्यर्थः, वहति—धारयति, जीवनमिति भावः, यः तथोक्तस्य; एतेन निःशीकत्वं प्रकटीकृतं, माल्यचन्दनादेः सशीकत्वव्यञ्जकत्वादिति भावः।

(३१२) कफविकारिण इव—श्लेष्मविकारवत इव। दिने दिने—प्रति दिनम्। कटुकैः,—उग्रैः प्रतिहारादिभिः, तीक्ष्णैः औषधैश्च, श्लेष्महरैः इति भावः; उद्वेज्यमानस्य—क्लेश्यमानस्य।

(३१३) सौगतस्य इव—जैनस्य इव। अर्थेति।—अर्थशून्या—निष्फलेत्यर्थः, या विज्ञप्तिः,—विज्ञापनं, प्रार्थनेत्यर्थः, प्रभुसमीपे इति भावः, तया जनितम्—उत्पादितम्, अभिलषितप्राप्त्यभावादिति भावः; वैराग्यं—निर्वेदः यस्य तथाभूतस्य, विज्ञापनसहस्रेष्वपि प्रभुसकाशादर्थसलभमानस्येति भावः, अर्थशून्यया—निष्फलया, सर्वमेव शून्यमित्येवंरूपयेत्यर्थः, विज्ञप्त्या—विज्ञानेन, बाह्यवस्तुनामिति भावः; जनितवैराग्यस्य—वीतरागस्य इति च। कषायाणि—कषायरसद्रव्याणि, अपि रक्षाध्याहार्यः, अतितुच्छद्रव्याण्यपीति भावः; अन्यत्र,—कषायाणि—कषायरक्तानि वसनानि, अभिलषतः,—प्रार्थयमानस्य।

(३१४) निशासु अपि—रात्रिष्वपि, किं पुनर्दिवसेषु इति भावः। माहबलिपिण्डस्य इव—माहभ्यः,—देवोबलिभ्यः, देयं बलिपिण्डम्—उपहारान्नं तस्येव, दिक्षु—प्राच्यादिषु, विक्षिप्यमाणस्य—निरस्यमानस्य, ताड्यमानस्येत्यर्थः, प्रतीहारादिभिरिति शेषः; निशायामपार्थमपि स्थानमलभमानस्येति भावः; दीयमानस्य च।

(३१५) अशौचगतस्य इव—अशौचं—मृतकादि, तद्गतस्य, अशौचिन इवेत्यर्थः। कुशयनेति।—कुशयनेन—कु—कुत्सितेन, शयनेन—शय्यया, क्षौ—पृथिव्यां शयनेन च, अशौचिनां स्थण्डिलशायित्वस्य शास्त्रीयत्वादिति भावः, जनिता—

समधिकतरदुःखहृत्तेः, (३१६) तुलायन्त्रस्य इव पश्चात्कृत-गौरवस्य, तोयार्थमपि नमतः अतिकृपणस्य शिरसा केवलेन असन्तुष्टस्य वचसाऽपि पादौ स्पृशतः, (३१७) निर्हृयवेत्रिवेत्र-ताड़नत्रस्तयेव त्रपया त्यक्तस्य, (३१८) दैन्यसङ्कोचित-हृदयहृतावकाशया इव आह्वीपुरुषिकया परिवर्जितस्य, (३१९) कुत्सितकर्माङ्गीकरणकुपितया इव उन्नत्या वियुक्तस्य,

---

त्पादिता, समधिकतरा—अतिशायिनी, दुःखहृत्तिः,—दुःखस्थितिः, असुखेनाव-स्थानमित्यर्थः, यस्य तथाभूतस्य।

(३१६) तुलायन्त्रस्य इव—तोलनयन्त्रस्य इव, पश्चात्—पृष्ठतः, अधस्, कृतं—विहितं, गौरवं—महत्त्व, गुरुत्वञ्च यस्य तथाभूतस्य ; तुलायन्त्रस्य यस्यां कोष्ठ्यां भारवस्तु तिष्ठति, सा कोष्ठिः यथा अधस्तिष्ठति, तथा सेवापरायणस्य गौरवादिक-मपि अधःकृतं भवति इति समुदितार्थः। तोयार्थमपि—जलप्राप्त्यर्थमपि, अत्र अपि-शब्देन अनायासलभ्यद्रव्यप्राप्त्यर्थमपीति गम्यते ; नमतः,—नतिं कुर्वतः, नत्वा याच-मानस्य इत्यर्थः, अत एव अतिकृपणस्य—दीनस्य। केवलेन शिरसा—शिरोमात्रे-णेत्यर्थः, पादौ स्पृशाऽपीति भावः ; असन्तुष्टस्य—अतृप्तस्य, अत एव वचसा—वाक्येनापि पादौ स्पृशत इत्यर्थः ; भवच्चरणौ धारयामि, मामीतहेहि, प्रसीद, इत्येवं-भाषिण इति भावः।

(३१७) निर्हृयेति।—निर्हृयेण—निष्ठुरेण, वेत्रिणा—वेत्रधारिणा पुरुषेण, वेत्रताड़नात्—वेतसदण्डप्रहारात्, त्रस्तयेव—भीतयेव। त्रपया—लज्जया, त्यक्तस्य—विहीनस्य, निर्लज्जस्येत्यर्थः।

(३१८) दैन्येति।—दैन्येन—दारिद्र्येण, सङ्कोचितं—कुण्ठितं, प्रसाररहित-मित्यर्थः, हृदयं—चित्तं, तेन हृतः,—अपनीतः, अवकाशः,—स्थानं यस्याः तथा-भूतया, दुष्कर्मणस्य सङ्कोचात् तत्र स्थातुं स्थानाभावेनेत्यर्थः ; आह्वीपुरुषिकया—"आह्वीपुरुषिका दर्पात् या स्यात् सम्भावनाऽऽत्मनि" इत्यमरोक्तलक्षणया, अहमेव श्रेष्ठपुरुष इत्येवमात्मनि गौरवबुद्ध्या इत्यर्थः, परिवर्जितस्य—परित्यक्तस्य ; निर्लज्जस्य निकृष्टस्य चेति भावः।

(३१९) कुत्सितेति।—कुत्सितं—निन्दितं, कर्म—सेवेत्यर्थः, तस्य अङ्गी-करणेन—लोभात्या, कुपितयेव—क्रुद्धयेव। उन्नत्या—अभ्युदयेन, वियुक्तस्य—

धनश्रद्धया क्लेशान् उपार्ज्जयतः, (३२०) स्वर्द्धिबुद्धया अवमानं वर्द्धयतो मूढस्य, सत्यपि विविधकुसुमाधिवाससुरभिणि वने हृष्णाऽञ्जलिम् उपरचयतः, (३२१) कुलपुत्रस्यापि कृतागस इव भीतभीतस्य समीपम् उपसर्पतः, दर्शनीयस्यापि आलेख्यकुसुमस्य इव निष्फलजन्मनः, (३२२) विदुषोऽपि वैधेयस्य इव अपशब्दमुखस्य, शक्तिमतोऽपि क्लिन्नस्य इव मङ्गोचितकर-

---

विरहितस्य, कदाऽपि सन्तर्पणम् अलभमानस्येत्यर्थः। धनश्रद्धया—अर्थप्राप्त्या। उपार्ज्जयतः,—सञ्चयं कुर्वतः।

(३२०) स्वर्द्धिबुद्धया—स्वस्य—आत्मा, धनञ्च, ("स्त्री भ्रातावात्मनि स्वं विद्यात्स्त्रीये स्त्रीऽस्त्रियां धने" इत्यमरः) तस्य ऋद्धिः,—अभ्युन्नतिः, तस्यास्तत्र वा या बुद्धिः,—ज्ञानं तया, अवमानम्—अवहेलनं, वर्द्धयतः,—वृद्धिं कारयतः, सेवायां हीनोचितकर्मकरणात् जनसमीपे अवज्ञेयत्वात्, कदाचित् प्रमादात् कार्य्यवैपरीत्येन प्रभुणा भर्त्सितत्वाद्वा इति भावः; अत एव मूढस्य—ज्ञानशून्यस्य। सत्यपि—विद्यमानेऽपि। विविधेति।—विविधानां—नानाप्रकाराणां, कुसुमानां—पुष्पाणाम्, अधिवासेन—निवासेन, विकसिततया अवस्थानेनेत्यर्थः, सुरभिणि—सुगन्धिनि; अन्यत्र,—विविधैः कुसुमैः,—सुगन्धिपुष्पैरिति यावत्, अधिवासेन—अधिवासनेन, संस्कारेणेत्यर्थः, ("अधिवासो निवासे स्यात् संस्कारे धूपनादिभिः" "संस्कारो गन्धमाल्याद्यैः यः स्यात्तदधिवासनम्" इति मेदिन्यमरौ) सुरभिणि। वने—कानने, जले च, ("वने सलिलकानने" इत्यमरः) हृष्णाऽञ्जलिं—हृष्णया—सृष्टया, धनलाभसया इति यावत्, पिपासया च, ("हृष्णे सृष्टापिपासयोः" इत्यमरः) अञ्जलिं—करद्वयसंयोगं, विधेयत्वप्रदर्शनार्थं, जलपानार्थञ्चेति भावः, उपरचयतः,—कुर्वतः।

(३२१) कुलपुत्रस्यापि—सत्कुलजातस्यापि। कृतागसः,—अनुष्ठितापराधस्य, अत एव भीतभीतस्येव—अतिभयार्त्तस्येव, प्रभोरिति शेषः। दर्शनीयस्य—अभिरूपस्य। आलेख्यकुसुमस्य—चित्रितपुष्पस्येत्यर्थः। निष्फलजन्मनः,—वृथोत्पन्नस्य, जनाऽऽदृताभावादिति भावः।

(३२२) विदुषः,—ज्ञानिनः। वैधेयस्येव—मूर्खस्येव, ("अज्ञे मूढधियाजातमूर्खवैधेयबालिशाः" इत्यमरः) अपशब्दमुखस्य—अपशब्दः,—अपभ्रंशः, असंस्कृतपदनित्यर्थः, कुत्सितभाषणमिति यावत्, ("अपभ्रंशोऽपशब्दः स्यात्" इत्यमरः) मुखे—वदने यस्य तथाभूतस्य, सदा ग्राम्यभाषणरतस्येत्यर्थः; नीचसंसर्गदोषादिति भावः; यद्वा,

युगलस्य, (३२३) समसमुत्कर्षेषु निरन्विष्यमानस्य, नीचसमीकरणेषु निरुच्छ्वासं म्रियमाणस्य, (३२४)परिभवैः तृणीकृतस्य, दुःखानिलेन अनिर्वृतेः ज्वलतः, (३२५) भक्तस्य अपि अभक्तस्य, निरुन्धनः सन्तापयतो बन्धून्, विमानस्य अपि अगतिकस्य, (३२६) च्युतगौरवस्य अपि अधस्माद्गच्छतः, निःस-

—अपगतं—निःशब्दमित्यर्थः, सुखं यस्य, आधिना किमप्यकथयत इत्यर्थः। म्रियमाण इव—श्वेतकुष्ठरोगिण इव, सङ्कोचितकरयुगलस्य—कृताञ्जलेः, रौद्रभावात् सङ्कोचितहस्तद्वयस्य च।

(३२३) समसमुत्कर्षेषु—समानां—तुल्यश्रीकगुणानां, निरन्तरमुत्कानामित्यर्थः, समानामिति शेषः, समुत्कर्षेषु—समुन्नतिषु, निरन्विष्यमानस्य—विनापि दह्यमानस्य, ईर्ष्यानलेनेति भावः। नीचसमीकरणेषु—प्राकृतैः साम्यप्राप्तिषु, भवत्योऽयं, नीचजातीयः, इत्येवंरूपेण इतरजनैः सह तुल्यनीकरणेषु इत्यर्थः, निरुच्छ्वासम्—उच्छ्वासवर्जितम्; मरणकाले ऊर्ध्वश्वासी भवति, अत्र तु तत्र भवतीति भावः; तद् यथा तथा, म्रियमाणस्य—मरणमनुभवतः, जीवन्मृतस्येत्यर्थः।

(३२४) परिभवैः,—अवमानैः, तृणीकृतस्य—हतवतो नीतस्य। दुःखानिलेन—दुःखपवनेन, ["दुःखानिलेन" इत्यत्र "दुःखानलेन" इति पाठः समीचीनः; अनिलस्य ज्वलनकर्तृत्वाभावात्]। अनिर्वृतेः,—निर्वृतिः,—सुखं तद्राहित्यात्; यद्वा,—नास्ति निर्वृतिः,—सुखं यस्य तादृशस्य, अत एव ज्वलतः,—दाहमनुभवतः, दुःखानिलेन सुखपादपभञ्जनात् छायाऽप्राप्ता इति भावः।

(३२५) भक्तस्य—अनुरक्तस्य, अपि अभक्तस्य—अननुरक्तस्येति विरोधः; भक्तवर्जितस्य, निरनुरक्तस्येत्यर्थः; इति परिहारः। निरुन्धनः,—निः,—नास्ति, रुन्धा—सन्तापः यस्य तथाभूतस्यापि, सन्तापयतः,—सम्यक् तापयतः, इति विरोधः; निरुन्धनः,—अगर्वस्य इति परिहारः। बन्धून्—स्वजनान्। विमानस्य—व्योमयानस्य, आकाशसञ्चारिरथविशेषस्य इत्यर्थः, ("व्योमयानं विमानोऽस्त्री" इत्यमरः) तथाभूतस्यापि, अगतिकस्य—गमनशक्तिहीनस्येति विरोधः; विमानस्य—मानवर्जितस्यापि, अगतिकस्य—निरुपायस्य इति परिहारः।

(३२६) च्युतगौरवस्य—च्युतं—भ्रष्टं, गौरवं—भारत्वं यस्य तथाभूतस्य अपि, प्राप्तलघुत्वस्यापीत्यर्थः, अधस्मात् गच्छतः,—निम्नदेशं प्राप्नुवतः इति विरोधः; च्युतं गौरवं—महत्त्वं यस्य तथाभूतस्य, अत एव अधस्माद् गच्छतः,—नीचतां प्राप्नुवतः।

त्वस्यापि महामांसविक्रयं कुर्व्वतः, (३२७) निर्मदस्य अस्वतन्त्रवृत्तेः, अयोगिनो ध्यानवशीकृतात्मनः, (३२८) अभ्योत्थायं प्रणमतः, दग्धमुण्डस्य, गोत्रविदूषकस्य, नग्नान्दिनं नृत्यतः, मनस्विजनं हासयतः, कुलाङ्गारस्य, वंशं दहतः, नृपशोः, तृणेऽपि लब्धे, कन्धराम् अवनमयतः,

निःसत्त्वस्य—सत्त्वं—जन्तुः, प्राणीति यावत्, तद्रहितस्यापि, महामांसविक्रयं—नरामिषविक्रयं, कुर्व्वतः,—विदधत इति विरोधः; निःसत्त्वस्य, सत्त्वम्—अनुभावः, मृतवद् खलीव इत्यर्थः, तद्वर्जितस्य, गतप्राणस्य उन्मत्तस्य वा इत्यर्थः; यद्वा,—निः,—नास्ति, सत्त्व—द्रव्यं, परिवारपोषणोचितः सामग्रीसम्भार इत्यर्थः, यस्य तथाभूतस्य; यद्वा,—निःसत्त्वस्य—सत्त्वगुणरहितस्य, ("सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः। आत्मतत्त्वे व्यवसायामुचित्तेष्वस्त्री तु जन्तुषु" ॥ इति मेदिनी) अत एव महामांसविक्रयं—स्वशरीरविक्रयं, दासत्वेनात्मविक्रयमित्यर्थः, कुर्व्वतः इति परिहारः।

(३२७) निर्मदस्य—मद्यपानरहितस्य, अमत्तस्यापीत्यर्थः, अस्वतन्त्रवृत्तेः,—अस्वतन्त्रा—पराधीना, वृत्तिः,—स्थितिः, अवस्थानमित्यर्थः; मत्तानां कामप्यनालक्ष्य स्वतन्त्रभावेन स्थातुमसामर्थ्यादिति भावः; यस्य तथोक्तस्य इति विरोधः; निर्मदस्य—विरहङ्कारस्यापि, अस्वतन्त्रवृत्तेः,—न स्वतन्त्रा—स्वाधीना, प्रभुपरतन्त्रेत्यर्थः, वृत्तिः,—स्थितिः, जीविका इत्यर्थः, ("आजीवो जीविका वार्त्ता वृत्तिर्वर्त्तनजीवने" इत्यमरः) यस्य तथाभूतस्य इति परिहारः। अयोगिनः,—योगः,—चित्तवृत्तिनिरोधः, तद्रहितस्यापि, योगिभिन्नस्यापीत्यर्थः; ध्यानवशीकृतात्मनः,—ध्यानेन—समाधिना, वशीकृतात्मनः,—निरुद्धचित्तवृत्तेः इति विरोधः; अयोगिनः,—योगः, धनस्य इति भावः, विद्यतेऽस्य इति योगी, स न भवति इति अयोगी तस्य, निर्धनस्य इत्यर्थः, "प्रतिकूलदैवस्य" इति केचित्। अत एव ध्यानेति।—ध्यानेन—दुर्भावनया इत्यर्थः, वशीकृतः,—अधीनीकृतः, आत्मा—मनः, ("आत्मा प्रंसि स्वभावे च प्रयत्नमनसोरपि" इति मेदिनी) यस्य तथोक्तस्य इति परिहारः।

(३२८) अभ्योत्थायं—अभ्याशे उत्थाय उत्थाय, आप्रभु तादिति भावः; प्रणमतः,—वन्दमानस्य, प्रभुमिति शेषः। दग्धमुण्डस्य—आतपोत्तप्तशिरसः; कार्य्यव्यपदेशेन इतस्ततो गमनागमनादिति भावः। गोत्रविदूषकस्य—वंशं दूषयतः, नीचकर्म्मानुष्ठानादिति भावः। नृत्यतः,—नृत्यं कुर्व्वतः, प्रभुनिदेशादनवरतं कर्म्म कुर्व्वत इति भावः। मनस्विजनं—धीरजनं, हासयतः,—हासिनं कुर्व्वतः; सेवाऽऽनु-

(३२९) जठरपरिपूरणमात्रप्रयोजनजन्मनः, मांसपिण्डस्य, गर्भरोगस्य मातुः, अपुण्यानां कर्मणाम् आचरणात् भृतकस्य (३३०) किं प्रायश्चित्तम् ? का प्रतिपत्तिक्रिया ? क्व गतस्य शान्तिः ? कौदृशं जीवितम् ? कः पुरुषाभिमानः ? किन्नामानो विलासाः ? कौदृशी भोगश्रद्धा ? प्रबलपङ्क इव मज्जन्तम् अधस्तात् नयति दारुणो दासशब्दः । धिक् (३३१) तदुच्छ्वसितम्, उपयातु तद्धनं निधनम्, अभवनिर्भृतेः अस्तु तस्याः, नमो भगवद्भ्यः तेभ्यः सुखेभ्यः, तस्य अयमञ्जलिः ऐश्वर्यस्य, तिष्ठतु दूर एव सा श्रीः, शिवं स परिच्छदः करोतु, (३३२) यदयम् उत्तमाङ्गं गां

रक्तदर्शनादिति भावः। कन्धरां—ग्रीवाम्; अतितुच्छवस्तुनिक्षिप्तमपि प्रणमत इति भावः।

(३२९) जठरेति।—जठरस्य—उदरस्य, परिपूरणमात्रं—भरणमात्रं, प्रयोजनम्—आवश्यकं यस्य तादृशं, जन्म—उत्पत्तिः यस्य तथाभूतस्य; कस्यापि उपकाराकरणादिति भावः। मांसपिण्डस्य—जडस्वरूपस्य इत्यर्थः। गर्भरोगस्य—उदरीयव्याधिभूतस्य; दशमासान् यावत् क्लेशप्रदत्वात्, उत्तरकालेऽपि क्लेशदूरीकरणासामर्थ्यादिति भावः। भृतकस्य—धृत्यभावमापन्नस्य, पुरुषस्य इति पूर्वेण सम्बन्धः।

(३३०) प्रायश्चित्तं—"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते। तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥" इत्युक्तलक्षणकम् अपुण्यकर्मक्षयसाधनं चान्द्रायणादि कर्म; यद्वा,—प्रायस्य पापस्य चित्तं शोधनं यस्मात् तादृशं कर्मेत्यर्थः। प्रतिपत्तिक्रिया—कर्त्तव्यताऽनुष्ठानम्।

(३३१) उच्छ्वसितं—जीवितम्। मद्धनं—दास्यलक्षणद्रविणं, निधनं—विनाशम्, अथ च धनाभावम्। उपयातु—गच्छतु। अभवनिः,—अनुत्पत्तिः। [आकारोऽनिप्रत्ययः]। भृतेः,—सम्पदः। भगवद्भ्यः,—माहात्म्यवद्भ्यः, सौजन्यपूर्णवचनमेतत्। तेभ्यः सुखेभ्यः,—दास्यसुखेभ्य इत्यर्थः। तस्य—दास्येनार्जितस्य। अञ्जलिः, कृत इति शेषः। सा—दास्यार्जिता इत्यर्थः, श्रीः,—सम्पत्, दूर एव तिष्ठतु, न तस्यामस्माकं किमपि प्रयोजनमिति भावः। सः,—दास्यलब्ध इत्यर्थः। परिच्छदः,—उपकरणम्। शिवं—मङ्गलं, युष्माकमिति शेषः।

(३३२) यदर्थं—यस्मात्पदादिक्षिप्तमिति शेषः। उत्तमाङ्गं—शिरः। गां—पृथ्वीं,

गमिष्यति, मुखप्रियरतः क्लीवः, अपूतिमांसमयः कृमिः, (३२३) अगण्यमानो नरकः, (३२४) पादरजोधूसरोत्तमाङ्गो जङ्गमः पादपीठः, पुंस्कोकिलः काकुक्वणितेषु, शिखी (३२५) सुखकरकेकासु, स्थलकूर्म्मः क्रोडक्षमणेषु, श्वा नीचचाटुकरणेषु,

गमिष्यति; शिखी गतं भविष्यतीत्यर्थः। क्लीवः,—"न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति। मेढ्रशीत्यानयुक्ताभ्यां हीनः क्लीवः स उच्यते॥" इत्युक्तलक्षणः इवेति ग्रेषः, निर्वीर्य्यत्वादिति भावः; सुखप्रियरतः,—मुखे—वदने, प्रियं—प्रीतिकरं, रतं—सुरतं, मेहनं वा यस्य तथाभूतः, मुखयोनिरित्यर्थः, मुखमध्ये सुरतप्रवृत्तः, न तु योनौ इति भावः; अन्वयः,—मुखस्य प्रिये—प्रीतिकरकर्म्मणि, भोजनव्यापारे इत्यर्थः, रतः, —तत्परः, भोजनसमर्थ इत्यर्थः, ("रतं सुरतगुह्ययोः। रतस्त्रिष्वनुरक्ते स्यात् तत्परे चाभिधेयवत्॥" इति मेदिनी)। अपूतिमांसमयः,—अदुर्गन्धमांसबहुल इत्यर्थः, अकुथितमांसपिण्डमयश्च। कृमिः,—कीटविशेषः, इवेति ग्रेषः, एवमुत्तरत्रापि बोद्धव्यम्; क्षुद्रत्वादल्पप्राणत्वाच्चेति भावः।

(३२३) अगण्यमानः,—असङ्ख्यायमानः, अगणनार्हश्च, अगण्यो मानो यस्य तथाभूतो वा, नरकः,—निरयः, कुत्सितो नरश्च; अबौद्धादिभेदेन कतिविधस्य सङ्ख्यायत्वात् सुकृतिभिः परित्यज्यमानत्वाच्चेति भावः।

(३२४) पादेति।—पादरजसा—चरणरेणुना, धूसरम्—धूम्रवर्णम्, उत्तमाङ्गम्—उपरिभाग इत्यर्थः, मस्तकञ्च यस्य तथाभूतः, जङ्गमः,—चरिष्णुः, गतिशीलः इत्यर्थः, पादपीठः,—चरणासनः; नियतं प्रभुपादपद्मस्य मस्तके धारणादिति भावः। काकुक्वणितेषु—मधुरवचनेषु, श्रोत्रजनितभिन्नकण्ठध्वनिषु च,—"भिन्नः कण्ठध्वनिः धीरैः काकुरित्यभिधीयते" इति दर्पणः। पुंस्कोकिल इव, परपुष्टत्वादिति भावः।

(३२५) सुखकरकेकासु—श्रुतिसुखजननीषु केकावाणीषु, ("केका वाणी मयूरस्य" इत्यमरः) सन्तोषकरेषु वचनविशेषेषु च, शिखी—मयूरः। क्रोडक्षमणेषु—उत्सङ्गारोहणेषु, उत्सङ्गघर्षणेषु वा, नितम्बघर्षणेषु इत्यर्थः, क्रोडवत्—वराहवत्, ("वराहः यूकरो घृष्टिः…। …क्रोडो भूदार इत्यपि" इत्यमरः) क्षमणेषु—पोत्रनिखननेन भूविदारणेषु च, स्थलकूर्म्मः,—पीवरः कमठः, अलसगतित्वादिति भावः। नीचचाटुकरणेषु—दैन्यजनितस्तोषणेषु, अलीकगुणानुवादेन परचित्तरञ्जनरूपेषु हीनक्रियासु इत्यर्थः, प्रभुपादसेवनेषु इति भावः; श्वा—कुक्कुरः।

(२२६) वेणुः मूर्च्छनासु, वेश्याकायः करणबन्धक्लेशेषु, (२२७) पलालं सत्त्वशालिषु, ककलासः शिरोविड्लुनासु, जाहकः (२२८) आत्मसङ्कोचनेषु, प्रतिपादकः पादसंवाहनासु, कटुकः करतलताडनेषु, वीणादण्डः (२२९) कोणाभिघातेषु,

(२२६) मूर्च्छनासु—मोहनक्रियासु, चाटुशतप्रयोगेण मोहोत्पादनेषु इत्यर्थः, "स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते। मूर्च्छनामिति तां प्राहुः कवयो यामसम्भवाम्॥" इत्युक्तलक्षणानां सङ्गीताङ्गस्वराणां विशिष्टासु स्थितिषु इति च, वेणुः,—वाद्यभेदः। करणबन्धक्लेशेषु—करणं—शरीरं, तस्य बन्धः,—बन्धकीकरणं, भृत्यत्वेनावश्यीकरणमित्यर्थः, तेन क्लेशाः,—दुःखा इत्यर्थः, तेषु; करणेषु—रतिशास्त्रविहितेषु व्यापारविशेषेषु, नृत्यगीतविशेषेषु वा, ("करणं हेतुकर्मणोः। क्रियायामेन्द्रियेबेकायसंवेशनेषु च। नृत्यगीतप्रभेदयोः" इति मेदिनी) ये बन्धाः,—आश्लेषादयः आत्मसंयमनादयो वा, तैः क्लेशाः तेषु। वेश्याकायः,—वाराङ्गनाशरीरम्; परोपभोग्यत्वात् पण्यभूतदेहत्वाच्चेति भावः।

(२२७) सत्त्वशालिषु—सत्त्वम्—अस्तित्वं, तेन शालन्ते—श्रीमन्ते इति तथोक्तेषु, अस्तित्वमात्रधर्मिषु सत्त्वे, न तु फलवत्सु इति भावः; पलालम्—धान्यवर्जितश्रीव्रजवरशिरिति यावत्; असारत्वादिति भावः। शिरोविड्लुनासु—शिरसेष्टासु, प्रच्छर्दिषु इति भावः; शिरसः नियतम् उन्नमनेषु च, ककलासः,—सरटः, सरीसृपविशेषः इत्यर्थः।

(२२८) आत्मसङ्कोचनेषु—स्वदेहसङ्कोचेषु, प्रभोराज्ञानभिया मृतभावेनावस्थानेषु इति भावः; जाहकः,—घोङ्काख्यः पक्षिभेदः, मार्जारो वा, ("जाहको घोङ्कमार्जारखट्टाकारुष्किकासु च" इति मेदिनी)। पादसंवाहनासु—पदसेवासु, प्रतिपादकः,—प्रतिपत्तियुक्तः, सुखातिमानित्यर्थः; यद्वा,—प्रतिपादकः,—सम्पादकः, चरणमर्दनकारक इत्यर्थः। करतलताडनेषु—करप्रहारेषु, करतलविमर्दनेषु च, अङ्गसंवाहनकाले इष्टप्रार्थनाकाले वा इति भावः। कटुकः,—कटुरसद्रव्यभेदः इत्यर्थः; सहसा कटुद्रव्यसेवनेन व्यथितरसनः कोऽपि यथा 'कथमेतद्रोचते' 'किं लवणम्' इत्यादियुक्त्या खस्य मित्रादिदेशे करप्रहारं करोति, तद्वदङ्गसंवाहनादिकाले करप्रहारं करतलविमर्दनं वा करोति इति भावः।

(२२९) कोणाभिघातेषु—कोणेन—वक्रेण, प्रभुणा इति शेषः; वीणा-

वराकः सेवकोऽपि मर्त्यमध्ये, राजिलोऽपि वा भोगी, (३४०) पुलाकोऽपि वा कलमः, (३४१) वरं क्षणमपि क्लृप्ता मानवता मानवता,न मतो नमतः त्रैलोक्याधिराज्योपभोगोऽपि मनस्विनः। तदेवम् अभिनन्दितास्मदीयप्रणयो देवोऽपि, दिवसैः कतिपयैः एव परागतः प्राग्ज्योतिषेश्वर इति करोतु चेतसि" इत्युक्त्वा तूष्णीम् अभूत्, अचिराच्च नमस्कृत्य निर्जगाम।

राजाऽपि रजनीं तां (३४२)कुमारदर्शनौत्सुक्यस्वीकृतहृदयः समनैषीत्। (३४३) आत्मार्पणं हि महताम् अमूल्यमन्त्रमयं

वादनयष्टिविशेषेण च, ("कोणो वाद्यप्रभेदे स्यात् वीणादीनाञ्च वादने। एकदेशे यष्टादीनामग्रौ च लगुडेऽपि च॥" इति मेदिनी)। अभिधाताः,—ताडनानि तेषु, वीणादण्डः। एवम्भूतः वराकः,—दीन इत्यर्थः, सेवकः,—दासः, मर्त्यमध्ये—मनुष्यलोके, यदि गण्यते इति शेषः, तदा राजिलोऽपि—डुण्डुभोऽपि, निर्विषः सर्पविशेष इत्यर्थः, भोगी—फणी, सुखभोगवांश्च, ("भोगः सुखे स्त्र्यादिभुतावहेश्च फणकाययोः" इत्यमरः)।

(३४०) पुलाकः,—फलहीनः शालिः, तुच्छधान्यमित्यर्थः, ("स्यात् पुलाकः तुच्छधान्ये" इत्यमरः)। कलमः,—धान्यम्।

(३४१) मानवता—मानिना। क्षणमपि मानवता—मनुष्यत्वं, पौरुषमित्यर्थः, प्रभुत्वमिति भावः; क्लृप्ता, तदपि वरम्—मनाक्प्रियः; किन्तु मनस्विनः,—प्रशस्तमनसः, उदाराशयस्येति यावत्। नमतः,—दासत्वं कुर्वतः सतः इत्यर्थः। त्रैलोक्याधिराज्योपभोगः,—त्रिभुवनाधिपत्यमपि, न मतः,—न इष्टः। तदिति।—तत्—तस्मात्, जनान्तरसमीपे शिरोनमनस्य हेयत्वप्रतिपादकत्वादित्यर्थः। देवोऽपि—भवानपि, एवम्—इत्थं, मदुक्तप्रकारेणेत्यर्थः। अभिनन्दितेति।—अभिनन्दितः,—समर्थित इत्यर्थः, अस्मदीयः,—अस्माकमित्यर्थः, प्रणयः,—प्रार्थना येन तथाभूतः। परागतः,—उपस्थितः।

(३४२) कुमारेति।—कुमारस्य—प्राग्ज्योतिषेश्वरस्य, दर्शने—अवलोकने, दर्शनाय वा, यदौत्सुक्यं—कौतूहलं, तेन स्वीकृतम्—आक्रान्तम्, अधीनीकृतमित्यर्थः, हृदयं—चेतः यस्य तथाभूतः। समनैषीत्—अतिवाहयामासेत्यर्थः।

(३४३) आत्मार्पणं—स्वदेहसमर्पणम्। अमूल्यमन्त्रमयं—मूलमन्त्रः,—

वशीकरणम् । प्रभाते च प्रभूतं (३४४) प्रतिप्राभृतं प्रधानप्रतिदूताधिष्ठितं दृष्ट्वा हंसवेगं प्राहिणोत् । (३४५) आत्मनाऽपि ततः प्रभृति प्रयाणकैः अनवरतैः अभ्यमित्रं प्रावर्त्तत । कदाचित्तु राज्यवर्द्धनभुजबलोपार्जितम् (३४६) अशेषं मालवराजसाधनम् आदाय आगतं समीप एव आवासितं लेखहारकात् भण्डिम् अशृणोत् । श्रुत्वा च अभिनवीभूतभ्रातृशोकदुताशनः कातरहृदयो बभूव, मूर्च्छान्धकारमिव विवेश, अतिष्ठच्च समुत्सृष्टसकलव्यापारः (३४७) प्रतीहारनिवारणनिभृतनिःशब्दपरिजने निजमन्दिरे सराजकपरिवारः तदागमनम् उदीक्षमाणो मुहूर्त्तम् ।

प्रधानदैवमन्त्रः, तत्तद्देवतासाधनं बीजमन्त्र इत्यर्थः, तन्मयं—तत्स्वरूपं न भवतीत्यमूलमन्त्रमयं, विना एव मूलमन्त्रमित्यर्थः ; यद्वा,—मूलानि—शिफाः, ओषधय इति यावत्, मन्त्राश्च, तन्मयं न भवतीति तथाभूतं, मन्त्रौषधिविरहितमित्यर्थः, वशीकरणमन्त्रेण जना वशीक्रियन्ते, आत्मार्पणे तु तत्प्रयोजनं नास्ति इति भावः ।

(३४४) प्रतिप्राभृतं—प्रत्युपढौकनम् । प्रधानेन—श्रेष्ठेन, दूतेषु इति भावः ; प्रतिदूतेन—स्वप्रेष्यदूतेन इति यावत्, अधिष्ठितं—युक्तम् ; प्रधाने प्रतिदूते न्यस्तमिति भावः । प्राहिणोत्—प्रेरयामास ।

(३४५) आत्मनाऽपि—स्वयमपि । प्रयाणकैः,—यात्राभिः । अनवरतैः,—अविश्रान्तैः । अभ्यमित्रम्—अमित्रं—शत्रुम्, अभि—लक्ष्यीकृत्य, शत्रोरभिमुखमित्यर्थः ।

(३४६) अशेषं—प्रभूतमित्यर्थः । मालवराजसाधनं—मालवेन्द्रसैन्यम् । आवासितं—कृतनिवेशम् । लेखहारकात्—दूतात् । भण्डिं—हर्षस्य मातुलपुत्रम् । अभीति ।—अभिनवीभूतः,—प्रत्ययीभूतः, पुनः नूतनतां गत इत्यर्थः, यः भ्रातृशोकः,—राज्यवर्द्धनमृत्युजनितः खेद इत्यर्थः, स एव दुताशनः,—अनलः, दाहकत्वादिति भावः ; यस्य सः । समुत्सृष्टसकलव्यापारः,—त्यक्तसर्वक्रियः ।

(३४७) प्रतीहारेति ।—प्रतीहारस्य—द्वौवारिकस्य, निवारणेन—मा अत्र आगमनं कुरुतेति निषेधेन, निभृताः,—निस्तब्धाः, विनीता वा, विनीतवेशेनावस्थिता इत्यर्थः, ("निभृतविनीतप्रश्रिताः समाः" इत्यमरः) निःशब्दाः,—तूष्णीं (स्थिताः),

(३४८) अथ भण्डिः एकेन एव वाजिना कतिपयकुलपुत्रपरिवृतः, मलिनवासाः, रिपुशरशल्यपूरितेन निखातबहुलोहकीलकपरिकररचितस्फुटनेन इव हृदयेन (३४९) हृदयलग्नैः स्वामिसत्कृतैः इव श्मश्रुभिः मुखं समुपदर्शयन्, (३५०) दूरीकृतव्यायामश्लथिलभुजदण्ड-दोलायमानमङ्गलवलयैकश्रेणालङ्कृतिः, (३५१) अनादरोपयुक्तताम्बूलविरलरागेण

परिजनाः,—अनुजीविनः यत्र तथाभूतं। सराजकपरिवारः,—राज्ञा समूहः राजकं, तत् एव परिवारः,—परिजनः तेन सह वर्त्तमानः; यद्वा,—राजकस्य परिवारस्य ताभ्यां सह वर्त्तमानः। तद् गमनं—तस्य—भण्डेः, आगमनम्—उपस्थितिम्, उदीक्षमाणः,—प्रतीक्षमाणः।

(३४८) "अथ भण्डिः" इत्यादौ "राजद्वारमाजगाम" इति अग्रेण सम्बन्धः। तं विशिनष्टि, कतिपयेत्यादि। रिपुशरेति।—रिपूणां—शत्रूणां, शरशल्यैः,—बाणफलकैः, पूरितेन—व्याप्तेन; अत एव निखातेति।—निखातानां—ग्रोथितानां, बहूनां—प्रभूतानां, लोहकीलकानाम्—अयःशङ्कूनां, परिकरेण—आश्रयेण इति यावत्, सङ्घेन वा, समूहेनेत्यर्थः, कीलसमूहाश्रयेणेति यावत्, ("भवेत् परिकरः सङ्घे" इति मेदिनी) रचितं—निरन्धमिति यावत्, स्फुटनं—विदरणं, राज्यवर्द्धनव्यापारजनितशोकादिति भावः, यस्य तथाभूतेन इव, हृदयेन उपलक्षितः।

(३४९) हृदयलग्नैः,—हृदि स्थितैः, उरोलग्नितैश्च, स्वामिसत्कृतैरिव—प्रभुसत्कारैरिव, प्रभुं प्रति दर्शितसमादरैरिवेत्यर्थः, श्मश्रुभिः,—चिबुकजातरोमनिचयैः; मृतं प्रति समादरप्रदर्शनार्थं नखश्मश्र्वादिधारणस्यार्य्याचारत्वात् अकृतक्षौरैरिति भावः, मुखं—श्रीकं, समुपदर्शयन्—प्रकटयन्।

(३५०) दूरीकृतेति।—दूरीकृतेन—परित्यक्तेन, शोकादिति भावः, व्यायामेन—श्रमेण, प्राप्यङ्किकाञ्चालनविशेषेणेति यावत्, शिथिले—अकठिने शीर्णे वा इति भावः, भुजदण्डे—बाहुयष्टौ, दोलायमानं—संसजमानमिति यावत्, मङ्गलवलयमेव—मङ्गलार्थधृतं कटकमेव, एकश्रेणा—एकमात्रावशिष्टा, अलङ्कृतिः,—अलङ्कारः यस्य तथोक्तः; शोकादन्यत् सर्व्वमेव भूषणं परित्यक्तवान्, केवलं तदवयवमेव मङ्गलसूचकत्वात् न परित्यक्तवानिति भावः।

(३५१) अनादरेति।—अनादरम्—अयत्नं यथा तथा, उपयुक्तं—चर्व्वितं, यत् ताम्बूलं—पर्णं, तेन विरलः,—अल्पः, रागः,—रक्तवर्णता यस्य तेन।

(३५२) शोकदहनदह्यमानस्य हृदयस्य अङ्गारेण इव दीर्घनिश्वासवेगनिर्गतेन अधरेण म्रियता, (३५३) स्वामिविरहविधृतजीवितापराधवैलक्ष्यादिव बाष्पवारिपटलेन पटेन इव प्रावृतवदनः, विशङ्किव दुर्बलीभूतैः स्वाङ्गमपत्रपया अङ्गैः, (३५४) वमद्भिव च व्यर्थीभूतभुजोष्माणमायतैः निश्वसितैः, पातकीव, अपराधीव, द्रोहीव, मुषित इव, छलित इव, यूथपतिपतनविषण्ण इव वेगदण्डवारणः, सूर्यास्तमयनिःश्रीक इव कमलाकरः, दुर्व्याधननिधनदुर्मना इव द्रौणिः, अपहृतरत्न इव सागरो राजद्वारम् आजगाम । अवतीर्य्य च तुरङ्गमात् अव-

(३५२) अत एव दीर्घेति ।—दीर्घेण—महता, निश्वासवेगेन—नासामुखप्रवाहितवायुजवेन ; यद्वा,—दीर्घः निश्वासः तस्य वेगेन, निर्गतः,—निःसृतः, हृदयाभ्यन्तरादिति भावः, तेन । शोकदहनदह्यमानस्य—शोकानलभस्मीभूयमानस्य, हृदयस्य—मनसः, अङ्गारेणेव—अलातेनेव, म्रियता—शोषं गच्छता, अधरेण—रदनच्छदेन उपलक्षितः ।

(३५३) स्वामीति ।—स्वामिनः,—राज्यवर्द्धनस्य, विरहे—वियोगेऽपि, विधृतम्—अवलम्बितं, स्थितमित्यर्थः, यत् जीवितं—जीवनं, तदेव तेन वा योऽपराधः,—आगः, तेन यत् वैलक्ष्यं—लज्जा तस्मादिव । बाष्पवारिपटलेन—अश्रुसन्तानेन । पटेनेव—वस्त्रेणेव । प्रावृतवदनः,—आच्छादितमुखः । अपत्रपया—लज्जया ; राज्यवर्द्धनमरणेनापि स्थितिजनितयेति भावः ; दुर्बलीभूतैः,—क्षीणैः, अङ्गैः,—करचरणाद्यवयवैः, स्वाङ्गं—स्वगात्रं, निजदेहाभ्यन्तरमित्यर्थः, ("अङ्गं गात्रे प्रतीकोपायथोः पुं भूम्नि नौहृति" इति मेदिनी) विशङ्किव—ढौकमान इव ; राज्यवर्द्धनस्य अन्यायनिधनस्य प्रतीकारकरणासामर्थ्यादिति भावः ; अतिक्रम इति निष्कर्षः ।

(३५४) वमद्भिव—उद्गिरद्भिव । व्यर्थीभूतेति ।—व्यर्थीभूतः,—विफलतां गतः, राज्यवर्द्धनघातताथिनां दमनासामर्थ्यादिति भावः ; भुजयोः—बाह्वोः, उष्माणं—तेजः तम् । आयतैः,—दीर्घैः । द्रोहीव—अनिष्टचिन्तक इव, राज्ञः इति शेषः । मुषित इव—अपहृत इव, अवञ्चित इति भावः । छलित इव—प्रतारित इव, रिपुपक्षेणेति भावः ; पातकीव इत्यादि विशेषणम् अतीव मलिनाकारत्वादिति बोध्यम् । यूथेति ।

नतमुखो विवेश राजमन्दिरम्। दूरादेव च (३५५) विमुक्ताक्रन्दः पपात पादयोः।

अवनिपतिरपि दृष्ट्वा तम् उत्थाय, (३५६) विरलैः पदैः प्रत्युद्गम्य, उत्थाप्य च गाढम् उपगूह्य कण्ठे, करुणमतिचिरं रुरोद। शिथिलीभूतमन्युवेगश्च पुरैव पुनः आगत्य निजासने निषसाद। प्रथमप्रक्षालितमुखे च भर्तृदारौ मुखम् अक्षालयत्। समतिक्रान्ते च कियत्यपि काले भ्रातृमरणवृत्तान्तम् अप्राक्षीत्; अथ अकथयच्च यथावृत्तम् अखिलं भर्तृदारः। अथ नरपतिः तमुवाच,—"राज्यश्रीव्यतिकरः कः?" इति। स पुनः अवादीत्,—"देव! (३५७) देवभूयं गते देवे राज्यवर्धने, गुप्तनाम्ना च गृहीते कुशस्थले, देवी राज्यश्रीः परिभ्रश्य बन्धनात्

—यूथपतेः,—दलाधिपस्य, पतनेन—निधनेन, विषण्णः,—अप्रसन्नः। वेगदण्डवारणः,—वेगेन—रभसा, दण्डयति—भ्रमन् पातयतीति वेगदण्डः, स चासौ वारणः,—इभो चेति तथोक्तः। कमलाकरः,—पद्मसमूहः सरोवरो वा; पद्मषण्डोचादिति भावः। द्रौणिः,—द्रोणाचार्यसुतः अश्वत्थामा।

(३५५) विमुक्ताक्रन्दः,—वि—विशेषेण, मुक्तः,—कृत इत्यर्थः, उच्चैःकृत इति यावत्, आक्रन्दः,—क्रन्दनं येन तथाभूतः। पादयोः,—चरणयोः, हर्षस्थेति भावः।

(३५६) विरलैः,—स्वल्पैः, कतिपयैरित्यर्थः, पदैः, कतिपयपदानीत्यर्थः; यद्वा,—विरलैः,—पेलवैः, कोमलैरित्यर्थः, ("पेलवं विरलं तनु" इत्यमरः) पदैः,—निःशब्दपदसञ्चारैरित्यर्थः। उपगूह्य—आलिङ्ग्य। शिथिलीभूतमन्युवेगः,—स्खलीभूतशोकप्रसरः। पुरैव—पूर्ववत्, विरलैः पदैरित्यर्थः। यथावृत्तं—यथासङ्घटितं, यथावद्यत्तीतवृत्तान्तमित्यर्थः, अखिलं—समग्रम्। राज्यश्रीव्यतिकरः,—राज्यश्रिया वृत्तान्तः; यद्वा,—राज्यश्रिया व्यतिकरः,—व्यसनं, विपदित्यर्थः, ("अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदिनी)।

(३५७) देवभूयं—देवत्वं, गते—मृते इत्यर्थः। गुप्तनाम्ना—छद्मसंज्ञया, नामान्तरं गृहीत्वेत्यर्थः, कुशस्थले—कान्यकुब्जे, कारावद्धराज्यश्रियाधिष्ठिते देशे इत्यर्थः, गृहीते—प्राप्ते, सतीति शेषः। परिभ्रश्य—विच्याव्य, पलाय्येत्यर्थः। बन्धनात्

विन्ध्याटवीं सपरिवारा प्रविष्टा इति लोकतो वार्त्ताम् अशृणवम्। अन्वेष्टारस्तु तां प्रति प्रभूता: प्रहिता जना न अद्यापि निवर्त्तन्ते" इति। तच्च आकर्ण्य भूपति: अब्रवीत्,—"किमन्यै: (३५८) अनुपदिभि: ? यत्र सा, तत्र परित्यक्तान्यकृत्य: स्वयमहं यास्यामि। भवानपि कटकम् आदाय प्रवर्त्ततां गौड़ाभिमुखम्" इत्युक्त्वा च उत्थाय स्नानभुवम् अगात्। (३५९) कारितशोकश्मश्रुवपनकर्म्मणा च प्रतीहारभवनस्थितेन (३६०) शारीरकवसनकुसुमाङ्गरागालङ्कारप्रेषणप्रकटितप्रसादेन भण्डिना सार्द्धम् अभुक्त, निनाय च तेनैव सह वासरम्।

अथ अपरेद्यु: उषसि एव भण्डिर्भूपालम् उपसृत्य व्यज्ञापयत्,—"पश्यतु देव: श्रीराज्यवर्द्धनभुजबलार्ज्जितं (३६१) साधनं सपरिवर्हं मालवराजस्य" इति। नरपतिना स:,—"एवं क्रियताम्" इति अभ्यनुज्ञातो दर्शयाञ्चभूव; तद्यथा,—

—बध्यते संयम्यते अत्र इति बन्धनं—कारागार इत्यर्थ:, तस्मात्। विन्ध्याटवीं—विन्ध्यारण्यम्। अन्वेष्टार:,—अनुसन्धातार:। तां—राज्यश्रियम्। प्रहिता:,—प्रेरिता:।

(३५८) अनुपदिभि:,—अनुपदी—[अनुपदम् अन्वेष्टा इत्यर्थे अनुपदसर्व्वादीनि:] अन्वेषणकर्त्ता इत्यर्थ:, तै: ; अन्वेषणकारिभि:, अनुचरैरिति यावत्। सा—राज्यश्रीरित्यर्थ:। प्रवर्त्तता—गच्छतामित्यर्थ:।

(३५९) कारितेति।—कारितं—विधापितं, शौरकारेणेति शेष:, शोकश्मश्रुणा—शोकात् रचितकूर्चानामित्यर्थ:, वपनकर्म—क्षौरं यस्य तेन।

(३६०) शारीरकेति।—शारीरकं—शरीरसम्बन्धि, स्वल्पवहार्य्यमित्यर्थ:, वसनं—वस्त्रं, कुसुमं—पुष्पम्, अङ्गराग:,—अनुलेपनम्, अलङ्कार:,—आभरणं, तेषां प्रेषणेन—प्रेरणेन, प्रकटित:,—प्रदर्शित:, प्रसाद:,—अनुग्रह: यस्य यस्मै वा तेन।

(३६१) साधनं—हस्त्यश्वादुपकरणसम्भारम्। सपरिवर्हं—सपरिच्छदम् ; ("परिच्छदे तृणार्हेऽर्घे परिवर्होऽन्यवा: परे" इत्यमर:)।

(३६२)अनवरतगलितमदमदिराऽऽमोदमुखरमधुकरजूटजटिल-करटपट्टपङ्क्तिलग्नगण्डान् गण्डशैलान् इव जङ्गमान् गम्भीरगर्ज्जित-रवान् जलधरान् इव महीम् अवतीर्णान् (३६३) उत्फुल्ल-समच्छदवनामोदमुचः शरद्दिवसान् इव पुञ्जीभूतान अनेक-सहस्रसङ्ख्यान् करिणः, (३६४) चारुचामीकरचित्रचामर-मण्डलमनोहरांश्च हरिणरंहसो हरीन्, (३६५) बालाऽऽतप-विसरवर्षिणश्च किरणैः अनेकेन्द्रायुधोल्लसदृशदिशाम् अलङ्का-

(३६२) अनवरतेति।—अनवरतगलितस्य—निरन्तरस्रुतस्य, मदस्य—दान-वारिणः, मदिरः,—मत्तताजननः यः; यद्वा,—अनवरतगलितः मदः मदिरा इव—सुरेव, मत्तताजननादिति भावः, तस्या आमोदः,—सौरभ, तेन मुखरैः,—वाचालैः, झणत्कारवद्भिः इत्यर्थः, मधुकरजूटैः,—भृङ्गनिचयैः, जटिलाः,—युक्ताः, करटपट्टा इव—कुम्भफलकानि इव, पङ्क्तिलाः,—आर्द्राः, गण्डाः,—कपोलाः येषां तान्; यद्वा,—मुखरैः मधुकरजूटैः जटिलाः ये करटपट्टाः,—करिकपोलफलकानि, ("करटो गजगण्डे स्यात् कुसुम्भे निम्बजीविनि" इति मेदिनी) ते इव पङ्क्तिलाः,—स्निग्धाः, मधुकरजटिलत्वादिति भावः; गण्डाः,—चिह्नानि ("गण्डः स्यात् पुंसि खड्गिनि। ..... । चिह्नवीरकपोलेषु" इति मेदिनी) येषां तान्। गण्डशैलानिव—पर्व्वतविच्युतशृङ्गखण्डा इव, ("गण्डशैलास्तु च्युताः स्थूलोपला गिरेः" इत्यमरः), कृष्णवर्णमहाकायत्वादिति भावः, जङ्गमान्—पादचारिणः।

(३६३) उत्फुल्लेति।—उत्फुल्लानां—विकसितानां, समच्छदवनानां—सप्त-पर्णकाननानाम्, आमोदं—सौरभं, मुञ्चन्ति—व्यञ्जयन्तीति तथोक्तान्। शरद्दिवसान् —शरत्कालिकदिवसान्; तत्र उत्फुल्लसमच्छदवनानां मदगन्धतुल्यगन्धवत्त्वात् जल-धराणामपीव गर्ज्जनशीलत्वाच्चेति भावः।

(३६४) चारुभिरिति।—चारुभिः,—मनोज्ञैः, चामीकरैः,—काञ्चनैः, ("चामी-करं जातरूपं महारजतकाञ्चने" इत्यमरः) चित्राणि—रञ्जितानि, चामरमण्डलानि —बालव्यजनसमूहाः, तैः मनोहराः,—रम्याः तान्। हरिणरंहसः,—हरिणवेगान्, मृगवद्द्रुतगमनसमर्थानित्यर्थः, हरीन्—अश्वान्, ("हरिरिन्द्रार्कवातास्त्रयकमेक-मनुष्यादिषु" इति मेदिनी)।

(३६५) बालाऽऽतपेति।—बालाऽऽतपान्—अभिनवसूर्य्यांशूनां, विसरान्

राणां विशेषान्, (३६६) विस्मयजनतः स्मरोन्मादितमालवी-कुचपरिमलदुर्ललितांश्च (३६७) निजज्योत्स्नापूरप्लावित-दिगन्तान् अपि तारान् हारान्, उडुपतिपादसञ्चयशुचीनि निजयशांसि इव बालव्यजनानि, जातरूपमयनालञ्च निवासपुष्करीकमिव श्रियः श्वेतातपत्रम्, अप्सरस इव (३६८) बहुसमररससाहसानुरागावतीर्णा वारविलासिनीः, (३६९) सिंहासनशयनासन्दीप्रभृतीनि राज्योपकरणानि,

—निवहान्, वर्षन्ति—विकिरन्तीति तथोक्तानां, नवोदितसूर्यप्रभावत् प्रभाप्रालिना-मित्यर्थः। किरणैः,—प्रभाभिः। अनेकेति।—अनेकानि—बहूनि, इन्द्रायुधानि—शक्रधनूंषि यासु ताः, कृताः,—सम्पद्यमानाः, अनेकेन्द्रायुधीकृताः, दश दिशः,—कुकुभः यैः तथोक्तानां, बहूनामिन्द्रायुधानामिव दिग्व्यापिनाम् इत्यर्थः।

(३६६) विस्मयजनतः,—चमत्कारकान्। स्मरेति।—स्मरेण—कामेन, उन्मा-दिताः,—उन्मत्तीकृताः, या मालव्यः,—मालवाङ्गनाः, तासां कुचपरिमलेन—स्तन-विमर्दजगन्धेन, दुर्ललिताः,—आदरवतः तान्।

(३६७) निजेति।—निजेन—स्वकीयेन, ज्योत्स्नापूरेण—प्रभातिशयेनेति यावत्, प्लाविताः,—उद्भासिताः, दिगन्ताः,—दिशां प्रान्तभागाः, सुदूरवर्त्तिनोऽपीति भावः; यैः तान्, तारान्—नक्षत्रः। उडुपतीति।—उडुपतेः,—चन्द्रस्य, पादानां —किरणानां, सञ्चयाः,—समूहा इव, शुचीनि—धवलीकृतानि इत्यर्थः। जातरूप-मयनालं—सौवर्णदण्डमित्यर्थः। निवासपुष्करीकमिव—आवासश्वेतकमलमिव। श्रियः,—लक्ष्म्याः।

(३६८) बहुसमरेति।—बहुः,—प्रभूतः, समररसः,—सङ्ग्रामानुरागः, तथा साहसञ्च —बलपूर्वककार्य्यकरणं, पराक्रमप्रदर्शनमित्यर्थः, ("साहसन्तु बलात्कारकृतकार्य्ये दर्पेऽपि च" इति मेदिनी) समरे एवेति शेषः, वीराणामिति भावः; ताभ्याम्; यद्वा,—बहुसमररसेन प्रबलसङ्ग्रामानुरागेण, यत् साहसं—पराक्रमप्रदर्शनं तस्मात्, अनुरागेण—प्रीत्या, अवतीर्णाः,—लब्धजन्मानः।

(३६९) सिंहेति।—सिंहासन—सौवर्णनृपासनं, शयनं—पर्य्यङ्कः, आसन्दी —आसनविशेषः, खट्वाविशेषो वा, ("आसन्दी वासुदेवे स्यात् खट्वाभेदे च पीठिके" इति मेदिनी) एते प्रभृतयः शोभां तानि।

(३७०) कालायसनिगड़निश्चलीकृतचरणयुगलश्च सकलं मालवराजलोकम्, अशेषांश्च मसङ्ख्यालेख्यपत्रान् (३७१) सालङ्काराऽऽपीड़पीड़ान् कोषकलशान्। अथ आलोक्य तत्सर्वम् अवनिपालः (३७२) स्वीकर्त्तुं यथाऽधिकारम् आदिक्षत् अध्यक्षान्। अन्यस्मिन् च अहनि हयैः स्वसारम् अन्वेष्टुम् उच्चचाल विन्ध्याटवीम्, अवाप च परिमितैः एव प्रयाणकैः ताम्।

(३७३) अथ प्रविशन् दूरादेव दह्यमानषष्टिकबुसविसरविसारिविभावसूनां (३७४) वन्यधान्यबीजधानीनां धूमैः

(३७०) कालायसेति।—कालायसनिगड़ेन—कृष्णवर्णलौहशृङ्खलेन, निश्चलीकृतं—गतिहीनीकृतं, बद्धं भूतमिति यावत्, चरणयुगलं—पादद्वन्द्वं यस्य तथाभूतं, बन्दी भूतमिति यावत्। ससङ्ख्यालेख्यपत्रान्—सङ्ख्या—अव एतत्सङ्ख्याकानि धनानि सलोप्यं गणना, तया लेख्यपत्रं—लिपिरित्यर्थः, तेन सहिताः तान्।

(३७१) सालङ्कारेति।—अलङ्काराणाम्—आभरणानाम्, आपीड़ानां—शिरोभूषणविशेषाणां, पीड़ा—सङ्घः, तया सहिताः तान्; यद्वा,—अलङ्काराणाम् आपीड़ेन—घनसन्निवेशजनितातिपीड़नेन, पीड़ा—परस्परसङ्घर्षरूपा, तया सहिताः तान्। कोषकलशान्—धनपूर्णकुम्भान्।

(३७२) स्वीकर्त्तुं—ग्रहीतुम्, आत्मसात्कर्त्तुमिति यावत्। यथाऽधिकारम्—अधिकारानुसारेणेत्यर्थः, तत्तद्यं यदयमधिभागीयाध्यक्षाधिकारे तिष्ठति, तत्तदधिकारं विभज्य इति यावत्। अध्यक्षान्—सेनापतीन्, तत्तद्व्यरक्षकार्यां प्रधानपुरुषान् वा। स्वसारं—भगिनीम्। परिमितैः,—अल्पैः। प्रयाणकैः,—गमनैरित्यर्थः, अल्पदूरं गत्वेति यावत्। तां—विन्ध्याटवीम्।

(३७३) "अथ प्रविशन्" इत्यादौ "वनयामकं हृदयं" इत्यत्रैव सम्बन्धः; तं विशिनष्टि; दह्यमानेत्यादि।—दह्यमानेषु—भस्मीभूयमानेषु, षष्टिकबुसानां—धान्यविशेषकड़ङ्गराणां, धान्यविशेषस्य निःसारांशानामित्यर्थः, ("कड़ङ्गरो बुसं क्लीबे" इत्यमरः) विसरेषु—निचयेषु, विसारिषु,—प्रसारिषु, विभावसवः,—अग्नयः येषु तथोक्तानाम्।

(३७४) वन्येति।—वन्यानि—वनजातानि, यानि धान्यबीजानि—धान्यकणाङ्कुरकारणानि, तेषां धान्यानां,—स्थानानि, तत्तद्धान्यबीजरक्षणस्थानानि इत्यर्थः,

धूमरिमाणम् आदधानैः, शुष्कशाखासञ्चयरचितगोवाट-वेष्टितविकटवटैः, व्यापादितवत्सरूपकरोषरचितव्याघ्रयन्त्रैः, (२७५) यन्त्रितवनपालहठाक्रियमाणपरग्रामीणकाष्ठिक-कुठारैः, (२७६) गह्वनतरुषण्डनिर्म्मितचामुण्डामण्डपैः वनप्रदेशैः प्रकाशमानम्; (२७७) अटवीप्रायप्रान्त-तया कुटुम्बभरणाकुलैः, कुहालप्रायकृषिभिः, कृषीबलैः,

---

तमान्। धूमरिमाणं—धूमरत्वम्, आदधानैः,—गच्छद्भिः। शुष्केति।—शुष्कैः,—शोषं गच्छद्भिः, शाखासञ्चयैः,—विटपनिचयैः, रचितेन—कल्पितेन, गोवाटेन—गवां—पशूनां, हिंस्राणामिति भावः, ("स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रेषूक्षभूजले। खड्ग-इत्या स्त्रियां पुंसि गौः" इत्यमरः) वाटेन—हतिस्थानेन, तत्प्रवेशनिवारणार्थं हति-विशेषेण इत्यर्थः, ("वाटो मार्गे हतिस्थाने" इति मेदिनी) वेष्टिताः,—परिवृताः, विकटाः,—प्रकाण्डाः, वटाः,—वटवृक्षा येषु तथोक्तैः; वटवृक्षतलस्य विश्रामधामतया हिंस्रजन्तुपरिहारार्थं हतिरिति भावः। व्यापादितेति।—व्यापादितस्य—निहतस्य, व्याघ्रेण इति भावः; वत्सस्य—गोशावकस्य, रूपकम्—आकृतिः, तेन करणेन, पूर्ववृत्ते निहतवत्सभक्षणाय यद्यपि आगमिष्यति व्याघ्र इति धिया तस्मात्संरक्षितु-मृषादिनिर्म्मितप्रतिमूर्त्तिस्थापनेनेति भावः; रोषात्—व्याघ्रं प्रति कोपादित्यर्थः, रचितं—कल्पितं, व्याघ्रयन्त्रं—शार्दूलनिरोधोपायविशेषः, येषु तैः, व्याघ्रनिपातनायेति भावः।

(२७५) यन्त्रितेति।—यन्त्रितैः,—यन्त्रकुशलैः, वनपालैः,—काननरक्षकैः, कठिन—बलात्, सहसा वा, क्रियमाणैः,—आच्छिद्यमान इत्यर्थः, परग्रामीणस्य—ग्रामान्तरवासिनः, काष्ठिकस्य—काष्ठव्यवसायिनः, काष्ठापहरणार्थमागतस्य इति भावः; कुठारैः,—परशुः येषु तथोक्तैः।

(२७६) गह्वनेति।—गह्वने—निबिडे, तरुषण्डे—वृक्षाणां, वृन्दे—समूहे, तन्मध्ये इत्यर्थः, निर्म्मितं—रचितं, चामुण्डायाः,—कालिकायाः, मण्डपैः—गृह-विशेषैः, येषु तथाभूतैः, वनप्रदेशैः,—वनविभागैः, प्रकाशमानं—राजमानं, वन-दामोदरमिति प्रतीतिमुत्पादयन्तं वा।

(२७७) अटवीप्रायप्रान्ततया—अरण्यबहुलप्रान्तदेशत्वेन, कुटुम्बभरणाकुलैः, परिवारपोषणव्यग्रैः; अटवीबाहुल्येन अल्पक्षेत्राभावात् बलानीमुच्छ्रित्य अल्पक्षेत्रकृषि-

(३७८) अबलवद्भिः, उच्चभागभाषितेन भज्यमानभूरिशालिखलक्षेत्रखण्डलकम्; (३७९) अल्पावकाशैश्च, कापिलैः, कालायसैः इव कृष्णमृत्तिकाकठिनैः, (३८०) स्थानस्थानस्थापितस्थाणूत्थितस्थूलपल्लवैः, दुरुपगमश्यामाकप्ररूढिभिः, अलम्बुसबहुलैः, (३८१) अविरहितकोकिलाचञ्चुपैः, विरलविरलैः, केदारैः, कृच्छ्रकृष्यमाणैः, नातिप्रभूतप्रवृत्त-

णाय व्याप्तैरिति भावः। कुद्दालैति।—कुद्दालः,—मृखननास्त्रविशेषः, प्रायेण—बाहुल्येन, कृषिः,—कर्षणसाधनं येषां तथाभूतैः। कृषीवलैः,—कृषकसमूहैः।

(३७८) अबलवद्भिः,—सामान्यबलशालिभिरित्यर्थः। उच्चभागभाषितेन—उच्चः,—उन्नतः, भागः,—भाग्यं यत्र तथाभूतं, भाषितं—वचनं तेन, उन्नतभाग्यशालित्वसूचकेन वाक्येनेति यावत्, एतत्क्षेत्रोत्पन्नशस्यविक्रयेणाहं प्रभूतधनी भूत्वा विविधसुखमनुभविष्यामि इत्येवंरूपेण दैवं यद्यनुकूलं भवेत्, तदा एतत्क्षेत्रमेव मे प्रभूतधनं भविष्यतीत्येवंरूपेण वा इति भावः। भज्यमानेति।—भज्यमानानि—विभज्य गृह्यमाणानि इत्यर्थः, भूरिशालिखलक्षेत्राणां—प्रभूतधान्यरक्षणस्थानानां धान्यमर्दनस्थानानां वा, खण्डलकानि—शकलानि यस्य यत्र वा तम्।

(३७९) अल्पावकाशैः,—अल्पपरिसरैः, कापिलैः,—पिङ्गलवर्णैः, कालायसैरिव—कृष्णलौहनिर्मितैरिव, कृष्णमृत्तिकाकठिनैः,—कृष्णमृत्तिका—मृत्तिकविशेषः, तद्वत् कठिनाः,—कठोराः तैः; यद्वा,—कृष्णमृत्तिकया कठिनैः, कठोरकृष्णमृत्तिकाविशिष्टैरित्यर्थः।

(३८०) स्थानेति।—स्थानस्थानेषु—केषुचित् केषुचित् प्रदेशेषु, स्थापितेभ्यः,—रक्षितेभ्यः, धान्यच्छेदनकाले इति भावः, स्थाणुभ्यः,—शाखापल्लवहीनतरुभ्यः इत्यर्थः, उत्थिताः,—प्रकटाः, स्थूलाः,—पृथवः, पल्लवाः,—किसलया येषु तथाभूतैः। दुरुपगमेति।—दुरुपगमाः,—दुर्ज्ञेयाः, श्यामाकानां—घासविशेषाणां, प्ररूढयः,—अङ्कुराः येषु तथाभूतैः। अलम्बुसबहुलैः,—लज्जालुवृक्षाऽऽकीर्णैः; कुण्डिरीवृक्षप्रायैर्वा इत्यर्थः।

(३८१) अविरहितेति।—न विरहिताः,—शून्याः, कोकिलाचञ्चुपाः,—तदाख्यवृक्षशाखाग्रिमकिसलयभेदाः येषु तथोक्तैः। विरलविरलैः,—अल्पाल्पैः; अरण्यप्रायत्वात् अनतिबहुलैः इति भावः। कृच्छ्रकृष्यमाणैः,—काठिन्यात् कष्टेन कर्षणं नीयमानैः इत्यर्थः, केदारैः,—क्षेत्रैः। नातीति।—नातिप्रभूतं—नात्यधिकं यथा तथा,

गतागताप्रवृत्तभुवम्; (३८२) उपवेत्रमुपरचितैर्मञ्चैश्च सूच्यमानश्वापदोपद्रवम्; दिशि दिशि च (३८३) प्रतिमार्ग-द्रुमसङ्कतानां, पथिकपादप्रस्फोटनधूलिधूसरैः नवपल्लवैर्लाञ्छित-च्छायानाम्, (३८४) अटवीसुलभसालकुसुमस्तवकाञ्चितनव-खातकूपिकोपकण्ठप्रतिष्ठितनागस्फुटानाम्, (३८५) अच्छिद्र-कटकल्पितकुटीरकाणां, (३८६) कुटिलकोटवेणीदेश्य-

---

क्लक्लथमानत्वादिति भावः; प्रवृत्ताभ्यां—प्रारब्धाभ्यां, गतागताभ्यां—यानायाता-भ्याम्, अप्रवृता—नातिपुष्टा, नातिक्लृप्ता इत्यर्थः, भूः,—भूमिः यत्र तम्।

(३८२) उपवेत्रं—वेतसमीपे, [सामीप्येऽव्ययीभावः] यथा,—वेतसेषु उप-वेत्रमिति [विभक्त्यर्थेऽव्ययीभावः] उपरचितैः,—कल्पितैः, मञ्चैः,—"माचा" इति भाषाभाषया प्रसिद्धैः, ["उपरचितैर्मञ्चैश्च" इत्यत्र "उपरचितैरुच्चैर्मञ्चैश्च" इति पाठा-न्तरम्]। सूच्यमानेति।—सूच्यमानः,—अनुमीयमानः, श्वापदानां—हिंस्रजन्तूनां, श्वापदस्य—व्याघ्रस्य वा, उपद्रवः,—उत्पातः यत्र तम्।

(३८३) प्रतिमार्गेति।—प्रतिमार्गं—प्रतिपथं, द्रुमैः,—वृक्षैः, सङ्कतानां—रचितानाम्। पथिकेति।—पथिकानां—पान्थानां, पादप्रस्फोटनात्—चरणताडनात्, सर्वेभ्यश्चेपणादित्यर्थः, क्षिप्ता इति शेषः, या धूलयः,—पांशवः, ताभिः, तत्सङ्घ-र्षेण इति भावः, धूसराः,—ईषत्पाण्डुवर्णाः तैः। लाञ्छितेति।—लाञ्छिताः,—चिह्निताः, युक्ता इत्यर्थः, छाया—प्रतिबिम्बं यासां तथोक्तानाम्।

(३८४) अटवीति।—अटव्याम्—अरण्ये, सुलभाः,—सुप्रापाः, ये सालाः,—वृक्षविशेषाः, तेषां कुसुमस्तवकैः,—पुष्पगुच्छैः, अञ्चिताः,—शोभिता इत्यर्थः, तत्पुष्पगुच्छानां निजजलेषु पतनादिति भावः, नवखाता—नूतनखनिता, कूपिका—क्षुद्रकूप, तथा उपकण्ठे—अन्तिके, ("उपकण्ठान्तिकाभ्यर्णाभ्यर्ण" इत्यमरः) प्रति-ष्ठिताः,—प्रतिष्ठां गताः, ये नागस्फुटाः,—नागदन्तिकाः, प्रस्फुटितपुष्पनागवृक्षा वा, यत्र तासाम्।

(३८५) अच्छिद्रेति।—अच्छिद्र—छिद्ररहितं यथा तथा, कटैः,—शरक्षु-दृणविशेषैः, विरचितैर्वा,("कटः शीर्षे त्रयोः पुंसि त्रिषु क्षेत्रेऽतिशये शरे" इति मेदिनी) कल्पितानि—रचितानि, कुटीरकाणि—क्षुद्रगृहाणि यासां तासाम्।

(३८६) कुटिलेति।—कुटिला—वक्रगामिनी, या कोटवेणी—कोटदेशी,

मानशक्तुधारशरावश्रेणीश्रितानाम्, (३८७) अध्वगजनजग्धजम्बूफलास्थिशवलसमीपभुवाम्, उद्धूलितधूलीकदम्बस्तवकप्रकरपुलकिनीनां, (३८८) कण्टकितकर्करीचक्राक्रान्तकाष्ठमञ्चिकामुषितत्वषां, तिम्यत्तलशीतलसिकतिलकलशीग्रमितश्रमाणाम्, (३८९) आघ्यानशैवलश्यामलितालिञ्जर-

---

पिपीलिकापङ्क्तिरिति यावत्, तया वेष्यमाना:,—आकीर्ण्यमाणा:, शक्तुभि:,—भृष्टयवचूर्णै:, धारा:,—शवला:, शरावाणां—मृन्मयभाजनविशेषाणां, श्रेण्य:,—पङ्क्तय:, ताभि: श्रिता:,—युक्ता: तासाम्।

(३८७) अध्वगेति।—अध्वगै:,—पान्थै:, जनै:,—लोकै:, जग्धानां—खादितानां, जम्बूफलानां—जाम्बवफलानाम्, अस्थिभि:,—बीजै:, अष्टिभिरिति भाव:; शवला—चित्रा, समीपभू:,—निकटस्थभूमिर्यासां तथोक्तानाम्। उद्धूलितेति।—उद्धूलितै:,—उत्क्षिप्तपरागै:, धूलीकदम्बानां—नीपभेदानां, कदम्बविशेषाणामित्यर्थ:, ("धूलीकदम्बो नीपे स्यात् तिनिशे वरुणद्रुमे" इति मेदिनी) स्तवकप्रकरै:,—पुष्पगुच्छसमूहै:, पुलकिन्य:,—पुलकशालिन्य:, रोमाञ्चिता इव दृश्यमाना इति भाव:, तासाम्।

(३८८) कण्टकितेति।—कण्टकितानां—सञ्जातकण्टकानां, कर्करीणां—लताविशेषाणां, ["कर्करी" इत्यत्र "कर्कटी" "कर्कारु" इति वा पाठ: समाचीन:, कर्करीशब्दस्य लताविशेषवाचकत्वस्य कीर्त्यादावदर्शनात्; कर्कटी कर्कारु इति वा पाठे,—"कांकुड़" इति प्रसिद्ध: फलविशेष:, कुष्माण्डी वा इति बोध्यम्] चक्रै:,—मण्डलै:, आक्रान्ता:,—आहता:, या: काष्ठमञ्चिका:,—दारुनिर्मितमञ्चविशेषा:, ताभि:, तद्भञ्जनेनेत्यर्थ:, फलभक्षणाऽऽयासेति भाव:; मुषिता:,—हृता:, तृष्ण:,—तृष्णा: यासु तथाविधानाम्। तिम्यदिति।—तिम्यत्सु—आर्द्रेषु, तलेषु—अधोदेशेषु, शीतलाभि:,—हिमाभि:, सिकतिलाभि:,—बालुकामयीभि:, कलशीभि:,—घटै:, घटस्थानीयैरिति भाव:; श्रमित:,—अपनीत:, श्रम:,—सन्तापजाऽऽयास इत्यर्थ:, पान्थानामिति भाव:; यासु तथोक्तानाम्।

(३८९) आघ्यानेति।—आघ्यानै:,—दूषच्छुष्कै:, दूषद्वनीभुतैर्वा, निबिड़भावेनावस्थितैरित्यर्थ:, शैवलै:,—जलनीलीभि:, नियतजलसद्भावात् मार्जनाभावाच्च सञ्जातैरिति भाव:; श्यामलितेषु—श्यामलतां गतेषु, अलिञ्जरेषु—मणिकेषु, मृन्मय-

जायमानजलजड़िम्नाम्, (३८०) उदकुम्भाऽऽक्रष्टपाटलशर्करा-शकलग्रिग्धिरीकृतदिशां, (३८१) घटमुखघटितकटहारपाटल-पुष्पपुटानां, (३८२) शीकरपुलकितपल्लवपूलीपाल्यमानशीघ्र-सरसग्रिग्धसहकारफलजूटीजटिलस्थाणूनां, (३८३) विश्राम्यत्-कार्पटिकपेटकपरिपाटीपीयमानपयसाम्, अटवीप्रवेशप्रपाणां

जलाधारविशेषेषु इत्यर्थः, "जाला" इति वङ्गीयैराख्यातेषु, ("श्लिक्षरः स्यान्मधिकम्" इत्यमरः) जायमानः,—सम्पद्यमानः ; जलानां—सलिलानां, जड़िमा—शैत्यं यासु तथोक्तानाम् ।

(३८०) उदकुम्भेति ।—उदकुम्भेभ्यः,—जलघटेभ्यः, आक्रष्टानां—बहिरानीतानां, पाटलानां—श्वेतरक्तानां, शर्कराणां—कर्कराख्यबालुकानां, शकलैः—खण्डैः, जलसिक्तैः इति भावः, शिग्धिरीकृताः,—शीतलीकृताः, वायुना जलीयांशस्य इतस्ततो विक्षिप्यमाणत्वादिति भावः ; दिशः,—ककुभः यासु तथोक्तानाम् ।

(३८१) घटेति ।—घटानाम्—उदकुम्भानां, मुखेषु—आस्येषु, उपरिभागेषु इत्यर्थः, घटिताः,—रचिताः, कटहाराः,—तृणविशेषनिर्म्मितहाराः, पाटलं—श्वेतरक्तं, पुष्पपुटञ्च—कुसुमावरणञ्च ; यद्वा,—घटमुखे घटितकटहारे यत् पाटलपुष्पं—पाटलाख्यकुसुमविशेषः, "पारुल" इति वङ्गीयैराख्यातः, यद्यितमिति भावः ; तैः पुटः,—आच्छादनम्, अधिवासनार्थमिति भावः ; यासु तथोक्तानाम् ।

(३८२) शीकरेति ।—शीकरैः,—अम्बुकणैः, पुलकिता—सम्पुष्टा इति यावत्, या पल्लवपूली—किसलयसमूहः, तया पाल्यमानाः,—रक्ष्यमाणाः, आप्यायमाना इत्यर्थः, अत एव शीघ्रोऽपि—शीघ्रणधीग्योऽपि, सरसः,—अशुष्काः इत्यर्थः, परिपुष्ट इति यावत्, यः स्निग्धसहकारः,—आम्रतरुः, तस्य फलजूटीभिः,—फलसमूहैः, जटिलाः,—संयुक्ताः, स्थाणवः,—शाखापल्लवरहिततरवः इत्यर्थः, यासु तथोक्तानाम् ; यद्वा,—शीकरपुलकितपल्लवपूलीपाल्यमानाः अत एव शीघ्रोऽपि, शाखापल्लवादि-शून्यत्वेनावरणराहित्यादिति भावः ; सरसः, आम्रशाखाभिराच्छादनादिति भावः ; स्निग्धसहकारफलजूटीजटिलाः स्थाणवः यत्र तथोक्तानाम् ।

(३८३) विश्राम्यदिति ।—विश्राम्यद्भिः,—श्रमनयनुदद्भिः, कार्पटिकैः,—कर्पटेन—कषायवस्त्रेण, चरन्तीति तैः, तीर्थयात्रिकैरित्यर्थः, पेटकपरिपाटीभिः,—भाजनविशेषश्रेणीभिः ; यद्वा,—कार्पटिकपेटकैः,—तीर्थयात्रिकदण्डकैः, (पेटकः पुत्र-कादीनां मञ्जूषायां कदण्डके" इति मेदिनी) परिपाट्या—आनुपूर्व्या, अनुक्रमेणेत्यर्थः,

प्रैत्येन त्याजयन्तमिव प्रैष्मम् उष्माणम् ; (३९४) क्वचित् अन्यत्र याहयन्तमिव अङ्गारीयदारुसङ्घ-दाहिभिः व्योकारैः ; सर्व्वतश्च (३९५) प्रातिवेश्यविषय-वासिना, समासन्नग्रामगृहस्थापितस्थविरपरिपाल्यमानपाथेय-स्थगितेन, (३९६) कृतदारुणदारुव्यायामयोग्याङ्गाभ्यङ्गेन, (३९७) स्कन्धाध्यासितकठोरकुठारकण्ठलम्बमानप्रातराशपुटेन,

पीयमानं सलिलं—जलं यासां यत्र वा तथोक्तानाम्। अटवीप्रवेशप्रपाणाम्—अरण्य-प्रवेशे पानीयशालानाम् ; ("प्रपा पानीयशालिका" इत्यमरः)। प्रैष्मं—नैदाघम्, उष्माणम्—उत्तापम्।

(३९४) अङ्गारीयदारुसङ्घादिभिः,—अङ्गारेभ्यः,—अङ्गातेभ्यः हितानि अङ्गारीयाणि—अङ्गारोपयोगीनि, दारूणि—काष्ठानि, तेषां संघैः,—सञ्चयैः, राशिरित्यर्थः, तं दहन्ति—भस्मीकुर्व्वन्तीति तथाभूतैः, व्योकारैः,—लौहकारैः, कर्म्म-कारैः इत्यर्थः, ("व्योकारो लौहकारकः" इत्यमरः), अन्यत्र क्वचित् याहयन्तमिव—सङ्ग्रामयन्तमिव ; उष्माणमिति पूर्वेणान्वयः।

(३९५) प्रातिवेश्येति।—प्रातिवेश्यैः,—प्रतिवेशी, विषयवासी—जनपदवासी तेन ; यद्वा,—प्रातिवेश्यैः,—प्रतिवेशस्य—प्रतिवेशिनः अयं, प्रतिवेशिसम्बन्धीत्यर्थः, विषयैः,—आश्रयैः, ("विषय आश्रये" इत्यमरः) तत्र वसति—तिष्ठतीति तेन ; यद्वा, —प्रातिवेश्यैः,—गृहसमीपवर्त्ती यो विषयः,—देशः, स्थानमित्यर्थः, ("विषयो गोचरे देशे तथा जनपदेऽपि च" इति मेदिनी) तद्वासिना। समासन्नेति।—समासन्ने—सन्निहिते, ग्रामे—आवसथे, यत् गृहं—भवनं, तत्र स्थापितेन—रचितेन, स्थविरेण —वृद्धेन, परिपाल्यमानं—रक्ष्यमाणं, यत् पाथेयं—सम्बलं, तेन स्थगितैः,—पाथेयाः; अधिगमात् गमनात् निवृत्त इत्यर्थः, तेन।

(३९६) कृतेति।—कृतैः,—विहितैः, दारुणस्य—कठिनस्य, दारुव्यायामस्य —काष्ठव्यवसायस्य, योग्यैः,—अनुरूपैः, अङ्गैः अङ्गैः,—शरीरे तैलमर्दनविशेषैः यैः तथोक्तेन ; अभ्यङ्गलक्षणमुक्तं यथा,—"मूर्द्ध्नि त्वक्षि यदा तैलं भवेत् सर्वाङ्गसङ्गतम्। श्रोतोभिलषंश्चेद्वाऽभ्यङ्गः स उदाहृतः" ॥ इति।

(३९७) स्कन्धेति।—स्कन्धे—अंसदेशे, अध्यासितस्य—स्थापितस्य, कठोरस्य —तीक्ष्णस्य इति यावत्, कुठारस्य—परशोः, कण्ठे—अग्रभागे इत्यर्थः, लम्बमानं —तिष्ठदित्यर्थः, प्रातराशपुटं—प्रातर्भोजनपात्रं यस्य तथाभूतेन।

(३९८) पाटच्चरप्रत्यवायप्रतिपन्नपटच्चरेण, कालवेत्रक-त्रिगुणव्रततिवलयपाशग्रथितग्रीवाग्रथितैः पत्रवीटाहृतमुखैः पीतकूटैः ऊढवारिणा, (३९९) पुरःसरबलद्बलीवर्दयुग-सरेण, नैकटिककुटुम्बिकलोकेन, काष्ठसङ्कट्टार्थम् अटवीं प्रविशता, (४००) श्वापदव्यधनव्यवधानबहलीसमारोपित-कुटीकृतकूटपाशैश्च, (४०१) गृहीतमृगतन्तुतन्त्रीजालवलय-

(३९८) पाटच्चरेति ।—पाटच्चरः,—चौरः, ("चौरैकागारिकस्तेन··· । ··· पाटच्चरमलिम्लुचाः" इत्यमरः) स एव प्रत्यवायः,—अन्तरायः तेन हेतुना, प्रतिपन्नं—गृहीतं, परिहितमित्यर्थः, पटच्चरं—जीर्णवस्त्रं येन तथोक्तेन, ("पटच्चरं जीर्णवस्त्रम्" इत्यमरः) दस्युतस्करादिभिः परिहितनूतनवस्त्रस्य बलपूर्व्वकापहरणभयात् इति भावः । कालेति ।—कालवेत्रकस्य—क्रमुकवेतसस्य, त्रिगुणं—त्रिवाहत्तं, व्रततिवलयं—लतामण्डलमेव, पाशः,—रज्जुः ; यद्वा,—त्रिगुणः व्रततिवलयपाशः,—लतामण्डल-रचितरज्जुः, तेन ग्रथितया—वेष्टितया, ग्रीवया—कण्ठेन, ग्रथितैः,—विधृतैः, संयुक्तैरित्यर्थः, तादृशग्रीवाबद्धिरिति यावत् । पत्रेति ।—पत्रवीटया—पत्रसंकरेण, आहृतम् —आच्छादितं, मुखम्—अग्रभाग इत्यर्थः, येषां तथोक्तैः, पीतकूटैः,—पानपात्र-विशेषैः, ऊढवारिणा—सङ्गृहीतसलिलेन ।

(३९९) पुरःसरेति ।—पुरःसरम्—अग्रेसरं यथा तथा, बलत्—चलत्, बलीवर्दयुगसरः,—वृषभयुगलं यस्य तेन । ["पुरःसरबलद्बलीवर्द—" इत्यत्र "पुरः-सरबलबद्बलीवर्द—" इति पाठस्तु समीचीनतया प्रतिभाति ; तथाहि पुरःसरः,—अग्रे गच्छन् बलवान्—सबलः, बलीवर्दयुगसरः यस्य तेन] । नैकटिककुटुम्बिकलोकेन —सन्निहितगृहस्थलोकेन, "उपेतम्" इत्यग्रेणान्वयः । एवमुत्तरत्रापि तृतीयान्त-विशेष्यपदेन सहेति बोद्धव्यम् ।

(४००) श्वापदेति ।—श्वापदानां—व्याघ्रादिहिंस्रजन्तूनां, व्यधनाय—वेधनाय, व्यवधाने—अन्तराले, या बहली—निर्मितं स्थानं, तत्र समारोपिता—रचितेत्यर्थः, या कुटी—क्षुद्रं तृणनिर्म्मितं गृहं, तत्र कृताः,—स्थापिताः, कूटपाशाः,—कूटरज्जवः यन्त्रवागुरा वा, यैः तथाभूतैः ।

(४०१) गृहीतेति ।—गृहीताः,—धृताः, मृगतन्तवः,—मृगाणां बन्धनानि इति यावत्, ते एव तन्त्रीजालानि—रज्जुसमूहाः, तेषां वलयैः,—मण्डलैः, कलितेति

वागुरैः, वर्हिव्याधैः विचरद्भिः; अंसावसक्तवीतंसव्यालम्बमानबालपाशिकैश्च, (४०२) सङ्गृहीतग्राहकक्रकरकपिञ्जलादिपञ्जरकैः शाकुनिकैः सञ्चरद्भिः, (४०३) च्युतलालासकलेशश्लिष्यल्लतावधूलट्टालम्पटानाञ्च पेटकैः पाशकशिशूनाम् अटद्भिः, (४०४) दृप्तस्तम्बान्तरिततित्तिरितरलायमानकौलेयककुलचाटुकारैश्च विहगमृगयां मृगयुयुवभिः

भावः, वागुरा—पाशः यैः तथाभूतैः, मृगान्तनिर्मितपाशधारिभिरित्यर्थः, व्याधैः, —लुब्धकैः, वर्हिः विचरद्भिः,—सञ्चरद्भिः। अंसेति।—अंसेषु—स्कन्धदेशेषु, अवसक्ताः,—संसक्ताः, वीतंसाः,—मृगपक्षिणां बन्धनसाधनानि उपकरणानि, ("वीतंसमुपकरणं बन्धने मृगपक्षिणाम्" इत्यमरः) "सातनला" इति वङ्गभाषया ख्याताः, व्यालम्बमाना—दोलायमाना इत्यर्थः, बालपाशिका—क्षुद्ररज्जुश्च येषां ते; यद्वा,—अंसावसक्तवीतंसेषु व्यालम्बमाना—सम्भ्रमतीत्यर्थः, बालपाशिका येषां ते।

(४०२) सङ्गृहीतेति।—सङ्गृहीतानि—धृतानीत्यर्थः, ग्राहकाणां—घातिविहगानां, श्येनानामित्यर्थः, ("ग्राहको घातिविहगे व्यालानाञ्च ग्रहीतरि" इति मेदिनी) क्रकराणां—क्रकणानां, "कयेर" इत्याख्यपक्षिणां, ("क्रकणक्रकरौ समौ" इत्यमरः) कपिञ्जलादीनाञ्च—गौरतित्तिरीणां चातकानां वा, पञ्जरकाणि—पिञ्जराणि यैः तथाभूतैः, शाकुनिकैः,—पक्षिव्याधैः, पक्षिलुब्धैः इत्यर्थः।

(४०३) च्युतेति।—च्युतलालासकाः,—विलासशून्या इत्यर्थः, निस्यन्दा इति यावत्, तथा लेशेन—लवेन, लालासकलवेनेति यावत्; कदाचित् वायुवशादिति भावः; श्लिष्टाः,—संसृष्टाः, लताः,—वीरुधः, एव वध्याः,—नार्यः, तासु या लट्टाः, —पक्षिभेदाः, वाग्यचटका इति यावत्, ("लट्टा करञ्जभेदे स्यात् फल्गौ वाद्ये खगान्तरे" इति मेदिनी) तासु लम्पटाः,—लुब्धाः तेषां, पाशकशिशूनां—व्याधबालकानां, पेटकैः,—समूहैश्च। अटद्भिः,—भ्रमद्भिः।

(४०४) दृप्तेति।—दृप्तानाम्—अर्जुनानां, स्तम्बेषु—गुच्छेषु, अन्तरिताः,—निभृतस्थिताः, ये तित्तिरयः,—तदाख्यपक्षिभेदाः, तेषु तरलायमानानां—लोलुपानां, कौलेयकानां—सारमेयाणां, कुक्कुराणामित्यर्थः, ("कौलेयकः सारमेये कुलीने" इति मेदिनी) यत् कुलं—समूहः, तस्य चाटुकारैः,—सेवकैरिति यावत्, तत्सदृशैः

क्रीड़द्भिः, (४०५) परिणतचक्रवाककण्ठकषायरुचां शीधव्यानां वल्कलानां कलापान्, नातिचिरोद्धृतानाञ्च धातुत्विषां धातकीकुसुमानां गोणीः अगणिताः, (४०६) पिचव्यानां चातसीगणपट्टमूलकानां पुष्कलान् सम्भारान्, भारांश्च मधुनो माक्षिकस्य, मयूराङ्गजस्य, अक्लिष्टमधूच्छिष्टचक्रवालानां, (४०७) लम्बमानलामज्जकजूटजटानाम्, अपत्वचां खदिर-

रिति भावः। विहगमृगयां—पक्षिषु आखेटं, क्रीड़द्भिः,—खेलद्भिः, कुर्वद्भिरित्यर्थः। मृगयुयुवभिः,—तरुणैः व्याधैः।

(४०५) परिणतेति।—परिणतः,—स्थविरः, यः चक्रवाकः,—रथाङ्गनामपक्षिभेदः, तस्य कण्ठः,—गलदेशः, तद्वत् कषाया—पीतरक्ता, लोहिता वा, ("कषायो रसभेदेऽपि··· । ···सुरभौ लोहिते त्रिषु ॥" इति मेदिनी) रुक्—प्रभा येषां तथोक्तानां, शीधव्यानां—शीधुसंज्ञकसुरानिर्म्माणोपयोगिनाम्, ऐक्षवाणामित्यर्थः, वल्कलानां—त्वचां, कलापान्—सङ्घान्। नातिचिरोद्धृतानाम्—अनतिचिरोच्छ्रितानां, धातुत्विषां—गैरिकवर्णाभां, ("धातुर्मनःशिलाद्यैर्गैरिकन्तु विशेषतः" इत्यमरः) धातकीकुसुमानां—धातपुष्पिकाख्यपुष्पाणां, "धाइफुल" इति बङ्गीयैराख्यातानामित्यर्थः, अगणिताः,—असङ्ख्याताः, गोणीः,—गुणनिर्म्मितभाजनविशेषान्।

(४०६) पिचव्यानां—पिचुः,—तूलं, तदुपयोगिनाम् ; कार्पासानामिति भावः। अतसीति।—अतसीगणाः,—अतसीभेदाः, पट्टाः,—वसनभेदाः, मूलकानि—ओषधिभेदाः तेषाम् ; यद्वा,—अतसीगणानां—क्षौमवस्त्रोपयोगिनां क्षुमासमूहानामित्यर्थः, पट्टानां—कौषेयाणां, कौषेयवसनोपयोगिनामित्यर्थः ; मूलकानि—मूलानि, बीजानि इत्यर्थः, तेषां, पुष्कलान्—प्रभूतान्, सम्भारान्—निचयान्। माक्षिकस्य—मक्षिकाविशेषकृतस्य, मधुनः,—क्षौद्रस्य इत्यर्थः, भारान्—समूहान्। मयूराङ्गजस्य—शिखिपिच्छस्य। अक्लिष्टेति।—अक्लिष्टानाम्—अक्षुण्णानां, मधूच्छिष्टानां—सिक्थकानां, "मोम" इति बङ्गे प्रसिद्धानामित्यर्थः, चक्रवालानि—समूहाः तेषाम्। ["मधूच्छिष्टचक्रवालानाम्" इत्यत्र "मधूच्छिष्टचक्रमालानाम्" इति पाठे,—मधूच्छिष्टचक्राणां—"मौमाछिर चाक" इति प्रसिद्धानां मधुमक्षिकाणाः आवासभूतानां सिक्थकबीजानां, मालाः,—श्रेण्यः तासाम्]।

(४०७) लम्बमानेति।—लम्बमानानां—दीर्घाणामित्यर्थः, लम्बमानाः,—

काष्ठानां, कुष्ठस्य, (४०८) कठोरकेशरिसटाभारबभ्रुणश्च रौद्रस्य भूयसो भारकान् लोकेन आदाय व्रजता; (४०९) प्रविचितविविधवनफलपूरितपेटकमस्तकाभिश्च, अभ्यर्णग्रामगल्वरीभिः, त्वरमाणाभिः, विक्रयचिन्ताव्यग्राभिः, ग्रामयिकाभिः व्याप्तदिगन्तरम्; इतस्ततश्च (४१०) युक्तशूरशक्वरशाक्वराणां, पुराणपांसूत्किरकरीषकूटवाहिनीनां,

दीर्घा इत्यर्थो वा, लामज्जकानाम्—उशीराणाम्, ("उशीरमस्त्रियाम्। ...। लामज्जकं लघुलयम्" इत्यमरः) जुटस्य—समूहस्य, जटाः,—मूलानि, ("मूले लग्नकचे जटा" इत्यमरः) तासाम्। अपत्वचा—त्वक्गुणानां, खादिरकाष्ठानां—खदिरदारुणाम्। कुष्ठस्य—औषधिविशेषस्य।

(४०८) कठोरेति।—कठोरः,—प्रबलः, परिणत इत्यर्थः, यः केशरी—सिंहः, तस्य सटाभारः,—जटासमूहः, तद्वत् बभ्रु—कापिलं, पिङ्गलमिति यावत्, ("विपुले नकुले विष्णौ बभ्रुनां पिङ्गले त्रिषु" इत्यमरः) तस्य, रौद्रस्य—रौद्रतरुवल्कलस्य इत्यर्थः। भूयसः,—अतिप्रभूतान्, भारकान्—भारा एव भारकाः तान्। व्रजता—गच्छता, लोकेन—जनेन।

(४०९) प्रविचितेति।—प्रविचितानि—उच्चितानि, विविधानि—नानाप्रकाराणि, वनफलानि—अरण्यजातहरीतक्यादीनि, तैः पूरितः,—पूर्णः, पेटकः,—भाजनविशेषः, मञ्जूषा इत्यर्थः, ["पिटकः पेटकः पेढा मञ्जूषा" इत्यमरः। "—पेटक—" इत्यत्र "—पिटक—" इति पाठेऽपि स एवार्थः] मस्तके—शिरसि याभां ताभिः। अभ्यर्णग्रामगल्वरीभिः,—सन्निकृष्टग्रामगामिनीभिः, त्वरमाणाभिः,—त्वरितगतिभिः। विक्रयेति।—विक्रयस्य—विपणस्य, ("विपणो विक्रयः" इत्यमरः) चिन्तया—भावनया, चिन्तायां वा, व्यग्राभिः,—व्याकुलाभिः, कथं केन प्रकारेण वा एतानि द्रव्याणि विक्रेष्यामीति चिन्तां कुर्वतीभिरित्यर्थः, ग्रामयिकाभिः,—ग्रामवासिनीभिः। व्याप्तदिगन्तरम्—आपूरितदिग्भागमित्यर्थः।

(४१०) युक्तेति।—युक्ताः,—बद्धा इत्यर्थः, शूराः,—बलवन्तः, शक्कराः,—तरुणाः, शाक्वराः,—बलीवर्दाः यासु तासाम्। पुराणेति।—पुराणाः,—पुरातनाः, पांसून्—रजांसि, उत्किरन्ति—उत्क्षिपन्तीति तथोक्ताः, रजोभिः आश्लिष्टा इति यावत्, ये करीषाः,—शुष्कगोमयानि, ("गोविड् गोमयमस्त्रियाम्। तत्तु शुष्कं करीषोऽस्त्री" इत्यमरः) तेषां कूटान्—राशीन्, वहन्ति—नयन्तीति तथोक्तानाम्।

(४११) धूर्गतधूलिधूसरसैरिभसरोषखरसार्थ्यमाणानां, सङ्क्रीडचटुलचक्रचीत्कारिणीनां, प्रकटश्रेणीनां सम्पातैः (४१२) सम्पाद्यमानदुर्बलोर्वीविरूक्षक्षेत्रसंस्कारम् ; (४१३) आरब्धिमदान्तवाहकदण्डोड्डीयमानहरिणप्लुतलङ्घितनुङ्गवैणवप्रतिभिश्च, (४१४) निखातगौरकरङ्कमङ्कुप्रङ्खितशशकशकलितनुङ्गशृङ्गैः, प्रयत्नप्रभृतविशङ्कटविटपैः,

(४११) धूर्गतेति ।—धूर्गतः,—धुरं—भारं, गतः,—प्राप्तः, भारवहने नियुक्त इत्यर्थः, धूलिभिः,—मार्गरजोभिः, धूसरः,—आपाण्डुरः, यः सैरिभः,—महिषः, ("लुलायो महिषो वाहो दिषत्कासरसैरिभाः" इत्यमरः) तेन सरोषेण—सक्रोधेन, खरेण—गम्भीररवविशेषेण, सार्थ्यमाणाः,—सञ्चाल्यमानाः तासाम् । सङ्क्रीडितेति । —सङ्क्रीडतां—कूजतां, चटुलानां—चञ्चलानां, घूर्णमानानामित्यर्थः, चक्राणां—रथाङ्गानां, चीत्कारः,—शब्दविशेषः, तद्वतीनाम् । सम्पातैः,—सञ्चारैः ।

(४१२) सम्पाद्यमानेति ।—सम्पाद्यमानः,—क्रियमाणः, दुर्बलः,—सामान्य इति भावः, उर्व्याः,—पृथिव्याः, विरूक्षाणां—विशेषेण रूक्षाणां, कर्कशानामित्यर्थः, परुषाणाम् इति यावत्, क्षेत्राणां—केदाराणां, संस्कारः,—कर्शीकरणं, कर्षणमिति भावः, यत्र तथोक्तम् ।

(४१३) आरब्धेति ।—आरब्धाय—रब्धाय, क्षेत्रस्खलनायेति भावः ; यद्वा, —आरब्धैः,—रब्धकैः, क्षिप्तैः,—प्रेरितैः, दान्तैः,—दमनयोग्यैः, ये वाहकदण्डाः,—द्विरदकलभाः, ताडनयष्टय इत्यर्थः, तैः उड्डीयमानैः,—उच्चैः पलायमाना इत्यर्थः, ये हरिणाः,—मृगाः, तैः हरिणैः—प्लवायनेन, लङ्घिता—आक्रम्य गता, तुङ्गा—उन्नता, वैणवी—वेणुसम्बन्धिनी, वंशनिर्मितेत्यर्थः, इति,—वेष्टनं, प्रान्तरक्षप्राचीरमित्यर्थः, ("प्राचीरं प्रान्तरक्षा इतिः" इत्यमरः) येषां तैः ।

(४१४) निखातेति ।—निखातैः,—निहितैः, प्रत्यभिघातकप्राप्तित्रासनार्थं भूमिनिखातदण्डोपरिस्थापितैरिति भावः ; गौरैः,—शुक्लैः, करङ्कैः,—कङ्कालैः, मस्तकास्थिभिरित्यर्थः, शिरःस्थखर्परैरिति यावत्, ("करङ्को मस्तकाम्रस्थनारिकेलफलास्थनि" इति मेदिनी) शङ्कुभिः,—कीलैः, करङ्कोपलक्षितैरिति भावः, प्रङ्खिताः,—भीताः, शशकाः,—शशभेदाः, "खरगोश" इति बङ्गे प्रसिद्धाः, तैः शकलिताः,—खण्डिताः, तुङ्गाः,—उन्नताः, शृङ्गाः,—अग्रभागाः, अविकसितपत्राणि वा, येषां तैः । प्रयत्नेति ।—प्रयत्नेन—प्रकृष्टादरेणेत्यर्थः, प्रभृताः,—पोषिताः, विशङ्कटाः,—विशालाः,

वाटैः ऐच्चवैः बहुभिः श्यामायमानोपकण्ठम्; (४१५) अतिविप्रकृष्टान्तरैः, मरकतस्निग्धस्रुहावाटवेष्टितैः, कार्मुककर्म्मण्यवंशविटपसङ्कटैः, (४१६) कण्टकितकरञ्जराजिदुष्प्रवेशैः, (४१७) उरुवूकवचावङ्कसुरसशूरणशिग्रुग्रन्थिपर्णगवेधुकागर्मुद्गुल्मगहन-गट्टवाटिकैः, (४१८) निखातोच्छ-

---

विस्तीर्णाः इत्यर्थः, ("विशङ्कटं पृथु बृहत् विशालं पृथुलं महत्" इत्यमरः) विटपाः,—शाखा येषु तैः। ऐच्चवैः,—इक्षुसम्बन्धिभिः, बहुभिः,—अनेकैः, वाटैः,—वृतिस्थानैः, ("वाटो मार्गे वृतिस्थाने" इत्यमरः)। श्यामायमानेति।—श्यामायमानं—नीलायमानम्, उपकण्ठं—सन्निकर्षः, समीपवर्त्तिप्रदेशः इत्यर्थः, यस्य तथोक्तम्।

(४१५) अतीति।—अति—अतिशयेन, विप्रकृष्टं—दूरम्, अन्तरम्—अवकाशः येषां तैः। मरकतेति।—मरकतवत्—हरिद्वर्णमणिविशेषवत्, स्निग्धैः,—मसृणैः, स्रुहावाटैः,—सुधाहचहतिभिः, वेष्टितानि—परिवृतानि तैः। कार्मुकेति।—कार्मुकं—धनुः, तस्य कर्म्मण्यानां—कर्म्मणि हितानां, धनुर्निर्म्माणोपयोगिनामित्यर्थः, वंशानां—वेणुदण्डानां, विटपैः,—शाखाभिः, सङ्कटानि—आकीर्णानि सम्बाधानि वा, दुष्प्रवेशानि इत्यर्थः, ("सङ्कटं ना तु सम्बाधः" इत्यमरः) तैः।

(४१६) कण्टकितेति।—कण्टकितानां—सञ्जातकण्टकानां, करञ्जानां—नक्तमालाख्यलतानां, राजिभिः,—पङ्क्तिभिः, दुष्प्रवेशानि—प्रवेष्टुमशक्यानि तैः।

(४१७) उरुवूकेति।—उरुवूकः,—एरण्डः, "एरण्ड उरुवूकश्च रुवूकर्षिलकश्च सः" इत्यमरः) वचा—उग्रगन्धा, ("वचोग्रगन्धा···गोलोमी" इत्यमरः) वल्कः,—हरितकविशेषः, वल्कपुष्पवचो वा, सुरसः,—भूतघ्नः, ("सुरसा तुलसीद्वः स्यादलसो बहुमञ्जरी। अपेतराक्षसो गौरो भूतघ्नी देवदुन्दुभिः॥" इति कोषः); यद्वा,—सुरसं—पर्णासः, तुलसीत्यर्थः, ("सुरसन्तु विषु स्वादौ पर्णासे तु नपुंसकम्" इति मेदिनी) सूरणः,—कन्दविशेषः, "ओल्" इति बङ्गभाषया प्रसिद्धः, शिग्रुः,—श्लीभाञ्जनः, ("श्लीभाञ्जनः क्षुण्णगन्धा सुखभञ्जोऽथ शिग्रुकः" इति कोषः) ग्रन्थिपर्णः,—सुगन्धाऽऽकारः सुगन्धिः ओषधिभेदः, ("ग्रन्थिपर्णे युकं वर्हिपुष्पं स्त्रीणेयकुकुरे" इति अमरः)। गवेधुका—तृणधान्यभेदः, "गड़गछे" इति बङ्गे प्रसिद्धः, गर्मुद्—लताविशेषः, मदनाख्यक्षुपभेदो वा, गुल्माः,—प्रकाण्डरहिततृणलताः, तैः गहना—सान्द्रा, दुष्प्रवेशा इत्यर्थः, गट्टवाटिका—उद्यानं येषां तैः।

(४१८) निखातेति।—निखातेषु—निर्खनितेषु, प्रोथितेषु इत्यर्थः, उच्चेषु—

काष्ठारोपितकाष्ठालुकलताप्रतानविहितच्छायैः, (४१९) परिमण्डलबदरीमण्डपकतलनिखातखादिरकीलबद्धवत्सरूपैः, कथमपि (४२०) कुक्कुटरटितानुमीयमानसन्निवेशैः, अङ्गनाग्रन्थिस्तम्भतलविरचितक्षिप्रपूपिकावापिकैः, (४२१) विकीर्णबदरपाटलपटलैः, (४२२) वेणुपोटदलनलशरमयवृत्तविहित-

---

च्छन्नेषु, काष्ठेषु—दारुषु, आरोपिताः,—उत्थापिताः, याः काष्ठालुकलताः,—अलाबुलताः, स्वनामप्रसिद्धकन्दविशेषाणां वल्लयः वा, तासां प्रतानैः,—शाखाप्रशाखाभिः, विहिताः,—कृताः, छाया येषां तैः।

(४१९) परिमण्डलेति।—परिमण्डलं—समन्तात् गोलं, यत् बदरीमण्डपकं—कोलिगृहं, बदरीदलनिर्मितनिकुञ्जभवनमित्यर्थः, बदरीकाष्ठनिर्मितगृहविशेषो वा, तस्य तलेषु—अधोभागेषु, निखाते—रोपिते, खादिरे—खादिरदारुमये, कीले—शङ्कौ, बद्धाः,—संयताः, वत्सरूपाः,—क्षुद्रा वत्सा येषां तैः।

(४२०) कुक्कुटेति।—कुक्कुटानां—ताम्रचूडानां, रटितेन—रवेण, अनुमीयमानः,—प्रतीयमानः, सन्निवेशः,—संस्थानं, रचना वा येषां तैः; समन्तात् छन्नगुल्मादिभिः विहितत्वेन अदृश्यत्वादिति भावः। अङ्गनेति।—अङ्गनानां—स्त्रीणां, ग्रन्थिस्तम्भः,—माङ्गलिकस्तम्भः, माङ्गलिकानुष्ठानस्मरणार्थं प्रोथितस्थूणाविशेष इत्यर्थः, तस्य तले—निम्नदेशे, विरचिता—निर्मिता, क्षिप्रपूपिकावापिका येषां तैः। ["अङ्गना···वापिकैः" इति पाठस्य दुर्बोधार्थतया एतस्मात् पुस्तकान्तरधृतः "अङ्गनाऽग्रन्थिस्तम्भतलविरचितपक्षिपूपिकावापिकैः" इति पाठः कथञ्चित् समीचीनतया प्रतिभाति; एतत्पक्षे,—अङ्गनाभिः अगस्त्यैः,—वङ्गसेनस्य, वकपुष्पवृक्षस्येत्यर्थः, ("अगस्तिः कुम्भयोनौ च वङ्गसेनतरौ पुमान्" इति मेदिनी) यः ग्रन्थिः,—तदुपनिर्मितस्थूणाकारः पक्षिणाम् उपवेशनार्थस्थानविशेषः इत्यर्थः, तस्य तले—निम्नदेशे, विरचिता पक्षिणां—विहङ्गानां, पूपिकावापिका—अङ्गनाप्रदत्तपिष्टकविशेषभक्षणानन्तरं जलपानाय क्षुद्रसरसी, "चौबाच्चा" इति वङ्गे प्रसिद्धा, येषु तैरित्यर्थः]।

(४२१) विकीर्णेति।—विकीर्णैः,—विक्षिप्तैः, बदरीदलात् वायुना पातितैरित्यर्थः, बदरैः,—कोलिफलैः, पाटलानि—श्वेतरक्तानि, पटलानि—छदयः, "चाल" इति बङ्गीयैराख्यातानि गृहाच्छादनानि इत्यर्थः, ("पटलं छदिः" इत्यमरः) येषां तैः।

(४२२) वेणुरिति।—वेणूनां—वंशानां, पोटदलाः,—खण्डशकलानि,

भित्तिभिः, किंशुकरोचनारचितमण्डलमण्डपवल्लजबद्वाङ्कार-राशिभिः, (४२३) शाल्मलिफलतूलसञ्चयबहुलैः, सन्निहित-नलशालिशालूकखण्डकुमुदबीजवेणुतण्डुलैः, (४२४) सङ्कृ-ष्टीतमालबीजैः, भस्ममलनम्लानकाश्मर्य्यकूटव्याधूतकटैः,

["—पोटदल—" इत्यत्र "—पोटगल—" इत्येव पाठः साधीयान्, कोषादौ पोट-दलशब्दस्य अदर्शनात्; अस्मिन् पक्षे,—वेष्णवः,—वंशाः,पोटगलाः,—काशाख्यतृण-भेदाः इत्यर्थः। "अथ पोटगलः पुंसि नले च काशसस्ययोः" इति मेदिनी]। नलाः, —नड़ाख्यतृणभेदाः,शराः,—गुन्द्राख्यतृणविशेषाश्च, तन्मयी—तदात्मिका, या वृतिः, —वेष्टनं, सैव ताभिर्वा विहिता—कृता, भित्तिः,—कुड्यं यैषां तैः। किंशुकेति।— किंशुकानि—पलाशपुष्पाणि, रोचना—गोरोचनाख्यमाङ्गल्यद्रव्यभेदः, ताभ्यां रचितं —कृतं, मण्डलं—लीलाकाररेखा यस्य तादृशं, मण्डपं—गृहं, वल्लजैः,—तृणभेदैः, बद्धः,—रचितः, अङ्गाररराशिः,—अलातचयः, भूतोपद्रवनिवारणार्थमिति भावः, तैषु तैः; यद्वा,—किंशुकः,—पलाशवृक्षः, रोचनः,—कूटशाल्मलीसञ्ज्ञकः शाल्मलीभेदः, ("रोचनः कूटशाल्मलिः" इत्यमरः) ताभ्याम् आरचितं—कृतं, मण्डलं—वेष्टनं, वृति-रित्यर्थः, यस्य तादृशे मण्डपे, वल्लजैः बद्धः,—कृतः, अङ्गाररराशिः,—अनुद्धतशिखाग्नि-समूहः; शैत्यनिवारणार्थं व्याघ्रादिभीतिनिवारणार्थं वा इति भावः, तैषु तैः।

(४२३) शाल्मलीति।—शाल्मलिः,—रक्तपुष्पा, ("शाल्मली रक्तपुष्पा च सुकुटी स्थिरजीविता" इति कोषः) तस्याः फलानां तूलसञ्चयैः,—तूलराशिभिः, बहुलानि—आकीर्णानि तैः। सन्निहितेति।—सन्निहितानि—स्थितानि, नल-शालयः,—शालिविशेषाः, शालूकखण्डाः,—पद्ममूलानां खण्डाः, ("पद्ममूलन्तु शालूकम्" इति कोषः) कुमुदबीजानि—कैरवशस्यानि, वेणवः,—वंशाः, तण्डुलाः, —धान्यसाराः, निस्तुषधान्यानीत्यर्थः; यद्वा,—वेणुतण्डुलाः,—वंशबीजानि, वंशजात-प्रकारपदार्थभेदाः इत्यर्थः, तैषु तैः।

(४२४) सङ्कृष्टीतेति।—सङ्कृष्टीतानि—सञ्चितानि, मालानां—स्थलपद्मानां, बीजानि—शस्यानि तैषु तैः; यद्वा,—सङ्कृष्टीतानि मालानां—पृक्कानां "पिड़ि" इति वङ्गे प्रसिद्धानामित्यर्थः, बीजानि—अङ्कुरकारणानि; यद्वा,—सङ्कृष्टीतानि मालबीजानि—शैवलशस्यानि तैषु तैः ("मालं शैवे स्त्रियां पृक्कास्वजीर्णान्यल्पके पुमान्" इति मेदिनी)। भस्मेति।—भस्मना—पांशुना, मलनेन—सङ्क्लेन, म्लानं—मलिनतां गतं, यत् काश्मर्य्यकूटं—कृष्णमृत्तिकाराशिः, तत्र व्याधूताः,—

(४२५) आम्रानराजादनमदनफलस्फीतैः, मधूकासवमद्यप्रायैः, (४२६) कुसुम्भकुम्भगण्डकुसूलैः, अविरहितराजमाषत्रपुष-कर्कटिकाकुष्माण्डालाबुबीजैः, (४२७) पीथमानवनविड़ाल-

---

निहिताः, कटाः,—ग्रथनानि, "माटुर" इति वङ्गभाषया ख्याता: येषां तैः; यद्वा, —भस्मना—भूतीनां, मलनेन—कर्दमेन, ("मलनः पटवासे ना कर्दमे तु नपुंसकम्" इति मेदिनी) जलार्द्रभस्मलेपनेनेत्यर्थः, (दृश्यते च गाम्भारीहरितत्वं भस्मलिप्तमिव लोकैः) म्लानाः ये काश्मर्य्याः,—गाम्भारीहरिताः, ("गाम्भारी सर्व्वतोभद्रा काश्मरी मधुपर्णिका। श्रीपर्णी भद्रपर्णी च काश्मर्य्यश्च" इत्यमरः) तेषां कूटे—राशौ, खण्डिततरुचयसमूहोपरि इत्यर्थः, व्याधृताः, कटाः, शीर्षणार्थमिति भावः, येषां तैः।

(४२५) आम्रानेति।—आम्रानानि—इंषच्छुष्काणि, राजादनः,—कपीष्टाख्यः वृक्षभेदः, ("चीरीदकस्तु राजन्यः चीरमत्स्यः कपीद्रुमः। राजादनो दृढस्कन्धः कपीष्टः प्रियदर्शनः॥" इति कोषः); यद्वा,—राजादनं—पियाल:, ("राजादनं पियालस्य" इत्यमरः) मदनः,—रोधवृक्षः, "मयना" इति वङ्गीयैराख्यातः, ("मदनः स्यात्को रीधः" इति कोषः) तयोः फलानि, तैः स्फीतानि—पूर्णानि तैः। मधूकेति। —मधूकानां—गुडपुष्पाणां, "महुया" इति ख्यातानां, ("मधूके तु गुडपुष्पमधुद्रुमौ" इत्यमरः) आसवाः,—रसाः एव; यद्वा,—मधूकेभ्यः कृताः आसवाः,—सन्धान-विशेषाः, मद्यविशेषा इत्यर्थः, ता एव, मद्यानि—सुराः, प्रायेण—बाहुल्येन येषु तैः।

(४२६) कुसुम्भेति।—कुसुम्भानां—सहारजनाख्यपुष्पाणां, कुम्भाः,—घटाः; गण्डानां—खड्गाख्यमृगभेदानां, कुसूलानि—स्थानानि येषु तैः; यद्वा,—कुसुम्भानां—सहारजनानां, ("स्यात् कुसुम्भं वह्निशिखं सहारजनमित्यपि" इत्यमरः) कुम्भानां—गुग्गुलूनाञ्च, ("कुम्भी राजन्वरे··· ।···घटे क्लीबन्तु गुग्गुलौ" इति मेदिनी) गण्डाः, —पिटकाः, तत्पूर्णपात्रविशेषाः इत्यर्थः, ("गण्डः स्यात् पुंसि खड्गिनि। वटयोग-प्रभेदे च वीर्य्यवृक्षे पिटकेऽपि च॥" इति मेदिनी) गण्डाः,—पिण्डा इत्यर्थो वा, तेषां कुसूलाः,—स्थापनार्थस्थानविशेषाः, गोष्ठी वा येषु तैः। अविरहितेति।—न विरहितानि—शून्यानि, राजमाषाणां—निष्पावाणां, "बरवटी" इति वङ्गे प्रसिद्धानां श्रीडिभेदानां वा, त्रपुषाणां—खाडुकानां, "खीरा" इति वङ्गभाषया प्रसिद्धानां, कर्कटिकानां—"काँकुड़" इति वङ्गे ख्यातानां, कुष्माण्डानां—कर्कारुभ्याम्, अलाबूनां —तुम्बीनाञ्च, बीजानि—अङ्कुरकारणानि येषु तैः।

(४२७) पीथमानेति।—पीथमानाः,—पाल्यमानाः, वनविड़ालाः,—

मालुधाननकुलशालिजातजातकादिभिः, अटवीकुटुम्बिनां गृहैः उपेतं वनग्रामकं ददर्श, तत्रैव च अवसदिति ।

इति श्रीबाणभट्टकृते हर्षचरिते कुवलयिनीनाम
सप्तम उच्छ्वासः ॥ ७ ॥

आरण्यनाञ्जारः, मालुधानाः,—प्राणिविशेषाः, मातुलाहिनाममर्पभेदा वा,("मालुधानो मातुलाही" इत्यमरः) ते तु निर्विषाः ज्ञेयाः ; नकुलाः,—सर्पशत्रवः, "बेजि" इति वङ्गे प्रसिद्धाः, शालिजाताः,—जीवभेदाः, जातकादयश्च—प्राणिविशेषा येषु तैः ; यद्वा,—शालयः,—गन्धमार्जारः, "खटाश" इति वङ्गे प्रसिद्धाः, ("शालिस्तु कलमादौ च गन्धमार्जारके पुमान्"इति मेदिनी) तेषां जातानां,—समूहानां, जातकादयः,—शावकादय इत्यर्थः ; यद्वा,—तेभ्यः जाताः,—उत्पन्नाः, ये जातकाः,—शावकाः, तदादयः,—तत्प्रभृतयः येषु तैः, ["जातकादिभिः" इत्यत्र "जालकादिभिः" इति पाठः समीचीनतया प्रतिभाति, पीड्यमाणबलविड़ालादिजातानां—समूहानां, जालकानि—जालायाः, पिञ्जरा इति यावत्, तदादयः यत्र तैः]। अटवीकुटुम्बिनां—वनगृहिणाम्। उपेतं—युक्तम्। वनग्रामकम्—अरण्यमध्यस्थं संवसथं, तत्रामकं वा।

इत्यशेषशास्त्राटवीसञ्चरणपञ्चाननेन वाल्यवंशावतंसेन पण्डितकुलपतिना वि. ए,
उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां,
तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-
विद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां
श्रीहर्षचरितव्याख्यायां सप्तम उच्छ्वासः ॥ ७ ॥

अष्टम उच्छ्वासः ।



सहसा सम्पादयता मनोरथप्रार्थितानि वस्तूनि ।
दैवेनापि क्रियते भव्यानां पूर्व्वसेवेव ॥ १ ॥
विदुज्जनसम्पर्को नष्टेष्टप्राप्तिदर्शनाभ्युदयः ।
कस्य न सुखाय भवने भवति महारत्नलाभस्य ? ॥ २ ॥

(१) अथ अपरेद्युः उत्थाय पार्थिवस्तस्मात् ग्रामकात् निर्गत्य विवेश विन्ध्याटवीम् ; आट च तस्याम् इतस्येतस्य सुबहून्

अथ पुरुषप्रयत्नं विनाऽपि सुदैवाऽनुकूल्येन सत्पुरुषाणां मनोरथसिद्धिर्भवतीति द्वाभ्यां प्रदर्शयन्नाह, सहसेति ।—सहसा—हठात्, मनोरथप्रार्थितानि—मनोऽभीष्टानि, अभिलषितानीत्यर्थः, वस्तूनि—द्रव्याणि, सम्पादयता—संयोजयता, प्रददता इत्यर्थः, दैवेनापि—भाग्येनापि, अनुकूलेनेति भावः ; किं पुनः पुरुषकारेण अत्नेन वा इत्यपि शब्दार्थः ; भव्यानां—योग्यानां, शुभफललाभार्हाणामित्यर्थः, सत्पात्राणामिति भावः ; ("भव्यं शुभे च सत्ये च योग्ये भाविनि च त्रिषु" इति मेदिनी) पूर्व्वसेवा—प्रथमा परिचर्य्या, क्रियते इव—विधीयते इव ; सुदैवं हि सहसैव सतां मनोरथं सम्पाद्य सदनुरागस्य प्रथमनिदर्शनं प्रदर्शयति, उत्तरत्रापि प्रभूताभ्युदयं जनयतीति भावः । श्लोकेनानेन भाग्यवतः सतो हर्षस्य दैवाऽनुकूल्येन यात्रायाः साफल्यं सूचितम् । अत्र पूर्व्वसेवायाः अक्रियमाणायाः अपि तत्त्वेन सम्भावनयोत्कीर्त्तनात् क्रियोत्प्रेक्षाऽलङ्कारः । आर्य्या वृत्तम् ॥ १ ॥

विदुरिति ।—विदुषां जनेन—पण्डितलोकेन, सम्पर्कः,—सङ्गः, सख्यमिति भावः, तथा नष्टेति ।—नष्टस्य—अदर्शनं गतस्य, इष्टस्य—प्रियस्य, प्राप्तेः,—बन्धुजनस्य, दर्शनं—साक्षात्कारः, तदेव अभ्युदयः,—मङ्गलम्, इष्टलाभजनिताऽऽनन्द इत्यर्थः, भवने—गृहे, महारत्नानां—महामूल्यमणीनाम् ; अन्येषामपि दुर्लभानामिति भावः ; लाभस्य—प्राप्तिस्य, कस्य—जनस्य इति भावः, सुखाय—आनन्दाय, न भवति ?—न जायते ? अपि तु सर्व्वस्य एव भवति इत्यर्थः, एतेन हर्षस्य दिवाकरमित्राख्य-विहङ्गिवरलाभः भगिन्याः राज्यश्रियाः प्राप्तिः महामूल्यैकावलीलाभश्च सूचितः । अत्र प्रस्तुतानां सम्पर्काभ्युदयरत्नलाभानामेकेन सुखजननयोग्यत्वरूपधर्म्मेण सह सम्बन्धात् तुल्ययोगिताऽलङ्कारः । आर्य्या वृत्तम् ॥ २ ॥

(१) एतदेव प्रतिपादयति, अथ इत्यादि ।—अपरेद्युः,—अपरस्मिन् दिवसे, वनग्रामे आवासग्रहणस्य परदिने इत्यर्थः । आट—वनम् । "एकदा तु भूपतेः"

दिवसान्। एकदा तु भूपतेर्भ्रमत एव आटविकसामन्त-शरभकेतोः सूनुर्व्याघ्रकेतुः नाम कुतोऽपि (२) कज्जलश्यामल-श्यामलतावलयेनाधिललाटम् उच्चैःकृतमौलिबन्धम्, (३) अन्ध-कारिणीम् अकारणभुवा भ्रुकुटिभङ्गेन त्रिशाखेन त्रियामामिव साहससहचारिणीं ललाटस्थलीं सदा समुद्वहन्तम्, (४) अव-तंसितैकशुकपक्षकप्रभाहरितायमानेन पिनद्धकाचरकाचमणि-कर्णिकेन श्रवणेन शोभमानं, (५) किञ्चिच्चुल्लस्य प्रविरल-पक्ष्मणः चक्षुषः सहजेन रागरोचिषा रसायनरसोपयुक्तं तार-

इत्यादौ "व्याघ्रकेतुः···शरवयुवानमादाय आजगाम" इति उत्तरेण सम्बन्धः। भूपतेः, इर्षस्य, [कर्मणि षष्ठी]। आटविकेति।—आटविकः,—आरण्यः, सामन्तः,—अधिराजः, वनप्रदेशरक्षणाय इर्षात् प्राप्ताधिकार इत्यर्थः, यः शरभकेतुः,—तदाख्यः कश्चित्, तस्य सूनुः,—पुत्रः, इति व्याघ्रकेतुरित्यस्य विशेषणम्।

(२) शरवयुवानं विशिनष्टि, कज्जलेति।—कज्जलवत्—अञ्जनवत्, श्यामला—नीला, या श्यामलता—गन्धप्रियङ्गुवल्ली, सा एव वलयं—वेष्टनं तेन, अधिललाटं—ललाटोपरि। उच्चैरिति।—उच्चैः कृतः,—उन्नतया स्थापितः, मौलिबन्धः,—संयतकेशचयः येन तथोक्तम्।

(३) अकारणभुवा—विना कारणं जातेन इत्यर्थः, स्वाभाविकेन इति भावः; त्रिशाखेन—त्रिरेखेण, भ्रुकुटिभङ्गेन—भ्रूकौटिल्येन, अन्धकारिणीम्—अन्धकारवतीम्; भ्रूभङ्गीवचनेन नवयौवनतमायत्वादिति भावः; यद्वा,—अन्धकारिणीं—कृष्णवर्णामित्यर्थः, अत एव त्रियामामिव—रात्रिमिव, तमिस्रामिवेति यावत्, साहससहचारिणीं—साहससङ्गिनीम्; बलपूर्वककार्यकरणसामर्थ्यबोधिकामिति भावः; ललाटस्थलीं—भालदेशं, समुद्वहन्तं—दधानम्।

(४) अवतंसितेति।—अवतंसितस्य—भूषणीकृतस्य, एकस्य—एकमात्रस्य, शुकपक्षकस्य—कीराख्यपक्षिपतत्रस्य, प्रभया—कान्त्या, हरितायमानं—श्यामायमानं तेन। पिनद्धेति।—पिनद्धा—बद्धा, काचरस्य—कपिलस्य, काचमणेः,—काचाख्य-रत्नस्य, कर्णिका—कर्णभूषणं, काचमणिनिर्मितं कर्णभूषणमित्यर्थः, यत तथोक्तेन, श्रवणेन—कर्णेन, शोभमानं—राजमानम्।

(५) किञ्चिच्चुल्लस्य—ईषत् क्लिन्नस्य, ("स्युः क्लिन्नाचे चुल्लचिल्लपिल्लाः क्लिन्नेऽधि

क्षतजमिव क्षरन्तम्, अवनाटनासिकं, चिपिटाधरं, चिकिनचिबुकम्, (६) अहीनहनूत्कटकपोलकूटास्थिपर्य्यन्तम्, ईषदुदग्रग्रीवाबन्धं, स्कन्नस्कन्धार्द्धभागम्, (७) अनवरतकोदण्डकुण्डलीकरणकर्कश्यव्यायामविस्तारितेन अंसलेन उरसा हसन्तमिव तटशिलाप्रथिमानं विन्ध्यगिरेः,

प्राप्यनी" इत्यमरः)। प्रविरलपक्ष्मणः,—असान्द्रलोम्नः। सहजेन—स्वाभाविकेन, रागरोचिषा—लोहितप्रभया, रसायनरसोपयुक्तं—रसायनरसेन—औषधविशेषरसेन सह, उपयुक्तं—पीतम् इत्यर्थः, तरक्षुः,—मृगादनः, "नेकड़े बाघ" इति वङ्गे प्रसिद्धः क्षुद्रव्याघ्रविशेष इत्यर्थः, ("तरक्षुस्तु मृगादनः" इत्यमरः) तस्य इदं, तारक्षवं, तस्य क्वचित् रोगविशेषे (यक्ष्मणि) उपयुज्यते इति वैद्यकाः; क्षतजमिव—रक्तमिव, क्षरन्तं—स्रवन्तम्। अवनाटनासिकं—निम्ननासापुटम्, ("अवटीटोऽवनाटश्चावभटो नतनासिके" इत्यमरवचनात् अवनाटशब्देनैव निम्ननासिके लब्धेऽपि पुनर्नासिकाशब्दग्रहणं नासाया अतिनिम्नत्वद्योतनार्थमिति मन्तव्यम्) अन्तःप्रविष्टनासिकमित्यर्थः, "खाँदा नाक" इति बङ्गभाषया प्रसिद्धमिति भावः। चिपिटाधरं—स्थूललम्बरदनच्छदम्। चिकिनचिबुकं—श्लक्ष्णवृत्तखाधराधोभागम्।

(६) अहीनेति।—अहीनौ—अन्यूनौ, प्रवृद्धौ इत्यर्थः, हनुभ्यां—कपोलोर्द्धभागाभ्याम्, उत्कटयोः,—उन्नतयोः, विषमयोः वा, कपोलयोः,—गण्डयोः, ("ओष्ठाधरौ तु रदनच्छदौ दशनवाससी। अधः स्यात्चिबुकं गण्डौ कपोलौ तत्परा हनुः" इत्यमरः) कूटौ—शिखरभूतौ, अस्थिपर्य्यन्तौ—कङ्कालप्रान्तौ यस्य तम्, अन्युन्नतहन्वस्थिकपोलम् अत एव निम्नहनुदेशमित्यर्थः। ईषदुदग्रग्रीवाबन्धम्—ईषदुदग्रः,—किञ्चिदुन्नतः, ["ईषदुदग्र—"इत्यत्र "ईषदवाग्र—" इति पाठे,—अवाग्रः,—अवनतः इत्यर्थः] ग्रीवाबन्धः,—कन्धरासन्निवेशः यस्य तम्। स्कन्नेति।—स्कन्नः,—भग्नः, लम्बमानः, उन्नतो वा, स्कन्धार्द्धभागः,—अंसार्द्धदेशः यस्य तम्।

(७) अनवरतेति।—अनवरतेन—अविश्रान्तेन, कोदण्डस्य—धनुषः, कुण्डलीकरणेन—ज्याकर्षणेन, चक्रीकरणेन इत्यर्थः, कर्कशेन—कठिनेन, व्यायामेन च—अङ्गचालनविशेषेण च, विस्तारितं—प्रसारं गतं तेन। अंसलेन—बलवता, ("बलवान् मांसलोऽंसलः" इत्यमरः) उरसा—वक्षःस्थलेन, विन्ध्यगिरेः,—विन्ध्याचलस्य, तटशिलाप्रथिमानं—तटशिलायाः,—उन्नतप्रदेशस्थप्रस्तरस्य, प्रथिमानं—विस्तारं, हसन्तम्—उपहसन्तं, विपुलोरस्कमित्यर्थः।

(८) अजगरगरीयसा च भुजयुगलेन लघयन्तं तुहिनशैलशाल-द्रुमाणां द्राघिमाणं, (९) वराहबालवलितबन्धनाभिर्नागदमन-जूटिकाभिः जटिलोक्तपृष्ठे प्रकोष्ठे प्रतिष्ठां गतं गोदन्तमणिचित्रं त्रापुषं वलयं बिभ्राणम्, अतुन्दिलमपि तुन्दिभम्, (१०) अहीरमणीचर्म्मनिर्म्मितपट्टिकया उच्चित्रचित्रकल्वक्तारकितपरि-

(८) अजगरगरीयसा—अजगर इव—हडदाकारसर्पविशेष इव, गरीयः,—गुरुतरं, दीर्घमित्यर्थः, तेन। लघयन्तं—लघुकुर्व्वन्तम्। तुहिनेति।—तुहिनशैलस्य—हिमाद्रेः, शालद्रुमाणां—सर्ज्जतरूणां, द्राघिमाणम्—अतिदीर्घताम्; आजानुलम्बितभुजमिति भावः।

(९) वराहेति।—वराहस्य—शूकरस्य, बालेन—लोम्ना, बलितं—कृतं, बन्धनं—संयमनं यासां ताभिः, नागदमनजूटिकाभिः,—नागदमनः,—विषहरः ओषधिविशेषः, "नागदोना" इति वङ्गीयैराख्यातः, तस्य जूटिका—प्रतानः, क्षुद्रमूलं वा ताभिः, सर्पभयनिवारणार्थमिति भावः, ["नागदमनजूटिकाभिः" इत्यत्र "नागदमनजूटिकावाटिकाभिः" इति पाठे,—नागदमनजूटिकाया वाटिकाः,—पूल्यः, गुच्छा इत्यर्थः, ताभिः] जटिलीकृतं—युक्तं, पृष्ठम्—उपरिभागः यस्य तथाभूते, प्रकोष्ठे—कूर्परमणिबन्धयोरन्तरालदेशे, ("प्रकोष्ठो मणिबन्धस्य कूर्परस्यान्तरेऽपि च" इति मेदिनी)। प्रतिष्ठां—स्थितिं, गतं—प्राप्तं, गोदन्तमणिचित्रं—सर्पविशेषशिरोरत्नमण्डितम्। त्रपुषा—सीसकेन रङ्गेण वा निर्वृत्तं त्रापुषं—सीसकेन रङ्गेण वा निर्म्मितमिति यावत्; यद्वा,—त्रपुषः,—सीसकस्य रङ्गस्य वा विकारः त्रापुषं ["त्रपुजतुनोः षुक्" (४।३।१३८ पा०) इत्यण् षुगागमश्च] सीसकनिर्म्मितं रङ्गनिर्म्मितं वेत्यर्थः,("त्रपु सीसकरङ्गयोः" इति मेदिनी) वलयं—कटकं, बिभ्राणं—दधानम्। अतुन्दिलं—तुन्दिलः,—हडत्वचिः, स्थूलोदरः पुमानित्यर्थः, ("तुन्दिलस्तुन्दिकस्तुन्दी हडत्वचिः पिचिण्डिलः" इत्यमरः) स न भवतीति तं, क्षीणोदरं, कृशमध्यमिति वा, तुन्दिभम्—क्षुन्नतनाभिम्; ["तुन्दिवलिवटेर्भः" (५।२।१३९ पा०) इडा नाभिस्तुन्दिरिति तुन्दिशब्दात् भः। "तुन्दिभम्" इत्यत्र "तुण्डिभम्" इति पाठेऽपि स एवार्थः]।

(१०) अहीति।—अहीरमणी—शिवशक्तिः चित्रकाख्यः जन्तुभेदः, यस्त्वायया जन्यतोऽपि अपरसर्पत्रासकः भवतीति बोध्यम्; ["अहीरमणी—" इत्यत्र "अहीरखि—" इति पाठस्तु साधीयान्, अहीरमणी इति शब्दस्य कोषादावदर्शनादर्थासङ्गतेश्च; अहीन् ईरयति दूरीकरोति इति व्युत्पत्त्या "राजसर्षप" इति प्रसिद्धः सिद्धार्थसर्षपविशेषः

वारया (११) सङ्कुञ्चाजिनजालकितया शृङ्गमयमसृणमुष्टिभाग-भास्वरया (१२) पारदरसलेशश्लिष्टसमस्तमस्तकया कृपाण्या करालितविसङ्कटकटिप्रदेशं, (१३) प्रथमयौवनोल्लिख्यमान-मध्यभागभ्रष्टमांसभरितौ इव स्थवीयसावूरुदण्डौ दधतम्,

---

अहीरणिः, तद्दर्शनादितरे सर्पाः पलायन्ते] तस्याश्चर्म्मणा—त्वचा, निर्म्मिता—रचिता, पट्टिका—खड्गकोषधारणार्थं वक्षसि तिर्य्यग्विलम्बितचर्म्मनिर्म्मितप्रग्रहतन्तु-भेदः यस्याः तथाभूतया। उच्चिक्वेति।—उच्चिक्वा—स्वभावीद्गतचिक्वा, विचित्रवर्णा इत्यर्थः, या चिक्वकस्य—मृगविशेषस्य, त्वक्—चर्म्म, तया तारकितः,—सञ्जाततारः इव परिदृश्यमान इत्यर्थः, परिवारः,—खड्गकोषः, परिवेष्टनमित्यर्थः, ("परिवारः परिजने खड्गकोषे परिच्छदे" इति मेदिनी) यस्याः तथाभूतया। ["अहीरमणी··· परिवारया" इत्यत्र "अहीरमणीचर्म्मनिर्म्मितपट्टिकयोच्चिक्वचिक्वकत्वक्तारकितपरि-वारया" इति पाठे,—तादृशपट्टिकयोः,—खड्गकोषस्य उभयपार्श्वावस्थितबलयावेष्टि-तिसृढचर्म्मरज्जोरित्यर्थः, आवृतया इति अध्याहार्य्यं, चिक्वया—विविधवर्णया, चिक्वक-त्वचा तारकितः परिवारः यस्याः तथाभूतया]।

(११) सङ्कुचेति।—सङ्कुचेन—सङ्कुचितेन, अजिनेन—कृष्णमृगचर्म्मणा, जालकिता—गवाक्षिता, जालाकृतवत् परिदृश्यमाना इत्यर्थः, तया, मृदुसङ्कुचितमृग-चर्म्मनिर्म्मितकोषाभ्यन्तरस्थावरणया इत्यर्थः, आदौ तादृशचर्म्मणा कृपाणीमावेष्ट्य पश्चात् कोषमध्ये स्थापितवान् इति भावः। शृङ्गेति।—शृङ्गमयेन—माहिषमार्गादि-विषाणनिर्म्मितेन, मसृणेन—श्लक्ष्णेन, मुष्टिभागेन—करदेशेन, मुष्टिधार्य्यस्थानेने-त्यर्थः, भास्वरा—दीप्तिमती तया।

(१२) पारदेति।—पारदस्य—पूतस्य, रसः,—द्रवः, तस्य लेशेन—बिन्दुना, लिप्तं—दिग्धं, समस्तं—सम्पूर्णं, मस्तकं—शिरोभागः यस्याः तया। कृपाण्या—क्षुरिकया कर्त्तर्य्या वा,("कृपाणः खड्गे क्षुरिकाकर्त्तर्य्योरपि श्रीपिति" इति मेदिनी)। करालितेति।—करालितः,—भीषणीकृतः, विसङ्कटः,—विशालः, स्थूल इत्यर्थः, कटिप्रदेशः,—श्रोणिफलकं यस्य तम्।

(१३) प्रथमेति।—प्रथमेन—अभिनवेनेत्यर्थः, यौवनेन—तारुण्येन, उल्लिख्य-मानात्—उत्खन्यमानात्, कृशतां नीयमानादिति यावत्, मध्यभागात्—उदर-देशादित्यर्थः, भ्रष्टेन—स्खलितेन, मांसेन—पिशितेन, भरिताविव—आपूरिताविव, स्थवीयसौ—अतिस्थूलौ।

(१४) अच्छभल्लचर्म्ममयेन भल्लीप्रायप्रभूतशरस्तृता (१५) शबल-शार्दूलचर्म्मपटपीड़ितेन अलिकुलकालकम्बललोमा पृष्ठ-भागभाजा भस्त्राभरणेन पल्लवितमिव कार्श्यमुपदर्शयन्तम्, (१६) उत्तरत्रिभागोत्तंसितचाषपिच्छचारुशिखरे खदिर-जटानिर्म्माणे खरप्राणे (१७) प्रचुरमयूरपित्तपल्वलताचित्रित-त्वचि त्वचि सारगुरुणि वामस्कन्धाध्यासितधनुषि दोषि लम्बमानेन अवाक्शिरसा (१८) शितशरक्षतैकनलकविवर-

(१४) अच्छेति।—अच्छभल्लचर्म्ममयेन—भल्लुकत्वक्निर्म्मितेन, ("ऋक्षाच्छ-भल्लभल्लुकाः" इत्यमरः)। भल्लीति।—भल्ली—अस्त्रविशेषः, तत्प्रायान्—तद्बहुलान्, प्रभूतान्—प्रचुरान्, शरान्—बाणान्, बिभर्त्ति—धारयतीति तथोक्तेन।

(१५) शबलेति।—शबलं—चित्रं, शार्दूलचर्म्मैव—व्याघ्राजिनमेव, पटः,—आवरणं, तेन पीड़ितम्—आवृतं तेन। अलीति।—अलिकुलं—भृङ्गवृन्दं, तद्वत् कालं—कृष्णवर्णं, यत् कम्बललोम—रङ्गकरोम तेन, तदुपलक्षितेन इति भावः। पृष्ठभागभाजा—पृष्ठदेशस्थितेन, भस्त्राभरणेन—भस्त्रा—चर्म्मनिर्म्मितास्त्युद्दीपकवायु-यन्त्रविशेषः, सैव आभरणं—मण्डनं तेन, तूणेन वा, पल्लवितमिव—पूरितमिव। कार्श्यं—कृशताम्, आत्मन इति भावः। उपदर्शयन्तं—प्रकाशयन्तं, स्वबाणतूणभारेण अतिपीड़ितमिव आत्मानं प्रकटयन्तमित्यर्थः।

(१६) उत्तरेति।—उत्तरे—उपरीत्यर्थः, त्रिभागे—तृतीये भागे, कूर्परोपरि-भागे इत्यर्थः, उत्तंसितं—मण्डनीकृतं, यत् चाषपिच्छं—नीलकण्ठाख्यपक्षिपुच्छः, तेन चारु—मनोज्ञं, शिखरम्—अग्रं यस्य तथोक्ते। खदिरेति।—खदिरजटाया इव—खदिरवृक्षस्य मूलस्येव, अतिस्थूलस्य इत्यर्थः; निर्म्माणं—घटनं यस्य तथाभूते, खदिरजटानिभे इत्यर्थः, पीवरांसे इत्यर्थः, खरप्राणे—तीक्ष्णबले।

(१७) प्रचुरेति।—प्रचुरेण—बहुना, मयूरपित्तेन—शिखिमायुना, या पल्वलता—रचनाविशेषः, रचितेति भावः; तया चित्रिता—रञ्जिता, त्वक्—चर्म्म यस्य तथाविधे। त्वचि—चर्म्मणि, सारगुरुणि—सारेण—काठिन्येन, गुरुः,—महान् तस्मिन्, दुर्भेद्यचर्म्मणि इत्यर्थः। वामेति।—वामस्कन्धं—सव्यांसम्, अध्या-सितं—स्थितं, धनुः,—कार्म्मुकं यस्य तथाभूते, दोषि—भुजे, ("भुजबाहू प्रवेष्टो दोः" इत्यमरः)। अवाक्शिरसा—अधोमुखेन।

(१८) शितेति।—शितेन—तीक्ष्णेन, शरेण—बाणेन, क्षतं—छिद्रं, यत्

प्रवेशितेतरजङ्घाजनितस्खस्तिकबन्धेन (१९) बन्धूकलोहित-रुधिरराजिरञ्जितप्राणवर्त्मना (२०) वपुर्वितत्यव्यक्तविभाव्य-मानकोमलक्रोडरोमशुक्लिम्ना प्रशेन (२१) मितोटनीशिखाऽग्र-ग्रथितग्रीवेण (२२) चापाऽऽहृतचञ्चूत्तानताम्रतालुना तित्ति-रिणा वर्णकमुष्टिमिव मृगयाया दर्शयन्तं, (२३) विषमविष-दूषितवदनेन च विकर्णेन कृष्णाहिना इव मूलगृहीतेन

एकं नलकं—"नला" इति ख्यातः जङ्घाऽस्थिविशेषः, तस्य विवरे—छिद्रे, प्रवेशिता—ढौकिता, या इतरजङ्घा—इतरपृष्ठता अन्या जङ्घा, तया जनितः,—कृतः, स्वस्तिक-बन्धः,—आसनबन्धविशेषः यस्य तथोक्तेन।

(१९) बन्धूकेति।—बन्धूकं—तदाख्यं पुष्पं, तद्वत् लोहितं—रक्तं, यत् रुधिरं—शोणितं, तस्य राज्या—धारया, रञ्जितं—प्रातरागं, रक्तवर्णमित्यर्थः, प्राणवर्त्म—नासारन्ध्रं यस्य तेन, नासारन्ध्रसृतरुधिरेण इत्यर्थः।

(२०) वपुरिति।—वपुषः,—शरीरस्य, वितत्या—विस्तारेण; मृतजीवत्वेन दैहिकसङ्कोचाभावादिति भावः; व्यक्तं—स्पष्टं यथा तथा, विभाव्यमानः,—दृश्य-मानः, कोमलानां—सुकुमाराणां, क्रोडरोम्णाम्—अङ्गलोम्नां, शुक्लिमा—श्वेतं यस्य तथोक्तेन, प्रशेन—तदाख्येन मृगविशेषेण।

(२१) मितेति।—मिता—तीक्ष्णा, या अटनी—धनुष्कोटिः, धनुषोऽयभागः इत्यर्थः, ("कोटिरस्त्रियामटनी" इति धनुःप्रकरणे अमरः) तस्याः शिखा—चूडा, तस्या ऊर्ध्वम्—उपरिभागः, तत्र ग्रथिता—विबद्धा, ग्रीवा—कन्धरा यस्य तेन।

(२२) चापेति।—चापेन—धनुषा, आहृतायाम्—आकृष्टायां, चञ्चौ—लोह्याम्, उत्तानः,—ऊर्ध्वीभूतः, परिदृष्ट इत्यर्थः, व्यक्तमुखत्वादिति भावः; ताम्रः,—रक्तवर्णः, तालुः,—काकुदम्, अन्तर्मुखोपरिभाग इत्यर्थः, यस्य तेन, तित्तिरिणा—तदाख्येन पक्षिणा, वर्णकमुष्टिमिव—मुष्टिगृहीतलेखन्या प्रथमम् अक्षरलेखनमिव, "कृते खड्डो" इति वङ्गभाषया प्रसिद्धं विधानम् इति यावत्, मृगयायाः,—आखेटस्य, समहननक्रियाया इत्यर्थः, क्षुद्रमृगपक्षिवधरूपं प्रथमं मृगयाव्यापारमात्मनः प्रकाश-यन्निव इति भावः।

(२३) विषमेति।—विषमेण—दुःखेन, विषेण—गरलेन, क्लिन्नेन, दंष्ट्राख्येन च इति भावः, दूषितं—सदोषं, वदनम्—मुखभागः, मुखञ्च यस्य तेन, कृष्णाहिना इव—कृष्णसर्पेण इव। मूलगृहीतेन—मूले—अधोभागे, पुच्छदेशे च, गृहीतः,—

व्यग्रदक्षिणकरायं, जङ्गममिव गिरितटतमालपादपं, यन्त्रोल्लिखितम् अश्मसारस्तम्भमिव भ्रमन्तम्, (२४) अञ्जनगिरिच्छेदमिव चलन्तम्, अयःसारमिव गिरेर्विन्ध्यस्य गलन्तं, पङ्कस्थलीं करिकुलानां, कालपाशं कुरङ्गयूथानां, (२५) धूमकेतुं मृगराजचक्राणां, महानवमीमहं महिषमण्डलानां, हृदयमिव हिंसायाः, फलमिव पापस्य, कारणमिव कलिकालस्य, कामुकमिव कालरात्रेः, शबरयुवानम् आदाय आजगाम ;

धृतः तेन, विकर्णेन—तदाख्यास्त्रविशेषेण, कर्णरहितशरविशेषेणेत्यर्थः, व्यग्रदक्षिणकरायं—व्यासक्तदक्षिणहस्तायभागं, विषलिप्तबाणं दधानमित्यर्थः। जङ्गमं—चरिष्णुं, गतिमन्तमित्यर्थः। गिरीति।—गिरितटे—पर्वतप्रस्थे, यः तमालपादपः,—कालस्कन्धवत् तम् ; प्रांशुकृष्णत्वादिति भावः। यन्त्रोल्लिखितं—शाणयन्त्रघृष्टमित्यर्थः, शिल्पविशेषनिर्मितमिति वा, अश्मसारस्तम्भमिव—दृढप्रस्तरस्थूणामिव ; महत्कृष्णवर्णदृढ़कायत्वादिति भावः।

(२४) अञ्जनगिरिच्छेदमिव—कज्जलप्रस्तरशकलमिव। अयःसारमिव—लोहस्य स्थिरांशमिव। करिकुलानां—गजयूथानां, पङ्कस्थलीमिव—सकर्दमभूमिमिव ; मारकत्वादिति भावः ; यथा करिणो दुस्तरपङ्कमासाद्य नोत्तरितुं समर्थाः, अवसीदन्ति च, तथा अमुं प्राप्य अपि न पलायितुं समर्थाः, म्रियन्ते च इति तात्पर्यम्। ["पङ्कस्थलीं करिकुलानाम्" इत्यत्र "पाकलं करिकुलानाम्" इति पाठे,—करिकुलानां पाकलं—तदाख्यं हस्तिनां ज्वरमिव, ("पाकलं कुष्ठभैषज्ये पुंसि स्यात् कुञ्जरज्वरे" इति मेदिनी) तदाख्यज्वरस्य करिणां प्राणनाशकत्वात् ; यदुक्तं वैद्यकै,—"असाध्योऽयं ज्वरो व्याधिः गोमहिषाश्वकुञ्जरे। किञ्चित्कृच्छ्रतमो नृणामल्पेषां जीवघातकः॥" "पाकलः स तु नागानामभितापस्तु वाजिनाम्" इत्यादि। पाकली यथा करिहन्ता, तथा अयमपीति भावः]। कुरङ्गयूथानां—मृगसङ्घानां, कालपाशं—व्रणस्य बन्धनरज्जुमिव, दर्शनमात्रेणैव हननादिति भावः।

(२५) धूमकेतुम्—अग्निम्, अग्निदर्शनं सिंहानां भयप्रदत्वादिति भावः ; यद्वा, —धूमकेतुमिव—उत्पातसूचकमयङ्करमिव, मारकत्वादिति भावः। धूमकेतुप्रादुर्भावः राजचक्राणामपि अशुभं सूचयतीति बोद्धव्यम्। मृगराजचक्राणां—सिंहसमूहानाम्। [राजसमूहानामित्यपि व्याख्येयं]। महानवमीमहं—शारदीयदुर्गानवमीमहोत्सवं,

दूरे च स्थापयित्वा विज्ञापयाम्बभूव,—"देव! सर्व्वस्य अस्य विन्ध्यस्य स्वामी, सर्व्वपक्षीपतीनां प्रायश्चरः शबरसेनापतिः भृकम्पो नाम। तस्य अयं निर्घातनामा (२६) स्वसीयः सकलस्य अस्य विन्ध्यकान्तारारण्यस्य पर्णानामपि अभिज्ञः, किमुत प्रदेशानाम्। एनं पृच्छतु देवः, योग्योऽयम् आज्ञां कर्त्तुम्"; इति कथिते च निर्घातस्तु (२७) क्षितितलनिहित-मौलिः प्रणामम् अकरोत्, उपनिन्ये च तित्तिरिणा सह शशोपायनम्। अवनिपतिस्तु सम्मानयन् स्वयमेव तम् अप्राक्षीत्,—"अङ्ग! अभिज्ञा यूयम् अस्य सर्व्वस्य उद्देशस्य। (२८) विहारशीलाश्च दिवसेषु एतेषु भवन्तः। सेनापतिर्वा

("महे उद्धव उत्सवः" इत्यमरः); महिषाणत्वकत्वादिति भावः; महानवमीदिने बहवो महिषाः बलित्वेन विनाश्यन्ते उपासकैरिति दृश्यते। महिषमण्डलानां—महिषमण्डलानाम्। "हृदयमिव हिंसायाः" इत्यादि विशेषणविशेषे सर्व्वदा जीवविनाश-परायणत्वात् इति भावो बोध्यः। कामुकमिव—कान्तमिव। कालरात्रेः,—सर्व्व-प्राणिनाशिकायाः यमभगिन्याः, सर्व्वजन्तुमरणोपलक्षितायाः कल्परात्रेर्वा; अस्य बहु-जीवहिंसाकरणात् सर्व्वप्राणिनाशिकाया यमभगिन्याः कालनिशेत्युत्प्रेक्षा बोद्धव्या। शबरयुवानं—म्लेच्छविशेषजातीयं तरुणवयस्कं पुमांसम्। आजगाम—प्राप। दूरं—दात्रः समीपादिति भावः। विन्ध्यस्य—विन्ध्यारण्यस्य, स्वामी—अधिपतिः। सर्व्व-पक्षीपतीनां—सर्वेषां—सकलानां, पक्षीपतीनां—शुद्रशाखाधिपतीनां, ("पक्षाख्यायाम-क्षुद्रायाः स्त्री" इति मेदिनी) प्रायश्चरः,—श्रेष्ठः।

(२६) स्वसीयः,—भागिनेयः। विन्ध्यकान्तारारण्यस्य—विन्ध्याचलदुर्गम-स्थानस्य, ("कान्तारो वर्त्म दुर्गमम्" इत्यमरः)।

(२७) क्षितीति।—क्षितितले—भूपृष्ठे, निहिता—स्थापिता, मौलिः,—संयतः केशः, ("चूडा किरीटं केशाश्च संयता मौलयस्त्रयः" इत्यमरः) येन सः। उपनिन्ये—अर्पयामासेत्यर्थः। तित्तिरिणा सह शशोपायनं—तित्तिरिं शशमपि-ढौकनद्रव्यमित्यर्थः। अङ्गेति सम्बोधनं, भोः! इत्यर्थः। अभिज्ञाः,—विशेषेण ज्ञातारः। उद्देशस्य—वनप्रदेशस्येत्यर्थः।

(२८) विहारशीलाः,—विचरणपराः। एतेषु दिवसेषु—बहुदिनं यावदिति

अन्यस्य वा तदनुजीविनः कस्यचित् (२८) उदाररूपा नारी आगता भवेद्दर्शनगोचरम् ?" इति।

निर्घातस्तु (३०) भूपालाऽऽलापनप्रसादेन आत्मानं बहुमन्यमानः प्रणनाम, दर्शितादरश्च व्यज्ञापयत्—"देव! प्रायेण अत्र हरिण्योऽपि न अपरिचिताः सञ्चरन्ति सेनापतेः, कुत एव नार्यः? नापि एवंरूपा काचित् अबला। तथाऽपि देवादेशात् इदानीम् अन्वेषणं प्रति प्रतिदिनम् अनन्यकृत्यैः क्रियते यत्नः। (३१) इतश्च अर्द्धगव्यूतिमात्र एव मुनिमहिते महति महीधरमालामूलबर्हि महाबर्हा षण्डे पिण्डपाती (३२) प्रभूतान्तेवासि-

---

भावः; यद्वा,—एतेषु—वनोद्देशेषु, दिवसेषु—प्रतिदिनमित्यर्थः। सेनापतेः,—भूकस्यस्य। तदनुजीविनः,—सेनापतेः परिजनस्य।

(२९) उदाररूपा—महासौन्दर्यशालिनी, अतिरूपवतीत्यर्थः, ("उदारो दातृमहतोः" इत्यमरः)।

(३०) भूपालेति।—भूपालस्य—राज्ञः हर्षस्य, यत् आलापनम्—आभाषणं, सम्बोधनपूर्वकवाक्यप्रयोगः इत्यर्थः, तदेव प्रसादः,—अनुग्रहः, महापराक्रमस्य समाजी हर्षस्य ताद्दृशेनेतरेण सह स्वयमाभाषणादिति भावः, तेन। बहुमन्यमानः,—श्लाघमानः, दर्शितादरं—ससम्मानमित्यर्थः। अपरिचिताः,—अज्ञाताः। ["अपरिचिताः" इत्यत्र "अपरिगताः" इति पाठेऽपि स एवार्थः; "सर्वे गत्यर्थाः ज्ञानार्थाः" इति नियमात्]। कुत एव नार्यः,—मानुष्यस्तु कथमपि नैवापरिज्ञाताः सञ्चरितुं प्रभवन्तीति भावः। अबला, अबागता इति शेषः। देवादेशात्—राज्ञः भवतः आज्ञया। अनन्यकृत्यैः,—नास्ति अन्यम्—अन्वेषणादपरं, कृत्यं—कार्यं येषां तैः, अन्यकार्यं परिहृत्य इत्यर्थः, अस्माभिरिति शेषः।

(३१) इतः,—अस्मात् स्थानात्। अर्द्धगव्यूतिमात्रे—क्रोशैकपरिमिते, ("गव्यूतिः स्त्री क्रोशयुगम्" इत्यमरः)। मुनिमहिते—ऋषिपूजिते। महीधरमालामूलबर्हि—पर्वतश्रेणिपादमूलजाते, महीरुहां—वृक्षाणां, षण्डे—मण्डले, तन्मध्ये इत्यर्थः। पिण्डपाती—पिण्डाय—ग्रासमात्राय, पतति—भिक्षां चरतीति तथोक्तः, ग्रासमात्रान्नोपयोगिभिक्षाकरः इत्यर्थः, न तु सञ्चयीति भावः।

(३२) प्रभूतेति।—प्रभूतैः,—बहुभिः, अन्तेवासिभिः,—शिष्यैः, ("आचार्यान्ते-

परिवृतः पराशरो दिवाकरमित्रनामा गिरिनदीम् आश्रित्य प्रतिवसति ; स यदि विन्देत् वार्त्ताम्" इति। तत् श्रुत्वा नरपतिः अचिन्तयत्,—"श्रूयते हि (३३) तत्रभवतः सुगृहीतनाम्नः स्वर्गतस्य ग्रहवर्म्मणो बालमित्रं मैत्रायणीयः त्रयीं विहाय ब्राह्मणायनो विद्वान् उत्पन्नसमाधिः सौगते मते युवा एव काषायाणि गृहीतवान् इति। प्रायशश्च जनस्य जनयति (३४) सुहृदपि दृष्टो भृशम् आश्वासम्। अभिगमनीयाश्च गुणाः सर्व्वस्य। कस्य न (३५) प्रतीच्यो मुनिभावः ? भगवतो वैधेयेऽपि धर्म्मगृहिणो गरिमाणम् आपादयति प्रव्रज्या, किं पुनः सकलजनमनोमुषि विदुषि जने ?

वासिनी शिष्ये" इत्यमरः) परिवृतः,—वेष्टितः। पराशरो—भिक्षुः. ["पराशरी" इत्यत्र "पाराशरी" इति पाठेऽपि स एवार्थः। "भिक्षुः परिव्राट् कर्म्मन्दी पाराशर्य्यपि मस्करी" इत्यमरः]। विन्देत्—जानीयादित्यर्थः। वार्त्ता—वृत्तान्तं, वार्य्याः इति भावः।

(३३) तत्रभवतः,—मान्यस्य। सुगृहीतनाम्नः,—प्रातःस्मरणीयस्य, विख्यातस्येत्यर्थः, बालमित्रं—शैशवसुहृत्। मैत्रायणीयः,—वेदशाखाविशेषाध्येता। त्रयीं—त्रिवेदीम्, ऋक्सामयजुःसंज्ञकं वेदत्रयमित्यर्थः, ("स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी" इत्यमरः)। विहाय—त्यक्त्वा, वैदिकधर्म्मं परित्यज्येत्यर्थः। ब्राह्मणायनः,—ब्राह्मणकुलजातः, द्विजन्मेतो वा। उत्पन्नसमाधिः,—चित्तैकाग्र्यनिष्ठः, गृहीतनियमो वा, ("स्युः समर्थनमीवाकनियमाश्च समाधयः" इत्यमरः) सौगते—सुगतः, —बुद्धः, तस्य इदं तस्मिन्, मते—आगमे, बौद्धधर्म्मसाश्रित्य इत्यर्थः। काषायाणि—कषायरक्तानि वसनानि।

(३४) सुहृत्—मित्रं, दृष्टः,—साक्षात्कृतोऽपि, किमपि अकुर्व्वन्नपीति भावः। आश्वासम्—आस्थां, प्रीतिं वा, भगिनीपतेर्ग्रहवर्म्मणो मित्रत्वात् तत्सम्बन्धेन स्वस्यापि मित्रभूतस्य तस्य किमप्यकुर्व्वतोऽपि दर्शनं मे आनन्दप्रदं भविष्यतीति भावः। अभिगमनीयाः,—अनुसरणीयाः। सर्व्वस्य—यस्मिन् कस्मिन्नपि मते वर्त्तमानस्य इति भावः ; "गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः" इति तात्पर्य्यम्।

(३५) प्रतीच्यः,—पूज्यः, ("पूज्यः प्रतीच्यः" इत्यमरः) मुनिभावः,—

यतो नः (३६) कुतूहलि हृदयम् अभूत् सततमस्य दर्शनं प्रति, प्रासङ्गिकमेव इदमापतितम् अतिकल्याणं, पश्यामः प्रयत्नप्रार्थितदर्शनं जनम्" इति। प्रकाशश्च अब्रवीत्,—"अङ्ग! समुपदिश तम् उद्देशं, यत्रास्ते स पिण्डपाती" इति। एवमुक्ता च तेनैव उपदिश्यमानवर्त्मा प्रावर्त्तत गन्तुम्।

अथ क्रमेण (३७) गच्छत एव तस्य अनवकेशिनः, कुड्मलितकर्णिकाराः, प्रचुरचम्पकाः, (३८) स्फीतफलैयग्रहयः, फलभरनमितनमेरवः, नीलदलनलदनारिकेलनिकराः, कारि-

---

तापसभावः। भगवती—सर्व्वशक्तिमती, धर्म्मगृहिणी—धर्म्मपत्नी, प्रव्रज्या—सन्यासधर्म्म इत्यर्थः, वैरेयैऽपि—मूर्खेऽपि, गरिमाणं—गौरवम्, आपादयति—प्रतिष्ठापयति; मूर्खोऽपि सन्यासमाश्रयति चेत्, सर्वेषां पूज्यो भवति इति सरलार्थः। सकललजननमनीमुषि—सर्व्वलोकमनोहरे।

(३६) कुतूहलि—समुत्सुकम्। प्रासङ्गिकं—प्रसङ्गात्—भणित्या श्लेषकरूपकार्थान्तरादित्यर्थः, आगतम्। इदं—तद्दर्शनावसररूपम्। प्रयत्नेति।—प्रयत्नेन—प्रकृष्टचेष्टया, बह्वादरेणेत्यर्थः, प्रार्थितं—याचितं, दर्शनम्—अवलोकनं यस्य तादृशं, दुर्लभदर्शनमित्यर्थः।

(३७) "अथ क्रमेण गच्छत एव तस्य" इत्यादौ "दर्शनपथमवतेरुः तरवः" इति परेण सम्बन्धः। तान् विशिनष्टि, अनवकेशिन इत्यादि।—अनवकेशिनः,—अवकेशिनः,—वन्ध्याः, अफला इति यावत्, ("वन्ध्योऽफलोऽवकेशी च" इत्यमरः) ते न भवन्तीति फलवन्तः इत्यर्थः, कुड्मलितकर्णिकाराः,—कुड्मलिताः,—सञ्जातमुकुलाः, कर्णिकाराः,—द्रुमोत्पलाः, आरग्वधवृक्षा वा,("कर्णिकारः पुमानारग्वधद्रौ च द्रुमोत्पले" इति मेदिनी) येषु ते। प्रचुरचम्पकाः,—प्रचुराः,—बहुलाः, चम्पकाः,—तदाख्यपुष्पवृक्षा येषु ते।

(३८) स्फीतेति।—स्फीताः,—प्रवृद्धाः, फलैयग्रहयः,—अवन्ध्याः, फलवन्तः इत्यर्थः, येषु तथोक्ताः, ("स्यात् अवन्ध्यः फलैयङ्गिः" इत्यमरः)। फलेति।—फलानां भरेण—भारेण, नमिताः,—अवनताः, नमेरवः,—सुरपुन्नागवृक्षाः, वृक्षाश्च वा येषु तथोक्ताः। ["फलभरनमितनमेरवः" इत्यत्र "फलभरभरितनमेरवः" इति पाठे,—फलानां भरेण—आतिशय्येन, बाहुल्येनेत्यर्थः, ("भरोऽतिशयभारयोः"

केसरसरलपरिकराः, (३९) कोरकनिकुरम्बरोमाञ्चितकुरबकराजयः, (४०) रक्ताशोकपल्लवलावण्यलिप्यमानदशदिशः, (४१) प्रविकसितकेसररजोविसरबध्यमानचारुधूसरिमाणः, खरजःसिकतिलतिलकतलाः, (४२) प्रविचलितालिङ्गवः,

इति मेदिनी) भरिताः,—पूर्णाः, अत एव नमिता इति भावः, नमेरवः यत्र तथोक्ताः]। नीलेति।—नीलदलाः,—श्यामलपर्णाः, नलदानि—तृणीराः, नारिकेलनिकराः,—लाङ्गलीहत्तसमूहाश्च येषु ते, ("स्यादीरणं वीरतरं मूलिऽप्यौशीरमस्त्रियाम्। अथ नलदं सैव्यम्" इति "नारिकेलस्तु लाङ्गली" इत्युभयत्राप्यमरः)। करीति।—करिकेसराः,—नागकेसराः, ["करिकेसर—" इत्यत्र "हरिकेशर—" इति पाठेऽपि,—हरिकेशराः,—अहिकेशराः, नागकेशराः इत्यर्थः, ("हरिस्तृणार्कमातङ्गयमकेसरिकपिषु" इति मेदिनी) सरलाः,—देवदारवः पीतदृच्छया वा, यस्मात् "तार्पिच" इति प्रसिद्ध तैलं क्रियते लोकैरित्यर्थः, ("पीतदृः सरलः पूतिकाष्ठश्च" इत्यमरः) तेषां परिकराः,—सङ्घाः, समूह इत्यर्थः, ("भवेत् परिकरः सङ्घे धर्मेङ्गपरिवारयोः" इति मेदिनी) येषु ते।

(३९) कोरकेति।—कोरकाणां—कलिकानां, निकुरम्बैः,—सङ्घैः, रोमाञ्चिताः,—सञ्जातरोमहर्षा इव लक्ष्यमाणाः, कुरबकाणां—रक्तास्थानानां, ये योषितामालिङ्गनैः, पुष्णन्तीति कविसमयप्रसिद्धिः, तेषामित्यर्थः, राजयः,—श्रेण्यः येषु ते।

(४०) रक्तेति।—रक्तानां—रक्तवर्णानां, विकसितानामित्यर्थः, अशोकानां—बन्धुजीवानां, ये योषितां पादाघातैः विकसन्तीति प्रसिद्धिः, तेषामिति भावः; पल्लवलावण्यैः,—किसलयकान्तिभिः, लिप्यमानाः—विच्छुरन्त्यः, दशदिशः,—आशाः येषु ते।

(४१) प्रविकसितेति।—प्र—प्रकर्षेण, विकसितानां—प्रस्फुटितानां, केसराणां—बकुलानां, ये कान्तायाः प्रेयसीमुखसेकात् विकसन्तीति कविसमयख्यातेः, तेषामित्यर्थः, ("अथ केसरे बकुल." इत्यमरः) रजोविसरेण—परागप्रसरेण, बध्यमानाः,—सङ्क्रम्यमाणाः, चारवः,—मनोज्ञाः, धूसरिमाणः,—धूसरत्वानि येषां येषु वा ते। खरजः इति।—खरजोभिः,—निजपरागैः, सिकतिलानि—सैकतमयानि, बालुकामयानीव स्थितानीत्यर्थः, तिलकानां—तिलतरूणां, ये प्रसादितानुरागवशीकृतजनमावेशैव पुष्पिताः सञ्जायन्ते इति भावः, तेषां तलानि—अधोदेशाः येषु येषां वा ते।

(४२) प्रविचलितेति।—प्रविचलिताः,—कम्पिताः, अलयः,—भृङ्गाः

प्रचुरपूगफलाः, (४३) प्रसवपूगपिङ्गप्रियङ्गवः, परागपिञ्जरितमञ्जरीपुञ्जायमानमधुपमञ्जुझिञ्जाजनितजनमुदः, (४४) मदमलमेचकितमुचुकुन्दस्कन्धकाण्डकथ्यमाननिःशङ्ककरिकटकण्डूतयः, (४५) उड्डीयमाननिःशङ्कचटुलकृष्णशारशावसकलशाद्वलसुभगभूमयः, (४६) तमःकालतमतमालमालामौलिता-

पवाणि येषु ते। प्रचुरेति।—प्रचुराणि—बहूनि, पूगानां—गुवाकानां, फलानि—अस्थानि येषु ते।

(४३) प्रसवेति।—प्रसवानां—फलानां पुष्पाणां वा, ("स्यादुत्पादो फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः) पूगेन—क्रमुकवृन्दैः, ("पूगः क्रमुकवृन्दयोः" इत्यमरः) पिङ्गाः,—पिङ्गलवर्णाः, प्रियङ्गवः,—श्यामाभिधाः येषु ते। परागेति।—परागैः,—रजोभिः, पिञ्जरिताः,—पिङ्गलवर्णाः, या मञ्जर्यः,—वल्लर्यः, ताभिः पुष्प्यमाणानां—सङ्कुसुमायमानानां, मधुपानां—भ्रमराणां, मञ्जुझिञ्जया—मनोहरेण रुतेन, जनिताः,—उत्पादिताः, जनानां—लोकानां, मुदः,—आनन्दाः यैः तथाभूताः।

(४४) मदेति।—मदस्य—दानजलस्य, मलेन—कलङ्केन, मेचकिताः,—संसक्तचन्द्रकाः, श्यामला वा, ("मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान्" इति मेदिनी) ये मुचुकुन्दाः,—पुष्पतरुभेदाः, चम्पकविशेषा इति यावत्, तेषां स्कन्धा इव काण्डाः,—मूलात् शाखाऽवधिविभागाः,("अस्त्री प्रकाण्डः स्कन्धः स्यात् मूलाच्छाखाऽवधिस्तरोः" इत्यमरः); यद्वा,—तेषां स्कन्धाः,—मूलात् शाखाऽवाधप्रदेशाः, तेषां काण्डाः,—दण्डाः, वर्गा वा, समूहा इत्यर्थः, ("काण्डोऽस्त्रीदण्डवाणार्ववर्गावसरवारिषु" इत्यमरः) तैः कथ्यमानाः,—निर्वेद्यमानाः, निःशङ्कानां—निर्भयानां, करिणां—हस्तिनां, कटयोः,—गण्डयोः, ["गण्डः कटः" इत्यमरः। "—कट—" इत्यत्र "—करट—" इति पाठेऽपि स एवार्थः, "कार्कैभगण्डौ करटौ" इत्यमरवचनात्] कण्डूतयः,—कण्डूयनानि येषु येषां वा ते।

(४५) उड्डीयमानेति।—उड्डीयमानैः,—उत्पतद्भिः, निःशङ्कैः,—निर्भयैः, चटुलैः,—चपलैः, कृष्णशारशावानां—कृष्णसारशिशूनां, सकलैः,—सर्वैः, शाद्वलाः,—श्यामाः इत्यर्थः; यद्वा,—कृष्णशारशावसकलैः शाद्वलैः,—शाद्वलरितिच, कृष्णहरिणैः हरिद्वर्णैर्युतैः श्यामैरित्यर्थः,("शाद्वलः शाद्वलरिते" इत्यमरः); अत एव सुभगाः,—इष्टाः, भूमयः,—तलदेशा येषां तथाभूताः।

(४६) तम इति।—तमांसि इव—अन्धकारा इव, कालतमाः,—अति-

तपाः, स्रवकदन्तुरितदेवदारवः, (४७) तरलताम्बूलीस्तम्ब-जालकितजम्बूजम्बीरवीथयः, कुसुमरजोधवलधूलीकदम्बचक्र-चुम्बितव्योमानः, (४८) बहलमधुमोक्षोक्षितक्षितयः, परि-मलघटितघ्राणतृप्तयः, (४९) कतिपयदिवसप्रसूतकुक्कुटीकुटी-कृतकुटजकोटराः, (५०) चटकासञ्चार्यमाणषाचाटचाटकैर-

---

नीलाः, याः तमालमालाः,—तापिच्छश्रेण्यः, ताभिः मीलिताः,—श्रमिता इत्यर्थः, आतपाः,—सौरालोका येषु तथोक्ताः। स्रवकैरिति।—स्रवकैः,—गुच्छैः, दन्तुरिताः,—सञ्जातदन्ता इव लक्ष्यमाणाः, देवदारवः,—भद्रदारुवृक्षा येषु तथोक्ताः।

(४७) तरलैरिति।—तरलानां—चपलानां, ताम्बूलीनां—नागवल्लीनां, स्तम्बैः,—गुच्छैः, जालकिताः,—युक्ताः, जम्बूनां—जाम्बवानां, जम्बीराणां—दन्तशठाख्यानां तरूणाञ्च, ("स्युः जम्बीरे दन्तशठजम्भजम्बीरजम्भलाः" इत्यमरः) वीथयः,—श्रेणयः येषु ते। कुसुमेति।—कुसुमानां—पुष्पाणां, रजांसि एव—परागा एव, धवलधूल्यः,—शुभ्रपांशवः, तासां कदम्बचक्रैः,—निचयमण्डलैः, चुम्बितं—स्पृष्टं, व्योम—आकाशं यैः तथोक्ताः; यद्वा,—कुसुमरजोभिः,—पुष्पपरागैः, स्वयंयैरिति भावः, धवलाः,—शुभ्राः, ये धूलीकदम्बाः,—तदाख्यनीपभेदाः, ("धूलीकदम्बो नीपे स्यात् तिनिशे वरुणद्रुमे" इति मेदिनी) तेषां चक्रैः,—समूहैः, चुम्बितं व्योम यत्र तथोक्ताः।

(४८) बहलेति।—बहलेन—प्रभूतेन, मधुना—मकरन्दानां, मोक्षेण—वर्षेण, उक्षिताः,—सिक्ताः, क्षितयः,—तलभूमयः येषां ते। परिमलेति।—परि-मलेन—पुष्पादीनां सौरभेण, घटिता—जनिता, घ्राणानां—घ्राणेन्द्रियाणां, तृप्तिः,—तर्पणं यैः तथोक्ताः।

(४९) कतिपयेति।—कतिपयेषु—अल्पसङ्ख्यकेषु इत्यर्थः, दिवसेषु—दिनेषु, सूताभिः,—प्रसूतवतीभिः, सुक्कगर्भाभिरित्यर्थः, कुक्कुटीभिः,—ताम्रचूडपक्षीभिः, कुटीकृतानि—आवासीकृतानि, कुटजानां—गिरिमल्लिकाद्रुमाणां, कोटराणि—बिलानि येषु तथोक्ताः।

(५०) चटकेति।—चटकया—तदाख्यया पक्षिण्या, सञ्चार्यमाणैः,—नीय-मानैः, वाचाटैः,—मुखरैः, कूजद्भिरित्यर्थः, चाटकैः,—चटकाया अपत्यानि शुनीः;

क्रियमाणचाटवः, (५१) सहचरीचारुचक्षुरचकोरचञ्चवः, निर्भयभूरिभूकण्डभुज्यमानपाककपिलपीलवः, (५२) सदाफलकट्फल फलविशसननिःशूक शुकशकुन्त-शातित-शलाटवः, (५३) शैलेयसुकुमारशिलातलसुखशयितशशशिशवः, (५४) शेफालिकाशिफाविवरविस्रब्धविवर्त्तमानगौधेरराशयः,

चाटकैराः तैः, चटकाशावकैरित्यर्थः, क्रियमाणाः,—उच्चार्य्यमाणा इत्यर्थः, चाटवः, —मधुरस्वना येषु तथोक्ताः।

(५१) सहचरीति।—सहचरीभिः,—सङ्गिनीभिः, चकोरीचक्षुभिरित्यर्थः, चकोरीभिः सहेति भावः; चारणे—भक्षणे, ["चारण" इत्यत्र "चरण" इति पाठः समीचीनतया प्रतिभाति, भक्षणार्थकस्य चारणशब्दस्य कोषादावदृष्टत्वात्, चरणशब्दस्य च तदर्थकत्वात्,तथा च मेदिनी,—"चरणोऽस्त्री बहूचादौ मूले गोत्रे पदेऽपि च। भक्षणे भक्षणे वाऽपि नपुंसक उदाहृतः॥" इति] चक्षुराः,—निपुणाः, चकोराणां—तदाख्यपक्षिणां, चञ्चवः,—चञ्चुयः येषु तथोक्ताः। निर्भयेति।—निर्भयैः,—निःशङ्कैः, भूरिभिः,—बहुभिः, भूकण्डैः,—पक्षिविशेषैः, भुज्यमानानि—खाद्यमानानि, पाकेन—परिणामेन, कपिलानि—पिङ्गलानि, पीलूनि—गुड़फलाख्यफलानि, "आखरोट्" इति प्रसिद्धाः फलविशेषाः इत्यर्थः, ("पीलौ गुड़फलः स्रंसौ" इत्यमरः) येषु तथोक्ताः।

(५२) सदेति।—सदाफलाः,—सदा फलन्तीति तथाभूताः, ये कट्फलाः, —औषधिकाख्या वृक्षाः, "कायफल" "कायफाल" इति वा वङ्गीयैराख्याता इत्यर्थः, तेषां फलविशसने—फलभेदने; यद्वा,—सदाफलानां—नारिकेलानां, ("सदाफलः स्कन्दफले नारिकेलेऽप्युदुम्बरे" इति मेदिनी) कट्फलफलानाञ्च विशसने, निःशूकाः, —अतत्त्वज्ञा इत्यर्थः,ये शुकशकुन्ताः,—कीराख्यपक्षिणः, तैः शातिताः,—पातिताः, शलाटवः,—अपक्वानि फलानि येषां ते, ("आमे फले शलाटुः स्यात्" इत्यमरः)।

(५३) शैलेयेति।—शैलेयेन—शैलजाख्यपर्व्वतजातसुगन्धिद्रव्येण, सुकुमारं —सुरम्यं, सुकोमलमित्यर्थः, यत् शिलातलं—प्रस्तरखण्डं, तत्र सुखेन—आनन्देन, अक्लिष्टभावेनेत्यर्थः, शयिताः,—निद्राणाः ("निद्राणशयितौ समौ" इत्यमरः) शशानां —मृगभेदानां, "खरगोस्" इति वङ्गे प्रसिद्धानामित्यर्थः, शिशवः,—शावकाः येषु येषां वा ते।

(५४) शेफालिकेति।—शेफालिकानां—नीलिकाख्यपुष्पप्रधानद्रुवाणां,

(५५) निरातङ्करङ्गवः, निराकुलनकुलकेलयः, कल-कोकिलकुलकवलितकलिकोद्गमाः, (५६) सहकाराराम-रोमन्थायमानचमूकयूथाः, यथासुखनिषण्णनीलाण्डजमण्डलाः, (५७) निर्विकारबकविलोक्यमानपोतपीतगवयधेनवः, (५८) श्रवणहारिमनीडगिरिनितम्बनिर्झरनिनादनिद्रानन्द-

---

मृगाः—मृगेषु, यानि विवराणि—कोटराणि, तेषु विसब्भं—निःशङ्कं यथा तथा, विवसमानाः,—तिष्ठन्तः, गोधेराणां—गोधिकाकियूनां, ("वर्या गोधेरगोधारगोधेया गोधिकात्मजे" इत्यमरः) राशयः,—समूहाः येषु तथोक्ताः ।

(५५) निरातङ्करङ्गवः,—निःशङ्करङ्गमृगाः । निराकुलेति ।—निराकुलाः, —निःशङ्काः, नकुलानां—भुजङ्गघातिप्राणिविशेषाणां, "वेजि" इति वङ्गे प्रसिद्धानामित्यर्थः, केलयः,—विचरणानि येषु तथाभूताः । कलेति ।—कलैः,—मधुरस्वरैः, कोकिलानां—पिकानां, कुलैः,—समूहैः, कवलिताः,—भक्षिताः, कलिकोद्गमाः, —कोरकप्ररोहाः येषां ते ।

(५६) सहकारेति ।—सहकाराणाम्—अतिसौरभवतामाम्राणाम्, ("आम्रयूतौ रसालोऽसौ सहकारोऽतिसौरभः" इत्यमरः) आरामेषु—उपवनेषु, कृत्रिमवनेषु इति यावत्, काननेषु इति भावः, ("आरामः स्यादुपवनं कृत्रिमं वनमेव तत्" इत्यमरः) रोमन्थायमानानि—प्राग्भक्षितानि उद्गीर्य चर्व्यन्ति, चमूकाणां—मृग-भेदानां, यूथानि—सङ्घाः येषु तथोक्ताः । यथेति ।—यथासुखं—सुखमनतिक्रम्य, यादृक्तया उपवेशनेन सुखं भवति,तथेत्यर्थः, निषण्णानि—उपविष्टानि, नीलानि—नीलवर्णानि, अण्डजानां—पक्षिणाम् ; यद्वा,—नीलाण्डजानाम्—शुक्याख्यमृग-विशेषाणां, मण्डलानि—वृन्दानि येषु तथोक्ताः ।

(५७) निर्विकारेति ।—निर्विकारैः,—विकारशून्यैः, प्रशान्तैरित्यर्थः, आश्रम-माहात्म्येन प्रशमितहिंसाऽऽचारत्वादिति भावः ; बकैः,—तरक्षुभिः, दूरादागतैर्वा, कुकुराकारव्याघ्रविशेषैरित्यर्थः, ("कोकस्त्वोदादृगो बकः" इत्यमरः) विलोक्यमानाः, —दृश्यमानाः, पीतपीताः,—पीतैः,—शावकैः, ("पीतः पाकोऽर्भको शिशुः पृदाकुः शावकः शिशुः" इत्यमरः) पीताः,—पीतवर्णा इत्यर्थः, गवयधेनवः,—गोसदृशाकारा गवलकज्वलविहीनाः पशुभेदाः येषु तथोक्ताः ।

(५८) श्रवणेति ।—श्रवणं—कर्णं, हरति—आकर्षतीति श्रवणहारी—श्रुतिसुख इत्यर्थः, तनीयसि—सन्निकृष्टस्थे,—निकटवर्तिनि इत्यर्थः, ("तनीयसि निकटा-

मन्द्रायमान करिकुलकर्णतालदुन्दुभयः, (५९) समासन्न-किन्नरीगीतरवरसमानरुरवः, प्रमुदिततरतरच्चवः, (६०) चत-हरितहरिद्राद्रवरज्यमानवनवराहपोतपोत्रवलयः, गुञ्जाकुञ्ज-गुञ्जजाहकाः, (६१) जातीफलकसुप्तशालिजातकवलयः, (६२) दशनकुपितकपिपोतपेटकपाटितपाटलकोटपुटकाः,

सन्नद्धनिकृष्टसनीडवत्" इत्यमरः) गिरिनितम्बस्य—पर्वतकटिखलायाः, निर्झर-निनादः,—वारिप्रवाहध्वनिः, तेन या निद्रा—स्वप्नः, निद्राऽऽवेश इत्यर्थः, तया आनन्दः,—सुखं, तेन मन्द्रायमानः,—क्वासं गच्छन्निति यावत्, करिकुलानां—गज-वृन्दानां, कर्णताल एव—कर्णास्फालनमेव, दुन्दुभिः,—वाद्यविशेषः येषु तथोक्ताः।

(५९) समासन्नेति।—समासन्नानां—सन्निहितानां, किन्नरीणां—देवयोनि-विशेषाणां, गीतरवेण—सङ्गीतनादेन, रसमानाः,—सुखमनुभवन्तः इत्यर्थः, मृगाणां गीतप्रियत्वादिति भावः; रुरवः,—मृगविशेषाः येषु तथोक्ताः। प्रमुदिततरतरच्चवः, —प्रमुदिततराः,—अतिप्रहृष्टाः, तरच्चवः,—मृगादनाः, "नेकड़े" इति वङ्गे प्रसिद्धाः व्याघ्रभेदाः यत्र तथोक्ताः, ("तरच्चुस्तु मृगादनः" इत्यमरः)।

(६०) चतेति।—चतायाः,—क्षुण्णायाः, चर्व्वितायाः इति भावः; हरितायाः, —श्यामलायाः, अयुष्कायाः इति यावत्, हरिद्रायाः,—पीतायाः; यद्वा,—हरितस्य —मुञ्जविशेषस्य, तृणभेदस्य वा, हरिद्रायाश्च; द्रवेण—रसेन, रज्यमानाः,—कुर्व्य-माणाः, वनवराहपोतानाम्—अरण्यशूकरशिशूनां, ["पोतः पाकोऽर्भको डिम्भः शिशुकः शावकः शिशुः" इत्यमरः। "—वनवराहपोत—" इत्यत्र "—नववराह-पोत—" इति पाठे,—नव्योजातवराहशिशूनामित्यर्थः] पोत्रवलयः,—मुखनिचयाः येषु तथोक्ताः, ("मुखाग्रे क्रोडइलयोः पोत्रम्" इत्यमरः)। गुञ्जेति।—गुञ्जाकुञ्जेषु—काकचिक्यलतावेष्टितस्थानेषु, गुञ्जन्तीति गुञ्जाः,—कूजनशीला इत्यर्थः, ["गुञ्ज—" इत्यत्र "गुञ्जत्—" इति पाठे,—गुञ्जन्तः,—ध्वनन्तः] जाहकाः,—क्रोडाख्यप्राणि-भेदा येषां ते, ("जाहको क्रोडमाञ्जारखट्टाकाङ्खिकासु च" इति मेदिनी)।

(६१) जातीति।—जातीफलकेषु—जातीफलवृक्षसमूहेषु, सुप्ताः,—निद्रिताः, शालिजातकानां—गन्धमाञ्जारशिशूनां, "खट्टाश" इति वङ्गे प्रसिद्धानामित्यर्थः, ("शालिस्तु कलमादौ च गन्धमाञ्जारके पुमान्" इति मेदिनी) वलयः,—समूहाः येषु तथोक्ताः।

(६२) दशनेति।—दशने,—दन्तसङ्घट्टने, कुपिताः,—क्रुद्धाः, निकटदन्त-

(६३) लकुचलम्पटगोलाङ्गूललङ्घ्यमानलवलयः, बद्धबालुकालवालवलयाः, (६४) कुटिलकुटावलिवलितवेगगिरिनदिकास्रोतसः, (६५) निविड़शाखाकाण्डलम्बमानकमण्डलवः, (६६) सूत्रशिक्यासक्तरिक्तभिक्षाकपालपल्लवितलतामण्डपाः, (६७) निकटकुटीकृतपाटलमुद्राचैत्यकमूर्त्तयः,

भङ्गीभिः प्रकटितनिर्झरोषा इत्यर्थः, ये कपीनां—वानराणां, पोताः,—शिशवः, तेषां पेटकैः,—समूहैः, पाटितानि—भक्षितानि, पाटलकोटपुटकानि—श्वेतरक्तवर्णकोटनिचयाः यैषां ते ; यद्वा,—पाटलकोटानाम्—आयुधान्यस्त्रकोटविशेषाणाम्, ("आयुर्न्नीहि; पाटलः स्यात्" इत्यमरः) पुटकानि—आवरणानि, आलया इत्यर्थः, यैषां ते ।

(६३) लकुचेति ।—लकुचेभ्यः,—डहुभ्यः, ("लकुचो लिकुचो डहुः" इत्यमरः) लम्पटाः,—लुब्धाः, ये गोलाङ्गूलाः,—कृष्णमुखकपिविशेषाः, तैः लङ्घ्यमानाः,—आक्रम्यमाणाः, उत्प्लुत्यमाना वा, लवलयः,—"गोयाड़" इति वङ्गे प्रसिद्धाः वृक्षविशेषा येषु येषां वा ते । बद्धेति ।—बद्धं—रचितं,बालुकाभिः,—सिकताभिः, आलबालवलयम्—आवापमण्डलं, मूलदेशेषु जलरक्षार्थं वेष्टनमित्यर्थः, यैषां तथोक्ताः ।

(६४) कुटिलेति ।—कुटिलाभिः,—वक्राभिः, कूटानां—लतावितपानां, पर्व्वतानां वा, वृक्षाणां वा, आवलिभिः,—श्रेणीभिः, वलिताः,—निरुद्धाः, वेगाः,—द्रुतगतय इत्यर्थः, यैषां तथाविधानि, गिरिनदिकानां—पार्व्वत्यसरितां, स्रोतांसि—प्रवाहा येषु तथोक्ताः ।

(६५) निविड़ेति ।—निविड़ेषु—सान्द्रेषु, स्थूलेषु इत्यर्थः, शाखाकाण्डेषु—विटपस्कन्धेषु, लम्बमानाः,—तिष्ठन्तः, कमण्डलवः,—कुण्डाः, मुनीनां जलपात्रविशेषाः इति यावत्, यैषां तथोक्ताः ।

(६६) सूत्रेति ।—सूत्रेषु—सूत्रनिर्म्मितेषु, शिक्येषु—काचेषु, वृक्षलम्बितेषु "शिक्का" इति वङ्गभाषायां प्रसिद्धेषु इत्यर्थः, आसक्तैः,—लग्नैः, रिक्तैः,—शून्यैः, भिक्षोपार्জ্জितान्नरहितैः इत्यर्थः, भिक्षाकपालैः,—यात्राकालद्रव्यस्थापनार्थं पात्रभेदैरित्यर्थः, पल्लवितानि—सञ्जातपल्लवानि इव कृतानि, समन्ततः स्थापनादिति भावः ; लतामण्डपाः—भङ्गीनिर्म्मितगृहाः यैषां यैषु वा तथोक्ताः ।

(६७) निकटेति ।—निकटकुटीषु—सन्निहितकुटीरेषु, कृताः,—रचिताः, पाटलमुद्रया—रक्तवर्णरचनया, चैत्यकानां—क्षुद्राणां चैत्यवृक्षाणाम्, अश्वत्थादि-

(६८) चीवराम्बररागकषायोदकदूषितोद्देशाः, मेघमया इव कृतशिखण्डिकुलकोलाहलाः, (६९) वेदमया इव अपरिमितशाखाभेदगहनाः, माणिक्यमया इव महानीलतनवः, (७०) तिमिरमया इव सकलजननयनमुषः, यामुना इव ऊर्ध्वीकृतमहाह्रदाः, मरकतमणिश्यामलाः क्रीड़ापर्व्वतका इव

प्रांशुवृक्षचयानित्यर्थः, क्षुद्राकृतिवृक्षविल्वानां वा, ("चैत्यमायतने वृक्षभेदे नीहेशपादपे" इति मेदिनी) मूर्त्तयः,—आकृतयः येषु तथोक्ताः, गृहभित्तौ सिन्दूरादिभिरङ्कितक्षुद्रवृक्षा इत्यर्थः।

(६८) चीवरेति।—चीवराम्बराणां—वल्कलवसनानां, कौपीनवस्त्राणां वा, रागेण—वर्णेन, कषायाणि—रक्तानि, उदकानि—जलानि, तैः दूषिताः,—आविलिताः, उद्देशाः,—निवेदशाः येषां तथोक्ताः। कृतेति।—कृतः,—विहितः, शिखण्डिनां—मयूराणां, कुलैः,—समूहैः, कोलाहलः,—कलकलः, केकावाणीत्यर्थः, येषु तथोक्ताः; अत एव मेघमया इव—जलदाच्छन्ना इव; मयूराणां मेघोदये प्रमोदोदयादिति भावः।

(६९) अपरिमितेति।—अपरिमितैः,—अगणितैः इत्यर्थः, शाखानां—विटपानां, कठकौथुमादीनाञ्च वेदांशानां, ("शाखा पक्षान्तरे शाखौ वेदभागद्रुमाङ्ग्योः" इति मेदिनी) भेदैः,—विशेषैः, गहनाः,—सान्द्राः, निबिड़ा इत्यर्थः, दुरधिगमाश्च; अत एव वेदमया इव—वेदात्मका इव। महेति।—महानीलाः,—अतिश्यामाः, भृङ्गराजा वा, भृङ्गराजवच्चपूर्णा इत्यर्थः, तनवः,—अवयवाः येषाम्; अन्यत्र,—महानीलानि—मणिभेदाः, नीलकान्ताः इति यावत्, ("महानीलो भृङ्गराजे मणिनागविशेषयोः" इति मेदिनी) तनूनि—निकृष्टानि येभ्यः तथोक्ताः।

(७०) सकलेति।—सकलानां—सर्वेषां, जनानां—लोकानां, नयनानि—चक्षूंषि, मुष्णन्ति—हरन्ति, एकत्र,—प्रीणयन्ति, अन्यत्र,—दर्शनव्यापाररहितानि कुर्व्वन्ति इत्यर्थः, इति तथोक्ताः। तिमिरमया इव—अन्धकाराच्छन्ना इव। यामुना इव—यमुनाप्रवाहा इव, ऊर्ध्वीकृतमहाह्रदाः,—ऊर्ध्वीकृताः,—उच्चैः कृताः, महान्तः,—प्रहृष्टाः, ह्रदाः,—निनादाः, पक्षिणाम् इति भावः; अन्यत्र,—उत्थापिताः,—मध्येधृता इत्यर्थः, महान्तः,—प्रभूताः, ह्रदाः,—गम्भीरजलाधारा यैः तथोक्ताः। मरकतेति।—मरकतमणिवत्—हरिदर्णमणिविशेष इव, श्यामलाः,—श्यामवर्णाः,

वसन्तस्य, (७१) अञ्जनाचला इव पल्लविताः, तनया इव अटवीजाता विन्ध्यस्य, पातालान्धकारराशय इव भित्त्वा भुवम् उत्थिताः, (७२) प्रतिवेशिका इव वर्षावासरागाम्, अंशावतारा इव कृष्णरात्रीणाम्, इन्द्रनीलमयाः प्रासादा इव वनदेवतानां, पुरस्तात् दर्शनपथम अवतेरुः तरवः।

ततो नरपतेः अभवन्मनसि,—(७३) "अदूरवर्त्तिना खलु भवितव्यं भदन्तेन" इति। अवतीर्य्य च गिरिसरितं समुपस्पृश्य युगपदिभ्रामसमय समुन्मुक्त हेषाघोष बधिरीकृताटवीगहनाम् अस्मिन् एव प्रदेशे स्थापयित्वा वाजिसेनाम्, अवलम्ब्य च तपस्विजनदर्शनोचितं विनयं हृदयेन, दक्षिणेन च हस्तेन माधवगुप्तम् अंसे, विरलैः एव राजभिः अनुगम्यमानः चरणाभ्यामेव प्रावर्त्तत गन्तुम्।

नयनरञ्जना इति भावः; अन्यत्र,—मरकतमणिना श्यामलाः, वसन्तस्य—कामसखस्य, क्रीडापर्व्वतका इव—विहारार्चला इव; सर्व्वर्तुकुसुमोत्कर्षवत्त्वादिति भावः।

(७१) अञ्जनाचला इव—कज्जलाद्रय इव, पल्लविताः,—सञ्जातपल्लवाः। अटवीजाताः,—अटवी—स्त्री इति भावः, तस्यां जाताः,—उत्पन्नाः। विन्ध्यस्य—विन्ध्याचलस्य, पुंस इति भावः।

(७२) प्रतिवेशिका इव—प्रतिच्छन्दका इव इत्यर्थः, समीपस्थानवासिन इव इति वा; वर्षावासरागाम्—वार्षिकादिनानाम्; निविडश्यामलपल्लवनवार्किभिः सुशीलमेघाच्छन्नवत् परिदृश्यमानत्वादिति भावः। कृष्णरात्रीणां—कृष्णपक्षीयनिशानाम्, अंशावतारा इव—अंशानां विभावा इव; अत्युच्चहत्वगहनैः सूर्य्यालोकप्रवेशाभावादिति भावः। इन्द्रनीलमयाः,—इन्द्रनीलाख्यमणिनिर्म्मिताः। प्रासादाः,—हर्म्याः इव; अभंलिहत्वात् अतिनीलवर्णत्वान्नेति भावः। अवतेरुः,—जग्मुरित्यर्थः।

(७३) भदन्तेन—पूज्येन बौद्धभिक्षुणा इति यावत्। अदूरवर्त्तिना—निकटवर्त्तिना। समुपस्पृश्य—आचम्य। युगपदिति।—युगपत्—समकालं, विधानसमये—स्नानादिकं विहाय समुखमुपवेशनादिकाले इत्यर्थः, समुन्मुक्तेन—समुच्चरितेन, हेषाघोषेण—क्रेषारवेण, बधिरीकृतं—श्रुतिमशक्तिरहितीकृतं, पूर्णीकृतमिति यावत्, अटवीगहनम्—अटव्या—वनेन, वनबाहुल्येनेत्यर्थः, गहनं—दुष्प्रवेशस्थाननिलयः,

(७४) अथ तेषां तरूणां मध्ये नानादेशीयैः, स्थानस्थानेषु स्थाणून् आश्रितैः, शिलातलेषु उपविष्टैः, लताभवनानि अध्यावसद्भिः, अरण्यानीनिकुञ्जेषु निलीनैः, विटपच्छायासु निषण्णैः, तरुमूलानि निषेवमाणैः, (७५) वीतरागैः, आर्हतैः, मस्करिभिः, श्वेतपटैः, पाशुपतैः, भागवतैः, वर्णिभिः, (७६) केशलुञ्चकैः, कापिलैः, जैनैः, लोकायतिकैः, काणादैः, औपनिषदैः, ऐश्वरकारणिकैः, कारन्धमिभिः, धर्म्मशास्त्रिभिः,

निविडारण्यमिति यावत्, यया तथोक्ताम्। वाजिसैनाम्—अश्वसैनिकम्। माधवगुप्तं—प्रागुक्तमालवेन्द्रसूनुम्। अंसे—स्कन्धदेशे। विरलैः,—कतिपयैः इत्यर्थः। प्रावर्त्तत—प्राक्रमत।

(७४) "अथ" इत्यादौ "दिवाकरमित्रमद्राक्षीत्" इत्युत्तरेण सम्बन्धः। तमेव विशिनष्टि, नानादेशीयैः इत्यादि।—नानादेशीयैः,—नानास्थानादागतैरित्यर्थः, स्थाणून्—शाखापत्रादिवर्জ্জितवृक्षान्। लताभवनानि—लतादिपिहितस्थानानीत्यर्थः। अध्यावसद्भिः,—अधितिष्ठद्भिः। अरण्यानीनिकुञ्जेषु—महाऽरण्यस्य लतादिपिहितोदरेषु स्थानेषु, निलीनैः,—निभृतं स्थितैः। विटपच्छायासु—विटपानां—विस्तारिणां, सपल्लवशाखानामित्यर्थः, छायाः—आतपः, विटपानां—शाखानां, छाया इति वा तासु, ("विस्तारी विटपोऽस्त्रियाम्" "विटपो न स्त्रियां स्तम्बशाखाविस्तारपल्लवे" इत्यमरमेदिन्यौ)।

(७५) वीतरागैः,—विगतविषयवासनैः। आर्हतैः,—अर्हन् देवता, उपास्य इति भावः, येषां तथोक्ताः तैः, नग्नचपणकैः इत्यर्थः, ("अर्हन्तु चपणे बुद्धे पुंसि नान्येऽन्यलिङ्गकः" इति मेदिनी)। मस्करिभिः,—परिव्राजकैः। श्वेतपटैः,—श्वेतोर्णाकम्बलवासोभिः, चपणकविशेषैरिति यावत्। पाशुपतैः,—त्यक्तकाषायैः, काषायवसनं परित्यज्य गृहीतशुभवस्त्रैरित्यर्थः। भागवतैः,—भगवद्भक्तैः, वैष्णवैरित्यर्थः। वर्णिभिः,—ब्रह्मचारिभिः, ("वर्णिनो ब्रह्मचारिणः" इत्यमरः)।

(७६) केशलुञ्चकैः,—मुण्डितशिरोभिः, ["केशलुञ्चकैः" इत्यत्र "केशलुञ्चनैः" इति पाठेऽपि स एवार्थः]। कापिलैः,—कपिलोक्तसाङ्ख्यमतवर्त्तिभिः। जैनैः,—जिनमतावलम्बिभिः। लोकायतिकैः,—लोकेषु आयतानि—विस्तीर्णानि, मतानीति शेषः, अनायासबोध्यत्वादिति भावः; तानि सन्ति एषामिति तादृशैः, चार्वाकैरित्यर्थः, ("चार्वाकलोकायतिकौ" इति कोषः)। काणादैः,—कणादकृतवैशेषिकमत-

पौराणिकैः, (७७) साप्ततन्तवैः, शाब्दैः, पाञ्चरात्रिकैः, अन्यैश्च स्वान् स्वान् सिद्धान्तान् शृण्वद्भिः, (७८) अभियुक्तैः, चिन्तयद्भिश्च, प्रत्युच्चरद्भिश्च, संशयानैश्च, निश्चिन्वद्भिश्च, व्युत्पादयद्भिश्च, विवदमानैश्च, अभ्यस्यद्भिश्च, व्याचक्षाणैश्च, (७९) शिष्यतां प्रतिपन्नैः दूरादेव आवेद्यमानम् ; अतिविनीतैः कपिभिः अपि चैत्यकर्म कुर्वाणैः, (८०) त्रिसरणपरैः परमोपासकैः शुकैरपि

बार्हतैः। औपनिषदैः,—वेदान्तिकैः, ब्रह्मवादिभिरित्यर्थः। ऐश्वरकारणिकैः,—ईश्वरः जगत्कारणमिति वादिभिः, नैयायिकैरित्यर्थः। कापर्दिभिः,—धातुवादिभिः, ("कापर्दी कार्षकारे धातुवादरतेऽपि च" इति मेदिनी) पाषण्डविशेषैः वा। धर्मशास्त्रिभिः,—आर्षैः। पौराणिकैः,—पुराणज्ञैः।

(७७) साप्ततन्तवैः,—सप्ततन्तुः,—क्रतुः, यज्ञः इत्यर्थः, ("सप्ततन्तुर्मखः क्रतुः" इत्यमरः) स एव उपास्यः, इष्टफलप्रद इति भावः, येषां तथोक्तैः, कर्मयोगिभिरित्यर्थः। शाब्दैः,—शब्दशास्त्राणि व्याकरणादीनि अधीयते विदन्तीति वा तथोक्तैः। पाञ्चरात्रिकैः,—पञ्चविधं रात्रं ज्ञानं यत्र तत्, "रात्रन्तु ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम्। पञ्चरात्रमिति ख्यातम्—" इत्युक्तः पञ्चज्ञानसाधन नारदाद्युक्तग्रन्थभेदः इति यावत्, तदस्यास्य इति पाञ्चरात्रिकः, तैः पाञ्चरात्रिकाः तैः, पञ्चरात्रोदितशास्त्रानुगामिभिः इत्यर्थः। सिद्धान्तान्—आगमान्।

(७८) अभियुक्तैः,—अभिनिविष्टैः। चिन्तयद्भिः,—भावयद्भिः, शास्त्रतत्त्वमिति भावः। प्रत्युच्चरद्भिः,—प्रत्युत्तरं ददद्भिः, गुर्वाक्यावधारणमनु उच्चरद्भिरिति वा। संशयानैः,—सन्दिहद्भिः। निश्चिन्वद्भिः,—सन्देहं निराकुर्वद्भिः। व्युत्पादयद्भिः,—व्युत्पत्तिं शब्दानामर्थावबोधनं कारयद्भिः, गुरुरयमिति शेषः। विवदमानैः,—नानाप्रकारज्ञानपूर्वकं मिथो विरुद्धं वदद्भिः, शास्त्रविचारं कुर्वद्भिरित्यर्थः। अभ्यस्यद्भिः,—अधीतशास्त्रार्थां पौनःपुन्येन आवृत्तिं कुर्वद्भिरित्यर्थः। व्याचक्षाणैः,—व्याख्यां कुर्वद्भिः।

(७९) शिष्यतां प्रतिपन्नैः,—अङ्गीकृतशिष्यभावैः इत्यर्थः। आवेद्यमानं—मां शिष्यं कुर्विति याच्यमानं, स्वस्ववक्तव्यं विज्ञाप्यमानैरिति वा। चैत्यकर्म—बौद्धधर्मविहितं कर्म, अहिंसादिरूपमिति भावः।

(८०) त्रिसरणपरैः,—त्रीणि सरणानि—गतयः, बौद्धधर्मभेदाः इति यावत्, तेषु परा:,—तत्पराः तैः। परमोपासकैः,—श्रेष्ठसेवकैः। शुकैरपि—तदाख्यपक्षिभिः

शाक्यशासनकुशलैः कोशं समुपदिशद्भिः, (८१) शिक्षापदोपदेशोपशमशालिनीभिः शारिकाभिः अपि धर्मदेशनां दर्शयन्तीभिः, (८२) अनवरतश्रवणगृहीतालोकैः कौशिकैरपि बोधिसत्त्वजातकानि जपद्भिः, जातसौगतशीलशीतलस्वभावैः शार्दूलैरपि अमांसाशिभिः उपास्यमानम्; (८३) आसनोपान्तोपविष्टविस्रब्धानेककेसरिशावकतया मुनिपरमेश्वरम्

रपि। शाक्येति।—शाक्यस्य—बुद्धदेवस्य, शासने—आज्ञायाम्, आज्ञापालने इत्यर्थः, कुशलाः,—निपुणाः, तत्परा इत्यर्थः, तैः, तत्पशाक्यश्रमणकानामाचारादिदर्शनादिति भावः। कोशं—बुद्धसिद्धान्तग्रन्थम्। समुपदिशद्भिः,—एवमेवं कुरु इत्यादिशिष्येभ्यः कथयद्भिरित्यर्थः, कोशं वाचयतां मुखेभ्यः श्रुत्वेति भावः। शुकानामाश्रवत्वस्य प्रसिद्धत्वम्।

(८१) शिक्षेति।—शिक्षायाः पदानि—सुप्तिङन्तानि, तेषाम् उपदेशेन—शिष्येभ्यः शिक्षाप्रदानेन इत्यर्थः, य उपशमः,—शान्तिः, इन्द्रियदमनमित्यर्थः, तेन शालन्ते—शोभन्ते इति तथोक्ताभिः। शारिकाभिः,—"सयना" इति प्रसिद्धाभिः पक्षिणीभिरित्यर्थः, धर्मदेशनां—धर्मचर्चाम्; पूर्ववत् दर्शनश्रवणादिभिरिति भावः।

(८२) अनवरतेति।—अनवरतश्रवणेन—नित्याकर्णनेन, गृहीतः,—प्राप्तः, आलोकः,—ज्ञानं यैः तथाभूतैः। कौशिकैरपि—उलूकैरपि, पेचकैरपीत्यर्थः, ("महेन्द्रगुग्गुलूलूकव्यालयाहिषु कौशिकः" इत्यमरः)। बोधिसत्त्वेति।—बोधि—ज्ञानि, सत्त्वं—मनः यस्य तथाविधः; यद्वा,—बोधौ—समाधिविशेषे, सत्त्वं—मनो यस्य तथाविधः, अथवा बोधौ—पिप्पलपादपे, अश्वत्थवृक्षतले इत्यर्थः, सत्त्वं—व्यवसायः, सिद्धिलाभार्थमुद्यम इत्यर्थः, यस्य तादृशः, बुद्धदेव इत्यर्थः, ("बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे" "सत्त्वं गुणे··· । ···व्यवसायाशुचित्वश्लो तु जन्तुषु" इति च मेदिनी) तस्य जातकानि—जन्मवृत्तान्ताः तानि, जपद्भिः,—कीर्त्तयद्भिः। जातेति। —जातेन—उत्पन्नेन, सद्भावस्थानादिति भावः, सौगतस्येव—बौद्धस्येव, शीलेन—चरितेन, शीतलः,—प्रशान्तः, हिंसावर्जित इत्यर्थः, स्वभावः,—प्रकृतिः येषां तैः।

(८३) आसनेति।—आसनस्य—उपवेशनपीठस्य, उपान्तेषु—प्रान्तदेशेषु, उपविष्टाः,—आसीनाः, विस्रब्धाः,—निःशङ्काः, हिंसादिविवर्जिते आश्रमे निवासादिति भावः; अनेके—बहवः, केसरिणां—सिंहानां, शावकाः,—शिशवः यस्य तथोक्तः, तस्य भावः, तत्ता तया हेतुना, मुनिः,—"दुःखेष्वनुद्विग्नमनाः

अकृत्रिम इव सिंहासने निषण्णम् ; उपशमसमिव पिबद्भिः वनहरिणैः जिह्वालताभिः उपलिह्यमानपादपल्लवम् ; वामकरतलनिविष्टेन नीवारम् अश्नता पारावतपोतेन कर्णोत्पलेन इव प्रियां मैत्रीं प्रसादयन्तम् ; (८४) इतरकरकिसलयनखमयूखलेखाभिर्जनितजनव्यामोहम् ; उड्डीवं मयूरं मरकतमणिकरकमिव वारिधाराभिः पूरयन्तम् ; इतस्ततः पिपीलकश्रेणीनां श्यामाकतण्डुलकणान् स्वयमेव किरन्तम् ; अकृणेन

सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थिरधीर्मुनिरुच्यते ॥" इत्युक्तलक्षणः स्थिरचित्तः वीतरागादिः भद्रली दिवाकरमित्रः, परमेश्वर इव तम् ; अशक्यसाधनादिति भावः । अकृत्रिमे इव—स्वभावनिष्पन्ने इव, सत्यस्वरूपे इत्यर्थः, आसनीपान्तोपविष्टानेकसिंहशिशुकत्वादिति भावः । उपशमसमिव—शान्तरसमिव, वनहरिणानां शान्तप्रकृतिकत्वादिति भावः । उपलिह्यमानपादपल्लवं—सृश्यमानचरणकिसलयम् । नीवारं—तृणधान्यम् । अश्नता—खादता । पारावतपोतेन—कपोतशिशुना । कर्णोत्पलेन इव—कर्णभूषणीभूतेन कुवलयेनेव, कर्णभूषणार्थमुपायनीकृतेन उत्पलेनेवेत्यर्थः ; सौकुमार्यात् वर्णसाम्याच्च पारावतपोते कर्णोत्पलत्वारोपो बोध्यः । प्रियां—प्रीतिभाजनीम्, अभिमतामित्यर्थः, मैत्रीं—सर्वजीवेषु सौहार्दं, प्रसादयन्तं—प्रसन्नां कुर्वन्तम्, आह्लादयन्तमित्यर्थः ; करतलोपरि पारावतान् उपवेश्य भोज्यप्रदानेन सर्वजीवेषु मैत्रीं विशेषेण प्रकटयन्तमिति भावः ।

(८४) इतरेति ।—इतरस्य—वामादन्यस्य, दक्षिणस्य इत्यर्थः, करकिसलयस्य—बाहुपल्लवस्य, नखानां—नखराणां, मयूखलेखाभिः,—किरणराजिभिः । जनितेति । —जनितः,—उत्पादितः, जनानां—लोकानां, व्यामोहः,—विशेषेण मोहनं येन तथोक्तं, जनचित्तमुग्धकरमित्यर्थः, नखसौन्दर्येण मुग्धीभावः, चन्द्रकरश्लाघिनी इति भावः । उड्डीवम्—उन्नमितग्रीवम् । मरकतमणिकरकमिव—हरिदश्मरत्नविशेषनिर्मितपक्षिविशेषमिव ; मयूरग्रीवाया मरकतसदृशवर्णत्वादिति भावः, ("करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च" इति मेदिनी) । पूरयन्तं—ग्रीवयन्तमित्यर्थः ; मयूरं जलं पाययन्तमिति निष्कर्षः । किरन्तं—ददतम् ; बौद्धधर्मान्तर्गतजैनधर्मावलम्बिनां तथाविधाचारस्य लोके सर्वथा परिदृश्यमानत्वात् बौद्धानामपि तादृशाचारकर्म बोद्धव्यम् ।

(८५) चीवरपटलेन स्वदीयसा संवीतं बहलबालातपानुलिप्तमिव पौरन्दरं दिग्भागम् ; (८६) उल्लिखितपद्मरागप्रभाप्रतिमया रक्तावदातया देहप्रभया पाटलीकृतानां काषायरङ्गमिव दिशामपि उपदिशन्तम् ; (८७) अनौद्धत्यात् अधोमुखेन मन्दमुकुलितकुमुदाकारेण स्निग्धधवलप्रसन्नेन चक्षुषा जनक्षुण्णक्षुद्रजन्तुजीवनार्थम् अमृतमिव वर्षन्तम् ; सर्व्वशास्त्राक्षरपरमाणुभिः इव निर्म्मितम् ; परमसौगतमपि अवलोकितेश्वरम् ; (८८) अस्खलितम् अपि तपसि लग्नम् ;

(८५) चीवरपटलेन—जीर्णवसनेन इत्यर्थः, संवीतम्—आच्छादितम् ; अत एव बहलेति।—बहलेन—प्रभूतेन, बालातपेन—नवोदितसूर्य्यालोकेन, अनुलिप्तः,—रञ्जितः तं, पौरन्दरम्—ऐन्द्रम्, इन्द्राधिष्ठितमित्यर्थः, दिग्भागमिव—पूर्व्वमिवेति भावः, स्थितमिति शेषः।

(८६) उल्लिखितेति।—उल्लिखितस्य—उद्भूतस्य, पद्मरागस्य—"पौखराज" इति प्रसिद्धस्य मणिभेदस्य, प्रभायाः,—दीप्तेः, प्रतिमा—तुल्या तया, रक्तावदातया—लोहितोज्ज्वलया। पाटलीकृतानां—रक्तीकृतानां, दिशामपि—ककुभामपि, काषायरङ्गमिव—कषायरक्तवसनधारणमिव।

(८७) अनौद्धत्यात्—प्रशान्तत्वात्। मन्देति।—मन्दम्—ईषत्, मुकुलितं—मुद्रितं, कुमुदं—कैरवं, तस्य इव आकारः,—मूर्त्तिः यस्य तेन। स्निग्धेति।—स्निग्ध—कोमलमित्यर्थः, धवलं—शुभ्रं, प्रसन्नं—प्रीतिप्रफुल्लञ्च तेन। जनेति।—जनैः,—लोकैः, हिंसापरैरिति भावः, क्षुण्णानां—दलितानां, विनष्टानामित्यर्थः, क्षुद्रजन्तूनाम्—इतरजीवानां, कीटपतङ्गादीनामिति यावत्, जीवनार्थं—प्राणदानार्थमित्यर्थः, अमृतमिव—सुधामिव, वर्षन्तं—विकिरन्तम् ; अमृतसेकेन मृताः जीवन्ति इति प्रसिद्धम्। सर्वेति।—सर्वेषां—कृत्स्नानां, शास्त्राणां—तन्त्राणाम्, अक्षराणां—वर्णानां, परमाणुभिः,—अतिसूक्ष्मावयवैरित्यर्थः ; वैदिकसौगतादिशास्त्राणामतिनिगूढार्थेष्वपि सुनिपुणमित्यर्थः। परमसौगतं—परमबौद्धम्। अवलोकितेश्वरम्—अवलोकितः,—दृष्टः, ईश्वरः,—जगत्कारणं येन तथोक्तमिति विरोधः, सुगतानामीश्वरानङ्गीकारादिति भावः, ईश्वरः,—भगवान्, बुद्धदेव इत्यर्थः, इति परिहारः, ("सर्व्वज्ञः सुगतो बुद्धो धर्म्मराजस्तथागतः। समन्तभद्रो भगवान्—" इत्यमरः)।

(८८) अस्खलितमपि—अपतितमपि। तपसि—संयमे। स्खलितस्य इव

आलोकमिव यथाऽवस्थितसकलपदार्थप्रकाशकं दर्शनार्थिनाम् ; सुगतस्यापि अभिगमनीयमिव, धर्म्मस्यापि आराधनीयमिव, प्रसादस्यापि प्रसादनीयमिव, मानस्यापि माननीयमिव, वन्द्यत्वस्यापि वन्दनीयमिव ; (८६) जन्म यमस्य, नेमिं नियमस्य, तत्त्वं तपसः, शरीरं शौचस्य, कोशं कुशलस्य, वेश्म विश्वासस्य, सहृत्तं सहृत्तताया: ; सर्व्वस्वं सर्व्वज्ञतायाः, दाक्ष्यं दाक्षिण्यस्य, पारं परानुकम्पायाः, निर्व्वृतिं सुखस्य, मध्यमे वयसि वर्त्तमानं दिवाकरमित्रम् अद्राक्षीत्। अतिप्रशान्त-

---

कुत्रचिदवलम्बनाल्लग्नत्वसम्भवाद् विरोधः, यतः स्खलितो हि अन्यत्र लग्नो भवति इति बोध्यम्। अस्खलितं—स्खलनं—करणीयकार्य्यस्य भंशनं, तद्रहितमिति विरोधपरिहारः, अभ्रष्टशीलमपश्च इत्यर्थः। यथेति।—यथा—येन रूपेण, अवस्थातुं—वर्त्तितुं योग्यं तथास्थितं, यथाऽवस्थितं तथाभूतानां, स्वस्वभावे वर्त्तमानानामित्यर्थः, सकलपदार्थानां—सर्व्ववस्तूनां, सद्रूपेण स्थितानां, न तु असद्रूपाणामिति भावः ; प्रकाशकं—ज्ञापकम् ; उपदेशादिना इति भावः। सुगतस्यापि—सर्व्वज्ञस्यापि, बुद्धस्यापीत्यर्थः, दर्शनार्थिन इति भावः। अभिगमनीयमिव—सेवनीयमिवेत्यर्थः, ज्ञानशिक्षार्थमिति भावः, महाज्ञानिनमिति तात्पर्य्यम्। धर्म्मस्येति।—महाधर्म्मपरायणमित्यर्थः, प्रसादस्यापि—प्रसन्नताया अपि ; अतिसुप्रसन्नाकारमित्यर्थः। माननीयमिव—सर्वेषामेव सम्मानार्हमित्यर्थः। वन्द्यत्वस्येति।—सर्व्वलोकपूजार्हमित्यर्थः।

(८६) यमस्य—बाह्येन्द्रियनियन्तृत्वस्य, जन्म—उत्पत्तिम्। नियमस्य—अन्तरिन्द्रियनियन्तृत्वस्य, नेमिं—परां काष्ठामिति भावः। तपसः,—तपस्यायाः, तत्त्वमिव—स्वरूपमिव। शौचस्य—पवित्रतायाः। कोशं—भाण्डागारम् ; सर्व्वप्राणिनां शिवकरमिति भावः। वेश्म—गृहम्। सहृत्तताया:,—सुशीलताया:, सहृत्तं—सच्चरितम्, अतीव सुचरितमित्यर्थः। सर्व्वस्वं—सारधनम्। दाक्षिण्यस्य—उदारताया:, सरलतायाः वा ; यद्वा,—दाक्षिण्यस्य—दक्षिणार्हस्य,("दक्षिणीयो दक्षिणार्हस्तत्र दाक्षिण्य इत्यपि" इत्यमरः) दाक्ष्यं—पाटवम् ; अत्युदारं, सर्वेषामेव एकमात्रदक्षिणार्हमिति वाऽर्थः। परानुकम्पायाः,—परानुग्रहस्य, परोपकारस्य इत्यर्थः, पारम्—अन्तम् ; एकान्तपरोपकारनिरतमित्यर्थः। सुखस्य—आनन्दस्य, निर्व्वृतिं—सुखं, सुखस्यापि सुखदमिति भावः ; सदानन्दमयमिति तात्पर्य्यम् ; ("निर्व्वृतिः स्खलितावस्थामने च सुखे स्त्रियाम्"

गम्भीराकारारोपितबहुमानश्च सादरं दूरादेव शिरसा मनसा वचसा च ववन्दे।

दिवाकरमित्रस्तु (८०) मैत्रीमयः प्रकृत्या, विशेषतः तेन अपरेण अदृष्टपूर्वेण अमानुषलोकोचितेन सर्वाभिभाविणा महानुभावाभोगभाजा भ्राजिष्णुना भूपतेः अप्राकृतेन आकारविशेषेण, तेन च आभिजात्यप्रकाशकेन गरीयसा प्रश्रयेण च आह्लादितः चक्षुषि च चेतसि च युगपत् अग्रहीत्। (८१) धीरस्वभावोऽपि च सम्पादितससम्भ्रमाभ्युत्थानः, सङ्कलय्य किञ्चित् उद्गमनकेन विलोलं विलम्बमानं

इति मेदिनी)। मध्यमे वयसि—यौवनवार्द्धकयोः मध्यावस्थायां, त्रिंशदूर्ध्वं पञ्चपञ्चाशतो वर्षस्य मध्ये इत्यर्थः। अतीति।—अतिप्रशस्तेन—अतिसौम्येन, गम्भीरेण—गाम्भीर्यपूर्णेन, अचापलेनेत्यर्थः, आकारेण—मूर्त्या, आरोपित,—स्थापितः इत्यर्थः, दिवाकरमित्रे इति भावः; बहुमानः,—अत्यादरः येन यस्य वा तथाभूतः सन्।

(८०) मैत्रीमयः,—सद्भावपूर्णः, प्रकृत्या—स्वभावेन, प्रकृत्या एव मैत्रीमयः आसीदित्यर्थः। तेन—तादृशेनेत्यर्थः, अतिप्रशस्तेनेति यावत्, अपरेण—नास्ति परः, —अन्यः यस्मात् यस्य वा तेन, नास्ति परस्मिन् यत् तेन इति वा, अनुपमेनेत्यर्थः। अमानुषलोकोचितेन—अलौकिकेन, स्वर्लोकोचितेनेत्यर्थः। सर्वाभिभाविणा—सर्वातिशायिना। महानुभावाभोगभाजा—महान्—अतीव, अनुभावः—प्रभावो यस्य, तथाविधो य आभोगः,—सन्निवेशः, तं भजते इति तथोक्तेन। भ्राजिष्णुना—राजमानेन। अप्राकृतेन—अलौकिकेन, अतिमनोरमेणेत्यर्थः। तेन—तादृशेनेत्यर्थः, अन्यत्र दुर्लभेनेति भावः। आभिजात्यप्रकाशकेन—महाकुलजन्मसूचकेन। गरीयसा—अतिगुरुणा, सुमहता इत्यर्थः। प्रश्रयेण—विनयेन। चक्षुषीत्यादि।—तस्य कृपाकृष्टः सबहुमानं ददर्श, विनयदर्शनेन कोऽयं महानुभवः इति मनसि तर्कयामास चेत्यर्थः।

(८१) ["धीरस्वभावः" इत्यत्र "वीरस्वभावः" इति पाठो न युज्यते, तथाविधस्य वीरभावकीर्तनस्य अनौचित्यादिति अवधेयम्]। सम्पादितेति।—सम्पादितम्—अनुष्ठितं, ससम्भ्रमं—त्वरितासहितम्, अभ्युत्थानम्—उद्गमनं येन तथाभूतः। सङ्कलय्य—संयम्य, यथास्थानं स्थापयित्वा इत्यर्थः। उद्गमनकेन—उत्थानेन हेतुना।

वामांसात् चीवरपटान्तम्, (९२) उत्क्षिप्य अनेकाभयदान-दीक्षादक्षिणो दक्षिणं महापुरुषलक्षणलेखाप्रशस्तं, स्निग्धमधुरया वाचा सगौरवम् आरोग्यदानेन राजानम् अन्वग्रहीत्; अभ्यनन्दच्च स्वागतगिरा, गुरुमिव अभ्यागतं बहु मन्यमानः स्वेन आसनेन,—"आस्तम् अत्र" इति निमन्त्रयाञ्चकार; पार्श्वे स्थितञ्च शिष्यम् अब्रवीत्,—"आयुष्मन्! उपानय कमण्डलुना पादोदकम्" इति। राजा तु अचिन्तयत्,—(९३) "अलीढः खलु संयमनपाशः सौजन्यम् अभिजातानाम्। स्थाने खलु तत्रभवान् गुणानुरागी ग्रहवर्म्मा बहुशो वर्णितवान् अस्य

विलोलं—चञ्चलम्। विलम्बमानं—दोलायमानं, संसजमानमिति यावत्। वामांसात्—वामस्कन्धात्। चीवरपटान्तं—जीर्णवसनप्रान्तभागम्।

(९२) उत्क्षिप्य—उत्तोल्य। अनेकेति।—अनेकेषां—बहूनां, जीवानामिति भावः; अभयदानमेव—आश्वासप्रदानमेव, दीक्षा—व्रतविशेषः, तत्र दक्षिणः,—अनुकूलः, ["—दीक्षादक्षिणः" इत्यत्र "—दीक्षादक्षिणम्" इति पाठः समीचीनतया प्रतिभाति, प्रसङ्गानुरोधात् "उत्क्षिप्य" इति क्रियायाः "महापुरुष—" इत्यादि-विशेषणस्यानुरोधाच्चेति मन्तव्यम्। अस्मिन् पक्षे—दक्षिणम्—उदारम्, अकुण्ठमित्यर्थः। दक्षिणं—सव्येतरं, भुजमिति शेषः। महेति।—महापुरुषस्य—नरोत्तमस्य, लक्षणानि—सूचकानि, या लेखाः,—रेखाः, करचिह्नविशेषाः इत्यर्थः, ताभिः प्रशस्तं—प्रशंसनीयम्। सगौरवं—सबहुमानं यथा तथा। स्निग्धमधुरया—सस्नेह-प्रियया, वाचा—वाक्येन, आरोग्यदानेन—नैरुज्यप्रदानेन, स्निग्धमधुरेण वाक्येनैव मनःपीड़ाप्रशमनद्वारा इत्यर्थः। अन्वग्रहीत्—अनुगृहीतवान्। अभ्यनन्दत्—सस्तोषयत्, सममन्यत वा। स्वागतगिरा—सुखेन आगमनम्? इति प्रश्नेन। अभ्यागतं—गृहागतम्, अतिथिमिति यावत्, राजानमिति शेषः। स्वेनासनेन—निजासन-प्रदानेनेत्यर्थः। आस्तम्—उपविश। ["आस उपवेशने" इत्यस्य लोटि रूपम्]। निमन्त्रयाञ्चकार—उपवेशनाय अनुरुरोध, आह्वानञ्चकारेत्यर्थो वा।

(९३) अलीढः,—लीढव्यतिरिक्तेऽपि निपात इत्यर्थः। संयमनपाशः,—बन्धनरज्जुः। अभिजातानां—सज्जनानाम्। स्थाने खलु—युक्तमेव, ("युक्ते ह्ये साम्प्रतं स्थाने" इत्यमरः)।

गुणान्" इति। प्रकाशश्च आवभाषे,—"भगवन्! (८४) दर्शनपुण्यानुगृहीतस्य मम पुनरुक्त इव अयमार्य्यप्रयुक्तः प्रतिभाति अनुग्रहः। (८५) चक्षुःप्रमाणप्रसादस्वीकृतस्य च परकरणमिव आसनादिदानोपचारचेष्टितम्। (८६) अतिभूमिः एव भवादृशां पुरः सम्भाषणामृताभिषेकप्रक्षालितसकलवपुषश्च मे प्रदेशग्रहणम्। पाद्यमपि अपार्थकम्। आसतां भवन्तो यथासुखम्। आसीनोऽहम्" इत्यभिधाय क्षितौ एव उपाविशत्।

"अलङ्कारो हि (८७) परमार्थतः प्रभवतां प्रश्रयातिशयः, रत्नादिकस्तु शिलाभारः" इति आकलय्य, पुनः पुनः अभ्यर्थ-

(८४) दर्शनेति।—दर्शनमेव—भवदवलोकनमेव, पुण्यं—पवित्रतासम्पादकमित्यर्थः, तेन अनुगृहीतः,—अनुकम्पितः तस्य। पुनरुक्त इव—अधिक इव। आर्य्यप्रयुक्तः,—आर्य्येण—मान्येन भवता, प्रयुक्तः,—कृतः।

(८५) चक्षुःप्रमाणेति।—चक्षुरेव—नेत्रमेव, प्रमाणं—हेतुः, ज्ञानकारणमित्यर्थः, यस्य तादृशः, प्रत्यक्षसिद्ध इत्यर्थः, यः प्रसादः,—अनुग्रहः, दर्शनदानरूप इति यावत्, तेन स्वीकृतस्य—अधीनीकृतस्य, परकरणमिव—अन्यत् साधनमिव, प्रसादस्य इति भावः; यद्वा,—परकरणमिव—इतरीकरणमिव, आत्मपरिजनात् पृथक्करणमिवेत्यर्थः। आसनेति।—आसनादिदानेन—उपवेशनपीठपाद्यादिसमर्पणेन, यः उपचारः,—सेवा, अर्हणा इति यावत्, तदर्थं चेष्टितं—प्रयत्नः।

(८६) अतिभूमिः,—भूमिमतिक्रान्ता, स्वर्गावस्थानरूपा इत्यर्थः, यद्वा,—भूमिं मर्य्यादाम्, अतिक्रान्ता, अतिभूमिः,—मर्य्यादालङ्घनमित्यर्थः। पुरः,—अग्रतः। सम्भाषणेति।—सम्भाषणमेव—सङ्कथनमेव, अमृतं—पीयूषं, तेन अभिषेकः,—स्नानं, तेन प्रक्षालितं—धौतं, निर्म्मलीकृतमिति भावः; सकलं—समग्रं, वपुः,—शरीरं यस्य तथाभूतस्य। प्रदेशग्रहणं,—एकदेशावस्थानम्; यद्वा,—प्रदेशग्रहणं,—अवस्थानम्, आसनग्रहणरूपव्यवहारः इत्यर्थः, भवद्दर्शनसम्भाषणादिभिरेव वयं कृतार्थाः स्मः; अतः आसनग्रहणन्तु न युक्तमेव, मर्य्यादातिक्रमणापराधादिति भावः। पाद्यं—पादोदकम्, अपार्थकं—निरर्थकं, पाद्यस्य प्रयोजनं नास्तीत्यर्थः।

(८७) परमार्थतः,—यथार्थतः, प्रभवतां—अभिजातानामित्यर्थः। प्रश्रयातिशयः,—विनयातिरेकः। शिलाभारः,—प्रस्तरभारः। आकलय्य—वितर्क्य इत्यर्थः।

मानोऽपि यदा न प्रत्यपद्यत पार्थिवो वचनं,तदा स्वमेव आसनं पुनरपि भेजे भदन्तः। (९८) भूपतिमुखनलिननिहित-निभृतनयनयुगलनिगडनिश्चलीकृतहृदयश्च स्थित्वा काञ्चित् कालकलां, कलिकालकल्मषकालुष्यमिव क्षालयन् अमलाभिः दन्तमयूखमालाभिः, (९९) मूलफलाभ्यवहारसम्भवम् उद्गमन् इव च परिमलसुभगं (१००) विकचकुसुमपटलपाण्डुरं लता-वनम् अवादीत्,—"अद्यप्रभृति (१०१)न केवलमयम् अनिन्द्यः, वन्द्योऽपि प्रकाशितसत्कारः संसारः। किं नाम न आलोक्यते जीवद्भिः अद्भुतम्? येन रूपम् अचिन्तितोपनतमिदं दृक्पथम् उपगतम्। एवंविधैः अनुमोद्यन्ते जन्मान्तरावस्थितसुकृतानि

अभ्यर्थ्यमानः,—प्रार्थ्यमानः, याच्यमान इत्यर्थः। प्रत्यपद्यत—अङ्गीचकार। वचनं—दिवाकरमित्रस्य वाक्यम्। भदन्तः,—क्षपणकः, दिवाकरमित्र इति यावत्।

(९८) भूपतीति।—भूपतेः,—राज्ञः, मुखनलिने—वदनपङ्कजे, निहितम्—अर्पितं, निभृतं—विनीतं, विनयव्यञ्जकमित्यर्थः, ("निभृतविनीतप्रश्रिताः समाः" इत्यमरः) नयनयुगलमेव—चक्षुर्द्वयमेव, निगडः,—शृङ्खलं, तेन निश्चलीकृतं—स्थिरीकृतं, हृदय—चेतः यस्य तथाभूतः; राज्ञि बद्धदृष्टिरित्यर्थः। स्थित्वा, तूष्णीमिति भावः। कालकलां—कालांशम्। कलिकालेति।—कलिकालस्य—चतुर्थयुगस्य, कल्मषं—पापमेव, कालुष्यं—मलम्। क्षालयन्—शोधयन्। दन्तमयूख-मालाभिः,—दशनकिरणराजीभिः।

(९९) मूलेति।—मूलस्य—कन्दविशेषस्य, फलस्य च—शस्यस्य च, अभ्यव-हारः,—भोजनं, तस्मात् सम्भवः,—समुत्पत्तिः यस्य तथोक्तम्। परिमलसुभगं—परिमलेन—सौरभेण, सुभगं—रम्यम्।

(१००) विकचेति।—विकचं—विकसितं, कुसुमानां—पुष्पाणां, पटलं—समूहः, तेन पाण्डुरं—धवलम्; मनोरमं, विशुद्धं कोमलञ्च अकथयदिति भावः।

(१०१) प्रकाशितेति।—प्रकाशितः,—प्रकटितः, सत्—साधुरेव, सारः,—उत्कर्षः यस्य तथाभूतः, अयं संसारः,—जीवलोकः, न केवलम् अनिन्द्यः,—प्रशस्त-मात्रो न, किन्तु वन्द्योऽपि—स्तुत्योऽपीत्यन्वयः। अचिन्तितोपनतम्—अतर्कितोपगत-मित्यर्थः, कल्पनाऽतीतमिति भावः। अनुमोद्यन्ते—प्रतर्क्यन्ते। जन्मान्तरावस्थित-

हृदयोत्सवैः। इह अपि जन्मनि दत्तमेव अस्माकम् अमुना तपःक्लेशेन फलम् असुलभदर्शनं दर्शयता देवानां प्रियम्। आ वक्षेः पोतम् अमृतम् (१०२) ईक्षणाभ्याम्। जातं निरुत्कण्ठं मानसं निर्वृतिसुखस्य; महद्भिः पुण्यैः विना न विश्राम्यन्ति सज्जने त्वादृग्नि दृशः; सुदिवसः सः, यस्मिन् जातोऽसि। सा (१०३) सुजाता जननी, या सकलजीवलोकजीवितजनकम् अजनयत् आयुष्मन्तम्। पुण्यवन्ति पुण्यानि अपि तानि, येषामसि परिणामः। सुकृततपसः ते परमाणवः, ये तव परिगृहीतसर्वावयवाः। तत्सुभगं सौभाग्यम्, आश्रितोऽसि

सुकृतानि—पूर्वजन्माऽर्जितपुण्यानि। हृदयोत्सवैः,—चित्तस्य प्रकृष्टानन्दैरित्यर्थः; पूर्वजन्मानुष्ठितमहत्पुण्यकर्मफलेनैव ईदृशापूर्वरूपदर्शनजा चित्तप्रीतिः जायते इति मन्ये इति निष्कर्षः। असुलभदर्शनं—दुर्लभावलोकनम्।

(१०२) ईक्षणाभ्यां—नेत्राभ्याम्। मानसं—चित्तं, निर्वृतिसुखस्य—निर्वृतौ—शान्तौ, यत् सुखम्—आनन्दः तस्य, निरुत्कण्ठं—निरुद्वेगं, जातं—उत्तम्; ईदृशसुभगरूपदर्शनसुखमनुभूय चेतः सुखान्तरनिरपेक्षं भवतीति भावः, ["निर्वृतिसुखस्य" इत्यत्र "निर्वृत्तिसुखस्य" इति पाठः,—वासनाहृतिजनितानन्दइत्यर्थः]। न विश्राम्यन्ति—न विरमन्ति। त्वादृग्नि—भवत्सदृशं। दृशः,—चक्षूंषि; भवादृशस्य सत्पुरुषस्य दर्शनादेव चक्षुषो रूपतृष्णा निवर्तते, तत्र महद्भिः पुण्यैरेव सञ्जायते इति भावः। यस्मिन्—यस्मिन् दिवसे।

(१०३) सुजाता—सफलजननी, तस्या एव मातुर्जन्मग्रहणं सार्थकमित्यर्थः। सकलेति।—सकलस्य—कृत्स्नस्य, जीवलोकस्य—जगतः, जगदासिनः इत्यर्थः, जीवितजनकं—प्राणदमित्यर्थः, रक्षणपोषणादिना इति भावः। येषां—पुण्यानाम्। परिणामः,—फलम्; अतिसौभाग्यं हि पुण्यस्य, येन त्वादृशः आश्रयो लब्धः इति भावः। ते—त्वदवयवारम्भका इति यावत्, परमाणवः,—द्व्यणुकरूपावयवारम्भकसूक्ष्मभूतानि, सुकृततपसः,—सुकृतानि—स्वाचरितानि, तपांसि—तपस्याः यैः तादृशाः; अत्युत्कटतपस्या कृतवन्त इत्यर्थः। ये—परमाणवः। परिगृहीतेति।—परिगृहीताः,—स्वीकृताः, आश्रिता इति यावत्, सर्वे अवयवाः,—अङ्गानि यैः तादृशाः; ये परस्परं मिलिताः तव अङ्गरूपेण परिणता इत्यर्थः। सौभाग्यं—शुभाद्दृष्टं, सुभगं—

येन। भव्यः स पुरुषभावः, भवति अवस्थितो यः। यत्नस्य, मुमुक्षोरपि मे पुण्यभाजम् आलोक्य पुनः श्रद्धा जाता मनुजजन्मनि। न इच्छन्ति अपि अस्माभिर्दृष्टः कुसुमायुधः। कृतार्थमद्य चक्षुः वनदेवतानाम्। अद्य सफलं जन्म पादपानां, येषामसि गतो गोचरम्। (१०४) अमृतमयस्य भवतो वचसां माधुर्य्यं कार्य्यमेव। अस्य तु ईदृशे शैशवे विनयस्य उपाध्यायं ध्यायन्नपि न सम्भावयामि भुवि। सर्व्वथा शून्य आसीत् अजाते दौर्घायुषि गुणग्रामः। धन्यः सः (१०५) भूभृत्, यस्य वंशे मणिरिव मुक्तामयः सम्भूतोऽसि। एवंविधस्य च पुण्यवतः (१०६) कथञ्चित् प्राप्तस्य केन प्रियं समाचराम इति पारिप्लवं चेतो नः। सकलवनचरसार्थसाधारणस्य कन्दमूलफलस्य

शोभनैश्वर्य्ययुक्तम्। येन—सौभाग्येन; त्वामाश्रयं लब्ध्वैव सौभाग्यस्य सुभगत्वं सञ्जातमिति भावः। भव्यः,—भवितुं योग्यः, लब्धस्य इति यावत्। पुरुषभावः,—पौरुषम्। भवति—त्वयि; त्वदाश्रितं पौरुषमेव सर्वैराकाङ्क्षणीयमिति भावः। मुमुक्षोः,—मुक्तिलिप्सोः। मनुजजन्मनि—मनुष्यदेहधारणे; मुक्तिलाभेच्छां विनिहानस्य मे पुनर्जन्मग्रहणे अभिलाषो जायते इति सरलार्थः। कुसुमायुधः,—कामः; मारञ्जितो बुद्धदेवस्य उपासकानां सुमुक्षूणां वा कामादिप्रसङ्गस्य निषिद्धत्वादिति भावः। गोचरम्—इन्द्रियविषयं, दर्शनपथमित्यर्थः।

(१०४) अमृतमयस्य—पीयूषस्वरूपस्य। कार्य्यमेव—कर्म्म एव, तव अमृतमयत्वात् त्वदुच्चारितवाक्यस्यापि अमृतवत् स्वादुत्वं बोद्धव्यं, "कारणगुणाः कार्य्यगुणमारभन्ते" इति न्यायादिति भावः। उपाध्यायम्—आचार्य्यम्। ध्यायन्—चिन्तयन्। शून्यः,—निरवलम्बनः। अजाते—अनुत्पन्ने, तव जन्मनः प्रागिति भावः।

(१०५) भूभृत्—राजा, पर्व्वतश्च। वंशे—कुले, वेणौ च। मुक्तामयः,—मौक्तिकरूपश्च।

(१०६) कथञ्चित्—अतिकृच्छ्रेणेत्यर्थः; अस्माकं बहुभाग्येनेति भावः। प्राप्तस्य—अत्र समागतस्य, चक्षुर्विषयतां गतस्य इत्यर्थो वा। समाचराम,—अनुष्ठेयम्। पारिप्लवं—चञ्चलं, ("चञ्चलं तरलञ्चैव पारिप्लवपरिप्लवे" इत्यमरः)। सकलेति।—सकलानां—सर्वेषां, वनचराणाम्—अरण्यवासिनां, सार्थस्य—समूहस्य, साधारणं—

गिरिसरिदभसो वा कं वयम्? (१०७) अपरोपकरणीकृतस्तु कायकलिः अयमस्माकम्। सर्व्वस्वम् अवशिष्टमिष्टातिथ्याय। (१०८) स्वायत्ताश्च विद्यन्ते विद्याविन्दवः कतिचित्। उपयोगन्तु न प्रीतिः विचारयति। यदि च (१०९) नोपरुणद्धि कञ्चित् कार्य्यलवम्, अरचणीयाक्षरं वा कथनीयं, तत् कथयतु भवान्, श्रोतुम् अभिलषति हृदयं सर्व्वमिदं नः। केन कृत्यातिभारेण भव्यो भूषितवान् भूमिम् एताम् अभ्रमणयोग्याम्? कियदवधिर्वा शून्याटवीपर्य्यटनक्लेशः कल्यागराशेः? कस्माच्च

सामान्यं तस्य, वनवासिसुलभस्येत्यर्थः। गिरिसरिदभसः,—पार्व्वत्यनदीसलिलस्य। कं वयम्?—न अधिकारिणो वयमेव, येन भवदर्थं क्रियते इति भावः; सर्व्वेषां चरसाधारणात् नो वयं निर्व्यूढाधिकारिणः इत्याशयः।

(१०७) अपरोपकरणीकृतः,—न परस्य—अन्यस्य, उपकरणीकृतः,—अधीनीकृतः इत्यर्थः, स्वायत्त इति भावः। कायकलिः,—कायः,—देह एव, कलिः,—कीरकः, क्षुद्रशरीरमित्यर्थः, तुच्छदेह एव अस्माकं स्वायत्तः, अत एव इममेव आतिथ्याय समर्पयामि इति भावः; यद्वा,—अपरेति।—अपरेषाम्—अन्येषाम्, उपकरणीकृतः,—अधीनीकृतः, परोपकाराय नियोजित इत्यर्थः। कायकलिः,—कायः,—देह एव, कलिः,—अन्त्ययुगः; अशेषदुःखहेतुत्वादिति भावः; अत एव इममेव तव परिचर्य्यार्थं नियोजयामि इत्याशयः, अपरोपकरणीकृतत्वात्; एतेनापि नाम्नाकम् अधिकारोऽस्तीति निष्कर्षः। इष्टातिथ्याय—प्रियातिथिसत्काराय, सर्व्वस्वं—सर्व्वधनं, देहः देहव्यतिरिक्तञ्च यत्किञ्चिदस्तीति भावः, अवशिष्टं—शेषीभूतम्; देहादिकं यत्किञ्चिदस्ति तत्सर्व्वमतिथिसत्कृतये नियोजयामीति भावः।

(१०८) स्वायत्ताः,—स्वाधीनाः, अधीत्येत्यादिचयत्वाच्चेति भावः। विद्याविन्दवः,—विद्यालेशाः, कतिचित्परिमिता इत्यर्थः। उपयोगम्—उपकारिताम्; मम एतेन क्षुद्रदेहेन सामान्यविद्यया वा भवतां कोऽप्युपकारः भवति न वा इत्येवम्।

(१०९) कञ्चित् कार्य्यलवं—कार्य्यबिन्दुं, तुच्छमपि कार्य्यमित्यर्थः, यदि न उपरुणद्धि—उपयति, क्षुद्रकार्य्येष्वपि चेत् बाधा न भवति इत्यर्थः। अरचणीयाक्षरं—न रचणीयानि—न गोप्यानि इत्यर्थः, अक्षराणि—वर्णानि यस्य तथाभूतम्। कथनीयं—वक्तव्यम्। कृत्यातिभारेण—कार्य्यातिशयेन। भव्यः,—भद्रकारकोऽयम्

(११०) सन्तप्तरूपा इव ते तनुः इयमसन्तापार्हा विभाव्यते ?" इति।

राजा तु सादरतरम् अब्रवीत्,—"आर्य्ये! (१११) दर्शितसम्भ्रमेण अनेन मधुरसविसरम् अमृतमिव हृदयधृतिकरम् अनवरतं वर्षता वचसा एव ते सर्व्वम् अनुष्ठितम्। धन्योऽस्मि, यत् एवम् अभ्यर्हितम् अनुपचरणीयम् अपि मान्यो मन्यते माम्। अस्य च महावनभ्रमणपरिक्लेशस्य कारणम् अवधारयतु मतिमान्। मम हि (११२) विनष्टनिखिलेष्टबन्धोः जीवितानुबन्धस्य निबन्धनम् एका एव यवीयसी स्वसा अवशिष्टा। साऽपि भर्तुः वियोगात् (११३) वैरिपरिभवभयात् भ्रमन्ती कथमपि विन्ध्यवनमिदम् अशुभशवरबलबहुलम् अगणितगजकुलकलिलम् अपरिमितसृमपतिशरभभयम्

इत्यर्थः। अभ्यर्हणीयान्—अर्चीयगमनाम् इत्यर्थः। कियदवधिः,—कियान्—कतिदिनानीत्यर्थः, अवधिः,—मर्य्यादा यस्य तथाभूतः; किमुद्दिश्य दुःखक्लेशं स्वीकरोषि ? किं वा लब्ध्वा निवर्त्तिष्यसे ? इति भावः। कल्याणरागः,—प्रभूतश्रेयोयोग्यस्य इत्यर्थः।

(११०) सन्तप्तरूपा इव—अत्यर्थंयिता इव। असन्तापार्हा—क्लेशसहनायोग्या। विभाव्यते—लक्ष्यते।

(१११) दर्शितसम्भ्रमेण—दर्शितादरेण। मधुरसविसरं—मधुररसप्रवाहम्। हृदयधृतिकरं—चित्तसन्तोषकरम्। सर्व्वम्—आतिथ्यादिकम्। अभ्यर्हितम्—अभिपूजितम्; ["मतिबुद्धि—" (३।२।१८८ पा०) इति वर्त्तमाने क्तः। "अभ्यर्हितम्" इत्यत्र "अभ्यर्हणीयम्" इति युक्ततया प्रतिभाति]। अनुपचरणीयम्—अनादरणीयम्।

(११२) विनष्टेति।—विनष्टाः,—विध्वस्ताः, निखिलाः,—समग्राः, इष्टाः,—प्रियाः, बन्धवः,—स्वजनाः यस्य तथाभूतस्य। जीवितानुबन्धस्य—जीवनधारणस्य, जीवनसंयोगस्य वा, निबन्धनं—हेतुः, यवीयसी—कनिष्ठा। स्वसा—भगिनी। ["अवशिष्टा" इत्यत्र "अवशेषा" इति पाठान्तरम्]।

(११३) वैरिपरिभवभयात्—वैरिणः,—शत्रोः, परिभवः,—तिरस्कारः, पीडनमिति यावत्, तस्मात् भयं—त्रासः तस्मात्। अशुभेति।—अशुभैः,—दुराचारैः,

(११४) उत्क्रमक्षिप्तमुषितपथिकगमनम् अतिनिश्चितशरकुश-पक्षम् (११५) अवटशतविषमम् आविशत्। अतः ताम् अन्वेष्टुं वयमनिशं निशि निशि च सततम् इमाम् अटवीम् अटामः; नचैनाम् आसादयामः। कथयतु च गुरुः, अपि यदि कदाचित् कुतश्चिदनचरतः श्रुतिपथम् उपगता तद्वार्त्ता" इति।

अथ तत् श्रुत्वा (११६) जातोद्वेग इव भदन्तः पुनः अभ्य-धात्,—"धीमन्! न खलु कश्चिदेवंरूपो दुष्टात्मोऽस्मानभ्युप-गतवान्। अभाजनं हि वयम् इष्टजानां प्रियाख्यानोपायनानां भवताम्"। इत्येवं भाषमाण एव तस्मिन् अकस्मादागत्य

अवराणां—म्लेच्छविशेषाणां, बलैः,—सैन्यैः, बहुलं—व्याप्तम्। अगणितैरिति।—अगणितैः,—असङ्ख्यातैः, गजानां—हस्तिनां, कुलैः,—वृन्दैः, कलिलं—गहनम्, आकीर्णमित्यर्थः, दुष्प्रवेशमिति यावत्, ("कलिलं गहनं समे" इत्यमरः)। अपरि-मितेति।—अपरिमितम्—अतिशयितं, मृगपतिभ्यः,—सिंहेभ्यः, शरभेभ्यः,—"अष्टापादोऽष्टनयन ऊर्ध्वपादचतुष्टयः" इत्युक्तलक्षणशरभेदेभ्यश्च, भयं—त्रासः यस्मिन् तथाभूतम्।

(११४) उत्क्रमेति।—उत्क्रमैः,—महद्भिः, महिषैः,—लुलापैः, मुषितम्—अपहृतं, पथिकानां—पान्थानां, गमनं—प्रयाणं यस्मिन् तथोक्तम्। अतिनिशितेति। —अतितीक्ष्णैः,—अतितीक्ष्णैः, शरैः,—गुन्द्राख्यलक्षणभेदैः, कुशैः,—दर्भैश्च, पक्षं—कर्कशं, खरस्पर्शमित्यर्थः।

(११५) अवटेति।—अवटानां—गर्त्तानां, ("गर्त्तावटौ भुवि स्त्रियै" इत्यमरः) शतैः,—समूहैः, विषमं—ततानतत्वाद् दारुणम्। अनिशम्—अत्यन्तं यथा तथा, अन्वेष्टुमिति योजना। निशि निशि—प्रतिनिशमित्यर्थः, चकारात् दिवाऽपि इति भावः। अटवीम्—अरण्यम्। अटामः,—भ्रमामः। आसादयामः,—प्राप्नुमः, अपि—सम्भावनायां, प्रश्ने वा। तद्वार्त्ता—तस्याः,—मम भगिन्याः, वार्त्ता—वृत्तान्तः।

(११६) जातोद्वेगः,—उत्कण्ठितः, अभ्युपगतवान्—प्राप्तवान्। अभाजनम्—अपात्रम्। प्रियेति।—प्रियाणि—इष्टानि, आख्यानानि—कथनान्येव, उपायनानि —उपढौकनानि तेषाम्।

अपरः, (११७) श्रमिनि वयसि वर्त्तमानः, सम्भ्रान्तरूप इव पुरस्तात् उपरचिताञ्जलिः, जातकरुणः, प्रचरितचक्षुः भिक्षुः अभाषत,—"भगवन् भदन्त! महत् कष्टं वर्त्तते। (११८) बाला एव बलवद्व्यसनाभिभूता भूतपूर्व्यापि कल्याणरूपा स्त्री शोकाविशविवशा वैश्वानरं विशति। सम्भावयतु ताम् अप्रोषितप्राणां भगवान्। (११९) अभ्युपपद्यतां समुचितैः समाश्वासनैः। अनुपरतपूर्व्वं कृमिकीटमपि दुःखितं दयाराशेः आर्य्यस्य गोचरगतम्" इति।

राजा तु (१२०) जातानुजाग्रद्धः सौदर्य्यस्नेहाच्च अन्तर्द्रुत इव दुःखेन दोदूयमानहृदयः कथमपि गद्गदिकागृहीतकण्ठो विकलवाग् वाष्पायमाणदृष्टिः पप्रच्छ,—

(११७) श्रमिनि—श्रान्ते, चरमे इति यावत्। सम्भ्रान्तरूपः,—साध्वसाकारः। उपरचिताञ्जलिः,—कृतकरपुटः, कृताञ्जलिरित्यर्थः। जातकरुणः,—उत्पन्नकृपः, सदयः इत्यर्थः। प्रचरितचक्षुः,—स्रवदश्रुः। कष्टं—शोकजनकं घटनम्।

(११८) बाला एव—बालिका एव, बाल्ये वयस्येवेति भावः। बलवद्व्यसनेति। —बलवता—प्रबलेन, व्यसनेन—विपदा, अभिभूता—परिभवं नीता। भूतपूर्व्या—अतिक्रान्तपूर्व्यावस्था, दुरवस्थामापन्नापि इत्यर्थः, कल्याणरूपा—शुभाकारा, सुखञ्च इत्यर्थः। शोकाविशविवशा—शोकातुरा। वैश्वानरम्—अग्निम्। सम्भावयतु—समाश्वियतां, सान्त्वयतु इत्यर्थः। अप्रोषितप्राणाम्—अगतजीवनाम्।

(११९) अभ्युपपद्यताम्—अनुगृह्यताम्। समुचितैः,—योग्यैः। समाश्वासनैः,—सान्त्वनैः। अनुपरतपूर्वं—पूर्वस्मिन् न उपरतं—न विनष्टं, मृतप्रायमित्यर्थः। गोचरगतं—दृष्टिविषयीभूतं, कृच्छ्रापन्नमिति भावः।

(१२०) जातानुजाग्रद्धः,—जाता—उत्पन्ना, अनुजा—भगिनी, इति अद्धा—सन्देहः यस्य तथाभूतः। सौदर्य्यस्नेहात्—भगिनीप्रीतिवशात्। अन्तर्द्रुत इव—अन्तर्गलित इव, द्रवीभूतान्तःकरण इवेत्यर्थः। दोदूयमानहृदयः,—पुनः पुनः सन्तप्यमानचेताः इत्यर्थः; [दुनोतेः यक्ति शानचि रूपम्]। गद्गदिकेति।—गद्गदिकया—बाष्पवेग, शोकहर्षादिजेन कण्ठावरोधकभावविशेषेणेत्यर्थः, गृहीतः,—आक्रान्तः, रुद्धः इत्यर्थः, कण्ठः,—गलदेशः, कण्ठध्वनिरिति यावत्, यस्य तथाभूतः। अश्रु इव

(१२१)"पाराशरिन्! कियद्दूरे सा योषिदेवंजातीया? जीविता कालम् एतावन्तम्? इति; पृष्टा वा त्वया,—'कासि? कस्यासि? कुतोऽसि? किमर्थं वनम् इदमभ्युपगतासि? विशसि च किं निमित्तम् अनलम्?' इति। आदितः प्रभृति कार्त्स्न्येन कथ्यमानमिच्छामि श्रोतुं, कथमार्य्यस्य गता गोचरम्? आकारतो वा कीदृशी?" इति।

तथाऽभिहितस्तु भृभुजा भिक्षुः आचचक्षे,—"महाभाग! श्रूयताम्,—अहं हि प्रत्यूषसि एव अद्य वन्दित्वा भगवन्तम्, अनेनैव (१२२) नदीरोधसा सैकतसुकुमारेण यदृच्छया विहृतवान् अतिदूरम्। एकस्मिंश्च (१२३) वनलतागहने गिरिनदीसमीपभाजि भ्रमरीणामिव हिमहृतकमलाकरकातराणां रसितं, सार्य्यमाणानाम् अतितारतानवर्त्तिनीनां वीणातन्त्रीणा-

विकलवाक्—स्खलितवचनः। बाष्पायमाणदृष्टिः,—बाष्पायमाणा—बाष्पमुद्गमनं, ["बाष्पीमथ्यामुद्गमने" (३।१ १६ पा०) इति क्यङि आनचि रूपम्]। दृष्टिः,—नेत्रं यस्य तथाभूतः, अश्रुदृष्टनयन इत्यर्थः।

(१२१) पाराशरिन्!—भिक्षो! एवंजातीया—भवदर्शितप्रकारेत्यर्थः। कार्त्स्न्येन—साकल्येन, सविशेषमिति यावत्। गोचरम्—इन्द्रियविषयीभूतम्, दृष्टिपथमित्यर्थः।

(१२२) नदीरोधसा—सरित्तीरेण, ("कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु" इत्यमरः)। सैकतसुकुमारेण—सिकतामयकोमलेन। यदृच्छया—स्वेच्छया। विहृतवान्—गतवान्।

(१२३) वनेति।—वनलताभिः,—आरण्यवल्लीभिः, गहने—निबिड़े, दुष्प्रवेशे इत्यर्थः। हिमेति।—हिमेन—तुषारेण, हृतः,—नाशितः, कमलाकरः,—पद्मनिवहः, ("आकरो निवहोत्पत्तिस्थानमध्येषु कथ्यते" इति मेदिनी) तेन कातराः,—व्याकुलाचाराः। रसितं—ध्वनितम्। सार्य्यमाणानां—संस्क्रियमाणानां, सङ्गीतशास्त्रानुसारेण यथायथं तन्त्रीसंयोजनं क्रियमाणानामित्यर्थः। अतीति।—अतितारः,—अतिमन्द्रान्, तानः,—सङ्गीतस्वरविशेषः, तस्मिन् वर्त्तने—तिष्ठन्ति

मिव झाङ्कारम् एकतानं नारीणां रुदितम् (१२४) अधृतिकरम् अतिकरुणम् आकर्णितवान् अस्मि । समुपजातकौतूहलश्च गतोऽस्मि तं प्रदेशम् । (१२५) दृष्टवानस्मि च दृषत्खण्डखण्डिताङ्गुलिगलल्लोहितेन च, (१२६) पार्ष्णिप्रविष्टशरशलाकाग्रशल्यशूलसङ्कोचितचक्षुषा च, (१२७) अध्वनीनश्रमक्षयथुनिश्चलचरणेन च, स्थाणुव्रणव्यथितगुल्फबद्धभूर्जत्वचा च, (१२८) वातखुड्खेदखञ्जजङ्घाजातज्वरेण च, पांशु-

---

इति तथोक्तानाम् । वीणातन्त्रीणां—वल्लकीगुणानाम् । एकतानं—समस्वरम्, अनवरतं वा ।

(१२४) अधृतिकरम्—अधैर्यजननम् । ["समुपजातकौतूहलश्च" इत्यत्र "समुपजातकुतश्च" इति पाठान्तरम्] ।

(१२५) "दृष्टवानस्मि" इत्यत्र "धौतिम्" इत्युत्तरेण सम्बन्धः । तां विशिनष्टि, दृषदित्यादि ।—दृषदां—शिलानां, खण्डैः,—शकलैः, खण्डिताभ्यः,—निकृत्ताभ्यः, अङ्गुलिभ्यः,—करशाखाभ्यः, गलत्—स्रवत्, लोहितं—रक्तं यस्य तेन ।

(१२६) पार्ष्णीति ।—पार्ष्णिषु—चरणतलपश्चिमभागेषु, गुल्फाधोभागेषु इत्यर्थः, प्रविष्टा—विद्धा, शराणां—गुन्द्राख्यतृणविशेषाणां, याः शलाकाः,—प्रतनुदीर्घकाष्ठिकाविशेषाः, ता एव शल्यानां—शङ्कुनामास्त्रविशेषाणां, शूलानि—शूलायवत् तीक्ष्णानि अयांसि इत्यर्थः, तैः, तज्जनितयातनाभिरित्यर्थः, सङ्कोचिते—कुटिले, चक्षुषी—नेत्रे यस्य तेन ।

(१२७) अध्वनीनेति ।—अध्वनीनः,—अध्वगमनजनितः, यः श्रमः,—आयासः, तस्य क्षयथुः,—हृद्धिः ; यद्वा,—अध्वनीनश्रमेण यः क्षयथुः,—शोथः, पादयोः स्फीतता इत्यर्थः, तेन निश्चलौ—स्थिरौ, गतिशक्तिरहितौ इत्यर्थः, चरणौ—पादौ यस्य तेन । स्थाणवेति ।—स्थाणुः,—शङ्कुः, ("स्थाणुर्वा ना ध्रुवः शङ्कुः" इत्यमरः) तस्य इदं स्थाणव—स्थाणुवेधजनितमिति यावत्, यत् व्रणं—क्षतं, तेन व्यथितौ—पीडितौ, यौ गुल्फौ—घुटिके, पादग्रन्थी इत्यर्थः, तत्र बद्धे—व्रणशोधनार्थं निहिते, भूर्जत्वची —भूर्जवृक्षशल्यत्वक्चक्रले येन तथाविधेन ।

(१२८) वातेति ।—वातखुड्ः,—गतिप्रतिघातजनको वातव्याधिविशेषः, तेन यः खेदः,—श्रमः, तेन खञ्जे—गतिशक्तिहीने, ये जङ्घे—प्रसृते, तत्रत्यौ भागौ इत्यर्थः, ताभ्यां

पाण्डुरपिण्डिकेन च, (१२९) खर्जूरजूटजटाजर्जरितजानुना च, (१३०) शतावरीविदारितोरुणा च, विदारीदारिततनुदुकूलपल्लवेन च, (१३१) उत्कटवंशविटपकण्टककोटिपाटितकञ्चुककर्पटेन च, (१३२) फल्गुलोभाल्लम्बितानम्रबदरीलताजालकैः उत्कण्टकैः उल्लिखितसुकुमारकरोदरेण च, (१३३) कुरङ्गशृङ्गोत्खातैः कन्दमूलफलैः कदर्थितबाहुना च, (१३४) ताम्बूलविरहविरसमुखखण्डितकोमलामलकोपफलेन च,

---

जातः,—उत्पन्नः, ज्वरो यस्य तेन। पाण्डुरेति।—पाण्डुना—रजसा, पाण्डुरम्—आविलं, पिण्डिकं—केशपाशः, पिण्डिका—जान्वधोमांसपिण्डमिति वा, यस्य तेन।

(१२९) खर्जूरेति।—खर्जूराणां—तृणद्रुमविशेषाणां, जूटस्य—समूहस्य, जटाभिः,—शाखाभिरिति यावत्, कण्टकाकीर्णाभिः इति भावः, जर्जरितं—खण्डितं, छिन्नं इत्यर्थः, जानुनी—ऊरुपर्व्वणी यस्य तेन।

(१३०) शतावरीति।—शतावर्य्यां—शतमूल्यां, विदारितौ—पाटितौ, ऊरू—सक्थिनौ यस्य तेन। विदारीति।—विदार्य्यां—क्षीरशुक्लायां, "भूमिकुष्माण्ड" इति प्रसिद्धायां इत्यर्थः, तद्वल्लतयेति यावत्, दारितः,—खण्डितः, तनुः,—सूक्ष्मः, दुकूलपल्लवः,—वसनप्रान्तदेशः इत्यर्थः, यस्य तेन।

(१३१) उत्कटेति।—उत्कटैः,—दारुणैः, वंशविटपानां—वेणुशाखानां, "कञ्ची" इति बङ्गे प्रसिद्धानामित्यर्थः, कण्टककोटिभिः,—कण्टकवदग्रैः, पाटितानि—छिन्नानि, कञ्चुककर्पटानि—स्तनावरणवसनानि यस्य तेन।

(१३२) फल्गुरिति।—फल्गूनां लोभेन—लालसया, आलम्बिताः—गृहीताः, अत एव आनम्राः—अवनताः, याः बदरीलताः,—कोलितरुशाखा इत्यर्थः, तासां जालकानि—समूहाः तैः। उत्कण्टकैः,—उद्गतकण्टकैः, कण्टकाकीर्णैः इति यावत्। उल्लिखितेति।—उल्लिखिते—उद्दृष्टे, विद्धे इत्यर्थः, सुकुमारयोः,—कोमलयोः, करयोः,—हस्तयोः, उदरे—अभ्यन्तरदेशौ यस्य तेन।

(१३३) कुरङ्गेति।—कुरङ्गाणां—मृगविशेषाणां, शृङ्गैः,—विषाणैः, उत्खातानि—उद्धृतानि तैः। कदर्थितबाहुना—क्लेशितभुजेन, अतितुच्छवन्यफलाभाहरणश्रमादिति भावः।

(१३४) ताम्बूलेति।—ताम्बूलस्य—पर्णस्य, विरहेण—वर्জ্জनेन, अभावे-

(१२५) कुशकुसुमाहतिलोहितानां क्षयताम् अक्ष्णां लेपीकृत-मनःशिलेन च, (१२६) कण्टकिलतालूनालकलेयेन च, केनचित् किसलयोपपादितातपत्रकृत्येन, केनचित् (१२७) कदलीदल-व्यजनवाहिना, केनचित् कमलिनीपलाशपुटगृहीताम्भसा, केन-चित् (१२८) पाथेयीकृतमृणालपूलिकेन, केनचित् (१२९) चीनां-शुकदशाशिक्यनिहितनारिकेलकोशकलशीकलितरसालतैलेन,

नेत्यर्थः, विरसं—विस्वादं, यत् मुखं—वदनं, तेन खण्डितं—चर्वितं, कोमलं—मृदु, आमलकीफलं—धात्रीफलं येन तथीकृतेन ।

(१२५) कुशेति ।—कुशानां—दर्भाणां, कुसुमानि—पुष्पाणि, तेषाम् आहत्या—आघातेन, लोहितानि—रक्तानि तेषाम् । क्षयतां—क्षीयतां गच्छताम्, अक्ष्णां—नेत्राणाम् । लेपीकृतेति ।—लेपीकृता—दिग्धा, मनःशिला—उपधातुविशेषः येन तथाभूतेन, शोणप्रशमनायेति भावः ।

(१२६) कण्टकीति ।—कण्टकिलतया—कण्टकाकीर्णलतया, लूनः,—छिन्नः, आमलकेयः,—चूर्णकुन्तलैकदेशः यस्य तेन । किसलयेति ।—किसलयेन—पल्लवेन, उपपादितं—सम्पादितम्, आतपत्रस्य—छत्रस्य, कृत्यं—कार्यम्, आतपनिवारण-रूपमिति भावः, येन तेन ; आतपनिवारणार्थं मस्तकस्योपरि धृतपल्लवेन इति भावः ।

(१२७) कदलीति ।—कदलीदलम् एव—रम्भापत्रमेव, व्यजनं—तालवृन्तकं, तत् वहति—धारयतीति तथोक्तेन, कदलीदलेन वीजयतेति भावः । कमलिनीति । —कमलिन्याः,—पद्मिन्याः, पलाशपुटेन—पत्ररचितपात्रविशेषेण, गृहीतं—गीतम्, अम्भः,—जलं येन तथोक्तेन ।

(१२८) पाथेयीकृतेति ।—पाथेयीकृतम्—अपाथेयं पाथेयं सम्पद्यमानं कृतं, पथि भोजनाय सङ्कलितमित्यर्थः, ["कृञ्चानुप्रयुज्यते—" (५।४।५० पा०) इति च्विः], मृणालपूलिकं—बिसनिचयः येन तथोक्तेन ।

(१२९) चीनेति ।—चीनांशुकस्य—सूक्ष्माम्बरस्य, दशा—एकदेशविशेषः, अञ्चल इति यावत्, सैव शिक्यं—काचं, "शिका" इति वङ्गभाषायां प्रसिद्धमित्यर्थः, तत्र निहितं—लम्बितं, नारिकेलकोशकलशी—नारकोलसम्बन्धकरके भाण्डे इति भावः ; ["—नारिकेल—" इत्यत्र "—नालिकेर—" इति पाठेऽपि स एवार्थः] कलितं—रचितं, रसालतैलम्—आम्रतैलं, सुखवैरस्यापनोदनाय सम्भावितमित्यर्थः ("आचारेर तेल") अपक्वाम्रेण सह रचितं तैलमित्यर्थः, येन तथोक्तेन ।

(१४०) कतिपयावशेषशोकविकलमूककुब्जवामनबधिरवर्ब्बराविरलेन, अबलानां चक्रवालेन परिहृताम् ; आपत्कालेऽपि (१४१) कुलोद्गतेन इव अमुच्यमानां प्रभालेपिना लावण्येन ; (१४२) प्रतिविम्बितैः आसन्नवनलताकिसलयैः सरसैः दुःखचतैरिव अन्तःपटलीक्रियमाणकायाम् ; कठोरदर्भाङ्कुरक्षतचारिणा क्षतजेन अनुसरणालक्तकेन इव रक्तचरणाम् ; (१४३) उन्नालेन अन्यतरनारीष्टतेन अरविन्दिनीदलेन कृतच्छायमपि विच्छायं

(१४०) कतिपयेति।—कतिपये—अल्पा इत्यर्थः, अवशेषाः,—परिशेषाः येषां तथाविधाः, शोकविकलाः,—मन्थुविधुराः, शोकार्त्ताः इत्यर्थः, मूकाः,—वर्णोच्चारकाः, भाषणासमर्था इति यावत्, कुब्जाः,—गडुलाः, वामनाः,—ह्रस्वपृथवः, बधिराः,—एड़ाः, वर्ब्बराः—मूर्खाः, तैः अविरलः,—गहनः, पूर्ण इत्यर्थः, तेन। अबलानां—नारीणां, चक्रवालेन—मण्डलेन, परिहृतां—वेष्टिताम्।

(१४१) कुलोद्गतेनेव—सत्कुलजातेन इव, आजन्मसिद्धेन इव च। प्रभालेपिना—उज्ज्वलेनेत्यर्थः। लावण्येन—कान्तिविशेषेण, अमुच्यमानाम्—अपरित्ज्यमानाम्, दुर्दशापन्नप्राप्तामपि सनधिकलावण्यमित्यर्थः।

(१४२) प्रतिविम्बितैः,—प्रतिफलितैः, लावण्यवदङ्के इति भावः, आसन्नवनलताकिसलयैः,—आसन्नाः,—समीपवर्त्तिन्यः, या वनलताः,—आरण्यवल्लयः, तासां किसलयैः,—पल्लवैः। सरसैः,—आर्द्रैः, प्रत्यग्रैरित्यर्थश्च, दुःखचतैरिव—आधिव्रणैः इव। अन्तरिति।—अन्तःपटलीक्रियमाणः,—अन्तर्दीयमानः, कायः,—देहो यस्यास्ताम्। कठोरेति।—कठोरेण—कर्कशेन, दर्भाङ्कुरेण—कुशाङ्कुरेण, अभिनवोद्भिन्नकुशाग्रेणेत्यर्थः, क्षतं—छिन्नं, तस्मात् चरति—स्रवतीति तथोक्तेन। क्षतजेन—रक्तेन। अनुसरणालक्तकेन इव—गतिवशेन स्रवदलक्तकेन इव, अनुसरणे—अनुगमने, कुतश्चित् गमनकाले इति यावत्, अलक्तकेन—अलक्तिप्तलाक्षारसेनेति वा, रक्तचरणां—रक्तौ—लोहितौ, चरणौ—पादौ यस्याः ताम्। कुलोद्गतेनेत्यारभ्य अनुसरणालक्तकेनेत्यन्तं यावदुत्प्रेक्षाऽलङ्कारः।

(१४३) उन्नालेन—उन्नतदण्डेन, अरविन्दिनीदलेन—पद्मिनीपत्रेण, कृतच्छायं—कृता—सम्पादिता, छाया—आतपः यस्य तथोक्तम्। विच्छायं—विगत-

मुखमुहहन्तीम् ; आकाशमपि (१४४) शून्यतया अतिशयानाम् ; मृन्मयीमिव निश्चेतनतया ; मरुन्मयीमिव निश्वाससम्पदा ; पावकमयीमिव सन्तापसन्तानेन ; (१४५) सलिलमयीमिव अस्रप्रस्रवणेन ; वियन्मयीमिव निरवलम्बनतया ; (१४६) तड़िन्मयीमिव पारिप्लवतया ; शब्दमयीमिव परिदेवितवाणीबाहुल्येन ; (१४७) मुक्तामुक्तांशुकरत्नकुसुमकनकपत्राभरणां

प्रभं, विवर्णमित्यर्थः। कृतच्छायमपि विच्छायमित्यापातत: विरोधात् विरोधाभासालङ्कार:।

(१४४) शून्यतया—रिक्ततया, हृदयस्थेति भाव:। अतिशयानां—जयन्तीम् ; आकाशमेव शून्यतया ख्यातम ; अस्या: हृदाकाशस्तु ततोऽप्यधिकं शून्यं, स्वजनविरहादिति भाव:। मृन्मयीमिव—मृत्तिकारचितामिव, पञ्चसु भूतेषु केवलं क्षितिमयीमिव, न तु अवादिमयीमिति भाव:; एवमुत्तरत्रापि योजयितव्यम्। निश्चेतनतया—निस्पन्दतयेति यावत्। मरुन्मयीमिव—वायुमयीमिव। निश्वाससम्पदा—दीर्घनिश्वासबाहुल्येनेत्यर्थ:, अविरतं दीर्घनिश्वासं त्यजन्तीमिति यावत्। पावकमयीमिव—अग्निमयीमिव, केवलं तेजोमयीमिवेति भाव:। सन्तापसन्तानेन—मनस्तापबाहुल्येनेत्यर्थ:, प्रबलशोकानलतप्तामिति भाव:।

(१४५) सलिलमयीमिव—जलमयीमिव, केवलमम्भयीमिवेति भाव:। अस्रप्रस्रवणेन—बाष्पवर्षणेन, अनवरतमश्रु मुञ्चन्तीमिति भाव:। वियन्मयीमिव—आकाशमयीमिव, केवलं व्योममयीमिवेति भाव:। निरवलम्बनतया—निराधारतया, निराश्रयतया इत्यर्थ:, अतीव निराश्रयामिति भाव:।

(१४६) तड़िन्मयीमिव—विद्युन्मयीमिव। पारिप्लवतया—चञ्चलतया, ("चञ्चलं तरलश्चैव पारिप्लवपरिप्लवे" इत्यमर:); हृदयघातनया अतीव अस्थिरामिति भाव:। शब्दमयीमिव—शब्दस्वरूपिणीमिव। परिदेवितबाणीबाहुल्येन—विलापाक्षरनिवहेन, अनारतं विलपन्तीमिति भाव:। मृन्मयीमिवेत्यारभ्य शब्दमयीमिवेत्यन्तं यावदुत्प्रेक्षालङ्कार:।

(१४७) मुक्तेति।—मुक्तानि—त्यक्तानि, निर्मितानि च, मुक्ता:,—मौक्तिकानि, अंशुकानि—उत्कृष्टवसनानि ; यद्वा,—मुक्तांशुकं—मुक्ताख्यमंशुकं, मालवदेशज: मुक्ताखचित: उत्तरीयविशेष इति यावत्, रत्नानि—मणय:, कुसुमानि—पुष्पाणि, कनकपत्राणि—सुवर्णखचितरचनाविशेषा:, सौवर्णपत्राणि च, आभरणानि

कल्पलतामिव महावने पतिताम्; (१४८) परमेश्वरोत्तमाङ्ग-पातदुर्ललिताङ्गां गङ्गामिव गाङ्गताम्; (१४९) वनकुसुम-धूलिधूसरितपादपल्लवां प्रभातचन्द्रमूर्त्तिमिव लोकान्तरम् अभि-लषन्तीम्; (१५०) निजजलमोचक्रदर्थितदर्शितधवलायत-नेत्रशोभां मन्दाकिनीमृणालिनीमिव परिम्लायमानाम्;

—अलङ्कारान्; यथा,—प्रवाभरणानि—प्रवरचनाविशेषाः, विशेषकरूपाः इत्यर्थः, यया ताम्। कल्पलतां—कल्पवृक्षवल्लीम्।

(१४८) परमेश्वरेति।—परमेश्वरस्य—हरस्य, राज्ञः यद्वत्सम्बन्धस्य, उत्तमाङ्गात्—शिरसः, उत्तमाङ्गस्य—शिरसश्च, पातेन—निपतनेन, क्षेपेण च, दुर्ललितम्—अत्याहृतं, दुःखेन पतितञ्च, अङ्गं यस्याः तथोक्ताम्। गाङ्गतां—पृथिवीं प्राप्तां, यानाभावात् भूमिमवतीर्णां च।

(१४९) वनेति।—वनस्य—अरण्यस्य, कुसुमानां—पुष्पाणां, धूलिभिः,—परागैः, धूसरितौ—पाण्डुरौ, पादपल्लवौ—चरणाङ्किसलयौ यस्याः ताम्; अत्यन्त—वनस्य—जलस्य, ("वने सलिलकानने" इत्यमरः) कुसुमानां—पुष्पाणां, कुमुदानामिति यावत्, धूलिभिः,—परागैरिव, धूसरिताः,—धूसरवर्णाः, पादाः,—रश्मयः, ("पादा रश्म्यङ्घ्रितुर्याशाः" इत्यमरः) पल्लवाः,—परिणतकिसलया इव, पाण्डुरत्वसाधर्म्यात् इति भावः; प्रभातिकचन्द्रस्य आपाण्डुरत्वादिति बोध्यम्; यस्यास्ताम्। प्रभातचन्द्रमूर्त्तिमिव—ऊषाकालिकेन्दुबिम्बमिव। लोकान्तरं—परलोकं, लोकालोकपर्व्वतस्य पार्श्वमिति च।

(१५०) निजेति।—निजेन—स्वीयेन, जलमोचेन—वाष्पवर्षणेन इत्यर्थः, क्रदर्थितं—क्लिष्टं यथा तथा, दर्शिता—अवलोकिता, धवलयोः,—शुभ्रयोः, आयतयोः,—दीर्घयोः, नेत्रयोः,—नयनयोः, शोभा—सुषमा यया ताम्। अन्यत्र,—निजस्य—स्वीयस्यैवेत्यर्थः, जलस्य—सलिलस्य, मोचात्—त्यागात्, क्रदर्थितं यथा तथा दर्शिता धवलस्य आयतस्य च नेत्रस्य—मूलस्य, शोभा यया ताम्; ("नेत्रं मणिगृहे वस्त्रभेदे मूले दृशश्च च। रथे चक्षुषि नद्याञ्च" इति मेदिनी)। मन्दाकिनी-मृणालिनीमिव—स्वर्गगङ्गापद्मिनीमिव, परिम्लायमानां—म्लायमेव मुह्यमाणाम्, एतत्,—मूल्यांतपराङ्मुखात् स्वजीवनभूतजलाभावाच्च, अन्यत्र,—पतिविरहादिति भावः। म्लायतेः कर्म्मकर्त्तरि लटि शानचि रूपम्।

(१५१) दुःसहरविकिरणसंस्पर्शखेदनिमीलितां कुमुदिनीमिव दुःखेन दिवसं नयन्तीम्; (१५२) दग्धदशाविसंवादितां प्रत्यूषप्रदीपशिखाम् इव श्यामश्यामां पाण्डुवपुषम्; (१५३) पार्श्ववर्त्तिवारणाभियोगरक्ष्यमाणां वनकरिणीमिव महाह्रदे निमग्नाम्; (१५४) प्रविष्टां वनगहनं ध्यानस्थ; स्थितां तरुतले मरणे च; पतितां

(१५१) दुःसहेति।—दुःसहेन—सोढुमशक्येन; एकत्र,—तीक्ष्णत्वात्, अन्यत्र,—चन्द्रानुरागादिति भावः; रविकिरणेन—सूर्यमयूखेन, यः संस्पर्शः,—संयोगः, तेन खेदः,—क्लमः, तेन निमीलिता—आत्तां, मुद्रिता च ताम्। कुमुदिनीमिव—कैरविणीमिव। नयन्तीम्—अतिवाहयन्तीम्।

(१५२) दग्धेति।—दग्धा—भस्मीभूता, दशा—वर्त्तिः; दग्धा—विधिना विश्लेष्येत्यर्थः, दशा—अवस्था च, ("दशाऽवस्थादीपवर्त्त्योर्विश्लाघ्ये भूम्नि योषिति" इति मेदिनी) तया विसंवादिता—निराश्रयीकृता ताम्। प्रत्यूषेति।—प्रत्यूषे—अहर्मुखे, या प्रदीपशिखा—दीपज्वाला ताम्। श्यामश्यामाम्—अतिक्षीणां, निर्वाणोन्मुखीञ्च। पाण्डुवपुषं—रक्तगुल्यकलेवरां, श्वेताभासामित्यर्थश्च।

(१५३) पार्श्ववर्त्तीति।—पार्श्ववर्त्तिनाम्—अन्तिकस्थानां, परिजनानामिति भावत्, वारणम् एव—प्रतिषेध एव, अभियोगः,—चेष्टितम्, आग्रहो वा, जीवनरक्षणार्थमिति भावः; अन्यत्र,—पार्श्ववर्त्तिना—पार्श्वस्थेन, वारणेन—द्विपेन, ("वारणं प्रतिषेधे स्यात् वारणस्तु मतङ्गजे" इति मेदिनी) यः अभियोगः,—बलात्कारः, तस्मात् रक्ष्यमाणा—निवर्त्त्यमाना, एकत्र,—मरणात्, अन्यत्र,—बलात्कारीक्षणात् कलादपि बलवतो द्विपेन: इति च भावः, ताम्; यद्वा,—पार्श्ववर्त्तिना वारणेन अभियोगात्—वारणान्तरकृतबलात्कारात्, रक्ष्यमाणां—त्रायमाणाम्। महाह्रदे—अगाधजलविस्तीर्णजलाशये, निमग्नाम्—अन्तःप्रविष्टाम्; एकत्र,—मरणमुपगमनार्थं पवित्रजलाशयस्नाताम्; अन्यत्र,—आत्मरक्षार्थं जलाशयावतरणात् तत्रैव पङ्के अवसन्नामिति भावः। वनकरिणीमिव—वन्यद्विपीमिव। कल्पलतामिवेत्यारभ्य वनकरिणीमिवेत्यन्तं यावत् एकत्र बहूनामवैधर्म्याणां श्लिष्टानां साम्यानां समावेशात् श्लेषानुप्राणिता मालोपमाऽलङ्कारः।

(१५४) वनगहनं—निबिड़ारण्यं, ध्यानस्थ—दुश्चिन्ताक्रं, प्रविष्टाम्—आश्रिता-

धात्र्यङ्के महाऽनर्थे च; दूरीकृतां भर्त्रा सुखेन च; (१५५) विरेचितां भ्रमणेन आयुषा च; आकुलां केशकलापेन मरणोपायेन च; विवर्णिताम् अध्वधूलिभिः अङ्गवेदनाभिश्च; दग्धां (१५६) चण्डातपेन वैधव्येन च; धृतमुखीं पाणिना मौनेन च; गृहीतां प्रियसखीजनेन मन्युना च; तथा च (१५७) भ्रष्टैः बन्धुभिः विलासैः, मुक्तेन श्रवणयुगलेन आत्मना च, परित्यक्तैः भूषणैः सर्व्वारम्भैश्च, भग्नैर्वलयैः मनोरथैश्च, चरणलग्नाभिः परिचारिकाभिः दर्भाङ्कुरसूचीभिश्च,

---

मित्यर्थः। स्थितां—कृतावस्थानां, कृतनिश्चयाच्च। पतितां—निहितदेहां, मग्नाच। धात्र्यङ्के—उपमातृक्रोडे। महाऽनर्थे—प्रबलविपत्तौ। दूरीकृतां—विरहिताम्।

(१५५) विरेचितां—त्यक्तान्। भ्रमणेन—भ्रटनेन, आयुषा—जीवितकालेन, गतिभ्रक्षिणीनाम्, आसन्नमरणाशेत्यर्थः। आकुलां—व्याकुलाम्। केशकलापेन—सुदीर्घविस्रसकुन्तलसमूहेन, मरणोपायेन—मृत्युचेष्टया, सुदीर्घकेशपाशसंयमनाचमतया, केनोपायेन मरिष्यामीति चिन्तया चेति भावः। विवर्णितां—मलिनां, निष्प्रभीकृताच्च। अध्वधूलिभिः,—मार्गरजोभिः, भ्रमणक्लेशादिति भावः।

(१५६) चण्डातपेन—तीक्ष्णसूर्य्यसन्तापेन। वैधव्येन—विगतः धवः,—पतिः यस्याः सा विधवा, तस्याः भावः वैधव्यं तेन, विपतिकृतया इत्यर्थः। धृतमुखीं—विधृतवदनां, निरक्षराच्च। पाणिना—करेण, मौनेन—तूष्णीम्भावेन, करस्योपरि स्थापितगण्डां, मौनावलम्बिनीत्यर्थः। गृहीतां—धृताम्, आक्रान्ताच्च। मन्युना—शोकेन।

(१५७) भ्रष्टैः,—च्युतैः, नष्टैरित्यर्थः, त्यक्तैश्च। बन्धुभिः,—भ्रात्रादिभिः, विलासैः,—सुखचेष्टितैः। ["बन्धुभिः" इत्यादौ "जीवितेन" इत्यस्मे इत्यभूतलक्षणे तृतीया]। मुक्तेन—निरलङ्कारेण, शून्येन च। सर्व्वारम्भैश्च—कृत्स्नोपक्रमैः, सकललार्थैरित्यर्थः। भग्नैः,—खण्डितैः, विध्वस्तैश्च। चरणलग्नाभिः,—पादपतिताभिः, मा मत्प्राणान् विहाय प्राणान् जहीति निवारणायेति भावः; चरणविलग्नाभिश्च। दर्भाङ्कुरसूचीभिः,—अभिनवोद्भिन्नकुशाग्रैः।

(१५८) हृदयविनिहितेन चक्षुषा प्रियेण च, (१५९) दीर्घैः शोकश्वसितैः कृशेन च, क्षीणेन वपुषा पुण्येन च, पादयोः पतन्तीभिः हृद्याभिः अश्रुधाराभिश्च, स्वल्पावशेषेण परिजनेन जीवितेन च, (१६०) अलसाम् उन्मेषे ; दक्षाम् अश्रुमोक्षे ; सन्ततां चिन्तासु ; विच्छिन्नाम् आशासु ; क्षमां काये ; स्थूलां श्वसितेषु ; (१६१) पूरितां दुःखेन ; रिक्तां सत्त्वेन ; अध्यासिताम् आयासेन ; शून्यां हृदयेन ; निश्चलां निश्चयेन ; चलितां धैर्यात् ; अपि च वसतिं व्यसनानाम् ; आधानम् आधीनाम् ; अवस्थानम् अनवस्थानाम् ; आधारम् अधृतीनाम् ; आवासम्

(१५८) हृदयविनिहितेन—हृदयार्पितेन, वक्षसि निबद्धेनेत्यर्थः, चित्तस्थापितेन च। प्रियेण च—भर्त्रा।

(१५९) दीर्घैः,—आयतैः, लम्बमानैश्च। शोकश्वसितैः—शोकजनिश्वासैः। क्षीणेन—क्षामतां गतेन, क्षयं गतेन च। वपुषा—शरीरेण च। स्वल्पावशेषेण—विरलेन, अल्पमात्रावशिष्टेनेत्यर्थः, निःशेषप्रायेणेत्यर्थश्च।

(१६०) अलसां—मन्थराम्, जड़प्रायामिति भावः, उन्मेषे—चक्षुरुन्मीलने ; नेत्रोन्मीलनाक्षम.मित्यर्थः। दक्षां—पटुः ताम् ; प्रबलवेगेनाश्रु मुञ्चन्तीमित्यर्थः। या अलसा सा कथं दक्षा ? इति आपाततः विरोधः ; उन्मेषाश्रुमोक्षपर्यायभिन्नाधिकरणिकतया च तयोः परस्परमविरोधात् विरोधाभासोऽलङ्कारः ; एवमुत्तरत्र। सन्ततां—अविच्छिन्नां, निरन्तरामित्यर्थः, सततं चिन्तयन्तीमिति निष्कर्षः। विच्छिन्नां—रहितां, हताशामित्यर्थः। सन्ततां विच्छिन्नामिति विरोधः। श्वसिते स्थूलां—दीर्घं श्वसन्तीमिति यावत्। क्षमां स्थूलामिति आपाततः विरोधः ; क्षान्तिस्थौल्ययोः सामानाधिकरण्याभावेनाविरोधात् विरोधाभासः ; एवमन्यत्रापि।

(१६१) रिक्तां—रहितां, सत्त्वेन—विद्यमानतया, अस्तित्वेन इत्यर्थः, बलेन उत्साहेन वा ; मृतप्रायां दुर्बलां निरुत्साहां वा इति भावः। पूरितां रिक्तामिति विरोधः। अध्यासिताम्—अधिरूढाम्। आयासेन—क्लेशेन, अनुभूतक्लेशामित्यर्थः। अध्यासितां शून्यामिति विरोधः। निश्चलां—स्थिराम्। निश्चयेन—निर्णयेन, स्थिरसङ्कल्पामित्यर्थः। चलितां—च्युताम्। निश्चलां चलितामिति विरोधः। वसतिम्—आश्रयम्। व्यसनानां—विपदाम्। आधानम्—आधारम्। आधीनां

अवसादानाम्; आस्पदम् आपदाम्; (१६२) अभियोगम् अभाग्यानाम्; उद्वेगम् उद्वेगानाम्; कारणं करुणायाः; पारं परायत्तताया योषितम्। चिन्तितवानस्मि च चित्रम्!! ईदृशीमपि आकृतिम् उपतापाः स्पृशन्ति!! इति।

सा तु ममीषगते मयि तदवस्थाऽपि (१६३) सबहुमानम् आनतमौलिः प्रणतवती। अहन्तु (१६४) प्रबलकरुणा-प्रेर्यमाणः ताम् आलपितुकामः पुनः कृतवान् मनसि—"कथमिव (१६५) महाऽनुभावाम् एनाम् आमन्त्रये? 'वत्से!' इति अतिप्रणयः, 'मातः!' इति चाटु, 'भगिनि!' इति (१६६) आत्मसम्भावना, 'देवि!' इति परिजनालापः,

—मानसीनां व्यथानाम्; ("पुंस्याधिर्मानसी व्यथा" इत्यमरः)। अवस्थानं—वासस्थानम्। अनवस्थानां—दुर्दशानामित्यर्थः। अधृतीनाम्—अधैर्याणाम्। अवसादानां—विषण्णतानाम्, अवसन्नतानां वा। आस्पदं—स्थानम्।

(१६२) अभियोगम्—आक्रान्तिम्, आक्रमणस्थानमित्यर्थः, दुर्भाग्याक्रान्तामिति यावत्। उद्वेगानां—व्याकुलतानामित्यर्थः, भयानां वा। उद्वेगम्—उद्वमनम्; गमनस्थानमित्यर्थः; आश्रयस्थानमिति भावः। करुणायाः कारणं—हेतुं, कृपाऽऽविर्भावस्य हेतुभूतामित्यर्थः; तद्दर्शने स्वत एव करुणा जायते इति भावः। पारम्—अन्तम्, अवसानमित्यर्थः, इतोऽप्यधिकपरायत्तायाः अन्यत्र कुत्राप्यदर्शनादिति यावत्। परायत्तताया:,—पराधीनतायाः, एकान्तपरावलम्बिनीमित्यर्थः। चित्रम्—आश्चर्यम्। उपतापाः,—उत्तापाः, मनस्तापा इति यावत्।

(१६३) सबहुमानं—सादरम्। आनतमौलिः,—अवनतमस्तका।

(१६४) प्रबलेति।—प्रबलया—महत्या, करुणया—कृपया, प्रेर्यमाणः,—नीयमानः; अतीव कृपाविवशहृदय इत्यर्थः। आलपितुकामः,—सम्भाषितुकामः।

(१६५) महाऽनुभावां—मनस्विनीम्। आमन्त्रये—सम्भाषे। अतिप्रणयः,—अतिवात्सल्यम्, अतिविस्रब्धता वा, एतादृक्सम्भाषणस्य स्नेहगर्भाभिप्रायाभिव्यञ्जकतया अपरिचितायां तत्र युक्तमिति भावः। चाटु—अयथार्थाभिः वाग्भिः केवलं सन्तोषणमित्यर्थः, प्रियोक्तिः वा, एतदपि पूर्ववदयुक्तमिति भावः।

(१६६) आत्मसम्भावना—आत्मनः समादरः, मिथो: मम तादृशी भगिनीव

'राजपुत्रि !' इति (१६७) अस्फुटम्, 'उपासिके !' इति मनोरथः, 'स्वामिनि !' इति (१६८) भृत्यभावाभ्युपगमः, 'भद्रे !' इति इतरस्त्रीसमुचितम्, 'आयुष्मति !' इति अवस्थायाम् अप्रियं, 'कल्याणिनि !' इति (१६९) दशायां विरुद्धं, 'चन्द्रमुखि !' इति अमुनिमतं, 'बाले !' इति (१७०) अगौरवोपेतम्, 'आर्ये !' इति जरारोपणं, 'पुण्यवति !' इति फलविपरीतं, (१७१) 'भवति !' इति सर्व्वसाधारणम् ; अपि

सम्भवति इति आत्मगौरवं स्यादिति भावः। परिजनालापः,—परिजनस्य—भवनपरिवारस्य, निजगृहस्वजनसमूहस्येत्यर्थः, आलापः,—सम्भाषणम् ; नाहं तथेति भावः।

(१६७) अस्फुटम्—अव्यक्तं, तथात्वेनाज्ञातत्वादिति भावः। उपासिके !—स्निग्धे ! औढधर्म्मावलम्बिनि ! इत्यर्थो वा। मनोरथः,—अभिलाषः ; स्वजनीऽनुकूलं वचनमित्यर्थः ; तथा हि,—आत्मनः उपासकतया सर्व्वमेव उपासकं मन्यामहै, यदि हि इयं तथा न स्यात्, तदा तयोक्तिर्विफलैवेत्यभिप्रायः।

(१६८) भृत्यभावाभ्युपगमः,—दासभावस्वीकरणं, स चायुक्तः स्त्रियां लाघवाभिव्यञ्जकत्वादिति भावः। इतरस्त्रीसमुचितं—सामान्यनारीसदृशम् ; इयन्तु न तथा दृश्यते, तत्कथं तथा सम्बोधनमिति भावः। अवस्थायां—मरणदशायाम् ; अप्रियं—न प्रीतिकरम् ; तादृशमरणोन्मुखदशायां न कोऽपि जीवितं प्रियं मन्यते, अत एव अप्रीतिकरस्य वचनस्य कमपि प्रति प्रयोक्तुमनौचित्यात् इति भावः। उक्तञ्च मनुना,—"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्। प्रियञ्च नानृतं ब्रूयादेष धर्म्मः सनातनः॥" इति।

(१६९) दशायाम्—अमङ्गलावस्थायां, विरुद्धं—विपरीतम् ; तादृशमरणोन्मुखायाः कल्याणासम्भवात् मिथ्याभूतस्य च वचनस्य प्रयोक्तुमनौचित्यादिति भावः। अमुनिमतं—मुनिजनानभिमतं, तपःस्वजनविरुद्धमित्यर्थः ; विश्वासिकामुकप्रयोज्यसम्बोधनमिदम् इति भावः।

(१७०) अगौरवोपेतं—गौरवैः अयुक्तमित्यर्थः, लघुत्वव्यञ्जकमिति यावत्। जरारोपणं—वार्द्धकाध्यासनं, जरसीनामेव तथा सम्बोधनीयत्वादिति भावः। फलविपरीतं—फलेन—तादृशेन दुर्विपाकरूपेण, विपरीतं—विपर्य्यस्तम् ; पुण्यवत्त्वे न तादृशी दुरवस्था जायते इति भावः।

(१७१) भवति !—भाव्ये ! इत्यर्थः। सर्व्वसाधारणं—सर्व्वेषां साधारणं—

च 'कासि ?' इति अनभिज्ञातं, 'किमर्थं रोदिषि ?' इति दुःखकारणस्मरणकारि, 'मा रोदीः' इति शोकहेतुम् अनपनीय न शोभते, 'समाश्वसिहि' इति किम् आश्रित्य ? 'स्वागतम् ?' इति यातयामं, 'सुखम् आस्यते ?' इति मिथ्या।

इत्येवं चिन्तयति एव मयि, तस्मात् (१७२) स्त्रैणात् उत्थाय अन्यतरा योषित् आर्यरूपा इव शोकविक्लवा समुपसृत्य, कतिपयपलितशरं शिरो नीत्वा महीतलम्, अतुलहृदयसन्तापसूचकैः अश्रुबिन्दुभिः चरणयुगलं दहन्ती मम अतिकृपणैः अक्षरैः इव हृदयम् अभिहितवती,—'भगवन्!

सामान्यं, तच्चाव अयुक्तम्, असामान्यमूर्त्तित्वात् तस्या इति भावः। अनभिज्ञातम्—अकुलोचितम्; "कौडयं कुलमलङ्कृताऽसि" एवं प्रश्नस्य सत्कुलसम्भूते अनादराभिव्यञ्जकत्वादिति भावः। दुःखेति।—दुःखस्य—मनःपीड़ायाः इत्यर्थः, यत् कारणं—हेतुः, तस्य स्मारणं—पूर्व्वानुभूतस्य मनसि आविर्भवणं, तं कारयतीति तथोक्तम्; रोदनकारणे आख्यायमाने पूर्व्वदृष्टस्य पुनरुत्स्मारणादिति भावः; पूर्व्वदृष्टान्तप्रबोधकतया व्यथाकरमिति तात्पर्य्यम्। अनपनीय—अनपनीय, दूरमकृत्वेति यावत्। समाश्वसिहि—आश्वस्ता भव; धैर्य्यमवलम्ब्य इत्यर्थः। किम् आश्रित्य ?—समाश्वसनार्हं कमाश्रित्य ब्रवीषीति भावः। यातयामम्—असामयिकं, जीर्णप्रायम् इति यावत्, पुरातनसम्बोधनं वा इति भावः; यद्वा,—यातः,—व्यतीतः, यामः,—प्रहररूपः कालः यस्य तथाविधम्; तथा हि—"स्वागतम्" इति प्रश्नस्य प्रथमदर्शनचक्षुष्कपकालनाभक्षततया इदानीं प्रहरादप्यधिके व्यतीतकाले तदभिधानस्य नितरामन्याय्यत्वादित्यभिप्रायः। आस्यते—उपविश्यते, स्थीयते इत्यर्थः, मिथ्या—अलीकम्; प्रत्यक्षमेव असुखव्यञ्जककार्य्यस्य दर्शनात् इति भावः।

(१७२) स्त्रैणात्—स्त्रीसमूहात्। आर्यरूपा इव—कुलीनस्वभावा इव दृश्यमाना इत्यर्थः। शोकविक्लवा—मन्युविधुरा। कतिपयेति।—कतिपयानि—अल्पसङ्ख्यकानि, पलितानि—जरसा शुक्लकेशग्रहन्दानि ("पलितं जरसा शौक्ल्ये केशादौ" इत्यमरः) तैः शरं—चिह्नं, शबलमित्यर्थः। अतुलहृदयसन्तापसूचकैः,—निरुपमचित्ततापव्यञ्जकैः। अतिकृपणैः,—अतिदीनैरित्यर्थः, अतिकरुणैरिति यावत्। हृदयं दहन्ती इति पूर्व्वानुषङ्गः।

(१७३)सर्व्वसत्त्वानुकम्पिनी प्रायः प्रव्रज्या। प्रतिपन्नदुःखक्षपण-दीक्षादक्षाश्च भवन्ति सौगताः। (१७४) करुणाकुलगृहञ्च भगवतः शाक्यमुनेः शासनम्। (१७५) सकलजनोपकार-सज्जा सज्जनता जैनी। परलोकसाधनञ्च धर्म्मो मुनीनाम्। प्राणरक्षणाच्च न परं (१७६) पुण्यजातं जगति गीयते जनेन। (१७७) अनुकम्पाभूमयः प्रकृत्या एव युवतयः, किं पुनर्विपद-भिभूताः? साधुजनश्च सिद्धचैत्यम् आर्त्तवचसाम्। यत इयं नः (१७८) स्वामिनी मरणेन पितुः, अभावेन भर्त्तुः, प्रवासेन च भ्रातुः, भ्रंशेन च शेषस्य बान्धववर्गस्य, (१७९) अतिमृदु-हृदयतया अनपत्यतया च निरवलम्बना परिभवेण च नीचा-

(१७३) सर्व्वसत्त्वानुकम्पिनी—सर्व्वप्राणिकृपाकारिणी। प्रव्रज्या—सन्यासधर्म्मः। प्रतिपन्नेति।—प्रतिपन्नानाम्—आपन्नानाम्, आश्रितानामित्यर्थः, दुःखस्य—क्लेशस्य, क्षपणं—निवारणमेव, दीक्षा—व्रतं, तत्र दक्षाः,—पटवः। सौगता,—बौद्धाः।

(१७४) करुणेति।—करुणायाः,—कृपायाः, कुलगृहं—जन्ममन्दिरम्; कारुण्यस्य आद्योत्पत्तिस्थानमित्यर्थः; तेन हि भगवता सदयहृदयेन सर्व्वजीवेषु कारुण्यस्यैव प्राधान्येन दर्शितत्वादित्यभिप्रायः; यद्वा,—करुणाकुलस्य—प्रभूत-कृपायाः, गृहम्—आवासः। शाक्यमुनेः,—बुद्धदेवस्य, शासनम्—आदेशः, शास्त्रं वा।

(१७५) सकलेति।—सकलानां—सर्वेषां, जनानां—लोकानाम्, उपकारे—हितविधाने, सज्जा—प्रवृत्ता, उद्युक्ता इति यावत्। सज्जनता—साधुता। जैनी—जिनसम्बन्धीया, बौद्धाचारसम्मता इत्यर्थः। परलोकसाधनम्—उत्कृष्टलोक-प्रापकः। धर्म्मः,—विध्यनुमोदितः आचारः।

(१७६) पुण्यजातं—पुण्यनिचयः।

(१७७) अनुकम्पाभूमयः,—कृपापात्राणि। प्रकृत्या—स्वभावतः। विपदभि-भूताः,—विपन्नाः स्त्रियः। सिद्धचैत्यं—सिद्धस्थानं, निश्चितफललाभस्थानमित्यर्थः, प्रसिद्धाश्रय इति यावत्। आर्त्तवचसाम्—आर्त्तानां—विपन्नानां, वचसां—वाक्यानाम्।

(१७८) स्वामिनी—अधीश्वरी। प्रवासेन—विदेशावस्थानेन। भ्रंशेन—वियोगेन, मरणेन पलायनेन वा इत्यर्थः। शेषस्य—अवशिष्टस्य। बान्धववर्गस्य—स्वजनसमूहस्य।

(१७९) अतिमृदुहृदयतया—अतिकोमलान्तःकरणतया। अनपत्यतया—

रातिक्रूतेन, प्रकृतिमनस्विनी, अमुना च (१८०) महाऽटवीपर्य्यटनक्लेशेन कदर्थितसौकुमार्य्यां, दग्धदैवदत्तैः एवंविधैः बहुभिः उपर्य्युपरि व्यसनैः विक्लवीकृतहृदया, दारुणं दुःखमपारयन्तीं सोढुं, निवारयन्तम् (१८१) अनतिक्रान्तपूर्व्वं स्वप्नेऽपि अवगणय्य गुरुजनम्, (१८२) अनुनयन्तीः अखण्डितप्रणया मर्म्मसु अपि समवधीर्य्य प्रियसखीः, (१८३) विज्ञापयन्तम् अशरणम् अश्रुव्याकुलनयनम् अपरिभूतपूर्व्वं मनसाऽपि परिभूय भृत्यवर्गम् अग्निं प्रविशन्तं; परित्रायताम्। आर्य्यीऽपि तावत् (१८४) असह्यशोकापनयनोपायोपदेशनिपुणां

अपुण्यकृतया। निरवलम्बना—निराश्रया। परिभवेण—तिरस्कारेण, उत्पीडनेनेत्यर्थः। लोचारातिक्रूतेन—पामरशत्रुप्रयुक्तेन, हीनात्मःकरणैर्विधिविडम्बनेति यावत्, निरवलम्बना इत्यनेनानुषङ्गः। प्रकृतिमनस्विनी—स्वभावतः एव प्रशस्तान्तःकरणा, स्वामिनी इत्यनेनानुषङ्गः।

(१८०) महाऽटवीपर्य्यटनक्लेशेन—दीर्घारण्यभ्रमणायासेन। कदर्थितसौकुमार्य्यां—क्लेशितमार्दवां। दग्धदैवदत्तैः,—हतविधिविडम्बितैः। व्यसनैः,—विपद्भिः। विक्लवीकृतहृदया—व्याकुलीकृतान्तःकरणा। दारुणं—घोरम्। अपारयन्तीं—अशक्नुवतीं।

(१८१) अनतिक्रान्तपूर्व्वम्—अनुल्लङ्घितपूर्व्वम्। अवगणय्य—अगणयित्वा, गुरुजनानां वाक्यमुल्लङ्घयेत्यर्थः।

(१८२) अनुनयन्तीः,—प्रबोधयन्तीः, मरणाध्यवसायात् निवर्त्तयितुमनुनयं कुर्व्वतीरित्यर्थः। अखण्डितप्रणयाः,—अविच्छिन्नसद्भावाः, अविघटितस्नेहा इति यावत्। मर्म्मसु अपि—परिहासेषु अपि। समवधीर्य्य—अवज्ञाय, सखीनामपि सानुनयवचनमनाकर्ण्येत्यर्थः।

(१८३) विज्ञापयन्तं—मा प्रविशाग्निं मा प्रविशाग्निम् इत्येवं बहुशः निवेदयन्तम्। अशरणम्—अनाथम्। मनसाऽपि अपरिभूतपूर्व्वं—चेतसाऽपि अनादृतपूर्व्वम्। परिभूय—अनादृत्य।

(१८४) असह्येति।—असह्यस्य—सोढुमशक्यस्य, शोकस्य—मन्योः, अपनयनं—निरसनं, तस्य उपायः,—साधनं, तस्य उपदेशे—शिक्षायां, निपुणा—दक्षा

व्यापारयतु वाणीम् अस्याम्' इति च अतिकृपणं व्याहरन्तीम् अहम् उत्थाप्य उद्विग्नतरः शनैः अभिहितवान्,—'आर्ये! यथा कथयसि, तथा। अस्मद्विराम् (१८५) अगोचरोऽयम् अस्याः पुण्याश्रयायाः शोकः। शक्यते चेत् मुहूर्त्तमात्रमपि (१८६) त्रातुम्, उपरिष्टात् न व्यर्था इयम् अभ्यर्थना भविष्यति। मम हि गुरुः अपर इव भगवान् (१८७) सुगतः समीपगत एव। कथिते मया अस्मिन् उदन्ते नियतम् आगमिष्यति परमदयालुः। दुःखान्धकारपटलभिदुरैश्च सौगतैः सुभाषितैः, (१८८) स्वकैश्च दर्शितनिदर्शनैः नानागमगुरुभिः गिरां कौशलैः कुशलशीलाम् एनां प्रबोधपदवीम् आरोपयिष्यति' इति। तच्च श्रुत्वा 'त्वरताम् आर्यः' इत्यभिदधाना सा

ताम्। व्यापारयतु—प्रयुङ्क्ताम्। अस्याम्—अस्याः स्वामिन्याम्। अतिकृपणम्—अतिदीनम्, अतिकरुणमित्यर्थः। व्याहरन्तीं—भाषमाणाम्। उद्विग्नतरः,—अतिव्याकुलः सन्। यथा कथयसि—सर्व्वसत्त्वानुकम्पिनी इत्यादि यत् वदसि, तथा—तत् तथैव, सत्यमेवेत्यर्थः।

(१८५) अगोचरः,—असाक्षात्करणीयः, अविषय इत्यर्थः, अनपनेय इति भावः। पुण्याश्रयायाः,—पवित्रस्वभावायाः।

(१८६) त्रातुम्—अग्निप्रवेशव्यवसायान्निवारयितुमित्यर्थः। उपरिष्टात्—परतः, मुहूर्त्तानन्तरमित्यर्थः। अभ्यर्थना—याच्ञा; यदि मुहूर्त्तकालं प्रबोधवाक्येनैर्य रचितुं शक्यते, तदा अस्मद्गुरून् आनीय तस्य सदुपदेशेनास्याः शोकं प्रशमय्य युष्मत्प्रार्थनां सफलयिष्यामीति निष्कर्षः।

(१८७) सुगतः,—बुद्धदेवः। उदन्ते—वृत्तान्ते, ("वार्त्ता प्रवृत्तिर्वृत्तान्तः उदन्तः स्यात्" इत्यमरः)। नियतं—निश्चितम्। दुःखेति।—दुःखानि—मनःपीड़ा एव, अन्धकाराः,—तिमिराणि, तेषां पटलं—समूहः, तस्य भिदुरैः—नाशकानि तैः। सौगतैः,—सुगतसम्बन्धिभिः। सुभाषितैः,—सदाक्यैः, उपदेशवचनैरिति यावत्।

(१८८) स्वकैः,—निजैः। दर्शितनिदर्शनैः,—उद्घाटितदृष्टान्तैः। नानेति।—नाना—विविधैः; आगमैः,—शास्त्रैः हेतुभिः, शास्त्रयुक्तिमाश्रित्य कथनादिति भावः, गुरुभिः—महद्भिः, गौरवयुक्तानीत्यर्थः, तैः। कौशलैः,—नैपुण्यैः, वाग्मिता-

पुनरपि पादयोः पतितवती। सोऽहमुपगत्य त्वरमाणः (१८९) व्यतिकरम् इमम् अधृतिकरम् अशरणकृपणबहुयुवतिमरणम् अतिकरुणम् अत्रभवते गुरवे निवेदितवान्" इति।

अथ (१९०) भूभृत् भैक्षवं समवधार्य्य तद्भाषितम् अनुमिश्रितम्, अश्रुतेऽपि स्वसुः नाम्नि निम्नीकृतमना मन्युना, सर्व्वाकारसंवादिन्या दशया एव दूरोद्भूतसन्देहः, दग्ध इव सौदर्य्यावस्थाश्रवणेन अवणयोः, (१९१) श्रमणाचार्य्यम् उवाच,--"आर्य्य! (१९२) नियतं सैवेयम् अनार्य्यस्य अस्य जनस्य अतिकठिनहृदयस्य अतिनृशंसस्य मन्दभाग्यस्य भगिनी भागधेयैः एताम् अवस्थां नीता निष्कारणवैरिभिः वराकी,

---

गुणैरित्यर्थः। कुशलशीलां—सुचरितामित्यर्थः। प्रबोधपदवीं—प्रकृष्टज्ञानमार्गं, शोकशान्तिकरमुपायमित्यर्थः।

(१८९) व्यतिकरं—व्यसनं, विपदमित्यर्थः, ("अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदनी)। अधृतिकरम्—अधैर्य्यजननम्। अशरणेति।—अशरणानां—निराश्रयाणां, कृपणानां—दुःखितानां, करुणाहाणामित्यर्थः, बहूनां—अनेकासां, युवतीनां—तरुणीनां, मरणं—मृत्युः यस्मिन् तम्। अतिकरुणम्—अतिशोकावहम्। अत्रभवते—पूज्याय।

(१९०) भूभृत्—भूपालः। भैक्षवं—भिक्षुकम्। समवधार्य्य—सावधितं श्रुत्वेत्यर्थः। स्वसुः,—भगिन्याः। निम्नीकृतमनाः,—प्रवणीकृतचित्तः, द्रवीकृतचेता इत्यर्थः, आकान्तहृदय इति यावत्। मन्युना—शोकेन, ("मन्युः शोकौ तु यक् स्त्रियाम्" इत्यमरः)। सर्व्वाकारसंवादिन्या—सर्व्वाकारैश्च—सर्व्वप्रकारैश्च, संवादिन्या—संवदति—इयमेव राज्यश्रीरिति ज्ञानीति तथोक्तया; यद्वा,—सर्व्वाकारं—सर्व्वमेवावयवं, संवदति—अनुकरोति या तया, निखिलशारीरिकसंस्थानकथनाभिज्ञातयेत्यर्थः। दशया—अवस्थया। सौदर्य्येति।—सौदर्य्यायाः,—भगिन्याः, अवस्थाश्रवणेन—दुर्दशाऽऽकर्णनेन। अवणयोः,—कर्णयोः।

(१९१) श्रमणाचार्य्यं—भिक्षुशिष्टं, बौद्धाचार्य्यं दिवाकरमित्रमित्यर्थः।

(१९२) नियतं—निश्चितम्। अनार्य्यस्य—असाधोः। अतिनृशंसस्य—अतिनिर्दयस्य। भागधेयैः,—दुर्दैवैरित्यर्थः। निष्कारणवैरिभिः,—अहेतुकशत्रुभिः,

विदीर्ण्यमाणं मे हृदयम् एवं निवेदयति" इत्युक्त्वा तमपि (१८३) श्रमणम् अभ्यधात्,—"आर्य्य! उत्तिष्ठ; दर्शय क्व असौ? यतः (१८४) सुप्रभूतप्राणपरित्राणपुण्योपार्जनाय यामः, यदि कथञ्चित् जीवन्तौ सम्भावयामः" इति भाषमाण एव उत्तस्थौ।

अथ समग्रशिष्यवर्गानुगतेन आचार्य्येण तुरगेभ्यश्च अवतीर्य्य समस्तेन सामन्तलोकेन (१८५) पश्चादाकृष्यमाणार्द्धायेन अनुगम्यमानः, (१८६) पुरस्ताच्च तेन शाक्यपुत्रीयेण च प्रदिश्यमानवर्त्मा, पद्भ्यामेव तं प्रदेशं प्रविरलैः पदैः पिबन्निव

अनुनाया इतीरसङ्गावेऽपि अनुवदाचरङ्गिरित्यर्थः। बराकी—तपस्विनी, निरपराधा इत्यर्थः।

(१८३) श्रमणं—भिक्षुम्।

(१८४) सुप्रभूतेति।—सुप्रभूतानाम्—अतिबहूनां, प्राणानां—जीवनानां, परित्राणं—परिरक्षणं, तदेव पुण्यं—सुकृतं, तस्य उपार्जनाय—लाभाय; एकस्या एव तस्या मरणे बहूनां हि तत्परिजनानां प्राणविसर्जनकृतनिघृणानां निधनमनुमाय सुप्रभूतत्वं प्राणविशेषणतयोपन्यस्तम्। सम्भावयामः,—सम्मानयामः, आश्वासादिदानेन संवर्द्धयाम इत्यर्थः।

(१८५) पश्चादिति।—पश्चात्—पृष्ठतः, आकृष्यमाणम्—आच्छिद्यमानम्, आनीयमानमित्यर्थः, अर्द्धायम्—अश्वसमूहः, ("इन्दे त्वर्द्धायमाश्ववत्" इत्यमरः) येन तथोक्तेन।

(१८६) पुरस्तात्—अग्रतः। शाक्यपुत्रीयेण—दिवाकरमित्रशिष्येण, प्रागुक्तभिक्षुणा इति भावः। प्रदिश्यमानवर्त्मा—दर्श्यमानमार्गः। प्रविरलैः,—स्वल्पैः, अतिद्रुतपदविक्षेपात् लघुभिरिति यावत्, अल्पीयस्या अल्पभूयसानैरिति भावः। पदैः,—पदविक्षेपैरित्यर्थः, ["प्रविरलैः" इत्यत्र "अविरलैः" इति पाठे,—अविरलैः, —अनल्पैः, बहुभिरित्यर्थः, अनैः अनैरिति यावत्; पाठोऽयं न समीचीनः, तथाविधगमनस्य समयानुपयोगित्वात्। केचित्तु "अविरलैः दीर्घैः" इति व्याख्यानयन्ति द्रुतगमनाभिप्रायेण]। पिबन्निव—ग्रसन्निव, लङ्घयन्निव इत्यर्थः, अतिद्रुतगमनेन क्षणोपवर्त्तिप्रदेशस्य क्षुल्लरमेव पश्चात्करणात् अदृश्यमानलाभ्च निर्बाधवेदुनेच्छा

प्रावर्त्तत। क्रमेण च समुपगतः शुश्राव लतावनान्तरितस्य मुमूर्षोर्मर्छतः स्त्रैणस्य तत्कालोचितान् अनेकप्रकारान् आलापान्,—"भगवन्! धर्म्म! (१८७) धाव शीघ्रम्। क्वासि? कुलदेवते! देवि! धरणि! धीरयसि न दुःखितां दुहितरम्? क्व नु खलु (१८८) प्रोषिता पुष्यभूतिकुटुम्बिनी लक्ष्मीः? (१८९) नाथ! सुखरवंश्य! अनाथां विविधाऽऽधिविधुरां बधूं विधवां विबोधयसि किमिति न इमाम्? भगवन्! सुगत! भक्तजने (२००) संज्वरिणि सुप्तोऽसि? राजधर्म्म! (२०१) पुष्यभूतिभवनपक्षपातिन्! उदासीनीभूतोऽसि कथम्? त्वयि अपि

दीङ्त्या। प्रावर्त्तत—प्रातिष्ठत। मुमूर्षोः,—मर्त्तुमिच्छोः। स्त्रैणस्य—स्त्रीरूपस्य। तत्कालोचितान्—मृत्युसमये प्रयुक्तान्, खिदसूचकानित्यर्थः।

(१८७) धाव—द्रुतम् आगच्छ, त्वामाश्रिता इयमकाले म्रियते, अतः शीघ्रमागत्य एनां रक्ष इति भावः। धरणि!—सर्व्वधारणकारिणि! पृथ्वि! न धीरयसि?—न धीरां करोषि? न सान्त्वयसि? इत्यर्थः। स्थिरायाः ते कन्या धीरा एव भवितुमर्हति, अत एनां धीरां कुरु इति भावः।

(१८८) प्रोषिता—गता। पुष्यभूतिकुटुम्बिनी—पुष्यभूतेः,—तदाख्यस्य वर्द्धनपूर्व्वजस्य, कुटुम्बिनी—गृहिणी, लक्ष्म्याः राजभोग्यत्वादिति भावः। लक्ष्मीः,—पुष्यभूतेः राज्ञः श्रीरित्यर्थः।

(१८९) नाथ!—प्रभो! सुखरवंश्य!—सुखरकुलप्रसूत! वर्द्धवंश्य! इति यावत्, वर्द्धवंशस्य पूर्व्वजराजत्ववर्ग वा, [सुख प्राधान्यमस्यास्तीत्यर्थे "रप्रकरणे—" इत्यादि वार्त्तिकात् अस्त्यर्थे रप्रत्ययः]। अनाथाम्—अशरणाम्। विविधात।—विविधाभिः,—नानाप्रकाराभिः, आधिभिः,—मनस्तापैः, विधुरा—आकुला ताम्। बधूं—भार्य्यां, स्नुषां वा, ("बधूः स्त्री सारिवौषधी। स्नुषाऽटौ नवोढ़ासु भार्य्यापुत्रकाङ्कनासु च॥" इति मेदिनी)। विधवां—पतिहीनाम्। विबोधयसि?—प्रबोधयसि? सान्त्वयसीत्यर्थः।

(२००) संज्वरिणि—सन्तापवति, ("सन्तापः संज्वरः समौ" इत्यमरः)। सुप्तोऽसि?—निद्रितोऽसि किम्? भक्तजनमनस्तापं न पश्यसि किमित्यर्थः।

(२०१) पुष्यभूतिभवनपक्षपातिन्!—पुष्यभूतिस्तद्वानुरागिन्!; पुष्यभूति-

विपद्बान्धव ! विन्ध्य ! बन्ध्योऽयम् अञ्जलिबन्धः ? मातः ! महाऽटवि ! रटन्तीं न शृणोषि इमाम् आपत्पतिताम् ? (२०२) पतङ्ग ! प्रसीद, पाहि पतिव्रताम् अशरणाम् । प्रयत्नरचित ! कृतघ्न ! चारित्रचण्डाल ! न रक्षसि राजपुत्रीम् ? (२०३) किम् अवधृतं लक्ष्मणैः ? हा देवि ! दुहितृस्नेहमयि ! यशोवति ! सुषितासि दग्धदैवदस्युना । देव ! दुहितरि दह्यमानायां न (२०४) आपतसि ? प्रतापशील ! शिथिलीभूतम् अपत्यप्रेम ? महाराज ! राज्यवर्धन ! न धावसि ? (२०५) मन्दीभूता भगिनीप्रीतिः ? अहो ! निष्ठुरः प्रेतभावः !! व्यपेहि पाप ! पावक ! स्त्रीघातनिर्घृण ! ज्वलन्

बंश्यानाम् एकान्ततया राजधर्मप्रतिपालनात् राजधर्मस्य तथात्वं बोध्यम् । उदासीनीभूतः,—निरपेक्षः ; आर्त्तत्राणरूपस्य स्वकर्त्तव्यस्याकरणादिति भावः । बन्ध्यः,—विफलः ; यतः अञ्जलिं बद्ध्वा प्रार्थ्यमानोऽपि विपन्नाननाद् त्वं न रक्षसीति भावः । महाऽटवि !—अरण्यानि ! रटन्तीं—विलपन्तीम् ; विलापं श्रुत्वाऽपि न प्रतिकरोषि ? इति भावः ।

(२०२) पतङ्ग !—सूर्य ! पक्षिन् वा, ("पतङ्गो पक्षिसूर्यौ च" इत्यमरः) । प्रयत्नरचित !—प्रकृष्टेन यत्नेन, रचित—पालित !, कृतघ्न !—कृतोपकारापकारिन् !, प्रयत्नरचितत्वेऽपि इदानीं विपन्नायाः रक्षिकायाः राजपुत्र्याः रक्षाऽकरणात् कृतघ्नत्वं चारित्रस्येति भावः । चारित्रचण्डाल !—चारित्रेषु—सुचरितेषु, चण्डाल—हीन ! इत्यर्थः, चण्डालवत् नृशंसकर्माकरणादिति भावः ।

(२०३) किम् अवधृतम् ?—किं गृहीतम् ? किमर्थं संयुक्तमित्यर्थः ; निरर्थकं स्थितमिति भावः । लक्ष्मणैः,—शुभाचरैः । सुषितासि—कृतसत्त्वेऽसि । दग्धदैवदस्युना—कृतविधिरूपतस्करेण ।

(२०४) आपतसि—आगच्छसि । शिथिलीभूतं—क्षीणं गतम् ।

(२०५) मन्दीभूता—अल्पीभूता । प्रेतभावः,—मृतत्वम् ; विगतचेतनत्वरूपस्य प्रेतत्वस्य प्राकृतसत्त्वेषु निरपेक्षतया जलत्वबोधराहित्यात् भगिनीप्रीतिः अपगता, तेन हि प्राकृतसत्त्वविकारत्वात् तस्य निष्ठुरत्वमभिहितमिति भावः । व्यपेहि—अपगच्छ, दूरमपसरेत्यर्थः । स्त्रीघातनिर्घृण !—नारीहननात् निष्करुण !

न लज्जसे ? भ्रातर्वात ! दासी तवाग्नि, (२०६) संवादय द्रुतं देवीदाहं देवाय दुःखितजनार्त्तिहराय हर्षाय। (२०७) नितान्तनिःशूक ! शोकश्वपाक ! सकामोऽसि ? दुःखदायिन् ! वियोगराक्षस ! तुष्टोऽसि ? विजने वने कमाक्रन्दामि ? कस्मै कथयामि ? कमुपयामि शरणम् ? कां दिशं (२०८) प्रतिपद्ये ? करोमि किम् अभागधेया ? (२०९) गान्धारि ! गृहीतोऽयं लतापाशः ? पिशाचि ! मोचनिके ! मुञ्च (२१०) शाखाग्रहणकलहम्। कलहंसि ! हंसि किमतःपरम् उत्तमाङ्गम् ? मङ्गलिके ! (२११) मुक्तगलं किमद्यापि क्रियते ? सुन्दरि ! दूरीभवति सखीसार्थः।

(२०६) संवादय—ज्ञापय। देवीदाहं—देव्याः,—राज्यश्रियाः, दाहः,—अग्निप्रवेशः तम्। दुःखितेति।—दुःखितजनानां—क्लिष्टलोकानाम्, आर्त्तिहराय—मनःपीडाप्रशमकाय। हर्षाय—देवाय हर्षवर्द्धनाय, ["क्रियया यमभिप्रेति—" इत्यादि वार्त्तिकात् चतुर्थी]।

(२०७) नितान्तनिःशूक !—नितान्तम्—एकान्तं, निः,—नास्ति, शूकः,—दया यस्य तत्सम्बुद्धौ, ("शूकोऽस्त्री शुक्रदययोः" इति मेदिनी) अतिनिर्दय ! इत्यर्थः। शोकश्वपाक !—मन्युचाण्डाल ! सकामोऽसि—पूर्णमनोरथोऽसि ; अस्मं खायत्तीकृत्येति भावः। तुष्टोऽसि ?—प्रीतोऽसि ? स्वजनैरन्यान् वियुज्य इति भावः। आक्रन्दामि—आह्वयामि,("आक्रन्दः क्रन्दने ज्ञाने मित्रदारुणयुद्धयोः" इति मेदिनी)।

(२०८) प्रतिपद्ये—गच्छामि। अभागधेया—अभाग्या, दुर्भगा इत्यर्थः।

(२०९) गान्धारि ! मोचनिके ! इत्यादीनि स्वमभिव्याहृतदासीनां सम्बोधनानि। गृहीतः,—धृतः। लतापाशः,—लतातिरज्जुः ; उद्बन्धनार्थमिति भावः, त्वयेति शेषः।

(२१०) शाखाग्रहणेति।—शाखायाः,—विटपस्य, ग्रहणं—धारणम्, उद्बन्धनार्थमिति भावः ; तव कलहः,—विवादः, अद्यनये एतस्यां शाखायामात्मानमुद्बध्नामीत्येवं रूपः इति भावः, तम्। हंसि—ताडयसि। उत्तमाङ्गं—शिरः ; सत्वरमेव सर्व्वा मरिष्यन्ति, तेन हि शिरोद्बननेनालमिति भावः।

(२११) मुक्तगलं—मुक्तकण्ठम्। दूरीभवति—दूरं गच्छतीत्यर्थः ; म्रियते इति भावः। सखीसार्थः,—वयस्यावर्गः।

(२१२) स्थास्यसि कथमिव अशिवे शवशिविरे शवरिके ! ? (२१३) सुतनु ! तनूनपाति पतिष्यसि त्वमपि ? मृणाल-कोमले ! मालावति ! म्लानाऽसि ? मातर्मातङ्गिके ! (२१४) अङ्गीकृतः त्वयाऽपि मृत्युः ? वत्से ! वत्सिके ! वत्स्यसि कथम् अनभिप्रेते प्रेतनगरे ? नागरिके ! (२१५) गरिमाणम् आगताऽसि अनया स्वामिभक्त्या । विराजिके ! (२१६) विराजिताऽसि राजपुत्रीविपदि जीवितव्ययव्यवसायेन। (२१७) भृगुपतनाभ्युद्यमभागाभिज्ञे ! भृङ्गारधारिणि ! धन्याऽसि । कैतकि ! कुतः पुनः ईदृशी स्वप्नेऽपि (२१८) सुस्वामिनी ? मेनके ! जन्मनि जन्मनि देवीदास्यमेव ददातु देवो देहं दहन् दहनः ।

---

(२१२) स्थास्यसि—स्थितिं करिष्यसि । अशिवे—अमङ्गले, शवशिविरे—श्मशाने इति भावः ।

(२१३) सुतनु !—शुभाङ्गि ! तनूनपाति—वह्नौ, ("अग्निर्वैश्वानरो वह्निः··· । ···जातवेदास्तनूनपात् ॥" इत्यमरः) म्लानाऽसि—विवर्णाऽसि ? शोकेनेति भावः ।

(२१४) अङ्गीकृतः,—स्वीकृतः । वत्स्यसि—आसिष्यसे, स्थास्यसीत्यर्थः । अनभिप्रेते—अनीप्सिते । प्रेतनगरे—श्मशानपुरे इत्यर्थः ।

(२१५) गरिमाणं—गौरवम् । आगता—प्राप्ता ।

(२१६) विराजिता—शोभिता, प्रशंसितेत्यर्थः । राजपुत्रीविपदि—राजपुत्र्याः,—राज्यश्रियाः इति यावत्, विपदि—व्यसने । जीवितव्ययव्यवसायेन—प्राणत्यागचेष्टितेन ।

(२१७) भृगुपतनेति ।—भृगोः,—प्रपातात्, पर्वततशिखरभागात् इत्यर्थः,("प्रपात-स्त्वटो भृगुः" इत्यमरः) पतनं—पातः, तस्य यः अभ्युद्यमः,—अभियोगः, आयह इत्यर्थः, तस्य भागः,—भजनं, यद्दर्शनमिति यावत्, स्वीकरणमिति भावः, तदभिज्ञा—तद्विषयज्ञानवती, कदा कस्यामवस्थायां भृगुपतनं स्वीकरणीयमित्यादिषु विज्ञा इत्यर्थः, तत्सम्बुद्धौ । भृङ्गारधारिणि ! जलपात्रविशेषवाहिनि ! धन्याऽसि—प्रशस्याऽसि ; भृगुपतनाऽऽयहादिति भावः ।

(२१८) सुस्वामिनी—अनुरूपा कर्त्री । दैवीदास्यं—देव्याः,—राज्यश्रियाः, दास्यं—कैङ्कर्यम् । दहन्—भस्मीकुर्वन् । दहनः,—अग्निः ।

विजये! (२१९) वीजय क्षमानुम्। मानुमति! (२२०) नमति इन्दीवरिका दिवं गन्तुकामा। कामदासि! देहि दक्षिनप्रदक्षिणावकाशम्। विरंचिके! विरचय वर्त्मम्। (२२१) विकिर किरातिके! कुसुमप्रकरम्। कुर्वरिके! कुरु (२२२) कुरुवककोरकाऽऽचितां चिताम्। चामरं चामरग्राहिणि! गृहाण पुनरपि कण्ठे। (२२३) मर्षयितव्यानि नर्मदे! नर्मनिर्मितानि निर्मर्यादहसितानि। भद्रे! सुभद्रे! भद्रमस्तु ते परलोकगमनम्। (२२४) ग्रामीणगुणानुरागिणि! ग्रामेयिके! गच्छ सुगतिम्। (२२५) वसन्तिके! अन्तरं प्रयच्छ, आपृच्छते क्षत्रधारी। देवि! देहि दृष्टिम्,

(२१९) वीजय—व्यजनवायुना सहीपय इत्यर्थः। क्षमानुम्—भूमिम्।

(२२०) नमति—प्रणमति। दिवं—स्वर्गम्। कामदासि!—कामकिङ्करि! दक्षिनप्रदक्षिणावकाशम्—अग्निप्रदक्षिणीकरणावसरम्; अग्नौ आत्मविसर्जनात् प्राक् अग्निप्रदक्षिणीकरणे मा विघ्नमुत्पादय इति भावः। ["विरंचिके" इत्यत्र "विधरिके" इति पाठान्तरम्]। विरचय—प्रज्ञापयेति भावः।

(२२१) विकिर—विक्षिप। कुसुमप्रकरं—पुष्पनिचयम्।

(२२२) कुरुवकेति।—कुरुवकाणां—नीलझिण्टीनां, कोरकैः,—कलिकाभिः, आचिताम्—आकीर्णाम्। चिताम्—मृतदाहार्थकाष्ठपुञ्जम्।

(२२३) मर्षयितव्यानि—सोढव्यानि, क्षन्तव्यानीत्यर्थः। नर्मनिर्मितानि—परिहासकृतानि। निर्मर्यादहसितानि—अवज्ञासूचकानि हास्यानि; मया यत् परिहासार्थं त्वामुद्दिश्य प्राक् उक्तैः हसितं, भवत्या: मर्यादाहानिकरं तत् सोढव्यमिति भावः। भद्रे—मङ्गलं, मङ्गलकरमित्यर्थः।

(२२४) ग्रामीणेति।—ग्रामीणाः,—ग्रामिकाः, मङ्गल इति यावत्,[ग्रामे भवाः इत्यर्थे "ग्रामाद्यखञौ" (४।२।९४ पा०) इति यञ्, पश्चात् नञ्समासः] तेषां ये गुणाः,—स्वाभ्यनुरागादयः, तेषु अनुरागः,—आसक्तिः विद्यतेऽस्याः तत्सम्बुद्धौ। ग्रामेयिके!—ग्रामवासिनि! सुगति—शोभना गतिं, वाञ्छनीयस्वर्गलोकमित्यर्थः।

(२२५) अन्तरम्—अवकाशम्। प्रयच्छ—देहि। आपृच्छते—सम्भाषते, ["आङि नुप्रच्छोः" इति वार्त्तिकात् आङ् पूर्वकात् पृच्छतेरात्मनेपदम्]।

(२२६) इष्टा तव जहाति जीवितं विजयसेना। सेयं मुक्तिका मुक्तकण्ठम् आरटति निकटे नाटकसूत्रधारी। पादयोः पतति ते ताम्बूलवाहिनी बहुमता राजपुत्रि! पत्रलता। कलिङ्गसेने! अयं (२२७) पश्चिमः परिष्वङ्गः, पीड्य निर्भरम् उरसा माम्। (२२८) असवः प्रवसन्ति वसन्तसेने!। मञ्जुलिके! (२२९) मार्ज्जयसि कतिकृत्व. सुदुःसहदुःखसहस्रासदिग्धं चक्षुः इदम्? रोदिषि कियत् आश्लिष्य च माम्? (२३०) निर्म्मार्ष्टुम् ईदृशं प्रायशो यशोधने!। (२३१) धीरयसि अद्यापि किं मां माधविके!? का इयम् अवस्था संस्थापनानाम्?। गतः कालः कालिन्दि! सखीजनानुनयाच्चलीनाम्। उन्मत्तिके!

(२२६) इष्टा—प्रिया। जहाति—त्यजति। मुक्तकण्ठं—उच्चैरित्यर्थः। आरटति—अभ्यर्थते, आक्रन्दतीत्यर्थः। नाटकसूत्रधारी—नाटकस्य—अभिनेयकाव्यस्य, सूत्रधारी—[सूत्रं नाटकीयसाधनं धारयति या सा इत्यर्थे धारयतेः कर्त्तरि अण् रूपम्] नटी इत्यर्थः। बहुमता—आदृता।

(२२७) पश्चिमः—चरमः, [पश्चाद्भव इत्यर्थे "अग्रादिपश्चाड्डिमच्" इति वार्त्तिकात् डिमच्]। परिष्वङ्गः—आलिङ्गनम्। निर्भरं—निर्दयं, गाढमित्यर्थः।

(२२८) असवः—प्राणाः; ["पुंसि सुखादयः प्राणाः" इत्यमरवचनात् असूनां नित्यं बहुत्वं ज्ञेयम्]। प्रवसन्ति—गच्छन्ति दूरमित्यर्थः।

(२२९) मार्ज्जयसि—शोधयसि, निर्जलीकरोषीत्यर्थः, [मार्ष्टेः णिचि लटि रूपम्]; कतिकृत्वः—कतिवारान्, ["सङ्ख्यायाः—" (५।४।१७ पा०) इति कृत्वसुच्]। सुदुःसहेति।—सुदुःसहैः—अतिदुःखेनापि सोढुमशक्यैः, दुःखानां सहस्रैः, —मनःपीड़ासमूहैः, यत् अक्षं—विगलितं नेत्रास्रु, तेन दिग्धं—लिप्तं, बाष्पकलुषितमित्यर्थः। कियत्—कियत्कालम्। आश्लिष्य—आलिङ्ग्य।

(२३०) निर्म्मार्ष्टुम्—सृष्टिपरम्परा। ईदृशं—दुःखबहुलमिति भावः।

(२३१) धीरयसि—स्थिरयसि। संस्थापनानां—प्रबोधनानाम्; किमयं कालः प्रबोधदानस्य? इति भावः। गतः—अतीतः। सखीति।—सखीजनेषु—वयस्यालीकेषु, यः अनुनयः—प्रार्थनं, 'मा कुप्य' 'प्रसीद' इत्यादिरूप इति भावः; यद्वा,—सखीजनानां यः अनुनयः—सान्त्वनं, सान्त्वनासूचकवाक्यप्रयोग इत्यर्थः, तस्य अन्त-

मत्तपालिके! (२२२) क्षन्तव्यः पृष्ठतः प्रणयिनोप्रणिपातानुरोधाः। (२२३) शिथिलय चकोरवर्ति! चरणग्रहणं ग्रहिणि!। कर्मलिनि! किमनेन पुनः पुनः (२२४) दैवोपालम्भेन? न प्राप्तं चिरं सखीजनसङ्गमसुखम्। आर्य्ये! महत्तरिके! तरङ्गसेने! नमस्कारः। सखि! सौदामनि! दृष्टासि?। ममुपनय (२२५) हव्यवाहनार्चनकुसुमानि कुमुदिके!। देहि चितारोहणाय रोहिणि! हस्तावलम्बनम्। (२२६) अम्ब! धात्रि! धीरा भव; भवन्ति एवंविधा एव कर्म्मणां विपाकाः

लयः,—करग्रहसंयोगाः तेषाम्, इदानीं मरणाध्यवसाये दृढ़ीभूते नास्ति सखीजनप्रसादनस्य सखीजनानुरोधरक्षणस्य वा समयः इति भावः।

(२२२) पृष्ठतः क्षन्तव्याः,—पश्चात् क्षन्तव्याः, उपेक्षिता इत्यर्थः। प्रणयिनीति। —प्रणयिनीनां—स्निग्धवयस्यानां, प्रणिपातैः,—विनयैः करणैः, ये अनुरोधाः,—अनुवर्त्तनानि, 'मा त्रियस्व' 'अस्मान् पालय' इत्यादयस्या विनयप्रदर्शनपूर्व्वकानुसरणानि याच्ञा वा; इदानीं सख्यादीनां सर्वासामेव ममतादिकं परित्यज्य मरणायैव दृढ़सङ्कल्पाऽस्मि इति भावः।

(२२३) शिथिलय—मन्दीभूतं कुरु.मा कुरु इति यावत्। ग्रहिणि!—आग्रहवति!

(२२४) दैवोपालम्भेन—नियतितिरस्कारेण। नेति।—चिरं—यावज्जीवमित्यर्थः, सखीजनसङ्गमसुखं—सहचरीसहवासानन्दः, न प्राप्तं, कैरपि कामिरपि वा इति शेषः; अतः दैवोपालम्भनालमिति भावः। महत्तरिके!—महाशये!। सौदामनि!—भोः सौदामनीनामधेये! सखीविशेषसम्बोधनमेतत्; [सुदामापर्व्वतभेदः तेनैकादिगित्यर्थे "तेनैकादिक्" (४।३।११२ पा०) इति अण्; स्फटिकमयस्य सुदाम्नः पर्व्वतविशेषस्य एकस्मिन् भागे जातत्वात् विद्युतः इयं संज्ञेति ज्ञेयम्; "सौदामिनि!" इति पाठस्तु प्रामादिक एव,"सुदाम्ना अद्रिणा एकदिक् सौदामनी" इति दीक्षितवचनात्; काशिकाकारा अप्येवमाहुः]। दृष्टा?—अवलोकिता? मयेति शेषः; त्वां किं पुनरवलोकयेयमिति भावः।

(२२५) हव्यवाहनार्चनकुसुमानि—अग्निपूजार्थपुष्पाणि। हस्तावलम्बनं—करार्पयं, तव प्रसारितं हस्तं धृत्वाऽहं चितामधिरोहामि इति भावः।

(२२६) अम्ब!—मातः! धात्रि!—उपमातः! विपाकाः,—परिणामाः।

पापकारिणीनाम्। (२३७) आर्य्यचरणानाम् अयमञ्जलिः। परः परलोकप्रयाणप्रणामोऽयं मातः!। मरणसमये कस्मात् लवलिके! (२३८) हलहलको बलीयान् आनन्दमयो हृदयस्य मे? (२३९) हृष्यन्ति उच्चरोमाञ्चमुच्चि किम् अङ्गीकृत्य अङ्गानि? वामनिके! वामेन मे (२४०) स्फुरितम् अक्ष्णा। हथा विरसमि वयस्य! वायस! हचे चौरिणि चणे चणे चीणपुण्यायाः पुरः। हरिणि! हेषितमिव हयानाम् उत्तरतः? कस्य इदम् (२४१) आतपत्रम् उच्चम् अत्र पादपान्तरेण प्रभावति! विभाव्यते? कुरङ्गिके! केन सुगृहीतनाम्नो नाम गृहीतम् अमृतमयम् आर्य्यस्य?। देवि! दिष्ट्या वर्द्धसे देवस्य हर्षस्य आगमनमहोत्सवेन"।

(२३७) आर्य्यचरणानाम्—आर्य्यस्य—ज्येष्ठस्य भ्रातुः हर्षस्य, चरणानां—पादानाम्। अयमञ्जलिः,—अयं प्रणामः इति यावत्। परः,—पश्चिमः। परेति।—परलोके—लोकान्तरे, प्रयाणाय—प्रस्थानाय, प्रणामः,—नतिः।

(२३८) हलहलकः,—उत्कण्ठा।

(२३९) हृष्यन्ति—पुलकितानि भवन्ति। उच्चरोमाञ्चमुच्चि—उच्चाः,—प्रबलाः, रोमाञ्चाः,—रोमोद्गमाः, तान् सुचन्ति—प्रकटयन्तीति तथोक्तानि, [सुचते: कर्त्तरि क्विपि रूपम्]। किम् अङ्गीकृत्य—अवलम्ब्य, किमानन्दकारणमधिगम्येति यावत्।

(२४०) स्फुरितं—स्पन्दितम्। अक्ष्णा—नेत्रेण, सकललभूचकमेतदिति भावः। विरसासि—रौषि। ["विरसासि" इत्यत्र "विरमसि" इति पाठे,—विश्राम्यसीत्यर्थः]। वयस्य!—सखे! वायस!—काक! हचे चौरिणि—वटाश्वत्थादिक्षीरप्रधाने वनस्पतौ; यदुक्तम्,—"न्यग्रोधोदुम्बराश्वत्थपारीषप्लक्षपादपाः। पक्षेते क्षीरिणां हचालेषां त्वक् पल्लवस्कलम्॥" इति। पुरः,—अग्रतः। हेषितमिव—क्रेषितमिव, ["रेषृ हेषृ क्रेषृ अव्यक्तशब्दे" इति हेषते: भावे निष्ठा]। हयानाम्—अश्वानां, हयेरित्यर्थः; [कर्त्तरि षष्ठी वैकल्पिकी]। उत्तरतः,—उत्तरस्यां दिशि।

(२४१) आतपत्रं—छत्रम्। पादपान्तरेण—हचान्तरालीन। विभाव्यते—ज्ञायते। सुगृहीतनाम्नः,—प्रातःस्मरणीयनाम्नः। अमृतमयं—पीयूषात्मकं, अत्यन्तपवित्रमिति भावः। दिष्ट्या—भाग्येन।

इत्येतच्च श्रुत्वा सत्वरम् (२४२) उपससर्प, ददर्श च मुच्छान्तीम् अग्निप्रवेशाय उद्यतां राजा राज्यश्रियम्, आललम्बे च (२४३) मूर्च्छामीलितलोचनाया ललाटं हस्तेन तस्याः ससम्भ्रमम्।

अथ (२४४) तेन भ्रातुः प्रेयसः प्रकोष्ठबद्धानाम् ओषधीनां रसविसरमिव प्रत्युज्जीवनक्षमं क्षरता, वमता इव पारिहार्य्यमणीनाम् अचिन्त्यं प्रभावम्, अमृतमिव नखचन्द्ररश्मिभिः उद्गिरता,(२४५)बध्नतेव चन्द्रोदयच्युतशिशिरशीकरं चन्द्रकान्तचूडामणिं मूर्द्धनि, मृणालमयाङ्गुलिना इव अतिशीतलेन निर्वापयता

(२४२) उपससर्प—समीपमाजगाम। मुच्छन्तीं—मोहमुपागताम् ; भ्रातुरागमनश्रवणोद्वेलितदुःखभारेण इति भावः। आललम्बे—जग्राह।

(२४३) मूर्च्छेति।—मूर्च्छया—मोहेन,भ्रातृदर्शनजनितहिगुणोच्छलितशोकाऽऽवेगेन इति भावः ; उक्तञ्च—"स्वजनस्य हि दुःखमयतो विहतेहारमिवोपजायते" इति कुमारसम्भवे कालिदासेन ; मीलिते—मुद्रिते, लोचने—नयने यस्याः तथाभूतायाः। ससम्भ्रमं—सत्वरम्।

(२४४) तेन—पूर्वोक्तेन, हस्तसंस्पर्शेनेत्यर्थेण सम्बन्धः। प्रेयसः,—अतिप्रियस्य, [प्रियशब्दादीयसुनि "प्रियस्थिर—"(६।४।१५७ पा०) इत्यादिना प्राऽऽदेशः]। भ्रातुः,—हर्षस्य। प्रकोष्ठबद्धानां—कूर्परमणिबन्धान्तरनिवेशितानाम्, ओषधीनां—लताविशेषाणां, प्रत्युज्जीवनक्षमं—प्राणप्रदानसमर्थमित्यर्थः, रसविसरमिव—द्रवौघमिव, क्षरता—स्रवता। पारिहार्य्यमणीनां—कटकरत्नानाम्,("आवापकः पारिहार्य्यः कटको वलयोऽस्त्रियाम्" इत्यमरः) अचिन्त्यम्—अतर्क्यं,प्रभावं—माहात्म्यं,वमता—उद्गिरता।

(२४५) बध्नतेव—विदधतेव सङ्घटयतेवेत्यर्थः। चन्द्रोदयच्युतशिशिरशीकरं—चन्द्रस्य—इन्दोः, उदयात्—प्रकाशात्, च्युतः,—गलितः, शिशिराणां—तुषाराणां, शीकरः,—कणः यस्मात् तम्। चन्द्रकान्तचूडामणिं—चन्द्रकान्तमणिनिर्मितमुकुटरत्नम्। मृणालेति।—मृणालमयाङ्गुलिना—बिसघटितकरशाखया, मृणालवदतीव शैत्यप्रदया अङ्गुल्या इत्यर्थः ; यद्यपि अङ्गुलिशब्दस्य स्त्रीत्वं कोषेषु दृश्यते, तथाऽप्यत्र पुंसि प्रयुक्तम्, अत एवाऽऽर्षत्वम्,—"पुंस्यपि, "रुहताधरौष्ठमङ्गुलिना—" इति भाकुलश्लोके" इति। निर्वापयता—प्रशमयता।

दह्यमानं हृदयं, (२४६) प्रत्यानयता इव कुतोऽपि जीवितम्, आक्रान्तकेन हस्तसंस्पर्शेन सहसैव समुन्मिमील राज्यश्रीः। तथा च (२४७) असम्भाविताऽऽगमनस्य अचिन्तितदर्शनस्य सहसा प्राप्तस्य भ्रातुः स्वप्नदृष्टदर्शनस्य इव कण्ठे ममाश्लिष्य तत्कालाविर्भावनिर्भरेण अभिभूतसर्व्वात्मना दुःखसम्भारेण निर्दयं नदीमुखप्रणालीभ्यामिव मुक्ताभ्यां स्थूलप्रवाहम् उत्सृजन्ती वाष्पवारि विलोचनाभ्यां,—"हा तात! हा अम्ब! हा सख्यः!" इति व्याहरन्ती मुहुर्मुहुः,

(२४६) प्रत्यानयतेव—प्रत्यावर्त्तयतेव। कुतोऽपि—कस्मात्चित् अविज्ञातहेतोरिति यावत्। समुन्मिमील—नेत्रोन्मीलनं चकारेत्यर्थः।

(२४७) असम्भावितागमनस्य—असम्भावितम्—अप्रत्याशितम्, अप्रतर्कितमित्यर्थः, आगमनम्—उपस्थितिः यस्य तथाभूतस्य। अचिन्तितदर्शनस्य—अचिन्तितं—प्राक्मनसाऽपि अनालोचितं, दर्शनम्—अवलोकनं यस्य तादृशस्य। स्वप्नेति।—स्वप्ने—निद्रावस्थायां, दृष्टम्—अनुभूतमित्यर्थः, दर्शनं—साक्षात्कारः यस्य तथाभूतस्य। समाश्लिष्य—समालिङ्ग्य, आसज्येत्यर्थः। तत्कालेति।—स एव कालः,—समयः तस्मिन्, आकस्मिकसाक्षात्कारक्षणे इत्यर्थः, आविर्भावेन—उदयेन, निर्भरः,—अतिशयितः, प्रगाढ इत्यर्थः, तेन। अभिभूतसर्व्वात्मना—सर्व्वाङ्गाभिभाविनेत्यर्थः, दुःखसम्भारेण—शोकातिरेकेण, निर्दयं—दृढं यथा तथा, अभिभूतसर्व्वात्मना इत्यनेन सम्बन्धः; यद्वा,—निर्दयं—प्रगाढम्, अतिशयितमित्यर्थः, तदयथा तथा उत्सृजन्ती इत्यनेन सम्बन्धः। नदीति।—नद्याः,—सरितः, मुखस्य—प्रभवस्थानस्य इत्यर्थः, ये प्रणाल्यौ—पयःपदव्यौ ताभ्याम्; ("द्वयोः प्रणाली पयसः पदव्याम्" इत्यमरः)। मुक्ताभ्याम्—उद्घाटिताभ्याम्। स्थूलप्रवाहं—स्थूलः,—पृथुः, महानित्यर्थः, प्रवाहः,—प्रवृत्तिः, निर्गमनमित्यर्थः, यस्य तथाभूतम्। वाष्पवारि—अश्रु। "वाष्पं ऊष्मणि नाऽश्रुणि" इति मेदिनीकरोक्तेः वाष्पशब्देनैव नेत्रसलिलार्थबोधात् वारिशब्दस्याधिकोपात्ततया कथितपदताऽऽख्यदोषस्यानिदमिति विभाव्यते, तथाऽपि श्रवणकुण्डलादिशब्देषु श्रवणादीनामिव सन्निधेः प्रतिपत्त्यर्थमेव तदुपन्यास इति ज्ञेयं, तथा हि वामनः,—"कर्णावतंसश्रवणकुण्डलशिरःशिखरेषु कर्णादिनिर्देशः सन्निधेः" इति (२ अधि० २ अध्या० १४ सू०)। व्याहरन्ती—कथयन्ती, विलपन्तीत्यर्थः।

(२४८) उच्चैस्तराच्च समुद्भूतभगिनीस्नेहसद्भावभारभावितमन्युना मुक्तकण्ठम् अतिचिरं विक्रुश्य,—"वत्से! स्थिरा भव त्वम्" इति भ्रात्रा(२४९)करस्थितमुखी समाश्वास्यमानाऽपि,(२५०)"कल्याणिनि! कुरु वचनम् अग्रजस्य गुरोः" इति आचार्येण याच्यमानाऽपि, "देवि! न पश्यसि देवस्य अवस्थाम्? अलमतिरुदितेन" इति राजलोकेन अभ्यर्थ्यमानाऽपि, "स्वामिनि! भ्रातरम् अवेक्षस्व" इति परिजनेन विज्ञाप्यमानाऽपि, (२५१)"दुहितः! विश्रम्य पुनः आरटितव्यम्" इति निवार्यमाणाऽपि बान्धवबहुलाभिः, "प्रियसखि! (२५२) कियद्दोदिषि? तूष्णीमास्स्व, दृढं दूयते

(२४८) उच्चैस्तराम्—अतिशयेन इत्यर्थः, ["किमेत्तिङव्यय—" (५।४।११ पा०) इति घस् आमु:]। समुद्भूतेति।—समुद्भूतेन—समुत्पन्नेन, आविर्भूतेनेत्यर्थः, भगिन्या—सहोदरायाः, यः स्नेहसद्भावः,—प्रीतिभावः, तस्य भारेण—भरेण, अतिशयेनेत्यर्थः, भावितः,—जनितः, मन्युः,—शोको यस्य तथाभूतेन। मुक्तकण्ठम्—उच्चैरित्यर्थः। विक्रुश्य—विलप्य।

(२४९) करेति।—करे—हस्ते, भ्रातुर्निजस्य वेति शेषः, स्थितं—रचितं, मुखं—वदनं यस्याः तथाभूता। ["करस्थितमुखी" इत्यत्र "करस्थगितमुखी" इति पाठे,—कराभ्यां—पाणिभ्यां, स्थगितम्—आच्छादितं, भ्रात्रा इति शेषः, क्रन्दननिवारणार्थमिति भावः, मुखं—वदनं यस्याः तथाभूता]। समाश्वास्यमानाऽपि—प्रबोध्यमानाऽपि, सान्त्व्यमानाऽपीत्यर्थः।

(२५०) कल्याणिनि!—सञ्जातमङ्गले! भाव्यदर्शनात् प्राप्तशुभफले इत्यर्थः, कुरु वचनं—वाक्यं प्रतिपालयेत्यर्थः। आचार्येण—दिवाकरमित्रेण। अलं—निषेधार्थकमव्ययम्, अतिरोदनं मा कुरु इत्यर्थः। राजलोकेन—सामन्तनृपसमूहेनेत्यर्थः। अभ्यर्थ्यमाना—प्रार्थ्यमाना। अवेक्षस्व—पश्य। परिजनेन—अनुजीविजनेन।

(२५१) दुहितः!—कन्ये! आरटितव्यं—रोदितव्यमिति भावः। बान्धवबहुलाभिः,—बान्धवेषु—स्वजनेषु, याः बहवः,—बन्धुस्त्रियः ताभिः।

(२५२) कियत्—कियत्कालमित्यर्थः। तूष्णीं—मौनम्, आस्स्व—उपविश, मौनावलम्बनं कुरु इत्यर्थः, मा रुदिहि इति यावत्। दृढम्—अत्यर्थम्। दूयते—सन्तापमनुभवति।

देवः" इति सखीभिः अनुनीयमानाऽपि, (२५३) चिरसम्भावितानेकदुःसहदुःखनिवहनिर्वहण-वाष्पोत्पीड़पीड्यमानकण्ठभागा, (२५४) प्रभूतमन्युभारभरितान्तःकरणा, करुणकाहलेन स्वरेण क्रतिचित्कालम् अतिदीर्घं रुरोद। विगते च मन्युवेगे वक्त्रेः समीपात् आच्छिद्य भ्रात्रा नीता निकटवर्त्तिनि तरुतले निषसाद।

(२५५) शनैः आचार्य्यस्तु तथा हर्षं इति विज्ञाय विवर्द्धितादरः सुतरां मुहूर्त्तामेव अतिवाह्य (२५६) निभृतसंज्ञाप्रापितेन शिष्येण उपनीतं नलिनीदलैः स्वयम् आदाय नम्रो

(२५३) चिरेति।—चिरं—दीर्घकालं व्याप्तेति भावः, सम्भावित,—भुक्तः इत्यर्थः, यः अनेकेषां—बहूनां, दुःसहानां—दुर्वहाणां, दुःखानां—क्लेशानां, निवहः,—समूहः, तस्य निर्वहणं,—निर्व्यूढः, परिसमाप्तिरित्यर्थः, सुचिरोपभुक्तानां दुःसहानां शोकसमुदयानां परिणाम इति यावत्, तेन, यो वाष्पोत्पीड़ः,—वाष्पाणां—नेत्रोदकानाम्, उत्पीड़ः,—प्रवाहः, तेन पीड्यमानः,—रुध्यमानः, कण्ठभागः,—गलान्तदेशः यस्याः तथाभूता।

(२५४) प्रभूतेति।—प्रभूतेन—प्रबलेन, मन्युभारेण—शोकभरेण, भरितम्—आपूरितम्, अन्तःकरणं—चेतः यस्याः तथोक्ता। करुणकाहलेन—करुणेन—करुणरसेन, काहलः,—भृशः, अतिशय इत्यर्थः, पूर्ण इति यावत्, तेन; ("काहलस्त्रैणायुधे। शब्दमात्रेऽपि पुंलिङ्गस्त्रिषु गृध्ने भृशं खले॥" इति मेदिनी) करुणरसपूर्णेन, करुणरसोद्दीपकेनेत्यर्थो वा। अतिदीर्घम्—अत्युच्चैरित्यर्थः, ["अतिदीर्घम्" इत्यत्र "अतिचिरम्" इति पाठान्तरम्]। मन्युवेगे—शोकप्रसरे। आच्छिद्य—आकृष्य। निषसाद—उपविवेश; ["सदिरप्रतेः" (८।३।६६ पा०) इति षत्वम्]।

(२५५) शनैः,—मन्दम्, अव्ययतया इत्यर्थः, [उपनिन्ये इति क्रियायाः विशेषणमिदम्]। आचार्य्यः,—दिवाकरमित्रः। तथा—तादृशः, सम्भाविति भावः; यद्वा, —तथा—तेन व्यापारेणेत्यर्थः, प्रागुक्तघटनयेति यावत्। विवर्द्धितादरः,—विशेषेण वर्द्धितः,—वृद्धिं गतः, आदरः,—बहुमानः यस्य तथाभूतः। अतिवाह्य—यापयित्वा।

(२५६) निभृतेति।—निभृतया—निःशब्दया, संज्ञया—इङ्गितेन, प्रापितः,—प्रादिष्टः इत्यर्थः, तेन। नलिनीदलैः,—पद्मिनीपत्रैः।

सुखप्रक्षालनाय उदकम् (२५७) उपनिन्ये। नरेन्द्रोऽपि सादरं गृहीत्वा प्रथमम् (२५८) अनवरतरोदनात्ताम्रं चिरप्रवृत्तास्रुजलजालं रक्तपङ्कजमिव खसुश्चक्षुः प्रक्षालयत्, पश्चात् आत्मनः। (२५९) प्रक्षालितमुखशशिनि च महीपाले सर्व्वतो निःशब्दः सम्बभूव सकलो लिखित इव लोकः। ततो नरेन्द्रो मन्दमन्दम् अब्रवीत् स्वसारं,—"वत्से! वन्दस्व अत्रभवन्तं भदन्तम्। एष ते भर्त्तुर्हृदयं द्वितीयम्, अस्माकञ्च गुरुः" इति। राजवचनात्तु (२६०) राजदुहितरि पतिपरिचयश्रवणोद्भूतेन पुनः आनीतनेत्राम्भसि नमन्त्याम् आचार्य्यः

(२५७) उपनिन्ये—अर्पितवान्, ददौमिति शेषः।

(२५८) अनवरतेति।—अनवरतेन—अविरतेन, रोदनेन—क्रन्दनेन, ताम्रम्—आरक्तम्। चिरमिति।—चिरं—दीर्घकालं व्याप्य, प्रवृत्तं—प्रसृतम्, अस्रुजलजालं—बाष्पसमूहः यस्मात् तथाभूतम्; अत्र अस्रुशब्देनैव नेत्रसलिलरूपार्थलाभात् जलशब्दस्य पुनरुक्ततया कथितपदताऽऽख्यदोषः; वामनस्तु एकार्थपदघटितवाक्येषु एकार्थत्वदोषमभिदधतवान्; एवञ्च तन्मते यथा करिकलभादिशब्दानां प्रौढकुञ्जररूपकलभार्थबोधाददोषत्वं, तथा अत्रापि सद्यःपतितास्रुमयजलप्रवाहरूपार्थस्य पश्चवसानाददोषः; तथा च वामनः,—"करिकलभशब्दः करिशब्दसादृश्यस्य प्रतिपत्त्यर्थम्" इति (२ अधि० २ अध्या० १७ सू०)। स्वसुः,—भगिन्याः। चक्षुः,—नयनम्। प्रक्षालयत्—अधावयत्। आत्मनः,—स्वस्य, चक्षुः इति सम्बन्धः।

(२५९) प्रक्षालितेति।—प्रक्षालितः,—धौतः, मुखशशी—आननेन्दुः येन तथोक्ते। सर्व्वतः,—समन्तात्। लिखित इव—चित्रार्पित इव। स्वसारं—भगिनीम्। वन्दस्व—अभिवादय, स्तुहि, प्रणम इत्यर्थो वा। अत्रभवन्तं—पूजनीयम्। भर्त्तुः,—बहुवल्लभस्य, द्वितीयं हृदयम्—अपरं शरीरम्, अन्तरङ्गमित्रमित्यर्थः।

(२६०) राजदुहितरि—राजकन्यायां, राज्यश्रियामिति यावत्। पतीति।—पत्युः,—प्रहर्षस्य, परिचयः,—संस्तवः, तदीयवार्त्तेत्यर्थः, तस्य श्रवणोद्भूतः,—आकर्षणप्रसङ्गः तेन। पुनः,—मूयः। आनीतेति।—आनीतम्—उपस्थितं, नेत्रयोः,—वसुधायाः, अम्भः,—सलिलं यया तथाभूतायां, भर्त्तृभद्दलेन श्रुत्वावार्त्ताऽऽकर्षणेन पुनर्बाष्पावेगमापन्नेत्रायामित्यर्थः। नमन्त्याम्—प्रणतिं कुर्व्वत्याम्।

(२६१) प्रयत्नरक्षितागतवाष्पाम्भःसम्भारभज्यमानधैर्य्यार्द्रलोचनः (२६२) किञ्चित्पराङ्मुखनयनो दीर्घं निश्वस्य। स्थित्वा च क्षणमेकं प्रदर्शितप्रश्रयो मृदुवादी मधुरया वाचा व्याजहार,—"कल्याणराशे! अलं रुदित्वा अतिचिरम्, राजलोको न अद्यापि रोदनात् निवर्त्तते। क्रियताम् अवश्यकरणीयः स्नानविधिः, स्नात्वा च गम्यतां (२६३) तामेव भूयो भुवम्"।

अथ भूपतिः (२६४) अनुवर्त्तमानो लौकिकमाचारम् आचार्य्यवचनञ्च, उत्थाय स्नात्वा (२६५) गिरिसरिति, सह स्वसा तामेव भूमिम् अयासीत्। (२६६) तस्याञ्च सपरिजनां प्रथमम् आहितावधानः पार्श्ववर्त्ती परवतीं शुचा (२६७) पतिपिण्डप्रदर्शितप्रयत्नप्रतिपन्नाभ्यवहारकरणां भगिनीम् अभोज-

(२६१) प्रयत्नेति।—प्रयत्नेन—प्रकृष्टचेष्टया, रक्षितानि अपि—निरोधितान्यपि, आगतानि—उपस्थितानि, यानि वाष्पाम्भांसि—नयनजलानि, तेषां सम्भारेण—निवहेन, भज्यमानं—क्षीयमाणं, व्यपगतप्रायमित्यर्थः, यत् धैर्य्यं—धीरत्वं, तेन आर्द्रे—सिक्ते, लोचने—नेत्रे यस्य तथाभूतः। अत्रापि वाष्पाम्भःपदं पूर्ववत् कथितपदताऽऽख्यदोषयुक्तमिति ज्ञेयम्।

(२६२) किञ्चित्पराङ्मुखनयनः,—साचीकृतचक्षुः। प्रदर्शितप्रश्रयः,—प्रकटितविनयः। मृदुवादी—अनुच्चभाषी, कोमलस्वराभिधायी इत्यर्थः। कल्याणराशे!—प्रभूतश्रेयोभाजनम्! अलं रुदित्वा—रोदनेनालं, क्रन्दनं मा कुरु इत्यर्थः। अतिचिरं—सुदीर्घकालम्।

(२६३) तामेव—पूर्वाधिष्ठानभूतां, यतः आगतोऽसि तामित्यर्थः। भूयः,—पुनरपि। भुवं—स्थानम्।

(२६४) अनुवर्त्तमानः,—अनुसरन्, पालयंश्च।

(२६५) गिरिसरिति—पर्व्वतीयनद्याम्।

(२६६) तस्याञ्च—भूमौ इत्यर्थः। सपरिजनां—सपरिवारां, स्नानुजीविलोकामित्यर्थः। आहितावधानः,—कृताभिनिवेशः, स्वयं पर्य्यवेक्षणपरः सन्नित्यर्थः। परवतीं शुचा—शोकपरवशामित्यर्थः।

(२६७) पतीति।—पत्युः,—भर्तुश्चः, पिण्डः,—मृतेभ्यो देयः गोलाकारः,

यत्; अनन्तरञ्च स्वयम् आहारस्थितिम् अकरोत्। भुक्तवाँश्च बन्धनात्प्रभृति विस्तरतः स्वसुः कान्यकुब्जात् (२६८) गौड़-सम्भ्रमं, मुक्तितो मुक्तनाम्ना (२६९) कुलपुत्रेण निष्कासनं, निर्गतायाश्च राज्यवर्द्धनमरणश्रवणं, श्रुत्वा च आहारनिराकरणम्, अनाहारपराहतायाश्च विन्ध्याटवीपर्य्यटनखेदं, (२७०) जातनिर्वेदायाः पावकप्रवेशोपक्रमणं यावत् सर्व्वमशृणोत् (२७१) व्यतिकरं परिजनतः। ततः सुखासीनम् एकत्र तरुतले विविक्तभुवि भगिनीहितीयं दूरस्थितानुजीविजनं

अन्नग्रहात इत्यर्थः, तस्मिन्, प्रदर्शितेन—बोधितेन, पत्युः पिण्डः दातव्यः जीवितया पत्न्या, तच्च जीवनम् आहारं विना न रक्षितुं शक्यते, तत्पिण्डमदत्त्वा आत्मत्यागे ऽाहानधर्म्मः, आप्रलयं नरकवासश्च इत्येवंरूपेण पर्य्यालोकितेनेति यावत्, प्रयत्नेन—प्रकृष्टानुरोधेन हेतुनेत्यर्थः, प्रतिपन्नं—स्वीकृतम्, अभ्यवहारकरणं—भोजनव्यापारः यया तथाविधाम्; भर्त्तरि बहुमानात् तत्पिण्डदानार्थमेव अभ्यवहारक्रिया कृता, न तु सा तदा स्वजीवने स्पृहावती आसीत् इति तात्पर्य्यम्। आहारस्थितिम्—आहाराय—भोजनाय, स्थितिम्—आस्थाम्, उपवेशनमित्यर्थः, ("स्यादास्था त्वासना स्थितिः" इत्यमरः); यद्वा,—आहारेण स्थितिम्—अवस्थानम्, आत्मजीवनरक्षणमित्यर्थः, ("स्थितिः स्थियामवस्थाने मर्य्यादायाञ्च भूमनि" इत्यमरः)।

(२६८) गौड़सम्भ्रमं—गौड़ाधिपात् भयम्। मुक्तितः,—बन्धनात्, कारावासात् इत्यर्थः, ("मुक्तिः स्यादरकस्थाने कारागारे च रत्नके" इति मेदिनी)।

(२६९) कुलपुत्रेण—सत्कुलप्रसूतेन। निष्कासनं—बहिष्करणम्, उद्वरणमित्यर्थः। आहारनिराकरणं—भोजनपरित्यागम्। अनाहारपराहतायाः,—उपवासपीड़िताया:।

(२७०) जातनिर्वेदायाः,—उत्पन्नवैराग्यायाः। पावकप्रवेशोपक्रमणम्—अग्निप्रवेशप्रक्रमम्।

(२७१) व्यतिकरं—वृत्तान्तं, व्यसनं वा, ("अथ व्यतिकरः पुंसि व्यसनव्यतिषङ्गयोः" इति मेदिनी)। परिजनतः,—परिजनसकाशात्। विविक्तभुवि—विजनप्रदेशे। भगिनीहितीयं—भगिनी—सहोदरा एव, हितीया—हितीयसहचरी यस्य तं, केवलं भगिन्या सहावस्थितमित्यर्थः। दूरेति।—दूरे—विप्रकृष्टस्थाने,

राजानम् आचार्यः समुपसृत्य शनैः (२७२) आसाञ्चक्रे ; स्थित्वा च कञ्चित् कालांशं लेशतो वक्तुमुपचक्रमे,—

"श्रीमन्! आकर्ण्यताम्, आख्येयमस्ति नः किञ्चित्—अयं हि (२७३) यौवनोन्मादात् परिभृय भूयसीर्भार्या यौवनावतारतरलतराः (२७४) तारा राजो रजनीकर्णपूरः पुरुहूतपुरोधसो धिषणस्य (२७५) पुरन्ध्रीं धर्म्मपत्नीं पत्नीयन् अतितरलः तारां नाम अपजहार ; नाकतस्य पलायाञ्चक्रे। (२७६) चकितचकोरलोचनया तया सह अतिकामया सर्व्वाकाराभिरामया रममाणो रमणीयेषु देशेषु चचार।

स्थिताः,—अवस्थिताः, अनुज्ञाविज्ञाताः,—परिज्ञाताः इत्यर्थः, यस्य तम्। आचार्यः,—दिवाकरमित्रः।

(२७२) आसाञ्चक्रे—उपविवेश। लेशतः,—किञ्चित्। उपचक्रमे—आरेभे। ["ग्रीष्माद्यर्थाभ्यः" (३।३ ४२ पा०) इति आत्मनेपदम्]। आख्येयं—वक्तव्यम्।

(२७३) यौवनोन्मादात्—तारुण्यजनितबुद्धिवैपरीत्यादित्यर्थः। भूयसीः,—बह्वीः, सदृविगतिम् अश्वित्यादिदृदृहितृरित्यर्थः। परिभृय—अवधीर्य, अनादृत्येत्यर्थः। यौवनेति।—यौवनस्य—तारुण्यस्य, अवतारेण—उदयेन, तरलतराः,—अतिशयेन स्फुरन्तीः, उद्दामयौवनाविर्भावरम्या इत्यर्थः।

(२७४) तारा राजः,—चन्द्रः। रजनीकर्णपूरः,—निशाकर्णभूषणभूतः। पुरुहूतपुरोधसः,—इन्द्रपुरोहितस्य। धिषणस्य—बृहस्पतेः, ("बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः" इत्यमरः)।

(२७५) पुरन्ध्रीं—गृहिणीम्। पत्नीयन्—पत्नीमिव आचरन्, ["उपमानादाचारे" (३।१।१० पा०) इति क्यच्]। अतितरलः,—अतिचञ्चलः, दुष्टकामुकप्रकृतिरित्यर्थः। अपजहार—मुमोष, तव व्यभिचारमकरोदित्यर्थः। नाकतः,—स्वर्गात्।

(२७६) चकितेति।—चकितः,—भीतः, चकोरः,—पक्षिविशेषः, तद्वत् लोचने—नयने यस्याः तथाभूतया, चञ्चललोचनया, चकोरीसदृशलोचनया इत्यर्थः। तया—तारया। अतिकामया—अतिकामुक्या। सर्वैः। सर्वैः—सकलैः, आकारैः—आकृत्या, वपुषेत्यर्थः, ("आकारावितिताकृतौ" इत्यमरः), अभिरामा—मनोरमा तया, सर्वाङ्गसुन्दर्या इत्यर्थः। रममाणः,—विहरन्।

(२७७) चिराच्च कथञ्चित् सर्व्वगीर्व्वाणवाणीगौरवात् गिरां पत्युः पुनरपि प्रत्यपेयामास ताम। हृदये तु (२७८) अनिश्वसनम् अदह्यत विरहात् वरारोहायाः तस्याः सततम्।

एकदा तु (२७९) शैलात् उदयात् उदयमानो विमले वारिणि वरुणालयस्य (२८०) सङ्क्रान्तमात्मनः प्रतिविम्बं विलोकितवान्। दृष्ट्वा च तदा मस्मार (२८१) सस्मरः स्मेरगण्डस्थलस्य तारायाः मुखस्य ; (२८२) मुमोच च मन्मथोन्माथमथ्यमानमानसः (२८३) स्वस्थोऽपि अस्वस्थः स्थवीयसः

(२७७) चिरात्—दीर्घकालात परमित्यर्थः। कथञ्चित्—अतिक्लेशेन, अनिच्छन्नपीति भावः। सर्व्वेति —सर्व्वेषां—सकलानां, गीर्व्वाणानां—देवानां, ("अमरा निर्जरा देवाः…। …गीर्व्वाणा दानवारयः॥" इत्यमरः) वाणीः,—वचनस्य, गौरवात्—तत्मानात्, देववाक्य ना सम्मानरक्षार्थमित्यर्थः। गिरां पत्युः,—बृहस्पतेः, ["षष्ठी शेषे" (२।३ ५० पा०) इति षष्ठी]। तां—ताराम्।

(२७८) अनिश्वसनम्—इत्यनं—काष्ठं, तद्वदृढं, दाम्भविनिर्मुक्तत्वादित्यर्थः, अदह्यत—सततप्यत, स इति शेषः ; यद्वा,—अदह्यत—अज्वल्यत, विरहानल इति शेषः। वरारोहायाः,—वरः,—श्रेष्ठः, सुन्दर इत्यर्थः, आरोहः,—श्रोणिभागः ("श्रोणिभागस्यारोहो वरारोहया:" इत्यमरः) यस्याः तस्याः, उत्तमाङ्गनायाः इत्यर्थः, ("वरारोहा नवकाशिन्युत्तमा वरवर्णिनी" इत्यमरः)। तस्याः,—तारायाः।

(२७९) उदयात् शैलात्—उदयाचलात्। उदयमानः,—उद्गच्छन्, [उत्पूर्व्वात् भौवादिकस्य "यम" इत्यस्य धातोः रूपमेतत्]। वरुणालयस्य—समुद्रस्य।

(२८०) सङ्क्रान्तं—प्रतिफलितम्। प्रतिविम्बं—प्रतिच्छायम्।

(२८१) सस्मरः,—सकामः, कामार्त्त इत्यर्थः। स्मेरगण्डस्थलस्य—विकसत्पीनतलस्य, ईषद्धासस्फुल्लकपोलदेशस्य वा। [मुखस्य इत्यत्र "अधीगर्थ—" (२।३।५२ पा०) इति कर्म्मणि षष्ठी]।

(२८२) मुमोच—ववर्ष इत्यर्थः। मन्मथेति।—मन्मथस्य—कामस्य, उन्माथेन —उत्पीडनेन, ["मन्मथोन्माथ—" इत्यत्र "मन्मथोन्माद—" इति पाठे,—मन्मथेन कृतः य उन्मादः,—उन्मत्तता, चित्तचाञ्चल्यमिति यावत्, तेन] मथ्यमानं—विलोड्यमानं, मानसं—हृदयं यस्य तथाभूतः।

(२८३) स्वस्थः,—प्रकृतिस्थोऽपि, अस्वस्थः,—अप्रकृतिस्थः इति विरोधः,

पीतसकलकुमुदवनप्रभाप्रवाहधवलताराभ्यामिव लोचनाभ्यां वाष्पवारिबिन्दून्। अथ पतत: (२८४) तान् उदन्वति समस्तान् एव आचेमु: मुक्ताशुक्तय:। (२८५) तासाञ्च कुक्षिकोषेषु मुक्ताफलीभूतान् अवाप तान् कथमपि रसातलनिवासी वासुकिर्नाम (२८६) विषमुचाम् ईश्व:। स च तै: मुक्ताफलै: पातालतलेऽपि तारागणमिव दर्शयद्भि: (२८७) एकावलीम् अकल्पयत्; चकार च मन्दाकिनीति नाम तस्या:। (२८८) सा च भगवत: सोमस्य सर्व्वासाम् ओषधीनाम् अधिपते: प्रभावात् अत्यन्तविषघ्नी, हिमामृतसम्भवत्वाच्च

स्वस्था:,—स्वर्गेऽस्य: इति तत्परिहारात् विरोधाभासोऽलङ्कार:, [स्व:,—परलोके, स्वर्गे इति यावत्, तिष्ठति इत्यर्थे स्वरित्युपपदपूर्व्वकात् स्थाधातो: कप्रत्यये "खपरे शरि वा विसर्गलोपो वक्तव्य:" (वा०) इति विसर्गलोप:] अस्वस्थताकारणभूतेन दु:खसन्तापादिना विरहिते स्वर्गे स्थितोऽपीत्यपिशब्दार्थ:। स्वौषस:,—अतिस्थूलान्; ["स्थूलदूर—" (६।४ १५६ पा०) इति ईयसुनि स्थूलस्य स्थवादेश:]। पीतेति।—पीतं—सेवितमित्यर्थ:, यत् सकलं—समग्रं, कुमुदवनं—कैरवारण्यं, सितोत्पलसमूह इत्यर्थ:, तस्य प्रभा वाह:,—कान्तिसमूह:, तेन धवला—शुभ्रा, विरहपाण्डुरा इति भाव:, तारा—कनीनिका यतीलाभ्याम्। वाष्पवारिबिन्दून्—अश्रुकणान्; अत्रापि धूम्रायत् वाष्पपदेनैव गतार्थतया वारिशब्दस्य पुनरुक्ते: कथितपदताऽऽख्यदोष:।

(२८४) तान्—वाष्पवारिबिन्दून्। उदन्वति—समुद्रे। आचेमु:,—पपु:। मुक्ताशुक्तय:,—मुक्ताजनक-मुक्ताखोटा:।

(२८५) तासां—मुक्तायुक्तीनां, कुक्षिकोषेषु—उदराभ्यन्तरेषु। मुक्ताफलीभूतान्—मौक्तिकरूपेण परिणतानित्यर्थ:। अवाप—प्राप। तान्—वाष्पबिन्दूनित्यर्थ:। कथमपि—केनापि प्रकारेण।

(२८६) विषमुचां—नागानाम्, ईश्व:,—प्रभु:, नागराज इत्यर्थ:।

(२८७) एकावलीम्—एकसरं, हारविशेषमिति यावत्। अकल्पयत्—अरचयत्। तस्या:,—एकावल्या:।

(२८८) सा—एकावली। ओषधीनां—फलपाकान्तानां व्रीहियवादीनाम्, ("ओषध्य: फलपाकान्ता:" इत्यमर:) अधिपते:,—ईश्वस्य, ("ओषधीशो निशापति:"

स्पर्शेन सर्व्वसत्त्वसन्तापहारिणी बभूव। (२८८) अतः स तां सर्व्वदा विषोपशान्तये वासुकिः पर्य्यधत्त।

(२८०) समतिक्रामति च कियत्यपि काले कदाचित् ताम् एकावलीं तस्मात् नागराजात् नागार्জ্জुनो नाम नागैः एव आनीतः पातालतलं भिक्षुः अभिचत, लेभे च। निर्गत्य रसातलात् त्रिसमुद्राधिपतये सातवाहननाम्ने नरेन्द्राय सुहृदे स ददौ ताम्। सा च अस्माकं कालेन शिष्यपरम्परया कथमपि हस्तमुपगता। यद्यपि च (२८१) परिभव इव

इत्यमरप्रमाणात् चन्द्रस्य ओषध्यधिपतित्वं बोद्धव्यम्)। सोमस्य—चन्द्रस्य। प्रभावात्—माहात्म्यात्। अत्यन्तविषघ्नी—अतिशयेन विषहरी। हिमेति।—हिम—तुहिनम्, अमृतमिव—पीयूषमिव, सन्तापनाशकत्वादिति भावः; यद्वा,—हिमं—शीतलं, यत् अमृतं—सुधा; चन्द्रलोके सुधाऽवस्थानात् चन्द्रस्य सुधानिधित्वमिति भावः, तत्सम्बन्धत्वात्—तदुत्पन्नत्वात्; यद्वा,—हिम यत् अमृतं—जलं, सामुद्रमिति भावः, ("अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते" इति मेदिनी) तत्सम्बन्धत्वात्, समुद्रगर्भोत्पत्तिमत्त्वे मुक्ताफलेव पारिप्लवनादिति भावः। सर्व्वसत्त्वसन्तापहारिणी—निखिलजीवानां ज्वरनाशिनी।

(२८९) ["अतः" इत्यत्र "यतः" इति पाठान्तरम्] विषोपशान्तये—विषसन्तापनिवृत्तये; नागलोकस्य विषपूर्णत्वात् रूक्षिद्वेव विषरूक्षत्वादिति वा भावः। पर्य्यधत्त—परिहितवान्।

(२९०) समतिक्रामति—समतीते, समतिगच्छति इत्यर्थः। नागराजात्—वासुकेः; [भिक्षतेः याच्ञार्थकतया द्विकर्मकत्वेन "नागराजात्" इत्यत्र गौणे कर्म्मणि द्वितीया एव भवितुमुचिता, तेन "नागराजम्" इत्येव प्रयोक्तुमुचितमिति]। नागैः,—कैश्चित् सर्पैः। भिक्षुः,—बौद्धसन्यासी। अभिचत—अयाचत। त्रिसमुद्राधिपतये—तदाख्यनगरस्वामिने; यद्वा,—तिसृषु दिक्षु स्थितः समुद्रः यत्र सः त्रिसमुद्रः,—अन्तरीपविशेष इत्यर्थः, तदधिपतये। सुहृदे—मित्राय, आत्मन इति शेषः। शिष्यपरम्परया—शिष्यप्रशिष्यक्रमेण। कथमपि—अज्ञातप्रकारेण इत्यर्थः।

(२९१) परिभव इव—अनादर इव, अवज्ञाकरणमिवेत्यर्थः, भिक्षोर्दानयाच्ञा-

भवति भवादृशां दर्शनम उपचारः, तथाऽपि (२८२) ओषधिबुद्ध्या बुद्धिमता सर्व्वसत्त्वराशिरक्षाप्रहृत्तेन रक्षणीयशरीरेण आयुष्मता विषरक्षाऽपेक्षया गृह्यताम्" इत्यभिधाय भिक्षोः (२८३) अभ्यासवर्त्तिनः चीवरपटान्तसंयतां मुमोच ताम् एकावलीं मन्दाकिनीम् ।

(२८४) उन्मुच्यमानाया एव यस्याः प्रभालेपिनि लब्धावकाशे विषदमहसि महीयसि विसर्पति रश्मिमण्डले, युगपद्धवलायमानेषु दिङ्मुखेषु, (२८५) मुकुलितलताभ्यूत्कण्ठितैः आ मूलाद्विकाशितमिव तरुभिः,(२८६) अभिनवमृणाललुब्धैः

दिति भावः । दावम:,—दानेन निर्वृत्तः, ["ऽडुतः ञ्कः" (४ ३।८८ पा०) इति दत्तार्थे ञ्कः, "वर्मचियम्" (४.४।२० पा०) इति मप् च] । उपचारः,—सत्कारः ।

(२८२) ओषधिबुद्ध्या—ओषधाधया, ओषधिः इति विधिना इत्यर्थः ; विषनाशकत्वात् सन्तापनाशकत्वेति भावः । सर्वेति ।—सर्वेषां—क्षुद्राणां, सत्त्वराशीनां—प्राणिसङ्घानां, रक्षायां—पालने, रक्षार्थे वा, प्रहृत्तः,—उद्यतः तेन ; अत एव रक्षणीयं—पालनीयं, शरीरं—देहः येन यस्य वा तथाभूतेन, अवश्यमेव रक्षाईशरीरेण इत्यर्थः । विषरक्षापेक्षया—विषेभ्यः आत्मरक्षानुरोधेन ।

(२८३) अभ्यासवर्त्तिनः,—अन्तिकस्थितस्य, निकटस्थितस्य इत्यर्थः, ("समीपे निकटाभ्यर्ण··· । सदेशाभ्याससन्निधः··· ॥" इत्यमरः) । चीवरपटान्तसंयतां—क्षौमीनाञ्चलबद्धाम् ।

(२८४) उन्मुच्यमानायाः,—निष्काश्यमानायाः । यस्याः,—मन्दाकिन्याः । प्रभालेपिनि—कान्तिव्यापिनि । लब्धावकाशे—प्राप्तावसरे, बहुदूरव्यापिनीत्यर्थः । विषदमहसि—उज्ज्वलतेजसि । महीयसि—अतिमहति । विसर्पति—प्रसरति । रश्मिमण्डले—किरणनिचये । युगपत्—सहसा, एकदैव वा ।

(२८५) मुकुलितेति ।—मुकुलिताः,—विकासोन्मुखा इति भावः, लताः,—बोधः एव,लब्धः,—स्त्रियः,नायिका इति यावत्, तासु उत्कण्ठितैः,—तत्सङ्गकामिभिरिति भावः । तरुभिः,—द्रुभिः, नायकैरिति भावः, आ मूलात्—शिफाम् आरभ्य शिखरपर्य्यन्तमित्यर्थः । विकाशितम् इव—उल्लासितमिव ; लताविकासधियेति भावः ।

(२८६) अभिनवेति ।—अभिनवं—प्रत्यग्रं, सद्य उद्भूतत्वादतिशयमिति भावः,

धावितमिव धुतपक्षपुटपटलधवलितगगनं वनसरसीहंसयूथैः, (२९७) स्फुटितमिव भरवशविशीर्ष्यमाणधूलिधवलैः गर्भभेद-सूचितसूचीमच्चयशुचिभिः केतकीवाटैः, (२९८) उद्गलित-दलदन्तुराभिः प्रबुद्धमिव कुमुदिनीभिः, (२९९) विधुनित-सटाभारभरितदिक्चक्रैः चलितमिव केसरिकुलैः, प्रहसित-मिव (३००) दशनांशुमालाऽऽलोकलिप्यमानवनं वनदेवताभिः, विकसितमिव (३०१) ग्रथितलितकुसुमकोशकेसराट्टहासनिर-

---

यत् सगणं—विभं, तव लुब्धैः,—लोलपैः। धुतेति।—धुतैः,—कम्पितैः, विस्तारितैरिति भावः, पक्षपुटानां—पतत्रयुगलानां, पटलैः,—समूहैः, धवलित—श्वेतीकृतं, गगनं—नभः यस्मिन् तदयथा तथा, वनसरसीहंसयूथैः,—आरण्यसरोवरहंसवृन्दैः, धावितमिव—विद्रुतमिव; अत्र प्रकृतानां मन्दाकिनीप्रभवाणाम् अप्रकृतहंसयूथ-धावितत्वरूपेण सम्भावनादुत्प्रेक्षाऽलङ्कारः; एवमुत्तरत्रापि ज्ञेयम्।

(२९७) भरेति।—भरवशेन—पुष्टिवशेन, परिणतत्वेनेत्यर्थः, विशीर्ष्यमाणाभिः,—विकीर्ष्यमाणाभिः, धूलिभिः,—रजोभिः, परागैरिति यावत्, धवलाः,—शुभ्राः कैः। गर्भेति।—गर्भभेदेन—अभ्यन्तरस्फोटनेन, सूचितैः,—प्रकटितैः, स्फुटितैरित्यर्थः, सूचीनां—सूचीवत् तीक्ष्णानां शिखानां, सञ्चयैः,—समूहैः, शुचयः,—विशदाः तैः। केतकीवाटैः,—केतकीवनैरित्यर्थः, स्फुटितमिव—विकसितमिव इत्युत्प्रेक्षा।

(२९८) उद्गलितेति।—उद्गलितैः,—निर्गतैः, प्रस्फुटितैरिति यावत्, दलैः,—छदैः, दन्तुराभिः,—सञ्जातदन्ताभिरिव लक्ष्यमाणाभिः। प्रबुद्धामिव—विकसित-मिव इत्युत्प्रेक्षा।

(२९९) विधुनेति।—विधुनेन—कम्पनवशात् विस्तारितेन, सितसटानां—श्वेतजटानां, भारेण—भरेण, अतिशय्येनेत्यर्थः, भरितः,—आपूरितः, दिक्चक्रं,—दिक्समूहः, दिङ्मण्डलमित्यर्थः, यैः तथाभूतैः। केसरिकुलैः,—सिंहवृन्दैः, चलितमिव—कम्पितमिव इत्युत्प्रेक्षा।

(३००) दशनेति।—दशनांशूनां—दन्तकिरणानां, माला—समूहः, तया आलोकेन—प्रभया, लिप्यमानं—दिप्यमानं, वनम्—अरण्यं यस्मिन् तदयथा तथा।

(३०१) ग्रथितेति।—ग्रथितानां—ग्रथीभूतानां, स्फोटनातिशय्यादिति भावः; कुसुमानां—पुष्पाणां, कोशकेसराः,—कर्णिकारकिञ्जल्काः, अत्र

कुशं काशकाननैः, (३०२) भ्रान्तमिव सम्भ्रमभ्रमितबाल-पल्लवपरिवेशखेतायमानैः चमरीकदम्बकैः, (३०३) प्रस्तृतमिव स्फायमानफेनिलतरलतरतरङ्गोद्गारिणा गिरिणदीपूरेण, (३०४) अपरतारागणलाभमुदितेन उदितमिव विकचमरीचि-चक्राऽऽक्रान्तककुभा पूर्णचन्द्रेण, (३०५) प्रक्षालित इव दावा-नलधूलिधूसरितदिगन्तो दिवसः, पुनरिव धौतानि अश्रुजल-क्लिष्टानि नारीणां मुखानि।

स्तरस्थकेसराः इत्यर्थो वा, अट्टहासाः इव—उच्चैर्हसितानि इव, निरङ्कुशाः,—निर्बाधाः यस्मिन् तत् यथा तथा। काशकानने,—इक्षुगन्धाख्यतृणविशेषारण्ये इत्यर्थः।

(३०२) सम्भ्रमेति।—सम्भ्रमेण—त्वराविशेषेण, भ्रमितैः,—चालितैः, बाल-पल्लवपरिवेशैः,—पुच्छलोमकिसलयमण्डलैः, श्वेतायमानाः,—श्वेता इव आचरन्तः तैः, ["कर्तुः क्यङ्—" (३।१।११ पा०) इति आचारार्थे क्यङ्]। चमरी-कदम्बकैः,—चमरीसंघकलगविशेषवृन्दैः। भ्रान्तमिव—चलितमिव इत्युत्प्रेक्षा।

(३०३) प्रस्तृतमिव—विस्तृतमिव इत्युत्प्रेक्षा। स्फायमानेति।—स्फायमानाः,—वर्द्धमानाः, फेनिलाः,—फेनीरसमुद्गिरन्तः, तरलतराः,—अतिचञ्चलाः, ये तरङ्गाः,—ऊर्म्मयः, तान् उद्गिरति—उद्गमयतीति तथाभूतेन। गिरिणदीपूरेण—पर्व्वतीयसरि-त्प्रवलप्रवाहेणेत्यर्थः, ["गिरिनद्यादीनां वा" (वा०) इति पाक्षिकत्वम्]।

(३०४) अपरेति।—अपरे—अन्ये, आकाशसञ्चारितारकाभ्यः नवीनाः, तारापतित्वात् चन्द्रस्य इति भावः, तारागणाः,—नक्षत्रवृन्दानि, तेषां लाभः,—प्राप्तिः, तेन मुदितः,—प्रहृष्टः तेन। विकचेति।—विकचैः,—विकसद्भिः, मरीचीनां—मयूखानां, चक्रैः,—समूहैः, आक्रान्ताः,—आपूरिताः, इयंतिरेकादिति भावः, ककुभः,—दिशः येन तथोक्तेन।

(३०५) प्रक्षालितः,—धौतः। दावानलेति।—दावानलस्य—वनवह्नेः, धूलिभिः,—भस्मभिरित्यर्थः, धूसरितः,—पाण्डुरः, दिगन्तः,—आशाप्रान्तः यस्मिन् तथाभूतः। पुनः—प्रथमं जलेन प्रक्षालितान्यपि, भूयोऽपि इत्यर्थः। धौतानि—क्षालितानि, अश्रुजलक्लिष्टानि—बाष्पवर्षेण मलिनानि। मुखानीव—आननानीव; अत्र धावल्यसाम्यात् प्रकृतस्य मन्दाकिनीप्रवाहस्य अप्रकृतनारीमुखत्वेन सम्भावनात् औत्प्रेक्षोऽवहित्थः, मुखस्य बहुवाचकत्वात्।

राजा तु (३०६) मांसलैः तस्याः सम्मुखैः मयूखैः आकुलीक्रियमाणं मुहुर्मुहुः उन्मीलयन् निमीलयंश्च चक्षुः कथमपि प्रयत्नेन ददर्श (३०७) सर्व्वाशापूरणीं षड्क्रीकृतामिव दिङ्नागकरग्रीकरसंहतिं, (३०८) घनमुक्तां शारदीम् इव लेखीकृतां ज्योत्स्नां, (३०९) प्रकटपदकचिह्नां सचारवीथीमिव बालेन्दोः, (३१०) निश्चलीभूतां सप्तर्षिमालामिव हस्तमुक्ताम्, अभिभूतसकलभुवनभूषणभूतिप्रभावाम् ऐशानीमिव मूर्त्ति-

(३०६) मांसलैः—प्रभूतैः। तस्याः—एकावल्याः। सम्मुखैः—अभिमुखवर्त्तिभिः। आकुलीक्रियमाणं—व्याकुलीक्रियमाणं, प्रतिरुध्यमानमित्यर्थः; ददर्शनप्रतीपरोधादिति भावः; उन्मीलयन्—उन्मेषयन्। निमीलयन्—मुद्रितं कुर्व्वन्। प्रयत्नेन—प्रकृष्टचेष्टया; एकावलीप्रभाभिः दृष्टेरवरोधादिति भावः।

(३०७) सर्व्वाशापूरणीं—सर्व्वादृग्ग्राह्यां, सर्व्वादरण्यापनीं वा, सर्व्वमनोरथसम्पादिनीं च। षड्क्रीकृतां—श्वेतीकृतामेव स्थापिताम्। दिङ्नागेति।—दिङ्नागस्य—ऐरावतस्य, करः,—शुण्डः, तस्य ग्रीकरसंहतिमिव—निर्गलदच्छहिन्दुधारामिव। इयन्तु उपमा भूलोकदुर्लभस्य महाप्रमाणस्य अतिशुभ्रस्य ऐरावतस्य करनिःसृतत्वात् दुग्धापत्वाच्छत्वातिशुभ्रत्वद्योतनार्था इति बोद्धव्यम्।

(३०८) घनमुक्तां—मेघावरणरहितां, निरन्तरसन्निविष्टमुक्ताफलखचितां च। शारदीं—शरत्कालिकीम्, अतिविशदत्वादिति भावः। लेखीकृतां—श्वेतीकृतां, ज्योत्स्नां—चन्द्रिकाम्।

(३०९) प्रकटेति।—प्रकटम्—उच्चलं, पदकं—मध्यमणिः, पदमिव—चरणमिव इति पदकं तच्च, चिह्नं—लक्ष्म यस्याः तां, सचारवीथीमिव—सञ्चरणपद्धतिमिव। बालेन्दोः,—नवोदितस्य चन्द्रस्य, रम्यदर्शनत्वात् बालेन्दुरितिपदं प्रयुक्तम्; चित्राङ्कतया अतिशुभ्रतया च तद्गतानि मुक्ताफलानि द्वितीयाचन्द्रस्य पदविन्यासलक्ष्मीरिव शुशुभिरे इति भावः।

(३१०) हस्तमुक्तां—हस्तात्—करात्, भिक्षोरिति भावः, हस्तो नाम नक्षत्रं, तस्मात् मुक्तां—निःसृताम्; अत्र पुंस्त्वयोगोऽपि दृश्यते, तथा हि ज्योतिषे,—"हस्तो मूलः श्रवणः पुनर्व्वसुः सप्तर्षिरश्वथा पुष्यः। पुंसंज्ञिते च कार्य्ये पुंनामायं गणः प्रथमः॥" इति। हस्ते समुदयस्य शरत्कालिकतया सप्तर्षिमण्डलस्य अपूर्व्वशोभासम्पत्तये हस्तशब्दोपादानमिति ज्ञेयम्। निश्चलीभूतां—स्थिरीभूताम्। सप्तर्षिमालामिव—

कलां, धवलतागुणगृहीतां कान्तिमिव निर्गतां क्षीरराशेः, (३११) अनेकमहामहीभृत्परम्पराऽऽगतां गङ्गामिव दुर्गतिहराम्, (३१२) अनवरतस्फुरिततरलांशुकां (३१३) पुरःसरपताकामिव महेश्वरभावागमस्य, घनसारशुक्लां दन्तपङ्क्तिम् इव अभिमुखस्य ईश्वरस्य, (३१४) वरमनोरथपूरणसमर्थां

मारीच्यादिसप्तर्षिसमूहमिव। अभिभूतेति।—अभिभूतः,—निर्ज्जितः, सकलानां—सर्वेषां, भुवनानां—लोकानां, भूषणभूतेः,—अलङ्कारसम्पदः, प्रभावः,—उत्कर्षः यया ताम्; अन्यत्र,—अभिभूतः,—निर्ज्जितः, सकलभुवनस्य—चतुर्दशलोकस्य, भूषणम्—अलङ्काररूपं इत्यर्थः, महादेव इति यावत्, तस्य भूतेः,—भस्मनः, अङ्गलिप्तस्य इति भावः, प्रभावः यया ताम्। ऐशानीमिव—ईशानस्य—शिवस्य इयमिति तां, शैवीमित्यर्थः; चन्द्रशेखरस्य शिरःशेखरीभूतामिति यावत्। धवलतेति।—धवलतागुणेन—शैत्यधर्म्मेण, श्वेतवर्णतन्तुना च, गृहीता—आश्रिता, गुम्फिता च ताम्। क्षीरराशेः,—दुग्धसमूहादित्यर्थः, क्षीरोदादिति वा।

(३११) अनेकेति।—अनेके—बहवः, महान्तः,—उन्नताः, श्रेष्ठाश्च, महीभृतः,—पर्व्वताः, राजानश्च, तेषां परम्पराः,—धाराः, ताभ्यः आगता—उपस्थिता ताम्। दुर्गतिहरा—दारिद्र्यहारिणीं, नरकनिवारिणीञ्च। ("दुर्गतिर्नरके नैःस्वे" इति मेदिनी)।

(३१२) अनवरतेति।—अनवरतं—सततं, स्फुरिताः,—स्फूर्त्तिं गताः, तरलस्य—मध्यमणेः, अंशुकाः,—किरणाः; यद्वा,—तरलाः,—चञ्चलाः, अंशुकाः,—किरणाः, तरलानि—चञ्चलानि, सूक्ष्माणि वा, अंशुकानि—पटाश्च यस्याः तथीक्ताम्।

(३१३) पुरःसरेति।—पुरः,—अग्रतः, सरति—गच्छतीति पुरःसरी, ["पुरोऽग्रतोऽग्रेषु सर्त्ते." (वा०) इति टः], सा चासौ पताका—वैजयन्ती चेति तामिव। महेश्वरभावागमस्य—महेश्वरस्य भावः,—महेश्वर्य्यमित्यर्थः, तस्य आगमः,—प्राप्तिः तस्य, साम्राज्यलाभस्य इत्यर्थः। घनसारशुक्लां—कर्पूरवत् धवलाम्, ("अथ कर्पूरे नपुंसकलिङ्गे। घनसारचन्द्रसंज्ञः सितोभ्रो हिमवालुका॥" इत्यमरः); अन्यत्र,—घना—निरन्तरा, सारा—सारवती, दृढेत्यर्थः, सा चासौ शुक्ला—शुभ्रा चेति ताम्। दन्तपङ्क्तिं—दशनश्रेणीम्। अभिमुखस्य—अनुकूलस्य इति यावत्। ईश्वरस्य—प्रभोः, देवस्येति वा।

(३१४) वरमनोरथपूरणसमर्थां—वरः,—श्रेष्ठः, मनोरथः,—कामः, इच्छेति यावत्, वरस्य—जामातुः, मनोरथस्य, तस्य पूरणे—साधने, समर्थां—दक्षा

स्वयंवरस्रजमिव भुवनश्रियः, (३१५) निजकरपल्लवावरण-दुर्लक्ष्यां (३१६) चक्षूरागविहसतिकामिव वसुधायाः, (३१७) मन्त्रकोषसाधनप्रहृत्तस्य अक्षमालामिव राजधर्मस्य, (३१८) समुद्रालङ्कारभूतां सङ्ख्यालेख्यपट्टिकामिव कुबेर-कोशस्य ; पश्यन् च एतां विस्मयम् आजगाम मनसा सुचिरम्।

ताम्। स्वयंवरस्रजं—स्वयम्—आत्मना, कन्ययेति यावत्, वरः,—वरणं, स्वपतेरिति भावः, तत्र तस्यै वा स्रजं—गुम्फकुसुममालां, भाविपतेर्गलदेशे अर्पणार्थमिति भावः। भुवनश्रियः,—जगल्लक्ष्म्याः, राजलक्ष्म्या इति यावत्।

(३१५) निजेति।—निजाः,—स्वीयाः, कराः,—रश्मय एव, पल्लवाः,—किसलयाः, प्रभातारुण्यात् दृष्टिरोधकत्वसाधर्म्यात् इति भावः ; निज-,—स्वीय-,कर-पल्लव-,—हस्तकिसलयैः, तैः तेन च आवरणेन—आच्छादनेन, दुर्लक्ष्यां—दुर्दर्शाम्।

(३१६) चक्षूरागेति।—चक्षुषः,—नेत्रस्य, रागः,—प्रीतिः, तेन विहसतिकां—लज्जाहासः ताम् इव ; खलार्थे राजनि प्रणयातिशय्यात् वसुधा करपल्लवेन निज-मुखमाच्छाद्य हारप्रभाव्याजेन विहसतीवेति भावः।

(३१७) मन्त्रेति।—मन्त्रः,—मन्त्रणा, मन्त्रिभिः सह स्वकर्तव्याकर्तव्यावधारण-मित्यर्थः, कोषः,—धनं, साधन—हस्त्यश्वादिबलं, तत्र. तत्कृते इत्यर्थः ; यद्वा,—तेन, मन्त्रादिसङ्घातेन इत्यर्थः, प्रहृत्तः,—उद्यतः, अभीष्टसम्पादने निरत इति वा, तस्य। अन्यत्र,—मन्त्रः,—देवादीनां साधनीभूतः तन्त्रायुक्तः शब्दराशिभेदः, ("मन्त्रो वेदविशेषे स्यात् देवादीनाञ्च साधने। गुप्तवादेऽपि च पुमान्" इति मेदिनी) च एव कोषः,—अर्थसङ्घातः, ("कोषोऽस्त्री कुड्मले पात्रे···। जातिकोषेऽर्थसङ्घाते··· ॥" इति मेदिनी) तस्य साधनाय—सिद्धिलाभाय, प्रहृत्तस्य—निरतस्य। अक्षमालामिव—जपमालिकामिव ; यस्य राज्ञः समीपे एषा रत्नमाला तिष्ठति, तस्य मन्त्रादिक-मप्रतिहतबलं भवतीति तात्पर्यम्।

(३१८) समुद्रेति।—समुद्रः,—सागरः, तस्य अलङ्कारः,—भूषणं, तद्भूतां—तदूपत्वेन विराजमानामित्यर्थः, निखिलसागरसाररूपामिति यावत् ; अन्यत्र,—समुद्रः,—मुद्रया—प्रत्ययोत्पादकचिह्नविशेषेण "मोहरछाप" इति बङ्गभाषया प्रसिद्ध-नेत्यर्थः, अङ्गुलिस्थमुद्राङ्गीयपर्युत्पाङ्गुरीयकचिह्नेन वा सहितस्य, यौऽलङ्कारः, तद्भूतां—तत्स्वरूपाम्। सङ्ख्यालेख्यपट्टिकामिव—सङ्ख्या—एतावन्ति रत्नानि अस्मिन् कुबेरकोशे सन्तीति गणना, तस्या लेख्यपट्टिका—लिपिपतिका "पाटा" इति बङ्गभाषया प्रसिद्धा,

आचार्यस्तु तान् (३१९) उद्धृत्य बबन्ध बन्धुरे स्कन्धभागे भूपतेः। अथ नरपतिरपि प्रीतिम् उपदर्शयन् प्रत्यवादीत्,—"आर्य! रत्नानाम् ईदृशानाम् अनर्हाः प्रायेण पुरुषाः। तपःसिद्धिः इयमार्यस्य देवताप्रसादो वा। के च वयम् इदानीम् आत्मनोऽपि? किमुत ग्रहणस्य प्रत्याख्यानस्य वा? (३२०) दर्शनात् प्रभृति प्रभूतगुरुगुणगणकृतेन हृदयेन परवन्तो वयम्। (३२१) सङ्कल्पितम् इदम् आ मरणात् आर्य्योपयोगाय शरीरम्। अत्र कामचारो वः कर्त्तव्यानाम्" इति।

तामिव। कुबेरकोशस्य—धनेश्वरभाण्डागारस्य। एताम्—एकावलीम्। अनेकस्याः एव एकावल्याः अनेधर्म्यसाम्यबोधकानां श्लेषघटितानां भूयसामुपमानानां सन्निवेशात्, श्लेषसङ्कीर्णा मालोपमाऽलङ्कारः।

(३१९) उद्धृत्य—उत्तोल्य। बन्धुरे—नतानते, वृषस्कन्धोपमे इत्यर्थः, रम्ये वा, ("बन्धुरं मुकुटे पुंसि···। ···त्रिषु स्याद्रम्यनम्रयोः॥" इति मेदिनी)। अनर्हाः,—अयोग्याः। तपःसिद्धिः,—तपश्चर्यायाः साफल्यरूपा इत्यर्थः। इयम्—एकावली। देवताप्रसादः,—देवानुग्रहः; तपस्याप्रभावेण देवानुग्रहेण वा इयमार्येण लब्धा इति निष्कर्षः। के च वयम् आत्मनः,—स्वस्य, स्वदेहस्य इत्यर्थः, प्रभवः इति शेषः, न केऽपि वयमित्यर्थः। प्रत्याख्यानस्य—निराकरणस्य, अयाचनस्येत्यर्थः।

(३२०) दर्शनात्—अवलोकनात्, भवत इति शेषः, [अत्र प्रभृतिशब्दयोगे पञ्चमी, "कार्त्तिक्याः प्रभृतीति भाष्यप्रयोगात्" इति दीक्षितोक्तेः]। प्रभृतेति।—प्रभूतानां—बहूनां, गुरुगुणानाम्—आचार्यगुणानाम्; यद्वा,—गुरूणां—महतां, गुणानां—दयादीनां, गणेन—समूहेन, कृतम्—आचितं, तेन। परवन्तः,—पराधीनाः, भवदायत्ताः इति भावः।

(३२१) सङ्कल्पितं—मनसा निर्द्धारितम्। आ मरणात्—मृत्युकालपर्य्यन्तं, यावज्जीवमित्यर्थः, ["पञ्चम्यपाङ्परिभिः"(२।३।१० पा०) इति पञ्चमी]। आर्य्योपयोगाय—आर्यस्य—मान्यस्य भवतः, उपयोगः,—व्यवहारः, इष्टकार्यसाधनमित्यर्थः, तस्मै, आर्यमुपयोक्तुमिति भावः, ["तुमर्थाच्च भाववचनात्" (२।३।१५ पा०) इति चतुर्थी]; भविष्यतीति शेषः। अत्र—शरीरे इत्यर्थः, वः,—युष्माकं, कर्त्तव्यानां—

(३२२) समतिक्रान्ते च कियत्यपि काले, गते च एकावलीवर्णनाऽऽलापे लोकस्य, अनन्तरं (३२३) लब्धविश्रम्भा राज्यश्रीः ताम्बूलवाहिनीं पत्रलताम् आहूय उपांशु किमपि कर्णमूले अनैः आदिदेश। दर्शितविनया च पत्रलता पार्थिवं व्यज्ञापयत्,—"देव! देवी विज्ञापयति,—'न स्मरामि आर्यस्य पुरः कदाचिदुच्चैः वचनमपि, कुतो विज्ञापनम्। इयं हि (३२४) शुचाम् असङ्गता व्यापारयन्ती हतदैवदत्तादेशा (३२५) शिथिलयति विनयम्। अबलानां हि पतिरपत्यं वा (३२६) अवलम्बनम्। (३२७) उभयविकलानान्तु दुःखा-

कार्य्याणां, कामचारः,—यथेच्छप्रवृत्तित्वम्; अहं मदीयेन शरीरेण भवतः यावदिष्टं मनोरथं सम्पादयिष्यामीति भावः; मद्देहं तवैव सम्पूर्णाधिकार इति फलितम्।

(३२२) समतिक्रान्ते—गते। गते—निवृत्ते इत्यर्थः। एकावलीवर्णनाऽऽलापे—एकावल्याः,—मन्दाकिन्याः, वर्णनमेव—विवरणमेव, आलापः,—प्रसङ्गः तस्मिन्, ["यस्य च भावेन" (२।३।३७ पा०) इति सप्तमी]। लोकस्य—तत्रस्थस्य जनस्य, एकावलीवर्णनाऽऽलापे इत्यनेन सम्बन्धः।

(३२३) लब्धविश्रम्भा—प्राप्तविश्वासा, जनान्तराभावात् विगतसाध्वसा इति भावः। उपांशु—सगूढम्। पार्थिवं—राजानं, हर्षमिति यावत्। देवी—राज्यश्रीः। न स्मरामीति।—ज्येष्ठस्य ते समक्षम् अन्येन केनचित् सममपि उच्चैः भाषणमहं प्राक् कृतवतीति इदानीं स्मर्तुं न शक्नोमि, तव पुरः साक्षात् भाषणन्तु दूरे एवं तिष्ठतु इति निष्कर्षः। आर्य्यस्य—मान्यस्य, भवत इत्यर्थः, ["षष्ठ्यतसर्थप्रत्ययेन" (२।३।३०पा०)इति षष्ठी]।

(३२४) शुचां—शोकानाम्, असङ्गता—दुःसङ्गता। व्यापारयन्ती—विज्ञापयितुं नियोजयन्तीत्यर्थः। हतेति।—हतेन—दग्धेन इति यावत्, दैवेन—भाग्येन, दत्तः,—अर्पित इत्यर्थः, आदेशः,—अनुमतिर्यस्यै तथाभूता, दुर्भाग्यायत्ता इत्यर्थः।

(३२५) शिथिलयति।—शिथिलं करोति, ह्रासयति इत्यर्थः; यतः भवतोऽयतः आलपितुं प्रवर्त्तते इति भावः।

(३२६) अवलम्बनम्—आश्रयः।

(३२७) उभयविकलानान्तु—उभाभ्यां—पत्या पुत्रेण चेत्यर्थः, विकलाः,—

ऽनलेम्बनायमानं प्राणितम् अशालीनत्वमेव केवलम्। (३२८) आर्य्यागमनेन च कृतोऽपि प्रतिहतो मरणप्रयत्नः। अतः (३२९) कषायग्रहणाभ्यनुज्ञया अनुगृह्यतामयम् अपुण्यभाजनं जनः' इति"। जनाधिपस्तु तदाकर्ण्य तूष्णीमेव अतिष्ठत्।

अथ आचार्यः (३३०) सुधीरम् अभ्यधात्,—"आयुष्मति! शोको हि नाम पर्य्यायः पिशाचस्य, रूपान्तरम् आक्षेपस्य, (३३१) तारुण्यं तमसः, विशेषणं विषस्य।

विरहिताः तासाम्, अवीचावान्तु इत्यर्थः, पञ्चिपुत्रविहीनानान्तु इति भावः; ["उभादुदात्तो नित्यम्" (५।२।४४ पा०) इति अयच्। "उभयशब्दात् इतिविषये नित्यमयच् स्यात् स्वार्थे; तेन उभयतः, उभयत्र "उभयपक्षविनोतनिद्राः" इत्यादि सिद्धम्" इत्याहुः तत्त्वबोधिनीटीकाकृतः]। दुःखेति।—दुःखमेव—मनःपीडा एव, अनलः,—अग्निः, तस्य इन्धनं—काष्ठं, तदिवाचरत्, दुःखानलेन्धनायमानं, शोकानलदाह्यभूतमित्यर्थः; ["कर्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति क्यङि ज्ञानचि च रूपम्। प्राणितं—जीवितं, प्राणधारणमित्यर्थः। अशालीनत्वमेव—धार्ष्ट्यमेव, निर्लज्जत्वमेव इत्यर्थः; विधवायाः जीवनं केवलं दुःखायैव, लोकापवादाय च इति भावः।

(३२८) आर्य्यागमनेन—आर्य्यस्य—भवतः, आगमनेन—उपस्थित्या। प्रतिहतः,—व्याहतः। मरणप्रयत्नः,—मृत्युचेष्टा इति यावत्।

(३२९) कषायेति।—कषायैव रक्तं कषायं—रक्तवसनमित्यर्थः, भिक्षुधार्य्यमिति भावः, ["तेन रक्तं रागात्" (४।२।१ पा०) इत्यण्], तस्य ग्रहणं—धारणं, प्रव्रज्याऽवलम्बनमित्यर्थः, तत्र अभ्यनुज्ञा—अनुमतिः तया। अपुण्यभाजनं—पापीत्यर्थः। जनाधिपः,—नृपः। तूष्णीं—मौनी, निर्वाग्मित्यर्थः।

(३३०) सुधीरं—प्रभूतधैर्य्यान्वितं यथा स्यात् तथा, धैर्य्यावलम्बनपूर्वकमित्यर्थः, अतिस्थैर्यं वा, मन्दं मन्दमित्यर्थः, ("धीरो धैर्य्यान्विते स्थैर्ये बुधे क्लीबन्तु कुङ्कुमे" इति मेदिनी)। पर्य्यायः,—नामान्तरम्। पिशाचस्य—नीचाधमस्य देवयोनिविशेषस्य; अतिनिष्करुणत्वादिति भावः। रूपान्तरम्—अन्यविधं रूपम्। आक्षेपस्य—वातव्याधिविशेषस्य, अचेतनतया भूमिलुण्ठनलक्षणस्य इति भावः।

(३३१) तारुण्यं—यौवनम्। तमसः,—अन्धकारस्य, सर्व्वाच्छादकत्वादिति भावः। विशेषणं—विशेषः, भेदभावमित्यर्थः, मोहोत्पादकत्वादिति भावः।

(३३२) अनन्तकः प्रेतनगरनायकः अयम्, अनिर्हृतिधर्मा दहनः अयम्, अक्षयो राजयक्ष्मा अयम्, (३३३) अलक्ष्मीनिवासो जनार्दनः अयम्, अपुण्यप्रवृत्तः क्षपणकः अयम्,

(३३२) अनन्तकः,—अन्त विनाशं करोति इति अन्तकः, [तत्करोतीत्यर्थे अन्तशब्दात् णिच् खुल्] स न भवतीति अनन्तकः,—अनिष्टना इत्यर्थः; प्रेतनगरनायकः,—यमः, अन्तक इति यावत्, अयं—शोकः; अत्र अन्तकसदृशत्वराहित्यं प्रेतपुरनायकेन नितान्तमसम्भवदपि शोकस्य अन्तकादपि भीषणतोद्योतनाय अनन्तकत्वरूपमधिकं वैशिष्ट्यमुपात्तम्; तथा च अन्तकः केवलमन्तं जनयति, शोकस्तु तदजनयन्नपि दहति, इति शोके अन्तकतादात्म्याध्यासात् रूपकं, ततश्चाधिकारूढवैशिष्ट्यरूपकमलङ्कारः,—"अधिकारूढवैशिष्ट्य रूपकं यत्तदेव तत्" इति लक्षणात्; विशेषणश्लेषाच्च श्लिष्टनित्यवगन्तव्यम्। शोकपक्षे तु—अनन्तकः,—अनन्तम्—अशेषं, पारवाहित्यमित्यर्थः, कार्यति—ग्रहीयति, क्षपयतीत्यर्थः, इति अनन्तकः, असीम इत्यर्थः। अनिर्हृतिधर्मा—अनिर्हृतिः,—अनिर्वाणः, धर्मः,—स्वरूपं यस्य सः; सदैव प्रज्वलन्नित्यर्थः, ["धर्मादनिच् केवलात्" (५।४।१२४ पा०) इत्यनिच्]। दहनः,—अग्निः, अत्र शोके दहनतादात्म्याध्यासात् रूपकं, निर्वाणराहित्यञ्च दहने अत्यन्तासम्भव इति तत्र तदारोपात् अधिकं वैशिष्ट्यमुपात्तम्; तथा च दहनः प्रज्वलन्नेव केवलं दहति, निर्वाणभूतस्तु दहनात् विरमति; शोकस्तु सदैव समनस्कं देहं व्यथयति, न तु कदाचिदुपशाम्यतीति शोकस्य दहनादपि भीषणत्वद्योतनात् पूर्ववदलङ्कारः। शोकपक्षे तु—अनिर्हृतिः,—अस्वास्थ्यम्, असुखमिति यावत्, ("निर्हृतिः स्वस्थितावस्वं गमने च सुखे स्त्रियाम्" इति मेदिनी) धर्मः यस्य तथाभूतः, शोकस्य सदैव सन्तापकत्वादिति भावः। अक्षयः,—नास्ति क्षयः,—नाशः यस्मात् तथोक्तः, क्षयरहितः इत्यर्थः, अयं—शोकः; राजयक्ष्मा—क्षयरोगविशेषः, तत्पक्षे तु—नास्ति क्षयो यस्य तथोक्तः, यावज्जीवस्थायी इत्यर्थः। अत्रापि क्षयराहित्यं राजयक्ष्मणि अत्यन्तमसम्भवदपि शोकस्य राजयक्ष्मणोऽपि भीषणत्वद्योतनाय अक्षयत्वरूपकमधिकं वैशिष्ट्यमुपात्तम्; तथा च राजयक्ष्मा केवलं स्वाक्रान्तमेव क्षिणोति, शोकस्तु सर्वानेव सपरिजनान् युगपत् विनिहन्ति इति शोके राजयक्ष्मतादात्म्याध्यासात् पूर्ववदलङ्कारः।

(३३३) अलक्ष्मीनिवासः,—अलक्ष्म्याः,—निर्ऋतेः, लक्ष्मीविरुद्धायाः, "आलक्ष्मी" इति ख्यातायाः इत्यर्थः, निवासः,—आश्रयः। जनार्दनः,—विष्णुः; ["नन्दियहि—" (३।१।१३४ पा०) इति ल्युः]। अत्र लक्ष्मीनिवासत्वाभावस्य जनार्दने अत्यन्तासम-

(३३४) अप्रतिबोधो निद्राप्रकारः अयम्, अनलसधर्म्मा सन्निपातः अयम्, (३३५) अग्निवसहचरो विनायकः

व्रत् श्लोकस्य असत्पुरुषसेवितत्वेऽपि जनार्द्दकत्वशीतनाय अधिकं वैशिष्ट्यमुपात्तमिति पूर्ववदलङ्कारः। श्लोकपक्षे तु—अलक्ष्मीनिवासः इति श्लोकस्यामङ्गलविलासभूमिसम्भूतत्वेऽपि बोध्यम्। अलक्ष्मीवन्तो हि केवलं श्लोकैरभिभूयन्ते इति तात्पर्य्यम्। जनार्द्दन इति।—जनान्—लोकान्, अर्द्दयति—पीडयति इति व्युत्पत्त्या जनपीडक इत्यर्थः। अपुण्यप्रवृत्तः,—पापप्रवृत्तः, पापरत इत्यर्थः। चपणकः,—नग्नाटकः। अत्रापि अपुण्यप्रवृत्तत्वं चपणके नितान्तमसम्भवदपि श्लोके तत्सम्बन्धतदारोपात् पूर्ववदलङ्कारः। श्लोकपक्षे तु—अपुण्यप्रवृत्तः,—अपुण्येन—असुकृतेन दुरितेन, प्रवृत्तः,—आपतित इत्यर्थः, चपणकः,—चपयति—नाशयति, देहमिति व्युत्पत्त्या, देहनाशकः इत्यर्थः।

(३३४) अप्रतिबोधः,—अप्रबुद्धजागरः। निद्राप्रकारः,—निद्राभेदः; निद्रासम्बन्धं पुनः जागरणस्य व्यवस्थितत्वात् अप्रतिबोधत्ववैशिष्ट्यं निद्रायां न सम्भवति इति तत्र तदारोपात् अत्रापि पूर्ववदलङ्कारः। श्लोकपक्षे तु—अप्रतिबोधः,—प्रबोधाप्रतिविधेयः, सान्त्वनाद्यैरनानपनेय इत्यर्थः, निद्राप्रकारः,—निद्रां प्रकिरति—निरस्यतीति तथोक्तः, श्लोकस्य निद्राऽपहारकत्वादिति भावः। अनलसधर्म्मा—अनलसः,—"प्रकृत्य चाप्यनुत्साहः कर्म्मस्वालस्यमुच्यते" इत्युक्तलक्षणेन आलस्येन वर्জ্জितः, धर्म्मः, स्वभावो यस्य तादृशः। सन्निपातः,—विकृतानां वातपित्तकफानां दोषत्रयाणां सम्यक् मिलनजनितः व्याधिविशेषः; सन्निपाते हि तन्द्रामोहादिभिराच्छन्नतया निश्चेष्टतेन कर्म्मसु अशक्तत्वात् अनलसधर्म्मेति विशेषणं न युज्यते इति तत्र तदारोपात् पूर्ववदलङ्कारः। श्लोकपक्षे तु—अनलसधर्म्मा—अनलसः धर्म्मो यस्य तादृशः, अनलेन—अग्निना, सधर्म्मा—सदृशः, इति च, सदैव मारणरूपकार्य्यकरत्वात् अत्यन्तदीप्तकत्वाच्च इति भावः। ["धर्म्मादनिच् केवलात्" (५।४।१२४ पा०) इत्यनिच्]; सन्निपातः,—सम्यक् निपातयति—भूमौ निक्षिपति, घातयति वा इति व्युत्पत्त्या मारकः इत्यर्थः।

(३३५) अग्निवसहचरः,—अग्निवम्—अमङ्गलम्; यद्वा,—अग्निवः,—शिवव्यतिरिक्तः, तस्य सहचरः,—सहायः, विनायकः,—गणपतिः, अमङ्गलनाशके शिवतनये वा गणपतौ अग्निवसहचरत्ववैशिष्ट्यमेकान्तासम्भवदपि श्लोके तत्सम्बन्धतदारोपात् पूर्ववदलङ्कारः। श्लोकपक्षे तु—अग्निवसहचरः,—अग्निवसहायः, तस्यामङ्गलसम्बन्धत्वा-

अयम्, (३३६) अबुधसेवितो ग्रहवर्गः अयम्, अयोगसमुत्थो ज्योतिष्प्रकारः अयम् ; (३३७) स्नेहात् वायुप्रकोपः, मानसात् अग्निसम्भवः, (३३८) आर्द्रभावात् रजःक्षोभः, रसात्

दिति बोध्यम्। विनायकः,—विघ्नः, ("विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुरौ" इति मेदिनी) ; यद्वा,—विशेषेण नयति मारयति यः सः, मारक इत्यर्थः।

(३३६) अबुधसेवितः,—बुधः,—सौम्यग्रहः, तेन सेवितः,—युक्तः न भवति इति तथोक्तः, बुधवर्जित इत्यर्थः। ग्रहवर्गः,—ग्रहाः,—सूर्य्यादयः, ("ग्रहोऽनुग्रह-निर्बन्धग्रहणेषु रवौ ग्रहे। सूर्य्यादौ पूतनादौ च सैंहिकेयोपरागयोः॥" इति मेदिनी) तेषां वर्गः,—समूहः। अत्रापि ग्रहवर्गे बुधविहीनत्वस्यासम्भवात् पूर्ववदलङ्कारः। श्लेषपक्षे तु—अबुधैः,—मूर्खैः, सेवितः,—श्लीलित इत्यर्थः, अबुधानां—व्यसनानां, वर्गः, अज्ञानिनामेव शोकोदयात् इति भावः। अयोगेति।—अयोगः,—चित्तवृत्ति-निरोधाभावः, तेन समुत्थः,—उत्पन्नः। ज्योतिष्प्रकारः,—परं ज्ञानम् ; अयोगे ज्योतिषः समुदयस्यासम्भवात् पूर्ववदलङ्कारः, अनेकार्थाभिधायित्वेन च सर्व्वत्र श्लेषानु-प्राणितमेतदित्यवधेयम्। श्लेषपक्षे तु—अयोगेन—अननुकूलदैवेन, समुत्थः,—समुद्भूतः ; यद्वा,—योगी—प्रियसमागमे सति, न समुत्तिष्ठति इति अयोगसमुत्थः ; ज्योतिष्प्रकारः,—अग्निस्वरूपः ; दाहकतया इति भावः।

(३३७) स्नेहात्—पुष्टिहेतुभूतघृतादेः, वायुप्रकोपः,—औद्धत्यम् ; वात-प्रशमकात् घृतादिस्नेहात् वायुप्रकोप इति विरोधः। स्नेहात्—प्रणयात्, वायुप्रकोपः,—उन्मादरोगस्वरूप इत्यर्थः, इति तत्परिहारः। श्लेषपक्षे—स्नेहात्—प्रणयजन्यत्वात्, वायुप्रकोपपक्षे च स्नेहात्—पुष्टिहेतुघृतादिजन्यत्वाच्च श्लेषानुप्राणितोऽयमित्यवधेयम् ; एवमुत्तरत्रापि। मानसात्—तदाख्यात् देवसरसः, अग्निसम्भवः,—समुद्भूतोग्निस्वरूपः, अग्निर्निर्वाणहेतुभूतात् जलात् अग्निसम्भवः इति विरोधः ; मानसात्—चेतसः, अग्नि-सम्भवः,—अनलोत्पत्तिः ; श्लोकस्य अन्तर्दाहकत्वात् मनःसमुद्भवत्वाच्च इति परिहारः। श्लेषपक्षे—मानसात्—चेतसः, अग्निसम्भवपक्षे च मानसात्—दैवसरोविशेषजाय-मानत्वाच्च श्लेषानुप्राणितोऽयमित्यवधेयम्।

(३३८) आर्द्रभावात्—सरसत्वात्, आर्द्रीभूतस्यादर्शीत्यर्थः, रजःक्षोभः,—रजसां—धूलीनां, क्षोभः,—प्रसरः, धूलीप्रसरनिवारकात् जलाद्यार्द्रवस्तुनः रजः-क्षोभः इति विरोधः ; आर्द्रभावात्—बालत्वात्, रजःक्षोभः,—रजसः,—गुण-विशेषस्य, क्षोभः,—विजृम्भितं, श्लोकस्य रजोगुणकार्य्यत्वादसौ रजोगुणविकारस्वरूपः,

अभिशोषः, रागात् कालपरिणामः। (३३९) तत् अस्य अजस्रास्रस्राविणो हृदयमहाव्रणस्य, (३४०) बहुलदोषान्ध-

इति परिहारः; शोको हि चेतसः आर्द्रभावादेव जायते, न तु काठिन्यात् इति भावः। अत्र साध्यस्य रजःशोषस्य साधनस्य आर्द्रभावस्य श्लेषेऽपि श्लिष्टत्वम्। रसात्—रसाधनात्, पुष्टिकारकादिति भावः, अलादित्यर्थो वा, अभिशोषः,—शरीरादिशोषणम् इति विरोधः; रसात—अनुरागात्, अभिशोषः,—शोषणम्, आत्मशोषणकारक इत्यर्थः, इति परिहारः; रसात्—रसायनात्, अभिशोषः,—शरीरशोषणं, तथा रसात—अनुरागात्, अभिशोषः,—प्रणयिणः युक्तता जायते इति रसमूलस्य हेतोः अभिशोषरूपसाध्यस्य च द्वयोरपि श्लिष्टत्वात् श्लेषानुप्राणितोऽयमिति श्लेषम्। रागात्—लौहित्यात्, कालपरिणामः,—कालः,—कृष्णः, कृष्णवर्ण इत्यर्थः, परिणामः,—परिणतिः इत्यर्थः, यस्य तथाभूतः, लौहित्यात् कृष्णवर्णता इति विरोधः; रागात्—अत्यासङ्गात्, कालपरिणामः,—कालः,—यमः, परिणामः,—परिणतिः, शेषफलमिति यावत्, यस्य तथोक्तः, जीवननाशः चरमं फलमस्येति भावः, इति परिहारः। अत्रापि रागस्य अत्यासङ्ग-लौहित्यरूपानेकार्थाभिधायित्वात् हेतोः, साध्यीभूतकालपरिणामस्यापि जीवननाश-कृष्णवर्णताप्राप्तिरूपद्व्यर्थाभिधायित्वात् श्लिष्टत्वम् पूर्ववत् श्लेषमूलकोऽयमिति श्लेषम्।

(३३९) "तत् अस्य" इत्यादौ "आपातम्" इत्यन्ते सम्बन्धः। अस्य—शोकस्य, अजस्रास्रस्राविणः,—अजस्रम्—अनवरतम्, असृक्—असृग्, शोणितञ्च, ("असृक् क्लीबे कचे पुंसि क्लीबमस्रृग्वि शोणिते" इति मेदिनी) स्रावयति—चारयति, स्रवति च—चरति च इति तथोक्तस्य, [स्रवतेः "नन्दिग्रहि—" (३।१।१३४ पा०) इति णिनिः। "अजस्रास्रस्राविणः" इत्यत्र "अजस्रस्राविणः" इति पाठान्तरं दृश्यते; तत्र शोकपक्षे—अजस्रं स्रावयति, असृग्वि इति शेषः, यः तथोक्तस्य ; व्रणपक्षे च—अजस्रं स्रावयति, रुधिरादिकमिति शेषः, यः तथोक्तस्य, इति णिजर्थघटिताघटितत्वरूपेण व्याख्येयम् ; शोकस्य असृस्रावकर्तृत्वाभावादिति दिक्]। हृदयेति।—हृदयस्य—चेतसः, महत्—बृहत्, व्रणः,—क्षतं तस्य, तत्सदृशस्येत्यर्थः ;—"व्रणोति यस्माद् रूढेऽपि व्रणवास्तु न नम्रयति। आ देहधारणात् जन्तोर्व्रणलक्षणमङ्गिकृष्यते॥" इति व्रणनिरुक्त्या हृन्मर्मस्पृक्कस्य तस्य यावज्जीवमनपनेयत्वात् व्रणत्वमिति भावः।

(३४०) बहुलेति।—बहुलदोषाः,—प्राज्यदूषणानि, बहवः अपगुणाः इत्यर्थः, आसक्तस्य इति यावत्, कृष्णपक्षस्य रात्रयस्य, ("बहुला गोलिकायां… । पुंस्यग्नौ कृष्ण-

कारलब्धप्रवेशप्रसरस्य प्राणतस्करस्य, (३४१) शून्यताहेतोः महाभूतग्रामघातकस्य, (३४२) सकलविग्रहक्षपणदक्षस्य दोषचक्रवर्त्तिनः, (३४३) कार्श्यश्वासप्रलापोपद्रवबहलस्य दीर्घरोगस्य, (३४४) असद्ग्रहस्य सकललोकक्षयधूमकेतोः,जीवि-

पत्ते च वाच्यवत् प्राज्यक्षणयोः॥" "दोषः स्याद्दूषणे पापे दोषा रात्रौ भुजेऽपि च" इत्युभयत्रापि मेदिनी) ते एव अन्धकाराः,—मोहाः, अज्ञानानि इति यावत्; तासु रात्रिषु ये अन्धकाराः,—तमांसि इति च, तैः लब्धः,—प्राप्तः, प्रवेशप्रसरः,—अभ्यन्तरागमनावकाशः येन तथाभूतस्य। प्राणतस्करस्य—जीवनापहारिण इत्यर्थः; प्राणविघातकचौरस्वरूपस्य इति यावत्।

(३४१) शून्यताहेतोः,—किं कर्त्तव्यताविमूढताकारणस्य; यद्वा,—शून्यता—अनाभावता, निर्जनता इत्यर्थः, हेतुः,—उद्दीपकारणं यस्य तथाभूतस्य; एकाकितायां शोकहर्द्धित्वादिति भावः। महेति।—महाभूतग्रामाणां—महतां—प्रभूतानां, सर्वेषामिति यावत्, भूतग्रामाणां—प्राणिसमूहानां, मानवादीनामित्यर्थः, घातकः,—नाशकः तस्य, तत्स्वरूपस्येत्यर्थः; यद्वा,—महाभूतग्रामाणां—चित्यादिपञ्चमहाभूतानां, घातकस्य, प्रबलशोकावेशेन कार्य्यभूतस्य देहस्य नाशात् कारणभूतस्य पञ्चमहाभूतस्य चित्यादिषु बाह्यपञ्चभूतेषु लयादिति भावः।

(३४२) सकलेति।—सकलानां—सर्वेषां, सकला वा, विग्रहाः,—शरीराणि, विरोधात्र, सङ्घाता इति यावत्, ("विग्रहः कायविस्तारविभागे ना रणेऽस्त्रियाम्" इति मेदिनी) तेषां क्षपणं—क्षयकरणं, तत्र दक्षः,—निपुणः तस्य। दोषचक्रवर्त्तिनः,—दोषाणां—कामक्रोधादिरिपूणां, चक्रे—मण्डले, वर्त्तते—मुख्यतया तिष्ठतीति तथोक्तस्य, निखिलदोषाधिराजस्वरूपस्य इति भावः।

(३४३) कार्श्येति।—कार्श्यं—कृशता, शोकेन रोगेण च इति भावः; श्वासः,—दीर्घनिश्वासः, व्याधिविशेषः, प्रलापः,—अनर्थकं वचनं, (प्रलापोऽनर्थकं वचः" इत्यमरः) शोकेन बुद्धिविपर्य्ययात्, व्याध्यारब्धकदोषकोपाच्च इति भावः; ते एव उपद्रवाः,—उत्पाताः, व्याधेरुत्तरकालजा अन्ये व्याधयः, तैः बहलः,—पूर्णः तस्य; उपद्रवलक्षणमुक्तं वैद्यके,—"व्याधेरुपरि यो व्याधिर्भवत्युत्तरकालजः। उपक्रमविरोधित्वात् स उपद्रव उच्यते॥" इति। दीर्घरोगस्य—दीर्घकालभोग्यरोगविशेषस्वरूपस्य,क्षयादितुल्यस्येति यावत्,वा दीर्घधारणादस्यानपायित्वादिति भावः।

(३४४) असद्ग्रहस्य—असति—असाधुविषये, निन्दनीये आत्महत्यादौ इति

तापहारदक्षस्य अक्षणरुचेः अनभ्रवज्रपातस्य, (३४५) स्फुरदनवद्यविद्याविद्युदुद्योतमानानि, गहनग्रन्थ्यग्रन्थिगूढ़गर्भग्रहणगम्भीराणि, (३४६) भूरिकाव्यकथाकठोराणि, बहुशास्त्रोद्गहनबृंहन्ति, विदुषामपि हृदयानि न अलं सोढुम् आपातम्;

भावः, यद्वः,—आविशः यस्मात् तथाभूतस्य, उत्पातसूचकदुष्टग्रहस्य च। सकलेति। —सकलानां—सर्वेषां, लोकानां—प्राणिनां, क्षये—नाशे, धूमकेतुः,—उपग्रहविशेषः, अग्निश्च तस्य, तद्रूपस्य इत्यर्थः; "उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" इति कुमारसम्भवे कालिदासः। जीवितापहारदक्षस्य—जीवनक्षयकारणपटोः, उभयत्रापि तुल्यम्। अक्षणरुचेः,—नास्ति क्षणमपि—मुहूर्त्तमपि, रुचिः,—अनुरागः, करणीयविषयेषु इति भावः, रुचिः,—आकाराभिलाषो वा यस्मिन् तथोक्तस्य, क्षणरुचिः,—क्षणप्रभा, विद्युदित्यर्थः, सा न भवति इति तस्याः, अविद्युतश्च, विद्युद्विरहितस्येत्यर्थः। अनभ्रवज्रपातस्य—मेघासम्बन्धाग्निपतनस्वरूपस्य इति यावत्। अत्र श्लिष्टविशेषणोपाहतानां हृदयसंहारणादीनाम् अनभ्रवज्रपातान्तानां क्रियाणां तादात्म्याध्यासात् श्लिष्टं मालारूपकमलङ्कारः।

(३४५) स्फुरदिति।—स्फुरन्ती—राजमाना, अनवद्या—अनिन्द्या, विद्या—ज्ञानम् एव, विद्युत्—सौदामनी, श्लोकान्धकाराच्छन्नहृदये तस्या विद्युदुत् क्षणिकस्फुरणादिति भावः; तया उद्योतमानानि—उद्भासमानानि। गहनेति।—गहनानां—निबिड़ानां, कठिनानामित्यर्थः, दुर्ज्ञेयानामिति यावत्, ग्रन्थानां—श्लोकानां, ये ग्रन्थयः,—कूटांशाः, दुर्बोधतमप्रदेशाः इत्यर्थः, तेषां गूढ़ाः,—रहस्याः, गुप्ता इति यावत्, ये गर्भाः,—अन्तर्गता भावाः, पदार्था इत्यर्थः, तेषां ग्रहणेन—अवबोधेन, गम्भीराणि—गाम्भीर्यवत्तया अनाविलानि, भाववन्तीत्यर्थः।

(३४६) भूरीति।—भूरिभिः,—बहुभिः, काव्यकथाभिः,—कविरचितसुभाषितावलिभिः, कठोराणि—कठिनानि, तत्तत्काव्यनिहितबहुश्रोचलीयव्यापारश्रवणपठनाभ्यामिति भावः; यद्वा,—विविधकाव्यकथाभिः समुल्लासिततया सुदृढ़ीकृततया च सहसा केनापि भेत्तुं द्रवीकर्त्तुं वा अशक्यानीत्यर्थः। बहुशास्त्रेति।—बहूनां—प्रभूतानां, शास्त्राणां—दर्शनादीनाम्, उद्ग्रहणेन—धारणेन, आयत्तीकरणेनेत्यर्थः, बृंहन्ति—प्रशस्तानीत्यर्थः। सोढुं—सहितुं, सम्यक् कर्त्तुमिति यावत्, न अलं—न क्षमाणीत्यर्थः। आपातम्—आपतनम्, आक्रमणमित्यर्थः; अस्येति पूर्वेणान्वयः।

(३४७) किमुत नवनवमालिकाकुसुमकोमलानां सरसविसतन्तुदुर्बलकम् अबलानां हृदयम्।

एवं सति (३४८) सत्यव्रते! वद, किमत्र क्रियते? कतम उपालभ्यते? कस्य पुर उच्चैः आक्रन्द्यते? हृदयदाहि दुःखं वा ख्याप्यते? सर्वम् (३४९) अक्षिणी निमील्य सोढ्व्यम् अमूढेन मर्त्यधर्म्मणा। पुण्यवति! पुरातन्यः स्थितय एताः केन शक्यन्तेऽन्यथा कर्त्तुम्? (३५०) संसरन्त्यो नक्तन्दिवं दाघीयस्यः

(३४७) किमुत—किं पुनः। नवेति।—नवा—अभिनवमुद्गता, या नवमालिका—सप्तला, पुष्पवृक्षविशेष इत्यर्थः, तस्याः कुसुमानि—पुष्पाणि इव, कोमलाः,—सुकुमाराः तासाम्। सरसेति।—सरसः,—आर्द्रः, यः विसतन्तुः,—मृणालसूत्र, तद्वत् दुर्बलकम्—अनुकम्पार्हम्, अतीव दुर्बलमित्यर्थः, ["अनुकम्पायाम्" (५।३।७६ पा०) इति कन्]; किंचिदपि पीडनासहिष्णु इति यावत्।

(३४८) सत्यव्रते!—सत्यम्—अखण्डितमिति भावः, व्रतं—चारित्रमिति भावः, यस्याः तत्सम्बुद्धौ; यद्वा,—सत्य—सत्याचरणमेव, व्रतं—नियमः, दीक्षा वा यस्याः तत्सम्बुद्धौ। कतमः,—को जनः इत्यर्थः; ["वा बहूनां जातिपरिप्रश्ने डतमच्" (५।३।९३ पा०) इति डतमच्]। उपालभ्यते?—तिरस्क्रियते? आक्रन्द्यते?—रुद्यते? हृदयदाहि—मनःसन्तापकरम्। ख्याप्यते—कथ्यते, ज्ञाप्यते इति यावत्।

(३४९) अक्षिणी—नेत्रे। निमील्य—समावृत्य। सोढ्व्यं—सहनीयम्। अमूढेन—शोकाविह्वलेन सता इत्यर्थः, शोकेन नात्यभिभूयेति यावत्, ["अमूढेन" इत्यत्र "मूढेन" इति पाठे,—मूढेन—अज्ञेन, शोकविवशेनेत्यर्थः]। मर्त्यधर्म्मणा—मरणधर्म्मवता, मानवेन इत्यर्थः; ["धर्म्मादनिच् केवलात्" (५।४।१२४ पा०) इत्यनिच्]। पुरातन्यः,—चिरन्तन्यः, अनादिकालादागच्छन्त्यः इत्यर्थः। स्थितयः,—मर्य्यादाः। एताः,—वक्ष्यमाणाः जन्मजरादयाः इत्यर्थः। अन्यथा कर्तुं—विफलीकर्तुं, लङ्घितुमित्यर्थः।

(३५०) नक्तन्दिवम्—रात्रौ च दिवा च इति विग्रहे ["अचतुर—" (५।४।७७ पा०) इति टच्प्रत्ययो निपात्यते], संसरन्त्यः,—प्रवहन्त्यः। दाघीयस्यः,—अतिदीर्घाः, अनन्ताः इत्यर्थः, कदाऽपि न विच्छिन्ना भवन्तीति यावत्, प्रवाहरूपेण सदैव प्रवर्त्तन्ते इति तात्पर्य्यम्।

(३५१) जन्मजरामरणघटनघटीयन्त्रराजिरज्जवः पञ्च-जनानाम्। (३५२) पञ्चमहाभूतपञ्चकुलाधिष्ठितान्तः-करण व्यवहारदर्शन-निपुणाः सर्व्वङ्कषा विषमा धर्म्मराज-स्थितयः। (३५३) क्षणमपि क्षममाणा गलन्ति आयुष्काला-

(३५१) जन्मेति।—जन्म च—उत्पत्तिश्च, जरा च—वार्द्धकञ्चेत्यर्थः, मरणञ्च—मृत्युश्च, तानि, तदूपाणीत्यर्थः, घटनानि—व्यापारा एव, घटीयन्त्राणाम्—उद्घाटनानां, कूपात् जलोद्धरणयन्त्राणामित्यर्थः, ("उद्घाटनं घटीयन्त्रं सलिलोद्धाटनं प्रति;" इत्यमरः) राजयः,—श्रेण्यः, तासां रज्जवः,—सूत्राणि; नियतमुत्थानपरिश्रमन-पतनशीलानां जलोद्धरणरज्जूनां प्रसारा यथा अतिदीर्घा भवन्ति, तथा उत्पत्तिवार्द्धक-मृत्युधर्म्मिणां मानवानामपि संसारा अनादिप्रवाहिणः अतिदीर्घा भवन्तीति समुदितार्थः; अतिदीर्घाः जलोद्धरणयन्त्ररज्जवो हि यथा अहर्दिवं जलानामुद्धरणकर्म्मणि व्याप्रियन्ते, तथैव जनानां जन्मादीनि रात्रिन्दिवं सततमेव संसरन्ति इति निष्कर्षः; अतः श्लोकं विजङ्कोऽह इति तु स्खलितम्। पञ्चजनानां—मानवानां, ("मनुष्याः मानुषाः मर्त्याः मनुजाः मानवा नराः। स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः॥" इत्यमरः)।

(३५२) पञ्चेति।—पञ्चानां—पञ्चसङ्ख्याकानां, महाभूतानां—क्षित्यादीनां, तद्विकाराणामित्यर्थः, मानवानामिति भावः, पञ्चकुलानि—चक्षुरादीनि पञ्च ज्ञानेन्द्रियाणि इति यावत्, तानि अधिष्ठितम्—अध्यक्षतया स्थितं,["पञ्चकुलः,—अध्यक्षः" इति केचित्; तथात्वे पञ्चानि महाभूतानि—महाभूतविकाराः चक्षुरादयः इत्यर्थः, तान्येव पञ्चकुलम्—अध्यक्षं, तत्; अधिष्ठितम्—आक्रम्य स्थितमित्यर्थः]। अन्तःकरणं—मनः, तस्य व्यवहारः,—चेष्टितं, तस्य दर्शने—अवलोकने, निपुणाः,—तत्पराः। सर्वं कषन्तीति सर्व्वङ्कषाः,—सर्व्वाकर्षिणः इत्यर्थः, कर्म्मानुसारेण सर्वेषामेव अपक्ष-पातं दण्डपुरस्कारादिविधायिन इति भावः, ["सर्व्वकूलाभ्रकरीषेषु कषः" (३।२।४२ पा०) इति खच्]। विषमाः,—दारुणाः। धर्म्मराजस्थितयः,—अन्तकव्यापाराः; मानवाः पञ्चेन्द्रियैः यद्यदाचरन्ति, सर्व्वान्तर्दर्शी धर्म्मराजस्तत्सर्व्वमतिनिपुणभावेन सूक्ष्मं विचारयति इति निष्कर्षः।

(३५३) क्षणमपि—विंशत्कलापरिमितकालमपि, अत्यल्पसमयमपीति यावत्, क्षममाणाः,—सहमानाः, अपेक्षमाणाः इत्यर्थः, गणयन्त इति यावत्, मानवाना-मायुषाम् इक्ष्वी निमेषाः इयत्यः काष्ठाः अतिक्रान्ताः, इत्येवम् अतिसूक्ष्मकालमपि

कलनकुशला निलये निलये कालनाड़िकाः। जगति (२५४) सर्व्वजन्तुजीवितोपहारपातिनो सञ्चरात भ्रांटिति चण्डिका यमाज्ञा। (२५५) रटन्ति अनवरतम् अखिलप्राणिप्रयाणप्रकटनपटवः प्रेतपतिपटहाः। प्रतिदिशं (२५६) पर्य्यटन्ति पेटकैः प्रतिपुरं प्रतप्तलोहलोहिताक्षाः (२५७) कालकूटकान्तिकालकायाः कालपाशपाणयः कालपुरुषाः। प्रति-

---

विचारयन्त्यः इति भावः। गलन्ति—अतिगच्छन्ति। आयुरिति।—आयुष्कालस्य—जीवितकालस्य, आकलनं—सङ्ख्यानं, गणनाकरणमित्यर्थः, ["आयुष्कालाकलन—" इत्यत्र "आयुःकलाकलन—" इति पाठे,—आयुषः कलायाः,—अंशस्य, अतिसूक्ष्मभागस्येति भावः; यद्वा,—कालपरिमाणस्य,("कला स्यात्···अंशमात्रके। ···कलनाकालमानयोः॥"इति मेदिनी) कलनं—सङ्ख्यानम्] तत्र कुशलाः,—पटवः। निलये निलये—गृहे गृहे; ["नित्यवीप्सयोः" (८।१।४ पा०) इति वीप्सायां द्विर्भावः]। कालनाड़िकाः,—कालस्य—मृत्योः, नाड़िकाः,—होराः, षट्त्रिंशन्मितः कालः इत्यर्थः, घटिका इति यावत्, ["नाड़ी नालेऽपि षट्त्रिंशे" इत्यमरः। "नाड़िकाः" इत्यत्र "नालिकाः" इति पाठेऽपि स एवार्थः]।

(२५४) सर्वेति।—सर्वेषां—सकलानां, जन्तूनां—प्राणिनां, जीवितमेव—जीवनमेव, उपहारः,—उपढौकनं, तत्र पतति—ग्रहणार्थं धावतीति तथाभूता, सर्व्वभूतजीवनापहरणनिरता इत्यर्थः। चण्डिका—भीषणा, रुद्राणी देवी च। यमाज्ञा—मृत्योर्निदेशः।

(२५५) रटन्ति—शब्दन्ति। अखिलेति।—अखिलानां—समस्तानां, प्राणिनां—जीवानां, प्रयाणं—यमभुवनगरे गमनं, तस्य प्रकटनम्—आघोषणं, तत्र पटवः,—कुशलाः। प्रेतपतिपटहाः,—प्रेतपतेः,—यमस्य, पटहाः,—वाद्यभेदाः; सदैव प्राणिनो यमपुरं गच्छन्तीति निष्कर्षः।

(२५६) पर्य्यटन्ति—भ्रमन्ति। पेटकैः,—समूहैः, अन्योऽन्यमेकतीभूय इत्यर्थः। प्रतप्तेति।—प्रतप्तम्—अत्युष्णं, यत् लोहम्—अयः, तद्वत् लोहिते—रक्ते, अक्षिणी—नेत्रे येषां ते।

(२५७) कालेति।—कालकूटस्य—विषस्य, कान्तिरिव कान्तिः,—द्युतिः येषां तथाभूताः, अत एव कालाः,—कृष्णवर्णाः, कायाः,—देहा येषां तथोक्ताः। काल-

भवन भ्रमन्ति (३५८) भीषणाकिङ्करकरघट्टितयमघण्टापुट-पटुटाङ्कारभयङ्करा: (३५९) सर्वसत्त्वसङ्संहरणाय घोरा-घातघोषणा:। दिशि दिशि (३६०) वहन्ति बहुचिताधूम-धूमरितप्रेतपतिपताकापाततग्रध्रदृष्टय: (३६१) शोकक्रत-कोलाहलाकुलकुटुम्बिनीविकीर्णकेशकलाप-शबलशवांशुका-महसमङ्गना: (३६२) किलाकलायमानश्मशानांशुविरांशुवा-

---

याशुपाशय:,—कालपाश:,—यमरज्जु, पाशौ—हस्ते येषां तथाविधा:। कालपुरुषा:,—यमदूता इत्यर्थ:।

(३५८) भीषणेति।—भीषणानां—भयङ्कराणां, किङ्कराणां—भृत्यानां, यम-दूतानामिति यावत्, करै:,—हस्तै:,घट्टिता:,—धृता:, ताडिता वा, या यमघण्टा:,—अन्तकस्य वाद्यविशेषा:, तासां पुटानां—कन्दुकाना, घण्टाऽधःस्थवर्तुलाकारवस्तु-विशेषाणामिति यावत्, पटुभि:,—उत्कटै:, टाङ्कारै:,—"टा टां" इत्यनुकरणध्वनि-विशेषै:, भयङ्करा:,—भीषणा:, [भयं कुर्वन्ति या: ता: इत्यर्थे,करोते: खच् मुम् च]।

(३५९) सर्वेति।—सर्वेषां—समग्राणां, सत्त्वानां—प्राणिनां, सङ्घस्य—समू-हस्य, सहरणं—संहार:, विनाश इत्यर्थ:, तस्मै। घोरेति।—घोरा:,—दारुणा:, आघाता:,—ताडनानि, यासु तथाविधा घोषणा:,—राजाज्ञाप्रचारा:, प्रजाभिरेत-भिरविलम्बमेव महत्वनमागन्तव्यमित्येव यमनृपतेरादेशप्रचारा इति यावत्।

(३६०) वहन्ति—विराजन्ते इत्यर्थ:। बहुभि:।—बहुभि:,—प्रभूतै:, चिताधूमै:,—मृतदहनकाष्ठचुल्लीत्यर्थक्रियाध्वजै:, धूसरिता:,—श्वेतकृष्णवर्णता प्राप्ता:, मलिनिता इत्यर्थ:, या: प्रेतपते:,—अन्तकस्य, पताका:,—वैजयन्त्य:, तासु पतिता:, —निबद्धा इत्यर्थ:, शवभक्षणलालसया इति भाव:; ["—पताकापतित—" इत्यत्र "—पताकापटुपतित—" इति पाठे,—पताकासु पटु—अत्यर्थं यथा तथा, पतिता:]; गृध्राणां—श्मशानपक्षिणां, दृष्टय:,—नयनानि यासु तथोक्ता:।

(३६१) शोकेति।—शोकेन—शुचा, कृत:,—विहित:, य: कोलाहल:,—करुणरव:, तेन आकुलानां—व्याकुलानां,कुटुम्बिनीनां—कुलाङ्गनानां, पुरन्ध्रीणां वा, पुरन्ध्रीणामित्यर्थ:, ("स्यात् तु कुटुम्बिनी पुरन्ध्री" इत्यमर:) विकीर्णै:,—विच्छिन्नै:, केशकलापै:,—कुन्तलसमूहै:, शबला:,—विविधवर्णा:, या: शवानां—मृतानां, शिविका:,—यानविशेषा:, तासां सङ्घै:,—समूहैरित्यर्थ:, सङ्कुला:,—आकीर्णा:।

(३६२) किलेति।—किलकिलायमानानां,—घनसन्निविष्टतया मिलता:, किञ्च-

श्वापदाः (३६३) परलोकावसथपथिकसार्थप्रस्थानविश्रिब्धा-वोधयः। (३६४) सकललोककवलावलेहलम्पटा बहुला वहंलिहा (३६५) लेढि लोहितार्चिता चिताङ्गारकाली कालरात्रिजिह्वा जीवितानि जीविनाम्। (३६६) तृप्तिम-ग्निश्चिता च भगवतः सर्वभूतभुजो बुभुक्षा मृत्योः।

किलेति सहर्षे शब्दे कृपायां वा इत्यर्थः, [किलकिला इव आचरन्त इत्यर्थे "कर्तुः क्यङ् सलोपश्च" (३।१।११ पा०) इति क्यङि ज्ञानचि च रूपम्], श्मशानशिविरस्य —पितृवनसङ्घस्य, प्रेतावासस्य इत्यर्थः, ("श्मशान स्यात् पितृवनम्" इत्यमरः); यद्वा,—श्मशानमेव शिविरं येषां तादृशाः, शिवाश्वापकाः,—मृगालशिशवः यातु तथाविधाः; मृतदेहभक्षणाशया इति भावः।

(३६३) परलोकेति।—परलोक एव—लोकान्तरमेव, [आवसति अव इत्यर्थे वसतेः अथच्], आवसथः,—वसतिस्थानम्, आलयः इत्यर्थः, तस्य ये पथिक-साथाः,—पान्थनिवहाः, तेषां प्रस्थानस्य—प्रयाणस्य, विश्रिब्धाबोधयः,—रथ्यायेधयः, पुराभ्यन्तरस्थाः प्रस्थानमार्गसमूहा इत्यर्थः,("रथ्या प्रतोली विश्रिब्धा" "वीथ्यालिरावलिः पङ्क्तिः श्रेणी" इत्युभयत्राप्यमरः)।

(३६४) सकलेति।—सकलानां—सर्वेषां, लोकानामेव—प्राणिनामेव, कवलानां—ग्रासानाम्, अवलेहः,—आस्वादः, तत्र लम्पटा—लुब्धा। बहुला—दीर्घा। वहंलिहा—छिद्रान्वेषणी; यद्वा,—वहं—स्कन्धं, "वहः स्याद् वृषभस्कन्धे वाहे गन्धवहेऽपि च" इति मेदिनीवचनात् वृषस्कन्धार्थकस्य वहशब्दस्यात्र सामान्यतः स्कन्धार्थे एव प्रयोगो बोद्धव्यः; लेढि—आस्वादयति, स्कन्धशोणितं पिबतीति भावः, या सा, स्कन्धं भोटयित्वा रक्तपायिनीत्यर्थः, यद्वा,—वहं,—गन्धवहं, प्राणवायुमिति भावः, लेढि वा सा, प्राणघातिनीत्यर्थः; ["वहाभ्रे लिहः" (३।२।३२ पा०) इति खश्]।

(३६५) लेढि—आस्वादयति। लोहितार्चिता—रक्तज्वाला; जीवानां रक्त-पानादिति भावः। चिताङ्गारकाली—चिताङ्गारवत्—शवदाहचुल्लिस्थाग्निरहिता-लातवत्, काली—कृष्णवर्णा। कालरात्रिजिह्वा—कालरात्रेः,—यमभगिन्याः, सर्व्व-भूतप्राणापहारिण्याः मृत्युदेव्या वा, कल्पान्तरात्रेर्वा, जिह्वा—रसना।

(३६६) सर्व्वभूतभुजः,—सर्व्वप्राणिभक्षकस्य, मृत्योः,—यमस्य, ("मृत्युर्नी मरणं यमे" इति मेदिनी) बुभुक्षा—क्षुधा, तृप्तिं—सन्तोषम्, अग्निश्चिता—न शिक्षिता,

(३६७) अतिद्रुतवाहिनी च अनित्यतानदी । (३६८) क्षणिकाश्च महाभूतग्रामगोष्ठाः । (३६९) रात्रिषु भङ्गुराणि गात्रयन्त्रपञ्जरदारूणि देहिनाम् । (३७०) अशुभशुभावेशविवशा विशरारवः शरीरनिर्माणपरमाणवः । (३७१) छिदुरा जीवबन्धनपाशतन्त्रीतन्तवः । सर्वमात्मनोऽनीश्वरं विश्वं नश्वरम् ।

ग्रिच्चामप्राप्ता, तत्प्रिज्ञानाभावात् इत्यर्थः, [ग्रिच्चते: इत्यस्य औणादिकस्य कर्तरि निष्ठायां रूपम्] ; बहुभोजनेनापि अस्या तृप्तिर्न जायते इति भावः ।

(३६७) अतिद्रुतेति ।—अतिद्रुतम्—अतिशीघ्रं, वहति—गच्छतीति तथोक्ता । अनित्यतानदी—अनित्यता—क्षयशीलता एव, नदी—सरित् ; अनित्यमिदं जीवनं द्रुतमेव क्षयतीत्यर्थः ।

(३६८) क्षणिकाः,—क्षणस्थायिन्यः । महेति ।—महाभूतानां—क्षित्यादीनां पञ्चानां, ग्रामस्य—समूहस्य, गोष्ठाः,—समाजाः, तुल्या इत्यर्थः, पञ्चमहाभूतात्मका जीवसङ्घा इति यावत् ।

(३६९) रात्रिषु—रजनीषु, प्रतिरात्रि इत्यर्थः, भङ्गुराणि—भङ्गप्रवणानि, प्रतिनिशान्ते आयुष्कालस्य एकैकदिनक्षयादिति भावः । गात्रेति ।—गात्रं—शरीरमेव, ["गात्र—" इत्यत्र "पात्र—" इति पाठे,—पात्रम्—आधारः, जीवस्येति भावः, शरीरमित्यर्थः, तदेव] यन्त्रं—नियमचालितः वस्तुविशेषः, तस्य पञ्जराः,—अस्थीनि एव, दारूणि—काष्ठानि ।

(३७०) अशुभेति ।—अशुभानां—दुष्कृतानां, शुभानाञ्च—सुकृतानाञ्च, आवेशेन—अधिष्ठानेन, विवशाः,—परायत्ताः ; सुकृतदुष्कृतकर्म्मानुसारेण शुभाशुभफलभोगिनः, न तु स्वेच्छया शुभमशुभं वा भोक्तुं सर्व्वथा इति भावः, इच्छाऽभावेऽपि पश्वादियोनिषु गमनादिति तात्पर्य्यम् ; विशरारवः,—वि—विशेषेण, शरारवः,—परस्परमुपघातकाः, परस्परोपघातेन विश्लेषात् चिरस्थायिन इत्यर्थः, ("शरारुर्घातुकी हिंस्रः" इत्यमरः) स्वजन्ये देहे नष्टेऽपि परमाणूनामविनाशित्वादिति भावः ; ["शॄस्वृस्निहित्रपिकृतिभ्य आरुः" (उ०१।१७३ पा०) इति विपूर्व्वकात् शृणातेः आरुः] । शरीरनिर्म्माणपरमाणवः,—देहघटकद्रव्यकारणात्मकपदार्थविशेषाः ।

(३७१) छिदुराः,—विच्छेदप्रवणाः ; ["विदिभिदिच्छिदेः कुरच्" (उ०१।१५२ पा०) इति कुरच्] । जीवेति ।—जीवानां—प्राणिनां, बन्धनस्य—संसारबन्धनस्य, पाशानां—रज्जूनां, तन्त्रीतन्तवः,—तन्त्रीरूपाणि सूत्राणि ; यद्वा,—जीवानां बन्धनाय

एवम् (३७२) अवधृत्य नात्यर्थम् एव अर्हसि मेधाविनि! मृदुनि मनसि तमसः प्रसरं दातुम्। एको हि (३७३) प्रतिसङ्क्रानलक्षण आधारीभवति धृतेः। अपि च दूरगतेऽपि हि शोके ननु इदानीम् अपेक्षणीय एव अयं ज्येष्ठः पितृकल्पो भ्राता

—ससारकारायां संयमनाय, पाशाः,—मृगपक्ष्यादिबन्धनाय वागुराः इत्यर्थः, ("पाशः कैशादिपूर्वः स्यात् तन्तुहस्तकर्मपूर्वकः। सुकर्मे च स्वसामर्थ्यान्मृगपक्ष्यादिबन्धने॥" इति मेदिनी) तेषां तन्त्रीतन्तवः। आत्मनः,—स्वस्य, अनीश्वरम्—अनायत्तम्; नास्ति ईश्वरो यस्मिन् तत्, ईश्वरभिन्नमित्यर्थः; कैवल्यमीश्वरस्यैव नित्यत्वेन तस्मादन्यस्य सर्वस्यैव क्षयित्वादित्यपि व्यज्यते। सर्वं—कृत्स्नम्। विश्वं—जगत्, विश्वस्थं वस्तुजातमिति यावत्। नश्वरं—नाशप्रवणम्, जगति सर्वमेव ध्वंसशीलं, तेषां स्थायित्वसम्पादने त्वस्य अस्वाप सामर्थ्यं नास्तीत्याशयः।

(३७२) अवधृत्य—निश्चित्य। अर्हसि—योग्या भवसि। मेधाविनि! इति राज्ञ्याश्रया आमन्त्रणपदम्; धारणावद्बुद्धिशालिनि इत्यर्थः; ["अस्मायामेधास्रजो विनिः" (५।२।१२१ पा०) इति मेधाया अस्त्यर्थे वि न., ततः ङीष्]। मृदुनि—कोमले, दुःखसहनानर्हे इति यावत्। ["मनसि" इत्यत्र आधारस्यैव वाच्यत्वात् न चतुर्थी]। तमसः,—मोहस्य। प्रसरं—विसर्पणं, विस्तारमित्यर्थः, अवसरमिति यावत्।

(३७३) प्रतिसङ्क्रानलक्षण इति।—प्रतिसङ्क्रानं—विवेककुशला मतिः, तस्य क्षणः,—समयः, तदाविर्भावकाल इत्यर्थः। धृतेः,—धैर्यस्य, आधारीभवति—आश्रयतामापद्यते, [अनाधारः आधारः सम्पद्यमानः भवतीत्यभूततद्भावार्थे "कृभ्वस्तियोगे—" (५।४।५० पा०) इति च्विः], विवेकिनी बुद्धिरेव धैर्यं विधातुं समर्था इति भावः; सर्वमेवेदमनित्यमिति विवेकिन्या बुद्ध्या आकलय्य स्वयमेव धैर्यमवलम्बस्व, नात्यधीरा भव इति वक्तुराशयः। दूरगते—दूरम्—अतिशये, गतः,—प्राप्तः, आरूढ इत्यर्थः, तस्मिन्, अतिवर्द्धितेऽपीति यावत्। नन्विति सम्बोधने, भोः! इत्यर्थः। इदानीम्—ईदृश्यां दशायामित्यर्थः, वैधव्यदशायामिति यावत्, पितृप्रभृतीनामभावे, भातुः परिचरणाद्यर्थं लोकाभावाच्च इति वा भावः। अपेक्षणीयः,—अनुसरणीयः इत्यर्थः, नारीणां स्वातन्त्र्याभावादिति भावः; यद्वा,—अपेक्षणीयः,—द्रष्टव्यः, एतादृशस्य भ्रातुर्मुखं प्रति दृष्टिपातः कर्त्तव्य इति भावः। पितृकल्पः,—पितृसदृशः; ["ईषदसमाप्तौ—" (५।३।६७ पा०) इति ईषदूनार्थे कल्पप्]।

भवत्या गुरुः। (३७४) इतरथा को न बहु मन्येत कल्याणरूपम् ईदृशं सङ्कल्पम् अत्रभवत्याः काषायग्रहणकृतम्? (३७५) अखिलमनोज्वरप्रशमनकारणं हि भगवती प्रव्रज्या। ज्यायः खलु इदं पदम् आत्मवताम्। (३७६) महाभागस्तु भिनत्ति मनोरथम् अधुना। यत् अयम् आदिशति, तदेव अनुष्ठेयम्। (३७७) यदि भ्राता इति, यदि ज्येष्ठ इति, यदि वत्सल इति, यदि गुणवान् इति, यदि राजा इति, सर्वथा स्थातव्यम् अस्य नियोगे" इति उक्त्वा (३७८) व्यरंसीत्।

(३७९) उपरतवचसि च तस्मिन् निजगाद नरपतिः,—

---

(३७४) इतरथा—अन्यथा, नो चेदेवामित्यर्थः। बहु मन्येत—आद्रियेत? कल्याणरूपं—मङ्गलरूपं, श्रेयोभूयिष्ठमित्यर्थः, ईदृशं—काषायग्रहणरूपमित्यर्थः। सङ्कल्पम्—अभिलाषम्। अत्रभवत्याः,—मान्यायाः।

(३७५) अखिलेति।—अखिलस्य—समग्रस्य, मनोज्वरस्य—मनःपीडायाः, प्रशमनम्—अपनयनं, तस्य कारणं—हेतुः। भगवती—ऐश्वर्यशालिनी। प्रव्रज्या—सन्यासधर्मः। ज्यायः,—श्रेष्ठमित्यर्थः; ["ज्य च" (५।३।६१ पा०) इति ईयसुनि प्रशस्यस्य ज्यादेशः; "ज्यायादीयसः" (६।४।१६० पा०) इति ज्यादृत्तरस्य ईयसुन आकारादेशश्च]। इदं पदं—काषायग्रहणमित्यर्थः। आत्मवतां—मनस्विनाम्।

(३७६) महाभागः,—श्रीमान् हर्षः। भिनत्ति—खण्डयति, विफलीकरोतीत्यर्थः। मनोरथं—सङ्कल्पम्; भ्रातुस्ते अवस्थां विलोक्य सङ्कल्पोऽयमदानीं परित्याज्यः इति भावः। अनुष्ठेयं—कर्त्तव्यम्।

(३७७) यदि भ्रातेत्यादि।—यदि भ्राता, अत एव अयं मान्य इति शेषः, इति, मन्यसे इति शेषः; एवं ज्येष्ठादिष्वपि योजनीयम्। वत्सलः,—स्निग्धः, त्वयि स्नेहपरायण इत्यर्थः; ["वत्सांसाभ्यां कामबले" (५।२।९८ पा०) इति लच्]। तदा सर्वथा—सर्वैः प्रकारैः। स्थातव्यं—वर्त्तितव्यम्। नियोगे—आज्ञायाम्।

(३७८) व्यरंसीत्—विरराम; ["व्याङ्परिभ्यो रमः" (१।३।८३ पा०) इति परस्मैपदम्]।

(३७९) उपरतवचसि—निवृत्तवाक्ये। तस्मिन्—दिवाकरमित्रे; ["यस्य च भावेन—" (२।३।३७ पा०) इति सप्तमी]। निजगाद—उवाच। नरपतिः,—

"आर्यम् अपहाय कोऽन्य एवम् अभिदध्यात् ? अनभ्यर्थितदैव-निर्मिता हि विषमविपदवलम्बनक्षमा भवन्तो लोकस्य। (३८०) स्नेहाद्रमूर्त्तयो मोहान्धकारध्वंसिनश्च धर्मप्रदीपाः; किन्तु (३८१) प्रणयप्रदानदुर्ललिता दुर्लभमपि मनोरथम् अतिप्रीतिः अभिलषति। (३८२) धीरस्यापि धार्ष्ट्यम् आरोपयति (३८३) हृदयलघिमलङ्घितम् अतिवल्लभत्वम्।

ष्टः। अपहाय—त्यक्त्वा, आर्यं विनेत्यर्थः। अभिदध्यात्—कथयेत्। अनभ्यर्थितेति।—अनभ्यर्थिताः,—न अभ्यर्थिताः,—न याचिताः, अथ च दैवेन—विधिना, अनुकूलनेनेति भावः; यद्वा,—अनभ्यर्थितम्,—अप्रार्थितं, यत् दैवे—सौभाग्यमित्यर्थः, अयाचिततयैवोपनतम् इति भावः, तेन निर्मिताः,—सृष्टाः, प्रचोदिता इत्यर्थः। विषमात्।—विषमा—दारुणा, विपत्—विपत्तिः, तस्या अवलम्बनक्षमाः,—आश्रयस्थानानीत्यर्थः; अप्राप्यमाना अपि भवन्तः करुणाविवशाः विपन्नानामप्रत्याशितसौभाग्यबलेनैव अकस्मादागत्य विपदस्त्रायन्ते इति सरलार्थः।

(३८०) स्नेहेति।—स्नेहेन—प्रीत्या, तैलादिना च, आर्द्रा—सरसा, सिक्ता च, मूर्त्तिः,—आकारः येषां तथोक्ताः। मोहेति।—मोहः,—अज्ञानता एव, अन्धकारः,—तिमिरम्, आवरकत्वभावादिति भावः; तस्य ध्वंसिनः,—नाशिनः, उपदेशदानेन आलोकदानेन च। धर्मप्रदीपाः,—धर्ममयाः दीपाः। धर्मनाथताः सर्व्वभूतेष्वेव दयापराः सदुपदेशदायकार्येत्यर्थः।

(३८१) प्रणयेति।—प्रणयस्य—स्नेहस्य, प्रदानेन—अर्पणेन, प्रदर्शनेनेति यावत्, दुर्ललिता—जनितस्पर्द्धेत्यर्थः। दुर्लभमपि—दुष्प्रापमपि। मनोरथम्—अभिप्रेतम्। अतिप्रीतिः,—अतिप्रणयः। अभिलषति—आकाङ्क्षति।

(३८२) धीरस्य—प्रशान्तस्य, गम्भीरस्य इत्यर्थौ वा। धार्ष्ट्यम्—उद्धतत्वं, वाचालत्वमित्यर्थौ वा। आरोपयति—जनयति; [आङ्पूर्व्वकात् रोहतेः णिचि लटि रूप, "रुहः पोऽन्यतरस्याम्" (७.३।४३ पा०) इति हकारस्य पः]।

(३८३) हृदयेति।—हृदयस्य—चेतसः, लघिमा—लघुत्वेन, चापल्येनेत्यर्थः, लङ्घितम्—अतिक्रान्तम्, अतिभूमिं गतमित्यर्थः; दुर्ललितत्वेन अहमेवास्य अतिप्रेयान् इति निश्चयादतिप्रगल्भमिति भावः; यद्वा,—हृदयस्य लघिमा—लघुत्वं, सङ्कोचः इत्यर्थः, लङ्घितः,—अतिक्रान्तः, दूरीकृतः इत्यर्थः, वात्सल्यवतः सतोऽपि कोऽपि सङ्कोचः न कर्त्तव्य इति धियेति भावः, यैन तत्। अतिवल्लभत्वम्—अतिप्रियत्वम्, अतिप्रियत्वज्ञानमित्यर्थः।

(३८४) युक्तायुक्तविचारशून्यत्वाच्च शालीनम् अपि शिक्षयन्ति स्वार्थतृष्णाः प्रागल्भ्यम् । (३८५) अभ्यर्थनाया रक्षन्ति च जलनिधय इव मर्य्यादाम् आर्य्याः । दत्तमेव च (३८६) शरीरमिदम् अनभ्यर्थितेन प्रथममेव आतिथ्याय माननीयेन भवता मह्यम् । अतः किञ्चित् अर्थये भदन्तम्,—इयं नः स्वसा बाला च (३८७) बहुदुःखखेदिता च सर्व्वकार्य्यावधीरणोपरोधेनापि यावत् लालनीया नित्यम् । अस्माभिश्च (३८८) भ्रातृवधापकारिरिपुकुलप्रलयकरणोद्यतस्य बाहोर्विधेयैः भूत्वा सकललोकप्रत्यक्षं

---

(३८४) युक्तेति ।—युक्तायुक्तयोः,—कार्य्याकार्य्ययोः, विचारे—वितर्के, शून्यः,—अक्षमः, तस्य भावः तत्त्वात् । शालीनम्—अधृष्टं, धीरमित्यर्थः, विनीतमिति यावत्, जनमिति शेषः ("स्यादधृष्टे तु शालीनः" इत्यमरः) । स्वार्थतृष्णाः,—स्वकार्य्यसिद्ध्यभिलाषाः । प्रागल्भ्यम्—औद्धत्यं, धृष्टतामित्यर्थः ।

(३८५) अभ्यर्थनायाः,—प्रार्थनायाः, मर्य्यादामित्यनेन सम्बन्धः । ["अभ्यर्थनायाः" इति क्वौ पक्षे वा] । रक्षन्ति—पालयन्ति, नोल्लङ्घयन्ति इत्यर्थः । जलनिधयः,—सागराः । मर्य्यादां—सीमां, वेलाञ्च ।

(३८६) इदं—दृश्यमानं, भवदीयमित्यर्थः । अनभ्यर्थितेन—अयाचितेन । आतिथ्याय—अतिथिसत्काराय, अतिथये वा, ("स्यादातिथ्यमतिथ्यर्थे क्लिङ्गमतिथौ पुमान्" इति मेदिनी) । अतः,—स्वशरीरस्याप्यर्पणात् । अर्थये—याचे । भदन्तं—बौद्धाचार्य्यं त्वामित्यर्थः ।

(३८७) बहुदुःखखेदिता—प्रबलाऽऽधिक्लिष्टा । सर्व्वकार्य्येति ।—सर्व्वेषां—सकलानां, कार्य्याणां—कर्म्मणाम्, अवधीरणम्—अवहेलनमेव उपरोधः,—क्षतिः तेन ; यद्वा,—सर्व्वकार्य्यावधीरणे—निखिलकर्म्मपरित्यागे, यः उपरोधः,—अनुरोधः तेन, सर्व्वकार्य्यक्षतिं सहित्वाऽपीत्यर्थः, यावत् लालनीया—यत्नेन पालनीया एव, ("यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः) ।

(३८८) भ्रातृवधेति ।—भ्रातुः,—राज्यधर्षणस्य, वधेन—हननेन, अपकारिणः,—द्रोहिणः, ये रिपवः,—शत्रवः, तेषां कुलस्य—वंशस्य, प्रलयकरणं—विध्वंसनं, तत्र उद्यतः,—प्रवृत्तः तस्य । बाहोः,—भुजस्य । विधेयैः,—वशवर्तैः, अधीनैरित्यर्थः, भुजबलगर्व्वे एव भ्रातृघातिनां शत्रूणां समूलकुन्मूलनाय मामादिशदित्यर्थः ।

प्रतिज्ञा कृता। (३८९) पूर्व्वावमाननाऽभिभवम् असहमानैः अर्पित आत्मा कोपस्य। अतः (३९०) नियुङ्क्तां कियन्तमपि कालम् आत्मानम् आर्य्योऽपि कार्य्ये मदीये। दीयताम् (३९१) अतिथये शरीरम् इदम्। अद्य प्रभृति यावदयं जनः (३९२) लघयति प्रतिज्ञाभारम्, आश्वासयति च तातविनाश-दुःखविक्लवाः प्रजाः, तावत् इमाम् अत्रभवतः कथाभिश्च धर्म्याभिः, (३९३) कुशलप्रतिबोधविधायिभिः उपदेशैश्च अरजोभिः, (३९४) शीलोपशमदायिनीभिश्च देशनाभिः,

(३८९) पूर्वेति।—पूर्व्वया—प्रथमया, अप्राप्तपूर्व्वयेति भावः, मुख्यया वा, अव माननया—अवज्ञया, साहसवधरूपया इति भावः, यः अभिभवः,—तिरस्कारः तम्। असहमानैः,—अक्षममाणैः, सोढुमशक्नुवानैरित्यर्थः। कोपस्य—क्रोधस्य, आत्मा—मनः, धैर्य्यं वा, ("आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि। धृतावपि मनीषायां शरीरब्रह्मणोरपि॥" इति मेदिनी) अर्पितः,—दत्तः; कोपाकुलोऽस्मीति भावः।

(३९०) नियुङ्क्तां—नियुक्तं करोतु; ["स्वराद्यर्थोपसर्गादिति वक्तव्यम्" इति वार्त्तिकबलात् युजेरात्मनेपदम्]। आत्मानं—शरीरम्। मदीये कार्य्ये—मम हितकर्म्मणीत्यर्थः, यथा मम सुमङ्गलं स्यात्, तथा भवता आचरितव्यमिति भावः।

(३९१) अतिथये—गृहागताय, मह्यमिति शेषः।

(३९२) लघयति—लघुकरोति, अवतारयतीति यावत्, प्रतिज्ञां निस्तरतीति भावः। आश्वासयति—सान्त्वयति। तातेति।—तातस्य—"पूज्ये पितरि पूज्ये च तातशब्दः प्रयुज्यते" इति वचनात् ज्येष्ठस्येत्यर्थः, विनाशेन—उपांशुहननेनेत्यर्थः, यत् दुःखं—मनःपीड़ा, तेन विक्लवाः,—विह्वलाः, आर्त्ता इत्यर्थः। प्रजाः,—प्रकृतीः। इमां—मत्त्वमारम्। अत्रभवतः,—पूज्यस्य ते। धर्म्याभिः,—धर्म्मादनपेताभिः, धर्म्मोपदेशसमन्विताभिरित्यर्थः; ["धर्म्मपथ्यर्थ—" (४।४।९२ पा०) इति यत्]।

(३९३) कुशलेति।—कुशलानां—मङ्गलानां, प्रतिबोधः,—विज्ञानं, तं विदधति—जनयन्तीति तथोक्तैः, शोकविनाशदक्षैरित्यर्थः, अरजोभिः,—रजोगुण-वर्জ্জितैः, सत्त्वोद्रेककरैः इति भावः।

(३९४) शीलोपशमदायिनीभिः,—शीलस्य—स्वभावस्य, सर्व्वदा शोकदुःख-सन्तप्तस्येति भावः, उपशमदायिनीभिः,—प्रशमकारिणीभिः, मनसः शान्ति-जननीभिरित्यर्थः। देशनाभिः,—कथाभिः, शिक्षाभिरित्यर्थः।

(३९५) क्लेशप्रहाणहेतुभूतैश्च तथागतैः दर्शनैः, (३९६) अस्मत्-पार्श्वोपयायिनीमेव प्रतिबोध्यमानाम् इच्छामि। इयन्तु यद्दी-व्यति मयैव (३९७) समं समाप्तकल्पेन काषायाणि। अर्थिजने च किमिव न अतिसृजन्ति महान्तः? (३९८) सुरनाथम् आत्मास्थिभिः अपि यावत् कृतार्थम् अकरोत् धैर्योदधिः दधीचः। (३९९) मुनिनाथोऽपि अनपेक्षितात्मास्थितिः

(३९५) क्लेशेति।—क्लेशस्य—संसारसन्तापस्य, प्रहाणं—क्षयः, तस्य हेतु-भूतानि—कारणरूपाणि तैः, भ्रान्तिप्रदैरित्यर्थः। तथागतैः,—तादृशैः, दर्शनैः,—ज्ञानैः, दृष्टान्तैः वा; यथा,—तथागतः,—बुद्धः, ("सर्वज्ञः सुगतो बुद्धः धर्मराज-स्तथागतः" इत्यमरः) तस्य इदं तथागतं तैः, बुद्धसम्बन्धिभिरित्यर्थः, दर्शनैः,—ज्ञानैः, बौद्धशास्त्रोक्तप्रबोधपदैः उपदेशवचनैरित्यर्थः, ("दर्शनं नयनस्वप्नबुद्धिधर्मोपलब्धिषु। शास्त्रदर्पणयोश्च" इति मेदिनी)।

(३९६) अस्मदिति।—अस्माकं पार्श्वे—समीपम, उपयाति—उपगच्छति, तिष्ठतीत्यर्थः, तथोक्ताम, अस्मत्पार्श्ववर्त्तिनीम। प्रतिबोध्यमानाम—उपदिश्यमानाम, अस्मत्पार्श्वस्थितमेवात्मानं यथा बुध्यते तथा क्रियमाणामित्यर्थः; यावदहं विपक्षकुलो-न्मूलनाय प्रजाहृदयाश्वासनाय च व्यापृतस्तिष्ठामि, तावन्मदीयमग्निमेनां स्वपार्श्व-मवस्थाप्य तथा प्रतिबोध्यतां, यथेयं मदर्शनात् नाधीरीभवति, परन्तु अस्मत्समीप-वर्त्तिनीमेव आत्मानं मन्यते इति भावः।

(३९७) समं—सह। समाप्तकल्पेन—कार्ये समाप्तवता, शत्रुविनाशरूपं प्रजाश्वासनरूपञ्च कार्यं समाप्येत्यर्थः। अर्थिजने—याचकजने। अतिसृजन्ति—ददति।

(३९८) सुरनाथम्—इन्द्रम्। आत्मास्थिभिः,—आत्मनः,—स्वस्य, अस्थिभिः,—कङ्कालैः। यावत्—अवधारणे, साकल्ये वा, कृतार्थं—सिद्धमनोरथं, सम्पूर्णरूपेण कृतकृत्यमित्यर्थः। धैर्योदधिः,—धैर्यसागरः। दधीचः,—तदाख्यमुनिः; असौ हि दधीच्यपरनामा मुनिः दैत्यासुरवधोद्यताय इन्द्राय वज्रनिर्माणार्थं स्वदेहस्थास्थीनि सस्नादादात्, वज्ररूपैः तैरसौ तं निजघानेति पौराणिकी वार्त्ताऽत्रानुसन्धेया।

(३९९) मुनिनाथः,—मुनीन्द्रः, सुगतः इति यावत्, ("सर्वज्ञः सुगतो बुद्धः···। मुनीन्द्रः सौघनः शास्ता" इत्यमरः)। अनपेक्षितेति।—न अपेक्षिता—न विवेचिता, आत्मनः,—स्वशरीरस्य, स्थितिः,—रक्षणं येन तथाभूतः, स्वशरीररक्षा-

अनुकम्पा इति कृत्वा कृपावान् आत्मानं (४००) वठरसत्त्वेभ्यः कार्तिकृत्वो न दत्तवान्; अतः परं भवन्त एव बहुतरं जानन्ति" इत्युक्त्वा तूष्णीम्बभूव भूपतिः।

भूयस्तु बभाषे भदन्तः,—(४०१) "भव्या न हि: उच्चारयन्ति वाचम्। चेतसा प्रथममेव प्रतिग्राहिता गुणाः कायबलिम् इमाम् अमुना जनेन। (४०२) उपयोगस्तु निरुपयोगस्य अस्य लघुनि गुरुणि वा कृत्ये गुणवदायत्तः" इति।

मनपेक्षमाण इत्यर्थः। अनुकम्पा—दया। इति कृत्वा—इति मत्वा, अनुकम्पार्ह इति विविक्षेत्यर्थः।

(४००) वठरसत्त्वेभ्यः,—जडप्राणिभ्यः, भिक्षादिभ्य इति भावः। कृतिकृत्वः,—कतिवारान्: ["सङ्ख्याया: क्रियाभ्यावृत्तिगणने कृत्वसुच्" (५।४।१७ पा०) इति कृत्वसुच्]। श्रूयते हि परा कामपि सिंहीं सद्यः प्रसूतां बुभुक्षया स्वशावकान् भक्षयितुं प्रवृत्तां दृष्ट्वा बुद्धदेवः करुणापारतन्त्र्यात् तस्यै स्वमांसप्रदानेन तान् शावकान् अरक्षदिति। बहुतरं—प्रचुरं, सदृक्षाभ्यामाभ्यामन्यविधम् अर्थिभ्यः स्वदेहदानरूपमुदाहरणमित्यर्थः।

(४०१) भव्याः,—साधवः। हिः,—निश्चयं, द्विप्रकारं वा; ["द्वित्रिचतुर्भ्यः सुच्" (५।४।१८ पा०) इति सुच्]। प्रथममेव—दर्शनक्षण एवेत्यर्थः, गुणाः,—धैर्यौदार्यादय इत्यर्थः, भवदीया इति भावः, इमां—परिदृश्यमानां मदीयामित्यर्थः, कायबलिं—शरीररूपमुपहारं, ["बलिः पूजोपहारयोः" इत्यमरः। "करोपहारयोः पुंसि बलिः प्राग्वद्भुजे स्त्रियाम्" इत्यमरोक्तेः अत्र उपहारार्थकबलिशब्दस्य स्त्रीलिङ्गत्वं चिन्तनीयं, तेन "इमाम्" इत्यत्र "इमम्" इति पाठः समीचीनः]। प्रतिग्राहिताः,—कृतप्रतिग्रहाः कृताः, प्रतिग्रहं कारिता इत्यर्थः, स्वीकरणमापादिता इति यावत्, ("प्रतिग्रहः स्वीकरणे सैन्यपृष्ठे पतद्ग्रहे" इति मेदिनी); अहं भवद्गुणैः शरीरमिदमुपहारीकृतवान् इति निष्कर्षः। अमुना जनेन—अनेन जीवेन, मयेति भावः।

(४०२) उपयोगः,—उपकारः। निरुपयोगस्य—निष्प्रयोजनस्य, परस्योपयोगमनपेक्षमाणस्येति भावः, अस्य, भवतः इति शेषः। गुणवत्—सम्यक् इत्यर्थः, आयत्तः,—अधीनः; अहं यावच्छक्यमनेन कायेन भवतः उपकारं विधास्यामीति तात्पर्यम्; यद्वा,—निरुपयोगस्य—केनापि स्वकृत्ये अकृतनियोगतया व्यर्थीभूतस्य इति

अथ (४०३) तथा तस्मिन् अभिनन्दितप्रणये प्रीयमाणः पार्थिवः तत्र ताम् उषित्वा विभावराम् (४०४)उषसि वसनालङ्कारादिप्रदानपरितोषितं विसर्ज्य निर्घातम् (४०५) आचार्येण सह स्वसारम् आदाय प्रयाणकैः कतिपयैः एव कटकम् अनुजाह्नवि निविष्टं प्रत्याजगाम ।

तत्र च (४०६) राज्यश्रीप्राप्तिव्यतिकरकथां कथयन् एव

भावः, मम—मम, मदीयकार्यस्य इत्यर्थः । लघुनि—स्वल्पायासमाध्ये इत्यर्थः. गुरुणि—प्रचुरायाससाध्ये इत्यर्थः, कृत्ये—कार्ये, उपयोगः,—व्यवहारः. नियोग इत्यर्थः ; गुणवदायत्तः,—गुणवतः,—गुणिनः भवतः, आयत्तः,—अधीनः ; मया पूर्वमेव शरीरमिदं भवद्गुणस्य उपहारीकृतम्, अतः शरीरेऽस्मिन् गुणिनो भवत एव पूर्णाधिकारः ; अधुना लघुनि गुरुणि वा यादृशि एव कार्ये इदं नियोक्ष्यसि, तदेवाहमविचारित करिष्यामीति निष्कर्षः ।

(४०३) तथा—तादृशप्रकारेणेत्यर्थः । तस्मिन्—दिवाकरमित्रे । अभिनन्दितप्रणये—अभिनन्दितः,—सादरं सम्मानित इत्यर्थः. प्रणयः,—याच्ञा येन तस्मिन्, ("प्रणयः प्रसये प्रेम्नि याच्ञाविश्रम्भयोरपि" इति मेदिनी) आदरेण गृहीताभ्यर्थने इत्यर्थः । प्रीयमाणः,—तुष्यन् ; ["प्रीञ् तर्पणे" इत्यस्य धातोः दैवादिकस्य शानचि रूपम्] । उषित्वा—आसित्वा, अवस्थाय इत्यर्थः । विभावरीं—रजनीम् ; ["अकर्मकधातुभिर्योगे देशः कालः—" इति वार्त्तिकात् कालवाचकस्य कर्मत्वम्] ।

(४०४) उषसि—प्रभाते । वसनेति ।—वसनानि—वस्त्राणि, अलङ्काराश्च—आभरणानि च, आदयो येषां तानि, वसनालङ्कारादीनि, तेषां प्रदानेन—अर्पणेन, परितोषितः,—प्रीणितः तम् ; निर्घातं—प्रागुक्तं प्रवरयुवानम् । विसर्ज्य—परित्यज्य, स्वस्थानं सम्प्रेष्येत्यर्थः ।

(४०५) आचार्येण—श्वशुरगुरुणा दिवाकरमित्रेण । प्रयाणकैः,—यात्राभिः । कतिपयैः,—स्वल्पैः, स्वल्पैरेव दिनैः स्वल्पैरेव भ्रमणैर्वा इत्यर्थः, कटकं—शिबिरम् । अनुजाह्नवि—जाह्नवी—गङ्गा, तस्याः अनु—तटसमीपे इत्यर्थः ; ["अनुर्यत्समया" (२।१।१५ पा०) इत्यव्ययीभावः ; "अव्ययीभावश्च" (२।४।१८ पा०) इति नपुंसकत्वञ्च] । निविष्टं—स्थितम् ।

(४०६) राज्यश्रीति ।—राज्यश्रियाः,—तन्नाम्न्याः हर्षभगिन्याः, प्राप्तिः,—लाभः, व्यतिकरः,—व्यतिषङ्गः, अन्योऽन्यसंसृष्टतामित्यर्थः ; यद्वा,—व्यतिकरः,—व्यसनं,

प्रणयिभ्यो रविरपि ततार गगनतलम्। (४०७) वह्लमधु-
पङ्गपिङ्गलः पङ्कजाकर इव सङ्कुकोच चक्रवाकवल्लभो वासरः।
(४०८) प्रकीर्णानि नवरुधिररसारुणवर्णानि लोकालोकजुषि
(४०९) यजूंषि इव कुपितयाज्ञवल्क्यवक्त्रवान्तानि निजवपुषि

राज्यश्रीसङ्गाला विपत्तिरित्यर्थः, ("अथ व्यलीकः पुंसि व्यसनव्यलिषङ्गयोः" इति मेदिनी) तयोः कथां—वार्त्ता, कथयन्—गदितुम्; ["लक्षणहेत्वोः क्रियायाः" (३।२।१२६ पा०) इति हेतौ शतृ। "कथयन्" इत्यत्र "कथयतः" इति पाठ,—कथयन्तं दर्शनादित्यर्थः, "षष्ठी चानादरे" (२।३।३८ पा०) इति षष्ठी] प्रणयिभ्यः,—सुहृद्भ्यः, ["क्रियया यमभिप्रैति—" (वा०) इति चतुर्थी]। ततार—अलङ्घयत्, अस्ताचलमगमदित्यर्थः।

(४०७) वह्लेति।—वह्लेन—प्रभूतेन, मधुना—मकरन्दानां, पङ्केन—द्रवेण इत्यर्थः, पिङ्गलः,—कपिलः। वासरोऽपि परिणतिकाले पिङ्गलवर्णो भवति। पङ्कजाकर इव—पद्माकर इव, चक्रवाकवल्लभः,—चक्रवाकाणां—रथाङ्गनाम्ना, वल्लभः,—प्रियः, मिलनसम्पादकत्वादिति भावः; वासरः,—दिवसः, सङ्कुकोच—सङ्कुचितवान्, शोषतामयासीत् इत्यर्थः। पङ्कजाकरोऽपि आवासभूमितया चक्रवाक-वल्लभः, इति तेन सह वासरस्यावैधर्म्यमार्म्योक्तरूपमालङ्कारः।

(४०८) प्रकीर्णानि—विक्षारितानि, दिक्षु विदिक्षु च व्याप्तानीत्यर्थः। नवेति।—नवः,—प्रत्यग्रः, सद्योनिर्गत इत्यर्थः, रुधिररसः,—रक्तद्रवः, तद्वत्, तेन च अरुणः,—लोहितः, वर्णः,—रूपं येषां तानि। लोकालोकजुषि—लोकालोकः,—खनामख्यातः सूर्य्यकरसम्पर्कसीमापर्व्वत इति यावत्, तस्य पार्श्वयोरातपस्य तद-भावस्य च सम्बन्धात् तथात्वमिति ज्ञातव्यम्; तं जुषन्ते—सेवन्ते, आश्रयन्तीत्यर्थः, तथोक्तानि, लोकालोकपर्व्वताश्रयीण इत्यर्थः, लोकदृष्टिप्रीतिकराणि इति भावः; ["जुषते:" इत्यस्य भौवादिकस्य कर्त्तरि क्विप्]; अत्यत्र,—लोकानां—जनानाम्, आलोक—दर्शनम्, ("आलोको दर्शनद्योतौ" इत्यमरः) जुषन्ते—सेवन्त इति तथोक्तानि, लोकदृष्टयोचराणीत्यर्थः; उद्गीर्य्य वाङ्मुखकरणादिति भावः।

(४०९) यजूंषीव—यजुर्वेदानिव। कुपितेति।—कुपितेन—क्रुद्धेन, गुरुं वैश-म्पायनं प्रतीति भावः, याज्ञवल्क्येन—तदाख्यमुनिना, वक्त्रात्—मुखात्, वान्तानि—उद्गीर्णानि। वैशम्पायनशिष्याः इव इति शेषः। निजवपुषि—स्वदेहे। पुरा वैशम्पायन-शिष्यः याज्ञवल्क्यः गुरोः वैशम्पायनस्य सकाशात् वेदानधीत्य सर्वेषु शिष्येषु समादिष्टं

(४१०) पूषा पापमुषि पुनरपि सञ्जहार जालकानि रोचि-

स्वगुरोः ब्रह्महत्यापापक्षयकारकं व्रतमेकाकी एवाचरितुमिच्छन् गुरुणा विप्रावमानना-मसहिष्णुना वेदान् मत्यग्रिगृहीतान् पारित्यजेति मुपालब्धः मल्वानेलाधौतान् वेद-भागानदवमत्; उद्वान्तांश्च तान् मुनयः तित्तिर्यां; तल्लौलुपतया तित्तिरीभूय आदद्युः। ततः एते वेदभागाः कृष्णयजुर्वेदा इति उच्यन्ते। तथा हि विष्णुपुराणम्;—"शिष्यानाह च भोः शिष्याः! ब्रह्महत्यापहं व्रतम्। चरध्वं मत्कृते सर्वं न विचार्योमिदं तथा॥ मयाऽऽह याज्ञवल्क्यस्य किमेतैर्बहुभिर्द्विजैः। क्लेशितैरल्पतेजोभिश्चरध्वेऽहमिदं व्रतम॥ ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम्। मुच्यतां यत् त्वयाऽधीतं यतो विप्रावमानकः॥.....इत्युक्त्वा रुधिराक्तानि यजूंष्यथ। छर्दयित्वा ददौ तस्मै यथौ च स्वेच्छया मुनिः॥ यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज!। जगृहुस्तित्तिरीभूतास्तित्तिर्यास्तु च ते ततः॥...एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः। अयातयामसञ्ज्ञानि यानि नो वेत्ति तद्गुरुः॥ यजूंषि यैरधीतानि तानि विप्रेदमोदितम!। वाजिनस्ते समाख्याता मुख्याश्चैत्ववयोगतः॥" इत्यादि। एवमेवाह वाजसनेयि-संहिताभाष्ये तत्रभवान् महीधरः; तथा हि,—"तत्रादौ ब्रह्मपरम्परया प्राप्तं वेदं वेद व्यासो मन्दमतीन् मनुष्यान् विचिन्त्य तत्कृपया चतुर्धा व्यस्य ऋग्यजुःसामाथर्वाख्या-श्चतुरो वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश, ते च स्वशिष्येभ्यः। एवं परम्परया सहस्रशाखो वेदो जातः। तत्र व्यासशिष्यो वैशम्पायनः याज्ञवल्क्यादिभ्यः स्वशिष्येभ्यो यजुर्वेदमध्यापयत्। तत्र दैवात् केनापि हेतुना क्रुद्धो वैशम्पायनः याज्ञवल्क्यं प्रत्युवाच मदधीतं त्यजेति, स योगसामर्थ्यात् मूर्त्ता विद्या विधाय उद्वमत्। वान्तानि यजूंष गृह्णीतेति गुरुक्तः; अन्ये वैशम्पायनशिष्याः तित्तिर्यो भूत्वा यजूंषि अभक्षयन्। तानि यजूंषि ब्रह्मस्खलित्यात् कृष्णानि जातानि। ततो दुःखितो याज्ञवल्क्यः सूर्यमाराध्य अन्यानि शुक्लानि यजूंषि प्राप्तवान्। तानि च जाबाल-बौधेयकाण्वमाध्यन्दिनादिभ्यः पञ्चदशशिष्येभ्यः पाठितवान्।" इति।

(४१०) पूषा—सूर्यः। पापमुषि—पापक्षयकारिणि, [पापोपपदात् मीषतेः मुषतेः वा कर्त्तरि क्विप्]। सञ्जहार—संहृतवान्, विलाययामासेत्यर्थः। जालकानि—निचयान्। रोचिषा—तेजसा, किरणानामित्यर्थः। यथा हि वैशम्पायनशिष्याः तित्तिरयो भूत्वा याज्ञवल्क्यमुखवान्तानि रुधिराक्तानि कृष्णानि यजूंषि स्वयमेव सञ्चारयामासुः, एवमेव पूषापि स्वरोचिषां जालकानि निजवपुषि सञ्जहारेति यजूंषि; सह रोचिषां जालकानामवैधर्म्यसाम्यादुक्तोपमालङ्कारः।

षाम्। (४११) क्रमेण च समुपोह्यमानमांसलरागरोचिष्णुः उष्णांशुः (४१२) उष्णीषबन्धसहजचूडामणिरिव हृकोदरकर-
५ पुटोत्पाटितः(४१३)प्रत्यग्रशोणितशोणाङ्गरागरौद्रो द्रौणायनस्य,

(४११) "क्रमेण" इत्यादौ "उष्णांशु.....मुहूर्त्तमदृश्यत" इत्यनेन सम्बन्धः। समुपोह्यमानेति।—समुपोह्यमानेन—मङ्क्ष्यमाणेन, आक्रुष्यमाणेनेत्यर्थः, क्षीय-माणेनेति भावः, ["मङ्क्ष्यमाणेन वर्द्धमानेन" इति केचित्] मांसलेन—सान्द्रेण, प्रभूतेनेत्यर्थः, रागेण—लौहित्येन, रोचिष्णुः,—राजमानः; ["अलं क्रञ्—" (३।२।१३६ पा०) इति इष्णुच्]। उष्णांशुः,—सूर्यः।

(४१२) उष्णीषेति।—उष्णीषः,—शिरोवेष्टनं, बध्यते—क्रियते, निवेश्यते इत्यर्थः, अवेति व्युत्पत्त्या, [बन्धातेरधिकरणे घञ्]। उष्णीषबन्धः,—मस्तकः, तत्र सहजः,—स्वभावोत्पन्नः, चूडामणिः,—शिरोरत्नं स इव। हृकोदरेति।—हृकोदरस्य—हृकः,—तन्नामा तीक्ष्णोऽग्निः, उदरे—कुक्षौ यस्य तस्य,—"यस्य तीक्ष्णो हृको नाम जठरे हव्यवाहनः। मया दत्तः स धर्म्मात्मा तेन चासौ हृकोदरः॥" इत्युक्तस्वरूपस्य भीमसेनस्य, करपुटेन—हस्तद्वयेन, उत्पाटितः,—उन्मूलितः, आकृष्ट इति यावत्।

(४१३) प्रत्यग्रेति।—प्रत्यग्रम्—अभिनवं, सद्योनिःसृतमित्यर्थः, उत्पाटन-वेगादिति भावः, शोणित—रक्तं, तेन तद्वद् वा शोणः,—लोहितः, यः अङ्गराग.—अङ्गप्रभा, तेन रौद्रः,—भीषणः। द्रौणायनस्य—द्रोणतनयस्य, अश्वत्थाम्न इत्यर्थः; ["द्रोणपर्व्वत—" (४।१।१०३ पा०) इति गोत्रे वैकल्पिकः फक्, पक्षे द्रौणिरिति]। पुरा सौप्तिके अश्वत्थाम्ना सुप्तेषु पुत्रेषु द्रौपद्या भीमसेनोऽभिहितः, यदश्वत्थाम्नः शिरः छित्वा नानीयते, तदा अहं जीवितं त्यक्ष्यामीति। तथा करिष्यामीति प्रतिज्ञानानम् आयान्तं भीमं दृष्ट्वा व्यासाश्रमे वदरिकावने स्थितौ रणश्रान्तः घृताभ्यक्तोऽश्वत्थामा अस्त्रसामर्थ्यादीषिकाः सम्मन्त्र्य ब्राह्ममस्त्रं विधाय तदैषिकं भीमवधाय प्रायुङ्क्त। तदा च एकाकिनी भ्रातुर्भीमसेनस्य गमनात् विपदमाकलय्य भीतेनार्জ্জুनेन कृष्ण-सारथिना तमेवानुसरता ब्रह्मशिरोऽस्त्रं समुचे। अवान्तरे समागतैश्च नारदादिभि-र्मुनिभिः मध्यस्थैरुक्तं, द्रौणेरस्त्रमभिमन्त्रितं वध्वा उत्तरायाः गर्भे पततु इति; अर्জ্জुने-नापि ब्रह्मवधो न कर्त्तव्य इति स्वमस्त्रं संहर्त्तव्यमिति च; ततस्तेषां वचनगौरवात् अर्জ্জुनेनास्त्रे संहृते भीमोऽश्वत्थाम्नः सहजं शिरोमणिं बलादुज्जहारेति भारतीयकथा अत्र अनुसन्धेया। अत्र अस्मदनवेक्षावशात् प्रत्यग्ररक्तैकरूपाभ्यां द्रौणिचूडामणिना सहादैधर्म्यसाम्योक्तेरुपमालङ्कारः।

(४१४) रुद्रभिक्षादानशौण्डपुरमथनमुक्तमुण्डशिरानाडिरुधिर-पूरणकपिलः कपालकर्पर इव च पैतामहः, (४१५) पितृवध-रुषितरामरागरचितः पृथुविकटकार्त्तवीर्य्यांसकूटकुट्टाककुठार-

(४१४) रुद्रेति।—रुद्रः,—भीषणः, भिक्षायाः,—प्रार्थितवस्तुनः इत्यर्थः, आदाने—ग्रहणे, यदा,—दाने—समर्पणे, भक्तानां वाञ्छितपरिपूरणे इत्यर्थः, शौण्डः,—तत्परः, यः पुरमथनः,—त्रिपुरारिः, हरः इति यावत्, तेन मुक्तं—परित्यक्तं, छेदनेन पातितमित्यर्थः, यत् मुण्डं—शिरः, ब्राह्ममिति भावः, तस्य शिराणां—सूक्ष्मनाडीनामित्यर्थः, नाडीनां—स्थूलशिराणां, रक्तवाहिनीनां धमनीनामित्यर्थः, रुधिरैः,—रक्तैः, पूरणेन—परिपूर्णतया, कपिलः,—पिङ्गलः, आरक्त इत्यर्थः, कपालकर्पर इव—कपालः,—शिरःकङ्काल एव, कर्परः,—अरावाऽऽकारपात्र-भेदः, कटाहविशेष इति वा, ("कर्परः स्यात् कपाले च भग्नभेदकटाहयोः" इति मेदिनी) स इव। पैतामहः,—ब्राह्मः, ब्रह्मणः शिरःकपाल इवेत्यर्थः। पुरा मेरु-शृङ्गे महर्षयः पितामहं परं तत्त्वं पप्रच्छुः, असौ तु महिमामायामोहितः आत्मानं सर्वोत्तमं ब्रह्मभूतमवादीत्; अथ नारायणांशजः क्रतुः क्रुद्धो आत्मानमेव सर्व्वकर्त्तार-मब्रवीत्; एवं तौ विवदमानौ प्रमाथशान् चतुर आचार्यान् पप्रच्छतुः। ते तु रुद्रमेव तथाभूतमब्रुवन्, तौ तु तच्छ्रुत्वा तं विनिन्दितुमारेभाते, ततस्ताभ्यन्तरे एकं परमाद्भुतं ज्योतिः प्रादुरभूत्, तद्दृष्ट्वा ब्रह्मणः पञ्चमं शिरः आवामभ्यन्तरे कः स्थानं विभर्त्तीत्युक्त्वा प्रजज्वाल। हिरण्यगर्भस्तु तं रुद्रं पुरुषं स्वभालस्थलादुद्भूतमवादीत्, तच्छ्रुत्वा कोपात् प्रभुरः कालभैरवं ससर्ज्ज, असौ तु वामाङ्गुलिनखाग्रेण विधेः पञ्चमं शिरः चकर्त्त। तच्च ब्रह्मशिरःकपालं हरस्य करं नामुञ्चत्। ततः कपालमोचने तीर्थे काश्यां ब्रह्म-कपालं तद्धस्तमुक्तमभवदिति काशीखण्डे एकचित्तेऽध्याये द्रष्टव्यम्। तथा हि,—"कपालं ब्रह्मणो रुद्रः सर्वेषामेव पश्यताम्। हस्तात् पतितमालोक्य ननर्त्त परया मुदा॥ विधेः कपालं नामुञ्चत् करमत्यन्तदुस्त्यजम्। हरस्य भगवतः क्वापि तत् काश्यां चणतोऽपतत्॥" इत्यादि। अत्र पैतामहरुधिराक्तशिरःकपालेन साकम् उपमाशिरोवैधर्म्यसाम्योक्तिरूपमालङ्कारः।

(४१५) पितृवधेति।—पितुः,—जनकस्य, जमदग्नेः इत्यर्थः, वधेन—हननेन, कार्त्तवीर्य्यकृतेन इति भावः, रुषितः,—कुपितः, यः रामः,—परशुरामः, तस्य रागेण—वीररौद्रात्मकेन, पितृवधजनितेन मात्सर्य्येण वा, असहिष्णुतया इत्यर्थः, ("रागस्तु मात्सर्य्ये लोहितादिषु" इति मेदिनी) रचितः,—कृतः। पृथ्विति।—

तृण्डतष्टदुष्टक्षत्रियकण्ठकुहर-रुधिरकुल्या-प्रणालमहस्र-पूरितो ह्रद इव दूररोधी रौधिरः, (४१६) भयनिगूढकरचरणमुण्ड-मण्डलाऽऽकृतिः गुरुगरुडनखपञ्जराक्षेपक्षपणक्षिप्तक्षतजोक्षितो व्यसुः विभावसुः कमठ इव च लोठ्यमानो नभसि

पृथुः,—महान्, पीवरः इत्यर्थः, विकटः,—उरुः, विशाल इत्यर्थः, ("विकटा वक्त्र-वाराह्यां विषमविकरालयोः" इति मेदिनी) यः कार्त्तवीर्यस्य—हैहयाधिपस्य, अंस-कूटः,—स्कन्धशिखरं, तस्य कृष्टाकः,—कृन्तकः, ["अल्पाभिक्तकृत्लयष्टङः षाकन्" (३।२।१५५ पा०) इति कृष्यतेः षाकन्], कुठारः,—परशुः, तस्य तुण्डं—मुखं, निशितधारेत्यर्थः, तेन तष्टाः,—तनूकृताः, त्वचिताः इत्यर्थः, निकृत्ताः इति यावत्, [तक्ष्णोतेः कार्श्यार्थकस्य निष्ठायां रूपम्। "तष्टत्वष्टौ तनूकृते" इत्यमरः] ये दुष्टाः,—दुर्वृत्ताः, क्षत्रियाः,—राजन्याः, तेषां कण्ठकुहराणां—गलरन्ध्राणां, रुधिराख्येव—रक्ताख्येव, कुल्या—अल्पा क्षुद्रिका सरित्, ("कुल्याऽल्पा क्षुद्रिका सरित्" इत्यमरः) तासां प्रणालसहस्रैः,—प्रवाहसमूहैः, पूरितः,—भरितः, ह्रदः,—अगाधजलाशयः ("तडागाधजलो ह्रदः" इत्यमरः); दूररोधी—दूरदेशव्यापी ; ["नन्दिग्रहि—" (३।१।१३४ पा०) इति कृञ्डेः कर्त्तरि णिनिः]। रौधिरः,—रुधिरमयः ; [रुधिरस्य विकार इत्यर्थे, "तस्य विकारः" (४।३।१३४ पा०) इत्यण्]। परशुरामो हि पितुः जमदग्नेः निहन्तुः कार्त्तवीर्यस्योपरि प्रकुप्य आदौ तं सान्ववायं निहत्य पश्चात् एकविंशतिकृत्वः निखिलमेव राजन्यं समूलघातं व्यधत्त, निहततद्रौधिरह्रदेन पितॄन् तर्पयामास चेति पौराणिकी कथाऽत्रानुसन्धेया। अत्र परशुरामनिहतक्षत्रिय-रुधिरमयह्रदेन साकम् उष्णांशोरवैधर्म्यसाम्योक्तिरूपमाऽलङ्कारः।

(४१६) भयेति।—भयेन—त्रासेन, गरुडदर्शनादिति भावः, निगूढं—सङ्कोचितं, यत् करचरणमुण्डं तेन मण्डला वर्त्तुला, आकृतिः,—अवयवो यस्य तथोक्तः। गुर्व्विति।—गुरुणा—महता, गरुडस्य—वैनतेयस्य, नखपञ्जरेण—नखर-सारविशेषेण इत्यर्थः, यः आक्षेपः,—आक्रमणम्, उत्क्षेपणम् इत्यर्थः, ततश्च क्षपणं—भूमौ प्रक्षेपः, तेन क्षिप्तैः,—निर्गलितैः, देहादिति भावः, क्षतजैः,—रक्तैः, ("रुधिरे रक्तलोहितास्रक्षतजक्षतजोक्षितम्" इत्यमरः) उक्षितः,—सिक्तः, संलिप्त इत्यर्थः। व्यसुः,—गतजीवितः, विगतप्राण इत्यर्थः, ("स्त्रियां भृत्वासवः प्राणाः" इत्यमरः) विभावसुः,—तदाख्यः, कमठः,—कच्छपः, ("कूर्म्मे कमठकच्छपौ" इत्यमरः) लोठ्यमानः,—लोठ्यमानः, नभसि—आकाशे। आसीत् पुरा विभावसुनाम

(४१७) अरुणगर्भमांसपिण्डाखण्ड इव च खण्ड्यमानमानीतः, (४१८) नियतकालातिपातदूयमानदाक्षायणीचित्तो धातुतट इव च सुमेरोः, (४१९) असुरबधाभिचारचरुपचनपिशुनः

कश्चित् महर्षिकल्पस्य भानुजः सुप्रतीको नाम ; असौ तु ज्यायसा भ्रात्रा सहैकत्र स्थातुं नेच्छत्, नित्यश्च एव धनविभागं कर्तुं भ्रातरमनुरुरोध ; विभक्ता भ्रातरः नूनमिवेऽभिहन्यन्ते इति ज्येष्ठेन प्रबोधितोऽपि कनिष्ठः यदा तद्वचनं नाभिनन्दितवान्, तदा त्वसौ कनीयांसं सुप्रतीकं हस्तिनमवाप्नुह्येत्यभिशप्तवान्, कनिष्ठोऽपि ज्येष्ठ विभावसुं कच्छपत्वं लभस्वेति अभिशशाप । एवं तौ समरसि अर्थार्थिपूर्ववैरात नित्यशः विवदमानौ गरुडेन भक्षितौ इति ; तथा चोक्तं भारते आदिपर्व्वणि विंशाध्याये, —"तावुभौ युद्धसम्मत्तौ परस्परवधैषिणौ ।.....भक्षयामास गरुडौ तावुभौ गजकच्छपौ ॥" इति । अत्र गरुडनिष्टतरक्तोपलिप्तकच्छपेन सह उपमानोपमेयवैधर्म्यसाम्योक्तेः रूपमाऽलङ्कारः ।

(४१७) अरुणेति ।—अरुणं—रक्तं, गर्भस्य—कुक्षेः, अभ्यन्तरस्य इत्यर्थः, भ्रूणस्य वा, ("गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पलमकरण्डके" इति मेदिनी) मांसपिण्डं—पिशितखण्डं यस्य तथाभूतः, अण्ड इव—डिम्ब इव । खण्ड्यमानं—खण्डतां, छिन्नतामित्यर्थः, ["खण्ड्यमानम्" इत्यत्र "खण्ड्यमानम्" इति पाठे,—खण्डपरिमाणं, खण्डस्वरूपमित्यर्थः] ; आनीतः,—प्रापितः ; अर्द्धस्य अल्पगमनात् खण्ड्यितवद्दृश्यमान इति भावः । खण्ड्यिताऽरुणगर्भमांसपिण्डाखण्डेन साकमुपमानोपमेयवैधर्म्यसाम्योक्तेरुपमाऽलङ्कारः ।

(४१८) नियतेति ।—नियतकालस्य—कल्पान्तस्य, अतिपातेन—आगमेन ; यद्वा,—नियतस्य—नित्यस्य, कालस्य—महाकालस्य, ("कालो मृत्यौ महाकाले समये यमकृष्णयोः" इति मेदिनी) सर्व्वभूतसंहारकस्येत्यर्थः, अतिपातः,—अतिशयेन पतनम्, अत्यर्थमागमनमित्यर्थः, तेन : अथवा,—नियतः,—शास्त्रविहितः, यः कालः, —पूजनसमयः, यस्मिन् काले देव्याः पूजा शास्त्रकृद्भिरुपदिष्टा तथाविधसमयः इति यावत्, तस्य अतिपातः,—उल्लङ्घनं, तेन दूयमाना—सन्तप्यमाना, सृष्टिध्वंसकरणादिति भावः, दाक्षायणी—दक्षकन्या, कालीत्यर्थः, संहाररात्रिरिति भावः ; [दक्षस्यापत्यं स्त्री इत्यर्थे दक्षशब्दात् फिञ् ङीष् च] ; तथा खिन्नः,—विध्वंसितः, धातुतटः, —गैरिकप्रस्थ इव, ("धातुर्मनःशिलाद्रेर्गैरिकन्तु विशेषतः" इत्यमरः) । श्लेषोत्थापितदाक्षायणीखिन्नधातुतटेन साकमुपमानोपमेयवैधर्म्यसाम्योक्तेरुपमाऽलङ्कारः ।

(४१९) असुरेति ।—असुराणां—दानवानां, वधार्थं—नाशार्थम्, अभिचारः, —आथर्व्वणिककर्मणादिक्रियाविशेषः, तस्य चरुः,—पायसविशेषः, तस्य पचनं—

शोणितक्काथकषायितकुक्षिः अतिविशङ्कटः कटाह इव च वाहस्यत्यः, (४२०) सद्यो गलितगजदानवदेहलोहितोपलेपभीषणो मुखमण्डलाऽऽभोग इव महाभैरवस्य मुहूर्त्तम् अदृश्यत। (४२१) जलनिधिजलप्रतिबिम्बितरविबिम्बराजिभास्वराभ्रावलम्बिनी गृहीतादृमांसभारा इव चाभासे वासरावसानवेला

पाकः, तस्य पिशुनः,—सूचकः, रात्रावेवाभिचारादिकरणप्रसिद्धेः। शोणितेति।—शोणितस्य—रक्तस्य, क्काथेन—निष्पाकेन, तापेन घनीकरणेन इत्यर्थः, ("क्काथः स्यादतिदुःखेऽपि निष्पाके च द्रवस्य च" इति मेदिनी) कषायितः,—रक्तीकृतः, कुक्षिः,—अभ्यन्तरं यस्य तथाभूतः, अतिविशङ्कटः,—अतिभीषणः, ["वेः शालक्कटचौ" (५।२।२८ पा०) इति शङ्कटच्प्रत्ययः] रक्तोपलिप्तत्वादिति भावः। कटाह इव—स्थाल्यविशेष इव। वाहस्यत्यः,—वहस्यतेरयं वाहस्यत्यः। पुरा देवासुरयुद्धावसरे देवगुरुः बृहस्पतिरसुरवधसाधनाय आथर्व्वणकाभिचारक्रियानकरोदिति पौराणिकी कथाऽत्रानुसन्धेया। अत्रासुररक्तोपलिप्तरक्तकटाहेन साकमुषाग्नेरवैधर्म्यसाम्योक्तेरुपमाऽलङ्कारः।

(४२०) सद्य इति।—सद्यः,—तत्क्षणं, निपातक्षण एव इत्यर्थः, गलितं—निःसृतं, गजदानवस्य—गजासुरस्य, देहात्—शरीरात्, यत् लोहितं—रक्तं, तस्य उपलेपेन—अनुलेपनेन, भीषणः,—भयः। मुखेति।—मुखमण्डलस्य—वदनबिम्बस्य, आभोग इव—आयतनमिव। महाभैरवस्य—महारुद्रस्य। अदृश्यत—अवलोक्यत; पूर्व्वोक्तविध उषाराज्ञीरिति पूर्व्वेण सम्बन्धः। महादेवकृतगजासुरनिधनवार्त्ता काशीखण्डे अष्टषष्टितमेऽध्याये उपवर्णिता; तथा हि,—"महिषासुरपुत्रोऽसौ समायाति गजासुरः। प्रमथान् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः॥.....ततस्त्रियूलहस्तेकमायान्तं दैत्यपुङ्गवम्। विज्ञायाबध्यमन्येन शूलेनाभिजघान तम्। प्रोतस्तेन त्रिशूलेन स च दैत्यो गजासुरः। कृत्तीकृतमिवात्मानं मन्यमानो जगौ हरम्॥" इति। अत्र गजदानवरक्तोपलिप्तमहाभैरवमुखमण्डलेन साकमुषाग्नेरवैधर्म्यसाम्योक्तेरुपमाऽलङ्कारः; एकस्यैवोषाग्नेः भूयसामुपमानानां दर्शनादियं मालारूपा वेदितव्या;—"मालोपमा यदेकस्योपमानं बहु दृश्यते" इति दर्पणोक्तेः।

(४२१) जलनिधीति।—जलनिधेः,—समुद्रस्य, जलेषु—सलिलेषु, प्रतिबिम्बिता—प्रतिफलिता, या रविबिम्बराजिः,—सूर्य्यमण्डलच्छायापङ्क्तिः, तया भास्वरं—दीप्यमानं, यत् अभ्रम्—आकाशं मेघो वा, तदवलम्बिनी—तदाश्रयिणी, अत एव

वेतालनिभा। (४२२) ज्वलत्सन्ध्यारागरज्यमानजल-प्रवाहः पुनरिव (४२३) पुराणपुरुषपोवरोरुसम्पुटोपिष्टमधु-कैटभरुधिरपटलपाटलवपुः अभवत् अधिपतिः अर्णसाम्।

गृहीतः,—धृतः, आर्द्रः,—सरसः, तत्क्षणनिकृत्त इति यावत्, मांसभारः,—पिञ्जितरात्रिः यया तथाभूतेव, वासरावसानवेलाः—सन्ध्याकालः, कृष्णवर्णा इति भावः; वेतालनिभा—वेतालसदृशी, आबभासे—बभूवे; वेतालीऽपि आर्द्रमांसभारं वहतीति भावः। अत्र समुद्रतीरे प्रतिफलितया, लौहित्यात् आर्द्रत्वेन प्रतीयमानया, सायङ्कालिकसन्ध्यस्य अरुणतया, क्वचित् क्वचित् श्यामरुचेः मेघपङ्क्तेः आरक्तौज्ज्वल्यतया, ईषदन्धकारीभूतायाः वासरावसानवेलायाः गृहीतार्द्रमांसभारवेतालसादृश्य-प्रतीतेः उपमालङ्कारः मुख्यः एव।

(४२२) ज्वलदिति।—ज्वलता—राजमानेन, सन्ध्यारागेण—सायङ्कालिका-रुणवर्णेन, रज्यमानः,—रुच्यमाणः, प्रतिफल्यमानतया रक्तौज्ज्वल्यमाणः इत्यर्थः, जल-प्रवाहः,—सलिलराशिः यस्य तथाभूतः।

(४२३) पुराणेति।—पुराणः,—सनातनः, पुरुषः,—पुमान्, नारायण इत्यर्थः, तस्य पोवरे—स्थूले, ऊरुसम्पुटे—सक्थ्यपधारे, सक्थ्ययुगले वा, उपिष्टौ,—निष्कृत्तौरित्यर्थः, सुदर्शनेन इति भावः, मधुकैटभौ,—तदाख्यौ असुरयुगलौ, रुधिरपटलेन—रक्तसमूहेन, पाटलम्—आरक्तं, वपुः,—शरीरं यस्य तथाभूतः। अर्णसां—जलानां, ("सलिलं कमलं जलम्। अम्भोऽर्णोऽम्बु—" इत्यमरः) अधि-पतिः,—प्रभुः, समुद्रः इत्यर्थः; पुनरभवादिव—प्राग्वदजायतेवेत्यर्थः; अर्णसामधि-पतिः पुराणपुरुषपाटलवपुष्कं बभूवेवेति भावः। अत्र उपमेयीभूते अर्णसामधिपतौ पुराणपुरुषमधुकैटभपाटलवपुषः उपमानभूतस्य तादात्म्याध्यासादुत्कटैककोटिक-संशयोदयादुत्प्रेक्षालङ्कारः। सृष्टिप्रारम्भे जलनिधौ शयानस्य भगवतो नारायणस्य नाभिकमलाद् ब्रह्मा समुदभवत्। तदानीञ्च तस्यैव भगवतः कर्णमलात् द्वावसुरौ मधुः कैटभश्च समुत्पद्य सुप्तोत्थया नाभिकमलस्थितं ब्रह्माणम् अत्तुम् उद्यतौ; तदव-लोक्य भीतेन ब्रह्मणा स्तुता योगनिद्रा विष्णोः शरीरं तत्याज। ततश्च समुत्थाय भगवान् तौ तथाविधौ दृष्ट्वा पञ्चवर्षसहस्रं ताभ्यां बाहुयुद्धं कृत्वा तथोरेव सन्तुष्टयोर्वरं दत्त्वा ऊरुदेशे निधाय चक्रेण निकृतवानिति मार्कण्डेयपुराणे—"तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ। विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ॥" इत्यादि देवीमाहात्म्यम् अत्र अनुसन्धेयम्।

(४२४) अवसिते सन्ध्यासमये समनन्तरम् (४२५) अपरिमितयशःपानतृषिताय मुक्ताशैलशिलाचषक इव निजकुलकीर्त्या, (४२६) कृतयुगकरणोद्यताय आदिराजराजतशासनमुद्रानिवेश इव राज्यश्रिया, सकलद्वीपजिगीषाचलिताय श्वेतद्वीपदूत इव च आयत्या, (४२७) श्वेतभानुः उपानीयत निशया नरेन्द्राय इति।

इति श्रीबाणभट्टकृते हर्षचरिते राज्यश्रीप्राप्तिर्नाम
अष्टम उच्छासः ॥ ८ ॥

(४२४) अवसिते—समाप्ति गते, अतिक्रान्ते इत्यर्थः।

(४२५) अपरिमितेति।—अपरिमितानि—प्रभूतानि, यशांसि—कीर्त्तयः, तेषां पानाय—पेयविषयीकरणाय, अधिगमायेत्यर्थः, तृषितः,—तृष्णार्त्तः, लुब्ध इत्यर्थः, तस्मै, नरेन्द्राय इत्यर्थेनान्वयः, सर्व्वदिग्विजयेन इति भावः। मुक्ताशैलशिलाचषक इव—मुक्तागिरिप्रस्तरखण्डरूपपानपात्रमिव, ("चषकोऽस्त्री पानपात्रम्" इत्यमरः)।

(४२६) कृतेति।—कृतं—सत्यं, युगं, तस्य करणे—विधाने, पुनः प्रवर्त्तने इत्यर्थः, पापाचारिणः उन्मूल्य चतुर्थाद्धर्ममंस्थापनद्वारा इति भावः, उद्यतः,—प्रवृत्तः, तस्मै। आदिराजेति।—आदिराजस्य—प्रथमनृपतेः, मनोः वैवस्वतस्य वैवस्वत पृथोर्वा इत्यर्थः, राजती—रजतनिर्म्मिता, शासनमुद्रा—राज्याधिकारमुद्रा, राजनामाङ्कितपत्र्यर्थोत्पादकमुद्राविशेषः इत्यर्थः, तस्याः निवेश इव—मुद्रितावयव इव। राज्यश्रिया—राजलक्ष्म्या। सकलेति।—सकलानां—सर्वेषां, समानामष्टादशानां वा इत्यर्थः, द्वीपानां—जम्बूशाकादीनां समन्ताज्जलवेष्टितभूभागानां, जिगीषया—जयाऽऽकाङ्क्षया, चलितः,—प्रस्थितः, तस्मै। श्वेतद्वीपदूतः,—श्वेतद्वीपस्य—अष्टादशद्वीपान्तर्गतद्वीपभेदस्य, दूतः,—वार्त्तावहः, तद्देशवासिनां सन्देशमादाय आगतः इति भावः; चन्द्रस्य अतिशुभ्रकान्तित्वात् श्वेतद्वीपदूतत्वौपम्यं सुसङ्गतमेवेति। आयत्या—उत्तरकालीन, ("उत्तरः काल: आयतिः" इत्यमरः) आगामिन्या शुभया नियत्या इत्यर्थः, दैवमेवानुकूलं श्वेतद्वीपयशसार्थं तद्देशीयदूतं हर्षाय प्रेरितवदिति निष्कर्षः।

(४२७) श्वेतभानुः—शुभांशुः, चन्द्रः इति यावत्। निशया—रजन्या, नरेन्द्राय—हर्षाय, उपानीयत—प्राप्यत, उपायनीकृत इति यावत्; [नयतेर्हि-कर्म्मकलेऽपि उपपूर्व्वकस्य तस्य उपहारकरणार्थकत्वेन सम्प्रदानरूपत्वात् "नरेन्द्राय"

इत्यत्र चतुर्थी, न तु द्वितीयेति वेदितव्यम्]। निशा श्वेतभानुं निजकुलकीर्त्तिसमर्पितमुक्ताशैलशिलाचषकमिव, राजलक्ष्मीसमर्पिताऽऽदिराजराज्यशासनमुद्रानिवेशमिव, आयतिप्रदत्तश्वेतद्वीपदूतमिव च नरेन्द्रमानयदिति निष्कर्षः; चन्द्रोदयोऽभूदिति भावः। अत्रैकस्मिन्नेव श्वेतभानौ भूयसां तथाविधचषकादीनामवैधर्म्यसाम्यान्मालोपमाऽलङ्कारः।

इत्यग्नीषशास्त्राटवीसञ्चरणपञ्चाननेन बाल्यवंशावतंसेन पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीमज्जीवानन्दविद्यासागरभट्टाचार्येण विरचितायां, तदात्मजाभ्यां पण्डितश्रीमदाशुबोधविद्याभूषण-पण्डितश्रीमन्नित्यबोध-विद्यारत्नाभ्यां परिवर्द्धितायां प्रतिसंस्कृतायाञ्चामलाख्यायां श्रीहर्षचरितव्याख्यायां अष्टम उच्छ्वासः ॥ ८ ॥



लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
Lal Bahadur Shastri National Academy of Administration Library
मसूरी
MUSSOORIE

अवाप्ति सं० 122702
Acc. No.....

कृपया इस पुस्तक को निम्न लिखित दिनांक या उससे पहले वापस कर दें।

Please return this book on or before the date last stamped below.

दिनांक Date	उधारकर्ता की संख्या Borrower's No.	दिनांक Date	उधारकर्ता की संख्या Borrower's No.


122702

Sans
891.21
बाण
वर्ग सं.
Class No.....
अवाप्ति सं० ~~14342~~
ACC. No.....
पुस्तक सं.
Book No.....
लेखक बाणभट्ट
Author.....
शीर्षक श्री हर्षचरितम् ।
Title.....
.....

891.21 LIBRARY 14342
LAL BAHADUR SHASTRI
National Academy of Administration
बाण MUSSOORIE

Accession No. 122702

1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discretion of the Librarian.
4. Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.
5. Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.

Help to keep this book fresh, clean & moving